AMARAKOS'A

[I]

WITH THE UNPUBLISHED SOUTH INDIAN COMMENTARIES

AMARAPADAVIVṚTI OF LIṄGAYASŪRIN

AND THE

AMARAPADAPĀRIJĀTA OF MALLINĀTHA

Critically edited with Introduction by

PROFESSOR A. A. RAMANATHAN

THE ADYAR LIBRARY AND RESEARCH CENTRE

THE ADYAR LIBRARY SERIES

VOLUME ONE HUNDRED AND ONE

अमरकोशः

दाक्षिणात्यव्याख्योपेतः

AMARAKOS'A

[1]

WITH THE UNPUBLISHED SOUTH INDIAN COMMENTARIES

AMARAPADAVIVṚTI OF LIṄGAYASŪRIN

AND THE

AMARAPADAPĀRIJĀTA OF MALLINĀTHA

Critically edited with Introduction by

PROFESSOR A. A. RAMANATHAN

THE ADYAR LIBRARY AND RESEARCH CENTRE

SBN 0-7229-7455-8
ISBN 0-8356-7455-X

PRINTED IN INDIA

At the Vasanta Press, The Theosophical Society,
Adyar, Madras 20

ABBREVIATIONS

Abhi. Cint.	*Abhidhānacintāmaṇi* by Hemacandra, CSS, 1964
Abhi. Saṃ.	*Abhidhānasaṃgraha*, NSP, 1889
Ak.	*Amarakośa*
ALB	*The Adyar Library Bulletin*
ALS	Adyar Library Series
Am.	*Amaramaṇḍana* by Kṛṣṇasūri, DCPRI, Poona, 1949
Bhānujī.	Bhānujī Dīkṣita
BSS	Bombay Sanskrit Series
Comm.	Commentary
CSS	Chowkhamba Sanskrit Series, Varanasi.
DCPRI	Deccan College Post-graduate and Research Institute, Poona.
GOS	Gaekwad Oriental Series, Baroda
IHQ	*Indian Historical Quarterly*, Calcutta
JOR	*Journal of Oriental Research*, Madras
Kir.	*Kirātārjunīyam*
Kk.	*Kalpadrukośa*, GOS 42, 1928
Kumāra.	*Kumārasaṃbhava*
Malli.	Mallinātha
Nām.	*Nāmaliṅgānuśāsana*
NCC	*New Catalogus Catalogorum*, University of Madras
NSP	Nirnaya Sagar Press, Bombay
OBA	Oriental Book Agency, Poona
Pt_2	*Amarakośa* with *Liṅgābhaṭṭīyam* and Telugu Comm., Vavilla Press, Madras, 1915
Ragh.	*Raghuvaṃśa*
Sūrin	Liṅgayasūrin
Svāmin	Kṣīrasvāmin
TSS	Trivandrum Sanskrit Series
Uttara.	*Uttararāmacarita*
Viśva.	*Viśvaprakāśa*, CSS, 1911
अ. द्र.	अभिधानद्रव्यावली (धन्वन्तरीयनिघण्टुः)

अने. स.	अनेकार्थसमुच्चयः (शाश्वतकोशः)
अ. मा.	अभिधानरत्नमाला (हलायुधः)
काद.	कादम्बरी
काम. नीति.	कामन्दकीयनीतिशास्त्रम्
किरा.	किरातार्जुनीयम्
कु. सं.	कुमारसंभवम्
टी. स.	टीकासर्वस्वम्
द्विसं.	द्विसंधानकाव्यम् (राघवपाण्डवीयम्)
ध. नि.	धन्वन्तरीयनिघण्टुः
नी. श.	नीतिशतकम्
भा. दी.	भानुजीदीक्षितीयम्
भो. प्र.	भोजप्रबन्धः
म. भार.	महाभारतम्
म. स्मृ.	मनुस्मृतिः
मेघ.	मेघदूतम्
रघु.	रघुवंशम्
रामा.	रामायणम्
विक्रम.	विक्रमोर्वशीयम्
वै. प.	वैराग्यपञ्चकम्
शिशु.	शिशुपालवधम्
सौ. ल.	सौन्दर्यलहरी
सं. म.	संगीतमकरन्दः

PREFACE

THE present critical edition of the *Amarakośa* with South Indian commentaries is based on the following MSS.:

MSS. COLLATED FOR THE *Amarapadavivṛti* OF LIṄGAYASŪRIN

1. A — Adyar Library. Palm-leaf No. 73403. 33 fo. 47.5 × 3.7 cm. 9 lines in a page. 66 to 75 letters in a line. Grantha. Old. Slightly injured. Clear writing. First Kāṇḍa complete.
2. B_1 — Adyar Library. Palm-leaf No. 68733. 89 fo. 37.5 × 3 cm. 8 lines in a page. 50 letters in a line. Grantha. Old. Injured. Good writing. First Kāṇḍa complete and Second Kāṇḍa incomplete.
3. B_2 — Adyar Library. Palm-leaf No. 75424. 62 fo. 31 × 4 cm. 9 lines in a page. 50 letters in a line. Grantha. Old. Much injured. Good writing. First Kāṇḍa complete.
4. C — Adyar Library. Palm-leaf No. 68734. 35 fo. 31.5 × 4 cm. 8 lines in a page. 42 letters in a line. Grantha. Old. Slightly injured. Good writing. Contains the first Kāṇḍa breaking off in the Digvarga.
5. D_1 — Adyar Library. Palm-leaf No. 70545. 73 fo. 41.5 × 4 cm. 7 lines in a page. 56 letters in a line. Grantha. Old. Injured. Good writing. First Kāṇḍa complete. The scribe adds:

सर्वजिन्नामसंवत्सरे मकरमासे षोडशदिने भानुवासरे दक्षिणद्वारकायां दक्षिणविशिखायां श्रीनिवासाचार्येण लिखितम् ।

6. D_2 Adyar Library. Palm-leaf No.73726. 117 fo. 39.4 × 2.3 cm. 9 lines in a page. 66 letters in a line. Telugu. Old. Slightly injured. Good writing. Breaks off in the Vaiśyavarga in the second Kāṇḍa. Date of copying: Wednesday, 12th day of the dark fortnight of the Phālguna month in the year Prabhava.

7. F_1 Adyar Library. Palm-leaf No. 68735. 12 fo. 37.5 × 3.6 cm. 10 lines in a page. 56 letters in a line. Grantha. Old. Good condition. Clear writing. Second Kāṇḍa incomplete ending in the middle of the Vanauṣadhivarga. The first leaf contains a few lines from the beginning of the first Kāṇḍa.

8. F_2 Tirupati. Palm-leaf No. 1958. 185 fo. 40.2 × 3.1 cm. 7 lines in a page. 67 letters in a line. Telugu. Old. Good writing. Second Kāṇḍa with Telugu comm.

9. G Adyar Library. Palm-leaf No. 68736. 8 fo. 38 × 4 cm. 10 lines in a page. 53 letters in a line. Grantha. Old. Slightly injured. Good writing. Contains a fragment of the second Kāṇḍa. Begins with *oṣadhyo jātimātre syuḥ*.

10. I Adyar Library. Palm-leaf No. 68731. 169 fo. 37 × 2.7 cm. 7 lines in a page. 66 letters in a line. Telugu. Old. Much injured. Clear writing. Contains fragments of the first and second Kāṇḍa-s. Begins with v. 7. Extra leaves found for pp. 4 and 5.

11. J_1 Adyar Library. Palm-leaf No. 71275. 60 fo. 37 × 3.4 cm. 8 to 9 lines in a page. 60 letters

in a line. Telugu. Old. Injured. Good writing. Contains the third Kāṇḍa only.

12. J_2 Mysore. Palm-leaf No. 1770. 90 fo. 40×3 cm. 8 lines in a page. 77 letters in a line. Nandi-nāgarī. Old. Much injured. Good writing. Contains the second and third Kāṇḍa-s.

13. K_1 Adyar Library. Palm-leaf No. 74223. 42 fo. 44×3.7 cm. 7 lines in a page. 70 letters in a line. Telugu. Old. Injured. Good writing. Contains the first Kāṇḍa incomplete as the last fo. is missing. The fly-leaf contains 7 stanzas of salutation to various gods.

14. K_2 Government Oriental MSS. Library, Madras. Paper No. D 1697. 414 pp. 24 lines in a page. Telugu. Injured. Complete.

15. K_3 Government Oriental MSS. Library, Madras. Palm-leaf No. R 1260. 252 fo. 43×3.2 cm. 8 lines in a page. Telugu. Slightly injured. Complete.

16. K_4 Adyar Library. Palm-leaf No. 68732. 119 fo. 42×3.6 cm. 6 lines in a page. 58 letters in a line. Telugu. Old. Injured. Good writing. Third Kāṇḍa complete. The scribe adds:

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया। अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

17. K_5 Tanjavur. Palm-leaf No. 4960. 148 fo. 43×3.5 cm. 6 to 10 lines in a page. Grantha. Old. Slightly injured. Good writing. Complete.

18. K_6 Adyar Library. Palm-leaf No. 73922. 156 fo. 42×3.2 cm. 7 lines in a page. 58 letters in a line. Telugu. Old. Injured. Good writing. Contains the second and third Kāṇḍa-s complete. The scribe adds:

पार्थिवाब्दे नभोमाससितकामदिने ददौ । सीताराम-
प्रभोर्लिङ्गाभट्टीयं केशवद्विजः ॥

19. O Adyar Library. Palm-leaf No. 74124. 100 fo. 42 × 3.5 cm. 6 lines in a page. 56 letters in a line. Telugu. Old. Injured. Good writing. Contains the second and third Kāṇḍa-s complete. Date of copying: Monday, 13th day of the bright fortnight of the month of Puṣya in the year Virodhikṛt.

20. T Adyar Library. Palm-leaf No. 73425. 42 fo. 42.5 × 3 cm. 8 lines in a page. 60 letters in a line. Grantha. Old. Slightly injured. Good writing. Contains the first Kāṇḍa complete.

21. U Mysore. Palm-leaf No. 586. 64 fo. 40.5 × 3 cm. 5 lines in a page. 60 to 62 letters in a line. Telugu. Slightly injured. First Kāṇḍa complete.

22. W_1 Trivandrum. Paper No. 5231. 50 fo. 30.6 × 15 cm. 11 lines in a page. 36 letters in a line. Devanāgarī. Good condition. First Kāṇḍa complete.

23. W_2 Trivandrum. Paper No. 1228. 393 pp. 28 × 22 cm. 20 lines in a page. 25 letters in a line. Devanāgarī. Good condition. Contains the first and second Kāṇḍa-s. Breaks off in the middle of Śūdravarga. Date of copying: 17.10.1102 (M.E.).

24. Y Tirupati. Palm-leaf No. 1907. 79 fo. 46 × 2.5 cm. 5 lines in a page. 74 letters in a line. Grantha. Old. Injured. Good writing. First Kāṇḍa complete.

25. Z_1 Tirupati. Palm-leaf No. 4231. 79 fo. 38.6 × 3.1 cm. 7 lines in a page. 61 letters in a line.

Telugu. Old. Fairly good condition. Third Kāṇḍa complete.

MSS. Collated for the *Amarapadapārijāta* of Mallinātha

26. A_1 Adyar Library. Palm-leaf No. 68740. 46 × 3 cm. 7 lines in a page. 90 letters in a line. Telugu. Old. Injured. Good writing. Complete in three Kāṇḍa-s. Full of scribal errors.

27. B_3 Government Oriental MSS. Library, Madras. Palm-leaf No. D 1696. 333 fo. 7 lines in a page. Telugu. Good condition. Appearance new. Fo. 23 is numbered 61. The succeeding leaves are numbered in order thereafter. Complete.

28. B_4 Government Oriental MSS. Library, Madras. Palm-leaf. No. R 1930. 58 fo. 6 lines in a page. Telugu. Good condition. Fo. 1, 37 to 39 and 56 are left blank. Contains the first Kāṇḍa complete.

29. C_1 Tirupati. Palm-leaf No. 4176. 41 fo. 47 × 3.8 cm. 8 lines in a page. 82 letters in a line. Telugu. Worm-eaten. Third Kāṇḍa complete.

The learned commentary of Bommagaṇṭi Appayārya was available only for the third Kāṇḍa. It will be printed in a further volume and the MSS. collated for the third Kāṇḍa will be described in that volume.

We express our thanks to the Ministry of Education, Government of India, for their grant-in-aid towards the publication of this volume. We are also thankful to the authorities of the Government Oriental MSS. Library, Madras; the Tanjore Maharaja Serfoji's Sarasvati Mahal Library; The Oriental Research Institute, University of Mysore;

The Oriental Research Institute and MSS. Library, University of Kerala, Trivandrum; and Sri Venkateswara University Oriental Research Institute, Tirupati, for lending their MSS. Dr. V. Raghavan and Dr. K. Kunjunni Raja, Advisers to the Adyar Library and Research Centre, rendered help in the preparation of this work in various ways which we gratefully acknowledge. Sri K. T. Venkatarama Sarma helped in the collation of the first Kāṇḍa and the preparation of the index of authors and works and Pandit T. H. Visvanathan read the proofs and saw the work through the press along with the editor.

July 1971.

RADHA BURNIER
Director,
Adyar Library and Research Centre

CONTENTS

		PAGE
Abbreviations	..	v
Preface	..	vii
Introduction	..	xv
प्रथमकाण्डः	..	**१–१८४**
१. स्वर्गवर्गः	..	१–५०
२. व्योमवर्गः	..	५०–१
३. दिग्वर्गः	..	५१–७३
४. कालवर्गः	..	७३–९१
५. धीवर्गः	..	९१–१०२
६. वाग्वर्गः	..	१०२–१७
७. शब्दादिवर्गः	..	११७–९
८. नाट्यवर्गः	..	१२०–४५
९. पातालवर्गः	..	१४६–८
१०. भोगिवर्गः	..	१४८–५३
११. नरकवर्गः	..	१५३–५
१२. वारिवर्गः	..	१५६–८४
द्वितीयकाण्डः	..	**१८५–६४८**
१. भूमिवर्गः	..	१८५–९४
२. पुरवर्गः	..	१९५–२०९
३. शैलवर्गः	..	२०९–१४
४. वनौषधिवर्गः	..	२१५–३२४
५. सिंहादिवर्गः	..	३२४–६१

		PAGE
६.	मनुष्यवर्गः	.. ३६२–४५०
७.	ब्रह्मवर्गः	.. ४५०–८४
८.	क्षत्रवर्गः	.. ४८४–५१३
९.	वैश्यवर्गः	.. ५१३–६२०
१०.	शूद्रवर्गः	.. ६२१–४८

INTRODUCTION

THE *Nāmaliṅgānuśāsana*, or the *Amarakośa* as it is popularly called after the name of its author Amarasiṃha, is the most celebrated and authoritative ancient lexicon in the Sanskrit language. Intimate acquaintance with the *Amarakośa* was considered as an essential requisite for a Sanskrit scholar. It is the lexicon most profusely quoted by the commentators on Sanskrit literature. It is concise, comprehensive and indisputably the most memorized dictionary in the world.[1] Its position is similar to that of the *Concise Oxford Dictionary* in English, as most people refer to it and only some advanced scholars have the need to look into more elaborate lexicons. There is hardly any Sanskrit scholar worth the name who is not acquainted with some line or other of this *kośa*.

It is said that the work of Amara is *sanātana* (perpetual or most ancient): *amaro 'yaṃ sanātanaḥ*.[2] No greater tribute can be paid to his thorough mastery of the grammar of Pāṇini than the popular humorous saying that he robbed all the authoritative interpretations of Patañjali's *Mahābhāṣya*:

अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरत् ।[3]

Malli. says in one of his concluding verses at the end of Kāṇḍa III that the immortality of Amara's *Nāmaliṅgānuśāsana* is assured as this faultless work will last as long as the moon and the stars shine in the sky:

कवेरमरसिंहस्य कृतिरेषा सुनिर्मला ।
आचन्द्रतारकं स्थेयान्नामलिङ्गानुशासनम् ॥

[1] *Ak.* is committed to memory at an early age by pupils.
[2] *Ak.*, BSS, 1886, Introd. p. 1.
[3] *Ak.*, NSP, Bombay 1905, p. 1.

In the beginning of the *Dharaṇikośa* (12th cent.), in verses 2 and 4 respectively, are to be found '*yasya jñānadayāsindhoḥ*', the very beginning of the *Ak.*, and '*samāhṛtyānyatantrāṇi*' (v. 2).[1]

Owing to this popularity, numerous commentaries have been written on it in Sanskrit as well as the regional languages of India.[2] It was translated into Chinese by Guṇarāta of Ujjayinī in the 6th cent. A.D.[3] In Italy, the text in Grantha script with an Italian translation was published in 1798.[4] An edition in French appeared in two volumes in Paris (1839, 1845).[5] The *kośa* was studied in Tibet also, for there is a Tibetan version of it published in 1912.[6] Thus the literature connected with the *Ak.* forms a literature by itself (See *New Catalogus Catalogorum*, vol. 1 (rev.), pp. 318-32).

The earliest beginnings of lexicographical literature in Sanskrit are the Nighaṇṭu-s. They are a collection of Vedic words, intended mainly for helping the interpretation of Vedic texts. The *Nirukta* of Yāska, who is considered older than Pāṇini (4th cent. B.C., Keith), is a commentary on the Nighaṇṭu-s and the most important work of this class. We find in it the derivation and explanation of many

[1] Ed. DCPRI, Poona 1968, p. 1.

[2] The principal eds. are

(*a*) *Ak.* with comm. of Maheśvarā, ed. V. Jhalakikar and Dr. R. G. Bhandarkar, BSS, 1886.

(*b*) *Nām.*, ed. Anundoram Borooah (incomplete), Berhampore 1887.

(*c*) *Nām.* with comm. of Kṣīrasvāmin, ed. V. G. Oka, Poona 1913.

(*d*) *Nām.*, rev. ed., OBA, Poona 1941.

(*e*) *Ak.* with comm. of Bhānujī Dīkṣita, NSP, Bombay 1905.

(*f*) *Nām.* with comm. of Sarvānanda, *Ṭīkāsarvasva*, TSS 38, 43, 51, 52.

[3] Max Müller, *India: What can It Teach Us?*, p. 328.

[4] *NCC*, vol. I (rev.), ed. V. Raghavan, p. 324.

[5] ibid.

[6] Ed. S. C. Vidyābhūṣaṇa, Bibliotheca Indica, 1912.

Vedic words, and it may thus be considered as the ancestor of the later lexicographical works.[1] But whereas the Nighaṇṭu-s contained not only nominal forms but also verbal ones, the later *kośa-s* restricted themselves to the nominal forms and the indeclinables. Further, the Nighaṇṭu-s confined themselves to the Veda-s,[2] whereas the *kośa-s* dealt with words in classical literature. As in the case of other ancient and mediaeval technical works in India, the *kośa-s* were composed in verse so that they could be committed to memory with comparative ease.

Even within the classical period, Amara had a number of predecessors in the field. Kṣīrasvāmin (11th cent.) mentions that Amara was confused by Bhāguri's identification of a class of prickly nightshade, Nidigdhikā, with Bṛhatī whereas the two are clearly distinct plants.

बृहती तु निदिग्धिकेति भागुरिवाक्याद् ग्रन्थकृद् भ्रान्तः; यतोऽनयोर्महान् भेदः।[3]

In the Vaiśya-varga (p. 148) we meet with the remark of Kṣīrasvāmin that Mālākāra was led astray by mistaking *sara* for *śara* in Bhāguri's statement, *etac ca drapsam śaram* and that Amarasiṃha was in his turn misled by the latter. It is thus clear that in the opinion of Kṣīrasvāmin, Bhāguri and Mālākāra preceded Amarasiṃha.[4] Amara himself says in the beginning of his work that he had collected together a number of lexicons then available: *samāhṛtyānya-tantrāṇi* (p. 3).

There is an enumeration of twenty-six *kośa-s* and authors of lexicons, among whom Amara is called *sanātana*.[5] This enumeration is welcome, but the predecessors of Amara such

[1] K. Kunjunni Raja, *Indian Theories of Meaning*, ALS 91, p. 33.

[2] Keith, *History* of *Skt. Literature*, p. 412.

[3] *Ak.*, Poona ed. 1941, p. 104.

[4] *Ak.*, K. G. Oka's ed., Introd. p. 5.

[5] *Ak.*, BSS, 1886, Introd. p. 1.

as Vācaspati, Vyāḍi and Bhāguri are mixed up with authors later than Amara, and hence the list is of no chronological value. More to the purpose is the statement of Keśava (A.D. 1660) in his *Kalpadrukośa*:

कात्यवाचस्पतिव्याडिभागुर्यमरमङ्गलाः ।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः ॥ [1]

Svāmin, the earliest available commentator on Amara, mentions the name of Kātya respectfully, citing him a number of times, e.g.

यत्कात्यः—आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः । [2]

(Kālavarga, p. 81)

The name of his *kośa* seems to be *Nāmamālā*,[3] for a line quoted by Vāmana (8th cent. A.D.)[4] in his *Kāvyālaṃkārasūtravṛtti* (I. 3. 6) as *Nāmamālāpratīkam*, a portion of *Nāmamālā*, has been ascribed to Kātya by Svāmin:

यत्कात्यः—नीविराग्रन्थनं नार्या जघनस्थस्य वाससः । [5]

The second name in the list, Vācaspati, is mentioned in the same line with Bhāguri and Vyāḍi by lexicographers like Puruṣottamadeva,[6] Maheśvara [7] and Hemacandra [8] and from a verse in the *Hārāvalī* it appears that his work is *Śabdārṇava*.

शब्दार्णव उत्पलिनी संसारावर्त इत्यपि ।
कोशा वाचस्पतिव्याडिविक्रमादित्यनिर्मिताः ॥ (V. 275)

[1] *Kk.*, GOS ed., p. 1, v. 2.
[2] *Ak.*, Poona ed., p. 35.
[3] *Kk.*, GOS ed., Introd. p. xiii.
[4] A. Sankaran, *Rasa and Dhvani*, Univ. Madras 1929, p. 29.
[5] *Ak.*, Poona ed., p. 322.
[6] *Hārāvalī*, (*Abhi. Saṃ.*), NSP 1889, v. 275.
[7] *Viśva.*, CSS, 1911, v. 16.
[8] *Abhi. Cint.*, Introd. v. 3.

The work seems to be a collection of synonyms, often giving the correct sounds of words and other forms of the same word.[1] But according to an anonymous commentary on the *Ak.*, the lexicon of Vācaspati is named *Nirṇayadīpikā*.[2]

Vyāḍi is the third name; his work being lost, it cannot be said definitely whether he is the author of the *Saṃgraha* mentioned in the *Mahābhāṣya* or of the *Utpalinī* mentioned by Puruṣottama in the *Hārāvalī*. About the *Saṃgraha* Patañjali says in his *Mahābhāṣya*,

संग्रहे एतत् प्राधान्येन परीक्षितम् (I. 1. 1)

on which Kaiyaṭa gives the gloss *granthaviśeṣe*, which is further amplified by Nāgojibhaṭṭa as a work consisting of one hundred thousand verses.[3] It is more probable that Vyāḍi's work is *Utpalinī* as mentioned in the *Hārāvalī*, for quotations from Vyāḍi's work are frequently given by Svāmin and later commentators on Amara such as Malli.

'अमृतं दिवि खे मोक्षे', 'यज्ञशेषेऽमृताशने' इत्युभयत्र व्याडिः (p. 3)
'किसलं स्यात् किसलयं पुंसि क्लीबे च पल्लवम्' इति व्याडिः (p. 224)

But according to Sarvānanda,[4] Vyāḍi's work, like that of Vararuci, deals with genders of words only.[5] But Amaracandra[6] says that the *Utpalinī* is a composition of Vyāḍi; for he cites twice in his *Kāvyakalpalatāparimala* from the *Utpalinī* with the words '*vyāḍikṛtotpalinīmadhyāt*'.[7]

[1] कृष्णः पाकः फलो . . . कृष्णपाकफलः, etc. Malli. (p. 255).
[2] *JOR*, Madras, VI, p. 272.
[3] संग्रहो व्याडिकृतो लक्षश्लोकसंख्यको ग्रन्थ इति प्रसिद्धिः (CSS ed., p. 20).
[4] *Ṭīkāsarvasva*, TSS 38, I, p. 2.
[5] यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि, व्याडिवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि (ibid., p. 3).
[6] *JOR*, Madras, VI, p. 272.
[7] *Kk.*, GOS., Introd. p. xi.

The next author is Bhāguri. There are nearly twenty quotations from his work in Svāmin's commentary; he is also often cited by Sarvānanda[1] and others, including Malli., who cites him a number of times.

'गन्धर्वपृषतश्चेति ज्ञेयाः सारङ्गजातयः' इति भागुरिः (p. 334)

'वाहित्थं वातकुम्भाघः' इति भागुरिः (p. 507)

His work was probably called *Trikāṇḍa*, different of course from Amara's work which also goes by that name: for this we have the authority of Puruṣottama, the author of the *Bhāṣāvṛtti*.[2]

According to tradition Amara is believed to have been one of the 'nine gems' in the court of the legendary king Vikramāditya, the founder of the Vikrama era, whose identity is a mystery, and who is generally believed to have flourished in the first century B.C. The basis for this tradition is the well-known verse from *Jyotirvidābharaṇa*, *Dhanvantarikṣapaṇakāmarasiṃha . . .*'[3] He is earlier than the 6th cent. A.D.; for the *Ak.* was translated into Chinese by Guṇarāta, evidently a Buddhist.[4] The earliest quotation from his work has been traced by Dr. R. G. Bhandarkar to the *Nyāsa* of Jinendrabuddhi, who has been shown to have flourished in the beginning of the 8th cent. A.D.[5] The line in question is '*tantraṃ pradhāne siddhānte*' (*Ak.*, III. 3. 186) which is found quoted in the *Kāśikāvivaraṇapañcikā*.[6] A reference to *Amarakośa* is also found in the *Amoghavṛtti*,

[1] तथा च भागुरिः—'कोषमाहुर्हिरण्यं च हेमरूपं कृताकृतम्', *Ṭīkāsarvasva*, III, p. 230. He quotes him 15 times.

[2] *JOR*, Madras, VI, p. 253.

[3] धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥

[4] Max Müller, *India, What can It Teach Us?* (p. 328), quoted in K. G. Oka's ed. of *Ak.*, p. 9, and in *Kk.*, GOS ed., vol. I, p. xvii.

[5] S. K. Belvalkar, *Systems of Skt. Grammar*, p. 38.

[6] *Ak.*, Oka's ed., p. 9.

commentary on his *Śabdānuśāsana* by Abhinavaśākaṭāyana, which was written between A.D. 814 and 867.[1] K. G. Oka also contends that Amara lived before Candragomin's Vyākaraṇa from which the grammarian Vasurāta (A.D. 480)[2] is said to have learnt his grammar. 'A justifiable inference from this (II. 4. 23) and many other *sūtra-s* is that Candra's grammar was not prior to Amarasiṃha when he wrote his work.'[3] As Keith remarks, the lower limit of his date is dubious,[4] but we have the upper limit in Guṇarāta's Chinese translation in the 6th cent. and we may not be wrong if we assign him to the 4th cent. A.D.

Amara has been considered a Buddhist and that may be the reason for the translation of the *Ak.* into Chinese by Guṇarāta. Svāmin is of the view that the first verse in the *Ak.*, '*yasya jñānadayāsindhoḥ* . .' has been set forth as the *maṅgalaśloka*, paying homage to Jina, for the purpose of fulfilling the desire to complete the work without impediments.[5] Sarvānanda states that though the salutation is not made to the Buddha expressly the epithet *jñānadayāsindhuḥ* is intended to denote the characteristics of Śākyamuni, i.e. the Buddha.[6] He further suggests that the name of the Buddha has not been mentioned as the author was apprehensive of neglect of his work by orthodox Hindus who disliked the Buddhist heretics.[7]

It is no doubt difficult to disregard the traditional view as propounded by these ancient commentators; but this

[1] V. Raghavan, ed. *NCC*, vol. I (rev.), p. 307.

[2] S. K. Belvalkar, *Systems of Skt. Grammar*, p. 58.

[3] *Ak.*, Oka's ed., p. 8.

[4] Keith, *History of Skt. Literature*, p. 413.

[5] इत्थं ग्रन्थारम्भेऽभीप्सितसिद्धिहेतुं जिनमनुस्मृत्याह । *AK.*, Poona 1941, p. 2.

[6] अत्र चानुक्तोऽपि शाक्यलक्षणार्थो ज्ञानदयादिभिः स्पष्टं प्रतीयते ।
AK., TSS 38, I, p. 2.

[7] बौद्धदर्शनविद्वेषिण इह प्रवृत्तिर्न स्यादित्यतोऽत्र बुद्धपदोपादानं न कृतं कविना ।
ibid., p. 3.

view has been criticized by other ancient commentators who try to establish that Amara was an orthodox Hindu. They interpret the first verse as a glorification of Lord Viṣṇu and the sea. Neither Sūrin nor Malli. refers to any suggestion of the Buddha in the verse. The former explains

अस्य विष्णोः क्षयो निवासोऽक्षयः । (p. 1)

and the latter has

अनेन परब्रह्मशब्दब्रह्मणोरुपास्तिराचरिता । (p. 3)

Bhānujī on the other hand emphatically denies any reference to the Buddha or to Jina.

स्वामी तु—'जिनमनुस्मृत्य' इति स्मरणलक्षणं मङ्गलमाह । तन्न । जिनवाचकपदस्यात्रादर्शनात् . . . अमरकर्तुर्जैनत्वे प्रमाणाभावाच्च[1] ।

In the Brahmavarga of the second Kāṇḍa he says:

यूपाग्रं तर्म . . . प्रणीतः संस्कृतोऽनलः । समूह्यः परिचय्यापचय्यावग्नौ प्रयोगिणः । (pp. 461-2)

These details of the sacrifice could hardly be within the ken of a Buddhist. Minute details are furnished for the performance of the Śrāddha ceremony,

पर्येषणा परीष्टिश्च . . सनिस्त्वध्येषणा (p. 469)

and of Vedādhyayana,

पाठे ब्रह्माञ्जलिः . . . (p. 472)

स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा ।

सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् । (p. 477)

There are again minute details such as

अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम्[2] । (p. 478)

[1] *Ak.*, NSP ed., 1905, p. 2.

[2] Incidentally, when Amara is obliged to change the metre for

ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ।
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ।
परंपराकं शसनं प्रोक्षणं च वधार्थकम् । (p. 465)

Considering the intimate knowledge he exhibits of the Vedic rites, it is possible that Amara was a Hindu who turned Buddhist in the latter part of his life when the *kośa* was written.

The words in the *Ak.* are classified and arranged according to topics as in the modern *Thesaurus of English Words and Phrases*. The *Amarakośa* (Eng. trans. by Colebrooke, Serampore 1808) must have influenced P.M. Roget in preparing his *Thesaurus*, for in his Introduction he refers to 'the Amera Cosha, or *Vocabulary of the Sanscrit Language*, by Amera Sinha' as the earliest attempt to construct a systematic arrangement of ideas with a view to their expression (p. xxvi, 1936 ed.).

Amara has managed to put in a little less than 1500 Anuṣṭubh verses a very large number of words, some of them most refractory,[1] giving all the necessary information regarding meaning and gender in the three Kāṇḍa-s of his work. The first Svarādikāṇḍa has twelve sections or Varga-s, according to Ṣūrin's commentary, on Svar (69½), Vyoman (1½), Diś (35), Kāla (31½), Dhī (17), Vāc (21½), Śabdādi (4), Nāṭya (38), Pātāla (3), Bhogin (8), Naraka (3½), and Vāri(45). The second Bhūmyādikāṇḍa has ten Varga-s: Pṛthvī (18), Pura (20), Śaila (8), Vanauṣadhi (169½), Siṃhādi (43), Manuṣya (139½), Brahman (57½), Kṣatra (119½), Vaiśya (111) and Śūdra (47). The third Sāmānyakāṇḍa has five Varga-s: Viśeṣyanighna

inclusion of certain refractory words in the same place, he chooses some of the most musical varieties such as Vidyunmālā here and Pramāṇikā in

प्रमापणं निबर्हणं निकारणं निशारणम् (p. 549),

which enliven to some extent such a dry subject as a string of synonyms.

[1] दाराः, बल्वजाः (pp. 365, 316).

(112½), Saṃkīrṇa (42½), Nānārtha (257), Avyaya (23) and Liṅgādisaṃgraha (47).

The title *Nāmaliṅgānuśāsanam* is significant, for it is 'a work treating of names of objects, as well as their genders'. 'Among lexicons of earlier writers, some like *Utpalinī* give only the words, some like the work of Vararuci deal only with genders, but here both are together.' [1] It is well known that the determination of the gender of words in Sanskrit requires a special study and hence a guide like the *Ak.* is indispensable even at the early stages of instruction. Hence the mastery of this lexicon is ordained at a very early stage when a student commences his studies.

Amara lays down the rules of interpretation at the beginning of his work and the devices that are employed for securing brevity. They are firstly to bring together all the available lexicons of his day, such as those of Kātya, Vyāḍi and Bhāguri.[2] The second stage is the selection of words suitable to a concise dictionary (*saṃkṣiptaiḥ*). He had necessarily to use his discrimination and delete a large number of *aprasiddha* words. As he says at the end of the second Kāṇḍa, when certain words are given in the text in a gender that is well known, the forms in other genders can be easily made out, and it is unnecessary to increase the bulk of the volume by their separate inclusion.

उक्ता भूरिप्रयोगत्वादेकस्मिन् येऽत्र यौगिकाः ।
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥ (p. 647)

The third stage consists in setting them in proper order, so that the non-essentials are left out and the arrangement

[1] The *Amaramaṇḍana* of Kṛṣṇasūri, ed. V. Raghavan, Poona 1949, Introd. p. 17.

[2] अन्यतन्त्राणि व्याडिवररुचिप्रभृतीनां तन्त्राणि, समाहृत्य एकीकृत्य । अत एव संपूर्णमिदम्, यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि, व्याडिवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि । *Ak.*, TSS 38, I, p. 3.

is an improvement on the existing usage (*pratisaṃskṛtaiḥ*). In the fourth stage these selected words are classified according to subjects, Varga-s, such as those dealing with celestial objects, etc. And finally the words are listed along with genders as completely as possible (*saṃpūrṇam ucyate*).

Although Amara himself is quite definite in the division of the *kośa* into three Kāṇḍa-s and the various Varga-s, some scholars, notably in Germany, have further subdivided[1] the Varga-s into Kīṭaprakaraṇam (p. 337), Aśvaprakaraṇam (p.515), Pāśupālyam (p. 588), etc. In the third Kāṇḍa alone there is a difference of opinion; the commentator Svāmin considered the section on homonymous *avyaya-s* as part of the following Avyaya section, whereas other commentators have generally added this to the Nānārtha section. The commentator Bommagaṇṭi Appayārya has discussed this question at length in the beginning of the Nānārtha Avyaya words. Setting forth arguments on both sides he has come to the conclusion that the *avyaya-s* are separate words and both the sections of the *avyaya*, homonymous and synonymous, should go together and that the Nānārtha section promised at the beginning of the third Kāṇḍa by Amara begins with *kānta* words and ends with *hānta* words. 'The *nānārtha avyaya-s* are also arranged by their finals, although not shown as such in any MS. or edition. Puruṣottama expressly mentions this in his *varṇanirdeśanā* and it has been discussed by Ramānātha and others'.[2] But as the beginning of the homonymous *avyaya-s* is '*avyayāḥ pare*' (III. 3. 239) and as it forms the latter part of the line in the verse dealing with *nānārtha*, it is hardly likely that it forms a separate Varga.

In the first Kāṇḍa alone there is a serious difference of opinion. The commentator Rāyamukuṭa considers that the Svargavarga extends up to the Nāṭyavarga; the commentaries

[1] These sub-sections or Prakaraṇa-s are mentioned by Sūrin.

[2] *Ak.*, Borooah's ed., p. iv.

of Svāmin and others in Bengali script have the words '*iti svargavargaḥ*' at the end of the Nāṭyavarga.[1] This is peculiar to the Bengali MSS. and not found in MSS. in other scripts. Moreover this is opposed to the statement of Amara himself who, in the penultimate verse ending the first Kāṇḍa, has clearly stated,

उक्तं स्वर्व्योमदिक्कालधीवाक्छब्दादिनाट्यकम् । (p. 183)

dividing the sections as Svar, Vyoman, etc. and further has the concluding line:

स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ।

Thus the names given by Amara to the three Kāṇḍa-s are Svarādi, Bhūmyādi and Sāmānya respectively.

'The text of Amara has been preserved with a fidelity which is not remarkable if we consider the rare attention it has received during the last ten centuries.'[2] But the MSS. show a very large number of variants and they are generally attributed to a deliberate transfer from the commentaries to the text or due to mistakes committed by scribes. This is possible as Svāmin, Malli. and other commentators add a good many lines supplementing the text and ignorant scribes may have transferred them to the text. There is also the possibility of confusion due to the similarity of certain sounds. A classical illustration of a variant in the text due to this cause is *yādavaṃ dhanam* which Subhūticandra has adopted as the text in his *Kāmadhenu* whereas *pādabandhanam* is the text adopted by Svāmin and the later commentators.

सुभूतिटीकायां तु यादवं धनमिति पठितम् (Malli., p. 589)

Sometimes transfer of whole verses has taken place from the commentaries. In the first Kāṇḍa there are thus a number of verses and hemistichs, e.g. on Viṣṇu, Lakṣmī, etc.

[1] ibid.

[2] *Ak.*, Borooah's ed., Introd. p. v.

गदाग्रजो मुञ्जकेशो दाशार्हो दशरूपधृत् । (p. 17)

इन्दिरा लोकमाता मा क्षीरोदतनया रमा । (p. 20)

In the second Kāṇḍa a whole verse, '*vipulā gahvarī* . . .' has been added to synonyms of the earth (p. 185). The spurious character of these additions can be determined by the treatment accorded to them by well-known commentators. If they commented on them they may be taken as a genuine part of the text. 'This has been forgotten by Bhānujī in some places, but the Bombay ed. generally marks them as spurious.'[1] But other commentators such as Mukuṭa, Sūrin, Malli. and Bommagaṇṭi are very clear in such cases. They have left them out as spurious additions but have taken care to note doubtful cases (Sūriṇ, pp. 17, 24).

Śrīharṣa, a late writer of the Telugu country, has written a short work called *Amarakhaṇḍana*[2] assailing Amara's lexicon 'as poor in the words, alternate forms and gender indications'.[3] Amara has failed to follow the principles laid down by himself at the beginning of his work. In the first place his synonyms are very meagre, a large number found in other lexicons having been omitted, e.g. he gives only Uccaiśravas, Mātali and Nandana for Indra's horse, charioteer and garden respectively whereas other lexicons give a number of other well-known names.

'हय उच्चैःश्रवाः नीला(?)शुभ्राङ्गः शक्रवाहनः . . .' इत्यादि पर्यायरत्नमालाविरचितमस्ति । किंच 'मातलिर्माकलिः शक्रसारथिस्तु हयंकषः' इति रभसः । (*JOR*, V, p. 17)

The answer given by *Amaramaṇḍana* against the charge is that Amara has taken, for his concise work, only words in greater currency.

[1] *loc. cit.*

[2] *JOR*, V, pp. 16-26, ed. T.R. Chintamani.

[3] *Amaramaṇḍana* of Kṛṣṇasūri, Poona 1959, ed. V. Raghavan, Introd. p. 17.

अस्मत्परिष्कृतसंक्षिप्तपदार्थैनैव तद्दोषपरिहारः सुकरः । (*Am.*, p. 23)

As for the criticism that a large number of words have been given to denote fish,

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः (p. 166)

ignoring the principle of *saṃkṣepa*, the answer is that these words too are in greater currency and hence could not be omitted.

प्राचुर्यस्यैव विवक्षितत्वे बाधाभावाच्च (*Am.*, p. 23)

The *kośa* of Amara is no doubt admirable but perfection should not be attributed to him, for it will only injure the true greatness of the author, instead of furthering it. No doubt the last section, Liṅgādisaṃgrahavarga, illustrates the brilliance and range of his perceptiveness. But some of his omissions too are somewhat glaring. Among some of the well-known words that he omitted is *kakudmat* (a humped bull, *Ragh.*, IV. 22) which is as old as the *Ṛgveda*. But it must be said in justice to him that he was conscious of the omissions in his concise work and hence he said in the concluding portion of his work,

शेषं तु ज्ञेयं शिष्टप्रयोगतः ।

The text of Amara in this edition is based on the three South Indian commentaries, Liṅgayasūrin's *Amarapadavivṛti*, Mallinātha's *Amarapadapārijāta* and (in the third Kāṇḍa) on Bommagaṇṭi Appayārya's *Amarapadavivaraṇa*. There are a very large number of variants, which have been mentioned by the commentators themselves or are given in the footnotes.

Liṅgayasūrin's Amarapadavivṛti

Liṅgayasūrin, the author of the *Amarapadavivṛti*, the first comm. given in the present edition, is also known as Liṅga

or Liṅgābhaṭṭa, and his work is popularly known as *Liṅga-(Liṅgā)bhaṭṭīyam.* From the Telugu meanings that he adds to the terms in the Vanauṣadhivarga of Kāṇḍa II and from the fact that most of the MSS. containing his comm. are in the Telugu script, he may be considered to have been a native of Āndhradeśa. His father's name was Vaṅgala Kāmaya Bhaṭṭa according to the colophons. In the introductory verses of his comm. Sūrin speaks respectfully of Kṣīrasvāmin and others whose works he carefully considered before writing his own.

पदवाक्यप्रमाणज्ञैः क्षीरस्वाम्यादिसूरिभिः । कृतान् ग्रन्थान् समालोच्य (p. 1)

Svāmin's date is known to be the second half of the 11th cent. as he quotes Bhoja (11th cent.)[1] and is in turn cited by Vardhamāna (12th cent.)[2] in his *Gaṇaratnamahodadhi.*[3] Sūrin also quotes Bhojarāja's views when he explains the words to denote the Gandharva-s Hāhā Hūhū as they were considered indeclinables by him.

हाहा हूहू इत्यालापानुकारात् नामद्वयम् । एकनामेत्येके । अव्ययाविति भोजराजः ।
(p. 37)

Thus the lower limit of Sūrin's date may be considered as A.D. 1150.

Malli. whose period may be assigned approximately to the 14th cent.[4] is greatly influenced by Sūrin as can be inferred from a number of identical lines in the works of both and from his express mention of the *Liṅga(Liṅgā)bhaṭṭīyam* (p. 144). He quotes with approval some of Sūrin's explanations, though he does not mention the source by name. Describing *indrāyudha* (rainbow) he gives almost the same line as Sūrin.

[1] Keith, *History of Skt. Literature* p. 292.
[2] A.D. 1140, S. K. Belvalkar, *Systems of Skt. Grammar*, p. 53.
[3] *Ak.*, K. G. Oka's ed., Introd. p. 3.
[4] For a discussion on his date, see p. xlvii below.

मेघप्रतिफलितनानावर्णस्य धनुराकारेण दृश्यमानस्य सूर्यकिरणस्य नामेति केचित् । (p. 57)

Identical again is the meaning given by both for *saṃdhyā* (twilight):

दिनान्तादुपरि घटिकात्रयात्मकस्य सूर्योदयात् प्राक् पञ्चघटिकात्मकस्य च कालस्य नामनी । (p. 75, 11. 3-4 and 15-16)

and *prasevaka* (the belly of a lute below the neck):

दण्डावलम्बनायालाबूमूलनिक्षिप्तसंदंशाकारसारदारुनाम । (p. 125);

and *kūpaka* (hole dug in the sandy bed of a river):

शुष्कनद्यादौ जललाभाय क्रियमाणगर्तनाम (p. 161).

When dealing with the word *jṛmbha* (yawn), Malli. mentions the *Liṅgabhaṭṭīyam* by name and politely suggests that his interpretation of the word as 'yawning' is not in accordance with the explanation given in the *Vaijayantī*, the favourite[1] of Malli. In another place, while explaining the word *secana* (p. 164), he adversely criticizes Sūrin without mentioning his name. It is clear from a large number of such examples that Malli. has utilized Sūrin's commentary.

The work of Sūrin is a very valuable accession to the lexicographical literature in Sanskrit. Whereas commentators of lesser merit have sunk into oblivion, Sūrin's commentary has all along been well received, especially in the southern region. The astonishingly large number of variants in his comm. as testified by more than a score of MSS. collated may be considered as a sign of his popularity. He explains all the words of Amara, assigning a distinct origin to each word in the vocabulary. He combines conciseness of expression with fullness of treatment. His motto is similar to that of Mallinātha, the celebrated commentator on the Mahākāvya-s:

[1] Malli. quotes 213 times from the *Vaijayantī* in the first two Kāṇḍa-s.

नामूलं लिख्यते किंचित् नानपेक्षितमुच्यते ।

Simple but striking are some of the illustrations that Sūrin furnishes to bring out the different genders in which a word may be used when explaining Amara's text. For example,

त्रिष्वेवं मेद्यगामि यत्, is explained as कष्टा सेवा, कष्टो भृत्यभावः, कष्टं व्याकरणम् (p. 155).

Surely *kaṣṭaṃ vyākaraṇaṃ* which is given by Patañjali himself in his *Mahābhāṣya* will be better appreciated by students learning grammar, than *kaṣṭaṃ viṣabhakṣaṇam* given by Malli. There are some words such as *varga*, *saṃgha*, *kula* and *yūtha* which appear to have the same general meaning of a 'group', but which have to be used distinctly according to the objects to be indicated. Sūrin gives apt illustrations, the word *varga* being employed in such cases as *prāṇivargaḥ*, *kavargaḥ* (group of gutturals), *saṃgha* in *pakṣisaṃghaḥ* (flock of birds), *sārtha* as in *vaṇiksārthaḥ* (caravan of merchants), *kulam* as in *brāhmaṇa-kulam* (assembly or family of Brāhmaṇa-s) and *yūtham* as in *gajayūtham* (herd of elephants) (pp. 359-60).

Sūrin gives the derivations of words, and brings out their full significance unlike some of the principal commentators who lavish attention on the minute details of grammar, leaving the explanations to take care of themselves. Svāmin no doubt derives most of the words, but in many places the explanation is not full and in some places positively meagre. Worse is the position in Bhānujī's comm.; his derivations are full of grammatical lucubrations, but he explains fully only a very few words. The word *āyattaḥ* (a dependent) in Amara (III. 1. 16) is dealt with thus:

आयतते स्म । 'यती प्रयत्ने' । अकर्मकत्वात् क्तः । (p. 411)

whereas Sūrin explains the meaning as 'a person employed in a particular work':

आयत्यते एककर्मसु नियुज्यत इत्यायत्तः । 'यती प्रयत्ने' ।

In the same context the word *nighnaḥ* (dependent) is explained by Bhānujī as

निहन्यते निगृह्यते । हन्तेः घञर्थे कः ।

whereas Sūrin says:

[निहन्यते] नियम्यते प्रभुणा तिरस्क्रियत इति निघ्नः ।

Svāmin has:

निहन्यते निघ्नः । घञर्थे कविधानम् (p. 239).

Sarvānanda's explanation too is meagre in most places, though the grammatical derivation is full. For *nighnaḥ* he has

निहन्यत इति निघ्नः । घञर्थे कः ।

and for *āyattaḥ* he has *yatī prayatne, ktaḥ* (IV, pp. 7-8).[1]

The word *ājiḥ* (battle) is explained by Svāmin as

आ-अज्यन्ते क्षिप्यन्तेऽत्राजिः (p. 197);

by Sarvānanda as

अज गतिक्षेपणयोः । 'अज्यतिभ्यां च' इति इण् । बाहुलकान्न वीभावः । आजिः (III, p. 139);

and by Bhānujī as '*ajanam.* "*aja gatau*"'. He then gives a number of grammatical rules to show the correctness of the form (p. 343). Sūrin here has

अजन्ति क्षिपन्ति शस्त्राण्यत्रेत्याजिः । 'अज गतिक्षेपणयोः' (p. 545).

Thus the clearness of Sūrin's commentary is self-evident.

The same fullness of explanation is seen in Sūrin's comm. for *tāmrakam* (copper). Svāmin has *tāmyati tāmram* (p. 222); Sarvānanda concerns himself with the derivation only: *āmravat tāmram* (III, p. 235); and Bhānujī has

ताम्यति तम्यते वा । 'तमु काङ्क्षायाम्' रक्, कन् (p. 384);

[1] References are to Sarvānanda's *Ṭīkāsarvasva,* TSS ed.

whereas Sūrin gives a plausible explanation of the meaning: It suffers pain when associated with fire or it requires the association of a sour ingredient like tamarind to shine in all its (golden) glory.

ताम्यति व्यथतेऽग्निसंयोगादिति ताम्रम् । 'तमु ग्लानौ' । ताम्यति काङ्क्षति स्वनैर्मल्यार्थं (सुवर्णनैर्मल्यार्थम् W_2) आम्लरसमिति वा । 'तमु काङ्क्षायाम्' ।

(p. 611)

Again he explains that *piccaṭam* (tin) is so called because it is pounded (tinned) into vessels of other metals like copper either as a thin layer or to form brass, etc.

पिच्च्यते कुट्ट्यते घटेष्वनेनेति पिच्चटम् । 'पिच्च कुट्टने' (p. 616)

This clearness of explanation is not found in the other principal commentaries.

Sūrin gives clear instructions to pupils where certain words are likely to confuse them. In the text, *godhūmaḥ sumanaḥ samau* he notes that the word *sumanaḥ* (wheat) is one ending in *a* (*akārānto 'yam*, p. 564). This is helpful as *sumanas* also means a god (p. 7), a flower (p. 225), a variety of jasmine (p. 258) all of which are words ending in *s* or *sakārānta* and Sūrin indicates them as such in their proper places, *sānto 'yam* (p. 258), *sāntaḥ striyām* (p. 226). Similarly in the text *sūtrāṇi nari tantavaḥ*, the word *nari* may sound somewhat puzzling to young students and hence he gives a clear explanation of the word,

नरीति पुंसि वर्तते तन्तुशब्द इत्यर्थः (p. 637).

The word *spaśa* (spy) is likely to be confused with *sparśa* as it is a better-known word and especially due to the *Dhātusūtra* where *sparśa* occurs (*spaśa bādhanasparśanayoḥ*). Hence he gives the clarification:

तालव्यान्तो रेफशून्यश्चायं शब्दः (p. 491).

A door is called *kapāṭa* because we get knocks on our heads at it; it is *kavāṭa* as it cuts off breeze:

कं शिरः पाटयतीति कपाटम् । कं वातं वटति वेष्टयतीति कवाटं वा ।
(p. 205)

Where the text of Amara is ambiguous or seemingly incomplete Sūrin takes care to see that the student has a clear grasp of the situation. In

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः

the numerals 20 and above are treated as singular in number and used both with reference to *saṃkhyeya* (objects to be numbered) and *saṃkhyā* (number) as *viṃśatiḥ paṭāḥ* and *viṃśatiḥ paṭānām.* Sūrin draws our attention to the fact that this is true not merely for numbers 20 and above, but the number 19 too must be added to the list.

अत्र विंशतिशब्देन एकोनविंशतिशब्दो विज्ञेयः ।
एकोनविंशत्याद्याः नवतिशब्दपर्यन्ताः सर्वाः संख्याः . . . (p. 603)

This clarification is not found in the other principal commentaries though the OBA ed. of Svāmin's comm. adds this within square brackets (p. 219). Again the definition of *viśeṣyanighna* (word dependent for its gender, etc. on a substantive) given by Amara, *strīdārādyaiḥ. . .tasya bhedakāḥ* (III. 1. 2) is a hard nut to crack and few students will be able to grasp its significance. In such cases, Sūrin comes out with an independent explanation of the verse.

तात्पर्यार्थस्तु—यस्य विशेष्यस्य यानि विशेषणानि तानि तल्लिङ्गान्येव भवन्तीत्यर्थः । (V. 2)

In cases of exceptionally peculiar derivation, attention is drawn to those abnormalities. In *druvayam* (measure) the change of *ma* to *va* is pointed out, *makārasya vakārādeśo bhavati* (p. 604) avoiding the technical detail that *vaya* is substituted

after the word *dru* (wood) in the sense of a measure, *māne vayaḥ* (IV. 3. 162). A similar popular clarification, avoiding Pāṇini's aphorisms, is seen in the next word *pāyyam*, having the same meaning.

मीयतेऽनेनेति पाय्यम् । धात्वादेर्मकारस्य पकारादेशः । (p. 604)

although the grammatical explanation is that Pāṇini has used the word 'irregularly' in the *sūtra*: *pāyyasāṃnāyya*. . . (III. 1. 129).

The *avatārika-s* or brief introductions to new subjects, when a large number of topics are dealt with in a Varga by Amara, facilitate the location of a connected topic in a continuous text. Thus in the beginning of the Brahmavarga in Kāṇḍa II when Amara lists the words for the offsprings of the people of all classes Sūrin has the *avatārikā*:

इदानीं सर्ववर्णानां संकीर्णजातीनां सामान्यसंततेर्नामानि प्रथममाह—संततिरिति । (p. 451)

Similarly when Amara begins the topic of cowherds, etc. immediately after enumerating words like *paryāptam* and *yathepsitam*, Sūrin's brief introduction to the new topic of 'protection of cows' is quite necessary and welcome: *idānīṃ pāśupālyam āha* (p. 588). When Amara begins the Śūdravarga, Sūrin introduces it appropriately as the next subject in the series dealing with Brāhmaṇa, Kṣatriya and Vaiśya topics.

अथ क्रमप्राप्तां शूद्रवर्गविवृतिमुपक्रमते । (p. 620)

Although Amara gives only the names of Varga-s, the separate mention of the heads of subjects by Sūrin is extremely useful, e.g. *kīṭaprakaraṇaṃ samāptam* (p. 337), *aśvaprakaraṇaṃ samāptam* (p. 515).

The concluding verses of Amara at the end of the Kāṇḍa-s (*kāṇḍasamāpti*) are fully explained by Sūrin, giving such hints as

स्वर्गे देवतादि, दिशि दिग्गजादि, काले उपरागादि,

etc. for Amara's crisp mention of associated words (*eṣāṃ ca saṃgatam*), unlike Malli. and Bhānujī. Sūrin realizes that readers generally remember the main topics only and hence he reminds them of the associated words such as *naukā* (boat) in dealing with Vārivarga.

As variants in the text of Amara have crept in in large numbers in the course of centuries,[1] Sūrin has mentioned them even though he gives his own choice for adoption as the correct text. In explaining *pāripārśvaka-s* (attendants on the sun), Sūrin mentions the reading *pāripārśvaga-s* (*pāripārśvagāḥ iti vā pāṭhaḥ*), though the MS. K_5 notes another reading *pāripārśvika-s* (*pāripārśvikā iti vā pāṭhaḥ*, fn., p. 71).

Again in the section on plants Amara gives *kālā* and *sthālī* as names of two plants. Sūrin here notes a number of readings and explains them:

कृष्णवृन्तत्वात् काला । रसाधारकुम्भत्वात् स्थाली । काचस्थालीति पाठे काचवर्णा स्थाली वृन्तमस्या अस्तीति काचस्थाली । कालस्थालीति पाठे कालवर्णस्थालीत्वात् कालस्थाली । साचस्थालीति पाठे सा च स्थालीति पदच्छेदः । (p. 248)

An important reading mentioned by Sūrin is with reference to domestic animals discussed by Amara in *gomahiṣyādikaṃ pādabandhanam*. Sūrin says that there is a variant reading *yādavaṃ dhanam* in the place of *pādabandhanam*, and also explains the significance of that reading.

यादवं धनमिति पाठे गोमहिष्यादिकं धनम् (p. 588)

This reading is evidently based on the comm. *Kāmadhenu* of Subhūticandra, as mentioned by Malli.[1] (p. 589). The god Brahmā, the first in the Trinity, is called Viriñci as he proffers life to all: *viriṇaktīti viriñciḥ* (p. 14); or because he separates the different species of his creation: *vicir pṛthagbhāve*. Sūrin

[1] See infra p. xxvi.

also gives an alternate reading *viriñcaḥ* which would mean the god who is borne by birds, namely swans:

विभिः हंसै रिच्यत उह्यते विरिञ्चः इति वा पाठः ।

The readings mentioned above are but a few specimens out of the hundreds which he has indicated and explained.

When a word has a meaning which is not directly connected with its derivation, it is called *rūḍha*.[1] The origin of such words has been forgotten. In such cases a commentator has to resort to imagination to establish the meaningfulness of the word. The word *pūpa* (flattened cake) in Amara's *pūpo 'pūpaḥ piṣṭakaḥ syāt* is so called, says Sūrin, because the ashes from the fire in which it has been cooked have been rubbed off!

पूयते पाकसमये लग्नं भस्म मृज्यतेऽस्येति पूपः । पूञ् पवने । (p. 583)

Amara gives *sūta* as one of the synonyms of mercury: *rasaḥ sūtaś ca pārade*. Sūrin's explanation of the word is based on the popular belief that gold can be produced out of mercury: *sūte hemādikam iti sūtaḥ* (p. 612). His explanation of *maireya* (a kind of intoxicating drink) is that it eclipses ordinary liquors.

इरां सामान्यसुरां स्वरुच्या मेति प्रतिषेधयतीति मेरा । सैव मैरेयम् । (p. 644).

A pupil is called *chātra* because he screens, out of a sense of respect and gratitude, the defects of his preceptor:

गुरोरसच्चरितं छादयतीति छात्रः । (p. 457)[2]

A subtle sense of humour is also seen in Sūrin's explanations: The word *nānā* given in the Avyaya section of Kāṇḍa III

[1] K. K. Raja, *Indian Theories of Meaning*, ALS 91, 2nd ed., p. 60.

[2] It is more likely that he is an umbrella bearer, when the preceptor goes out in the sun; for the greatest fun that a boy gets in student life is in the exposure of the mannerisms and weaknesses of the teacher. cf. *Mahābhāṣya* on Pāṇini, IV. 4. 62; see also *ALB* 29, p. 181 n.

has the well-known meaning of 'in different ways' as well as 'without'. To illustrate the latter meaning Sūrin says,

नाना नारीं निष्फला लोकयात्रा ।

The line has a double significance, for it applies to the performance of *dharma* in participation with the life-partner as well as a life of pleasure in her company (III. 4. 3). The same kind of humorous suggestion is seen in the explanation of the word *riktham* (wealth), as that which (being hard earned by the father) is squandered by the sons:

रिच्यते पुत्रादिना निःसार्यत इति रिक्थम् । (p. 607)

Some words can convey a clear picture to the mind only if a full description of the object is given:[1] *navanītaṃ navoddhṛtam* does not convey a picture of the object in question, namely fresh butter. Here, Sūrin gives a full description:

नवं तत्कालदध्नो मन्थनानन्तरं नीतं नवनीतम् ;

and

मथनानन्तरं दध्नो विनिर्गतस्य सर्पिषः प्रकृतिभूतस्य सारांशस्य नामनी । (p. 585)

Similar is the case with *pṛthuka* which is parched and flattened rice.

सार्द्रान् व्रीहीन् भृष्टान् कृत्वा उलूखले मुसलेन कुट्टयित्वा भक्ष्यत्वेन कल्पितानां नामनी । (p. 582)

The somewhat heavy dependence on such an established authority as Svāmin sometimes lands him in questionable derivations. The word *vitunnakam* (coriander seed) is derived by Svāmin as:

[1] Hence Bhavabhūti's humorous description of a horse in *Uttara*. (IV.27) to ascetic boys who had not seen such an animal before (*paścāt puccham vahati . . .*).

वितुदति मन्दाग्नित्वं वितुन्नकम् (p. 208).

Sūrin, evidently following Svāmin says,

वितुदति रोगान्नाशयतीति वितुन्नकम् । 'तुद व्यथने' (p. 576).

Bhānujī points out the error in such a derivation (p. 363):

यत्तु वितुदति मन्दाग्निमिति स्वामी । तन्न । सकर्मकात् कर्तरि वर्तमाने क्तस्याभावात् ।

On occasions, Sūrin's explanation is not quite happy; e.g. *patadgrahah* is said to be a vessel (p. 572) although it is more appropriate for a spittoon.

Popular interpretations constitute a feature of Sūrin's commentary: For example, Svāmin's interpretation of *yathepsitam* is

ईप्सितमनतिक्रम्य यथेप्सितम् (p. 212),

while Bhānujī says,

आप्तुमिष्टम् । सन् । क्तः । 'अव्ययं विभक्ति . . .' इत्यव्ययीभावः । (p. 371)

Sarvānanda's explanation is similar to the one of Svāmin:

ईप्सितस्यानतिक्रमो यथेप्सितम् । (III, p. 200)

Sūrin however has:

आप्तुमिच्छा ईप्सा । अस्या अधिकं यथेप्सितम् । यस्य कस्यापि वस्तुनः इच्छाधिक्योपेतस्य नाम । (p. 588)

Similarly *gosaṃkhyaḥ*, which is a synonym for *gopaḥ* (cowherd), is explained by Sūrin as a person tending cattle, who not only counts the number of cows after their return from pasture, but tells the owner that all of them have safely reached the cowpen:

गाः संचष्टे गोमिने तव गावः सुखेनागता इति गोसंख्यः । (p. 588)

This thoughtful interpretation is not found in the principal commentaries.

The brevity of Amara being sometimes reminiscent of Pāṇini's *sūtra-s*, Sūrin fulfils the role of the Bhāṣyakāra. The words *hālika* and *sairika* are defined by Amara as

खनति तेन तद्वोढास्येदं हालिकसैरिकौ । (p. 591)

Sūrin brings the above aphoristical statement within the realm of intelligibility by saying:

हलेन खनतीति हालिकः । हलं वहतीति हालिकः । हलस्य संबन्धी हालिकः । हलेन खनतः, हलं वहतः, हलसंबन्धिनो वा बलीवर्दस्य नामनी । (p. 592)

i.e. oxen utilized for ploughing or drawing carts. Similar is the explanation of the word *sairika*.

Some words in Amara's text are *deśya*, local words of popular origin; for even such a conservative and classical language as Sanskrit is not completely immune to the influence of the regional languages. Sūrin points out that some words, more especially names of plants in the Vanauṣadhivarga, are of Prakrit origin. The word *phaṇijjaka* (citron tree), Sūrin says, has been adopted from the vernacular, *phaṇijjakaśabdo deśyaḥ* (p. 262). The milk-hedge plant is variously named *sihuṇḍa*, *siṃhuṇḍa* and *sīhuṇḍa*. Dhanvantari and Svāmin recognize the Prakrit form *sīhuṇḍa;* but Sūrin gives *siṃhuṇḍa* only and explains that it is only irregularly formed with the loss of *ta* in *siṃhatuṇḍa* (resembling the mouth of a lion).

सिंहतुण्डाभशाखात्वात् सिंहुण्डः । तकारलोपः । (p. 277)

The word *indindira* (bee) is given by Sūrin as an additional variant of a doubtful character (p. 351); Svāmin considers it a *deśya* word, but Sūrin has no comment to offer.

While avoiding the intricacies of grammar, Sūrin quotes the *Dhātupāṭha* at every step, sometimes in a form slightly different from what is in modern editions, which may indicate

the oral tradition prevalent in his day. Thus in MSS. K_2, K_6 and Pt_2, *kuṇa śabde* takes the place of the later *kuṇa śabdopakaraṇayoḥ*.[1] Again most of the MSS. give *srambhu viśvāse* (p. 497) instead of *srambhu pramāde viśvāse ca*.[2] The MSS. also indicate Sūrin's fondness for combining *dhātu-s* that have the same meaning. Thus in the place of *lāja bharjane bhartsane ca*[3] K_5, K_6 give *lāja lāji bharjane* (p. 582). Similarly *aghi laghi gatyākṣepe* (p. 593)[4] is the combined result of *aghi gatyākṣepe* and *laghi gatau*.[5] The *Dhātupāṭha* given in MSS. K_5, K_6 as *karva kharva garva darpe* (p. 610) is a combination of the three roots having the same meaning. Numerous are such combinations scattered throughout Sūrin's commentary. He has also the merit of explaining some difficult or unusual words found in the *Dhātusūtra-s*. In *añjū vyaktimrakṣaṇakāntigatiṣu* (p.585) regarding *mrakṣaṇa* he gives the additional information *mrakṣaṇaṃ secanam*. Similarly he mentions *cakyārthaḥ tṛptyarthaḥ* (p. 587) in the *Dhātusūtra*, *suha cakyārthe* in the context of deriving the word *sauhityam* (satisfaction).

There are some well-known words in Amara for which Sūrin gives a number of alternate derivations without straining the meaning, and showing the depth of his knowledge of grammar. *Surāḥ* (gods) is derived in six ways as those possessing power and prosperity:

सुरन्तीति सुराः । 'सुर ऐश्वर्ये';

those who are resplendent:

सुष्ठु राजन्तीति वा । 'राजृ दीप्तौ';

those who gracefully receive offerings made with devotion:

भक्त्या दत्तं सुष्ठु रान्तीति वा । 'रा आदाने';

[1] *Bṛhat-dhāturūpāvali*, ed. T. R. Krishnacharya, Kumbakonam, p. 400.
[2] ibid., p. 546. [3] ibid., p. 505. [4] ibid., p. 379. [5] ibid., p. 502.

those who give welfare:

शुभं रान्तीति वा । 'रा दाने';

those who possess the superior wine churned out of the milky ocean:

अब्धिजा सुरा येषामस्तीति वा;

those who fulfil the desires of devotees well:

सुष्ठु वाञ्छितफलं रान्तीति वा । 'रा दाने' (p. 8).

Similarly he derives Rudra (Śiva) in three ways (pp. 9-10), *asura* (demon) in five ways (p. 11) and Kumāra (Subrahmaṇya) in four ways (p. 29). When deriving *bhagavat* (venerable person) he quotes the verse which describes the characteristics such as power, valour, fame, prosperity, wisdom, etc.: *aiśvaryasya samagrasya. . .*' (p. 12).

Amara has set forth in the beginning of his work certain devices for indicating the genders of words, etc. whose significance is explained with suitable illustrations by Sūrin. The first device is that the distinction of gender is made by the form of the word such as the endings in *a*; *ā*, *ī* or *ū*; and *am* for mas., fem. and neuter gender respectively.

स्त्रीपुंनपुंसकं प्रायेण रूपभेदेन ज्ञेयम् । तद्यथा— बुद्धिर्मनीषा धिषणा ।

In some places, genders are clarified by the proximity of other words:

कुत्रचित् साहचर्यात् ज्ञेयम् । तद्यथा—तटित् सौदामिनी ।

In other places where genders have to be mixed up, special directions are given:

क्वचित् तेषां लिङ्गानां विशेषविधेः ज्ञेयम् । कथम्? भेरिः स्त्री दुन्दुभिः पुमान् । (p. 3)

Similarly, other devices employed by Amara such as the avoidance of Dvandva compounds in which words of different genders are mixed up, are all elucidated by Sūrin.

The Nānārtha-(homonymous)varga is the biggest section in *Ak.;* still the author says that only some homonymous words have been dealt with in this section, beginning with words that end in *ka* (*nāka*) and ending with those that end in *ha* (*paribharha*).

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।

Sūrin says at the very outset of this Varga that he intends to include meanings left out by the author due to his fear of increasing the bulk of the work:

अनुक्ता ग्रन्थकारेण ग्रन्थगौरवभीरुणा । (v. 1)

The inclusion of additional meanings necessarily obliges him to recast the original verses of Amara, retaining, as far as possible, Amara's own words. These alterations and additions have been noted from time to time in various lexicons after Amara, such as the *Vaijayantī*, *Viśvaprakāśa* and *Abhidhānaratnamālā*. Sūrin says that he consulted such works as were available to him:

तन्त्रान्तरस्थो नानार्थपदस्यार्थो यथामति ।

His explanations are in prose in between the verses, e.g. for *ākāśe tridive nākaḥ*, Sūrin has the version

अम्बरे सुरलोके च नाकशब्दः प्रकीर्तितः ।

explained as

न विद्यतेऽकं दुःखमत्रेति नाकः ।

The word *kṣveḍā* (poison, etc.) is dismissed by Amara with *kṣveḍā vaṃśabalākāpi*, no doubt referring to his *kṣveḍā tu siṃhanādaḥ syāt* in the Kṣatriyavarga (p. 546). Sūrin elaborates it by giving more than ten meanings:

कर्णरोगे विषे ध्याने दुर्लभे कुटिले शणे ।

लोहिताक्षे फले चैव भटानां सिंहनिःस्वने ।
क्ष्वेडा वंशशलाकायां भटे दन्तोष्ठवाद्यके । (v. 92)

Another feature in the Nānārtha section, helpful to students, is the addition of the meanings of the words in fem. gender which have a large number of senses unconnected with the word in the mas. The word *hariṇī* is dealt with by the side of *hariṇah* bringing out the additional meanings possessed by the former (v. 107) such as the name of a goddess, a metre, a golden statue, etc.

हरिणी सुरयोषायां वृत्तभेदपिशङ्गयोः ।
कनकप्रतिमायां च मृगीहरितयोरपि ॥

Similarly *vanita* (begging, etc.) which is used in all the three genders has the distinctive meaning of a young (passionate) woman in the fem. (*vanitā*).

याचिते सेविते प्राप्ते वनितं स्यात् त्रिलिङ्गकम् ।
अत्यन्तजातानुरागयोषायां वनिता भवेत् ॥ (v. 158)

Quotations by Sūrin from well-known authors are few and far between unlike Malli. whose citations are very large in number and Bommagaṇṭi who is moderate in this regard. But in the Avyaya section, he quotes liberally. For *nūnam* (surely) he cites:

क्षुद्रेऽपि नूनं शरणं प्रपन्ने . . . (*Kumāra.*, I. 12);

for *vā* (or):

अरावणमरामं वा जगत् . . . (*Raghu.*, XII. 83);

for *nāma* (indeed):

अमृतं नाम यत्सन्तः . . . (*Śiśu.*, II. 107);

and for *khalu* (indeed):

प्रवृत्तिसाराः खलु मादृशां गिरः (*Kir.*, 1. 25).

Liṅgayasūrin was a scholar of profound learning. His thorough acquaintance with the *pañcamahākāvya-s* is seen from the quotations in the Avyaya section of the Nānārthavarga in Kāṇḍa III. That his net is a wide one is proved from such lines as

अथातो दर्शपूर्णमासौ व्याख्यास्यामः ।

from the *Śrautasūtra* of Āpastamba (I. 1). He also mentions the grammarian Bhojarāja (p. 37). His eclectic mind includes a considerable acquaintance with Buddhist philosophy. He mentions the various temptations that stand in the way of the spiritual aspirant:

बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः (p. 12),

the six special characteristics possessed by the enlightened one, *divyaṃ cakṣuḥ divyaṃ śrotram* and the ten sources of his strength, *dāntikṣāntiśīla*. . . (p. 12). The citation from Kāmandaka reveals his close acquaintance with political science (p. 530).

Telugu equivalents are given by Sūrin in the Vanauṣadhivarga, but unlike Malli. who gives Telugu words for all and sundry, he does not approve of introducing other languages in explaining Skt. words. In fact, Sūrin's commentary is very popular in regions where Tamil is the main language spoken. It is only from verse 20 onwards in this section, and that too only when absolutely necessary that he gives Telugu meanings.

इह वृक्षलतौषधीनां नामान्यान्ध्रभाषयैव वक्ष्यामः । (p. 229)

The Telugu words found in the various MSS. are not uniform; *pratti*, *patti* and *putti* are given as Telugu equivalents of *kārpāsa* (cotton). It may be inferred that the names vary slightly according to the particular localities of the Telugu country. MS. J_2 gives *hatti*, which is evidently a Kannada word.

MALLINĀTHA'S AMARAPADAPĀRIJĀTA

Mallinātha, the author of the *Amarapadapārijāta*, the second comm. given in this edition is to be distinguished from his well-known namesake, the commentator on the *pañcamahākāvya-s*. This commentator on the *Ak.* too hails from the Andhra country as testified by his liberal use of Telugu equivalents in all the three Kāṇḍa-s. His father was Nṛsiṃhasūrin[1] of the Śrīvatsagotra. He also gives his family name as Bollāṭinmi:

बोल्लाटिन्मिनृसिंहसूरितनयः श्रीमल्लिनाथो . . . ।

He states in the introductory verse (p. 2) that he made a thorough study of the *ṭīkā* of Subhūti, as also the comms. *Amarabhāṣya* and *Amaravārttika*, etc:

टीकां सुभूतेः . . . अमरभाष्यवार्त्तिकमुखान् ग्रन्थान् बहूनादरात् ।

Malli. confines himself to bringing out the meaning when it differs from the interpretation of his predecessors. The great task he undertakes is to supply the omissions in *Ak.* This included collecting a list of words which were either rarely used or had fallen into disuse, which Amara did not mention.

[1] In one MS. (A_1) it is said in v. 7 that Nṛsiṃha, proficient in the three Veda-s, was his paternal grandfather (*nṛsiṃho yatpitāmahaḥ*) and Tripurāri his great grandfather. But in v. 2 (12th in A_1) it is stated that he was the son of Nṛsiṃhasūrin (*nṛsiṃhasūritanayaḥ śrīmallinātho mudā*). In v. 8 (A_1) it is said that his father was called Nāganāthasudhī (*śrī nāganāthasudhiyaṃ namāmi janakaṃ mama*). But as MS. A_1 in general, and the introductory verses in particular, are somewhat unreliable and as the colophon at the end of each Varga mentions Nṛsiṃha as his father (*srīvatsanṛsiṃhasūrisutamallināthasūri. . .*) we can take it that he was the son of Nṛsiṃha. Two or three colophons in A_1 mention the name of the author as Mallikārjuna. He might have been thus affectionately addressed by his friends or more probably it is a scribal error.

Malli. quotes frequently from the *Ṭīkāsarvasva* assigned to A.D. 1159,[1] mentioning Sarvānanda by name a number of times (11). He also quotes a verse (p. 438) from the *Vairāgya-pañcaka* of Vedāntadeśika (b. A.D. 1268).[2] Hence the lower limit of his date may be placed in the beginning of the 14th cent. Malli. should have lived long before Bhānujī, for his quotations of Gopālita are identical with those attributed to Bopālita in the same context by Bhānujī.[3] Rāyamukuṭa, the author of the *Padacandrikā* (A.D. 1431,[4] 1470[5]) is never mentioned by Malli. The absence of any mention of the *Siddhāntakaumudī* suggests that Malli. wrote his comm. before the 17th cent.

The introductory (*paribhāṣā*) verses of Amara are explained clearly by Malli. with a large number of illustrations, pointing out the significance of words often missed by other commentators. Svāmin, Sūrin, Bhānujī and others take the meaning of *ca* only as 'and' in combining *rūpabheda* and *sāhacarya* in:

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् (p. 3).

But it is indicatory (*upalakṣaṇa*); it is not *rūpabheda* and *sāhacarya* alone that give an indication of the gender of a word. Malli. observes that the gender is sometimes indicated by the affix (*pratyaya*), e.g. *ktin* to denote the fem. in words like *vibhūti* and *bhūti*:

[1] T. Ganapati Sastri, *Ak.*, TSS 38, Preface p. ii.

इदानीं चैकाशीतिवर्षाधिकसहस्रैकपर्यन्तेन (१०८१) शकाब्दकालेन . . .

[2] *The Philosophy of Viśiṣṭādvaita* by P. N. Srinivasachari, ALS 39, 2nd ed., p. 526.

[3] Malli: 'वलिकः (वलीकः B_3) पटलप्रान्त इत्यपि' इति पुंस्काण्डे गोपालितः (p. 204).
Bhānujī: 'वलीकः पटलप्रान्ते' इति पुंस्काण्डे बोपालितात् . . . (p. 138)
Malli: 'लोष्ठुः शण्डेऽपि लोष्टः स्यात्' इति गो(बो)पालितः (p. 560).
Bhānujī: 'लोष्ठुः शण्ढेऽपि लोष्टः स्यात्' इति बोगालितः (p. 351).

[4] R. G. Bhandarkar, Preface to *Mālatīmādhava*, p. xxi.

[5] *IHQ*, XVII, p. 467.

विभूतिर्भूतिरैश्वर्यम् । विभूतिभूतिशब्दौ क्तिन्नन्तत्वात् स्त्रीलिङ्गौ । (p. 27)

Sometimes the nature of the compound indicates the gender: *rāśiḥ*[1] is known to be mas. because of its association with *puñja* in the compound *puñjarāśī tūtkaraḥ kūṭam astriyām* and as Dvandva compounds are not employed by Amara when their components are of different genders. Malli. sees in the use of *ca*, such additions as *pratyaya* and *samāsa* indicatory of gender:

चशब्दः प्रत्ययाद्युपलक्षणार्थम् । विभूतिर्भूतिरैश्वर्यमित्यत्र प्रत्ययो लिङ्गस्य गमको भवति । पुञ्जराशी तूत्करः कूटमस्त्रियामित्यत्र समासो लिङ्गस्य गमको भवति । (p. 4)

The word *krama* again in '*kramādṛte*' (v. 4) is interpreted in a novel way. When referring to the prohibition of Dvandva compounds, *krama* means that all words with the same meaning but differing in gender should be given separately.

अत्र पार्थक्यमेव क्रमशब्दार्थः ।

In prohibiting *ekaśeṣa samāsa*, the word *krama* means the separate mention of all the words individually.

नाली नालं च । अत्र सर्वपदोक्तिरेव क्रमशब्दार्थः ।

In the prohibition of *saṃkara* ('mix up'), words of different genders must be separated as *stavaḥ* and *stotram* are separated from *stutiḥ* and *nutiḥ*,[2] the latter two ending in *ktin* being fem. in gender.

अत्र विभाग एव क्रमशब्दार्थः ।

Having said '*bhedākhyānāya na dvandvaḥ*' (p. 4), how does Amara use the compound *māsarācāmanisrāvāḥ* in giving the synonyms of 'scum of boiled rice'? But in this case there is a possibility of construing the ending as fem. also; hence

[1] This word is both mas. and fem. according to later commentators.

[2] स्तवः स्तोत्रं स्तुतिर्नुतिः । (p. 110).

Malli.'s observant eye detects that the mas. ending of *māsara* and *ācāma* should dispel all such misapprehension:

द्वन्द्वान्तश्रूयमाणपुंस्त्वानि (p. 584).

Great care is taken by Malli. where mispronunciation of sibilant sounds is generally observed.[1] Regarding Śunāsīra (Indra), Malli. says the initial sibilant is a palatal and not the dental sibilant *s*; he quotes as authority

शुनासीरेणेति हरिप्रबोधयमकात् तालव्यादिः (p. 32)

and points out that the word is spelt as *sunāsīraḥ* also, quoting *Āścaryamañjarī*:

शक्र इव नाकविख्यातसुनासीरः इत्याश्चर्यमञ्जरीश्लेषाद् दन्त्यः (p. 31).

Though Malli. does not as a rule give the derivation of words, he does so when a particular sound is irregular, doubtful or novel, e.g. in *aṅgaṇam* (courtyard) the cerebralization of *na* is irregular as pointed out by Subhūti:

अङ्गन्त्यस्मिन्निति अङ्गणम् । पृषोदरादित्वाण्णत्वमिति सुभूतिटीका । अङ्गनमिति च कतिचन कथयन्ति । (p. 203)

Similarly, in *kavāṭaḥ* (door), the middle sound can also be a labial as per the *Rabhasakośa*:

पवर्गमध्य इति रभसकोशकारेणाभ्यधायि ; कपाटः कपाटीति (p. 206).

Amara gives *carmakaṣā* as a synonym for *saptalā* (soap tree); Malli. notes that the sibilant may be *sa*, as the *Subhūtiṭīkā* sanctions it:

. . . चर्मकसेति दन्त्योपधः सुभूतिटीकायां व्युत्पादितः । (p. 303)

In this context, he gives a whole verse describing its merits and the place where it is commonly found. Other examples are *dṛṣad* (stone) which may be *dṛśad* on the authority of Aruṇadatta and others:

[1] शशः षषो मा भूत् (*Mahābhāṣya*, I. 1. 1).

. . . दृषदः इत्यूष्मभेदपाठान्मूर्धन्यः । . . . दृशत्त्रिशः . . . इत्यरुणदत्त-लिङ्गानुशासनपाठात् तालव्यमध्यः (p. 211);

bṛsī (ascetic's seat made of holy *darbha* grass) which is *bṛsī* according to Candragomin and *bṛṣī* in the *Viśvaprakāśikā*:

. . . बृसिमांसीति दन्त्यान्तेषु चन्द्रगोमिः । . . . बृषीति मूर्धन्यान्तेषु विश्वप्रकाशिका (p. 477);

iṣīkā (an elephant's eyeball; 'the under-surface of the top of the eye-socket of an elephant'[1]) and not *īṣikā* as per some of the principal commentators such as Svāmin and Sūrin (p. 506). Numerous are such clarifications of pronunciation given by Malli., his statements being always supported by appropriate authorities.

As a text becomes more and more popular, variants grow like a snowball in its onward march. Malli. takes care to point out such variant readings in the text of Amara. Readings for the word *samākhyā* (fame) are given in the work of Halāyudha, in the *Vaijayantī* and in *Rabhasakośa* as *samākhyā*, *samajñā* and *samājñā* respectively.

समाख्या तुल्यलक्षणमिति हलायुधानुसारी पाठः । यशः कीर्तिः समज्ञा चेत्ययं वैजयन्त्यनुसारिपाठः । कीर्तिः ख्यातिः समाज्ञा चेति रभसकोशः । (p. 111)

In the case of *parivāda* (censure) he has the well-known reading *parīvādaḥ* as illustrated in *Ragh.*:

अत्र परीवादशब्दो दीर्घेकारो ह्रस्वेकारश्च भवति । यथा—मा भूत् परीवाद-नवावतारः (p. 112).

Tamisra (darkness) in the text *tamisraṃ timiraṃ tamaḥ* can also be *tamisrā* as it is included in the Prajñādipāṭha and as Māgha has used it:

[1] Given by Edgerton, Apte's Dict., p. 394.

प्रज्ञादिपाठात् . . . तमिस्रापि भवति । 'स्मररागमयी वपुस्तमिस्रा' इति माघ-प्रयोगात् । (p. 147)

The word *hālāhala* (deadly poison) Malli. shows is *hālāhala* in common usage as in *hālāhalaṃ viṣam ivāpraguṇaṃ tad eva* but *hālahalam* also is in use as in *hṛdaye hālahalaṃ mahad viṣam* (p. 153).

As a general rule Malli. is not satisfied by merely furnishing the different readings but discusses the aptness of the variants. In discussing the word *alinda* (a terrace before a house door) he says that the word may begin with a short or long vowel and quotes an authority for each of them.

अलिन्द इति ह्रस्वादिः । आलिन्द इति दीर्घादिश्च भवति। ह्रस्वादेरुदाहरणम्—'प्रघाणः . . .' इति रत्नकोशः । दीर्घादेः—'गृहैकदेशे . . .' इत्यमरमाला । (pp. 202-3)

The most striking illustration of difference in reading is furnished under the word *kṛṣṇapāka* based on the lexicon *Śabdārṇava*. The three words *kṛṣṇa*, *pāka* and *phala* are combined in all possible ways so as to fill three verses:

कृष्णः पाकः . . . कृष्णफलो वशः । (p. 255)

For the plant named *tṛṇaśūlya* Malli. points out not only the difference in reading but also the consequent change of gender:

सुभूतिटीकायां तृणशूल्या तृणशून्या वेति रूपान्तरसत्ता स्त्रीलिङ्गता चोक्ता । (p. 257)

As in the case of Sūrin's comm. the variants furnished by him are in hundreds.

The use of *śleṣa* (paronomasia or *double entendre*) by well-established authors is utilized by Malli. for the clarification of doubtful sounds in some words. The word *śasya* is found

commonly used [1] in the sense of corn or produce of plants and *sasyam* in the same sense is justified by the *śleṣa* found in *Naladamayantī* (*kathā*?):

'ग्राम्यकविकथाबन्ध इव नीरसस्य-मनोहरो देशः' इति नलदमयन्तीश्लेषाद् द्विदन्त्यः । (p. 224)

A dress or embellishment may be denoted by *veśa* or *veṣa*, the latter word being found in the *śleṣa* [2] in *Kumāracarita*:

'द्वेषरहितमपि सद्वेषम्' इति कुमारचरिते वेषः । (p. 426)

and the former in the *Rabhasakośa*:

'गृहमात्रे च नेपथ्ये वेशो . . .' इति रभसकोशपाठाद् वेशः । (p. 426)

Malli. finds *anuprāsa* and *yamaka* too are useful in the clarification of sounds. The *t* ending of *tanūnapāt* (fire) is confirmed by an alliteration in the *Harṣacarita*:

'तनूनपाति . . . पातयाम्यात्मानम्' इति हर्षचरितानुप्रासात् तान्तः । (p. 39)

According to the *yamaka* in *Daṇḍyalaṃkāra* the synonym for the sun is *sūra* only, beginning with a dental sibilant.

'वारुणी . . . सौरभा · सौरभास्पदम्' इति दण्ड्यलंकारयमकपाठात् सूरशब्दो दन्त्यादिः । (p. 70)

Fullness of treatment supplying a wealth of details, is a characteristic of Malli.'s comm. Amara mentions *kadalī* and five other kinds of deer as the source of deerskin (p. 331). Malli. gives details of these in five verses, describing their colour (*nīlāgrair lomabhir yuktā*), size (*triṃśadaṅgulā*), habitation (*kadalī tu bile śete*), varieties of the same species (*sitaḥ, kṛṣṇaḥ, citraromā*) and furnishes other information useful for their identification. With regard to the spotted deer (*kṛṣṇasāra*) and eleven others mentioned by Amara he gives a supplement

[1] Apte's Dict., p. 1541.

[2] This is to confirm the ending in a cerebral sibilant.

of fifteen hemistichs describing their various features. On insects Amara briefly says '*nīlaṅgus tu krimiḥ. . . .*' The ant (*pipīlikā*) is mentioned in the section on fem. nouns in the Liṅgādisaṃgrahavarga (III. 5. 8). But Malli. gives in the proper place (Siṃhādivarga) a full account of known varieties such as *brāhmī* (big, reddish brown ant), *ulaṃgavaḥ* (big, black ant) and many other varieties.

महान् ब्राह्मी स पिङ्गलः । महान् कृष्ण उलंगवः । (p. 337)

The different kinds of movement of a horse are graphically described by Malli. in contrast to the tame treatment accorded to it by others. *Āskanditam* is a mad gallop when a horse is angered:

कोपात् सर्वपदैरुत्प्लुत्योत्प्लुत्य गमनमास्कन्दितम् ।

Dhauritakam is a movement similar to that of herons, peacocks, etc.:

कङ्कशिखिक्रोडनकुलगतैः सदृशं धौरितकम् । (p. 513)

The three myrobalans taken together (*triphalā*) is a well-known medicine in Āyurveda mentioned by Amara; but Malli. points out the three different combinations set forth in Āyurvedic works:

हरीतकी चामलकी विभीतकमिति त्रयम् । त्रिफला प्रथमा . . . द्वितीया तु त्रिफला . . . तृतीया त्रिफला . . . । (pp. 619-20)

When discussing varieties of food, Amara finds no place for *kṛsaram* (food made of sesamum, rice, etc.) and *saṃyāvaḥ* (similar to vermicelli) which are as old as the *Manusmṛti* (V. 7) and hence Malli. describes them, the latter graphically:

यन्त्रपातितो मृणालतन्त्वाकृतिरोदनः संयावः स्यात् । (p. 584)

It is strange that such a word as *tāmbūlam*, universal in all religious and social functions, should have been overlooked by

Amara, though he mentions *tāmbūlī* and *tāmbūlavallī* (betel vine) in the Vanauṣadhivarga (p. 286). The omission is rectified by Malli. in

ताम्बूलं स्याद् वीटिका स्त्री ताम्बूलं मुखभूषणम् । (p. 588)

Numerous are such additions that Malli. gives in their appropriate places.

Among words of Amara with doubtful derivations is *viśvasṛṭ*, one of the synonyms of Lord Brahmā. Malli. says that according to Subhūti it is *viśvasṛk* formed by *kvinpratyaya*; he also gives the opinion of Rabhasa and others who prefer *ṣatva* forming *viśvasṛṭ*, quoting the relevant *sūtra-s* of Pāṇini in both cases.

सुभूतिना विश्वसृग् विधिरिति प्रत्यपादि । क्विन्प्रत्ययस्य इति कुत्वमिति । ये तु क्विन्नन्तत्वं नेच्छन्ति तन्मते 'व्रश्चादिना' षत्वमिति रभसकोशकारेण तदपाठि विरिञ्चो विश्वसृट् . . . कमलासनः इति । (pp. 14-15)

Bhānujī has later confirmed this interpretation; for he points out that Patañjali has said '*rajjusṛḍbhyām*' under the *sūtra* '*mṛjer vṛddhiḥ*' (VII. 2. 114). The word *saṃkara* (dust sweepings) is *abanta* as per the *Vaijayantī* and *ghañanta*, i.e. *saṃkāraḥ*, according to *Viśva*.

संकरौ इति वैजयन्तीपाठात् संकरशब्दोऽबन्तः । 'संकारो . . .' इति विश्वप्रकाशिकापाठात् संकारो घञन्तः । (p. 207)

The word *kikīdiviḥ* (blue jay) in Amara, '*atha cāṣaḥ kikīdiviḥ*' (p. 339), is variously interpreted. Both Sūrin and Malli. take it also as two words *kikī* (based on its cry) and *diviḥ*. But Malli. adds that the word is also spelt as *kikidīviḥ* on the authority of *Ratnakośa*:

किकी नान्तः, दिविरिदन्तः, नामद्वयमिति केचित् । 'किकिदीविश्चाषः स्यात्' इति रत्नकोशपाठात् तृतीयवर्णदीर्घोऽपि । (p. 340)

Malli. hints that no unnecessary word is found in Amara's text and the seemingly redundant words have a significance. In '*mahājālī sa pītakaḥ*', *saḥ* appears redundant inasmuch as the gender of *mahājālī* and *pītaka* are clear enough by their very form (*rūpabheda*). Malli. points out that this word has been purposely inserted to avoid *sāṃkarya* (closeness), lest one mistake *mahājālī* to be a mas. *nakārānta* word due to its proximity with *pītakaḥ*.

स इति सर्वनामनिर्देशः सांकर्यनिरासार्थः । (p. 285)

As a rule Amara gives words in the singular number only. However, *godhe* and *tale* are in the dual as these gloves are always used in a pair.

हस्तद्वयापेक्षया द्विवचनप्रयोगः । (p. 534)

The words *madhu* and *mādhvīka* (wine) are mentioned by Amara as neuter (*advayoḥ*), but as Durgasiṃha states they may be used both in the mas. and neuter due to their inclusion in the Ardharcādi-gaṇa. Malli. says that the word *advayoḥ* is reminiscent of its optional character.

अद्वयोरिति विशेषविधिर्मधुमाध्वीकशब्दयोरनित्यताज्ञापनार्थः[1] । (p. 644)

The word *saraka* is variously interpreted. Svāmin (p. 235), Sūrin and Bhānujī (p. 405) take it as 'serving wine' though the other meaning of 'a wine cup' is mentioned by them. Malli. interprets it as a cup and shows that the word *api* used by Amara in *sarako 'pi* is intended to connect it with *astrī* previously used; and quoting a number of authorities such as Patañjali, Bhāguri, Sarvadhara, Śeṣakāra and Rudra he winds up the discussion with a citation from the *Vaijayantī*:

अपिशब्देनास्त्रीति पदं सरकेणापि संबध्यते । अत एव 'अर्धर्चाः पुंसि च' इत्यत्र महाभाष्ये सरकः सरकमित्युभयमुदाहृतम् । . . . सरकश्च इति भागुरिः । (p. 646)

[1] *mādhvīkam* is the reading adopted by Malli.

Lucidity is another characteristic of the explanation of those words which Malli. deems worthy of his special notice. Amara distinguishes *koraka* from *kuḍmala*, taking the former to be a bud in general and the latter as a 'half-opened bud'. Malli. points out that Halāyudha is for non-distinction between the two:

केषांचित् कुड्मलकोरकावेकार्थौ । कोरक . . . कुड्मलमुकुलानि तुल्यानि इति हलायुधः । (p. 225)

Ahibhaya is the apprehension of treachery and the danger arising from one's own allies and is explained by Amara as '*svapakṣaprabhavaṃ bhayam*' (p. 501). Malli. elucidates that it is fear of one's own rebellious sons, kinsmen and others allied to him:

पुत्रदायादप्रभृतिस्वपक्षैः कृतं भयमहिभयं स्यात् । (p. 502)

The word *tita-u* (sieve) is as peculiar in formation as it is confusing in its declension. Hence Malli. quotes the relevant *Uṇādi-sūtra*, '*taroter ḍa uḥ sanvac ca*' in its derivation and shows the way for its declension as *tita-ū*, *titavaḥ*, etc. As some lexicons like the *Ratnakośa* take this word as neuter in gender he says:

'चालनं तितउ प्रोक्तम्' इति रत्नकोशमते तितउनी, तितऊनि । (p. 569)

Where misconceptions are likely to arise Malli. gives clear elucidations. Amara correctly gives the general direction '*puṃsi klībe ca*' to certain words denoting poisons such as *kākola* (p. 152). To avoid the possibility of interpreting this direction as applicable to all the poisons mentioned there,

पुंसि क्लीबे च काकोल . . . सौराष्ट्रिक . . . दारदो . . . विषभेदा अमी नव,

Malli. says that the option of being mas. and neuter is confined to the first three words *kākola*, *kālakūṭa* and *halāhala*:

समानसामर्थ्यात् पुंसि क्लीबे चेति विशेषविधिः काकोलादिषु त्रिष्वेव । (p. 152)

In Amara's line '*pratīraṃ ca taṭaṃ triṣu*', Malli. takes care to clarify that the three genders ordained apply to the word *taṭam* only, as *tīram* and *pratīram* can be in neuter alone (*triṣviti taṭamātraviśeṣaṇam*) and he quotes the *Vaijayantī* for this restriction (p. 160). The word *padmākaraḥ* (lake) may seem to apply only to a lake in which there are lotuses, as its derivation is *padmānām ākaraḥ*. Malli. points out that it being *rūḍha* 'popularly accepted and conventional' as well as *yaugika* 'possessing etymological sense', *padmākara* may be a lake with or without lotuses.

पद्माकरशब्दो रूढो यौगिकश्च । तेन पद्मशून्यमपि सरः पद्माकरः स्यात् । (p. 175)

As views on the gender of words differ Malli. sets them forth in appropriate places. The word *ghanarasaḥ* (water) is mas. according to Amara: *meghapuṣpaṃ ghanarasaḥ* (p. 157) and the *Vaijayantī*, *ghanarasaḥ pumān* (p. 158); but it is neuter as given in *Ratnakośa*, *ghanarasam ambhaḥkṣāram*'. Amara mentions as neuter *khātam* (a reservoir dug by men) and *akhātam* (natural reservoir). Malli. adds that the lexicographer Amaradatta has included them in the section on mas. words:

'अखातो देवखातके' इति पुंस्काण्डेऽमरदत्तः । (p. 174)

The word *nirastaḥ* (arrow discharged from a bow) is obviously mas. in form (*rūpa*). But Malli. clarifies that this is so only when it is a noun (*viśesya*); as an adjective (*viśeṣaṇa*) it takes all the three genders (*viśesyanighna*). Similar is the case in regard to the two other words *digdha* and *lipta* (poisoned) mentioned in the same line:

विशेषणत्वे त्रिलिङ्गाः । इषुर्निरस्ता इषुर्दिग्धा इषुर्लिप्तेत्यादि । विशेष्यत्वे पुंलिङ्ग एव । निरस्तो हन्त्येव । दिग्धो हन्त्येवेत्यादि । (p. 536)

In *iṣudhir dvayoḥ* Amara sanctions mas. and fem. to the word *iṣudhiḥ* (quiver). This, Malli. points out, is somewhat

misleading, as it is but a half-truth. If the word *iṣudhi* is formed by using the verb *dhiyati*, it is *ubhayaliṅga*. But if the formation of the word is based on the verb *dadhāti*, it can only be mas.; for *karmaṇyadhikaraṇe ca* by which *kipratyaya* is ordained refers to *ghu* verbs only and it helps to form words in mas. such as *udadhiḥ*:

धियतिधातुसिद्धः इषुधिशब्दः उभयलिङ्गः। दधातिधातुसिद्धः पुंलिङ्ग एव। (p. 537).

The literary acumen of Malli. perceives many a significance missed by most commentators. The word *rathāṅgāhvayanāmakaḥ* in Amara (p. 346) meaning the *cakravāka* (ruddy goose) is literally interpreted by Sarvānanda, Sūrin and Bhānujī, who overlook its two distinct names *rathāṅgāhvayaḥ* and *rathāṅganāman*.

रथाङ्गाह्वयो रथाङ्गनामेति द्वे नामनी इत्यर्थः। (p. 346)

In this connection, Malli. also sets forth the views of various authorities as to the correctness of words like *rathāṅgasaṃjñikaḥ*, *rathāṅgākhyaḥ*, *cakrāhvaḥ*, etc. Subhūti says, in his *Kāmadhenu*, that only *āhvaya* and *nāman* should be affixed to *rathāṅga* (*cakra*); others hold that any word meaning *hūtiḥ* (name) can be added to *cakra*; here Malli. cites a line from Māgha where *hariheti-hūtiḥ* is used to denote a ruddy goose. In conclusion Malli. states that any word meaning *cakra* and *nāman* can be employed to denote the bird, which view is supported by Pratāpa and Yādava.

एतदुक्तं भवति। रथाङ्गाख्यः चक्राह्वः रथचरणनामा इत्यादि . . . तथा च प्रतापः . . . चक्रवाको रथः . . . इति वैजयन्ती। (p. 346)

In Amara's *klībaḥ paṇḍo napuṃsakam*, the word *klībaḥ* is said to be mas. and *napuṃsakam* neuter only. But time and usage have sanctioned *klībam* and *napuṃsakaḥ* to denote a hermaphrodite. Malli. reads this as already sanctioned by

Amara, as the purpose of the *saṃkara* (mixing up of words of different genders) here is a *jñāpaka* (significant usage).

संकरपाठात् क्लीबनपुंसकशब्दौ पुंलिङ्गावपि । अस्त्री नपुंसकं क्लीबं . . . इति रुद्रः । स नपुंसको भवेत् इत्यमरभाष्यकारः । (p. 385)

Aptness of illustration is another noteworthy feature of Malli's comm. The word *āhatam* means an assertion of impossibility for which Malli. gives as illustration the well-known line, 'There goes the son of a barren woman' (*eṣa vandhyāsuto yāti*, p. 116), found also in Apte's Dict. (p. 376). After explaining *makaranda* as honey and adding the form *maranda* given in the *Vaijayantī*, he mentions another word *madhūlikā* which is illustrated by:

अहो मे सौभाग्यं मम च भवभूतेश्च फणितं . . . गिरां देवी . . . मधूलीमाधुर्यं क्षिपति . . .

a verse melting in its appeal but mythical in content, found in the *Bhojaprabandha* (p. 226). *Rajaḥ* (dust) is well known to be a *sakārānta* word and is taken as such by the principal commentators. Malli. notes its use as *akārānta* also as in the well-known verse:

अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनम् ।

which he annotates as *iti purātanaprayogaḥ* (p. 542). On the topic of *apūpa* (Indian cake), Malli. waxes eloquent regarding the varieties, quoting a popular verse '*pūrikayā ghārikayā polikayā*. . .', hinting in unmistakable terms at his own favourite dish (p. 583). Amara has '*pustaṃ lepādikarmaṇi*', indicating thereby 'the art of plastering and making models'. Amplifying this statement with an apt illustration, Malli. adds that the word *pustakam* has the additional sense of a collection of palm leaves (so as to form a literary work).

. . . पुस्तं स्यात् । मृद्दारुचर्मवस्त्राद्यैः . . . पुस्तमुच्यते । . . . तालपत्रादिसंचये च पुस्तकशब्दप्रयोगः । (p. 637)

A person depending on the worship of the gods in a temple for his livelihood is called *devala*: *devājīvastu devalaḥ*. Malli. clarifies with a suitable illustration from a Smṛti work that a person who performs worship for his maintenance for a short period cannot be included in this category; a *devala* is one who remains in that calling for a minimum of three years:

देवार्चनपरो . . . वत्सरत्रयम् । जीवेद् देवलको नाम . . . । (p. 627)

Stating that *upamā* and *upamāna* are *āviṣṭaliṅga*, that which in every relationship preserves its own gender, Malli. gives two apt verses to illustrate them:

रात्रावेव मघावेव राकायामेव सुन्दरम् । मुखचन्द्रस्य ते चन्द्रं कथयेदुपमां कथम् ॥ न मञ्जुभाषणं पद्मं . . . नोपमानं मुखस्य ते ॥ (p. 642)

Ingenious are some of the explanations offered by Malli. to justify additional meanings that he sees in the text of Amara which others have either failed to notice or have left to be understood by the reader. The word *koraka* (bud) is specifically stated to be mas. by Amara in '*kalikā korakaḥ pumān;*' but a master of literature such as Māgha has used the word in the neuter, '*marudavani. . . korakāṇi*' (*Śiśupālavadha*, VII. 26). Malli. cleverly explains that when the gender of a word is easily recognized by its very appearance (*rūpa*) any mention by Amara that it belongs to that particular gender is intended to suggest the *anityatva* (impermanence) of that gender. This is a device well known in the interpretation of the *sūtra-s* of Pāṇini, '*vyarthaṃ sat jñāpayati*'. Hence the mas. of *koraka* is *anitya* and the neuter in *korakāṇi* is justified by Amara's own text:

रूपभेदसिद्धलिङ्गे विशेषविधिरनित्यज्ञापकः । (p. 225)

Drawing attention to the statement in the *Amaravārttika* that *antarikṣa* (sky or atmospheric region) has a long *ī* sound (*antarīkṣa*) he ingeniously explains it as that region which is 'seen' between the earth and the heavens.

अन्तरिक्षमित्यत्र विशेषः। अमरवार्त्तिककारेण वर्णनिर्देशनायां . . . इति प्रत्यपादि। अन्तरीक्ष्यते जगदत्रेत्यन्तरीक्षम्। द्यावापृथिव्योरन्तरीक्ष्यत इति वा।

As for the usage *antarikṣam* in the Veda-s, it is only *chāndasa*, he concludes (p. 51). The tame explanation of *siṃhanāda* by other commentators is that it is a war-cry of soldiers resembling the roar of a lion. Malli. says that the cry resembles the roar of a lion which frightens the war elephants that constituted the most formidable element in the Indian army:

कुञ्जरादिभयार्थकवीरारावनाम। (p. 546)

The word *ādi* in *kuñjarādi* evidently refers to the cavalry as well as to chariot horses.

Popular maxims (*laukikanyāya-s*) are occasionally made to bring home certain explanations that Malli. initiates. On the analogy of *śatamanyu* (performer of a hundred horse-sacrifices) the word *śatamakha* has found favour in popular usage, but parallel to *harihayaḥ*, the word *haryaśvaḥ* is not employed, since certain words have become *rūḍha* such as *harihayaḥ*, but *yaugika* words of the same significance are not allowed.

'प्रायो रूढिर्बलवती' इति न्यायेन . . . हर्यश्वादिशब्दाश्च प्रयोक्तव्या न भवन्ति। (p. 32)

The word *kārā* is explained as 'a prison house', but Malli. adds that according to the maxim of a lion's backward glance, the word is also intended to mean 'captivity'.

कारा सिंहावलोकनन्यायेन बन्धननामापि स्यात्

and he quotes the authority of Śāśvata for this interpretation (p. 552). For ornamental gold, Amara gives the word *śṛṅgīkanakam*, which usage, Malli. says, is similar to *aurvānala* (fire of the submarine fire), according to *gobalīvardanyāya*; for *śṛṅgī* by itself denotes ornamental gold according to *Ratnakośa*:

श्रृङ्गीकनकमित्यौर्वानलादिवत् प्रयोगः । स्त्री श्रृङ्गी मण्डनसुवर्णम् इति रत्नकोशे पृथङ्निर्देशः । (p. 611)

But at the same time he says, in all fairness, that the compound word is also insisted on by some authorities like the *Vaijayantī*:

केषांचित् श्रृङ्गीकनकमिति संघातोऽपि गृहीत एव । अलंकारसुवर्णं तु श्रृङ्गी-कनकमाशु च इति वैजयन्ती ।

The use of popular conundrums (*prahelikā-s*) is another novel feature in Malli's comm. enlivening the otherwise dry as dust derivation of words. White ant (*vamrī*), not mentioned by Amara, has five synonyms and its habitation is given in the form of a popular riddle:

अनेकसुषिरोपेतं कान्तं स्त्रीमुखपङ्कजम् ।
सुसिद्धं त्र्यक्षरोपेतं चक्षुःश्रोत्रमनोहरम् ॥ (p. 337)

So also is the verse:

अष्टौ श्लोकान् कुरुष्वेति पुत्रः पित्रा नियन्त्रितः ।
सप्त श्लोकाः कृतास्तेन पितुराज्ञा न लङ्घिता ॥ (p. 107)

where the word *aṣṭau* is also the locative of *aṣṭi*, the name of a metre. Popular beliefs, interesting but incredible, are also utilized by Malli. in the course of his explanations. The wagtail (*khañjarīṭa*), he quotes from the *Rasaratnākara*, has some mysterious power. If caught and confined in a cage during the month of Phālguna (Feb.-Mar.), the cage becomes invisible when the month of Bhādrapada (Aug.-Sept.) arrives; then only its crest will be visible, *khañjarīṭaṃ sajīvaṃ tu . . .* (p. 340).

Declension of rare forms is another useful feature in Malli.'s comm. The rare form *svapnaj* is declined by him to the joy of students; the fem. forms of *sadhryañc* (accompanying), *viṣvadryañc* (all-pervading) and *tiryañc* (oblique) are also noted (III. 1. 33). The word *samam* in Amara's '*atha samaṃ*

sarvam ' (III. 1. 64) is fully interpreted by Malli. showing that the word is *sarvanāman* (pronoun) only in the sense of ' all ' and that in the other remaining senses of ' equal ', etc. it should be declined as an ordinary noun. He gives examples such as *samaḥ samau same*, *samasmai*, *sameṣām* when it is a *sarvanāman* and

समाय समानायेत्यर्थः । समानां संवत्सराणामित्यर्थः । समे साधावित्यर्थः ।

for the other senses. The word *kāṣṭhatakṣ* (carpenter) is somewhat puzzling in its declension and hence he gives the forms as *kāṣṭhataṭ kāṣṭhatakṣau kāṣṭhatakṣaḥ* (p. 625). The declension of the word *tita-u* (sieve) has already been referred to (p. lvi). Malli. adds *sauḥ* as an epithet of the goddess Pārvatī and declines it as ' *sauḥ savau savaḥ*, *savam savau savaḥ* (p. 28). As Uśanas (planet Śukra) is *sānta*, *nānta* and *adanta* in its vocative he gives these forms quoting the relevant *sūtra-s*.

हे उशनः, हे उशनन्, हे उशन (p. 67).

Malli. seems to have a flair for unearthing odd sounding words from various authors and lexicons. This happens too often to be considered as fortuitous. When explaining the word *trisaṃdhyam* (the triad of junctures or twilights) he cannot resist the temptation of mentioning the alternate form *trisaṃdhyī*, just because some people say that such a form exists.

त्रिसंध्यी इति च कतिचित् कथयन्ति । (p. 76)

The term *hradaḥ* for a reservoir is well known but Malli. fishes out *drahaḥ* which sounds quaint, but derives authority from Trivikrama.

द्रहः संस्कृतेऽपि इति त्रैविक्रमवचनाद् द्रहोऽपि ह्रदनाम । (p. 173)

For the word *puṣpavāṭikā* (flower garden) he gives a strange sounding word *purpavāṭikā*.

पुर्पवाटिकेत्यत्र सस्य पाक्षिको रेफादेशः । (p. 216)

Some writers, Malli. says, prefer the word *turtūraḥ* for *dhuttūra* (white thorn-apple) (p. 261). The blue jay (*cāṣa*) can also be *cāsa* as the well-known *Rabhasakośa* sanctions it (p. 340). The word *yuvānaḥ* (young men) is *akārānta* as well, for Trivikrama alludes to it, there being such usages in literature.

युवानः संस्कृतेऽपि इति त्रिविक्रमवचनाद् अकारान्तो युवानशब्दोऽप्यस्ति । प्रयोगश्च—'. . . युवानैः' इति । (p. 386)

In *vrate rāmbhas tu vaiṇavaḥ* all well-known commentators take *vrate* as the loc. of *vrata* (vow). Malli. ingeniously takes it as *vrateḥ* and says that the *repha* in the *saṃdhi* is dropped by Pāṇini's rule '*ro ri*'. To emphasize the existence of the word *vrati* he gives illustrations such as '*vrateḥ palāśaḥ*' and '*vrater veṇudaṇḍaḥ*. . .' But in no well-known lexicon, ancient or modern, is that word found and even in Malli's 'bible', the *Vaijayantī*, this word is not traceable. The twang made by a bow in battle is *visphāraḥ*; Malli. says *viṣphāraḥ* is also correct as the *sūtra* '*sphurati* . . .' (VIII. 3. 76) sanctions it optionally (p. 547). The word *musala* (pestle) may also be *muṣala* (p. 569) and *heman* for gold is also *hema* (p. 610). *Panasa* (jack tree), Malli. notes is *phanasa* according to some and *paṇasa* in the opinion of others.

पवर्गद्वितीयादिरिति केचित् । पणस इति टवर्गमध्यम इति केचित् । (p. 251)

The sun is *bāḥkara* and *ahaḥkara* in addition to *bhāskara* and *ahaskara* (p. 70).

Malli. is not lacking in intellectual courage, for he does not hesitate to criticize when necessary the views of previous commentators. But he is not distinguished for moderation of language. Some have interpreted the word *hāhā* to be an imitation of the musical sounds ever present on the lips of Gandharva-s (semi-divine musicians) and declare that the word is not capable of derivation. Condemning such ignorance, Malli. says:

हाहाशब्दो धातुजो न भवतीति केचित् व्याचक्रिरे। तज्जल्पितमज्ञानविजृम्भितमेव। हेति निन्दितं ध्वनिं जहातीति हाहा इत्यमरभाष्यकाराः प्रतिजानते। (p. 37)

In a covert reference to Sūrin's interpretation of *grāha* as 'a horse-faced aquatic creature' and *kumbhīra* as 'a crocodile or shark capable of dragging elephants into the water', Malli. says:

घोटकमुखमीननामनी इति वदन्ति। तदसत्। उदकचरमण्डलिसर्पनामनी . . . गजाकर्षणमत्स्यनामनी इति केचित्। तदज्ञानविजृम्भितम्। (p. 170)

This censure pronounced on Sūrin is an unjust representation of his erudition, for *ajñāna* may not be the monopoly of his opponents; since some *kumbhīra* sharks are quite capable of dragging elephants into the waters (witness '*nakrākrānte karīndre*. . .' in the *Bhāgavata*). Some commentators explain the *rohitaka-vṛkṣa* as a variety of the thorny Palāśa tree. Malli. being perhaps familiar with this tree in the Magadha country castigates this 'play of ignorance'.

स च मगधविषयप्रसिद्धः। कण्टकपलाश इति केचित्। तदज्ञानविलसितमेव।
(p. 245)

The *sūtra-s* of Pāṇini are not generally quoted by Malli. as he does not, as a rule, give the derivation of Amara's words. But occasionally, when he finds that certain words require derivation at his hand, he quotes the *sūtra-s*. *Vaiśravaṇa* (Kubera) has grammatical peculiarity:

विश्रवःशब्दात् 'तस्येदम्' (४. ३. १२०) इत्यणि कृते विश्रवसो विश्रवणरवणाविति प्राप्ते विश्रवणादेशे वृद्धौ वैश्रवण इति रूपं सिद्धम्। (p. 48)

The word *bharatāḥ* (actors) has a peculiar formation in the plural and hence he gives the relevant *sūtra-s* for its derivation. As the word *bharata* is included in the *utsādi* group, the affix *añ* is added to it resulting in *bhārataḥ*, but by '*yañañoś ca*' it loses its *gotra* affix *añ* in the plural. Hence *bharatāḥ* is the resultant form.

भरता इत्यत्र उत्सादित्वादञ् । भारतः, भारतौ । 'यञञोश्च' इति बहुत्वे लुकि भरताः । (p. 627)

Concerning the formation of the word *śūrpa* (winnowing basket), Malli. quotes the *Uṇādi sūtra* '*suśṛbhyāṃ nic ca*' and draws attention to its exceptional character:

इति शृणातेः पप्रत्यये उद्रपरत्वदीर्घत्वानि ।

He further notes that the word may also begin with a dental as *sūrpam* on the authority of Puruṣottama (p. 569).

Malli.'s humour is delightful, but occasionally pungent. When giving an illustration for the word *vāsūḥ* (a young woman connected with the theatre) he says,

वासुदेवालयं गत्वा सोमं शंकरमर्चय ।

('Worship Lord Śiva and the moon by going to the temple of Lord Viṣṇu: Girl, go to the temple and worship Śiva and Pārvatī); evidently he has a large number of such popular lines in his repertoire. Illustrating the use of the word *sasya* (vegetable), he quotes the line:

ग्राम्यकविकथाबन्ध इव नीरसस्य-मनोहरो देशः । (p. 224)

Noting Amara's omission of a word for a 'hairy person', Malli. gives '*romaśo lomaśaḥ samau*' and explains that a person with a profusion of hair all over the body resembles a bear:

भल्लूकवत् प्रवृद्धरोम्णो नामनी । (p. 388)

Badarā (cotton plant) is fem. according to Amara; it ends in *ṭāp* according to Subhūti but ends in *ṅīṣ* on the authority of *Viśva.* and is neuter if the fruit is meant; in order not to leave out the remaining gender, he says it is mas. as given in *Amaramālā*: *kārpāso badaraḥ proktaḥ* (p. 284). The word *guṇa* has also the meaning of a cook and to illustrate this he quips that the lady at home is 'the beloved wife, the cook and the maid of all work rolled into one',

कान्ता चेयं गुणा चेयं प्रेष्या चेयं मर्मिकिका । (p. 570)

Most of the commentators on Amara have systematically turned their backs on the question of supplementing his vocabulary. But Malli. evidently acted on the principle that the usefulness of a lexicon is less impaired by an abundance rather than a paucity of words. He gives 12 additional words for Indra to Amara's 35, 20 more for Lord Viṣṇu to Amara's 30, and 21 for a coconut against the 2 mentioned by Amara. He generally starts with the characteristic expression *anuktam* and then a string of words follows, especially at the conclusion of each sub-section in the homonymous section. These words with little scope for any explanation are exhaustive and in many cases exhausting to the reader. Thus at the conclusion of the *tānta* words (*vivasvat*), he adds more than ten verses and at the end of the *rephānta* words (*vāra*) he has more than sixteen additional verses.

But the supplementary words in all other places are informative, useful and interesting. He adds thousands of words to the original. Where the text gives *sukarā* for a docile cow *syād acaṇḍī tu sukarā*, Malli.'s supplement, *sukatā tadviparyaye*, mentions a vicious cow which is active with its hoofs and horns. When Amara gives *suvratā sukhasaṃdohyā*, Malli. mentions the opposite:

करटा तद्विपर्यये । प्रयासेन संदोह्या गौः करटा स्यात् । (p. 596)

Malli. dives into various sources of information such as the work of Dhanvantari; e.g. the herb *balā*, an important and well-known medicinal plant (Tamil: Tippili or Cittāmuṭṭi)[1] is mentioned by Amara, but the related names *atibalā* and *mahābalā* are supplied by Malli. (p. 278).

Malli. is no purist, who rejects outright current words of Prakrit origin. But he takes care to be in approved

[1] *Vaijayantī* II. p. 653.

company in so risky a venture. *Aṅkura* (sprout) has an alternate form of Prakrit origin, *aṅkila*, that has gained currency and hence he accepts it:

अङ्किलः प्ररोहोऽप्यत्रेति सुभूतिटीकावचनात् प्राकृतरूपस्यापि ग्रहणम् ।
(p. 217)

He also approves of the Prakrit form *iṅgāra* for *aṅgāra* (charcoal), and also mentions *iṅgāla* used by Śrī Harṣa in the *Naiṣadha*:

'हरनयनेङ्गारितो मदनः' इति प्राकृतरूपस्यापि ग्रहणम् । 'इङ्गारो . . .' इति रभसकोशपाठात् प्रयोगार्ह एव । 'वितेनुरिङ्गालमिवायशः परे' इति नैषधः ।
(p. 572)

In accepting some other words like *siṃhiṇḍa*, Malli. is in the distinguished company of Dhanvantari and Yādava.

'प्रायो जनाः . . . प्राकृतमित्यदोषः' इति धन्वन्तरिवचनात् प्राकृतग्रहणम् । 'सिंहुण्डः . . .' इति वैजयन्त्यामपि प्राकृतग्रहणमेव कृतम् । (p. 277)

The words *indindira* and other synonyms of *madhukara* (bee) given by the author of *Śeṣa* are *deśya* words according to Svāmin, and Malli. accepts them as such:

इन्दिन्दिरचञ्चरीकरोलम्बभसलशब्दा देश्या इति स्वामी । (p. 352)

Malli. gives the Telugu meaning of Amara's words almost everywhere in his comm. Some of the Telugu equivalents may be archaic and sound strange to modern ears. Sūrin gives *vepa* for the Nimba tree while Malli. has *vempa* (p. 252). Khadira is *candraceṭṭu* to Sūrin and *caṇḍraceṭṭu* to Malli. Sūrin gives the word *devatāḍi* for which Malli. supplies *ḍāpara-ḍaṅgi*. Jasmine is *molla* to Sūrin and *mulla* to Malli. (p. 257). The medicinal plant *balā* is *ciṭṭāmudapuceṭṭu* in Sūrin's comm. whereas *muttuvapulagamu* is given in Malli.'s comm. (p. 278). *Kokila* (cuckoo) is *koyala* (*Koyila* B_1, K_6) in Sūrin's work but *kokila* in Malli.'s.

Malli.'s comm. has a very large number of quotations (975 in the two Kāṇḍa-s). He gives no less than 213 citations

in the first two Kāṇḍa-s from the *Vaijayantī*. Some of the authors mentioned by him are not traceable in the *Catalogus Catalogorum* and it may be presumed that they were his contemporaries. We give below a list of authors and works cited by Malli., the number in brackets indicating the number of citations in the first two Kāṇḍa-s.

1.	अजय	(1)	27.	कामन्दक	(1)
2.	अजयपाल	(2)	28.	कामन्दकीयनीतिसार	(2)
3.	अनर्घराघव	(1)	29.	कालिदास	(10)
4.	अनेकार्थसमुच्चय	(1)	30.	काशिका	(2)
5.	अभिधानद्रव्यावलि (धन्वन्तरीयनिघण्टु)	(1)	31.	किरातार्जुनीय	(1)
			32.	कुमारचरित	(1)
6.	अभिधानरत्नमाला (हलायुध)	(58)	33.	कुमारचरितालंकार	(1)
7.	अमरदत्त	(1)	34.	कुमारसंभव	(8)
8.	अमरभाष्यकार	(2)	35.	कैयट	(1)
9.	अमरमाला	(7)	36.	क्षीरस्वामिन्	(4)
10.	अमरवार्त्तिककार	(1)	37.	,, टीका	(1)
11.	अमरसिंह	(1)	38.	क्षुर	(5)
12.	अमरुक	(1)	39.	गोपाल	(3)
13.	अमरुशतक	(1)	40.	गोपालित	(5)
14.	अरुणदत्त	(5)	41.	गोवर्धन	(1)
15.	आयुर्वेदप्रकाश	(1)	42.	गौड	(2)
16.	आश्चर्यपदमञ्जरी	(1)	43.	चन्द्रकाव्य	(3)
17.	आश्चर्यमञ्जरी	(1)	44.	चन्द्रगोमिन्	(2)
18.	इन्दु	(3)	45.	,, लिङ्गानुशासन	(1)
19.	उत्तररामचरित	(2)	46.	चिन्तामणि	(1)
20.	उत्पलमाला	(1)	47.	जयकोश	(2)
21.	उदारराघव	(1)	48.	ज्ञानपत्र	(1)
22.	ऋग्वेद	(1)	49.	टीकासर्वस्व	(9)
23.	कर्पिणाभ्युदय	(3)	50.	,, कार	(2)
24.	कातन्त्रसूत्र	(1)	51.	तारकाख्यान	(1)
25.	कादम्बरी	(2)	52.	तारपाल	(4)
26.	कामधेनुकार	(1)	53.	तैत्तिरीयसंहिता	(5)

54. त्रिकाण्डशेष (17)
55. त्रिविक्रम (1)
56. त्रैविक्रम (1)
57. दण्ड्यलंकार (1)
58. दुर्गसिंह (2)
59. देवीशतक (1)
60. द्रव्यावली (4)
61. द्विसंधानकाव्य (राघवपाण्डवीय) (4)
62. धनंजय (10)
63. ,, निघण्टु (2)
64. धनपाल (2)
65. धन्वन्तरि (7)
66. ,, निघण्टु (12)
67. धरणि (1)
68. धर्मशर्माभ्युदय (6)
69. धातुप्रदीप (2)
70. ध्वनिमञ्जरी (1)
71. नलदमयन्ती(श्लेष) (1)
72. नलोदय (1)
73. नागभूपालीय (1)
74. नाट्यशास्त्र (1)
75. नानार्थशास्त्र (1)
76. नाममाला (7)
77. नामलिङ्गानुशासन (1)
78. नारद (1)
79. निघण्टुसर्वकष (1)
80. नीतिगजाङ्कुश (1)
81. नीतिशतक (1)
82. नैषध (3)
83. न्यास (1)
84. पाणिनीय (1)
85. पारिजात (1)
86. पुराण (1)
87. पुरुषोत्तम (1)
88. प्रताप (7)
89. प्रसन्नराघव (1)
90. प्राकृतसंजीविनी (1)
91. बाण (1)
92. बालभारत (1)
93. बृहस्पति (1)
94. भट्टि (4)
95. ,, काव्य (4)
96. भर्तृहरि (1)
97. भागवृत्ति (2)
98. भागुरि (4)
99. भारवि (1)
100. भावप्रकाश (1)
101. भाषावृत्तिकार (1)
102. भाष्य (महाभाष्य) (1)
103. भोज (1)
104. भोजप्रबन्ध (2)
105. भोजराज (1)
106. मत्स्यपुराण (1)
107. मनु (7)
108. मनुस्मृति (3)
109. मयमत (1)
110. महाभारत (2)
111. महाभाष्य (3)
112. माघ (18)
113. ,, काव्य (1)
114. माधव (5)
115. माधवीयपाठ (1)
116. मेघसंदेश (3)
117. यादव (8)
118. ,, प्रकाश (1)
119. योगशतक (1)
120. रक्षित (1)
121. ,, वचन (1)

122. रघुवंश (14)
123. रत्नकोश (2)
124. „ नाममालिका (1)
125. रत्नमाला (2)
126. रभस (3)
127. „ कोश (28)
128. „ „ कार (4)
129. रसरत्नाकर (1)
130. राघवपाण्डवीय (9)
131. रामायण (1)
132. रुद्र (15)
133. रुद्रटालंकार (1)
134. रुद्राभिधानकोश (3)
135. ललितासहस्रनाम (1)
136. लिङ्गभट्टीय (1)
137. लिङ्गसंग्रह (1)
138. लिङ्गानुशासन (1)
139. „ अरुणदत्त (4)
140. „ चन्द्रगोमिन् (1)
141. „ वामन (2)
142. वसन्तराजीय (1)
143. वाक्चन्द्रिका (1)
144. वाग्भट (1)
145. वाचस्पति (1)
146. वाजसनेयिसंहिता (1)
147. वामन (5)
148. वामनसूत्र (1)
149. वासवदत्ता (3)
150. विक्रमोर्वशीय (1)
151. विजयकोश (1)
152. विदग्धकण्ठाभरण (2)
153. विश्व (2)
154. विश्वप्रकाशिका (19)
155. विष्णु (पुराण) (1)
156. विष्णुस्मृति (1)
157. वेणीसंहार (1)
158. वेदभाष्य (4)
159. वैजयन्ती (213)
160. वैद्यक (18)
161. वैराग्यपञ्चक (2)
162. वैराग्यशतक (1)
163. व्याडि (7)
164. शंकर (1)
165. शंकराचार्य (1)
166. शब्दार्णव (1)
167. शाकटायन (3)
168. „ मत (3)
169. „ वृत्ति (1)
170. „ व्याकरण (1)
171. शातातपस्मृति (1)
172. शाश्वत (3)
173. „ कोश (1)
174. शिशुपालवध (24)
175. शृङ्गारप्रकाश (2)
176. शेष (56)
177. „ कार (2)
178. श्रुति (2)
179. संगीतमकरन्द (1)
180. सज्जन (1)
181. सरस्वतीकण्ठाभरण (1)
182. सर्वधर (1)
183. साहित्यकल्पवल्ली (1)
184. सुबोधिनी (टीका) (2)
185. सुभूति (3)
186. „ टीका (25)
187. सुरसिंह (1)
188. सोमजात (1)
189. सोमदेवनीति (1)

190. सौन्दर्यलहरी	(1)	195. हर्षचरित	(1)
191. स्मृति	(3)	196. हर्षचरिताभ्युदय	(1)
192. स्वामिन्	(3)	197. हलायुध	(61)
193. हनुमन्नाटक	(1)	198. हारावलि	(2)
194. हरिप्रबोध (यमक)	(2)		

Many of the quotations have been identified, though several printed editions have no index and the cited items are not the beginnings of verses. But many others remain to be traced, for the author does not mention the source in many cases.

Malli.'s style is easy and flowing. Its general nature cannot be judged on seeing his first sentence which is a series of very long compounds, reminiscent of Bāṇa's works. Simple but effective are his explanations in general; e.g. the kind of ox which can do only one kind of work is *ekadhurīṇa*. Malli. says:

हलं विना शकटं न वहति ; शकटं विना हलं न वहति ; इत्येतादृग्विधैकधुरावहो वृषः ; तस्मिन् एकधुरीणैकधुरशब्दौ स्याताम् । (p. 592)

His knowledge of grammar is specially deep, enabling him to point out certain subtle points missed by many commentators. Dealing with the topic of cows of different ages, the three year olds, four year olds, etc. he shows that words like *ekahāyanī* can have *ṅīp* by *vayasi prathame* only with reference to the ages of living beings; otherwise there can be *ṭāp* only, as in *dvihāyanā citragavī*. Further the *ṇatva* in *trihāyaṇī* (three year old) is permissible only when it refers to the age of living beings and not when the age of inanimate things is denoted:

णत्वमपि वयस्येव स्मर्यत इत्यनेनान्यत्र णत्वं न भवति । चतुर्हायना लेख्यगवी । (p. 594)

His grammatical knowledge is not confined to the *Aṣṭādhyāyī* of Pāṇini; he often refers to other systems of grammar such as

that of Śākaṭāyana. The word *baṣkayaṇī* is interpreted by Svāmin, Sūrin and others as a cow whose calf is full grown, '*ciraprasūtagornāma*'. But Malli. following Śākaṭāyana says:

बष्कयेण नीता अनुगता बष्कयणीति शाकटायनव्युत्पत्त्या । बष्कयो नामैकवत्स-रवत्सः । (p. 596)

Śākaṭāyana's views are again referred to supplement Amara's statement that *ardhanāvam* (half a boat) is neuter only; for the former mentions it as fem. also.

अर्धनावमर्धनावीति हि स्त्रीनपुंसकयोर्दृश्यत इति शाकटायनः । (p. 164)

Pāṇini ordains the substitution of *v* for the *ū* of *varṣābhū* (frog) when a case affix beginning with a vowel follows (*varṣābhvaś ca*). But Malli. adds that this holds good for the word *karabhū* (finger-nail) as well, as Śākaṭāyana sanctions it.

'दृन्पुनः . . .' इति शाकटायनशास्त्रे करभूशब्दस्यापि यणादेशः । (p. 172)

The Kātantra system of grammar too is not neglected, for he quotes a *sūtra* '*dyor govad vibhaktau*' to justify the peculiar declension of *sauḥ* (Gaurī) (p. 28).

The profundity of his scholarship may be guaged by his close acquaintance with such works as the *Saṃgītamakaranda* of Nārada, the grammatical comm. of *Kaiyaṭa*, the Jaina work *Dharmaśarmābhyudaya*, the Buddhist poem *Karpi(pphi)ṇābhyudaya* and a thorough mastery of the *pañca-mahākāvya-s*. Extensive also is Malli.'s knowledge of medical authorities. He often cites Vaidyaka with special reference to Dhanvantari whom he quotes over twenty times, as well as the *Yogaśataka*, etc. The plant *ikṣugandhā* has a synonym in *balvajāḥ* which Amara says is mas. in gender and pl. in number. But Malli. points out that the word has been used by Patañjali in the singular.

'एकश्च बल्वजो बन्धनेऽसमर्थः' इत्यर्थवत्सूत्रे महाभाष्यप्रयोगदर्शनादेकवचनान्त-त्वमपि । (p. 317)

He also clarifies that this is a kind of grass similar to the *muñja*, used for making a bowstring or the girdle of an initiated student. His learning includes the science of omens (*śakuna*); he gives extensive details from the *Vasantarājīya*, e.g. that among sparrows (*caṭaka*) of various colours, the black variety plays a big role in the field of omens.

तदुक्तं वसन्तराजीयाख्ये शकुनग्रन्थे—'श्यामा वराही . . . ।' (p. 342)

His deep study of the Veda-s and the *Vedabhāṣya* is seen in discussing the etymology of some words. The word *śitpuṭa* as a synonym of *bhramara* quoted from the *Taittirīya Saṃhitābhāṣya* is ignored by other commentators:

'बृहस्पतये शित्पुटः पीतभ्रमरः' इति वेदभाष्यम् । (p. 352)

Also quoted are the *Vedabhāṣya* to add *plava* (watercock) to the list of birds, and the *śruti* (*Taittirīya Saṃhitā*) to show that *tittiri* (partridge) is a favourite bird of the Rudra-s, *rudrāṇāṃ tittiriḥ* (p. 355). His knowledge of political science is witnessed by citations from a large number of authorities such as Kāmandaka, Sajjana, Bṛhaspati, *Nītigajāṅkuśa*, *Somadevanīti* and *Dhvanimañjarī*. Dealing with the position of the feet of an archer, Amara says, *ityādi sthānapañcakam*; Malli. supplements the statement by quoting the relevant portion from *Dhanurveda*:

'. . . मण्डलमिति धनुर्वेदोक्तानि पञ्च धनुर्धरस्थानानि । (p. 534)

We have seen in the foregoing pages some of the salient features of two of the South Indian commentaries. The comm. of Bommagaṇṭi is even more learned as will be seen in the volume to follow.

अमरकोशः

दाक्षिणात्यव्याख्योपेतः

प्रथमकाण्डः

१. स्वर्गवर्गः

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रियै चामृताय च ॥ १ ॥

अमरपदविवृतिः लिङ्गयसूरिकृता

शिवं [1]हरिं विधातारं [2]तत्पत्नीस्तत्सुतान् गुरून्[3] ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ॥
पदवाक्यप्रमाणज्ञैः क्षीरस्वाम्यादिसूरिभिः ।
कृतान् ग्रन्थान् समालोच्य[4] बालानां सुखबुद्धये ॥
[5]यत् कृतं [6]सुरसिंहेन नामलिङ्गानुशासनम् ।
तत्रस्थायाः पदावल्या [7]विवृतिर्वक्ष्यते मया ॥

<u>यस्येति</u>—हे धीराः विद्वांसः यस्य [8]गुणाः अनघाः निर्मलाः स देवः श्रियै[9] च अमृताय च मोक्षाय[10] च सेव्यताम् आराध्यताम्,[11] [12]भुक्तिमुक्तिफलावाप्त्या[13] इत्यर्थः । किंविशिष्टस्य? ज्ञानं च दया च तयोः सिन्धुः तस्य [14]ज्ञानदयासिन्धोः । अगाधस्य [15]विषय[16]लिप्साविरहितस्य । किंविधः? अक्षयः क्षयरहितः । श्लोकोऽयं समुद्रपक्षेऽप्यूहनीयः । [17]अस्य विष्णोः क्षयो निवासः अक्षयः ॥ १ ॥

[1] A, T add गुरुं. [2] तत्पत्नीं T. [3] च वै W_1; इमान् B_2. [4] °लोक्य A, B_1, C, D_1, K_1. [5] तत्कृतं K_2, T; यत्कृतिं W_2. [6] सूरि° W_1. [7] विवृत्तिः W_1. [8] Y adds देवस्य. [9] D_1, K_2, W_1 add लक्ष्म्यै; gap in U; श्रिये W_2. [10] W_1

omits. [11] U omits. [12] T omits मुक्ति. [13] °व्याता T; प्रदातृत्वात् तस्येति भाव: B_2, C, D_1. [14] K_5, W_2 omit. [15] विषये W_1. [16] वीप्सा W_1; B_2, O, D_1 omit लिप्सा. [17] अकारवर्णवाच्यस्य C.

अमरपदपारिजातः मल्लिनाथसूरिकृतः

आकण्ठपौरुषमतो वारणतां विघ्नवारणेनैव ।
प्रथितां बिभ्रदशेषत्रिदशोपास्यं परं महः सेवे ॥
उक्तानुक्तनिरुक्तचिन्तनफलां टीकां सुभूतेः परा-
मालोच्यामरभाष्यवार्त्तिकमुखान् ग्रन्थान् बहूनादरात् ।
व्याचक्षेऽमरसिंहनामकमहं श्रीवत्सगोत्रोद्भवो
[1]बोल्लार्टिन्मिनृसिंहसूरितनयः श्रीमल्लिनाथो मुदा ॥ *

इह खलु निखिलफणिपतिविततमतकमलनिलयकबलनकलशतनयः कविवरकरटि-निकरसिंहामरसिंहः[2] [3]प्रक्रम्यमाणनिबन्धनरत्नपरिपन्थिनिरन्तरान्तरायतिमिरपटलनियुत-मिहिरसमानामभिनवाधिकृतदेवतोपासनामनेन निबध्नाति यस्येति—तत्र देवतायाः परममहत्त्वख्यापनार्थं समुद्रत्वमारोपितम् । तत् कथम् । यस्यागाधस्य मन्दरगिरिमूल-[4]कर्षणेनाकलुषितस्य ज्ञानदयासिन्धोः । क्षीरस्य सिन्धुः क्षीरसिन्धुरिति यावत् । ज्ञान-दययोः सिन्धुः ज्ञानदयासिन्धुरिति आधाराधेयभावसंबन्धेन । समस्त[5]विषयकानुभवस्य [6]सकलजगदुद्धारकदयायाश्चाधारभूतसिन्धोर्गुणा[7] अलङ्घ्यत्वादयः[8] । अनघाः तरुचरनि-करलङ्घितत्वादिदोषेणादूषिताः । अक्षयः कलशसुतकरतलाचुलुकितः । स शैवानां शिवः वैष्णवानां विष्णुः, जैनानां जिनः, बौद्धानां बुद्ध इति तत्तदधिदेवतापूर्वसिन्धुः । हे धीराः हे विद्वांसः । श्रियै चामृताय च नारायणनाकपालैकविषयसर्वजनयोगिविषयभूत-श्र्यमृतयोः । भवद्भिः सेव्यताम् । त्रिवर्गसंपत्तेर्मोक्षस्य चाराध्यतामित्यर्थः । किं च । यस्यागाधस्य शेषवाचस्पतिप्रभृतिभिरपि वर्णितुमशक्यस्य । ज्ञानदया ज्ञानदानसंपत्त्या । ज्ञानस्य दाः दानम् ईः संपत्तिः । तया ज्ञानदयेत्युपलक्षणतृतीयया उपलक्षितस्येत्यर्थः । सिन्धोर्गुणाः प्रसादमाधुर्यादयः[9] । अनघाः पापरहिताः । अक्षयः सकलजनैरुम्भितोऽप्य-क्षीणः । स विद्वज्जनाधिदेवतापूर्वसिन्धुः । धीराः श्रियै चामृताय च । सिन्धुर्लक्ष्मीसुधयोः सेव्यः । 'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवति' (cf. महा-भाष्य, ६. १. ८४) इत्यागमात् । वाचस्तत्साध्यस्वर्गस्य च भवद्भिः सेव्यताम् ।

लक्ष्मीसरस्वतीधात्रीत्रिवर्गसंपत्तिविभूतिशोभासु ।
उपकरणवेषरचनावसुधासु श्रीरिति प्रथिता ॥

* A_1 has nine additional introductory verses, some of them containing contradictory statements.

'अमृतं दिवि खे मोक्षे', 'यज्ञशेषेऽमृताशने' इत्युभयत्र व्याडिः। अनेन परब्रह्म-शब्दब्रह्मणोरुपास्तिराचरिता[10] ॥ १ ॥

[1] बोल्लापिन्नि B₃. [2] सिंहः सुरसिंहः B₃, B₄. [3] प्रक्रंस्यमान° B₃. [4] B₃, B₄ omit मूल. [5] A₁ adds वस्तु. [6] A₁ adds दुःखनिमग्न°. [7] °भूतस्य B₄. [8] °त्वादिगुणाः A₁. [9] °आदिगुणाः A₁. [10] A₁ adds उभयत्र देवता°.

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

(वि.) समाहृत्येति—अन्यतन्त्राणि निघण्ट्वन्तराणि[1] समाहृत्य एकीकृत्य संक्षिप्तैः संकुचितैः प्रतिसंस्कृतैः पर्यायपदैः वर्गैः [2]सजातीयसमूहैः साङ्गोपाङ्गशब्दसमूहैश्च नाम्नां[3] [4]वृक्षादिपर्यायाणां लिङ्गानां स्त्रीपुंनपुसकानाम् [5]अनुशासनं शिक्षा संपूर्णं [6]रूढपर्यायपरित्यागेनोच्यते ॥ २ ॥

[1] W₂ adds कुत्रचित्. [2] सजाति° D₁; सजातीयस्य K₂. [3] W₂ adds पदानां. [4] B₂, W₂ omit वृक्षादि. [5] D₁ omits. [6] रूढि° W₂.

(पा.) शास्त्रप्रारम्भे विशिष्य प्रयोजनं प्रथयति—समाहृत्येति—अन्यतन्त्राणि समाहृत्य कतिचिल्लिङ्गहीनानि[1] कतिचिदसंक्षिप्तानि कानिचिदप्रतिसंस्कृतानि कानि-चिद्वर्गहीनानि। तस्मादन्यतन्त्राण्येकीकृत्य। संक्षिप्तैः स्तोकाद्भूयोऽभिधानं संक्षेप इति लक्षणस्याश्रयैः प्रतिसंस्कृतैः [2]असूक्तिपरिहारः प्रतिसंस्कार इति लक्षणस्य विषयैः वर्गैः सजातीयपदसमूहैः नामलिङ्गानुशासनमित्येतत्तन्त्रं संपूर्णं लिङ्गाद्यविकलं यथा तथोच्यते ॥ २ ॥

[1] °विहीनानि B₄. [2] अनुक्ति° B₄.

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

(वि.) प्रायश इति—स्त्रीपुंनपुसकं प्रायशः प्रायेण रूपभेदेन ज्ञेयम्[1]। तद्यथा—[2]'बुद्धिर्मनीषा धिषणा' इति (१. ५. १)। कुत्रचित् साहचर्यात् ज्ञेयम्। तद्यथा—'तटित् [3]सौदामिनी' इति (१. ९. ३)। क्वचित् तेषां [4]लिङ्गानां विशेषविधेः ज्ञेयम्। [5]कथम्? 'भेरी स्त्री दुन्दुभिः पुमान्' इति (१. ७. ६)। एवं लिङ्गत्रयेऽपि ऊहनीयम् ॥ ३ ॥

[1] ज्ञातव्यं K_2. [2] D_1, K_1, U, W_2 omit बुद्धिः. [3] सौदामनी D_2, K_1, K_3. [4] K_1 adds भिन्न°. [5] तद्यथा B_2, D_2; यथा W_1.

(पा.) संक्षेपप्रकारं प्रदर्शयति प्रायश इति—प्रायशः प्रचुरं रूपभेदेन[1] नियतरूपेण, कुत्रचित् रूपभेदाप्रतीतस्थले साहचर्यात्, तद्विशेषविधेः क्वचित्, यत्र रूपभेदप्रतीतिर्नोदेति,[2] यत्र साहचर्यं च न निमित्तं, यत्र [3]साहचर्यलिङ्गापवादः, यत्रानेकलिङ्गत्वं, तत्र विशेषविधेः स्त्रीपुंनपुंसकं ज्ञेयम्। रूपभेदस्योदाहरणम्—

'हरीतकी हैमवती रेचकी श्रेयसी शिवा'। (२. ४. ५९)
'उन्मत्तः कितवो धूर्तो धुत्तूरः काञ्चनाह्वयः'। (२. ४. ७७)
'अभयं नलदं सेव्यममृणालं जलाशयम्'। (२. ४. १६४)

इत्यादि। साहचर्यस्योदाहरणम्—'स्याद्वितर्दिस्तु वेदिका' (२. २. १६)। 'पञ्चशाखः शयः पाणिः' (२. ६. ८१)। 'विष्टपं भुवनं जगत्' (२. १. ६)। चशब्दः प्रत्ययाद्युपलक्षणार्थम्। 'विभूतिर्भूतिरैश्वर्यम्' (१. १. ३९) इत्यत्र [4]प्रत्ययो लिङ्गस्य गमको भवति। 'पुञ्जराशी तूत्करः कूटमस्त्रियाम्' (२. ५. ४२) इत्यत्र समासो लिङ्गस्य गमको भवति। विशेषविधेरुदाहरणम्—'चञ्चुस्त्रोटिरुभे स्त्रियाम्' (२. ५. ३६)। 'स्त्रियः सुमनसः पुष्पम्' (२. ४. १७)। 'खनिः स्त्रियामाकरः स्यात्' (२. ४. ७)। 'किरीटं पुंनपुंसकम्' (२. ६. १०२)॥ ३॥

[1] प्रचुररूपभेदेन A_1. [2] न चेत् B_4. [3] साहचर्यं A_1. [4] B_4 adds क्तिन्.

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते॥ ४॥

(वि.) भेदाख्यानायेति—अत्र [1]ग्रन्थे भिन्नलिङ्गानां [2]पदानाम् अनुक्तानां क्रमात् ऋते [3]भेदाख्यानाय द्वन्द्वो न कृतः। [4]एकशेषः एकशेषसमासो न कृतः। संकरश्च[5] न कृतः। तद्यथा—'उखा कुण्डम्' इत्युक्तम् (२. ९. ३१)। न तु 'उखाकुण्डे' इति। एकशेषो [6]यथा—'नभः[7] खं श्रावणो नभाः' (३. ३. २३२) न तु 'खश्रावणौ नभः खम्' इति। संकरो यथा—'स्तवः स्तोत्रं स्तुतिर्नुतिः' इति (१. ६. ११)। न तु 'स्तुतिः स्तोत्रं स्तवो नुतिः' इति। संकरो नाम [8]साहचर्यम्। भिन्नलिङ्गानां नानालिङ्गानाम् अनुक्तानाम् अन्यत्रानुक्तानाम्। क्रमादृते। भिन्नवाक्यानां[9] क्रमेणैव अनुशासनं करोमि, क्रमं विना न करोमीत्यर्थः॥ ४॥

[1] K_3 omits. [2] U omits. [3] K_2, W_2 add लिङ्गान्तरज्ञापनार्थं. [4] C, D_1, K_5, U, W_2, Y omit. [5] D_1, K_3 omit च. [6] Y adds न कृतः.

[7] नभाः श्रावणिकश्च सः इत्युक्तं न तु श्रावणौ नभसौ इत्युक्तम् B_2, C; न नभसि श्रावणे नभाः K_3. [8] सांकर्यं W_2. [9] भिन्नलिङ्गानां C, D_2.

(पा.) प्रतिसंस्कारप्रकारं दर्शयति भेदाख्यानायेति—अत्र शास्त्रेऽनुक्तानां भिन्नलिङ्गानां पदानां क्रमादृते क्रमं विना भेदाख्यानाय भेदप्रतिपत्तिनिमित्तार्थं न द्वन्द्वः कृतः। नैकशेषः। एकशेषोऽपि[1] न कृतः। संकरश्च न कृतः। केवलं क्रम एव [2]कृत इत्यर्थः। द्वन्द्वप्रतिषेधस्य—'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः' (२. ८. ९८)। अत्र पार्थक्यमेव क्रमशब्दार्थः। एकशेषप्रतिषेधस्य—'नाली नालं च काण्डोऽस्य' (२. ९. २२) इत्यादि। अत्र सर्वपदोक्तिरेव क्रमशब्दार्थः। संकरप्रतिषेधस्य—'स्तवः स्तोत्रं स्तुतिर्नुतिः' (१. ६. ११)। अत्र विभाग एव क्रमशब्दार्थः। भेदप्रतीतिस्थले संकरो न दोषाय[3]। 'अलंकारस्त्वाभरणं परिष्कारो विभूषणम्' (२. ६. १०१)। अत्र भिन्नलिङ्गानामित्यनेन अभिन्नलिङ्गानामुदाहरणान्युक्तान्येव। [4]द्वन्द्वस्य—'गृहं गेहोदवसितं वेश्म सद्म निकेतनम्' (२. २. ४)। 'निकाय्य-निलयालयाः' (२. २. ५)। एकशेषस्य—'नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ' (१. १. ५१)। अनुक्तानामित्यनेन उक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव[5]। 'तमालपत्रतिलकचित्रकाणि विशेषकम्' (२. ६. १२३) इत्यत्र 'द्वितीयं च तुरीयं च न स्त्रियाम्' (२. ६. १२३) इति लिङ्गमुक्तम्। 'धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः' (३. ३. १३९) इत्यत्र 'स्याद्धर्ममस्त्रियां पुण्यश्रेयसी' (१. ४. २४) इत्यत्र लिङ्गमुक्तम्। 'पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः' (१. १२. २८)। अत्र तटाकोऽस्त्रीति लिङ्गमुक्तम्॥ ४॥

[1] A_1 adds समासः. [2] क्रियते A_1. [3] A_1 adds तत् कथम्. [4] A_1, B_4 add अत्र. [5] एवम् B_4.

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्॥ ५॥

(वि.) त्रिलिङ्ग्यामिति—त्रिष्विति प्रयुक्ते लिङ्गत्रयं[1] ज्ञेयम्। यथा 'तटं त्रिषु' इति (१. ९. ७)। द्वयोरित्युक्ते स्त्रीपुंलिङ्गे[2] ज्ञेये। यथा—'रेणुर्द्वयोः' इति (२. ८. ९८)। एकलिङ्गनिषेधे[3] अवशिष्टलिङ्गं[4] ज्ञेयम्। यथा—'विमानोऽस्त्री' इति (१. १. ४९)। तु शब्दोऽन्ते यस्य तत् त्वन्तम्, अथशब्दः [5]आदिः यस्य[6] तत् अथादि, त्वन्तं च अथादि च[7] पदं पूर्वपदार्थं न [8]भवति शास्त्रेषु[9]॥ ५॥

[1] त्रये W_2. [2] पुंलिङ्गस्त्रीलिङ्गे K_3, K_5. [3] एकलिङ्गे निषिद्धे B_2, C. [4] परिशिष्टलिङ्गे ज्ञेये B_2, W_2; °लिङ्गद्वयं W_1; °लिङ्गपरिग्रह इत्यर्थः K_2. [5] आदौ B_2,

D_2, K_1. [6] W_2 adds वर्तते. [7] B_2 adds त्वन्ताथादि. [8] भजति B_2, K_1, Y. [9] D_2, K_1, K_2, K_3 omit.

(पा.) तरणिरहितपारावार इव परिभाषारहितं शास्त्रं दुस्तरमिति परिभाषां निरूपयति त्रिलिङ्ग्यामिति—त्रिष्विति प्रयुक्ते त्रिलिङ्गे[1] कृतविवक्षा ज्ञेया। 'सरन्ध्रे सुषिरं त्रिषु' (१. ९. २)। द्वयोरित्युक्ते स्त्रीपुंलिङ्गे ज्ञेये। यथा 'वह्नेर्द्वयोर्ज्वालकीलौ' (१. १. ५७)। यद्यपि द्विशब्दः संख्येयसामान्यवर्ती तथापि वक्तृविवक्षापूर्विका शब्द-प्रवृत्तिरिति विवक्षावशात् प्रकृते संख्येयविशेषवर्ती। तस्माद् 'द्विहीनं प्रसवे सर्वम्' (२. ४. १८) इत्यादौ मिथुनार्थप्रतीतिकरो भवति। 'अर्धरात्रनिशीथौ द्वौ' (१. ४. ६) इत्यत्र संख्याविशेषस्य श्रूयमाणत्वादतिप्रसङ्गस्यावकाशो[2] नास्ति। निषिद्धलिङ्गं शेषार्थम्। निषिद्धलिङ्गं पदं पारिशेष्यानिषिद्धलिङ्गार्थं स्यात्। यथा 'अस्त्रियामाढकद्रोणौ' (२. ९. ८८)। अत्र शेषत्वं पुंनपुंसकयोरेव। आढकः, आढकम्। द्रोणः, द्रोणम्। त्वन्ताथादि न पूर्वभाक्। तुशब्दान्तम् अथशब्दादि पदं पूर्वभाङ्न भवति। त्वन्तस्य—'प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः' (२. १. ७)। 'प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः' (२. ६. ५५)। एवं दण्डापूपन्यायादुदाहरणान्तराण्यपि[3] द्रष्टव्यानि। 'स्यात्तेमनं तु निष्ठानम्' (२. ९. ४४) इत्यादौ स्यादादिप्रयोगः। अथादेः—'अम्बा माताथ बाला स्याद्वासूः' (१. ८. १४), 'भार्या जायाथ पुंभूम्नि दाराः' (२. ६. ६)। अर्थग्रहणाद् 'अनुक्रोशोऽप्यथो हसः' (१. ८. १८) इत्यादौ अथोशब्द-प्रयोगः। इतः परं स्वर्गादिक्रमेण शास्त्रमवतारयति। अत्र शेषपूरणं विशेषाभिधानं टीकाप्रयोजनम्॥ ५॥

[1] त्रिलिङ्गी ज्ञेया B_3, B_4. [2] °प्रसङ्गः स्यादिति। अत्र A_1. [3] A_1 adds तेनैव.

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्॥ ६॥

(वि.) स्वरिति—स्वर्यते स्वः,[1] 'स्वृ शब्दोपतापयोः'। स्वः सुखं गम्यते [2]इति स्वर्गः। [3]'गम्लृ गतौ'। सुष्ठु अर्ज्यते[4] इति वा। 'अर्ज सर्ज अर्जने'। न विद्यते अकम् असुखम्[5] अत्रेति नाकः[6]। [7]तृतीयश्चासौ [8]दिवश्च त्रिदिवः[9]। त्रिदशानाम् आलयः त्रिदशालयः। सुराणां लोकः सुरलोकः। दीव्यन्त्यस्यामिति द्यौः, द्यौश्च[10]। 'दिवु क्रीडाविजिगीषाद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु'। इमावोकारान्तवकारान्तौ स्त्रीलिङ्गौ। तृतीयं च तद् विष्टपं च त्रिविष्टपम्[11]। एतानि स्वर्गनामानि॥ ६॥

[1] एतदव्ययम् C, D_2. [2] B_1, B_2, C, D_1 add अत्र. [3] D_2, W_2 add सृप्लृ. [4] अर्जयति D_1, W_1, Y. [5] W_2 omits; दुःखं D_1. [6] C adds

'अक कौटिल्ये'.　　[7] तृतीया B_2, C, D_1, W_2.　　[8] द्यौश्च B_1, C, D_1, K_2, W_2.　[9] C adds भूम्यन्तरिक्षदिव इति विवक्षया तस्य तृतीयत्वमिति भावः.　　[10] दिवि च T; दिवश्च Y.　　[11] एतत् नपुंसकलिङ्गं, भूम्यादिविवक्षयेति भावः C.

(पा.) स्वरव्ययं – त्रिविष्टपम् । एतानि स्वर्गनामानि । अत्र स्वःशब्दोऽव्ययः[1] । स्वः पुण्यलोकः । 'स्वर्जयति काशी' । स्वर्गशब्दसाहचर्यात् स्वःशब्दस्य पुंस्त्वे प्राप्तेऽव्ययवचनाद् अलिङ्गत्वम् । 'सदृशं त्रिषु लिङ्गेषु' इति विधीयते । तत्स्वरूपे शृङ्गारप्रकाशिका—'इयमयमिदमित्यर्थसंज्ञाव्यपदेशनिमित्तं शब्दसंस्कारहेतुः शब्दधर्मो लिङ्गं स्त्री पुमान् नपुंसकमिति' (cf. पृ. १८३) । टाबादिशब्दसंस्कारहेतुरियंव्यपदेशकारणं स्त्री । 'तस्माच्छसो नः पुंसि' (६. १. १०३) इत्यादिशब्दसंस्कारहेतुरयमित्यर्थव्यपदेशकारणं पुमान् । 'इकोऽचि विभक्तौ'[2] (७. १. ७३) इत्यादिशब्दसंस्कारहेतुरिदमित्यर्थव्यपदेशकारणं नपुंसकम् । तदेतल्लिङ्गं षोढा । शुद्धं मिश्रं संकीर्णम् उपसर्जनम् आविष्टम् अव्यक्तं चेति । तेष्वेकसंस्कारहेतुः शुद्धम्—[3]खट्वा वृक्षः कुण्डं स्त्री पुमान् नपुंसकमित्यादि । संस्कारद्वयोपग्राहि मिश्रम् । मरीचिः ऊर्मिः अर्चिः छर्दिः कषायं कवाटमित्यादि । संस्कारत्रयोपग्राहि संकीर्णम् । तटी तटः तटं, शृङ्खला शृङ्खलः शृङ्खलम् । विशेष्यशब्दसंस्कारग्राहि विशेषणरूपमुपसर्जनम् । शुक्ला शुक्लः शुक्लम् । विशेषणत्वेऽपि नियतसंस्कारमाविष्टम् । प्रीतिर्विषयः प्रधानं भार्या दाराः कलत्रम् । लिङ्गनिमित्तशब्दसंस्कारानर्हमव्यक्तम् । पञ्च षट् कति उच्चैः नीचैः यूयं वयमित्यादि । स्वर्गादयः पञ्च रूपभेदात् पुंलिङ्गाः । वैजयन्त्यां (पृ. ३, श्लो. २) तु त्रिदिवशब्दः पुंनपुंसक इति कथितः । 'अमर्त्यभवनं ना[4] च त्रिदिवं स्यात् स्वरव्ययम्' इति । द्योदिवौ शब्दौ स्त्रीरूपभेदाभा[5]वाल्लिङ्गप्रतीत्यविषयौ । अतः स्त्रियामिति विशेषविधिः । अकारान्तदिवशब्दोऽप्यस्ति ।

'स्वर्लोकस्तूर्ध्वलोकः[6] स्यादवरोहः फलोदयः ।
मन्दरः सैरिकः शक्रभवनं खं दिवं नभः ॥'

इति त्रिकाण्डशेषः (पृ. १, श्लो. ४) । त्रिविष्टपशब्दो नपुंसकः । विष्टपशब्दापेक्षया प्राप्तपुंनपुंसकत्वप्रतिषेधार्थं क्लीबवचनम् । यदाह कैयटः—क्लीबग्रहणं नित्यज्ञापनार्थमिति ॥ ६ ॥

[1] अव्ययम् B_4.　　[2] सुपि A_1.　　[3] A_1 adds कथम्.　　[4] गौश्च त्रिदिवः इति मुद्रितग्रन्थे (पृ. ३, श्लो. २)　　[5] A_1 omits अभावात्.　　[6] देवलोकः B_3, B_4; मुद्रितग्रन्थे च (पृ. १, श्लो. ४)

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥

(वि.) अमरा इति—[1]अमराः, न म्रियन्ते इत्यमराः। 'मृङ् प्राणत्यागे'। न विद्यते जरा येषां ते निर्जराः। 'जॄष् [2]वयोहानौ'। दीव्यन्तीति देवाः। 'दिवु क्रीडादौ'। [3]त्रिदशपरिमाणं वयो येषामिति त्रिदशाः। विबुध्यन्ते इति विबुधाः। 'बुध अवगमने'। सुरन्तीति सुराः। 'सुर ऐश्वर्ये'। सुष्ठु राजन्ते वा[4]। 'राजृ दीप्तौ'। भक्त्या दत्तं सुष्ठु [5]रान्तीति वा। 'रा आदाने'। शुभं रान्तीति[6] वा। 'रा दाने'। अब्धिजा सुरा येषामस्तीति वा। सुष्ठु वाञ्छितफलं रान्तीति[7] वा। 'रा दाने'। सुष्ठु [8]पृणन्ति पालयन्तीति सुपर्वाणः। 'पॄ पालनपूरणयोः'। शोभनं पर्व आचरित[9]मेषामिति वा। सुष्ठु मन्यन्ते सुमनसः। 'मन ज्ञाने'। शोभनचित्तत्वाद्वा। त्रिदिवस्य ईशाः[10] त्रिदिवेशाः। द्यौः ओकः [11]स्थानमेषां ते दिवौकसः॥ ७॥

[1] Y omits. [2] I, K_1, K_2, W_1 omit. [3] तिस्रो दशाः परिणामः (परिमाणं K_2) येषां ते B_2, C, D_1. [4] D_2, I, K_1, K_2 add सुराः. [5] D_2, W_2 add आददते. [6] रायन्ति 'रै शब्दे' B_2, C, D_2, K_2, K_3; अत्र एकपत्रं ग्रन्थपातः U, W_2. [7] D_2, K_1, K_2, K_3 add ददति. [8] पिपर्ति B_1, C. [9] B_1, T add अस्ति. [10] ईश्वराः W_1. [11] निलयः B_2, C.

(पा.) अमरा—अमृतान्धसः। सर्वत्र स्वरपरत्वाद्धल्परत्वाच्च 'लोपः शाकल्यस्य' इति (८. ३. १९) 'हलि सर्वेषाम्' इति (८. ३. २२) द्वाभ्यां यलोपः॥ ७॥

आदितेया दिविषदो लेखा अदितिनन्दनाः।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः॥ ८॥

(वि.) आदितेया इति—[1]अदितेः अपत्यानि [2]आदितेयाः। दिवि सीदन्तीति दिविषदः। 'षद्लृ विशरणगत्यवसादनेषु'। लिख्यन्ते [3]पटादौ लेखाः। 'लिख लेखने'। प्राणिनां [4]शुभाशुभानि लिखन्तीति वा। 'लिख अक्षरविन्यासे'। अदितेः नन्दनाः[5] अदितिनन्दनाः। [6]अदितिं नन्दयन्तीति वा। [7]अदितेः पुत्राः आदित्याः। [8]ऋते सत्ये भवन्तीति ऋभवः। ऋ[9] स्वर्गे भवन्तीति वा ऋभवः। ऋशब्दो [10]नीतिवाची। तस्माद् भवन्तीति वा। न विद्यते स्वप्नो येषां ते अस्वप्नाः। मर्त्यादन्ये [11]अमर्त्याः। [12]न म्रियन्ते इति वा अमर्त्याः। अमृतम् अन्धो ऽन्नं[13] येषां ते अमृतान्धसः॥ ८॥

[1] अदित्या वा D_2, W_2. [2] K_1, K_3 add पुमांसः; D_1, K_2, W_1 add आदित्याः. [3] फलकादौ K_1, T; फलकायामिति D_2. [4] शुभं D_2, K_1, K_3, W_1. [5] पुत्राः B_2, D_2, K_2, W_1. [6] W_1 omits; K_1, K_3 add 'टु नदि समृद्धौ'. [7] अदित्याः अपत्यानि पुमांसः B_2, Y. [8] ऋतेन सत्येन B_2, D_1, I, K_3, W_1.

[9] री D_2, I, K_1, K_2, W_2. [10] अदिति° D_2, I, W_1. [11] न मर्त्याः A, T; मर्त्येभ्यः D_1; मर्त्याः न भवन्तीति B_1, B_2. [12] B_1, B_2, C, W_1 omit न . . . [13] B_1, C, K_5, Y omit.

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

(वि.) बर्हिरिति—बर्हिः [1]अग्निः मुखं येषां ते बर्हिर्मुखाः । क्रतौ भुञ्जते[2] इति क्रतुभुजः । 'भुज पालनाभ्यवहारयोः' । गिरं[3] वणन्ति [4]व्याकुर्वन्तीति गीर्वाणाः । 'वण क्वण शब्दे' । गीः [5]वाणो येषामिति वा[6] । गिरं वनन्तीति वा । 'वन [7]संभक्तौ शब्दे च' । दानवानाम् अरयः दानवारयः । शोभनं [8]वृन्दं येषामस्तीति वृन्दारकाः । देवता[9] एव दैवतानि[10] । इति सामान्यतो [11]देवतानामानि ॥ ९ ॥

[1] बर्हीं रश्मिः T, Y. [2] भुञ्जन्ति K_1. [3] गिरः B_2, C, K_2. [4] व्याकुर्वते D_2, K_3, W_1. [5] गीरेव वाणाः Y. [6] D_2, K_1, W_2, Y add गीर्वाणाः. [7] 'वन वण संभक्तौ' D_1, W_1. [8] बृन्दं D_1; अरं शोभनं C. [9] देवा एव D_2, K_1, K_5, W_1. [10] स्वार्थे देवताभ्योऽण् इत्यण् । देवतेति स्वार्थे तल्; तलि स्त्रीलिङ्गवचनं कर्तव्यम् इति स्त्रीत्वे सिद्धेऽपि यत् पुनः 'स्त्रियाम्' इति वचनं तद् बहुवचनान्तपुंलिङ्गशङ्का-निराकरणार्थम् D_1. [11] देव° D_2, K_3, K_5.

(पा.) बर्हिर्मुखाः—स्त्रियाम् । देवनामानि । 'निलिम्पाः स्वर्गिणः सेन्द्रा दिविजा द्विदशा बुधाः' इत्येतानि च । जातिशब्देन जात्याश्रिता व्यक्तिरभिधीयत इति तद्-व्यक्तीनां बहुत्वाद् बहुवचननिर्देशः ॥ ९ ॥

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

(वि.) आदित्येति—आदित्याः [1]आदित्यसंघेन वृत्ताः[2] गणदेवताः, ते द्वादश । श्राद्धादौ [3]अग्रे उपविशन्तीति विश्वे । 'विश प्रवेशने' । ते [4]त्रयोदश । आहूता वसन्तीति वसवः । 'वस निवासे' । ते [5]अष्टौ । तुष्यन्तीति तुषिताः । 'तुष तुष्टौ' । ते षट्त्रिंशत् । आभासन्ते[6] इति आभास्वराः । 'भासृ दीप्तौ' । ते चतुःषष्टिः । यैः अनन्ति [7]संचरन्ते प्राणिनः ते अनिलाः । 'अन प्राणने' । इलायां[8] न चरन्तीति वा । ते एकोनपञ्चाशत् । महाराजशब्दो येषामस्तीति महाराजिकाः । ते षट्त्रिंशद् द्वे शते । साध्यन्ते आराध्यन्ते इति साध्याः । 'राध साध संसिद्धौ' । ते द्वादश । रोदयन्ति [9]दुष्टान् इति रुद्राः ।

'रुदिर् अश्रुविमोचने'। [10]रुतं दुःखं द्रावयन्तीति वा रुद्राः। 'द्रा कुत्सायां गतौ'। रुतं वेदात्मकं शब्दं कल्पादौ [11]द्रावयन्तीति वा रुद्राः। ते एकादश[12]। एतानि [13]समूहदेवतानामानि ॥ १० ॥

[1] W_1 omits. [2] युक्ताः W_1. [3] B_2, W_2 omit. [4] B_2, C, D_1, W_2 omit त्रयो. [5] अष्ट K_3. [6] आ समन्तात् C; भास्वन्ति D_2. [7] W_1 omits सं . . . नः. [8] निलः यानं, न विद्यते निलः यस्मिन् कर्मणि यथा भवति तथा चरन्तीति अनिला वा B_2, C. [9] W_2, Y omit. [10] Y omits two lines. [11] द्रवन्ति D_1, D_2, W_1. [12] B_1, C, D_1, K_1, W_1 add एते गणदेवताः. [13] B_1, C, D_1, K_1 add गण°.

(पा.) आदित्य—गणदेवताः। आदित्यादयो देवताः[1]।

'तत्रादित्या द्वादश स्युर्विश्वेदेवास्त्रयोदश[2]।
वसवश्चाष्ट संख्याताः षट्त्रिंशत् तुषिताः स्मृताः।
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः॥
महाराजिकनामानो द्वे शते[3] विंशतिस्तथा।
साध्या द्वादश विख्याता रुद्रा [4]एकादश स्मृताः'॥

'तत्र द्वादश नग्नाख्या इति पाठान्तरम्' इति सुबोधिन्यामुक्तम्। एवं पुराणवचनैस्तत्संख्यानामानि ज्ञातव्यानि। विश्वे इति पाठसामर्थ्यात् सर्वनामकार्यमनिषिद्धम् ॥ १० ॥

[1] गणदेवताः B_4. [2] दश B_3, B_4. [3] षट् च विंशतिः A_1. [4] रुद्राश्चैकादश B_4.

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ ११ ॥

(वि.) विद्याधर इति—[1]गुलिकाञ्जनादिविद्यां [2]धारयन्तीति विद्याधराः। 'डुधाञ्[3] धारणपोषणयोः'। एते जीमूतवाहन[4]पुष्पदन्तप्रभृतयः[5]। अद्भ्यः सरसः निर्गताः अप्सरसः[6]। 'सृ गतौ'। अथवा आप्यन्ते पुण्यकृद्भिरिति। 'आप्लृ व्याप्तौ'। ताः उर्वशीमुखाः। यक्ष्यन्ते[7] इति यक्षाः। 'यक्ष पूजायाम्'। ते कुबेरादयः। यज्ञेभ्यो[8] रक्ष्यन्त इति रक्षांसि। 'रक्ष पालने'। तानि च रावणादीनि। गानं[9] धारयन्तीति गन्धर्वाः[10]। ते हाहाहूहूप्रभृतयः। किंचिन्नराः किंनराः। ते अश्वमुखादयः। पिशितं मांसमश्नन्तीति पिशाचाः। 'अश भोजने'। ते [11]कामचारिणः। निधिं[12] गूहन्तीति

गुह्यकाः । 'गुहू संवरणे'। ते मणिभद्रादयः । अणिमादिसिद्धिः एषामस्तीति सिद्धाः । सिध्यन्तीति वा । ते विश्वावसुप्रभृतयः । भवन्तीति भूताः । 'भू सत्तायाम्'। ते बालग्रहादयः । एतानि [13]देवोद्भवदेवतानामानि ॥ ११ ॥

[1] घुटिका° K_3, W_1.　[2] धरन्ति D_1.　[3] 'धृ धारणे' D_1.　[4] K_1, K_3 omit पुष्पदन्त.　[5] आदयः D_2, K_2, Y.　[6] अद्भयः सरन्ति निर्गच्छन्ति B_2.　[7] D_1 adds पूज्यन्ते.　[8] येभ्यो B_1, C, D_2; W_2 adds युद्धैः.　[9] गानानि B_1, C, T.　[10] D_1 adds 'डुधाञ् धारणपोषणयोः.　[11] तमसि D_1, W_1; तामस° K_1, K_2; तामसीचराद्याः B_2, C, W_2; तमःसंचारिणः K_3.　[12] निधीन् B_2.　[13] देवतो° A, D_1; देवोद्भवनामानि B_1, B_2, C.

(पा.) विद्याधरो—देवयोनयः । विद्याधरादयो देवयोनिपदवाच्याः[1] । विद्याधरपिशाचगुह्यकसिद्धभूताः पञ्चानुक्ताः । तस्माद् व्यासविधिः । अप्सरोयक्षरक्षोगन्धर्वकिंनरशब्दाः पञ्च उक्ताः । तस्मात् समासविधिः । ईदृशः प्रत्ययः [2]सुभूतिटीकापरि[3]श्रमशालिनां सुगमः ॥ ११ ॥

[1] A_1 omits पद.　[2] A_1 omits टीका.　[3] क्रम° B_4.

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

(वि.) असुरा इति—यज्ञभागान् [1]निरस्यन्तीति [2]असुराः । असून् अस्यन्ति इति वा असुराः । 'असु क्षेपणे'। सुरेभ्योऽन्ये वा । असुना रात्रौ सृष्टा वा । असून् रान्तीति[3] वा । 'रा आदाने'। दितेः पुत्राः दैत्याः दैतेयाश्च । दनोर्जाता दनुजाः दानवाश्च[4] । इन्द्रस्य अरयः इन्द्रारयः । शुक्रस्य शिष्याः शुक्रशिष्याः । दितेः सुताः दितिसुताः । पूर्वान् इन्द्रादीन् दीव्यन्ति विजिगीषन्त इति पूर्वदेवाः । अथवा पूर्वे देवा वा । सुरान् द्विषन्तीति सुरद्विषः । 'द्विष [5]अप्रीतौ'। एतानि [6]असुरनामानि ॥ १२ ॥

[1] अस्यन्ति K_5, W_2.　[2] न विद्यते सुरा एषां ते D_1; सुराः यज्ञभागाः एषां न सन्तीति B_2.　[3] B_2 adds क्षपयन्ति.　[4] D_1 adds 'जनी प्रादुर्भावे'.　[5] अप्रीणने A, B_1, I, T.　[6] असुषु प्राणेषु रमन्ते इति वा । 'रमु क्रीडायाम्'। रभसं शीघ्रं प्राणिवर्गं अस्यन्तीति वा । पूर्वनिपातसमासः । 'असु क्षेपणे'। रात्रौ सृष्टाः उत्पन्ना असवो येषां ते । परनिपातप्रधानबहुव्रीहिः B_2.

(पा.) असुरा—सुरद्विषः । असुरनामानि ॥ दैत्यानां दानवानां च मातृभेदाद् भेदे सत्यपि असुराविशेषत्वादभेदः । 'हिरण्याख्यं दानवमिव दंष्ट्राविभिन्नवक्षः-

स्थलमिति' हिरण्याख्यदैत्ये दानवशब्दप्रयोगः। 'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्' (कु. सं. २. ५५) इति तारकाख्यदानवे दैत्यशब्दप्रयोगः[1] ॥ १२ ॥

[1] A_1 adds इष्टः.

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥ १३ ॥

(वि.) <u>सर्वज्ञ इति</u>—सर्वं जानातीति सर्वज्ञः। 'ज्ञा अवबोधने'। [1]शोभनं गतं ज्ञानम् अस्येति [2]सुगतः। ये [3]गत्यर्थास्ते ज्ञानार्था इति। सर्वं क्षणिकमिति आच्छिनत्ति वा। बुध्यते इति बुद्धः। 'बुध [4]अवगमने'। धर्मस्य संसारोद्धरणादेः राजा धर्मराजः[5]। तथा सत्यं गतं भूतं ज्ञानमस्य तथागतः[6]। समन्ताद् भद्रं मङ्गलमस्येति समन्तभद्रः।

'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग [7]इतीरणा ॥'

इति। [8]सोऽस्यास्तीति भगवान्। मारं [9]कामं जयतीति मारजित्। मारान् कामक्रोधादीन् जयतीति वा[10]। [11]स्कन्धमारक्लेशमारादीन् जयतीति वा। लोकान् जयतीति लोकजित्। भवं जयतीति जिनः। 'जि अभिभवे'। त्रयाणामपि 'जि जये' इति वा धातुः ॥ १३ ॥

[1] B_2 adds सु. [2] सुष्ठु अपुनरावृत्तिमोक्षं गतः D_1. [3] K_5, W_1 omit ये . . . र्थाः. [4] अवबोधने B_1, C. [5] B_2 adds 'राजृ दीप्तौ'. [6] सर्वे गम्लृ-अर्थाः ज्ञानार्थाः B_2. [7] ईरिताः K_3; स्मरणात् B_2, D_1, W_2. [8] भगः K_5, W_2; भगः ऐश्वर्यादिषट्कोऽस्यास्तीति भगवान्। तदुक्तम्—ऐ . . . इति स्मृत इति स्मरणात् C. [9] क्लेशं B_1, B_2, C. [10] D_1 adds 'जि जये'. [11] बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः। तान् जयतीति वा D_1, K_2, K_3, W_1.

षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः, शाक्यमुनिस्तु यः ॥१४॥

(वि.) <u>षडभिज्ञ इति</u>—[1]दिव्यं चक्षुः, दिव्यं श्रोत्रं, [2]पूर्वनिवासानुस्मृतिः, परचित्ततत्त्वज्ञानम्, [3]आश्रवक्षयः, ऋद्धिश्चेति[4] षड्[5] अभिज्ञा यस्य सः षडभिज्ञः। [6]दान्तिक्षान्तिशीलवीर्यध्यान[7]कान्ति[8]बलोपाय[9]प्रणिधिविज्ञानानि[10] दश बलानि यस्य

स दशबलः। अद्वयम् अभेदं विज्ञानाद्वैतं वदतीत्यद्वयवादी[11]। 'वद व्यक्तायां वाचि'। विनयति शिक्षयति इति विनायकः। 'णीञ् प्रापणे'। मुनीनामिन्द्रः मुनीन्द्रः। श्रिया [12]योगविभूत्या घनः निरन्तरः श्रीघनः। शास्तीति [13]शास्ता। 'शासु अनुशिष्टौ'। मनुते इति [14]मुनिः। 'मनु अवबोधने'। एतानि बुद्धनामानि॥ [15]शकदेशेषु जातो मुनिः शाक्यमुनिः॥ १४॥

[1] वीर्यं B_1, C. [2] निरास° K_2, K_3; पूर्णनिरास° B_1, C, D_2, K_1; 4 pp. gap ends here in U. [3] आश्रयप्रत्यक्षं ऋद्धिश्चेति W_1. [4] प्रशस्तानि तानि अभिजानातीति षडभिज्ञः C. [5] B_2 adds बुद्धशास्त्रप्रशस्तानि. [6] W_1 adds तपःक्लेशसहो. [7] °ज्ञान° A, B_1, C, T. [8] °शान्ति° B_1, D_2, K_2, W_1. [9] °प्रमाणादि° B_1, C, K_5, W_2. [10] ज्ञान° B_2, C, K_1, K_5, W_1. [11] अद्वयमधीतं वदतीति W_2; नकारान्तः D_1. [12] B_1, C, W_2 omit योग. [13] D_1 adds शिक्षयति; ऋकारान्तः D_1. [14] D_1 adds सर्वधर्माणां मननात्. [15] शकेषु देशविशेषेषु B_2, C.

(पा.) सर्वज्ञः—जिनः। षडभिज्ञो—मुनिः। बुद्धनामानि॥

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः॥ १५॥

(वि.) स इति—शकेषु[1] श्रेष्ठः शाक्यसिंहः। सर्वार्थेषु सिद्धः सर्वार्थसिद्धः। शुद्धोदनस्य[2] अपत्यं पुमान् शौद्धोदनिः। स च गोतमस्यापत्यं पुमान् गौतमः[3]। गौतमगोत्राद्वा। अर्कवंशजत्वात् अर्कबन्धुः। मायादेव्याः सुतः मायादेवीसुतः। एतानि शकदेशबुद्धनामानि[4]॥ १५॥

[1] शाक्येषु B_2, D_2; A, K_1, K_3 add सिंहः. [2] शुद्धम् ओदनं यस्य सः शुद्धोदनः C. [3] गोत्रत्वाद्वा गौतमः K_1, K_5, U; परब्रह्मलोकगोत्रत्वाद्वा W_2; गोत्राद्वा B_1, B_2, C. [4] D_1, W_1 add सर्वज्ञो वीतरागोऽर्हन् केवली तीर्थकृज्जिनः.

(पा.) शाक्यमुनिस्तु यः—मायादेवीसुतश्च सः। शाक्यसिंह इत्यभिधानबुद्धनामानि। अनुक्तम्—'सर्वज्ञो वीतरागोऽर्हन् जिनः स्यात्कारभूषणः'॥ १५॥

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः॥ १६॥

(वि.) ब्रह्मेति—बृहति[1] ब्रह्मा। [2]'बृह बृहि वृद्धौ'। आत्मना भवतीति आत्मभूः। 'भू सत्तायाम्'। सुरश्चासौ ज्येष्ठश्च सुरज्येष्ठः[3]। सुराणां ज्येष्ठो सुरज्येष्ठः। परमे [4]ब्रह्मलोकाख्ये स्थाने तिष्ठतीति परमेष्ठी। 'ष्ठा गतिनिवृत्तौ'। [5]अग्निष्वात्तादिपितॄणां पिता पितामहः। हिरण्यं [6]गर्भे यस्य सः हिरण्यगर्भः। लोकानाम् ईशः लोकेशः। स्वयं भवतीति स्वयंभूः। चत्वारि आननानि यस्य सः चतुराननः ॥ १६ ॥

[1] बृंहति B_1, W_2; बृंहयति B_2, C. [2] 'बृंहि वृद्धौ' B_1, W_2. [3] ज्येष्ठश्चासौ सुरश्च सुरज्येष्ठः; ज्येष्ठ इति पदस्य पूर्वनिपातत्वम् B_2, C, K_1. [4] ब्रह्मलोके D_2, K_1, K_2, K_5. [5] A, K_1, W_1 omit अ . . . दि. [6] गर्भो B_1.

धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥ १७ ॥

(वि.) धातेति—धत्ते[1] धाता[2]। 'डुधाञ् धारणपोषणयोः'। अब्जं[3] योनिः[4] यस्य सः अब्जयोनिः। द्रुह्यति असुरेभ्यो[5] द्रुहिणः। 'द्रुह जिघांसायाम्'। विरिणक्तीति विरिञ्चिः[6]। 'रिचिर् विरेचने'। 'विचिर् पृथग्भावे'[7]। विभिः हंसै रिच्यते उह्यते विरिञ्चः[8] इति वा पाठः। कमलम् आसनं यस्य सः कमलासनः। सृजतीति स्रष्टा। प्रजानां पतिः प्रजापतिः। विदधाति करोतीति[9] वेधाः[10]। विधत्त इति विधाता। विश्वं सृजतीति विश्वसृट्। 'सृज [11]विसर्गे'। विधति[12] विधत्त इति विधिः। 'विध विधाने'। एतानि ब्रह्मणो नामधेयानि[13] ॥ १७ ॥

[1] धत्त इति B_2, C. [2] B_1, D_2, K_2, K_3, W_1 add विधत्त इति विधाता. [3] C adds कमलं. [4] C adds स्थानं. [5] B_2, C add अयमिति. [6] विशेषेण रिङ्क्ते निर्गमयति यस्य यशः विरिञ्चिः B_2, C. [7] D_2 adds इति वा धातुः. [8] K_3 omits. [9] K_1, K_3, Y omit. [10] B_2, C, U add विधिश्च. [11] विसर्जने A, B_1, C, K_1, W_1. [12] विदधाति A, C, D_2, W_1. [13] W_1 adds शतानन्दः शतधृतिः.

(पा.) ब्रह्मात्मभूः—विधिः। ब्रह्मणो नामानि। अनुक्तम्—

'शतानन्दः शतधृतिः प्रजासृट् सर्वतोमुखः ।
विश्वात्मा विश्वरेताश्च विखना[1] नाभिजोऽब्जजः ।
अब्जगर्भश्च वागीशः प्राणदो हंसवाहनः ॥'

एतानि[2] च। सुभूतिना विश्वसृग् विधिरिति प्रत्यपादि। 'क्विन्प्रत्ययस्य' (८. २. ६२) इति कुत्वमिति। ये तु क्विन्नन्तत्वं नेच्छन्ति तन्मते 'व्रश्चादिना' (८. २. ३६)

षत्वमिति रभसकोशकारेण तदपाठि 'विरिञ्चो विश्वसृट् स्रष्टा विरिञ्चिः कमलासनः' इति ॥ १६-१७ ॥

[1] द्रुघण: A_1, B_4.　[2] A_1 adds १३.

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥

(वि.) विष्णुरिति—वेवेष्टीति विष्णुः । 'विष्लृ व्याप्तौ' । नरस्य धर्माख्यस्य ऋषेरपत्यं नारायणः[1] । नरस्येदं नारम् अयनम् वपुः अवतारेषु यस्येति वा नारायणः । नारं नरसमूहम् अयति [2]स्वकर्मणेति वा । 'अय पय[3] गतौ' । नाराः[4] आपः अयनं स्थानं यस्येति वा । राः शब्दाः आयान्ति निर्गच्छन्ति यस्मात् सः [5]रायणः । रायणादन्यः अरायणः, न अरायणः नारायणः । [6]अशब्दगम्य इत्यर्थः । करोतीति कृष्णः । 'डुकृञ् करणे' । दैत्यान् कर्षतीति वा । 'कृष विलेखने' । कृष्णवर्णत्वाद्वा[7] । विकुण्ठाया अपत्यं पुमान् वैकुण्ठः । विष्टराकारे[8] श्रोत्रे यस्य सः विष्टरश्रवाः । विष्टराकारो रोमावर्तो श्रवसि यस्येति वा । विष्टरं [9]व्यापनशीलं श्रवः कीर्तिर्यस्येति वा । दाम [10]उदरे यस्य स दामोदरः । हृषीकाणाम् इन्द्रियाणाम् ईशः हृषीकेशः । शोभनाः केशा यस्य सः केशवः[11] । कश्च अश्च ईशश्च केशाः ब्रह्मविष्णुरुद्राः,[12] ते अस्मिन् वसन्तीति[13] वा केशवः । मधोरपत्यं पुमान् माधवः[14] । मायाः लक्ष्म्याः धवो वा । मा धूयते शत्रुभिरिति वा । 'धूञ् कम्पने' । मधोरयं हन्ता वा । वध्यघातुकत्वं[15] संबन्धः । स्वतो[16] भवतीति स्वभूः । स्वेन हिरण्येन भवतीति वा स्वभूः ॥ १८ ॥

[1] नार इति कश्चित् ऋषिः, स एव अयनं स्थानं यस्य सः B_2, C; नरस्य ज्ञानं वपुः अवतारेषु अयति वा K_5.　[2] B_2 omits.　[3] 'अय गतौ' D_2, I.　[4] नारं नरकृत्यं कर्म अयतीति वा । 'अय पय गतौ' B_2.　[5] तस्य वेदजनकत्वादिति भावः C.　[6] शब्दगम्य D_1, W_1, Y.　[7] °वर्णात् Y.　[8] B_2, C, D_1, K_1, K_3, W_1 add श्रवसी.　[9] व्यापक° Y.　[10] अत्र उदरस्य परनिपातत्वं B_2, C.　[11] वान्ति गन्धयन्ति इति वाः गन्धवन्तः केशाः यस्येति केशवः । 'वा गतिगन्धनयोः' । परनिपातः B_2, C.　[12] °ईश्वराः K_3, K_5, W_2; °ईशाः D_2, I, K_1, W_1.　[13] 'वस निवासे' U.　[14] मा धूयतेऽयम् अंहोभिरिति वा B_1, C.　[15] घातक W_1; W_2 omits.　[16] स्वयं B_1, C, W_2, Y; स्वस्मिन् W_1; D_1, I add 'भू सत्तायाम्'.

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥

(वि.) दैत्यारिरिति—दैत्यानाम् अरिः दैत्यारिः। पुण्डरीके[1] इव अक्षिणी यस्य सः पुण्डरीकाक्षः। पुण्डरीकं हृत्कमलम् अक्षतीति[2] वा। 'अक्षू व्याप्तौ'। गां [3]भुवं विन्दतीति गोविन्दः। गाः धेनूः विन्दतीति वा। 'विदिर् लाभे'। गरुडः [4]ध्वजे यस्य सः गरुडध्वजः। पीतम् अम्बरं[5] यस्य सः पीताम्बरः। न विद्यते च्युतिः यस्य सः अच्युतः[6]। 'च्युतिर् क्षरणे'। शृङ्गविकारः शार्ङ्गं धनुः[7] अस्यास्तीति शार्ङ्गी। विष्वक्[8] विषूची सर्वगता सेना यस्य सः विष्वक्सेनः। जनान् अर्दयति सुखयतीति[9] जनार्दनः। 'अर्द गतौ याचने पीडने[10] च'॥ १९॥

[1] °कवत् B_2, D_1, K_2, W_1, Y; °कमिव A, C, T. [2] D_2, K_3 add व्याप्नोति; आक्षिपति C. [3] W_1 omits. [4] ध्वजो K_1. [5] पीते अम्बरे D_1, I, K_1, K_2. [6] न च्युतः अच्युतः D_1, K_3, K_5, W_1, Y. [7] K_3 adds चापो. [8] W_1, Y omit. [9] W_1 omits. [10] K_3, W_1, Y omit.

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः॥ २०॥

(वि.) उपेन्द्र इति—इन्द्रम् अनु जातः उपगतः[1] उपेन्द्रः। इन्द्रस्य अवरजः इन्द्रावरजः। चक्रं पाणौ यस्य सः चक्रपाणिः। चत्वारो भुजा यस्य सः चतुर्भुजः। पद्मं नाभौ[2] यस्य सः पद्मनाभः। मधोः रिपुः[3] मधुरिपुः। वसुदेवस्य अपत्यं पुमान् वासुदेवः। त्रयो लोका विक्रमेषु पदेषु[4] यस्य सः त्रिविक्रमः। त्रीन् लोकान् विक्रमत[5] इति वा। 'क्रमु पादविक्षेपे'। त्रिषु[6] लोकेषु विना[7] गरुडेन क्रमते त्रिविक्रम इति वा[8]॥ २०॥

[1] K_2, W_1, Y omit; उपजायते C; उपजातः B_1, B_2, C, K_5; इन्द्रशब्दस्य परनिपातनं C. [2] नाभ्यां K_1. [3] K_1 adds दैत्यस्य असुरस्य C. [4] पादेषु D_2; K_3 omits. [5] पदेन क्रमते D_1. [6] त्रिलोकेषु B_1. [7] विना तृतीयान्तं [पक्षिणा] B_2, C. [8] C, D_2, K_1, K_3 add 'क्रमु पदविक्षिपे'.

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः॥ २१॥

(वि.) देवकीति—देवक्या नन्दनः देवकीनन्दनः। शूरस्य वसुदेवस्य अपत्यं शौरिः। श्रियः पतिः श्रीपतिः। [1]पुरुषाणां पुरुषेषु वा उत्तमः पुरुषोत्तमः। वनमाला अस्यास्तीति वनमाली। बलिं [2]ध्वंसयतीति बलिध्वंसी। 'ध्वंसु [3]अवस्रंसने'।

कंसस्याराति: कंसाराति:। अक्षम्[4] इन्द्रियम् अधः कृतं[5] यैस्ते अधोक्षाः, [6]दशरथ-वसुदेवादयः। तेभ्यो जातः अधोक्षजः। अक्षजम् इन्द्रियजन्यज्ञानम्[7] अधः कृतं [8]येनेति वा ॥ २१ ॥

[1] W_1 omits; पुरुषाणां मध्ये K_3; पुरुषश्चासौ उत्तमश्च B_2, K_1, K_3, K_5, W_1. [2] ध्वंसयितुं शीलम् अस्यास्तीति B_2, C. [3] गतौ D_1. [4] अक्षाणि इन्द्रियाणि B_2, C. [5] अधः कृतानि B_2, C. [6] B_2, W_1, Y omit दशरथ. [7] ऐन्द्रियज्ञानं C, D_2, K_2, W_1; W_2 omits जन्य. [8] यस्य K_1, K_3; अक्षजशब्दस्य परनिपातः C.

विश्वंभरः कैटभजिद् विधुः श्रीवत्सलाञ्छनः।
([1]गदाग्रजो मुञ्जकेशो दाशार्हो दशरूपभृत्[2]) ॥ २२ ॥

(वि.) विश्वंभर इति—विश्वं बिभर्तीति विश्वंभरः। 'भृञ् भरणे पोषणे[3] च'। कैटभं जयतीति कैटभजित्। 'जि [4]अभिभवे'। विदधातीति विधुः। '[5]डुधाञ् धारणपोषणयोः'। श्रीवत्साख्यो [6]रोमावर्तो लाञ्छनं यस्य सः श्रीवत्सलाञ्छनः। एतानि विष्णुनामानि (गदाग्रजो मुञ्जकेशो दाशार्हो दशरूपभृत् एतानि विष्णु-नामानि) ॥ २२ ॥

[1] B_2, U omit गदा . . . भृत्; W_2 adds पुराणपुरुषो यज्ञपुरुषो नरकान्तकः. [2] °धृक् W_2. [3] धारणपोषणयोः D_1; W_1 omits. [4] 'जि जये' B_2, C, D_1, U, W_2. [5] 'विध विधाने' C; विधति K_1, K_3. [6] रोमावलिः K_3.

(पा.) विष्णुः—श्रीवत्सलाञ्छनः ॥ विष्णुनामानि। अनुक्तम्—

'अरिष्टनेमिर्दाशार्हः[1] कोलकण्ठो गदाधरः।
मुञ्जकेशो गिरिधरः श्रीधरो धरणीधरः ॥
मुकुन्दो यज्ञपुरुषो ब्रह्मनाभो गदाग्रजः।
जगन्नाथो मुररिपुस्त्रिककुन्नरकान्तकः।
श्रीवत्सोऽनन्तशयनो बभ्रुश्च[2] कमलोदरः ॥'

एतानि च[3]। ह्रस्वादिर्नरायणशब्दोऽप्यस्ति। [4]लुप्तोत्तरपदवासुःशब्दोऽप्यस्ति। 'वासु-र्नरायणपुनर्वसुविश्वरूपाः' इति त्रिकाण्डशेषः (प्र. २, श्लो. ३०) ॥ १८-२२ ॥

[1] दासार्हः A_1. [2] हठिरः A_1, B_4. [3] A_1 adds २०. [4] B_3, B_4 omit.

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः।
बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ॥ २३ ॥

(वि.) वसुदेव इति—वसुभिः दीव्यतीति वसुदेवः। [1]वसुषु अष्टसु दीव्यतीति वा। 'दिवु क्रीडादौ'। अस्य गृहे विष्णोरुत्पत्तिसमये[2] आनकाश्च दुन्दुभयश्च वादिता[3] इत्यानकदुन्दुभिः। एतानि विष्णु[4]पितृनामानि ॥ बलेन भद्रः बलभद्रः। प्रलम्बनामानं [5]रक्षो हतवान्[6] इति प्रलम्बघ्नः। बलेन दीव्यतीति बलदेवः[7]; अच्युतस्याग्रजः अच्युताग्रजः ॥ २३ ॥

[1] अष्टवसुषु K_3, W_2. [2] °काले K_3; W_1 omits. [3] ताडिता देवैः C, D_1, W_2; आनकदुन्दुभयो नेदुरिति K_3. [4] °जनक° A, B_1. [5] राक्षसं D_1, I; °नामकं W_1. [6] हन्तीति B_2; C adds 'हन हिंसागत्योः'. [7] C adds 'दिवु क्रीडेत्यादि'.

(पा.) वसुदेवो—आनकदुन्दुभिः। विष्णुपितृनामनी। 'वसुदेवोऽस्य जनको दुन्दुरानकदुन्दुभिः' इति वैजयन्तीपाठाद् (पृ. ५, श्लो. २६) दुन्दुरप्यस्ति।

रेवतीरमणो रामः कामपालो हलायुधः।
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ॥ २४ ॥
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः।

(वि.) रेवतीति—रमयतीति रमणः[1]। रेवत्या रमणो रेवतीरमणः। 'रमु क्रीडायाम्'। कामं पालयतीति कामपालः। 'पाल रक्षणे'। हलम् आयुधं यस्य सः हलायुधः। [2]नीलम् अम्बरं यस्य सः नीलाम्बरः। रोहिण्या अपत्यं पुमान् रौहिणेयः। तालोऽङ्को यस्य सः तालाङ्कः। मुसलम् अस्यास्तीति मुसली। [3]हलम् अस्यास्तीति हली। संकर्षतीति [4]संकर्षणः। 'कृष विलेखने'। सीरः[5] पाणौ यस्य सः सीरपाणिः। कालिन्दीं भिनत्तीति कालिन्दीभेदनः। 'भिदिर् [6]विदारणे'। बलमस्यास्तीति [7]बलः। एतानि बलभद्रनामानि ॥ २४ ॥

[1] B_1, D_1, I, K_1, K_2, W_1, Y add रमयतीति रामः(?) [2] नीले अम्बरे B_1, C, D_1, I, K_1, K_3, W_2. [3] हलः D_1. [4] B_1, K_2, W_2 add संहरतीति. [5] K_3 adds हलं. [6] K_2 adds व्यधिकरणे. [7] D_2, K_2 add बली वा; बलः, धर्मधर्मिणोर्लिङ्गभेदस्तु मतुप्सामर्थ्यात् B_2, C.

(पा.) बलभद्रः—बलः। बलभद्रनामानि। 'स्यादेककुण्डलः शेषः सात्वतश्च सितासितः'। एतानि[1] च। 'सौनन्दमस्य मुसलं तस्य संवर्तकं हलम्' इति वैजयन्ती (पृ. ५, श्लो. २४-५)। तद्योगात् संवर्तकधरः सौनन्दपाणिश्च भवति ॥ २३–४ ॥

[1] A_1, B_4 add पञ्च.

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ॥ २५ ॥
कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ।
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ॥ २६ ॥
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ।

(वि.) मदनेति—मदयतीति मदनः । 'मदी हर्षग्लेपनयोः'[1] । मनो[2] मथ्नातीति मन्मथः । 'मन्थ[3] विलोडने' । वियुक्ता[4] अनेन म्रियन्ते मारः । 'मृङ् प्राणत्यागे'[5] । प्रकृष्टं द्युम्नं बलम् अस्यास्तीति प्रद्युम्नः । मीनः [6]केतने यस्य सः मीनकेतनः । मीनशब्दः [7]जलचरोपलक्षणम् । कं कुत्सितेऽव्ययम् । कं कुत्सितः दर्पः यस्य सः कंदर्पः । दर्पं बलं करोतीति दर्पकः[8] । न [9]विद्यते [10]अङ्गं यस्य सः अनङ्गः । कामयते अनेन कामः । 'कमु [11]कान्तौ' । पञ्च शरा यस्य सः पञ्चशरः । स्मरन्त्यनेनेति स्मरः[12] । 'स्मृ आध्याने' । [13]शम्बरासुरस्य अरिः[14] शम्बरारिः । मनसि [15]जायते इति मनसिजः । 'जनी प्रादुर्भावे' । कुसुमानि [16]इषवो यस्य सः कुसुमेषुः । मनसोऽन्यस्मात्[17] न जायते इत्यनन्यजः । पुष्पं धनुर्यस्य सः पुष्पधन्वा । रतेः पतिः रतिपतिः । मकरः [18]ध्वजे यस्य सः मकरध्वजः । [19]आत्मनो मनसो भवतीत्यात्मभूः । 'भू सत्तायाम्' । एतानि [20]मन्मथनामानि ॥ २५–६ ॥

1 ग्लपनयोः A, B_2, K_2, Y.　2 मत् मानसं D_1, I, K_1, U, W_1.　3 मथि C, D_1, D_2; मथे A.　4 B_2, C add पुरुषा वा स्त्रियो वा.　5 °परित्यागे W_1.　6 C, K_5, W_2 add ध्वजे; केतनं ध्वजो° D_1, I, W_1.　7 जलचरनक्रोपलक्षणः B_2, C; मकरकेतन इत्यर्थः C, D_1, K_5, U, W_1.　8 कर्त्रर्थे कप्रत्ययः C; दर्पयतीति K_3, W_1; 'दृप हर्षमोहनयोः' W_1.　9 नास्ति B_1, K_3.　10 B_2, C add शरीरं.　11 C adds कान्तिरिच्छा.　12 स्मर्यते इति स्मरः B_1, B_2; 'स्मृ स्मरणे' B_2, C, K_5, W_2, Y.　13 शम्बरस्य K_1, K_3.　14 U adds अरातिः.　15 जनिः A, B_1, K_1, W_1; जातः U, W_2.　16 K_3 adds एव.　17 अन्यजो न भवतीति K_3.　18 ध्वजो A, K_2, K_5, T.　19 आत्मना मनसा B_1, C, D_1, W_2, Y.　20 काम° B_2, D_2, K_3, K_5, W_1.

(पा.) मदनो—आत्मभूः । कामनामानि ।

'कं वदन्ति तपोभङ्गकारणं यतिनां जनाः ।
न स्वीकुर्वन्ति किं सन्तः सर्वधर्मपरायणाः [1] ॥'

इति विदग्धकण्ठाभरणप्रश्नोत्तराभ्यां ब्रह्मसूशब्दः कामपर्यायः ।

'इः कायजो जराभारुः कन्तुः सुरभिसायकः ।
संकल्पजन्मा शृङ्गारयोनिर्गूढाशयेशयः[2] ॥
पुष्पायुधः पुष्पकेतुर्भावजो विषमायुधः ।
पञ्चायुधो मधुसखः श्रीसूनुर्मधुसारथिः ॥
वीरधन्वा स्वादुधन्वा स्मृतिभूरिक्षुसायकः ॥'

एतानि[3] च ॥ २५–६ ॥

[1] विशारदाः A_1, B_4. [2] गूर° A_1. [3] A_1 adds २१.

ब्रह्मसूर्ऋश्यकेतुः स्यादनिरुद्ध उषापतिः ॥ २७ ॥

(वि.) ब्रह्मेति—ब्रह्म ज्ञानं [1]सूते ब्रह्मसूः । 'षूञ् प्राणिप्रसवे' । ऋश्यो मृगः केतौ यस्य सः ऋश्यकेतुः । न निरुध्यत इति अनिरुद्धः । 'रुधिर् आवरणे' । उषायाः पतिः उषापतिः । एतानि [2]प्रद्युम्नपुत्रनामानि । [3](अरविन्दमिति अशोकमिति नवमल्लिकेति चूतमिति नीलोत्पलमिति ते पञ्चापि मन्मथस्य सायकनामानि ।

अरविन्दमशोकं च चूतं च नवमल्लिका ।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥
[4]हृच्छयः कामजश्चैत्रसखः शृङ्गारयोनिजः ।)

इति ॥ २७ ॥

[1] सूयते U. [2] अनिरुद्ध° B_2, C, W_1. [3] K_2 adds. [4] हृच्छयः चैत्रसखः शृङ्गारयोनिः U, W_1; K_2 adds श्रियः पुत्रः श्रीपुत्रः, शूर्पकस्य अरातिः.

(पा.) ब्रह्मसूर्विश्वकेतुः—उषापतिः । कामपुत्रनामानि । 'क्लेदन्ती स्मरवल्लभा' 'ब्रह्मसूर्विश्वकेतुः स्यात्' इति रभसकोशपाठाद् ब्रह्मसूशब्दः कामपुत्रपर्यायः ॥ २७ ॥

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।
([1]इन्दिरा लोकमाता मा क्षीरोदतनया रमा) ॥ २८ ॥

(वि.) लक्ष्मीरिति—लक्ष्यत इति लक्ष्मीः[2] । 'लक्ष दर्शनाङ्कनयोः' । पद्मम् आलयं यस्याः सा पद्मालया । पद्यत इति पद्मा । 'पद्लृ सेवायाम्'[3] । [4]पद्ममस्या अस्तीति वा । काम्यत[5] इति कमला । 'कमु कान्तौ' । श्रीयत इति श्रीः,[6] श्रयत इति वा । 'श्रिञ् सेवायाम्' । हरेः प्रिया हरिप्रिया । इन्दिं[7] रातीति इन्दिरा । 'इदि परमैश्वर्ये' । 'रा दाने' । लोकानां माता लोकमाता । मा च । क्षीराब्धेस्तनया क्षीराब्धितनया । रमयतीति रमा । 'रमु क्रीडायाम्' ।

([8]भार्गवी लोकजननी क्षीरसागरकन्यका) ।

भार्गवीति—भृगोर्गोत्रापत्यं स्त्री भार्गवी । लोकानां जननी लोकजननी । क्षीरसागरस्य कन्यका क्षीरसागरकन्यका । एतानि लक्ष्मीनामानि ॥ २८ ॥

[1] Found in D_2, K_1, K_2, K_3, K_5, W_2, Y. [2] लक्षं (लक्ष्यं B_2) कलङ्कं मुष्णातीति लक्ष्मीर्वा । 'मुष स्तेये' C; W_2 adds 'लक्षेर्मुट् च'. [3] B_2, C add गत्यर्थे वा. [4] B_2, C add पद्मं हस्ते धारयतीति वा. [5] कम्यते W_1, Y. [6] D_2, K_2 add श्रयन्त्येतामिति वा. [7] W_1 omits 6 lines. [8] K_1, K_3, K_5, U, Y omit.

(पा.) लक्ष्मीः—हरिप्रिया । लक्ष्मीनामानि । पद्मा कमलेत्यादिना पर्यायस्यापि ग्रहणम् । 'स्त्रीलिङ्गाश्चाम्बुजाह्वया' इति वैजयन्ती (पृ. ६, श्लो. ३६) । 'ईर्लोकमाताब्धिसुता मा रमा गोमिनीन्दिरा' । एतानि[1] च ॥ २८ ॥

[1] A_1 adds सप्त.

शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनम् ।
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥ २९ ॥

(वि.) शङ्ख इति—पञ्चजनाख्ये [1]असुरे भवः पाञ्चजन्यः इति [2]लक्ष्मीपतिशङ्खनाम । सुष्ठु दृश्यते सुदर्शनम् । पुंलिङ्गपक्षे सुष्ठु शत्रून् पश्यतीति सुदर्शनः । 'दृशिर्[3] प्रेक्षणे' । चकत इति चक्रम् । इति विष्णुचक्रनाम । कुं [4]पृथिवीं मोदयतीति कुमोदकः विष्णुः[5] तस्येयं कौमोदकी । 'मुदि हर्षे' । कौपोदकीति पाठे[6] कूपोदकात् जायत इति कौपोदकी । इति विष्णुगदानाम । नन्दयतीति नन्दकः । 'टुनदि समृद्धौ' । इति विष्णुखड्गनाम[7] । कौ भुवि स्तोभते व्याप्नोतीति कुस्तुभः[8] । तस्यायं कौस्तुभः । 'ष्टुभु [9]स्तम्भे' । इति विष्णुमणिनाम ॥ २९ ॥

[1] रक्षसि B_1, C, D_1, K_1, U, W_1. [2] विष्णु° B_2, D_2, K_1, W_1. [3] दृशेः पश्यादेशः A, D_2, K_2. [4] भूमिं B_2, C, K_2; पृथ्वीं K_1, K_3. [5] स च विष्णुरित्यर्थः C. [6] तत् पक्षे इयं व्याख्या B_2, C. [7] विष्णुचन्द्रहासनाम K_2. [8] कुस्तुभः समुद्रः तत्र भवः B_2, C, D_1, K_1, K_2, U, W_1. [9] स्तोभे K_5, W_1.

(पा.) शङ्खो—मणिः । लक्ष्मीपतेः शङ्खः पाञ्चजन्यः स्यात् । तस्य चक्रं सुदर्शनम् । विधेयानुवाद्यपदानि सर्वाण्यत्र समानलिङ्गानि[1] । अतः सुदर्शनशब्दस्य नपुंसकत्वं सिद्धम् । 'बन्धुरेष जगतां सुदर्शनः' इति माघप्रयोगात् (शिशु. १४. १६) पुंस्त्वं[2] च

संभावितम्। अत एव 'परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः' (३. ५. ४६) इति शास्त्रान्ते वक्ष्यति। तद्गदा कौमोदकी स्यात्। तत्खड्गो नन्दकः स्यात्। तन्मणिः कौस्तुभ इति शब्द्यते। 'चापं तु शार्ङ्गमुरसि वनमाला च मालिका' इति च। तद्योगात् शार्ङ्गी वनमालीति शब्दौ व्युत्पत्तिसिद्धौ ॥ २९ ॥

[1] A_1 adds स्युः. [2] पुंलिङ्गत्वं B_3, B_4.

([1]चापं शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम् ॥)

(वि.) चापमिति—शृङ्गस्य विकारः शार्ङ्गं, मुरारेः चापस्य नाम। तस्य लाञ्छनं श्रीवत्स इति मतम्। श्रीः वक्षसि यस्येति वा।

[1] Found in D_2, K_2.

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ ३० ॥

(वि.) गरुत्मानिति—गरुतोऽस्य सन्तीति गरुत्मान्। [1]सर्पान् गिरतीति गरुडः। 'गॄ निगरणे'। गरुद्भिः डीयते इति वा गरुडः। 'डीङ् विहायसा[2] गतौ'। [3]तृक्षस्यापत्यं पुमान् तार्क्ष्यः। विनताया अपत्यं पुमान् वैनतेयः[4]। खगानामीश्वरः खगेश्वरः। [5]नागानाम् अन्तको नागान्तकः। विष्णोः रथः[6] विष्णुरथः। शोभनानि पर्णानि पक्षाः यस्य सः सुपर्णः। पन्नगा[7] अशनं यस्य सः पन्नगाशनः। एतानि गरुडनामानि ॥ ३० ॥

[1] सर्वान् D_1, D_2, T. [2] °यसा K_1, O, U, Y. [3] तृक्ष्यापत्यं W_1. [4] B_2, C, K_5, W_2 add 'स्त्रीभ्यो ढक्'. [5] नागान् अन्तयति नाशयतीति B_2, C. [6] B_2, C add वाहनं. [7] पन्नगान् अश्नातीति। 'अश भक्षणे' B_2, C.

(पा.) गरुत्मान्—पन्नगाशनः। गरुडनामानि। गरुत्मसौपर्णशब्दावपि विद्येते। 'विदधद्विमुखान् भटानिवाहीन् स गरुत्मेव महेन्द्रमाप कोपात्' इति चन्द्रकाव्यम्। [1]'ग्रौर्णवीदथ सौपर्णः कीर्णपर्णः फणाभृतः' इति राघवपाण्डवीयम् (द्विसं. १८. ५२) ॥३०॥

[1] 'जीर्णवीवधसौपर्णकीर्णपर्णफणाभृतः' MSS.

शंभुरीशः पशुपतिः शिवः शूली महेश्वरः।
ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ॥ ३१ ॥

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३२ ॥
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३३ ॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३४ ॥
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ३५ ॥
(अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः ॥)

(वि.) शंभुरिति—शं सुखमस्माद् भवतीति शंभुः[1]। ईष्टे इति ईशः। 'ईश ऐश्वर्ये'। पशूनां पतिः पशुपतिः। शेरते [2]सज्जनमनांसि अस्मिन्निति शिवः। अन्तकाले जगती[3] अस्मिन् शेते इति वा शिवः। 'शीङ् स्वप्ने'। शिवंकरत्वाद्वा शिवः। शूलमस्यास्तीति शूली। महांश्चासौ ईश्वरश्च महेश्वरः। महतां देवानाम् ईश्वरो वा[4]। शं[5] करोतीति शंकरः। 'डुकृञ् करणे'। चन्द्रः शेखरः[6] यस्य सः चन्द्रशेखरः। भूतानामीशः भूतेशः। [7]भूताः प्राप्ताः शिवभक्ताः तेषां ईं मायां श्यतीति वा। 'शो तनूकरणे'। परशुना खण्डयतीति खण्डपरशुः। 'खडि खड भेदने'। खण्डः परशुः[8] अनेनेति वा। गिरीणामीशो गिरीशः[9]। गिरौ शेते इति गिरिशः[10]। मृडतीति [11]मृडः। 'मृड सुखने'। मृत्युं जयतीति मृत्युंजयः। 'जि जये' कृत्तिश्चर्म वासो यस्य सः कृत्तिवासाः। पिनाकोऽस्यास्तीति पिनाकी। प्रमथानाम् अधिपः प्रमथाधिपः। उत् गृह्णातीति उग्रः। 'ग्रह उपादाने'। उग्रत्वाद्वा उग्रः। कपर्दोऽस्यास्तीति कपर्दी। श्रीः शोभा[12] कण्ठे यस्य सः श्रीकण्ठः। शितिः [13]मेचकः कण्ठे यस्य सः शितिकण्ठः। कपालं बिभर्तीति कपालभृत्। 'डुभृञ् धारण-पोषणयोः'। वामः श्रेष्ठः, स चासौ देवश्च वामदेवः। वामया[14] दीव्यतीति वा वामे [15]सव्ये देवी यस्येति वा। वामया युक्तो वा। वामत्वात् वक्रत्वाद्वा[16]। महांश्चासौ देवश्च महादेवः। सर्वत्र 'दिवु क्रीडे'त्यादि धातुः। विरूपम् अक्षि यस्य सः विरूपाक्षः। त्रीणि लोचनानि यस्य सः त्रिलोचनः। कृशानू[17] रेतो यस्य सः कृशानुरेताः। सर्वं जानातीति सर्वज्ञः। 'ज्ञा अवबोधने'। धूः गङ्गा जटासु यस्य सः धूर्जटिः[18]। कण्ठे नीलः केशेषु लोहितः नीललोहितः। नीलश्चासौ लोहितश्च नीललोहितः[19]।

हरतीति हरः। 'हृञ् हरणे'। स्मरं हरतीति स्मरहरः। भृज्ज्यते[20] अनेनेति भर्गः[21]। 'भ्रस्ज पाके'। सकलं बिभर्तीति वा। त्रीणि अम्बकानि लोचनानि यस्य सः त्र्यम्बकः। द्यौर्भूमिरापः तिस्रोऽम्बा[22] यस्येति वा। त्रयाणां ब्रह्मविष्णुरुद्राणाम् अम्बको वा। 'अम्ब जनने'। त्रिपुराणाम् अन्तकः त्रिपुरान्तकः। गङ्गायाः धरः गङ्गाधरः। अन्धकस्य[23] रिपुः अन्धकरिपुः। क्रतुं[24] ध्वंसयतीति क्रतुध्वंसी। 'ध्वंसु अवस्रंसने'। वृषः ध्वजे यस्य सः वृषध्वजः। व्योमवद् [25]विकीर्णः केशो यस्य सः व्योमकेशः। व्योम आकाशः को वायुः तदादीनामीशो[26] वा। सर्वमस्माद् भवतीति भवः। सर्वमस्मिन् भवतीति वा[27]। बिभेत्यस्माद् भीमः। 'ञिभी भये'। [28]प्रलये तिष्ठतीति स्थाणुः। 'ष्ठा गतिनिवृत्तौ'। रोदयति शत्रूनिति रुद्रः। 'रुदिर् अश्रुविमोचने'। [29]ऋतं सत्यं रातीति[30] वा। 'रा आदाने'। रुतं[31] शब्दं रायतीति वा। 'रै शब्दे'। रुदं रोदनं द्रावयतीति वा। 'द्रु गतौ'। उमायाः पतिः उमापतिः। एतानि [32]ईश्वरनामानि॥ ३१-५॥

[33](भस्माङ्गरागोऽस्थिधरः उग्राक्षो नागकङ्कणः।)

(भस्म अङ्गरागो यस्य भस्माङ्गरागः। अस्थीनि धरतीति अस्थिधरः। उग्राणि अक्षीणि यस्य उग्राक्षः। नाग एव कङ्कणं यस्य नागकङ्कणः। एतानि ईशपर्यायनामानि।)

[1] C, D_1, I add 'भू सत्तायाम्'. [2] सुजन° D_2; निजजन° B_2, C. [3] जगत् C, D_1, I, K_3, K_5. [4] ईष्टे ईश्वरः 'ईश ऐश्वर्ये' A, B_1, C, D_1, K_1, W_1; शृणातीति शर्वः, 'शॄ हिंसायाम्' K_1, W_1; B_2, K_1, K_2, K_5, U, W_2, Y add ईष्टे ईशानः. [5] C, D_2, I, K_2, K_5, Y add सुखं. [6] शेखरे A, W_2. [7] भूः प्राप्ताः भूताः K_2, W_2; C adds शिवभक्ताः. [8] परशुर्नामासुरः B_1, K_3, W_2. [9] गिरयोऽस्य सन्तीति वा K_1, K_3, U, W_1, Y. [10] गिरि वाचि शेते वसतीति वा, 'शीङ् स्वप्ने' B_2, C, D_1, K_2; C adds अलुक्। तस्य उपनिषत्प्रतिपाद्यत्वात् इत्यर्थः. [11] Y adds सुखयतीति. [12] C, I, K_3 add विष°. [13] कालः W_2; कालकण्ठः A; नीलकण्ठः K_1. [14] B_2, C add स्त्रिया. [15] वामभागे B_2. [16] वामायाः पार्वत्याः देवो वा, वामत्वात् वक्रत्वाद्वा वामः, स चासौ देवश्च C. [17] कृशानौ B_2, D_2, K_3, W_1. [18] धूरूपा (B_2 omits भास्वरूपा) जटा यस्य B_2, C, D_1; धुर इव° W_2. [19] K_1, K_3 omit. [20] D_1 adds संसारो; संसारे B_1, C, K_2. [21] W_2 adds भञ्जयति वा. [22] एतासां तिसृणाम् अम्बयति पूरयतीति अम्बको वा। स्वार्थे कप्रत्ययः। 'अम्ब पूरणे' C; अम्बकः पिता वा K_3. [23] अन्धकासुरस्य C, D_1, K_3, U. [24] °दक्षयज्ञं ध्वंसितुं शीलमस्यास्तीति B_2, C. [25] विस्तीर्णः D_2, K_1, K_3, Y; °र्णाः केशाः K_2, W_1. [26] B_2 adds अग्न्यादीनां. [27] D_1, I add 'भू सत्तायाम्'. [28] K_1, W_1 add अपि; K_2 adds काले. [29] U omits 2 lines. [30] C adds गृह्णातीति. [31] ऋतं D_2, W_1; रुणद्धीति रुत् अज्ञानं तत् द्रावयतीति वा B_2, C. [32] ईशानस्य A, T; शम्भु° K_5.

अहिः सर्प एव बुध्न्यम् आभरणं यस्य अहिर्बुध्न्यः। अष्टसु दिक्षु मूर्तिः यस्य सः अष्टमूर्तिः। महान् कालः महाकालः। महान् नटः महानटः। महन्नटनं यस्येति वा। K_2. [33] Found in A, K_2, W_2.

(पा.) शंभुरीशः—त्र्यम्बकः। छान्दसानपि शब्दान् [1]संज्ञाशब्दत्वाद्भाषायामपि प्रयुञ्जत इति[2] त्रियम्बकशब्दः प्रयोगार्ह एव। 'त्रियम्बकं संयमिनं ददर्श' इति [3]कालिदासः। (कु. सं. ३. ४४) नो चेत् दिवस्पतिप्रभृतिशब्दा अप्यव्यवहर्तव्याः स्युः॥ त्रिपुरान्तकः—उमापतिः। [4]ईश्वरनामानि। अनुक्तम्—

'पञ्चाननोऽर्धमकुटः कण्ठेकालो हगायुधः।
अष्टमूर्तिर्युग्माक्षो भालनेत्रोऽकुतश्चनः॥
शैलधन्वार्धरमणिर्ज्यापिङ्गः पांसुचन्दनः।
कालंजरो महाकालो रेरिहाणो[5] महानटः॥
हिरण्यबाहुर्हेहीरो [6]गुहाकेशोऽहिभूषणः।
कटीटङ्कः कंकटिकः कटप्रूः परमेश्वरः॥
अहिर्बुध्न्यो[7] जटाटीरो[8] जटाजूटोऽग्निलोचनः॥'

एतानि च॥ ३१-५॥

[1] B_3 omits. [2] तेन B_3, B_4. [3] B_4 adds कुमारसंभवे. [4] शिव° B_3. [5] लेलिहानः A_1. [6] गुहकेशः A_1. [7] अहिर्बुध्नः B_3. [8] जटाचीरः B_4.

कपर्दोऽस्य जटाजूटः पिनाकोऽजकवं धनुः।

(वि.) कपर्द इति—कं शिरः [1]पिपर्ति पूरयतीति कपर्दः। 'पॄ पालनपूरणयोः'। शिवजटाजूटनाम। अकति[2] अपि नाकति न नमति इति पिनाकः। 'अक अग कुटिलायां गतौ'। पिनह्यत इति पिनाकः। 'णह बन्धने'। अजस्य[3] कम् अस्थि तद्विकारः अजकवम्। अजगवमिति वा पाठः। अजगवोऽस्थिविकारः। शिवस्य धनुर्नामनी॥

[1] पर्दयति B_1, C. [2] अकति कुटिलीभवति इत्यकः। अको न भवतीति नाकः। शिवादितरैः ज्यासंधानाय न नम्यते (नमति B_2) इत्यर्थः। पिकारोऽप्यर्थकः। पिकारेण सहित इति वा। शिवादन्यैरपि न नम्यत इति यावत्। B_2, C. [3] अजस्य इदम् अजकम् अजशृङ्गमित्यर्थः। तेन अजकेन अजशृङ्गेण वर्त्यते क्रियते यत् तत् अजकवम्। तन्निर्मितमित्यर्थः। संबन्धार्थे कप्रत्ययः। C; आजगवमिति वा पाठः। अजश्च गौश्च अजगावौ। तयोर्विकारः आजगवम्। B_2.

(पा.) कपर्दोऽस्य—धनुः। [1]शिवजटाजूटः कपर्दनामा। पिनाक इति अजगवं चेति तस्य धनुर्नामनी। अत्र अजगवशब्दस्य रूपान्तराण्यपि कथयन्ति।

'स्थाणोर्धनुश्चाजगवम्' इति नाममाला। 'अजगावमजीगावम्'[2] इति वैजयन्ती (पृ. ७, श्लो. ५०)।

[1] कपर्द इति ईश्वरजटाजूटनाम A_1. [2] आजगावं B_4; अजीगवमिति मुद्रितग्रन्थे (पृ. ७, श्लो. ५०).

प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ॥ ३६ ॥

(वि.) प्रमथा इति—प्रमथ्नन्ति शत्रूनिति प्रमथाः। 'मन्थ विलोडने'। परिषदि साधवः पारिषदाः। ईश्वरस्य सभ्यनामानि। मान्ति वरिवस्यामिति मातरः। 'मा माने'। 'माङ् माने' इति वा धातुः। मानं वर्तनम्। शिवपरिचर्याकारिणीनां ब्राह्मयादीनां नामानि।

> 'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
> वाराही चैव माहेन्द्री चामुण्डा सप्त मातरः ॥'

ब्रह्मणः संबन्धिनी ब्राह्मी। महेश्वरस्य संबन्धिनी माहेश्वरी। कुमारस्य संबन्धिनी कौमारी। विष्णोरियं वैष्णवी। वराहस्य संबन्धिनी वाराही। महेन्द्रस्य संबन्धिनी माहेन्द्री। चामुण्डा इति सप्त [1]मातरः ॥ ३६ ॥

[1] ब्राह्मी माहेश्वरीन्द्राणी[2] वाराही वैष्णवी तथा।
कौमारी चर्ममुण्डा च [3]कालसंहारिणीति च ॥ B_1, C, W_1, Y. [2] चैन्द्री D_2, I, K_5, W_1. [3] °संकर्षिणीति च D_2, I, K_2; derivations of ब्राह्मी, etc. omitted in D_2, K_1, W_1, Y.

(पा.) प्रमथाः—मातरः। प्रमथा इतीश्वरदासनाम। अनुक्तम्—'भूतलोकानि भूतानि'। भूतानां नामनी। 'कापिशेयाः पिशाचकाः'। गुरुनाथादितत्सहचरपिशाचनाम ॥ अनुक्तम्—

> 'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
> वाराही चैव माहेन्द्री चामुण्डा सप्त मातरः ॥'

ब्राह्मीप्रभृतयः सप्त मातरः स्युः[1]। 'ब्रह्माण्यार्या स्मृताः सप्त मातरो देवता बुधैः' इत्यभिधानात् ब्राह्मी ब्रह्माणीति च नाम भवति। 'चण्डमुण्डा तु चामुण्डा चर्चा मार्जारकन्यका' इत्यभिधानात् चामुण्डा चण्डमुण्डा च भवति[2] ॥ ३६ ॥

[1] B_3 adds 'सप्तमातृकलु'. [2] A_1 adds 'पोलकम्म'.

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।

(वि.) विभूतिरिति—विभवतीति [1]विभूतिः भूतिश्च । ईश्वरस्य भावः कर्म वा ऐश्वर्यम् । [2]अणिमा महिमा लघिमा गरिमा प्राप्तिः[3] प्राकाम्यम् ईशिता वशित्वं चेति ऐश्वर्याष्टकमुच्यते । इत्यणिमाद्यष्टैश्वर्यनामानि ।

[1] विशेषेण भवतीति विभूतिः, 'भू सत्तायाम्' C.
[2] अणिमा लघिमा प्राप्तिः गरिमा महिमेशिता ।
प्राकाम्यं वशिता चेति चैश्वर्याष्टकमुच्यते ॥ B_1, C, D_2.
[3] प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टभूतयः K_2.

(पा.) विभूतिः—अष्टधा । विभूत्यादीनि ऐश्वर्यनामानि । विभूतिभूतिशब्दौ क्तिन्नन्तत्वात् स्त्रीलिङ्गौ । ऐश्वर्यशब्दः ष्यञन्तत्वान्नपुंसकः । अणिमादिभेदेन तदेवाष्टविधम् ।

'अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टभूतयः ॥'

उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥ ३७ ॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३८ ॥
(आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
सती च कालरात्री च भैरवी गणनायिका ॥)

(वि.) उमेति—अवतीति उमा । 'अव रक्षणे' । [1]तपसः उ मेति मात्रा निषिद्धा वा उमा । कति अयनानि सन्तीति विचारयतीति कत्ययनः[2] तस्य गोत्रापत्यं स्त्री कात्यायनी । गौरवर्णत्वाद् गौरी । तपसे [3]गुरते इति गौरी । 'गुरी [4]उद्यमने' । कालवर्णत्वात् काली । हिमवतोऽपत्यं स्त्री हैमवती । ईश्वरस्य पत्नी ईश्वरी । ईष्टे इति वा ईश्वरा । अयमपि पाठः । शिवं मङ्गलमस्या अस्तीति [5]शिवा । शिवस्य पत्नी वा । तथा भवस्य [6]स्त्री भवानी । तथा रुद्राणीशर्वाणीशब्दौ । सर्वतो मङ्गलं [7]यस्याः सा सर्वमङ्गला । अपगतम् ऋणं पितुर्यस्याः सा अपर्णा । [8]तपःकाले अपगतानि[9] पर्णानि यतः अपर्णा । तपसि [10]हरार्थं पर्णमपि नैच्छदित्यपर्णा । पर्वतस्य पुत्री पार्वती । दुःखेन गम्यते[11] इति दुर्गा । दुर्गे निवासोऽस्या अस्तीति वा । मृडस्य पत्नी मृडानी । चण्डत इति

चण्डिका[12]। 'चडि कोपे'। चण्डासुरमर्दनाद्वा[13]। अम्बते [14]जनयति सर्वमिति अम्बिका। 'अम्ब जनने'। एतानि पार्वतीनामानि ॥ ३७–८ ॥

[1] तपसः, उ अयि, मा मास्तु, इति मात्रा मेनकया निषिद्धा वा B_2, C. [2] ऋषिः कश्चित् C. [3] आगुरते K_1, T; अवगुरते W_1. [4] उद्यमे D_2, K_2, K_5, U, Y. [5] शिवंकरत्वाद्वा B_2, C. [6] पत्नी B_1, C, D_1, W_1. [7] यया सा K_3, U, W_1. [8] तपश्चरकाले D_2. [9] अपगतानि आगामिसंचितप्रारब्धरूपाणि ऋणानि यस्याः सा अपर्णा B_2, C. [10] आहारार्थं D_1; K_1, W_1, Y omit तप . . . र्णा. [11] गम्या K_5; I adds 'गम्लृ सृप्लृ गतौ'. [12] W_2 adds चण्डी. [13] मथनत्वाद्वा W_2. [14] °जनं सूते सर्वं Y.

(पा.) उमा—अम्बिका। ईश्वरीत्यत्र गौरादिपाठात् ङीष्। पक्षे टाप्। 'कर्बुरी चेश्वरेश्वरी' इति त्रिकाण्डशेषः (पृ. ३, श्लो. ५५)। पार्वतीनामानि। अनुक्तम्—

'बर्हिर्ध्वजा महाकाली रक्तदन्त्येकपाटला।
दाक्षायणी महादेवी कौशिकी मेनकात्मजा ॥
कालरात्रिर्भगवती गिरिजा शारदा च सौः ॥'

एतानि च। सौः सवौ सवः। सवं सवौ सवः। 'द्योर्गौवद्विभक्तौ' इति कातन्त्रसूत्र-नियमात् गोशब्दवत् णित्कार्यं न भवति ॥ ३७–८ ॥

विनायको विघ्नराजद्वैमातुरगणाधिपाः।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ ३९ ॥

(वि.) विनायक इति—विगतो नायको [1]नियन्ता यस्य सः विनायकः। विनयति शिक्षयति दुष्टानिति वा। 'णीञ् प्रापणे'। विघ्नानां राजा विघ्नराजः[2]। द्वयोर्मात्रोः उमागङ्गयोरपत्यं द्वैमातुरः। गणानाम् अधिपः गणाधिपः। एको दन्तो यस्य सः एकदन्तः। हिरते वर्धयति नेतॄन् हेरम्बः। 'हिर वृद्धौ'। हे रम्बते शब्दायते वा हेरम्बः[3]। हेरम्बशब्दं करोतीति वा। लम्बम् उदरं यस्य सः लम्बोदरः। गजस्येव आननं [4]यस्य सः गजाननः। एतानि विघ्नेश्वरनामानि ॥ ३९ ॥

[1] प्रभुः K_1, K_3, K_5; नेता B_1, C, W_2, Y. [2] B_1, C, K_5, W_2 add 'राजाहः-सखिभ्यष्टच्'. [3] देशीपदप्रायं तु मन्महे W_2, Y; अथवा बालयोः विनायकगुहयोरन्योन्यं क्रीडासमये संभवति युद्धे विनायकोदरे प्रहरतो गुहस्य षट्छिरार्भकस्य एकतो मिलित्वा प्रकुप्य शिवमङ्कमवलम्ब्य निलीनं विनायकं प्रति रोदनवशात् आक्रोशन् गुहस्तातं प्रति हे तात विनायको

मां प्रहृत्य मञ्चे लम्बते इति निवेदयामास। तदाप्रभृति हेरम्भ इति सर्वेऽप्याचक्षत इति ब्रह्माण्डपुराणे प्रसिद्धम्। तस्मात् हेरम्बः C.　　[4] आननमिवाननं C, D_2.

(पा.) विनायको—गजाननाः। विनायकनामानि ॥ ३९ ॥

कार्त्तिकेयो महासेनः शरजन्मा षडाननः।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः॥ ४०॥
बाहुलेयस्तारकजिद् विशाखः शिखिवाहनः।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः॥ ४१॥
(भृङ्गी भृङ्गिरिटस्तण्डुनन्दिनौ नन्दिकेश्वरे।
कर्णमोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका॥)

(वि.) कार्त्तिकेय इति—कृत्तिकानामपत्यं कार्त्तिकेयः। महती सेना यस्य सः महासेनः। शराख्यतृणे जन्म यस्य शरजन्मा[1]। षड् आननानि यस्य षडाननः। पार्वत्या नन्दनः पार्वतीनन्दनः। ईश्वरस्य [2]रेतसः स्कन्दतीति स्कन्दः। शत्रून् स्कन्दति शोषयतीति वा। 'स्कन्दिर् गतिशोषणयोः'। सेनां नयतीति सेनानीः[3]। 'णीञ् प्रापणे'। अग्नेर्भवतीति अग्निभूः। 'भू सत्तायाम्'। परायुधेभ्यः सेनां गूहतीति गुहः। 'गुहू संवरणे'। बहुलानां कृत्तिकानाम् अपत्यं पुमान् बाहुलेयः। तारकासुरं जयतीति तारकजित्। 'जि [4]जये'। विशाखासु[5] [6]भवतीति विशाखः। विना [पक्षिणा] मयूरेण शाखतीति[7] वा विशाखः। 'शाखृ व्याप्तौ'। शिखी वाहनं यस्य सः शिखिवाहनः। [8]षण्मातॄणामपत्यं षाण्मातुरः। शक्तेर्धरः, शक्तिं [9]धारयतीति वा शक्तिधरः। 'धृञ् धारणे'। [10]कुत्सितं मारयतीति कुमारः। कौ पृथिव्यां मां श्रियं रातीति वा। कुमारयति शिखिना वा। 'कुमार क्रीडायाम्'। सदा ब्रह्मचारित्वाद्वा कुमारः। क्रौञ्चगिरिं दारयतीति[11] क्रौञ्चदारणः। 'दॄ विदारणे'। एतानि [12]कुमारनामानि ॥ ४०–१ ॥

[1] शरे जले जन्म D_1, I.　[2] रेतसा W_1; रेतसि K_2.　[3] ईकारान्तः B_2, C.
[4] अभिभवे I, K_1, W_1.　[5] B_2, C add नक्षत्रेषु.　[6] भवः D_1, I, K_5, W_1; विशाखसंभवः K_1.　[7] B_2, C, D_1, I add व्याप्नोतीति.　[8] षण्णाम् K_1, K_5, W_2.
[9] धरति B_2, C.　[10] कुत्सितं भयंकरं यथा भवति तथा शत्रून् मारयति। 'मृङ् प्राणत्यागे' C.
[11] B_1, C add खण्डयति.　[12] कुमारस्वामि° D_2, I, K_1, K_3, W_1; °स्वामिनां A.

(पा.) कार्त्तिकेयो—क्रौञ्चदारणः। कार्त्तिकेयनामानि। अनुक्तम्—

सुब्रह्मण्यो ब्रह्मगर्भो नीलदंष्ट्रो हरात्मजः।
स्वामी शरेजः[1] शरजो गाङ्गेयः कुक्कुटध्वजः॥

एतानि च॥ ४०—१॥

[1] जलेजः A_1.

इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः।
वृद्धश्रवाः शुनासीरः पुरुहूतः पुरंदरः॥ ४२॥
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः।
सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा॥ ४३॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः॥ ४४॥
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः।
आखण्डलः सहस्राक्ष ऋभुक्षाः

(वि.) इन्द्र इति—इन्दतीति इन्द्रः[1]। 'इदि परमैश्वर्ये'। मरुतः अस्य सन्तीति मरुत्वान्। मह्यते मघवान्[2]। 'मह पूजायाम्'। मघः [3]सौख्यमस्यास्तीति मघवा। बेडति इति बिडम्। 'बिड आक्रोशे'। 'बिड भेदने'। बिडं शत्रुतापनम् आक्रोशनं वा [4]तेजोऽस्य बिडौजाः। पाको[5] नामासुरः तं शास्तीति पाकशासनः। 'शासु अनुशिष्टौ'। पाकं दितिगर्भं वा शास्तीति पाकशासनः। वृद्धेभ्यः श्रवः श्रवणं यस्य वृद्धश्रवाः। वृद्धं श्रवः कीर्तिर्यस्येति वा। वृद्ध इति श्रूयते वा। 'श्रु श्रवणे'। शुनन्तीति [6]शुनाः। 'शुन गतौ'। शुनाः सीराः लाङ्गलानि येन साधनेन शुनासीरः। शुनाः समृद्धाः सीरा येनेति वा। वायुसूर्यौ अस्य स्त इति वा। शु शोभनाः नासीरा अग्रेसरा यस्येति वा शुनासीरः। पुरु भूयिष्ठं हूयते यज्ञेषु पुरुहूतः। पुरं शत्रोः शरीरं [7]पुरं वा दारयतीति पुरंदरः। 'दॄ विदारणे'। जयतीति जिष्णुः[8]। लेखानां देवानाम् ऋषभः श्रेष्ठः लेखर्षभः। शक्नोति दुष्टजये इति शक्रः। 'शक्लृ शक्तौ'। शतं मन्यवः क्रतवो यस्य सः शतमन्युः। दिवः स्वर्गस्य पतिः दिवस्पतिः। सुष्ठु त्रायते इति सुत्रामा। 'त्रैङ् पालने'। शोभनं त्राम बलं यस्येति वा। गोत्रान् [9]गिरीन्

भिनत्तीति गोत्रभित्। 'भिदिर् विदारणे'[10]॥ [11]वज्रोऽस्यास्तीति वज्री। वसूनामयं स्वामी वासवः। वसून्यस्य सन्तीति वा। वृत्रं [12]हतवान् वृत्रहा। 'हन हिंसागत्योः'। वर्षतीति वृषा। नकारान्तः। 'वृष सेचने'। वास्तोः [13]गृहदेवतायाः पतिः वास्तोष्पतिः। सुराणां पतिः सुरपतिः। [14]बलस्यारातिः बलारातिः। शच्याः पतिः शचीपतिः। जम्भम् असुरं [15]भिनत्तीति जम्भभेदी। 'भिदिर् [16]विदारणे'। [17]हरयो हरितो हया यस्य हरिहयः। स्वः स्वर्गे राजतीति स्वाराट्। 'राजृ दीप्तौ'। [18]नमुचिं सूदयतीति नमुचिसूदनः। 'षूद क्षरणे'। संक्रन्दं नयति शत्रून् [19]संक्रन्दनः। 'क्रदि आह्वाने रोदने च'। दुःखेन च्योतितुं शक्यः दुश्च्यवनः। 'च्युतिर् [20]क्षरणे'। शत्रूणां तुरं [21]त्वरितं सहते तुराषाट्। 'षह मर्षणे'। मेघो वाहनं यस्य मेघवाहनः। आखण्डयति रिपून् इत्याखण्डलः। 'खडि [22]भेदने'। सहस्रम् अक्षीणि यस्य सः सहस्राक्षः। इयर्तीति ऋभुक्षाः[23]। 'ऋ गतौ'। ऋभून् देवान् क्षिपति कर्मसु इति वा ऋभुक्षाः। नकारान्तः। 'क्षिप प्रेरणे'[24]। एतानि इन्द्रनामानि॥ ४२–५॥

[1] यद्वा इदंकारास्पदघटादिवत् इम् इदं सर्वं द्राति साक्षात्करोतीति इन्द्रः। 'द्रु गतौ'। गतिशब्दस्तु ज्ञानात्मकः C. [2] मघवा K_1, K_3, K_5, W_1; मह्यते पूज्यते इति महः। हकारस्य घश्च आदेशः। मघः अस्यास्तीति मघवान् B_2, C. [3] सौम्यं A. [4] ओजो B_1, D_1, W_1; बलं C; बिडं शत्रुसमुत्क्रोशनं ओजः W_2. [5] दितिगर्भे पाकं शिशुं शास्ति भेदयतीति वा B_2, C, D_2; पाकं गजेन्द्रं वा W_2. [6] 'शुन गतिसमृद्ध्योः'। अथवा शुनाः आसीराः येषां ते। ते च वायुसूर्यापः। तेऽस्य वशे तिष्ठन्तीति शुनासीरः B_2, C. [7] पट्टणं वा B_1, C, D_1, W_1, Y. [8] C, D_1, I add 'जि जये'. [9] पर्वतान् C. [10] 'द्वैधीकरणे' A, B_1, C, K_2, K_5, T. [11] वज्रं B_1, C, W_2. [12] हन्तीति B_1, C, K_3, U, W_2. [13] वास्तुपुरुषस्य B_2, C. [14] बलासुरस्य B_2, C. [15] C adds हिनस्ति. [16] 'द्वैधीकरणे' A, B_1, C, T, W_1. [17] हरिवर्णाः A; श्यामाः C. [18] ऋणं न मुञ्चतीति नमुचिः A, D_2, K_1, W_1. [19] संक्रन्दयतीति D_2, K_1, K_5, W_1. [20] स्रंसने C, K_2. [21] तुदनं (तोदनं) आ समन्तात् सहते तुराषाट् C. [22] 'खण्डने' D_2, K_2, Y. [23] इयर्ति व्याप्नोतीति च भवतीति च क्षमते इति च धातुत्रयेण निष्पन्नः ऋभुक्षाः। 'ऋ गतौ, भू सत्तायाम्, क्षम सहने'। अथवा ऋभु अमोघं, क्षिप्यते इति क्षः, तत् किं, धनुरित्यर्थः। अमोघं धनुर्यस्येति ऋभुक्षाः C. [24] K_2, K_5, W_2 add उग्रधन्वा च.

(पा.) इन्द्रो मरुत्वान्, मघवान्—मघवा इत्युभयथा पाठः। पूर्वस्योदाहरणम्—'स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः'। (रघु. ९. १९) अपरस्योदाहरणम्—'जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः[1]। (मेघ. १. ६) वृद्धश्रवाः शुनासीरः। 'शक्र इव नाकविख्यातसुनासीरः' इत्याश्चर्यमञ्जरी[1]श्लेषाद् दन्त्यः।

'गुर्वी वहन् सदानवलक्ष्यीकृत्वाङ्गदांशुनाशीरेण ।
अनुवनिताञ्जलिमुकुलं लक्ष्यीकृत्वाङ्गदां शुनासीरेण ॥'

इति हरिप्रबोधयमकात् ताल्व्यादिः ।

पुरुहूतः—हरिहयः । 'प्रायो रूढिर्बलवती' इति [2]न्यायेन शतमन्युशब्दसाम्यात् शतमखादिशब्दाः प्रयोक्तव्या [3]इति हरिहयशब्दसाम्याद् हर्यश्वादिशब्दाश्च प्रयोक्तव्या न भवन्ति । हरिवाहनशब्दः प्रयोक्तव्यो भवति । स्वाराट्—ऋभुक्षाः । 'सहेः साडः सः' (८. ३. ५६) इति साड्रूपे षत्वम् । तुरासाहौ तुरासाहः । [4]पृतनाषाट्-शब्दस्याप्ययमेव क्रमः । 'हल्ङ्याब्भ्यो दीर्घात्' इति (६. १. ६८) हलाश्रितत्वात् स्थान्यतिदेशो न । इन्द्रनामानि ॥ अनुक्तम्—

प्राचीनबर्हिर्मेषाण्डो महेन्द्रः सितकुञ्जरः ।
पूतक्रतुः पुलोमारिर्दाल्मिरप्सरसां पतिः ।
पुरदंस उग्रधन्वा हरिवान् वज्रदक्षिणः ॥

एतानि च ॥ ४२–५ ॥

[1] °मञ्जु° A_1. [2] न्यायो बलवान् A_1. [3] इव A_1. [4] एवं पृतनाशब्देऽपि B_3, B_4.

तस्य तु प्रिया ॥ ४५ ॥

पुलोमजा शचीन्द्राणी नगरी त्वमरावती ।
हय उच्चैश्रवाः सूतो मातलिर्नन्दनं वनम् ॥ ४६ ॥
स्यात् प्रासादो वैजयन्तो जयन्तः पाकशासनिः ।
ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४७ ॥
ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः ।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥ ४८ ॥

(वि.) पुलोमजेति—पुरूणि लोमानि यस्य सः पुलोमा । तस्मात् पुलोम्नः जायत[1] इति पुलोमजा । 'जनी प्रादुर्भावे' । शश्चते[2] हंसवत् गच्छतीति शची । 'शश्च गतौ' । इन्द्रस्य पत्नी इन्द्राणी । इन्द्रभार्यानामानि[3] ॥ [4]अमरा अत्र [5]वसन्तीति अमरावती । इन्द्रनगरीनाम ॥ उच्चैः श्रवः कीर्तिः यस्य सः

उच्चैःश्रवाः। [6]उच्चैः उन्नते श्रवसी[7] यस्येति वा। इन्द्रहयनाम[8]।। मतानि सूतकर्मणि लाति गृह्णातीति मतलः। तस्यापत्यं [9]मातलिः। 'ला आदाने'। इन्द्रसारथिनाम।। नन्दयतीति नन्दनम्। 'टुनदि समृद्धौ'। इन्द्रवननाम।। विजयन्तस्य इन्द्रस्य अयं [10]वैजयन्तः। तत्प्रासादनाम।। जयति शत्रूनिति जयन्तः। रूपेण[11] वा सर्वान् जयति अभिभवति जयन्तः[12]। पाकशासनस्यापत्यं पाकशासनिः। इन्द्रपुत्रनामानि[13]।। इरा आपः यत्र वसन्ति स इरावान् सिन्धुः[14]। तत्र जातः ऐरावतः। अभ्रे मातङ्ग इव खेचरत्वात् अभ्रमातङ्गः[15]। इरा हाला तत्प्रधानं वनम् इरावणम् तत्र जातः ऐरावणः[16]। अभ्रमोः वल्लभः अभ्रमुवल्लभः। इन्द्रगजनामानि।। ह्रादो [17]ध्वनिः अस्या अस्तीति ह्रादिनी। ह्रादुनीति वा पाठः। वजति शीघ्रं गच्छतीति वज्रम्। 'वज व्रज गतौ'। कुल्यते संतन्यते कीर्तिरनेनेति कुलिशम्। 'कुल संताने'। कुं पृथिवीं[18] लेशयतीति वा। 'लिश अल्पीभावे'। कुलिनः[19] पर्वतान् श्यतीति वा। 'शो तनूकरणे'। कुलिशवज्रशब्दौ अस्त्रियौ। भिनत्ति ताच्छील्येनेति भिदुरम्। पुनाति वैरमिति पविः। 'पूञ् पवने'। शतं कोटयो[20] यस्य शतकोटिः। स्वरतीति परान् स्वरुः। 'स्वृ उपतापे'। शमयति शत्रूनिति [21]शम्बः। 'शमु उपशमने'। शत्रुं दभ्नोतीति दम्भोलिः। 'दम्भु हिंसायाम्'। अश्नाति शत्रुजीवितम्[22] अश्नुते[23] वा अशनिः। 'अश भोजने'। 'अशू व्याप्तौ'। अशनीति वा पाठः स्त्रीलिङ्गपक्षे। एतानि वज्रनामानि[24]।। ४६–८।।

[1] जात B_2, C, D_2, K_2, W_1. [2] शचते C, D_2, K_5, W_1, Y; शं सुखं चिनोतीति शची C. [3] °पत्नी° A, K_2, T. [4] B_1, U add इन्द्रस्य. [5] सन्ति D_1. [6] B_1, C, T omit. [7] A, B_2, C add श्रोत्रे. [8] °वाहन° A, Y. [9] °लाति ताडयति अश्वान्। 'ला ताडने' 'अत इञ्' B_1, C. [10] विजयतः इन्द्रस्यायं वैजयन्तः B_1, C. [11] रोषेण W_2. [12] 'जि जये' C; D_1 adds 'जि अभिभवे'. [13] नामनी B_2, C. [14] समुद्रः C. [15] आतमेव आतङ्कः। भ्रमश्च आतं च भ्रमाते। ते गच्छतीति भ्रमातङ्गः। स न भवतीति अभ्रमातङ्गः। 'गम्लृ गतौ' C; भ्रमातङ्गात् अन्यः अभ्रमातङ्गः B_2; श्वेताभ्रवद्वा K_2. [16] आ समन्ताद्विद्यमानं वनम् आवनम्, ऐरं च तत् आवनं च ऐरावणं क्षीरसमुद्रः, तत्र जातः ऐरावणः B_2, C. [17] अहंकारः B_2, C. [18] पृथ्वीं K_1, W_1. [19] कुः भूमिः तत्र लीयन्त इति कुल्यः। ईकारान्तः। पर्वता इत्यर्थः। तान् श्यतीति C. [20] C adds अग्राणि. [21] शत्रुं शमयित्वा स्वपक्षं वहतीति शंवः। वबयोरभेदः। 'शम उपरमे', 'वह प्रापणे' C, K_1, I, U. [22] °जनं B_2, K_1, K_3. [23] C adds व्याप्नोति. [24] वज्रायुध° B_2, D_2.

(पा.) तस्य तु प्रिया—इन्द्राणी। [1]तत्प्रियानामानि। 'मघोनी जयवाहिनी'। एते च। [2]महेन्द्राणीति पाठान्तरम्।। नगरी त्वमरावती। पुरनाम। अमरा इत्यप्यस्ति। 'दूर्वामरावतीस्थूणागुडूचीष्वमरा [3]मता' इति विश्वप्रकाशिका (पृ. १३२,

श्लो. ९४)। हय उच्चैःश्रवाः। [4]तदश्वनाम॥ सूतो मातलिः। [5]इन्द्रसारथिनाम। 'सारथिस्तु हयंकषः' इति रभसकोशपाठात् हयंकषोऽपि स्यात्॥ नन्दनं वनम्। तत्क्रीडावनं[6] नन्दनम्॥ स्यात् प्रासादो वैजयन्तः। तत्प्रासादनाम। तच्च सप्तभूमिकाभवनम्। तस्य ध्वजोऽपि वैजयन्तः स्यात्। 'प्रासादो वैजयन्तोऽस्य वैजयन्तो ध्वजोऽपि च' इति वैजयन्ती (पृ. ९, श्लो. ९)। जयन्तः पाकशासनिः। तत्तनयनामनी॥ ऐरावतो—अभ्रमुवल्लभाः। तदारोहणगजनामानि। 'राथन्तरिश्चतुर्दन्तः'। एते च॥ ह्रादिनी—द्वयोः। [7]वज्रायुधनामानि। वज्रमस्त्री स्यात् कुलिशमिति संदष्टविशेषविधिः। पविः शतकोटिः स्वरुः शम्बो दम्भोलिरिति [8]परापरसाहचर्यम्। उभयत्र वैजयन्ती—(पृ. १०, श्लो. १३)

> 'अस्त्रियौ वज्रकुलिशौ भिदुरं शतधारकम्।
> [9]व्याधामः पुंसि दम्भोलिः शतकोटिः पविर्भिदुः'॥

अशनिर्द्वयोरित्यसंघातपक्षे विशेषविधिः। संघातपक्षे पुंलिङ्ग एव। 'वज्राशनिर्भिदुर्वज्रम्[10]' इति त्रिकाण्डशेषः (पृ. ४, श्लो. ६५)। 'वज्राशनिर्गिरिकिटः पविर्दम्भोलिरक्षजम्' इति रभसकोशः। अत्र स्वरुशब्दं विना सर्वे शब्दास्तालव्याः। शम्बशब्दस्तालव्यो दन्त्यश्च भवति।

> 'तालव्या अपि दन्त्याः स्युः शम्बशूकरपांशवः[11]।
> कलशः शम्बलं चैव जिह्वायां रसना च या'॥

इत्यूष्मभेदपाठात्॥ ४६–८॥

[1] पत्नी B_3. [2] A_1 adds अमरकोशे. [3] स्मृता B_3, B_4. [4] तदारोहणहय° A_1. [5] B_3 omits इन्द्र. [6] तद्वननाम B_3. [7] A_1 adds तद्गृहीत. [8] B_3 omits परापर. [9] व्याधावः B_3. [10] भिद्र इति मुद्रितग्रन्थे. [11] °सूकरपांसवः A_1.

व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः।
स्यात् सुधर्मा देवसभा पीयूषममृतं सुधा॥ ४९॥

(वि.) व्योमेति—व्योम्नि [1]यानं व्योमयानम्। विमान्ति वर्तन्ते देवा अत्र विमानम्[2]। 'माङ् माने वर्तने च'। विमाननाम॥ [3]सुराणाम् ऋषयः सुरर्षयः। नारं नरसमूहं [4]द्यतीति नारदः। नारदादिदेवर्षिनाम[5]॥ शोभनो धर्मोऽत्र सुधर्मा[6]। नकारान्तोऽप्यस्ति। देवसभानाम॥ पीयते इति पीयूषम्। 'पीङ् पाने'। न मृता

भवन्त्यनेनेत्यमृतम् । सुष्ठु [7]धयन्त्येनां सुधा । 'धेट् पाने' (समुद्रनवनीतं देश्याम्) अमृतनामानि ॥ ४९ ॥

[1] C adds विद्यमानं. [2] विभातीति B₂, C. [3] B_1 omits 3 words. [4] दाति भेदयतीति 'दा अवखण्डने' C, I. [5] °सुर° W_1. [6] आकारान्तः स्त्रियां Y. [7] B_2, C add पिबन्ति; सुखेन धीयते सुधा D_2.

(पा.) व्योमयानं विमानोऽस्त्री । [1]विमाननामनी ॥ नारदाद्याः—देवसभा । देवसभा सुधर्मा स्यात् । 'सुधर्मामिव स्वच्छन्दकौशिकां विन्ध्याटवीं विवेश' इति वासवदत्ता । संज्ञाशब्दत्वाद् 'धर्मादनिच् केवलात्' इति (५. ४. १२४) अनिच् न भवति ॥ पीयूषममृतं सुधा । अमृतनामानि ॥ ४९ ॥

[1] याननामनी B_3.

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।
मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ५० ॥
पञ्चैते देवतरवो मन्दारः पारिजातकः ।
संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५१ ॥

(वि.) मन्दाकिनीति—मन्दम् अकति मन्दाकिनी । 'अक अग कुटिलायां गतौ' । वियति [1]गङ्गा वियद्गङ्गा । [2]स्वः स्वर्गे नदी स्वर्णदी । सुराणां दीर्घिका सुरदीर्घिका । [3]मन्दाकिनीनामानि ॥ मिनोति शिखरैः ज्योतींषीति मेरुः[4] । 'डुमिञ् प्रक्षेपणे' । सुष्ठु मिनोतीति सुमेरुः । हय्यते हेम । 'हय्य गतिकान्त्योः' । हेम्नोऽद्रिः हेमाद्रिः । रत्नानि सानुषु यस्य [5]रत्नसानुः । सुराणाम् आलयः सुरालयः । [6]मेरुनामानि ॥ मन्द्यते स्तूयते मन्दारः । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । मन्दा आरा अस्येति वा मन्दारः । पारम् उदकमस्यास्तीति पारी समुद्रः । तस्मात् जातः पारिजातः[7] । संतनोति वाञ्छितं संतानः । 'तनु विस्तारे' । कल्पयति वाञ्छितं कल्पः, स चासौ वृक्षश्च कल्पवृक्षः । 'कॢपि [8]सामर्थ्ये' । हरेरिन्द्रस्य चन्दनं हरिचन्दनम्[9] । एतानि पञ्च [10]देवतरुनामानि ॥ ५०–१ ॥

[1] B_2, C add विद्यमाना. [2] A, K_1, T, U omit. [3] आकाशगङ्गा° D_1. [4] मीनाति हिनस्ति असुरानिति मेरुः । 'मीञ् हिंसायाम्' D_1. [5] रत्नमयाः सानवः D_1. [6] मेरुगिरि° B_1, C, D_1, K_1, K_5, W_1, Y. [7] पारिणः पारावतः(?) समुद्रात् जातः D_1;

B$_2$, C add 'जनी प्रादुर्भावे'. [8] 'क्लृप्तौ' A, K$_1$, W$_1$. [9] हरिम् इन्द्रं चन्दयति ह्लादयतीति । 'चदि आह्लादने' D$_1$. [10] देवतावृक्ष° D$_1$.

(पा.) मन्दाकिनी—हरिचन्दनम् । [1]आकाशगङ्गानामानि । गिरिनद्यादित्वात् [2]स्वर्णदीत्यपि स्यात् । सिद्धनदीशब्दः प्रयोगे दृष्टः । 'भेजे भीतः पादुकसिद्धसिन्धोर्भूतपूर्वां श्रियमम्बुराशिः'[3] । इति विदग्धकण्ठाभरणम् ।। हेमाद्रिरित्यादिमेरुगिरिनामानि[4] । मन्दारादयः पञ्च [5]सुरतरुनामानि ।। ५०–१ ।।

[1] स्वर्गङ्गा° B$_3$, B$_4$. [2] स्वर्नदीति पाठान्तरम् B$_3$. [3] अम्बुराशेः B$_3$. [4] B$_3$ omits गिरि. [5] देवतरवः A$_4$.

सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।। ५२ ।।

(वि.) सनदिति—[1]सनत् नित्यं कुमारः सनत्कुमारः । विधातुरपत्यं वैधात्रः । [2]वैद्यसंहिताकर्तृविधातृपुत्रस्य नामनी ।। [3]अश्विन्याः सुतौ अश्विनीसुतौ[4] । न असत्यौ नासत्यौ[5] । अश्वावनयोः स्त इत्यश्विनौ । सदा अश्वारूढत्वाद्वा । दस्यतः क्षपयतः रोगानिति दस्रौ । 'दसु उपक्षये' । अश्विन्या [6]अपत्ये पुमांसौ आश्विनेयौ[7] । एतानि स्वर्गवैद्यनामानि ।। ५२ ।।

[1] सनत् ब्रह्मा तस्य कुमारः D$_1$. [2] सनत्कुमारनामानि D$_1$. [3] K$_1$, K$_3$, W$_1$ add स्वः स्वर्गे वैद्यौ स्वर्वैद्यौ. [4] सूर्यस्य पत्न्याः संज्ञायाः अश्वरूपधारिण्याः सुतौ D$_1$. [5] न विद्यते असत्यं ययोस्तौ D$_1$; सत्यौ न भवतः इत्यसत्यौ B$_2$, C. [6] पुत्रौ B$_1$, C, K$_5$, Y; D$_1$ adds तावुभौ सहचरावित्यर्थः. [7] अश्विन्याः अश्वरूपधरासंज्ञायाः जातौ; अश्विनीनक्षत्रजातौ वा D$_1$.

(पा.) सनत्कुमारो वैधात्रः । वैद्यशास्त्रकर्तृदेवर्षिनामनी ।। स्वर्वैद्यौ—तावुभौ । देववैद्ययोर्नामानि । नासत्य इति दस्र इति च तयोः पृथङ्नामनी । 'नासत्यदस्रौ नासत्यावश्विनौ [1]वरवाहनौ' इति वैजयन्ती (पृ. १५, श्लो. ५) । विरूपैकशेषादत्र नासत्यौ दस्रावित्युक्तं मूलकारेण ।। ५२ ।।

[1] नरवाहनौ A$_1$, B$_4$.

स्त्रियां बहुष्वप्सरसः स्वर्वेश्या ऊर्वशीमुखाः ।
(घृताची मेनका रम्भा ऊर्वशी च तिलोत्तमा ।

सुकेशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः ॥)
हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५३ ॥

(वि.) स्त्रियामिति—आप्यन्ते पुण्यकृद्भिरिति अप्सरसः[1]। ऊरू अश्नुते, नारायणस्य ऊर्वोर्भवत्वात् [2]ऊर्वशी। ऊर्वशीमुखस्वर्वेश्यानाम। अप्सरा इत्येकवचनान्तमपि विद्यते॥ गानं धारयन्तीति गानपराः [3]गन्धर्वाः। हाहा हूहू इत्यालापानुकारात् नामद्वयम्। एकनामेत्येके। अव्ययाविति भोजराजः। हाहाहूहूप्रभृतिदेवगायकनामनी॥ ५३॥

[1] अप्सु सरन्तीति। 'सृ गतौ' U; स्रवन्तीति I; अद्भ्यः सृताः अप्सरसः, अपसारयन्ति स्मारयन्तीति, सकारान्तः D_1; अद्भ्यः निःसृताः निर्गताः Y. [2] उर्वशीति वा पाठः Y. [3] गानं धर्मः येषां ते गन्धर्वाः D_1; गानं धारयन्ति, शिष्यान् पाठयन्ति, स्वयं वहन्ति च ये ते गन्धर्वाः। 'धृञ् धारणे' 'वह प्रापणे' C.

(पा.) स्त्रियां—ऊर्वशीमुखाः। ऊर्वशीरम्भामेनकादिस्वर्गगणिका अप्सरस इत्युच्यन्ते। बहुष्विति बहुवचनप्रकृतिरन्ते लिङ्गसंग्रहे समीरिता। एकवचना विंशत्यादयः। द्विवचना दम्पत्यादयः। बहुवचना अप्सरःप्रभृतयः। त्रिवचना वृक्षादयः। अवचनान्यव्ययानि। केषांचिद् बहुत्वमनभिमतमेव। 'एकाप्सरःप्रार्थितयोर्विवादः'[1] इत्यत्र बहुत्वं प्रायिकाभिप्रायमुक्तम्। [2]अबहुवचनस्योदाहरणम्—

'सान्द्रकाण्डपटसंवृतमूर्तेर्दन्तिदन्तशयनीयशयस्य।
मानिनः कुलवधूरिव रागादप्सरा व्यधित पार्श्वमशून्यम्'॥

इति॥ हाहा हूहू—त्रिदिवौकसाम्। हाहाशब्दो धातुजो न भवतीति केचिद् व्याचक्रिरे। तज्जल्पितमज्ञानविजृम्भितमेव। 'हेति निन्दितं ध्वनिं जहातीति हाहा' इत्यमरभाष्यकाराः प्रतिजानते। गन्धर्वन्ति हाहसोरित्यभिधानान्तरपक्षः। हाहाहूहूप्रभृतयो देवगन्धर्वाः। गान्धर्वा अपि भवन्ति। 'अपि गन्धर्वगान्धर्वदिव्यगायनगातवः' इति रभसकोशः[3]॥ ५३॥

[1] A_1 omits विवादः. [2] एकवचनस्य B_3, B_4; कप्फिणाभ्युदये (१७. ३२) इति टीकासर्वस्वे (पृ. ३९). [3] °कोशकारः A_1.

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५४ ॥

बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ।
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५५ ॥
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ॥ ५६ ॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।
शुचिरप्पित्तम्

(वि.) अग्निरिति—[1]अङ्गति [2]ऊर्ध्वं गच्छतीत्यग्निः । 'अगि ऊर्ध्वगमने' । विश्वानरस्य ऋषेरपत्यं वैश्वानरः । हव्यं [3]वहतीति वह्निः । 'वह प्रापणे' । होत्रस्य[4] हविषो वीतिः अश्व इव वहनात् वीतिहोत्रः । अथवा वीतयोऽश्वा होत्रं हव्यमस्येति वीतिहोत्रः । वीतिः [5]आर्याणामशनं होत्रं होमसाधनं तदस्यास्तीति वा वीतिहोत्रः । धनं [6]जयतीति धनंजयः । 'जि जये' । कृपीटस्याम्भसो[7] योनिः कृपीटयोनिः । कृपीटं योनिरस्येति वा । ज्वलतीति ज्वलनः । 'ज्वल दीप्तौ' । जातं विद्यते इति जातवेदाः[8] । 'विद सत्तायाम्' । जातं शुभाशुभं वेत्तीति वा । 'विद ज्ञाने' । वेदो हिरण्यम् अस्मात् [9]जातमिति वा । तनूं न पातयति [10]तनूनपात् । 'पत्लृ गतौ' । बृंहति वर्धते आज्येनेति बर्हिः[11] । 'बृहि वृद्धौ' । शोषयतीति शुष्मा[12] । बर्हाः दर्भाः शुष्म स्थानमस्येति बर्हिः-शुष्मा[13] । दर्भस्थानपक्षे एकनाम । कृष्णं वर्त्म मार्गोऽस्य कृष्णवर्त्मा । शोचींषि[14] केशाः यस्य सः शोचिष्केशः । [15]उषसि बुध्यते प्रकाशते उषर्बुधः । 'बुध अवगमने' । [16]आश्रयम् अश्नातीति आश्रयाशः । 'अश भोजने' । आश्रयाशी इति वा पाठः । बृहन्तः भानवो यस्य बृहद्भानुः । कृशयति तनूः स्वमान्द्यात् कृशानुः[17] । 'कृश तनूकरणे' । कृशेन मन्थकाष्ठेन उत्पन्न इति वा । पुनातीति पावकः । 'पूञ् पवने' । अनिति वर्धतेऽनेन अनलः । 'अन प्राणने' । काष्ठादिभिः अलं पर्याप्तिः नास्ति अस्येति वा । लोहिताख्यो[18] मृगः [19]अश्वोऽस्येति लोहिताश्वः । वायोः सखा वायुसखः[20] । वायुः सखा अस्येति वा । शिखा अस्यास्तीति शिखावान् । आशु शोषयितुमिच्छतीति आशुशुक्षणिः । हिरण्यं रेतोऽस्य हिरण्यरेताः । हुतं [21]भुङ्क्ते हुतभुक् । 'भुज पालनाभ्यवहारयोः' । दहतीति दहनः । 'दह भस्मीकरणे' । हव्ये हव्यविषये वाहते यतते इति हव्यवाहनः । 'वाहृ प्रयत्ने' । हव्यं वहतीति वा । 'वह प्रापणे' । सप्त अर्चींषि यस्य सः [22]सप्तार्चिः । दाम्यति ग्लापयति शमयति [23]दमुनाः । सकारान्तः । 'दमु उपशमने' । शोचयति शत्रूनिति [24]शुक्रः । 'शुच शोके' । शुचं रातीति वा । 'रा आदाने' । शुक्रं [25]रुद्र-रेतोऽत्रास्तीति वा । चित्रा भानवो यस्य चित्रभानुः । विभैव[26] वसु धनमस्य विभावसुः ।

[27]शोचयतीति शुचिः। 'शुच शोके'। शुद्धत्वाद्वा। अपां पित्तम् [28]अप्पित्तम्। एतानि अग्नेर्नामानि ॥ ५४-६ ॥

[1] अगति B_1, C, D_1, I, K_3, W_2. [2] कुटिलम् ऊर्ध्वं वा D_1. [3] D_1 adds प्रापयति देवान्. [4] हूयते इति होत्रं हविर्द्रव्यम्। वीतिः वहनं, तदश्व इव वहनात्, परनिपातः, 'हु दानादानयोः' C; होत्रं हविः वीतिरशनं यस्य वीतिहोत्रः D_1. [5] अमराणां C. [6] C adds संपादयति. [7] उदकस्य K_3, W_1. [8] B_2, C add जातश्चासौ वेदाश्च, 'जनी प्रादुर्भावे'; A, D_2 add जाते जाते. [9] जायते W_2. [10] इन्धनं विना तनूं न पाति। 'पा रक्षणे' D_1, U. [11] K_1, K_3 add सान्तः. [12] D_1 adds 'शुष शोषणे'. [13] नकारान्तः C, W_1. [14] D_1 adds ज्वालाः. [15] प्रातःकाले B_2, C; प्रभाते D_1. [16] K_5 omits 3 lines. [17] कृशोऽपि अनिति वर्धते 'अन प्राणने' D_1. [18] °वर्णः D_1. [19] रोहितः कृष्णमृगः अश्वो वाहनः B_2, C. [20] 'राजाहःसखिभ्यष्टच्' B_2, C. [21] भुनक्ति K_3. [22] काली कराली मनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिङ्गिनी विश्वदासाख्याः जिह्वारूपज्वालाः यस्य सप्तार्चिः D_1. [23] दमनाः B_1, C; उपशाम्यति घनं (?इन्धनं) विना D_1. [24] शोषयति दार्वादीन् B_2, C, D_1. [25] तेजः D_1. [26] विभा प्रभा B_2, C, D_1, K_3. [27] D_1 adds दुःखयति. [28] अपः पिबतीति अप्पित्, 'पा पाने', तनोतीति तं, अप्पिच्च तत्तं च अप्पित्तम् C.

(पा.) अग्निर्वैश्वानरो—तनूनपात्। 'तनूनपाति पीतसर्पिषि पतङ्ग इव पातयाम्यात्मानम्' इति हर्षचरितानुप्रासात् तान्तः। बर्हिः शुष्मा—शोचिष्केश[1] उषर्बुधः। शोचिष्केश इत्यत्र कस्कादित्वात् षत्वमिति कतिचिद्वदन्ति[2]। आश्रयाशो—अप्पित्तम्। अग्निनामानि। बर्हिःशुष्मेति संघातोऽप्यग्निनाम। अपां पित्तमिति वाक्यं सदप्यग्निनाम। शुचिर इति वा पाठः।

'स्रुग्जिह्वो [3]मन्त्रजिह्वश्च त्रिधामा[4] वातसारथिः।
स्वाहाप्रियः कृष्णगतिर्हव्यवाड्ढव्यसूदनः।
धूमध्वजो हुतवहः पाञ्चजन्यो वृषाकपिः॥'

एतानि च॥ ५४-६ ॥

[1] रोचिष्केश A_1, B_1. [2] B_3 omits. [3] मित्र° A_1. [4] दावा A_1.

और्वस्तु बाडवो बडवानलः॥ ५७ ॥
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।

(वि.) औौर्व इति—ऊर्वतीत्यूर्वः । 'उर्वी तुर्वी धुर्वी हिंसायाम्' । तस्यापत्यं औौर्वः । बडवायां भवः बाडवः । बडवायाम् अनलः बडवानलः । बडवाग्निनामानि ॥ ज्वलतीति ज्वालः । 'ज्वल दीप्तौ' । कीलति पक्ष्यादिगतिं कीलः । 'कील बन्धने' । एतौ शब्दौ द्वयोः स्त्रीपुंसयोः । अर्च्यते अर्चिः । सान्तः । 'अर्च पूजायाम्' । स्त्रीपुंनपुंसकेषु अर्चिःशब्दः । प्रायेण अर्चिःशब्दः स्त्रीत्येके । हन्यते अनया हेतिः । 'हन हिंसागत्योः' । हिनोति वर्धते वा । 'हि गतौ वृद्धौ च' । हेतिशब्दः सूर्यवह्निदीप्तिपर्याये स्त्रीलिङ्गः । आयुधपर्याये द्वयोः । शाखति वह्नौ शिखा । 'शाखृ व्याप्तौ' । अग्निज्वालानामानि ॥ ५७ ॥

(पा.) औौर्वस्तु बाडबो बडबानलः । समुद्राग्निनामानि । अनुक्तम्—'सहरक्षा द्रुमाशनः' । अरण्याग्निनामनी ॥ वह्नेर्द्वयोः—स्त्रियाम् । [1]अग्निज्वालानामानि । स्त्रियामिति अर्चिरादिविशेषविधिः । अर्चिषः पश्य, हेतीः पश्य, शिखाः पश्य ॥ ५७ ॥

[1] वह्नि° B_3.

त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ ॥ ५८ ॥
([1]उल्का स्यान्निर्गता ज्वाला भूतिर्भसितभस्मनी ।
क्षारो रक्षा च दावस्तु दवो वनहुताशनः ॥)

(वि.) त्रिष्विति—स्फुलतीति स्फुलिङ्गः[2] । 'स्फुल संचलने' । अग्नेः कणः अग्निकणः । अग्निकणनाम । [3]संतापयतीति संतापः । 'तप संतापे' । संज्वरतीति संज्वरः । 'ज्वर रोगे' । अग्निदाहनामनी । निर्गता ज्वाला अस्य उल्का । अपगतज्वालाग्निनाम । भूतिः भसितभस्मनी क्षारः रक्षा । एतानि भूतिनामानि । दावः दवः वनहुताशनः । दवाग्निनामानि ॥ ५८ ॥

[1] Found in A, B_1. [2] स्फुकारेण लिङ्गतीति D_1; स्फुरतीति W_2, Y. [3] सम्यक् तापयति B_2, C; व्याप्नोति B_2.

(पा.) त्रिषु स्फुलिङ्गोऽग्निकणः । वह्निकणनामानि । आबन्तताप्रसिद्ध्यर्थं त्रिषु स्फुलिङ्गेति केचित् पठन्ति । 'त्रयी[1] [2]स्फुलिङ्गाऽपुञ्जो ना खड्गाङ्गश्चाथ संज्वरः' इति वैजयन्त्यामपि (पृ. ११, श्लो. ३१) तथैव पठिता । संतापः संज्वरः समौ । दाहनामनी । अनुक्तम्—'रेटिः स्त्री रटितं वह्नेः' । अग्निरटितं रेटिरित्युच्यते । तद्ध्वनिनाम । 'धूमः स्यान्नमतस्तरिः' । धूमनाम । 'उल्का स्यान्निर्गता ज्वाला' । निर्गतज्वाला उल्का स्यात् ।

विच्छिन्नज्वालनाम। 'भूतिर्भसितभस्मनी। क्षारो रक्षा[3] च'। भस्मनामानि॥ 'दावस्तु दवो वनहुताशने।' वनवह्निनामनी ॥ ५८

[1] त्रिषु B_3, B_4.　[2] 'स्फुलिङ्गो' इत्येव मुद्रितपुस्तके दृश्यते.　[3] रूक्षा B_3.

धर्मराजः पितृपतिः समवर्ती परेतराट्।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ॥ ५९ ॥
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः।

(वि.) धर्मराज इति—[1]धर्मस्य राजा धर्मराजः। पितॄणां[2] पतिः पितृपतिः। [3]समं वर्तितुं शीलमस्येति समवर्ती। 'वृतु वर्तने'। परेतेषु[4] राजते परेतराट्। 'राजृ दीप्तौ'। कृतः अन्तो[5] येन कृतान्तः। यमुनाया[6] भ्राता यमुनाभ्राता। शमयतीति[7] शमनः। 'शमु उपशमे'। यमेन[8] राजते यमराट्। यमयति नियतिं [9]यच्छतीति [10]यमः। 'यम उपरमे'। [11]कलयतीति कालः। 'कल किल क्षेपे'। दण्डं धरति धारयतीति दण्डधरः[12]। श्राद्धस्य देवः श्राद्धदेवः। विवस्वतोऽपत्यं वैवस्वतः। अन्तं करोतीति अन्तकः। [13]एतानि यमनामानि॥ ५९॥

[1] यथापराधदण्डदानेन D_1.　[2] D_1 adds कव्यवाहनादीनां.　[3] समं वर्तते A, B_1; सम्यग् वर्तते U.　[4] W_1 adds प्रेतेषु; श्मशानेषु C; परेता मृतास्तेषां राजा D_1.　[5] D_1 adds नाशः.　[6] नद्याः D_1.　[7] प्राणिनः D_1.　[8] नियमादिना C; 'राजृ दीप्तौ' I.　[9] नियच्छति A, I.　[10] प्रजासंयमनात् यमः, मृत्युप्रज्वरप्रभृतयोऽस्य किंकराः, तेषु राजेति यमराट् D_1; यमुनया सह यमलत्वे जातत्वाद्वा यमः D_1.　[11] कालयति D_2, I, K_1, K_2, K_5, U; धर्माधर्माणां आयुषां च संख्यानं करोतीति कालः। 'कल शब्द-संख्यानयोः' D_1; वेलास्वरूप इत्यर्थः C.　[12] कालदण्डाख्यस्य धरः D_1; 'धृ धारणे' I.　[13] 'डुकृञ् करणे' I; एतानि धर्मराजनामानि A, I.

(पा.) धर्मराजः—अन्तकः। यमनामानि। 'शामित्रेयः कालकण्ठो दण्डी महिषवाहनः'। एतानि च॥ ५९॥

राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः[1] ॥ ६० ॥
रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६१ ॥

(वि.) राक्षस इति—रक्ष एव राक्षसः। कुणपं [2]शवमत्तीति कौणपः। कोणं पातीति वा। क्रव्यं मांसमत्तीति क्रव्यात्। क्रव्यादश्च। 'अद भक्षणे'। अस्रं [3]रक्तं पिबतीति अस्रपः। 'पा पाने'। अश्रप इति पाठे भक्ष्यमांसं न श्रपयति न पचतीत्यश्रपः। 'श्रा पाके'। असुर एव आसुरः। असून् प्राणान् रातीति वा। 'रा आदाने'। आशृणातीति आशरो[4] वा। 'शॄ हिंसायाम्'। रात्रौ चरतीति रात्रिंचरः। रात्रिचरश्च। 'चर गतिभक्षणयोः'। [5]कर्बुरवर्णत्वात् कर्बुरः। कृणाति[6] हिनस्तीति वा कर्बुरः। 'कॄ हिंसायाम्'। निकषाया[7] आत्मजः निकषात्मजः। निकषानाम रक्षोमाता। यातूनि यातनाः तीव्रवेदना धीयन्त अस्मिन्निति यातुधानः[8]। यातुना धीयतेऽत्रेति वा। विरुद्धलक्षणेन पुण्यवान् जनः पुण्यजनः[9]। [10]निर्ऋतेरपत्यं नैर्ऋतः। याति रक्षांसि यातु[11]। यातुशब्दः उकारान्तः। 'या प्रापणे'। रक्ष्यतेऽस्मात् जगदिति रक्षः[12]। 'रक्ष पालने'। नैर्ऋतनामानि[13] ॥ ६०–१ ॥

[1] आसुरः इति पाठान्तरम्. [2] °तद्भक्षणात् कौणपः D_1, W_1. [3] रुधिरं D_2, I, K_1, U, W_1, Y. [4] अशितमेव आशम्, अस्मै तदर्थं राति गृह्णाति हिंसतीत्यर्थः। तस्मादाशरः, 'रा हिंसायाम्' C. [5] °दशनत्वात् Y. [6] कृणोति Y. [7] निकषति हिनस्तीति निकषा राक्षसमाता D_1. [8] यात्विति नाम धीयते अत्रेति वा W_1; यातून् यातनाः प्राणिषु धत्ते सृजतीति। 'डुधाञ्°' C. [9] विपरीतलक्षणया पापजन इत्यर्थः D_1. [10] दिक्पालस्य D_1; निर्ऋत्यां दिशि वर्तमानो वा नैर्ऋतः D_1. [11] यातयति व्यथयति D_1. [12] रक्षत्यात्मानमिति रक्षः D_1; सकारान्तं नपुंसकम् B_2, D_1, I. [13] निर्ऋतिनामानि D_2, K_1, K_2, Y.

(पा.) राक्षसः—निकषात्मजः। कीकसात्मज इति पाठान्तरम्। यातुधानः—यातुरक्षसी। नैर्ऋतनामानि। अनुक्तम्—'पलंकषो रात्रिमटो रात्र्यटो जललोहितः'। एतानि च ॥ ६०–१ ॥

प्रचेता वरुणः पाशी यादसांपतिरप्पतिः।

(वि.) प्रचेता इति—प्रकृष्टं [1]चेतोऽस्य प्रचेताः। वृणोति पाशैरिति [2]वरुणः। 'वृञ् वरणे'। पाशोऽस्यास्तीति [3]पाशी। [4]यादसां पतिः। अपां पतिः अप्पतिः। उभयत्र षष्ठ्या अलुग्विकल्पः। वरुणनामानि ॥

[1] हृदयम् C. [2] वृण्वन्ति वरादीनमुमिति D_1. [3] पाशयोगात् पाशी D_1. [4] जलचराणां C; जलग्राहाणां Y; जलजन्तूनां D_1.

(पा.) प्रचेताः—अप्पतिः । वरुणनामानि । 'अम्बुकान्तारोऽम्बुभूषणः स्यान्मकरवाहनः' । एतानि च ॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६२ ॥
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।
समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६३ ॥
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।
(प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः ॥)

(वि.) श्वसन इति—श्वसन्ति अनेन प्राणिनः श्वसनः । 'श्वस [1]प्राणने' । स्पृशतीति स्पर्शनः । 'स्पृश संस्पर्शने' । वातीति वायुः । 'वा गतिगन्धनयोः' । मातरि आकाशे श्वयति[2] मातरिश्वा[3] । 'टुओश्वि गतिवृद्ध्योः' । सदा गतिः यस्य सदागतिः । [4]पृषदाख्यो मृगोऽश्वो यस्य पृषदश्वः । पृषतां बिन्दूनाम् अश्व इति वा । गन्धस्य वहः गन्धवहः । [5]गन्धं [6]वहतीति वा । 'वह प्रापणे' । अनित्यनेन अनिलः[7] । 'अन प्राणने' । आशु गच्छतीत्याशुगः[8] । समीरतीति[9] समीरः । 'ईर गतौ' । अनेन कुपितेन[10] म्रियते[11] इति मारुतः[12] । मरुच्चैवम् । जगतां प्राणः जगत्प्राणः[13] । सम्यग् ईरयति समीरणः[14] । 'ईर प्रेरणे' । नभोऽस्यास्तीति नभस्वान्[15] । वातीति वातः । 'वा गतिगन्धनयोः' । पवत इति पवनः । 'पूङ् पवने' । पुनीते वा । पवमानश्च । 'पूञ् पवने' । प्रभञ्जयति[16] शाखादिकं प्रभञ्जनः । 'भञ्जो आमर्दने' । प्रकम्पनो महाबलः झञ्झामारुतः सवृष्टिकः[17] । एतानि [18]वायुनामानि ॥ ६२–३ ॥

[1] निश्वासे B_2, C, W_2.　[2] D_1 adds संचरते.　[3] नान्तः D_1.　[4] पृषत् मृगोऽश्वो वाहनं यस्य C; पृषन्ति जलकणाः अश्वाः यस्य D_1.　[5] गन्धयत इति गन्धम् D_1.　[6] वाहयति A, K_2, W_2.　[7] न विद्यते निलः निलयं स्थानं यस्य C.　[8] 'गम्लृ गतौ' D_1, W_1.　[9] समीर्ते B_1, W_1.　[10] कुपिते K_2, C, W_2.　[11] म्रियन्ते D_2, K_1, K_3; D_1 adds लोकः.　[12] अनेन जीववर्गा मा रुदन्ति न म्रियन्ते इति C; D_1, I add 'मृङ् प्राणत्यागे'.　[13] जगदिति प्राण इति पदच्छेदपक्षे गच्छतीति जगत्, प्राणन्ति अनेन प्राणः D_1.　[14] ईरितुं गन्तुं शीलम् अस्य D_1.　[15] तत्स्वामित्वाद्वा D_1.　[16] प्रभनक्ति U, W_2; B_1, C add मर्दयति.　[17] वृष्ट्याकुलश्च W_2, Y.　[18] मारुत° B_1, K_5, W_2.

(पा.) श्वसनः—प्रभञ्जनाः । वायुनामानि । जगदिति तस्यैव नामान्तरं स्यात् । 'जगत् स्याद् विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु' इति रुद्रः । प्राण इत्यपि नामान्तरं स्यात । 'हृदि स्थितानिले जीवे बले प्राणः प्रकीर्तितः' इति रुद्रः ।

'महाबलः सततगः शरण्युर्मृगवाहनः ।
ध्वजप्रहरणो धूलिध्वजः पृश्च प्रकम्पनः ॥'

एतानि च ॥ ६२-३ ॥

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ ६४ ॥
[1]हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ॥ ६५ ॥
शरीरस्था इमे

(वि.) प्राण इति—प्रकर्षेण [2]बहिरानयतीति प्राणः । [3]अधो नयतीति अपानः । सर्वत्र[4] आनयतीति समानः । उद् ऊर्ध्वम् आनयतीति उदानः । [5]विनयतीति व्यानः । 'णीञ् प्रापणे'। प्राणयति अपानयति समानयति उदानयति व्यानयतीति वा यथाक्रमं वक्तव्यः । [6]एते पञ्च क्रमेण हृद्गुदनाभिकण्ठसर्वदेहस्थवायुनामानि ॥ ६४–५ ॥

[1] Verse included in most MSS. [2] बहिरायाति W_2; अनन्ति अनेन D_1; U adds 'णीञ् प्रापणे'. [3] अपानयति B_2, K_3, W_2. [4] मातीति K_3; समम् आनयति B_2, C. [5] विविधेषु जीवात्मानं प्रशमानयतीति C; विशेषेण नयति D_1. [6] एतानि देहस्थितवायुनामानि D_1.

(पा.) प्राणो—शरीरस्था इमे । प्राणादयः पञ्च शरीरवायवः । अनुक्तम्— 'झञ्झावातः सवृष्टिः स्यात्'। वृष्टिसहितवायुनाम[1] ॥ 'वात्या वातस्तु मण्डली'। मण्डलाकारवातनाम । आन्ध्रभाषायां 'सुडिघाली'। 'गोगन्धनः पुरोवातः'। पुरोवायुनाम । 'ग्रदुरुगाली'। 'परुषः स्यादिरिङ्गणः'। चण्डवातनाम[2]। 'छिंदुनवटि-गालि[3]'। '[4]मूर्ध्नि वातः किंचुलुकः'। उपरिवातनाम । '[5]ईन्दिगालि किंचुलुकमु'। 'मध्यमः स्वेदचूषकः'। [6]समवातः स्वेदचूषकः स्यात् । 'समगालि' ॥ ६४—५ ॥

[1] वातः झंझावातः स्यात् A_1. [2] वातः इरिङ्गणः स्यात् A_1. [3] 'विसरोटि' A_1. [4] मृदुवातः A_1. [5] 'हींदि' B_3. [6] समवायुनाम B_3, B_4.

रंहस्तरसी तु रयः स्यदः ।
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ६६ ॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

(वि.) रंह इति—रंहति सततं रंहः। 'रहि गतौ'। तरत्यनेन तरः। 'तॄ प्लवनतरणयोः'। उभौ [1]सान्तौ। रयते अनेनेति रयः। 'रय गतौ'। स्यन्दते अनेनेति स्यदः[2]। 'स्यन्दू प्रस्रवणे'। जवते अनेन जवः। 'जुङ् गतौ'। एतानि [3]सवेगगति-नामानि॥ शिङ्घति येन धर्मेण[4] शीघ्रम्। 'शिघि व्याप्तौ'। त्वरते अनेन त्वरितम्[5]। 'ञित्वरा संभ्रमे'। त्वरया सह वर्तत इति सत्वरम्। लङ्घ्यते अनेन लघु। 'लघि [6]गत्याक्षेपे'। क्षिपत्यनेन [7]क्षिप्रम्। 'क्षिप प्रेरणे'। [8]अरम् इत्यव्ययम्। [9]द्रवतीति द्रुतम्। 'द्रु गतौ'। चोपत्यनेनेति चपलम्। 'चुप मन्दायां गतौ'। तुरते इति तूर्णम्[10]। 'तुर त्वरणे'। न विलम्बते ऽस्मात्[11] अविलम्बितम्। 'लबि [12]आलम्बने'। अश्नुते आशु। 'अशू व्याप्तौ'[13]॥ ६६॥

[1] एतौ सकारान्तौ नपुंसकलिङ्गौ च D_1; रंहश्च तरश्च रंहस्तरसीति सान्तं पदद्वयम् C. [2] 'स्यदो जवे' (६. ४. २८) इति साधुः B_1, C. [3] °गुणि° D_2. [4] धर्मिणः तत् D_3, W_1. [5] त्वरया सह वर्तते U; त्वरयतीति A. [6] गतौ K_5; C, K_5, Y add भोजननिवृत्तौ च. [7] क्षिप्यते अनेन K_5, W_1; इति क्षिपं, क्षिपमेव क्षिप्रम् C. [8] ऋच्छति अनेन अरम्, 'ऋ गतौ' D_1. [9] U adds अस्मात्. [10] त्वरयति अनेन B_1, C. [11] अस्मिन् C. [12] अवस्रंसने B_1, C, U, W_2; अवि° K_2. [13] वेगमात्रनामानि B_2, D_2; शीघ्र° A.

(पा.) रंहस्तरसी—आशु च। आद्यन्तयोः क्रियावयवयोः सामीप्य-नामानि[1]॥ ६६॥

[1] B_3 adds जवः—वेगनामानि.

सततानारताश्रान्तसंततविरतानिशम्॥ ६७॥

नित्यानवरताजस्रमप्यथातिशयो भरः।

(वि.) सततमिति—संतन्यते [1]सततम्। संततं च। न विद्यते आरतं विरामो[2] ऽत्रेति अनारतम् अविरतम् अनवरतं च। न श्राम्यन्त्यत्रेति अश्रान्तम्। 'श्रमु तपसि खेदे च'। नास्ति निशा[3] अत्रेति अनिशम्। नियतं भवं[4] नित्यम्। न [5]जस्यतीति अजस्रम्। 'जसु [6]उपक्षये'। [7]अविच्छित्तिनामानि॥ अतिशेते जयत्यनेनेति अतिशयः[8]। भरतीति भरः। 'भृञ् [9]भरणे'॥ ६७॥

[1] B_1 adds 'समो वा हिततयोः' (वा. ६. १. १४४); 'तनु विस्तारे' B_2, C. [2] विरतं K_3; अरतं, रज्यते अनेन इति रतम् आसक्तिरित्यर्थः, रतं न भवतीत्यरतं विराम इत्यर्थः C; आ समन्तात् अरतम् आरतम्। आ समन्ताद् विराम इत्यर्थः, विरामो ऽवसानम् C.

[3] B_2, D_2, I, T add विरतिः; विच्छेदकालो° D_1. [4] भवतीति A, C. [5] K_5, W_2 add शिथिलीभवतीति; न विच्छिद्यते D_1. [6] मोक्षणे A, C, K_2. [7] निरन्तर-क्रियानामानि D_1. [8] 'शीङ् स्वप्ने' C, D_2, I. [9] 'भृ भर्त्सने' D_1.

(पा.) सततानारत—अजस्रमपि। क्रियायाः क्रियान्तरेणाव्यवधानस्य नामानि ॥ ६७ ॥

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥ ६८ ॥
तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ।
क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां सत्त्वगामि यत् ॥६९॥

(वि.) अतिवेलमिति—[1]वेलामतिक्रान्तम् अतिवेलम्। बिभर्तीति भृशम्। 'भृञ् भरणे'। [2]अर्थमतिक्रान्तम् अत्यर्थम्। [3]मात्रामतिक्रान्तम् अतिमात्रम्। उद्गाहते प्रादुर्भवतीति उद्गाढम्। 'गाहू विलोडने'। निःशेषः सर्वो भरो ऽत्रेति निर्भरम्[4]। तीवतीति तीव्रम्। 'तीव स्थौल्ये'। एकोऽन्तो [5]निश्चितोऽत्र एकान्तम्। नितरां ताम्यतीति नितान्तम्। 'तमु ग्लानौ'। गाहते गाढम्। 'गाहू [6]विलोडने'। बाहते बाढम्। 'बाहृ प्रयत्ने'। दृंहतीति दृढम्। 'दृहि वृद्धौ'। बृढेति वा पाठः, बृहतीति बृढम्। 'बृह वृद्धौ'। अतिशयनामानि ॥ क्लीबे शीघ्राद्यसत्त्वे स्यात्। [7]शीघ्रादिदृढपर्यन्तशब्दाः [8]असत्त्वे क्रियाविशेषणत्वे गुणवृत्तित्वेऽपि नपुंसकलिङ्गाः। क्रियाविशेषणत्वे यथा—शीघ्रं [9]पचति, सततं गच्छति, क्षिप्रं करोतीत्यादि। गुणवृत्तित्वे यथा—अश्वस्य शीघ्रम्। तूलस्य लघु इत्यादि। अत्रातिशयभरशब्दौ गुणवृत्तित्वे पुंलिङ्गौ। यथा—गन्धस्यातिशयः[10]। पुष्पाणां भर इत्यादि। क्रियाविशेषणत्वे तु शीघ्रादिवन्नपुंसकलिङ्गावेव। यथा—अतिशयं भुङ्क्ते। भरं तिष्ठति इत्यादि। त्रिष्वेषां सत्त्वगामि यत्। एषां शीघ्रादिपदानां मध्ये यत् सत्त्वगामि विशेष्यगामि, तत् त्रिषु लिङ्गेषु भवति। यथा—शीघ्रोऽश्वः[11]। क्षिप्रा जरा[12]। सततं सुखम्। लघुस्तुष इत्यादि ॥ ६८-९ ॥

[1] D_1, U add मर्यादां. [2] D_1 adds विषयं; अतिक्रामति C. [3] मात्रं स्तोकं D_1, W_1; मात्रं कार्त्स्न्यं तदतिक्रामति C. [4] निःशेषेण भरो यस्मिन् तत् D_1; U omits 6 lines. [5] नियतः C; निश्चलः W_2; C adds अवसानं. [6] प्रयत्ने A, C, K_1, K_2. [7] शीघ्रादयो दृढान्ताः A, D_2, K_1, W_1; शीघ्रशब्दादारभ्य दृढशब्दपर्यन्तं ये शब्दा वर्तन्ते ते क्रियाविशेषणानि वा गुणवाचका वा नपुंसकलिङ्गा एव भवन्ति D_1. [8] अव्यये स्युः C; द्रव्यत्वे गुणपरत्वेऽपि पुंलिङ्गम् C. [9] K_1, K_3, K_5, W_1, Y add शीघ्रं भुङ्क्ते [10] Y omits 3 words. [11] W_2 adds शीघ्रा बडवा. [12] स्त्रियः W_1.

(पा.) अथातिशयो—दृढानि च । क्रियावयवसाकल्यनामानि । क्लीबे—सत्त्वगामि यत् । उक्तानामेषां रंहःप्रभृतिशब्दानां मध्ये[1] भावकरणप्रत्ययान्तवर्जितो यः शब्दोऽस्ति स शब्दोऽसत्त्वेऽद्रव्ये वर्तमानो[2] नपुंसकलिङ्गो भवति । यथा—शीघ्रं गच्छति । [3]सततं शेते । अतिमात्रं भुङ्क्ते । सत्त्वगामिद्रव्ये वर्ती सन् त्रिलिङ्गो भवति । यथा—शीघ्रो बाणः । [4]संततो रागः । अतिमात्रो भारः । भावकरणप्रत्ययान्ताः शब्दा उक्तलिङ्गाः । अश्वस्य जवः । हयस्यातिशयः इत्यादि ॥ ६८–९ ॥

[1] A_1 adds शीघ्रादिग्रहणेन.　[2] वर्ती स A_1.　[3] संततं A_1.　[4] सततो B_3.

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ७० ॥
किंनरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥ ७१ ॥

(वि.) कुबेर इति—कुत्सितं[1] बेरं शरीरमस्येति कुबेरः । त्र्यम्बकस्य[2] सखा त्र्यम्बकसखः । यक्षेषु राजत इति यक्षराट् । 'राजृ दीप्तौ' । गुह्यकानाम् ईश्वरः[3] गुह्यकेश्वरः । मनुष्यस्येव [4]धर्मोऽस्येति मनुष्यधर्मा । नान्तः । धनं दयते[5] धनदः । 'देङ् रक्षणे' । धनं ददातीति वा धनदः । 'डुदाञ् दाने' । [6]राज्ञां यक्षाणां राजा राजराजः । धनानाम्[7] अधिपः धनाधिपः । किंनराणाम् ईशः किंनरेशः । [8]विश्रवसोऽपत्यं वैश्रवणः । पुलस्तेरपत्यं पौलस्त्यः । पुलस्त्यस्यापत्यं वा । नरो वाहनमस्य नरवाहनः । यक्षजाति-[9]राजत्वाद् [10]यक्षः । एकं नेत्रं [11]पिङ्गमस्य एकपिङ्गः । इलविलाया[12] अपत्यम् ऐलविलः । इडविडा मातास्येति ऐडविडो वा । [13]लडयोरेकत्वस्मरणात् । श्रियं ददातीति श्रीदः । 'डुदाञ् दाने' । [14]पुण्यजनानाम् ईश्वरः पुण्यजनेश्वरः । एतानि कुबेरनामानि ॥ ७०-१ ॥

[1] तस्य देवादिशरीरापेक्षया कुत्सितत्वादिति भावः, कुत्सितं वेरं यस्मात् अन्यस्य सः, अतिसुन्दरशरीरवानित्यर्थः C.　[2] शिवस्य D_1.　[3] ईशः A, T.　[4] श्मश्रुलत्वादिः W_1; आचारः D_1.　[5] रक्षति B_2, C; धनेन नन्दयति A, K_2, T.　[6] राजन्त इति राजानः यक्षाः B_2, C.　[7] धनस्य K_3, W_2.　[8] विशेषेण शृणोतीति विश्रवाः D_1.　[9] K_5, W_2, Y omit राज.　[10] यक्ष्यते पूज्यते इति, 'यक्ष पूजायाम्' D_1.　[11] पिङ्गलवर्णं A, D_2, K_1, K_2, U, W_2.　[12] शिवपरिचर्याकारिणी A.　[13] डल(लड I) योरभेदः C.　[14] रक्षसां यक्षाणां वा D_1.

(पा.) कुबेरः—वैश्रवणः। विश्रवःशब्दात् 'तस्येदम्' (४. ३. १२०) इत्यणि कृते विश्रवसो विश्रवणरवणाविति प्राप्ते विश्रवणादेशे[1] वृद्धौ वैश्रवण इति रूपं सिद्धम्॥ पौलस्त्यो—पुण्यजनेश्वराः। कुबेरनामानि। अनुक्तम्—

'कैलासनाथो हर्यक्षो रत्नगर्भः सितोदरः।
इच्छावसुर्निधिपतिस्तथा स्यादेककुण्डलः॥'

एतानि च॥ ७०–१॥

[1] णित्वात् वृद्धौ सत्यां A_1.

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः।
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम्॥ ७२॥

(वि.) अस्येति—चित्ररथेन [1]गन्धर्वेण निर्मितं [2]चैत्ररथम्। [3]कुबेरोद्याननाम॥ नल इव कूबरः चारुः नलकूबरः। [4]नलस्येव [5]कूबरो रथावयवोऽस्येति वा। कुबेरपुत्रनाम॥ के शिरसि शिवयोः लासो नृत्यं, तदस्यास्तीति कैलासः। केलीनां समूहः कैलं, तेन आस्यते स्थीयत इति कैलासः[6]। 'आस उपवेशने'। केलयोः जलभूम्योः आसनं स्थितिर्यस्य केलसः स्फटिकम्। तस्यायं कैलासः[7]। कुबेरस्थाननाम॥ अलति स्वस्थानं भूषयतीति अलका। 'अल भूषणपर्याप्तिवारणेषु'[8]। कुबेरनगरीनाम॥ पुष्पमिव[9] पुष्पकम्[10]। कुबेरविमाननाम[11]॥ ७२॥

[1] °नामगन्धर्वे° U. [2] A, K_2 add वनं. [3] °वन° D_1. [4] C adds महाराजस्य. [5] C adds युगंधरः; नले कमले कूयते कीर्त्यते नलकूः लक्ष्मीः, तया व्रीयते अभिलक्ष्यते नलकूबरः, 'व्रीङ् वरणे', वबयोरभेदः D_1. [6] के शिरसि इलायां लासोऽत्यन्तमस्यास्तीति 'सरूपाणामेकशेष एकविभक्तौ' W_2. [7] W_1 omits 2 lines. [8] °शक्तिवारणवाचकम्। 'अल भूषणे वा' W_2, Y; इति वा धातुः U. [9] एव, स्वार्थे कप्रत्ययः, पुष्पसदृशमित्यर्थः C. [10] पुष्प्यति श्रियमिति U. [11] °पुष्पक° A, B_1, K_2, T.

(पा.) अस्योद्यानं चैत्ररथम्। [1]कुबेरोद्यानवननाम॥ पुत्रस्तु नलकूबरः। तत्पुत्रनाम॥ कैलासः स्थानम्। कुबेरस्थाननाम॥ 'अष्टापदो हराद्रिः स्यात् कैलासो रजताचलः' इत्ययमपि[2]। अलका पूः। तन्नगरनाम॥ विमानं तु पुष्पकम्। तद्विमानं तु पुष्पकं स्यात्॥ ७२॥

[1] उद्यानं चैत्ररथं स्यात् A_1. [2] A_1 adds तत्प्रपञ्च एव.

स्यात् किंनरः किंपुरुषस्तुरंगवदनो मयुः ।
निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः ॥ ७३ ॥
महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च चर्चाश्च निधयो नव ॥ ७४ ॥

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने स्वर्गवर्गः

(वि.) स्यादिति—किंचिन्नरः किंनरः। किंचित् पुरुषः किंपुरुषः। कुत्सितो नरो वा। तुरंगस्येव [1]वदनमस्य तुरंगवदनः। मयते विनिमयते[2] मयुः। 'मय गतौ'। एतानि किंनरनामानि ॥ निधीयते[3] अत्रेति निधिः। 'डुधाञ् धारणपोषणयोः'। शेवं स्थाप्यं धनं [4]धीयतेऽत्र शेवधिः[5]। निधिनाम ॥ महांश्चासौ पद्मश्च महापद्मः। पद्यते पद्मः। 'पद्ऌ सेवायाम्'। शमयति दुःखं शङ्खः। 'शमु उपशमे[6]'। मकरवद् ग्रहीतुमशक्यत्वात् मकरः। कूर्मवत् स्थितत्वात् कच्छपः। कमनीयत्वात् [7]मुकुन्दः। कुन्दश्च। नितराम् ईड्यते[8] नीलः। 'ईड स्तुतौ'। चर्च्यन्ते चर्चाः। 'चर्च अध्ययने'। एतानि निधिभेदनामानि[9] ॥ ७३–४ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ स्वर्गवर्गनामलिङ्गविवेचनम्

[1] वदनमिव वदनं B_2, C. [2] नियमयति K_3. [3] नितरां धीयते पुष्यत इति; ना पुंलिङ्ग इत्यर्थः, एतत् काकाक्षिन्यायेन D_1. [4] तन्निधीयते D_2. [5] सेवधिरिति सकारादिरप्यस्ति D_1. [6] उपरमे B_2, D_2, K_2, W_1; उपशमने A. [7] अत्र वर्णव्यतिहारः C. [8] पूज्यते C; डलयोरभेदः C. [9] नवनिधि° D_2, K_1, K_2, K_3, I.

(पा.) स्यात् किंनरः—मयुः। किंनरनामानि। 'किमनेन गृहीतेन वागृहीतेन वा किंनरयुगलेन प्रयोजनम्' (काद. पृ. २२७) 'इदमुपश्रुतमश्वमुखद्वयम्' (पृ. २२७) इति कादम्बर्यामभेदः कथितः।

'विम्बोष्ठं बहु मनुते तुरंगवक्त्रश्चुम्बन्तं मुखमिह किंनरं प्रियायाः।
श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीमुत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥'

इति माघकाव्ये (४. ३८) भेदः कथितः। अनुक्तम्—'गुह्यकः स्यान्माणिचरः'। गुह्यकनाम ॥ 'यक्षः पुण्यजनः समौ'। यक्षनाम ॥ निधिर्ना शेवधिः। निधिनामानि ॥ 'निधानगर्भामिव सागराम्बराम्' इति रघुवंशे (३. ९) ल्युडन्तनिधानशब्दोऽप्यस्ति। 'मानसेवधिमानसे' इति सेव्यप्रकृतिकसेवधिशब्दोऽप्यस्ति। भेदाः—निधेः। निधिभेदाः।

'पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च [1]खर्वश्च निधयो नव ॥'

इति [2]तल्लिङ्गे तत्संख्यायां च [3]हारावलिः ॥ ७३–४ ॥

इति [4]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते स्वर्गवर्गः

[1] वरश्च A_1. [2] B_3 adds तन्नामसु. [3] हारावली B_3, B_4. [4] °नरसिंह° A_1.

---

२. व्योमवर्गः

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥
वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी ।

इति व्योमवर्गः

(वि.) द्योदिवाविति—दीव्यतीति द्यौः । दिवि[1] च । द्वे स्त्रियाम् । न [2]भ्राजते अभ्रम् । 'भ्राजृ दीप्तौ' । विशेषेण अवति अवकाशदानेन व्योम[3] । 'अव रक्षणे' । पुष्णातीति पुष्करम् । 'पुष पुष्टौ' । पुष्कमुदकं रातीति वा पुष्करम् । 'रा दाने' । अम्बते शब्दायते इत्यम्बरम् । 'अबि शब्दे' । मेघैर्न भातीति नभः । 'भा दीप्तौ' । अन्तः ऋक्षाणि यत्र अन्तरिक्षम् । द्यावापृथिव्योरन्तरीक्ष्यत[4] इति वा । 'ईक्ष दर्शने' । गच्छन्त्यत्र खगा इति गगनम्[5] । 'गम्लृ गतौ' । न विद्यतेऽन्तो यस्य तदनन्तम् । सुराणां वर्त्म मार्गः सुरवर्त्म । खन्यते खम्[6] । 'खनु अवदारणे' । वियच्छति न विरमतीति वियत्[7] । 'यम उपरमे' । विष्णोः पदं विष्णुपदम् । आ समन्तात् काशन्ते सूर्यादयोऽत्र आकाशम् । न काशते वा । 'काशृ दीप्तौ' । विजहाति सर्वं विहायः । विहायाश्च । 'ओहाक् त्यागे' । 'ओहाङ् गतौ'[8] ॥ १ ॥

[1] द्यौश्च K_1; द्यौश्च द्यौश्च द्योदिवौ, द्वन्द्वसमासः, ओकारान्तवकारान्तस्त्रीलिङ्गौ B_2, C; इमावोकारान्तवकारान्तौ I; दिवु क्रीडेत्यादि धातुः W_1. [2] अमूर्तत्वात् D_1. [3] विशेषेण एन विष्णुना उ ऊर्ध्वं मीयते आक्रम्यत इति व्योम, 'माङ् माने' C. [4] °ईक्षणं यस्येति A, I, W_1. [5] आद्यन्ताक्षरग्रहणाद् एवं गगमिति भवति । गच्छन्तः खगाः अस्मिन् नीयन्त इति गगनम् । 'गम्लृ गतौ' 'णीञ् प्रापणे' B_2, C. [6] खन्यते ज्ञानं नीरूपत्वात् D_1.

[7] विशब्दः पक्षिवचनः, तेऽस्मिन् यान्तीति वा, 'या प्रापणे' C. [8] इत्याकाशनामानि D_2, I, K_1, W_2; U, Y add—

विहायसोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ।
तारापथोऽन्तरिक्षं[9] च मेघाध्वा च महाबिलम् ॥

[9] शब्दगुणः Y.

इति व्योमवर्गः

(पा.) द्योदिवौ—सुरवर्त्म खम् । अन्तरिक्षमित्यत्र विशेषः । अमरवार्त्तिककारेण वर्णनिर्देशनायां दीर्घकारान्तरिक्षशब्द इति प्रत्यपादि । अन्तरीक्ष्यते जगदत्रेत्यन्तरीक्षम् । द्यावापृथिव्योरन्तरीक्ष्यत इति वा । वेदे तु ह्रस्वेकारो दृश्यते । तत्रापि छान्दसमेव ह्रस्वत्वमिति । वियद् विष्णुपदं—विहायसी । वैजयन्त्यामदन्तविहायसशब्दः कथितः । 'वायुवर्त्म विहायसम्' इति (पृ. १७, श्लो. १) । आकाशनामानि ॥

'विहायसोऽपि नाकोऽपि द्युरपि स्यात् तदव्ययम् ।
तारापथोऽन्तरीक्षं च मेघद्वारं महाबिलम् ॥'

एतानि च ॥ १ ॥

इति व्योमवर्गः

---

३. दिग्वर्गः

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।
प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ १ ॥
उत्तरा दिगुदीची स्याद् दिश्यं तु त्रिषु दिग्भवे ।

(वि.) दिश इति—प्राचीयं दक्षिणेयमिति दिश्यते [1]दिक् । दिशत्यवकाशमिति वा । 'दिश अतिसर्जने' । कमुदकं [2]स्कुभ्नातीति ककुप् । 'स्कुभु विस्तारे' । कं वायुं स्कुभ्नातीति वा । काशते काष्ठा । 'काशृ दीप्तौ' । अश्नुते आशा । 'अशू व्याप्तौ संघाते च' । हरन्त्यनया अप्रतीतमिति हरित् । 'हृञ् हरणे' । दिङ्नामानि ॥ प्रागञ्चति सूर्यः प्राची । अवागञ्चति दक्षिणायनेन सूर्य इति अवाची । अपाचीति वा पाठः । प्रति पश्चादञ्चति सूर्यः अस्तमय इति प्रतीची । [3]उत्तरमञ्चति सूर्यः उत्तरायणेनेति उदीची ।

[4]'अञ्चु गतिपूजनयोः'। एतानि यथाक्रमं पूर्वदक्षिणपश्चिमोत्तरनामानि। इतरदिग्भ्यश्च आद्या[5] पूर्वा। दक्षते वर्धते इति दक्षिणा। 'दक्ष वृद्धौ शीघ्रार्थे च'। पश्चाद् भवा पश्चिमा। [6]उत्तरति मेर्वादिभूभृत इत्युत्तरा। 'तॄ प्लवनतरणयोः'॥ दिशि भवं[7] दिश्यम्। एतद् दिग्भवस्य इन्द्रायुधादेर्नाम ॥ १ ॥

[1] शकारान्तस्त्रीलिङ्गः Y. [2] B_2, C add विस्तारयति. [3] उत्तरत्र B_2; उदञ्चति K_5. [4] C adds सर्वत्र. [5] भवतीति K_5; भवन्ती B_1, C. [6] उत्तरति मेर्वादिभूभ्यः (भूः U) B_1, C, W_2, Y; भूभृद्भ्यः K_5. [7] अवाग्भवम् अवाचीनम्, उदीच्यां दिशि उत्पन्नम् उदीचीनम्, प्रतीच्यां दिशि उत्पन्नं प्रतीचीनं, प्राच्यां दिशि उत्पन्नं प्राग्भवं, एतानि वाच्यलिङ्गानि C, Y; B_1, C, Y add:

अवाग्भवमवाचीनमुदीचीनमुदग्भवम्।
प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु ॥

(पा.) दिशस्तु—त्रिषु दिग्भवे। ता इति लिङ्गानुशासनम्। दिशां नामानि। 'दिग्दिशाशा ककुब्दीर्णा' इति वैजयन्ती (पृ. १७, श्लो. २)। हलन्तत्वाद्वैकल्पिकष्टाप्। प्राच्यवाची—पश्चिमाः। एतानि पूर्वदक्षिणपश्चिमदिशामेव नामानि। [1]प्राचीत्युक्ते पूर्वैव। अवाचीत्युक्ते दक्षिणैव। केचिदमुमेव [2]पवर्गमध्यमं पठन्ति। प्रतीचीति पश्चिमैव। उत्तरा—स्यात्। उदीचीति उत्तरैव। दिश्यं—दिग्भवे। दिग्भवार्थे दिश्यम्। [3]भवार्थे यत्प्रत्ययः ॥ १ ॥

[1] पूर्वेत्युक्ते प्राच्येव A_1. [2] अन्तःस्थमध्यमं B_3. [3] 'दिगादिभ्यो यत्' B_4.

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्।

(वि.) इन्द्र इति—[1]इन्द्रः, वह्निः, पितृपतिः, नैर्ऋतः, वरुणः, मरुत्, कुबेरः, ईश इति क्रमात् पूर्वादीनां दिशां पतयः ॥ २ ॥

[1] Y adds इन्दतीति इन्द्रः, हव्यं वहतीति वह्निः, पितॄणां पतिः पितृपतिः, निर्ऋतेः अपत्यं नैर्ऋतः, वृणोतीति पाशैः वरुणः, अनेन कुपितेन म्रियते मरुत्, कुत्सितं बेरं शरीरं यस्य कुबेरः, ईष्टे ईशः इति पूर्वादीनां दिशां क्रमात् पतिनामानि।

(पा.) इन्द्रो वह्निः—दिशां क्रमात्। इन्द्रादयः [1]पूर्वादीनां दिशां विदिशां च क्रमात् पतयः ॥ २ ॥

[1] पूर्वाद्यष्टदिक्पतयः B_3.

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

(वि.) ऐरावत इति—[1]इरा आपः अस्मिन् सन्तीति इरावान् समुद्रः, तस्मिन् जातः ऐरावतः । पुण्डरीकवर्णत्वात् पुण्डरीकः । पुणति शोभत इति वा । 'पुण कर्मणि शुभे' । वायुमात्मानं मन्यते [2]वामनः । 'मन ज्ञाने' । वामं वल्गु शरीरमस्यास्तीति वा । वामनत्वाद्वा । कुमुदवर्णत्वात् कुमुदः । कुं [3]पृथिवीं मोदयतीति वा । 'मुद हर्षे' । अञ्जनाभत्वात्[4] अञ्जनः । अनक्ति गच्छतीति वा । 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' । [5]पुष्प्यतीति पुष्पम् । 'पुष्प विकसने' । पुष्पवद् दन्तोऽस्यास्तीति पुष्पदन्तः । सर्वभूम्यां विदितः सार्वभौमः । शोभनाः प्रतीकाः अवयवाः यस्य सः सुप्रतीकः । एतानि यथाक्रममष्टदिग्गजनामानि[6] ॥ ३ ॥

[1] इरावति समुद्रे जातः° B_1, K_2, K_5, U, W_1, Y. [2] वाय्वात्मना संमन्यत इति B_2, C. [3] पृथ्वीं K_1, K_3. [4] °वर्णत्वात् B_2, C. [5] C adds विकसतीति [6] °गजानां D_2.

(पा.) ऐरावतः—दिग्गजाः । [1]ऐरावतादयः पूर्वादिक्रमेण दिग्गजाः ॥ ३ ॥

[1] दिग्गजनामानि B_3, B_4.

करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ॥ ४ ॥
[1]ताम्रपर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।

(वि.) करिण्य इति—अभ्रेषु[2] माति वर्तते अभ्रमुः । 'मा माने'[3] । न भ्राम्यति [4]स्ववल्लभं हित्वा क्वचित् न भ्रमतीति अभ्रमुः । 'भ्रमु [5]अनवस्थाने' । काम्यत[6] इति कपिला । 'कमु कान्तौ' । कपिलवर्णत्वाद्वा । पिङ्गलवर्णोऽस्या अस्तीति पिङ्गला । न विद्यते उपमा यस्याः सा अनुपमा । [7]ताम्रपर्णाख्यौषधिसाहचर्यात् ताम्रपर्णी । [8]शोभनौ दन्तौ यस्याः सा शुभ्रदन्ती । शोभनान्यङ्गानि यस्याः सा अङ्गना । [9]अञ्जनाकारो वर्णो यस्याः सा अञ्जनावती । एतानि[10] दिग्गजभार्यानामानि[11] ॥ ४ ॥

[1] ताम्रकर्णीति वा पाठः. [2] अभ्रे स्वर्गे माति च वर्तते च C. [3] K_2, U, Y add वर्तने च. [4] स्वावलम्बं W_2. [5] चलने D_1, K_1, K_3, W_1, Y. [6] कम्यते Y. [7] °वर्ण° U. [8] शोभना दन्ताः A, B_1, T; सुदन्ती D_1, K_1, W_1. [9] अञ्जनमिव C, Y. [10] I, U, W_1, Y add ऐरावतादि°. [11] °पत्नी° B_1, K_5, Y.

(पा.) [1]करिण्यो—चाञ्जनावती। क्रमादैरावतादिदिग्गजाङ्गनानामानि ॥ ४ ॥

[1] ताम्रकर्णीति पाठान्तरम् A_1.

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥ ५ ॥
अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् ।

(वि.) क्लीबेति—दिशोरिदम्[1] अपदिशम्। विशिष्टा दिक् विदिक्। दिङ्मध्यनामानि ॥ अन्तरमवकाशम् अभिगतम् अभ्यन्तरम्। अभ्यन्तर्यन्ते बध्यन्ते अश्वादयः अत्रेति अभ्यन्तरम्। अन्तरम् आलाति अन्तरालम्। 'ला आदाने'। अष्टदिगादेरभ्यन्तरनामानि ॥ चक्राकारेण [2]वालते वर्तते चक्रवालम्। 'वाड़ आप्लाव्ये'। डलयोरेकत्वस्मरणात्। मण्डयति भूषयतीति मण्डलम्। 'मडि भूषायां हर्षे च'। दिङ्मण्डलनाम ॥ ५ ॥

[1] अन्तरं B_2, C. [2] वलते K_3, W_1, Y.

(पा.) क्लीबाव्ययं—विदिक् स्त्रियाम्। दिग्वलयमध्यनामानि। आग्नेय्यादिक्रमेण विदिशां [1]नामान्यपि सन्ति।

'आग्नेयी तु चराशा[2] स्यात् नैर्ऋती तु दिगन्धकी[3]।
मारुत्यनन्ता शार्वी तु शालाक्षाप्यपराजिता ॥'

इति वैजयन्ती (पृ. १७, श्लो. ४–५)। अभ्यन्तरं त्वन्तरालम्। सकलदिङ्मध्यनाम। चक्रवालं तु मण्डलम्। दिक्समूहनाम। अनुक्तम्—'दिग्युग्मं मण्डपीठिः स्यात्'। दिग्युग्मं[4] मण्डपीठिरित्युच्यते। 'दिगन्तः [5]करिशालुकम्'। दिगन्तः करिशालुकमित्युच्यते ॥ ५ ॥

[1] ईशादिनामानि A_1. [2] ईशान्या A_1; चतुराशा B_3. [3] दिगान्धकी A_1, B_4. [4] दिग्युग्मनाम B_3. [5] करिलोलुकम् B_3.

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ ६ ॥
धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ।
घनजीमूतमुदिरजलमुग्धूमयोनयः ॥ ७ ॥

(वि.) अभ्रमिति—अभ्रति गच्छतीत्यभ्रम्। 'अभ्र गतौ'। अपो रातीत्यभ्रम्। 'रा दाने'। न भ्रश्यन्त्यापोऽस्मादिति वा। 'भ्रंशु [1]अवस्रंसने'। मेहतीति मेघः। 'मिह सेचने'। वारि वहतीति वारिवाहः। 'वह प्रापणे'। स्तनयतीति स्तनयित्नुः। 'स्तन [2]देवशब्दे'। बलं न जहातीति बलाहम् उदकम्, तदस्यास्तीति [3]बलाहकः। धाराणां धरो धाराधरः। जलस्य[4] धरो जलधरः। तटितोऽत्र सन्तीति तटित्वान्। वारि ददातीति वारिदः। 'डुदाञ् दाने'। अम्बु बिभर्तीति अम्बुभृत्। 'डुभृञ्[5] धारणपोषणयोः'। वायुना हन्यत इति घनः। 'हन हिंसागत्योः'। जीवनम् उदकं मूयतेऽत्र जीमूतः। 'मूङ् बन्धने'। मोदन्ते येन कृषीवलाः [6]मुदिरः। 'मुद हर्षे'। जलं मुञ्चतीति जलमुक्। 'मुच्लृ मोक्षणे'। धूमो योनिर्यस्य सः धूमयोनिः। एतानि मेघनामानि ॥ ६–७ ॥

[1] अधःपतने W_2. [2] °ध्वन° B_2, U, W_1. [3] जहातीति हं, हं न भवतीत्यहं, बलस्याहं बलाहं बलवर्धनमित्यर्थः। बलाहं कम् उदकं यस्य सः बलाहकः B_2, C. [4] जलं धरतीति C. [5] 'भृञ् भरणे' K_2, K_5, Y. [6] कृषीवलान् मोदयतीति मुदिरः C.

(पा.) अभ्रं—धूमयोनयः। मेघनामानि। 'नभ्राट् तटित्पतिर्देवो [1]नदनुर्जलपोट्टणः[2]'। एतानि च ॥ ६–७ ॥

[1] नदन्युः A_1. [2] °पोट्टलः इति पाठश्चेत् साधीयान्.

कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम्।
स्तनितं गर्जितं मेघनिर्घोषो रसितादि च ॥ ८ ॥

(वि.) कादम्बिनीति—कमुदकम् आददत इति कादम्बाः[1] मेघाः, तेऽस्यां सन्तीति कादम्बिनी। कादम्बाः[2] कलहंसाः अस्यां सन्तीति वा। कदम्बाः[3] पुष्प्यन्त्यत्रेति वा। मेघमालानाम ॥ अभ्रे भवम् अभ्रियम्। मेघभवस्योदकादेर्नाम ॥ [4]स्तनयतीति स्तनितम्। 'स्तन गदी देवशब्दे[5]'। गर्जतीति गर्जितम्। 'गर्ज शब्दे'। रसति [6]शब्दायते रसितम्। 'रस शब्दे'। मेघनिर्घोषनामानि ॥ ८ ॥

[1] कम् आदत्त इति कादं, जलस्वीकरणमित्यर्थः, तद्वहन्तीति कादम्बाः, वबयोरभेदः B_1, C. [2] तेषां, नयतीति नं गमनमित्यर्थः, कादम्बनमस्याः अस्तीति कादम्बिनी, 'णीञ् प्रापणे' C. [3] वृक्षविशेषाः C. [4] स्तनति A, B_1, K_1, W_1. [5] °ध्वन° C, I, K_5, W_1, Y. [6] शब्दयति A.

(पा.) कादम्बिनी मेघमाला। मेघमालानाम। अनुक्तम्—'ऐरावतो राजमेघः' राजमेघनाम ॥ 'मोयिलुयेक्किवच्चिमेयलु'। अभ्रे[1] भवार्थः अभ्रियं स्यात्[2]। स्तनितं—

रसितादि च। मेघनिर्घोषनामानि। रसितादि चेति चशब्दो व्यभिचारप्रदर्शनार्थः। खरस्य रसितं, पावकस्य ह्रसितम् इत्यादि ॥ ८ ॥

[1] A_1 adds घने. [2] B_4 adds 'समुद्राभ्राद्धः'.

शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा।
तडित् सौदामिनीविद्युच्चञ्चलाचपला अपि ॥ ९ ॥

(वि.) शम्पेति—कृषीवलानां दुःखं शमयतीति शम्पा। 'शमु [1]उपशमने'। कर्षकाणां शं सुखं [2]पातीति वा। 'पा रक्षणे'। सम्पेति वा [3]पाठः। समन्तात् पातीति सम्पा। सम्यक् पिबति चाक्षुषं तेज इति वा। 'पा पाने'। शतं ह्रादते शतह्रदा[4]। 'ह्राद अव्यक्ते शब्दे'। [5]शतं ह्रदा विद्यन्ते अस्यामिति वा। बडवाज्योतिष्मत्या ह्रादत इति ह्रादिनी। ह्रादुनीति वा पाठः। [6]इरावति मेघे भवा ऐरावती। ऐरावतोऽभ्रनागः, तस्य[7] स्त्री वा। क्षणं प्रभा यस्याः सा क्षणप्रभा। प्रभया नयनानि ताडयतीति तडित्। 'तड आघाते'। [8]सुदाम्नाद्रिणा सह वर्तत इति [9]सौदामिनी। सुदाम्ना अद्रिणा दीव्यतीति सौदामिनी। 'तेनैकदिक्' इति (४. ३. ११२) सादृश्यं व्यज्यते। सुदामवत् दीर्घाकारोऽस्या अस्तीति वा। सौदामनीति वा पाठः। विद्योतत इति विद्युत्। 'द्युत दीप्तौ'। चञ्चतीति चञ्चला। 'चञ्चु गतौ'। चोपतीति चपला। 'चुप मन्दायां गतौ'। चम्पयतीति वा चपला। 'चपि गतौ'। एतानि विद्युन्नामानि ॥ ९ ॥

[1] उपरमे K_1; °शमे U. [2] B_1, C, K_1, U add रक्षति. [3] पाठे I. [4] शतह्रदः समुद्रः विद्यतेऽस्यामिति वा I, K_1, K_2. [5] अपरिमितं C. [6] इरा आपः तद्वन्तः इरावन्तः मेघा इत्यर्थः, तेषु भवतीति B_1, C, D_2, K_3. [7] स तस्यामास्त इति B_2, D_2, K_5. [8] A, T, W_1 add °आख्येन. [9] सौधामिनीति वा पाठः, सुधामवत् कैलासवत् दीर्घाकारोऽस्य B_2, C; एतेन शैलसादृश्यं व्यज्यते B_2.

(पा.) शम्पा—सौदामिनी। 'सौदाम्नी त्वशनिर्विद्युत्' इति त्रिकाण्डशेषः (पृ. ५, श्लो. ८७)। विद्युच्चञ्चलाचपला अपि। विद्युन्नामानि। 'आकालिकी स्याज्जलदा क्षणिकाप्यचिरद्युतिः'। एतानि च ॥ ९ ॥

स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः।
इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् ॥ १० ॥

(वि.) स्फूर्जथुरिति—स्फूर्जतीति स्फूर्जथुः। 'टुओस्फूर्ज वज्रनिर्घोषे'। वज्रस्य [1]निर्घोषो वज्रनिर्घोषः। वज्रनिर्घात इति वा पाठः। वज्रनिष्पेष इति च[2]। प्रहरद्विद्युच्छब्दनामानि ॥ इरया अम्भसा माद्यतीति इरंमदः। 'मदी हर्षग्लपनयोः'। मेघज्योतिर्नाम ॥ इन्द्रस्यायुधम् इन्द्रायुधम्। शक्रस्य धनुः[3] शक्रधनुः। [4]मेघप्रतिफलितनानावर्णस्य धनुराकारेण दृश्यमानस्य सूर्यरश्मेर्नामनी ॥ रोहतीति रोहितम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। एतस्यैवाजिह्मस्य[5] धनुषो नाम ॥ १० ॥

[1] K₁ adds निर्घुष्यत इति निर्घोषः. [2] 'घुषिर् विशब्दने', 'हन हिंसागत्योः' 'पिष्लृ संचूर्णने' इति क्रमेण पदत्रयस्यापि धातुत्रयम्। एतानि अशनि(पात Y)नामानि B_2, C. [3] K_1, U, W_1 add इव; एव K_3. [4] प्रतीत° B_2. [5] अदीर्घस्य W_1.

(पा.) स्फूर्जथुर्वज्रनिर्घोषः। प्रहारकविद्युद्ध्वनिनाम। 'श्रुत्वा तु [1]स्फूर्जथुप्रख्यं निनादं परिदेविनी' इति भट्टिः (५. ५३)। मेघज्योतिरिरंमदः। प्रहारकविद्युदग्निनाम ॥ अनुक्तम्—'निर्घातः षडिको वज्रः'। प्रहारकविद्युन्नामानि ॥ भाषया 'पिडुगु'[2]। इन्द्रायुधं शक्रधनुः। मेघप्रतिफलितनानावर्णस्य धनुराकारेण दृश्यमानस्य सूर्यकिरणस्य नामेति केचित्। कामधनुरिति केचित्[3]। मणिधनुरित्यन्ये[4]। तदेव ऋजु रोहितम्। तदेवावक्रं चेद्रोहितमित्युच्यते। एतस्यैवावक्रस्य धनुषो नाम ॥ भाषया 'कोरडु'। 'वक्रमिन्द्रधनुर्ज्ञेयं ऋजु रोहितमिष्यते' इत्युत्पलमाला। अथवा तदेव ऋजुरोहितमित्युच्यते। 'ऋजुरोहितमिच्छन्ति बुधाः शक्रशरासनम्' इति हलायुधः (अ. मा. १. ५७) ॥ १० ॥

[1] विस्फूर्जथु° इति मुद्रितग्रन्थे (पृ. १०२). [2] A_1 adds 'प्रेल्लु'. [3] A_1 adds व्यवहरन्ति. [4] केचित् B_3, B_4.

वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ ।
धारासंपात आसारः शीकरोऽम्बुकणाः स्मृताः ॥ ११ ॥
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम् ।

(वि.) वृष्टिरिति—वर्षतीति [1]वृष्टिः। वर्षं च। वर्षशब्दः अस्त्री। 'वृषु सेचने'। [2]वर्षनामनी ॥ अवगृह्णातीत्यवग्रहः। अवग्राहश्च। 'ग्रह उपादाने'। वर्षप्रतिबन्धकनामानि[3] ॥ आ समन्तात् सरतीति आसारः। 'सृ गतौ'। धाराणां संपातः [4]धारासंपातः। धारासंतानस्य[5] नामानि ॥ शीकते सिञ्चतीति शीकरः। 'शीकृ सेचने'।

शीतं करोतीति वा शीकरः। 'डुकृञ् करणे'। सीकर इति वा पाठः। अम्बुकणनाम॥ कृणाति[6] सस्यमिति [7]करका। 'कॄ हिंसायाम्'। कीर्यते वायुना भुवीति वा। 'कॄ विक्षेपे'। वर्षशिलानाम॥ [8]दुष्टं दिनं दुर्दिनम्। मेघच्छन्नाहोरात्रनाम॥ ११॥

[1] वृष्टिशब्दः स्त्रीलिङ्गः D_2, K_3, Y. [2] वृष्टि° A, T, W_1. [3] °बन्ध° K_1, W_1. [4] धरतीति धारा, 'डुधाञ् धारणपोषणयोः'; सम्यक् पततीति संपातः, 'पत्लृ गतौ', धाराणां संपात इति एकं पदं क्वचित् पठन्ति, प्रगल्भवृष्टिनाम B_2, C. [5] °संपात° K_5, W_2, Y; सन्ततपतनस्य K_3. [6] हिंसति सर्परक्तपुच्छादिजन्तूनिति B_2, C. [7] करकशब्दः स्त्रीलिङ्गः पुंलिङ्गश्च Y. [8] दुरितं A.

(पा.) वृष्टिर्वर्षं। वृष्टिनामनी॥ तद्विघाते—समौ। [1]वर्षप्रतिबन्धनामानि॥ वग्रहावग्रहाविति पाठान्तरम्। धारासंपात आसारः। धारावर्षनाम॥ शीकरोऽम्बुकणाः स्मृताः। वायुवशाद्विशीर्णाम्बुकणाः[2] शीकरः स्यात्। वर्षोपलस्तु करकः। वर्षशिलानाम। [3]घनोपल इति पाठान्तरम्। 'घनोपलस्तु करकः पुञ्जिका [4]मटचीति च' इति वैजयन्ती (पृ. २५, श्लो. ७)। आबन्तकरकाशब्दोऽप्यस्ति। 'वर्षोपले तु करका करकोऽपि च दृश्यते' इति रुद्रः। मेघच्छन्नेऽह्नि दुर्दिनम्। [5]मेघच्छन्नदिननाम। 'दुर्दिनं जलदध्वान्तम्' इति रत्नकोशादयः॥ ११॥

[1] A_1 adds 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरि'त्यनेनाल्लुपो वैकल्पिकः। [2] °कणनाम B_3. [3] A_1 adds तस्यैव. [4] मटती B_3, B_4. [5] मेघाच्छादितदिवा दुर्दिनं स्यात् A_1.

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम्॥ १२॥
अपिधानतिरोधानपिधानाच्छादनानि च।

(वि.) अन्तर्धेति—अन्तर्धीयतेऽनयेति अन्तर्धा। व्यवधीयतेऽनया व्यवधा। अन्तर्धानम् [1]अन्तर्धिः। 'डुधाञ् धारणपोषणयोः'। अपवार्यत इत्यपवारणम्। 'वृञ् [2]वरणे'। अपिदधातीत्यपिधानम्[3]। तिरोदधातीति तिरोधानम्[4]। छादयतीति छादनम्। 'छद अपवारणे'। [5]मेघाद्यैश्चन्द्रादेरन्तर्धाननामानि॥ १२॥

[1] अन्तर्धीयतेऽनेनेति° पुंलिङ्गः B_2, C; D_1 omits 2 lines. [2] संवरणे K_5. [3] पिदधातीति पिधानम् A, K_1. [4] W_1 adds 'डुधाञ् धारणपोषणयोः'. [5] A, B_1, K_3 add °आच्छादित°.

(पा.) अन्तर्धा—छादनानि च । मेघाद्यैश्चन्द्रादे[1]रन्तर्धाननामानि ॥ १२ ॥

[1] सूर्यादेः B_3, B_4.

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १३ ॥
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥ १४ ॥
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।

(वि.) हिमांशुरिति—हिमा अंशवो यस्य हिमांशुः । चन्द्रेण कर्पूरेण मीयते उपमीयते[1] चन्द्रमाः[2] । 'माङ् माने' । चन्दतीति चन्द्रः 'चदि आह्लादने दीप्तौ च' । मिमीते[3] कालमस्येति परिमाणं करोतीति माः, चन्द्रश्चासौ माश्च चन्द्रमाः । तुषारकिरणैः उनत्ति क्लेदयतीति इन्दुः । 'उन्दी क्लेदने' । कुमुदानां बान्धवः कुमुदबान्धवः । देवा एनं विशेषेण धयन्तीति विधुः । 'धेट् पाने' । सुधारूपा अंशवो यस्य सुधांशुः । शुभ्रा अंशवो यस्य शुभ्रांशुः । ओषधीनाम् ईशः ओषधीशः[4] । निशायाः पतिः [5]निशापतिः । अप्सु जातः [6]अब्जः । ओषधीः जीवयतीति जैवातृकः । 'जीव [7]प्राणधारणे' । [8]सौति अमृतं सोमः । 'षु प्रसवैश्वर्ययोः' । [9]ग्लायतीति ग्लौः । 'ग्लै हर्षक्षये' । मृगः अङ्को यस्य सः मृगाङ्कः । कलानां निधिः कलानिधिः । द्विजानां राजा द्विजराजः । शशस्य धरः [10]शशधरः । नक्षत्राणाम् ईशः नक्षत्रेशः । क्षपां करोतीति क्षपाकरः[11] । [12](रोहिणीशः सुधामूर्तिरात्रेयोऽमृतनिर्गमः । समुद्रनवनीतं[13] च) । एतानि चन्द्रनामानि ॥ १३-१४ ॥

[1] अनुमीयते A, B_1, C, T. [2]सान्तः C. [3] मीयते कालोऽस्येति वा B_1, C, K_5. [4] ओषधीभिः ईष्टे ओषधीशः । 'ईश ऐश्वर्ये' । D_1, I, Y. [5] निशायां स्पष्टीक्रियते इति निशाकर इति च पाठः, 'डुकृञ् करणे' C. [6] जायत इति U; 'जनी प्रादुर्भावे' C. [7] A, K_2, T add प्रीणने च. [8] सूयते B_2, K_5, Y. [9] D_2, I, K_1, Y add श्राम्यति; शाम्यति K_3. [10] शशं धरतीति C, K_3, U. [11] D_1, I add 'डुकृञ् करणे'. [12] D_2, K_2, K_3 add. [13] D_2, K_2, K_3, W_1 add.

(पा.) हिमांशुः—क्षपाकरः । चन्द्रनामानि । अनुक्तम्—

'शुचिरोचिः सुधासूतिरात्रेयोऽमृतनिर्गमः ।
पुनर्युवा निशाकेतुः प्राचीनस्तिलकः शशी ॥
शशाङ्को रोहिणीकान्तो जलात्मा यज्वनां पतिः ।

नक्षत्रनेमिरब्जारिश्चन्दिरः श्रीसहोदरः ।
यथासुखः स्मरसखः समुद्रनवनीतकम् ॥'

एतानि च ॥ १३–१४ ॥

कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु ॥ १५ ॥
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेंऽशके ।

(वि.) कलेति—कलयति संख्यातीति कला । 'कल गतौ संख्याने च' । षडधिका दश षोडश, षोडशानां पूरणः षोडशो [1]भागः । चन्द्रस्य षोडशांशस्य[2] नाम ॥ बिम्बति विस्तारं प्राप्नोतीति बिम्बः । 'बिम्ब आभोगे' । मण्डति व्याप्नोतीति मण्डलम् । 'मडि भूषायां व्याप्तौ च' । [3]चन्द्रमण्डलनामानि ॥ भिद्यत इति भित्तम् । 'भिदिर् विदारणे' । शक्यते [4]भेत्तुमिति शकलम् । 'शक्ल शक्तौ' । खण्ड्यत इति खण्डम् । [5]'खडि भेदने' । अर्धति भेदं गच्छतीत्यर्धः । अर्धं च[6] । 'अर्ध गतौ' । शकलनामानि ॥ १५ ॥

[1] षोडशांशः U. [2] °भागस्य C. [3] चन्द्रसूर्यादि° B_2, D_2, K_5, U.
[4] भङ्क्तुं K_3. [5] खण्डने भेदने च D_2, W_2. [6] अर्धं समांशकनाम I, K_5, U.

(पा.) कला तु षोडशो भागो । चन्द्रस्य षोडशांशनाम[1] ॥ बिम्बोऽस्त्री मण्डलं त्रिषु । चन्द्रस्य [2]समग्रशरीरनामनी ॥ ते द्वे आदित्यादिनामन्यपि[3] भवतः । 'जलनिधिजलप्रतिबिम्बितरविबिम्बराजताम्बरान्तावलम्बागृहीतार्द्रमांसभारेव बभासे वासरावसानवेला वैताली' । किं च—

'आदित्यवर्मणा[4] साम्यमादित्यः कथमश्नुते ।
विभिन्नमण्डलो [5]वीरैर्भिन्दता रविमण्डलम्[6] ॥' इति ।

भित्तं—पुंस्यर्धः । असमभागनामानि[7] । शकलखण्डे वा पुंसि । शकलं, शकलः । खण्डं, खण्डः । 'वा पुंसीति' अर्धेऽप्यन्वेति । तेन त्रिलिङ्गः । अर्धः कम्बलः, अर्धा शाटी, अर्धं वस्त्रम् । खण्डार्धशब्दौ गुणवचनौ । छेदभङ्गदलादयोऽप्यसमभागार्थकाः । 'बिसकिसलयच्छेदपाथेयवन्तः' (मेघ. १. ११), 'पुष्पोच्चयः पल्लवभङ्गभिन्नः' (कु. सं. ३. ६१) इत्यादि । अर्धं समेंऽशके । [8]नपुंसकलिङ्गाभिधायी अर्धशब्दः समभागार्थः ।

'मातापितृत्वं जगतामाविष्कर्तुमिवेच्छतः ।
अर्धं नारी पुमानर्धं यस्य तस्य पदे पदे[9] ॥' इति ॥ १५ ॥

[1] °अंशः कला स्यात् A_1.　[2] सर्वे° A_1.　[3] A_1 adds °शरीर°.　[4] °वर्मणी A_1. [5] °भिण्ड° A_1.　[6] °रथि° B_3.　[7] A_1 adds तस्योदाहरणम्—'खण्डे तु कृतशेखर' इति। अत्र खण्डशब्दो गुणवचनः। न्यासोदाहरणमपि गुणवचनविषयमेव.　[8] समभागेऽर्धं नपुंसकमेव B_3. [9] परे वरेति A_1.

चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ॥ १६ ॥
कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।

(वि.) चन्द्रिकेति—[1]चन्द्रो नियुक्तोऽत्रास्तीति चन्द्रिका। कुमुदानामियं[2] कौमुदी। ज्योतिरस्या[3] अस्तीति ज्योत्स्ना। चन्द्रप्रकाशनामानि ॥ प्रसीदतीति प्रसादः। 'षद्लृ विशरणगत्यवसादनेषु'। [4]प्रसन्नस्य भावः प्रसन्नता। नैर्मल्यनामानि ॥ कल्यते ज्ञायतेऽनेनेति कलङ्कः। 'कल संख्याने'। अङ्क्यते इत्यङ्कः। 'अकि लक्षणे'। लाञ्छ्यते लक्ष्यतेऽनेनेति लाञ्छनम्। 'लाछि लक्षणे'। चह्यते कल्यत इति चिह्नम्। 'चह कलने'। लक्ष्यते[5] लक्ष्म। लक्षणं च। 'लक्ष दर्शनाङ्कनयोः'[6]। चिह्न-नामानि ॥ १६ ॥

[1] चन्द्रे नियुक्ता B_2, C; °नित्ययुक्ता D_2, K_1, K_2, K_5; चन्द्रातपेन W_2; चन्द्रादनपेता B_1, C.　[2] C adds अब्जविशेषाणाम्.　[3] अस्यां B_2, C, I, K_3.　[4] तस्य भावः तत्ता W_2.　[5] अनेनेति K_5.　[6] लक्ष्मेति नान्तः C.

(पा.) चन्द्रिका कौमुदी ज्योत्स्ना। कौमुदीनामानि ॥ 'चान्द्री चन्द्रातपोऽपि च'। एते च ॥ प्रसादस्तु प्रसन्नता। प्रसादगुणनामनी ॥

'क्षीरक्षालितचन्द्रेव नीलधौताम्बरेव च।
टङ्कोल्लिखितसूर्येव वसन्तश्रीरदृश्यत' ॥ इति।

लाञ्छनं—लक्ष्मणम्। क्षकारमध्यः[1] क्ष्मकारमध्यश्च[1] भवति।

'लक्षणं नाम्नि चिह्ने च सौमित्रौ[2] चापि लक्षणः[3]।
लक्ष्मणं लाञ्छने नाम्नि रामभ्रातरि लक्ष्मणः ॥'

इति विश्वप्रकाशिका (पृ. ५०, श्लो. ४२)। चिह्ननामानि ॥ १६ ॥

[1] °मध्यं च B_3.　[2] सौमित्रे B_3, B_4.　[3] लक्ष्मणः A_1.

सुषमा परमा शोभा शोभा कान्तिर्द्युतिश्छविः ॥ १७ ॥
अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः ॥ १८ ॥

(वि.) सुषमेति—सुष्ठु समा सुषमा । उत्कृष्टशोभानाम । शोभत इति शोभा । 'शुभ शोभने' । 'शुभ शुम्भ शोभार्थे' इति वा धातुः । काम्यते यया कान्तिः । 'कमु कान्तौ' । द्योतत इति द्युतिः । 'द्युत दीप्तौ' । छ्यति नाशयति [1]अन्धकारमिति [2]छविः । 'छो छेदने' । छ्यति अशोभामिति वा । कान्तिमात्रनामानि ॥ अवश्यायतेऽवपततीत्यवश्यायः । 'श्यैङ् गतौ' । [3]नितरां ह्रियतेऽग्निना[4] नीहारः । 'हृञ् हरणे' । तप्तं तोषयतीति [5]तुषारः । 'तुष तुष्टौ' । तोहति[6] पद्ममिति तुहिनम् । 'तुहिर् अर्दने' । हिनोति वर्धत इति हिमम् । 'हि गतौ वृद्धौ च' । तापं हन्तीति वा हिमम् । 'हन हिंसागत्योः' । प्रलयात्[7] शरदन्तादागतं प्रालेयम् । मेहति [8]भुवमिति मिहिका । 'मिह सेचने' । हिमिकेति वा पाठः । हिनोति वर्धते हिमिका । 'हि गतौ वृद्धौ च' । हिमनामानि ॥ [9]हिममहत्त्वं हिमानी, हिमस्य संहतिः । हिमसमूहनाम ॥ १७-१८ ॥

[1] असारं B_1, K_3, W_2, Y. [2] छवयति आशां जनयति असाविति छविः । 'छवि कान्तौ' C; छवति D_2, I, K_5. [3] नितान्तं I, Y. [4] B_2, C add आदिना. [5] तुष्यन्त्यनेन (ओषधिविशेषा इति C) B_1, C, D_1, I, U, W_1, Y. [6] W_2 adds अर्दयति. [7] प्रलये शरदन्ते भवतीति C, U. [8] भुवि B_1, C, D_1, U, Y. [9] महत् हिमं D_1.

(पा.) सुषमा परमा शोभा । [1]अधिकशोभा सुषमा स्यात् । 'राधा शोभा विभूषा स्यादभिख्या सुषमा तथा' इति केषांचिच्छोभामात्रमेवाभिमतम् ॥ शोभा—छविः । शोभानामानि ॥ अवश्यायस्तु—मिहिका च । हिमनामानि ॥ अथ हिमानी हिमसंहतिः । हिमसमूहनाम[2] ॥ १७–१८ ॥

[1] परम° B_3. [2] A_1 adds हिमानीत्यत्र 'इन्द्रवरुण—' इत्यादिनानुगागमः.

शीतं गुणे तद्वदर्थाः सुषिमः शिशिरो जडः ।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥ १९ ॥

(वि.) शीतमिति—[1]गुणे जाड्ये शीतं क्लीबे बोध्यम् । श्यायत इति शीतम् । 'श्यैङ् गतौ' । शैत्यगुणनाम ॥ तद्वदर्थाः [2]शीतपर्यायार्थाः अभिधेयवल्लिङ्गाः सप्त । सुष्ठु सिनोति बध्नाति व्यापारमिति सुषिमः । 'षिञ् बन्धने' । सुष्ठु श्यायते [3]सुशीम इति

वा पाठः । 'श्यैङ् गतौ'। शिनोति पद्मशोभाः शिशिर[4]ः। 'शिञ् निशातने'। जडतीति जड[5]ः। 'जल शून्ये'। डलयोरेकत्वस्मरणात्। तुष्यत्यनेनेति तुषार[6]ः। शीतं लातीति शीतलः। 'ला आदाने'। श्यायत इति शीतः। हिनोति वर्धते हिमः। 'हि गतौ वृद्धौ च'। एते अभिधेयलिङ्गाः। [7]शीतवद्द्रव्यनामानि ॥ १९ ॥

[1] शीतं शैत्ये जाड्ये क्लीबे B_2, C.　[2] °तद्वन्तः पर्यायाः अर्थाः B_2.　[3] सुशिम° A, D_2, K_1; B_1 omits 2 lines.　[4] शिनोत्यर्थे श्यायते वा A, W_1.　[5] जलति जघन्यं करोति, 'जल जघन्ये' B_2, C, W_2, Y; 'जड मान्द्ये' A.　[6] C, D_1 add 'तुष तुष्टौ'.　[7] K_5, W_1, Y omit °वद्°.

(पा.) शीतं गुणे। गुण इति स्पर्शविशेषे शीतं नपुंसकम्[1]। देवदत्तस्य शीतं वर्तते। तद्वदर्थाः—सप्तान्यलिङ्गकाः। सुषिमादयः शीतगुणविशिष्टार्थ विशेष्यलिङ्गका भवन्ति। सुषिमशब्दो ह्रस्वेकारः मूर्धन्यमध्यः। दीर्घेकारस्तालव्यमध्य इति केचन पठन्ति। 'शीफरो मेलकः स्थिरः[2]'। एतानि च ॥ १९ ॥

[1] नपुंसकाभिधायी शीतशब्दोऽप्यस्ति A_1.　[2] स्थितः A_1.

ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसंभवः ।
मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी ॥ २० ॥

(वि.) ध्रुव इति—ध्रुवति स्थिरीभवतीति ध्रुवः। 'ध्रुव गतिस्थैर्ययोः'। उत्तानपादस्यापत्यम् औत्तानपादिः। ध्रुवनामनी ॥ अगं विन्ध्यं गिरिं स्त्यायति स्तम्भयतीति अगस्त्यः। अगस्तिरिति वा पाठः। 'स्त्यै शब्दसंघातयोः'। [1]कुम्भः संभवो यस्य कुम्भसंभवः। मित्रावरुणयोरपत्यं मैत्रावरुणिः। [2]अगस्त्यमुनिनामानि ॥ विरहे [3]सति शुश्रूषालोपेऽमुद्रा[4] न मुदं [5]रातीति लोपामुद्रा[6]। 'रा दाने'। समानो धर्मोऽस्त्यस्याः सधर्मिणी। अगस्त्यभार्यानाम ॥ २० ॥

[1] कुम्भे D_2, K_2, K_3, U, Y.　[2] B_2 omits °मुनि°; °ऋषि° W_2.　[3] पतिशुश्रूषा° B_1, C, I, K_5, Y.　[4] लोपेन A, T.　[5] D_1, K_1, K_5, U, W_1 add ददाति.　[6] °लोपेन मुन्न भवतीति अमुत्, अमुदम् असन्तोषं (सन्तोषाभावं B_2) रातीति अमुद्रा C.

(पा.) ध्रुवः—स्यात्। ध्रुवनामनी ॥ अगस्त्यः—मैत्रावरुणिः। अगस्त्यनामानि ॥ अगस्तिरित्यप्यस्ति। 'अगस्तिनाध्यासितविन्ध्यशृङ्गम्' इति भट्टिकाव्ये (१२. ७१)। 'और्वशेयः कुम्भयोनिरगस्तिर्विन्ध्यकूटनः[1]' इति वैजयन्ती (पृ. ९५, श्लो. १५१)। अस्यैव—सधर्मिणी। तस्य भार्या लोपामुद्रा स्यात् ॥ २० ॥

[1] °कुट्टनः B_3; °कूटक इति मुद्रितपुस्तके ।

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।
दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी ॥ २१ ॥

(वि.) नक्षत्रमिति—न [1]क्षरति [2]नक्षत्रम् । 'क्षर संचलने'। न क्षीयत इति वा। 'क्षि क्षये'। न क्षदत इति वा नक्षत्रम् । 'क्षद गतिहिंसनयोः'। नक्षतीति वा। 'णक्ष गतौ'। ऋक्षति तमो नाशयतीति ऋक्षम्[3] । 'ऋक्ष हिंसायाम्'। ऋषतीति वा ऋक्षम् । 'ऋषी गतौ'। भा अस्यास्तीति [4]भम् । तरत्यनयेति तारा । तारैव तारका । 'तॄ प्लवनतरणयोः'। अवतीत्युडु[5] । 'अव रक्षणेत्यादि'। नक्षत्रनामानि ॥ दक्षस्यापत्यानि स्त्रियः दाक्षायण्यः । अश्विन्यादिरेवत्यन्तनक्षत्रसाधारणनाम । अश्वा युज्यन्तेऽस्यामिति अश्वयुक् । 'युजिर् योगे'। अश्ववत्त्वादश्विनी । अश्विनीनक्षत्रनामनी ॥ २१ ॥

[1] क्षरति गच्छतीति क्षः नाश इत्यर्थः, क्षो न भवतीति नक्षः, नित्यत्वमित्यर्थः, तत् त्रायते इति नक्षत्रम् । 'क्षर गतौ' C. [2] न क्षरति न गच्छति B_1, I, Y. [3] अथवा तमोनाशं कृत्वा रक्षतीति ऋक्षम् । 'रक्ष पालने'। रेफऋकारयोरभेदः B_2, C. [4] C adds 'भा दीप्तौ'. [5] उद् डयते गच्छतीति उडु । उडुशब्दः स्त्रीलिङ्गो वा । 'डीङ् विहायसा गतौ' C; उडति गच्छतीत्युडु, 'उड गतौ' B_2, C, I.

(पा.) नक्षत्रं—स्त्रियाम् । नक्षत्रनामानि ॥ अपिशब्दात् तारकाशब्दः नपुंसकश्च स्यात् । 'भं नक्षत्रं तारकं तारका च' इति हलायुधः (अ. मा. १. ५१), 'तारा भं रात्रिजं धिष्ण्यं सन्नक्षत्रमुडुर्न ना' इति वैजयन्ती (पृ. २०, श्लो. ३८)। दाक्षायण्यो—ताराः । अश्विन्यादितारा[1] दाक्षायण्य इत्युच्यन्ते । सुभूतिटीकायां तत्क्रमोद्देशः कृतः । अश्विनी, भरणी, कृत्तिकाः षड् बहुषु, रोहिणी, मृगशिरा स्त्रीक्लीबयोः, आर्द्रा, पुनर्वसू द्वौ, पुष्यः, आश्लेषमघाः स्त्रियां बहुत्वे च, पूर्वोत्तरफल्गुन्यौ, हस्तः, चित्रा, स्वातिः स्त्रीपुंसयोः, विशाखे द्वे, अनूराधा, ज्येष्ठा, मूलं नपुंसकम्, पूर्वाषाढा, उत्तराषाढा, श्रवणः पुमान्, धनिष्ठा, शतभिषक् स्त्री, पूर्वभाद्रपदे द्वे, उत्तरभाद्रपदे द्वे, रेवती इति ॥ अश्वयुगश्विनी । अश्विनीनक्षत्रनामनी ॥ २१ ॥

[1] °नक्षत्रनाम B_3.

राधा विशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया ।
समा धनिष्ठा स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः ॥ २२ ॥

(वि.) राधेति—राध्यते पूज्यते राधा। 'राध साध संसिद्धौ'। [1]विशाखति कान्त्येति विशाखा। 'शाखृ व्याप्तौ'। विशाखानक्षत्रनामनी॥ [2]पुष्णात्यभिलषितमिति पुष्यः। 'पुष पुष्टौ'। सिध्यन्त्यर्था [3]अस्मिन्निति सिध्यः। 'षिधु संराद्धौ'। साध्नोत्यस्मिन्नर्थानिति सिद्धः। 'साध संसिद्धौ'। तुष्यन्त्यस्मिन् तिष्यः। त्वेषते प्रभया वा तिष्यः। 'त्विष दीप्तौ'। पुष्यनक्षत्रनामानि॥ शुभकर्मणि श्रूयते श्रविष्ठा। 'श्रु श्रवणे'। [4]दधन्ति धनं करोति धनिष्ठा। 'धन धान्ये'। धनिष्ठानामनी॥ प्रोष्ठे सारे पदे यासां ताः प्रोष्ठपदाः[5]। प्रोष्ठस्येव गोरिव पदे[6] यासां ताः इति वा प्रोष्ठपदाः। [7]भाद्रे सारे पदे यासां ताः भाद्रपदाः। [8]प्रोष्ठपदानामनी॥ २२॥

[1] विशेषेण शाखति व्याप्नोति कान्त्येति B_2, C.　[2] W_2 adds अवलम्बिनम्. [3] अनेन B_2, C.　[4] दधाति Y; ददाति धनिकं करोति B_2, C, K_5, U, W_2. [5] अथवा प्रोष्ठस्य मत्स्यविशेषस्य पदमिव पदं यस्याः B_2, C.　[6] मञ्चस्येव पदानि A. [7] भद्रं मङ्गलमनयोरस्तीति भाद्रे C.　[8] C adds भद्राकार°.

(पा.) राधा विशाखा। विशाखयोर्नामनी॥ 'विशाखयोश्च' इति (१. २. ६२) पाक्षिकैकवचनम्। पुष्ये—तिष्यौ। पुष्यनक्षत्रनामानि॥ श्रविष्ठया समा धनिष्ठा। धनिष्ठानामनी॥ स्युः—[1]स्त्रियाम्। भाद्रपदानामनी॥ समुदायसंख्यापेक्षया बहुवचनम्॥ २२॥

[1] स्त्रियः B_3.

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी।
इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः॥ २३॥

(वि.) मृगशीर्षमिति—मृगस्येव शीर्षमस्य मृगशीर्षम्। एवं मृगशिरः। अग्रे हायना नवव्रीहयोऽस्याः सन्तीति आग्रहायणी। हायनस्य[1] वत्सरस्य अग्रमादिः अस्या अस्तीति वा। [2]मृगशिरोनक्षत्रनामानि॥ शिवबाणेन इल्यन्ते प्रेर्यन्त [3]इति इल्वलाः। 'इल स्वप्नप्रेरणयोः'। इन्वका इति वा पाठः। [4]इल्वका इति वा। 'इल प्रेरणे'। [5]मृगशिरःसमीपस्थतारकानाम[6]॥ २३॥

[1] अग्रे हायनो वत्सरोऽस्या अस्तीति B_1, C, Y.　[2] °शिर° K_1.　[3] °इति इलः, वलन्ते चलन्तीति वलाः, एवं धातुद्वयेन पदार्थनिर्वाहः। 'वल संचलने' C.　[4] तत्पक्षे इलन्ति शिवबाणवत् प्रापयन्तीति इलानि, तानि वहन्तीति वाः, धातुद्वयेन इल्वा इति भवति। इल्वा एव इल्वकाः, क प्रत्ययः, धातुद्वयं च 'इल प्रापणे', 'वह प्रापणे' B_2, C.　[5] शीर्ष° B_2, I, K_5, U, W_2.　[6] °स्थित° A, K_1, I.

(पा.) मृगशीर्षं—आग्रहायणी। मृगशिरोनक्षत्रनामानि ॥ इल्वलाः—याः। तदिति तच्छब्देन प्रत्यासन्नमृगशिर एव परामृश्यते। तच्छिरोभागे याः स्वल्पतारकाः सन्ति ता इल्वला इत्युच्यन्ते। इन्वका इति पाठोऽप्यस्ति। 'इन्वकास्तच्छिरोदेशे तारका इल्वला [1]अपि' इति वैजयन्ती (पृ. २०, श्लो. ३९)। अनुक्तम्[2]। 'ज्येष्ठा ज्येष्ठघ्नी'। ज्येष्ठानक्षत्रनामनी॥ 'अथो निष्ठ्या स्वातिः'। स्वातीनक्षत्रनामनी॥ 'आर्द्रा नक्षत्रशाखिनी'। आर्द्रानाम॥ २३॥

[1] मता: B_3, B_4; मुद्रितग्रन्थे च. [2] अनुक्तः पाठः A_1.

बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः॥ २४॥

(वि.) बृहस्पतिरिति—बृहतां वेदमन्त्राणां[1] पतिः बृहस्पतिः[2]। सुराणामाचार्यः सुराचार्यः। गिरां पतिः गीष्पतिः। गीर्पतिर्वा। धिषणा बुद्धिरस्यास्तीति धिषणः। [3]गृणाति [4]पुरुषार्थान् [5]गुरुः। 'गॄ शब्दे'। जीव्यते मृतोऽनेनेति जीवः। 'जीव प्राणधारणे'। अङ्गिरसोऽपत्यं पुमानाङ्गिरसः। वाचां पतिः वाचस्पतिः। चित्रशिखण्डिनोऽङ्गिरसो [6]जातः चित्रशिखण्डिजः। बृहस्पतिनामानि॥ २४॥

[1] देवमन्त्रिणां W_2. [2] 'बृहि वृद्धौ' C. [3] गृह्णाति B_1, C, W_2; 'ग्रह उपादाने' C, W_2, Y. [4] तत्त्वार्थान् Y. [5] अथवा ग्राहयति शब्दयति गुरुः, गुरुत्वात् सर्वाधिक्यात् गुरुः B_2, C. [6] जायत इति I, K_3, U.

(पा.) बृहस्पतिः—गीष्पतिः। 'अहरादीनां पत्यादिषु [1]वा रेफः' (वा. ८. २. ७०) इति पाक्षिकरेफादेशात् गीर्पतिरपि[2]। धिषणो—चित्रशिखण्डिजः। बृहस्पतेर्नामानि॥२४॥

[1] उपसंख्यानं कर्तव्यम् B_3. [2] A_1 omits अपि.

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः।
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः॥ २५॥

(वि.) शुक्र इति—[1]शुक्लवर्णत्वात् [2]शुक्रः। [3]शुक्रात् रुद्रद्वारा आगत इति वा। रुद्रस्य स्वशुक्लद्वारेण निर्यातत्वाद्वा। शुचं दुःखं देवेभ्यो [4]रातीति वा शुक्रः। 'रा दाने'। दैत्यानां गुरुः दैत्यगुरुः। कवेरपत्यं पुमान् काव्यः। दैत्येभ्यः [5]पुष्टिं वष्टि[6] कामयते उशना। 'वश कान्तौ[7]'। अयं शब्दः [8]सान्तः। भृगोरपत्यं भार्गवः। कवयति चातुर्येण

वर्णयतीति कविः। '[9]कवृ वर्णने'। शुक्रनामानि॥ [10]अङ्गारवर्णत्वात् अङ्गारकः। अङ्गानि आरयति पीडयतीति वा। 'आर पीडने'। कोः भूमेर्जातः [11]कुजः। भूमेरपत्यं पुमान् भौमः। [12]लोहितम् अङ्गं यस्य सः लोहिताङ्गः। मह्याः सुतो महीसुतः। [13]मङ्गलनामानि॥ २५॥

[1] शुक्र° B_1, C, D_1, W_1.　[2] रलयोरभेदः C.　[3] शुक्लात् रुद्राद्वा D_2. [4] B_2, C, D_1 add ददाति; 'रा दाने' C, I.　[5] श्रेयः D_2, K_2, K_5; हितं U. [6] B_2, Y omit.　[7] कान्तिरिच्छेत्यर्थः C.　[8] सकारान्तः D_2, K_3.　[9] 'कुङ् शब्दे' A, B_1, T.　[10] अङ्गारक° I, Y.　[11] C adds 'जनी प्रादुर्भावे'.　[12] लोहितान्यङ्गानि C.　[13] °ग्रह° B_2, C, D_1, I, W_2; अङ्गारक° K_3, Y.

(पा.) शुक्रो—कविः। शुक्रनामानि। उशनेत्यत्र ऋदुशनेत्यादिना (७. १. ९४) [1]सौ परे चानङ् स्यादसंबुद्धौ। संबोधने[2] तु उशनसस्त्रिरूपम्। सान्तं, तथा नान्तं, तथाप्यदन्तम्। हे उशनः, हे उशनन्, हे उशन॥ अङ्गारकः—महीसुतः। अङ्गारकनामानि। 'वक्रो मङ्गल आरश्च'। एतानि च॥ २५॥

[1] सावनङ्ङादशो A_1.　[2] संबुद्धौ B_3, B_4.

रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ।
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः॥ २६॥

(वि.) रौहिणेय इति—रोहिण्या अपत्यं पुमान् रौहिणेयः। बुध्यत इति बुधः। 'बुध अवगमने'। सोमस्यापत्यं पुमान् [1]सौम्यः। बुधनामानि॥ [2]सूर्यस्यापत्यं सौरिः। सौरो वा। शनैः[3] चरतीति शनैश्चरः[4]। 'चर गतिभक्षणयोः'। [5]शनिनामनी॥ तम आयुधं यस्य तमः। सान्तनपुंसकलिङ्गम्[6]। सूर्याचन्द्रमसौ [7]तमयतीति वा। 'तमु ग्लानौ'। रहयति रिक्तीकरोति सूर्याचन्द्रमसौ राहुः। रहयति त्यजति भुक्त्वा चन्द्रार्काविति वा। 'रह त्यागे'। स्वः [8]अन्तरिक्षे भाति स्वर्भानुः। 'भा दीप्तौ'। सिंहिकाया अपत्यं सैंहिकेयः। विधुमिन्दुं [9]तुदतीति विधुंतुदः। 'तुद व्यथने'। ([10]ग्रहकल्लोलः अभ्रपिशाचकश्च)। एतानि [11]राहुनामानि॥ २६॥

[1] सुष्ठु मयति जानातीति वा सौम्यः C.　[2] सूरस्य I, W_2.　[3] C adds मन्दं [4] शनिश्च C; D_2, U add 'पङ्गुः, क्रोधः छायासुतः शनिः.　[5] शनैश्चर° A, B_1, K_3; C adds पङ्गुः, खञ्जः, कलयति क्लेशं करोतीति कालः, कलिः कामधेनुः, छायादेव्याः पुत्रः छायापुत्रः, कृष्णवर्णत्वात् असितः.　[6] तमः अकारान्तः पुंलिङ्गश्च D_2, K_1, K_2, W_1.　[7] C adds

ग्लपयति. [8] स्वर्गे B_2, C. [9] K_5, W_1 add व्यथयति. [10] B_1, D_2, K_2, K_5 add the two words. [11] एते शब्दाः केतोरपि वाचकाः C; केतुः शिखीति वाच्यम् K_5.

(पा.) रौहिणेयो—सौम्यः। बुधनामानि ॥ समौ—शनैश्चरौ। '[1]शनिमन्दखोड-कोणच्छायापुत्रासितक्रोडाः'। एतानि च ॥ तमस्तु—विधुंतुदः। राहोर्नामानि। 'स एव ग्रहकल्लोलः स एवाभ्रपिशाचकः'। एते च ॥ २६ ॥

[1] शनिमन्दौ पङ्गुकालौ B_3.

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः।
राशीनामुदयो लग्नं ते तु मेषवृषादयः ॥ २७ ॥

(वि.) सप्तर्षय इति—मरीच्यत्रिमुखाः सप्तर्षयः चित्रशिखण्डिनः स्युः। चित्राः शिखण्डा जटा येषां ते चित्रशिखण्डिनः। के ते।

[1] 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
वसिष्ठश्चेति सप्तर्षीनाहुश्चित्रशिखण्डिनः ॥'

इति सप्तर्षिनामानि ॥ [2]राति ददाति [3]कल्याादिफलमिति राशिः। तेषामुदयो लग्नमित्युच्यते। लगति ग्रहैः संबध्नाति लग्नम्। 'लगि सङ्गे'। राशयः मेषवृषादयः ॥ २७ ॥

[1] मरीचिरङ्गिरा अत्रिः °ज्ञेयाश्चित्रशिखण्डिनः B_2, W_2, Y. [2] रान्ति ददति इति राः कालविशेषाः, तान् शमयन्तीति राशयः। 'रा दाने' 'शम उपशमे' B_2, C. [3] कल्याणादिसकलं K_3; कालादि° B_1, D_1, K_5, W_2, Y.

(पा.) सप्तर्षयो—चित्रशिखण्डिनः। मरीच्यत्रिप्रमुखाः[1] समुदायोक्त्या चित्र-शिखण्डिनः। राशीनामुदयो लग्नम्। राशीनामुदयनाम[2] ॥ ते तु मेषवृषादयः। ते त्विति राशयो मेषवृषभमिथुनकर्कटकसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीना इति द्वादश। एते सर्वे तत्तत्पर्यायनामलिङ्गभाजः ॥ २७ ॥

[1] A_1 adds पुलस्त्य°. [2] लग्नमित्युच्यते A_1.

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः।
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥ २८ ॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः।

विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥ २९ ॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ ३० ॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
*(पद्माक्षस्तेजसांराशिश्छायानाथस्तमिस्रहा ।
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ।
इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः ॥)

(वि.) सूरेति—सुवति कर्मणि सूरः। सूर्यश्च। 'षू प्रेरणे'। इयर्ति ऋच्छति[1] इति अर्यमा। 'ऋ गतौ'। अदितेरपत्यं पुमानादित्यः। द्वादश आत्मानो यस्य द्वादशात्मा। दिवा अहनि प्राणिनः चेष्टावतः करोतीति दिवाकरः[2]। भासं करोतीति भास्करः। अहः करोतीति अहस्करः[3]। अन्यतेजो बध्नाति प्रतिबध्नाति ब्रध्नः[4]। 'बन्ध बन्धने'। प्रभां करोतीति प्रभाकरः। विभां करोतीति विभाकरः। भासः सन्त्यस्य भास्वान्। विवस्ते प्रभया छादयतीति [5]विवस्वान्। 'वस आच्छादने'। विवः [6]तेजोऽस्यास्तीति वा विवस्वान्। सप्त अश्वा यस्य सः सप्ताश्वः। हरितः[7] अश्वा यस्य सः हरिदश्वः। उष्णा रश्मयो यस्य उष्णरश्मिः। तमः विकृन्ततीति विकर्तनः। 'कृती छेदने'। अर्च्यते[8] वालखिल्यादिभिरिति अर्कः। 'अर्क स्तवने'। अर्च्यते वा अर्कः। 'अर्च पूजायाम्'। अर्च्यते सेव्यते [9]वा। 'अर्च सेवायाम्'। मृतण्डस्यापत्यं मार्तण्डः। मृतमण्डं ब्रह्माण्डं जीवयतीति वा मार्ताण्डः। मेहति वर्षति मिहिरः। 'मिह सेचने'। इयर्तीति अरुणः। 'ऋ गतौ'। पुष्णातीति पूषा[10]। 'पुष पुष्टौ'। [11]दिवि मणिः द्युमणिः। तरति[12] नभः तरणिः। 'तॄ प्लवनतरणयोः'। मेद्यति स्निह्यतीति मित्रः। 'ञिमिदा स्नेहने'। सर्वस्य मित्रत्वाद्वा। चित्रा भानवो यस्य चित्रभानुः। विरोचते विरोचनः। 'रुच दीप्तावभिप्रीतौ च'। विभैव [13]वसु यस्य सः विभावसुः। ग्रहाणां पतिः ग्रहपतिः। त्विषां पतिः त्विषांपतिः। अह्नः पतिः अहर्पतिः, अहःपतिः। भातीति भानुः। 'भा दीप्तौ'। तमो हन्तीति हंसः। 'हन हिंसागत्योः'। सहस्रम् अंशवो यस्य सः सहस्रांशुः। तपतीति तपनः। 'तप संतापे'। सुवति सुप्तं सविता। 'षू प्रेरणे'। स्तूयते [14]श्रूयते रविः। 'रु शब्दे'। एतानि सूर्यनामानि ॥ २८–३० ॥

* Found in I, K_2, K_5: कर्मणः साक्षी कर्मसाक्षी। जगतां चक्षुः जगच्चक्षुः। अंशूनां माला अस्यास्तीति अंशुमाली। प्रद्योतयतीति प्रद्योतनः। 'द्युत दीप्तौ'। दिनस्य मणिः दिनमणिः।

खे द्योतत इति खद्योतः। लोकानां बान्धवो लोकबान्धवः। सुरेषु उत्तमः। धाम्नां निधिः धामनिधिः। पद्मिनीनां वल्लभः पद्मिनीवल्लभः। तमो हरतीति हरिः। 'हृञ् हरणे' I.

[1] C, K_5, U, W_2 add गच्छति. [2] 'डुकृञ् करणे' C. [3] अह्नि प्राणिनः चेष्टावतः करोतीति अहस्करः, धातुः पूर्ववत् C. [4] अस्य तेजोभिः मृत्काष्ठादिकं बध्नाति दृढीकरोतीति C. [5] विवस्ते (प्रभया B_2) आच्छादयतीति विवाः, सान्तः, तत् किम्, कान्तिः। सा अस्यास्तीति B_2, C. [6] भाः D_2, K_3. [7] B_2, C add श्यामाः. [8] स्तूयते B_2, C. [9] Y adds वालखिल्यादिभिः. [10] नान्तः C. [11] दिवः C, W_2. [12] C adds विस्तारयति. [13] वसुः K_1; B_2, C add धनं. [14] स्तूयते U, Y.

(पा.) सूर—विभाकराः। भास्कराहस्करेत्यत्र 'कस्कादिषु' (८. ३. ४८) इति पाक्षिकसादेशात् भाःकराहःकरौ इत्यपि भवतः। भास्वत्—रविः। [1]आदित्यनामानि॥ 'वारुणीवारुणीभूतसौरभा सौरभास्पदम्' इति दण्ड्यलंकारयमकपाठात् (३. १८) सूरशब्दो दन्त्यादिः। 'मार्ताण्डः सविता भानुरिनः[2] पूषा दिनप्रणीः' इति वैजयन्तीपाठात् (पृ. १७, श्लो. १०) मार्ताण्डशब्दो दीर्घमध्यमः। 'तर्पुमार्तण्डमुण्डीर[3]पाथिपेरु-[4]गभस्तयः' इति वैजयन्तीपाठात् (पृ. १८, श्लो. १३) मार्तण्डशब्दो ह्रस्वमध्य इति केचित्। 'कुमुदाकारा इवासोढशूरभासः स्थिता राजपुत्राः' इति वासवदत्ताश्लेषात् शूरशब्दस्तालव्यादिः।

'कर्मसाक्षी जगच्चक्षुरंशुमाली त्रयीतनुः।
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः॥
सुरोत्तमो धामनिधिः पद्मिनीवल्लभश्च सः।
पद्मबन्धुरशीतांशुर्मातण्डो जलतस्करः॥
रश्मिमाली दृगध्यक्षः॥' एतानि च॥ २८-३०॥

[1] सूर्य° B_3. [2] भातुरिति मुद्रितग्रन्थे [3] °पाथः B_4. [4] °फेरु° A_4.

माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकाः॥ ३१॥
सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः।
परिवेषस्तु परिधिरुपसूर्यकमण्डले॥ ३२॥

(वि.) माठर इति—चण्डांशोः सूर्यस्य[1] परिवर्तमानाः यमाग्नीन्द्राः क्रमेण माठरः पिङ्गलः दण्ड इत्युच्यन्ते[2]। मठरस्यापत्यं पुमान् माठरः। मन्यते वा। 'मन ज्ञाने'। पिङ्गलवर्णत्वात् पिङ्गलः। दण्डोऽस्यास्तीति दण्डः। पारिपार्श्वगा इति वा पाठः। परितः पार्श्वे वर्तन्त इति पारिपार्श्वकाः[3]। सूरस्य[4] सूतः सूरसूतः। [5]अरुणवर्णोऽस्यास्तीति

अरुणः। न विद्येते ऊरू यस्य सः अनूरुः। कश्यपस्यापत्यं पुमान् काश्यपिः। काश्यप इति वा पाठः। गरुडस्याग्रजो गरुडाग्रजः। सूर्यसारथिनामानि॥ परितो विष्यतेऽनेन परिवेषः[6]। 'विष्लृ व्याप्तौ'। परितो धीयतेऽनेन परिधिः। 'धि[7] धारणे'। परिवेषनामनी॥ समीपे सूर्यस्य [8]प्रतिकृतिः उपसूर्यकम्। मण्ड्यतेऽनेन मण्डलम्। 'मडि भूषायां व्याप्तौ च'। प्रतिसूर्यनामानि। चत्वार्यपि [9]नामानि परिवेषस्यैवेति केचित्॥ ३१-२॥

[1] B_1, D_1, K_5, U, W_2, Y add पार्श्वे. [2] एते शब्दाः व्याख्यायन्ते B_2, D_2. [3] पारिपार्श्विका इति वा पाठः K_5. [4] सूर्यस्य D_1, K_1, W_2. [5] अरुणवर्णत्वात् W_2. [6] C ends here. [7] 'डुधाञ् धारणपोषणयोः' W_1. [8] प्रतिकृतिरूपं °सूर्यमण्डलम् B_2, U, K_5. [9] B_2, K_1 omit नामानि.

(पा.) माठरः—पारिपार्श्विकाः। रथरक्षणार्थमादित्यस्य [1]पार्श्वे स्थितदेवतानामानि॥ सूरसूतो—गरुडाग्रजः। काश्यप[2] इति पाठान्तरम्। अनूरुनामानि॥ परिवेषस्तु—मण्डले। परिवेषनामानि॥ अत्र चतुर्णां मध्ये प्रथमे द्वे परिवेषनामनी, उत्तरे द्वे प्रतिसूर्यनामनी इति केचित्। परिवेषशब्दो मूर्धन्यस्तालव्यश्च[3]।

'[4]परिवेशं विजानीयादुपसूर्यकमण्डले।
परिवेष्टनमप्याहुः परिवेषं मनीषिणः॥'

इति शाश्वतः (पृ. ११, श्लो. ११८)॥ ३१-२॥

[1] परिपार्श्वे A_1. [2] B adds गरुडाग्रजः. [3] A_1 adds भवति. [4] परिवेषमिति मुद्रितग्रन्थे.

किरणोस्रमयूखांशुगभस्तिघृणिपृश्नयः।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्॥ ३३॥

(वि.) किरणेति—तमः कृणातीति किरणः। 'कॄ हिंसायाम्'। आपो वसन्त्यत्र उस्रः। 'वस निवासे'। [1]मिनोति [2]अवक्षिपति तम इति मयूखः। 'डुमिञ् प्रक्षेपणे'। अश्नुते अंशुः। 'अशू व्याप्तौ'। गां [3]दिशं बभस्ति दीपयति गभस्तिः। 'भस भर्त्सनदीप्त्योः'। जिघर्ति [4]हरति जलमिति घृणिः। 'घृ क्षरणदीप्त्योः'। दीप्यत इति वा। स्पृशतीति[5] पृश्निः। वृष्टिरिति पाठपक्षे वर्षतीति वृष्टिः। वृष्णिरिति पाठपक्षे वर्षति क्ष्मामिति वृष्णिः। 'वृष सेचने'। घृष्यत इति [6]घृष्णिः। 'घृष [7]संघर्षे'। इति बहवः पाठाः [8]अवधारणीयाः। भातीति भानुः। 'भा दीप्तौ'। तमः कृणातीति करः। 'कॄ हिंसायाम्'। भुवि कीर्यते वा। 'कॄ विक्षेपे'। तमो म्रियतेऽनेन [9]मरीचिः। स्त्रीपुंसयोः। [10]दीधीते दीप्यते दीधितिः। 'दीधीङ् दीप्तिदेवनयोः'। रश्मिनामानि॥ ३३॥

[1] D_1 adds दीप्त्या. [2] अधः क्षिपति K_3. [3] भुवं B_2, D_1, I, K_5, W_2. [4] दीपयति B_2, K_5, Y. [5] B_1, K_5 add क्ष्माम्. [6] घृष्टिः A, B_1, K_5, W_1. [7] संघर्षणे U. [8] आदरणीयाः D_2, I, K_3, W_1. [9] मरीची B_1; D_1, I, U add 'मृङ् प्राणत्यागे'. [10] दीधीयते दीप्यतेऽनेन K_5, U.

(पा.) किरणोस्र—स्त्रियाम्। किरणनामानि ॥ ३३ ॥

स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः।
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥ ३४ ॥

(वि.) स्युरिति—प्रभातीति प्रभा[1]। रोचते रुक्। रुचिश्च। 'रुच दीप्तौ'। त्वेषते[2] त्विट्। 'त्विष दीप्तौ'। भाति भा[3]। 'भा दीप्तौ'। भासते भाः[4]। सकारान्तः। 'भासृ दीप्तौ'। [5]छविरुक्ता। द्युतिश्च। दीप्यत इति दीप्तिः। 'दीपी दीप्तौ'। रोचत इति रोचिः। रुचिश्च[6]। शुच्यते शोचिः। 'शुचिर् पूतीभावे'। उभे क्लीबे। दीप्तिनामानि ॥ [7]प्रकाशते प्रकाशः। 'काशृ दीप्तौ'। द्योतते द्योतः। 'द्युत दीप्तौ'। आ समन्तात् तपति इत्यातपः। 'तप संतापे'। आतपनामानि ॥ किरणादीनि आतपान्तानि नामानि [8]रश्मीनामेवेति केचित् ॥ ३४ ॥

[1] D_1, I add 'भा दीप्तौ'. [2] यया A, B_1, I, K_2. [3] आकारान्तस्त्रीलिङ्गः B_2. [4] स्त्रीलिङ्गः Y. [5] छ्यति नाशयत्यसारं छविः, 'छो छेदने'; द्योतत इति द्युतिः, 'द्युत दीप्तौ' Y. [6] 'रुच दीप्तौ' B_2, D_1, K_3, W_1, Y. [7] प्रकर्षेण काशते B_2. [8] रश्मिनामानीति B_2, I, K_5, W_1, Y.

(पा.) स्युः प्रभा—दीप्तयः।

'जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टै-
र्भाभिर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धाः[1]।'

इति वेणीसंहारे (२. ७) भाःशब्दस्य पुंस्त्वं दृष्टम्। रोचिः—आतपः। प्रकाशनामानि। 'भल्यातिपालिकाकलिकलशिवेशित्विषि[2] वासेः' (?) इत्यरुणदत्तलिङ्गानुशासने त्विषिशब्दो दृष्टः। 'इन्दुं विनान्यस्य न [3]विद्यते द्युत्' इति धर्मशर्माभ्युदये (१. १६) द्युत्-शब्दो दृष्टः ॥ ३४ ॥

[1] विबुद्धैः B_3. [2] °कलशीवेशी° B_3. [3] दृश्यते इति मुद्रितग्रन्थे.

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ॥ ३५ ॥

इति दिग्वर्गः

(वि.) कोष्णमिति—किंचिद् उष्णं कोष्णम् । ईषदुष्णं कवोष्णम् । मन्दं च तदुष्णं च मन्दोष्णम् । [1]किंचिदुष्णं कदुष्णम् । ईषदुष्णनामानि ॥ एषां धर्ममात्रे क्लीबत्वम् । [2]धर्मिवृत्तित्वे अभिधेयलिङ्गत्वम् । तेजयतीति तिग्मम् । 'तिज निशातने'[3] । तीक्ष्णं च । खनतीति खरम् । 'खनु अवदारणे' । खुरमिति वा पाठः । खुरतीति खुरम् । 'खुर [4]छेदने' । अत्युष्णनामानि[5] ॥ मृगाणां तृष्णास्ति[6] अस्यामिति मृगतृष्णिका । म्रियन्ते मृगा अनयेति मरीचिका । 'मृङ् प्राणत्यागे' । जलवत्प्रतीयमानसूर्यरश्मिनामनी ॥ ३५ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ दिग्वर्गविवृतिः

[1] मनागुष्णम् B_1, K_5, Y.　[2] धर्मिणि त्रिलिङ्गत्वम् B_2, K_5, U, Y.　[3] D_1 adds क्षमायां च.　[4] भेदने A, B_1, T, K_1.　[5] तद्वदिति धर्मे क्लीबत्वं, धर्मिणि त्रिलिङ्गत्वम् I, U, W_2.　[6] B_2, D_2, I, K_1, K_2, K_5 omit अस्त्यस्यामिति.

(पा.) कोष्णं—तद्वति । [1]कोष्णादयोऽल्पोष्णवाचकाः, ते गुणे [2]नपुंसकलिङ्गाः गुणिनि तु [3]त्रिलिङ्गा भवन्ति । तिग्मं—तद्वत् । तिग्मादयोऽत्युष्णवाचकाः तद्वदिति कोष्णादय इव गुणे नपुंसकलिङ्गाः गुणिनि त्रिलिङ्गा भवन्ति ॥ मृगतृष्णा मरीचिका । सलिलवत्प्रतीयमानरविकिरणनामनी । आन्ध्रभाषायां 'यंडमावुलु' ॥ ३५ ॥

इति श्रीवत्सनृसिंहसूरिसुतमल्लिनाथ[4]विरचितेऽमरपदपारिजाते दिग्वर्गः

[1] एतान्यल्पोष्णनामानि B_3, B_4.　[2] नपुंसकानि B_3.　[3] त्रिलिङ्गानि B_3.
[4] मल्लिकार्जुन A_1.

---

४. कालवर्गः

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ।
प्रतिपद् द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः ॥ १ ॥

(वि.) काल इति—[1]कल्यते संख्यायते कालः। 'कल संख्याने[2]'। [3]कलयति प्रेरयति वा कालः। 'कल किल क्षेपे'। दिश्यते दिष्टः। 'दिश अतिसर्जने'। न ईहत इति अनेहा[4]। 'ईह चेष्टायाम्'। न हन्यते वा। सान्तः [5]पुमान्। [6]कर्मणि समेति समयः। 'इण् गतौ'। कालनामानि॥ पक्षस्य मूलं प्रारम्भदिनं पक्षतिः। प्रतिपद्यते उपक्रम्यतेऽनया प्रतिपत्। '[7]पद् गतौ'। पक्षप्रथमदिवसनामनी॥ तन्यते [8]षष्टिघटि-कादिभिरिति तिथिः। 'तनु विस्तारे'। प्रतिपत्प्रभृति पञ्चदशीपर्यन्ततिथिनामानि[9]॥ १॥

[1] काल्यते B_2, U. [2] A, B_1, T add शिल्पिसंज्ञयोः [3] कालयति K_1. [4] ईहत इति ईहा, ईहा न भवतीति नेहा, नेहा न भवतीति अनेहा; ईषदपि हन्यते ईहा, ईहा न भवतीति अनेहा, द्वयोर्नञोः प्रकृतार्थप्रतिपादकत्वेन हन्यमान इत्यर्थः B_2. [5] पुंलिङ्गः U. [6] कर्मणा I, U. [7] पद्लृ A, Y. [8] °घटिकाभिः K_1, W_2, Y. [9] °पर्यन्तं दिवसनामानि B_2, K_5, W_2.

(पा.) कालो—समयोऽपि। कालनामानि। [1]अनेहेत्यादन्तं पदम्। अन्यत्र अनेहसौ अनेहसः। हे अनेहः इत्यादि॥ अथ पक्षतिः—स्त्रीत्वे। प्रतिपन्नामनी॥ तदाद्यास्तिथयो द्वयोः। आद्यशब्देन पक्षत्यादीनामेव ग्रहणम्। ताश्च[2] पञ्चदशतिथि-शब्दवाच्याः। स तिथिशब्दोऽपि स्त्रीपुंसलिङ्गः॥ १॥

[1] A_1 adds अनेहेत्यत्र 'ऋदुशन—' (७. १. ९४) इत्यादिनानङ्ङादेशोऽसंबुद्धौ. [2] A_1 adds पक्षत्यादयः.

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ।
प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि॥ २॥
व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते।
प्रभातं च दिनान्ते तु सायः संध्या पितृप्रसूः॥ ३॥

(वि.) घस्र इति—तमो घसतीति[1] घस्रः। 'घस्लृ अदने'। तमो द्यतीति दिनम्। 'दो अवखण्डने'। सूर्येण न हीयते अहः। 'ओहाक् त्यागे'। दीव्यन्ति देवा[2] अस्मिन्निति दिवसः। 'दिवु क्रीडादौ'। वसन्ति व्यवहर्तारः अस्मिन्निति वासरः। 'वस निवासे'। [3]दिवसनामानि॥ प्रत्यूषति निशामिति प्रत्यूषः। 'ऊष रुजायाम्'। अह्नो मुखम् अहर्मुखम्। कलयति मङ्गलं कल्यम्। 'कल संख्याने'। काले[4] साधु काल्यम् इति वा पाठः। ओषत्यन्धकारमिति[5] उषः। प्रत्युषश्च। 'उष प्लुष दाहे'। [6]भातुं प्रवृत्तं प्रभातम्। 'भा दीप्तौ'। सूर्योदयात् प्राक् घटिकाचतुष्टयात्मकस्य कालस्य नामानि॥

दिनं स्यतीति [7] सायः। 'षोऽन्तकर्मणि'। दिनस्य पश्चाद्भागे मुहूर्तत्रयात्मककालनाम॥ सम्यग् ध्यायन्त्यत्रेति[8] संध्या। 'ध्यै चिन्तायाम्'। अहोरात्रसंधौ भवा वा। पितृणां प्रसूः माता पितृप्रसूः। दिनान्तादुपरि घटिकात्रयात्मकस्य[9] सूर्योदयात् प्राक् पञ्चघटिकात्मकस्य च कालस्य नामानि॥ २–३॥

[1] B_2 adds व्यथयति. [2] देहाः D_2. [3] दिन° K_3. [4] कालेन साम्यं W_2. [5] B_1, K_5, W_2, Y add उपरमयति. [6] प्रभातुं W_1. [7] B_1 adds समापयति; दिनम् अन्तयति समापयतीति दिनान्तः B_2. [8] °अस्यां विप्रैरिति वा संध्या, अर्कोदयास्तमयकालः Y. [9] घटिकात्मकस्य A, W_2; सूर्यास्तमयात् प्राक् D_2.

(पा.) घस्रो—वासरौ। दिवसनामानि॥ प्रत्यूषो—प्रभातं च। सूर्योदयात् प्राग् घटिकाचतुष्टयात्मककालनामानि। [1]वैजयन्त्यां प्रत्यूषशब्दो नपुंसकलिङ्ग इति प्रतिज्ञातम्। 'व्युष्टं विभातं प्रत्यूषं सांयात्रिकमहर्मुखम्' इति (पृ. २२, श्लो. ६८)। शाश्वतकोशे [2]काल्यशब्दो ह्रस्वादिः। 'कल्यं प्रभातमध्ये[3] च कल्यो नीरोगदक्षयोः' इति (पृ. ३, श्लो. २४)। 'गोपीथो गोसर्गस्त्रिचोषः कथ्यते निशान्तश्च' एतानि च॥ दिनान्ते तु सायम्। दिवसावसाननाम। सायमिति नपुंसकत्वेन निर्दिष्टम्। 'सायमण्डनमभित्वरयन्त्यः' इति। संध्या पितृप्रसूः। दिनान्तादुपरि घटिकात्रयात्मकस्य सूर्योदयात् प्राक् पञ्चघटिकात्मकस्य च कालस्य नामनी। संधाशब्दोऽप्यस्ति। 'संधा संध्या पितृप्रसूः' इति वैजयन्ती (पृ. २२, श्लो. ६९)॥ २–३॥

[1] वैजयन्तीकारेण A_1. [2] कल्य° B_3. [3] प्रभातं सजितं B_1; मुद्रितग्रन्थे च.

प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथ शर्वरी।
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा॥ ४॥
विभावरीतमस्विन्यौ रजनी यामिनी तमी।

(वि.) प्राह्ण इति—अह्नः प्रान्ते[1] भवः प्राह्णः। अह्नः अपरो भागः अपराह्णः। अह्नो मध्यो भागः मध्याह्नः। एते त्रयः समाहृताः त्रिसंध्यं भवति। तिसृणां संध्यानां समाहारः त्रिसंध्यम्॥ शृणाति [2]लोकचक्षूंषीति शर्वरी। 'शॄ हिंसायाम्'। नितरां श्यतीति सर्वचेष्टाः [3]निशा। निशीथोऽस्त्यस्यामिति[4] निशीथिनी। राति ददाति सुखमिति रात्रिः। 'रा दाने'। त्रयो यामा [5]यस्याः सा त्रियामा। विश्रमाय क्षणमवसरं[6] ददातीति क्षणदा। 'दा दाने'। क्षपयति आयुरिति क्षपा। 'क्षि क्षये'। तमसावृतत्वात् [7]विभावरी। तमोऽस्यामस्तीति तमस्विनी। तमसा [8]रज्यत इति रजनी। 'रञ्ज रागे'।

यामा अस्याः सन्तीति यामिनी । तमयति चक्रवाकान् तमी । 'तमु ग्लानौ' । तमा इति वा पाठः । रात्रिनामानि ॥ ४ ॥

[1] प्रारम्भः B_1, D_1, I, K_5, W_2. [2] सर्वचेष्टाः W_2. [3] नितरामस्यां शेरत इति निशा । 'शीङ् स्वप्ने' । नितरामस्यति निरस्यति सर्वचेष्टा इति वा निशा । 'अस निरसने' B_2; D_1, W_1 add 'शो तनूकरणे'. [4] अस्याः W_1. [5] यस्यां D_1. [6] अवकाशं A, B_1, T, U. [7] भाभिः व्रियत इति भावरी, भावरी न भवतीति विभावरी, 'वृञ् वरणे'; भा कान्तिः, न विद्यते भा यस्य तत् विभं तमः, तेन विभेन आ समन्तात् व्रियत इति विभावरी वा B_2. [8] रञ्जयति B_1, D_1, I, K_5, W_2.

(पा.) प्राह्ण—त्रिसंध्यम् । प्राह्ण इति पूर्वाह्णः[1] । अपराह्ण इति सायाह्नः[1] । मध्याह्न इति [2]मध्यंदिनपर्यायः । एतेषां त्रयाणां[3] समाहारस्त्रिसंध्यम् । त्रिसंध्यी इति च कतिचित् [4]कथयन्ति । समाहारस्यैकत्वाद् [5]एकवचनम् ॥ अथ शर्वरी—तमी । 'तमासिता विरात्रः स्याद् वासुरा यामिनी तमी' इति रभसकोशपाठात् तमा इत्यपि भवति । रात्रिनामानि ॥ ४ ॥

[1] A_1 adds पर्यायः. [2] दिनमध्य° B_3. [3] B_3 adds संध्यानां. [4] B_3, B_4 omit. [5] A_1 adds पक्षद्वयेऽपि.

तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता ॥ ५ ॥
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ।

(वि.) तमिस्रेति—तमोऽस्त्यस्यामिति[1] तमिस्रा । तमोबहुला [2]तामसी । तमोयुक्तरात्रिनामनी ॥ ज्योत्स्ना अस्त्यस्यामिति [3]ज्यौत्स्नी । ज्योत्स्ना ज्योत्स्नीति वा पाठः । चन्द्रिकायुक्तरात्रिनाम ॥ उभयाह्नी पक्षाविव यस्याः सा पक्षिणी । [4]उभयतः अहोयुक्तरात्रिनाम ॥ ५ ॥

[1] अस्याः A, B_1, T. [2] तमसां समूहः तामसम्, तदस्यास्तीति तामसी B_2. [3] ज्योत्स्नी, आकारान्तोऽप्यस्ति B_1, I, K_5, W_2; K_5 omits 4 lines. [4] उभयाहो° D_1, I, W_2; उभयत्राहोयुक्तनिशानाम W_1.

(पा.) तमिस्रा—रात्रिः । तमोयुक्तरात्रिस्तमिस्रा स्यात् । ज्योत्स्नी चन्द्रिकयान्विता । चन्द्रिकायुक्तरात्रिर्ज्योत्स्नी स्यात् । 'पूर्णेन्दुस्तु दिनंमन्या' । पूर्णचन्द्रयुक्तरात्रिर्दिनंमन्या स्यात् । आगामि—पक्षिणी । पक्षद्वयवदुभयतोवर्त्यहःसंयुक्ता रात्रिः पक्षिणी स्यात् ॥ ५ ॥

गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम् ॥ ६ ॥
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ।

(वि.) गणरात्रमिति—रात्रीणां गणो[1] गणरात्रम् । [2]गणरात्रो वा । समाहारे नपुंसकम् । रात्रिसमूहनाम ॥ प्रकृष्टो दोषः [3]प्रारब्धा दोषा वा अत्रेति प्रदोषः । [4]रजनीमुखनाम ॥ रात्रेरर्धम् अर्धरात्रः । नियतं शेरतेऽत्र[5] निशीथः । 'शीङ् स्वप्ने' । [6]मध्यरात्रनामनी ॥ यातीति यामः । 'या प्रापणे' । प्रह्रियत इति प्रहरः[7] । 'हृञ् हरणे' । दिनस्य रात्रेर्वा चतुर्भागनामानि ॥ ६ ॥

[1] B_1, W_2 add समूहः.　[2] W_2 omits.　[3] प्रारब्धः B_1.　[4] B_2 adds रजन्याः मुखं रजनीमुखम् ; एतत् प्रदोषकालनाम B_2, K_5, W_2.　[5] A adds प्राणिनः.　[6] मध्यरात्रि° A, B_1, D_2, W_1.　[7] प्रकर्षेण ह्रियते° A.

(पा.) गणरात्रं निशा बह्व्यः । रात्रिसमूहः गणरात्रं स्यात् । अथवा बह्व्यः [1]रात्रयो गणरात्रमित्युच्यते । चिररात्रमपि [2]तन्नाम । 'बह्व्यस्तु गणरात्रं च चिररात्रं च रात्रयः' इति वैजयन्ती (पृ. २१, श्लो. ५९) । प्रदोषो रजनीमुखम् । [3]रात्रिमुखनाम ॥ अर्धरात्रनिशीथौ द्वौ । रात्रिमध्यनामनी । 'मध्यरात्रो [4]महारात्रिः' । एते च । द्वौ—समौ । दिनस्य रात्रेर्वा तुरीयांशनामनी ॥ ६ ॥

[1] निशाः A_1.　[2] B_3 omits.　[3] रात्रेर्मुखं प्रदोषः स्यात् A_1.　[4] महारात्रौ A_1.

स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ॥ ७ ॥
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा ।
कलाहीने सानुमतिः पूर्णे राका निशाकरे ॥ ८ ॥

(वि.) स इति—प्रतिपत्पञ्चदश्योर्यदन्तरं स संधिः, पर्व वा भवति । संधीयते[1] संधिः । पृणाति पालयति [2]अभिलषितमिति [3]पर्व । 'पॄ पालनपूरणयोः' । पर्वसंधिरिति एकं पदं वा । [4]शुक्लकृष्णपक्षान्तौ द्वे पञ्चदश्यौ भवतः । पञ्चदशसंख्यायाः पूरणी पञ्चदशी । पूर्णश्चासौ माश्च [5]पूर्णमाः, पूर्णमसः चन्द्रस्येयं पौर्णमासी । पूर्णो मासोऽस्यामिति वा । [6]पूर्णं मिमीते पूर्णिमा । 'माङ् माने' । पूर्यते मासः अनयेति वा । 'पूरी आप्यायने' । [7]शुक्लपञ्चदशीनामानि ॥ अनुमन्यते [8]अनुमतिः । 'मन ज्ञाने' । [9]चतुर्दशीमिश्रितपूर्णिमानाम ॥ यज्वभिः रायते राका । 'रै शब्दे' । राति ददाति [10]अभिलषितमिति वा । 'रा दाने' । [11]संपूर्णचन्द्रवत्पूर्णिमानाम ॥ ७–८ ॥

[1] 'डुधाञ् धारणपोषणयोः' D_1. [2] अभिलक्षितं W_2; अभिमतम् A. [3] पृणाति ददाति देवेभ्यो हविरिति वा B_1, K_5, W_2, Y. [4] शुक्लपक्ष° A. [5] B_2, D_1 add चन्द्रः; तस्येयं तिथिरिति पौर्णमासी I. [6] पूरणं पूर्णं W_1. [7] T adds पक्ष. [8] कलाहीने चन्द्रे कलामात्रहीने सति चन्द्रे या पूर्णिमा सा अनुमतिरित्यर्थः B_2, K_5, W_2, Y. [9] कलाहीनचन्द्रयुक्तपूर्णिमानाम B_2, I. [10] शुभम् Y; सुखम् W_2. [11] °चन्द्रमिश्रित° A, B_1, T.

(पा.) स पर्व—यदन्तरम्। प्रतिपत्पञ्चदश्योरन्तरालकालः पर्वसंधिरित्युच्यते। पक्षान्तौ—द्वे। [1]पौर्णमास्यमावास्ययोर्नामनी ॥ 'पर्वणी पञ्चदश्यौ द्वे पक्षान्तौ नन्दिवर्धनौ' इति वैजयन्ती (पृ. २३, श्लो. ७३)। पौर्णमासी तु पूर्णिमा। [2]शुक्लपञ्चदशीनामनी ॥ पूर्णमासी च भवति। 'पूर्णा च पूर्णमासी च पौर्णमासी च पूर्णिमा[3]' इति वैजयन्ती (पृ. २३, श्लो. ७३)। कलाहीने—निशाकरे। यस्यां चन्द्रः कलाहीनः [4]स्यात् सा पूर्णिमा अनुमतिः स्यात्। यस्यां पूर्णश्चन्द्रः[5] सा राकेत्युच्यते। अनुक्तम्—'चैत्री तु मदनध्वजा'। पौषीमाघीप्रभृतयस्तत्तन्मासपूर्णिमासु ॥ ७–८ ॥

[1] वक्ष्यमाणपञ्चदश्यौ द्वे पक्षान्तौ स्याताम् A_1. [2] पूर्णिमा° A_1. [3] पूर्णिका इति मुद्रितपुस्तके. [4] चेत् A_1. [5] पूर्णचन्द्रः A_1.

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः।
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ॥ ९ ॥

(वि.) अमावास्येति—चन्द्रार्कौ [1]अमा सह वसतः अत्रेति अमावास्या[2] अमावस्या च। दृश्येते सूर्याचन्द्रमसावत्रेति दर्शः। 'दृशिर् प्रेक्षणे'। सूर्येन्दू संगच्छेते अत्रेति सूर्येन्दुसंगमः। 'गम्लृ सृप्लृ गतौ'। कृष्णपञ्चदशीनाम ॥ वालते चलतीति [3]वालः। 'वाडृ आप्लाव्ये'। वालेन चन्द्रेण सिनी सिता सिनीवाली। दृष्टचन्द्रदर्शनाम ॥ कुहयते विस्मापयति तमसा कुहूः। 'कुह विस्मापने'। तमसा कुं भुवं हन्तीति वा[4]। नष्टचन्द्रदर्शनाम ॥ ९ ॥

[1] अमा इत्यव्ययं, सहार्थकं च। वा विकल्पे। वा अमा स्यात्, अमेति वा स्यादित्यर्थः B_2. [2] D_1, I, W_1 add 'वस निवासे'. [3] चन्द्र इत्यर्थः B_2. [4] B_2, D_1, Y add 'हन हिंसागत्योः'.

(पा.) अमावास्या—संगमः। कृष्णपञ्चदशीनामानि ॥ अमावासी, अमावसी इत्यपि स्यात्। 'दर्शोऽमावास्यमावसी' इति वैजयन्ती (पृ. २२, श्लो. ७०)। अमावसे-

त्यप्यस्ति । 'अमावास्या त्वमावसा[1]' इति वैजयन्ती (पृ. २२, श्लो. ७१) । सा दृष्टेन्दुः सिनीवाली । [2]सा अमावसा दृष्टचन्द्रा चेत् सिनीवालीत्युच्यते[3] । सा लक्ष्मीरस्यामस्तीति सिनी चन्द्रकला । सा बाला अस्यामिति सिनीवालीति व्युत्पत्त्या दन्त्यादिः । सा नष्टेन्दुकला कुहूः । सा[4] अमावसी नष्टेन्दुकला चेत् कुहूरित्युच्यते ॥ ९ ॥

[1] अमवसा B_3.　[2] दृष्टेन्दुदर्शनाम B_3, B_4.　[3] शब्द्यते A_1.　[4] नष्टेन्दुदर्शनाम B_3.

उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ।
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः ॥ १० ॥
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।

(वि.) उपराग इति—उपरज्येते सूर्याचन्द्रमसावनेनेति उपरागः । 'रञ्ज रागे' । गृह्येते सूर्याचन्द्रमसावनेन ग्रहः । 'ग्रह उपादाने' । ग्रहणनामनी ॥ उपप्लवेन सहितः सोपप्लवः । उपरज्यते उपरक्तः । राहुग्रस्ते इन्दौ पूष्णि च द्वौ शब्दौ वर्तेते । [1]अग्नेरुत्पातः अग्न्युत्पातः । उप समीपे [2]आहितमत्र उपाहितः । [3]धूमकेतुनाम ॥ [4]पुष्पं विकासः तद्वन्तौ पुष्पवन्तौ । सूर्याचन्द्रमसोरपृथङ्नाम ॥ १० ॥

[1] अग्निना कृतः उत्पातः B_1, K_5, W_2.　[2] अहितम् B_1, D_1.　[3] धूमकेत्वादि° B_2.　[4] पुष्पवद् विकासः K_1.

(पा.) उपरागो ग्रहः । ग्रहणनामनी ॥ राहुग्रस्ते—द्वौ । राहुग्रस्तचन्द्रसूर्यनामनी ॥ अग्न्युत्पात उपाहितः । धूमकेतुनाम ॥ एकयोक्त्या—निशाकरौ । एकयोक्त्या [1]सूर्याचन्द्रमसौ [2]पुष्पवन्ताविति कथ्येते ।

'जातौ स्वकिरणसंचयपटावृतौ वियति पुष्पवन्तौ सन्तौ ।
बाणासनौ च घनरवपटावृतौ वियति पुष्पवन्तौ सन्तौ ॥'

इति हरिप्रबोधयमके ॥ पुष्पदन्तावपि भवतः । 'प्राक्प्रत्यग्धरणीधरशिखरस्थितपुष्पदन्ताभ्याम्' इति धर्मशर्माभ्युदये ॥ १० ॥

[1] सूर्यचन्द्रौ B_3.　[2] पुष्पवत्पदवाच्यौ भवतः B_3, B_4.

अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ॥ ११ ॥
तास्तु त्रिंशत् क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् ।

(वि). अष्टादशेति—निमिषतीति निमेषः[1]। ते अष्टादश काष्ठा भवति। काशत इति काष्ठा[2]। ताः काष्ठाः त्रिंशत् कला भवति। कालं कलयतीति कला[3]। ताः कलाः त्रिंशत् [4]क्षणो भवति। क्षिणोति हिनस्तीति क्षणः। 'क्षिणु हिंसायाम्'। ते क्षणाः द्वादश मुहूर्तो[5] भवति। [6]मुहुर्मुहुरियर्तीति [7]मुहूर्तः। 'ऋ गतौ'॥ ११॥

[1] निमिषः A, B_1, T; U adds 'मिष उन्मीलने'. [2] D_2, I, K_1, W_1 add 'काशृ दीप्तौ'. [3] 'कल किल क्षेपे' D_1. [4] क्षणं I. [5] मुहूर्तं K_1. [6] W_2 omits one मुहुः. [7] मुह्यतीति मुहु, इयर्ति गच्छतीत्यर्थः। आहत्य उभयधात्वर्थमेलनात् मुहूर्तो भवति। 'मुह वैचित्ये', 'ऋ गतौ' B_2.

(पा.) अष्टादश—काष्ठा। मनुष्याक्षिपक्ष्मपरिक्षेपकालो निमेषो निमिषश्च भवति। 'निमेषनिमिषौ कालप्रभेदेऽक्षिनिमीलने' इति विश्वप्रकाशिका (पृ. १७२, श्लो. १५)। निमेषा अष्टादश स्युश्चेत् काष्ठा॥ त्रिंशत्तु ताः कला। काष्ठास्त्रिंशच्चेत् कला। तास्तु त्रिंशत् क्षणः। त्रिंशत्कलाः क्षणः। ते तु—अस्त्रियाम्। क्षणाः द्वादश स्युश्चेत् मुहूर्तः[1]॥ ११॥

[1] B_3 adds स चास्त्रियाम्.

ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च॥ १२॥
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ।

(वि.) ते त्विति—ते तु मुहूर्ताः त्रिंशत् अहोरात्रो[1] भवति। अह्ना सहिता[2] रात्रिः अहोरात्रः। तेऽहोरात्राः पञ्चदश पक्षो भवति। [3]पचति [4]भूतानि पक्षः। 'डुपचष् पाके'। [5]पक्ष्यते वा पक्षः। 'पक्ष परिग्रहे'। पूर्वापरौ पक्षौ क्रमेण शुक्लकृष्णनामकौ[6] भवतः। उभौ तौ मासो भवति॥ १२॥

[1] अहोरात्रं K_2. [2] समेता B_1; अहःसमेता B_2. [3] परिणामयतीत्यर्थः B_2. [4] B_2 adds शरीरादीनि. [5] पक्षति गृह्णातीति वा B_2. [6] °नामानौ D_2, K_2, K_5, W_1.

(पा.) ते तु त्रिंशदहोरात्रः। मुहूर्तत्रिंशत् अहोरात्रः। अत्रापि अस्त्रियाम् इति लिङ्गमन्वेति। अहोरात्रं, द्विरात्रं, त्रिरात्रमिति वामनलिङ्गानुशासने (पृ. १३, श्लो. १६) तथैवोदाहृतत्वात्॥ पक्षस्ते दश पञ्च च। अहोरात्राणि[1] पञ्चदश चेत् पक्षः॥ पक्षौ—कृष्णौ। अत्र पूर्वपक्षः शुक्लपक्षः स्यात्। अपरपक्षः कृष्णपक्षोऽपि भवति॥

मासस्तु तावुभौ। पक्षौ द्वौ चेन्मासः। [2]माःशब्दोऽपि स्यात्। 'मासौ मासनिशाकरौ' इति वैजयन्ती (पृ. २७०, श्लो. ६१)। माः सान्तः ॥ १२ ॥

[1] अहोरात्राः B_3.　　[2] मासि इत्यपि A_1.

द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः ॥ १३ ॥
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः।

(वि). द्वाविति—[1]मस्यति परिणमतीति मासः। 'मसी [2]परिणामे'। मासः[3] चन्द्रस्यायं मास इति वा। इयर्तीति ऋतुः। 'ऋ गतौ'। तौ [4]मार्गादिमासौ द्वौ द्वौ ऋतुः भवति। तैः त्रिभिः ऋतुभिः अयनम्। अयते यात्यनेन सूर्यः दक्षिणामुत्तरां चेति अयनम्। 'अय पय गतौ'। ते द्वे अयने अर्कस्य उदग्दक्षिणागतिश्च[5] वत्सरो भवति। वसन्त्यस्मिन् ऋतवः वत्सरः। 'वस निवासे'॥ १३ ॥

[1] मस्यते परिमीयतेऽनेन K_3, W_2.　　[2] 'मसी परिमाणे' A, I, T.　　[3] माश्चन्द्रः तस्यायं B_1, D_1, I, W_2.　　[4] माघादि° B_2.　　[5] °गती च W_2.

(पा.) द्वौ द्वौ—ऋतुः। मार्गशीर्षादिमासद्वयम् ऋतुः स्यात्। तैरयन त्रिभिः। ऋतवस्त्रयश्चेद् अयनम्। अयने—वत्सरः। [1]अर्कस्य उदक् उदीच्याम्[2] अयनं गतिरुत्तरायणम्। दक्षिणा दक्षिणस्यामयनं[2] गतिर्दक्षिणायनम्। ते त्वयने वत्सरः ॥ १३ ॥

[1] A_1 adds उदगिति अस्तातिप्रत्ययान्तस्योदीचीशब्दस्य सप्तमी, दक्षिणा इति आच्प्रत्ययान्तदक्षिणाशब्दस्य सप्तमी.　　[2] A_1 adds जाता गतिः.

समरात्रिंदिवे काले विषुवद् विषुवं च तत् ॥ १४ ॥
(पुष्ययुक्ता[1] पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥)
मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः।

(वि.) समेति—रात्रिश्च दिवा च रात्रिंदिवम्। [2]समं रात्रिंदिवं यस्मिन् काले स समरात्रिंदिवः। अस्मिन् काले[3] विषुवत् विषुवं च भवतः। अहोरात्रयोः विषु[4] साम्यमत्रास्तीति विषुवत्। विषुवं च। पुष्यनक्षत्रयुक्ता पौर्णमासी पौषी, सा यत्रास्ति मासे स नाम्ना पौषः[5]। अपरे एकादश[6] माघाद्या एवमूह्याः[7]। कथम्? [8]मघानक्षत्रयुक्ता

पौर्णमासी माघी। सा यत्रास्ति स माघः। [9]मृगशीर्षनक्षत्रयुक्ता [10]मार्गशीर्षी, सा यस्मिन्नस्ति स मार्गशीर्षः। शीतोष्णे सह्येतेऽत्र सहाः[11]। सान्तः। 'षह मर्षणे'। [12]मृगशिरोनक्षत्रयुक्ता पौर्णमासी मार्गी, सा यत्रास्ति स मार्गः। आग्रहायणी यत्रास्ति स आग्रहायणिकः। [13]मार्गशीर्षनामानि ॥ १४ ॥

[1] Verse included in most of the MSS. [2] B_2 adds समानं. [3] °विषुर्भवति विषुवत् विषुवं च B_2. [4] विषु इति साम्येऽव्ययम् D_1, K_5. [5] A, T add मासः. [6] K_3, K_5 add मासाः. [7] कथनीयं K_1. [8] मघनक्षत्र° A, B_1, T, K_1. [9] °शिरो° A, B_1, T. [10] W_1 adds पौर्णमासी. [11] सहतेऽत्र सहाः A, T. [12] °शीर्ष° B_1; K_1, K_3, W_1 omit °शिरः°. [13] D_2, W_2 add °मास°.

(पा.) समरात्रिंदिवे—तत्। [1]समं रात्रिंदिवं यस्मिन् तस्मिन्[2] काले विषुवत् विषुवं च शब्दौ भवतः। समकालनामनी ॥ [3]पुष्ययुक्ता—अपरे। पुष्ययुक्ता पौर्णमासी पौषी। पुष्ययुक्तपूर्णिमानाम ॥ पौषस्तन्मासनाम ॥ अपरे एकादश चैवं माघाद्याः माघादिपदवाच्याः ॥ मार्गशीर्षे—च सः। मार्गशीर्षमासनामानि ॥ १४ ॥

[1] A_1 adds रात्रिश्च दिवा च रात्रिंदिवम्. [2] अस्मिन् A_1. [3] A_1 omits the verse पुष्ययुक्ता . . .

पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने ॥ १५ ॥
स्यात् तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ।

(वि.) पौष इति—पौषी यत्रास्ति पौषः, तैषी यत्रास्ति तैषः। सहोऽस्यास्तीति [1]सहस्यः। [2]पौषमासनामनी ॥ स्नानादिना पापं तपत्यत्रेति [3]तपाः। सान्तः। 'तप संतापे'। मा न [4]विद्यमानम् अघमस्मिन्निति माघः। माघी अत्रास्तीति वा। माघमास-नामनी ॥ [5]फाल्गुनी अत्रास्तीति फाल्गुनः। फाल्गुनिकश्च। तपसि साधुः तपस्यः। फाल्गुनमासनामानि ॥ [6]चैत्री अत्रास्तीति चैत्रः। चैत्रिकश्च[7]। मधुना पुष्परसेन योगान्मधुः। [8]मधुर्वसन्तोऽत्रास्तीति वा मधुः। चैत्रमासनामानि ॥ १५ ॥

[1] सहसि साधुः U. [2] पुष्यमास° B_1, D_1, K_5, W_2. [3] तपः अस्त्यस्मिन्निति D_1, K_5; तपति अस्मिन् B_2. [4] अविद्यमानम् B_1, U, W_2. [5] फल्गुनीयुक्ता पूर्णिमा B_2. [6] चित्रानक्षत्रयुक्ता पूर्णिमा B_2. [7] चैत्रकश्च A. [8] B_1 omits one line.

(पा.) पौषे—द्वौ। पौषमासनामनी ॥ तपा माघे। माघमासनामनी ॥ अथ—फाल्गुनिकः। फाल्गुनमासनामनी ॥ स्यात्—मधुः। चैत्रमासनामानि ॥ १५ ॥

वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् ॥ १६ ॥
आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ।

(वि.) वैशाख इति—वैशाखी अत्रास्तीति वैशाखः । मधौ साधुः माधवः । राधी अत्रास्तीति राधः । [1]वैशाखनामानि ॥ [2]ज्येष्ठी अत्रास्तीति ज्येष्ठः[3] । शोचयति तापेन[4] प्राणिन इति शुक्रः । 'शुच शोके' । ज्येष्ठमासनामनी ॥ जनान् तापेन शोचयतीति शुचिः । आषाढाभियुक्ता पौर्णमासी आषाढी । सा अत्रास्तीति आषाढः । आषाढमासनामनी ॥ श्रावणी अत्रास्तीति श्रावणः । श्रावणिकश्च । न बभस्ति न भाति मेघैः नभाः । 'भस भर्त्सनदीप्त्योः' । न भासते मेघैरिति वा । 'भासृ दीप्तौ' । तपोऽत्र [5]नभ्यते नश्यतीति वा नभाः[6] । सान्तः । नभोऽत्राभिभवतीति वा । 'णभ हिंसायाम्' । [7]श्रावणनामानि ॥ १६ ॥

[1] A, B_2, D_1, I, W_2 add °मास° . [2] ज्येष्ठायुक्ता पूर्णिमा ज्येष्ठी B_2. [3] ज्यैष्ठः K_3, W_1. [4] तापयति B_2. [5] नभते A, B_1, T. [6] भातीति भाः, स न भवतीति नभाः B_2. [7] D_2, K_3, U, W_2 add °मास°.

(पा.) वैशाखे—राधः । वैशाखमासनामानि ॥ ज्येष्ठे शुक्रः । ज्येष्ठमासनामनी ॥ शुचिस्त्वयम् आषाढे । आषाढमासनामनी ॥ श्रावणे—सः । श्रावणमासनामानि ॥ १६ ॥

स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ॥ १७ ॥
स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्त्तिके ।
बाहुलोर्जौ कार्त्तिकिको हेमन्तः शिशिरोऽस्त्रियाम् ॥ १८ ॥

(वि.) स्युरिति—नभसि साधुः नभस्यः । [1]प्रोष्ठपदी अत्रास्तीति [2]प्रोष्ठपदः । [3]भद्राभ्यां युक्ता [4]पौर्णमासी भाद्री । सा अत्रास्तीति भाद्रः । [5]भाद्रपदी अत्रास्तीति भाद्रपदः । [6]भाद्रपदनामानि ॥ अश्विनीनक्षत्रयुक्ता पौर्णमासी आश्विनी । सा अत्रास्तीति आश्विनः । [7]दीक्षितैरिष्यत इति इषः । 'इषु इच्छायाम्' । [8]आश्वयुजी अत्रास्तीति आश्वयुजः । आश्वयुजमासनामानि ॥ कार्त्तिकी अत्रास्तीति कार्त्तिकः । कार्त्तिकिकश्च । [9]बाहुली अत्रास्तीति बाहुलः । [10]ऊर्जमन्नमत्रास्तीति ऊर्जः । कार्त्तिकमासनामानि ॥ हिमेन हन्तीति हेमन्तः[11] । हेमन्तऋतुनाम ॥ शीतेन गात्राणि शिनोति तनूकरोतीति शिशिरः । 'शिञ् निशातने' । शिशिरऋतुनाम ॥ १७–१८ ॥

[1] प्रोष्ठपदायुक्ता पूर्णिमा प्रोष्ठपदी A. [2] प्रौष्ठपदः W_1. [3] भद्रया युक्ता K_5, U, W_2. [4] पूर्णिमा B_2, D_2. [5] भाद्रपदायुक्ता(पौर्णमासी U) भाद्रपदी B_2, K_5.

[6] D_2, K_1, K_3, K_5, U, W_1 add °मास°. [7] B_2, W_2 omit दीक्षितैः. [8] अश्वयुग्युक्ता आश्वयुजी D_1. [9] बहुलायुक्ता पौर्णमासी बाहुली B_1, D_1, I, K_5. [10] ऊर्क् बलमत्रेति ऊर्जः B_2. [11] 'हन हिंसागत्योः' B_2, D_1.

(पा.) स्युः—समाः। भाद्रपदमासनामानि॥ स्यादाश्विन—अपि। आश्वयुजमासनामानि॥ स्यात्तु—कार्त्तिकिकः। कार्त्तिकमासनामानि॥ हेमन्तः। हेमन्तर्तुनाम। शरदत्ययहिमागमादिशब्दाः कविप्रयुक्ताः। 'पतितमेव हिमागमभङ्गिनां वपुषि कान्तिहरं शरदत्यये'। 'तपेन वर्षाः शरदा हिमागमो वसन्तलक्ष्म्या शिशिरः समेत्य च'। (शिशु. १. ६६) इत्यादि॥ शिशिरोऽस्त्रियाम्। शिशिरर्तुनाम॥ १७–१८॥

वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः।
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः॥ १९॥

(वि.) वसन्त इति—[1]वसन्त्यस्मिन् [2]सुखं वसन्तः। 'वस निवासे'। पुष्पाणां समयः पुष्पसमयः। सुष्ठु [3]रभते आह्लादनं कर्तुमारभतेऽत्र सुरभिः। 'रभ राभस्ये'। वसन्तऋतुनामानि॥ जलं गिरतीति ग्रीष्मः। 'गॄ निगरणे'। ऊष्माणं करोतीति ऊष्मकः[4]। [5]निदह्यते जनोऽत्र निदाघः। 'दह भस्मीकरणे'। उष्णस्योपगमः उष्णोपगमः। ओषति तापेनेति उष्णः। 'उष प्लुष दाहे'। ऊष्मणः आगमः ऊष्मागमः। तपतीति तपः। 'तप संतापे'। अकारान्तोऽयम्[6]। ग्रीष्मऋतुनामानि॥ १९॥

[1] वसति D_2. [2] सुखेन W_1; I adds यथा तथा. [3] सुष्ठु रम्भितम् आह्लादकं कर्तुं शीलमस्यास्तीति B_2. [4] D_1 adds 'डुकृञ् करणे'. [5] निदहति जनान् B_1. [6] सकारान्तश्च D_1.

(पा.) वसन्ते—सुरभिः। वसन्तर्तुनामानि॥ ग्रीष्म—तपः। अकारान्तोऽयं तपः। ग्रीष्मर्तुनामानि॥ १९॥

स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम्।
षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात्॥ २०॥

(वि.) स्त्रियामिति—[1]प्रवर्षतीति प्रावृट्। 'वृष सेचने'। [2]अनुवर्षमस्तीति वर्षाः। बहुवचनमेव [3]स्त्रियां वर्तते। वर्षर्तुनामनी॥ शृणाति [4]पङ्कं जलं च शरत्। 'शॄ हिंसायाम्'। शरदृतुनाम॥ अमी षट् मार्गादीनां मासानां युगैः युग्मैः मासैः क्रमात् [5]हेमन्तादिऋतवो भवन्ति॥ २०॥

[1] प्रकर्षेण वर्षतीति B_2. [2] आसु D_1; वृष्यन्ते आसु B_2. [3] स्त्रीलिङ्गं च B_2.
[4] पङ्कजलानि B_2. [5] हेमन्तादयः D_1, I.

(पा.) स्त्रियां—वर्षाः। वर्षर्तुनामानि। प्रावृषाशब्दोऽप्यस्ति। 'प्रावृषा तु जलार्णवः' इति त्रिकाण्डशेषः (पृ. ६, श्लो. ११५)॥ अथ शरत् स्त्रियाम्। शरदृतुनाम। शरदाशब्दोऽप्यस्ति। '[1]कालप्रभातं शरदा' इति त्रिकाण्डशेषः (पृ. ६, श्लो. ११५)॥ षडमी—क्रमात्। हेमन्तादयः षडपि मार्गशीर्षादियुग्मक्रमेण ऋतुशब्दवाच्याः पुंलिङ्गाः। यद्वा ऋतुशब्दः पुंलिङ्गः। [2]कार्त्तिकादियुग्मक्रमात् व्यवस्था[3] मा भूदिति मार्गग्रहणम्॥२०॥

[1] कल्यं विभातं शरदा A_1, B_4. [2] A_1 adds पूर्व. [3] A_1 adds वैषम्यं.

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः।
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः॥ २१॥

(वि.) संवत्सर इति—[1]संवसन्ति ऋतवोऽत्र संवत्सरः। वत्सरश्च। 'वस निवासे'। आप्यते [2]अधिकमासेनेत्यब्दः। 'आप्लृ व्याप्तौ'। अपो ददातीति वा। 'डुदाञ् दाने'। जहाति क्रमेण ऋतूनिति हायनः। 'ओहाक् त्यागे'। शीर्यते [3]जगदत्रेति शरत्। 'शॄ हिंसायाम्'। समयन्तीति [4]जनान् समाः। 'षम वैक्लव्ये'। अयं शब्दः स्त्रीलिङ्गो बहुवचनान्तः। एकवचनान्तो वा। संवत्सरनामानि॥ मानुषेण मासेन पैत्रः अहोरात्रः स्यात्। पितॄणामयं पैत्रः। मानुषेण वर्षेण दैवतः अहोरात्रः स्यात्। देवतानामयं दैवतः॥ २१॥

[1] वसन्तादिऋतवोऽत्र सम्यक् वसन्तीति B_2. [2] अखिल° K_1, Y. [3] अङ्गमत्रेति B_2.
[4] जीवान् B_1, K_5, W_2.

(पा.) संवत्सरो—समाः। संवत्सरनामानि। अस्त्रीशब्दो हायनशब्दविशेषणम्। शरच्छब्दस्य, [1]समाशब्दसाहचर्यात् स्त्रीलिङ्गतैव। 'वर्षोऽस्त्री स्त्री शरत्समाः' इति वैजयन्ती (पृ. २४, श्लो. ९१)। समाशब्दोऽस्मिन् शास्त्रे बहुप्रकृतिकः। वामनलिङ्गानुशासनेऽप्येवमेवोक्तम्। 'बहवश्च समाः सिकता वर्षा आपः सुमनसो जलौकसोऽप्सरस' इति (पृ. १६, श्लो. २३)॥ मासेन—पैत्रः। मानुषेण मासेन पितॄणामहोरात्रः। अत्र पक्षाभ्यां दिवारात्रिविभागः॥ वर्षेण दैवतः। मानुषेण वर्षेण देवतानामहोरात्रः स्यात्। अत्रायनाभ्यां दिवारात्रिविभागः॥ २१॥

[1] A_1 adds अस्त्रीशब्दसाहचर्यात् पुंनपुंसकलिङ्गतायां प्राप्तायां.

दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् ।
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ॥ २२ ॥

(वि.) दैवे इति—दैवे[1] द्वे युगसहस्रे [2]ब्राह्मः अहोरात्रः स्यात् । ब्रह्मणोऽयं ब्राह्मः । तौ नृणां स्थितिक्षयात्मकौ कल्पौ भवतः । कल्पयति नृणां [3]नाशं करोतीति कल्पः । 'कृपू [4]सामर्थ्ये' । दिव्यानां युगानामेकसप्ततिः मन्वन्तरं भवति । मनोरन्तरं मन्वन्तरम् ॥ २२ ॥

[1] दैवयुगसहस्रं A, B_2. [2] ब्रह्मणः U. [3] काशं A, B_1, W_2; अवकाशं B_2. [4] 'कल्प कल्पतौ' A, D_2, K_5.

(पा.) दैवे—ब्राह्मः । [1]दैवयुगमित्युक्ते मनुष्यचतुर्युगम् । ते युगे द्वे सहस्रे चेत् ब्रह्मणः अहोरात्रो भवति । अत्र कल्पाभ्यां [2]दिवारात्रिविभागः ॥ कल्पौ—नृणाम् । स्थितिक्षयात्मकौ कल्पौ भवतः । तावित्यनेन बुद्धिस्थदिवारात्र्योः परामर्शः ॥ मन्वन्तरं—एकसप्ततिः । चतुर्दशदलनस्य कल्पस्य एकैको [3]भागो मन्वन्तरं भवति । मानुषचतुर्युगं दिव्यं युगम् । तेषामेकाधिका सप्ततिः ॥ २२ ॥

[1] दिव्य° A_1. [2] अहोरात्र° B_3, B_4. [3] विभागो A_1.

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ।
अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् ॥ २३ ॥
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ।
स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ॥ २४ ॥

(वि.) संवर्त इति—संवर्तते क्षीयते जगदत्रेति संवर्तः । 'वृतु वर्तने' । [1]प्रलीयते जगदत्रेति प्रलयः । 'लीङ् श्लेषणे' । जगन्नाशः कल्प्यतेऽत्रेति कल्पः । 'कृपू[2] सामर्थ्ये' । क्षीयते जगदत्र क्षयः । 'क्षि क्षये' । कल्पस्यान्तः कल्पान्तः । संहारकालनामानि ॥ कम्पते [3]अस्मात् पङ्कः । [4]अक्षरविपर्ययः । 'कपि चलने' । सभामध्ये [5]पच्यते वा । 'पचि विस्तारे' । पच्यते व्यक्तीक्रियते वा पङ्कः । 'पचि व्यक्तीकरणे' । पतति येन नरके पाप्मा । 'पत्लृ गतौ' । पान्त्यस्मादिति वा पाप्मा । पापं च । 'पा रक्षणे' । कल्यते चित्रगुप्तेन गण्यते किल्बिषम् । कल्मषं कलुषं च । 'कल संख्याने' । कलयति नरके वा कलुषम् । 'कल किल क्षेपे' । [6]वर्ज्यते वृजिनम् । 'वृजी वर्जने' ।

नरकमेत्यनेनेति एनः। 'इण् गतौ'। कर्तारमङ्कत[7] इत्यघम्। 'अघि गत्याक्षेपे'[8]। अंहते नरमनेनेति अंहः। 'अहि गतौ'। दुष्टमेतीति दुरितम्[9]। [10]दुष्क्रियत इति दुष्कृतम्। 'डुकृञ् करणे'। पापनामानि॥ ध्रियत इति [11]धर्मः। पुणति शुभं करोतीति पुण्यम्। 'पुण कर्मणि शुभे'। शुभेन [12]श्रीयते श्रेयः। 'श्रिञ् सेवायाम्'। [13]सुष्ठु क्रियते स्म सुकृतम्। अभिलषितं वर्षतीति वृषः। 'वृष सेचने'। पुण्यनामानि॥ २३-४॥

[1] प्रलयते, 'ली द्रवीकरणे' B_1. [2] 'क्लृप क्लृप्तौ' A, B_1, T, W_1. [3] अस्मिन् W_2. [4] °विपर्यायः A, W_2. [5] A adds विस्तार्यते. [6] वृज्यते A. [7] अधो गमयति B_2. [8] 'अघि लघि गतौ' U. [9] D_1 adds 'इण् गतौ'. [10] दुष्क्रियत्वात् W_1. [11] D_1, I, W_1 add 'धृ धारणे'. [12] श्रयते K_1. [13] सु K_1.

(पा.) संवर्तः प्रलयः। मन्वन्तरान्ते जातावान्तरप्रलयनामनी॥ कल्पः—इत्यपि। महाप्रलयनामानि॥ 'महाप्रलयकल्पान्तौ युगान्तो भूतसंप्लवः' इति वैजयन्ती (पृ. २४, श्लो. ९४)॥ अस्त्री—दुष्कृतम्। पापनामानि॥ स्याद् धर्म—वृषः। पुण्यनामानि॥२३-४॥

मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः।
स्यादानन्दथुरानन्दः शर्मसातसुखानि च॥ २५॥

(वि.) मुदिति—[1]मोदयतीति मुत्। [2]प्रमोदश्च। आमोदश्च। 'मुद हर्षे'। प्रीणातीति प्रीतिः। 'प्रीञ् [3]तर्पणे कान्तौ च'। [4]प्रमदयति हर्षयतीति प्रमदः। 'मदी[5] हर्षे'। हृष्यतेऽनेनेति हर्षः। 'हृष तुष्टौ'। आनन्दयतीति आनन्दथुः। आनन्दश्च। 'टुनदि समृद्धौ'। शृणाति दुःखमिति शर्म। 'शॄ हिंसायाम्'। स्यति दुःखं सातम्। 'षोऽन्तकर्मणि'। श्यति दुःखं शातमिति वा पाठः। 'शो तनूकरणे'। शातिर्वा। [6]शाम्यति दुःखमनेनेति शान्तम्। 'शमु [7]उपशमे'। अयमपि पाठः। शोभनानि खानि इन्द्रियाणि [8]अस्मिन्निति सुखम्। संतोषनामानि॥ २५॥

[1] K_3 omits 3 lines. [2] मोदश्च B_1, K_5, W_2, Y. [3] प्रीणने I, K_1. [4] प्रकर्षेण मदयति D_1. [5] 'मदी हर्षग्लपनयोः' K_5. [6] शान्तमिति पाठे I. [7] उपरमे W_2, Y; उपशमने K_5, W_1. [8] अनेन T.

(पा.) मुत् प्रीतिः—सुखानि च। शर्मसाहचर्यात् शातम्। 'शितं[1] शातं च निशिते कृशे शान्तं च शर्मणि' इति विश्वप्रकाशिका (पृ. ५७, श्लो. ९)। सुखसाहचर्यात् [2]सातम्। 'सूतिः साततता[3] तु सा' इति देवीशतकम्। एतानि सुखनामानि॥ २५॥

[1] निशिते शितं कृशे शातं A_1. [2] B_3 adds च. [3] सूतिस्ततो (श्लो० ९३).

श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥ २६ ॥
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ।

(वि.) श्वःश्रेयसमिति—श्वः आगामि श्रेयोऽत्र श्वःश्रेयसम् । [1]अरिष्टं शिनोति तनूकरोतीति शिवम् । 'शिञ् [2]निशाने' । भन्दते [3]भद्रम् । 'भदि कल्याणे' । कल्यं नीरुजत्वमणति कल्याणम् । 'अण [4]शब्दे' । [5]मङ्गति सुखं लातीति मङ्गलम् । 'मगि गतौ' । 'ला दाने' । शोभते शुभम् । [6]'शुभ दीप्तौ' । भवतीति भावुकम्[7] । प्रशस्तो भवोऽत्र भविकम् । भवनार्हं [8]भव्यम् । कुत्सितं श्यतीति कुशलम् । कुशान् लातीति[9] वा । 'शो तनूकरणे' । क्षिणोति [10]क्लेशमिति क्षेमम् । 'क्षिणु हिंसायाम्' । शस्यते स्मेति[11] शस्तम् । 'शंसु स्तुतौ' । शुभनामानि ॥ पापपुण्यसुखादिशब्दाः द्रव्ये गुणिनि त्रिषु वर्तन्ते ॥ २६ ॥

[1] अनिष्टं A. [2] निशातने A, B_1, T, W_1. [3] भं बन्धं दत्ते B_1. [4] गतौ A, B_1, T. [5] मङ्गं A, B_1, T; मङ्गतीति मङ्गं D_1. [6] 'शुभ शुम्भ शोभने' I, U, W_1. [7] D_1 adds 'भू सत्तायाम्'. [8] भवितुं योग्यम् B_2. [9] 'ला आदाने' D_1. [10] अशुभं W_1. [11] अस्मिन् K_1.

(पा.) श्वःश्रेयसं—भव्यम् । शुभनामानि ॥ कुशलं—शस्तं च । क्षेमनामानि ॥ अथ—सुखादि च । पापपुण्यशब्दाः सुखादिशब्दाश्च द्रव्ये त्रिलिङ्गा भवन्ति । 'पापा ऋतुमती कन्या पापो राजाप्यरक्षकः' । पापग्रहणमर्थपरमिति[1] कतिचित् कथयन्ति । दुष्कृतोऽयं व्यापारः । कल्मषोऽयममेध्याहारः[2] । पुण्यं तीर्थमिदम् । पुण्या नदी । पुण्योऽयमाश्रमः । 'सुखं कामिकुलं द्रव्यात् सुखो वासः सहाम्बया' । सुखादयः स्वार्थप्रधानाश्चेन्निजलिङ्गा एव । दारिद्र्येऽपि धनित्वेऽपि वशः परिजनः सुखम् ॥ २६ ॥

[1] °प्रधानं A_1. [2] °आहरः A_1.

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ॥ २७ ॥
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ।
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥ २८ ॥

(वि.) मतल्लिकेति—मतल्लिका, मचर्चिका, प्रकाण्डम् अस्त्री, उद्धः, तल्लजः, अमूनि प्रशस्तवाचकानि[1] । अश्वमतल्लिका प्रशस्ताश्व इत्यर्थः[2] । प्रशस्तः पुरुषः पुरुष-

तल्लजः । शुभमेत्यनेन [3]अयः । शुभावहविधिनाम ।। देवस्येदं दैवम् । शुभाशुभं दिशतीति दिष्टम् । 'दिश अतिसर्जने'। [4]भगस्य ऐश्वर्यस्येदं भागम् । भागमेव भागधेयम् । भजनीयं [5]भाग्यम् । 'भज सेवायाम्'। नियम्यतेऽनया पुरुष इति नियतिः । [6]'यम उपरमे'। विधीयते प्रेर्यतेऽनेन विधिः[7]। अयं पुमान् । [8]शुभाशुभफलनिमित्तदैवनामानि[9] ।। २७–८ ।।

[1] निरस्तावयवान्येतानि W_1. [2] ब्राह्मणमचर्चिका प्रशस्तो ब्राह्मणः । गोप्रकाण्डं प्रशस्ता गौः B_1, K_5, W_2, Y; गजोद्धः प्रशस्तो गज इत्यर्थः । पुरुषतल्लज इति नित्यसमासः W_1; कुमारीतल्लजः प्रशस्ता कुमारीत्यादि W_2. [3] I, W_1 add 'इण् गतौ'. [4] भजति ऐश्वर्यमनेन भगं B_1, K_5, Y. [5] भागोऽत्रास्तीति वा B_1, K_5, U, Y. [6] 'यम उपशमने D_1. [7] D_1, I add 'डुधाञ् धारणपोषणयोः' [8] °फलप्रद° B_2. [9] °देवनिमित्तानां W_2.

(पा.) मतल्लिका—अमूनि । मतल्लिकादीनि पदानि प्रशस्तवाचकानि[1] भवन्ति । यस्य कस्यचिद्विशेषणानि सन्त्यपि आविष्टलिङ्गान्येव । अश्वो मतल्लिका अश्वमतल्लिका । प्रशस्ताश्व इत्यर्थः । गोप्रकाण्डम् । पुरुषतल्लजः । प्रशस्तपुरुष इत्यर्थः । पुरुषमतल्लिका इत्यादि । प्रकाण्डमस्त्री । 'प्रकाण्डोऽस्त्री पुमानुद्धः' इति [2]त्रिकाण्डशेषः ।। अयः—विधिः । शुभावहदैवम् अय इत्युच्यते[3] ।। दैवं—विधिः । दैवनामानि ।। 'भविष्यं भवितव्यं च'। एते च । भागधेयशब्दव्युत्पत्त्या भागशब्दसिद्धिः ।। २७–८ ।।

[1] °नामानि B_3. [2] मुद्रितग्रन्थे न दृश्यते. [3] A_1 adds तद्विपरीतः अनयः । तदुभयात्मकोऽयं नयः.

हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् ।
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ।। २९ ।।

(वि.) हेतुरिति—हिनोति वर्धते[1] हेतुः[2] । 'हि गतौ वृद्धौ च'। कार्यतेऽनेन कारणम्[3] । बीज्यतेऽनेन[4] बीजम् । 'बीज रोहणे'। निमित्तनामानि ।। [5]निदीयते निदानम् । 'दाण् दाने'। [6]मूलनिमित्तनाम ।। क्षीयत इति क्षेत्रम् । 'क्षि निवासगत्योः' 'क्षि क्षये' वा धातुः । क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः । 'ज्ञा अवबोधने'। अत्ति स्वकृतं शुभाशुभम्[7] आत्मा । 'अद भक्षणे'। अतति शरीरेषु [8]संवसतीति वा । 'अत सातत्यगमने'। पुरि देहे सीदति[9] तिष्ठतीति पुरुषः । 'षद्लृ विशरणगत्यवसादनेषु'। देहादिकं पिपर्तीति वा । 'पॄ पालनपूरणयोः'। अहंप्रत्ययस्य विषयिणो जीवात्मनो[10] नामानि ।। प्रधत्ते [11]सर्वं प्रधानम्[12] । पृथक् क्रियते [13]आत्मन इति वा । प्रारम्भः[14] क्रियतेऽनया प्रकृतिः । प्रकृतिनाम ।। २९ ।।

[1] B_2 adds अनेनेति. [2] अयं पुंलिङ्गः D_1, I. [3] D_1 adds 'डुकृञ् करणे'. [4] B_1, K_5 add साध्यं प्राप्यते ; विज्यते D_1. [5] नितरां दीयते B_2. [6] एतत्तु मूलकारणनाम D_2, I; आदिकारण° D_1. [7] A adds कर्म. [8] संभवति K_5. [9] शेते वसतीति वा W_1, Y; शरीरे for देहे in B_1. [10] क्षेत्रज्ञस्य D_2. [11] सत्यं A, B_1, T. [12] 'डुधाञ् धारणपोषणयोः' A. [13] आत्मा I, W_1. [14] प्रारम्भाः क्रियन्ते A, B_1, T; B_2, Y add 'डुकृञ् करणे'.

(पा.) हेतुर्ना—बीजम् । कारणनामानि ॥ निदानं त्वादिकारणम् । आदिकारणं निदानं स्यात् ॥ क्षेत्रज्ञः—पुरुषः । आत्मतत्त्वनामानि ॥ प्रधानं—स्त्रियाम् । प्रकृतितत्त्वनामानि ॥ २९ ॥

विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः ।
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ॥ ३० ॥

(वि.) विशेष इति—[1]अविकृतौ तिष्ठतीत्यवस्था । 'ष्ठा गतिनिवृत्तौ' । कालकृतयौवनादिविशेषनाम ॥ सतो भावः सत्त्वम् । प्रकाशज्ञानहेतुः । [2]रागात्मनि दुःखहेतुत्वात् रजः । ताम्यत्यनेन तमः । 'तमु ग्लानौ' । गुणाभिधानप्रकृतिधर्मनामानि ॥ जन्यतेऽनेन जनुः । सान्तोऽयम्[3] । जननं च । जन्म च । जनिश्च[4] । 'जनी प्रादुर्भावे' । [5]उत्पत्स्यते इत्युत्पत्तिः । 'पद्लृ गतौ' । उद्भवतीत्युद्भवः । 'भू सत्तायाम्' । जन्मनामानि ॥ ३० ॥

[1] अवधिकृतौ Y. [2] रागात्मापि B_2. [3] सान्तमिदं पदम् B_2. [4] जनिशब्दः स्त्रीलिङ्गे B_2. [5] उत्पद्यते K_2.

(पा.) विशेषः कालिकोऽवस्था । कालकृतविशेषोऽवस्था स्यात् । बाल्यजरादि ॥ गुणाः—तमः । सत्त्वरजस्तमांसि प्रकृतिगुणा इत्युच्यन्ते ॥ जनुः—उद्भवः । जन्मनामानि ॥ जनिशब्दोऽर्धर्चादिपाठादुत्पत्तिलिङ्गभागुद्भवलिङ्गभाक् च भवति । उभयत्रोदाहरणम्—

'कर्त्रादिना जनिरियं च न युक्तरूपा' ।
'तस्या वा जनिरस्तु मातरवमा जीवस्य मा जीवतो
भूयाद्वा जननिः किमम्ब जनिना जन्तोर्वृथा जन्मनः' ।

इति । अनुक्तम्—'संसारस्त्वाजवं जवः (?)' । संसारनामानि ॥ ३० ॥

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ।
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ॥ ३१ ॥
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥

इति कालवर्गः

(वि.) प्राणीति—प्राणोऽस्यास्तीति प्राणी । चेततीति चेतनः । 'चिती संज्ञाने' । जन्मास्यास्तीति जन्मी । जायते जन्तुः । जन्युश्च । 'जनी प्रादुर्भावे' । शरीरमस्यास्तीति शरीरी । प्राणिनामानि ॥ जायते जातिः । जातं च । 'जनी प्रादुर्भावे' । समानस्य भावः सामान्यम् । जातिनामानि ॥ व्यज्यत इति व्यक्तिः । पृथगात्मनो भावः पृथगात्मता । व्यक्तिनामनी ॥ चेतयतेऽनेन चित्तम् । चेतश्च । 'चिती संज्ञाने' । 'चिच्चिन्तायाम्' । [1]विषयैः ह्रियते हृदयम् । [2]हृच्च । 'हृञ् हरणे' । [3]शोभनोऽन्तो यस्य स्वान्तम् । स्वनतीति वा स्वान्तम् । 'स्वन शब्दे' । मन एव मानसम् । [4]मन्यतेऽनेन मनः । 'मन ज्ञाने' । मनोनामानि ॥ ३१ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ कालवर्गः

[1] विषयेषु K_2. [2] विषयैः ह्रियते हृत् Y. [3] शोभनमन्तं K_1, K_2, K_3, W_1.
[4] मन्यते मनः A, B_1, T.

(पा.) प्राणी—शरीरिणः । प्राणिनामानि ॥ जातिः—सामान्यम् । जातिनामानि ॥ व्यक्तिस्तु पृथगात्मता । व्यक्तिनामनी ॥ चित्तं—मनः । अन्तःकरणनामानि ॥ 'स्वान्तमास्वनितं चित्तं चेतोऽन्तःकरणं मनः' इति धनंजयः ॥ ३१ ॥

इति श्रीवत्स[1]नृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते कालवर्गः

[1] नरसिंह° A_1.

---

५. धीवर्गः

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतना: ॥ १ ॥

धीर्धारणावती मेधा संकल्पः कर्म मानसम् ।
(अवधानं समाधानं प्रणिधानं तथैव च ।)

(वि.) बुद्धिरिति—बुध्यतेऽनया बुद्धिः । 'बुध अवगमने' । मन्यते मनीषा । 'मन ज्ञाने' । [1]मनस ईषावत् लाङ्गलदण्डवत् संबन्धाद्वा । धृष्णोतीति धिषणा । 'ञिधृषा प्रागल्भ्ये' । ध्यायतेऽनया धीः । 'ध्यै चिन्तायाम्' । प्रज्ञायतेऽनया प्रज्ञा । 'ज्ञा अवबोधने' । शेयं मोहं मुष्णातीति शेमुषी । 'मुष स्तेये' । मन्यतेऽनयेति[2] मतिः । 'मन ज्ञाने' । [3]प्रेक्षते यया प्रेक्षा । 'ईक्ष दर्शने' । उपलभ्यतेऽनयेति[4] उपलब्धिः । 'डुलभष् प्राप्तौ' । चेतन्त्यनयेति [5]चित् । 'चिती संज्ञाने' । अनया सम्यग्वेत्तीति संवित् । 'विद ज्ञाने' । प्रतिपद्यतेऽनया प्रतिपत् । 'पद्लृ गतौ' । ज्ञायतेऽनया ज्ञप्तिः । 'ज्ञा अवबोधने' । चेतयतेऽनया चेतना । बुद्धिनामानि ॥ मेधते सर्वमनुभूतमस्यामिति मेधा । 'मेधृ संगमे' । [6]स्मृतिमद्बुद्धिनाम ॥ सम्यक् [7]क्लृप्यतेऽनेनेति [8]संकल्पः । '[9]कृपू सामर्थ्ये' । मानसव्यापारनाम ॥ १ ॥

[1] मनसः ईषा D_2, K_1, K_2. [2] A, B_1, T omit अनया. [3] प्रेक्ष्यते B_1, W_2. [4] यया B_2, D_2, I, K_1, K_2, W_1. [5] चेतयते यया B_2, D_2, K_1, Y. [6] अतिबुद्धिनाम B_1, W_2. [7] कल्प्यते D_1, D_2, W_2; कल्पते A, B_1, T. [8] इदमहं कुर्यामिति मनसो व्यापार: संकल्प: D_1. [9] 'क्लृप कल्तौ' A, T, W_1.

(पा.) बुद्धिर्मनीषा—शेमुषी । तालव्यादिः । मतिः—चेतनाः । बुद्धिनामानि । 'प्रतिभोपलभा पण्डा' । एतानि च ॥ धीः—मेधा । धारणगुणयुक्ता धीर्मेधा स्यात् ।

'षोढा धीस्तत्त्वधीः पण्डा मेधा धीर्धारणक्षमा ।
ऊहापोहक्षमा चार्वी गृहीतिर्ग्रहणक्षमा ॥
शुश्रूषा बहुला श्रौती श्रवणज्ञा तु चत्वरी ॥'

इति षड्विधबुद्धीनां मध्ये एका ॥ संकल्पः कर्म मानसम् । मानसव्यापारः संकल्पः ॥ १ ॥

चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा ॥ २ ॥
(विमर्शो भावना चैव वासना च निगद्यते ।)
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ।
संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥ ३ ॥

(वि.) चित्ताभोग इति—चित्तस्य आभोगः [1]परिपूर्णता चित्ताभोगः । मनसि करोतीति मनस्कारः । मनःपरिपूर्णतानाम ॥ चर्च्यतेऽनया चर्चा । 'चर्च अध्ययने' । [2]संख्यायतेऽनयेति संख्या । 'ख्या प्रकथने' । विचार्यतेऽनया विचारणा[3] । परामर्शनामानि ॥ अध्याहरतीति अध्याहारः । 'हृञ् हरणे' । [4]तरन्त्यनेन संशयविपर्ययाविति तर्कः । 'तॄ प्लवनतरणयोः' । ऊह्यते अनेनेति ऊहः । 'ऊह वितर्के' । युक्तिप्रज्ञानामानि ॥ विचिकित्सतीति[5] विचिकित्सा । 'कित निवासे रोगापनयने च' । [6]उभयकोटौ संशेते इति संशयः । 'शीङ् स्वप्ने' । संदेग्धि[7] सम्यक् बध्नातीति संदेहः । 'दिह उपचये' । स्थाणुर्वा पुरुषो वेति द्वौ पक्षौ परौ [8]प्रधानभूतावस्मिन्निति द्वापरः । संदेहनामानि ॥ पुरुषसंदेहाभावं[9] नितरां [10]नयतीति निर्णयः । 'णीञ् प्रापणे' । निश्चिनोतीति निश्चयः । 'चिञ् चयने' । [11]इदमित्थमिति बुद्धिनामनी ॥ २–३ ॥

[1] °पूरणता K_2. [2] सम्यक् ख्यायते B_2. [3] Y adds 'विचिर् पृथग्भावे'. [4] तरति K_1, K_2, W_1. [5] विविधं स्थापयितुमिच्छति B_2. [6] उभयोः रूपयोः B_1. [7] संदिग्धे W_2. [8] प्रसक्तौ B_2. [9] °संदेहभावं K_1. [10] निर्णयति A. [11] निश्चितबुद्धिनामानि B_1.

(पा.) चित्ताभोगो मनस्कारः । चित्ताभोगश्चित्तयत्नः । 'आभोगो यत्नपूर्णता' इति वैजयन्ती (पृ. २३९, श्लो. ७) । स मनस्कारः स्यात् । तं मनस्कारं मनसि कारमित्युभयथा [1]कथयन्ति ॥ चर्चा—विचारणा । मीमांसानामानि ॥ 'मीमांसा स्याद् विचारणा' इति हलायुधः (अ. मा. १. १०) ॥ अध्याहारः—ऊहः । [2]तर्कनामानि ॥ विचिकित्सा—द्वापरौ च । संशयनामानि । 'वितर्को विशयः शङ्का' । एतानि च ॥ अथ—निश्चयौ । निश्चयनामनी ॥ 'निर्धारणा परिच्छित्तिः' । एते च ॥ २–३ ॥

[1] वदन्ति B_3. [2] तर्कस्य A_4.

मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ ४ ॥

(वि.) मिथ्येति—मिथ्या चासौ दृष्टिश्च मिथ्यादृष्टिः । नास्ति परलोक इति मतिर्यस्य सः नास्तिकः । तस्य भावो नास्तिकता । परलोकाभावबुद्धिनामनी ॥ व्यापाद्यतेऽनेनेति [1]व्यापादः । 'पद गतौ' । द्रोहस्य चिन्तनं द्रोहचिन्तनम् । जिघांसाचिन्तानामनी ॥ सिद्धः अन्तो निश्चयोऽत्र सिद्धान्तः । राद्धः[2] अन्तो [3]यस्य राद्धान्त.[4] । निर्णयविशेषनामनी ॥ भ्राम्यतेऽनयेति भ्रान्तिः । भ्रमश्च । 'भ्रमु चलने' । 'भ्रमु अनवस्थाने' इति वा धातुः । मिथ्या चासौ मतिश्च मिथ्यामतिः । [5]अतस्मिन् तद्बुद्धिनामानि ॥ ४ ॥

[1] विशेषेण आपद् क्रियतेऽस्मिन्निति B_2. [2] W_1 adds सिद्धः. [3] K_3 adds निश्चयः. [4] B_2 adds 'राध संसिद्धौ'. [5] भ्रमनामानि B_2; °तदिति बुद्धि° W_2.

(पा.) मिथ्यादृष्टिर्नास्तिकता। नास्तिक्यनामनी ॥ व्यापादो द्रोहचिन्तनम्। [1]द्रोहचिन्तानाम ॥ समौ—राद्धान्तौ। स्थिरपक्षनामनी ॥ भ्रान्तिः—भ्रमः। [2]अयथार्थ-ज्ञाननामानि ॥ 'संकेतस्तु समयः'। देवदत्तडित्थादिव्यवहारनामनी। 'अथाप्रतिपत्ति-र्विहस्तता'। इतिकर्तव्यतावैकल्यनामनी।

'स्नाता तिष्ठति मण्डलाधिपसुता वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य[3] च।
इत्यन्तःपुरसुन्दरीपरिजनैर्विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थिता नाडिकाः ॥' *

इति ॥ ४ ॥

[1] व्यापाद इत्युच्यते A_1. [2] रज्जौ सर्पग्रहः, सर्पे रज्जुबुद्धिः इत्यादिनाम A_1. [3] अधुना B_3.

* Quoted in *alaṃkāra* works with कुन्तलेश्वर for मण्डलाधिप.

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

(वि.) संविदिति—संविद्यतेऽनया संवित्। 'विद ज्ञाने'। [1]आगमनं संवेदनम् आगूः। ऊकारान्तः। आगुरते वा आगूः। 'गुरी उद्यमने'। रेफान्तः स्त्रीलिङ्गः। प्रतिज्ञायतेऽनेन [2]प्रतिज्ञानम्। नियम्यते [3]नियमः। 'यम उपरमे'। [4]आशृणोतीत्याश्रवः। [5]संश्रवश्च। प्रतिश्रवश्च। 'श्रु श्रवणे'। [6]अङ्गीकरणमङ्गीकारः। अभ्युपगमनम् [7]अभ्युपगमः। समाधीयते [8]समाधिः। 'डुधाञ् धारणपोषणयोः'। संप्रतिपत्ति-नामानि[9] ॥ ५ ॥

[1] आगमं A, B_1, T; आगतं D_1; प्रतिज्ञानिर्वर्तनपर्यन्तं या क्रिया B_2. [2] यस्मिन् प्रतिजानाति तत् B_2; W_1 adds 'ज्ञा अवबोधने'. [3] यस्मिन् नितरां यम्यतेऽनेन इतरव्यापार इति B_2. [4] B_2 adds समन्तात्. [5] संशृणोतीति Y. [6] अङ्गीकरोति यस्मिन् विषये, 'डुकृञ् करणे' B_2. [7] यस्मिन् विषयेऽभ्युपगम्यते सः, 'गम्लृ गतौ', प्रति-शृणोतीति प्रतिश्रवः, धातुः पूर्ववत् B_2. [8] यस्मिन् तत्रत्यधर्मः B_2. [9] संमति° B_2.

(पा.) संविदागूः । आगूरिति [1]पक्षे रेफान्तस्त्रीलिङ्गः, ऊकारान्तो वा ।। प्रतिज्ञानम् । पुनर्ज्ञाननामानि ।। नियम—समाधयः । अङ्गीकारनामानि ।। ५ ।।

[1] A_1 adds अत्र संवित् आगूः संविदागूरिति विकल्पयन्ति.

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ।। ६ ।।
मोक्षेऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् ।

(वि.) मोक्ष इति—ज्ञायतेऽनेन ज्ञानम् । 'ज्ञा अवबोधने' । मोक्षबुद्धिनाम ।। [1]विरूपं ज्ञानं विज्ञानम् । [2]शिल्पशास्त्रादिबुद्धिनाम ।। आत्मनः पाशाभ्यां [3]मुक्तत्वं मुक्तिः । आत्मानं [4]पाशेभ्यो मोचयतीति वा । 'मुच्लृ मोक्षणे' । केवलावस्था[5] कैवल्यम् । निर्वाति [6]निष्प्रपञ्चं गच्छत्यस्मिन्निति निर्वाणम् । निर्वान्ति सर्वाणि कर्माणि अत्रेति वा । 'वा गतिगन्धनयोः' । अतिशयेन प्रशस्यं [7]श्रेयः । निश्चितं श्रेयोऽत्र निश्रेयसम् । नास्ति मृतं मरणमस्मिन्निति अमृतम् । आत्मानं पाशेभ्यो मोचयतीति मोक्षः । [8]मोक्षते वा अस्मान् मोक्षः । 'मोक्ष निरसने' । पाशेभ्योऽपवर्जनम्[9] अपवर्गः । 'वृजी वर्जने' । मोक्ष-नामानि ।। विरुद्धं ज्ञानम्[10] अज्ञानम् । विरुद्धा[11] विद्या अविद्या । अहमित्यव्ययम् । अहमिति मतिः अहंमतिः । अनात्मनि देहादावहंबुद्धिनामानि[12] ।। ६ ।।

[1] विज्ञायतेऽनेन D_2, I, K_1, W_1; विशेषेण ज्ञायते B_2, Y. [2] शिल्पि° A, D_1. [3] मोचनं W_1. [4] पापेभ्यो D_1, I. [5] केवलावस्थायाः यो भावः B_2. [6] निःस्पृहो यो गच्छति W_2. [7] प्रशस्यतेतरां W_2, Y. [8] मोक्ष्यतेऽस्मिन् B_1, K_5. [9] अपवर्ज्यते B_2, I, K_5; °वर्जितः A, B_1, D_1. [10] W_2 adds अस्मिन्निति. [11] विरुध्यतेऽनया B_1. [12] अहमिति Y.

(पा.) मोक्षे धीर्ज्ञानम् । मोक्षविषया धीः बुद्धिर्ज्ञानं स्यात् ।। अन्यत्र—शास्त्रयोः । तदतिरिक्तकलाशास्त्रविषया[1] बुद्धिर्विज्ञानं स्यात् ।। मुक्तिः—अपवर्गः । मोक्षनामानि ।। अथाज्ञानम्—स्त्रियाम् । विषयेन्द्रियादौ आत्मबुद्धिनामानि ।। ६ ।।

[1] °कलाविषया A_1.

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ।। ७ ।।
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ।। ८ ।।

(वि.) रूपमिति—रूप्यते चक्षुषा निरूप्यते रूपम् । 'रूप [1]रूपक्रियायाम्' । [2]शपं ददातीति शब्दः । 'शप आक्रोशे' । गं गमनं धयतीति गन्धः । 'धेट् पाने' । गन्ध्यतेऽनेनेति वा । 'गन्ध अर्दने' । [3]रस्यतेऽनेनेति रसः । 'रस आस्वादने' । स्पृश्यते स्पर्शः । 'स्पृश संस्पर्शने' । अमी पञ्च विषयगोचरेन्द्रियार्थनामानो भवन्ति ॥ [4]विसिन्वन्ति बध्नन्ति स्वानुभवाय पुरुषं विषयाः । 'षिञ् बन्धने' । गावः इन्द्रियाणि चरन्त्यत्र गोचराः । 'चर गतिभक्षणयोः' । [5]इन्द्रियैरर्थ्यन्त इति इन्द्रियार्थाः । 'अर्थ उपयाच्ञायाम्' । हृष्यतीति हृषीकम् । 'हृष तुष्टौ' । विषयोऽस्यास्तीति विषयि । [6]इन्द्रस्य आत्मनो लिङ्गम् इन्द्रियम् । इन्द्रियनामानि ॥ कर्मणः साधनम् इन्द्रियं कर्मेन्द्रियम् । पायुवाक्पाणिपादोपस्थनामानि ॥ धियः साधनमिन्द्रियं धीन्द्रियम्[7] । [8]नेत्रघ्राणरसनत्वक्श्रोत्रपञ्चकस्य नामानि ॥ मनस्तूभयात्मकम् ॥ ७–८ ॥

[1] निरूपणे K_2, Y. [2] शं सुखं पातीति शप्, तं A; शपं सुखकारणं श्रवणादिकं ददातीति शब्दः B_2; D_1, I add 'दा दाने'. [3] °रसोऽनेन D_2, I. [4] विषिण्वन्ति D_2, I, T, W_2. [5] K_2 adds यन्ति. [6] W_1 adds तनोः. [7] मनोनेत्रादि W_2. [8] °रसना° Y.

(पा.) रूपं—इन्द्रियार्थाश्च । [1]रूपादीनां पञ्चानां नामानि ॥ हृषीकं—इन्द्रियम् । इन्द्रियसामान्यनामानि । पूर्वापरसाहचर्याद् विषयिशब्दो नपुंसकः ।

'विषयी राज्ञि कन्दर्पे विषयस्थजने च[2] ना ।
अर्थवद्विषयोपेत इन्द्रिये तु नपुंसकम् ॥'

इति वैजयन्ती (पृ. २६३, श्लो. ७५-६) ॥ कर्मेन्द्रियं—धीन्द्रियम् । पायूपस्थपाणिपादवाचः[3] पञ्च कर्मेन्द्रियाणि । [4]नेत्रश्रोत्रजिह्वाघ्राणत्वचः पञ्च बुद्धीन्द्रियाणि । काकाक्षिन्यायान्मनः कर्मेन्द्रिय बुद्धीन्द्रियं च भवति ॥ ७–८ ॥

[1] रूपादयः पञ्च विषयशब्दवाच्याः A_1. [2] अपि वा A_1, B_4. [3] वाचाः A_1. [4] चक्षुः° B_3.

तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः ।
तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥ ९ ॥

(वि.) तुवर इति—[1]तौति [2]हृदयमिति तुवरः । 'तु गतिवृद्धिहिंसासु[3]' । कषति पित्तमिति कषायः । 'कष हिंसायाम्' । खदिरादिरसनामनी[4] ॥ मधु माधुर्यम् अस्यास्तीति [5]मधुरः । इक्ष्वादिरसनाम ॥ लुनाति [6]वातं लवणः । 'लूञ् छेदने' । सैन्धवादिरसनाम ॥

कटति क्रिमिविषादि गच्छत्यनेन कटुः। 'कटी गतौ'। शुण्ठ्यादिरसनाम ॥ [7]श्लेष्माणं तेजयतीति तिक्तः। 'तिज [8]निशाने'। निम्बादिरसनाम ॥ वातममति रुजतीत्यम्लः। अम्ल इति वा पाठः। 'अम रोगे'। अम्बते [9]मुखशब्दहेतुर्भवतीति अम्बलः। 'अबि शब्दे'। जम्बीरादिरसनाम ॥ अमी षड् गुणेषु पुंसि, तद्वत्सु[10] विशेष्येषु त्रिषु वर्तन्ते ॥ ९ ॥

[1] तवीति A. [2] रसनेन्द्रियं U. [3] 'तु वृद्धिहिंसयोः' A, B_1, T. [4] U, W_2 add °जन्य°. [5] मश्नाति वातं A, B_1. [6] पातुं B_1. [7] श्लेष्मादि B_1. [8] निशातने I, K_1, Y. [9] तद्धक्षणेन वाताधिक्यवशात् आक्रोशादिशब्दं करोतीति बाहटशास्त्रप्रसिद्धिः B_2. [10] W_2 adds गुणिषु.

(पा.) तुवरस्तु—रसाः। अत्राद्ये द्वे अपक्वदाडिमादिरसनामनी। 'वोगरुपेरु'॥ मधुर इक्ष्वादिरसनाम। 'तीपिपेरु'॥ लवणः सैन्धवादिरसनाम। 'उप्पुपेरु'॥ कटुः शुण्ठ्यादिरसनाम। 'कारमुपेरु'॥ तिक्तो निम्बादिरसनाम। 'चेंदुपेरु'॥ आम्लः। अम्ब्ल इति वा पाठः। [1]जम्बीरादिरसनाम। 'पुलुसु'॥ एते रसशब्दवाच्याः पुंसि ॥ तद्वत्सु षडमी त्रिषु। षडमी इत्यनेन कषायशब्दं विना रसवत्सु त्रिलिङ्गाः। तुवरा हरीतकी। मधुरं क्षीरम्। इत्यादि ॥ ९ ॥

[1] चिञ्चादि° B_3, B_4.

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमा गुणात् ॥ १० ॥

(वि.) विमर्दोत्थ इति—सुरभिमाल्यगन्धादिसंमर्दादुत्पन्ने[1] जनमनोहरे गन्धे परिमलः स्यात्। [2]परिमलत इति परिमलः। 'मल मल्ल धारणे'। आ समन्तात् [3]मोदयतीत्यामोदः। 'मुद हर्षे'। दूरव्यापि[4]मनोहारिपरिमलनाम ॥ वाच्यलिङ्गत्वमा गुणात्। गुणवाचिशुक्लशब्दपर्यन्तं वाच्यलिङ्गता [5]भवति ॥ १० ॥

[1] °उल्बणे W_2. [2] परितः मलत इति B_2. [3] मोदतेऽनेन A, B_1, T. [4] °मनोहर° D_1, W_2. [5] स्यात् D_2.

(पा.) विमर्दोत्थे—जनमनोहरे। माल्यसंमर्दोत्पन्नमनोज्ञगन्धनाम[1] ॥ आमोदः सोऽतिनिर्हारी। [2]दूरव्यापिपरिमलनाम ॥ 'आमोदो वापि पद्मस्य'॥ वाच्यलिङ्गत्वमा गुणात्। गुणवचनशुक्लशब्दावधि इतः परं वक्ष्यमाणाः शब्दा वाच्यलिङ्गा भवन्ति ॥ १० ॥

[1] गन्धे च परिमलशब्दो वर्तते । परिमलो मलयजस्य A_1. [2] A_1 adds अतिनिर्हारी गन्ध आमोदः स्यात्.

समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥ ११ ॥
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत् ।

(वि.) समाकर्षीति—[1]समाकर्षति चित्तमाकर्षतीति समाकर्षी । 'कृष विलेखने'। निर्हरति आकर्षत्यवश्यं चित्तमिति निर्हारी[2] । सम्यगाकर्षणशीलकर्पूरादि-गन्धद्रव्यनाम ॥ [3]तर्पयितुं सुष्ठु रभते आरभते सुरभिः । 'रभ राभस्ये'। [4]घ्राणतर्पण-गन्धद्रव्यनाम ॥ शोभनो गन्धो यस्य सुगन्धिः । अपेक्षितगन्धवद्वस्तुनाम ॥ आमोदो-ऽत्रास्तीति आमोदी । मुखं वासयतीति मुखवासनः । मुखवासनयोग्ययक्षकर्दमादेर्नाम[5] ॥ दुर्गन्धोऽस्यास्तीति दुर्गन्धिः । [6]पूतिगन्धोऽस्यास्तीति पूतिगन्धिः । दुर्गन्ध इति वा पाठः । दुष्टगन्धिनामानि ॥ विस्यति[7] विस्रम् । 'विस उत्सर्गे'। आमगन्धिनो नाम ॥ ११ ॥

[1] समाकर्षुं शीलमस्य B_2. [2] 'हृञ् हरणे' D_1. [3] कर्षयितुं K_1, W_2. [4] घ्राणं घ्राणेन्द्रियं तर्पयतीति घ्राणतर्पणः । इष्टो गन्धो यस्य सः इष्टगन्धः B_2. [5] °कर्पूरादि-द्रव्यजनितगुलिकादिनाम B_2. [6] पूतिः गन्धः U. [7] उत्सृजति B_4.

(पा.) समाकर्षी—तर्पणः । [1]गन्धद्रव्यनामानि ॥ सुरभ्यादयो गन्धविशेष-वाचकाश्च भवन्ति । यथा—

'नो जिघ्रासति चम्पकेषु सुरभिं नो चन्दने चन्द्रिकां
नोशीरे मुखवासनं हिमरुचौ नो वासनं पङ्कजे ।
नो वा गन्धिकमुत्पले विचकिले नो लिप्सते मङ्गलं
दायं दायमपावृणोति हि शक्रद्विस्रार्थिनी मक्षिका ॥'

इति ॥ इष्टगन्धः—मुखवासनः । अभिलषितगन्धवन्नामानि । 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (५. ४. १३५) इत्येकवचनग्रहणात् शोभना गन्धा अस्य सुगन्धो वायुरिति भवति ॥ पूतिगन्धस्तु दुर्गन्धः । यद्दुष्टगन्धवत् तन्नामनी । दुर्गन्धि इति तु लघुवाच्यधर्मः । [2]तथा च शृङ्गारप्रकाशिका (पृ. ३१०-११) 'द्विविधो वाच्यधर्मः । लघुर्गुरुश्चेति । तत्र बहुव्रीहिणा लघुः । कर्मधारयान्मत्वर्थीयेन गुरुः । तयोरादिमो[3] यथा—

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
[4]स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

इति (मेघ. १. १)। अन्तिमो यथा—

आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः
[4]संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥

इति (मेघ. १. ११)। विस्रं स्यादामगन्धि यत्। यन्मत्स्यादिगन्धवत्तन्नाम[5]॥ ११॥

[1] यो गन्धो घ्राणतर्पणं करोति तन्नामानि A_1. [2] अस्मिन्नर्थे A_1. [3] आद्यो B_3.
[4] Pāda omitted in B_3. [5] A_1 adds °सदृशगन्ध°.

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः॥ १२॥
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः॥ १३॥

(वि.) शुक्लेति—शोकति गच्छति मनोऽस्मिन्निति शुक्लः। 'शुक गतौ'। शुक्रेति वा पाठः। शोभत इति शुभ्रः। 'शुभ[1] दीप्तौ'। शोचति [2]शुच्यतीति वा शुचिः। 'शुच शोके'। धातूनामनेकार्थत्वात्[3]। श्वेतते श्वेतः। 'श्विता वर्णे'। श्वयति मनोऽस्मिन्निति वा। 'टुओश्वि गतिवृद्ध्योः'। चित्तं [4]विशतीति विशदः। 'विश प्रवेशने'। श्यायते जनमनांसि गच्छतीति श्येतः। 'श्यैङ् गतौ'। पण्यते स्तूयते पाण्डरः। 'पण व्यवहारे स्तुतौ च'। पण्डते मनोऽस्मिन्निति वा। 'पडि गतौ'। पाण्डुः। पाण्डुरश्च। अवदायते अवदातः। 'दैप् शोधने'। सिनोतीति मनः सितः। 'षिञ् बन्धने'। गुरते मनोऽस्मिन् [5]उद्युङ्क्ते गौरः। 'गुरी उद्यमने'। अवलक्ष्यत इति [6]वलक्षः। 'लक्ष दर्शनाङ्कनयोः'। बलति प्राणित्यनेन[7] बलम्। 'बल प्राणने'। बले रक्षो वा [8]वलक्षः। रेफलोपः। धूयते मलोऽत्रेति धवलः। 'धूञ् कम्पने'। अर्ज्यते सर्वैरित्यर्जुनः। 'अर्ज सर्ज अर्जने'। मनो हरतीति हरिणः। 'हृञ् हरणे'। एतानि क्षीरशङ्खादिसवर्णनामानि॥ धुनोति कुरूपतया चित्तं [9]धूसरः। 'धूञ् कम्पने'। अव्यक्तधवलनाम॥ १२–१३॥

[1] 'शुभ शोभने' I, Y. [2] शुध्यति B_1, D_2. [3] B_2 adds एवं व्याख्यातं.
[4] विशदयति W_2; वीनां पक्षिणां शं सुखं ददातीति वा, 'दाण् दाने', विशन्तं प्रवेष्टुकामं दाति खण्डयतीति वा विशदः, 'दोऽवखण्डने', धातूनामनेकार्थत्वात् खण्डनार्थपदस्य क्लेशपरत्वम् B_2.
[5] उद्यमयतीति B_2. [6] वं वरुणं जलं वा लक्षयति द्रव्यत्वेन करोतीति वलक्षः। तस्य गुणत्वात्। गुणाश्रयं द्रव्यमिति हि द्रव्यलक्षणम् B_2. [7] सत्त्वगुणेन, तद्बलं रक्षतीति वा B_2.
[8] वबयोरभेदः A, K_2. [9] यो धूयते च सृज्यते च स धूसरः, ईषत् स्वल्पं पाण्डुः ईषत्पाण्डुः, ईषद्धवलनामानि B_2.

(पा.) शुक्लशुभ्र—पाण्डुः। बलक्ष इति वा। धवलनामानि ॥ ईषत्पाण्डुस्तु धूसरः। [1]किंचिद्धवलनाम ॥ १२–१३ ॥

[1] अल्प° A_1.

कृष्णे नीलासितश्यामकालश्यामलमेचकाः।
पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ॥ १४ ॥

(वि.) कृष्ण इति—[1]कृषति चित्तमाकर्षतीति कृष्णः। 'कृष विलेखने'। नीलवर्णत्वान्नीलः। 'नील वर्णे'। सितादन्योऽसितः। श्यायते श्यामः। 'श्यैङ् गतौ वृद्धौ च'। [2]कलयति प्रेरयतीति कालः। 'कल किल क्षेपे'। [3]श्यामद्रव्यमत्रास्तीति श्यामलः। [4]मचति वर्णान्तरेण मिश्रीभवितुमर्हतीति मेचकः। 'मच [5]मुचि कल्कने'। मयूरकण्ठादिवर्णनाम ॥ पिबति चित्तं पीतः। 'पा पाने'। गुरतीति गौरः। 'गुरी [6]उद्यमे'। [7]हरिद्राया इव आभा यस्य सः हरिद्राभः। हरिद्रादिवर्णनामानि। पलाशवर्णस्यायं [8]पालाशः। हरति मनोऽत्रेति हरितः। हरिच्च। पलाशादिवर्णनामानि ॥ १४ ॥

[1] कर्षति B_2, D_1, K_5, U, W_2. [2] कालयति I, K_5, W_2, Y. [3] श्यामं Y. [4] मेचयति . . मिश्रीभवति B_2, D_1, W_2, Y. [5] 'मच कल शिल्पिसंशयोः' B_2, I, W_2; मच मुचि° Y. [6] उद्यमने I. [7] हरिद्राभा इव आभा B_2, K_5. [8] पलाशस्य वर्णः इव वर्णः पालाशः B_2, U.

(पा.) कृष्णे—मेचकाः। कृष्णवर्णनामानि। 'कल्माषश्च सितेतरः'। एते द्वे च ॥ पीतो—हरिद्राभः। हरिद्रावर्णनामानि ॥ पालाशो—हरित्। पलाशपत्रसदृशवर्णनामानि ॥ १४ ॥

लोहितो रोहितो रक्तः शोणः कोकनदच्छविः।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥ १५ ॥
श्यावः स्यात् कपिशो धूम्रधूमलौ कृष्णलोहिते ।

(वि.) लोहित इति—[1]रोहति प्रादुर्भवति संध्यादौ रोहितः। लोहितश्च। 'रुह बीजजन्मनि प्रादुर्भावे च'। [2]रज्यते रक्तः। 'रञ्ज रागे'। शोणतीति शोणः। 'शोणृ वर्णगत्योः'। कोकनदस्य रक्तोत्पलस्येव [3]छविर्यस्य सः कोकनदच्छविः। [4]रक्तोत्पलवर्णनामानि ॥ आसां द्रव्यादियर्ति शीघ्रं गच्छतीत्यरुणः[5]। 'ऋ गतौ'। अव्यक्त-

रागवर्णनाम। [6]पाटलपुष्पवर्णत्वात् पाटलः। श्वेतमिश्ररक्तवर्णनाम॥ श्यायते आगच्छतीति श्यावः। शावो वा। श्यामश्च[7]। कपिवर्णयोगात् कपिशः[8]। वानरवर्णनाम॥ धूमवर्णं रातीति धूम्रः। 'रा दाने'। [9]धूमलः। 'ला दाने'। [10]कृष्णमिश्रितलोहितवर्णनाम॥ १५॥

[1] रोहयति प्रादुर्भावयति B_1, W_2. [2] B_2 adds रूप्यत इति. [3] छविरिव छविः B_2, D_2; U adds वर्णो. [4] रक्तोत्पलादि° U. [5] अर्णोति शीघ्रं गच्छति, 'ऋणु गतौ B_3. [6] पाटलि° D_2. [7] 'श्यैङ् गतौ' I. [8] कपौ शेते वा। 'शीङ् स्वप्ने' इति धातुः B_2. [9] धूमवर्णं लातीति धूमलः B_2, W_2, Y. [10] °मिश्र° W_1, Y.

(पा.) लोहितो—रक्तः। रक्तवर्णनामानि। 'ताम्रो निरक्तो माञ्जिष्ठः'। एतानि च। शोणः कोकनदच्छविः। रक्तोत्पलच्छवी[1] रक्तवर्णः शोण इत्युच्यते॥ अव्यक्तरागस्त्वरुणः। अव्यक्तरागः[2] रक्तवर्णोऽरुणः स्यात्॥ श्वेतरक्तस्तु पाटलः। श्वेतमिश्ररक्तवर्णः पाटलः स्यात्[3]॥ श्यावः स्यात् कपिशः। हरिद्रावर्णाधिकरक्तवर्णनामनी। [4]वानरवर्णनामनी वा॥ अनुक्तम्—'पीतरक्तस्तु पिञ्जरः'। रक्तवर्णाधिकहरिद्रावर्णः पिञ्जरः इत्युच्यते[5]॥ धूम्र—लोहिते। कृष्णवर्णाधिकरक्तवर्णनामानि॥ अनुक्तम्—'रक्तकृष्णस्तु जोनलः'। रक्तवर्णाधिककृष्णवर्णः जोनल इत्युच्यते॥ १५॥

[1] °द्युतिः B_3. [2] B_3 omits रागः. [3] इत्युच्यते B_3. [4] कपि° B_3. [5] स्यात् B_3.

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ॥ १६॥
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे।
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति॥ १७॥

इति धीवर्गः

(वि.) कडार इति—कडति [1]प्रकर्षेण लक्ष्यत इति कडारः। 'कड [2]लक्षणे'। कपिवर्णं लातीति कपिलः। [3]पिङ्क्ते पिङ्गः। 'पिजि वर्णे'। पिंशतीति पिशङ्गः। 'पिश [4]अवयवे'। कुत्सितं द्रावयतीति कद्रुः। 'द्रा[5] कुत्सायां गतौ'। [6]पिङ्गवर्णं लातीति पिङ्गलः[7]। गोरोचनादिवर्णनाम। चीयन्ते वर्णा अत्रेति चित्रम्[8]। 'चिञ् चयने'। नानावर्णाः कीर्यन्तेऽत्रेति किर्मीरः। 'कॄ विक्षेपे'। कलयति [9]काङ्क्षतीति कल्माषः। [10]कलतिरनेकार्थः। शवति नानावर्णान् शबलः। 'शव गतौ'। एति नानावर्णत्वम् एतः।

'इण् गतौ'। कीर्यन्ते नानावर्णा अत्रेति कर्बुरः। नानावर्णद्रव्यनामानि[11] ॥ गुणे[12] शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति। त्रिषु इत्यर्थः ॥ १६–१७ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ धीवर्गविवृतिः

[1] कडति प्रतिक्षणं भिन्नवर्णमिव लक्ष्यते B_2. [2] 'कड बन्धने मदे च' A. [3] पिङ्गयति मिलति W_1, Y; पिङ्गति B_1, D_1, U; 'पिङ्ग मिलने' K_5, U. [4] गतौ W_2, Y. [5] 'द्रु गतौ' Y. [6] पिङ्गं लाति W_1. [7] 'ला दाने' D_1. [8] चीयन्त इति चिताः नानावर्णाः तेऽस्मिन्निति B_2. [9] B_2, K_5, U, Y add अनेकवर्णान्; °वर्णेन K_1, K_2. [10] कलिः कामधेनुः B_2. [11] W_2, Y omit द्रव्य. [12] शुक्लादयः शब्दाः गुणमात्रे वर्तमानाः पुंसि, पटस्य शुक्लः; गुणवद्वर्तमानाः अभिधेयलिङ्गाः, शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम् W_1.

(पा.) कडारः—पिङ्गलौ। कपिलवर्णनामानि ॥ चित्रं—कर्बुरे। तिलतण्डुलन्यायेन दृश्यमानमिश्रवर्णनामानि ॥ गुणे—तद्वति। शुक्लादिशब्दा गुणे पुंलिङ्गा भवन्ति। गुणिनि तु त्रिलिङ्गा भवन्ति। अत्र रोहितादिशब्दानां स्त्रीत्वे रूपभेदोऽस्ति।

'रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।
लोहितिका लोहिनिका रागात् कोपादिनापि वा ॥
शोणी शोणा च पिङ्गा स्यात् पिशङ्गी हरिणी तु या।
हरितैनी तथैता च श्येनी श्येता सिता च सा ॥
नीलैव वस्त्रे वा नाम्नि नीली प्राणिनि चौषधौ।
शबली चैव कल्माषी कल्माषेत्यर्शआद्यचि ॥' १६–१७ ॥

इति [1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते धीवर्गः

[1] नरसिंह° A_1.

---

६. वाग्वर्गः

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

(वि.) ब्राह्मीति—ब्रह्मण इयं ब्राह्मी। [1]विश्वानि [2]भूतानि भ्रियन्तेऽनया भारती। 'भृञ् भरणे'। भरतस्य ब्रह्मण इयं वा। भरतस्य आदित्यस्य [3]प्रभा वा। [4]भाष्यते भाषा। 'भाष व्यक्तायां वाचि'। गृणाति अस्खलितम् उच्चारयति गीः। 'गॄ शब्दे'। गीयते स्तूयते वा। 'गै शब्दे'। उच्यत इति वाक्। 'वच परिभाषणे'। वण्यते स्तूयते वाणी। 'वण शब्दे'। सरः प्रसरणं सर्वत्रास्तीति सरस्वती। सरस्वतीनामानि॥ [5]व्याह्रियते उच्यते व्याहारः। 'हृञ् हरणे'। उच्यते उक्तिः। 'वच परिभाषणे'। लप्यते लपितम्। 'लप व्यक्तायां वाचि'। भाष्यते भाषितम्। 'भाष व्यक्तायां वाचि'। उच्यत इति वचनम्। वचश्च[6]। एतानि वचननामानि॥ १॥

[1] B_1, K_5, Y omit. [2] भुवनानि W_2. [3] प्रभा कान्तिर्वा भारती; वाक् तेजोमयीति श्रुतिनिर्णीतत्वात् B_2. [4] स्तूयते A, T; श्रूयते K_5, Y. [5] व्याहरति B_1, W_2, Y. [6] B_2, W_1 add 'वच परिभाषणे'.

(पा.) ब्राह्मी—सरस्वती। [1]सरस्वतीदेवीनामानि॥ इकारान्तवाणिशब्दः आकारान्तवाचाशब्दोऽप्यस्ति[2]। तत्र प्रथमो यथा—'एका [3]वाणिरलंकरोति पुरुषम्' (नी. श. १५) इति। अन्तिमो यथा—'कुठारदण्डः कुलमृत्युरेषा वाचा समीचीनसुवीरधन्वा' इति। व्याहारः—वचः। वचननामानि। सरस्वतीपर्यायं च [4]पठन्ति।

'[5]कवेरपार्था-मधुरा न भारती कथेव कर्णान्तमुपैति भारती।'

इति राघवपाण्डवीये (द्विसं. १. ५)।

'सन्तः क्षतानि जनयन्तु यथेष्टमस्यामाभाति तैरधिकमेव सरस्वती मे।
दन्तक्षतं प्रियतमैरनुभूतिकाले किं मण्डनाय न भवेद् वरसुन्दरीणाम्॥'

इत्यादि॥ १॥

[1] वाग्देवता° B_3. [2] शब्दश्च B_3, B_4. [3] वाण्येका, वागेका इति मुद्रितग्रन्थे. [4] भवति A_1. [5] कले: A_1, B_4.

अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः।
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता॥ २॥

(वि.) अपभ्रंश इति—वाचम् अपभ्रंशयतीति अपभ्रंशः[1]। 'भ्रंशु अधः[2] पतने' शब्दादपभ्रष्टोऽपशब्दः। [3]शब्दशास्त्राकथितशब्दनामानि॥ शब्दयत्यवगमयत्यर्थमिति शब्दः। 'शब्द आविष्कारे'। [4]वचोयोग्यो वाचकः। शब्दशास्त्रोक्तशब्दनाम॥ तिङां चयः सुपां चयः कारकान्विता क्रिया वा वाक्यं भवति। अर्थबोधाय वक्तव्यं वाक्यम्।

तिङन्तानां चयो यथा—पचति[5] भवतीत्यादि। सुबन्तचयो यथा—[6]ज्ञानेन मौनमित्यादि। क्रिया [7]यथा—गां [8]जलं फलमानयेत्यादि ॥ २ ॥

[1] संस्कृतात् अपभ्रंशयति वा B_1, D_1, I, K_5, W_2; अपभ्रश्यते W_1. [2] हिंसायां I, K_5. [3] °शास्त्रात् पतितशब्द° B_2; शपयति अवगमयति अर्थं शब्दः, 'शप गतौ' I, Pt_1, Pt_2. [4] वचसो योग्यः B_2; वाचो° K_5; वक्तुं° W_2. [5] भवति एधते पचतीत्यादि K_5, Y; भाति भवति K_1. [6] ज्ञानं Y. [7] B_2, W_1 add कारकान्विता. [8] गामानय, जलमानयेत्यादि B_2, D_1, K_5, U, Y.

(पा.) अपभ्रंशो—वाचकः। शास्त्रे गालिगोणीत्याद्यपशब्दोऽपभ्रंशः स्यात्। गौरित्यादिर्वाचकः शब्दो भवति। तिङ्—वाक्यम्। [1]एकार्थोपरि तिङन्तसुबन्तसमुदायो वाक्यम्। यथा—

'कतिचन जृम्भन्ते दिशि कतिचन विकसन्ति काननाभोगे।
कतिचन नृत्यन्ति गिरौ तथापि भवितव्यमेव भवितव्यम् ॥'
'भ्रेमुर्ववल्गुर्ननृतुर्जजक्षुर्जगुः समुत्पुप्लुविरे निषेदुः।
आस्फोटयांचक्रुरभिप्रणेदू रेजुर्ननन्दुर्विययुः समीयुः[2] ॥' (भट्टि. १३. २८)
'[3]कियत्प्रमाणमुदकं जानुदघ्नं नराधिप।
तथापीयमवस्था ते न हि सर्वे भवादृशः ॥' (भो. प्र. पृ. ४०, श्लो. १८५)

इत्यादि ॥ क्रिया वा कारकान्विता। कारकसंबद्धक्रियापि वाक्यं भवति। यथा—

'ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता ॥' (म. भार. ७. १५९. ४२)
'मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा।
वाहिनी जलधरः कुलिशो वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥'

अत्र बाधिष्ट इति क्रियाध्याहर्तव्या।

'छायासंतपिताध्वन्यः फलैः पोषितनीडजः।
हन्त वृक्षो महानेष समिदर्थे विभिद्यते ॥'

अत्र जाल्मेनेति कारकमध्याहार्यम् ॥ २ ॥

[1] एकार्थपदः B_3. [2] B_4 adds इति भट्टिकाव्ये. [3] कियन्मानं जलं विप्र इति मुद्रितग्रन्थे.

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।
स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥
शिक्षेत्यादि श्रुतेरङ्गमोंकारप्रणवौ समौ ।

(वि.) श्रुतिरिति—श्रूयेते धर्माधर्मावनयेति श्रुतिः । 'श्रु श्रवणे' । [1]धर्माधर्मौ वेदयतीति वेदः[2] । 'विद ज्ञाने' । आम्नायते[3] पारंपर्येण आम्नायः । 'म्ना अभ्यासे' । ऋग्यजुःसामाख्याः त्रयोऽवयवा[4] यस्याः त्रयी । वेदनामानि[5] ॥ धारयति जगन्तीति धर्मः[6] । वेदोक्तविधिनाम ॥ ऋच्यते स्तूयते ऋक् । 'ऋच स्तुतौ' । पापं[7] स्यतीति साम । 'षोऽन्तकर्मणि' । इज्यतेऽनेन यजुः । 'यज देवपूजासंगतिकरणयजनदानेषु' । इति त्रयो वेदाः । तेषां[8] समाहारः त्रयी । [9]वेदत्रयसमूहनाम ॥ [10]शिक्ष्यतेऽनया [11]वर्णादि शिक्षा । 'शिक्ष विद्योपादाने' । आदिशब्देन [12]अङ्गान्युच्यन्ते ।

'शिक्षा व्याकरणं कल्पो निरुक्तं ज्योतिषां [13]गतिः ।
[14]छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ॥'

इति श्रुत्यङ्गनामानि ॥ ओमित्यक्षरम् ओंकारः । [15]प्रणूयते स्तूयतेऽनेनेति प्रणवः । 'णु स्तुतौ' । [16]वेदप्रणवनाम ॥ ३ ॥

[1] धर्मादि D_1. [2] श्रुतित्रयं वेदः D_1; विदन्ति धर्मादिकमनेन A. [3] उपदिश्यतेऽनेन धर्मादिः D_1; अभ्यस्यते B_2. [4] तेषां समाहारः त्रयी B_2. [5] वेदत्रयनाम K_3. [6] 'धृञ् धारणे' D_1. [7] पापानि I. [8] इति त्रयाणां A, B_1, T. [9] W_2, Y omit °त्रय°. [10] शिक्षते B_2. [11] आदिवर्णादि A, B_1, T, W_1. [12] अङ्ग्यते (अङ्गति K_5) ज्ञायतेऽनेन अङ्गं B_1, D_1, Y; 'अगि गतौ' I. [13] ज्योतिषं तथा A, B_1, T. [14] छन्दसां लक्षणं चैव B_1, I, K_5, W_2, Y. [15] प्रकर्षेण नूयते B_2. [16] वेदनिष्ठ° B_2; °प्रणववचन° D_1.

(पा.) श्रुतिः—त्रयी । वेदनामानि ॥ धर्मस्तु तद्विधिः । वेदोक्तविधिर्धर्मः स्यात् । स्त्रियाम्—त्रयी । त्रयाणां वेदानां [1]समाहारस्त्रयी । अत्र त्रयीति सामान्याकारेणोक्तम् । शिक्षे—अङ्गम् । शिक्षादीनि वेदाङ्गानि ।

'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा[2] ।
छन्दसां विचितिश्चेति षडङ्गो वेद उच्यते' ॥

ओंकारप्रणवौ[3] समौ । प्रणवनामनी[4] ॥ ३ ॥

[1] समुदाय: B_3, B_4. [2] श्रुति: A_1. [3] A_1 adds प्रणमौ इति वा. [4] शिक्षादि-पाठस्य प्रणवपूर्वकत्वात् शिक्षाद्यनन्तरकथनम् A_1.

इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।

(वि.) इतिहास इति—[1]इतिह इति पारंपर्योपदेशः आस्तेऽस्मिन्निति इतिहासः । 'आस [2]उपवेशने'। [3]पुरावृत्तनृ[4]पादिचरित्र[5]ग्रन्थसंदर्भनाम ॥ उत् ऊर्ध्वमुन्नीयते[6] उदात्तः[7]। तद्विपरीतः अनुदात्तः। उदात्तानुदात्तयोः समाहारः[8] प्राप्तः स्वरितः। एते त्रयः स्वरा भवन्ति ॥ प्रत्यक्षागमाभ्याम् अवगन्तव्यस्य[9] वस्तुनोऽनु पश्चात् ईक्षणम् अन्वीक्षा,[10] सा प्रयोजनं यस्याः सा आन्वीक्षिकी। अक्षपादादिप्रणीततर्कशास्त्रनाम[11] ॥ [12]दण्डोऽनया नीयते दण्डनीतिः। 'णीञ् प्रापणे'। चाणक्यादिप्रणीतार्थशास्त्रनाम ॥ ४ ॥

[1] इतिहा A, B_1, T; इति हसति B_2; इतिह आसीत् D_1, D_2, I, K_1, W_1. [2] 'अस भुवि क्षेपे' D_2, I, K_1, K_2, K_5, Y. [3] पुरा पूर्वम् उत्पन्नं वृत्तं पुरावृत्तम् B_2. [4] °पृथ्व्यादिनृप° K_5. [5] °चरित° W_2. [6] आदीयते D_1, K_1, U, W_1, Y. [7] उदात्तः उच्चैर्गीतः आद्यः प्रथमो येषां ते उदात्ताद्याः B_2. [8] समाहारः D_2, K_1, W_1. [9] ईक्षितस्य D_2, K_1, U, W_2. [10] अन्वीक्षणं तत् A, B_2. [11] तर्कशास्त्रादिविद्या° W_2; °तर्कविद्या° D_1, I, K_1, K_5, Y. [12] दण्ड्यतेऽनेन ऊन इति W_2.

(पा.) इतिहासः पुरावृत्तम्। इतिहासनाम ॥ उदात्ताद्यास्त्रयः स्वराः । उदात्तनिहतस्वरिताः[1] स्वराः। आन्वीक्षिकी—शास्त्रयोः। तर्कविद्या वैशेषिकादिः, अर्थशास्त्रं कामन्दकादि। तयोर्यथाक्रमं आन्वीक्षिकीदण्डनीतिशब्दौ वर्तेते। अनुक्तम्—'नामशास्त्रं[2] निघण्टुर्ना'। नामशास्त्रं निघण्टुरित्युच्यते[3] ॥ ४ ॥

[1] °विहत° B_4. [2] A_1 adds कामशास्त्रं. [3] नामशास्त्रनाम B_3.

आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥ ५ ॥
प्रबन्धकल्पना कथा प्रवल्हिका प्रहेलिका ।

(वि.) आख्यायिकेति—आख्यायते वर्तमाननृपादिचरित[1]मित्याख्यायिका[2] । 'ख्या प्रकथने'। [3]हर्षचरितादिग्रन्थसंदर्भनाम ॥ पुरा भवं पुराणम्। पञ्चलक्षणयुक्तं ब्राह्मवैष्णवादिपुराणनाम ॥

'[4]सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं [5]चेति [6]पुराणं पञ्चलक्षणम्॥'

[7]अनया कथ्यत इति कथा। 'कथ वाक्यप्रबन्धे'। रामायणादेर्नाम॥ प्रवल्हते [8]प्राधान्यं भजते प्रवल्हिका। 'वल्ह प्राधान्ये'। प्रहेलयति हावयति सूचयति [9]भावार्थमिति प्रहेलिका। 'हिल [10]भावकरणे'। विरुद्धार्थवचोनामनी॥ ५॥

[1] °चरित्रं B_2, W_2. [2] P_2 adds उपलब्धो ज्ञातोऽर्थो यस्याः सा उपलब्धार्था. [3] प्राचीनचरित्र° B_2; श्रीहर्ष° K_5; वर्तमाननृपचरित्र° A, T. [4] पञ्चलक्षणान्युच्यन्ते B_2; K_5 omits. [5] चैव B_1, W_2. [6] लक्षणानां च पञ्चकम् B_2. [7] B_2 adds प्रबन्धस्य कल्पना रचना. [8] प्रधानं U; अप्राधान्यं Y. [9] नानार्थमिति D_1; 'वल्ह परिभाषणहिंसाप्रदानेषु प्राधान्ये च' B_2. [10] हावकरणे A, B_1, T.

(पा.) आख्यायिकोपलब्धार्था। नायकाख्यातनायकोपलब्धार्थवती आख्यायिका। हर्षचरितादि॥ पुराणं पञ्चलक्षणम्। सर्गप्रतिसर्गादिपञ्चलक्षणोपेतं पुराणम्।

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तरं तथा।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥'

स्कन्दादि॥ प्रबन्धकल्पना कथा। स्तोकसत्यबह्वसत्ययुक्ता प्रबन्धकल्पना कथा स्यात्। कादम्बर्यादि॥ प्रवह्लिका प्रहेलिका। गूढनिक्षिप्तार्थस्य कुतुकहेतोः कार्यविशेषस्य नामानि।

'[1] अष्टौ श्लोकान् कुरुष्वेति पुत्रः पित्रा नियन्त्रितः।
सप्त श्लोकाः कृतास्तेन पितुराज्ञा न लङ्घिता'॥ ५॥

[1] अष्टिरिति वृत्तनाम.

स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः॥ ६॥
समस्या तु समासार्था किंवदन्ती जनश्रुतिः।

(वि.) स्मृतिरिति—स्मर्यतेऽनया स्मृतिः। 'स्मृ आध्याने'। मन्वादिप्रणीतधर्मसंहितानाम[1]॥ समाह्रियतेऽनयेति समाहृतिः। संगृह्यते संक्षिप्यते[2] संग्रहः। [3]संक्षिप्तग्रन्थसन्दर्भनाम॥ समस्यते संक्षिप्यते समस्या। 'असु [4]क्षेपणे'। [5]कविपरीक्षार्थं दीयमानश्लोकांशनाम॥ [6]किं परस्परं वदन्त्यत्रेति किंवदन्ती। 'वद व्यक्तायां वाचि'। [7]जनैः श्रूयते जनश्रुतिः। 'श्रु श्रवणे'। लोकप्रवादनामनी॥ ६॥

[1]B₂ adds धर्मेण संहिता. [2] अनेनेति B_2; 'ग्रह उपादाने' B_2, D_1. [3] D_1 omits संदर्भ; संक्षेपग्रन्थनाम B_1, K_5, W_2, Y. [4] क्षेपे W_1. [5] कविता° K_5; श्लोकान्त° W_1; श्लोकान्तपाद° Y. [6] किमिति W_1, Y. [7] W_1 omits 3 lines.

(पा.) स्मृतिस्तु धर्मसंहिता। स्मृतिनाम ॥ समाहृतिस्तु संग्रहः। संग्रहग्रन्थनाम ॥ समस्या तु समस्यार्था। समस्यारूपार्थं प्रहेलिका निक्षिप्तार्थकौतुकवती समस्या। अथवा समस्या तु समासार्था समासशब्दवती समस्या। 'समस्या तु [1]समासः स्यात्' इति वैजयन्ती (पृ. ३४, श्लो. ४०)।

'श्रीभोजेन जितोऽस्मीति चिन्तां चिन्तामणे त्यज।'
'जिता देवद्रुमाः पञ्च न दुःखं पञ्चभिः सह॥'

किंवदन्ती जनश्रुतिः। जनवादनामनी ॥ ६ ॥

[1] समासा A_1, B_3.

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ ७ ॥
आख्याह्वे अभिधानं च नामधेयं च नाम च।

(वि.) वार्तेति—नृपादिवृत्तिरत्रास्तीति[1] वार्ता। प्रवर्ततेऽत्रेति प्रवृत्तिः। 'वृतु वर्तने'। वृत्तोऽनुवर्तनीयोऽन्तः समाप्तिरस्येति वृत्तान्तः। वृत्तस्यान्तो वा। उद्यते निगद्यते राजादिचरित्रमत्रेत्युदन्तः। 'वद व्यक्तायां वाचि'। वार्तानामानि ॥ अनेन आह्वयन्तीत्याह्वयः। 'ह्वेञ् स्पर्धायां शब्दे च'। आहूयतेऽनेनेति [2]वा। 'हु दानादानयोः'। अनया आख्यायते आख्या। 'ख्या प्रकथने'। आहूयतेऽनया आह्वा। अनेनाभिधीयतेऽभिधानम्[3]। नामैव नामधेयम्। अनेन नमति नाम। 'णम प्रह्वत्वे शब्दे च'। संज्ञानामानि[4] ॥ ७ ॥

[1] अस्याः D_2, K_1, K_2. [2] आहूतिश्च A. [3] 'डुधाञ् धारणपोषणयोः' B_2. [4] Y omits 3 lines.

(पा.) वार्ता—उदन्तः स्यात्। वार्तानामानि। अनुक्तम्—'रथ्यावादस्तु कोहलः'[1]। एते द्वे च। वीथीवार्तानामनी ॥ अथाह्वयः—नाम च। [2]संकेतितशब्दनामानि ॥ ७ ॥

[1] काहलः A_1. [2] A_1 adds देवदत्तादौ.

हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥ ८ ॥
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ।

(वि.) हूतिरिति—अनया हूयते हूतिः । 'हु दानादानयोः' । अनया आकारयन्तीति आकारणा[1] । अनेनाह्वयन्तीत्याह्वानम् । 'ह्वेञ् स्पर्धायां शब्दे च' । अथवा हूतिः आकारणं च आह्वानं च । आकारणाह्वाने इति द्वन्द्वम् । एहीति [2]वचसो नामानि ॥ सम्यक् हूयते संहूतिः । बहुभिः कृतस्य एहीति वचसो नाम ॥ विविधो वादो विवादः[3] । व्यवहरत्यनेन व्यवहारः । 'हृञ् हरणे' । इदं मदीयमिदं मदीयमिति परस्परवादनाम[4] ॥ उपन्यस्यते उपन्यासः । 'असु क्षेपणे' । वाचो मुखं वाङ्मुखम् । वाक्यारम्भनाम ॥ ८ ॥

[1] 'डुकृञ् करणे' B_2. [2] वचन° D_1. [3] 'वद व्यक्तायां वाचि' A. [4] वचन° A; °विवाद° B_1, D_1.

(पा.) हूतिः—आह्वानम् । इत एहीति वचसो नामानि ॥ समासाङ्गीकारपक्षे आकारणशब्दो नपुंसकः । 'आकारणमाह्वानम्' इति हलायुधः (अ. मा. १. १५४) । व्यासाङ्गीकारपक्षे आकारणाशब्दः स्त्रीलिङ्गः । 'हूतिराकारणा हावो[1] । [2]हक्कारामन्त्रणाह्वानम्' इति वैजयन्ती (पृ. ३३, श्लो. ३०) । संहूतिर्बहुभिः कृता । बहुभिः कृतस्य एहीति वचसो नाम । 'बहुभिर्मुहुःकृता हक्का संहूतिरिति भण्यते' इति वा ॥ विवादो व्यवहारः स्यात् । विवादनाम ॥ उपन्यासस्तु वाङ्मुखम् । [3]'यरो ञमि ञम्वेति' ककारस्य विभाषा ङकारः । उपन्यासनाम ॥ ८ ॥

[1] हवः B_3. [2] आमन्त्रणं ह्वानम् A_1. [3] 'यरोऽनुनासिके—' (८. ५. ४५).

उपोद्घात उदाहारः शपनं शपथः पुमान् ॥ ९ ॥
प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।

(वि.) उपोद्घात इति—उपोद्घन्यते [1]उपोद्घातः । 'हन हिंसागत्योः' । उदाह्रियतेऽनेन उदाहारः[2] । प्रकृतार्थचिन्ताग्रन्थस्य नामनी ॥ उदाहरणनामनी इति केचित् । विचारविषयवाक्यस्येत्यन्ये ॥ शपति आक्रोशतीति शपनम् । 'शप [3]आक्रोशे' । शपति लम्भयति[4] विश्वसित्यनेनेति [5]शपथः । 'शप [6]लम्भने' । सत्यवचननामनी ॥ देवतापितृपादादिस्पर्शस्य वा ॥ [7]पृच्छतीति प्रश्नः । पृच्छा च । 'प्रच्छ ज्ञीप्सायाम्' । अनुयुज्यतेऽनुयोगः । 'युजिर् योगे' । कोऽसौ कुत[8] इत्येवंविधस्य वाक्यस्य नामानि ॥

[9]प्रतिविधानार्थं वाक्यं प्रतिवाक्यम् । उत्तरति चोद्यमनेनेति उत्तरम् । 'तॄ प्लवनतरणयोः' । असावत्रेत्यादिप्रत्युत्तरनामानि[10] ॥ ९ ॥

[1] उप समीपे उद्धन्यते B_1, D_1, I, K_5, Y. [2] 'हृञ् हरणे' B_2, D_1, I. [3] आक्रोशने D_2. [4] उपालम्भते W_1. [5] शपथशब्दः नपुंसकेऽपि A, B_1, T. [6] उपालम्भने B_2, W_2, Y. [7] पृच्छ्यते K_5, W_2. [8] I adds आगतः. [9] प्रति-दानं वाक्यं W_2. [10] प्रश्नवाक्यस्योत्तरनामानि B_2; °अत्रागत° K_3; उत्तर° K_2, K_5.

(पा.) उपोद्घात उदाहारः । प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थान्तरवर्णनम् उपोद्घातः ॥ शपनं शपथः पुमान् । सत्यवचननामनी । प्रश्नो—पृच्छा च । प्रश्ननामानि ॥ प्रतिवाक्योत्तरे समे । उत्तरनामनी ॥ ९ ॥

मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥ १० ॥
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ।

(वि.) मिथ्येति—अभि असत्यमारोप्याख्यानम् अभ्याख्यानम्[1] । अध्याख्यानमिति वा पाठः । अन्धो बधिर [2]इत्यादि [3]मिथ्याभियोगनाम ॥ मिथ्या असत्यमभिशस्यते मिथ्याभिशंसनम्[4] । 'शसि [5]इच्छायाम्' । अभि आरोप्य शप्यते अभिशापः । 'शप आक्रोशे' । अविद्यमानपापारोपनामनी ॥ प्रणद्यतेऽनुरागेण प्रणादः । 'णद अव्यक्ते शब्दे' । अनुरागोत्पन्नमणितादिशब्दनाम ॥ १० ॥

[1] अभितः आख्यानं B_2. [2] इत्येवंप्रकारं I, K_5. [3] असत्याभियोग° B_2. [4] मिथ्या अभिशंसति K_5, W_2; B_2 adds अस्मिन्निति. [5] 'शंसु स्तुतौ' I, Y.

(पा.) मिथ्याभियोगोऽभ्याख्यानम् । अध्याख्यानमिति वा । मृषा झकटकनामनी(?) । अथ—अभिशापः । मृषाभूतनिर्भत्सननामनी ॥ प्रणादस्तु—अनुरागजः । अनुरागाज्जातध्वनिविशेषः प्रणादः स्यात् ॥ १० ॥

यशः कीर्तिः समाख्या च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ ११ ॥
आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ।

(वि.) यश इति—अश्नुते व्याप्नोति देशान्तरेषु यशः । सान्तः । 'अशू व्याप्तौ' । देशान्तरं यातीति वा । 'या प्रापणे' । कीर्त्यते [1]शब्द्यते [2]कीर्तिः । 'कॄत संशब्दने' । समन्तात् आख्यायते समाख्या । 'ख्या प्रकथने' । यशोनामानि ॥ [3]समाज्ञेति

वा पाठः ॥ स्तूयतेऽनेन स्तवः । स्तोत्रं । स्तुतिश्च । 'ष्टुञ् स्तुतौ' । नूयतेऽनेन नुतिः । 'णु स्तुतौ' । प्रशंसानामानि ॥ आम्रेड्यतेऽसकृदुच्यते आम्रेडितम् । 'म्रेडृ उन्मादे' । असकृद्भाषितनाम ॥ घुष्यत इति घोषणा । 'घुषिर् शब्दे[4]' । आज्ञापयितुं सर्वजनबोधनार्थं [5]पटहादावुच्चैःकृतशब्दनाम ॥ ११ ॥

[1] शब्दायते A, B_1, T. [2] इयर्तीति वा कीर्तिः, 'ऋ गतौ' B_1, D_1, K_5, W_2, Y. [3] समज्ञेति वा पाठः, समन्तात् ज्ञायते, 'ज्ञा अवबोधने' B_2, D_2, Y. [4] विशब्दने A, D_1, K_1, K_2. [5] A omits आदौ.

(पा.) यशः—समाख्या च। समाख्या तुल्यलक्षणमिति हलायुधानुसारी पाठः । 'यशोऽभिख्यासमाख्यास्तुल्यलक्षणाः' इति हलायुधः (अ. मा. १. १५३) । यशः कीर्तिः समाज्ञा[1] चेत्ययं वैजयन्त्यनुसारिपाठः[2] । 'समाज्ञा च यशः कीर्तिः' इति वैजयन्ती (पृ. ३४, श्लो. ३६) । 'कीर्तिः ख्यातिः समाज्ञा च' इति रभसकोशः । कीर्तिनामानि ॥ स्तवः—नुतिः । स्तोत्रनामानि ॥ 'ईडा श्लाघा प्रशंसा च वर्णनं च विकत्थनम्' । एतानि च ॥ आम्रेडितं द्विस्त्रिरुक्तम् । द्विस्त्रिरुदीरणमाम्रेडितं भवति । '[3]एतदेव यथावाचमाम्रेडयति वासवः' (म. भार. ३. १२४. १३) ॥ उच्चैः—घोषणा । उच्चैःशब्दः घोषणा स्यात् ॥ ११ ॥

[1] समज्ञा इति मुद्रितग्रन्थे. [2] °पाठेन समाज्ञा च B_3. [3] 'एतदेव यदा वाक्यमाम्रेडयति देवराट्' Apte's Dict. p. 347.

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १२ ॥
अवर्णाक्षेपनिर्वादपरिवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥

(वि.) काकुरिति—कायतीति काकुः । 'कै[1] शब्दे' । शोकभीत्यादिकृतध्वनिविकारनाम ॥ वर्ण्यते वर्णः । विरुद्धो वर्णः अवर्णः । 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' । 'वर्ण स्तुतौ' इति वा धातुः । आक्षिप्यते आक्षेपः । 'क्षिप प्रेरणे' । निकृष्टो वादः [2]निर्वादः । [3]परिवादः । [4]अपवादः । 'वद व्यक्तायां वाचि' । [5]उपक्रोशतीत्युपक्रोशः । 'क्रुश आह्वाने रोदने च' । [6]जुगुप्सते जुगुप्सा । 'गुप गोपने[7]' । कुत्सयते कुत्सा । 'कुत्स [8]निन्दने' । निन्दतीति [9]निन्दा । 'णिदि कुत्सायाम्' । [10]गर्हतीति गर्हणम् । गर्हा च । 'गर्ह कुत्सायाम्' । निन्दानामानि ॥ १२–१३ ॥

(वि.) तत्रेति—आ क्षरति परितो [1]व्याप्नोतीति आक्षारणा। 'क्षर संचलने'। मैथुनमुद्दिश्याक्रोशनाम[2]॥ आभाष्यते [3]सम्यग् भाष्यते आभाषणम्। आलपतीत्यालापः। 'लप व्यक्तायां वाचि'। सुखेन[4] स्थितमिति प्रियवचननाम॥ प्रलपतीति प्रलापः। निष्प्रयोजनवचननाम॥ अनुलपतीत्यनुलापः। [5]मुहुर्वचननाम॥ विलपतीति विलापः। [6]परिदेवते परिदेवनम्। 'देवृ देवने'॥ अनुशोचननामानि॥ १५॥

[1] प्राप्नोति W_2.　[2] क्रोश° K_5, W_1.　[3] अनेनेति B_2; D_1, I add 'भाष व्यक्तायां वाचि'.　[4] सुजनस्थितिमतो A, B_1, T.　[5] B_2 adds मुहुर्भाष्यत इति मुहुर्भाषा ; बहुवचननाम U.　[6] परितः दीव्यति B_2, T, W_2.

(पा.) तत्र—प्रति। आक्रोश इति भर्त्सनानि। 'शाप[1] आक्रोश आक्षेपः क्षारणा स्याद् विरूक्षणम्' इति हलायुधः (अ. मा. १. १४५)। मैथुनमुद्दिश्य यद्भर्त्सनं तव भार्यां तव मातरमित्यादि, तत्र आक्षारणाशब्दो [2]वर्तते। स्यात्—आलापः। संभाषणनामनी॥ '[3]संभाषणमाभाषणमालापः कुरुकुञ्चिका' इति वैजयन्ती (पृ. ३२, श्लो. २३)। प्रलापोऽनर्थकं वचः। अर्थशून्योन्मत्तादिवचनं प्रलापः स्यात्॥ अनुलापो मुहुर्भाषा। [4]असकृदेकार्थवचनमनुलापः स्यात्॥ विलापः परिदेवनम्। दुःखेन वचनं विलापः स्यात्॥ १५॥

[1] शापाधिक्षेपः B_3.　[2] स्यात् B_3.　[3] संभाषणं त्वाभाषणं B_4.　[4] निद्रादिमध्येऽसकृदुक्तवचनं यत् तन्नाम A_1.

विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः॥ १६॥
सुप्रलापः सुवचनमपलापस्तु निह्नवः।
(चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा।
अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनम्॥)

(वि.) विप्रलाप इति—[1]विप्रलपतीति विप्रलापः। [2]पुरुषाणां मिथोविरोधवचननाम॥ [3]संलपतीति संलापः। [4]मिथोऽविरोधोक्तिनाम॥ [5]सुप्रलपतीति सुप्रलापः सुवचननाम॥ अपलपतीत्यपलापः। 'लप व्यक्तायां वाचि'। निह्नुते निह्नवः। 'ह्नुङ् अपनयने'। [6]निह्नववचननामनी॥ १६॥

[1] विशेषण° B_2.　[2] परुषाणां K_2, K_3.　[3] सम्यक् B_2; सत् सम्यक् W_1.　[4] मिथोभाषण° B_2, K_5, W_2.　[5] सुष्ठु B_2.　[6] निह्नुति° K_5.

(पा.) विप्रलापो विरोधोक्तिः। परस्परविरोधोक्तिर्विप्रलापः स्यात्॥ संलापो भाषणं मिथः। परस्परभाषणं संलापः स्यात्। द्वयोरन्यतरस्यालापः, द्वयोरपि संलाप इति [1]विशेषः॥ सुप्रलापः सुवचनम्। सुवचननाम॥ अपलापस्तु निह्नवः। निह्नववचननाम॥ अनुक्तम्—'काका वर्णनमुल्लापः'। काका [2]कथितवचनमुल्लापः स्यात्॥ 'प्रियवाक् चाटुरस्त्रियाम्'। प्रियवचनं चाटु स्यात्॥ १६॥

[1] भेदः A_1. [2] वर्णित° B_3.

संदेशवाग् वाचिकं स्याद् वाग्भेदास्तु त्रिषूत्तरे॥ १७॥
रुशती वागकल्याणी स्यात् कल्या तु शुभात्मिका।

(वि.) संदेशवागिति—वाचोऽस्मिन् सन्तीति वाचिकम्। संदेशवचननाम॥ उत्तरे वाग्भेदास्त्रिषु[1] वर्तन्ते। [2]रुशति कल्याणमिति रुशती। 'रुश हिंसायाम्'। उषतीति पाठे[3] 'उष प्लुष दाहे'। अमङ्गलोक्तिनाम॥ [4]कलयितुमर्हतीति कल्या। 'कल गतौ संख्याने च'। कलासु [5]क्रियासु साधुरिति वा। शुभवचननाम॥ १७॥

[1] B_2 adds लिङ्गेषु. [2] रोषति जिघांसति कल्याणमिति रुषती। 'रुष हिंसायां' B_2. [3] तत्पक्षे उषति कल्याणं B_2. [4] कलयति संख्यातुमर्हति K_5, U. [5] क्रीडासु W_2.

(पा.) संदेशवाग्वाचिकं स्यात्। संदेशवचननाम॥ वाग्भेदास्तु त्रिषूत्तरे। [1]उपरि वक्ष्यमाणा वाग्भेदा वागादिशब्दप्रयोगे त्रिषु वर्तन्ते। [2]विशेष्यानुक्तौ तूक्तलिङ्गाः[3]। रुशती वागकल्याणी। अकल्याणी वाग् रुशती स्यात्। रुशती वाक्। रुशन् व्याहारः। रुशद् भाषितम्। रुशतीं न ब्रूयात् कल्यामेव वदेत्। उषती वागकल्याणीति पाठादुषत्यपि भवति॥ स्यात् कल्या तु शुभात्मिका। शोभना[4] वाक् कल्या [5]भवति॥ १७॥

[1] B_3 omits. [2] °गम्यत्वे A_1. [3] B_4 adds एव. [4] शोभनात्मिका A_1. [5] स्यात् B_3.

अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम्॥ १८॥
निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये।

(वि.) अत्यर्थमधुरमिति—सान्त्व्यते [1]प्रयत्नेन सान्त्वम्। 'षान्त्व सामप्रयोगे'। अतिमधुरवचननाम॥ हृदयं गम्यतेऽनेन हृदयंगमम्। 'गम्लृ[2] गतौ'। [3]संबन्धार्थ-

वचननाम ॥ [4]दुष्टहेतुत्वान्निशितमिव [5]तिष्ठतीति निष्ठुरम् । 'ष्ठा गतिनिवृत्तौ' । परुषवचननाम ॥ [6]न विद्यते श्रीरत्र [7]अश्लीलम् । [8]असभ्यवचननाम ॥ शोभमानम् ऋतमत्रास्तीति [9]सूनृतम् । प्रियसत्यवचननाम ॥ १८ ॥

[1] प्रयतनेन I, K_2, K_3; प्रयत्यतेऽनेन U. [2] 'गम्लृ सृप्लृ°' D_1, I, K_1, U. [3] संगतवचन° K_5. [4] दुःख° D_2, K_1. [5] अवतिष्ठते A, B_1, T. [6] D_1, I, K_3 add ग्रामे भवं ग्राम्यम्; अत्र गीर्यते ग्राम्यवार्ता मैथुनादिवार्ता, 'गॄ निगरणे' B_2. [7] अश्रीलं W_1, Y; रलयोरैक्यं W_1; अश्रीरं K_5, U. [8] ग्राम्य° D_1, I, Y; असत्य° W_2. [9] सुष्ठु ऊन्यते सूनं, 'ऊन परिहाणे', सूनं च तत् ऋतं च K_5, W_2, Y; प्रीयते प्रियम् W_2.

(पा.) अत्यर्थमधुरं सान्त्वम् । [1]अतिमधुरवचनं सान्त्वमित्युच्यते ॥ संगतं हृदयंगमम् । ग्राह्यवचननाम ॥ निष्ठुरं परुषम् । कर्कशवचननामनी ॥ ग्राम्यमश्लीलम् । असभ्यवचननामनी ॥ 'कुतस्त्यं फल्गु काहलम्' । एतानि च[2] । 'अश्लीलं काहलं फल्गु' इति धनंजयः ॥ सूनृतं प्रिये सत्ये । प्रियसत्यवचनं सूनृतं स्यात् ॥ १८ ॥

[1] मधुरं B_3. [2] A_1 adds असभ्यवचनपर्याय एव.

सत्येऽथ संकुलक्लिष्टे परस्परपराहते ॥ १९ ॥
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ।

(वि.) सत्य इति—[1]संकुल्यते संकुलम् । 'कुल संस्त्याने बन्धुषु च' । क्लिश्यते क्लिष्टम्[2] । 'क्लिशू विबाधने' । अन्धः पश्यति अकरः करोतीत्येवमादिवचननामनी[3] ॥ ग्रस्यते ग्रस्तम् । 'ग्रसु ग्लसु अदने' । [4]लुप्ताक्षरस्य लुप्तपदस्य वा नाम ॥ निरस्यते निरस्तम् । 'असु क्षेपणे' । त्वरितोदितनाम ॥ १९ ॥

[1] सुष्ठु° D_2. [2] म्लिष्टमिति वा पाठः, म्लेच्छतीति म्लिष्टं, 'म्लेच्छ अव्यक्ते शब्दे' D_2. [3] °परस्पराहतवचो° Y. [4] K_5 omits 5 lines.

(पा.) अथ—पराहते । वृद्धोऽहं मे[1] पिता बाल इत्यादिव्याहतवचने संकुलक्लिष्टशब्दौ वर्तेते ॥ लुप्तवर्णपदं ग्रस्तम् । लुप्तवर्णं पदं लुप्तपदं वाक्यं च ग्रस्तं स्यात् ॥ निरस्तं त्वरितोदितम् । द्रुतोच्चारितवचनं निरस्तं भवति ॥ १९ ॥

[1] मत्पिता B_3.

अम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम् ॥ २० ॥
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ।

(वि.) अम्बूकृतमिति—[1]निष्ठीवसंपर्कात् अम्बूक्रियते अम्बूकृतम्। निष्ठीवसहितवचननाम[2]। 'ष्ठिवु निरसने'॥ यत्रार्थसंबन्धो नास्ति तदबद्धम्[3]। '[4]बन्ध बन्धने'। संबन्धशून्यवचननाम॥ न सन्त्यक्षराणि यत्र अनक्षरम्। [5]अवाच्यवचननाम॥ आहन्यत इत्याहतम्[6]। मिथ्यार्थवचननाम॥ २०॥

[1] °संपर्कवशात् A; निष्ठीवनात् हेतोरुत्पन्नमम्बु लाला, तेन सह कृतम् अम्बूकृतं, समानकालोत्पन्नमित्यर्थः B_2. [2] B_2 adds निष्ठीवेन सहितं सनिष्ठीवम्. [3] K_5 adds बध्यत इति बद्धं, बद्धं न भवतीत्यबद्धं. [4] 'बन्ध संयमने' I, K_1, Y. [5] अनक्षरवचननाम K_5. [6] A adds 'हन हिंसागत्योः'.

(पा.) अम्बूकृतं सनिष्ठीवम्। लालासहितं निष्ठीवनिर्यद्बिन्दुसहितं च वचनमम्बूकृतमित्युच्यते॥ अबद्धं स्यादनर्थकम्। समुदायार्थशून्यं दशदाडिमादिवाक्यमबद्धं स्यात्॥ अनक्षरमवाच्यं स्यात्। हस्तनेत्रादिव्यञ्जितवचनमनक्षरमित्युच्यते[1]॥ आहतं तु मृषार्थकम्। एष [2]वन्ध्यासुतो याति—इत्यादिवचनमाहतं स्यात्॥ २०॥

[1] स्यात् B_3. [2] वन्ध्यासुतः पश्यति B_3.

(सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ।
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ॥)
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ॥ २१ ॥
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।

इति वाग्वर्गः

(वि.) अथेति—म्लेच्छतीति म्लिष्टम्। 'म्लेच्छ अव्यक्ते शब्दे'। क्लिष्टमिति पाठे क्लिश्यत इति क्लिष्टम्। 'क्लिशू विबाधने'। [1]अस्पष्टवचननाम॥ विगता[2] तथा सत्यमत्रेति वितथम्। अनृतवचननाम॥ सति धर्मे साधु सत्यम्। तथा सत्यमत्रास्तीति तथ्यम्। सद्भिरर्यते[3] ऋतम्। 'ऋ [4]गतौ'। समञ्चतीति सम्यक्। 'अञ्चु गतौ याचने च'। सत्यवचननामानि॥ अमूनि तद्वति गुणिनि त्रिषु वर्तन्ते॥ २१॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ वाग्वर्गः

[1] अविस्पष्ट° I, K_3. [2] विरता K_2, K_5. [3] रूयते, 'रु शब्दे' K_1, K_2. [4] 'ऋ शब्दे', अर्यते उपदिश्यते B_1, U; आद्रियते D_1.

(पा.) अथ म्लिष्टमविस्पष्टम् । अस्पष्टबालकिरातादिवचनं म्लिष्टं स्यात् ॥ अनुक्तम्—'गद्गदं गलमूलस्थम्' । गलमूलस्थवचनं गद्गदं भवति ॥ 'तुम्बकं स्पृष्टनासिकम्' । नासिकां स्पृष्ट्वोद्गच्छद्वचनं [1]तुम्बकमित्युच्यते । वितथं—वचः । असत्यवचननामनी ॥ आहतमसद्भूतार्थकथनम्[2] । असत्यं [3]सद्भूतापलापः ॥ सोल्लुण्ठनं तु सोत्प्रासम् । उत्क्रोशवचननामनी ॥ मणितं रतिकूजितम् । रतिकालगलरवनामनी ॥ सत्यं—सम्यक् । सत्यवचननामानि ॥ अमूनि त्रिषु तद्वति । [4]सत्यादिशब्दाः सत्यवत्यर्थे त्रिलिङ्गा भवन्ति । सत्यो देवदत्तः । सत्या यज्ञदत्ता । सत्यं कलत्रमित्यादि ॥ २१ ॥

इति [5]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते वाग्वर्गः

[1] तुम्बुकं A_1. [2] B_3 omits कथनं. [3] आलापः A_1. [4] °आदीनि B_3. [5] नरसिंह° A_1.

---

७. शब्दादिवर्गः

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ॥ १ ॥
आरवारावसंरावविरावा अथ मर्मरः ।
स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ॥ २ ॥

(वि.) शब्द इति—शब्द्यते इति [1]शब्दः । 'शब्द शब्दक्रियायाम्' । निनदतीति निनादः । निनदश्च । 'णद अव्यक्ते शब्दे' । [2]ध्वनतीति ध्वनिः । [3]ध्वानश्च । 'ध्वन शब्दे' । [4]रूयते रवः । आरवः । आरावः । संरावः । विरावश्च । 'रु शब्दे' । स्वनतीति स्वनः । स्वानश्च । 'स्वन शब्दे' । निर्घुष्यते[5] निर्घोषः । 'घुषिर् विशब्दने' । नितरां ह्रादते निर्ह्रादः । 'ह्राद अव्यक्ते शब्दे' । नदतीति नादः । 'णद अव्यक्ते शब्दे' । निस्वाननिस्वनशब्दौ स्वानशब्दवद्बोध्यौ[6] । समुद्रघोषादिशब्दनामानि ॥ [7]मर्मरध्वनिर-

त्रास्तीति मर्मरः। वस्त्रपर्णस्वननाम॥ [8]शिङ्क्ते शिञ्जितम्। 'शिजि अव्यक्ते शब्दे'। भूषणध्वनिनाम॥ १-२॥

[1] शब्दयति D_1; शब्द उक्तः Pt_1, Pt_2. [2] ध्वन्यते K_3; ध्वननं Pt_1, Pt_2. [3] ध्वनश्च W_1. [4] रौति Pt_1, Pt_2. [5] निर्घोषति Pt_1, Pt_2. [6] ज्ञेयौ W_2; विज्ञेयौ B_2; नितरां स्वनतीति Pt_1, Pt_2. [7] वस्त्रादिध्वनिः मर्मरध्वनिः अत्रास्तीति B_2. [8] शिञ्जतीति Pt_1, Pt_2.

(पा.) शब्दे—विरावाः। [1]रावशब्दोऽपि साधितः। पृथु भाषार्थ(?) इति चुरादिपाठाद् रौतेर्भाषार्थत्वात् णिच्[2]। प्रयोगश्च[3]। 'समाविशद्भीषणरावगह्वरम्' इति। अव्यक्तशब्दनामानि॥ अथ मर्मरः—पर्णानाम्। वस्त्रपर्णानां रावः मर्मरः स्यात्॥ भूषणानां च शिञ्जितम्। भूषणध्वनिः शिञ्जितं स्यात्। 'शिञ्जापरशुशिशिरपिशुनशिखाश्रेणयः'[4] इत्यूष्मभेदपाठात् तालव्यादिः। शिञ्जैव[5] शिञ्जानम्। 'शिञ्जानमञ्जुमञ्जीरविरञ्जितपदाम्बुजाम्' इति प्रयोगश्च॥ १-२॥

[1] A_1 adds लक्ष्यलक्षणदुर्घट°. [2] A_1 adds अत एव राव इति. [3] A_1 adds सप्तकुमारिकापादनकार°. [4] A_1 adds श्येनः. [5] B_3 omits the three words.

निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि।
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः॥ ३॥

(वि.) निक्वाण इति—[1]निक्वणतीति निक्वाणः। निक्वणः। क्वाणः। क्वणः। क्वणनम्। एतानि [2]वीणादिवाद्यस्वननामानि॥ वीणायाः क्वणिते [3]प्रादेः [4]प्रक्वाणः, प्रक्वणादयः। प्राद्युपसर्गे क्वणतिधातुजाः प्रक्वाणप्रक्वणादयः वीणायाः क्वणिते[5] वर्तन्ते। निक्वाणादयस्तु वीणादिसर्ववाद्यध्वनौ वर्तन्त इत्यर्थः। 'वण क्वण शब्दे'॥ ३॥

[1] नितरां क्वणति Pt_1, Pt_2. [2] °सर्ववाद्य° I, K_1, K_3, U. [3] प्राद्युपसर्गे D_2, K_3, W_1. [4] प्रकर्षेण क्वणति Pt_1, Pt_2. [5] एव U.

(पा.) निक्वाणो—क्वणनमित्यपि। वीणादिध्वनिनामानि॥ वीणायाः—प्रक्वणादयः। वीणामात्रध्वनिनामानि[1]॥ अनुक्तम्—'मार्जना मुरजध्वानः'। [2]मुरजध्वनिर्मार्जना स्यात्॥ 'गुण्डिलो मर्दलध्वानः'। मर्दलध्वनिर्गुण्डिलः स्यात्॥ ३॥

[1] A_1 adds कल्याणनिक्वणवीणाकलक्वाणः। वेणुं . . . [2] °जन्य° A_1.

कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ।
स्त्री प्रतिश्रुत् प्रतिध्वाने गीतं गानमिमे समे ॥ ४ ॥

इति शब्दादिवर्गः

(वि.) कोलाहल इति—कोलान् वराहानाहलतीति[1] कोलाहलः । 'हल विलेखने'। कल्यते [2]शब्द्यते कलकलः[3] । 'कल शब्दसंख्यानयोः'। '[6]कल किल क्षेपे' इति वा धातुः । अव्यक्तनानावचनमहाध्वनिचयनामनी[4] ॥ वाश्यते इति वाशितम् । 'वाश्टृ शब्दे'। मृगपक्षिरवनाम ॥ प्रतिश्रूयते प्रतिश्रुत् । 'श्रु श्रवणे'। [5]प्रतिध्वाननाम ॥ गीयते गीतम् । गानं च । 'कै [6]गै रै शब्दे'। गीतध्वनिनामानि ॥ ४ ॥

इत्यमरकोशपदविवृतौ शब्दादिवर्गः

[1] आहरति Y.　[2] Pt_1, Pt_2 add अव्यक्तं.　[3] वीप्सायां(अभीक्ष्णे° W_2, Y) द्विर्भावः B_2, K_5.　[4] °निचय° B_1, D_1.　[5] प्रतिध्वनतीति, 'ध्वन शब्दे' B_2; प्रतिध्वननं Pt_1, Pt_2.　[6] B_2 adds 'गै गाने'.

(पा.) कोलाहलः कलकलः । बहुध्वनिनामनी ॥ तिरश्चां वाशितं रुतम् । मृगपक्षिणां ध्वनिर्वाशितं[1] स्यात् । 'शिवं वा शशवाशितम्' इति कर्पिणाभ्युदयप्रयोगात् (१८. ९२) तालव्यमध्यः । 'वासितं भावितं रुते' इति रुद्राभिधानाद् दन्त्यमध्यश्च भवति ॥ अनुक्तम्—'गवां तु रम्भितं हुम्फा'। गवां ध्वनिनामनी ॥ 'बुक्कनं भषितं शुनः'। शुनकध्वनिनामनी ॥ स्त्री—प्रतिध्वाने । गुहादिप्रतिबिम्बितध्वनिनामनी ॥ गीतं—समे । गीतनामनी । इमे समे इत्यनेन रागगीत्यादिकं गीतं प्रावेशिक्यादिंध्रुवारूपं [2]मन्द्रकादिरूपं गानमिति विशेषपक्षं विहाय 'गीतं गानं च गेयं च [3]गीतिर्गान्धर्वमित्यपि' इति सामान्यपक्षमवलम्ब्योक्तम् ॥ ४ ॥

इति [4]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथविरचितेऽमरपदपारिजाते शब्दादिवर्गः

[1] A_1 adds रुतं च.　[2] मद्रक° A_1.　[3] रीतिः A_1.　[4] °नरसिंह° A_1.

८. नाट्यवर्गः

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥

(वि.) निषाद इति—निषीदन्त्यत्र स्वरा इति निषादः । 'षद्लृ विशरणगत्यवसादनेषु' । [1]ऋषभस्वरसंवादित्वात् ऋषभः । गां वाचं धारयतीति गान्धारः । गन्धं गृह्णातीति गान्धं घ्राणेन्द्रियम् । तस्मिन् इयर्तीति वा गान्धारः । 'ऋ गतौ' । षट्सु [2]नासाकण्ठोरस्तालुजिह्वादन्तस्थानेषु जायत इति षड्जः । 'जनी प्रादुर्भावे' । [3]मध्यं मातीति मध्यमः । 'मा माने वर्तने[4] च' । मोक्षं धावतीति धैवतः । 'धावु गतिशुद्ध्योः' । धीर्हृत् तद्वत्सु नाभ्यादिस्थानेषु भवो वा धैवतः[5] । पिकैः पञ्च्यते पञ्चमः । 'पचि विस्तारवचने' । पञ्चसु[6] स्थानेषु मातीति वा । 'मा माने वर्तने च' । एतानि सप्त [7]तन्त्रीकण्ठोत्थितस्वरनामानि ॥ स्वयं राजते स्वरः । 'राजृ दीप्तौ' । श्रुतिस्थाने [8]स्वहृदयं रञ्जयतीति वा । 'रञ्ज रागे' ॥

'*षड्जं मयूरा ब्रुवते [9]गावस्त्वृषभभाषिणः ।
अजाविकं तु गान्धारं पिकः[10] कूजति पञ्चमम् ।
धैवतं हेषते[11] वाजी निषादं बृंहते[12] गजः ॥'

इति ॥ १ ॥

[1] वृषभ° D_2. [2] उदर° K_1. [3] मध्ये B_2, D_1. [4] वर्तमाने च W_1. [5] दैवत इति वा पाठः, तत्पक्षे दिवि सुखप्राप्तिस्थाने भवः B_2. [6] पञ्चस्थानेषु B_1. [7] °कण्ठोक्त° A, B_1, T. [8] सहृदयं D_2; स्वं हृदयं W_1. [9] गावो ऋषभ° D_2. [10] क्रौञ्चः क्वणति मध्यमं B_2, D_1, W_1, Y; पुष्पसाधारणे काले पिकः कूजति पञ्चमम् D_2, I, K_1, U. [11] भाषते B_1, W_2. [12] ब्रुवते गजाः B_1, W_2.

* षड्जं रौति मयूरस्तु—Nārada. Apte's Dict., p. 1583.

(पा.) निषाद—स्वराः । तन्त्रीकण्ठयोरुभयोर्जायमाना निषादादयः सप्त स्वरशब्दवाच्याः । तत्स्वरूपे नारदः—

'षड्जं मयूरो वदति गावो [1]रम्भन्ति चर्षभम् ।
अजाविकौ तु गान्धारं क्रौञ्चो नदति मध्यमम् ॥

पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।
अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥' (सं. म. १. १. १३-१४)

इति ॥ १ ॥

[1] नर्दन्ति B_4; रम्भत्यथ° A_1; चातको ऋषभं तथा, अजो विरौति इति मुद्रितग्रन्थे.

काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ॥ २ ॥
(नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ।
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते ॥)

(वि.) काकलीति—कुः[1] सूक्ष्मः स चासौ कलश्च[2] काकली । सूक्ष्मकलनाम ॥ कं सुखं लातीति कलः । 'ला दाने' । कलयतीति वा । 'कल शब्दे' । अव्यक्तमधुरध्वनिनाम ॥ [3]मन्दते शनैः [4]निःसरतीति मन्द्रः । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । गम्भीरध्वनिनाम ॥ तारयति संदेहं[5] तारः । 'तॄ प्लवनतरणयोः' । अत्युच्चध्वनिनाम ॥ त्रयस्त्रिषु । [6]कलमन्द्रताराः त्रिषु वर्तन्ते, विशेष्यनिघ्ना इत्यर्थः ॥ २ ॥

[1] कुत्सितश्चासौ कलश्च काकलः सोऽत्रास्तीति B_2; काकलिः A, T, U. [2] कलिः K_1. [3] मन्यते D_2, I, U, W_2. [4] निरस्यति D_1. [5] संदेहे W_1; संदेहान् A; स्थानेभ्यः स्वरमिति Pt_2. [6] I adds त्रयः.

(पा.) काकली—सूक्ष्मे । [1]कलसूक्ष्मध्वनिः काकली स्यात् । ध्वनौ—कलः । मधुरास्फुटध्वनिः कलः स्यात् । मन्द्रस्तु गम्भीरे । गम्भीरध्वनिः मन्द्रः स्यात् । तारोऽत्युच्चैः । अत्युच्चध्वनिः तारः स्यात् ॥ त्रयस्त्रिषु । एते त्रयः त्रिष्विति वाच्यलिङ्गाः । [2]कला रुतिः, मन्द्रा रुतिः इत्यादि ॥ २ ॥

[1] सूक्ष्मकण्ठध्वनिः B_3. [2] कला मन्द्रा तारा रुतिरित्यादि B_3.

समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥

(वि.) समेति—[1]समन्वितोऽनुगतो लयः श्रुतादिर्यत्र समन्वितलयः । एकः समः तालो मानमस्य एकतालः । एकतान इति वा पाठः । तालाद्यन्वितलयनाम ॥ वेति

प्रजायते स्वरोऽस्यामिति वीणा । 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' । वण्यत इति वा वीणा । 'वण शब्दे' । वल्लन्ते स्वरा अस्यामिति [2]वल्लरी । 'वल्ल संचलने' । विविधं [3]पञ्च्यते स्वरा अत्रेति विपञ्ची । 'पचि व्यक्तीकरणे' । वीणानामानि ॥ परितो [4]वदति स्वरानिति परिवादिनी । 'वद व्यक्तायां वाचि' । सप्ततन्त्रीयुक्तवीणानाम ॥ ३ ॥

[1] सम्यगन्वित: Pt_2;

> नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः ।
> स एककण्ठे मध्य: स्यात् तार: शिरसि गीयते ॥ B_1, D_1.

[2] वल्लक: सौत्र: सोऽस्या अस्तीति वल्लकी इति वा । अयमेव हृद्यार्थ: B_2, D_1, K_2; वलि: सौत्रो धातुः, हृद्यार्थ: Y. [3] पञ्चते A, T, W_1. [4] वादयत्यवश्यं सप्तस्वरान् B_1, D_1, I.

(पा.) समन्वितलयस्त्वेकताल: । अनुगतद्रुतादिमानगीतादिवस्तु एकताल: स्यात् । [1]एकतान इति कतिचित्[2] । वीणा तु वल्लकी विपञ्ची । वीणानामानि ॥ सा तु— परिवादिनी । सप्तभिः [3]तन्त्रीभिः प्रोता वीणा परिवादिनीत्युच्यते ।

> 'तन्त्र्यश्चेत् सप्त सप्तास्या चतुर्दश चतुर्दशी ।
> एकादशैकादशी [4]भिदैवं वीणा त्रयोदशी ॥' इति ।

परिवादिनी बहुविधा । [5]सप्ततन्त्री परिवादिनीति कथिता ॥ ३ ॥

[1] एकतानमिति A_1. [2] A_1 adds कथयन्ति. [3] तन्त्रिभि: B_3. [4] चेष्टेव A_1. [5] B_3 adds तत्र.

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ ४ ॥

(वि.) ततमिति—तन्यते ततम्[1] । [2]तन्त्रीजननात्ततम् । वीणादिवाद्यनाम ॥ चर्मणा आनह्यत इत्यानद्धम् । 'णह [3]बन्धने' । मुरजादिवाद्यनाम ॥ सुषिः रन्ध्रमस्यास्तीति सुषिरम् । [4]शुषिरं वा । [5]वंशादिवाद्यनाम ॥ हन्यत इति घनम् । 'हन हिंसागत्योः' । [6]तालादिकांस्यवाद्यनाम ॥ ४ ॥

[1] B_1, D_1, K_5 add 'तनु विस्तारे'. [2] °जनितं B_2. [3] आबन्धने W_2. [4] तालव्याद्येव इति प्राच्या: B_2, D_1; तालव्यमिति B_1, K_5; W_2 adds आहु:. [5] °रन्ध्रवाद्य° B_2. [6] तालाख्यादि° W_2.

(पा.) ततं—वाद्यम्। वीणादिवाद्यं ततं स्यात्॥ आनद्धं मुरजादिकम्। मुरजादिवाद्यमानद्धं स्यात्॥ वंशादिकं तु सुषिरम्। वंशादिवाद्यं सुषिरं स्यात्॥ कांस्यं—घनम्। [1]कांस्यं तालादिकं वाद्यं घनं स्यात्॥ [2]केचन मुरजादिवाद्यमपि घनमिति वदन्ति। कांस्यं तालादिवाद्यं ततमिति च[3] कथयन्ति॥ ४॥

[1] B_3 adds कांस्यविकारः.　　[2] केचित् B_3, B_4.　　[3] B_3 adds केचित्.

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्।
मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः॥ ५॥

(वि.) चतुर्विधमिति—वाद्यत इति [1]वाद्यम्। वादित्रं च[2]। आ समन्तात् [3]तोद्यत इत्यातोद्यम्। 'तुद व्यथने'। [4]ततादिचतुर्विधवाद्यनामानि॥ मृद्यत इति मृदङ्गः। मृत् मृत्स्ना अङ्गे यस्येति वा। 'मृद मर्दने'। मुरतीति मुरः। 'मुर संवेष्टने'। मुरः चर्मपट्टिकासंवेष्टनम्। तस्माज्जातो मुरजः। मृदङ्गनामनी॥ अङ्के भवः अङ्क्यः। [5]अङ्कोपरि निधाय वाद्यते वा। हरीतक्याकृतिमृदङ्गनाम॥ आलिङ्ग्यते आलिङ्ग्य वाद्यत इत्यालिङ्ग्यः। गोमुखाकृतिमृदङ्गनाम॥ अङ्की आलिङ्गी इति वा पदच्छेदः। तदा तदाख्या ततो भवतीति विग्रहः। [6]ऊर्ध्वीकृत्य वाद्यत इत्यूर्ध्वकः। यवमध्याकृतिमृदङ्ग-नाम॥ ५॥

[1] वादयन्ति एनमिति Pt_2.　　[2] 'वद व्यक्तायां वाचि' D_1, I.　　[3] आतुद्यत इति B_1, D_2, Pt_2.　　[4] तन्त्र्यादि A, B_1, T, W_1; यदाह भरतः—

'ततं चैवावनद्धं च घनं सुषिरमेव च।
चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम्॥' इति (ना. शा. २८. १) B_2, D_2, I.

[5] अङ्के उपनिधाय D_1.　　[6] ऊर्ध्वस्थः सन् कायति Pt_2.

(पा.) चतुर्विधमिदं—नामकम्। इदं चतुर्विधं वाद्यम्। वादित्रमातोद्यमिति च नामद्वयवद् भवति। वादित्रशब्दो वाद्यध्वनावपि वर्तते। 'तूर्योऽस्त्री वाद्यनिर्घोषे[1] वादित्रं वादनं च तत्' इति वैजयन्ती (पृ. १४७, श्लो. १३६)। मृदङ्गा मुरजाः। मुरजनामनी॥ वक्ष्यमाणभेदापेक्षया बहुवचनम्। भेदाः—त्रयः। अङ्क्यः, आलिङ्ग्यः, ऊर्ध्वक इत्येते त्रयो मुरजभेदाः। 'पूर्वः पूर्वो महानेषामेतत्[2] पुष्करमण्डले' इति वैजयन्त्यां (पृ. १४६, श्लो. १३०) परिमाणभेदोऽभ्यधायि।

'हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः ।
आलिङ्ग्यश्चैव गोपुच्छ[3] आकृत्या संप्रकीर्तितः ॥'

इति [4]सुभूतिटीकायामाकृतिभेदः[5] कथितः ॥ ५ ॥

[1] °निर्घोषो A_1, B_3. [2] वादने मूर्च्छनानने A_1, B_3. [3] पुच्छस्य B_3. [4] सुबोधिनी° A_1. [5] °भेदात् भेदः A_1.

स्याद्यशःपटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान् ।
आनकः पटहोऽस्त्री स्यात् कोणो वीणादिवादनम् ॥ ६ ॥

(वि.) स्यादिति—[1]यशोनिमित्तं पटहः यशःपटहः । ढगिति [2]व्यक्तं कायतीति ढक्का । 'कै शब्दे' । यात्रादौ [3]वाद्यमानयशःपटहनाम ॥ बिभेति अस्याः[4] परसैन्यमिति[5] भेरी । 'ञिभी भये' । दुन्दु इति शब्दं भाषते दुन्दुभिः । शत्रुहृदयं [6]भिद्यत इति वा । भेरीनामानि ॥ आ समन्तात् नदतीत्यानकः । 'णद अव्यक्ते शब्दे' । अनेन स्वपक्षः आ समन्तात् अनिति[7] वा । 'अन प्राणने' । पटवत् हन्यते पटहः । पणव इति पाठे पण्यते स्तूयते पणवः । 'पण व्यवहारे स्तुतौ च' । परसेनाभीत्यर्थवाद्यनामानि ॥ अनेन कुणति वीणादिवाद्यमिति कोणः । 'कुण शब्दोपकरणयोः' । वीणादिवादनदण्डनाम ॥ ६ ॥

[1] यशसे D_1, W_1; यशसि A, B_1, T; यशोऽर्थं Pt_2; पटु यथा तथा हन्यते, 'हन हिंसागत्योः' B_2, U. [2] अव्यक्तं D_1, I, K_1, W_1; वादयति K_2. [3] हन्यमान° B_1, D_1, K_1, W_1. [4] रवात् B_2, D_2; रवेण K_5, W_2. [5] °सेना B_2, K_5, U, W_1. [6] द्यतीति वा, 'दोऽवखण्डने' B_2, D_1. [7] B_2 adds प्राणिति.

(पा.) स्यात्—ढक्का । सामन्तढक्कानामनी । भेरी—पुमान् । भेरीनामनी । आनकः—स्यात् । अस्त्रीशब्द उभयविशेषणम् । 'पटहस्त्वानकोऽस्त्रियाम्[1]' इति वैजयन्ती (पृ. १४६, श्लो. १३४) । पटहनामनी ॥ अनुक्तम्—'वंशस्तु वेणुर्मुरली' । [2]मुरलीनामानि ॥ 'शृङ्गं खुरमुखं समे' । शृङ्गनामनी । आन्ध्रभाषया 'बूरगोम्मु' ॥ 'काहली तु कुहाला स्यात्' । काहलीनामनी ॥ 'ढेङ्गुरा जयघण्टिका' । आन्ध्रभाषया 'जांयंट[3] पेरु' । 'ताली द्वयोः कांस्यतालः पुमान् स्त्री तालपत्रिका' । तालनामानि ॥ कोणो वीणादिवादनम् । वीणादिवादनसाधननाम ॥ ६ ॥

[1] अस्त्रियौ इति मुद्रितग्रन्थे. [2] वेणु° A_1. [3] 'जाघटपेर्लु' A_1.

वीणादण्डः प्रवालः स्यात् ककुभस्तु प्रसेवकः ।
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ॥ ७ ॥

(वि.) वीणादण्ड इति—प्रवलन्ते सर्वे [1]स्वरा अत्रेति प्रवालः । 'वल संवरणे [2]संचरणे च' । [3]प्रचाल इति वा पाठः । 'चल कम्पने' । वीणादण्डनाम ॥ स्वालम्बनाय दण्डं [4]कङ्कते आकाङ्क्षतीति ककुभः । 'ककि लौल्ये' । प्रकर्षेण सेव्यते प्रसेवकः । 'षेवृ सेवने' । दण्डा[5]लम्बनायालाबूमूलनिक्षिप्तसंदंशाकार[6]सारदारुनाम[7] ॥ [8]कुल्यते सम्यक् स्त्यायतेऽनेन शब्दः कोलम्बकः । 'कुल संस्त्याने बन्धुषु च' । के शिरसि तन्त्रीरवलम्बते इति वा कोलम्बकः । 'लबि शब्देऽवस्रंसने च' । वीणायाः दण्डादिसर्वपरिकरनिष्पन्न-[9]मूर्तिनाम ॥ उपनह्यन्ते तन्त्र्योऽनेन उपनाहः । 'णह बन्धने' । निबध्यन्ते[10] तन्त्र्योऽनेन निबन्धनम् । 'बन्ध बन्धने' । तन्त्रीबन्धस्थाननामनी ॥ ७ ॥

[1] स्वनाः B_1, D_1, W_2. [2] संचलने D_2, K_5, T. [3] प्रवार U. [4] ककते K_5, U, W_1. [5] °अवलम्बनाय K_5, U. [6] °स्वर° U. [7] °साधनविशेषपर्वनाम B_2, W_2. [8] कोलति W_2. [9] °शरीर° W_1. [10] संबध्यन्ते B_2.

(पा.) वीणादण्डः प्रवालः स्यात् । वीणादण्डनाम ॥ ककुभस्तु प्रसेवकः । दण्डावलम्बनायालाबूमूलनिक्षिप्तसंदंशाकारसारदारुनामनी । भाषया 'बैसण' ॥ कोलम्बकस्तु कायोऽस्याः । वीणाया दण्डादिसर्वपरिकरनिष्पन्नमूर्तिः कोलम्बकः स्यात् । उपनाहो निबन्धनम् । तन्त्रीनिबन्धनस्थाननामनी । भाषया 'करिभे' ॥ अनुक्तम्—'वीणागुणे स्त्रियां तन्त्रीः' । वीणागुणनाम । 'अवितॄस्तृतन्त्रिभ्य ईः' (उ. ३. १५८) इति ईःप्रत्ययान्तत्वात् सुलोपो नास्ति । तन्त्रीः तन्त्र्यौ तन्त्र्यः । हे तन्त्रीः इत्यादि । अत्र विशेषः । लक्ष्मीप्रभृतीनाम् 'अम्बार्थनद्योर्ह्रस्वः' (७. ३. १०७) इति ह्रस्वत्वं केचन नेच्छन्ति । प्रयोगास्तु बहवो दृश्यन्ते ।

'हे लक्ष्मि स्यादलिन्द्राणामपि संस्पृश मे वपुः ।
तन्त्रीः कर्णामृतं कूज तन्द्रीः संश्रय चक्षुषी ॥
वातप्रमीर्वसाटव्यां तरीस्तर्पय चातकम् ।
. . . . . धत्स्व स्तनांशुकम् ॥'

इत्यादि ॥ ७ ॥

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ॥ ८ ॥

(वि.) वाद्यप्रभेदा इति—डमिति [1]शब्दमियर्ति डमरुः। 'ऋ गतौ'। मड्डु इति [2]उच्चारणात् मड्डुः। डिंडिमिति शब्दं करोतीति डिण्डिमः[3]। झर्झशब्दं करोतीति [4]झर्झरः। मृद्यत इति [5]मर्दलः। 'मृद क्षोदे'। [6]पणाज्जायते पणवः। पण्यते स्तूयतेऽनेनेति वा। 'पण व्यवहारे स्तुतौ च'। एते च अन्ये च वाद्यप्रभेदाः॥ नृत्यतीति नर्तकी। 'नृती गात्रविक्षेपे'। [7]लसति क्रीडति रङ्गभूमाविति लासिका। 'लस श्लेषणक्रीडनयोः'॥ [8]नृत्तकारिणीनामनी॥ ८॥

[1] K_5 adds अव्यक्तं. [2] उच्चारणत्वात् B_1. [3] मिनोति प्रक्षिपतीति Pt_2. [4] झर्झते भाषते, झर्झेति शब्दं रातीति Pt_2. [5] मद्दलः W_1. [6] पणायते U, W_2. [7] लस्यति D_1. [8] नृत्य° K_5, W_1; नर्तनकरीणां A, B_1, T.

(पा.) वाद्यप्रभेदाः—अन्ये च। डमर्वादयश्चान्ये[1] घण्टानिःसाणादयश्च[2] वाद्यभेदाः। नर्तकी—समे। नृत्तकारिणीनामनी॥ अनुक्तम्—'रङ्गः स्यान्नर्तनस्थानम्'। नर्तनस्थलं[3] रङ्गः स्यात्॥ 'सूत्रधारस्तु सूचकः'। सूत्रधारनाम॥ ८॥

[1] A_1 adds अन्यशब्दगृहीत°. [2] निःसानः B_4. [3] °स्थानं B_3.

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्।
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम्॥ ९॥
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने।

(वि.) विलम्बितमिति—[1]विलम्बितं द्रुतं मध्यम् इति लयविशेषाः क्रमात् तत्त्वम् ओघः घनमित्युच्यन्ते। तलन्ति गीतवाद्यनृत्तानि तिष्ठन्त्यत्र तालः। 'तल प्रतिष्ठायाम्'। [2]मध्यकालक्रियायाः परिच्छेदकनाम॥ लीयतेऽत्रेति लयः। 'लीङ् श्लेषणे'। [3]न्यूनाधिकरहिततालसाम्यनाम[4]॥ तण्डुना शिवेनोपदिष्टं ताण्डवम्। उद्धतप्रयोगनर्तननाम। नट्यते नटनम्। 'नट नृत्तौ'। नटस्य कर्म नाट्यम्। [5]नटनर्तननाम॥ लसतीति लास्यम्। 'लस श्लेषणक्रीडनयोः'। सुकुमारप्रयोगनर्तननाम॥ नृत्यतीति नृत्यम्। 'नृती गात्रविक्षेपे'। नर्तननामानि[6]॥ ९॥

[1] Pt_2 adds विलम्बन्ते करपदादयोऽत्रेति विलम्बितम्। प्रत्येकं गतिविशेषत्वात्। 'लबि लम्बने'। द्रवन्ति त्वरन्ते करचरणादयोऽत्रेति द्रुतम्। 'द्रु गतौ'। विलम्बितद्रुतयोर्मध्ये भवत्वान्मध्यम्. [2] मेयायाः गानक्रियायाः K_5, W_2; एषां पर्याया इत्येके। नाट्येऽपि विलम्बितादि-

लयानुसारेण क्रमात् तत्त्वाद्या वाद्यप्रभेदप्रकाराः B_2, D_1, K_5; कालक्रियायाः मानं परिमाणमिति कालक्रियामानम् B_2. [3] °आधिक्य° W_2. [4] °सामान्य° K_2. [5] °नृत्त° B_2, D_2, W_2. [6] गात्रविक्षेपणनृत्त° B_2, W_2.

(पा.) विलम्बितं—क्रमात्। विलम्बितादिमानानि[1] तत्त्वादिसंज्ञानि भवन्ति। तालः कालक्रियामानम्। कालस्याङ्गुलिकरक्रियया[2] कृतं मानं तालः स्यात्। लयः साम्यम्। सर्वाभिनयसाम्यं लयः स्यात्। अथाक्षर्जं—नर्तने। [3]नटनर्तननामानि। अक्षजशब्दस्थाने-ऽस्त्रियामिति, नृत्यशब्दस्थाने नृत्तमिति च पठन्ति[4]॥ ९॥

[1] आदीनि B_3; B_4 omits मानानि. [2] अङ्गुल्यादिचेष्टया B_3. [3] नटननामानि A_1. [4] B_4 adds केचित्.

तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम्॥ १०॥
भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका॥ ११॥

(वि.) तौर्यत्रिकमिति—तूर्याणां त्रिकं तौर्यत्रिकम्[1]। तूर्याणां संबन्धि तौर्यम्। तच्च त्रिकं च तौर्यत्रिकम्। [2]नटकर्म नाट्यम्। समुदितनृत्तगीतवाद्यनाम॥ भ्रूभ्यां कुंसयतीति [3]भ्रकुंसः। भ्रुकुंसश्च[4]। भ्रकुंसश्च। 'कुसि भाषायाम्'। स्त्रीवेषधारिनर्तक-पुरुषनामानि॥ नाट्योक्तौ नटव्यवहारे नामान्याह। अर्जतीत्यज्जुका। 'अर्ज अर्जने'। नाट्योक्तौ गणिकानाम॥ १०–११॥

[1] तूर्यं मुरजादिः तत्र भवः शब्दः तौर्यः, त्रयोऽवयवा अस्येति त्रिकम्। तौर्येण त्रिकं W_1, Pt_2. [2] नटस्य° I, W_1; नृत्तं गीतं वाद्यम् एतत्त्रयसमुदितनटनमत्रेति B_2. [3] चेष्टादिकं भ्रियतेऽत्रेति भ्रं, तदिङ्गितसूचकचलनविशेषः। तेन कुं भूमिं तत्रत्यजनं सादयति गमयतीति, आहत्य भ्रकुंस इत्यर्थो जायते B_2. [4] भ्रुकुंशश्च A.

(पा.) तौर्यत्रिकं—त्रयम्। नृत्तगीतवाद्यानि त्रीणि तौर्यत्रिकम्। इदं[1] त्रयं नाट्यं स्यात्। तत् प्रेक्षणार्थं स्याच्चेत् संगीतं भवति। '[2]संगीतं प्रेक्षणार्थेऽस्मिन्' इति वैजयन्ती (पृ. १४१, श्लो. ७२)। भ्रकुंसश्च—पुरुषः। भ्रकुंसादयः [3]षडपि स्त्रीवेषधारि-नर्तकपुरुषनामानि। भ्रकुंसशब्दो रुशब्दादिश्च [4]ऋकारादिश्च भवति। 'स भ्रूकुंसो भ्रुकुंसश्च भृकुंसश्च भ्रकुंसवत्' इति वैजयन्ती (पृ. १४१, श्लो. ६७)। अनुक्तम्—'पात्राण्यधिकृता नाट्ये'। नाट्ये नियुक्तास्ते पात्राणीत्युच्यन्ते। 'तेषां वेषस्तु भूमिका'।

तेषां वेषो भूमिका स्यात् ॥ नाट्योक्तौ । अङ्गहारावधि अधिकारवचनम् । तस्मादितःपरं वक्ष्यमाणाः शब्दाः नाट्यविषयाः । व्यवस्थिताधिकारविषयत्वाद्[5] देवकुमारादिशब्दा इतरविषयाश्च भवन्ति । गणिकाज्जुका[6] । लञ्जिका [6]अज्जुका स्यात् ॥ १०–११ ॥

[1] A_1 omits इदं त्रयं. [2] संगीतकमिति मुद्रितपुस्तके. [3] B_3, B_4 omit. [4]ऋवर्णादि° A_1. [5] A_1 omits विषय. [6] अर्जुका A_1.

भगिनीपतिरावुत्तो भावो विद्वानथावुकः ।
जनको युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥

(वि.) भगिनीपतिरिति—अवति भगिनीमिति आवुत्तः । 'अव रक्षणे' । भगिनीपतिनाम ॥ भावयतीति भावः । [1]विदूषकनाम ॥ अवतीति आवुकः । 'अव रक्षणे' । जनकनाम ॥ कुत्सितं मारयतीति कुमारः । 'मृङ् प्राणत्यागे' । युवा चासौ राजा च युवराजः । कुमारयतीति वा कुमारः । 'कुमार क्रीडायाम्' । प्रेष्यादीन् बिभर्तीति भर्ता । तस्य दारकः भर्तृदारकः । पोष्यान् दारानिव बिभर्तीति वा । 'डुभृञ् धारण-पोषणयोः' । युवराजनामनी ॥ १२ ॥

[1] विदुषां W_2; विदुषः D_1, I, K_5.

(पा.) भगिनीपतिरावुत्तः । ज्येष्ठकनिष्ठभगिन्योः पतिः आवुत्तः स्यात् । अनुक्तम्—'पतिरार्योऽप्यार्यपुत्रः' । पतिरार्य आर्यपुत्रश्च स्यात् ॥ भावो विद्वान् । तत्र विद्वान् भावः स्यात् ॥ अथावुको जनकः । पिता आवुकः स्यात् ॥ युवराजः—भर्तृदारकः । युवराजश्च कुमारश्च भर्तृदारकः स्यात् ॥ अनुक्तम्—'गोस्वामिनो राजसुताः[1]' । अन्यराजपुत्रा गोस्वामिन इत्युच्यन्ते ॥ १२ ॥

[1] राजपुत्राः B_4.

राजा भट्टारको देवस्तत्सुता भर्तृदारिका ।
देवी कृताभिषेकायामितरासु तु भट्टिनी ॥ १३ ॥

(वि.) राजेति—भटन्ति उद्धतं भाषन्ते भट्टाः । 'भट परिभाषणे' । भट्टान् शत्रून् अरति पीडयतीति [1]भट्टारकः । 'अर पीडने' । दीव्यतीति देवः । 'दिवु क्रीडादौ' ।

भर्तृदारिकाशब्दः भर्तृदारकशब्दवत्। राजपुत्रीनाम ।। दीव्यतीति देवी। [2]अभिषिक्तराजपत्नीनाम ।। भटति उद्धतं भाषते [3]भट्टिनी। अकृताभिषेकराजभार्यानाम ।। १३ ।।

[1] भटाः सेवकाः तैर्युद्धमुत्तारयति 'तॄ प्लवनतरणयोः' Pt_2. 　[2] कृताभिषेक° W_2.
[3] D_1, Y omit 3 pages; 'भट परिभाषणे' W_2.

(पा.) राजा—देवः। नृपः भट्टारको [1]देवश्च स्यात्। नामान्ते प्रयुक्ता अप्येते पूज्यमपि कथयन्ति। 'पादा इति नामान्ते देवो भट्टारको वापि' इति हलायुधः (अ. मा. १. १५५)। तत्सुता भर्तृदारिका। राजसुता[2] भर्तृदारिका स्यात् ।। देवी कृताभिषेकायाम्। महिषीनाम ।। इतरासु तु भट्टिनी। अन्या राजपत्न्यः[3] भट्टिन्यः स्युः ।। १३ ।।

[1] A_1 omits. 　[2] राजपुत्री B_1. 　[3] °भार्याः B_1.

अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः।
अम्बा माताथ बाला स्याद् वासूरार्यस्तु मारिषः ।। १४ ।।

(वि.) अब्रह्मण्यमिति—ब्राह्मणोऽवध्य इत्युक्तिः [1]अब्रह्मण्यम्। ब्रह्मणो हितं ब्रह्मण्यं, शान्तता, तदविद्यमानमत्रेति वा। अवध्योक्तिनाम ।। राज्ञः श्यालः[2] राजश्यालः। राष्ट्री राज्ञी तस्या भ्राता राष्ट्रियः। राजपत्नीभ्रातृनाम ।। अम्ब्यते शब्द्यते [3]बालैरित्यम्बा। 'अबि शब्दे'। मातृनाम ।। वसति मातुः समीप इति वासूः। 'वस निवासे'। बालानाम ।। मायामियर्ति गच्छतीति मारिषः[4]। 'ऋ गतौ'। [5]आर्यनाम ।। १४ ।।

[1] ब्रह्मणि साधु न भवतीति, अवयवानर्थ्ये इत्येके D_1, I, K_5; अवयवानर्थमित्येके Y.
[2] स्यालः Y. 　[3] भावैः A, B_1, T. 　[4] मारयति पापानिति मारिषः। मर्षणात् सहनाद्वा Pt_2.
[5] आरात् पापकर्मभ्यो यातीत्यार्यः, अरणीयः अभिगम्यो वा Pt_2.

(पा.) अब्रह्मण्यमवध्योक्तौ। अवध्योऽस्मीत्युक्तिरवध्योक्तिः। [1]तस्यामाक्रोशनेऽपि अब्रह्मण्यशब्दः स्यात् ।। राज्ञः—राष्ट्रियः। राज्ञः पत्नीभ्राता राष्ट्रियः स्यात्। अम्बा माता। जननी अम्बा स्यात्। 'अम्ब सरस्वति किमियं तव माता विष्णुवल्लभा [2]देवी'। अथ—वासूः। बालिका वासूरित्युच्यते। 'वासु-देवालयं गत्वा सोमं शंकरमर्चय' आर्यस्तु मारिषः। आर्यनाम। मार्षोऽपि भवति। 'आर्यौ मारिषमार्षकौ[3]' इति वैजयन्ती (पृ. १४४, श्लो. १०६)। अनुक्तम्—'क्षपणाद्या भदन्ताः स्युः'। क्षपणसौगतादयो भदन्ता इत्युच्यन्ते ।। १४ ।।

[1] A_1 omits तस्यां. 　[2] देवि A_1. 　[3] °मार्षिकौ A_1, B_2.

अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे ।
हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥ १५ ॥

(वि.) अत्तिकेति—अत्ति[1] भ्रातृभार्यां वचनैरिति अत्तिका । 'अद भक्षणे' । ज्येष्ठभगिनीनाम ॥ नियतं [2]स्थानं निष्ठा । निःशेषेण[3] वहनं प्रस्तुतकथायाः समाप्तिः निर्वहणम् । समे इति समानार्थे । नाटकस्य [4]निर्वहणाख्यपञ्चमसंधिनामनी ॥ हण्डे इति नीचां प्रति, हञ्जे इति चेटीं प्रति, हला इति सखीं प्रति आह्वानम् । एते त्रयः संबोधनार्थे अव्ययाः ॥ नाट्योक्तयः[5] समाप्ताः ॥ १५ ॥

[1] अत्ति क्षणयति (परुषवचनैः K_5) B_2. [2] अत्र तिष्ठन्ति, 'ष्ठा गतिनिवृत्तौ' B_2. [3] नितरां वहतीति B_2. [4] 'मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिः' U. [5] नाट्योक्तविधिः समाप्तः B_2, I.

(पा.) अत्तिका—ज्येष्ठा । ज्येष्ठभगिनी अत्तिका स्यात् । अनुक्तम्—'कनिष्ठा तु बलाबुसा' । कनिष्ठा[1] स्वसा बलाबुसा स्यात् । निष्ठा—समे । प्रस्तुतकथासंहारः निष्ठा च निर्वहणं च स्यात् । हण्डे—सखीं प्रति । नीचाह्वाने हण्डेशब्दः प्रवर्तते । चेटिकाह्वाने हञ्जेशब्दः । सख्याह्वाने हलाशब्दः[2] । 'हला सौन्दले' । [3]हलिलेशब्दोऽप्यस्ति । 'हलिले[3] जनमध्ये याचितवत्यसि' । हण्डे हञ्जे हलेति शब्दास्त्रयः संबोधनार्थका इति [4]प्राकृतसंजीविन्यामव्ययपरिच्छेदे कथितत्वादव्ययाः ॥ १५ ॥

[1] A_1 omits. [2] B_3 adds प्रवर्तते. [3] हरिते B_3. [4] °संजीवन्यां B_3.

अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥ १६ ॥

(वि.) अङ्गहार इति—अङ्गानां हारोऽन्यत्रानयनम् अङ्गहारः[1] । अङ्गानां विक्षेपोऽङ्गविक्षेपः । स्थानात् स्थानान्तरानयनरूपक्रियानामनी ॥ व्यनक्त्यर्थं व्यञ्जकः[2] । 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' । आभिमुख्येन नीयतेऽनेनार्थः अभिनयः । 'णीञ् प्रापणे' । वाचिकाङ्गिकसात्त्विकाख्यभावसूचकनामनी ॥ अङ्गेन निर्वृत्तम् आङ्गिकम् । सत्त्वेन निर्वृत्तं सात्त्विकम् । सत्त्वोत्कटे[3] मनसि पुलकिताद्यभिनयनामनी ॥ १६ ॥

[1] 'हृञ् हरणे' B_2; स्थानान्तरानयनं Pt_2. [2] K_5 omits 4 lines. [3] सर्वोत्कटे A, B_1, T.

(पा.) अङ्गहारोऽङ्गविक्षेपः । अवयवविक्षेपोऽङ्गहारः [1]स्यात् । व्यञ्जक—समौ । सूच्यार्थसूचननामनी ॥

'निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ।
व्यञ्जकोऽभिनयो यस्तु सूच्यार्थोऽभिनयस्य च ॥'

इत्यनेन सूच्यार्थश्चाभिनयः । अङ्गनिर्वृत्तं स्यादाङ्गिकम् । सत्त्वनिर्वृत्तं स्यात् सात्त्विकम् । द्विशब्दग्रहणेन वाचिकाहार्ययोर्गुणत्वं सूच्यते ॥ १६ ॥

[1] इत्युच्यते B_4.

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥

(वि.) शृङ्गारेति—शृङ्गारो वीरः करुणा अद्भुतः हास्यं भयानकः बीभत्सः रौद्रः चकारात् शान्तश्च[1] । एते शृङ्गारादयो नव रसा भवन्ति । सामाजिकजनेन[2] रस्यन्त इति रसाः । 'रस आस्वादने' । [3]शृङ्गं युवादिकमियर्तीति[4] शृङ्गारः । 'ऋ गतौ' । [5]जुगुप्सादिरहितत्वात् शुचिः । उज्ज्वलति प्रकाशते उज्ज्वलः । 'ज्वल दीप्तौ' । शृङ्गार-रसनामानि ॥ १७ ॥

[1] शान्तिश्च A, T, W_1; वात्सल्यं दशमः Pt_2.　　[2] सामाजिकेन A, B_1, T.
[3] के ते रसा इत्याकाङ्क्षायां क्रमेण प्रतिपादयति B_2.　　[4] शृङ्गं श्रेष्ठं B_1, Y; प्राधान्यं Pt_2.
[5] परिशुद्धत्वात् Pt_2.

(पा.) शृङ्गार—रसाः । शृङ्गारादयोऽष्टौ रसशब्दवाच्याः । चशब्दो मतान्तर-बोधनार्थः[1] ।

'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च नव नाट्यरसाः स्मृताः ॥'
'शृङ्गारवीरौ बीभत्सरौद्रौ हास्यं भयानकम् ।
करुणाद्भुतशान्ताश्च वात्सल्यं च रसा दश ॥'

इति । द्वादशरसा इति केचित् । शृङ्गारः—उज्ज्वलः । शृङ्गाररसनामानि ॥ १७ ॥

[1] °प्रबोधन° A_1.

उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।
कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥ १८ ॥
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।

(वि.) उत्साहेति—उत्साहं वर्धयतीति उत्साहवर्धनः । 'वृधु वृद्धौ' । [1]विरुद्धान् राति हन्तीति वीरः । 'रा दाने छेदने च' । विद्विष्टान् ईरयतीति वा । 'ईर [2]क्षेपे' । वीरयतीति वा वीरः । 'शूर वीर विक्रान्तौ' । वीररसनाम ॥ कुर्वन्त्यात्मानमदीनमनयेति करुणा । 'डुकृञ् करणे' । [3]कुरुं क्लेशं न सहत इति वा । करुणैव कारुण्यम् । [4]घृण्यन्तेऽनुगृह्यन्तेऽनयेति घृणा । 'घृणि ग्रहणे' 'घृणु दीप्तौ' इति वा धातुः । [5]क्रपयते कृपा । '[6]क्रप कृपायाम्' । दयन्ते[7] रक्षन्त्यनया दया । 'दय दानगतिहिंसारक्षणेषु' । अनुकम्पन्तेऽनयेत्यनुकम्पा । 'कपि [8]चलने' । अनुक्रोशन्त्यनेनेत्यनुक्रोशः । 'क्रुश आह्वाने रोदने च' । [9]करुणारसनामानि ॥ हासयति [10]जनानिति हसः, हासः, हास्यं च । 'हस हसने' । हास्यरसनामानि ॥ [11]बीभत्सा निन्दा, सा अत्रास्तीति बीभत्सम् । सद्विरुद्धत्वात् विकृतम् । बीभत्सरसनामनी ॥ [12]इदं द्वयं तद्वति त्रिषु ॥१८॥

[1] विदुष्टान् W_2; विद्विषः Y. [2] प्रेरणे A, B_1, T. [3] करुं क्लेशं नयति B_2. [4] घृणन्ते B_2. [5] कृपयन्ते U, W_1, Pt_2. [6] कृप K_5, Y, Pt_2. [7] रक्ष्यन्ते A, B_1, T. [8] किंचिच्चलने Pt_2. [9] कारुण्य° A, T, W_1. [10] सर्वान् B_1. [11] Pt_2 adds बन्ध बन्धन इत्यस्य निन्दायां सन्. [12] बीभत्सविकृतशब्दौ तद्धेतुशोणितमांसादिवाचित्वे त्रिषु लिङ्गेषु वर्तेते Pt_2.

(पा.) उत्साह—वीरः । वीररसनाम ॥ '[1]शुच्युज्ज्वलौ तु शृङ्गारो वीर उत्साहवर्धनः' इति व्याडिः । कारुण्यं—अनुक्रोशः । करुणारसनामानि ॥ 'करुणो रस' इति पुंस्त्वमपि । अथो हसः—हास्यं च । हास्यरसनामानि ॥ चशब्दो रूपान्तरसमुच्चयार्थः । 'हसिका [2]तु हसो हासो हसनं हास्यघर्घरे' इति । बीभत्सं विकृतम् । बीभत्सनामनी ॥ त्रिष्विदं द्वयम् । इमे द्वे त्रिष्वित्यनेन त्रिलिङ्गे[3] । बीभत्सो रोगः । विकृतो रोग इत्यादि ॥ १८ ॥

[1] शुचिः A_1. [2] हसितं for तु हसो B_3. [3] B_4 adds भवतः.

विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ॥ १९ ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।

भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु ॥ २० ॥
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ।

(वि). विस्मय इति—[1]विस्मापयतीति विस्मयः। 'ष्मिङ् ईषद्धसने'। अत् आश्चर्यार्थेऽव्ययम्। तस्मात् भवं [2]अद्भुतम्। आचरणीयं आश्चर्यमिति साधु। 'चर गतिभक्षणयोः'। चित्रयतीति[3] चित्रम्। 'चित्र [4]चित्रीकरणे'। अद्भुतरसनामानि ॥ भीरोरिदं त्रासकरत्वाद् भैरवम्। बिभेत्यस्मात् अधीर इति वा भैरवम्। दारयति चित्तमिति दारुणम्। 'दॄ [5]विदारणे'। बिभेत्यस्मादिति भीषणम्[6]। भीष्मम्। भीमम्। भयानकं च। 'ञिभी भये'। घुरतीति घोरम्[7]। 'घुर भीमार्थशब्दयोः'। भयं करोतीति भयंकरम्। 'डुकृञ् करणे'। भयं प्रति गतं [8]प्रतिभयम्। भयानकरस-नामानि ॥ रुत् [9]रोगः, तां राति ददातीति रुद्रः। तस्य कर्म रौद्रम्[10]। उग्रत्वात् उग्रम्। रौद्ररसनामानि ॥ अमी अद्भुताद्याः उग्रान्ताः शब्दाः चतुर्दश त्रिषु लिङ्गेषु वर्तन्ते। [11]दरति बिभेत्यस्मादिति दरः। 'दृ भये'। त्रस्यत्यस्मादिति [12]त्रासः। 'त्रसी उद्वेगे'। बिभेत्यस्या इति भीतिः। भीश्च। भयं च। 'ञिभी भये'। साधूनस्यति बाधत इति साध्वसम्। '[13]असु क्षेपणे'। भयनामानि ॥ १९–२० ॥

[1] विशेषेण स्मा° B_2. [2] भवतीति भूतं, तत्र भवतीत्यद्भुतम्; आसमन्तात् चर्यत इत्याश्चर्यम् B_2; आ: चरणं K_5, Y. [3] I, U, W_2 add अकस्मात्. [4] 'चित्रिङ् आश्चर्ये' K_2. [5] 'दॄ अवखण्डने' B_2; 'दॄ भये' A, T, W_1. [6] भीषयते B_2, D_1, I. [7] घुरति यतः तद्घोरम् A, B_1, T. [8] प्रतिबिभेत्यस्मात् B_2. [9] रोदः D_1. [10] I adds 'रा दाने'. [11] दीर्यतेऽस्मात् Pt_2. [12] त्रसनं Pt_2. [13] 'अस निरसने' इति वा धातुः B_2.

(पा.) विस्मयो—चित्रमपि। अद्भुतरसनामानि ॥ अथ—प्रतिभयम्। भयान-करसनामानि ॥ रौद्रं तूग्रम्। रौद्ररसनामनी ॥ अमी—चतुर्दश। धर्मिधर्मवचना [1]अद्भुतादिशब्दा नियतत्रिलिङ्गा [2]भवन्ति। अद्भुतकरी विद्या अद्भुता। धर्मवचना भैरवादयो नियतत्रिलिङ्गाः। भैरवोऽहिः, दारुणोऽहिः, इत्यादि ॥ दरत्रासौ—भयम्। भयनामानि। भयरसः साध्वसरस इति रसत्वोपचाराद् रसानन्तरकथनम् ॥ १९–२० ॥

[1] अद्भुतादयः B_3. [2] B_3 omits.

विकारो मानसो भावोऽनुभावो भावबोधकः ॥ २१ ॥
गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ।
(दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः ।)

(वि.) विकार इति—भावयति करोति रसान् भावः। 'भू [1]सत्तायाम्'। मनसोऽयं मानसः। मनोविकारो भाव इत्युच्यते।

'हर्षोन्मादश्रमाशङ्का निर्वेदो जडता धृतिः।
[2]ग्लानिश्चिन्तामतिव्रीडा दैन्यं गर्वः स्मृतिर्मदः[3]॥
गर्हापस्मारसुप्तानि चापलालस्यमुग्रता।
अमर्षत्रासतर्काश्च निद्रौत्सुक्यं [4]मृतिस्तथा॥
आवेगो व्याधिरीर्ष्या च विषादश्च विकत्थनम्।
अवबोध इति प्रोक्ता भावाः संचारिणो बुधैः॥'

मनोविकारनाम॥ अनु पश्चादर्थं भावयति प्रकाशयतीति अनुभावः। 'भुवोऽवकल्कने'। मनोविकारज्ञापकहेतुनाम[5]।

'वागङ्गाभिनयेनेह यस्मादर्थोऽनुभूयते[6]।
शाखाङ्गोपाङ्गसहितः सोऽनुभावस्ततः स्मृतः॥'

इति। 'भ्रूभङ्गकटाक्षाद्या अनुभावा इति स्मृताः' इति च। [7]गर्वत्यनेनेति गर्वः। 'कर्व खर्व गर्व दर्पे'। आत्मानं [8]ज्यायांसमभिमनुते अभिमानः। 'मनु अवबोधने'। अहमेव ज्यायानिति करोतीत्यहंकारः। [9]आत्मानं मानयतीति मानः। 'मान पूजायाम्'। चित्तस्य समुन्नतिः चित्तसमुन्नतिः। अहमेव ज्यायानिति मनननामानि॥ २१॥

[1] 'भुव अवकल्कने' A, B_1, T. [2] ध्यान° B_2. [3] क्षयः B_2. [4] धृतिः A. [5] पुलकादिनाम B_2, D_1. [6] अनुभाव्यते K_2, K_5, U. [7] गर्वन्ति B_1. [8] उत्कृष्टं मानयति Pt_2. [9] A, W_1 add एव.

(पा.) विकारो—भावबोधकः। मनसो विकारो भावः स्यात्। स च [1]स्थायि-संचारभेदेन द्विविधो भवति। स च प्रकाशमानः सन् अनुभावः। अत्र[2] भयप्रभृतयः स्थायिनः। गर्वप्रभृतयः संचारिणः। अनादरप्रभृतयोऽनुभावाः। सात्त्विकभावानामनु-भावविशेषत्वादनभिधानम्[3]। ते च घर्मप्रलयादयः। गर्वो—समुन्नतिः। गर्वनामानि॥ गर्विशब्दोऽप्यस्ति। '[4]गर्विः स्त्री चास्मिता गर्वः' इति वैजयन्ती (पृ. ९७, श्लो. १६९)। 'स्मयोऽवलेप उत्सेको दर्पः शौण्डीर्यमित्यपि'। एतानि च॥ २१॥

[1] स्थायी A_1. [2] A_1 adds ते के इत्युच्यमाने. [3] °धानत्वम् A_1. [4] गर्वः स्त्री गर्विरस्मिता B_3, B_4; मुद्रितग्रन्थे च.

अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढावमाननावज्ञावहेलनमसुक्षणम् ।
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः ॥ २३ ॥

(वि.) अनादर इति—नाद्रियतेऽनादरः[1] । 'दृङ् आदरे' । [2]परिभूयते परिभवः, परीभावश्च । 'भू सत्तायाम्' । तिरस्करोतीति तिरस्क्रिया[3] । 'डुकृञ् करणे' । रिहति हिनस्तीति[4] रीढा । '[5]रिह हिंसायाम्' । अवमानयतीत्यवमानना[6] । 'मान पूजायाम्' । अवज्ञायतेऽनया अवज्ञा । 'ज्ञा अवबोधने' । अवहेलयतीति अवहेलनम् । 'हेड़ अनादरे' । असून् क्षिणोतीति [7]असुक्षणम् । 'क्षिणु हिंसायाम्' । [8]असूर्क्षणमिति वा पाठः । 'सूर्क्ष आदरे' । तिरस्क्रियानामानि ॥ मन्दम् अक्षि यत्रेति मन्दाक्षम् । मन्दम् अक्षम् [9]इन्द्रियमत्रेति वा । जिह्रेत्यनयेति[10] ह्रीः । 'ह्री लज्जायाम्' । त्रपत इति त्रपा । 'त्रपूष् लज्जायाम्' । [11]व्रीड्यतीति व्रीडा । 'व्रीड चोदने लज्जायां च' । [12]व्रीडाशब्दो द्वयोः । लज्जते इति लज्जा । 'ओ लस्जी व्रीडने' । लज्जानामानि ॥ अपत्रपत [13]इत्यपत्रपा । परादागतह्रीनाम ॥ २२-३ ॥

[1] आदरः सत्कारः, स न भवतीति Pt_2. [2] परिभावयति B_2. [3] तिरस्करणं Pt_2. [4] कत्थयति B_2, D_2, I, W_1. [5] 'रिह कत्थनयुद्धनिन्दाहिंसादानेषु' A, B_1, T, W_1, Pt_2. [6] माननं पूजा तद्विरोधिनी Pt_2. [7] असूर्क्षणम् अनादरः Pt_2 [8] असूक्षणं इति च पाठः I, W_1. [9] वाग्यत्र Pt_2. [10] Pt_2 omits अनया. [11] व्रीडयति Pt_2. [12] व्रीडशब्दः पुंलिङ्गोऽप्यस्ति Pt_2. [13] निकृष्टा त्रपा Pt_2.

(पा.) अनादरः—असूक्षणम् । अनादरनामानि ॥ हलायुधाभिधानेऽनादरावज्ञे भिन्नार्थके ।

'अत्याकारः परिभवो [1]निराकारः पराभवः ।
अनादरश्चाभिभवस्तिरस्कारश्च कथ्यते ॥ (अ. मा. ४. १९)
[2]हेला स्यादवहेला चावज्ञा रीढा विमानना' ॥ (अ. मा. ४. ३०)

इति ॥ मन्दाक्षं—लज्जा । लज्जानामानि ॥ व्रीलशब्दोऽप्यस्ति ।

'पथि पथिकवधूभिः सादरं पृच्छयमाना
कुवलयदलनीलः कोऽयमार्ये तवेति ।
स्मितविकसितगण्डं व्रीलविभ्रान्तनेत्रं
मुखमवनमयन्ती स्पष्टमाचष्ट सीता ॥'

इति प्रसन्नराघवे[3] ॥ सापत्रपान्यतः । परसकाशाज्जाता लज्जा अपत्रपा स्यात् ॥ २२-३ ॥

[1] निकारश्चेति मुद्रितग्रन्थे. [2] 'हेला स्यादवहेलं रीढावज्ञावलीढा च' इति मुद्रितपुस्तके. [3] अयं श्लोकः मुद्रितग्रन्थे न दृश्यते, उपलभ्यते च हनुमन्नाटके (३. १५); A_1 adds विवासोपरिव्रीलनं लज्जा.

क्षान्तिस्तितिक्षाभिध्या तु परस्वविषये स्पृहा ।
अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि ॥ २४ ॥

(वि.) क्षान्तिरिति—क्षम्यत इति [1]क्षान्तिः । 'क्षमूष् सहने' । तितिक्षते तितिक्षा । '[2]तिज निशाने' । निशानं सहनम् । मर्षणनामानि ॥ [3]अभिध्यायते अभिध्या । 'ध्यै चिन्तायाम्' । [4]परद्रव्यलिप्सानाम ॥ न क्षान्तिरक्षान्तिः । ईर्ष्यतीति [5]ईर्ष्या । 'ईर्ष्य ईर्ष्यायाम्' । अक्षमानाम ॥ असूयतीति असूया । गुणेषु [6]दोषारोपनाम ॥ २४ ॥

[1] तितिक्षा च A. [2] 'तिज क्षमायाम्' W_2. [3] अपहरणे ग्रहणे ध्यानमभिध्या Pt_2. [4] ईप्सा W_1. [5] ईर्ष्यतीति ईर्षा । ईर्ष अमर्षार्थः । सा अत्रेति वा B_2. [6] रोषाद्यारोपण° D_2.

(पा.) क्षान्तिस्तितिक्षा । मर्षणनामनी ॥ अभिध्या—स्पृहा । परद्रव्यविषयस्पृहा अभिध्या स्यात् । विषये स्पृहेति वा पाठः । अक्षान्तिरीर्ष्या । [1]परौन्नत्यासहननामनी ॥ असूया—अपि । गुणेषु दोषारोपणमसूया स्यात् ॥ २४ ॥

[1] परोत्कर्षा° B_3.

वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ।
पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

(वि.) वैरमिति—वीरस्य कर्म वैरम् । विरुणद्धीति विरोधः[1] । 'रुधिर् आवरणे' । विद्वेष्टीति विद्वेषः[2] । 'द्विष अप्रीतौ' । वैरनामानि ॥ विरुद्धलक्षणया मन्यतेऽनेनेति मन्युः । 'मन ज्ञाने' । [3]शोचत्यनेन शोकः । 'शुच शोके' । शुक् च । शोकनामानि ॥ पश्चात्तपतीति[4] पश्चात्तापः । अनुतापश्च । 'तप संतापे' । विरुद्धं [5]प्रतिसरतीति विप्रतीसारः । 'सृ गतौ' । पश्चात्तापनामानि ॥ २५ ॥

[1] विशेषेण रोधः Pt_2. [2] विद्विष्यते A; विशेषो द्वेषः Pt_2. [3] शोचयति D_2, U; शोचनं Pt_2. [4] तापयति Pt_2. [5] प्रतिसरणं Pt_2; विप्रतिसारः D_2, K_5.

(पा.) वैरं—विद्वेषः। वैरनामानि ॥ अनुक्तम्—'कलहोऽस्त्री झकटकः'। कलहनामनी ॥ 'दोर्मध्यं तु [1]करेकरम्'। मुष्टिप्रहारनामनी ॥ मन्यु—स्त्रियाम्। शोकनामानि ॥ पश्चात्तापो—इत्यपि। पश्चात्तापनामानि। 'पृष्ठमांसादनं पश्चाद् गतस्यार्थस्य चिन्तनम्'। गतार्थचिन्तनं पृष्ठमांसादनं स्यात् ॥ २५ ॥

[1] करेङ्कडम् A_1.

कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ।
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ॥ २६ ॥

(वि.) कोप इति—[1]कुप्यतीति कोपः। 'कुप क्रोधे'। क्रुध्यतीति क्रोधः। 'क्रुध कोपे'। न मृष्यत्यनेन [2]अमर्षः। 'मृष सहने'। रुष्यत[3] अनेनेति रोषः। 'रुष हिंसायाम्'। रुट् च। प्रतिहन्तीति प्रतिघः। 'हन हिंसागत्योः'। क्रुध्यतीति [4]क्रुत्। 'क्रुध कोपे'। कोपनामानि ॥ [5]शीलतीति शीलम्। 'शील समाधौ'। शुचिचरितनाम ॥ उन्माद्यतेऽनेनेति उन्मादः। '[6]मदी हर्षग्लपनयोः'। चित्तस्य विभ्रमः चित्तविभ्रमः। [7]भूताद्यावेशागतचित्तविभ्रमनाम[8] ॥ २६ ॥

[1] कुप्यत्यनेन A, B_1, T. [2] न मर्षणममर्षः Pt_2. [3] रुष्यति B_1. [4] क्रुध्यत्यनया A, B_1, T. [5] शीलयतीति D_2. [6] 'मदी हर्षे' B_1. [7] °आवेशात् I. [8] °भ्रमण° B_2, K_5.

(पा.) कोप—स्त्रियाम्। कोपनामानि ॥ रुषाक्रुधाशब्दावपि [1]स्तः। 'रुषारुट्क्रुत्क्रुधाः[2] स्त्रियाम्[3]' इति वैजयन्ती (पृ. ९८, श्लो. १८३)। शुचौ—शीलम्। 'आचारश्चरितं वृत्तं चरित्रं चरणं च तत्' इति [4]वैजयन्ती (पृ. ९२, श्लो. ११५)। [5]सदाचारः शीलं स्यात्। उन्मादः—विभ्रमः। चित्तभ्रमणमुन्मादः स्यात्। अनुक्तम्—'तन्द्रा कौसीद्यमालस्यम्'। आलस्यनामानि ॥ 'विस्मृतिः प्रस्मृतिः समे'। [6]विस्मृतिनामनी ॥२६॥

[1] B_3 omits. [2] क्रुधा B_4. [3] स्त्रियः B_3; मुद्रितग्रन्थे च. [4] आचारो वृत्तचारित्रचरित्रचरणानि च इति मुद्रितग्रन्थे. [5] शुद्धयाचारः A_1. [6] विस्मरण° B_3.

प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम्।
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ॥ २७ ॥
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः।

(वि.) प्रेमेति—प्रियस्य भावः प्रेमा। [1]प्रेम च। प्रियता च। हृदः कर्म [2]हार्दम्। स्निह्यत इति [3]स्नेहः। 'ष्णिह प्रीतौ'। स्नेहनामानि॥ दोग्धीति दोहः तं ददातीति दोहदम्[4]। 'दुह प्रपूरणे'। इच्छति ययेति इच्छा[5]। 'इषु इच्छायाम्'। [6]काङ्क्षति काङ्क्षा। 'काङ्क्षि काङ्क्षायाम्'। स्पृहयतीति[7] स्पृहा। 'स्पृह ईप्सायाम्'। ईहनं ईहा। 'ईह चेष्टायाम्'। तृष्यतीति तृट्। तर्षश्च। 'ञितृषा पिपासायाम्'। [8]वाञ्छतीति वाञ्छा। 'वाछि इच्छायाम्'। लब्धुमिच्छा लिप्सा। 'डुलभष् प्राप्तौ'। मनो रथो यस्य सः मनोरथः[9]। [10]काम्यते कामः। 'कमु कान्तौ'। [11]अभिलषति अभिलाषः। 'लष कान्तौ'। इच्छानामानि॥ तर्षणं [12]तर्षः। 'तृष पिपासायाम्'। स एवाधिकश्चेत् लालसा। अतिशयेन लस्यते लालसा। 'लस श्लेषणक्रीडनयोः'। भृशतराभिलाषनाम॥२७॥

[1] प्रेम नपुंसकम् B_2; D_1 adds 'प्रीञ् तर्पणे कान्तौ च'. [2] हृदये भवं Pt_2. [3] स्निह्यत्यनेन A, B_1, T. [4] दोहमाकर्षं गर्भिण्यादेर्ददाति I, K_5, W_2. [5] एषणमिच्छा Pt_2. [6] काङ्क्षणं Pt_2. [7] स्पृहणं Pt_2. [8] वाञ्छनं Pt_2. [9] भ्रामकत्वेन मनसो रथ इव स्थितत्वात् Pt_2; मन एव रथः D_1. [10] कम्यते U, W_1. [11] अभिलषणं Pt_2. [12] A, B_1, T omit.

(पा.) प्रेमा—स्नेहः। स्नेहनामानि॥ पुंलिङ्गप्रेमशब्दस्तद्धितान्तः। नपुंसकलिङ्ग-प्रेमशब्दः कृत्प्रत्ययान्तः[1]। तस्मात्—'स्नेहोऽस्त्री प्रेम सौहार्दमजीर्यं हार्दसौहृदे' [2]इत्यन्यसमीरिता संग्रहोक्तिरपि युक्ता। अथ दोहदम्—तर्षश्च। तृष्णानामानि॥ स महान् लालसा द्वयोः। अत्यर्थमिति वा पाठः। अतितृष्णानाम॥ २७॥

[1] कृदन्तः नपुंसकलिङ्गः B_3. [2] अन्यसंगृहीता B_3.

उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा॥ २८॥
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे।
उत्साहो व्यवसायः स्यात् स वीर्यमतिशक्तिभाक्॥ २९॥

(वि.) उपाधिरिति—उप समीपे आधीयते धर्मोऽत्रेति [1]उपाधिः। धर्मचिन्ताया नाम॥ आधीयते दैन्यमनेन आधिः। 'डुधाञ् धारणपोषणयोः'। मनोव्यथानाम॥ चिन्त्यते चिन्ता[2]। 'चिति स्मृत्याम्'। दारिद्र्यादिना वितर्कनाम॥ स्मर्यत इति [3]स्मृतिः। 'स्मृ आध्याने'। विस्मृतस्मरणनाम॥ आ समन्तात् ध्यायते आध्यानम्। 'ध्यै चिन्तायाम्'। उत्कण्ठात्मकस्मरणनाम॥ केचित् त्रय एकार्था इति [4]वदन्ति। उत्कण्ठ्यते[5] उत्कण्ठा। 'कठि शोके'। उत्कल्यते उत्कलिका। 'कल संख्याने'। औत्सु-

क्यनामानि ॥ [6]उत्सहनं उत्साहः । 'षह मर्षणे' । व्यवसीयत इति व्यवसायः । 'षोऽन्तकर्मणि' । अध्यवसायो[7] वा । उत्साहनामानि[8] ॥ वीरस्य कर्म वीर्यम् । अतिशक्तिसहितोद्योगनाम ॥ २८–९ ॥

[1] उपपन्नश्चासावाधिश्च, 'डुधाञ् . .', पुंलिङ्गः D_1. [2] 'चिति चिन्तायाम्' K_2, Y. [3] स्मरणं Pt_2; स्मर्यतेऽनया D_2, W_1. [4] भणन्ति I, K_3, K_5, W_2. [5] उत्कण्ठते A. [6] उत्सहते A; उद्गतं सहनं Pt_2. [7] Pt_2 adds. [8] उद्योगनामानि B_2, D_2, I, K_5, W_2.

(पा.) उपाधिः—धर्मचिन्ता । धर्मचिन्ता उपाधिः स्यात् । पुंसि—व्यथा । मनोव्यथा आधिः स्यात् । स्याच्चिन्ता—आध्यानम् । चिन्तानामानि ॥ चिन्तियाशब्दोऽप्यस्ति । 'चिन्ता स्याच्चिन्तिया स्मृतिः' इति रभसकोशः । उत्कण्ठा—समे । औत्सुक्यनामानि । समशब्दग्रहणात् सर्वस्यापि ग्रहणम् । 'उत्कण्ठा स्यादुत्कलिका रतिश्च रणरणकम्' इत्यन्योक्तायल्लकादय ईषद्भिन्नार्थकाः ।

'उत्कण्ठा परितापो रणरणकं जागरस्तनोस्तनुता ।
फलमिदमहेयमाप्तं सुखाय मृगलोचनां दृष्ट्वा ॥'

उत्साहो—स्यात् । यत्ननामनी ॥ 'यत्नोत्साहोद्यमायासास्तरीषोऽध्यवसायवत्' इति वैजयन्ती (पृ. ९५, श्लो. १६७) । स वीर्यमतिशक्तिभाक् । स यत्नोऽतिशक्तिभाक्[1] चेत्[2] वीर्यं स्यात् । 'अतिशयशक्तिर्वीर्यमिति' [3]त्रिकाण्डेऽमरमाला ॥ २८–९ ॥

[1] शक्तिमान् B_3. [2] यदि B_4. [3] B_3 omits.

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।
कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ॥ ३० ॥

(वि.) कपट इति—के शिरसि पट इव आच्छादकः कपटः । कं ब्रह्माणमपि पटतीति वा । 'पट गतौ' । [1]व्यजतीति व्याजः । 'अज गतिक्षेपणयोः' । दभ्नोति हिनस्तीति[2] दम्भः । 'दम्भु [3]आज्ञापने' । उप समीपे धीयत इत्युपधिः[4] । 'डुधाञ् धारणपोषणयोः' । छाद्यते स्वरूपमनेनेति [5]छद्म । 'छद अपवारणे' । कितवस्य कर्म कैतवम् । कपटनामानि ॥ कुत्सिता सृतिः हिंसा कुसृतिः । 'सृ गतौ' । निकृष्टं [6]कृणाति हिनस्तीति निकृतिः । 'कॄ हिंसायाम्' । शठतीति शठः । 'शठ हिंसासंक्लेशनकैतवेषु' । [7]शठस्य कर्म शाठ्यम् । [8]अनात्मकव्यापारनामानि ॥ प्रमाद्यतीति [9]प्रमादः । 'मदी हर्षे' । न विद्यतेऽवधानं यस्य सः अनवधानः । तस्य भावः अनवधानता । [10]चित्ताकुलतानामनी ॥ ३० ॥

[1] कुत्सितपट इव आच्छादकः कपटः B_2; विशेषेण अजति क्षपयति B_2; व्यज्यतेऽनेनेति Pt_2. [2] A, B_1, T add अनेन. [3] दम्भने Pt_2; हिंसायाम् A, B_1, W_1. [4] B_2, D_1, K_5, W_2 add स्फटिकस्येव सिन्दूरं. [5] नकारान्तनपुंसकलिङ्गम् D_1. [6] करोतीति, 'डुकृञ् करणे' A; कृणातीति कृतिः, निकृष्टा कृतिः I. [7] तस्य D_1, I. [8] आत्मानात्मक° K_3. [9] प्रकृष्टो मदः Pt_2. [10] चिन्ताकुल(ता W_2) नामानि B_1, T.

(पा.) कपटो—कैतवे। कपटनामानि ॥ 'मिषं निभं छलं दण्डाजिनं गजनिमीलनम्'। एतानि पञ्च च। कुसृतिः—शाठ्यम्। शाठ्यनामानि[1]। प्रमादोऽनवधानता। अनवधाननामनी ॥ ३० ॥

[1] A_1 adds भाषया 'दब्बिर'.

कौतूहलं कौतुकं च कुतुकं च कुतूहलम्।
स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा ॥ ३१ ॥
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः।

(वि.) कौतूहलमिति—एते शब्दा रूढाः[1]। [2]कुत्सितं पापं तूलयतीति कौतूहलम्। कुतूहलं च। 'तूल निष्कर्षे'। कुत्सितं तोजयतीति कुतुकम्। 'तुज हिंसाबलादाननिकेतेषु'। कुतुकमेव कौतुकम्। [3]अननुभूताभीष्टाभिलाषनामानि ॥ विलसति येनेति [4]विलासः। 'लस श्लेषणक्रीडनयोः'। प्रिये आगते सति प्रियाया [5]अङ्गेषु यो विशेषो जायते तस्य नाम ॥ विशेषेण [6]बुक्कति गर्वतीति बिब्बोकः[7]। 'बुक्क गर्वे'। प्रिये आगते सति प्रियाया गर्वादनादरनाम ॥ विशेषेण भ्रमतीति विभ्रमः। 'भ्रमु अनवस्थाने'। शृङ्गाराधिक्यात् चित्तवृत्त्यनवस्थाननाम ॥ ललतीति ललितम्। 'लल विलासे'। [8]स्वपरिकल्पितसुकुमाररत्याद्यङ्गचेष्टितनाम ॥ हिलतीति हेला। हेडते वा। 'हिल भावकरणे' 'हेड़ अनादरे' इति वा धातुः। [9]शृङ्गारक्रीडानाम ॥ ललनं लीला। 'लीङ् श्लेषणे'। [10]मनोमधुरवागङ्गचेष्टितैः प्रियानुकरणनाम ॥ स्त्रीणां शृङ्गारभावजाः क्रिया अमी हावा उच्यन्ते। हूयन्ते कामिनः एभिरिति हावाः। 'हु दानादनयोः' ॥ ३१ ॥

[1] B_1, D_1, I, K_5, W_2 add the line. [2] W_1, Pt_2 add. [3] I, U, W_1 omit अभीष्ट°. [4] विशेषेण लसनं Pt_2. [5] अङ्गे A; अङ्गैः W_1. [6] बुकति B_2, I. [7] विवोः गतिविशेषस्य ओकः स्थानं, वबयोरभेदः, विपूर्वको 'वा गतिगन्धनयोरिति' धातुः Pt_2. [8] सुरत° A, T; स्वपति° K_5, U. [9] °प्रौढि° B_2, D_1, K_1, K_5, Y. [10] मधुरतर° A, T, W_1.

(पा.) कौतूहलं—कुतूहलम् । अननुभूताभीष्टाभिलाषनामानि ॥ स्त्रीणां—भावजाः । स्मितकटाक्षसंवृत्त्यादयो विलासाः । भर्त्सनादयो बिब्बोकाः । वचनभूषणादिवृत्तयो[1] विभ्रमाः । सुकुमारक्रमो ललितम् । धाष्ट्र्याचरणं हेला । प्रियगतिवचनाद्यनुकरणं लीला । इतिशब्देन मोट्टायितकुट्टमितादीनां ग्रहणम् । तत्र मोट्टायितं कर्णकण्डूयनगात्रभङ्गादि । कुट्टमितमोष्ठग्रहणसुखे दुःखाभिनयः । [2]किलकिञ्चितं क्रोधाश्रुहर्षभीत्यादिसांकर्यं विकृतमुखभाषणम् । विच्छित्तिमाल्यभूषणादिनिरासः विक्षेपः । असकलप्रतिकर्म मौग्ध्यम्[3] । स्त्रीणां शृङ्गारभावादुत्पन्नविलासादिचेष्टा हावशब्दवाच्याः ॥ ३१ ॥

[1] °विषयाः A_1. [2] किलिकिञ्चितं A_1. [3] A_1, B_4 add मुक्ताः कस्य कदा फलानीत्यादिवाक्प्रयोगश्च.

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ॥ ३२ ॥
व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ।
घर्मो निदाघः स्वेदः स्यात् प्रलयो नष्टचेष्टता ॥ ३३ ॥

(वि.) द्रवेति—द्रवति हृदयमनेनेति द्रवः । 'द्रु गतौ' । केलति चित्तं केलिः[1] । 'केलृ चलने' । किलतीति वा । 'किल श्वैत्ये क्रीडायां च' । परिहसतीति परीहासः । 'हसे हसने' । क्रीडतीति क्रीडा । 'क्रीडृ [2]विहारे' । ललनं लीला । 'लीङ् श्लेषणे' । खेलेति वा पाठः । खेलतीति खेला । 'खेलृ चलने' । [3]नृणाति रत्यतिशयं प्रापयतीति नर्म । 'नॄ [4]नये' । प्रियाणां प्रियाभिः सह [5]क्रियमाणरतिपरिहासनाम ॥ [6]व्यजति क्षपयतीति व्याजः । 'अज गतिक्षेपणयोः' । अपदिश्यतेऽतद्रूपेणानेनेति अपदेशः । 'दिश अतिसर्जने' । लक्ष्यतेऽनेनेति लक्ष्यम् । 'लक्ष दर्शनाङ्कनयोः' । मिषनामानि ॥ [7]क्रीडतीति क्रीडा । 'क्रीडृ विहारे' । खेलतीति खेला । 'खेलृ चलने' । कूर्दत इति कूर्दनम्[8] । 'कुर्द क्रीडायाम्' । विहारनामानि ॥ [9]अङ्गं जिघर्तीति घर्मः । 'घृ क्षरणदीप्त्योः' । नितरां दहतीति निदाघः । 'दह भस्मीकरणे' । निदाघकाले जातो वा निदाघः । स्विद्यतेऽनेनाङ्गमिति स्वेदः । 'ष्विदा गात्रप्रक्षरणे' । स्वेदनामानि ॥ [10]प्रलीयते क्रिया अत्रेति प्रलयः । 'लीङ् श्लेषणे' । [11]नष्टचेष्टतानाम ॥ ३२–३ ॥

[1] केलिः द्वयोः D_2, W_2; 'केलृ चलने', 'केलृ क्रीडायाम्', 'केलृ चलनक्रीडनयोः' इति धातुत्रयम् A. [2] विहरणे B_1, D_2, K_5, W_2. [3] नृणां B_1. [4] प्रीणने A, K_1. [5] B_1, D_1, W_2 omit रति. [6] व्यज्यते क्षिप्यते Pt_2. [7] क्रीडनं Pt_2. [8] कुर्दनमिति केचित् पठन्ति B_2, K_5. [9] Pt_2 omits अङ्गं. [10] A adds प्रकर्षेण. [11] °चेष्टित° K_5.

(पा.) द्रवकेलि—नर्म च। कान्तैः कान्ताभिः सह [1]कृतपरिहासभर्त्सनताडनादिनामानि[2]। व्याजो—लक्षं च। 'लक्षं संख्या व्याजलक्ष्ये' इति रुद्राभिधानात् लक्षं मूर्धन्यान्तम्। विषमनामानि। अत्र कपटपर्यायमपि[3] प्रपञ्चयन्ति।

'सरागमुर्व्या मृगनाभिदम्भादपारकर्पूरपदेन कीर्त्या।
[4]रत्यापि दन्तच्छदरुक्छलेन स एकहेलं सुभगोऽवगूढः[5]'॥

इति धर्मशर्माभ्युदयः। क्रीडा—कूर्दनम्। कुर्दनमिति च क्वचित् पाठः। 'उपधायां [6]च' (८. २. ७८) इति दीर्घत्वमत्र कैश्चिन्नेष्यत इति रक्षितवचनात् कुर्दनमित्यप्यस्ति। विहारनामानि॥ घर्मो—स्वेदः स्यात्। स्वेदनामानि॥ प्रलयो नष्टचेष्टता। नष्टचेष्टतेति निष्पन्दस्थितिः। सा प्रलयः स्यात्। अनुक्तम्—'कालिका तु विवर्णता'। वैवर्ण्यं कालिका स्यात्॥ ३२—३॥

[1] °परिहसन° B_3. [2] A_1 adds भाषया 'सरसालु'. [3] °पर्यायान् B_3.
[4] श्रिया B_3. [5] उपगूढः A_1, B_1. [6] 'र्वोरुपधाया दीर्घ इकः' (८. २. ७६) B_3.

अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ।
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक् स्मितम्॥ ३४॥
मध्यमः स्याद् विहसितं रोमाञ्चो रोमहर्षणम्।

(वि.) अवहित्थेति—अवहीयते गोप्यते आकारोऽत्रेति अवहित्था[1]। 'ओहाक् त्यागे'। आकारगुप्तिनाम॥ संविज्यते[2] संवेगः। 'ओ विजी भयचलनयोः'। [3]संभ्रमत्यनेनेति संभ्रमः। 'भ्रमु अनवस्थाने'। संभ्रमनामनी॥ आ समन्तात् [4]छुरतीति आच्छुरितकम्। 'छुर छेदने'। उत्प्रास्यते उत्क्षिप्यतेऽनेनेति उत्प्रासः। तेन सह वर्तत इति सोत्प्रासः। सोत्प्रासो हासः आच्छुरितकमित्युच्यते। सामर्षहासनाम॥ स हासः मनाक् ईषच्चेत् स्मितमित्युच्यते। स्मीयते स्मितम्। 'ष्मिङ् ईषद्धसने'। ईषद्धासनाम॥ विहस्यते [5]विहसितम्। 'हस हसने'। मध्यमहासनाम॥ रोमाणि अञ्चतीति [6]रोमाञ्चः। 'अञ्चु गतिपूजनयोः'। रोमाणि हृष्यन्त्यनेन रोमहर्षणम्। 'हृष तुष्टौ'। पुलकोद्गमनामनी[7]॥ ३४॥

[1] अवहित्थमित्येके D_1, I. [2] Pt_2 adds अनेनेति. [3] संभ्रम्यते Pt_2; संभ्रमयति B_1.
[4] छुरयति U. [5] स्मिताद्विहसितयोर्मध्यमः Pt_2. [6] रोम्णामञ्चनं Pt_2. [7] B_2, D_1, I add पुलको रोमविक्रिया.

(पा.) अवहित्थाकारगुप्तिः । लज्जाभयादिहेतुकाकारगोपनमवहित्था स्यात् । अवहित्थमप्यस्ति[1] । 'न पुमानवहित्था स्यादङ्गी गृहजालिकाप्यस्याम्' इति वैजयन्ती (पृ. १४३, श्लो. ८६) । समौ—संभ्रमौ । इष्टदर्शनादिभ्यो भूततारतम्यविरहनामनी ॥ स्यात्—सोत्प्रासः । परिहासवचनसहितहास्यमाच्छुरितकं स्यात् ॥ स मनाक् स्मितम् । स [2]हासो मनाक् चेत् स्मितं भवति । मनाक्शब्देनादृष्टदन्तत्वलक्षणम् । 'स्मितं त्वदृष्टदशने हासो वक्रोष्ठिका न ना' इति वैजयन्ती (पृ. १४२, श्लो. ८३) । मध्यमं—विहसितम् । स्मितं मध्यमं चेद् विहसितम् । अनुक्तम्—'अट्टहासो महत्तरः' । स हासो महान्[3] चेत् अट्टहासः स्यात् । रोमाञ्चो—हर्षणम् । पुलकोद्गमनामनी ॥ क्वचित् स्पष्टलिङ्गस्यापि साहचर्यमपेक्ष्यम् ।

'भयाद् यदेवोद्गतमङ्गनानां देवासुराणां प्रधनोत्सुकानाम् ।
तदेव हर्षश्च तयोर्जयेन रोमाञ्चमस्याप्युपकारि जातम् ॥'

इति राघवपाण्डवीयम् (द्विसं. ६. ४८) ॥ ३४ ॥

[1] A_1 adds आकारगोपनायामवहित्थिकाप्यवकुटिलिकापि स्त्री. [2] हसः B_3. [3] A_1 adds स्यात् .

क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ॥ ३५ ॥
विप्रलम्भो विसंवादो रिङ्खणं स्खलनं समे ।
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ ३६ ॥

(वि.) क्रन्दितमिति—[1]क्रन्द्यतेऽनेन क्रन्दितम् । 'क्रदि आह्वाने रोदने च' । [2]रोदित्यनेन रुदितम् । 'रुदिर् अश्रुविमोचने' । [3]क्रोशत्यनेन क्रुष्टम् । 'क्रुश आह्वाने रोदने च' । रुदितनामानि ॥ जृम्भन्तेऽनेनेति जृम्भः । जृम्भणं च । '[4]जृभि गात्रविनामे' । [5]निद्रावसाने आरम्भे वा मुखविकासविशेषनामनी ॥ विप्रलभ्यतेऽनेन विप्रलम्भः । 'डुलभष् प्राप्तौ' । [6]विसंवदतीति विसंवादः । 'वद व्यक्तायां वाचि' । अङ्गीकृतापह्नवनामनी ॥ रिङ्खतीति रिङ्खणम् । 'रिखि गतौ' । रिङ्गणमिति वा पाठः । 'रिगि गतौ' । [7]स्खलतीति स्खलनम् । 'स्खल संचलने' । [8]स्वधर्माच्चलननामनी ॥ चत्वार्येतानि प्रतारणस्यैवेति केचित् ॥ नियतं द्रान्तीन्द्रियाण्यत्रेति निद्रा । 'द्रा कुत्सायां गतौ' । [9]शेते शयनम् । 'शीङ् स्वप्ने' । स्वपितीति स्वापः । स्वप्नः । 'ञिष्वप् शये' । [10]संविशत्यत्रेति संवेशः । 'विश प्रवेशने' । निद्रानामानि ॥ ३५–६ ॥

[1] क्रन्दति B_1, D_1. [2] रुद्यते B_2, W_2. [3] क्रुद्यते W_2; A omits अनेन. [4] जृभ जृभि A, B_1, T, Pt_2. [5] निशावसाने B_1, W_2. [6] विसंवदनं Pt_2. [7] स्खलितं D_2, Pt_2. [8] गोत्रस्खलन° A, B_1, T, W_1. [9] शेरते प्राणिनोऽत्रेति B_2; शेते यत्र I. [10] संविशति W_1.

(पा.) क्रन्दितं—क्रुष्टम् । [1]रुदितनामानि ॥ जृम्भस्तु—जृम्भणम् । अङ्गभङ्गनामानि ॥ 'निद्रावसानप्रारम्भयोर्मुखविकासविशेषनामनी' इति लिङ्गभट्टीयम् । जृम्भो नियतस्त्रीलिङ्गश्चेत् मुखविकासनाम । 'जृम्भणं तु त्रयी जृम्भा मुखभेदस्तु जृम्भिका' इति वैजयन्ती (पृ. १४३, श्लो. ८८) । विप्रलम्भो विसंवादः । फलविप्रतिपत्तिनामनी ॥ रिङ्खणं—समे । अङ्गीकृतत्यागनामनी । स्यान्निद्रा—संवेश इत्यपि । निद्रानामानि ॥ स्वप्नशब्दोऽवस्थात्रयमध्यावस्थायामपि स्यात् । 'निद्रा गुडाका सुप्तिश्च[2] स्वप्नस्त्वेवात्र दर्शनम्' इति वैजयन्ती (पृ. ९९, श्लो. १९७) ॥ ३५–६ ॥

[1] रोदन° B_3. [2] सुप्तं चेति मुद्रितपुस्तके.

तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।
अदृष्टिः स्यादसौम्येऽक्षिण संसिद्धिप्रकृती त्विमे ॥ ३७ ॥
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ।
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ ३८ ॥

इति नाट्यवर्गः

(वि.) तन्द्रीति—[1]ततम् इन्द्रियाणां विस्तारं द्रातीति तन्द्री । तन्द्रा । तन्द्रिश्च । 'द्रा कुत्सायां गतौ' । प्रमीलन्ति [2]इन्द्रियाण्यत्र प्रमीला । '[3]मील निमेषणे' । महाश्रमोपजनितेन्द्रियोपरतिनामनी ॥ भ्रुवोः कुटिः कुटिलता भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिश्च । 'कुट [5]कौटिल्ये' । भ्रुवोः कुटिलतानाम ॥ असौम्या दृष्टिः अदृष्टिः । [6]विरुद्धदर्शननाम ॥ संसिध्यतीति संसिद्धिः[7] । 'षिधु संराद्धौ[8]' । प्रकर्षेण क्रियते [9]प्रकृतिः । 'डुकृञ् करणे' । स्वस्य रूपं स्वरूपम् । [10]स्वमात्मानं भावयतीति स्वभावः । 'भुवोऽवकल्कने' । निसृज्यते निसर्गः । 'सृज विसर्गे' । स्वभावनामानि ॥ [11]वेपते वेपथुः । 'टुवेपृ कम्पने' । [12]कम्पते कम्पः । 'कपि चलने' । कम्पनामनी ॥ अशुभं क्षणोति हिनस्तीति क्षणः । 'क्षणु हिंसायाम्' । उत्कृष्टः हर्षः उद्धर्षः । मह्यते जनैरिति महः । 'मह पूजायाम्' । उत् उद्धतं हूयन्ते जना अत्रेति उद्धवः । उत् उद्धतं जनान्

सुवतीति उत्सवः। 'षू प्रेरणे'। उत्सूते सुखमिति वा। 'षूङ् प्राणिगर्भविमोचने'। उत्सवनामानि ॥ ३७–८ ॥

इत्यमरकोशपदविवृतौ नाट्यवर्गः

[1] तं ततं B₁, Y; अत्यन्तमिन्द्रियाणि द्राम्यत्रेति It₂. [2] नयनानि A, B₁, T. [3] 'मील निमीलने' A, B₁, T. [4] °उत्पन्न° B₂. [5] कापट्ये W₂. [6] °दृष्टि° D₁, I. [7] सम्यक् सिद्धिः Pt₂; सम्यक् सिध्यति B₂. [8] गत्यां D₂, I, K₁, K₂, U, Pt₂. [9] प्रकृष्टं करोतीति Pt₂. [10] स्वस्य भावः Pt₂. [11] वेपनं Pt₂. [12] कम्पनं Pt₂.

(पा.) तन्द्री प्रमीला। [1]निद्राभरजनितेन्द्रियविकारनामनी[2] ॥ 'विभज्य नक्तंदिवमस्ततन्द्रिणा' (किरा. १. ९) इति केचिद्[3] ह्रस्वान्तस्तन्द्रिरिति। 'तन्त्रीः कर्णामृतं कूज तन्द्रीः संश्रय चक्षुषी' इति केषांचिद्दीर्घान्तः। भ्रकुटिः—स्त्रियाम्। भ्रूकौटिल्यनामानि। भ्रुकुटिशब्दो रुवर्णादिः ऋवर्णादिश्च भवति[4]। 'भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्। भ्रकुटिर्भृकुटिः सारी काली तीरतरङ्गिका। रेचितं त्वेकया भ्रुवा' इति वैजयन्ती। (पृ. १४३, श्लो. ९१-२) एकभ्रुवो भेदो रेचितं स्यात् ॥ अदृष्टिः—अक्ष्णि। [5]रोषादिभिर्विकृतदृष्टिः अदृष्टिः स्यात्। संसिद्धि—निसर्गश्च। स्वभावनामानि ॥ चशब्दाः रूपभावसर्गसमुच्चयार्थाः। अथ—कम्पः। कम्पनामनी ॥ अथ क्षण—उत्सवः। उत्सवनामानि ॥ अत्र महशब्दोऽकारान्तः। यथा—'स स्वयंवरमहाय महेन्द्रान्' इति नैषधे (५. १)। अनुक्तम्—'पूर्णानकं पूर्णपात्रं वस्त्राद्याकृष्टमुत्सवे'। उत्सवे आकृष्टवस्त्रादिनामनी ॥ 'उत्सवार्थं तु यत् तूर्यं तत्र स्यात् प्रियवादिका'। उत्सवार्थतूर्यं प्रियवादिका स्यात्। मङ्गलवाद्यनाम ॥ ३७-८ ॥

इति [6]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते नाट्यवर्गः

[1] °इन्द्रियोपरति° A₁. [2] B₃ adds भाषया 'कुनिकिपाट्टु'. [3] B₃ adds भारविप्रयोगात्. [4] B₃ adds अनुक्तम्—भृकुटिः सारी काली तीरतरङ्गिका. [5] रुषादि° A₁. [6] °नरसिंह° A₁.

९. पातालवर्गः

अधोभुवनपातालं बलिसद्म रसातलम् ।
नागलोकोऽथ कुहरं सुषिरं विवरं बिलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः ।
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे सुषिरं त्रिषु ॥ २ ॥

(वि.) अधोभुवनमिति—[1]अधःस्थितं भुवनम् अधोभुवनम् । पतन्त्यस्मिन् पापादिति पातालम् । 'पत्लृ गतौ' । बलेः सद्म बलिसद्म । रसाया भूमेः तलमधोभागः रसातलम् । नागानां लोकः नागलोकः । [2]पाताललोकनामानि ॥ प्राण्यादिकं कुत्सितं कृत्वा हरतीति कुहरम् । 'हृञ् हरणे' । तमसा[3] कुहयते[4] विस्मापयतीति वा । 'कुह विस्मापने' । सुष्ठु स्यति [5]गतिमिति सुषिरम् । 'षोऽन्तकर्मणि' । विव्रियते विवरम् । 'वृञ् वरणे' । बिल्यते बिलम् । 'बिल भेदने' । छिद्यते छिद्रम् । 'छिदिर् द्वैधीकरणे' । निर्व्यथन्तेऽस्मात् निर्व्यथनम् । 'व्यथ भयसंचलनयोः' । रौति [6]स्वगतप्राणिमुखेन शब्दायत इति रोकम् । रोचते प्रकाशते वा । 'रु शब्दे' 'रुच दीप्तौ अभिप्रीतौ च' । गतिं [7]रन्धयतीति रन्ध्रम् । 'रध हिंसासंराध्योः' । रणति वायुनेति वा । 'रण शब्दे' । शुभं परिहृत्य अभ्रति वर्तत[8] इति श्वभ्रम् । 'अभ्र गतौ' । शोभनमभ्रमाकाशमस्मिन्निति वा । उप्यते [9]क्षिप्यते [10]पर्णादिकमस्यां वपा । 'डुवप् बीजसन्ताने' । प्रमादपतितान् सुष्ठु स्यति सुषिः । 'षोऽन्तकर्मणि' । बिलनामानि ॥ गिरति सर्पादिकमिति गर्तः । 'गॄ निगरणे' । अवति सर्पादिकमित्यवटः[11] । 'अव रक्षणे' । [12]श्वभ्रनामानि ॥ सुषिरत्रास्तीति सुषिरम्[13] । सरन्ध्रवेण्वादिनाम ॥ १–२ ॥

[1] Half folio missing in I. [2] नाग° A, B_1. [3] तमसि W_2. [4] °कुहम् आश्चर्यमित्यर्थः । तद् रातीति कुहरं, 'रा दाने' B_2. [5] B_2, K_2, omit गतिम्. [6] अत्र प्राणीति B_2. [7] A_1 adds हिंसयति. [8] वर्धते W_2. [9] निक्षिप्यते I, K_3. [10] तृणादिकं Pt_2. [11] अव्यतेऽत्र वातादिति वा B_2, D_1, K_2, K_3, U. [12] भूश्वभ्र° B_1, D_1, U, W_1. [13] सुषिरशब्दो रन्ध्रवद्वस्तुवाचकत्वे त्रिलिङ्गः Pt_2.

(पा.) अधोभुवन—नागलोकः । पातालनामानि ॥ रसेति तलमिति व्यस्तमपि तन्नाम । 'रसातलं तलं नागलोको दैत्यक्षयो रसा' इति वैजयन्ती (पृ. १४८, श्लो. १) । अथ कुहरं—बिलम् । 'छिद्रे छिद्रान्विते वाद्ये सुषिरं सुषिरो नडः' इति वैजयन्ती-

पाठाद् (पृ. २६४, श्लो. ९०) दन्त्यादिरेव सुषिरशब्दः। छिद्रं—सुषिः। 'कलशकुलिश-शुभ्रश्वभ्रकाश्मीरशिल्पम्' इति श्वभ्रशब्दस्य तालव्यादित्वम्[1]। बिलनामानि॥ गर्तावटौ—श्वभ्रे। श्वभ्रनामनी॥ सरन्ध्रे—त्रिषु। रन्ध्रवद् द्रव्यं सुषिरं [2]त्रिलिङ्गं स्यात्॥ १-२॥

[1] A_1 adds ऊष्मभेदः.　　[2] B_3 adds भवति तत्.

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः।
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः॥ ३॥
विष्वक् संतमसम्

इति पातालवर्गः

(त्रि.) अन्धकार इति—[1]अन्धं करोतीति अन्धकारः। 'डुकृञ् करणे'। ध्वनन्त्यत्र [2]मार्गमपश्यन्त इति ध्वान्तम्। 'ध्वन शब्दे'। तमयति लोकं तमः। 'तमु ग्लानौ'। तम एव तमिस्रम्। [3]तिम्यत्यनुष्णत्वादिति तिमिरम्। 'तिम आर्द्रीभावे'। तमिस्रशब्दः स्त्रीनपुंसकयोः। अन्धकारनामानि॥ अन्धं तमः अन्धतमसम्। अन्धयति जनानां दृष्टिमिति वा [4]अन्धतमसम्। 'अन्ध दृष्ट्युपघाते'। गाढध्वान्तनाम॥ अवक्षीणं तमः अवतमसम्। क्षीणध्वान्तनाम॥ विष्वक् समन्तात् तमः संतमसम्। [5]सर्वतःस्थित-तमोनाम॥ ३॥

इति पातालवर्गः

[1] अन्धवत् A, T, W_1.　　[2] पन्थानं A, T.　　[3] अनुपङ्गत्वात् A, B_1, T; तिम्यति कामिहृदयानीति वा W_1.　　[4] अन्धं करोतीत्यन्धम्। अन्धं च तत् तमश्च Pt_2.　　[5] सर्वत्र° B_1, D_1.

(पा.) अन्धकारो—तमः। प्रज्ञादिपाठात् [1]तामिस्रमपि स्यात्। 'स्मररागमयी वपुस्तमिस्रा' इति माघप्रयोगात् (शिशु. ६. ७०) तमिस्रा च भवति। अन्धकार-नामानि॥ 'कालिकज्जलभूच्छायतमं वा स्यात् तमिः स्त्रियाम्'। एतानि च॥ ध्वान्ते—अन्धतमसम्। अतिसान्द्रतिमिरनाम॥ शाकटायनवृत्तौ 'यन्युपसर्गस्य च' (२. २. ८८) इति दीर्घविधानसूत्रे [2]अन्धातमसमित्युदाहृतम्। 'तदन्धातमसं प्राहुर्गाढं तिमिर-

मित्यपि' इति हारावली। क्षीणेऽवतमसम्। अल्पं तमोऽवतमसं स्यात्। क्षीणतमसो नाम ॥ तमः—संतमसम्। सर्वतः प्रसृततमोनाम ॥ अनुक्तम्—'रुपीडोऽस्त्री रुहेलिः स्त्री रुभेटिरपि धूमिका'। धूमिकानामानि[3] ॥ ३ ॥

इति पातालवर्गः

[1] तामिस्रः B_3. [2] बहुलवचनात् क्वचिदयञ्यप्यनुपसर्गस्यापि दीर्घः। अन्धातमसम्। अन्धतमसम्; पृ. २३०. [3] A_1 adds भाषया 'मोब्बु पेल्लु'.

---

१०. भोगिवर्गः

नागाः काद्रवेयास्तदीश्वरः।
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ॥ १ ॥
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ।

(वि.) नागा इति—पद्भ्यां नाङ्गन्ति गच्छन्तीति [1]नागाः। 'अगि गतौ'। कद्रोरपत्यानि पुमांसः काद्रवेयाः[2]। देवयोनिसर्पनामनी ॥ शेते हरिरस्मिन्निति शेषः। अन्तकालेऽपि शिष्यत इति वा। 'शिष असर्वोपयोगे'। न विद्यतेऽन्तो यस्य सः अनन्तः। देवयोनिसर्पेश्वरनामनी[3] ॥ वसति पाताल इति वासुकिः। 'वस निवासे'। वसुकस्यापत्यं वा। सर्पाणां राजा सर्पराजः। देवयोनिसर्पराजनामनी[4] ॥ गोरिव [5]नासा यस्य सः गोनसः। तिलति स्निह्यतीति तिलित्सः[6]। 'तिल स्नेहने'। तिलिङ्ग इति पाठे 'तिल गतौ'। अजं [7]मेषं गिरतीति अजगरः। 'गॄ निगरणे'। अजो नित्यो गरो विषं यस्येति वा। शेते अत्यर्थमिति शयुः। 'शीङ् स्वप्ने'। वाहं [8]गमनं स्यतीति वाहसः[9]। 'षोऽन्तकर्मणि'। [10]वाहयति प्राणिनः आत्मवशं नयतीति वा[11]। 'पेनुपामु पेरु' ॥ १ ॥

[1] अगन्ति गच्छन्ति अगाः, अगाः न भवन्तीति नागाः, 'अगि गतौ' B_2. [2] तदीश्वराः के ? काद्रवेया इमे ज्ञेयाः शेषवासुकितक्षकाः A. [3] शेषाहिनामनी D_1. [4] वासुकिनामनी D_1. [5] नासिका A, B_1, T. [6] तिलिप्स इति वा पाठः A. [7] छागं Pt_2. [8] गतिं D_1, K_3. [9] B_2 adds समापयति. [10] वहति B_1, T. [11] 'वह प्रापणे', अतिस्थूलसर्पनामनी B_2, K_5, W_2.

(पा.) नागाः । वक्ष्यमाणनाम । काद्रवेयास्तदीश्वराः । तन्नायकाः काद्रवेयाः स्युः । शेषवासुकिप्रभृतयः [1]कद्रुपुत्राः ।

'काद्रवेया इमे ज्ञेयाः शेषवासुकितक्षकाः ।
ऐरावतो महापद्मः कम्भलाश्वतरावुभौ ॥
एलापुत्रश्च गर्गश्च कर्कोटकधनंजयौ ।
महानीलमहाकण्ठौ धृतराष्ट्रबलाहकौ ॥
दुर्मुखः खररोमा च मणिरित्येवमादयः ॥'

इति ॥ शेषोऽनन्तः । शेषनामनी । वासुकिस्तु सर्पराजः । वासुकिनाम ॥ अथ गोनसे—स्यात् । गोनासशब्दोऽप्यस्ति । 'भवेन् तिलित्सो[2] गोनासः' इति हलायुधः (अ. मा. ३. २०)। भाषया 'मण्डलमुन्नु'। 'चिलिम[3]'। कर्णाटभाषया मण्डलनाम ॥ अजगरे—इत्युभौ । अजगरनामनी । 'पेनुपामु[4]' ॥ १ ॥

[1] कद्रू° B_3. [2] तिलिप्सो A_1, B_4. [3] 'कोडचलव' B_3. [4] '°भामु' B_3.

अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ॥ २ ॥
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।

(वि.) अलगर्द इति—अलं गिरति भेकानिति अलगर्दः । 'गॄ निगरणे'। अरश्चासौ गर्दश्चेत्यरगर्दः । रलयोरभेदात् । अलिगर्द इति वा पाठः । अलिवद्गर्दतीति अलिगर्दः । 'गर्द शब्दे'। जले व्यालः जलव्यालः । जलस्थसर्पनामनी । 'नीरुकट्टुपामुपेरु' ॥ राजिं रेखां लातीति राजिलः[1] । 'ला दाने आदाने च'। डुण्डतीति डुण्डुभः । 'डुडि मज्जने'। डुण्डु इति भेकशब्दानुकारेण भाषते वा । निर्विषमुखसर्पनामनी ॥ मालुरोषधिः धानं स्थानमस्य [2]मालुधानः । मातुले धत्तूरे वर्तमानोऽहिः [3]मातुलाहिः । अवान्तरसर्पभेदनामनी ॥ निर्मुक्तः कञ्चुको येन निर्मुक्तः[4] । 'मुच्लृ मोक्षणे'। मुक्तकञ्चुकसर्पनाम ॥ २ ॥

[1] राजभिः सर्पजीविभिः लायते गृह्यत इति B_2; राजिः रेखास्मिन्नस्तीति Pt_2. [2] मालुभिर्धीयते पोष्यत इति, 'डुधाञ् धारणपोषणयोः' Pt_2. [3] मातुला नाम ओषधिः तस्यां स्थितः अहिः Pt_2. [4] कञ्चुकेन मुक्तः Pt_2.

(पा.) अलगर्दो जलव्यालः । नीरसर्पनामनी ॥ भाषया 'नीरुकट्टिपामु'। अजगर्द इति क्वचित् पाठः । अलिगर्द इत्येके । अलगर्द इति केचिदिति सुभूतिटीकायां

त्रेधा विकल्पितः पाठः[1]। समौ—डुण्डुभौ। क्षीराकारनिर्विषद्विमुखसर्पनामनी। 'राजिलः [2]क्षीरकश्चाथ' इति वैजयन्ती (पृ. १४९, श्लो. २०)। मालुधानो मातुलाहिः। धत्तूरवृत्तिसर्पनामेति केचित्। 'मुरुटपामु[3]'। 'पोष्यमाणवनविनालमालुधाननकुलशिशाजालिकादिभिरटविकुटुम्बिनां गृहैरुदितं वनग्रामं ददर्श' इति हर्षचरिताभ्युदयः। अनुक्तम्— 'अहिरिणी तु द्विमुखी'। द्विमुखसर्पनाम। 'रेण्डुतलविषंगलपामु'॥ 'सर्पराजस्तु सर्पभुक्'। सर्पभक्षकसर्पनाम॥ निर्मुक्तो—कञ्चुकः। परित्यक्तकञ्चुकसर्पनाम॥ २॥

[1] विकल्पितम् B_3. [2] क्षिलिकः A_1. [3] A_1 adds 'रक्तवेनुपोडानुन्नु'.

सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः॥ ३॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी॥ ४॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः॥ ५॥
(लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा।
अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका॥)

(वि.) सर्प इति—सर्पतीति सर्पः। 'सृप्लृ गतौ'। पर्दत इति पृदाकुः। 'पर्द कुत्सिते शब्दे'। आखुग्रहणार्थं कुं भुवं प्रियते [1]गच्छति वा पृदाकुः। परनिपातः। 'पृङ् व्यायामे'। भुजं कुटिलं गच्छतीति भुजगः। भुजंगः। भुजंगमश्च। 'गम्लृ गतौ'। भुजतीति भुजः। 'भुज कौटिल्ये'। भुजः सर्पदेहः, तेन गच्छतीति वा। अंहत इत्यहिः। 'अहि गतौ'। आशिषि दंष्ट्रायां विषमस्येति आशीविषः। विषस्य धरः विषधरः[2]। चक्रं मण्डलाकारोऽस्यास्तीति चक्री। शिरसि चक्रयोगाद्वा। दष्टुं [3]व्याडतीति व्यालः। डलयोरभेदात्। 'अड उद्यमने'। कुटिलं सर्पतीति सरीसृपः। 'सृप्लृ गतौ'। कुण्डलाकारं वपुरस्येति [4]कुण्डली। [5]गूढाः पादाः यस्य सः गूढपात्। चक्षुषी श्रवसी यस्य चक्षुःश्रवाः[6]। काकस्येवोदरं यस्य काकोदरः[7]। काको विषविशेषः उदरे यस्येति वा। फणोऽस्यास्तीति फणी। दर्वी फणैव करो यस्य दर्वीकरः। दर्व्या फणया [8]कृणोति हिंसयतीति वा दर्वीकरः[9]। 'कृञ् हिंसायाम्'। दीर्घं पृष्ठमस्येति दीर्घपृष्ठः। कुत्सितं दशतीति [10]दन्दशूकः। 'दंश दशने'। बिले शेत इति बिलेशयः। 'शीङ् स्वप्ने'।

उरसा गच्छतीति उरगः । 'गम्लृ गतौ'। पद्भ्यां न गच्छतीति पन्नगः । पन्नं पतितं यथा तथा गच्छतीति वा । भोगः सर्पशरीरं । तदस्यास्तीति भोगी । जिह्मं कुटिलं गच्छतीति जिह्मगः । पवनोऽशनं यस्य सः पवनाशनः । सर्पनामानि ॥ ३–५ ॥

[1] व्यायच्छति K_3. [2] D_1, I add 'धृ धारणे'. [3] विशेषेण आडति B_2. [4] कुण्डलयोगात् A, B_1. [5] गूढौ पादौ W_2. [6] चक्षुभ्यां शृणोतीति वा Pt_2. [7] का ईषत् अकं कुटिलगतिकम् उदरमस्येति वा Pt_2. [8] कृणाति, 'कृ हिंसायाम्' K_3. [9] दर्व्याकारत्वात् फणा दर्वी सैव प्रहरणादौ करोऽस्येति Pt_2. [10] दन्तशूक इति वा पाठः। दन्त एव शूकः तीक्ष्णकण्टकः यस्य B_2.

(पा.) सर्पः—पवनाशनः । अनुक्तम्—'कुम्भीनसः पुण्डरीको लेलिहानश्च कञ्चुकी । गोकर्णो नाकुसह्वा च' इत्येतानि च । सर्पजातिनामानि ॥

'षड्विंशतिर्मण्डलिनस्तथा [1]दर्विकराभिधाः ।
त्रयोदश च राजीला[2] वैकरञ्जाभिधास्त्रयः ।
निर्विषा द्वादशेत्येवमशीतिः सर्पजातयः' ॥ ३–५ ॥

[1] दर्वीकर° B_1. [2] राजीवाः A_1.

त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ।
समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ॥ ६ ॥

(वि.) त्रिष्विति—अहौ सर्पे भवम् आहेयम् । विषास्थ्यादिनाम ॥ स्फटतीति स्फटा । 'स्फट विकसने'। स्फुटति विशीर्यतेऽनया आहत इति स्फुटा वा । 'स्फुट विशरणे'। [1]फणत्यनया फणा । 'फण गतौ'। [2]दर्विनामनी ॥ कञ्चुक इव तिष्ठतीति कञ्चुकः । कञ्च्यते बध्यत[3] इति कञ्चुकः । 'कचि दीप्तिबन्धनयोः'। निर्मुच्यत इति निर्मोकः । 'मुच्लृ मोक्षणे'। सर्पकञ्चुकनामनी ॥ क्ष्वेडत इति क्ष्वेडः । 'ञिक्ष्विदा स्नेहनमोचनयोः'। अन्तः निगीर्यत इति गरलम् । गिरति जीवमिति वा । 'गॄ निगरणे'। देहं वेवेष्टीति विषम् । 'विष्लृ व्याप्तौ'। [4]विषशब्दः पुंसि क्लीबे वा । विषनामानि ॥ ६ ॥

[1] गच्छति B_2. [2] दर्व्याकारफण° B_2. [3] B_2, Pt_2 add अनेन. [4] पुंसि क्लीबे चेत्यस्य पूर्वेण विषशब्देनान्वयात् विषशब्दः पुंलिङ्गेऽपीति केचित् Pt_2.

(पा.) त्रिषु—विषास्थ्यादि। अहेर्विषास्थ्यादि आहेयं स्यात्। तच्च त्रिलिङ्गम्। स्फटायां—द्वयोः। फणानामनी। 'फटा [1]दर्वि: खटेरुश्च'। एतानि त्रीणि च॥ समौ—निर्मोकौ। सर्पकञ्चुकनामनी॥ 'सर्पाम्बरो निर्ल्वयनी[2]'। एते द्वे च। क्ष्वेडस्तु—विषम्। विषनामानि॥ ६॥

[1] दर्वी B_4. [2] निर्लयनी A_1.

पुंसि क्लीबे च काकोलकालकूटहलाहलाः।
सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः॥ ७॥
दारदो वत्सनाभश्च विषभेदा अमी नव।
विषवैद्यो जाङ्गलिकः व्यालग्राह्यहितुण्डिकः॥ ८॥

इति भोगिवर्गः

(वि.) पुंसीति—काकवत् [1]मेचकः काकोलः। का ईषत् कोलति संस्त्यायतीति वा। 'कुल संस्त्याने'। कालवर्णस्य कूटः[2] कालकूटः। कालं यममपि कूटयतीति वा। 'कूट परिदाहे'। हलति विलिखति जठरं न हलति च [3]हलाहलः। 'हल विलेखने'। सुराष्ट्रदेशे भवः सौराष्ट्रिकः। शुक्लदेशे भवः शौक्लिकेयः। ब्रह्मणः पुत्रः ब्रह्मपुत्रः[4]। [5]प्रदीपयतीति [6]प्रदीपनः। 'दीपी दीप्तौ'। दरददेशे भवः दारदः। दरदे नागविशेषे भवो वा। वत्सस्येव नाभिरस्य वत्सनाभः। [7]अमूनि विषभेदनामानि॥ जाङ्गलं विषविद्या। जाङ्गुलिर्जाङ्गुली वा। तां वेत्तीति जाङ्गलिकः, जाङ्गुलिको वा। [8]विषवैद्यनाम॥ अहितुण्डेन[9] जीवतीति अहितुण्डिकः। [10]व्यालग्राहिपुरुषनाम॥ ७-८॥

इति अमरकोशपदविवृतौ भोगिवर्गः

[1] कृष्णवर्णत्वात् Pt_2. [2] इदम् अहिच्छत्रमलयकोङ्कणशृङ्गबेरपुरादिषूत्पद्यते Pt_2. [3] इदं हिमवत्पर्वतकिष्किन्धाकोङ्कणदेशदक्षिणसिन्ध्वादिषु भवति Pt_2. [4] एष कपिलवर्णो मलयाद्रिभवः Pt_2. [5] प्रकर्षेण दीपयति B_2. [6] एष रक्तवर्णोऽञ्जनाद्रिभवः Pt_2. [7] अमी नव विषभेदाः, तन्नामानि W_2. [8] विषविद्यां वेत्ति विषवैद्यः Pt_2. [9] अहिमुखेन B_2; आहितुण्डिको वा W_2. [10] व्यालं सर्पं गृह्णातीति A.

(पा.) पुंसि—नव। काकोलादयो नव विषभेदाः। समानसामर्थ्यात् पुंसि क्लीबे चेति विशेषविधिः काकोलादिषु त्रिष्वेव। काकोलः, काकोलम्। कालकूटः,

कालकूटम्। हलाहलः, हलाहलम्। 'हालाहलं विषमिवाप्रगुणं तदेव' इति प्रयोगाद् हालाहलः। हालाहलम्। 'हृदये हालहलं महद्विषम्' इति प्रयोगाद् हालहलमित्यपि। अनुक्तम्—'गरस्तु कृतकं विषम्'। कृत्रिमविषं गरः स्यात्॥ विषवैद्यो जाङ्गुलिकः। गारुडविद्याभिज्ञनामनी। जाङ्गुलिं जाङ्गुलं वा वेत्तीति [1]व्युत्पत्तिद्वारेण। जाङ्गुलिर्विषमन्त्रः। जाङ्गुलो विषतन्त्रः॥ व्यालग्राह्याहितुण्डिकः[2]। 'व्यालग्राहोऽहितुण्डिकः' इति रत्नकोशनाममालिके। व्यालग्राहिपुरुषनामनी॥ ७–८॥

इति [3]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते पातालभोगिवर्गः

[1] व्युत्पादन° A_1.	[2] आहितुण्डिकः B_4.	[3] °नरसिंह° A_1.

---

११. नरकवर्गः

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्।
तद्भेदास्तपनावीचिमहारौरवरौरवाः॥ १॥
संहारः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः।
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः॥ २॥

(वि.) स्यान्नारक इति—नारं नरसमूहं कायत्यस्मिन्निति नारकः। [1]नरकश्च। 'कै शब्दे'। निर्गतोऽयः[2] दैवमस्मादिति निरयः। दुष्टा गतिरिति दुर्गतिः। नरकनामानि॥ [3]तप्यन्ते पापिनोऽत्र तपनः। 'तप संतापे'। अव्यन्ते रक्ष्यन्तेऽस्माद् अवीचिः। नास्ति वीचिः सुखस्य स्वल्पोऽप्यत्रेति वा। 'अव रक्षणे'। अव्यन्ते खाद्यन्तेऽस्मिन्निति वा। स्त्रीपुंसयोः। रुः दुःखं, तस्य रवोऽत्रेति रौरवः। महांश्चासौ रौरवश्च [4]महारौरवः। संह्रियन्ते पापिनोऽस्मिन्निति संहारः। 'हृञ् हरणे'। संघात इति वा पाठे 'हन हिंसागत्योः'। कालानि अयोमयानि सूत्राण्यस्मिन्निति कालसूत्रम्। [5]एवमादीनि नरकभेदनामानि॥ आद्यशब्देन तामिस्रान्धतामिस्रासिपत्रवनादयः उच्यन्ते। [6]सत्त्वाः प्राणिनः। नरके [7]विद्यमानाः नारकाः। प्रकर्षेण नरकमिताः [8]प्रेताः। 'इण् गतौ'। नरकसंबन्धिप्राणिनाम॥ विगतं तरणं यत्र वितरणम्। वितरणे नरके[9] भवा वैतरणी। विगता तरणिः नौरत्रेति [10]वितरणिः। वितरणिरेव वैतरणी। विगतः तरणिः सूर्योऽत्रेति

वितरणिः पातालः, तस्मिन् भवा वा। नरकसिन्धुनाम ॥ न लक्ष्यते अलक्ष्मीः। 'लक्ष दर्शनाङ्कनयोः'। लक्ष्मीर्न भवतीति वा। [11]ऋतेः सन्मार्गात् निष्क्रान्ता निर्ऋतिः। अभाग्यनामानि ॥ १-२ ॥

[1] नृणाति प्रापयति पापिनः स्वसमीपं Pt_2. [2] अयः शुभावहो विधिः Pt_2. [3] तापयति Pt_2. [4] महान् रौद्रः रवः अत्रेति Pt_2. [5] इत्यादिस्वनामप्रसिद्धनरकनामानि B_2. [6] K_5, W_2 add सीदन्तीति. [7] भवाः Pt_2. [8] क्षुत्पिपासादिभिः भृशं प्राप्ता वा Pt_2. [9] नरकलोके D_2, I, K_3. [10] वितरणेन गोदानादिना तीर्यत इति Pt_2. [11] B_2 adds नितराम्.

(पा.) स्यान्नारकस्तु—चेत्याद्याः। [1]नरकविशेषनामानि ॥ तपनादिसंघातशब्दान्ताः[2] पुंलिङ्गाः। अवीचिशब्दः केषांचित् स्त्रीलिङ्गः। 'विशेषाः स्युरवीचिः स्त्री महारौरवरौरवौ' इति वैजयन्ती[3] (पृ. १२, श्लो. ३७)। सत्त्वास्तु—प्रेताः। नरकभवजन्तवः प्रेताः स्युः। '[4]नारका जन्तवः प्रेता यात्याश्चैवातिवाहिकाः' इति हलायुधः (अ. मा. ३. ३)। वैतरणी सिन्धुः। नारकशब्दस्यात्रापि संबन्धः। नारकनदी वैतरणी स्यात्। स्यादलक्ष्मीस्तु नैर्ऋती। अलक्ष्मीनामनी ॥ 'निर्ऋतिः कालकण्ठिके' इति रभसः। 'अलक्ष्मीर्निर्ऋतिर्ज्येष्ठा' इति वैजयन्ती (पृ. १२, श्लो. ४२)। अत्र प्रज्ञादिपाठात् नैर्ऋतीति पठितम् ॥ १-२ ॥

[1] B_3 adds °दुर्गतिः स्त्रियाम्। नरकसामान्यनामानि. [2] A_1 adds सर्वे. [3] मुद्रितपुस्तके तु 'अवीच्यन्ता रौरवाद्याः प्रायशो नरका नरि' इति दृश्यते. [4] नरके A_1, B_2.

विष्टिराजूः कारणा तु यातना तीव्रवेदना।
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥
स्यात् कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत्।

इति नरकवर्गः

(वि.) विष्टिरिति—विशति नरकमनया विष्टिः। 'विश प्रवेशने'। आजवते यया नरकम् [1]आजूः। आ समन्तात् अज्यते वा। 'अज गतिक्षेपणयोः'। नरके हठात् प्रक्षेपनामनी ॥ कृणातीति कारणा। 'कॄ हिंसायाम्'। याति [2]नाशमनयेति यातना। 'या प्रापणे'। यातयतीति वा। '[3]यत निराकारोपस्कारयोः'। तीव्रवेदनानाम ॥ पीड्यतेऽनयेति पीडा। 'पीड अवगाहने'। बाध्यते यया बाधा। 'बाधृ

विलोडने'। [4]व्यथ्यन्तेऽनयेति व्यथा। 'व्यथ भयसंचलनयोः'। दुष्टानि खानीन्द्रियाण्यस्मिन्निति दुःखम्। दुःखमात्रनामानि॥ अमनसो [5]भवम् आमनस्यम्। मानसे साधु मानस्यं, तन्न भवतीत्यामनस्यम्। [6]प्रसूतेर्जातं प्रसूतिजम्। दुःखविशेषनामानि॥ [7]कषति हिंसयतीति कष्टम्। 'कष हिंसायाम्'। [8]कृणत्ति वेष्टयतीति कृच्छ्रम्। 'कृती वेष्टने'। आ समन्तात् भियं लातीति आभीलम्। 'ला दाने'। शरीरपीडानामानि[9]॥ [10]पीडाद्याभीलान्तानि नामानि दुःखवाचकानीति केचित्। त्रिष्वेषां भेद्यगामि यत्। एषां [11]शब्दानां दुःखादीनां मध्ये यद् भेद्यगामि विशेष्यगामि तत् त्रिषु; कष्टा सेवा, कष्टो भृत्यभावः, कष्टं व्याकरणमिति॥ ३॥

इत्यमरकोशपदविवृतौ नरकवर्गः

[1] D$_2$, K$_2$ add 'जू गतौ'. [2] नाशनम् D$_2$. [3] 'यती प्रयत्ने' Pt$_2$. [4] व्रिथ्यन्ते Pt$_2$. [5] भाव: B$_2$. [6] K$_3$, U add आधेः. [7] कषिष्यति W$_1$. [8] कृणाति W$_1$; कृन्तति W$_2$, Pt$_2$; 'कृती छेदने' Pt$_2$. [9] K$_5$ omits 3 lines. [10] पीडादीनि D$_2$, K$_1$. [11] एषां मध्ये यद् द्रव्यगामि तत् त्रिषु B$_1$, D$_1$.

(पा.) विष्टिराजूः। कर्मनरकनामनी। भाषया 'वेट्ट'। स्त्रीलिङ्गमध्यपाठात् स्त्रीलिङ्गौ। 'त्रिषु कर्मकरे विष्टिस्त्र्याजूर्वेतनकर्मसु' इति रुद्रः॥ कारणा—तीव्रवेदना। अत्यन्तदुःखनामानि॥ पीडा—दुःखम्। दुःखनामानि॥ बाधा चाबाधेति चात्र रूपद्वयं संभाव्यम्। 'बाधा दुःखनिषेधयोः' इति वैजयन्ती (पृ. २२२, श्लो. २५)। 'आबाधा वेदना दुःखम्' इति हलायुधः (अ. मा. ३. ४)। अत्रापि दुःखं दुष्खमिति रूपद्वयस्य संभावना। 'कान्तो नयनानन्दो बाले दुःखेन भवति [1]सदा' इति रुद्रटालंकारे (५. २८) बिन्दुच्युतकत्वाद्विसर्गश्रुतिः। 'पुष्पभूषणविषाणघोषणादुष्खदुष्कृतवरीषु[2] पुष्करम्' इति ऊष्मभेदपाठात् षकारश्रुतिः। आमनस्यं प्रसूतिजम्। [3]प्रसवसंजातदुःखमामनस्यं स्यात्। स्यात् कष्टं—आभीलम्। कष्टनामानि॥ त्रिष्वेषां—यत्। कष्टादयस्त्रयो यदा भेद्यगामिनस्तदा त्रिलिङ्गाः। कष्टा सेवा। कष्टः प्रसवः। कष्टं विषभक्षणम्। [4]अन्यथा नपुंसकलिङ्गा एव। कष्टेनातिक्रान्तो नरकः[5]॥ ३॥

इति [6]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते नरकवर्गः

[1] 'कान्तो नयनानन्दी बालेन्दुः खे न भवति सदा' इति मुद्रितग्रन्थे. [2] °पुरीष° A$_1$. [3] B$_3$ omits संजात. [4] भेद्यगामिनो नो चेत् A$_1$. [5] पन्थाः B$_3$. [6] °नरसिंह° A$_1$.

१२. वारिवर्गः

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।

(वि.) समुद्र इति—[1]सम्यगुनत्ति समुद्रः । 'उन्दी क्लेदने' । समन्तात् मुदं [2]रातीति वा । 'रा दाने' । मुद्रया मर्यादया सहित इति वा । आपो धीयन्ते अत्रेति अब्धिः । 'डुधाञ् धारणपोषणयोः' । मर्यादया कुं भुवं न पृणातीति अकूपारः । 'पॄ पालनपूरणयोः' । अकुत्सितं पारमस्येति वा । पारमावृणोतीति पारावारः । 'वृञ् वरणे' । [3]पारमपारमस्य दुस्तरत्वादिति वा पारापारः । सरितां पतिः सरित्पतिः । उदकमस्त्यस्मिन्निति उदन्वान् । [4]उदकानि धीयन्तेऽस्मिन्निति उदधिः । 'डुधाञ् धारणपोषणयोः' । स्यन्दते जलमत्र सिन्धुः । 'स्यन्दू [5]प्रस्रवणे' । सरांस्यत्र सन्तीति सरस्वान् । [6]सगरपुत्रैः खातः सागरः । अर्णांसि जलानि सन्त्यस्मिन्निति अर्णवः । रत्नानाम् आकरः रत्नाकरः । जलानां निधिः जलनिधिः । जलानि नितरां धीयन्तेऽस्मिन्निति वा । 'डुधाञ् धारणपोषणयोः' । यादसां जलजन्तूनां[7] पतिः यादःपतिः । अपां जलानां पतिः अपांपतिः । अप्पतिर्वा । समुद्रनामानि ॥ १ ॥

[1] Pt_2 adds चन्द्रोदयात्. [2] लाति A. [3] अस्य पारस्य दुस्तरत्वात् B_2.
[4] उदानि एव उदकानि, स्वार्थे कप्रत्ययः B_2. [5] प्रवहणे B_2. [6] सगरैः कृतः A, B_1.
[7] A, B_1, T omit.

(पा.) [1]समुद्रो—पारावारः । आवारपारकूपारावपि तत्पर्यायौ । 'आवारपारः कूपारो रत्नमीनाभिधाकरः' इति धनंजयः । सरित्पतिः—अर्णवः । 'अर्णसो लोपश्च' (वा. ५. २. १०९) इति सलोपः । रत्नाकरो—अपांपतिः । समुद्रनामानि ॥ अनुक्तम्—'ऊर्मिमाली पयोराशिः सरित्वान् [2]सलिलाकरः' । एतानि च ॥ १ ॥

[1] A_1 adds महागणपतिं वन्दे महादेवकुमारकम् ।
सहायं निजभक्तानां गुहानन्दप्रदायकम् ॥
श्रीधेनुवागीश्वर्यै नमः. [2] सरिदाकरः B_3.

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।

पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥ ४ ॥
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।

(वि.) तस्येति—[1]क्षीरमुदकं यस्य क्षीरोदः। [2]लवणमुदकं यस्य लवणोदः। तथा अपरे। के ते ? दध्युदः, घृतोदः, सुरोदः, इक्षूदः, स्वादूदः। समुद्रविशेषनामानि ॥ इन्द्रेण आप्यन्ते[3] आपः। 'आप्लृ व्याप्तौ'। बहुप्रदेशं [4]वृणोतीति वाः। वारि च। 'वृञ् वरणे'। वार्शब्दो रेफान्तः स्त्रीलिङ्गश्च पूर्वसाहचर्यात्। सरतीति सलिलम्[5]। 'सृ गतौ'। काम्यते तृषितैरिति कमलम्। 'कमु कान्तौ'। जलति जडीभवतीति जलम्। 'जल [6]घातने'। पयत इति पयः। 'पय गतौ'। पीयत इति वा। 'पा पाने'। कीलान् ज्वालान् अलति वारयतीति कीलालम्। 'अल भूषणपर्याप्तिशक्तिवारणेषु'। न म्रियन्तेऽनेनेत्यमृतम्। 'मृङ् प्राणत्यागे'। अनेन न मृतमिति वा। जीवन्ति येनेति जीवनम्। 'जीव प्राणधारणे'। भवति सर्वमस्मादिति भुवनम्। 'भू सत्तायाम्'। वन्यते याच्यत इति वनम्[7]। 'वनु याचने'। कं सुखं बध्यतेऽत्र कवन्धम्। 'बन्ध बन्धने'। कं [8]सुखं बध्नातीति वा। कमन्धमिति पाठे कम् अन्धमिति नामद्वयम्। तृषितैः काम्यत इति कम्। 'कमु कान्तौ'। अनन्त्यनेनेत्यन्धम्। 'अन प्राणने'। उनत्तीत्युदकम्। 'उन्दी क्लेदने'। पीयते पाथः। 'पीङ् पाने'। पातीति वा। 'पा रक्षणे'। [9]पुष्णातीति पुष्करम्। 'पुष पुष्टौ'। सर्वतो मुखं यस्य तत् सर्वतोमुखम्। अमति गच्छतीत्यम्भः। 'अम गत्यादिषु'। मुखम् अम्भते वा अनेनेत्यम्भः। 'अभि शब्दे'। ऋणोतीत्यर्णः। ऋच्छतीति वा। 'ऋ[10] गतौ'। तौतीति तोयम्। 'तुः आवरणार्थे'। तायते पालयतीति वा तोयम्। 'तायृ संतानपालनयोः'। पीयत इति पानीयम्[11]। पातव्यमिति वा। 'पा पाने'। नीयते नीरम्। 'णीञ् प्रापणे'। क्षीयते क्षीरम्। 'क्षि निवासगत्योः'। 'क्षि क्षये' इति वा धातुः। घस्यते वा। 'घस्लृ अदने'। अम्बते मुखमनेन अम्बु। 'अवि रवि लवि शब्दे'। शं सुखं वृणोतीति शम्बरम्। 'वृञ् वरणे'। सम्बरमिति पाठे संवृणोतीति संवरम्। वबयोरभेदः[12]। मेघस्य पुष्पं मेघपुष्पम्। घनस्य रसो घनरसः। एतानि जलनामानि॥ अपां विकारः आप्यम्। अम्मयं च। जलविकारनामनी॥ २-४॥

[1] क्षीरमिव Pt_2.　　[2] लवणमिव Pt_2.　　[3] आप्नुवन्ति Pt_2.　　[4] अपवारयति निम्नोन्नतमिति Pt_2.　　[5] सलतीति, 'षल गतौ' Pt_2.　　[6] 'जल घने' Pt_2.　　[7] वनतीति

वा, 'वन संभक्तौ' Pt₂. [8] शरीरं Pt₂. [9] पोषयति Pt₂. [10] ऋणु गतौ, 'ऋ गतिप्रापणयोः' D₂, I. [11] पातुं योग्यमिति वा Pt₂. [12] K₁, W₂ add.

(पा.) तस्य प्रभेदाः—अपरे। क्षीरोद इति[1] क्षीरसमुद्रः। 'मन्थोदधिस्तु क्षीराब्धिः क्षीरोदः कलशोदधिः' इति वैजयन्ती (पृ. ३६, श्लो. ११)। लवणोद इति क्षारसमुद्रः। 'लावणो लवणोदः स्यात्' इति वैजयन्ती[2] (पृ. ३५, श्लो. १०)। अपरशब्देनोच्यमाना दध्युदकघृतोदकमद्योदकेक्षुरसोदकस्वादूदकाः पञ्च समुद्रभेदाः। आपः—वाः। रेफान्तनपुंसकः[3]। वारि—घनरसम्[4]। 'घनरसमम्भः क्षीरं घृतममृतं जीवनं वनं भुवनम्' इति रत्नकोशपाठात् घनरसशब्दः नपुंसकः। 'वार्नं पुंसि स्त्रियो भूमन्यापो घनरसः पुमान्' इति वैजयन्तीपाठात् (पृ. १५४, श्लो. ३) पुंलिङ्गः। उदकनामानि॥ अनुक्तम्—'स्यात् किट्टिमं क्षारजलम्'। लवणोदकं किट्टिमं स्यात्। 'स्वादुतोयं तु शीतलम्'। स्वादूदकनाम॥ त्रिषु—अम्मयम्। अब्विकारनामनी॥२-४॥

[1] B₃ omits. [2] A₁ adds कण्ठोक्तौ क्षीरोदलवणोदौ. [3] नपुंसकं B₃; °कान्तं B₄. [4] B₃ adds 'कृपीटं काण्डमस्त्री स्याज्जीवनीयं कुशं विषम्'.

भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु॥ ५॥
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः।

(वि.) भङ्ग इति—भज्यते[1] भङ्गः। 'भञ्जो आमर्दने'। तरतीति तरङ्गः। 'तॄ प्लवनतरणयोः'। ऊर्वतीति ऊर्मिः। 'उर्वी हिंसायाम्'। ऋच्छतीति वा। 'ऋ गतौ'। स्त्रीपुंसयोः। वेति[2] वृद्धिं गच्छतीति वीचिः। 'वी गत्यादिषु'। वीचिः स्त्रियाम्। तरङ्गनामानि॥ उत् ऊर्ध्वं लोडति[3] उल्लोलः। 'लोडृ[4] उन्मादे'। कल्लते शब्दायते कल्लोलः[5]। 'कल्ल अव्यक्ते शब्दे'। कत् ऊर्ध्वं लोलतीति कल्लोलः। महातरङ्गनामनी॥ आवर्तते चक्रवद् भ्राम्यतीति[6] आवर्तः। 'वृतु वर्तने'। अम्भोभ्रमणनाम॥ ५॥

[1] Pt₂ adds स्वयमेव. [2] वाति, 'वा गतिगन्धनयोः' Pt₂. [3] लोडयति K₃, Pt₂. [4] 'लुड विलोडने' K₁, K₂. [5] कल्यते जलमनेन, 'कल किल क्षेपे' Pt₂. [6] भ्रमति D₁.

(पा.) भङ्गस्तरङ्गः—वीचिः। तरङ्गनामानि॥ ऊर्मिर्विकल्पितस्त्री। वीचिर्नियतस्त्री। अथोर्मिषु—कल्लोलौ। महावीचिवाचकोर्मिषु उल्लोलकल्लोलौ स्याताम्।

'[1]वीचिर्भङ्गस्तरङ्गः स्यात् तन्महत्त्वे च कथ्यते ।
ऊर्मिरुत्कलिकोल्लोलः कल्लोलो लहरी तथा ॥'

इति हलायुधः (अ. मा. ३. ३१) । 'कल्लोललीला मुरवैरिवाहा' इति प्रयोगः[2] चन्द्रकाव्ये । स्यादावर्तो—भ्रमः । अम्भोभ्रमणमावर्तः स्यात् ॥ ५ ॥

[1] वीचीति मुद्रितग्रन्थे. [2] A_1 omits.

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥ ६ ॥
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।

(त्रि.) पृषन्तीति – पर्षन्तीति[1] पृषन्ति । 'पृषु [2]सेचनहिंसाक्लेशनेषु'। तकारान्त-नपुंसकलिङ्गः । विन्दतीति बिन्दुः । 'विदि अवयवे' । पर्षन्ति सिञ्चन्तीति पृषताः । विगता प्रुट् दाहोऽस्याः विप्रुट्[3] । बिन्दुनामानि ॥ चक्राकार एषामस्तीति चक्राणि । वक्राणीति पाठे वङ्कनात्[4] वक्राणि । 'वकि कौटिल्ये गतौ च'। जलशिरोरूपं पुटं भित्त्वा निर्यान्तीति पुटभेदाः[5] । 'भिदिर् विदारणे'। भ्रमन्ति जलान्येभिरिति भ्रमाः । 'भ्रमु चलने'। जलानि निर्गच्छन्त्येभ्य[6] इति जलनिर्गमाः । 'गम्लृ गतौ'। जलनिर्गम[7]-नामनी ॥ ६ ॥

[1] Pt_2 adds सिञ्चन्तीति. [2] 'पृष सेचने' A, B_1, T, W_1, Pt_2. [3] विशेषेण प्रोक्षयति विप्रुट्, 'उक्ष सेचने' B_2. [4] पङ्कसंबन्धात् वक्रीभवन्तीति वक्राणि B_2; वक्रत्वात् वक्राणि Pt_2. [5] पुटं संश्लिष्टं भिन्दतीति I, Pt_2. [6] अस्मिन् A, B_1, T; अस्मात् W_2. [7] जलपथनाम D_1, K_1, K_5, U; निर्गमस्थान° W_1.

(पा.) पृषन्ति – विप्रुषः स्त्रियः । जलबिन्दुनामानि ॥ बहुत्वमत्राविवक्षितम्[1] । 'विप्रुट् स्त्री पृषतो बिन्दुः स्तोको द्रप्सः पृषन्न पुम्' इति वैजयन्ती (पृ. २५, श्लो. ८) । [2]वक्राणि पुटभेदाः स्युः । वेण्याकारजलकौटिल्यनामनी ॥ भ्रमाः – निर्गमाः । नीरनिर्गम-नामनी । जलागमनपथनामेति केचित् । 'निल्लगंड्लु' ॥ ६ ॥

[1] A_1 adds शब्दस्वभावस्तु. [2] चक्राणीति पाठः B_2.

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥
पारावारे परार्वाची तीरे पात्रं तदन्तरम् ।

(वि.) कूलमिति—[1]कूलयतीति कूलम्। 'कूल आवरणे'। रुध्यत इति [2]रोधः, रुणद्धि जलमिति वा। 'रुधिर् आवरणे'। सकारान्तनपुसंकलिङ्गः, अकारान्तोऽपि। तरन्त्यस्मादिति तीरम्[3]। 'तॄ प्लवनतरणयोः'। [4]प्रतीरं च। तटतीति तटम्। 'तट उच्छ्राये'। तीरनामानि॥ परं चार्वाक् च परार्वाची, ते तीरे पारावारे इत्युच्येते। पार्यते उत्तारणकर्म समाप्यतेऽत्र पारम्। 'पार कर्मसमाप्तौ'। परतीरनाम॥ न विद्यते वाः उदकमत्र कदाचिदपीति अवारम्। अर्वाक्तीरनाम[5]॥ [6]पीयत इति पात्रम्। 'पीङ् पाने'। उभयतीरमध्यप्रवाहस्वरूपनाम॥ ७॥

[1] कूल्यते A, D_1, T; कूलति K_5, W_1, Y, Pt_2. [2] रुन्धे वारीति B_1, K_5 [3] तरन्त्यनेनेति, तीरयति सरित्तरणकर्मात्रेति वा, 'तीर कर्मसमाप्तौ' Pt_2. [4] तीरमेव प्रतीरम् Pt_2. [5] सिकतामयतटनाम K_5. [6] K_5 omits 5 lines; पिबन्त्यस्मात्, 'पा पाने' A.

(पा.) कूलं—तटं त्रिषु। त्रिष्विति तटमात्रविशेषणम्। 'कूलं तीरं प्रपातश्च प्रान्ते कच्छस्तटी[1] त्रयी' इति वैजयन्ती (पृ. १५६, श्लो. ३२)। तीरनामानि॥ पारावारे—तदन्तरम्। परं तीरं पारं [2]स्यात्। अर्वाक्तीरमवारं स्यात्। तयोर्मध्यं पात्रं स्यात्॥ ७॥

[1] तटं A_1, B_3. [2] B_3 adds परतीरनाम.

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्॥ ८॥
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्।

(वि.) द्वीप इति—[1]वारिणोऽन्तः वारिमध्ये यत्तटं तस्मिन् द्वीपान्तरीपशब्दौ वर्तेते। [2]द्विधा गताः आपोऽस्मिन्निति द्वीपः। [3]अन्तर्गता आपोऽत्रेति अन्तरीपम्। अन्तरीपं चास्त्रियां वर्तते। उदकमध्यस्थतटनामनी[4]॥ [5]तोये क्षीणे सति उत्थितं दृश्यं तत् पुलिनमित्युच्यते। [6]पुलतीति पुलिनम्। 'पुल महत्त्वे'। तोयोत्थितद्वीपनाम॥ सिकता अत्र सन्तीति [7]सैकतम्। सिकतामयतटनाम॥ ८॥

[1] Pt_2 adds the line. [2] द्विविधा A, B_1; पीयन्त इति पाः आपः, ताः द्विधा अत्रेति द्वीपः B_2. [3] अपामन्तः मध्यमन्तरीपं Pt_2. [4] Y omits °स्थ°. [5] Pt_2 adds. [6] पुलः महत्त्वमस्यास्तीति Pt_2. [7] Pt_2 adds सिकतामयं च.

(पा.) द्वीपो—तटम्। द्वीपमस्त्री। अन्तरीपं नपुंसकम्। एते द्वे जलमध्यतटनामनी[1]॥ तोयोत्थितं—पुलिनम्। तोयोत्थितद्वीपनाम। सैकतं सिकतामयम्। सिकतामयतटनाम। [2] 'यिनुकदिव्व'॥ ८॥

[1] °मध्यगत° A_1.　　[2] 'इनुकदिन्न' B_3.

निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ॥ ९॥
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः।

(वि.) निषद्वर इति—निषीदन्ति वराहादयोऽत्रेति निषद्वरः। 'षद्लृ विशरणगत्यवसादनेषु'। निषीदन्त्यस्मिन्निति निषत्, तां वृणोतीति वा। 'वृञ् वरणे'। जमति गतिं भक्षयतीति जम्बालः। 'चमु छमु जमु अदने'। पञ्च्यन्ते[1] गन्तॄणां पदान्यत्रेति पङ्कः। [2]'पचि व्यक्तीकरणे'। [3]शीयते पादोऽत्र शादः। 'शद्लृ शातने'। कर्दतीति कर्दमः। 'कर्द कुत्सिते शब्दे'। कृणोति हिंसयतीति वा। 'कृञ् हिंसायाम्'। पङ्कनामानि॥ प्रवृद्धं जलमुच्छ्वसितीति यैर्मार्गैः ते जलोच्छ्वासाः[4]। 'श्वस प्राणने'। परितो जलं वहन्तीति परीवाहाः[5]। तटाकान्ते प्रवृद्धजलनिर्गमाय कृतमार्गनाम॥ स्वल्पाः कूपाः कूपकाः[6]। विदार्यन्ते[7] विदारकाः। 'दॄ विदारणे'। शुष्कनद्यादौ[8] जललाभाय क्रियमाणगर्तनाम॥ ९॥

[1] पच्यन्ते A, B_1, T, Pt_2.　　[2] 'पचि विस्तारे' Pt_2; I, K_2, K_3, U, Y add व्यज्यन्ते.　　[3] शीयन्ते पादाः B_1, T; शीर्यते पादौ K_3, W_1.　　[4] जलस्य उच्छ्वासा इव Pt_2.　　[5] K_1 adds 'वह प्रापणे.'　　[6] अल्पार्थे कप्रत्ययः B_2.　　[7] B_2 adds खन्यन्ते.　　[8] शुष्कसस्यादेर्जलार्थं B_2.

(पा.) निषद्वरस्तु—कर्दमौ। पङ्कनामानि॥ जलोच्छ्वासाः परीवाहाः। तटाकान्ते प्रवृद्धजलनिर्गमाय कृतमार्गनामनी। 'चरुवुमरव'। 'पूरोत्पीडे तटाकस्य परिवाहः प्रतिक्रिया' इत्युत्तररामचरिते[1] (३. २९)। कूपकास्तु विदारकाः। शुष्कनद्यादौ [2]जललाभाय क्रियमाणगर्तनामनी। भाषया 'चलमलु'। अनुक्तम्—'अवतारो घट्टस्तीर्थम्'। [3]जलावतरणनामानि। 'निल्लिरेवु'॥ ९॥

[1] Wrongly attributed to वैजयन्ती in A_1, B_3.　　[2] नीर° A_1.　　[3] जलप्रवेशयोग्यदेशनामनी B_3.

नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ॥ १० ॥
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः ।

(वि.) नाव्यमिति—नावा तार्यं [1]नाव्यम् । नौतार्यजलनाम ॥ नुद्यते इति नौः । 'णुद प्रेरणे' । नयतीति वा । 'णीञ् प्रापणे' । तरत्यनया नदीं [2]तरणिः । तरिश्च । 'तॄ प्लवनतरणयोः' । तरणी तरिरिति वा [3]पाठः । नौनामानि ॥ ऊर्ध्वमुप्यते उडुपम् । 'डुवप् बीजतन्तुसंताने' । उडवः आपः ताभ्यो रक्षति पातीत्युडुपम् । 'पा रक्षणे' । प्लवन्तेऽनेनेति प्लवः । '[4]प्लुङ् गतौ जलोपरि सर्पणे च' । कोलति संस्त्यायतीति कोलः । 'कुल संस्त्याने बन्धुषु च' । [5]तृणप्लवनामानि ॥ स्वतः [6]स्रवतीति स्रोतः । 'स्रु गतौ' । अकृत्रिमाम्बुसरणनाम ॥ १० ॥

[1] नौतार्यं K_3. [2] तार्यतेऽनया नदी; तरी च W_2. [3] तरणी तरीति B_1. [4] 'प्लव गतौ' W_2, Pt_2. [5] W_1 omits तृण:; सिन्धुतरणार्थं दारवप्लवनामानि B_2. [6] सरतीति B_2, W_2, Pt_2; 'सृ गतौ' Pt_2, W_2.

(पा.) नाव्यं—नौतार्ये । नावा [1]तर्तुं योग्यं नाव्यं स्यात् । स्त्रियां—तरिः । नावो नामानि ॥ स्त्रियामिति जातिविशेषणम् । इयं नौरियं तरणिः, इयं तरिरियमङ्गिनी ॥ अनुक्तम्—'यानपात्रं प्रवहणं वोहित्थं च [2]वहित्रकम्' । यानपात्रनामानि ॥ उडुपं—कोलः । [3]तृणप्लवनामानि । 'तेप्प' ॥ अनुक्तम्—'तरण्डश्चर्मपात्रादि' । जलतरणाय कल्पितवर्तुलचर्मपात्रादिस्तरण्डः स्यात् । 'आरोह्योऽसौ तरण्डकः' इति वैजयन्ती (पृ. १५५, श्लो. १६) । स्रोतो—स्वतः । स्वतोऽम्बुसरणं प्रवाहः । तत् स्रोतः स्यात् । 'ओघः प्रवाहो वेणी च धारा स्रोतो रयः स्मृतः' इति हलायुधः (अ. मा. ३. ४५) ॥ १० ॥

[1] तरितुं B_3, B_4. [2] वहित्रवत् A_2, B_3. [3] B_3 omits तृण°.

आतरस्तरपण्यं स्याद् द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥
सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः ।

(वि.) आतर इति—[1]आतरन्त्यनेनेति आतरः । 'तॄ प्लवनतरणयोः' । आवाप इति वा पाठः । आ समन्तादुप्यते [2]आवापः । 'डुवप् बीजसंताने' । तरस्य तरणस्य पण्यं मूल्यं तरपण्यम् । नदीतरणाय नाविकदेयमूल्यनामनी ॥ द्रवत्यस्यां जलमिति द्रोणी । 'द्रु गतौ' । काष्ठपाषाणादिनिर्मिताम्बुवाहिनीनाम ॥ समुदितानां यात्रा संयात्रा द्वीपान्तरगमनम् । सा प्रयोजनमस्य सांयात्रिकः[3] । पोते [4]वणिक् [4]पोतवणिक् । वहित्रवणिङ्नाम ॥

कर्णम् अरित्रं धारयतीति कर्णधारः। 'धृञ् धारणे'। नावा [5]तरतीति नाविकः। 'तॄ प्लवनतरणयोः'। [6]नौतारयितृनामनी ॥ ११ ॥

[1] आ समन्तात् तरति B₂. [2] आ समन्तात् अवाप्यते, 'आप्लृ व्याप्तौ' B₂. [3] 'वहित्रमुकलमुपेरु' K₃. [4] पूयतेऽनेनेति पोतः यानं, तत्र भवः वणिक् पोतवणिक् B₂, Pt₂. [5] तारयतीति A, B₂, T. [6] नौतरणकर्तृनामनी B₂.

(पा.) आतरस्तरपण्यं स्यात्। तरपण्यं तरणमूल्यम् तदातरः स्यात्। द्रोणी काष्ठाम्बुवाहिनी। द्रोणीनामनी ॥ 'दोनि'। काष्ठाम्बुवाहिनीति करिकलभसदृशप्रयोगः। 'द्रोणी स्यादम्बुवाहिन्यां [1]द्रवभाण्डे गिरिप्लवे' इति वैजयन्ती (पृ. २२१, श्लो. १८)। सांयात्रिकः पोतवणिक्। सांयात्रिक इति वहित्रव्यवहारिणो नाम। वहित्रमिति पाषाणादि(?)निर्मितयानपात्रविशेषः। तरिव्यवहारी[2] च भवति। '[3]तरीषु तत्रत्यमफल्गुभाण्डं सांयात्रिकानावपतोऽभ्यनन्दत्' इति माघप्रयोगात् (शिशु. ३. ७६)। कर्णधारस्तु नाविकः। तरणितारयितृनामनी ॥ ११ ॥

[1] द्रव्य° B₃. [2] व्यवहारिणोऽपि B₃. [3] तरिषु A₁.

नियामकाः पोतवाहाः कूपको गुणवृक्षकः ॥ १२ ॥
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः।

(वि.) नियामका इति—नियच्छन्ति पोतं नियामकाः। 'यम उपरमे'। पोतं [1]वहन्तीति पोतवाहाः। 'वह प्रापणे'। पोतवाहनामनी ॥ [2]कूपप्रतिकृतित्वात् कूपकः। गुणेन रज्ज्वा बद्धो वृक्षः[3] गुणवृक्षकः। [4]पोतमध्यस्थपताकास्तम्भनामनी ॥ नौकायाः प्रेरणदण्डो नौकादण्डः। क्षिप्यते नौरनयेति क्षेपणी, क्षेपणिर्वा। 'क्षिप प्रेरणे'। [5]नौप्रेरणदण्डनामनी ॥ ऋच्छति नौरनेनेत्यरित्रम्। 'ऋ गतिप्रापणयोः'। के जले नावो निपात्यन्तेऽनेनेति केनिपातकः। 'पत्लृ गतौ'। नौप्रवर्तकदर्वीनामनी ॥ १२ ॥

[1] वाहयन्ति B₁, D₁, I. [2] कूपजलहरणार्थं निर्मितो यन्त्रविशेषः सोऽपि कूप एव, तत्प्रतिकृतित्वात् कूपकः, साम्ये कप्रत्ययः B₂; कायतीति कूपकः, 'कै शब्दे' Pt₂. [3] वृक्षकः A, B₁, T. [4] °पटबन्धन° B₂. [5] इतस्ततःप्रेरण° B₂.

(पा.) नियामकाः पोतवाहाः। वहित्रतारयितृनामनी ॥ कूपको गुणवृक्षकः। गुणेन बद्धपोतमध्यगतस्तम्भनामनी ॥ नौकादण्डः क्षेपणी स्यात्। नौकाप्रेरकदण्डः क्षेपणी स्यात्। अरित्रं केनिपातकः। [1]नौदर्विनामनी ॥ १२ ॥

[1] °दर्वी° B₁.

अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ॥ १३ ॥
यानपात्रं तु पोतोऽब्धिभवे त्रिषु समुद्रियम् ।
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ॥ १४ ॥

(वि.) अभ्रिरिति—अभ्रयति पोते लवणादिकं पातयतीति अभ्रिः । 'अभ्र गतौ' । काष्ठनिर्मितः कुद्दालः काष्ठकुद्दालः । [1]लवणादिखननकाष्ठकुद्दालनामनी ॥ [2]सेकाय पात्रं सेकपात्रम् । सिच्यतेऽनेन नौकाजलमिति सेचनम् । 'षिच क्षरणे' । पोतरन्ध्र-प्रविष्टजलस्य बहिःसेचनाय नियोजितदारुपात्रनामनी ॥ यानाय[3] पात्रं यानपात्रम् । पूयते कालक्रमेणेति पोतः । 'पूयी विशरणे' । वहित्रनामनी ॥ समुद्रे भवं समुद्रियम् । [4]त्रिषु । कथं ? समुद्रिया आपः, समुद्रियं लवणं, [5]समुद्रियस्तरङ्ग इत्यादि । अब्धिभव-मुक्तादिनाम[6] ॥ नावोऽर्धम् अर्धनावम् । नावोऽर्धनाम ॥ अतीता नौर्येन अतिनु । नावमतिक्रान्तमिति वा । अतीतनौकजलादिनाम ॥ १३–१४ ॥

[1] दृढदारुनिर्मितसन्धीकरणसाधनविशेषः; कुम् उद्दालयतीति कुद्दालः, 'दल विशरणे' B_2. [2] सेकः सेचनं तस्य पात्रं Pt_2; सेकायान्तःस्थजलानां निर्मितं पात्रं B_2. [3] B_2 adds निर्मितं. [4] तत् त्रिषु वर्तते D_1. [5] समुद्रियो मुक्तामणिः Pt_2. [6] Y adds °वस्तु°.

(पा.) अभ्रिः—काष्ठकुद्दालः । दारुमयकुद्दालोऽभ्रिः स्यात् । अभ्रिपुरन्ध्रिशौरि-शरारितन्द्रिवल्लरिवलिगालिशष्कुलिहलिधूलिशब्दा[1] ह्रस्वान्ता दीर्घान्ताश्च भवन्तीत्यरुणदत्त-लिङ्गानुशासने[2] सम्यक् प्रतिपादितम् ॥ सेकपात्रं—सेचनम् । जलसेकबोकाणः सेचनं स्यात् । 'पोतरन्ध्रप्रविष्टजलस्य बहिःसेचनाय निर्मितदारुपात्रनाम' इति वदन्ति । तदसत् । 'चर्मपात्रं तु बोकाणः' इति वामनलिङ्गानुशासनवचनात् । यानपात्रं तु पोतः । वहित्रनामनी ॥ अब्धिभवे—समुद्रियम् । अब्धौ समुद्रे भवं समुद्रियं स्यात् । तच्च त्रिलिङ्गम् । क्लीबे—अर्धे । नावोऽर्धेऽर्धनावं स्यात् । अर्धनावमर्धनावीति हि स्त्रीनपुंसक-योर्दृश्यत इति शाकटायनः (२. १. १६७) ॥ अतीतनौके—त्रिषु । नावमतिक्रान्तमतिनु स्यात् । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१. २. ४७) इति ह्रस्वः[3] । 'स्त्रीपुंसयोस्तु अतिनौः' ॥ १३–१४ ॥

[1] A_1 adds °आलि°. [2] °शासनकारेण A_1. [3] इति ह्रस्वत्वं नपुंसकविषयम् A_1.

त्रिष्वागाधात् प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ।
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ॥ १५ ॥

अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ।

(वि.) त्रिष्विति—वक्ष्यमाणागाधपर्यन्ताः[1] शब्दाः त्रिषु वर्तन्ते । प्रसीदतीति प्रसन्नः । 'षद्लृ विशरणगत्यवसादनेषु' । न [2]छाद्यते दृष्टिरित्यच्छः । 'छद अपवारणे' । निर्मलनामनी ॥ कं जलं लुनातीति कलुषम् । 'लूञ् छेदने' । कं लुषति हिनस्तीति वा । 'लुष हिंसायाम्' । [3]न अच्छः अनच्छः । [4]आविलतीत्याविलः । 'विल संवरणे' । अनिर्मलनामानि ॥ खननाय नितरां [5]मनतीति निम्नः । 'म्ना अभ्यासे' । [6]गमनेन भियं रातीति गभीरं गम्भीरं च । 'रा दाने' । गां भुवं भियमीरयतीति वा । 'ईर प्रेरणे' । अत्यर्थनिम्ननामानि ॥ उत् ऊर्ध्वं तन्यते उत्तानम् । 'तनु विस्तारे' । निम्नविपर्ययनाम ॥ न गाधम् अगाधम् । नास्ति गाधः प्रतिष्ठा अस्येति वा । 'गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च' । न विद्यते [7]तलस्पर्शोऽत्र अतलस्पर्शः । अगाधनामनी ॥ के जले वर्तन्ते इति केवर्ताः मत्स्यादयः, तेषामयं हन्ता कैवर्तः । 'वृतु वर्तने' । विक्रयेण मत्स्यान् दाशति[8] दाशः । 'दाश्टृ दाने' । दाश्नोति मत्स्यानिति वा । 'दाश्टृ हिंसायाम्' । धत्ते मत्स्यानिति धीवरः । 'डुधाञ् धारणपोषणयोः' । ध्यायति मत्स्यानिति वा । 'ध्यै चिन्तायाम्' । जालिकनामानि ॥ १५ ॥

[1] °पर्यन्तं I.　[2] न छ्यति दृष्टिम् अच्छः, 'छो छेदने' Pt_2.　[3] अच्छो न भवतीति B_2.　[4] आ समन्तात् बिलतीति (बिल्यते Pt_2), 'बिल छेदने,' वबयोरभेदः I, Y.　[5] म्नायते W_2, Y, Pt_2.　[6] गमने Pt_2.　[7] अधःस्पर्शः Pt_2.　[8] Pt_2 adds द्यति, 'दोऽवखण्डने'.

(पा.) त्रिष्वागाधात् । अगाधशब्दावधि ते त्रिलिङ्गाः त्रिष्विति पुनर्ग्रहणात् । प्रसन्नोऽच्छः । [1]निर्मलनामनी । 'तेट' । कलुषो—आविलः । [2]अनिर्मलनामानि । 'कलंकुट' । निम्नं—गम्भीरम् । अत्यर्थनिम्ननामानि ॥ उत्तानं तद्विपर्यये । निम्नविपर्ययनाम ॥ अगाधमतलस्पर्शः । तलस्पर्शविहीननाम ॥ कैवर्ते—धीवरौ । जालिकनामानि ॥ 'शाल[3] . . . . . दाशपुरीशे'—इत्यूष्मभेदपाठात् तालव्यः । 'कैवर्तभृत्ययोर्दासो दासी बाणा च चेटिका' इति रुद्राभिधानकोशपाठाद् दन्त्यः ॥ १५ ॥

[1] नैर्मल्य° A_1.　[2] अनैर्मल्य° A_1.　[3] B_3 adds दाश इत्यत्र; gap in A_1, B_3.

आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ॥ १६ ॥

मत्स्यधानी कुवेणी स्याद् बडिशं मत्स्यवेधनम् ।

(वि.) आनाय इति—आनीयन्ते मत्स्या अनेनेति आनायः । 'णीञ् प्रापणे'। जालवत् गवाक्षवत् तिष्ठतीति जालम् । जले क्षिप्यत इति वा । जालनामनी ॥ शणमयं सूत्रं शणसूत्रम् । निमज्जनेन जलं पुनातीति पवित्रकम् । निर्मत्स्यत्वेन वा । 'पूञ् पवने'। जालरज्जुनामनी ॥ मत्स्या धीयन्तेऽत्रेति [1]मत्स्यधानी । कुत्सितं वेणन्ते मत्स्या अत्र कुवेणी । 'वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु' । मत्स्यकरण्डिकानामनी[2] ॥ बलिनो मत्स्यान् श्यतीति बडिशम्[3] । 'शो तनूकरणे' । मत्स्या विध्यन्ते येन तत् मत्स्यवेधनम् । 'व्यध[4] ताडने' । [5]मत्स्यगलग्राहकसामिषवक्रायोमययन्त्रनामनी ॥ १६ ॥

[1] मत्स्याधानी A, B_1, T; 'डुधाञ् धारणपोषणयोः' A. [2] °करण्डक° D_2. [3] बलिशं W_1; डलयोरैक्यात् I. [4] 'विध विधाने' W_1. [2] °वक्राकार° A.

(पा.) आनायः—जालं स्यात् । जालनामनी । 'वल' । शणसूत्रं पवित्रकम् । जालादिरज्जुनामनी । 'सन्नपुत्राडु' । मत्स्यधानी—स्यात् । मीनकरण्डिकानामनी । 'मीनबुट्टि' । बडिशं मत्स्यबन्धनम् । मत्स्यग्राहकायोयन्त्रनामनी । 'गालमु' ।

'अजानन् दाहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद् बडिशयुतमश्नातु पिशितम् ।'

इति भर्तृहरिः (वै. श. १८) ।

'[1]बडिशक्रोडपाटलम् ।
तारकं रसनं नीडमेते टाबन्तकाः स्त्रियाम्' ॥

इति त्रिकाण्डशेषपाठाद् (पृ. ३८, श्लो. १०४७-८) बडिशेत्यपि स्यात् ॥ १६ ॥

[1] बडिशं तारकं नीडमेते टाबन्तकाः स्त्रियाम् A_1, B_3.

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ॥ १७ ॥
विसारः शकली चाथ गडकः शकलार्भकः ।

(वि.) पृथुरोमेति—पृथूनि रोमाणि [1]मुखदेशे यस्य सः पृथुरोमा । बालमत्स्यान् [2]झषतीति झषः । 'झष हिंसायाम्' । माद्यति मांसजिघृक्षया मुह्यतीति मत्स्यः । 'मदि[3] हर्षग्लपनयोः' । मीयते धीवरेण मीनः । 'मीञ् हिंसायाम्' । [4]मिनोति क्षिपति जलमिति वा । 'डुमिञ् प्रक्षेपणे' । [5]विसरतीति विसारी । 'सृ गतौ' । विसारी[6] एव वैसारिणः । अण्डाज्जायत इत्यण्डजः । 'जनी प्रादुर्भावे' । विचित्रं सरतीति विसारः[7] । शकलं

शल्यमस्यास्तीति शकली। शकुलीति वा पाठः। शकुल इति वा। शक्यते ग्रहीतुं शकुलः। 'शक्लृ शक्तौ'। मत्स्यनामानि॥ [8]गडति पुच्छाच्छोटनात् गडकः[9]। 'गड सेचने'। [10]शकलार्भकनाम॥ १७॥

[1] A, B_1, T add पक्षाः. [2] Pt_2 adds हिनस्ति. [3] 'मदि हर्षे' Pt_2. [4] मीनाति B_1, W_2, Y; 'मीञ् हिंसायाम्' I. [5] K_5, W_2, Y add मांसजिघृक्षया. [6] विसारिणः संबन्धी A, B_1. [7] 'सृ गतौ' I. [8] गण्डति A, T. [9] गण्डकः B_1, T. [10] शकुलार्भक° A, D_1.

(पा.) पृथुरोमा—मत्स्यः। मच्छोऽप्यत्रेति सुभूतिवचनान्मच्छोऽप्यस्ति। मीनो वैसारिणोऽण्डजः। विसार्येव वैसारिण इति [1]व्युत्पत्तिः। विसारः शकली च। 'शकली शल्की च विज्ञेयः' इति हलायुधपाठात् (अ. मा. ३. ३५) शल्कीत्यपि स्यात्[2]। मीननामानि॥ 'षडक्षीणोऽप्सुचकम आत्माशी जलपिप्पलः[3]'। एतानि च। [4]अथ गडकः शकुलार्भकः। अधिकपुच्छमीननामनी। भाषया 'कुच्चुलमीनु'॥ १७॥

[1] व्युत्पत्त्या A_1. [2] भवति B_3. [3] °पिप्पकः A_1, B_3. [4] गण्डोलः A_1.

सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ॥ १८॥
नडमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः।

(वि.) सहस्रदंष्ट्र इति—[1]बहुदंष्ट्रत्वात् सहस्रदंष्ट्रः। [2]भक्ष्यतया शास्त्रेषु पठ्यत इति पाठीनः। 'पठ व्यक्तायां वाचि'। पाठयति स्वजातीयविरुद्धमिति वा। पाटीन इति पाठे पाटयतीति। 'पट[3] भेदने'। बहुदंष्ट्रमत्स्यनामनी॥ उत् ऊर्ध्वं लुम्पति भ्रमतीति उलूपी। 'लुप्लृ छेदने'। उ सविस्मयं लुप्यति [4]पङ्कजादिकमिति वा। 'लुप विमोहने'। शिशुरिव[5] शिशुकः। शिशुवच्चपलमत्स्यनामनी॥ [6]नडाख्यतृणे मीनः नडमीनः। चीयते लीयते चिलिचिमः। 'चिञ् चयने'। 'लीङ् श्लेषणे'। तृणसंचारिमत्स्यनामनी॥ प्रोषति पित्तादिकमिति प्रोष्ठी। 'उष प्लुष दाहे'। शफान्[7] गतिसाधनावयवान् रिणाति पीडयतीति शफरी। 'री गतिरेषणयोः'। [8]पित्तघ्नमत्स्यनामनी॥ १८॥

[1] सहस्रं दंष्ट्राः यस्य Pt_2. [2] भक्षतया W_1. [3] 'पट व्यथने' D_2. [4] पङ्कादिकं B_2; 'लुप लोपे' A, B_1, T. [5] शिशुवत् गच्छतीति B_1. [6] नलाख्ये तृणे वर्तते मीनः B_1, Y. [7] शफः पित्तविकारः B_2. [8] पित्तघ्नमीननाम W_2; उत्पतनशीलमत्स्यनाम Y.

(पा.) सहस्रदंष्ट्रः पाठीनः । बहुदंष्ट्रमीननामनी । 'बेडिशमीनु' । उलूपी—समौ । शिशुवच्चपलमत्स्यनामनी । 'ससियलु' ।। नडमीनश्चिलिचिमः । वृश्चिकाकारमत्स्यनामनी । 'तेलुमीनु' । प्रोष्ठी—द्वयोः । पित्तघ्नमीननामनी[1] ।। १८ ।।

[1] °मत्स्य° B_3.

क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ।। १९ ।।
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ।
तिमिंगिलादयश्चाथ यादांसि जलजन्तवः ।। २० ।।

(वि.) क्षुद्रेति—क्षुद्राणामपरिमितपरिमाणानां मत्स्यानामण्डाज्जाताः, तेषां मत्स्यानां संघातः क्षुद्राण्डमत्स्यसंघातः । पोता मत्स्यपोता आधीयन्तेऽस्मिन्निति पोताधानम् । 'डुधाञ् धारणपोषणयोः' । मत्स्यपोतसमूहनामनी ।। [1]रोहितवर्णत्वात् रोहितः । [2]जले मज्जतीति मद्गुरः । 'टुमस्जो शुद्धौ' । शलति शीघ्रं गच्छतीति शालः । 'शल चल आशुगमने' । राज्यः[3] रेखा अस्य सन्तीति राजीवः । शक्नोति गन्तुं शकुलः । 'शक्लृ शक्तौ' । [4]तिम्यतीति तिमिः । 'तिम आर्द्रीभावे' । तिमिं गिलतीति तिमिंगिलः । 'गॄ निगरणे' । एवमादीनि [5]झषभेदनामानि ।। यान्तीति यादांसि । 'या प्रापणे' । यतन्ते हन्तुं मत्स्यानिति वा । 'यती प्रयत्ने' । जले विद्यमाना जन्तवः जलजन्तवः । क्रूरजलजन्तुनाम ।। १९–२० ।।

[1] रक्तत्वात् A, B_1, T. [2] B_1, T omit; 'मस्ज मज्जने' A, T, W_1. [3] राजयः I. [4] B_2 adds आर्द्रीक्रियते. [5] जलजन्तुनामानि K_3; एते सप्त प्रत्येकं मत्स्यभेदाः । आदिशब्देन तिलादयोऽपि । यतन्ते बालमत्स्यान् हन्तुं यत्नं (प्रयत्नं U) कुर्वन्तीति वा यादांसि । 'यती प्रयत्ने' W_1.

(पा.) क्षुद्राण्ड—पोताधानम् । मत्स्यसमूहनामानि ।। अथो झषः—तिमिंगिलादयश्च । 'मकरो मत्स्यराड् झषः' इति वैजयन्ती (पृ. १५२, श्लो. ५१) । [1]झषादयः पृथक्पृथङ्मत्स्याः । अथ यादांसि जलजन्तवः । क्रूरजलजन्तवो यादांसीत्युच्यन्ते । 'अन्तर्जलचरं [2]सत्त्वं क्रूरं यादोऽभिधीयते' इति हलायुधः (अ. मा. ३. ३४) ।।१९–२०।।

[1] मकरादयः A_1. [2] सर्वं A_1.

तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ।
स्यात् कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ॥ २१ ॥

(वि.) तद्भेदा इति—शिशून् मारयतीति शिशुमारः । 'मृङ् प्राणत्यागे'। उनत्तीत्युद्रः । 'उन्दी क्लेदने'। शङ्कतेऽस्मात् लोकः शङ्कुः । 'शकि शङ्कायाम्'। मायां करोतीति मकरः । 'डुकृञ् करणे'। प्राणिकवलने मुखं किरतीति वा । 'कॄ विक्षेपे'। आदिशब्देन जलहस्तिग्राहादयः । [1]एवमादीनि यादोभेदनामानि ॥ कौ भूमौ लीयत इति कुलीरः । 'लीङ् श्लेषणे'। [2]कुली: [3]परलोकाय ईरयतीति वा । 'ईर प्रेरणे'। कृणाति जननीं कर्कटकः । 'कृ हिंसायाम्'। कर्कटनामनी ॥ कुत्सितः ऊर्मिः वेगोऽस्य कूर्मः । कं जलम् ऊर्वति प्राणिभक्षणायेति वा । 'उर्वी हिंसायाम्'। के जले मठतीति कमठः । 'मठ मदनिवासयोः'। यज्ञार्थं काम्यत इति वा । 'कमु कान्तौ'। कच्छेन पुच्छेन पिबतीति कच्छपः । 'पा पाने'। कच्छमनूपदेशं पाति क्षुद्रजन्तुभक्षणेनेति वा । 'पा रक्षणे'। कूर्मनामानि ॥ २१ ॥

[1] मकरादीनि W_1.　[2] W_1 adds मातृः.　[3] कुवर्तनाय D_2; कैवर्तकाय K_3.

(पा.) तद्भेदाः—मकरादयः ।

'शङ्कुः कच्छपसंस्थानः शिशुमारोऽम्बुमर्कटः ।
उद्रः स्याज्जलमार्जार आलभ्यश्चाम्बुसूकरः ॥'

शिशुमारादयश्च पूर्वोक्तमकरादयश्च यादोभेदाः । स्यात्—कर्कटकः । कुलीरनामनी । आन्ध्रभाषया '[1]यंद्रिकाय'। 'पृष्ठचक्षुर्द्विधागतिः'। एते द्वे च । कूर्मे—कच्छपौ । कूर्मनामानि । 'पञ्चगूढश्चतुर्गतिः'। एते द्वे च ॥ २१ ॥

[1] 'यंद्रिपीत' B_3.

ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता ।
गण्डूपदः किंचुलको निहाका गोधिका समे ॥ २२ ॥
रक्तपा तु जलूकायां स्त्रियां भूम्नि जलौकसः ।

(वि.) ग्राह इति—गृह्णाति न मुञ्चति प्राणिन इति ग्राहः । 'ग्रह उपादाने'। अवहरतीत्यवहारः । 'हृञ् हरणे'। अवराह इति वा पाठः । तत्पक्षे [1]अवरहयति

स्थलभूमिमिति अवराहः । 'रह त्यागे' । [2]तुरङ्गमास्यमत्स्यनामनी ।। न क्रामति अतिदूरमिति नक्रः[3] । 'क्रमु पादविक्षेपे' । कुम्भिनो गजानीरयतीति कुम्भीरः । 'ईर क्षेपे' । [4]गजादिकर्षनक्रनामनी ।। मह्यां लतेव तिष्ठतीति [5]महीलता । गण्डुः[6] शरीरग्रन्थयः, त एव [7]पदान्यस्य गण्डूपदः । [8]मृदादि किंचित् लुञ्चित्वा [9]चुलति अपनयतीति किंचुलुकः । '[10]चुल संवरणे समुच्छ्राये च' । लताकारपाटलवर्णकृमिनामानि[11] ।। निजहाति [12]जलं निहाका । 'ओहाक् त्यागे' । गुध्यतीति गोधिका । 'गुध परिवेष्टने' । [13]जलचरप्राणिविशेषनामनी ।। रक्तं पिबतीति रक्तपा[14] । 'पा पाने' । जलम् ओकः स्थानं यस्या [15]जलूका । जलौकसश्च । जलूकानामानि ।। २२ ।।

[1] अपरहयतीति अपराहः D_2, K_5, U. [2] तुरङ्गमाकर्षणमत्स्य° B_2, U. [3] न क्रम्यते B_1, T. [4] गजाकर्षकमत्स्य° B_1, D_1, K_5, W_2. [5] महीं लुनातीति वा । 'लूञ् छेदने' A, B_1, T. [6] गण्डवः B_1, T. [7] पादाः Y. [8] मृदं W_1. [9] चोलयति D_1, W_2. [10] 'चुल अपनयने' K_2, U, W_1. [11] 'यरलु' K_5. [12] स्थलं Pt_2; बलं A, B_1, W_1. [13] जलचरगोधिका° Y. [14] रक्तपो वा I. [15] B_1, W_2 add जलौका; जलम् ओको येषां ते जलौकसः.

(पा.) ग्राहोऽवहारः[1] । घोटकमुखमीननामनी इति वदन्ति । तदसत् । उदकचरमण्डलिसर्पनामनी । 'तन्तुनागस्तथा तन्तुर्नागो वरुणपाशकः' । [2]एतानि च ।। नक्रस्तु कुम्भीरः । नक्रनामनी । 'मोसलि' । गजाकर्षणमत्स्यनामनी इति केचित् । तदज्ञानविजृम्भितम् । 'गोमुखस्तालुजिह्वश्च' । एते द्वे[3] च ।। अथ महीलता—किंचुलुकः । लताकारपाटलवर्णकृमिनामानि । 'यट्लु' । निहाका—समे । गोधिकानामनी । 'नीरुडुमु' । रक्तपा तु—जलौकसः । जलूकानामानि । 'जलौकः स्याज्जलूकायां जलौका जलजन्तुके' । इति तारपालवचनात् जलौकापि स्यात् । 'जलङ्ग' ।। २२ ।।

[1] अवराहः A_1. [2] A_1 adds चत्वारि. [3] B_3 omits द्वे.

मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात् कम्बुरस्त्रियौ ।।२३।।
क्षुद्रशङ्खाः शङ्खनखाः शम्बूका जलशुक्तयः ।

(वि.) मुक्तास्फोट इति—मुक्ताः [1]स्फुटन्ति [2]यतः मुक्तास्फोटः । 'स्फुट विकसने' । मुक्ता यतः शोकन्तीति शुक्तिः । 'शुक गतौ' । शुक्तिनामनी ।। [3]शं सुखं खनति जनयतीति शङ्खः । 'खनु [4]अवदारणे' । [5]शमयति दुःखं जनानामिति वा ।

'शमु उपशमे[6]'। काम्यते [7]मङ्गलार्थिनेति कम्बुः। 'कमु कान्तौ'। शङ्खनामनी॥ क्षुद्राश्च ते शङ्खाश्च क्षुद्रशङ्खाः। शङ्खा नखा इव शङ्खनखाः। शङ्खवन्न विद्यते खम् [8]अवकाशोऽस्येति वा। [9]नद्यादौ विद्यमानक्षुद्रशङ्खनामनी॥ शं[10] वान्तीति शम्बूकाः। 'वा गतिगन्धनयोः'। शाम्यति दुःखमिति वा। जले विद्यमानाः शुक्तयः जलशुक्तयः। जलशुक्तिनामनी॥ २३॥

[1] स्फोटयन्ति B_1, T.　[2] अस्मात् Pt_2.　[3] W_1 omits two lines.　[4] K_2 adds जननार्थे च.　[5] शाम्यति I, Pt_2.　[6] परनिपातः Y.　[7] शुभार्थिभिरिति Pt_2.　[8] आकाशः D_2, Y.　[9] समुद्रादौ Y; सिन्ध्वादौ B_1.　[10] शं सुखं B_1, D_1, W_2.

(पा.) मुक्तास्फोटः—शुक्तिः। शुक्तिनामनी॥ शङ्खः—अस्त्रियाम्। शङ्खनामनी। अस्त्रीशब्द उभयविशेषणम्। 'शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्री' इति [1]नानार्थशास्त्रे (३. ३. १८) स्वयमेव वक्ष्यति। अनुक्तम्—'शम्फा[2] तु शङ्खनिस्वानः'। शङ्खध्वनिः शम्फा स्यात्। 'शङ्खपात्रं तु [3]पाटली'। शङ्खपात्रं पाटली स्यात्। क्षुद्रशङ्खाः—जलशुक्तयः। जलशुक्तिनामानि। 'नत्तगुल्लु'। शम्बूकशब्दः शङ्खशब्दसाहचर्यात् पुंलिङ्गः। 'शम्बूकः शम्बुको ज्ञेयः शाम्बूकोऽपि च पण्डितः' इति तारपालः। जलशुक्तिसाहचर्यात् स्त्रीलिङ्गोऽपि।

'सिन्धोरुच्चैः पवनवलनादुच्चलद्भिस्तरङ्गै-
　　स्तीरं नीतो हतविधिवशाद् दक्षिणावर्तशङ्खः।
दग्धः किं वा भवति मनसीवेति संदेहिनीभिः
　　शम्बूकाभिः सह परिचयान्नीयते पामरीभिः॥'[4]

इति॥ २३॥

[1] नानार्थेषु B_3.　[2] शम्भा A_1.　[3] पाटलिः A_1.　[4] सुभाषितरत्नकोशे ११९८.

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः॥ २४॥
शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः।

(वि.) भेक इति—बिभेति [1]सर्पात् भेकः। 'ञिभी भये'। मण्डति शोभते[2] तटाकादौ मण्डूकः। 'मडि भूषायाम्[3]'। वर्षासु भवतीति वर्षाभूः। 'भू सत्तायाम्'। शलति [4]उत्प्लुत्य गच्छतीति शालूरः। 'शल गतौ'। प्लवते प्लवः। 'प्लुङ् गतौ जलोपरि सर्पणे च'। [5]शब्दैः कर्णौ दृणातीति दर्दुरः। 'दॄ विदारणे'। भेकनामानि॥ शिनोति श्यतीति वा शिली[6]। 'शिञ् निशाने'। 'शो तनूकरणे'। शिलति [7]मृदमिति वा।

'शिल उञ्छे'। गण्डूपदस्य स्त्री गण्डूपदी। भेकस्य स्त्री भेकी। वर्षाभ्वाः स्त्री वर्षाभ्वी। कमठस्य स्त्री कमठी। [8]डोलयति जलमिति डुलिः। 'डुल उत्क्षेपणे'। कमठजातिस्त्रीनामनी॥ २४॥

[1] सर्वस्मात् B_2. [2] A, B_1, T add किङ्किणीजालवत्. [3] व्याप्तौ च K_1, K_2. [4] प्लवैः B_2, D_1, K_5, W_2; प्लवनैः U. [5] शब्देन कर्णान् Y. [6] शिलतीति शिली, 'शिल गतौ' Pt_2. [7] मृदुरिति I; मृदयति K_5; मृदं भक्षयति W_1. [8] डोलति, 'डुल उपतापे' 'डुल चलने' वा धातुः B_2.

(पा.) भेके—दर्दुराः। मण्डूकनामानि। 'स्यात् केन्दुकः प्रावृषिजः स्त्री तु कूपेपिशाचिका'। [1]एते च। शिली गण्डूपदी। गण्डूपदस्त्रीनामनी॥ भेकी वर्षाभ्वी। भेकस्त्रीनामनी। 'वर्षाभ्वश्च' इति यणादेशः। 'दृन्पुनःकरवर्षाभिर्भुवः' इति शाकटायनशास्त्रे (१. २. ३९) करभूशब्दस्यापि यत्वादेशः॥ कमठी डुलिः। कमठस्त्रीनामनी॥ २४॥

[1] एतानि त्रीणि च B_3.

मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोशिका॥ २५॥
जलाशयो जलाधारस्तत्रागाधजलो ह्रदः।

(वि.) मद्गुरस्येति—शृणातीति शृङ्गी। 'शॄ हिंसायाम्'। [1]मद्गुरमत्स्यभार्यानाम॥ दुष्टं [2]नाम यस्या दुर्नामा। 'णमु प्रह्वत्वे शब्दे च'। आकारान्तः। दीर्घकोशातक्याकारत्वात् दीर्घकोशिका। [3]हस्तिजलूकानामनी॥ जलमाशेतेऽत्र जलाशयः। 'शीङ् स्वप्ने'। जलस्याधारो जलाधारः। साधारणजलस्थाननामनी॥ कल्लोलैरव्यक्तं ह्रादतेऽत्रेति [4]ह्रदः। 'ह्राद् अव्यक्ते शब्दे'। अगाधं जलं यत्र सः अगाधजलः। [5]अगाधजलाशयनाम॥ २५॥

[1] Pt_2 adds जलान्तर्मकरस्य. [2] W_1, W_2 add नमनं. [3] A adds वक्राकार°. [4] ह्रियतेऽत्र ह्रदः, 'हृञ् हरणे' B_2. [5] अगाधजल° K_5.

(पा.) मद्गुरस्य—शृङ्गी। मद्गुरस्य स्त्री शृङ्गी स्यात्। सर्पशफरीनाम। 'पामुमीनु'। 'शृङ्गी तु सर्पशफरी' इति वैजयन्ती (पृ. १५१, श्लो. ४४)॥ दुर्नामा दीर्घकोशिका। गजजलूकानामनी। 'येरुचिप्प'। सुभूतिटीकायामस्य ङीप्डाप्प्रतिषेधाभ्यां त्रैरूप्यं [1]दर्शितं दुर्नाम्नीं दुर्नामां दुर्नामानमिति॥ जलाशयो जलाधारः। साधा-

अवदारणे'। कृत्रिमजलाशयनामनी ॥ न खन्यत इत्यखातम्। देवैः खन्यत इति देवखातकम्। अकृत्रिमजलाशयनामनी ॥ २७ ॥

[1] B₁, T add जलान्तिकं; जलसमीपं B₂. [2] समाहारः B₁, D₁. [3] °आकर्षणार्थं D₂, I, K₅, U. [4] °दारुत्रय° Y. [5] इष्टिकादार्वादिभिर्विशेषेण नह्यते B₂. [6] स एव K₃. [7] पुष्कराणि B₂.

(पा.) नेमिस्त्रिकास्य। कूपस्य नेमिस्त्रिका स्यात्। 'त्रिका कूपस्य नेमौ स्त्री पृष्ठवंशाधरे त्रिकम्' इति रभसकोशः। [1]वंशत्रयेण रज्जुधारणार्थं [2]कूपोपरिकल्पिततोरण-[3]यन्त्रनामनी। 'गिरक'॥ पीनाहो—यत्। शिलादिकल्पितकूपमुखबन्धननाम। 'बावियो-नरिकट्टु'॥ पुष्करिण्यां—स्यात्। कृत्रिमजलाशयनाम॥ अखातं देवखातके। 'अखातो देवखातके' इति पुंस्काण्डे अमरदत्तः। देवनिर्मितजलाशयनाम॥ 'दोने'॥ २७॥

[1] अंश° A₁. [2] A₁ omits कूपोपरि°. [3] °दारु° A₁.

पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः ॥ २८ ॥
वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका।

(वि.) पद्माकर इति—पद्मानामाकरः पद्माकरः। तटानि अकति कुटिलं यथा भवति तथा प्राप्नोतीति तटाकः। 'अक अग कुटिलायां गतौ'। प्रवाहेण तटानि ताडयतीति वा तडागः। 'तड आघाते'। पद्माकरनामनी॥ कम् उदकमासरत्यत्रेति [1]कासारः। 'सृ गतौ'। नड्वलाम्बुत्वात् [2]कासनं कुत्सनमियर्तीति वा। 'ऋ गतौ'। कासत इति वा। 'कासृ शब्दे'। सरति प्रवहतीति [3]सरसी। सरश्च। सान्तोऽयम्। 'सृ गतौ'। नड्वलवर्तिमहाजलाशयनामानि॥ विशन्ति महिषादयोऽस्मिन्निति वेशन्तः। 'विश प्रवेशने'। पलन्ति[4] महिषादयोऽत्रेति पल्वलम्। 'पल गतौ'। अल्पं च तत् सरश्च अल्पसरः। अल्पसरोनामानि॥ उप्यते पद्मादिकमस्यामिति [5]वापी। 'डुवप् [6]बीजतन्तुसंताने'। दीर्घैव[7] दीर्घिका। दीर्घचतुरश्रतया खातजलाशयनामनी॥ २८॥

[1] कुत्सितमासरतीति वा B₂. [2] कासः A. [3] स्त्रीलिङ्गः B₂. [4] K₁ adds गच्छन्ति. [5] वारि पीयतेऽत्र वापी, 'पा पाने' W₁. [6] Pt₂, A, B₁, T omit तन्तु°. [7] दैर्घ्यात् D₂; दीर्घैव W₂.

(पा.) पद्माकरः—अस्त्री। तडाग इति क्वचित् पाठः। 'पथि पथिकदृशां दत्तरागस्तडागः' इति धर्मशर्माभ्युदयः[1]॥ कासारः—सरः। सरोनामनी। पद्माकर-

शब्दो[2] रूढो यौगिकश्च[3]। तेन[4] पद्मशून्यमपि सरः पद्माकरः स्यात्॥ वेशन्तः—चाल्पसरः। अल्पसरोनामानि॥ वापी—दीर्घिका। दीर्घचतुरश्रतया निखातजलाशयनामनी। 'केलाकूलि'॥ २८॥

[1] °भ्युदये B_3. [2] A_1, B_4 add गवादिशब्दवत्. [3] A_1, B_1 add भवति. [4] तस्मात् A_1.

खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम्॥ २९॥
स्यादालवालमावालमावापोऽथ नदी सरित्।
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी॥ ३०॥
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगा।
(कूलंकषा निर्झरिणी रोधोवक्रा सरस्वती)

(वि.) खेयमिति—खन्यत इति खेयम्। 'खनु अवदारणे'। परितः खन्यत इति परिखा। दुर्गवेष्टनखनिकानामनी॥ [1]आध्रियन्त [2]आपोऽत्र आधारः। 'धृञ् धारणे'। [3]अम्भोधारणगर्तनाम॥ आलूयते खन्यतेऽत्रेति आलवालम्। 'लूञ् छेदने'। आवलतेऽम्भोऽत्रेति आवालम्। 'वल संवरणे [4]संचरणे च'। आ समन्तादुप्यन्तेऽम्भां[5]स्यत्रेति आवापः। 'डुवप् बीजतन्तुसंताने'। [6]सेकार्थं तरुं परितः [7]कृतजलाधारनामानि॥ नदति जलवेगेनेति नदी। 'णद अव्यक्ते शब्दे'। सरतीति सरित्। 'सृ गतौ'। तरङ्गा अस्यां सन्तीति तरङ्गिणी। शैवलमस्यामस्तीति शैवलिनी। [8]तटमस्या अस्तीति तटिनी। ह्रादोऽव्यक्तशब्दोऽस्यामस्तीति [9]ह्रादिनी। ह्रादुनीति वा पाठः। धुनोति [10]पापमिति धुनी। 'धूञ् कम्पने'। स्रोतोऽस्यामस्तीति स्रोतस्विनी। [11]द्वीपानि सन्त्यस्यामिति द्वीपवती। स्रवति गिरिभ्य इति स्रवन्ती। 'स्रु [12]गतौ'। निम्नं गच्छतीति निम्नगा। 'गम्लृ गतौ'। अपां वेगः [13]आपम्। तेन गच्छतीत्यापगा। अपां समूहः आपम्। तेन गच्छतीति वा। नदीनामानि॥ २९–३०॥

[1] आधीयन्ते W_2. [2] जलं Pt_2. [3] अम्बु° W_2. [4] 'वल संचलने' B_1, T, Pt_2. [5] आपः B_2. [6] सेचनार्थं B_1, D_1. [7] °सेतु° B_2. [8] तटावस्यां स्तः D_2, K_1, K_2, W_1. [9] ह्रदिनी B_1, W_2. [10] आपः W_2; धुनोति वातेन Pt_2. [11] द्वीपाः B_1, W_2, Y. [12] 'स्रु स्रवणे' A, B_1, Pt_2. [13] आपः A, B_1, T.

(पा.) खेयं—परिखा। सालपरिवेष्टनखातिकानामनी। 'अगडिते'। खातिकेति प्रौढप्रयोगः। 'यज्जेतुमेतामिव खातिकाम्भश्छायाच्छलात् क्रामति नागलोकम्'। इति

धर्मशर्माभ्युदयः (१. ६२) ॥ आधारः—धारणम् । यस्मिन् कस्मिन् [1]देशे शाल्यादिसस्य-संवर्धनायोदकं[2] प्रतिबद्धं स आधारः स्यात् । 'सेतु' 'कत्तुव'॥ स्यादालवालम्—आवापः । वृक्षलतादेर्जलसेचनार्थं निबद्धसेतुनामानि[3] । 'चेट्ल पादुकुचेसिन कुदुरु' । आधारशब्दोऽत्रापि संपद्यते । 'आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम्' इति रघुवंशे (५. ६) । अथ नदी—आपगा । आपं [4]समुद्रं गच्छतीत्यापगेति व्युत्पत्त्या आपशब्दः समुद्रपर्यायः । नदीनामानि ॥ अनुक्तम्—

'कूलंकषा निर्झरिणी रोधोवक्त्रा पयस्विनी ।
स्रोतोवहा च ह्रदिनी ॥'

एतानि च ॥ २९–३० ॥

[1] °चित् प्रदेशे A_1. [2] संवर्धनार्थं A_1. [3] °देश° B_3, B_4. [4] A_1 omits.

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ ३१ ॥
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ।

(वि.) गङ्गेति—[1]हरशिरसः गां भुवं गता गङ्गा । हरिचरणात् भूमिं गता वा । विष्णुपदोत्था [2]विष्णुपदी । [3]जह्नोस्तनया जह्नुतनया । जाह्नवी च । सुराणां निम्नगा[4] सुरनिम्नगा । भगीरथस्यापत्यं, तस्येयमिति वा भागीरथी[5] । त्रयाणां पथां समाहारस्त्रिपथम् । तेन गच्छतीति त्रिपथगा[6] । त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः । भीष्मं [7]सूयते भीष्मसूः । 'षूङ् प्राणिप्रसवे' । [8]गङ्गानामानि ॥ ३१ ॥

[1] हरोत्तमाङ्गात् B_1, D_1, U, Y, W_2; हरेरीशाङ्गं गता D_2; हरिचरणात् गां भूमिं Pt_2. [2] विष्णोः पदमस्या अस्तीति B_2; विष्णुपदे तिष्ठति U. [3] राजर्षेः B_2. [4] D_2, K_1 add नदी. [5] भगीरथेन राज्ञा भूलोकमवतारितेति Pt_2; भगीरथेन आनीता K_5. [6] स्वर्गमर्त्य-पातालमार्गेषु त्रिषु गच्छतीति Pt_2. [7] सूते D_2, K_1, K_3, Pt_2. [8] भागीरथीनामानि D_1, K_3, U, W_1.

(पा.) गङ्गा—भीष्मसूरपि । गङ्गानामानि । 'घर्मद्रवी हैमवती त्रिमार्गा हरशेखरा' । [1]एतानि च ॥ ३१ ॥

[1] A_1 adds चत्वारि.

कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥ ३२ ॥
रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका ।

(वि.) कालिन्दीति—कलिन्दपर्वतोद्भवा[1] कालिन्दी। सूर्यस्य तनया सूर्यतनया। यमेन [2]यमलजा यमुना। शमनस्य यमस्य स्वसा शमनस्वसा। यमुनानामानि॥ रेवते [3]विन्ध्याद्रौ रेवा। 'रेवृ गतौ'। नर्म केलिं ददातीति नर्मदा[4]। 'डुदाञ् दाने'। सोम[5] उद्भवो यस्याः सा सोमोद्भवा। [6]सोमवंशजेन पुरूरवसा भुवं प्रत्यवतारिता वा। मेखलाद्रेः[7] कन्यका, उद्भवत्वात्, मेखलकन्यका। नर्मदानामानि॥ ३२॥

[1] °पर्वताज्जाता Pt_2.　[2] सह जाता Pt_2.　[3] विन्ध्यसमीपे D_1.　[4] नर्म विलासं (केलिं D_2, K_3, U) पुरूरवसे ददाति B_1.　[5] सोमात् D_2, U.　[6] Pt_2 adds the line. [7] मेकलोऽद्रिः तस्य कन्यका W_2.

(पा.) कालिन्दी—शमनस्वसा। यमुनानामानि॥ रेवा तु—मेखलकन्यका। नर्मदानामानि॥ ३२॥

करतोया सदानीरा बाहुदा सैतवाहिनी॥ ३३॥
शतद्रुस्तु शुतुद्रिः स्याद् विपाशा तु विपाट् स्त्रियाम्।

(वि.) करतोयेति—[1]ईश्वरस्य करतोयाज्जाता [2]करतोया। सदा नीरमस्यामिति सदानीरा। गौरीप्रदाने [3]शर्वकरजलजातनदीनामनी॥ [4]बाहुबलं ददातीति बाहुदा। बहुदेन कार्तवीर्येणावतारितत्वाद् वा। सितमम्बु वहतीति सितवाहिनी। सितवाहिन्येव सैतवाहिनी[5]। कार्तवीर्यावतारितनदीनामनी॥ पुत्रशोकार्तं शिलां बध्वा प्रविष्टं वसिष्ठं दृष्ट्वा भयात् शतधा द्रवतीति शतद्रुः। शु शोभनं यथा पापं तुदतीति [6]शुतुद्रिः। 'तुद व्यथने'। पुत्रशोकाकुलवसिष्ठप्रविष्टनदीनामनी[7]॥ विगताः पाशा यत्र विपाशा। विपाट् च। विपाशानदीनामनी॥ ३३॥

[1] D_1, W_2 add गौरीविवाह(विहार B_1, U, Y) समये.　[2] K_1 omits 3 lines. [3] ईश्वर° B_2, K_5.　[4] बाहुजलं ददाति D_1; बहुबलं B_1.　[5] सितवाहिनीति वा पाठः B_1; शीतवाहिनीति पाठे शीतम् अम्बु वहतीति शीतवाहिनी K_5.　[6] शुतुद्रः D_2; शितद्रुः A. [7] वसिष्ठमृतिभयात् D_2, I.

(पा.) करतोया सदानीरा। करतोयाख्यनदीनामनी॥ बाहुदा सैतवाहिनी। प्रज्ञादित्वादण्[1] (५. ४. ३८)। बाहुदाख्यनदीनामनी॥ शतद्रुस्तु शुतुद्रिः स्यात् शतद्रुनदीनामनी॥ विपाशा तु—स्त्रियाम्। विपाशाख्यनदीनामनी॥ ३३॥

[1] 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण्प्रत्ययः B_3.

12

शोणो हिरण्यवाहः स्यात् कुल्याल्पा कृत्रिमा सरित् ॥३४॥
शरावती वेत्रवती चन्द्रभागा सरस्वती ।
कावेरी सरितोऽन्याश्च संभेदः सिन्धुसंगमः ॥ ३५ ॥

(वि.) शोण इति—शोणतीति शोणः । 'शोणृ वर्णगत्योः' । हिरण्यं वहतीति हिरण्यवाहः । 'वह प्रापणे' । [1]शोणनदनामनी ॥ कुल्यते कुल्या[2] । 'कुल संस्त्याने बन्धुषु च' । नदीमातृकक्षेत्रसेकाय अल्पकृत्रिमसरिन्नाम ॥ [3]शराः तृणविशेषा अत्र सन्तीति शरावती । वेत्रा[4] वेणुवलयाः सन्त्यस्यामिति वेत्रवती । चन्द्रभागाभ्यां गिरिभ्यां जाता चन्द्रभागा । चन्द्रेण[5] भागतो न्यस्ता वा । सरांस्यत्र सन्तीति सरस्वती । [6]सरसि प्रवहतीति वा । कवेराद्रेर्जाता कावेरी[7] । कवेरस्य राज्ञोऽपत्यं स्त्रीति वा । एतानि प्रत्येकं नदीविशेषनामानि ॥ अन्याश्च कृष्णवेण्यादयः सरितः सन्ति । ग्रन्थकारेणात्र ग्रन्थविस्तर-भयान्नोक्ताः ॥ संभिद्यन्ते संगच्छन्ते [8]सरितोऽत्र परस्परमिति संभेदः । 'भिदिर् विदारणे' । सिन्ध्वोः संगमः सिन्धुसंगमः । अनेकसिन्धुसंगमनाम ॥ ३४–५ ॥

[1] शणदत्तनदीनाम W_1. [2] कोलति संस्त्यायतीति Pt_2. [3] शराख्यः तृणविशेषः Pt_2. [4] वेत्रा वेणवः B_1, K_5, U; वेत्रयोगात् Pt_2. [5] चन्द्र इति गिरिविशेषनाम A; चन्द्रस्य भागोंऽशः अस्याः W_1. [6] सरति, 'सृ गतौ' D_2, U, W_1. [7] कवेराजाता Y. [8] नद्यः Pt_2.

(पा.) शोणो—स्यात् । [1]शोणनदीनामनी ॥ कुल्या—सरित् । कृतकाल्पनदी कुल्या स्यात् । 'कालुव' ॥ शरावती वेत्रवती चन्द्रभागा । अस्य सुभूतिटीकायां चातूरूप्यमभिहितम् । चन्द्रभागा, चन्द्रभागी, चान्द्रभागा, चान्द्रभागीति ॥ सरस्वती—अन्याश्च । शरावत्यादयः पञ्च । तुङ्गभद्रा गोदावरी कृष्णवेण्यादयोऽन्याश्च नद्यः[2] ॥ संभेदः सिन्धुसंगमः । नदीसंगमनाम ॥ ३४–५ ॥

[1] °नद° A_1. [2] B_3, B_4 add स्युः.

द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे दाविकसारवौ ॥ ३६ ॥
सौगन्धिकं तु कह्लारं हल्लकं रक्तसंध्यकम् ।

(वि.) द्वयोरिति—[1]प्रणलत्यम्भोऽनया प्रणाली । 'णल गतौ' । प्रणाल इति वा पाठः । प्रासादादौ निर्मितजलमार्गनाम ॥ उत्तरे पदे त्रिषु वर्तेते । देविकायां भवः

[2]दाविकः । सरय्वां भवः [3]सारवः । देविकासरयूद्भववस्तुनः[4] क्रमेण नामनी ॥ शोभनः[5] गन्धः प्रयोजनमस्य सौगन्धिकम् । के जले ह्लादते कह्लारम् । '[6]ह्लादी सुखेऽव्यक्ते शब्दे च' । [7]ईषद्रक्तवर्णपरिमलबहुलोत्पलनामनी ॥ [8]हल्लति भ्रमरोऽत्रेति हल्लकम् । 'हल्ल भ्रमणे' । रक्तं [9]संध्यावत् रक्तसंध्यकम् । रक्तोत्पलनामनी ॥ ३६ ॥

[1] W_1 adds गच्छतीति. [2] दाविकं D_2, W_1. [3] सारवम् B_1, T. [4] °वस्तूनां A. [5] K_3 adds पुष्पेषु; सुगन्धि A, B_1, T; सुगन्धः K_3, K_5, W_1, Pt_2. [6] 'ह्लाद आह्लादने' B_2, K_2. [7] °वर्ण° W_1. [8] K_5 adds भ्रमति. [9] संध्यावत् रक्तवर्णत्वात् B_1, K_5, W_2.

(पा.) द्वयोः—पद्व्याम् । [1]हर्म्यादेः [2]प्रवहत्सलिलवर्त्मनाम । द्वयोरित्यनेनाल्पानल्पविभागाल्लिङ्गविभागः प्रणाली प्रणाल इति ॥ त्रिषु—दाविकसारवे । [3]देविकानदीविशेषे भवं दाविकं स्यात् । [4]सरयूनदीविशेषे भवं सारवं स्यात् । तदुभयं त्रिलिङ्गम् ॥ अनुक्तम्—'समुद्रियं स्यादप्यं च समुद्रेऽप्सु भवे क्रमात्' । [5]समुद्रे भवं समुद्रियम् । अप्सु भवमप्यम् ॥ त्रिषु तूत्तरे इत्यनेन त्रिलिङ्गौ ॥ सौगन्धिकं—रक्तसंध्यकम् । अल्परक्तपरिमलाधिकोत्पलनामानि ॥ भाषया 'चेंगलुव' ॥ ३६ ॥

[1] हर्म्यादौ A_1. [2] प्रविशत्° A_1, B_3. [3] देविकायां नद्यां B_3. [4] सरय्वां नद्यां B_3. [5] समुद्रेभवाप्सुभवयोरर्थयोः समुद्रियाप्यशब्दौ वर्तेते A_1.

स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ॥ ३७ ॥
इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे ।

(वि.) स्यादिति—[1]उद् ऊर्ध्वं पलति गच्छतीति उत्पलम् । 'पल गतौ' । [2]कौ वलत इति कुवलयम् । 'वल[3] संवरणे' । कुत्सितो वलयो पत्रसंवेष्टनमत्रेति वा । उत्पलमात्रनामनी ॥ अम्बुनि जन्मास्येति अम्बुजन्म । नीलं च तदम्बुजन्म च । इन्दतीति इन्दी लक्ष्मीः । 'इदि परमैश्वर्ये' । तया व्रियत इति [4]इन्दीवरम् । 'वृञ् वरणे' । पुष्पेषु इन्दतीति वा । [5]नीलोत्पलनामनी ॥ कौ भूमौ मोदत इति कुमुदम् । 'मुद हर्षे' । के जले [6]रौतीति केरवः हंसः । तस्येदं प्रियमिति कैरवम् । सितोत्पलनामनी ॥ ३७ ॥

[1] उत्पलतीति B_1, T. [2] B_1 adds भुवि. [3] 'वल संचलने' B_1, T. [4] इन्द्रियाणि वृणोति आह्लादकत्वेनाच्छादयतीति वा W_1. [5] नीलाम्बुजन्मेति स्पष्टोऽर्थः I, U. [6] रवोऽस्य I; रतोऽस्य B_1.

(पा.) स्यादुत्पलं कुवलयम्। उत्पलमात्रनामनी। 'कलुव'॥ 'कुवेलं कुवलं च तत्'। एते द्वे च॥ अथ नीलाम्बुजन्म—नीलेऽस्मिन्। नीलोत्पलनामनी॥ 'दोलाभमपि [1]कन्दोट्टम्'। एते द्वे च॥ सिते—कैरवे। सितोत्पलनामनी॥ अनुक्तम्—'रक्तेऽस्मिन् [2]रक्तमण्डलम्'। अतिरक्तोत्पलनाम॥ ३७॥

[1] कन्दोष्टं B_3. [2] रक्तकुण्डलम् B_4.

शालूकमेषां कन्दः स्याद् वारिपर्णी तु कुम्भिका॥ ३८॥
जलनीली तु शैवालं शैवलोऽथ कुमुद्वती।
कुमुदिन्यां नलिन्यां तु बिसिनीपद्मिनीमुखाः॥ ३९॥

(वि.) शालूकमिति—शलत इति शालूकम्। 'शल चलनसंवरणे'। उत्पलादि-कन्दनाम॥ वारि पिपर्ति आच्छादयतीति वारिपर्णी। 'पॄ पालनपूरणयोः'। वारिणि पर्णान्यस्या इति वा। वारि कुम्भयतीति कुम्भिका[1]। 'कुभि आच्छादने'। [2]कुम्भिक इति वा पाठः। [3]जलोपरिस्थितलतारूपशाकनामनी[4]॥ जले [5]नीली जलनीली। जले शेते शैवालम्। शैवलं च। 'शीङ् स्वप्ने'। [6]शैवलनामानि॥ कुमुदान्यस्याः सन्तीति कुमुद्वती। कुमुदिनी च। कुमुद्वद्दीर्घिकानामनी॥ नलमस्यामस्तीति नलिनी। बिसमस्या-मस्तीति बिसिनी। एवं पद्मिन्यादीनि कुमुदिनीवत्[7]॥ ३८–९॥

[1] W_1, Pt_2 add केन जलेन उभ्यत इति कुम्भिका, 'उभ पूरणे'. [2] वारिपर्णस्तु कुम्भिकः इति वा पाठः A, B_1, T. [3] जले पर्यस्तस्वल्पशैवालनामानि W_1. [4] °वलयरूप° B_2, T. [5] नीलिका D_2. [6] शैवाल I, U, W_1. [7] K_1 ends here.

(पा.) शालूकम्—कन्दः स्यात्। सौगन्धिकादीनां कन्दः शालूकं स्यात्॥ वारिपर्णी—कुम्भिका। तोये पर्यस्तलतारूपशैवलनामनी। 'अन्तर्वजल्लि'॥ जलनीली—शैवलः। शैवालनामानि। शेवालमित्यप्यस्ति। 'शेवालमपि[1] शैवालं जलशूकश्च नीलिका' इति हलायुधः (अ. मा. ३. ६१)। शिफालमिति [2]शैवलविशेषः। 'शिफालं[3] शैवलं यद्धि चूर्णाभं लोहितं जले' इति वैजयन्ती (पृ. १५३, श्लो. ४९)॥ अथ—कुमुदिन्याम्। कुमुदस्तम्बनाम॥ नलिन्यां—पद्मिनीमुखाः। पद्मस्तम्बनामानि। पद्मवत्सरोनामान्यपि भवन्ति। 'बिसिनीपद्मिनीत्याद्याः पद्मस्तम्बे सरस्यपि' इति वैजयन्ती (पृ. १५३, श्लो. ४३)॥ ३८–९॥

1 'शेवालं शैवलं प्रोक्तं जलशूकं च नीलिका' इति मुद्रितग्रन्थे. 2 नीलिका° B_3.
3 शैवालं चाथ शीवालं चूर्णाभं लोहितं जले' इति मुद्रितपुस्तके.

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ ४० ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ ४१ ॥

(वि.) वा पुंसीति—पद्यतेऽत्र लक्ष्मीरिति पद्मम्[1]। 'पद्लृ गतौ'। नल्यते [2]बध्यते चन्द्रेणेति नलिनम्। 'णल बन्धने'[3]। अरान् केसरान् विन्दतीति अरविन्दम्। 'विद्लृ लाभे'। महच्च तदुत्पलं च महोत्पलम्। सहस्रं पत्राणि यस्य तत् सहस्रपत्रम्। केन जलेन[4] मल्यत इति कमलम्। 'मल[5] धारणे'। शतं पत्राणि यस्य तत् शतपत्रम्। कुशे जले शेत इति कुशेशयम्। 'शीङ् स्वप्ने'। पङ्के रोहतीति पङ्केरुहम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। ताम्यति रसति चेति तामरसम्[6]। 'तमु ग्लानौ', 'रस आस्वादने'। ताम्यद्भिः रस्यत इति वा। सरसि भवं सारसम्। सरस्यां रोहतीति सरसीरुहम्। बिसस्य प्रसूनं बिसप्रसूनम्[7]। राज्योऽस्य सन्तीति राजीवम्[8]। पुष्णातीति पुष्करम्। 'पुष पुष्टौ'। [9]अम्भसि रोहतीति अम्भोरुहम्। पद्मनामानि ॥ ४०-१ ॥

1 पद्यते लक्ष्म्या सेव्यते, 'पद्लृ सेवायाम्' B_1, D_1, K_5, U; 'पद गतौ' W_1.
2 भिद्यते D_1, I, K_5; खिद्यते A, B_1, T. 3 'णल गन्धने', गन्धनं भेदः A, B_1, T.
4 वारिणा I; कं जलमलति भूषयतीति, 'अल भूषणे' Pt_2. 5 'मल मल्ल धारणे' B_1, T.
6 तामः प्रकर्षो रसोऽस्य Pt_2. 7 बिसं प्रसूनमस्य A, B_1. 8 केसरराजियोगात् Pt_2.
9 शेषं स्पष्टम् A, T.

(पा.) वा पुंसि—अम्भोरुहाणि च। पद्मनामानि। 'सरसिजमप्सुजमब्जं सरोजमिन्दीवरं बिसजम्'। एतानि च ॥ ४०-१ ॥

पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं नालो नालमथास्त्रियाम् ॥ ४२ ॥
मृणालं बिसमब्जादिकदम्बे षण्डमस्त्रियाम् ।

(वि.) पुण्डरीकमिति—पुणति मङ्गलत्वात् पुण्डरीकम् । 'पुण कर्मणि शुभे'। सितं च तदम्भोजं च सिताम्भोजम् । सितपद्मनामनी[1] ।। रक्तं च तत् सरोरुहं च रक्तसरोरुहम् । रक्तं च तदुत्पलं च रक्तोत्पलम् । कोकाः [2]चक्रवाका नदन्त्यस्मिन्निति [3]कोकनदम् । रक्तपद्मस्य रक्तोत्पलस्य च नामानि ।। नल्यते बध्यते पुष्पेणेति नालः । नालं च[4] । 'णल बन्धने[5]' । पद्मादिदण्डाकारवृन्तनामनी ।। मृण्यते भक्ष्यत इति मृणालम् । '[6]मृण तर्षणे', 'मृण हिंसायां' इति वा धातुः । बिस्यन्ते उत्सृज्यन्ते तन्तवोऽत्र भक्षणसमय इति बिसम् । 'बिस उत्सर्गे' । [7]पद्मकन्दोपरिस्थितभक्ष्यनामनी ।। भ्रमरेभ्यो रसं सनोतीति षण्डः । 'षणु दाने' । अब्जादिसमूहनाम ।। ४२ ।।

[1] सितपुण्डरीकनाम U. [2] चक्राः K_3. [3] B_1, D_1 add 'णद अव्यक्ते शब्दे'. [4] नाला इति स्त्रीलिङ्गत्वमपि W_2. [5] 'नल गन्धने' A, T. [6] 'मृण तर्पणे' D_2, K_5, U. [7] B_1, D_2, K_5, W_2 add तन्तूनामुत्सृष्टत्वात्.

(पा.) पुण्डरीकं सिताम्भोजम् । सितारविन्दनामनी[1] ।। अथ—कोकनदम् । शोणाम्बुजनामानि ।। 'कन्दादं खरदण्डं च बिसखण्डं च तद्भवेत्' । इत्येतानि च ।। नालो नलम् । कमलनालो नलमित्युच्यते ।

'[2]स्तनतापशून्यमवनम्रनलं बिसपत्रमत्र कुसुमास्तरणे ।
किमुतोज्झितान्यमनसा [3]विगुणी सुरयोषिता विरहवल्लरिका[4] ।।'

इति राघवपाण्डवीये (द्विसं. १२. १८) ।। अथास्त्रियां—बिसम् । [5]तामरसमूलनामनी । 'तामेरपेल्लु' ।। अब्जादिकदम्बे—अस्त्रियाम् । अब्जादिकदम्बं[6] षण्डः स्यात् । अब्जषण्डः, कुमुदषण्डः । 'षण्डः स्याद्विट्चरेऽब्जादिकदम्बे षण्डमस्त्रियाम्' इति रुद्राभिधानकोशान्मूर्धन्यादिः[7] । 'शडि रुजायां संघाते च' । शण्डत इति शण्डः । पद्मशण्डः—इति धातुप्रदीपात् तालव्यादिः ।। ४२ ।।

[1] अम्भोरुह° B_1. [2] सून for शून्य in the printed text. [3] विगुणा in the printed text. [4] °वल्लकिका in the printed text. [5] पद्म° B_3, B_4. [6] समूह: A_1, B_3. [7] A_1 omits कोशात्.

करहाटः शिफा कन्दः किञ्जल्कः केसरोऽस्त्रियाम् ।। ४३ ।।
संवर्तिका नवदलं बीजकोशो वराटकः ।

इति वारिवर्गः

(वि.) करहाट इति—कं जलम् उपरिवर्तनाद् रहयन्तीति करहाः पद्मादयः। 'रह त्यागे'। तानि प्रतिदिनम् अभिवृत्याटतीति करहाटः। 'अट पट गतौ'। करं घ्नन्तीति करहाः मीनाः, तैरट्यते प्राप्यत इति वा। शिनोति क्ष्मां शिफा। 'शिञ् निशातने'। कन्दति भक्षणार्थं मत्स्यादिरिति कन्दः[1]। 'कदि आह्वाने रोदने च'। पद्मादिमूलनामानि ॥ किंचित् जलति जडीभवतीति किञ्जल्कः। 'जल घातने[2]'। के जले सरतीति केसरः। 'सृ गतौ'। केसरनामनी ॥ संवर्तयति वेष्टयतीति संवर्तिका। 'वृतु वर्तने'। नवोत्पन्नं दलं नवदलम्। [3]नवदलनामनी ॥ बीजानां पद्माक्षाणां कोशः आकरो बीजकोशः। वरं श्रेष्ठं पद्ममटतीति वराटकः। 'अट पट गतौ'। बीजकोशनामनी ॥ ४३ ॥

इति अमरकोशपदविवृतौ[4] वारिवर्गः

[1] कन्द्यते कन्द: B_1, B_2, K_5.   [2] जघन्ये B_1, B_2; घात्ये T.   [3] T, W_1 add पद्मादीनां.
[4] वारिवर्गनामलिङ्गविवेचनम् I.

(पा.) करहाटः—कन्दः। [1]पद्मादिमूलनामानि। 'दानिगद'। किञ्जल्कः—अस्त्रियाम्। केसरनामनी। अब्जादिकदम्बे षण्डमस्त्रियामिति विशेषविधिरब्जमात्रविषयः। 'अभूदलिविलासिनीलुलितकेसरं केसरम्' इति प्रपञ्चयन्ति ॥ संवर्तिका नवदलम्। पद्मनूतनदलं संवर्तिका स्यात् ॥ बीजकोशो वराटकः। पद्मबीजकोशो वराटकः स्यात् ॥ ४३ ॥

इति वारिवर्गः

[1] A_1 adds ग्रन्थि° after पद्मादि.

काण्डसमाप्तिः

उक्तं स्वर्व्योमदिक्कालधीवाक्छब्दादि नाट्यकम्।
पातालभोगिनरकं वारि चैषां च संगतम् ॥ ४४ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने।
स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥ ४५ ॥

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने प्रथमकाण्डः

(वि.) अथ काण्डसमाप्तिं चिकीर्षुः अमरसूरिः एतत्काण्डोक्तवर्गान् संक्षेपेणाह— उक्तमिति । स्वः स्वर्गः व्योम आकाशः दिशश्च कालश्च वाचश्च शब्दादिश्च । आदिना रसगन्धादिः गृह्यते । [1]नाट्यकं तत्संबन्धि गीतवाद्यादिकमुच्यते । पाताल-भोगिनरकं वारि च । द्वन्द्वैकवद्भावः । उक्तमित्यनेनान्वयः । एषां [2]यत्संगतं स्वर्गे देवतादि, दिशि दिग्गजादि, काले उपरागादि, धीसंगतं विचारादि, वाचि श्रुत्यादि, शब्दे उदात्तादि, नाट्ये भ्रकुंसादि, पाताले कुहरादि, भोगिनि कञ्चुकादि, नरके पीडाबाधादि, वारिणि नौकापद्मोत्पलादि, एतत् सर्वमुक्तमस्मिन् काण्डे इत्यर्थः ।। ४४–५ ।।

इति वंगलभट्टोपाध्यायसूरिसुतलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ
प्रथमकाण्डः समाप्तः

[1] सनाट्यकं नाट्यवर्गेण सहितं K_5, U. [2] प्रसक्त्या संगतं देवासुरसुधादिकं D_2, I, K_5.

(पा.) उक्तं—समर्थितः ।। ४४–५ ।।

इति [1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते प्रथमकाण्डः

[2]श्रीवत्सान्वयमान्येन मल्लिनाथेन निर्मिते ।
व्याख्यानेऽमरसिंहस्य प्रथमः काण्ड उम्भितः ।।
चकोरैरत्यन्तं परिदलितशालीनकिरणः
प्रकुप्यद्राहूद्यद्विषशिखिशिखाशोषिततनुः ।
पुरारातेर्भूषा कुवलयविकासेन किमभू-
न्ममाप्येष ग्रन्थो भवति जगदानन्दजनकः ।।

[1] °नरसिंह° A_1. [2] verses in A_1.

द्वितीयकाण्डः

वर्गभेदाः

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

(वि.) एवं प्रथमकाण्डं परिसमाप्य द्वितीयकाण्डे वक्ष्यमाणवर्गान् संग्रहेण वक्ति वर्गाः पृथ्वीतिश्लोकेन । पृथ्वी च पुरं च क्ष्माभृच्च वनौषधिश्च मृगादिश्च, तैरिह काण्डे पृथ्वीप्रभृतिभिः नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैः, अङ्गप्रत्यङ्गसहितैः वर्गा [1]उदिताः वक्तुमुपक्रान्ताः ॥ १ ॥

[1] उदिता आरब्धाः F_2; अथ भौमादिद्वितीयकाण्डमारभते F_1.

१. भूमिवर्गः

भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥ २ ॥
सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ ३ ॥
(*विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥)

(वि.) भूरिति—[1]भवति सर्वमस्यामिति भूः । 'भू सत्तायाम्' । ऊकारान्तोऽयं स्त्रीलिङ्गः । अव्ययं तु रेफान्तः । अस्यामिदम् अभूदिति [2]भूमिः । न चलतीत्यचला । 'चल [3]कम्पने' । न विद्यतेऽन्तो यस्याः सा अनन्ता । रस्यते आस्वाद्यत इति [4]रसा । 'रस आस्वादने' । रसतीति वा । 'रस शब्दे' । रसा अत्र सन्तीति वा । विश्वं

बिभर्तीति विश्वंभरा। 'डुभृञ् [5]धारणपोषणयोः'। [6]स्थिरत्वात् स्थिरा। तिष्ठति सर्वमस्यामिति वा। 'ष्ठा गतिनिवृत्तौ'। ध्रियते [7]नृपैरिति धरा। धरति विश्वमिति वा। 'धृञ् धारणे'। [8]धरित्री धरणिश्च। क्ष्णौतीति क्षोणिः। क्षोणी च। 'टुक्षु शब्दे'। जिनाति सर्वमस्यामिति ज्या। 'ज्या वयोहानौ'। जिनाति[9] सर्वान् पार्थिवानिति वा। कश्यपस्येयं काश्यपी। क्षियन्ति निवसन्ति सर्वेऽस्यामिति क्षितिः। 'क्षि निवासगत्योः'। सर्वं भारं सहत इति सर्वंसहा। 'षह मर्षणे'। वसु धनमस्यामस्तीति वसुमती। वसु [10]दधातीति वसुधा। 'डुधाञ् धारणपोषणयोः'। [11]ऊर्णूयते पर्वतैरित्युर्वी। 'ऊर्णुञ् आच्छादने'। उरुत्वात् विस्तीर्णत्वाद्वा। वसु धारयतीति वसुंधरा। 'धृ धारणे'। गोत्राः शैलाः[12] सन्त्यस्यामिति गोत्रा। तृणादिना [13]गवादीन् त्रायत इति वा। 'त्रैङ्[14] पालने'। [15]कौति ध्वनतीति कुः। 'कु शब्दे'। पृथुत्वात् पृथिवी। पृथ्वी च। पृथुना[16] वैन्येन सत्कृता वा। प्रथते वा। 'प्रथ प्रख्याने'। क्षमते भारं क्ष्मा। 'क्षमूष् सहने'। क्ष्मायते [17]विधूनयते नृपनाशायेति वा। 'क्ष्मायी विधूनने'। [18]अव्यते नृपैरित्यवनिः। स्वयमवति प्रजा इति वा। 'अव रक्षणे'। मधुकैटभदैत्यमेदोयोगात् मेदिनी[19]। 'ञिमिदा स्नेहने'। मह्यत इति मही। 'मह पूजायाम्'। महिर्वा। अत्र भूम्यवनिक्षितिक्षोणिमहिधरणिशब्दाः कृदिकारान्ताः। भूनामानि ॥ २–३ ॥

* Additional verse in B_1, F_2.

[1] भवन्ति अस्याम् K_5. [2] K_5 adds 'भुवः कित्' इत्यौणादिको मिप्रत्ययः (उ. ४. ४५). [3] 'चल संचलने' W_2. [4] रसयुक्तत्वात् F_2. [5] 'भृञ् भरणे' B_1, K_6, Pt_2. [6] तिष्ठति सदा Pt_2. [7] शैलैः W_2. [8] धरतीति धरित्री F_2. [9] जिनाति सर्वं B_1, K_5; जिनाति परिभवति बाधादिति K_6, U. [10] धनं धत्ते B_1, K_5. [11] ऊर्णूयते आस्तीर्यते W_2. [12] पर्वताः F_2, Pt_2. [13] गाः B_1, W_2, Pt_2. [14] 'त्रा रक्षणे' F_1, K_6. [15] कायति, 'कै शब्दे' B_1, Pt_2; काले प्रतिध्वनिं करोति F_2. [16] पृथुचक्रवर्तिना Pt_2. [17] विधुनुते K_2. [18] अवति प्रजाः B_1, K_5, Pt_2. [19] मधुकैटभयोः मेदसा परिपूतत्वात् F_2; परिप्लुतत्वात् Pt_2.

(पा.) भूर्भूमिः—मही। भूमिनामानि। 'महिः सर्वसहा मही' इति [1]वैजयन्तीपाठात् (पृ. ३५, श्लो. ३) महिशब्दोऽप्यस्ति। अनुक्तम्—

'रत्नगर्भा [2]घनश्रोणिरुर्वरा सागराम्बरा।
दुर्दरा[3] गह्वरी धात्री भूतधात्र्यब्धिमेखला॥
रत्नसूः कुम्भिनी विश्वा [4]धारिणी गौर्गिरिस्तनी॥'

एतानि च ॥ २–३ ॥

[1] 'हेमा सर्वसहा मही' इत्येव मुद्रितग्रन्थे. [2] घनश्रोणी B_3. [3] दुर्धरा B_3. [4] धरणी B_3.

मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥ ४ ॥

(वि.) मृदिति—मृद्यते [1]कुलालादिभिरिति मृत् । [2]मृत्तिका च । 'मृद क्षोदे' । मृन्नामनी ॥ प्रशस्ता [3]मृत् मृत्सा मृत्स्ना च । [4]श्रेष्ठमृन्नामनी ॥ उर्वति क्षुधं हिनस्तीत्युर्वरा[5] । 'उर्वी हिंसायाम्' । सर्वसस्य[6]संपन्नभूनाम ॥ ऊषति बीजमित्यूषः । 'ऊष रुजायाम्' । क्षारा च मृत्तिका च क्षारमृत्तिका । क्षारमृत्तिकानामनी ॥ ४ ॥

[1] कुलालादिना W_2.　[2] 'मृदस्तिकन्' (५. ४. ३९) इति स्वार्थे मृत्तिका B_1, K_5; मृद्-शब्दः दकारान्तः स्त्रीलिङ्गः F_2.　[3] प्रशस्ता मृत्तिका K_3; 'सस्नौ प्रशंसायाम्' (५. ४ .४०) B_1, K_5.　[4] प्रशस्त° W_2.　[5] Pt_2 adds उरुं महान्तं वृणोति तदर्हत्वात्.　[6] °सस्याढ्य° F_2; °संपन्नाढ्य° K_5; संपादक° W_2.

(पा.) मृन्मृत्तिका । मृदो नामनी ॥ प्रशस्ता—मृत्तिका । प्रशस्तमृत्तिकानामनी । उर्वरा—आढ्या । सर्वसस्योत्पादकमृदो[1] नाम । स्यादूषः—मृत्तिका । क्षारमृत्तिकानाम[2] ॥ ४ ॥

[1] °मृदुर्वरा स्यात् A_1.　[2] °ऊषः स्यात् A_1.

ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली ।
समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ॥ ५ ॥

(वि.) ऊषवानिति—ऊषोऽस्यास्तीत्यूषवान् । ऊषरश्च । द्वावप्यन्यलिङ्गौ । ऊषरक्षेत्रनामनी ॥ स्थलतीति[1] स्थलम् । [2]स्थली च । 'ष्ठल स्थाने' । अकृत्रिमोन्नतदेशनामनी ॥ [3]तृषया म्रियन्तेऽत्रेति मरुः । 'मृङ् प्राणत्यागे' । धन्वन्ति तृषयात्रेति धन्वा । 'धवि [4]गतौ' । [5]निर्जलदेशनामनी ॥ लाङ्गलेन न लिखितमिति खिलम् । 'लिख अक्षरविन्यासे' । खं लातीति वा । 'ला दाने' । [6]हलादिना न प्रहन्यत इत्यप्रहतम् । 'हन हिंसागत्योः' । इमौ शब्दौ विशेष्यनिघ्नौ । [7]अकृष्टदेशनामनी ॥ ५ ॥

[1] B_1, F_2, K_5 add चिरात् तिष्ठति.　[2] स्थलं स्थला इति वा पाठः J_2, K_6; जानपदेत्यादिना (४. १. ४२) ङीप् K_5.　[3] तृष्णया F_1, F_2.　[4] 'धन्व मरणे' B_1, K_6.　[5] °प्रदेश° F_2, J_2.　[6] लाङ्गलादिना K_6, Pt_2.　[7] अप्रतिहतदेश° K_6; °क्षेत्र° B_1.

(पा.) ऊषवान्—अन्यलिङ्गौ। [1]क्षारमृत्तिकावत्प्रदेशनामनी। विशेषणं विवक्षितं चेत् तौ द्वावप्यन्यलिङ्गौ। तदविवक्षितं चेत् नपुंसकावेव॥ 'वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्यमूषरम्'। इति शिशुपालवधे (१४. ४६)। स्थलं स्थली। भूतलनाभनी॥ समानौ—धन्वानौ। [2]निर्जलप्रदेशनामनी॥ द्वे—समे। [3]अकृष्टभूतलनामनी। 'पाडुनेल'॥ ५॥

[1] वनप्रदेश° A_1. [2] निर्जलोन्नत° A_1. [3] A_1 adds हलेन.

त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्।
लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः॥ ६॥
देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः।

(वि.) त्रिष्वथो इति—जंगम्यते[1] भृशं गच्छतीति जगती। जगच्च। गम्यते जनैरिति वा। 'गम्लृ गतौ'। लोक्यते सर्वमस्मिन्निति लोकः। 'लोकृ दर्शने'। विशन्त्यस्मिन्निति [2]विष्टपम्। 'विश प्रवेशने'। सर्वमस्मिन्[3] भवतीति भुवनम्। लोकनामानि॥ भरतस्य राज्ञः इदं [4]भारतम्। वृष्यते सिच्यते मेघैरिति वर्षम्। 'वृषु सेचने'। हिमवत्सेतुमध्यदेशनाम[5]॥ प्राचा[6] सहितो दक्षिणो देशः प्राच्यः। शरावतीनद्यवधिभूतपूर्वदक्षिणदेशनाम॥ उदीच्या सहितः पश्चिमो देशः उदीच्यः। उदीच्यां भवः उदीच्यः। पश्चिमेन सहितः उत्तरो देशः पश्चिमोत्तरः। शरावतीनद्यवधिभूतपश्चिमोत्तरदेशनामनी॥ ६॥

[1] जं भृशं गम्यते जनैरत्र B_1, K_6; B_1, K_5 add प्रलयकाले. [2] विष्टपतीति, 'ष्टप स्तप प्रतिघाते' B_1, K_3. [3] अस्मात् K_6; F_2 adds 'भू सत्तायाम्'. [4] जम्बूद्वीपस्य नवांशः भरतस्य क्षत्रियस्येदं B_1, K_5. [5] °नामनी B_1, K_6, W_2. [6] प्राच्या K_6.

(पा.) त्रिषु। अत्र त्रिष्वित्यनेन खिलशब्दानुपदोक्ताप्रहतशब्द एव[1] परामृश्यते। खिलं नपुंसकमेव। '[2]खिलमप्रहता भूमिः' इति हलायुधः (अ. मा. २. ३)। अनुक्तम्—'नारट्टः स्फुटिता भूमिः'। स्फुटितभूमिर्नारट्टः स्यात्। 'बिटिकेनेल'। 'जन्तुप्राया कचङ्गला'। जन्तुभूयिष्ठा भूमिः कचङ्गला स्यात्। अथो जगती—विष्टपम्। 'विष्टपलोकौ नरौ' इति रत्नकोशमतात् पुंलिङ्गश्च। भुवनं जगत्। लोकसामान्यनामनी॥ लोको—वर्षम्। असौ लोको भारतं च वर्षं च स्यात्। इदमा प्रत्यक्षजम्बूद्वीपः[3] परामृश्यते।

'स्याद् व्यासभाषिते ग्रन्थे जम्बूद्वीपे च भारतम् ।'
'पुंनपुंसकयोर्वर्षं जम्बूद्वीपाद्द्वृष्टिषु ।'

इत्युभयत्र रुद्रः । अथवा [4]हिमाद्रेर्दक्षिणभूतजम्बूद्वीपैकखण्डः परामृश्यते । 'नाभीदं भारतं वर्षं हिमाद्रेस्तच्च दक्षिणम्' इति वैजयन्ती (पृ. ३५. श्लो. ५)। शरावत्याः—पश्चिमोत्तरः। शरावत्याख्या नदी [5]ऐशानदिशः सकाशात् [6]निर्ऋतिदिशं प्रत्यागत्य पश्चिमसमुद्रं प्रविष्टा । तन्नद्यवधि अङ्गवङ्गादिबहुभेदभिन्नः प्रागुदक्षिणदेशः प्राच्यः स्यात् । तदवधि गान्धारशूरसेनादिबहुभेदभिन्नः पश्चिमोत्तरदेश उदीच्यः स्यात् ॥ ६ ॥

[1] °शब्दस्यैव B_3.　[2] 'खिलमप्रहतं स्थानम्' इति मुद्रितपुस्तके.　[3] °द्वीपपरामर्शः B_3.
[4] °दक्षिणभवः A_1.　[5] ईशान° B_3.　[6] नैर्ऋतीं दिशं B_3.

प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ॥ ७ ॥
आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः ।
नीवृज्जनपदो देशविषयौ तूपवर्तनम् ॥ ८ ॥

(वि.) प्रत्यन्त इति—म्लेच्छानां देशः म्लेच्छदेशः । प्रतिगतोऽन्तं प्रत्यन्तः । [1]शरावत्यन्तप्रतिगतशिष्टाचाररहितदेशनाम ॥ मध्यश्चासौ देशश्च मध्यदेशः । मध्ये भवः मध्यमः । हिमवद्विन्ध्यविनशनप्रयागमध्यगतदेशनामनी[2] ॥ आर्या[3] वर्तन्तेऽत्रेति आर्यावर्तः[4] । पुण्या भूमिः पुण्यभूमिः । हिमवद्विन्ध्यमध्यदेशनामनी ॥ नितरां वर्तन्ते जना अत्रेति नीवृत् । 'वृतु वर्तने' । [5]नियमेन वर्तन्त इति वा । जनपदशब्दसाहचर्यात् नीवृच्छब्दः पुंलिङ्गः । जनाः पद्यन्तेऽत्रेति जनपदः[6] । 'पद्ऌ गतौ' । प्रसिद्धराष्ट्रनामनी ॥ दिश्यत इति देशः । 'दिश अतिसर्जने' । विशेषेण सिनोति बध्नाति[7] प्रीतिमिति विषयः । 'षिञ् बन्धने' । उपयोगवशात् वर्तन्तेऽत्रेत्युपवर्तनम् । विंशत्रिंशद्ग्रामात्मकस्थाननामानि ॥ ७–८ ॥

[1] °नद्यन्त° K_6;

'हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥'

इति मनुः (२. २१) B_1, Pt_2.　[2] °विन्ध्यनग° K_6.　[3] B_1 adds आ समन्तात्.　[4] 'वृतु वर्तने';

'आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥'

इति मनुः (२. २२) B_1, Pt_2.　[5] नियतं वर्तन्ते B_1, K_5, W_2; F_2 adds तकारान्तः.
[6] जनैः पद्यत इति वा D_2, K_2, O; जनानां पदं F_2; पुंस्त्वं लोकात् B_4.　[7] धृतिमिति K_2.

(पा.) प्रत्यन्तो—स्यात्। भारतवर्षान्तस्थितदेशनाम। मध्यदेशः—मध्यमः। भारतवर्षस्य मध्यमदेशनाम। आर्यावर्तो ब्रह्मवेदिः—हिमालयोः। [1]पूर्वपश्चिमसमुद्राय-तयोर्विन्ध्याचलहिमाचलयोर्मध्यम्[2] आर्यावर्तश्च ब्रह्मवेदिश्चेत्युच्यते। अनुक्तम्—'विन्ध्यात्तु दक्षिणो देशो दक्षिणापथसंज्ञितः'। विन्ध्याचलात् सेतुपर्यन्तं[3] दक्षिणापथः स्यात्। नीवृत्—उपवर्तनम्। देशनामानि। अत्र[4] तुशब्दो [5]निरर्थकः। 'नीवृज्जनपदो देशस्तद्भेदाः पुंसि भूम्नि च' इति वैजयन्ती (पृ. ३६, श्लो. २१)। 'राष्ट्रं जनपदो निर्गो जनान्तो विषयः स्मृतः' इति धनंजयः॥ ७–८॥

[1] °युतयोः A_1. [2] B_3 omits °अचल°. [3] °पर्यन्तदक्षिणदेशः A_1. [4] अत्रत्य° A_1. [5] अनर्थकः A_1.

त्रिष्वा गोष्ठान्नडप्राये नड्वान् नड्वल इत्यपि।
कुमुद्वान् कुमुदप्राये वेतस्वान् बहुवेतसे॥ ९॥

(वि.) त्रिष्विति—आ गोष्ठात् गोष्ठशब्दपर्यन्तं [1]त्रिषु। नडाः सन्त्यत्रेति नड्वान्। नड्वलश्च[2]। नडतृणप्रायदेशनामनी॥ कुमुदान्यत्र सन्तीति कुमुद्वान्। कुमुदानि प्रायः अत्र। कुमुदप्रायदेशनाम॥ वेतसाः सन्त्यत्र वेतस्वान्। बहवः वेतसाः[3] सन्त्यत्र। बहुवेतस-देशनाम॥ ९॥

[1] F_2 adds लिङ्गेषु वर्तन्ते. [2] F_2, Pt_2 add नडप्रचुरो देशः नडप्रायः; बाहुल्येन नडोऽस्त्यस्मिन्निति F_2, Pt_2. [3] K_2, K_6 add वृक्षाः.

(पा.) त्रिष्वा गोष्ठात्। गोष्ठशब्दात् प्राग्भूतशब्दास्त्रिलिङ्गाः। उत्तराधिकारस्य बाधितविषयत्वात् कच्छादयः शब्दा उक्तलिङ्गा एव। नडप्राये—इत्यपि। नडतृणप्रायदेशे[1] नड्वान् नड्वलश्चेत्येतौ वर्तेते। कुमुद्वान् कुमुदप्राये। कुमुदप्रायदेशनाम। वेतस्वान् बहुवेतसे। [2]बहुलनिचुलदेशनाम॥ ९॥

[1] °प्रायदेशनामनी B_3. [2] A_1 adds °वृक्ष°.

शाद्वलः शादहरिते सजम्बाले तु पङ्किलः।
जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः॥ १०॥

(वि.) शाद्वल इति—[1]शादो बालतृणमस्मिन्नस्तीति[2] शाद्वलः। शाड्वलो वा। [3]शादहरितदेशनाम॥ [4]पङ्कोऽस्यास्तीति पङ्किलः। जम्बालेन पङ्केन सह वर्तत इति

सजम्बालः । [5]कर्दमसहितदेशनाम ॥ अनुगता आपोऽत्रेत्यनूपम् । [6]जलप्रायघट्टादि[7]-स्थलनाम ॥ कषन्ति आपो यं देशं स [8]कच्छः । कष्यते जलैरिति वा । 'कष हिंसायाम्' । [9]जलप्रायदेशनाम ॥ १० ॥

[1] B_1 omits 3 lines.　[2] अस्यास्तीति K_2.　[3] बालतृण° for शाद° K_5. [4] अस्मिन् K_5.　[5] जम्बाल° K_5; सजम्बाल° J_2.　[6] जलप्रचुरं स्थानं जलप्रायम् F_2. [7] K_5, W_2 omit घट्ट.　[8] कं पानीयं छ्यतीति, 'छो छेदने' Pt_2.　[9] J_2 adds तथाविध°.

(पा.) शाद्वलः—हरिते । बालतृणहरितदेशनाम । सजम्बाले—पङ्किलः । जम्बालाविलदेशनाम । जलप्रायम्—तथाविधः । बहुलजलदेशोऽनूपं स्यात् । कच्छ इति च स्यात् । 'पुंस्येवान्धुः प्रहिः कूपः' (१. १२. २७) इत्यत्रैवकारः क्वचिदनित्यत्वबोधनार्थः । पुंसि च कच्छमनूपः . . . .[1]

[1] Break in all MSS. up to verse 18.

स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।
देश एवादिमावेवमुन्नेयाः सिकतावति ॥ ११ ॥

(वि.) स्त्रीति—शृणातीति शर्करा । सा अस्त्यत्रेति शर्करा । 'शॄ हिंसायाम्' । शर्करा अस्मिन् सन्तीति शर्करिलः । शर्करावद्देशस्यैव नामनी ॥ शर्करावन्मात्रवृत्तिरत्रास्तीति शार्करः । शर्करावांश्च । [1]शर्करावद्भूमिनामनी ॥ एवं [2]सिकतावति देशे । [3]आदिमौ द्वौ शब्दौ अपरौ च इति चत्वारः शब्दा उन्नेयाः । [4]कथम् । सिकता सिकतिलः इति द्वौ तद्वद्देश एव । सैकतः सिकतावान् इत्युत्तरौ शब्दौ सिकतावन्मात्रवृत्तौ ॥ ११ ॥

[1] घट्टादि° for भूमि° B_1, F_1, J_2.　[2] शर्करादिशब्देषु आदिमौ शर्कराशर्करिलशब्दौ शर्करावति देश एव वर्तेते । इतरौ द्वौ देशे अन्यत्र च । यथा शार्करो देशः, शार्करमोदनमित्यादि । एवं सिकतावत्यपि ऊह्याः F_2, W_2, Pt_2.　[3] सिकता अस्य अस्तीति सिकतावान्, अस्मिन् सिकतावति । सिन्ध्वादौ देशे F_2.　[4] K_2 omits.

देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥

(वि.) देश इति—नदी मातेव[1] यस्य नदीमातृकः । नद्यम्बुसंपन्नव्रीहिपावित[2]-देशनाम ॥ देवो मातेव[3] यस्य देवमातृकः । वृष्ट्यम्बुसंपन्नव्रीहिपावितदेशनाम[4] ॥ १२ ॥

[1] Pt_2 omits इव. [2] °पालित° B_1, F_1, W_2. [3] Pt_2 omits इव. [4] पालितो देश: F_2.

सुराज्ञि देशे राजन्वान् स्यात् ततोऽन्यत्र राजवान् ।
गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥

(वि.) सुराज्ञीति—शोभनो राजा यस्मिन्[1] सः राजन्वान् । सुराजदेशनाम ॥ राजा अत्रास्तीति राजवान् । राजवद्देशनाम ॥ गावोऽत्र[2] तिष्ठन्तीति गोष्ठम् । 'ष्ठा गतिनिवृत्तौ' । [3]गोस्थाननाम ॥ [4]गावो यत्र प्रागासन् तत् गौष्ठीनम् । पुरातनगोस्थान-नाम ॥ १३ ॥

[1] यस्य Pt_2; सुराजा, तस्मिन् सुराज्ञि F_2. [2] अस्मिन् F_2. [3] F_1 adds गवां स्थानं गोस्थानं. [4] पूर्वं भूतं भूतपूर्वं, भूतपूर्वकं पुरातनं तत् गोस्थानं F_2; भूतपूर्वं गोष्ठं J_2.

पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान् ।
वामलूरुश्च नाकुश्च वल्मीकं पुंनपुंसकम् ॥ १४ ॥

(वि.) पर्यन्तभूरिति—पर्यन्ते उपान्ते भूः पर्यन्तभूः । परितः सरन्त्यत्रेति परिसरः । 'सृ गतौ' । ग्रामादिसमीपभूनामनी[1] ॥ सिन्वन्ति बध्नन्ति मृत्पाषाणादिभिरिति सेतुः । 'षिञ् बन्धने' । अल्यते निवार्यते [2]प्रवाहोऽनयेति आलिः । आली च । 'अल भूषणपर्याप्तिवारणेषु' । स्त्रियाम्[3] आलिः सेतुः पुमान् । सेतुनामनी ॥ वामैः प्राणिभिः लूयत इति वामलूरुः । वामलूर इति वा पाठः[4] । 'लूञ् छेदने' । प्राणिनः [5]प्रवेशे नमन्त्यत्रेति नाकुः[6] । 'णमु प्रह्वत्वे शब्दे च' । वलन्ते[7] प्राणिनोऽत्रेति वल्मीकम् । पुंनपुंसके[8] । 'वल [9]संचलने' । वल्मीकनामानि ॥ १४ ॥

[1] °भूमि° D_2, J_2, K_3, K_6. [2] जलं Pt_2. [3] F_1 adds वर्तमानायाम्. [4] वामैर्भोगिभिर्लूयत इति B_1, K_6. [5] प्रविश्य B_1, K_5. [6] अकुः अभूमिः आधारो न भवतीति B_1, K_5. [7] वलते संवृणोतीति F_2. [8] पुंलिङ्गनपुंसकलिङ्गौ F_2. [9] 'वल संवरणे संचरणे च' B_1, Pt_2.

अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥

(वि.) <u>अयनमिति</u>—अयन्तेऽनेनेति अयनम्। 'अय पय गतौ'। वर्तन्तेऽनेनेति [1]वर्त्म। 'वृतु वर्तने'। [2]मृगयन्ते गवेषयन्त्यनेनेति मार्गः। 'मृग अन्वेषणे'। अद्यते भक्ष्यते पथिकैरत्रेत्यध्वा[3]। 'अद भक्षणे'। [4]पथन्त्यनेन पन्थाः। 'पथे गतौ'। नकारान्तः। पतन्त्यत्रेति वा। 'पत्लृ गतौ'। पद्यन्तेऽनयेति[5] पदवी। 'पद गतौ'। सरन्त्यनयेति सृतिः। 'सृ गतौ'। सरणिश्च। [6]पद्भ्यां हन्यत इति पद्धतिः। 'हन हिंसागत्योः'। पदमत्र दृश्यते [7]पद्या। 'दृशिर् प्रेक्षणे'। वर्तन्तेऽनया वर्तनी[8]। एके कतिपये पादा लक्ष्यन्तेऽत्रेति एकपदी। मार्गनामानि॥ १५॥

[1] नकारान्तः F_2. [2] मार्गयन्ति B_1, F_2, K_5, K_6; 'मार्ग अन्वेषणे' F_2, K_5; मृज्यते पथिकपदैर्निस्तृणीक्रियत इति F_2, Pt_2; 'मृजूष् शुद्धौ' Pt_2. [3] अर्द (य K_5) न्त्यत्रेत्यध्वा, 'अर्द गतौ' B_1, F_1, K_6; नकारान्तः F_2. [4] पन्थयन्ति, 'पथि गतौ' Pt_2. [5] अस्यामिति F_2. [6] पादाभ्यां Pt_2. [7] तृणकण्टकादिरहितत्वात् पादाय हिता Pt_2. [8] F_1 adds 'वृतु वर्तने'.

अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि।
व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः॥ १६॥

(वि.) <u>अतिपन्था इति</u>—[1]अतिपूज्यः पन्था अतिपन्थाः। सुपूज्यः[2] पन्थाः सुपन्थाः। संश्चासौ पन्थाश्च सत्पथः। अर्चिताध्वनामानि॥ विरुद्धोऽध्वा व्यध्वः। [3]दुष्टोऽध्वा दुरध्वः। विरुद्धः पन्थाः विपथः[4]। कुत्सितोऽध्वा कदध्वा। कुत्सितः पन्थाः कापथः। कुत्सितमार्गनामानि[5]॥ १६॥

[1] अतिश्रेष्ठः Pt_2. [2] सुशोभनः F_2, Pt_2. [3] दुष्टाध्वा K_2. [4] विपथं कापथं च क्लीबमाहुः F_2. [5] °मार्गाभास° W_2.

अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे।
प्रान्तरं दूरशून्योऽध्वा कान्तारं वर्त्म दुर्गमम्॥ १७॥

(वि.) <u>अपन्था इति</u>—पन्था न भवतीत्यपन्थाः। अपथं च। मार्गाभासनामनी॥ शृङ्गवन्नानादिगाश्रितैर्मार्गैरटतीति [1]शृङ्गाटकम्। शृङ्गैरुत्सवैर्जनोऽटतीति वा। '[2]अट गतौ'। चतुर्णां पथां समाहारः चतुष्पथम्[3]। चतुष्पथनामनी॥ प्रकृष्टं ग्रामयोरन्तरं व्यवधानं यत्रेति प्रान्तरम्। प्रगता ग्रामादयोऽन्तरेऽस्मिन्निति वा। [4]दूरशून्याध्वनाम॥ कस्य जलस्यान्तरं समीपमृच्छतीति जनोऽत्र कान्तारम्[5]। 'ऋ गतौ'। [6]दुर्गमवर्त्मनाम॥ १७॥

[1] शृङ्गाकारैर्मार्गैरटतीति वा F_2. [2] 'अट पट गतौ' K_6, Pt_2. [3] चत्वारः पन्थानः यस्य तत् F_2. [4] F_2 adds दूरश्चासौ शून्यश्च. [5] कांश्चिन्न तारयतीति F_2, Pt_2. [6] F_2, Pt_2 add दुष्टो गमो यस्य तत् दुर्गमम् ; दुर्गवर्त्म° B_1, K_5.

गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतम् ।
घण्टापथः संसरणं तत् पुरस्योपनिष्करम् ॥ १८ ॥
([1]द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।
दिवस्पृथिव्यौ गञ्जा तु रुमा स्याल्लवणाकरः ॥)

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने भूमिवर्गः

(वि). गव्यूतिरिति—गवोः क्रोशयोर्यूतिः युग्मं गव्यूतिः । क्रोशयोर्युगं युग्मम् । क्रोशयुगनाम ॥ नल्यते बध्यतेऽनेनेति नल्वः । 'णल बन्धने' । किष्कूणां हस्तानां चतुःशतम् । चतुःशतहस्तप्रमाणवर्त्मनाम ॥ [2]घण्टावतां गजानां पन्थाः घण्टापथः । सम्यक् सरन्त्यनेनेति [3]संसरणम् । 'सृ गतौ' । राजमार्गनामनी ॥ उप समीपे निष्कीर्यते सैन्यमत्रेत्युपनिष्करम्[4] । 'कॄ विक्षेपे' । पुरराजमार्गनाम ॥ १८ ॥

इति श्रीलिङ्गयसूरिविरचितायाम् अमरकोशपदविवृतौ भूमिवर्गः

[1] Additional verse in K_2. [2] घण्टोपलक्षितानां Pt_2. [3] संभूय (संहताः Pt_2) सरन्त्यत्र F_2 [4] F_2 adds तत् संसरणं पुरस्य संबन्धि चेत्.

(पा.) . . . हस्तानां चतुःशतं चेत् नल्वः स्यात् । घण्टापथः संसरणम् । राजमार्गनामनी । 'राजमार्गः संसरणं श्रीघण्टाभ्यां पथः परः' इति वैजयन्ती (पृ. १६०, श्लो. १६) । तत् पुरस्योपनिष्करम् । तदेव पुराभिमुखं चेदुपनिष्करं स्यात् । द्यावापृथिव्यौ—पृथिव्यौ । आकाशभूम्योर्नामानि । गञ्जा—लवणाकरः । लवणभूनामनी ॥ १८ ॥

इति [1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते भूमिवर्गः

[1] °नरसिंह° A_1.

———

२. पुरवर्गः

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात् पुरम् ॥ १ ॥
तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ।

(वि.) पूरिति—पूर्यते जनैरिति पूः । 'पॄ पालनपूरणयोः' । रेफान्तस्त्रीलिङ्गः । [1]पुरी च । [2]क्रीडार्थं नगाः वृक्षाः पर्वता वा सन्त्यत्रेति नगरी । [3]पुरीनगर्यौ विकल्पेन स्त्रियौ । पत्तनसाहचर्यात्[4] नपुंसकेऽपि । पतन्ति जना अत्रेति पत्तनम् । 'पत्लृ गतौ' । पट्टणमिति पाठे पटन्ति गच्छन्ति जना अत्रेति पट्टणम् । '[5]पट गतौ' । पुटमगारं भिद्यतेऽत्रेति पुटभेदनम् । 'भिदिर् विदारणे' । पुटाः[6] घृतघटादयो जनसंमर्दादस्मिन् भिद्यन्त इति वा । तिष्ठन्त्यस्मिन्निति स्थानीयम् । अकुतोभयत्वात् स्थानाय वासाय हितम् इति वा । 'ष्ठा गतिनिवृत्तौ' । नियतं गच्छति जनोऽत्रेति निगमः[7] । प्रधानपुरनामानि ॥ वृक्षस्य शाखा यथा तथा प्रधाननगरस्याङ्गं शाखानगरम्[8] । प्रधानपुरादन्यपुरनाम ॥ विशन्ति कामुका अत्रेति वेशः । 'विश प्रवेशने' । वेश्याजनस्य समाश्रयो वासस्थानम् । [9]गणिकासमूहस्थाननाम ॥ १ ॥

[1] पूर्यते जनैरिति F_2. [2] क्रीडार्थाः K_5. [3] पुरीनगरीशब्दौ F_2. [4] साम्यात् F_1. [5] 'अट पट गतौ' B_1, J_2, K_5. [6] पुटा मृद्घटादयः W_2. [7] B_1, F_1 add 'गम्लृ गतौ'. [8] मूलनगरस्य वृक्षप्रायस्य शाखासदृशत्वात् शाखानगरम् F_2. [9] वेश्याजन° F_2.

(पा.) पूः । रेफान्तः स्त्रीलिङ्गश्च । पुरीनगर्यौ वा । पाक्षिकस्त्रीलिङ्गौ । 'पीठं क्रोडं रसनं तुम्बं नगरं च मन्दिरापुर्यौ' इत्यरुणदत्तलिङ्गानुशासनात् पक्षे नपुंसकलिङ्गौ । [1]पट्टणं—निगमः । नगरनामानि । 'पट्टणं[2] पुटभेदनम् । पत्तनं च' इति वैजयन्तीपाठात् (पृ. १५९, श्लो. ३-४) पत्तनशब्दोऽप्यस्ति । अन्यत्तु—शाखानगरम् । मूलनगरादन्यन्नगरं[3] यत्तच्छाखानगरं स्यात् । अनुक्तम्—'स्कन्धावारो[4] राजधानी दुर्गं च कटकोऽस्त्रियाम्' । राज्ञां प्रधाननगरीनामानि[5] ॥ वेशो—समाश्रयः । वेश्याजनाश्रयो वेशः स्यात् । अनुक्तम्—'वेण्ठा विटजनाश्रयः' । विटजनाश्रयः वेण्ठा स्यात् ॥ १ ॥

[1] पट्टनं B_3. [2] पट्टनमिति मुद्रितग्रन्थे. [3] पुरं B_3. [4] स्कन्धाधारो A_1, B_3. [5] °नगर° B_3.

आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥ २ ॥

रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् ।
प्राकारो वरणः सालः प्राचीनं प्रान्ततो वृतिः ॥ ३ ॥

(वि.) आपण इति—आ[1] समन्तात् पणन्ते व्यवहरन्त्यस्मिन्निति[2] आपणः। 'पण व्यवहारे स्तुतौ च'। विपणिश्च[3]। निषीदन्ति [4]वणिजोऽत्रेति निषद्या। 'षद्लृ विशरणगत्यवसादनेषु'। पण्यस्य वीथिका पण्यवीथिका[5]। हट्टनामानि ॥ रथाय हिता रथ्या। प्रतोल्यते जनैरिति [6]प्रतोली। 'तुल उन्माने'। [7]मुण्डितशिरोवत् समभूमित्वाद् विशिखा। विशीयन्ते प्रकाश्यन्त इति वा। 'शीङ् स्वप्ने'। विपूर्वकत्वात् प्रकाशार्थकत्वम्। [8]रथहितमार्गनामानि ॥ चीयते पाषाणादिभिरिति चयः। 'चिञ् चयने'। उप्यते [9]प्राकारोऽत्रेति वप्रः। 'डुवप् बीजसन्ताने'। प्राकाराधारभूतमृदादेर्नामनी ॥ [10]प्रकर्षेण क्रियत इति प्राकारः। 'डुकृञ् करणे'। वृणोति सम्यगिति [11]वरणः। व्रियते वेष्ट्यतेऽनेनेति वा। 'वृञ् वरणे'। स्यति पर्यन्तं करोतीति सालः। 'षोऽन्तकर्मणि'। स्यति गमनमिति वा। प्राकारनामानि ॥ [12]प्रागास इति प्राचीनम्[13]। प्राक् चीयत इति वा। 'चिञ् चयने'। प्राचीरमिति वा पाठः। प्राक् ईर्यत इति प्राचीरम्। 'ईर क्षेपे'। ग्रामवृतिनामनी ॥ २–३ ॥

[1] आपणन्ते K_6, W_2. [2] अत्रेति W_2. [3] पणश्च D_2, F_1; विपणन्तेऽत्र F_2. [4] वणिजाः F_2. [5] पण्यानां विक्रेतुमानीतानां वीथिः Pt_2. [6] प्रतोलयन्ति जना अस्यामिति Pt_2. [7] मुण्डितसाम्यात् K_6, W_1. [8] रथस्य मार्ग° F_1. [9] प्राकाराधारो W_2. [10] प्रक्रियते K_6, W_2. [11] Gap of 2 pages in I. [12] प्रागास्त K_6. [13] Pt_2 adds प्रागञ्चतीति वा, 'अञ्चु गतिपूजनयोः'.

(पा.) आपणस्तु निषद्यायाम्। आपणनामनी। 'अङ्गडि'। विपणिः—वीथिका। आपणवीथिनामनी[1]। रथ्या—विशिखा। वीथिनामानि। अनुक्तम्—'उपरथ्या तु दर्शिनी[2]'। ग्रामस्य [3]पुरतो गवाद्यागमनगमनाभ्यां कृतमार्गनामनी। भाषया 'पशुवुल . . . अंदुरु'॥ स्याच्चयो—अस्त्रियाम्। प्राकाराधारार्थं मृच्छिलाभ्यां बद्धसेतुनामनी। भाषया 'आड्डवलि'। 'वप्रः स्याद् धूलिकुट्टिमम्' इति धनंजयः[4]॥ प्राकारो—सालः। प्राकारनामानि। 'कोट'। देहलीदीपन्यायाद् वप्रमपि। 'वप्रं [5]सालं प्राकारमाहुररर्रं [6]कवाटं च' इति हलायुधः (अ. मा. २. १३३)॥ अनुक्तम्—'कपिशीर्षं तु सालाग्रम्'। सालाग्रनाम। भाषया 'कोटकोम्म'॥ प्राचीनं—वृतिः। सालावृतिनाम॥ अनुक्तम्—'आवेष्टको वृतिर्वाटी'। कण्टकशाखावरणनामानि। 'मुंलकंचे'॥ २–३॥

[1] वीथिका° B_3. [2] दर्शनी B_3. [3] पुरस्तात् B_3. [4] A_1 adds वप्रमस्त्रियाम्. [5] शालमिति मुद्रितग्रन्थे. [6] कपाटं B_1, मुद्रितग्रन्थे च.

भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम् ।
गृहं गेहोदवसिते वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तवस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥

(वि.) भित्तिरिति—भिद्यत इति भित्तिः । स्त्रियाम् । 'भिदिर् विदारणे' । कुड्यां साधु कुड्यम् । कुड्यत इति वा । 'कुडि संघाते' । [1]मृन्मयावरणनामनी ॥ इल्यते क्षिप्यतेऽस्थि अन्तरिति एडूकम् । 'इल स्वप्नक्षेपणयोः' । सास्थिभित्तिनाम ॥ [2]गृह्णाति सर्वमिति गृहम् । 'ग्रह उपादाने' । गाह्यत इति गेहम् । 'गाहू विलोडने' । वल्कलादिना उद् ऊर्ध्वमवसीयत इत्युदवसितम् । उदवसीयते बध्यते वंशादिभिरिति वा । 'षिञ् बन्धने' । विशन्त्यस्मिन्निति वेश्म । 'विश प्रवेशने' । सीदन्ति तिष्ठन्त्यत्रेति सद्म । 'षद्लृ विशरणगत्यवसादनेषु' । [3]निकेतयन्ति निवसन्त्यस्मिन्निति निकेतनम् । 'कित [4]निवासे' । निकेत्यते स्थीयतेऽस्मिन्निति वा । नितरां शाम्यति [5]दुःखमत्रेति निशान्तम् । 'शमु उपशमे' । अवश्यं निशायामस्यते गम्यत इति वा । 'अम गत्यादिषु' । [6]वस्तुं साधु वस्त्यम् । 'वस निवासे' । अवस्त्यमिति पाठे अवस्त्यायते संघीभवतीत्यवस्त्यम्[7] । 'स्त्यै शब्दसंघातयोः' । सीदन्त्यत्र सदनम् । 'षद्लृ विशरणादौ' । भवन्ति [8]बाला अत्रेति भवनम् । 'भू सत्तायाम्' । अगा वृक्षा ईर्यन्ते नीयन्ते स्वनिर्माण[9] इत्यगारम् । 'ईर प्रेरणे' । अगान् वृक्षान् स्तम्भभूतानियर्तीति वा । 'ऋ गतौ' । मन्दन्ते [10]मोदन्तेऽत्रेति मन्दिरम् । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । मन्द्यन्ते सुप्यन्तेऽत्रेति वा । गृहशब्दः पुंसि भूम्न्येव[11] । गृह्णन्ति प्रविष्टानिति गृहाः । 'ग्रह उपादाने' । चात् क्लीबमपि । गृहाणि । निचीयते द्रव्यमत्रेति निकाय्यः । 'चिञ् चयने' । निलीयन्ते आलीयन्ते जना अत्रेति निलयः । आलयश्च । 'लीङ् श्लेषणे' । गृहनामानि ॥ ४–५ ॥

[1] मृण्मय° D_2, K_5, K_6. [2] गृह्यते पुरुषेणार्जितं धनमिति Pt_2; F_1 omits 5 pages. [3] निकेतन्ति F_2. [4] रोगापनयने च W_2. [5] दुःखानि W_2. [6] वस्तां J_2. [7] अपस्त्यायते संघीभवतीति अपस्त्यम् J_2. [8] शालाः B_1; भवन्त्यस्मिन् पुत्रादयः F_2. [9] स्वनिर्माणाय B_1. [10] मोदं प्राप्नुवन्ति W_2. [11] गृहाः भूम्नि पुंस्येवेति नियमो नास्ति K_6, W_2.

(पा.) भित्तिः—कुड्यम् । कुड्यनामनी ॥ एडूकं—कीकसम् । अन्तर्गतास्थिकुड्यनाम । 'मेत्तिनकोड[1]' । एडुकमित्यप्यस्ति । 'एडुकमन्तर्गतास्थिकुड्यं स्यात्' इति

रत्नकोशः ॥ गृहं—उदवसितम् । गेहोदवसितशब्दयोर्गृहशब्देन[2] सामानाधिकरण्यं लिङ्गान्तरसंभावनार्थम् । 'न नोदवसितं न स्त्री गेहं पुंभूम्नि वा गृहम्' इति वैजयन्ती (पृ. १६०, श्लो. १९) । वेश्म—सदनम् । वस्तमित्यत्रान्तःस्थादिपाठे 'वस्तं वस्त्यं निकेतनम्' इति वैजयन्ती (पृ. १६०, श्लो. १७) । पवर्गादिपाठे 'संपद्गुणातिशयपस्त्य रुचं [3]तवेति' इति धर्मशर्माभ्युदयपद्मचित्रम् (१९. ९९) । भवनागारमन्दिरम्—आलयाः । गृहनामानि ॥ ४–५ ॥

[1] °गाड B_3. [2] °शब्दसामाना° A_1. [3] तवैति इति मुद्रितग्रन्थे.

वासः कुटी द्वयोः शाला सभा संजवनं त्विदम् ।
चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥

(वि.) वास इति—[1]वसन्त्यस्मिन्निति वासः । 'वस निवासे' । कुटति कुटिलीभवतीति कुटी । 'कुट कौटिल्ये' । कुट्यन्ते पशवो [2]बध्यन्तेऽस्मिन्निति वा । कुटी द्वयोः । शलन्त्यस्यामिति शाला । 'शल[3] गतौ' । [4]शाल्यते वा । 'शाल श्लाघायाम्' । [5]सह भान्त्यस्यामिति सभा । 'भा दीप्तौ' । सभागृहनामानि ॥ संजवन्ते[6] संगच्छन्ते चतस्रः शाला अत्रेति संजवनम् । [7]संवहनमिति पाठे संवहन्ति मिलन्त्यत्रेति । गत्यर्थो धातुरत्र । चतस्रः शालाः समाहृता अत्रेति चतुःशालम्[8] । चतुःशालगृहनामनी ॥ पर्णैः [9]कृता शाला पर्णशाला । उटैस्तृणपर्णैर्जायत[10] इति उटजः । 'जनी प्रादुर्भावे' । मुनिसदननामनी ॥ ६ ॥

[1] W_2 adds विशेषेण. [2] संगच्छन्ते K_6. [3] 'शल चल आशुगमने' K_2, K_6. [4] शालते K_6, W_2. [5] F_2 adds पुत्रादिभिः. [6] F_2, Pt_2 add मिथः. [7] संहननमिति पाठे संहन्ति मिलन्त्यत्रेति । 'हन हिंसागत्योः' । गत्यर्थो धातुरत्र B_1, J_2, K_5. [8] चतसृणां शालानां समाहारः Pt_2. [9] पर्णैः शालत इति F_2. [10] K_6 omits पर्णैः.

(पा.) वासः—सभा । गृहनामानि । अनुक्तम्—'निवासावसथावासा वास्तव-स्त्री निर्वृतं कुलम्' । एतानि षट् च । संजवनं—चतुःशालम् । चतुःशालगृहनामनी । 'तोड्डिल्लु' ॥ मुनीनां—अस्त्रियाम् । आश्रमनामनी । 'आश्रमे तु पर्णशालोटजमस्त्रि-याम्'[1] इति वैजयन्ती (पृ. १६१, श्लो. २६) ॥ ६ ॥

[1] '°उटजोऽस्त्रियाम्' इति मुद्रितग्रन्थे.

चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा ।
आवेशनं शिल्पिशाला प्रपा पानीयशालिका ॥ ७ ॥

(वि.) चैत्यमिति—मृदादिना[1] चीयत[2] इति चैत्यम् । 'चिञ् चयने' । [3]आयतन्तेऽस्मिन्नित्यायतनम् । 'यती प्रयत्ने' । [4]मुन्यालयनामनी ॥ वाजिनां[5] शाला वाजिशाला । मन्दन्तेऽत्राश्वा[6] इति मन्दुरा । 'मदि स्तुत्यादौ' । वाजिशालानाम ॥ आविशन्त्यत्र कर्मकारा[7] इत्यावेशनम् । शिल्पिनां शाला । [8]शिल्पिशालानाम ॥ प्रपिबन्त्युदकमस्यामिति[9] प्रपा । 'पा पाने' । पानीयस्य जलस्य शाला । पानीयशालानाम ॥ ७ ॥

[1] पाषाणादिना F_2, Pt_2.　[2] चय्यते K_2.　[3] अत्र for अस्मिन् K_6, W_2.　[4] मुनेरालय° K_5.　[5] F_2 adds अश्वानां.　[6] वाजिनः F_2.　[7] कर्मकारयितारः B_1, K_5, Pt_2, W_2.　[8] शिल्पशाला K_5, W_2.　[9] K_2 adds प्रजाः.

(पा.) चैत्यम्—तुल्ये । देवसदननामनी । तुल्ये इत्यनेनार्थान्तरेऽपि तुल्यत्वम् ।

'चैत्यं देवकुले बुद्धबिम्बेऽप्युद्देशपादपे[1] ।
देवसद्मन्यायतनं सद्ममात्रेऽपि तद्विदुः ॥'

इति । वाजिशाला—मन्दुरा । [2]हयशालायां मन्दुरा स्यात् । अनुक्तम्—'चतुरं हस्तिनां शाला' । [3]गजालयश्चतुरं स्यात् । 'शाला संधानिनी गवाम्' । गवां शाला संधानिनी स्यात् । आवेशनं शिल्पिशाला । कुलालपाकपुटी च कारोरव्यासवश्च पल्याणकारकचक्रिश्च नापितखरकुटिश्च चित्रकारजालिनी च पाटसालिकतन्तुवायगर्तिकादिकं च सर्वमावेशनं स्यात् ॥ प्रपा पानीयशालिका । पानीयशालानाम ॥ अनुक्तम्—'सत्रशाला शुभस्थली' । सत्रशालानामनी[4] ॥ ७ ॥

[1] उद्देश्य° B_3.　[2] हयलायः B_3.　[3] गजलायः A_1, B_3.　[4] °शालिका° A_1.

मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम् ।
गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ॥ ८ ॥
(कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम्)

(वि.) मठ इति—[1]मठन्त्यत्रेति मठः । 'मठ मदनिवासयोः' । [2]शिष्यापत्यादिनिवासनाम ॥ गञ्जन्ति [3]शब्दायन्ते मत्ता अस्यामिति गञ्जा । 'गजि शब्दे' । मदिराया मद्यस्य संधानगृहं मदिरागृहम् । सुरागृहनामनी ॥ [4]गर्भेऽन्तः अगारम् गर्भागारम् ।

वासाय[5] गृहं वासगृहम् । गृहान्तर्गृहनामनी[6] । [7]कृतरक्षत्वाद् ग्रहैर्न रिष्यत इत्यरिष्टम् । 'रिष हिंसायाम्' । सूतिकाया अभिनवसूतिकाया गृहम् । सूतिकागृहनामनी ॥ ८ ॥

[1] मव्यन्ते छात्रादिभिरिति F_2, Pt_2. [2] छात्रोऽन्तेवासी आदिर्येषां ते परिव्राजकक्षपणकादयः तेषां निलयः Pt_2. [3] स्वैरमालपन्ति F_2. [4] निर्वातत्वात् गर्भ इव Pt_2. [5] वासस्य शयनस्य Pt_2. [6] गृहान्तरित° W_2. [7] Pt_2 adds मन्त्रादिना.

(पा.) मठः—निलयः । अन्तेवास्याश्रयो मठः स्यात् ॥ गञ्जा—मदिरागृहम् । सुरादिविक्रेतृगृहं गञ्जा स्यात् । [1]स गञ्जाशब्दः पुंलिङ्गश्चेत् भाण्डागारनामापि स्यात् । 'भाण्डागारे पुमान् गञ्जः स्त्री तु खन्यां सुरागृहे' इति वैजयन्ती (पृ. २३२, श्लो. २६)॥ गर्भागारम् । कोष्ठगृहनाम । '[2]गर्भागारोऽपवरकः' इति वैजयन्ती (पृ. १६३, श्लो. ५१)। वासगृहम् । सज्जिकागृहनाम । 'उशन्ति शयनस्थानं वासागारं विशारदाः' इति हलायुधः (अ. मा. २. १४०) । अरिष्टं सूतिकागृहम् । प्रसूतिगृहनाम ॥ ८ ॥

[1] B_3 omits. [2] 'अपवरकं गर्भगृहम्' A_1, B_3.

वातायनं गवाक्षोऽथ मण्डपोऽस्त्री जनाश्रयः ।
हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम् ॥ ९ ॥

(वि.) वातायनमिति—वातस्यायनं[1] वातायनम् । गौश्चक्षुरक्ष्यत इति गवाक्षः[2] । 'अक्षू व्याप्तौ' । गोचक्षुरिव वर्तुलाकारत्वाद्वा । जालकनामनी ॥ मण्ड्यते जनैरिति मण्डपः । 'मडि भूषायाम्' । जनानामाश्रयः जनाश्रयः । सर्वजनाश्रयशालानाम ॥ मनो हरतीति हर्म्यम् । 'हृञ् हरणे' । धनिकगृहनाम ॥ [3]प्रसीदन्त्यस्मिन्निति प्रासादः । 'षद्लृ विशरणगत्यवसादनेषु' । प्रमुदिताः सीदन्त्यस्मिन्निति वा । देवनृपगृहनाम ॥ ९ ॥

[1] F_2, Pt_2 add मार्गः; F_2 adds अयते यात्यनेनेत्ययनम्, 'अय पय गतौ'. [2] गवां किरणानामक्षो व्यापारोऽत्रेति वा F_2, Pt_2. [3] F_2 adds देवादयः.

(पा.) वातायनं—स्यात् । जालकनामनी । 'दीर्घाश्रं कर्णगच्छिद्रं तद्गवाक्षमिति स्मृतम्' इति मयमतप्रयोगान्नपुंसकम् । 'विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्रावरणा इवासन्' इति रघुवंशप्रयोगात् (७. ११; कु. सं. ७. ६२) पुंलिङ्गः । गवाक्षनामानि ॥ अनुक्तम्—'कुट्टिमोऽस्त्री निबद्धा भूः' । पाषाणादिनिबद्धभूमिनाम ॥ 'चन्द्रशाला शिरोगृहम्' । गृहोपरि गृहनामनी । मण्टपोऽस्त्री जनाश्रयः । [1]मण्टपनामनी ॥ हर्म्यादि—

वासः। धनिकानां निवासः हर्म्यादिसंज्ञकः स्यात्। आदिशब्दः पर्यायवचनः। 'हर्म्यं च मालिका'। प्रासादो देवभूभुजाम्। देवनृपवासः[2] प्रासादसंज्ञः स्यात्॥ ९॥

[1] जनाश्रयशालानाम B_3.　[2] °आवासः B_3.

सौधोऽस्त्री राजसदनमुपकार्योपकारिका।
स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च॥ १०॥
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम्।

(वि.) सौध इति—[1]सुधायोगात् सौधः। राज्ञां सदनं राजसदनम्। [2]राजभवननाम॥ उप समीपे क्रियत इत्युपकार्या[3]। प्रयाणे[4] उपकरोतीति उपकारिका। पटकृतराजवेश्मनामनी॥ स्वस्ति शुभं कायतीति स्वस्तिकः। 'कै शब्दे'। सर्वतो भद्रमस्येति सर्वतोभद्रः। नन्दिमानन्दम् आवर्तयतीति नन्द्यावर्तः[5]। आदिग्रहणाद् रुचकवर्धमानादि गृह्यते। विशिष्टः छन्दोऽत्र विच्छन्दकः। [6]एते ईश्वरसद्मनां विच्छन्दकप्रभेदाः रचनाविशेषा भवन्ति। रचनाविशेषयुक्तनृपगृहाणां नामानि॥ १०॥

[1] सुधालिप्तत्वात् F_2; K_6 adds अस्त्रियां.　[2] राजसदन° K_6, W_2.　[3] पटादिभिरुपक्रियते F_2.　[4] प्रयाणाय W_2, Pt_2.　[5] नन्दमानन्दमावर्तयतीति Pt_2; W_2, Pt_2 add 'वृतु वर्तने'.　[6] एतानि ईश्वरसद्मनामानि W_2.

(पा.) सौधो—राजसदनम्। राजगृहनामनी॥ उपकार्योपकारिका। [1]पटादिकृतराजगृहस्थाननामनी[2]। 'गृहस्थानं मतं[3] राज्ञामुपकार्योपकारिका' इति हलायुधः (अ. मा. २. १३५)॥ स्वस्तिकः—सद्मनाम्। स्वस्तिकसर्वतोभद्रनन्द्यावर्तरुचकवर्धमाना राजगृहरचनाविशेषाः। तत्स्वरूपं [4]तु—

'अपरान्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ।
तदवधिविधृतश्चान्यः प्राग्द्वारं स्वस्तिकं शुभदम्॥
अप्रतिषिद्धालिन्दं समन्तगे वास्तु सर्वतोभद्रम्।
नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि॥
नन्द्यावर्तमलिन्दैः शालाकुड्यात् प्रदक्षिणान्त्यगतैः।
द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि॥
प्राक्पश्चिमावलिन्दावन्त्यगतौ तदवधि स्थितौ शेषौ।
रुचकं द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि॥

द्वारालिन्दोऽन्त्यगतः प्रदक्षिणोऽन्यस्ततश्चान्यः ।
रुद्धश्च वर्धमानो द्वारं तु न दक्षिणं कार्यम् ॥' [5]

इति ॥ १० ॥

[1] A₁ omits घटादिकृत°. [2] B₃ omits स्थान°. [3] स्मृतं B₃; मुद्रितग्रन्थे च. [4] निरूप्यते A₁. [5] बृहत्संहिता ५२. ३१-५.

स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥
शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम् ।
प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥

(वि.) स्त्र्यगारमिति—स्त्रीणामगारं स्त्र्यगारम् । अन्तः पूर्यत इत्यन्तःपुरम् । 'पॄ पालनपूरणयोः' । अन्तरभ्यन्तरे पुरं गृहमिति वा । अवरुध्यन्ते [1]राज्ञः स्त्रियोऽत्रेत्यवरोधनम् । 'रुधिर् आवरणे' । अवरोधश्च । [2]शुद्धाः सुरक्षिता अन्तिकाः समीपवर्तिनोऽत्रेति शुद्धान्तः । [3]राजस्त्रीणामगारनामानि ॥ अट्टन्ते हिंसन्ति [4]योधा अत्र स्थित्वेत्यट्टः । 'अट्ट [5]अतिक्रमणहिंसनयोः' । योधा अत्र क्षुवन्तीति क्षौमम् । 'टुक्षु शब्दे' । प्राकाराग्रस्थितरणगृहनामनी ॥ प्रहन्यते घटादिरनेनेति प्रघाणः । प्रघणश्च[6] । 'हन हिंसागत्योः' । अल्यते [7]भूष्यत इत्यलिन्दः । आलिन्द इति वा पदच्छेदः । 'अल [8]भूषणपर्याप्तिशक्तिवारणेषु' । [9]बहिर्द्वारालपगृहनामनी ॥ ११–१२ ॥

[1] राजस्त्रियः J₂, K₂, K₅, K₆, W₂. [2] शुद्धाः परिशुद्धाः रक्षका अन्ते पुरसमीपेऽस्येति F₂, Pt₂. [3] B₁, I, K₂, K₃, K₅ add नृपस्त्रीणां च नामानि. [4] F₂ adds परबलमिति. [5] अतिक्रम° W₂, Pt₂. [6] प्रविशद्भिर्जनैर्हन्यत इति वा Pt₂. [7] अलंक्रियते F₂. [8] F₂, W₂ omit शक्ति. [9] °द्वारे W₂.

(पा.) स्त्र्यगारं—अवरोधश्च । [1]राजस्त्रीगृहनामानि । तात्स्थ्यात् तद्व्यपदेश इति [2]राजस्त्रीनामान्यपि[3] ।

'कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः' ॥

इति रघुवंशे (१. ३२) । स्यादट्टः—अस्त्रियाम् । अट्टनामनी । 'अट्टुग' ॥ 'कोट्टङ्गस्तु तमङ्गः स्यात्[4]' । तमङ्गनामनी । भाषया 'तमगम्' ॥ प्रघाण—प्रकोष्ठके । द्वारपार्श्वाल्पगृहनामानि ॥ अलिन्द इति ह्रस्वादिः । आलिन्द इति दीर्घादिश्च भवति । ह्रस्वादेरुदाहरणम् 'प्रघाणः प्रघणोऽलिन्दः' इति रत्नकोशः । दीर्घादेः—'गृहैकदेश आलिन्दः

प्रघाणः प्रघणस्तथा' इत्यमरमाला ॥ अनुक्तम्—'संवेशिनी मुखे शाला'। मुखशालानाम। भाषया 'मोगसाल[5]' ॥ ११–१२ ॥

[1] वरारोहा° A_1.　[2] मत्तकाशिनी°A_1.　[3] A_1 adds भवति.　[4] B_3 adds 'कोद्रङ्गस्तु तमङ्गकः' इति वैजयन्ती.　[5] A_1 adds 'चन्द्रशाला शिरोगृहम्'। पृथुगृहोपरि गृहनाम.

गृहावग्रहणी देहल्यङ्गणं चत्वराजिरे ।
अधस्ताद्दारुणि शिला नासा दारूपरि स्थितम् ॥ १३ ॥

(वि.) गृहावग्रहणीति—गृहं गृहद्वारशाखा अवगृह्यतेऽनयेति गृहावग्रहणी। 'ग्रह उपादाने'। दिह्यते [1]पङ्कादिनेति देहली। 'दिह उपचये'। द्वारमूले तिर्यक्स्थितपूज्यदारुनामनी ॥ अङ्गन्त्यत्रेत्यङ्गणम्। अङ्गनं वा। 'अगि गतौ'। [2]चतन्ते याचका अत्र स्थित्वेति चत्वरम्। 'चते याचने'। अजन्ति क्षिपन्ति [3]धान्यादिकमत्रेति अजिरम्। 'अज गतिक्षेपणयोः'। गृहस्य पुरःप्रदेशनामानि ॥ अक्ष्यतैः शाल्यत इति शिला। 'शाल श्लाघायाम्'। देहल्यधःस्थितपूज्यह्रस्वदारुनाम ॥ गृहस्य नासिकेव तिष्ठतीति नासा। द्वारोपरि तिर्यक्स्थितपूज्यदारुनाम[4] ॥ १३ ॥

[1] सुधादिना Pt_2; देहं प्रवेशेन लातीति वा 'ला आदाने' F_2, Pt_2.　[2] Pt_2 adds अत्र स्थित्वा चत्यते याचकैरिति वा.　[3] F_2 adds आतपसंबन्धात्.　[4] पूज्यस्य दारुणो B_1, I, K_2, K_3.

(पा.) गृहावग्रहणी देहलिः[1]। द्वारमूले तिर्यक्प्रसारितपूज्यदारुनामनी। 'कडप' ॥ अनुक्तम्—'उत्तराङ्गं तु तत्तिर्यग्द्वारस्योपरि दारु यत्'। द्वारोपरि तिर्यक्प्रसारितदारु उत्तराङ्गं स्यात्[2] ॥ अङ्गणं—अजिरे। प्राङ्गणभूनामानि। [3]अङ्गत्यस्मिन्नित्यङ्गणम्। पृषोदरादित्वाण्णत्वमिति सुभूतिटीका। अङ्गनमिति च कतिचन[4] कथयन्ति ॥ अधस्तात्—स्थितम्। संधिकर्मोचितकाष्ठयोरधस्तनकाष्ठं शिला स्यात्। उपरितनकाष्ठं नासा स्यात् ॥ १३ ॥

[1] देहली B_3.　[2] A_1 adds उत्तरासनं च; उत्तरङ्गं B_3.　[3] B_3 omits the line.　[4] कतिचित् B_3.

प्रच्छन्नमन्तर्द्वारं स्यात् पक्षद्वारं तु पक्षकः ।
वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः ॥ १४ ॥

(वि.) प्रच्छन्नमिति—प्रच्छाद्यत इति प्रच्छन्नम्। 'छद अपवारणे'। अन्तः स्थितं द्वारम् अन्तर्द्वारम्। गृहान्तर्गतद्वारनामनी ॥ [1]पक्षे पार्श्वे क्रियत इति पक्षकः[2]। पार्श्वकृतद्वारनामनी ॥ वलति संवृणोति [3]भित्तेः बहिःप्रदेशमिति वलीकम्। 'वल संवरणे'। [4]कुड्यादेर्नितरां बहिर्व्रियत[5] इति नीव्रम्[6]। 'वृञ् वरणे'। जलं बहिर्नीयत इति वा। 'णीञ् प्रापणे'। पटलस्य प्रान्तः पटलप्रान्तः। छदिषः प्रान्तनामानि ॥ पटं पटकार्यं [7]लातीति पटलम्। 'ला दाने'। छाद्यतेऽनेनेति छदिः। 'छद अपवारणे'। [8]सान्तोऽयं नपुंसकलिङ्गः। छदिषो नामनी ॥ आन्ध्रभाषायां 'कप्पु' ॥ १४ ॥

[1] F_2, Pt_2 add गृहस्य. [2] गृहस्य पक्षयोः स्थितं द्वारं पक्षद्वारम् F_2; पक्षे पार्श्वे द्वारं Pt_2. [3] कुड्यमिति Pt_2. [4] कुड्याः W_2. [5] Pt_2 adds अनेनेति. [6] नीध्रमिति वा पाठः K_6, W_2. [7] F_2 adds आदत्ते. [8] सकारान्तः K_3.

(पा.) प्रच्छन्नम्—स्यात्। अन्तर्द्वारनाम[1]। भाषया 'लोनि वाकिलि'। पक्षद्वारं—पक्षकः। पक्षद्वारनाम। नपुंसकोऽप्यस्ति। '[2]पक्षकं तु पक्षद्वारं खडक्किका' इति वैजयन्ती (पृ. १६२, श्लो. ४२)। वलीक—प्रान्ते। पटलप्रान्तनामानि ॥ 'चारुनीव्रो वलिकः[3] पटलप्रान्त इत्यपि' इति पुंस्काण्डे गोपालितः। अथ पटलं छदिः। अपवारणनामनी। आन्ध्रभाषायां 'कप्पु'। पटलशब्दसाहचर्याच्छदिःशब्दो नपुंसकः[4] ॥ १४ ॥

[1] प्रच्छन्नं स्यात् A_1. [2] B_3 adds 'पक्षशाला तु पक्षकः' इति वैजयन्ती (पृ. १६०, श्लो. २४). [3] वलीकः B_3. [4] B_3 adds °लिङ्गः.

गोपानसी तु वलभी छादनेऽवक्रदारुणि ।
कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ॥ १५ ॥

(वि.) गोपानसीति—गोपायतीति [1]गोपानसी। 'गुपू रक्षणे'। वलतीति[2] [3]वलभी। 'वल संवरणे'। [4]पटलोपस्थितस्यावक्रस्य दारुणो नामनी। वक्रदारुणीति वा [5]पदच्छेदः। तदा पटलप्रान्ते शिखेव स्थितस्य वक्रदारुणो नामनी ॥ कपोतान् पालयतीति कपोतपालिका। 'पाल रक्षणे'। विशिष्य[6] टङ्क्यतेऽत्रेति विटङ्कम्। 'टकि बन्धने'। पुंनपुंसके। वक्रदार्वधः पक्षिविश्रमाय [7]क्षिप्तस्य दारुणो नामनी ॥ १५ ॥

[1] गोपायतीति गोपा, नासेव नासा, गोपा चासौ नासा च Pt_2; 'गुपू गोपने' K_3, K_6. [2] D_2, Pt_2 add संवृणोति. [3] वलभिः B_1, D_2, I, K_2, K_3. [4] °उपरि° K_6. [5] पदविभागः K_2. [6] विशिष्टं K_2, I, W_2. [7] विक्षिप्तस्य K_5.

(पा.) गोपानसी—वक्रदारुणि। [1]वलभिच्छादनवक्रदारु गोपानसी स्यात्। 'गोप्पुलु'। कपोतपालिकायां—पुंनपुंसकम्। [2]कपोतादिपक्षिणामावासार्थं[3] निर्मितकाष्ठ-[4]विशेषनाम ॥ १५ ॥

[1] वलभी° B₃. [2] A₁ adds गृहासक्त°. [3] कपोतादीनाम् for पक्षिणाम् B₃. [4] °दारु° B₃.

स्त्री द्वार्द्वारं प्रतीहारः स्याद् वितर्दिस्तु वेदिका।
तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ॥ १६ ॥

(वि.) स्त्रीति—द्वार्यते [1]जनोऽत्रेति द्वाः। रेफान्तस्त्रीलिङ्गः। द्वारं च। 'द्वृ [2]संवरणे'। प्रतिह्रियते नूतनो जनोऽत्रेति प्रतीहारः[3]। 'हृञ् हरणे'। गृहद्वारनामानि॥ विगता तर्दिः श्रमोऽत्रेति वितर्दिः। 'तर्द हिंसायाम्'। श्रमं वितर्दयतीति वा। पथिकैर्विद्यते लभ्यत इति वेदिका। 'विद्लृ लाभे'। विदन्त्यस्यामिति वा। 'विद ज्ञाने'। वेदिकानामनी॥ मङ्गलार्थं बन्धून् [4]त्वरयतीति तोरणम्। 'तुर त्वरणे'। द्वाराद्बहिः बहिर्द्वारम्। द्वाराद्बहिर्वन्दनमालाबन्धनाय[5] रचितस्तम्भद्वयनाम। गोप्यते [6]पौरैरिति गोपुरम्। 'गुपू रक्षणे'। पुरद्वारनाम ॥ १६ ॥

[1] F₂ adds नूतनो; वार्यते नूतनपुरुषोऽत्र Pt₂. [2] वरणे K₆; वारणे W₂. [3] प्रतिहारः K₆, W₂. [4] त्वरिता भवन्त्यत्र Pt₂. [5] मण्डनमाला° W₂. [6] पुरस्थैरिति F₂; शूरैः Pt₂.

(पा.) स्त्री—प्रतीहारः। द्वारनामानि॥ स्यात्—वेदिका। वेदिकानामनी॥ तोरणो—बहिर्द्वारम्। [1]बाह्यद्वारं तोरणं स्यात्। 'तलवाकिलि'। तदग्रे मङ्गलार्थमाबद्ध-[2]स्रग्विशेषोऽपि तोरणं स्यात्। 'बुधैर्वन्दनमाला तु तोरणं परिकीर्तितम्[3]' इति हलायुधः (अ. मा. २. १४६)। पुरद्वारं—गोपुरम्। नगरद्वारं गोपुरं स्यात्। 'ऊरुवाकिलि'॥ १६ ॥

[1] बहिर्द्वारनाम B₃. [2] निबद्ध° B₃. [3] °कीर्त्यते A₁; मुद्रितग्रन्थे च.

कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु।
कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ॥ १७ ॥

(वि.) कूटमिति—हस्तिनो [1]नखमिव तिष्ठतीति हस्तिनखः। पूर्द्वारमृत्कूटनाम॥ [2]कं शिरः पाटयतीति कपाटम्[3]। कं वातं वटति वेष्टयतीति कवाटं वा। 'पट भेदने'

'वट वेष्टने'। इयर्ति यातायातप्रकारेणेति अररम्। 'ऋ गतौ'। द्वारपिधाननामनी॥ तत् कपाटं विष्कभ्नातीति विष्कम्भः। 'स्कम्भु[4] रोधनस्तम्भनयोः'। [5]अरेण कर्षणेन गलतीत्यर्गलम्। 'गल अदने स्रवणे च'। कवाटानुद्घाटनाय निर्मितदारुयन्त्रनामनी॥ १७॥

[1] नख इव W_2. [2] Pt_2 adds प्रविशतां. [3] कैर्वातैः पाटयति भाषत इति वा। 'पट शब्दे' F_2, Pt_2. [4] 'ष्कभि स्कभि प्रतिबन्धने' K_3, K_6. [5] अरणे कर्षणे F_2; न गलतीत्यर्गलम् J_2, K_3, K_5; परेण K_5.

(पा.) कूटं—तस्मिन्। पुरद्वारेऽक्रमनिम्नमृत्कूटो हस्तिनखः स्यात्। 'शनैरनीयन्त रयात् पतन्तो रथाः क्षितिं हस्तिनखादखेदैः' इति माघः (शिशु. ३. ६८)। 'वंकदारम्'। कवाटम्—तुल्ये। द्वारपिधाननामनी॥ त्रिलिङ्गः कवाटः। कवाटः, कवाटी, कवाटम्। [1]पवर्गमध्य इति रभसकोशकारेणाभ्यधायि। कपाटः कपाटीति। अररं नपुंसकमेव। 'अथ त्रयी कपाटोऽपि कवाटोऽप्यररं न पुम्' इति वैजयन्ती[2] (पृ. १६२, श्लो. ४६)। अररीत्यपचयविवक्षायां स्त्री। पुंलिङ्गोऽररिशब्दोऽप्यस्ति।

'अप्यन्वेष्टुं रतिगृहगुहां गन्धवाहेन कार्ये
प्रेर्यन्तेऽमी परमररयो हर्म्यवातायनानाम्'।

इति चन्द्रकाव्यम्। अनुक्तम्—'घर्घरो द्वितलादीनामधोद्वारकवाटिका'। द्वितलत्रितलादिगृहद्वारकवाटिका घर्घरः स्यात्। तद्विष्कम्भो—न ना। कवाटधारकलोहदण्डादिकमर्गलं स्यात्[3]। 'द्वारयन्त्रं तु तालकम्' इत्यल्पार्गलपर्यायश्च पृथक्। 'तलुपुचडिय'। 'वितण्डस्त्वर्गला त्रयी' इत्ययस्तालकपर्यायोऽपि पृथक्। 'बीगेमु'॥ १७॥

[1] पकारमध्यम: B_3, [2] 'अथ त्रय्यौ कवाटोऽपि कुवाटोऽप्यररं न पुम्' इति मुद्रितग्रन्थे. [3] दारुदण्डमयं यत्कवाटधारकम् A_1.

आरोहणं स्यात् सोपानं निश्रेणिस्त्वधिरोहिणी।
संमार्जनी शोधनी स्यात् संकरोऽवकरस्तया॥ १८॥

(वि.) आरोहणमिति—आरोहन्त्यनेनेत्यारोहणम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। सह उपानमन्त्यत्रेति सोपानम्। 'णम प्रह्वत्वे शब्दे'। सोपाननामनी॥ [1]निश्रयन्ति ऊर्ध्वतलमनयेति निश्रेणिः। 'श्रिञ् सेवायाम्'। अधिरोहत्यनयेति अधिरोहिणी[2]। दारुनिर्मितसोपाननामनी॥ संमाष्टर्यनयेति[3] संमार्जनी। 'मृजूष् शुद्धौ'। [4]शोधयत्यनयेति शोधनी। 'शुध शौचे'। अङ्गणादौ [5]रजःसमूहनिराकरणसाधन-[6]

नामनी ॥ तृणादिना सह [7]कीर्यत इति संकरः। [8]अवकरश्च। 'कॄ विक्षेपे'। तया संमार्जन्या एकत्र क्षिप्तरजोनामनी ॥ १८ ॥

[1] निश्रयेण श्रयन्ति उन्नतस्थलमनयेति F_2, Pt_2. [2] अधिरोहणी D_2. [3] F_2 adds गृहादिकं; संमृज्यतेऽनया Pt_2. [4] शुध्यतेऽनया F_2, Pt_2. [5] K_2, K_3, K_5 add कीर्ण°. [6] अपनयन° K_5. [7] संकीर्यते अवकीर्यते Pt_2. [8] अवक्षिप्यते धूल्यादिकमिति F_2.

(पा.) आरोहणं—सोपानम्। सोपाननामनी ॥ निश्रेणिः—अधिरोहिणी। अट्टाद्यारोहणार्थं वंशादिनिर्मितयन्त्रनामनी। 'निच्चेन'॥ संमार्जनी—स्यात्। गृहाद् [1]रजस्तृणाद्यपनयनाय [2]निर्मितकामञ्जकादिसंदोहनामनी: '[3]पारक'। संकरो—क्षिप्ते। [4]संमार्जन्यपनीततृणराशिनामनी। 'कनवुकुप्प'। 'संमार्जनी [5]वर्धनी तन्मलेऽवकर-संकरौ' इति वैजयन्तीपाठात् (पृ. १६३, श्लो. ५२) संकरशब्दोऽबन्तः। 'संकारोऽग्नि-चटत्कारे संमार्जन्यवमार्जिते[6]' इति विश्वप्रकाशिकापाठात् (पृ. १३९, श्लो. १५९) संकारो घञन्तः। अनुक्तम्—'गोमुखं तूपवेशनम्[7]'। गृहाद्युपलेपननामनी। 'यिल्लु-ल्लुकुट[8]'॥ १८ ॥

[1] रजःकण° A_1. [2] कामलजकादि° A_1. [3] 'चापुरु' B_3. [4] °अवमर्जित° A_1. [5] शोधनीति मुद्रितग्रन्थे. [6] 'शङ्करोऽग्निचटत्कारे सम्मार्जन्यवपुञ्जिते' इति मुद्रितग्रन्थे. [7] उपलेपनम् B_3. [8] 'अलुकुट' B_3.

क्षिप्ते मुखं निःसरणं संनिवेशो निकर्षणम्।
समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥

(वि.) क्षिप्त इति—[1]गृहस्य मुखप्रायत्वात् मुखम्। [2]गृहान्निःसरन्त्यनेनेति निःसरणम्। 'सृ गतौ'। गृहादिपुरोदेशनामनी ॥ [3]समन्तात् निविशन्तेऽत्र संनिवेशः। 'विश प्रवेशने'। निवृत्तं कर्षणमत्रेति निकर्षणम्। 'कृष विलेखने'। पुरादेर्बहि-र्विहरणभूनामनी[1]॥ सम्यग् वसन्त्यत्रेति संवसथः। 'वस निवासे'। ग्रस्यते[5] भुज्यत इति ग्रामः। 'ग्रसु[6] अदने'। पुरादन्यकतिपयगृहसमूहनामनी ॥ वसन्त्यत्र [7]गृहिण इति [8]वास्तुः। वेश्मनो भूर्वेश्मभूः। वेश्मस्थानभूतनामनी ॥ १९ ॥

[1] D_2 omits 3 lines. [2] निःसार्यतेऽत्रेति K_8. [3] संनिविशन्ते W_2. [4] °भूमि° B_1. [5] K_8 adds नियतेः; नियुक्तेः B_1, J_2, K_2, K_3, K_5. [6] 'ग्रसु ग्लसु अदने' F_2, K_3, K_6. [7] रक्षिणः F_2. [8] वास्तु K_5; F_1, I add 'वस निवासे.'

(पा.) मुखं निःसरणम् । [1]गेहादिपुरोभागनामनी ।। संनिवेशो निकर्षणम् । गृहाद्यपरभागनामनी । ‘ इंट्टुवेनक ’ । समौ—ग्रामौ । ग्रामनामनी । तत्र परिवसथादि-[2] शब्दा अपि सन्ति । ‘ग्रामः पर्युपसंनिभ्यः प्रतेश्च वसथः परः ’ इति वैजयन्ती (पृ. १५९, श्लो. २) ।। वेश्मभूः—अस्त्रियाम् । गृहभूमिर्वास्तु स्यात् । वेश्मशब्द उपलक्षणम् । ‘ग्रामादि-भूमिर्वास्त्वस्त्री ’ इति वैजयन्ती (पृ. १५९, श्लो. १०) ।। १९ ।।

[1] गृहादि° B_3. [2] °आदयोऽपि B_3.

ग्रामान्तमुपशल्यं स्यात् सीमसीमे स्त्रियामुभे ।
घोष आभीरपल्ली स्यात् पक्कणः शबरालयः ।। २० ।।

इति पुरवर्गः

(वि.) ग्रामान्तमिति—[1]ग्रामस्यान्तं[2] ग्रामान्तम् । उपगतः शल्यः कीलको यत्र चिह्नार्थं प्रक्षेपात् उपशल्यम् । ‘शल[3] चलनसंवरणयोः ’ । ग्रामसमीपप्रदेशनामनी ।। सीयते बध्यत इति सीमा । [4]नान्तः । सीमा आकारान्तस्त्रीलिङ्गश्च । ‘षिञ् बन्धने ’ । ग्रामान्तनामनी ।। घोषन्ति गावोऽत्रेति घोषः । ‘[5]घुषिर् अविशब्दने ’ । आभीराणां गोपानां पल्ली[6] ग्रामः आभीरपल्ली । गोपालग्रामनामनी ।। पच्यते कदन्नमत्र पक्कणः । ‘डुपचष् पाके ’ । शबन्ति भ्रमन्तीति शबराः । ‘शब भ्रमणे ’ । तेषामालयः शबरालयः । शबरालयनामनी ।। २० ।।

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ पुरवर्गः

[1] W_2 omits 3 lines. [2] F_2 adds समीपं. [3] ‘शल गतौ ’ F_2; K_6 adds समीपभ्रमणे साधु वा. [4] प्रथमो नकारान्तः द्वितीयस्तु आकारान्तः F_2. [5] ‘घुष घुष्टौ ’ F_2. [6] घृतादिक्रयार्थं जनैः पल्यते गम्यत इति पल्ली J_2; पलन्ति दध्यादिक्रयार्थ-मत्रेति, ‘पल गतौ ’ F_2.

(पा.) ग्रामान्तम्—स्यात् । ग्रामान्तनाम ।। अनुक्तम्—‘ प्रान्तरं ग्रामयोर्मध्यम् ’ । ग्रामद्वयमध्यं प्रान्तरं स्यात् ।। सीमसीमे—उभे । सीमनामनी । ‘द्वयच्कमसिसुसन्नन्तम्’ (३. ५. २४) इति विशेषविधिरबाधितः । ‘सीमभिः सस्यसंपन्नैः’ इति । ‘मर्यादावधि

राघाटः '। एतानि त्रीणि च ॥ घोषः—स्यात्। वल्लवपल्लीनाम[1]। पक्कणः शबरालयः। किरातालयः पक्कणः स्यात् ॥ २० ॥

इति [2]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते पुरवर्गः

[1] घोषः स्यात् A_1.　　[2] °नरसिंह° A_1.

---

३. शैलवर्गः

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

(वि.) महीध्र इति—महीं [1]धारयतीति महीध्रः। ' धृञ् धारणे[2] '। शिखराण्यस्य सन्तीति शिखरी। क्ष्मां बिभर्तीति क्ष्माभृत्। ' डुभृञ् [3]भरणपोषणयोः '। हर्तुमशक्यः अहार्यः। ' हृञ् हरणे '। धरति [4]भुवमिति धरः। ' धृञ् [5]धारणे '। पर्वाणि संधयोऽस्य सन्तीति पर्वतः। नराणामुपजीवनीयत्वाद्[6] अद्यत इत्यद्रिः। ' अद भक्षणे '। गां भुवं त्रायत इति गोत्रः। ' त्रैङ् [7]पालने '। कालेन गीर्यत इति गिरिः। ' गॄ निगरणे '। ग्रस्यते कालेनेति ग्रावा। ' ग्रसु[8] अदने '। न चलतीत्यचलः। ' चल कम्पने '। शिला अत्र सन्तीति शैलः। शिलानामुच्चयो राशिः शिलोच्चयः। पर्वतनामानि ॥ १ ॥

[1] कीलभूतो Pt_2; धरतीति W_2, Pt_2.　[2] धरणे Pt_2.　[3] धारण° F_2, W_2; ' भृञ् भरणे ' F_2.　[4] धरामिति K_6; धारयति F_2; W_2 adds धराधरश्च.　[5] धरणे K_6, Pt_2.　[6] उपजीव्यत्वात् K_6; जीव° F_1, K_2.　[7] ' त्रा रक्षणे ' K_6.　[8] ' ग्रसु ग्लसु अदने ' K_6, W_2.

(पा.) महीध्रे—शिलोच्चयाः। पर्वतनामानि। ' कुत्कीलो भूधरः [1]कुण्डः कुण्डिरः[2] सानुमानपि '। एतानि पञ्च च ॥ १ ॥

[1] कुड्डः A_1.　[2] कुड्ढरः A_1.

लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत् समौ ।
अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ॥ २ ॥

(वि.) लोकालोक इति—एकस्मिन् भागे लोक्यते, एकस्मिन् भागे न लोक्यत इति [1]लोकालोकः। 'लोकृ दर्शने'। चक्राकारेण वलते संवृणोतीति चक्रवालः। 'वल संवरणे'। [2]भुवमावेष्ट्य स्थितस्य[3] गिरेर्नामनी ।। त्रयः कूटाः शिखराण्यस्येति त्रिकूटः। अत एव त्रिककुत्[4]। त्रिकूटपर्वतनामनी ।। [5]सूर्यादिरस्यते अत्रेत्यस्तः। 'असु क्षेपणे'। अस्तमनुपलब्धिं ग्रहनक्षत्राणां करोतीति वा। चरमः पश्चिमः स चासौ क्ष्माभृच्च चरमक्ष्माभृत्। चरमगिरिनामनी ।। सूर्यादयोऽत्र [6]उदयन्त इत्युदयः। 'अय पय गतौ'। पूर्वश्चासौ पर्वतश्च पूर्वपर्वतः। [7]उदयगिरिनामनी ।। २ ।।

[1] अस्याभ्यन्तरं सूर्यकिरणैः प्रकाश्यते न बाह्यमिति प्रकाशाप्रकाशतया लोक्यते न लोक्यत इति J_2, K_3, Pt_2. [2] भुवनम् B_1. [3] स्थितगिरेः K_6, W_2. [4] तिस्रः (त्रयः Pt_2) ककुदो यस्य F_2. [5] सूर्यादीनस्यत्यत्र W_2; सूर्यादिर्नश्यत्यत्र K_6. [6] उदयन्ति K_6; उद्यन्ति ग्रहाः सूर्यादयोऽस्मात् B_1, K_5, Pt_2. [7] पूर्वपर्वतनाम B_1, K_5.

(पा.) लोकालोकश्चक्रवालः। लोकालोकपर्वतनाम ।। त्रिकूटः—समौ। त्रिकूट-पर्वतनामनी ।। अस्तः—क्ष्माभृत्। [1]अस्तपर्वतनाम। उदयः—पर्वतः। [2]पूर्वपर्वतनाम। अनुक्तम्—'मलयश्चन्दनाद्रिः स्यात्'। मलयपर्वतनाम ।। 'मन्थशैलस्तु मन्दरः'। मन्दरगिरिनाम। अस्तपर्वतमेव मन्दरपर्वत इति कतिचित् कथयन्ति। 'मन्दरोऽपरशैलो-ऽस्तः' इति धनपालनिघण्टुः ।। २ ।।

[1] चरम° B_3. [2] उदय° A_1.

हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः ।
गन्धमादनमन्ये च हेमकूटादयो नगाः ।। ३ ।।

(वि.) हिमवानिति—हिममस्यास्तीति हिमवान्। निषीदन्ति [1]सुरा अत्रेति निषधः। 'षद्लृ विशरणगत्यवसादनेषु'। अगस्त्येन विद्धत्वाद् विन्ध्यः। 'व्यध ताडने'। [2]सूर्यपथं विध्यतीति वा। स[3] एव धातुः। [4]माल्याकारतास्यास्तीति[5] माल्यवान्। परितो यात्रा गमनमस्यास्तीति पारियात्रकः। गन्धेन [6]मादयतीति गन्धमादनः। 'मदी हर्षग्लपनयोः'। [7]अस्त्रियाम्। हेममयाः कूटा अस्य हेमकूटः। अन्ये च हेमकूटादयो गिरयः सन्ति। एतेषामुक्तान्येव नामानि प्रशस्तानि ।। ३ ।।

[1] गन्धर्वादयः K_5, K_6, W_2. [2] °पदवीं F_2, Pt_2. [3] B_1, D_2 omit. [4] माल्याकारत्वात् K_6, W_2; माल्यः for माल्यवान् K_2. [5] अत्र for अस्य K_5. [6] मदयति J_2; K_2, W_2, Pt_2 add हर्षयति. [7] अयं पुंलिङ्गेऽपि F_2, Pt_2.

(पा.) हिमवान्—गन्धमादनम्। 'अस्त्री कुलाचले ना तु मत्तेभे गन्धमादनम्' इति भागुरिमतान्नपुंसकम्। अन्ये च—नगाः। [1]हिमवदादयः पृथक्[2] पर्वताः॥ ३॥

[1] हेमकूटादयः B_2.	[2] पृथक् पृथक् A_1.

पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्।
कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्तु तटो भृगुः॥ ४॥

(वि.) पाषाणेति—वस्तूनि पिनष्टि चूर्णयतीति पाषाणः। 'पिष्लृ संचूर्णने'। प्रस्तृणाति आच्छादयति [1]भुवमिति प्रस्तरः। 'स्तृञ् आच्छादने'। [2]आतपादिभिस्तप्तः सन् [3]जलं गिरतीति ग्रावा। नान्तः। 'गॄ निगरणे'। उपलाति भिनत्ति वस्तूनीति उपलः। 'ला [4]आदाने'। अश्नुते व्याप्नोति [5]भुवमित्यश्मा। 'अशू व्याप्तौ'। वस्त्रादिकमश्नातीति वा। 'अश भोजने'। शिनोति तनूकरोत्यायुधमिति[6] शिला। 'शिञ् निशातने'। दृन् वृक्षान् सादयतीति नाशयतीति दृषत्। 'षद्लृ विशरणगत्यवसादनेषु'। दृणातीति वा। 'दॄ विदारणे'। शिलादृषदौ स्त्रियौ। पाषाणनामानि॥ कूट्यते दह्यते [7]रविणेति कूटः। 'कूट दाहे'। अयमस्त्री। [8]शिखा अग्रशिलाऽत्रास्तीति शिखरम्। शृङ्गवदौन्नत्यगुणयोगात्[9] शृङ्गम्। शृणातीति[10] वा। 'शॄ हिंसायाम्'। शिखरनामानि[11]॥ अस्मात् प्रपततीति प्रपातः। 'पत्लृ गतौ'। तटत्युच्छ्रायं प्राप्नोतीति तटः। 'तट उच्छ्राये'। भृज्ज्यते सूर्याग्नितेजसा पच्यत इति भृगुः। 'भ्रस्ज पाके'। शिखरादधस्तटनामानि॥ प्रपातस्त्वतटो भृगुरिति पाठे [12]अतटः प्रपातः [13]संकटदेशो भृगुरित्युच्यते॥ ४॥

[1] महीम् K_5; भुवनम् D_2, F_1.	[2] आतपाभितप्तत्वात् J_2, K_2, W_2.	[3] पतितं सलिलं F_1, I.	[4] दानादानखण्डनेषु F_1, J_2.	[5] भुवनम् K_6.	[6] क्षुरादिकम् F_2.	[7] सूर्यकिरणेन F_2.	[8] शिखेव Pt_2.	[9] गुणात् B_1, F_1; गुणत्वात् J_2.	[10] F_2, Pt_2 add हिनस्ति.	[11] शृङ्गनामानि J_2.	[12] न विद्यते तटं यस्य अतटः B_1, K_5.	[13] स्वकटदेशः B_1, K_5.

(पा.) पाषाण—दृषत्। 'कषायः कूष्माण्डो महिषवृषभव्योषदृषदः' इत्यूष्मभेदपाठान्मूर्धन्यः। 'शरच्छरद्दृशत्त्रिंशच्चत्वारिंशश्च विंशतिः' इत्यरुणदत्तलिङ्गानुशासनपाठात् तालव्यमध्यः। तदा च दृशद् दृषदित्युभयथापि[1] पाठः साधुः। शिलानामानि॥ कूटोऽस्त्री—शृङ्गम्। गिरिशिखरनामानि॥ प्रपातस्तु—भृगुः। [2]संचारानर्हशिखराधस्तलनामानि। भाषया 'चरि'॥ ४॥

[1] उभयत्र A_1.	[2] आसारप्रसारानर्हकूटाधोदेशनामानि A_1.

कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियाम् ।
उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ॥ ५ ॥

(वि.) कटक इति—कटत्याकाशमावृणोतीति कटकः । 'कटे वर्षावरणयोः' । पर्वतस्य नितम्बप्रायत्वात् नितम्बः । अद्रिनितम्बनाम ॥ स्नौति जलमिति [1]स्नुः । 'ष्णु प्रस्रवणे' । [2]प्रतिष्ठन्तेऽस्मिन् समभूभागत्वात् प्रस्थः । 'ष्ठा गतिनिवृत्तौ' । सनोति [3]सुखं ददाति उपवेशन[4] इति सानुः । अस्त्रियाम् । 'षणु दाने' । फलकाकारावस्थित-महाशिलानामानि ॥ उनत्ति [5]जलसंपर्केणेत्युत्सः । 'उन्दी क्लेदने' । आपः प्रस्रवन्त्यस्मात् शिलासंध्यादाविति प्रस्रवणम् । 'स्रु गतौ' । पर्वतान्ताद् बहिर्निर्गताल्पस्यन्दितनीर-नामनी[6] ॥ वारिणः प्रवाहः वारिप्रवाहः । निर्झीर्यते [7]कालेन स्वल्पो[8] भवतीति निर्झरः । झरश्च[9] । 'झॄष् वयोहानौ' । प्रवाहवत्प्रस्रवणनामानि ॥ ५ ॥

[1] Pt$_2$ adds स्नातीति, 'ष्णा शौचे'. [2] प्रतिष्ठते स्थावरादिरत्रेति K$_6$. [3] अवकाशं F$_2$. [4] उपवेशेन I. [5] अम्भसा Pt$_2$. [6] पर्वतान्ताद् बहिर्निर्गतस्य जलस्य नाम B$_1$, K$_5$. [7] काले K$_2$. [8] स्वल्पीभवति K$_6$. [9] निर्झरा झरा इति वा पाठः K$_5$, K$_6$.

(पा.) कटको—अद्रेः । अद्रिनितम्बप्रदेशनाम । स्नुः—अस्त्रियाम् । स्नुर्वप्रः सानुरस्त्रियाम् इति पाठान्तरम् । [1]तदधोगतविशालफलकशिलानामानि[2] ।

'आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥'

इति कालिदासः (कु. सं. १. ५) । स्नुशब्दः प्रस्थवप्रशब्दसाहचर्यात् पुंलिङ्गः । वप्रशब्दः सानुशब्दसाहचर्यात् पुंनपुंसकः । 'स्नुः पुमानस्त्रियां वप्रः' इति जयकोशः । उत्सः प्रस्रवणम् । प्रस्यन्दननामनी । '[3]निल्लुगारूंट' । वारिप्रवाहो—झरः । 'झारी झरी झलश्चापि' । एतानि च । झरीत्युपचयविवक्षायां स्त्रीलिङ्गः । 'झरीदत्तपरीरम्भदरी-सुप्तसरीसृपम्' इति । [4]निपत्य प्रवहदुदकनामानि ॥ अनुक्तम्—'नदी चेद्योजनातिगा' । योजनमतिक्रान्ता झरी नदीत्युच्यते ॥ ५ ॥

[1] B$_3$ omits °गत°. [2] °तलनामानि B$_3$. [3] 'ऊंट' B$_3$. [4] B$_3$ omits निपत्य and adds गिरि°.

दरी तु कन्दरो वा स्त्री देवखातबिले गुहा ।
गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥
(दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः)

(वि.) दरीति—दीर्यते दरी। 'दॄ विदारणे'। कं कुत्सितं दृणातीति [1]कन्दरः। केन जलेन दीर्यत इति वा। [2]भित्तिवद्भासमानपर्वतपार्श्वनामनी ॥ देवैः खन्यत इति देवखातम्। 'खनु अवदारणे'। विल्यत इति विलम्। 'विल भेदने'। देवखातं च तद्बिलं च देवखातविलम्। तस्मिन् गुहागह्वरशब्दौ वर्तेते। [3]गूहत्यन्धकारमिति गुहा। 'गुहू संवरणे'। सिंहादिभिर्गाह्यत इति गह्वरम्[4]। 'गाहू विलोडने'। [5]पर्वतान्तराकृत्रिमविवरनामनी ॥ गण्डा इव शैला गण्डशैलाः। गण्डाः [6]स्थूलाः शैला वा। भूकम्पादिना गिरिच्युतस्थूलोपलनाम ॥ ६ ॥

[1] कन्दरा वा B_1, K_5. [2] कन्दर° B_1, K_5. [3] गुह्यते F_2. [4] गतिं ह्वरतीति, 'ह्वृ कौटिल्ये' Pt_2. [5] दरीगृहनामनी B_1, I, K_5; देवखातविलशब्दौ गुहापर्यायाविति केचित् I, K_5. [6] गुरवः F_1, K_6; गिरेः च्युताः स्थूलोपला गण्डाकाराश्च ते शैलाकाराश्च गण्डशैलाः F_2.

(पा.) दरी—वा स्त्री। गिरिनारद्रनामनी। भाषया [1]'पर्वतमुयोकशिशु'। देव—गह्वरम्। [2]गुहानामानि ॥ षडपि पर्यायाः[3] इति केचित्। 'दरी [4]गुहा कन्दरोऽस्त्री' इति वैजयन्ती (पृ. ४९, श्लो. ६)। गण्डशैलाः—गिरेः। गिरेः च्युताः पृथुलोपलाः[5] गण्डशैलाः स्युः। अनुक्तम्—'दन्तास्तून्नतपाषाणाः'। उच्चोपलनाम[6]। भाषया 'दकनिनिल्पुराल्लु' ॥ ६ ॥

[1] 'लोय' B_3. [2] सुरनिघातनामानि A_1. [3] एकार्थके A_1. [4] दरीगृह° B_3. [5] पृथूपलाः B_3. [6] °ला दन्ताः स्युः A_1.

खनिः स्त्रियामाकरः स्यात् पादाः प्रत्यन्तपर्वताः।
उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ ७ ॥
धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः।
निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥ ८ ॥

इति शैलवर्गः

(वि.) खनिरिति—खन्यते [1]रत्नादिकमत्रेति खनिः। 'खनु अवदारणे'। स्त्रियाम् ॥ आकीर्यन्ते [2]धातवोऽत्रेत्याकरः। 'कॄ विक्षेपे'। लोहादिधातुखननस्थाननामनी ॥ [3]पादा इव तिष्ठन्तीति पादाः। प्रत्यन्ते समीपे पर्वताः प्रत्यन्तपर्वताः। समीपस्थक्षुद्रपर्वत-

नामनी ।। उप समीपे भूरुपत्यका । अद्रेरासन्नभूमिनाम ।। अद्रेरधिभूः ऊर्ध्वभूरधित्यका । अद्रेरूर्ध्वभूनाम ।। धत्ते मिथो व्यावर्तकं धर्ममिति धातुः । 'डुधाञ् धारणपोषणयोः' । मनःशिलादिनाम ।। गिरौ[4] भवं गैरिकम् । [5] धातुविशेषनाम ।।

'सुवर्णरौप्यताम्राश्महरितालमनःशिलाः ।
[6]गैरिकाञ्जनकांस्यादिलोहसीसाः सहिङ्गुलाः ।
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसंभवाः ।।'

पक्षिणोऽत्र स्थित्वा निकूजन्तीति निकुञ्जः[7] । कुञ्जश्च । 'कूज अव्यक्ते शब्दे' । उभौ शब्दौ वा क्लीबे । गृहवद्वासमानलतापिहितप्रदेशनामनी ।। ७–८ ।।

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ शैलवर्गः

[1] सुवर्णादिकम् K_6, W_2. [2] लोहादयः F_2, Pt_2. [3] अद्रेः पादा इव अधस्ताद्धारणाच्च पद्यन्त इति पादाः, 'पद्लृ गतौ' F_2. [4] गिरेः K_6, W_2; गिरौ भवतीति B_1. [5] विशेषधातुर्गैरिकमित्युच्यते F_2. [6] °कासीस° F_2. [7] निम्नप्रदेशो निकुञ्जश्च F_2; कावजनि कुञ्जः, 'जनी प्रादुर्भावे' Pt_2; कुञ्जन्ति K_6.

(पा.) खनिः—आकरः स्यात् । रत्नाद्युत्पत्तिस्थाननामनी[1] । भाषया 'गनि' । खानिशब्दोऽप्यस्ति । 'आकरश्च खनिः खानिः' इति व्यालिः । अनुक्तम्—'रुमा[2] तु लवणाकरः' । लवणखनी रुमा स्यात् । पादाः प्रत्यन्तपर्वताः । [3]अधःस्थितस्वल्पपर्वताः पादाः स्युः । उपत्यका—भूमिः । गिरेरासन्ना भूमिरुपत्यका स्यात् । ऊर्ध्वमधित्यका । ऊर्ध्वभूमिरधित्यका स्यात् । धातुः—अद्रेः । [4]हरितालं मनःशिलादिशिलाविकाराः[5] सर्वेऽपि सामान्यतो धातव एव[6] । गैरिकं—विशेषतः । गैरिकं विशेषतो धातुरित्युच्यते । 'गैरिकं[7] स्वर्णरेतोऽस्थिषु विशेषतः' इति वैजयन्ती (पृ. ४१, श्लो. ११) । निकुञ्ज—पिहितोदरे । लतादिभिः पिहितोदरस्य [8]प्रदेशस्य नामनी । 'पादरिळ्ळु' ।। ७–८ ।।

इति [9]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते शैलवर्गः

[1] खनिः स्यात् A_1. [2] B_3 adds इति वैजयन्ती. [3] प्रान्त° B_3. [4] B_3 adds अद्रेः संबन्धि. [5] °अश्म° B_3. [6] इत्युच्यन्ते B_3. [7] 'गैरिकं पीतधातुः स्यात्' इति मुद्रितग्रन्थे. [8] A_1 adds पर्वत°. [9] °नरसिंह° A_1.

४. वनौषधिवर्गः

[1]अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी गृहारामास्तु निष्कुटाः ॥ १ ॥

(वि.) अटवीति—अटन्त्यस्यां [2]वनेचरा[3] इत्यटवी । '[4]अट गतौ' । इयर्ति भ्राम्यति दुर्गमार्गत्वादत्रेत्यरण्यम् । 'ऋ गतौ' । वेपन्तेऽत्र भयादिति विपिनम् । 'टु-वेपृ कम्पने' । गाह्यतेऽवगाह्यतेऽत्रेति गहनम् । 'गाहू विलोडने[5]' । अरण्यनामानि ॥ कन्यते गम्यते वानरादिभिरिति काननम् । 'कनी दीप्तिकान्तिगतिषु' । कं जलमननं प्राणनमस्येति वा । 'अन प्राणने' । फलवत्वाद् वन्यते सेव्यत इति वनम् । 'वन षण संभक्तौ' । बहुवृक्षलतादिप्रदेशमात्रनामनी ॥ एतानि षड् अरण्यस्यैव नामानीति केचित्[6] । महदरण्यं[7] महारण्यम् । अरण्यानी च । गृहे आरामा गृहारामाः । कुटाद् गृहान्निष्क्रान्तो निष्कुटः । गृहवननामनी ॥ १ ॥

[1] F_2, J_2 add इतःपरमटवीवर्ग आरम्यते.　[2] Pt_2 adds मृगयार्थं.　[3] मृगादयः F_2; अटन्तीत्यटाः पश्वादयः, वयः पक्षिणः अत्रेति F_2.　[4] 'अट पट गतौ' K_6, Pt_2.　[5] विगाहने D_2.　[6] W_2 omits rest of this Varga.　[7] K_6 adds अत्रास्तीति.

(पा.) चूलीस्थलीमिलद्बालकलानिधिकलाङ्कुरैः ।
　　विकासयञ्छिवः पायात् कवितांकुमुदाटवीम् ॥

अटवी—वनम् । [1]अटवीनामानि । '[2]वाटिका मलयं कक्ष्यम्' । एतानि च ॥ महारण्यमरण्यानी । महारण्यनामनी ॥ अनुक्तम्—'शुष्काटवी[3] तु कक्षः स्यात्' । शुष्ककाष्ठाटवीनाम[4] ॥ 'प्रस्तरस्तु तृणाटवी[5]' । तृणारण्यनामनी ॥ गृहारामस्तु निष्कुटः । [6]गृहकानननामनी ॥ १ ॥

[1] अटवि° A_1.　[2] काटिका A_1.　[3] °अटविस्तु A_1.　[4] °काष्ठाटवि° A_1.　[5] तृणाटविः A_1.　[6] गेह° A_1.

आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥

(वि.) आराम इति—'आ' समन्ताद् रमन्तेऽत्रेत्यारामः । 'रमु क्रीडायाम्' । [2]पुरस्य उप समीपे वनम् उपवनम् । पुरस्य बाह्योद्याननामनी ॥ वृक्षा वटन्ते वेष्टन्तेऽत्रेति

वृक्षवाटिका[3] । 'वट [4]वेष्टने परिभाषणे च' । पुष्पवाटिकेति वा पाठः । धनिनां वेश्यानां च [5]गृहोपवननाम ॥ २ ॥

[1] आरमन्ति Pt_2. [2] वनस्य B_1, J_2, K_6. [3] वटतीति वाटिका, वृक्षाणां वाटिका F_2, Pt_2. [4] परिवेष्टने K_6. [5] गृहवन° J_2, K_6.

(पा.) आरामः—वनमेव यत् । यत् कृत्रिमं वनं तदेवोपवनमारामश्च स्यात् । स्यादपवनम् इति पाठान्तरम् । 'कृत्रिमं वनमारामोऽपवनोपवने अपि' इति वैजयन्ती (पृ. ४५, श्लो. २) । वनमित्यपि भवति । 'नन्दनं वनमारामः' इति धनंजयः । अमात्य—वृक्षवाटिका । [1]अमात्यगणिकाग्रहणं [2]वैभवोपलक्षणार्थम् । 'किंराटगृहवृक्षवाटिकासु' इति वासवदत्ता । [3]पुष्पवाटिकेति पाठान्तरम् । '[4]पुष्पवाटी त्वमात्यादेः' इति वैजयन्ती (पृ. ४५, श्लो. ४) । पुर्पवाटिकेत्यत्र सस्य पाक्षिको रेफादेशः ॥ २ ॥

[1] अमात्यानां गणिकानां च A_1. [2] धनिको° B_3. [3] पुर्पवाटिका A_1, B_3. [4] पुर्पवाटी A_1, B_3; मुद्रितपुस्तके पुष्पवाटीत्येव.

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥

(वि.) पुमानिति—आक्रीडन्ते जना अत्रेत्याक्रीडः[1] । 'क्रीडृ [2]विहारे' । उद्यान्ति[3] उद्योगं [4]कुर्वतेऽत्रेति [5]उद्यानम् । 'या प्रापणे' । सर्वसाधारणराजवननामनी ॥ प्रमदानां वनं प्रमदवनम् । प्रमदावनमिति वा । [6]राजस्त्रीविनोदवननाम ॥ ३ ॥

[1] आक्रीड्यते राजादिभिः K_5. [2] विहरणे K_6. [3] उद्यतन्ते, 'यती प्रयत्ने' F_2, K_5. [4] कुर्वन्ति J_2. [5] उद्यानवननाम K_6. [6] राजस्त्रीणां विनोदार्थम् I, J_2.

(पा.) पुमानाक्रीडः—वनम् । राजसाधारणोपवननामनी[1] । स्यादेतदेव—पुरोचितम् । अन्तःपुरोचितमेतदेव वनं प्रमदवनं स्यात् । ह्रस्वतृतीयः । 'प्रमदावनोपकण्ठनलिनीषु लताभवनेषु भूभुजः' इति दीर्घतृतीयश्च भवति । '[2]चारकर्मणि निष्णातः प्रविष्टः प्रमदावनम्' इति ॥ ३ ॥

[1] B_3 omits उप. [2] विचार° A_1.

वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः ।
वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि ॥ ४ ॥

(वि.) वीथीति—वियन्ति गच्छन्त्यनयेति वीथी। 'वी गतिप्राप्तिप्रजनकान्त्यसनखादनेषु'। विथ्यतेऽत्रेति वा। 'विथृ याचने'। अलति भूषयति वनादिकमिति आलिः। 'अल [1]भूषणपर्याप्तिवारणेषु'। आवलते संवृणोतीति आवलिः। 'वल संवरणे संचरणे च'। पञ्च्यते वृक्षगणेनेति पङ्क्तिः। 'पचि व्यक्तीकरणे'। श्रीयते[2] स्वशोभयेति श्रेणिः। 'श्रिञ् सेवायाम्'। वृक्षादिवीथिनामानि॥ अक्षररेखावल्लिख्यन्त इति लेखाः। 'लिख अक्षरविन्यासे'। राजन्त इति राजयः। 'राजृ दीप्तौ'। अतिसंनिकृष्टवीथिनामनी॥ वनानां समूहो वन्या। वनसमूहनाम॥ अङ्क्यते बीजं भित्त्वा दृश्यत[3] इत्यङ्कुरः। 'अकि लक्षणे'। उद्भिद्यते[4] बीजमनेनेति उद्भित्। 'भिदिर् विदारणे'। प्रत्यग्रप्ररोहनाम॥ ४॥

[1] भूषणशक्ति° K_6. [2] श्रयते शोभामिति B_1, K_5. [3] लक्ष्यते F_2, Pt_2. [4] उद्भिनत्ति भुवं बीजं च F_2, Pt_2.

(पा.) वीथी—श्रेणिः। पङ्क्तिनामानि। 'धोरणिः पद्धतिः पालिः'। एतानि च। [1]सान्तरालवृक्षादीनां पङ्क्तेर्नामानि॥ लेखास्तु राजयः। [2]निरन्तरालतृणादीनां श्रेणिनामनी॥ वन्या—स्यात्। वनसमूहनाम॥ अङ्कुरोऽभिनवोद्भिदि। [3]नवोद्भिदङ्कुरः स्यात्। 'अङ्किलः प्ररोहोऽप्यत्रेति' [4]सुभूतिटीकावचनात् प्राकृतरूपस्यापि ग्रहणम्। 'अङ्कुरोऽङ्कूरमस्त्रियाम्' इति वैजयन्तीपाठात्तु[5] (पृ. ४५, श्लो. १०) [6]अङ्कूरोऽपि स्यात्। 'मोलक'॥ ४॥

[1] विरल° B_3. [2] निरन्तरतत्पङ्क्तिनामनी B_3. [3] अभिनव° B_3. [4] टीकाकार° A_1. [5] वचनात् B_3. [6] 'स्यादङ्कुरोऽङ्कूरमस्त्रियौ' इति मुद्रितग्रन्थे.

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः॥ ५॥

(वि.) वृक्ष इति—वृश्च्यते छिद्यते कुठारादिनेति वृक्षः। 'ओव्रश्चू छेदने'। [1]वृक्षत इति वा। 'वृक्ष वरणे'। वृणोतीति वा वृक्षः। 'वृञ् वरणे'। मह्यां रोहतीति महीरुहः। 'रुह बीजजन्मनि प्रादुर्भावे च'। शाखा अस्य सन्तीति [2]शाखी। विटपा अस्य सन्तीति विटपी। पादैर्मूलैरुदकं पिबतीति पादपः। 'पा पाने'। तरन्त्यातपमनेनेति तरुः। 'तॄ प्लवनतरणयोः'। अनसः शकटस्य अकं [3]गतिं हन्तीति अनोकहः। 'हन हिंसागत्योः'। कुटति शाखादिना वक्रीभवतीति कुटः। 'कुट कौटिल्ये'। शाल्यते पुष्पफलादिनेति शालः।

'शाल्ट श्लाघायाम्'। [4]साल इति पाठे सीयते भिद्यते[5] सालः[6]। 'षोऽन्तकर्मणि'। पलाशानि पर्णानि सन्त्यस्येति पलाशी। [7]दीर्यत इति द्रुः। [8]द्रुमश्च। 'दॄ विदारणे'। न गच्छतीत्यगमः। 'गम्लृ गतौ'। वृक्षसामान्यनामानि ॥ ५ ॥

[1] वृक्षतीति F₂. [2] शाखतीति वा, 'शाखृ व्याप्तौ' F₂. [3] गमनं J₂, Pt₂. [4] सल्यते गम्यते जनैरिति, 'षल गतौ' F₂, Pt₂. [5] छिद्यते D₂, J₂, K₅. [6] अयमपि पाठः B₁, F₁, I. [7] द्रूयते द्रुः, 'द्रु गतौ' Pt₂. [8] द्रुः वृक्षावयवोऽस्य Pt₂.

(पा.) वृक्षो—अगमाः। तरुनामानि। 'कुजो रूक्षोऽगच्छश्च[1]'। एतान्यपि च ॥ ५ ॥

[1] अगच्छंश्च A₁; नगच्छंश्च B₃.

वानस्पत्यः फलैः पुष्पात् तैरपुष्पाद् वनस्पतिः ।
ओषध्यः फलपाकान्ताः स्युरवन्ध्यः फलेग्रहिः ॥ ६ ॥

(वि.) वानस्पत्य इति—वनस्य पतिः वनस्पतिः। पुष्पैर्विना [1]फलवद्वृक्षनाम॥ वनस्पतौ भवः वानस्पत्यः। पुष्पवत्फलजनकवृक्षनाम ॥ वनस्पतिरुदुम्बरादिः। वानस्पत्यः चूतादिः॥ ओषं दाहं [2]धयन्तीत्योषध्यः। 'धेट् पाने'। ओषो दाहो धीयतेऽत्रेति वा। 'डुधाञ् धारणपोषणयोः'। फलपाक एवान्तो यासां ताः फलपाकान्ताः। फलमुत्पाद्य पाकानन्तरं [3]विनश्वरप्ररोहनाम[4]॥ व्रीह्यादिरोषधिः। न वन्ध्योऽवन्ध्यः। फलानि गृह्णातीति[5] फलेग्रहिः। 'ग्रह उपादाने'। अनिष्फलवृक्षादिनाम ॥ ६ ॥

[1] फलजनक° F₂, J₂. [2] D₂, K₅ add पिबति नाशयति. [3] विनाश° K₅. [4] F₂, J₂, K₂, K₃ add °मात्र°. [5] F₂ adds धारयति.

(पा.) वानस्पत्यः—पुष्पात्। [1]पुष्पफलितमाकन्दादिर्वानस्पत्यः स्यात्। तैः—वनस्पतिः। अपुष्पफलितपनसादिर्वनस्पतिः स्यात्। वृक्षमात्रमपि वनस्पतिर्भवति। '[2]सालो वनस्पतिरगो विटपी कुटश्च[2]' इति हलायुधः (अ. मा. २. २२)। ओषध्यः—पाकान्ताः। फलपाकनाशिन्यः कदल्यादय ओषध्यः स्युः। अत्र बहुवचनमतन्त्रम्। 'ओषधिः फलपाकान्ता' इति वैजयन्ती (पृ. ४५, श्लो. ६)। स्यात्—फलेग्रहिः। अवन्ध्यतरुनामनी ॥ स्युरवन्ध्यादयस्त्रिषु (श्लो. ८) इत्यनेन त्रिलिङ्गाः। अवन्ध्यो वृक्षः। अवन्ध्या लता ॥ ६ ॥

[1] पुष्पित° A₁. [2] शालो इति कुठ इति च मुद्रितग्रन्थे.

वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली ।
प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥
फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ।

(वि.) वन्ध्य इति—स्वगतवैगुण्येन [1]फलानि [2]बध्नातीति वन्ध्यः । 'बन्ध [3]बन्धने' । न [4]सन्ति फलान्यस्य अफलः । अवकं शून्यमीष्टे पालयतीत्यवकेशी । 'ईश ऐश्वर्ये' । निष्फलवृक्षनामानि ॥ फलानि सन्तीति फलवान् । फलिनश्च । फली च । फलाढ्यवृक्षादिनामानि ॥ प्रफुल्लति उत्फुल्लति संफुल्लतीति प्रफुल्लः उत्फुल्लः संफुल्लश्च । 'फुल्ल विकसने' । प्रफलतीति वा प्रफुल्लः । 'ञिफला विशरणे' । विगत आकोचः संकोचो यस्य सः व्याकोचः । 'कुच संकोचने' । व्याकोश इति पाठे व्यावृत्तः कोशः संकोचोऽस्मादिति व्याकोशः । विगतः कचो मुकुलावस्था[5] अस्य विकचः । '[6]कचि दीप्तिबन्धनयोः' । स्फुटति विकसतीति स्फुटः । 'स्फुट विकसने'[7] । विकसितवृक्षादिनामानि ॥ अवन्ध्यादयः फुल्लान्ताः शब्दास्त्रिषु लिङ्गेषु वर्तन्ते ॥ ७ ॥

[1] फलनिष्पत्ति K_8.　[2] प्रतिबध्नाति F_1, J_2, K_2, K_3.　[3] 'बधि संयमने' K_6; F_1, I add बवयोरभेदः.　[4] न विद्यन्ते F_2, K_5.　[5] बन्धनं F_2.　[6] 'कच बन्धने' Pt_2.　[7] F_2, Pt_2 add फुल्लतीति फुल्लः, 'फुल्ल विकसने'.

(पा.) वन्ध्यो—अवकेशी च । वन्ध्यतरुनामानि ॥ फलवान्—फली । फलित-तरुनामानि ॥ प्रफुल्लो—विकसिते । [1]पुष्पितपादपादिनामानि ॥ '[2]दलितोन्मिषितोन्निद्राः प्रफुल्लश्च विजृम्भितः' । एतानि च ॥ स्युः—त्रिषु । एते त्रिलिङ्गाः ॥ ७ ॥

[1] विकसित° B_3.　[2] 'उत्फुल्लोन्मिषितोन्निद्रा उद्बुद्धोन्मीलितस्मिताः' इति मुद्रित-वैजयन्त्याम्.

स्थाणुर्वा ना ध्रुवः शङ्कुर्ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥
अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता ।
लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ॥ ९ ॥

(वि.) स्थाणुरिति—वायुना [1]विहतोऽपि तिष्ठतीति [2]स्थाणुः । 'ष्ठा गतिनिवृत्तौ' । चलनाभावाद् ध्रुवतीति ध्रुवः । 'ध्रुव[3] गतिस्थैर्ययोः' । शङ्कतेऽस्मात्[4] तस्करादिकमिति शङ्कुः । 'शकि शङ्कायाम्' । सर्वशाखाव्यपेतवृक्षमूलनामानि ॥ ह्रस्वाः शाखाः शिफाः

यस्य सः क्षुप इत्युच्यते। [5]दवाग्निना दह्यमानः क्षौतीति क्षुपः। 'टुक्षु शब्दे'। अल्पशाखावृक्षनाम ॥ न प्रकाण्डोऽस्य अप्रकाण्डः। स्कन्धेन विनापि तिष्ठतीति स्तम्बः। 'ष्ठा गतिनिवृत्तौ'। गुडति चोरादिभीतान्[6] गुल्मः। 'गुड रक्षायाम्'। स्कन्धरहितवृक्षनामनी ॥ वलते वेष्टते यष्ट्यादिकमिति वल्ली। 'वल [7]संवरणे'। प्रकृष्टा ततिर्विस्तारोऽत्र[8] व्रततिः। 'तनु विस्तारे'। प्रतनोतीति वा। पकारस्य वकारप्राप्तिः। लाति वेष्टनाय यष्ट्यादिकमिति लता। 'ला आदाने'। लतानामानि ॥ प्रतानोऽस्त्यस्याः प्रतानिनी लता वीरुत्। [9]विरोहतीति वीरुत्। 'रुह बीजजन्मनि प्रादुर्भावे च'। विरुणद्धीति वा। 'रुधिर् आवरणे'। [10]गुल्मो लतासमूहोऽस्या अस्तीति गुल्मिनी। उलत्यावृणोतीत्युलपः। 'उल आवरणे'। उभ्यते गुल्मादिना मिश्रीभवतीति वा उलपः। 'उभ पूरणे'। [11]मिथोऽत्यन्तसंश्लेषलतासमूहनामानि ॥ ८–९ ॥

[1] निहतः B_1, K_5. [2] स्थाणुशब्दो विकल्पेन पुंलिङ्गः K_5; नपुंसकलिङ्गः B_1. [3] 'ध्रुव स्थैर्ये' F_2, K_3, K_5, K_6. [4] F_2, Pt_2 add पुरुषधिया. [5] दावाग्निना F_2, Pt_2. [6] °भीतेः K_6. [7] संवेष्टने K_3. [8] अस्याः F_2, J_2. [9] विविधं रोहति F_2, Pt_2. [10] B_1 omits 10 lines. [11] अत्यन्तसंश्लिष्ट° D_2, F_1.

(पा.) स्थाणुरस्त्री—शङ्कुः। भग्नसर्वशाखवृक्षनामानि[1]। '[2]मोटचट्टु'। ह्रस्व—क्षुपः। [3]वामनशाखाजटस्तरुः क्षुपः स्यात्। इतः परं प्रसिद्धेनाप्रसिद्धं विबोधनीयमिति न्यायमनुसृत्य प्राय आन्ध्रभाषया नामानि व्याहरामः। 'कुरुचकोम्मलु उडलुगलचेट्टु क्षुपमु'। छुप इत्यप्यस्ति। 'छुपः क्षुपः स्पर्शनयोः' इति विश्वप्रकाशिका (पृ. १०३, श्लो. ३)। अप्रकाण्डे—गुल्मौ। [4]प्रकाण्डविरहितवृक्षादेर्नामनी। 'गोरिंट्टमोदयनवि'। वल्ली—लता। लतानामानि ॥ लता—इत्यपि। [5]परस्परसंश्लिष्टद्राक्षादेर्नामानि। लताग्रहणात् [6]परस्परसंश्लिष्टकेतक्यादेर्नामानि न भवन्ति ॥ ८–९ ॥

[1] °द्रुम° B_3. [2] 'मोरडु' B_3. [3] वामनानां शाखानां A_1. [4] A_1 adds °नखरञ्जक°. [5] A_1 adds °अत्यन्त°. [6] तादृश° B_3.

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः।
अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥१०॥

(वि.) नगाद्यारोह इति—[1]उत् श्रयणमुच्छ्रायः। उच्छ्रयश्च। 'श्रिञ् सेवायाम्'। उत्सेधयतीति उत्सेधः। 'षिध गत्याम्'। वृक्षाद्युन्नतत्वनामानि ॥ प्रकाम्यते फलरक्षणा-[2]दिभिरिति प्रकाण्डः। 'कमु कान्तौ'। स्कन्द्यतेऽधिरुह्यत[3] इति स्कन्धः। 'स्कन्दिर् गतिशोषणयोः'। मूलादारभ्य शाखान्तस्य तरोर्मध्यदेशनामनी ॥ १० ॥

[1] नगस्य वृक्षस्य, आरुह्यत इत्यारोहः F_2; उत् श्रयतीति K_6.　[2] °रक्षणार्थिभिः F_2, K_6.　[3] कथंचिदारुह्यते K_5, K_6.

(पा.) नगाद्यारोहः—उच्छ्रयश्च सः। वृक्षादीनामूर्ध्वमाननामानि। अस्त्री प्रकाण्डः—तरोः[1]। मूलप्रभृति शाखावधेर्वृक्षभागनामनी। तत्र मूलभागः प्रकाण्डः। शाखाभागः स्कन्धः। 'स्कन्धादधः प्रकाण्डः स्यात् प्रघाणः स्कन्ध उच्यते' इति हलायुधः (अ. मा. २. २७)॥ १०॥

[1] °अवधेः for अवधिः A_1.

समे शाखालते स्कन्धशाखाशाले शिफाजटे।
शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता॥ ११॥

(वि.) समे इति—शाखति दिशो व्याप्नोतीति शाखा। 'शाखृ व्याप्तौ'। [1]लतति दिशो व्याप्नोतीति लता। 'लति व्याप्तौ'। वृक्षशाखानामनी॥ स्कन्धस्य शाखा स्कन्धशाखा। स्कन्धात् निर्गता शाखेति वा। शालते शाला। 'शाडृ श्लाघायाम्'। स्कन्धशाखानामनी॥ शिनोति तनूकरोति वृक्षमूलमिति शिफा। 'शिञ् निशातने'। जटति [2]संघीभवतीति जटा। 'जट संघाते'। वृक्षमूलनामनी॥ अवरोहति लम्बत इत्यवरोहः। 'रुह बीजजन्मनि प्रादुर्भावे च'। वृक्षशाखाग्रलम्बिजटाया[3] वृक्षमूलादूर्ध्व-[4]संगतायाश्च शाखाया नाम॥ ११॥

[1] लाति वेष्टनार्थं यष्टयादिकमिति F_2, Pt_2.　[2] समूहीभवति J_2, Pt_2.　[3] अवलम्बि° I, J_2, K_3, K_5.　[4] मूलादग्रं गता शाखा लता Pt_2.

(पा.) समे—लते। शाखामात्रनामनी॥ स्कन्ध—शाले। प्रधानशाखानामनी। 'पेनुगोम्र'॥ शिफाजटे। पतन्त्याः शाखाया नामनी। 'पड्डुगोम्म[1]'। शाखा—स्यात्। [2]शाखातोऽधःप्रसृताया जटाया नाम॥ मूलात्—लता। मूलादारभ्याग्रं गता वल्ल्यप्यवरोहः स्यात्॥ ११॥

[1] 'पड्डुकोम्म' B_3.　[2] शाखायाः पातोऽवरोहः स्यात् A_1.

शिरोऽग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः।
सारो मज्जा नरि त्वक् स्त्री वल्कं वल्कलमस्त्रियाम्॥१२॥

(वि.) शिरोऽग्रमिति—श्रीयते स्वाङ्गं शिरः। 'श्रिञ् सेवायाम्'। अगतीत्यग्रम्। 'अग कुटिलायां गतौ'। शिखा अग्रशाखा अस्यास्तीति शिखरम्। वृक्षशिरोनामानि॥ मूल्यतेऽनेनेति [1]मूलम्। 'मूल [2]प्रतिष्ठायाम्'। बध्यन्ते स्थिरीक्रियन्ते उद्भिदादयोऽनेनेति बुध्नः। 'बन्ध बन्धने'। अङ्घ्रेर्नाम पादपर्यायो यस्य अङ्घ्रिनामकः। वृक्षादेरङ्घ्रिसंज्ञिकभागनामानि॥ [3]कालान्तरेऽपि सरतीति सारः। 'सृ गतौ'। मज्जति दारुणोऽन्तरिति मज्जा। '[4]टुमस्जो शुद्धौ'। [5]नकारान्तः। वृक्षान्तःसारनामनी। [6]त्वच्यन्ते आव्रियन्तेऽनयेति त्वक्। 'त्वच संवरणे'। [7]वलते संवृणोतीति वल्कम्। वल्कलं च। 'वल संवरणे'। वृक्षत्वचो नामानि॥ १२॥

[1] मूलतीति F_2, Pt_2. [2] 'मूल रोहणे' F_1, K_6. [3] कालान्तरमपि F_2.
[4] 'मज्ज निमज्जने' K_6. [5] आकारान्तः स्त्रीलिङ्गोऽपि F_2. [6] त्वचति आवृणोति Pt_2.
[7] वल्यते K_5.

(पा.) शिरोऽग्रं—वा ना। अग्रनामनी। 'कोन'। मूलं—नामकः। मूलनामानि। 'वेरु'। नामशब्दः पादादिपर्यायग्रहणार्थः॥ सारो—नरि। स्थिरांशनामनी। 'चाव'। मज्जा नान्तः॥ त्वक्—अस्त्रियाम्। तर्वादित्वङ्नामनी॥ अस्त्रीशब्दो वल्कलमात्रविशेषणम्। '[1]वल्कलश्चोलकोऽस्त्रियाम्' इति वैजयन्ती (पृ. ४६, श्लो. १३)॥ १२॥

[1] 'वल्कलं चोलकोऽस्त्रियौ' इति मुद्रितपुस्तके.

काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्।
निष्कुहः कोटरं वा ना वल्लरी मञ्जरी स्त्रियौ॥ १३॥

(वि.) काष्ठमिति—काशते [1]दैर्घ्येणेति काष्ठम्[2]। 'काशृ दीप्तौ'। दीर्यते कुठारादिनेति दारु। 'दॄ विदारणे'। [3]भिन्नशाखानामनी॥ इध्यतेऽग्निरनेनेति इन्धनम्। इध्मं च। 'ञिइन्धी दीप्तौ'। एधतेऽग्निरनेनेति एधः। सान्तः[4]। अजन्तश्च, पुमानयम्। 'एध वृद्धौ'। समिध्यतेऽग्निरनयेति समित्। स्त्रियाम्। 'ञिइन्धी दीप्तौ'। अग्निसमिन्धनार्थकाष्ठनामानि॥ निष्कुहयते [5]विस्मापयत्यत्यन्तविस्तृतत्वादिति निष्कुहः। 'कुह विस्मापने'। कुटिलसुषिरत्वात् कुटतीति कोटरम्। 'कुट कौटिल्ये'। निष्कुटमिति वा पाठः। वृक्षगतविवरनामनी॥ वल्लते संवृणोति शाखामिति वल्लरी वल्लरिर्वा[6]। मन्यते कोकिलादिभिर्बहुमन्यत इति मञ्जरी। मञ्जरिर्वा। 'मनु अवबोधने'। सकुड्मलनवा-[7]विर्भूतवृक्षशाखानामनी॥ १३॥

[1] अग्निना समं F₂, Pt₂.　　[2] कासते कुत्सयते स्वविकलं स्थाणुमिति वा, 'कासृ कुत्सायाम्' D₂, J₂.　　[3] छिन्न° F₂.　　[4] नपुंसकलिङ्गः, एधोऽयमकारान्तः पुंलिङ्गः B₁, F₁, K₅.　　[5] अतिविस्तृत° B₁, K₃.　　[6] F₂ adds 'वल वल्ल संवरणे'. [7] प्रवालभूत° B₁, K₅.

(पा.) काष्ठं दारु। शुष्कवृक्षनामनी। 'पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः'[1] इति त्रिकाण्डशेषः (पृ. ३७, श्लो. १०३६)॥ इन्धनं—स्त्रियाम्। एध इति सान्तप्रथमा। द्वितीय एधोऽदन्तः। समिदिति धान्तः स्त्रियाम्। उदाहरणानि—'अनलायागरुचन्दनैधसे' (रघु० ८. ७१)। 'एधान् हुताशनवतः स मुनिर्ययाचे' (रघु० ९. ८१)। द्वे समिधावाधयेति। 'वंटचरुकु'। 'आलाउयं सर्पणं शुष्कम्'। एतानि च। [2]गरहादयो विशेषवचनाः। 'काष्ठेन्धनं तु [3]गरहं गोकरीषेन्धनं बुला' इति वैजयन्ती (पृ. ९१, श्लो. ९७)। निष्कुहः—वा ना। तरुसुषिरनामनी। 'तोरू'। निष्कुट इति क्वचित् पाठः। निष्कुष इति क्वचित्। निष्कूट इत्यपि। 'तरुनिष्कूटगतश्चकार चिन्ताम्' इति बालभारते। वल्लरी—स्त्रियौ। सकिसलयनवतरुशाखानामनी। 'चिगुरुकोम्म'॥ मञ्जाशब्दोऽपि। 'वल्लरिर्मञ्जरिर्मञ्जा'[4] इति वैजयन्ती (पृ. ४६, श्लो. २०)॥ १३॥

[1] सीधव इति मुद्रितग्रन्थे; शीधवः पादटिप्पण्यां च.　　[2] गहरादयः B₃　　[3] गहरं B₃. [4] 'मञ्ज्यां मञ्जरिवल्लरी' इति मुद्रितपुस्तके.

पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्।
पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम्॥ १४॥

(वि.) पत्रमिति—पतति [1]वृक्षसकाशादिति पत्रम्। 'पत्लृ गतौ'। पल्यते भिद्यत[2] इति पलाशम्। 'पल छेदने'। पलाश्यते ग्रस्यत इति वा। परपूर्वः 'अश भोजन' इति धातुः। रलयोरभेदः। [3]छाद्यते वृक्षोऽनेनेति छदनम्। छदश्च। 'छद अपवारणे'। दलति शीर्यत इति दलम्। 'दल विशरणे'। पिपर्ति वृक्षं पूरयतीति पर्णम्। 'पॄ पालनपूरणयोः'। वृक्षपर्णनामानि॥ पलति वायुवशाच्चलतीति पल्लवः। 'पल गतौ'। अयमस्त्रियाम्। किंचित् सलतीति किसलयम्। 'षल गतौ'। नवत्वेनारुणत्वमापन्नदलनामनी॥ विस्तीर्यते तरुरनेनेति विस्तारः। 'स्तृञ् आच्छादने'। विटान् गृहच्युतान् पातीति [4]विटपः। 'पा रक्षणे'। विटति आक्रोशयति वा। 'विट [5]आक्रोशे'। वृक्षविस्तारनामनी॥ १४॥

[1] वृक्षात् F₂, Pt₂.　　[2] छिद्यते B₁; अपलश्यते छिद्यत इति वा, 'लश छेदने' F₂. [3] छद्यते J₂, K₆.　　[4] वटति वेष्टयति वा, 'वट वेष्टने' F₂, Pt₂.　　[5] 'विट शब्दे' J₂; आक्रोशने B₁.

(पा.) पत्रं—छदः पुमान्। पत्रनामानि। 'आकुलु'। पल्लवो—किसलयम्। पल्लवनामनी। 'चिगुरु'॥ किसलशब्दोऽपि। 'किसलं स्यात् किसलयं पुंसि क्लीबे च पल्लवम्' इति [1]व्याडिः। विस्तारो—अस्त्रियाम्। पल्लवितशाखानामनी॥ १४॥

[1] व्यालिः B_3.

वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम्।
आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु॥ १५॥

(वि.) वृक्षादीनामिति—फलतीति फलम्। 'फल निष्पत्तौ'। सस्ति वृक्षमधिशेते सस्यम्। 'षस स्वप्ने'। वृक्षलतादिफलनामनी॥ [1]वृणोति स्वीकरोति पुष्पमिति वृन्तम्। 'वृञ्[2] वरणे'। प्रसूयत इति प्रसवः। 'षु प्रसवैश्वर्ययोः'। बध्यतेऽनेनेति बन्धनम्। 'बन्ध बन्धने'। प्रसवाः पुष्पफलपत्राणि तेषां बन्धनम्। पुष्पादीनां लतादिसंबन्धघटकनालादियुक्तस्य नाम॥ शलति पुष्टिमापद्यत इति शलाटुः[3]। 'शल [4]गतौ'। अपक्वफलनाम॥ वायति शुष्यतीति वानम्। 'पै ओवै शोषणे'। शुष्कफलनाम॥ उभे त्रिषु। उभे शलाटुवानननामनी त्रिषु लिङ्गेषु वर्तेते॥ १५॥

[1] वृणीते Pt_2. [2] 'वृङ् संभक्तौ' K_3, Pt_2. [3] शलति पुष्टिमापद्यते शलः। शलश्चासौ अटुश्च शलाटुः F_2, Pt_2. [4] 'शल चलनसंवरणयोः' Pt_2.

(पा.) वृक्षादीनां—सस्यम्। वृक्षादिफलनाम। 'ग्राम्यकविकथाबन्ध इव नीरसस्य-मनोहरो देशः' इति नलदमयन्तीश्लेषाद् द्विदन्त्यः। वृन्तं—बन्धनम्। पुष्पफलबन्धनं वृन्तं स्यात्। 'तोडिमे'। प्रसवबन्धनमिति करिकलभवत्प्रयोगः। 'प्रसवः पिप्पलं सस्यं फलं वृन्तं तु बन्धनम्' इति वैजयन्ती (पृ. ४६, श्लो. २०)। आमे—स्यात्। अपक्वफलनाम। 'काय'।

'शार्दूलशम्बलपलाशशलाटुशाटी-
शुण्ठीशटीशरदशोकशुभप्रकाशाः।'

इत्यूष्मभेदपाठात् तालव्यादिः। शुष्के वानम्। शुष्कफलनाम। उभे त्रिषु। शलाटुवानशब्दौ द्वौ त्रिलिङ्गौ। शलाटवो माषाः, वानाश्चणकाः॥ १५॥

क्षारको जालकं क्लीबे कलिका कोरकः पुमान्।
स्याद् गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियाम्॥१६॥

(वि.) क्षारक इति—क्षरति प्रसूत इति क्षारकः। 'क्षर संचलने'। [1]समूहावस्थावत्त्वात् जलतीति जालकम्। 'जल घातने'। नवकलिकावृन्दस्य नामनी॥ कल्यते प्रसूनमिति शब्द्यते कलिका। 'कल शब्दसंख्यानयोः'। कुर्यते शब्द्यते कोरकः। 'कुर शब्दे'। अत्यन्ताविकसितपुष्पनामनी॥ अत्र कोरकशब्दोऽस्त्री[2]। [3]गूयते साधुरिति गुच्छकः। 'गुङ् शब्दे'। स्तूयत इति स्तवकः। 'ष्टुञ् स्तुतौ'। विकसितपुष्पसंघातस्य नामनी[4]॥ कुटति कुटिलभावमीषद्व्रजति [5]कुट्मलः। 'कुट कौटिल्ये'। मुञ्चति कलिकावस्थामिति मुकुलः। 'मुच्ऌ मोक्षणे'। [6]अयमस्त्रियाम्। ईषद्विकसितकलिकानामनी॥ १६॥

[1] समूहवत्त्वात् K_6; समूहावस्थासत्त्वात् B_1.　[2] पुंसि F_2.　[3] गुर्यते, 'गुरी शब्दे' F_2, K_6.　[4] F_2 adds:

'एकप्ररोहे पुष्पाणि पृथग् यत्र बहूनि च।
पुष्पगुच्छस्य विजयो यथा स्यात् करवीरके॥'

[5] कुड्मलः K_2.　[6] K_2 adds मुकुलः.

(पा.) क्षारको—पुमान्। अत्यन्ताविकसितकुसुमनामानि। 'मुग्ग'। रूपभेदसिद्धलिङ्गे विशेषविधिरनित्यज्ञापकः। तेन—

'मरुदवनिरुहां रजो वधूभ्यः
समुपहरन् विचकार कोरकाणि।' (शिशु. ७. २६)

स्यात्—स्तवकः। पुष्पगुच्छनामनी। 'पुव्वलगुत्ति'। गुच्छक इति चकार-छकारसंयोगी। 'गुच्छो गुलुच्छः स्तवकः' इति वैजयन्ती (पृ. ४६, श्लो. २०)। 'स्तवको गुच्छको गुच्छः' इति हलायुधः (अ. मा. २. ३३)। सुभूतिटीकायां 'गुपस्सकि (?) गुत्स' इति तकारसकारसंयोगयुक्तः। 'गुत्सो गुञ्चो गुलुच्छकः। [1]गुलुञ्छश्चार्धवासिते' इति शेषे। अर्धवासित इत्युत्तरान्वयि॥ कुड्मलो—अस्त्रियाम्। अर्धविकसितकोरकनामनी। 'अरविरिमोग्ग'। केषांचित् कुड्मलकोरकावेकार्थौ। 'कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानि' इति हलायुधः (अ. मा. २. ३१)॥ १६॥

[1] 'गुलुंछः परिकीर्तितः' इति हलायुधः।

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।
मकरन्दः पुष्परसः परागः सुमनोरजः॥ १७॥

(वि.) स्त्रिय इति—सुष्ठु मन्यते जनैरिति सुमनाः। सान्तः स्त्रियाम्। 'मनु[1] अवबोधने'। पुष्प्यतीति पुष्पम्। 'पुष्प विकसने'। प्रसूयत[2] इति प्रसूनम्। 'षूङ् प्राणिप्रसवे'। कुस्यति [3]भ्रमरादिना संश्लिष्यतीति कुसुमम्। 'कुस [4]संश्लेषणे'। [5]सुनोतीति सुमम्। 'षु प्रसवैश्वर्ययोः'। सममिति वा पाठः। पुष्पनामानि॥ मङ्क्यते मण्ड्यते पुष्पमनेनेति मकरन्दः। 'मकि मण्डने'। पुष्पाणां रसः पुष्परसः। पुष्परसनामनी॥ परागच्छति [6]वायुनेति परागः। सुमनसां रजः सुमनोरजः। पुष्परजोनामनी॥ १७॥

[1] 'मन ज्ञाने' F_2. [2] प्रसूते K_2. [3] भ्रमरादिरिति K_5. [4] श्लेषणे B_1, F_1, K_2, K_5. [5] सवति J_2. [6] वायुवेगेन F_1, J_2, K_2; वायुवशेन K_5.

(पा.) स्त्रियः—सुमम्। पुष्पनामानि। सुमनःशब्द एकवचनान्तोऽपि। 'पुष्पं सुमनाः कुसुमम्' इति नाममाला। पुष्पशब्दः पुंलिङ्गोऽपि। 'पुष्पोऽस्त्री कुसुमं सुमम्' इति वैजयन्ती (पृ. ४६, श्लो. १८)। प्रयोगश्च—

'आरामसीमनि यथा वियति प्रसन्ने
तारास्तथैव विलसन्ति कदम्बपुष्पाः।'

इति। 'प्रसूतमुद्गमं फुल्लं लतान्तं तरुजं तथा'। एतानि च॥ मकरन्दः पुष्परसः। पुष्परसनाम। 'मरन्दो मकरन्दोऽस्य [1]रसः' इति वैजयन्ती (पृ. ४६, श्लो. १९)। आसवमधूलिकादिपदान्यपि प्रपञ्चयन्ति—

'भ्रान्तः पलाशकुसुमासवसौरभज्ञः
प्राप्तोऽद्य मामिति वृथा न विधेहि गर्वम्।
जातेर्वियोगविधुरस्फुटदावबुद्ध्या
भृङ्गस्त्वदीयकुसुमानि परं विवेश॥'
'अहो मे सौभाग्यं मम च भवभूतेश्च [2]फणितं
तुलायामारोप्य प्रतिफलति तस्यां लघिमनि।
गिरां देवी सद्यः श्रुतिकलितकल्हारकलिका-
मधूलीमाधुर्यं क्षिपति परिपूर्त्यै स्मितमुखी[3]॥'

इत्यादि॥ परागः सुमनोरजः। पुष्पधूलिनामनी। अनुक्तम्—'निर्यासः स्यात् द्रुमरसः खपुरो वेष्टको लशः'। तरुरसनामानि। 'बङ्क'॥ १७॥

[1] रसे इति मुद्रितग्रन्थे. [2] भणितं, घटायाम् इति च मुद्रितग्रन्थे. [3] भगवती (भो. प्र. पृ. ५६, श्लो. २५३).

द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ।
आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ १८ ॥
बार्हतं च फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।

(वि.) द्विहीनमिति—सर्वं वक्ष्यमाणं प्रसवे मूलपुष्पफलादौ वर्तमानं वृक्षलतौषधिजातं द्विहीनं स्त्रीपुंलिङ्गहीनं भवति । नपुंसकमेवेत्यर्थः[1] । लुप्ततद्धितान्तं[2] च भवति । चम्पकस्य पुष्पं चम्पकम् । आम्रस्य फलम् आम्रम् । [3]द्विहीनस्यापवादमाह—हरीतक्यादयः स्त्रियामिति । हरीतकीकोशातकीकेतकीधात्र्यादयः फले प्रसवे वर्तमानाः प्रकृतिः[4] हरीतकीशब्दवत् स्त्रियां वर्तन्ते । कथम् ? हरीतक्याः फलं हरीतकी । एवं[5] कोशातकीत्यादि । लुप्ततद्धितान्तस्यापवादमाह—आश्वत्थेत्यादि । एते शब्दाः फले[6] प्रसवे वर्तमाना अलुप्ततद्धितान्ता भवन्ति । न तु चूतादिशब्दवत् । अश्वत्थस्य फलम् आश्वत्थम् । वेणोरिदं वैणवम् । प्लक्षस्य फलं प्लाक्षम् । न्यग्रोधस्य फलं नैयग्रोधम् । इङ्गुद्याः[7] फलम् ऐङ्गुदम् । बृहत्याः फलं बार्हतम् । जम्बूशब्दः फले वर्तमानः स्त्रीरूपत्वं [8]भजते । कथम् ? जम्ब्वाः फलं जम्बूः । पक्षे जम्बु जाम्बवं च ॥ १८ ॥

[1] इति यावत् J_2, Pt_2.　　[2] लुप्ततद्धितं K_6.　　[3] B_1 omits one page.
[4] स्वप्रकृतिः F_2.　　[5] F_2 adds कोशातक्याः फलं कोशातकी.　　[6] फलप्रसवे D_2, F_1.
[7] इङ्गुदस्य Pt_2.　　[8] स्त्रीरूपं भवति F_1.

(पा.) द्विहीनं—सर्वम् । वक्ष्यमाणशब्दजातं सर्वं पुष्पफलमूलादौ वर्तमानं सन् नपुंसकलिङ्गं भवति । चम्पकस्य पुष्पं चम्पकम् । कदम्बम् । करवीरम् । 'पुष्पमूलेषु बहुलम्' (वा. ४. ३. १६६) इति बहुलवचनादुत्पन्नप्रत्ययस्य लुक् च । आम्रस्य फलमाम्रम् । दाडिमम् । तिन्दुकम् । 'फले लुक्' (४. ३. १६३) इति लुक् । हरीतक्यादयः स्त्रियाम् । हरीतक्यादयः फले वर्तमानाः स्त्रीलिङ्गाः । हरीतक्याः फलं हरीतकी । कोशातकी, द्राक्षा । 'हरीतक्यादिभ्यश्च' (४. ३. १६७) इति लुप् । 'लुपि युक्तवद्व्यक्तिवचने' (१. २. ५१) इति प्रकृतिलिङ्गता । आश्वत्थ—बार्हतं च । अश्वत्थादयः फले नपुंसकलिङ्गाः । अश्वत्थस्य फलमाश्वत्थमित्यादि । 'प्लक्षादिभ्योऽण्' (४. ३. १६४) इत्यत्रपवादकाण्विधानसामर्थ्यान्न लुक् । एवं वैणवादीनामपि । चकाराद् गणपठितशिग्र्वादेरपि । शैग्रवमित्यादि ॥ फले—जाम्बवम् । जम्बूफले जम्बूः स्त्रीलिङ्गः । 'लुप् च' (४. ३. १६६) इति लुप् । जम्बुजाम्बवशब्दौ नपुंसकौ । 'जम्ब्वा वा' (४. ३. १६५) इति विभाषाण् । पक्षे 'ओरञ्' (४. २. ७१) । तस्य लुक् जम्बु । अणि जाम्बवम् ॥ १८ ॥

पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ १९ ॥
विदार्याद्यास्तु मूलेऽपि पुष्पे क्लीबेऽपि पाटला ।

(वि.) पुष्प इति—[1]जातीमालती[2]यूथिकादयः[3] पुष्पे प्रसवे वर्तमानाः स्वलिङ्गा भवन्ति । कथम् ? [4]जात्याः पुष्पं जाती । एवं [5]मालत्यादयः । व्रीहयः फले । व्रीहिशब्द-बहुवचनेन गोधूमादयो गृह्यन्ते । व्रीहियवगोधूमादयः फले प्रसवे वर्तमानाः स्वलिङ्गाः प्रकृतिलिङ्गा भवन्ति । कथम् ? व्रीहीणां फलानि व्रीहयः । [6]एवं गोधूमादयः । विदारी-[7]गान्धार्यंशुमत्यादयो मूले वर्तमानाः स्वलिङ्गाः प्रकृतिलिङ्गा भवन्ति । अपिशब्दात् परेऽपि । कथम् ? विदार्याः फलं मूलं [8]वा विदारी । एवं [9]गान्धार्यादि । पाटलशब्दः पुष्पप्रसवे वर्तमानः क्लीबेऽपि । अपिशब्दात् स्वलिङ्गश्च भवति । कथम् ? पाटलायाः पुष्पं पाटलं पाटला वा ॥ १९ ॥

[1] J_2, K_2 add पुष्पे जातिप्रभृतयः स्वलिङ्गाः. [2] मल्लिका F_1, I, K_5; शेफालिका F_2. [3] प्रभृतयः F_1. [4] जातेः कुसुमं जातिः Pt_2. [5] मल्लिकायाः कुसुमं मल्लिका Pt_2. [6] मुद्गस्य फलं मुद्गः, माषस्य फलं माषः Pt_2. [7] गन्धारी Pt_2. [8] Pt_2 adds कुसुमं वा. [9] गन्धार्याः फलं मूलं कुसुमं वा गन्धारी Pt_2.

(पा.) पुष्पे—स्वलिङ्गाः । पुष्पे वर्तमाना जातिप्रभृतयः प्रकृतिलिङ्गाः । जातिर्मल्लिका यूथिका नवमालिका । 'पुष्पमूलेषु बहुलम्' (वा. ४. ३. १६६) इति लुप् । व्रीहयः फले । व्रीहयः फले प्रकृतिलिङ्गाः । माषा यवास्तिला मुद्गाः । [1]लुक्प्रकरणे 'फलपाकशुषाम्' (वा. ४. ३. १६६) [1]इति लुबुपसंख्यानात्[2] ॥ विदार्या—मूलेऽपि । विदार्याद्या मूले प्रकृतिलिङ्गाः । विदारी, अंशुमती, शतावरी, बृहती, अपिशब्दात् पुष्पे यथादर्शनं प्रकृतिलिङ्गता । बृहत्याः पुष्पमपि बृहतीति ॥ पुष्पे—पाटला । पाटलाशब्दः पुष्पे वर्तमानो नपुंसकलिङ्गः प्रकृतिलिङ्गश्च भवति । पाटलं, पाटला ॥१९॥

[1] 'लुप्प्रकरणे फलपाकशुषामुपसंख्यानम्' इति काशिकायाम् (पृ. ३६२). [2] A_1 adds लुप्.

बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥
अश्वत्थेऽथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
तस्मिन् दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥

(वि.) बोधिद्रुम इति—इह वृक्षलतौषधीनां नामान्यान्ध्रभाषयैव[1] वक्ष्यामः। [2]बोधिसंज्ञको द्रुमः बोधिद्रुमः। स्वल्पेऽपि वाते [3]चलानि दलानि यस्य चलदलः। सेवितारं[4] पातीति पिप्पलः। 'पा रक्षणे'। कुञ्जरैरश्यत इति कुञ्जराशनः। 'अश भोजने'। कुञ्जराणामशनमिति वा। अश्वरूपेणाग्निरस्मिन् तिष्ठतीति अश्वत्थः। अश्वत्थनामानि। 'राविचेट्टु'॥ कपीनां प्रियत्वेन तिष्ठतीति कपित्थः। 'ष्ठा गतिनिवृत्तौ'। दधिवत्[5] फलन् तिष्ठतीति दधित्थः। [6]ग्राहिफलत्वात् ग्राही। 'ग्रह उपादाने'। नान्तः। फलैः कपिमनो मथ्नातीति[7] मन्मथः। 'मन्थ विलोडने'। दधिवदम्लं ग्राहिफलमस्य दधिफलः। पुष्पात्[8] फलमस्येति पुष्पफलः। पुष्यति फलति चेति वा। 'पुष्प विकसने'। 'फल निष्पत्तौ'। आम्लत्वात् [9]दन्तान् शठतीति दन्तशठः। 'शठ कैतवे च'। चशब्दात् हिंसासंक्लेशनयोः। कपित्थनामानि। 'वेलङ्गचेट्टु'[10]॥ २०–१॥

[1] कर्णाटकभाषायां J_2. [2] बुध्यतेऽनेनेति बोधिः, 'बुध अवगमने', बोधिश्चासौ द्रुमश्च F_2, Pt_2. [3] चलन्ति D_2, K_6. [4] भक्तान् Pt_2. [5] दधीव तिष्ठति Pt_2; दध्युपेतवत् K_6. [6] विष्टम्भत्वात् Pt_2. [7] F_2, Pt_2 add बध्नाति. [8] पुष्पाण्येव फलानि B_1. [9] दन्तानां शठः F_2, Pt_2. [10] 'वेललमर' J_2.

(पा.) बोधिद्रुमः—अश्वत्थे। अश्वत्थनामानि। 'राविचेट्टु'। द्रुमशब्दो द्रुमाभिधानख्यापनाय। 'श्रीवृक्षः पिप्पलोऽश्वत्थो बुधैर्बोधिश्च कथ्यते' इति हलायुधः (अ. मा. २. ४१)॥ अथ कपित्थे—दन्तशठावपि। कपित्थनामानि। 'वेलग'॥ २०–१॥

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः।
कोविदारे चमरिकः कुद्दालो युगपत्रकः॥ २२॥

(वि.) उदुम्बर इति—उन्नतत्वाद् उल्लङ्घितमम्बरं [1]येनेत्युदुम्बरः। उन्दनाद्वा। 'उन्दी क्लेदने'। जन्तवः क्रिमयः फले यस्य [2]जन्तुफलः। [3]यूपादियज्ञाङ्गत्वात्[4] यज्ञाङ्गः। हेमवर्णं दुग्धं क्षीरमस्य हेमदुग्धकः। उदुम्बरनामानि। 'अत्तिचेट्टु'॥ कुं [5]भुवं [6]विदारयतीति कोविदारः। 'दॄ विदारणे'। चमरसदृशमञ्जरित्वात्[7] चमरिकः। कुं भुवं [8]मूलैर्दालयतीति कुद्दालः। 'दल विशरणे'। युगानि पत्राणि यस्य युगपत्रकः। कोविदारनामानि। '[9]काञ्चनपुचेट्टु॥ २२॥

[1] अनेन F_2, Pt_2. [2] जन्तुयुक्तं फलमस्येति F_2, Pt_2. [3] यूपादिरूपेण J_2, Pt_2. [4] Pt_2 adds उपकरणमिति. [5] भूमिं J_2, Pt_2. [6] विदृणाति J_2. [7] मञ्जरी° J_2, Pt_2. [8] दलयति K_6, Pt_2; दलति D_2, J_2. [9] 'काबालमर' J_2.

(पा.) उदुम्बरो—हेमदुग्धकः । उदुम्बरनामानि । 'मेडि' । कोविदारे—युगपत्रकः । कोविदारनामानि । 'काञ्चनमु' । 'कञ्जदारः काञ्चनारः' । एते च ।। २२ ।।

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः ।। २३ ।।
आरेवतव्याधिघातकृतमालसुवर्णकाः ।

(वि.) सप्तपर्ण इति—[1]सप्त पर्णानि यस्य सप्तपर्णः । विशाला त्वक् यस्य विशालत्वक् । शरदि [2]पुष्पोद्गमात् शारदः । शारदीति वा स्त्रीलिङ्गः । [3]विषमाः छदाः पत्राणि यस्य विषमच्छदः । सप्तपर्णनामानि । 'एडाकुल यर्टिचेट्टु' ।। आरञ्जयन्तीति आरजः फलाकारा मलास्तेषां वधः छेदनमस्यास्मिन्निति वा आरग्वधः । राजा चासौ वृक्षश्च राजवृक्षः । रोगराजं वृश्चति छिनत्तीति वा । 'ओव्रश्चू छेदने' । शमीमकत्यनुगच्छतीति [4]शम्याकः । 'अक अग कुटिलायां गतौ' । चतुरङ्गुलपर्णपर्वकत्वात् चतुरङ्गुलः । आरेवते उत्प्लुत्य गच्छति रोगोऽनेनेति आरेवतः । 'रेवृ प्लव गतौ' । आरेव खड्ग इव रोगदेवतां हन्तीति वा । व्याधिं हन्तीति[5] व्याधिघातः । फलैः कृता माला यस्य कृतमालः । सुवर्णाकाराणि पुष्पाणि यस्य सुवर्णकः । सुवर्णकनामानि । 'रेलचेट्टु' ।। २३ ।।

[1] प्रतिपर्व सप्त पर्णानि Pt_2. [2] पुष्प्यतीति F_2, Pt_2; शारदीति वा पाठः K_5, Pt_2. [3] Pt_2 adds सप्तपर्णत्वात् . [4] सम्यक् पाकोऽत्र सम्पाक इति वा पाठः । शं कल्याणः पाकोऽत्रेति वा Pt_2. [5] 'हन हिंसागत्योः' K_6.

(पा.) सप्तपर्णो—विषमच्छदः । सप्तपर्णनामानि । 'येडाकुलरट्टु' । शारदीशब्दोऽपि । 'शारदी तोयपिप्पल्यां सप्तपर्णे च शारदी' इति रुद्रः । सांकर्यं पुंस्त्वज्ञापनार्थम् ।। 'शारदः [1]सप्तपर्णः स्याद् बृहत्त्वक् ग्रहनाशनः' इति रत्नकोशः । आरग्वधे—सुवर्णकाः । आरग्वधनामानि । 'रेल चेट्टु' ।। अरग्वधशब्दोऽपि । 'आरग्वधस्तु शम्याकः कृतकूलोऽप्यरग्वधः' इति रत्नमाला । अर्ग्वधशब्दोऽपि । '[2]अर्ग्वधे तु व्याघातः' इति वैजयन्ती (पृ. ४९, श्लो. ४८) ।। २३ ।।

[1] सप्तपर्णेभ्यो बृहत्यः B_3. [2] 'आरग्वध आरवेतः शम्याकः प्रग्रहोऽर्ग्वधः' (पृ. ४९, श्लो. ४८) इति, 'आर्ग्वधे तु व्याघातश्चतुरङ्गुलः' इति च मुद्रितग्रन्थे.

स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥
वरुणे वरणः सेतुस्तिक्तशाकः कुमारकः ।
पुंनागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २५ ॥

(वि.) स्युरिति—जम्यते [1]भक्ष्यत इति जम्बीरः । 'जमु अदने' । दन्तान् शठति [2]हिंसयति आम्लत्वेनेति दन्तशठः । 'शठ हिंसासंक्लेशनकैतवेषु' । जम्भयति मोहयतीति जम्भः । जम्भीरः जम्भलश्च । 'जभी गात्रविनामे' । जम्भीरनामानि । 'निम्मिचेट्टु' ॥ वृणोति आवृणोतीति वरुणः । 'वृञ् वरणे' । वरणश्च । आवरणकारित्वात् सेतुः । सिनोति व्याधिं हन्तीति वा । 'षिञ् बन्धने' । [3]तिक्तश्चासौ शाकश्च तिक्तशाकः । सदा तरुणत्वात् कुमारकः । वरणनामानि । 'उलिमिरि चेट्टु' ॥ पूजितः पुमान् पुंनागः । पुंनाग इव पुंनागः । पुरुषवदुन्नतत्वात् पुरुषः । तुङ्गश्च । तुज्यत इति तुङ्गः । 'तुजि हिंसायाम्' । प्रशस्ताः केसराः सन्त्यस्य केसरः । देवानां वल्लभः प्रियः देववल्लभः । पुंनागनामानि । 'सुरपोन्नचेट्टु' ॥ २४–५ ॥

[1] भुज्यते B_1, K_5.　[2] हिनस्ति K_6; दन्तानां शठः अम्लत्वेन F_2, Pt_2.　[3] तिक्तरसः शाकोऽस्य Pt_2.

(पा.) स्युर्जम्बीरे—जम्भलाः । [1]जम्बीरनामानि । [2]'निम्म' ॥ वरणे—कुमारकः । वरणवृक्षनामानि । 'उविमिरि चेट्टु' । 'मटमाविनपेरुन्तु' ॥ पुंनागे—देववल्लभः । पुनागनामानि । 'पोन्नचेट्टु' । सुरपुंनाग इति तद्भेदः । 'नमेरुः सुरपुंनागः' । इति निघण्टुसर्वंकषः । 'सुरपोन्नचेट्टु' ॥ २४–५ ॥

[1] जम्भीर° B_3.　[2] B_3 adds 'चेट्टु'.

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ।
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥
वानप्रस्थमधुष्ठीवौ जलजेऽत्र मधूलकः ।

(वि.) पारिभद्र इति—परितो भद्रमस्य पारिभद्रः । नयत्यारोग्यमिति निम्बः । 'णीञ् प्रापणे' । स चासौ तरुश्च निम्बतरुः । [1]मन्दाः सूक्ष्मा अराः कण्टका यस्य

मन्दारः। मन्दारशब्दसाहचर्यात् पारिजातकः। पारिणः समुद्राज्जातः पारिजातकः। निम्बतरुनामानि। 'पारिजातवृक्षमु'॥ [2]चिरजीवित्वादतिक्रान्ता [3]निशा येन तिनिशः। स्यन्दनोपयोगित्वात्[4] स्यन्दनः। रथचक्रान्ते[5] नमतीति नेमिः। 'णम प्रह्वत्वे शब्दे च'। नेमी वा। रथाय द्रुर्वृक्षो रथद्रुः। अतिविस्तृतत्वाद् अतिमुक्तकः। वन्यतेऽर्थ्यत[6] इति वञ्जुलः। 'वनु याचने'। [7]लघुत्वेऽपि दार्ढ्यदैर्घ्याभ्यामाश्चर्यं करोतीति चित्रकृत्। 'डुकृञ् करणे'। अतिमुक्तकनामानि। 'नेम्मिचेट्टु'। पीतयति वस्त्रादिकं रसेन पीतीकरोतीति पीतनः। मिष्टैः फलैः कपीनां [8]प्रीतिं तनोतीति कपीतनः। 'तनु विस्तारे'। आम्रमततीषदनुगच्छतीति आम्रातकः। 'अत सातत्यगमने'। आम्लवत् कपिभिरद्यत इति वा आम्लातकः। 'अद भक्षणे'। रलयोरभेदः। आम्रातकनामानि। '[9]अम्बालपुचेट्टु'॥ मधुरसः उच्यते युज्यतेऽत्रेति मधूकः। 'उच समवाये'। गुडवन्मधुराणि पुष्पाणि यस्य गुडपुष्पः। मधुप्रधानो द्रुमो मधुद्रुमः[10]। वनप्रस्थे वनस्थले भवो वानप्रस्थः। मधु ष्ठीवतीति[11] मधुष्ठीवः। 'ष्ठिवु निरसने'। मधुष्ठील इति पाठे मधु ष्ठीले गर्भेऽस्य मधुष्ठीलः[12]। मधु उलत्यावृणोत्यत्रेति मधूलकः। 'उल आवरणे'। जलजमधूलकनाम। 'नीरिप्पचेट्टु'॥ २६–७॥

[1] मन्दानि सूक्ष्माणि अराणि कण्टकानि J_2, Pt_2. [2] चिरजीवित° J_2. [3] निशामतिक्रान्तः Pt_2. [4] उपयोग्यदारुत्वात् K_5, K_6. [5] चक्रान्तेन K_6. [6] वर्धते J_2, K_6. [7] लघुदार्ढ्यात् F_2, J_2, K_6. [8] कामं K_5, K_6. [9] 'सिन्न अम्बालमु' K_3. [10] मधुरश्चासौ द्रुमश्च F_2, J_2, K_6. [11] K_5, K_6 add प्रस्रवतीति. [12] 'इप्पचेट्टु' K_6.

(पा.) पारिभद्रे—पारिजातकः। पारिभद्रनामानि। 'पारिजमु'॥ तिनिशे—चित्रकृच्च। तिनिशनामानि। 'तिनासमु'। 'मथुरादेशप्रसिद्धमु'॥ अथ द्वौ—आम्रातके। आम्रातकनामानि। 'अम्बालमु'। 'अदे कोतिमामिडि'। 'कपिचूतोऽम्लबाटश्च'। एते द्वे च। कपिभूष इति वा पाठः॥ मधूके तु—मधुष्ठीलौ। मधूकनामानि। 'इप्प'॥ जलजोऽत्र मधूलकः; जलजमधूकनाम। 'नीरिप्प'। 'मधूकोऽन्यो मधूलस्तु जलजो दीर्घपत्रकः' इति वामनतन्त्रानुसारिपाठः। 'गिरिजेऽत्र मधूलकः'। गिरिजमधूकनाम। 'गौरशालो मधूलोऽन्यो गिरिजस्वल्पपत्रकः' इत्यरुणदत्ततन्त्रानुसारिपाठः॥ २६–७॥

पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे ॥ २८॥
अक्षोटकन्दरालौ द्वावङ्कोले तु निकोचकः।

(वि.) पीलाविति—पीयते माधुर्यात् [1]पीलुः। 'पा पाने'। गुडवन्मधुराणि फलानि यस्य गुडफलः। स्रंसयति [2]फलादिकमिति स्रंसी। 'स्रंसु अवस्रंसने'।

'[3]गोनुगुचेट्टु' ॥ अक्ष्णोति मूलैर्भुवं[4] व्याप्नोतीति अक्षोटः। 'अक्षू व्याप्तौ'। [5]कन्दर-स्थानम् अलति भूषयतीति कन्दरालः। कर्पराल इति पाठे कल्पते रोगं हन्तुमिति कर्परालः[6]। 'कृपू सामर्थ्ये'। पर्वतपीलुनामनी। 'कोण्डगोड्गुचेट्टु'॥ अङ्क्यते कण्टकैरित्यङ्कोलः। 'अकि लक्षणे'। अङ्कोट इति वा पाठः। [7]निकुच्यते कण्टकत्वेनास्मान्निकोचकः। 'कुञ्च कौटिल्याल्पीभावयोः'। अङ्कोलनामनी। 'ऊडुगचेट्टु'॥ २८॥

[1] पीड्यत इति वा, 'पीड अवगाहने', डलयोरभेदः K_5, K_6.　[2] मालादिकम् J_2, K_6.　[3] K_3 adds 'सिन्न'.　[4] भुवनं K_5.　[5] कन्दरान् सानूनि Pt_2.　[6] कर्पररोगं हन्तीति K_2.　[7] निकुञ्चति K_5, K_6.

(पा.) पीलौ—स्रंसी। पीलुवृक्षनामनी। 'गोनुगुचेट्टु'॥ तस्मिंस्तु—आक्षोट-कन्दरालौ द्वौ। अक्षोट इति वा। पर्वतोत्पन्नपीलुनामनी। 'कोण्डगोनुगुचेट्टु'। 'अव्दोढ' इति वणिक्प्रसिद्धः॥ अङ्कोले—निकोचकः। अङ्कोलनामनी। 'उडुग'। अङ्कोडे त्विति पाठे—'अथाङ्कोले निचोलोऽङ्कोडशोधनौ[1]' इति वैजयन्ती (प्र. ४८, श्लो. ४१)॥ २८॥

[1] अङ्कोढ इति मुद्रितग्रन्थे.

पलाशे किंशुकः पर्णो वातपोथोऽथ वेतसे॥ २९॥
रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः।
द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे॥ ३०॥

(वि.) पलाश इति—पुण्यानि पलाशानि पर्णानि यस्य सः पलाशः। स्वपुष्पैः पलं मांसमश्नातीव तिष्ठतीति वा। '[1]अश भोजने'। किंचिच्छुकवत्[2] शुकतुण्डसदृशपुष्पत्वात् किंशुकः। [3]पुण्यानि पर्णानि यस्य पर्णः। वातरोगं पोथयतीति[4] वातपोथः। 'पुथ हिंसायाम्'। पलाशनामानि। 'मोदुगचेट्टु'॥ ति[5] वृद्धिं गच्छतीति वेतसः। 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु'। वितस्यते कालेनोपक्षीयत इति वा। 'तसु उपक्षये'। [6]रमन्तेऽस्मिन् पक्षिण इति रथः। 'रमु क्रीडायाम्'। अभ्रवर्णानि पुष्पाण्यस्य अभ्रपुष्पः। [7]अभ्रसमये पुष्पमस्येति वा। विदोल्यते[8] वायुवेगेनेति विदुलः। 'दुल उत्क्षेपे'। विडुल इति वा। 'डुल उत्क्षेपणे'। शीतवीर्यत्वात् शीतः। दाहशमनत्वाद् [9]वन्यत इति वानीरः। वञ्जुलश्च। 'वन षण संभक्तौ'। वेतसनामानि। '[10]पुव्वचेट्टु'॥ परिविध्यतेऽम्भसेति[11] परिव्याधः। विदोल्यतेऽम्भसीति विदुलः। नद्यां भवा नादेयी। जलजातवेतसनामानि। 'निरुपुव्वचेट्टु'॥ २९-३०॥

[1] 'अश भक्षणे' K_5. [2] नीलत्वात् K_6, Pt_2. [3] प्रशस्तानि J_2, Pt_2. [4] F_1, K_2, K_5 add नाशयति. [5] वेति अम्भोऽनुवर्तते Pt_2. [6] F_1 omits 2 pages. [7] J_2 adds वर्षासमये. [8] विदुल्यते Pt_2. [9] K_6 adds सेव्यते. [10] 'प्रब्बलि-चेट्टु' Pt_1, Pt_2. [11] अम्भसि K_6.

(पा.) पलाशे—वातपोथः। पलाशद्रुमनामानि। 'मोदुग'। 'ब्रह्मवृक्षस्त्रि-पत्रकः'। एते च॥ अथ वेतसे—वञ्जुलाः। वेतसनामानि। 'प्रब्बचेट्टु'॥ द्वौ परिव्याध—चाम्बुवेतसे। जलवेतसनामानि। 'नीरुप्रब्ब'॥ २९–३०॥

सौभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीबमोचकाः।
रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ॥ ३१॥

(वि.) सौभाञ्जन इति—[1]कटुत्वेन सुष्ठु मुखं भनक्तीति[2] सौभाञ्जनः। 'भञ्जो आमर्दने'। शोभामनक्तीति शोभाञ्जन इति वा पाठः। 'अञ्जू व्यक्तिम्रक्षणकान्ति-गतिषु'। शिनोति [3]शमयति कफादीनिति शिग्रुः। 'शीञ् निशातने'। तेजयति कफा-दीनिति तीक्ष्णः। 'तिज निशातने'। गन्धं करोतीति गन्धकः। तीक्ष्णो गन्धोऽस्यास्तीति तीक्ष्णगन्धक इति वा। मद्यादिवत् आक्षीबन्त्यनेनेति आक्षीबः[4]। 'क्षीबृ मदे'। [5]मुञ्चति [6]तीक्ष्णगन्धमिति मोचकः। 'मुच्लृ मोक्षणे'। शिग्रुनामानि। 'मुनगचेट्टु'॥ ३१॥

[1] तीव्रगन्धत्वेन Pt_2. [2] K_6 adds भेदयतीति. [3] हन्ति K_5, K_6. [4] मन्दो न भवतीति अक्षीबः K_5. [5] मोचयति K_5. [6] उग्रगन्धम् Pt_2.

(पा.) शोभाञ्जने—मोचकाः। शोभाञ्जननामानि। 'मुनुग'। 'शोभाञ्जने तीक्ष्णगन्धशिग्रुकाक्षीवमोचकाः' इति पाठादक्षीवः। सौभाञ्जन इति पाठान्तरम्॥ रक्तोऽसौ—स्यात्। रक्तशिग्रुनाम। 'येर्रमुनुग'॥ अनुक्तम्—'अगस्त्ये शुकनासः स्यान्मार्जारो वङ्गसेनकः[1]'। अगस्त्यद्रुमनामानि। 'अगिशचेट्टु'॥ अरिष्टः फेनिलः समौ। अरिष्टवृक्षनामनी। 'कुङ्कुडुचेट्टु'॥ ३१॥

[1] वंगसेवकः B_3; वङ्गसेनक इति मुद्रितवैजयन्त्याम् (पृ. ५८, श्लो. १५६).

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि।
प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद् वटः॥ ३२॥

(वि.) बिल्व इति—बिलति [1]कुष्ठरोगमिति, सेवकस्य पापं [2] हिनस्तीति वा बिल्वः। 'बिल भेदने'। शाण्डिल्यमुनिवत्[3] विप्रमान्यत्वात्[4] शाण्डिल्यः। शैलूषो[5] नट इव [6]रूपपरिवर्तनात्[7] शैलूषः[8]। मलते निष्कभ्नाति मलमिति मालूरः। 'मल मल्ल धारणे'। मल्यते धार्यते देवैरिति वा। मां लक्ष्मीं लातीति वा मालूरः। 'ला दाने'। श्रीप्रदानि श्रीप्रियाणि वा फलानि यस्य सः श्रीफलः। बिल्वनामानि। '[9]मारेडु चेट्टु'॥ प्लक्षति [10]कफादिदोषमिति प्लक्षः। 'प्लक्ष [11]भक्षणे'। प्लक्षति मूलैरधोगच्छतीति वा। जटाः सन्त्यस्येति जटी। 'जट संघाते'। पृच्यते परस्परं संसृज्यत इति पर्कटी। 'पृची संपर्के'। नकारान्तोऽयम्। केचित् ईकारान्तस्त्रीलिङ्गमिच्छन्ति[12]। प्लक्षनामानि। 'जुव्वि चेट्टु'॥ न्यक् तिर्यक् [13]रुणद्धीति न्यग्रोधः। 'रुधिर् आवरणे'। बह्वः पादा मूलान्यस्य बहुपात्। वटति मूलैः स्वस्थानं वेष्टयतीति वटः। 'वट परिवेष्टने'। वटवृक्षनामानि। 'मर्रिचेट्टु[14]'॥ ३२॥

[1] कफरोगम् K_5.　[2] K_2, K_3 add बिलति.　[3] ऋषि° J_2, Pt_2.　[4] °मानित्वात् K_5.　[5] शैलूषवत् J_2, Pt_2; इव K_5.　[6] K_6 adds दुर्जरत्वादिना.　[7] विारि° K_5.　[8] शिलूषपुत्रवद्वा I, K_2, K_3, K_5.　[9] 'बिल्वपत्रे' J_2.　[10] वस्त्रादि° B_1, K_5.　[11] अदने K_6; क्षरणे B_1.　[12] इति वदन्ति B_1, I, K_5.　[13] F_2, Pt_2 add मार्गमिति.　[14] 'आलमर' J_2.

(पा.) बिल्वे—श्रीफलावपि। बिल्वनामानि। 'मारेडु'। प्लक्षो—पर्कटी स्यात्। प्लक्षवृक्षनामानि। 'गोनुचेट्टु'। 'प्लक्षे[1] तु पर्कटिजटी पलाशी गिरिलक्षणः' इति वैजयन्तीपाठात् (पृ. ४७, श्लो. २८) जटिपर्कटिशब्दौ पुंलिङ्गौ॥ न्यग्रोधो—वटः। वटवृक्षनामानि। 'मर्रिचेट्टु'॥ ३२॥

[1] 'प्लक्षस्तु पर्कटिजटिकलापिगिरिलक्ष्मणाः' इति मुद्रितग्रन्थे.

गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ।
आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः॥ ३३॥

(वि.) गालव इति—गालयति स्रावयत्यक्षिरोगमिति[1] गालवः। 'गल स्रवणे'। गालवाख्येन प्रभूत इति वा। शबरसंबन्धित्वात्[2] शाबरः। साबर इति पाठान्तरम्[3]। अतिसारं रुणद्धीति लोध्रः। रलयोरभेदः। 'रुधिर् आवरणे'। तिरयति पित्तादिरोगान् नाशयतीति तिरीटः। तीरयतीति वा। 'पार तीर कर्मसमाप्तौ'। तिलति स्निह्यत्यङ्गमनेनेति तिल्वः। 'तिल स्नेहने'। मार्जयति उद्वर्तयत्यङ्गमनेनेति मार्जनः। 'मृजूष शुद्धौ अलंकारे च'। लोध्रनामानि। 'तेल्ललोद्दुगु चेट्टु'॥ षडपि लोध्रसामान्यनामानीति केचित्।

आद्यौ श्वेतलोध्रस्य, इतरे रक्तलोध्रस्येत्यपरे ॥ अम्यते [4]भक्ष्यत इत्याम्रः । 'अम गत्यादिषु' । [5]चोतति स्रवति रसमिति चूतः । 'चुतिर्[6] क्षरणे' । रसम् अलति भूषयतीति रसालः । 'अल भूषणपर्याप्तिवारणेषु' । रसम् आलातीति वा । 'ला दाने' । आम्रनामानि । 'मामिडि चेट्टु' ॥ सह कारयति मेलयति स्त्रीपुंसाविति सहकारः । 'डुकृञ् करणे' । [7]अतिसुगन्धाम्रनाम ॥ 'तिय्यमामिडि चेट्टु' ॥ ३३ ॥

[1] अस्थिरोगम् K_3. [2] J_2, K_6 add °वृक्ष°. [3] B_1, I, K_2 add श्वेतलोध्रनामनी. [4] अभिलष्यते F_2, Pt_2. [5] च्योतति B_1, D_2, I, K_5. [6] 'च्युतिर् क्षरणे' I, J_2. [7] F_2 adds अतिशयितं सौरभमस्य.

(पा.) गालवः—मार्जनौ । लोध्रनामानि । 'लोदुगचेट्टु' ॥ आम्रः—रसालः । चूतवृक्षनामानि । 'मामिडिचेट्टु' । 'वसन्तशाखी माकन्दः कामाङ्गो मदिरासखः' । एतानि च ॥ असौ—सौरभः । अत्यन्तसुरभिचूतः सहकारः स्यात् ॥ ३३ ॥

कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ।
शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३४ ॥

(वि.) कुम्भोलूखलकमिति—कुम्भोलूखलाकारात् वृक्षकोशान्निर्यातीति कुम्भोलूखलकम् । कुम्भोलूखलके क्लीबे इति केचित् द्विवचनान्ततया नामद्वयं दर्शयितुं [1]पठन्ति । वृक्षकोशे भवः कौशिकः । गुडति रक्षति वातरोगादिति गुग्गुलुः । 'गुड रक्षणे[2]' । पुरत्यग्रे सरति धूपवृक्षेष्विति पुरः । 'पुर अग्रगमने' । गुग्गुलुवृक्षनामानि । 'गुग्गिलपुचेट्टु' ॥ शिलति उञ्छति केशकार्ष्ण्यं करोतीति शेलुः । 'शिल उञ्छे' । शिनोति [3]जिह्वामिति वा । 'शिञ् निशातने' । श्लेष्माणम् अतति [4]कटुतयेति श्लेष्मातकः । 'अत सातत्यगमने' । विरुद्धलक्षणया [5]उष्णवीर्यत्वात् शीतः । उष्णवीर्यत्वादङ्गमुद्दालयतीत्युद्दालः । 'दल [6]विशरणे' । बहूनि स्रोतांसि कटुत्वेन वृणोतीति बहुवारकः । 'वृञ् वरणे' । उद्दालकनामानि । 'विरिगिचेट्टु' ॥ ३४ ॥

[1] वदन्ति B_1. [2] 'गुड रक्षायाम्' K_6. [3] रोगान् J_2, Pt_2. [4] कटूष्णतया K_5. [5] शीतवीर्यत्वात् Pt_2. [6] विदारणे Pt_2.

(पा.) कुम्भोलूखलकं क्लीबे । सुभूतिटीकायां त्रिधा विभक्तं कुम्भोलूखलकं कुम्भम् उलूखलकमिति ॥ कौशिको—पुरः । गुग्गुलुद्रुमनामानि । 'गुग्गिलपुचेट्टु' । 'जटायुः कालनिर्यासो महिषाक्षः पलंकषः' । एतानि च ॥ शेलुः—बहुवारकः । श्लेष्मातकनामानि । 'विरिगचेट्टु' ॥ ३४ ॥

राजादनं प्रियालः स्यात् सन्नकद्रुर्धनुष्पटः ।
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३५ ॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ।
कर्कन्धूर्बदरी घोण्टा कोली कुवलफेनिले ॥ ३६ ॥
सौवीरं बदरं कोलमथ स्यात् स्वादुकण्टकः ।
विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥

(वि.) राजादनमिति—[1]राजभिरद्यते मृष्टत्वादिति राजादनम् । 'अद भक्षणे' । प्रीयते हृदयं गच्छति अतिरसत्वादिति[2] प्रियालः । 'प्रीङ् प्रीतौ' । पियाल इति पाठे पीयत इति । सन्नानि सूक्ष्माणि कद्रुवर्णानि वीजान्यस्येति सन्नकद्रुः । सन्नको[3] द्रुः स्कन्धोऽस्येति वा । धनुष इव पटो विस्तारोऽस्यास्तीति धनुष्पटः । नामद्वयं वा । [4]धनतीति धनुः । 'धन धान्ये' । उकारान्तः । पटवद्विस्तृतः पटः । प्रियालनामानि । 'मोरटिचेट्टु' ॥ [5]सारतया मूलादिगमने भारोऽस्या अस्तीति गम्भारी । सर्वतो भद्रमस्या अस्तीति सर्वतोभद्रा । कृश्यति तनूकरोति पित्तादिकमिति काश्मरी । 'कृश तनूकरणे' । मधूनि [6]स्वादूनि पर्णान्यस्या इति मधुपर्णिका । श्रीः पर्णेष्वस्या इति श्रीपर्णी[7] । भद्रप्रदानि पर्णान्यस्या भद्रपर्णी । कृश्यति तनूकरोति पित्तादिकमिति काश्मर्यः । 'कृश तनूकरणे' । कश्यते कर्म कुरुतेऽनेनेति वा काश्मर्यः । 'कशि गतिशासनयोः' । काश्मरीनामानि । 'गुम्मुडुचेट्टु' ॥ कर्काणि लोहितानि[8] पर्णानि धत्त इति कर्कन्धूः । 'डुधाञ् धारणपोषणयोः' । बदति स्थिरा भवतीति बदरी । 'बद स्थैर्ये' । कोलति[9] निबिडावयवत्वात् कोली । 'कुल संस्त्याने' । घुणति वृत्ततया भ्रमतीति घोण्टा । 'घुण घूर्ण भ्रमणे' । बदरीनामानि । रेंगुचेट्टु' ॥ कौ भुवि [10]वलते भ्रमतीति कुवलम् । 'वल[11] संवरणे संचरणे च' । फेनोऽस्यास्तीति फेनिलम् । सुवीरदेशे प्रचुरत्वात् सौवीरम् । बदर्याः फलं बदरम् । कोल्याः फलं कोलम् । घोण्टाशब्दो वृक्षफलयोर्वाचकः । बदरीफलनामानि । 'रेंगुपण्डु' ॥ स्वादुफलत्वात् कण्टकवत्त्वाच्च स्वादुकण्टकः । विकङ्कते प्रसरतीति विकङ्कतः । 'ककि गतौ' । स्रुवा स्रुक् तदर्थं वृक्षः स्रुवावृक्षः । स्रुचावृक्ष इति वा पाठः । [12]ग्रन्थिलत्वात् ग्रन्थिलः । व्याघ्रस्य पादा इव पादा[13] मूलान्यस्य व्याघ्रपात् । विकङ्कतनामानि । 'पुल्लवेलंगचेट्टु' ॥ ३५–७ ॥

[1] राज्ञामदनं J_2, Pt_2.　　[2] सारवत्त्वात् B_1; सारत्वात् I, K_2, K_3.　　[3] K_6 adds खरः.　　[4] दधातीति K_5.　　[5] सारवत्त्वात् F_2, Pt_2.　　[6] मृष्टानि K_5, K_6; K_5 adds

पुष्पाणि. [7] श्रीप्रदानि Pt_2. [8] लोहितवर्णानि J_2; Pt_2 adds फलानि च. [9] कुल्यते K_5, K_6. [10] वलति K_6, Pt_2. [11] 'वल संचलने' Pt_2. [12] ग्रन्थिमत्त्वात् K_5, K_6. [13] पदानि K_5.

(पा.) राजादनं—धनुः। उकारान्तः। पटः। [1]प्रियालद्रुमनामानि। पियालोऽपि। 'मोरटिचेट्टु'॥ अनुक्तम्—'तद्बीजे चारबीजं स्यात्'। प्रियालबीजनाम। 'मोरटिवित्तु'॥ गम्भारी—काश्मर्यश्चापि। गम्भारीवृक्षनामानि। 'पेग्गुम्मडुचेट्टु'॥ अथ द्वयोः—कोली। स्थूलबदरीनामानि। 'गङ्गरेंगु'॥ घोण्टा। बदरीनाम। 'रेंगु'॥ कुवलफेनिले—कोलम्। तत्फलनामानि। हरीतक्यादित्वाद्[?]घोण्टीति[2]। 'रेङ्गुपण्डु'॥ अथ स्यात् स्वादुकण्टकः—स्रुचां वृक्षः। स्रुवावृक्ष इति वा। ग्रन्थिलो व्याघ्रपादपि। विकङ्कतवृक्षनामानि। 'मुलुवेलुम'॥ ३५–७॥

[1] प्रियालु° B_3. [2] काशिकायां कौमुद्यां च घोण्टीशब्दो हरीतक्यादिगणे न दृश्यते.

ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका।
तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके॥ ३८॥

(वि.) ऐरावत इति—[1]इरावती विद्युत् सेव रक्तत्वाद् ऐरावतः। नागस्य सिन्दूरस्येव रङ्गो रागोऽस्येति [2]नागरङ्गः। नागरङ्गनामनी। 'नारिञ्जचेट्टु'॥ नद्यां नदीतीरे भवा [3]नादेयी। भूमौ जम्यत इति [4]भूमिजम्बुका। 'जम अदने'। भूमौ जन्यत इति वा। 'जनी प्रादुर्भावे'। नादेयीनामनी। 'काकिनेरेडु'॥ चत्वार्यपि नागरङ्गस्यैव नामानीति केचित्[5]॥ तिम्यति[6] आर्द्रीभवतीति तिन्दुकः। 'तिमि आर्द्रीभावे'। तिन्दुकोऽस्त्री। स्फूर्जति दह्यमानः [7]चिपिटशब्दं करोतीति स्फूर्जकः। 'टुओस्फूर्जा वज्रनिर्घोषे'। कालो नीलः स्कन्धोऽस्य कालस्कन्धः। [8]शितिर्नीलः सारो मज्जास्येति शितिसारकः। तिन्दुकनामानि। 'तुमिकिचेट्टु'॥ ३८॥

[1] इरावत्या विद्युत इव K_5, K_6. [2] नागच्छतीति नागः सहजः रङ्गोऽस्येति वा K_6. [3] नदीतीरे जायते (जाता J_2) इति K_5, K_6. [4] भूमौ जम्बूः Pt_2. [5] K_3 adds वदन्ति. [6] तिम्यत्वात् K_3. [7] चिदिचिदीति F_1, I. [8] सितिः . . . सितिसारकः K_6.

(पा.) ऐरावतो नागरङ्गः। नारङ्गनामनी। 'नारदमु'। 'नागरङ्गे तु नारङ्गो [1]नारुङ्गस्तक्रवासनः' इति वैजयन्ती (पृ. ४८, श्लो. ३६)। नादेयी—जम्बुका। काकजम्बूनामनी। 'काकिनेरडु'।

'नादेयी नागरङ्गे स्याज्जयायां जलवेतसे।
भूमिजम्ब्वां जवायां च।'

इति विश्वप्रकाशवचनात् (पृ. १२३, श्लो. १०५) [2]नारङ्गजातीयनामन्यपि। 'कित्तसि-चेट्टुन्नु'॥ तिन्दुकः—शितिसारके। तिन्दुकवृक्षनामानि। 'तुम्मिकचेट्टु'॥ ३८॥

[1] नार्यङ्ग इति मुद्रितग्रन्थे.　　[2] नारुङ्ग° B_3.

काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके।
गोलीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ॥ ३९॥

(वि.) काकेन्दुरिति—काका इन्दन्त्यत्रेति काकेन्दुः। 'इदि परमैश्वर्ये'। कुत्सितैः काकादिभिर्लक्यत इति कुलकः। [1]'लक आस्वादने'। काकैः पीयत इति काकपीलुकः[2]। 'पा पाने'। काकैस्तिम्यत इति काकतिन्दुकः। 'तिमि आर्द्रीभावे'। काकतिन्दुकनामानि। 'नल्लतुमिकिचेट्टु'॥ गोभिर्लिह्यत[3] इति गोलीढः। 'लिह आस्वादने'। झाटं संघातं लाति आदत्त इति झाटलः। 'ला [4]दाने'। पशुभक्षणार्थं हन्यत इति घण्टा। 'हन हिंसागत्योः'। पाटं विस्तारं लातीति पाटलिः। पाटला[5] वा। 'ला दाने'। मोक्षति सहते पश्वादिसंमर्दमिति मोक्षः। 'मोक्ष सहने'। मुष्णाति [6]विषमिति मुष्ककः। 'मुष स्तेये'। मुष्कर इति वा पाठः। गोलीढनामानि॥ 'मोक्पुचेट्टु'॥३९॥

[1] लकि Pt_2.　　[2] काकवर्णानि पीलूनि पुष्पाणि यस्य J_2, K_5.　　[3] J_2, Pt_2 add आस्वाद्यते; गोलिह इति वा B_1, K_5.　　[4] 'ला आदाने' K_6.　　[5] पाटलो वा I, K_6.　　[6] रोगान् Pt_2.

(पा.) काकेन्दुः—काकतिन्दुके। काकतिन्दुकनामानि। 'काकितुम्मिक'। गोलीढो—मुष्ककौ। मोक्षवृक्षनामानि। 'मोक्पुचेट्टु'।

'मुष्कको मोक्षको घण्टामूर्खको मुञ्जुकस्तथा।
क्षारश्रेष्ठो गोलिहश्च द्विविधः श्वेतकृष्णकः॥'

इति वैद्यकाद् गोलिहोऽपि॥ ३९॥

तिलकः क्षुरकः श्रीमान् समौ पिचुलझावुकौ।
श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ॥ ४०॥

(वि.) तिलक इति—तिलाभानि पुष्पाण्यस्य तिलकः। क्षुरति [1]परुषत्वात् क्षुरकः। 'क्षुर [2]विलेखने'। श्रीः शोभास्यास्तीति श्रीमान्। तिलकनामानि। 'तिलकपुचेट्टु'॥ पिचुं तूलं लातीति पिचुलः। 'ला दाने'। झम्यत इति झावुकः। 'झमु अदने'। झावुकनामनी। 'सन्ननियाकुलुगलपक्कचेट्टु'॥ श्रीः पर्णेष्वस्याः श्रीपर्णिका। कुमुदवर्णत्वात् [3]कुमुदिका। कुम्भयति पर्णैराच्छादयतीति कुम्भी। '[4]कुभि आच्छादने'। कड्यते प्रकर्षेण लक्ष्यत इति कैडर्यः। 'कड मदे'। कटूनि[5] फलानि यस्य [6]कट्फलः। कुम्भीनामानि। 'टेकुम्रानिचेट्टु'॥ ४०॥

[1] निष्ठुरत्वात् B_1, F_1, K_5. [2] 'क्षुर दीप्तौ' K_3, K_6; 'ऐश्वर्यदीप्त्योः' Pt_2. [3] कुं भुवं मोदयतीति वा B_1, K_5. [4] 'कुबि आच्छादने' J_2. [5] कटुरसानि B_1, I, J_2; रसवन्ति K_6. [6] कटुकफलः J_2.

(पा.) तिलकः—श्रीमान्। तिलकवृक्षनामानि। 'परुषः छन्नपुष्पकः'। एते च।

'यस्य शाखा वह्नियोगाद् दीपवद् दीप्यते चिरम्।
स वृक्षस्तिलको नाम यो वसन्ते हि पुष्प्यति॥'

इति। 'बोट्टुग'। अनुक्तम्—'मदनः स्यात् कुरवको मधुर्दूतश्च नागरः'। कुरवकनामानि। 'कोरविचेट्टु'॥ समौ—झावुकौ। झावुकवृक्षनामनी। 'सन्नपुटे कुलपक्के'॥ श्रीपर्णिका—कट्फलौ[1]। कुम्भीवृक्षनामानि। 'पिनगुम्मुडु'॥ ४०॥

[1] कट्फले B_3.

क्रमुकः पट्टिकाख्यः स्यात् पट्टी लाक्षाप्रसादनः।
तूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च॥ ४१॥
तूलं च नीपप्रियककदम्बास्तु हलिप्रिये।

(वि.) क्रमुक इति—[1]क्रामतीति क्रमुकः। 'क्रमु पादविक्षेपे'। [2]पट्टिकेत्याख्या यस्य सः पट्टिकाख्यः। पट्टी व्रणबन्धनसामर्थ्यमस्यास्तीति पट्टी। लाक्षां प्रसादयतीति लाक्षाप्रसादनः[3]। 'षद्लृ विशरणगत्यवसादनेषु'। क्रमुकनामानि। 'एट्लोद्दुगुपेल्लु'॥ तुद्यते यूपीकर्तुं[5] तक्ष्यत इति तूदः। 'तुद व्यथने'। [6]यूपार्हवृक्षत्वाद् यूपः। पूग[7] इति पाठे पुनातीति [8]पूगः। 'पूञ् पवने'। क्रामतीति क्रमुकः[9]। ब्रह्मणि वैदिके कर्मणि साधुः ब्रह्मण्यः। ब्राह्मण्य इति वा पाठः। ब्रह्मणे वैदिककर्मणे योग्यं

दारु ब्रह्मदारु। [10]तूल्यतेऽस्मादग्निरिति तूलम्। 'तूल निष्कर्षे'। ब्रह्मदारुनामानि। [11]'गङ्गराविचेट्टु'॥ नयति प्राणिनां सुखमिति नीपः। 'णीञ् प्रापणे'। प्रीणातीति प्रियकः। 'प्रीञ् तर्पणे'। कं [12]वातं दमयति [13]शमयतीति कदम्बः। 'दमु [14]उपशमे'। हलिनो बलभद्रस्य प्रियः सुरादिपानाद् हलिप्रियः। कदम्बनामानि। '[15]कडपचेट्टु'॥ ४१॥

[1] कामयति J_2.　[2] पट्टिकेव F_2, K_6.　[3] °प्रसादकः K_2.　[4] पट्टिकालोध्रनाम K_2, K_6.　[5] यूपार्थे F_2, Pt_2.　[6] यूपार्हत्वात् J_2, Pt_2.　[7] इति वा पाठः, तदा F_1, J_2, K_3.　[8] इति व्युत्पत्तिः F_1, I.　[9] F_1 adds 'क्रमु पादविक्षेपे'. [10] तूलति K_5.　[11] 'मङ्गलवल्ली' J_2.　[12] कमुदकं K_6; कफं (कष्टं K_5) दमयति F_1, J_2. [13] उपशमयति J_2.　[14] उपशमने B_1, F_1, I, J_2.　[15] 'मुगलुंगचेट्टु' K_3.

(पा.) क्रमुकः—लाक्षाप्रसादनः। [1]क्रमुकनामानि। 'पट्टिकालोध्रमु'॥ तूदस्तु—तूलं च। अश्वत्थाकृतेर्वृक्षस्य नामानि। 'गङ्गरावि'॥ नीप—हलिप्रिये। कदम्बनामानि। 'कडिमि'॥ 'पुलकः कर्णपूरश्च कादम्बर्यो हरीतकः'। एतानि च॥ अनुक्तम्—'अन्यो धूलीकदम्बः स्याद् वासन्तो वृत्तपुष्पकः'। धूलीकदम्बनामानि। 'बट्टकडिमि'॥ ४१॥

[1] पट्टिकालोध्रनामानि B_3.

वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु॥ ४२॥
गर्दभाण्डे कंदरालकपीतनसुपार्श्वकाः।
प्लक्षश्च तिन्त्रिणी चिञ्चाम्लिकाथो पीतसालके॥ ४३॥
सर्जकासनबन्धूकपुष्पप्रियकजीवकाः।

(वि.) वीरवृक्ष इति—[1]दुःस्पर्शत्वाद् वीरा एव इमं वृक्षं स्पृशन्तीति वीरवृक्षः[2]। अरूंषि [3]व्रणानि करोतीत्यरुष्करः[4]। अग्निवन्मुखमस्यास्तीति अग्निमुखी। भल्लः शर इवातततीति भल्लातकी। 'अत सातत्यगमने'। [5]त्रिषु। अग्निमुखीनामानि। 'जिडिग्रानिचेट्टु'॥ गर्दभ[6] इवाण्डं मूलमस्य गर्दभाण्डः। कंदरमलतीति कंदरालः[7]। 'अल भूषणादौ'। [8]कमुदकं पीतयति पीतवर्णं करोतीति कपीतनः। शोभनौ [9]पार्श्वौ यस्य सः सुपार्श्वकः। प्लक्ष्यते भक्ष्यत इति प्लक्षः। 'प्लक्ष [10]भक्षणे'। प्लक्षनामानि। 'पच्चजुव्विचेट्टु'॥ तिम्यते मुखमत्यर्थमनयेति तिन्त्रिणी। 'तिम आर्द्रीभावे'। तिन्तिडीति वा पाठः। [11]चिञ्चिमायते मुखमाम्लत्वादनया चिञ्चा। [12]अम्लफलत्वाद् आम्लिका। तिन्त्रिणीनामानि। 'चिन्तचेट्टु'॥ पीतवर्णः सालः पीतसालकः। पीतवर्णः सारोऽस्येति

पीतसारक इति वा पाठः। सृजति निर्यासमिति सर्जकः। 'सृज [13]विसर्गे'। अस्यति कुष्ठादीनीत्यसनः। 'असु क्षेपणे'। बन्धूकस्येव रक्तानि पुष्पाणि यस्य बन्धूकपुष्पः। [14]प्रीणातीति प्रियकः। 'प्रीञ् तर्पणे[15] कान्तौ च'। कुष्ठरोगिणं जीवयतीति जीवकः। 'जीव प्राणधारणे'। बीजक इति वा पाठः। बन्धूकपुष्पनामानि। '[16]वेगिचेट्टु' ॥ ४२–३ ॥

[1] वीराणामुपस्पर्शयोग्यः J_2, Pt_2. [2] K_6 adds 'स्पृश स्पर्शने'. [3] व्रणान् Pt_2. [4] F_1 adds 'डुकृञ् करणे.' [5] F_1 adds अयं. [6] F_1 omits 3 pages. [7] कन्दराश्रयो रातीति K_5, K_6. [8] जलं Pt_2. [9] पार्श्वकौ K_5, K_6. [10] अदने K_5. [11] चिमिचिमायते K_5. [12] °रसत्वात् J_2, Pt_2. [13] सर्जने B_1, K_5. [14] प्रीणयति B_1, I, K_2. [15] प्रीणने K_6. [16] 'वेंगि' D_2.

(पा.) वीरवृक्षो—भल्लातकी त्रिषु। [1]भल्लातकीवृक्षनामानि। 'जीडिचेट्टु'॥ गर्दभाण्डे—प्लक्षश्च। अश्वत्थानुकारिणः प्लक्षस्य नामानि। '[2]कलजुव्वि'॥ तिन्त्रिणी—आम्लिका। तिन्त्रिणीवृक्षनामानि॥ 'तिन्तिडा तिन्तिडी' इत्येते च। 'चिन्तचेट्टु'॥ अथो पीतसारके—जीवकाः। असनवृक्षनामानि। 'वेङ्गिस'।

'प्रियविमानितमानवतीरुषां
निरसनैरसनैरवृथार्थता।' (शिशु. ६. ४७)

इति माघप्रयोगाद् ह्रस्वादिः। 'पीठेभस्कन्धयोः क्लीबमासनं ना तु जीवके'[3] इति रभसकोशपाठाद् दीर्घादिः॥ ४२–३ ॥

[1] भल्लातक° B_3. [2] 'पचजुव्वि' B_3. [3] नाम्रजीवकः B_3.

साले तु सर्जकार्श्याश्वकर्णकाः सस्यसंवरः॥ ४४॥
नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः।

(त्रि.) साल इति—स्यति कुष्ठरोगमिति सालः। 'षोऽन्तकर्मणि'। सृजति निर्यासमिति सर्जः। 'सृज विसर्गे'। [1]कृशयति [2]कुष्ठरोगमिति कार्श्यः। 'कृश तनूकरणे'। कार्ष्य इति वा पाठः। [3]अश्वकर्णाभानि पत्राण्यस्य अश्वकर्णकः[4]। सस्यं [5]वृक्षादिफलं संवृणोतीति सस्यसंवरः। 'वृञ् वरणे'। सालनामानि। 'मद्दिचेट्टु'॥ नद्यां भवः सर्जो नदीसर्जः। वीरोऽर्जुनस्तन्नामकत्वाद्[6] वीरतरुः। अत एव इन्द्रस्य प्रियो द्रुर्वृक्षः इन्द्रद्रुः। शाखाभिः ककुभो[7] व्याप्नोतीति ककुभः। शौक्ल्यात् अर्जुनः। इन्द्रप्रियत्वाद्वा। अर्जुनवृक्षनामानि। 'वेरुमद्दि'॥ ४४॥

[1] कृशति K_5, K_6. [2] कुष्ठादीन् Pt_2. [3] अश्वकर्णाभपत्रत्वात् J_2, K_5, K_6. [4] °कर्णिः J_2. [5] Pt_2 omits वृक्षादि. [6] संज्ञकत्वात् K_5, K_6. [7] Pt_2 adds दिशः, कं शीतं कुभ्नातीति वा ककुभः Pt_2.

(पा.) साले तु—सस्यसंवरः। सालवृक्षनामानि। ‘[1]नल्लमद्दि’॥ नदीसर्जो—अर्जुनः। [2]नदीसर्जनामानि। ‘येरुमद्दि’॥ ४४॥

[1] ‘मद्दिचेट्टु’ B_3. [2] अर्जुनवृक्षनामानि B_3.

राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः॥ ४५॥
इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ।

(वि.) राजादन इति—राजभिरद्यते राजादनः। ‘अद भक्षणे’। अध्यक्षाणि श्रेष्ठानि फलान्यस्य[1] फलाध्यक्षः। क्षीरवन्मधुराणि फलान्यस्याः क्षीरिका[2]। क्षीरिकानामानि। ‘पालचेट्टु’॥ इङ्गत्यूर्ध्वं गच्छतीति इङ्गुदी। इङ्गुदश्च। ‘[3]इगि लिगि गत्यर्थाः’। [4]तापसानां तरुः तापसतरुः। इङ्गुदीनामनी। ‘गारचेट्टु’॥ भूरित्यव्ययम्। भूर्भूम्यां जायत[5] इति भूर्जः। ‘जनी प्रादुर्भावे’। [6]चर्माभपत्रयोगात् चर्मी। मृद्वी त्वगस्य मृदुत्वक्। भूर्जनामानि। ‘[7]भुजपत्रवुचेट्टु’॥ ४५॥

[1] D_2, K_2 add सन्तीति. [2] क्षीरयुक्तफलानीति वा K_3; ‘पालेय मर’ J_2. [3] ‘इगि गतौ’ J_2. [4] तपस्विजनोपयुज्यमानत्वात् Pt_2. [5] जातः J_2. [6] चर्माकार° Pt_2. [7] ‘भूर्जपत्रमुपेरु’ B_1, K_3.

(पा.) राजादनः—क्षीरिकायाम्। क्षीरिकावृक्षनामानि। ‘पालचेट्टु’॥ अथ द्वयोः—तापसतरुः। [1]इङ्गुदतरुनामनी। ‘गारचेट्टु’॥ भूर्जे—मृदुत्वचौ। [2]भुजपत्रनामानि। ‘भुजपत्रवृक्षमु’। ‘भूर्जपत्रे भुजो भूर्जो मृदुत्वक् [3]चर्मिचर्मिकौ’ इति वैजयन्ती (पृ. ४८, श्लो. ४५)॥ ४५॥

[1] इङ्गुदी° B_3. [2] भूर्जपत्र° B_3. [3] चर्मिकावपि B_3.

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः॥ ४६॥
पिच्छा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः।
चिरबिल्वो नक्तमालः करजश्च करञ्जके॥ ४७॥

(वि.) पिच्छिलेति—पिच्छा निर्यासोऽस्या अस्तीति पिच्छिला। पूरयति तूलेन फलानीति पूरणी। 'पूरी आप्यायने'। मुञ्चति रसमिति मोचा। 'मुच्लृ मोक्षणे'। स्थिरमायुर्यस्य [1]कालसहत्वात् स्थिरायुः। चिरमायुर्यस्य चिरायुरिति वा पाठः। [2]शालते विटपैरिति शाल्मलिः। शाल्मली वा। 'शाल श्लाघायाम्'। शाल्मलीनामानि। '[3]बूरुगुचेट्टु'॥ पराङ्गुलिसङ्गत्वात् पिच्छा। शाल्मलीं वेष्टयतीति शाल्मलीवेष्टः। शाल्मलिनिर्यासनाम। '[4]बूरुगुबंक'॥ रोचते सूक्ष्मतयेति रोचनः। 'रुच दीप्तौ'। कूटा कुत्सिता चासौ शाल्मलिश्च कूटशाल्मलिः। '[5]कोण्ड बूरुगु'॥ चिरिणोति चिरी। 'चिरि जूरि दाश हिंसायाम्'। चिरिणं हिंस्ररोगं बिलति भिनत्तीति चिरिबिल्वः। 'बिल भेदने'। नक्तमलति मण्डयतीति नक्तमालः। 'अल भूषणादौ'। नक्तं रात्रौ भूताना-मालयत्वात्[6] नक्तमालः। कं जलं रञ्जयतीति करजः। करञ्जकश्च। 'रञ्ज रागे'। करञ्जवृक्षनामानि। '[7]कानुगुचेट्टु॥ ४६–७॥

[1] स्थिरत्वात् J_2. [2] शाल्यते Pt_2. [3] 'बूरद मर' J_2. [4] 'बुरदबीयल' J_2. [5] 'पिन्नबूरुगु' K_2, K_5; 'चिक्कबुर' J_2. [6] आश्रयत्वात् I, K_2, Pt_2; भूताश्रयत्वादलं भूतसंघोऽस्मिन्निति J_2. [7] 'हलिगिनमर' J_2.

(पा.) पिच्छिला—शाल्मलिर्द्वयोः। 'शालते शाल्मलिः शलति शल्मलिः' इति सुभूतिटीकायां दीर्घादिर्ह्रस्वादिश्च व्युत्पादितः। शाल्मलिवृक्षनामानि। '[1]भूरुग'॥ पिच्छा—शाल्मलीवेष्टे। शाल्मलिनिर्यासनाम। 'बूरुगबंक'॥ रोचनः—शाल्मलिः। हंसशाल्मलिनामनी। 'कोण्डबूरुङ्ग'॥ चिरबिल्वो—करञ्जके। करञ्जनामानि। 'कानुग'॥४६–७॥

[1] 'बूरुगुचेट्टु' B_3.

प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः।
करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी॥ ४८॥

(वि.) प्रकीर्य इति—प्रकीर्यते कलहस्थान इति प्रकीर्यः। 'कॄ विक्षेपे'। पूतिगन्धिः करजः पूतिकरजः। पूतिकश्च[1]। कलेः [2]कलहस्य मारकः नाशकः कलिमारकः। कलिं करोतीति कलिकारक इति वा पाठः। पूतिकरञ्जनामानि। 'नेमलियड्डुगुचेट्टु'॥ षड् ग्रन्थयो यस्य षड्ग्रन्थः। 'आरुकनुपुलुगलकानुग'॥ मर्कटवत्[3] पाटयतीति मर्कटी। 'कोन्तिवन्नेकानुग'॥ अङ्गारवर्णा वल्ल्योऽस्याः सन्तीति अङ्गारवल्लरी। 'निप्पुवन्नेगल[4] पूगुत्तुलु गलकानुग'॥ एते करञ्जभेदाः॥ ४८॥

[1] दुर्गन्धत्वात् पूतिकः J_2, Pt_2. [2] कलहंसस्य K_2. [3] मर्कटवर्णत्वात् K_5, Pt_2. [4] 'रक्तपुष्पदहलिगिलु' J_2.

(पा.) प्रकीर्यः—कलिमारकः। पूतीकोऽपि। 'गौरः प्रकीर्णः पूतीकः सुमनामृतपत्रकः' इति शेषः। 'पूतीकपत्रगजचिर्भटचव्यवह्वान्' इति धन्वन्तरिश्च। पूतिकरजनामानि। 'नेमिलिचेट्टु'॥ करञ्जभेदाः—अङ्गारवल्लरी। षड्ग्रन्थादयः करञ्जभेदा भवन्ति॥ षड्ग्रन्थः 'गण्डुलकानुग'॥ मर्कटी 'तीङ्गेकानुग'॥ अङ्गारवल्लरी 'निप्पुलवन्नेगुत्तुलकानुग'॥ ४८॥

रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः।
गायत्री बालतनयः खदिरो दन्तधावनः॥ ४९॥

(त्रि.) रोहीति—[1]भिन्नप्ररूढोऽपि रोहतीति रोही। नकारान्तः। रोहितकश्च। रोहिरिति इकारान्त इति केचित्। 'रुह बीजजन्मनि प्रादुर्भावे च'। प्लीहाख्यरोगशत्रुः[2] प्लीहशत्रुः। दाडिमस्येव [3]पुष्पाण्यस्य दाडिमपुष्पकः। रोहितकनामानि। 'मुल्लुमोदुग'॥ गायन्तं वैद्यं त्रायत इति गायत्री। 'त्रैङ् पालने[4]'। इयमीकारान्तः[5]। [6]बालः सूक्ष्मः तनयः पत्राख्यप्रसवो यस्य बालतनयः। खदति स्थिरतरं[7] भवतीति खदिरः। 'खद [8]स्थैर्ये'। दन्तान् [9]धावन्त्यनेनेति दन्तधावनः। 'धावु गतिशुद्ध्योः'। खदिरनामानि। [10]'चन्द्रचेट्टु'॥ ४९॥

[1] छिन्न° B_1, I, K_2; छिन्नोऽपि प्ररूढो Pt_2. [2] °आख्यस्य रोगस्य B_1, K_5, Pt_2. [3] पुष्पः J_2, K_2, K_5. [4] रक्षणे K_2, K_6. [5] तदीकारान्तः J_2. [6] बालाः सूक्ष्माः पत्रात्मकास्तनया यस्य Pt_2; पत्रात्मकप्रसवः J_2. [7] स्थिरीभवति Pt_2. [8] K_6 adds हिंसायां च. [9] धावयन्ति B_1, I, J_2, K_3, Pt_2. [10] 'मरुयदमर' J_2.

(पा.) रोही—दाडिमपुष्पकः। रोहिर्नान्त इकारान्तश्च। 'ढ्रलोप—' (६. ३. १११) इति दीर्घः। रोहितवृक्षनामानि। स च मगधविषयप्रसिद्धः। कण्टकपलाश इति केचित्। तदज्ञानविलसितमेव॥ गायत्री—दन्तधावनः। खदिरतरुनामानि। 'चंड्रचेट्टु'। 'गायत्री खदिरे स्त्री स्याच्छन्दस्यपि षडक्षरः' इत्यभिधानप्रसिद्ध्या स्त्रीलिङ्गः। 'पारिजातजपानिम्बवह्निगायत्रिणां पृथक्' इति वैद्यकप्रसिद्ध्या नान्तपुंलिङ्गोऽपि॥४९॥

अरिमेदो विट्खदिरे कदरः खदिरे सिते।
सोमवल्कोऽप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ॥ ५०॥

एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ॥ ५१ ॥

(वि.) अरिमेद इति—[1]अरिर्दुःसहो मेदोऽस्य[2] अरिमेदः । अयमकारान्तः । विड्गन्धी[3] खदिरो विट्खदिरः । 'दुर्गन्धमुगुलचन्द्रचेट्टु' ॥ कुत्सितं गन्धं दृणातीति कदरः । 'दॄ विदारणे' । सोमवत् चन्द्रवत् वल्कं वल्कलमस्य सोमवल्कः । श्वेतखदिर-नामनी । 'वेलिचन्द्रचेट्टु' ॥ व्याघ्रपुच्छाकारशाखायोगाद् व्याघ्रपुच्छः । गन्धर्वस्य [4]भूतविशेषस्य हस्त इव स्थूलपत्राण्यस्य गन्धर्वहस्तकः । [5]ईरयति वातं नाशयतीति एरण्डः । 'ईर[6] क्षेपे' । उरु भृशं वातं वाति नाशयतीति उरुबूकः । 'वा गति-गन्धनयोः' । वबयोरभेदः । रोचते [7]पर्णैरिति रुचकः । 'रुच दीप्तौ' । चित्रवर्णत्वात् चित्रकः । चञ्चति[8] वायुना चञ्चुः । 'चञ्चु गतौ' । पञ्चाङ्गुलयोऽवयवाः[9] पत्रात्मके हस्तेऽस्येति पञ्चाङ्गुलः । मण्डयति स्वप्रदेशमिति मण्डः । 'मडि [10]भूषायाम्' । आमण्ड इति वा पाठः । यत्र क्वापि वर्धत इति वर्धमानः । 'वृधु वृद्धौ' । व्यडति [11]रोगिणमुद्धरतीति व्यडम्बकः । 'अड उद्यमने' । एरण्डनामानि । 'आमुदमुचेट्टु' ॥ ५०—१ ॥

[1] अरिः शत्रुरिव J_2, Pt_2. [2] स्रावः Pt_2. [3] विड्गन्धः K_2, K_3. [4] Pt_2 adds मृगविशेषस्य. [5] J_2 adds आ समन्तात्. [6] 'ईर प्रेरणे' K_6. [7] वर्णैः K_6. [8] चलति पत्रभरेण K_5, K_6. [9] अङ्गुलय इव पत्राणि K_5; पर्णानि F_1. [10] व्याप्तौ च D_2; हर्षे च K_5. [11] रोगं हन्तुं Pt_2.

(पा.) अरिमेदो विट्खदिरे । दुर्गन्धखदिरनामनी । 'तुम्म' ॥ कदरः—सोम-वल्कोऽपि । श्वेतसारखदिरनामानि ॥ 'उण्डुचेट्टु' ॥ अथ व्याघ्रपुच्छ—व्यडम्बकाः । एरण्डनामानि । 'आमुदमुचेट्टु' ॥ ५०—१ ॥

अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा ।
पिण्डीतको मरुवकः श्वसनः करहाटकः ॥ ५२ ॥
शल्यश्च मदने शक्रपादपः पारिभद्रकः ।
भद्रदारु द्रुकिलिमं पीतदारु च दारु च ॥ ५३ ॥
पूतिकाष्ठं च सप्त स्युर्देवदारुणि

(वि.) अल्पा इति—अल्पा शमी शमीरः। 'चिन्नदैनजम्मि'॥ [1]शमयति दोषानिति शमी। 'शमु उपरमे'। सक्तुवत् स्वादूनि [2]फलान्यस्य सक्तुफला। [3]दोषशमनात् शिवा। शमीनामानि। '[4]जम्मिचेट्टु'॥ स्वल्पं पिण्डीभावम् इतः प्राप्तः पिण्डीतकः। 'इण् गतौ'। [5]विषपुष्पत्वात् म्रियन्तेऽनेन[6] मरुवकः। 'मृङ् प्राणत्यागे'। श्वसन्त्य[7]नेकरोगहरत्वात् श्वसनः। 'श्वस प्राणने'। दुःस्पर्शत्वेन[8] करं हन्तीति करहाटकः। 'हन हिंसागत्योः'। [9]शल्यं कण्टकमस्यास्तीति [10]शल्यः। मदयतीति मदनः। 'मदी हर्षग्लपनयोः'। मरुवकनामानि। 'मङ्गचेट्टु'॥ शक्रस्य प्रियः पादपः शक्रपादपः। पारिं निष्ठां प्राप्तं भद्रमस्य पारिभद्रकः। भद्रं च तद्दारु च भद्रदारु। द्रौ स्कन्धे किलिमं निर्यासोऽस्य द्रुकिलिमम्[11]। पीतवर्णं च तद्दारु च पीतदारु। पूतिदार्विति पाठे पूतिगन्धि काष्ठं पूतिकाष्ठं,[12] पूतिकाष्ठं च तद्दारु च पूतिदारु। एतौ शब्दौ विरुद्धलक्षणया [13]निष्पन्नौ। दीर्यत इति दारु। 'दॄ विदारणे'। देवानां दारु देवदारु। अयं पुल्लिङ्गेऽपि। देवदारुनामानि। 'देवदारुवृक्षमु'॥ ५२–३॥

[1] शाम्यति J_2.　[2] स्वादुफलत्वात् K_5, K_6.　[3] विहीनत्वात् B_1, K_5.
[4] 'वंनिय मर' J_2.　[5] विषपुष्पात् K_5; पुष्पवत्त्वात् B_1.　[6] स्वादनेन B_1.　[7] अनेन F_1, K_5, K_6.　[8] दुःस्पर्शत्वात् Pt_2.　[9] B_1, K_5 add स्वल्पं.　[10] शल्यकण्टकः D_2.
[11] द्रुकीलिममिति वा पाठः K_6.　[12] पूति उग्रगन्धं काष्ठमस्येति Pt_2.　[13] व्युत्पन्नौ F_1, I, K_3, K_5.

(पा.) अल्पा शमी—स्यात्। अल्पशमीवृक्षनाम। 'नेलजम्मि[1]'॥ शमी—शिवा। शमीवृक्षनामनी। 'जम्मिचेट्टु'॥ पिण्डीतको—श्वसनः करहाटकः। स्वसन इति केचित्॥ शल्यश्च मदने। मदनवृक्षनामानि। 'मङ्गचेट्टु'॥ शक्रपादपः—देवदारुणि। देवदारुद्रुमनामानि। 'देवदारुचेट्टु'॥ ५२–३॥

[1] B_3 adds °चेट्टु.

अथ द्वयोः।

पाटलिः पाटलामोघा काला स्थाली फलेरुहा॥ ५४॥
कृष्णवृन्ता कुबेराक्षी श्यामा तु महिलाह्वया।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली॥ ५५॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सः।

(वि.) अथेति—[1]पाटलवर्णपुष्पत्वात् पाटलिः। पाटला च। उपयोगिपुष्पत्वाद् अमोघा। मोघा इत्यपि पाठः। [2]कृष्णवृन्तत्वात् काला[3]। [4]रसाधारकुम्भत्वात् स्थाली। काचस्थालीति पाठे काचवर्णा स्थाली वृन्तमस्या अस्तीति काचस्थाली। कालस्थालीति पाठे [5]कालवर्णस्थालीत्वात् कालस्थाली। साचस्थालीति [6]पाठे सा च स्थालीति पदच्छेदः। साङ्कुरफलत्वात् फले रोहतीति फलेरुहा। कृष्णं वृन्तमस्या अस्तीति कृष्णवृन्ता। यक्षाक्षितुल्यपुष्पत्वात् कुबेराक्षी। पाटलाया नामानि। '[7]कलिगोट्टुचेट्टु'॥ श्याम-वर्णत्वात् श्यामा। महिलायाः स्त्रियाः [8]आह्वयः नाम यस्याः सा महिलाह्वया। स्त्रियाः[9] यानि नामानि तान्यस्या वर्तन्त[10] इत्यर्थः। लतारूपत्वात् लता। गवि भूमौ वन्द्यते[11] स्तूयत इति गोवन्दनी। 'वदि अभिवादनस्तुत्योः'। गुद्यते क्रीड्यतेऽनयेति गुन्द्रा। 'गुद क्रीडायाम्'। प्रीणाति रोगहरणेन प्रियङ्गुः। 'प्रीञ् [12]तर्पणे कान्तौ च'। फलयोगात् फलिनी। फलति विशीर्यत इति वा। फली च। 'ञिफला विशरणे'। विष्वक् सिनोति बध्नातीति[13] विष्वक्सेना। गन्धानि स्थूलानि फलान्यस्या गन्धफली। गन्धप्रधानं फलमस्या इति वा। किंचित्[14] रम्भा कारम्भा। प्रिय एव[15] प्रियकः। प्रियङ्गुनामानि। 'प्रेंकणपुचेट्टु'॥ ५४–५॥

[1] आताम्रपुष्पत्वात् K_5, K_6. [2] काल° Pt_2. [3] कालः K_3. [4] पुष्परसाधार-त्वात् K_5, K_6. [5] काला कृष्णा स्थाली यस्याः B_1, K_5. [6] इति वा पाठः, तदा F_1. [7] 'हादकायमर' J_2. [8] आह्वा F_1, I, J_2. [9] स्त्रियां F_1; स्त्रीणां K_5. [10] सन्ति B_1, F_1, K_3. [11] वन्दते K_5, K_6. [12] प्रीणने K_6. [13] B_1, D_2, K_2, K_5 add सर्वतः. [14] किंचिद्रम्भाकारत्वात् B_1, K_5; ईषद्रम्भाकारा Pt_2. [15] प्रिय इव K_5, K_6.

(पा.) अथ द्वयोः पाटलिः—अमोघा। 'अमोघा पाटलीर्न स्त्री' इति वैजयन्ती (पृ. ५२, श्लो. ९०)। 'मोघा स्त्री पाटलीवृक्षे मोघस्त्रिषु निरर्थकः' इति रुद्रः॥ काचस्थाली—कुबेराक्षी। पाटलातरुनामानि। 'कालिगोट्टु'॥ श्यामा तु—फली। 'प्रियके तु प्रियङ्ग्वाख्या[1]' इति वैजयन्ती (पृ. ५०, श्लो. ६६)॥ विष्वक्सेना—प्रियका च सा। प्रियङ्गुवृक्षनामानि। 'प्रेंकणमुस्तु'[2]॥ ५४–५॥

[1] 'प्रियङ्गुः पीततण्डुला' इत्यपि मुद्रितग्रन्थे (पृ. १२७, श्लो. ५५). [2] B_3 adds 'सेनमु.'

मण्डूकपर्णपत्त्रोर्णनटकट्वङ्गटुण्टुकाः॥ ५६॥
स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः।
शोणकश्चारलौ तिष्यफला त्वामलकी त्रिषु॥ ५७॥

अमृता च वयस्था च त्रिलिङ्गस्तु विभीतकः ।
नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥ ५८ ॥

(वि.) <u>मण्डूकपर्णेति</u>—मण्डूका इव पर्णान्यस्य [1]मण्डूकपर्णः । पत्त्रेपूर्णा यस्य पत्त्रोर्णः । नटति वातेनेति नटः । 'नट नृत्तौ' । [2]कट्वन्यङ्गान्यस्येति कट्वङ्गः । शिखाभिः[3] टुंटु इति शब्दं कायतीति टुण्टुकः । 'कै शब्दे' । डुण्डुक इति वा पाठः । स्योनं सुखमकतीति स्योनाकः । 'अक अग कुटिलायां गतौ' । श्योनाक इति पाठे श्यायत इति श्योनाकः । 'श्यैङ् गतौ' । [4]शुकनासाकाराणि पुष्पाण्यस्य शुकनासः । ऋक्ष्णोति [5]हिनस्तीति ऋक्षः । 'ऋक्ष हिंसायाम्' । दीर्घं वृन्तमस्य दीर्घवृन्तः । कुटन्[6] वक्रीभवन्[7] नटतीति कुटन्नटः । 'नट नृत्तौ' । शोणतीति शोणकः । 'शोणृ वर्णगत्योः' । शोनक इति [8]पाठे शवति व्याप्नोति सर्वतः शाखाभिरिति शोनकः । 'शव गतौ' । इयर्ति [9]पित्तादिकमपसरतीत्यरालुः । 'ऋ गतौ' । शोणकनामानि । 'पेद्दमानु' ॥ तिष्यनक्षत्रवद्[10] भास्वरं फलमस्या इति तिष्यफला[11] । आमलते गुणानामलकी । 'मल मल्ल धारणे' । [12]अमलफलयोगाद्वा । रसायनत्वादमृता । [13]वयसि तिष्ठत्यस्या भक्षणेनेति वयस्था । वयो यौवनं तिष्ठति स्थिरीभवत्यनयेति वा । 'ष्ठा गतिनिवृत्तौ' । आमलकीनामानि । [14] 'उसिरिकचेट्टु' ॥ बिभेत्यस्माद् रोग इति विभीतकः । 'ञिभी भये' । अक्ष्णोति फलैरिति [15]अक्षः । 'अक्षू व्याप्तौ' । तुष्यति स्वल्पवारिणेति तुषः । 'तुष तुष्टौ' । कर्षमात्राणि फलान्यस्येति कर्षफलः । भूतानामावासो[16] भूतावासः । कलेराश्रयो द्रुमः कलिद्रुमः[17] । विभीतकनामानि । 'दाण्ड्रचेट्टु' ॥ ५६–८ ॥

[1] मण्डूकाकाराणि पर्णानि J_2, Pt_2. [2] स्कन्धाः B_1, F_1, J_2, K_5. [3] शिम्ब्यादिभिः K_5, K_6. [4] शुकनासेव F_2, Pt_2. [5] अस्थि° B_1, F_1, I, K_3; अक्षिरोगान् D_2, K_6. [6] कुटं वक्रीभावं F_1, I, K_3; वक्राकारं J_2. [7] K_6 adds स्यन्दने; स्पन्दति F_2. [8] वा पाठः, तदा B_1, F_1, I, J_2. [9] अवसादयति K_5. [10] तिष्यवच्छुभफलत्वात् F_2, Pt_2; तिष्यनक्षत्रयुक्ते काले फलं करोतीति वा Pt_2. [11] तिष्यफली K_5, K_6. [12] आमल° K_6. [13] नववयसि J_2. [14] 'नेल्लियमर' J_2. [15] ना अक्ष इति पदच्छेदः F_2. [16] आवासत्वात् K_3. [17] कलिपुरुषस्य प्रियः K_3.

(पा.) <u>मण्डूकपर्ण—शोणकश्चारलौ</u> । 'भूतपुष्पो नटोदङ्कभक्षकट्वङ्ग आरलुः' इत्यभिधानाद्दीर्घादिः । 'मयूरजङ्घोऽरलुकः [1]प्रियकेतुः कुटन्नटः' इत्यभिधानात् ह्रस्वादिः । आरलुद्रुमनामानि । 'पेनुमानु । दुंदिलमुन्नु' ॥ <u>तिष्यफला—वयस्था च</u> । आमलकनामानि । 'उशिरिकचेट्टु' । अनुक्तम्—'माकन्दी तु फलं तस्याः' । तत्फलनाम ।

'उशिरिक्काय' ॥ त्रिलिङ्गः—विभीतकः । नाक्षः । [2]स्वग्रहणं नियमार्थम् ॥ तुषः—कलिद्रुमः । विभीतकतरुनामानि । 'तांडिचेट्टु' ॥ ५६–८ ॥

[1] प्रियजीव इति मुद्रितधन्वन्तरिनिघण्टुग्रन्थे. [2] नाक्ष इत्यत्र 'ना' इति पुंलिङ्गग्रहणं नियमार्थम्.

अभया त्वव्यथा पथ्या कायस्था पूतनामृता ।
हरीतकी हैमवती रेचकी श्रेयसी शिवा ॥ ५९ ॥

(वि.) अभयेति—नास्ति [1]भयमस्याः सकाशाद् अभया । न [2]व्यथयति रोगहरत्वाद् अव्यथा । 'व्यथ भयसंचलनयोः' । निरामये पथि साध्वी पथ्या । कायस्तिष्ठत्यनयेति कायस्था । काये [3]शरीरे आरोग्यकरी तिष्ठतीति वा । वयस्थेति पाठे व्युत्पत्तिः पूर्वोक्ता । पूतयति[4] पुरुषं पूतं करोतीति पूतना । 'पूञ् पवने' । रसायनत्वात् नास्ति मृतिर्मरणमस्या इत्यमृता । हरति रोगानिति हरीतकी । 'हृञ् हरणे' । हिमवति गिरौ प्रचुरा हैमवती । रेचयति विरेचनं करोतीति रेचकी । 'रिचिर् विरेचने[5]' । श्रेयः करोतीति श्रेयसी । दोषशमनात्[6] शिवा । हरीतकीनामानि । '[7]करकचेट्टु' ॥ ५९ ॥

[1] रोगभयं यस्याः Pt_2. [2] नास्ति रोगव्यथास्याः F_2, Pt_2. [3] देहे B_1, J_2, K_5. [4] पुनाति देहं J_2, Pt_2. [5] 'रिचिर् पृथग्भावे' Pt_2; चेतकीति पाठे चेतयति चेतकी । 'चिती संज्ञाने' F_2. [6] रोग° J_2. [7] 'अलिलेमर' J_2.

(पा.) अभया—वयस्था । कायस्थेत्यपि ॥ पूतना—शिवा । हरीतकीनामानि । 'करकचेट्टु' ॥ ५९ ॥

पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः ।
कर्णिकारः परिव्याधे लकुचो लिकुचो दहुः ॥ ६० ॥

(वि.) पीतद्रुरिति—पीतवर्णो द्रुर्द्रुमः[1] पीतद्रुः । सरति विस्तारं प्राप्नोतीति सरलः । सरलसंज्ञकत्वाद्वा । पूतिगन्धि काष्ठं[2] पूतिकाष्ठम् । सरलनामानि । 'सरल[3]पुचेट्टु' ॥ अस्य द्रुमस्योत्पलानीव पुष्पाणि सन्तीति द्रुमोत्पलः । [4]कर्णिकाकारभूषणम् इयर्तीति कर्णिकारः । 'ऋ गतौ' । वायुना परिविध्यत[5] इति परिव्याधः । 'व्यध ताडने' । कर्णिकारनामानि । 'कोण्डगोंगु' ॥ लक्यते आस्वाद्यत इति लकुचः । लिकुचश्च । 'लकि आस्वादने' । अग्निना दह्यत इति दहुः[6] । 'दह भस्मीकरणे' । 'कम्मरेंगु ॥ ६० ॥

[1] K_2, K_3 add वृक्षः.　[2] °काष्ठत्वात् K_5.　[3] 'सरलमर' J_2.　[4] कर्णिकां कर्णभूषणं B_1, K_5.　[5] परिविध्यति K_5, K_6.　[6] दहति, तोहति वा डहुः। डदयोरभेदः। 'तुहिर् अर्दने' Pt_2.

(पा.) पीतद्रुः—पूतिका च। सरलनामानि। 'अंदुगचेट्टु'॥ अथ द्रुमोत्पलः—परिव्याधः। कर्णिकारनामानि। 'कोंडगोंड्डु'॥ लकुचो—डहुः। गजजम्बीरनामानि। 'गजनिम्म'॥ अनुक्तम्—'शाकः क्रकचपत्रः स्यात् पृथक्छदहरीतकौ'। शाकवृक्षनामानि। 'तेंकुचेट्टु'॥ ६०॥

पनसः कण्टकिफलो निचुलो हिज्जलोऽम्बुजः।
काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला॥ ६१॥

(वि.) पनस इति—पन्यते स्तूयत[1] इति पनसः। 'पन स्तुतौ'। पणस इति पाठे पण्यते [2]व्यवह्रियते पणसः। 'पण व्यवहारे स्तुतौ च'। कण्टकितानि[3] फलान्यस्य कण्टकिफलः। 'पनस चेट्टु'॥ निचोल्यते[4] जलेनेति निचुलः। 'चुल [5]समुच्छ्राये'। हितं जलमस्य हिज्जलः। अम्बुनि जायत इत्यम्बुजः। 'जनी प्रादुर्भावे'। निचुलनामानि। 'एर्रगन्नेरु'॥ काकप्रिया च सा [6]उदुम्बरकल्पा च काकोदुम्बरिका। निःसारत्वात् [7]फलतीति फल्गुः। 'ञिफला विशरणे'। मलात् श्वित्रादिकात् पुनातीति मलपूः। 'पूञ् पवने'। मलं यावयते[8] कुत्सयतीति मलयूरिति वा पाठः। 'यु जुगुप्सायाम्'। जघने स्कन्धे फलानि यस्याः सा जघनेफला। 'कुक्कमेडिचेट्टु'॥ ६१॥

[1] B_1, G, K_2 add स्वादुतया.　[2] पण्यत इति व्युत्पत्तिः K_2, K_3.　[3] कण्टकवन्ति G; कण्टकयुक्तानि Pt_2.　[4] निचुल्यते K_5.　[5] 'चुल निमज्जने' K_3, K_6.　[6] उदुम्बरी G, Pt_2; 'ब्रह्ममेदिचेट्टु' K_3.　[7] फलवती K_6.　[8] यापयति K_5, K_6.

(पा.) पनसः कण्टकिफलः। पनसवृक्षनामनी। 'पनसचेट्टु'। पवर्गद्वितीयादिरिति केचित्। पणस इति टवर्ग्यमध्यम इति केचित्॥ निचुलो—जघनेफला। काकोदुम्बरनामानि। 'ब्रह्ममेडि[1]'॥ ६१॥

[1] ब्रह्ममेदिचेट्टु B_3.

अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः।
पिचुमन्दश्च निम्बेऽथ पिच्छिलागुरु शिंशुपा॥ ६२॥

(वि.) अरिष्ट इति—न रिष्यते [1]कुष्ठरोगग्रस्तोऽनेनेति अरिष्टः। 'रिष हिंसायाम्'। सर्वतो भद्रमस्य[2] सर्वतोभद्रः। हिङ्गुवन्निर्यासोऽस्येति हिङ्गुनिर्यासः[3]। [4]मल्यते काकैर्वेष्टयत इति मालकः। 'मल [5]धारणे'। पिचुं कुष्ठं मन्दयतीति पिचुमन्दः[6]। 'मदि हर्षग्लपनयोः'। आरोग्यं नयतीति निम्बः। 'णीञ् प्रापणे'। निम्बनामानि। 'वेपचेट्टु'॥ पिच्छास्या अस्तीति पिच्छिला। न गुरु अगुरु[7]। रोगं शिनोति [8]तनूकरोतीति शिंशुपा। 'शीञ् निशातने'। शिंशपेति वा पाठः। शिंशुपानामानि। 'डरुगुडुम्रानि'॥ ६२॥

[1] रोगिजनः G, Pt_2. [2] K_5 adds अस्तीति. [3] हिङ्गुनो निर्यास इव निर्यासः G, Pt_2. [4] माल्यते K_6; मलते काकसमूहं Pt_2. [5] 'मल मल्ल धारणे' K_3, K_6, Pt_2. [6] पिचुं मृद्नातीति पिचुमर्द इति वा पाठः; 'मृद क्षोदे' G, Pt_2. [7] न गुरुः अगुरुः K_3, K_6. [8] नाशयति B_1, K_2, K_3, K_5.

(पा.) अरिष्टः—निम्बे। निम्बनामानि। 'वेंपचेट्टु'। अनुक्तम्—'कालशाकस्तु कैडर्यः'। कैडर्यनामनी। 'करिवेंपचेट्टु'॥ अथ पिच्छिलागुरु। नपुंसकम्। 'अगुरु स्त्री शिंशपायां जोङ्गके लघुनि त्रिषु' इति रुद्रः। 'शिंशपा'॥ ६२॥

कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः।
भण्डिलोऽप्यथ चाम्पेयश्चम्पको हेमपुष्पकः॥ ६३॥

(वि.) कपिलेति—काम्यत इति कपिला। 'कमु कान्तौ'। [1]भस्मतुल्या मज्जा गर्भे अस्या अस्तीति भस्मगर्भा। हस्तिगर्भेति पाठे हस्तितुल्यो गर्भो मज्जा अस्या अस्तीति हस्तिगर्भा। कपिलानामनी। 'कंपुगलयरुगुडु चेट्टु'॥ पिच्छिलादीनि[2] भस्मगर्भान्तानि [3]पदानि शिंशुपाया नामानीति केचित्[4]॥ शीर्यते मृदुपुष्पत्वादिति[5] शिरीषः। 'शॄ हिंसायाम्'। कपीन्[6] तनोतीति कपीतनः। 'तनु विस्तारे'। भण्ड्यते[7] परिभाष्यते शुकैरिति भण्डिलः[8]। 'भडि परिभाषणे'। शिरीषनामानि। 'दिरिसेनपुचेट्टु'॥ [9]चम्पादेशे भवः चाम्पेयः। चम्यते षट्पदैरिति चम्पकः। 'चमु[10] अदने'। हेमवर्णं [11]पुष्पमस्येति हेमपुष्पकः। चम्पकनामानि। 'संपेंगचेट्टु'॥ ६३॥

[1] भस्मतुल्यो गर्भो मज्जा G, K_5. [2] पिच्छिलादि G, K_6. [3] K_3 adds पञ्च. [4] K_2 adds वृणन्ति. [5] सौकुमार्यात् G, Pt_2. [6] कपिं K_5, K_6. [7] भण्डतीति भण्डिलः, 'भडि कल्याणे' Pt_2. [8] भण्डिरः B_1, K_2, K_3, K_5. [9] चम्पाख्य° G, Pt_2; चम्पाख्ये B_1. [10] चमु छमु जमु K_6. [11] °वर्णपुष्पत्वात् K_5, K_6.

(पा.) कपिला—सा । [1]शिंशपावृक्षनामानि । 'पिच्छिला च महाश्यामा कृष्णसारस्तथागरुः' इति शेषे । 'यिरुगुडुचेट्टु' । शिरीषस्तु—भण्डिलोऽपि । ह्रस्वमध्यः । 'अथ भण्डिले कपीतनः शिरीषश्च' इति वैजयन्ती (पृ. ५१, श्लो. ७२) । शिरीषनामानि । '[2]दिरिशिनचेट्टु' ॥ अथ चाम्पेयः—हेमपुष्पकः[3] । चम्पकनामानि । 'संपेङ्गचेट्टु' । 'पञ्चपञ्चश्च सुरभिः' । एते च ॥ ६३ ॥

[1] शिंशुपा° B_3.　　[2] 'दिरिशेन°' B_3.　　[3] हिम° B_3.

एतस्य कलिका गन्धफली स्यादथ केसरे ।
वकुलो वञ्जुलोऽशोके समौ करकदाडिमौ ॥ ६४ ॥

(वि.) एतस्येति—गन्ध एव फलमस्या इति गन्धफली । चम्पककलिकानाम । 'संपेंगमोग्गुपेरु' ॥ के शिरसि सरति गन्धसारत्वात् केसरः । 'सृ गतौ' । (कविभिः) उच्यते रोगानत्तीति[1] वकुलः । 'वच परिभाषणे' । वकुलनामनी । 'पोगडचेट्टु' ॥ [2]वन्यते याच्यते कर्णपूरायेति वञ्जुलः । 'वनु याचने' । अश्नुते व्याप्नोतीत्यशोकः । 'अशू व्याप्तौ' । शोकनाशकत्वाद्वा । अशोकनामनी । '[3]अशोकवृक्षमु' ॥ करोति दोषाभावमिति करकः । 'डुकृञ् करणे' । किरति बीजानीति वा । 'कॄ विक्षेपे' । दल्यते पक्वावस्थायामिति दाडिमः । 'दल विशरणे' । दाडिमनामनी । '[4]दानिम्मचेट्टु' ॥६४॥

[1] नुदतीति B_1, D_2, K_6; अपनुदति K_5.　　[2] वर्ण्यते G, K_2.　　[3] 'अशोकपुचेट्टु' G, Pt_2.　　[4] 'दाडिम्बमु' K_2; 'दाडिमचेट्टु' K_3.

(पा.) एतस्य—स्यात् । एतत्कोरकनाम । 'संपेङ्गमुग्ग' ॥ अथ—बकुलः[1] । केसरवृक्षनामनी । 'पोगड[2]' । 'केसरः[3] सिंहपूर्वश्च भव्यपूर्वश्च लम्पटः' । एते च ॥ वञ्जुलोऽशोके । अशोकनामनी । 'अशोकमु' ॥ 'कङ्केलिः कर्णपूरकः' । एते च ॥ समौ—दाडिमौ । दाडिमद्रुमनामनी । 'दानिम्म' । 'स्वाद्वम्लो रक्तबीजश्च कुट्टिमः फलपाडवः[4]' । एतानि च ॥ ६४ ॥

[1] वकुलः B_3.　　[2] B_3 adds °चेट्टु.　　[3] 'केसरे वकुलो मद्यलालसः सिंहकेसरः' इति वैजयन्त्याम्.　　[4] °शाडवः इति त्रिकाण्डशेषे (पृ. ११, श्लो. २३७).

चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ ६५ ॥

(वि.) चाम्पेय इति—चम्पाख्यदेशे भवः[1] चाम्पेयः। के शिरसि सरतीति केसरः। 'सृ गतौ'। नागप्रियाणि केसरवन्ति पुष्पाण्यस्य नागकेसरः[2]। काञ्चनस्य स्वर्णस्याह्वयो यस्य काञ्चनाह्वयः[3]। नागकेसरनामानि। 'नागकेसरमु'॥ जयति [4]शोषादिरोगानिति जया। जयन्ती च। तर्कं [4]शोषादिविनाशहेतुभावम् [5]इयर्तीति तर्कारी। 'ऋ गतौ'। नद्यां भवा नादेयी। विजयते[6] शोभादिकमनयेति वैजयन्तिका[7]। जयन्तीनामानि। 'तक्किलिचेट्टु'॥ ६५॥

[1] भवत्वात् Pt_2. [2] नागो हस्ती तन्नाम केसरोऽस्येति वा Pt_2. [3] काञ्चनस्य सर्वाणि नामानि अस्येति D_2, K_5, K_6. [4] शोभादि° B_1, I. [5] K_5, K_6 add प्राप्नोति. [6] विजयत इति K_5, K_6. [7] 'जि जये' G, J_2.

(पा.) चाम्पेयः—काञ्चनाह्वयः। नागकेसरनामानि। 'नागकेसरमु'॥ जया—वैजयन्तिका। तर्कारीनामानि। 'तक्कोलचेट्टु'॥ ६५॥

श्रीपर्णमग्निमन्थः स्यात् कणिका गणिकारिका।
जयाथ कुटजः शक्रो वत्सको गिरिमल्लिका॥ ६६॥

(वि.) श्रीपर्णमिति—श्रीः शोभा पर्णेष्वस्य श्रीपर्णम्। [1]अग्निं मथ्नात्यस्मिन्निति अग्निमन्थः[2]। 'मन्थ विलोडने'। कणाः सन्त्यस्यामिति [3]कणिका। गणिकावत् [4]कुहकमियर्ति गच्छतीति गणिकारिका। जयति रोगानिति जया। 'जि जये'। अग्निमन्थस्य नामानि। 'कूरनेल्लिचेट्टु'॥ कुटिलो जायत इति कुटजः। 'जनी प्रादुर्भावे'। शक्रवृक्षत्वात् शक्रः। वस्ते त्वचमिति वत्सकः। 'वस आच्छादने'। गिरौ मल्लिकावत् तिष्ठतीति गिरिमल्लिका। कुटजनामानि। [5]'कोडिसेचेट्टु॥ ६६॥

[1] मन्थन्ति J_2. [2] B_1 omits 16 lines. [3] कर्णिका K_2. [4] मोहनतां Pt_2. [5] 'कोडसिगे' J_2.

(पा.) श्रीपर्णं—जया। अग्निमन्थवृक्षनामानि। 'नेल्लिचेट्टु'। अथ कुटजः—गिरिमल्लिका। कुटजनामानि। 'कोडिश'॥ ६६॥

एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले।
कृष्णपाकफलाविग्नसुषेणाः करमर्दके॥ ६७॥

(वि.) एतस्येति—[1]कलिङ्गदेशे जातं कलिङ्गम्। इन्द्रवृक्षफलत्वाद् यववीजाकृतित्वाच्च इन्द्रयवम्। दीपनादिकल्याणकारित्वाद्[2] भद्रयवम्। भद्रयवनामानि। '[3]कोडिसेपण्डु'॥ कृष्णं पाके फलमस्य कृष्णपाकफल[4]ः। आविजतेऽस्मादिति आविग्नः। 'ओविजी भयचलनयोः'। उद्विग्न इति पाठे उद्विजन्ते जनाः पित्तकरेऽस्मिन्निति उद्विग्नः। सुषेणाख्यकपिमुखाभफलत्वात्[5] सुषेणः। करेण [6]मृद्यते करमर्दकः। 'मृद मर्दने'। करमर्दकनामानि। '[7]करिवे चेट्टु'॥ ६७॥

[1] कलिङ्गफलत्वात् K_5, K_6.　　[2] G, Pt_2 add यवाकृतित्वाच्च.　　[3] 'कोडरीगनपील' J_2.　　[4] कृष्णवर्णपाकं फलमस्य Pt_2.　　[5] °मुखाभत्वात् J_2; मुखाकृतित्वात् Pt_2.　　[6] मर्द्यते J_2, Pt_2.　　[7] 'वोरिग' K_6.

(पा.) एतस्यैव—फले। एतत्फलनामानि। 'कोडिशकाय'। 'कुटजस्य फले क्लीबं कलिङ्गेन्द्रयवं स्मृतम्' इति रत्नकोशपाठात् समासाभिप्रेतम्। 'कलिङ्गं तु यवे ना तु देशपक्षिविशेषयोः' इति वैजयन्तीपाठाद् (पृ. २५९, श्लो. ३३) व्यासाभिप्रेतं कलिङ्गम् इन्द्रयवमिति॥ अनुक्तम्—'दोषघ्नाहस्तु कतकः'। कतकनाम। 'इण्डुपुचेट्टु'॥ 'जम्बूः स्त्री सुरभिच्छदः'। जम्बूनाम। 'नेरेडु'॥ कृष्णपाकफला—करमर्दके। करमर्दकनामानि। 'कलिवेचेट्टुन्नु वोंकचेट्टुन्नु'। शब्दार्णवे कृष्णपाकफलशब्दाः बहुधा विकल्पिताः—

'कृष्णः पाकः फलो विघ्नः सुषेणः करमर्दकः।
कृष्णपाकफलः कृष्णफलपाको वनालकः॥
कृष्णपाकफलादिश्च पाककृष्णः फलादिकः।
कृष्णपाकः पाककृष्णः फलकृष्णो वरालकः॥
पाककृष्णफलः पाकफलकृष्णः कराम्बुकः।
फलपाकः पाकफलो बोलः कृष्णफलो वशः॥'

इति॥ ६७॥

कालस्कन्धस्तमालः स्यात् तापिच्छोऽप्यथ सिन्दुकः।
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि॥ ६८॥

(वि.) कालस्कन्ध इति—कालवर्णः स्कन्धोऽस्य कालस्कन्धः। [1]तम्यते तापिभिरिति तमालः। 'तमु [2]काङ्क्षायाम्'। [3]तापिनः छादयतीति तापिच्छः। 'छद अपवारणे'। तमालनामानि। 'तमालमु'॥ स्यन्दते [4]कटुरक्तरसमिति [5]सिन्दुकः।

'स्यन्दू प्रस्रवणे'। सिन्दुं स्यन्दनं त्वगादिना वृणोतीति सिन्दुवारः। 'वृञ् वरणे'। इन्द्रस्य सुरसः प्रिय इति इन्द्रसुरसः। गुडतीति गुडः। 'गुड वेष्टने'। [6]गुडाद्वेष्टनान्निष्क्रान्ता निर्गुण्डी। इन्द्रस्य प्रिया इन्द्राणिका। सिन्दुवारनामानि। '[7]वाविलिचेट्टु'॥ ६८॥

[1] ताम्यतीति Pt_2 [2] 'तमु ग्लानौ' Pt_2. [3] तापिनं G, Pt_2. [4] तिक्त° D_2, G, I, K_2. [5] सिन्धुकः K_6; स्यन्दते रसं Pt_2. [6] गुडवत् G. [7] 'लाकगड' J_2.

(पा.) कालस्कन्धः—तापिच्छोऽपि। तमालतरुनामानि। 'चीकटिचेट्टु'॥ अथ [1]सिन्दुके—इन्द्राणिकेत्यपि। [2]सिन्दुकनामानि। 'वाविलिचेट्टु'॥ ६८॥

[1] सिन्धुके B_3; सिन्धुवारः B_3. [2] सिन्धुक° B_3.

वेणी गरागरी देवताडो जीमूत इत्यपि।
श्रीहस्तिनी तु भूरुण्डी तृणशूल्यं तु मल्लिका॥ ६९॥
भूपदी शीतभीरुश्च सैवास्फोटा वनोद्भवा।

(वि.) वेणीति—[1]वेणीवत् तिष्ठतीति वेणी। गरं मूषिकविषम् आगिरतीति गरागरी। 'गॄ निगरणे'। खरागरी, खरा, गरीति वा पाठः। ताडयन्ति कर्णं ताडाः अङ्कुराः। 'तड आघाते'। अङ्कुरा उद्भिदस्तेषु मुख्यत्वात् देवताडः। देवमिन्द्रियं ताडयतीति वा। [2]जीमूत इवाह्लादकत्वात् जीमूतः। देवतालनामानि। 'देवताडि पेल्लु'॥ [3]शोभान्वितहस्तिकर्णाभपत्रयोगात्[4] श्रीहस्तिनी। भुवि रोहतीति भूरुण्डी। 'रुह बीजजन्मनि प्रादुर्भावे च'। 'गुरुगुचेट्टु'॥ तृणशूले वातगुल्मे साधु तृणशूल्यम्। तृणशून्यं, तृणशून्या, तृणशूल्या इति पाठाः। मल्यते मूर्ध्नि मल्लिका। 'मल मल्ल धारणे'। भुवि पदं यस्याः सा भूपदी। शीताद् [5]भीरुरिति शीतभीरुः। 'ञिभी भये'। मल्लिकानामानि। '[6]मल्लेचेट्टु'॥ [7]आस्फोटति ईषद्विकसतीति आस्फोटा। 'स्फुट विकसने'। आस्फोतेति वा पाठः। '[8]अडविमल्लेपेरु'॥ ६९॥

[1] वेणीव J_2, Pt_2. [2] जीमूतवत् Pt_2. [3] शोभाकार° K_5, K_6. [4] कर्णाकार° J_2. [5] बिभेतीति G, K_2, K_3, K_5; Pt_2 adds ग्रीष्मजत्वात्. [6] 'मोल्ले' J_2. [7] ईषत् स्फुटतीति K_5, K_6. [8] 'अटवीमोल्ले' J_2.

(पा.) वेणी—जीमूत इत्यपि। देवतालनामानि। 'डापरडङ्कि'। अनुक्तम्—'अजभक्षस्तु गोशृङ्गो बर्बुरश्च युगाक्षरः'। बर्बुरनामानि। 'बोब्बचेट्टु'। 'कारस्करो

महाकोलः किंपाकः कालकूटकः' । किंपाकद्रुमनामानि । 'कांजीरवृक्षमु' ॥ श्रीहस्तिनी—भूरुण्डी । श्रीहस्तिनीनामनी । 'गुरुगुचेट्टु' ॥ [1]तृणशून्यं तु । सुभूतिटीकायां तृणशूल्या तृणशून्या वेति रूपान्तरसत्ता स्त्रीलिङ्गता चोक्ता । मल्लिका—शीतभीरुश्च । मल्लिकानामानि । 'मल्ले' । 'मदयन्ती विचकिलः' । एते च ॥ सैव—वनोद्भवा । 'अडविमल्ले' । '[2]काकमल्यां वनोद्भवा' इति वैजयन्ती (पृ. ६०, श्लो. १८४) ॥ ६९ ॥

[1] तृणशून्यं B_3.　　[2] काकमाल्याम् इति मुद्रितग्रन्थे.

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ॥ ७० ॥
सितासौ श्वेतसुरसा भूतवेश्यथ मागधी ।
गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिका ॥ ७१ ॥

(वि.) शेफालिकेति—शेरत इति शेफाः निद्राणा अलयोऽत्रेति शेफालिका । सुष्ठु वहत्यामोदं सुवहा । 'वह प्रापणे' । गुडाद्वेष्टनान्निष्क्रान्ता [1]निर्गुण्डी । नीलपुष्पत्वात् नीलिका । शेफालिकानामानि । '[2]नल्लवाविलि' ॥ श्वेतः शोभनो[3] रसो यस्याः सा श्वेतसुरसा । भूतानि विशत्याह्लादयतीति भूतवेशी । '[4]विश आह्लादने' । श्वेतशेफालिकानामनी । 'तेल्लवाविलि' ॥ [5]मगधदेशप्रचुरा मागधी । गणिकावच्चित्ताकर्षणाद्[6] गणिका । यूथो [7]जालकमस्या अस्तीति यूथिका । भ्रमरैरम्ब्यते शब्द्यत इत्यम्बष्ठा । 'अबि शब्दे' । अम्बो भ्रमराणां ध्वनिः, सोऽत्र तिष्ठतीति वा । 'ष्ठा गतिनिवृत्तौ' । [8]यूथिकानामानि । 'अडविमोल्ल' ॥ हेमवर्णानि पुष्पाणि यस्या हेमपुष्पिका । पीतपुष्पयूथिकानाम । 'पच्चपूवुलमोल्लपेरु' ॥ ७०—१ ॥

[1] Pt_2 adds 'गुड वेष्टने'.　　[2] 'नल्लनिपुप्पुलुवाविलि' K_3.　　[3] शोभनश्च G.
[4] 'विश प्रवेशने' B_1, K_3.　　[5] °देशे J_2, Pt_2; प्रचुरत्वात् J_2.　　[6] कर्षणात् Pt_2.
[7] जालमस्या इति Pt_2.　　[8] एतानि मालतीकल्पस्य नामानि J_2.

(पा.) शेफालिका—नीलिका च सा । नीलपुष्पनिर्गुण्डीनामानि । 'नल्लवाविलि' ॥ सितासौ—भूतवेशी । श्वेतपुष्पनिर्गुण्डीनामानि । 'तेल्लवाविलि' ॥ अथ मागधी—अम्बष्ठा । 'मुल्ल' । सा—हेमपुष्पिका । सा यूथिका पीतपुष्पा चेत् हेमपुष्पिका । 'पच्चपुप्पुलमुल्ल' ॥ ७०—१ ॥

अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवी लता ।
सुमना मालती जातिः सप्तला नवमालिका ॥ ७२ ॥

(वि.) अतिमुक्त इति—[1]वैराग्यसंपत्त्या मुक्तानप्यतिक्रामत्यभिभवतीति अतिमुक्तः । पुण्ड्रदेशे भवः पुण्ड्रकः । वसन्तमासे[2] भवा वासन्ती । मधौ वसन्ते[3] भवा माधवी । लात्यादत्ते [4]शारिकाचित्तमिति लता । 'ला आदाने' । वासन्तीनामानि । 'पूवुलगुरुविंदपेल्लु' ॥ सुष्ठु मन्यते जनैरिति सुमनाः । सान्तोऽयम् । 'मन [5]अवबोधने' । मालां कुर्वन्त्यनयेति मालती । मल्यते आमोदैरिति वा । 'मल मल्ल धारणे' । जायते [6]प्रीतिरनयेति जातिः[7] । 'जनी प्रादुर्भावे' । जातिनामानि । 'जाजिचेट्टु' ॥ सप्त [8]इन्द्रियाणि लात्यादत्ते सुगन्धित्वात् सप्तला । 'ला आदाने' । नूयत इति नवा । 'णु स्तुतौ' । नवा चासौ [9]मालिका च नवमालिका । नवा स्तुत्या माला अस्या इति वा । नवमालिकानामनी ॥ '[10]विरजाजिचेट्टु' ॥ ७२ ॥

[1] अतिक्रान्तो मुक्तान् विरक्तानिति Pt_2. [2] °काले J_2; वसन्ते पुष्प्यतीति Pt_2. [3] चैत्रे पुष्प्यतीति Pt_2 [4] जनमनांसि Pt_2. [5] 'मन ज्ञाने' F_2, Pt_2. [6] सुखम् Pt_2. [7] जाती इति वा पाठः G, I. [8] Pt_2 adds मनोबुद्ध्यन्तानि. [9] मल्लिका J_2. [10] 'इरवन्तिगे' J_2.

(पा.) अतिमुक्तः—माधवी लता । माधवीनामानि । 'पूवुलगुरिविंद' ॥ सुमना—जातिः । जातिनामनी । 'जाजि' ॥ सप्तला नवमालिका । 'विरुवाविलि विरवाजिन्नि' । 'वनमाली च नेपाली . . . शेखरीत्यपि (?)' इति शेषे ॥ ७२ ॥

माघ्यं कुन्दं रक्तकस्तु बन्धूको बन्धुजीवकः ।
सहा कुमारी तरणिरम्लानस्तु महासहा ॥ ७३ ॥

(वि.) माघ्यमिति—[1]माघमासे भवं माघ्यम् । कुं भुवमुद्भेदनकाले[2] द्यति खण्डयतीति कुन्दम् । 'दो अवखण्डने' । कुन्दनामनी । '[3]मोल्लचेट्टु' ॥ रक्तपुष्पशालित्वाद्[4] रक्तकः । सुकुमारत्वाच्चित्तं बध्नातीति बन्धूकः । 'बन्ध बन्धने' । बन्धून् जीवयतीति बन्धुजीवकः[5] । बन्धुः जीवतां यूनामिति वा । बन्धूकनामानि । 'मङ्केनचेट्टु' ॥ [6]सहते परिमलमिति सहा । 'षह मर्षणे' । कुं[7] भूमिस्थं मारयति नाशयतीति कुमारी । 'मृङ् प्राणत्यागे' । तरन्त्यनया [8]दोषजानि दुःखानीति तरणिः । 'तॄ प्लवनतरणयोः' । [9]कुमारीनामानि । 'पिन्नगोरिंट' ॥ म्लानिर्न विद्यतेऽस्मिन्नित्य-

म्लानः[10]। महतीं पीडां संमर्दं सहते महासहा। महती च सा सहा चेति वा। महासहानामनी। 'पेद्गोरिंट' ॥ ७३ ॥

[1] माघे मासे K_5, Pt_2. [2] उद्भेदेन B_1; उद्भवकाले Pt_2. [3] 'मोल्ले' J_2.
[4] °पुष्पतया F_2, J_2, Pt_2. [5] जीवानां बन्धुः J_2. [6] B_1, K_5 add मुखेऽन्वहं.
[7] कुत्स्थं K_5, K_6; कुत्सितान् रोगान् मारयतीति वा Pt_2; K_5 adds प्राणिजातं. [8] त्रिदोष° B_1, D_2, G; रोगजनितदुःखं Pt_2. [9] 'केरुयोरते' J_2. [10] आशु अम्लानं पुष्पमस्य Pt_2.

(पा.) माघ्यं कुन्दम्। कुन्दनाम। 'कुन्दं यासो स्मृतं माघ्यो दलकोशो दलाढकः' इति पुंनपुंसकयोर्व्यालिः। 'तोंटमुल्ल' । रक्तकस्तु—बन्धुजीवकः। बन्धुजीवनामानि। 'मंकन'। सहा—तरणिः। सहानामानि। 'चामन्ति'॥ अम्लानस्तु महासहा। महासहानामनी। 'अनल्यमैनरकुलुगलचामन्ति। अदे गोरुंगि'। 'कुब्जिका भद्रतरणिः वृहत्पत्रातिकेसरा। महासहा' इति धन्वन्तरिः॥ ७३ ॥

तत्र शोणे कुरवकस्तत्र पीते कुरण्टकः।
नीली झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा॥ ७४ ॥

(वि.) तत्रेति—तत्र अम्लाने। कौ भुवि रूयते साधुरिति कुरवकः। 'रु शब्दे'। कुरवकनाम। '[1]एर्रपूवुलगोरिंट'॥ कौ भूमौ रम्यते कुरण्टकः। 'रमु क्रीडायाम्'। कुरण्टकनाम। '[2]पच्चपूवुलगोरिंट'॥ तत्र नीलपुष्पत्वान् नीली। झिमिति शब्दं करोति शुष्कदशायामिति झिण्टी। बणति शुष्कदशायामिति बाणा। 'बण शब्दे'। दस्यते क्षीयते कालेनेति[3] दासी। 'दसु उपक्षये'। आर्तः क्षीणः सन् गलतीति आर्तगलः। '[4]गल अदने स्रवणे च'। नीलझिण्टिकानामानि। 'नल्लपूवुलगोरिंट[5]'॥ ७४ ॥

[1] 'कयपनगोरटे' J_2. [2] 'पच्चनोगोरटे' J_2. [3] कालेन गच्छति K_5, K_6.
[4] 'गल अवस्रंसने' F_2, Pt_2. [5] 'किरियगोरटे' J_2.

(पा.) तत्र—कुरवकः। शोणसहानाम। 'येर्चामन्ति'॥ तत्र—कुरण्टकः। पीतसहानाम। 'पच्चशामन्ति'॥ नीली—चार्तगलस्तथा। नीलझिण्टीनामानि। 'नल्लगोरिंट'॥ ७४ ॥

सैरेयकस्तु झिण्टी स्यात् तस्मिन् कुरवकोऽरुणे।
पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः॥ ७५ ॥

(वि.) सैरेयक इति—सिराख्या वृक्षा यस्मिन् सन्तीति सैरः, सैरदेशे भवः सैरेयकः। शुष्के सति झिमिति [1]शब्दं करोतीति झिण्टी। सैरेयकनामनी। 'मुलुगोरिंट'॥ कुरवकशब्दश्चोक्तः[2]। कुरण्टक उक्तः[2]। भ्रमरीभिः सह भ्रमराश्चरन्त्यस्यामिति [3]सहचरी। 'चर गतौ'। '[4]पच्चपुव्वुलगोरिंट'॥ ७५॥

[1] रटति, 'रट परिभाषणे' B_1, K_3; 'सिन्न मुलुगोरिंट' B_1. [2] श्लो. ७४.
[3] तस्मिन्नेव कुरण्टके सहचरीशब्दो वर्तते B_1, J_2. [4] 'मुल्लु गोरटे' J_2.

(पा.) सैरेयकस्तु—स्यात्। श्वेतझिण्टीनाम। 'तेल्लगोरंट'॥ तस्मिन्—अरुणे। 'येर्रगोरंट'। पीते—द्वयोः। पीतझिण्टीनामानि। 'पच्चगोरंट'। अनुक्तम्—'किंकराटः किंकरातो वर्णपुष्पो मिलातकः'। 'वन्नेचेट्टु'॥ ७५॥

उड्रपुष्पं जपा पुष्पं वज्रपुष्पं तिलस्य यत्।
प्रतिहासशतप्रासचण्डातहयमारकाः॥ ७६॥
करवीरे करीरे तु क्रकरग्रन्थिलावुभौ।

(वि.) उड्रपुष्पमिति—उड्रदेशे भवं पुष्पं उड्रपुष्पम्। ओड्रपुष्पमिति वा पाठः। जपतीव तिष्ठति जलमध्ये जपा। 'जप जल्प[1] व्यक्तायां वाचि'। जपानामनी। '[2]दासानिचेट्टु'॥ विरुद्धलक्षणया वज्रवत् कठिनं पुष्पं वज्रपुष्पम्[3]। 'नुव्वु [4]पूवुपेरु'॥ विकसितैः पुष्पैः प्रतिहसतीव तिष्ठतीति प्रतिहासः। 'हसे हसने'। शतं प्रासा[5] इव तीक्ष्णाः[6] कुड्मला अस्येति शतप्रासः। चण्डं तीक्ष्णमततीति[7] चण्डातः। 'अत सातत्यगमने'। [8]कशासादृश्यशाखात्वाद् हयान् मारयतीति हयमारकः। 'मृङ् प्राणत्यागे'। करवीरवत् खड्गवत् मारकत्वात् रसपानेन करवीरः। करवीरनामानि। 'गन्नेरु[9]'॥ करिणं समीपगतम् ईरयति तीक्ष्णकण्टकैरिति करीरः। 'ईर क्षेपे'। तीक्ष्णत्वात् क्रेति शब्दं करोति क्रकरः[10]। 'डुकृञ् करणे'। ग्रन्थिमत्त्वात् ग्रन्थिलः[11]। करीरनामानि। 'वेणुतुरुचेट्टु[12]'॥ ७६॥

[1] J_2, Pt_2 omit जल्प. [2] 'दासिवाण' J_2. [3] वज्रमिव विदारकं Pt_2.
[4] 'कांसेप्यपुष्प' J_2. [5] K_5, K_6 add कुन्ताः. [6] तीक्ष्णानि कुड्मलानि Pt_2.
[7] K_5, K_6 add तुदति; व्याप्नोति J_2. [8] हयमारककशा° J_2. [9] 'कणिगलु' J_2.
[10] क्रणातीति K_5, K_6. [11] ग्रन्थयः सन्त्यस्य Pt_2. [12] 'वेन्दे' J_2.

(पा.) [1]ओड्रपुष्पं जपा। जपानामनी। 'दासनमु'। 'जपायामोड्रपुष्पं[2] स्यादत्र पद्मादयोऽपि च' इति वैजयन्ती (पृ. ६१, श्लो. १९५)। रुद्रपुष्पं जपेति कचित्पाठः। '[3]रुद्रपुष्पमभिधीयते जपा' इति हलायुधः (अ. मा. २. ५२)। पुष्पं—तिलस्य यत्। तिलस्य पुष्पं यत् तद्वज्रपुष्पं स्यात्। 'नुवुपुव्वु'॥ प्रतिहास—करवीरे। करवीरनामानि। 'गन्नरु'॥ अनुक्तम्—'तारावतस्तु दगरो नन्द्यावर्तो नभोङ्गणः'। 'नन्दिवर्धनमु'॥ करीरे—ग्रन्थिलावुभौ। करीरतरुनामानि। 'वेणुतुरु'॥ ७६॥

[1] ओड्रपुष्पं for उडुपुष्पं in B_3.　[2] रुद्रपुष्पम् इत्येव मुद्रितग्रन्थे.　[3] ओड्रपुष्पमिति मुद्रितपुस्तके.

उन्मत्तः कितवो धूर्तो धुत्तूरः कनकाह्वयः॥ ७७॥
मातुलो मदनश्चास्य फले मातुलपुत्रकः।
फलपूरो बीजपूरो रुचको मातुलङ्गके॥ ७८॥

(वि.) उन्मत्त इति—उन्मादयतीत्युन्मत्तः। 'मदी हर्षग्लपनयोः'। अत एव कितवः। [1]धूर्वत्युन्मादकरणेनेति धूर्तः। '[2]उर्वी तुर्वी धुर्वी हिंसायाम्'। वातादिदोषान्[3] धुवतीति[4] धुत्तूरः। 'धू विधूनने'। काञ्चनस्याह्वयो नाम यस्य काञ्चनाह्वयः। कनकाह्वय इति वा पाठः। [5]उन्मादकद्रव्येषु मा नास्ति तुला साम्यमस्येति मातुलः। मदयतीति मदनः। 'मदी हर्षग्लपनयोः'। धुत्तूरनामानि। 'उम्मेत्तपेरु'॥ मातुलस्य पुत्रः[6] फलं मातुलपुत्रकः। 'उम्मेत्तकाय'॥ फलैः पूर्यत इति फलपूरः। 'पॄ पालनपूरणयोः'। बीजैः पूर्यत[7] इति बीजपूरः। रोचते स्वफलं नरेभ्य इति रुचकः। 'रुच[8] दीप्तावभिप्रीतौ च'। रुच्यवस्तुष्वनेन मा तुलां[9] गच्छतीति मातुलङ्गकः। मातुलङ्गकनामानि। '[10]मादीफलमुचेट्टु'॥ ७७–८॥

[1] उन्मादेन हिनस्तीति F_2, Pt_2.　[2] 'धुर्वी हिंसायाम्' F_2, Pt_2.　[3] रोगान् J_2, Pt_2.　[4] धवति G, K_2, K_3.　[5] उन्मादकृत्सु K_5, K_6.　[6] पुत्रकः K_6　[7] परिपूर्यते J_2, K_2.　[8] 'रुच स्तुतौ' K_3, K_5, K_6.　[9] G, K_3 add साम्यं.　[10] 'मादिफलं' D_2; 'मादले' J_2.

(पा.) उन्मत्तः—धुत्तूरः[1]। तुर्तूरः दुस्तूर इति च कचित्पाठः। काञ्चनाह्वयः—मदनश्च। उन्मत्तद्रुमनामानि। 'उम्मेत्तचेट्टु'॥ अस्य—मातुलपुत्रकः। तत्फलनाम।

'उम्मेत्तकाय'। अनुक्तम्—'त्रिपुरो मदमत्तः स्यात्'। 'वंगिचेट्टु'॥ फलपूरो—मातुलुङ्गके। मातुलुङ्गकनामानि। 'मादिफलमुचेट्टु'॥ ७७–८॥

[1] दुत्तूरः B_3.

समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः।
जंबीरोऽप्यथ पर्णासे कठिंजरकुठेरकौ॥ ७९॥

(वि.) समीरण इति—समीरयति प्रकाशयत्यामोदमिति समीरणः। 'ईर क्षेपे'। [1]मरुदेशे वाति वर्तत इति मरुवकः। 'वा गतिगन्धनयोः'। प्रस्थे[2] सानौ स्थितोऽपि पुष्प्यतीति प्रस्थपुष्पः। 'पुष्प विकसने'। तीक्ष्णत्वेन फणाभपत्रत्वात् फणिज्जकः[3]। फणिज्जकशब्दो देश्यः। [4]जम्यते भक्ष्यत इति जंबीरः। 'जमु अदने'। जंबीरनामानि। 'मरुवमु'॥ [5]पुराणानि पर्णान्यस्यति क्षिपतीति पर्णासः। 'असु क्षेपणे'। कठिनं मुद्गशष्कुल्यादिकं जरयति जीर्णं करोतीति कठिंजरः। '[6]जॄष् वयोहानौ'। कुण्ठति मशकादिगतिं प्रतिबध्नातीति कुठेरकः। 'कुठि [7]प्रतिघाते'। कठिंजरनामानि। 'नल्लगग्गेर'॥ ७९॥

[1] मरौ देशे J_2, K_3, Pt_2. [2] प्रस्थेऽपि K_5. [3] तीक्ष्णत्वेन फणीव आर्जकः फणिर्जकः Pt_2. [4] जक्ष्यते, 'जक्ष भक्षहसनयोः' K_5, K_6. [5] पुराणपर्णानि D_2. [6] 'जॄष् झॄष् वयोहानौ' K_5, K_6. [7] 'कुठ बन्धने' K_6.

(पा.) समीरणो—जम्बीरोऽपि। मरुवकनामानि। 'मरुवमु'॥ अथ पर्णासे—कुठेरकौ। पर्णासनामानि। 'नल्लगग्गेर'॥ ७९॥

सितेऽर्जकोऽत्र पाठी तु चित्रको वह्निसंज्ञकः।
अर्काह्ववसुकास्फोटगणरूपविकीरणाः॥ ८०॥
मन्दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ।

(वि.) सित इति—अर्जयति [1]नवपत्रादीन् अर्जकः। 'अर्ज [2]अर्जने'। श्वेतपर्णासनाम। 'तेल्लगग्गेर'॥ वह्निपर्याये[3] पाठोऽस्यास्तीति पाठी। चेतन्तीति चितो जन्तवस्तान् त्रायते व्याधित इति चित्रकः[4]। 'त्रैङ् पालने'। [5]वह्निसंज्ञा नामास्यास्तीति[6] वह्निसंज्ञकः। चित्रकनामानि। 'चित्रमूलमु'॥ [7]अर्कस्याह्वा नामास्यास्तीति अर्काह्वः। वसत्यस्मिन् तेज इति वसुकः। 'वस निवासे'। आस्फुटतीत्यास्फोटः। 'स्फुट

विकसने'। [8]आस्फोत इति वा पाठः। कालक्रमेण गणरूपाणि वहुरूपाण्यस्य गणरूपः। पुष्पाणि विकिरतीति विकीरणः। 'कॄ विक्षेपे'। मन्दान् [9]क्षुद्रव्याधीनौषधत्वेन इयर्तीति मन्दारः। 'ऋ गतौ'। अर्कवर्णपर्णत्वाद् अर्कपर्णः। मन्दारनामानि। 'जिल्लेडुचेट्टु[10]'॥ अलति भूषयतीत्यल्[11]। अल् चासौ अर्कश्च अलर्कः। 'अल भूषणादौ'। प्रकृष्टास्तापसा [12]अनेनेति प्रतापसः। अलर्कनामनी। 'तेल्लपूव्वुलजिल्लेडु'॥ ८०॥

[1] आरोग्यं Pt_2. [2] 'अर्ज षर्ज अर्जने' K_5, K_6. [3] °पर्यायेण K_6; पर्यायपाठः K_2; पठ्यत इति K_5. [4] चित्रकार्यत्वात् चित्रकः K_5. [5] वह्नेः अग्नेः B_1, K_5. [6] Pt_2 adds दीपनत्वात्. [7] B_1, K_5 add सूर्यस्य. [8] आस्फुट इति वा पाठः K_6. [9] K_6 adds ग्रन्थ्यादि°. [10] 'येक्के' J_2. [11] अलः, अलश्चासौ Pt_2. [12] K_5, K_6 add योगिनो भवन्ति.

(पा.) सितेऽर्जकोऽत्र। श्वेतपर्णासनाम। 'तेल्लगग्गेर'॥ अनुक्तम्—'दमनं तु ब्रह्मजटा'। 'दवनमु'॥ 'तुलसी भारती समे[1]'। 'तुलसी'॥ पाठी—वह्निसंज्ञकः। चित्रमूलनामानि। 'चित्रमूलमु'। 'चित्रको दहनव्यालपाठिसौरारुणोऽग्निकः' इति तन्त्रान्तरपाठात् पाठी इन्नन्तः॥ अर्काह्व—अर्कपर्णे। स्फाटस्फोटस्फोता इत्यमरमाला। अर्कवृक्षनामानि। 'जिल्लेडु'॥ अत्र शुक्ले—प्रतापसौ। अलर्कनामनी। 'तेल्लजिल्लेडु' ॥ ८०॥

[1] शिवा इति वैजयन्त्याम् (पृ. ५४, श्लो. ११९).

शिवमल्ली पाशुपत एकाष्ठीलो बको वसुः॥ ८१॥
वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि।

(वि.) शिवमल्लीति—शिवेन[1] मल्ल्यत इति शिवमल्ली। 'मल मल्ल धारणे'। पशुपतेरयं प्रियः पाशुपतः। [2]एकोऽष्ठीलो मज्जास्यास्तीति एकाष्ठीलः। गन्धानुमेयसूक्ष्मांशैर्वाति गच्छतीति [3]वकः। 'वा गतिगन्धनयोः'। वस्ते भूमिमाच्छादयतीति वसुः। 'वस आच्छादने'। वकपुष्पनामानि। 'बकपुष्पमु[4]'॥ वन्द्यते स्तूयते औषधत्वेनेति [5]वन्दा। 'वदि अभिवादनस्तुत्योः'। वृक्षमत्ति पीडयतीति वृक्षादनी। 'अद भक्षणे'। वृक्षे रोहतीति वृक्षरुहा। 'रुह बीजजन्मनि प्रादुर्भावे च'। जीवयतीति जीवन्तिका[6]। 'जीव प्राणधारणे'। जीवन्तिकानामानि। '[7]बदनिकपेरु'॥ ८१॥

[1] शिवस्य मल्लिकेव K_5, K_6. [2] D_2, G add मुख्यः. [3] वबयोरभेदः G, I. [4] 'बकुलपुष्प' J_2. [5] वन्द्या J_2. [6] जीवन्त्यनया K_5, K_6; जीवतीति B_1. [7] 'मरद-वन्दणिगे' J_2.

(पा.) शिवमल्ली—बुकः । बक इति वा । वसुः । बकपुष्पनामानि । 'बकपुष्पमन्नचेट्टु' । वन्दा—जीवन्तिकेत्यपि । वृक्षोपरिप्ररूढविजातीयोद्भिन्नामानि । 'बदनिक' ॥ ८१ ॥

वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ॥ ८२ ॥
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।

(वि.) वत्सादनीति—वत्सानां बालानामदनीयत्वाद्[1] वत्सादनी । 'अद भक्षणे' । [2]छिन्नापि रोहतीति छिन्नरुहा । 'रुह बीजजन्मनि प्रादुर्भावे च' । ज्वरितान्[3] गुडति रक्षतीति गुडूची । 'गुड रक्षायाम्' । तन्त्रयत्यायुरिति[4] तन्त्रिका । 'तन्त्रि कुटुम्बधारणे' । रसायनत्वादमृता[5] । जीवयति रोगिणमिति जीवन्तिका । 'जीव प्राणधारणे' । [6]सोमस्यांशभूता वल्ली सोमवल्ली । विगतं शल्यमस्या इति विशल्या । मधुराणि [7]पर्णान्यस्या इति मधुपर्णी । गुडूचीनामानि । 'तिप्पतीगे' ॥ ८२ ॥

[1] अदनं (भवतीति D_2, J_2, K_2) Pt_2. [2] छिन्ने स्थानेऽपि K_6; छिन्नस्थाने B_1, K_5. [3] ज्वरितादीन् K_5. [4] ज्वरितान् K_6; धारयति पोषयति B_1, D_2. [5] न म्रियत इत्यमृता Pt_2. [6] अंशे भूता B_1. [7] K_5 adds पत्राणि.

(पा.) वत्सादनी—मधुपर्ण्यपि । गुडूचीनामानि । 'तिप्पतीङ्गे' ॥ ८२ ॥

मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।

(वि.) मूर्वेति—मूर्वति [1]वेष्टयति यष्ट्यादिकमिति मूर्वा । 'मुर्वी बन्धने' । दीव्यतीति देवी । 'दिवु क्रीडादौ' । [2]मधुरसोऽस्या अस्तीति मधुरसा । मुरति वेष्टयति मोरटा । 'मुर संवेष्टने' । तेजयत्यग्निमिति [3]तेजनी । 'तिज निशातने[4]' । स्रवति रसमिति स्रवा । 'स्रु [5]प्रस्रवणे' । [2]मधु[6] लातीति मधूलिका । 'ला दाने' । [2]मधुनः श्रेणिः पङ्क्तिरस्या इति मधुश्रेणी । गोकर्णाभपत्रत्वाद् गोकर्णी । पीलोरिव पर्णान्यस्याः पीलुपर्णी । मूर्वानामानि ॥ 'चांगचेट्टु' ॥ ८३ ॥

[1] वेष्टते Pt_2. [2] K_5, K_6 add विरुद्धलक्षणया; मधुः रसः B_1. [3] तेजिनी K_5. [4] निशाने J_2. [5] 'स्रु गतौ' F_2; 'स्रु स्रवणे' D_2, K_6. [6] माधुर्यान्वयात् B_1, I, K_3, K_5.

(पा.) मूर्वा—पीलुपर्ण्यपि। यत्प्रभवत्वेन धनुर्गुणो मौर्वीत्युच्यते तस्योद्भिद्विशेषस्य नामानि। 'चांग' ॥ ८३ ॥

पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी शिवा ॥ ८४ ॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तका ।

(वि.) पाठेति—बहुषु[1] योगेषु पठ्यत इति पाठा। 'पठ व्यक्तायां वाचि'। अम्बे शब्दे तिष्ठतीति अम्बष्ठा[2]। 'ष्ठा गतिनिवृत्तौ'। [3]वैद्यकर्णावनया विद्धाविति विद्धकर्णी। वस्तौ कर्मणि स्थापनीयत्वात् [4]स्थापनी। [5]श्रेयःसाधनत्वात् श्रेयसी। [6]दोषशमनात् शिवा। एकोऽष्ठीलो मज्जास्या अस्तीति एकाष्ठीला। पापं चलयतीति [7]पापचेली। 'चल संचलने'। [8]प्राच्यां भवा प्राचीना। [9]वनजा च तिक्तरसा च वनतिक्तका। पाठानामानि। 'अगुरुसोंटि' ॥ ८४ ॥

[1] बहु° B_1, Pt_2.　[2] अम्बेव तिष्ठतीति वा Pt_2.　[3] Pt_2 adds शास्त्रेषु श्रूयमाणत्वात्.　[4] वस्तिकर्मणि B_1; जनान् स्थापयतीति, 'ष्ठा गतिनिवृत्तौ' Pt_2.　[5] श्रेयस्करत्वात् F_2, Pt_2.　[6] विष° B_1.　[7] वृकीनामत्वात् J_2; वृजिन° K_5.　[8] प्राचि प्रायशः K_5, K_6.　[9] वने I, Pt_2.

(पा.) पाठाम्बष्ठा—वनतिक्तका। पाठाया नामानि। 'पाट', 'इदे चिरिबोह्रि' ॥ ८४ ॥

कटुः कटुंवराशोकरोहिणी कटुरोहिणी ॥ ८५ ॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।

(वि.) कटुरिति—कटुरसोऽस्या अस्तीति कटुः। कटत्यावृणोति रोगमिति वा। 'कटे वर्षावरणयोः'। कटत्यावृणोति बलाख्यरोगमिति कटुंवरा। 'वृञ् वरणे'। कटुंभरेति पाठे कटुं बिभर्तीति कटुंभरा। कटंभरेत्यपि पाठः। रोगजशोकं[1] हन्ति रोपयति[2] चाङ्गमिति अशोकरोहिणी। अशोका रोहणीति पदद्वयं वा। तत्पक्षे न विद्यते शोकोऽस्या अशोका। रोहति व्याप्नोत्यङ्गानीति रोहिणी। 'रुह बीजजन्मनि प्रादुर्भावे च'। [3]कटुश्चासौ रोहिणी[4] च कटुरोहिणी। मत्स्यानां पित्तं जीवनमिति मत्स्यपित्ता। कृष्णो भेदः छेदोऽस्याः कृष्णभेदी[5]। चक्रवदङ्गमस्या अस्तीति चक्राङ्गी। [6]वक्राङ्गीति वा पाठः। शकुलानां मत्स्यानामदनमिति शकुलादनी। कटुरोहिणीनामानि। 'कटुकरोहिणीपेरु' ॥ ८५ ॥

[1] रोगजं शोकं J_2; राजशोकं B_1. [2] रोहति K_6. [3] कटुरसा K_5, K_6. [4] रोहति च B_1. [5] भेदे छेदने कृष्णवर्णोऽस्याः K_5, K_6. [6] वक्रमङ्गमस्याः F_2, Pt_2.

(पा.) कटुः—रोहिणी ।

'अशोका कटुरोहिण्यामशोको वञ्जुलद्रुमे ।
रोहिणी कटुरोहिण्यां भभेदे रोहिता गवोः[1] ॥'

इति रभसकोशादशोका रोहिणीति पदद्वयमपि । कटुरोहिणी । कटुकरोहिण्यपि ॥ मत्स्यपित्ता—शकुलादनी । शकुलादिनीति वा । कटुरोहिणीनामानि । 'कटुकरोहिणी-पेरु' ॥ ८५ ॥

[1] 'तद्भेदे लोहितागरोः' इति टीकासर्वस्वे (पृ. १३९); 'भमित्कटंभरासोमवल्केषु लोहितागवोः' इति मेदिनीति भानुजीदीक्षितः (पृ. १७९).

आत्मगुप्ताजहा व्यण्डा कण्डूरा प्रावृषायणी ॥ ८६ ॥
ऋश्यप्रोक्ता शूकशिम्बिः कपिकच्छूश्च मर्कटी ।

(वि.) आत्मगुप्तेति—आत्मा गुप्यतेऽस्या[1] आत्मगुप्ता । '[2]गुपू रक्षणे' । न जहाति शूकान् अजहा[3] । 'ओहाक् त्यागे' । जडेति वा पाठे जडयतीति जडा । 'जल अपवारणे' । कन्दूकरणाय व्यडति वर्धत[4] इति व्यण्डा । 'अड उद्यमने' । अव्यण्डेति वा पाठः । कण्डूं रातीति कण्डूरा । 'रा दाने' । प्रायेण प्रावृषि भवा प्रावृषायणी । ऋश्यैर्मृगैः प्रोक्ता दर्शिता ऋश्यप्रोक्ता । ऋष्यप्रोक्तेति वा पाठः । शूकप्रधाना [5]शिम्बिः शूकशिम्बिः । कपीन्[6] कषति [7]हिनस्तीति कपिकच्छूः । 'कष हिंसायाम्' । [8]मर्कटरोमवर्ण-फलत्वात् मर्कटी । मर्कटीनामानि । '[9]दुरदगोडिचेट्टु' ॥ ८६ ॥

[1] अनया K_5. [2] 'गुप गोपने' K_3, K_5. [3] जिहीते जिहा K_6. [4] उद्यच्छति B_1, Pt_2. [5] शिम्बी शूकशिम्बी K_5, K_6, [6] कपिं K_3. [7] हिंसति K_5, K_6. [8] °रोमाभफलत्वात् F_2, Pt_2. [9] 'तुरुचे' J_2.

(पा.) आत्मगुप्ता—अव्यण्डा । अकारपूर्वाविमौ शब्दौ । तथा चाहेन्दुः । 'अव्यण्डा[1] वृषती शस्यादजहा शूकशिम्बिका' इति । 'स्वयंगुप्ता जहा जटा' इत्युक्तत्वात् जटेति पाठश्च ॥ कण्डूरा—मर्कटी । आत्मगुप्तानामानि । 'दूलगोंडि' ॥८६॥

[1] 'अव्यण्डा वृषभी गुप्ता' इतीन्दुरिति भानुजीदीक्षितः (पृ. १८०, श्लो. ८६).

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शंबरी वृषा ॥ ८७ ॥
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।

(वि.) चित्रेति—[1]चित्रवर्णपर्णत्वात् चित्रा । उपचित्रा[2] च । न्यक् तिर्यक् [3]रुणद्धीति न्यग्रोधी । 'रुधिर् आवरणे' । द्रवति [4]विसरतीति द्रवन्ती । 'द्रु गतौ' । शं सुखं वृणोतीति शंबरी । 'वृञ् वरणे' । आरोग्यकामिनां [5]कामं वर्षतीति वृषा । 'वृष सेचने' । प्रत्यक् प्रतीची श्रेणी [6]पर्णावलिरस्या इति प्रत्यक्श्रेणी । सुतानां पर्णादीनां श्रेणिरस्या इति सुतश्रेणी । [7]रम्यते पक्षिभिरिति रण्डा । 'रमु क्रीडायाम्' । मूषिककर्णाभपत्रत्वात् मूषिकपर्णी । मूषिकपर्णीनामानि । 'एलुकचेविचेट्टु' ॥ ८७ ॥

[1]नानावर्णत्वात् F_2, Pt_2.　[2] साक्षाद्चित्तत्वात् K_5, K_6.　[3] रोहतीति K_5, K_6; I adds 'रुह बीजजन्मनि प्रादुर्भावे च.'　[4] विगलति J_2, Pt_2.　[5] सुखं Pt_2.　[6] पर्णादिप्रसवानां K_5, K_6.　[7] रमयति Pt_2.

(पा.) चित्रोपचित्रा—मूपकपर्ण्यपि । मूपकपर्णीनामानि । 'येलुकजीडि' ॥ ८७ ॥

अपामार्गः शैखरिको धामार्गवमयूरकौ ॥ ८८ ॥
प्रत्यक्पर्णी कीशवल्ली किणिही खरमञ्जरी ।

(त्रि.) अपामार्ग इति—अपकृष्टः आ समन्तात् मार्गोऽस्येति अपामार्गः । शिखरे भवतीति शैखरिकः । धाम स्थानमर्जयतीति धामार्गवः[1] । 'अर्ज अर्जने' । धाम्नोऽर्गो धामार्गः । धामार्गं वातीति वा । मयूरचूडाप्रतिकृतित्वात्[2] मयूरकः । प्रत्यञ्चि[3] पर्णान्यस्याः सन्तीति प्रत्यक्पर्णी । कीशस्य कपेः रोमाभा वल्ल्योऽस्याः सन्तीति कीशवल्ली । कीशपर्णीति वा पाठः । किणिनो दद्रुरोगिण औपधत्वेन जिहीते यातीति किणिही । 'ओहाङ् गतौ' । खरास्तीक्ष्णा मञ्जर्योऽस्याः सन्तीति खरमञ्जरी । अपामार्गनामानि । 'उत्तरेणि चेट्टु' ॥ ८८ ॥

[1] अथवा अधर्मं मार्गेऽतिवाति गच्छतीति K_5, K_6.　[2] मयूरचूडाकृतिप्रकृतित्वात् D_2.　[3] प्रत्यक् विमुखं Pt_2.

(पा.) अपामार्गः—किणिही । दीर्घतृतीयः । खरमञ्जरी । अपामार्गनामानि । 'उत्तरेणि' ॥ ८८ ॥

हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥ ८९ ॥
अङ्गारवल्ली बालेयशाकबर्बरवन्दकाः ।

(वि.) हञ्जिकेति—हन्ति [1]यक्ष्माणमिति हञ्जिका । 'हन हिंसागत्योः' । भञ्जिकेति पाठे भनक्ति रोगं भञ्जिका । 'भञ्जो आमर्दने' । [2]ब्राह्मणीवत् पवित्रत्वाद् ब्राह्मणी । [3]पद्माभपुष्पत्वात् पद्मा । भृज्जति कफादिकं नाशयतीति भार्गी । 'भ्रस्ज पाके' । [4]ब्राह्मणरीतित्वाद् ब्राह्मणयष्टिका । अङ्गाराभा[5] वल्ल्योऽस्या अङ्गारवल्ली, लौहित्यात् । बालेयस्य गर्दभस्य [6]शाको बालेयशाकः । शाखाभिः वृणोतीति[7] बर्बरः । 'वृञ् वरणे' । [8]वैद्यैर्वन्द्यते स्तूयत इति वन्दकः । 'वदि अभिवादनस्तुत्योः' । वर्धक इति वा पाठः । भार्गीनामानि ॥ '[9]गंडुबारंगि' ॥ ८९ ॥

[1] रोगं Pt_2. [2] ब्राह्मणवत् Pt_2. [3] °पुष्पवत्त्वात् K_5. [4] ब्राह्मणयष्टिरिव F_2. [5] अङ्गाराकारवल्ली अस्याः K_5, K_6. [6] G, Pt_2 add भोज्यः [7] K_6 adds व्याप्नोति; वबयोरभेदः G. [8] वैद्येन K_5, K_6. [9] 'भङ्गि' J_2.

(पा.) हञ्जिका । भञ्जिकापि ।

'भार्ङ्गी गर्दभशाकश्च भृगुजा च सुवर्चला ।
ब्रह्मरीतिः शुक्रमाता कासघ्नी भञ्जिका तथा ॥'

इति वैद्यके । ब्राह्मणी—वन्दकाः । भार्ङ्गीनामानि । 'भारंगि' ॥ ८९ ॥

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ॥ ९० ॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।

(वि.) मञ्जिष्ठेति—मञ्जुनि मनोज्ञे[1] वर्णे तिष्ठतीति मञ्जिष्ठा[2] । विकसति दूरं प्रसरतीति विकसा । 'कस गतौ' । जिङ्गति [3]सर्वतः प्रसरतीति जिङ्गी । 'जिगि गतौ' । समन्तादङ्गतीति[4] समङ्गा । 'अगि गतौ' । [5]काले मिष्यते शब्द्यते कालमेषिका । कालमेशिकेति वा पाठः । 'मिष मिश [6]शब्दे' । मण्डूका इव पर्णान्यस्या मण्डूकपर्णी । [7]भण्ड्यते भण्डीरी । [8]भण्डी । 'भडि परिभाषणे' । दीर्घवल्लीत्वात् योजनवल्ली । मञ्जिष्ठानामानि ॥ 'मञ्जिष्ठचेट्टु[9]' ॥ ९० ॥

[1] K_5, K_6 add लोहिते. [2] G, I add 'ष्ठा गति निवृत्तौ.' [3] G adds पर्वतात्. [4] अगति D_2, G, K_3. [5] कालेन B_1; कालेति K_6. [6] 'मिश शब्दे

रोषकृते बन्धने गतौ च' F_2; 'मिष स्पर्धायाम्' G. [7] भण्डते Pt_2. [8] भाण्डी K_5, K_6, Pt_2. [9] G, I add पेरु.

(पा.) मञ्जिष्ठा—योजनवल्ल्यपि। योजनफल्ल्यपीति केचित्। मञ्जिष्ठानामानि। 'मञ्जिष्ठि'॥ ९०॥

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः॥ ९१॥
रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा।

(वि.) यास इति—याति लतावत् प्रसरतीति यासः। 'या प्रापणे'। यौतीति यवासः। 'यु गतौ' 'यु मिश्रणे अमिश्रणे च' इति वा धातुः। कण्टकाचितत्वात् दुःखेन स्पृश्यत इति [1]दुःस्पर्शः। 'स्पृश[2] स्पर्शने'। धन्वनि मरुदेशे यासो धन्वयासः। कुं भुवं [3]कण्टकत्वेन नाशयतीति कुनाशकः। 'णश अदर्शने'। स्पृशन्तं रोदयतीति रोदनी। 'रुदिर् अश्रुविमोचने'। कच्छुरोगं रातीति कच्छुरा। 'रा दाने'। [4]अतिदूर-व्यापिनीत्वाद् अनन्ता। समुद्रान्ता च। दुःखेन [5]आलभ्यत इति दुरालभा। 'डुलभष् प्राप्तौ'। धन्वयासनामानि। '[6]तीण्टकसिण्डपेरु'॥ ९१॥

[1] कण्टकित्वाद् दुःस्पर्शः K_5, K_6. [2] 'स्पृश संस्पर्शे' K_6; संस्पर्शने D_2. [3] कण्टकित्वेन J_2, K_6. [4] B_1, G, I omit अति; दीर्घमूलतया J_2, Pt_2. [5] लभ्यते स्पृश्यत इति Pt_2. [6] 'रोगटिदूलकोकिलतेगड' K_6; 'रेगडुदूलपेरु' G, K_2, K_5.

(पा.) यासो—दुरालभा। दुरालभानामानि। 'तींटकसवेंद'। 'रेगडिदूल' ॥ ९१॥

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका॥ ९२॥
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनी गुहा।

(वि.) पृश्निपर्णीति—पृश्नीन्यल्पानि पर्णान्यस्याः पृश्निपर्णी। [1]पृथक् भिन्नानि पर्णान्यस्याः पृथक्पर्णी। [2]चित्राणि पर्णान्यस्याः चित्रपर्णी[3]। अङ्घ्रेर्बुध्नादारभ्य पर्णान्यस्या अङ्घ्रिपर्णिका[4]। अङ्घ्रिवल्लिकेति वा पाठः। क्रोष्टुभिर्विन्ना [5]दत्तेवाभाति तत्पुच्छसाम्यात्[6] क्रोष्टुविन्ना। 'विद विचारणे'। [7]सिंहस्येव पुच्छं शाखा अस्याः सिंहपुच्छी। रसाधारत्वात् कलशसाम्यं किंचिदस्तीति कलशी। धावति प्रसरतीति धावनी। धावनिरिति वा पाठः। 'धावु गतिशुद्ध्योः'। गूहति रसमिति गुहा। 'गुहू संवरणे'। सिंहपुच्छीनामानि। 'नक्तोंकपोन्नचेट्टु'॥ ९२॥

[1] विविक्तपर्णत्वात् F_2, K_5, K_6. [2] चित्ररूपाणि Pt_2. [3] चित्रपर्णिका D_2. [4] K_5, Pt_2 add 'कालपोन्नपेल्लु'. [5] आदत्तेव Pt_2. [6] तत्पुच्छनाशात् K_5, K_6. [7] सिंहपुच्छाकृतिमञ्जरीत्वात् Pt_2.

(पा.) पृश्निपर्णी—गुहा। पृश्निपर्णीनामानि। 'नक्तोंकपोन्न' ॥ ९२ ॥

निदिग्धिकास्पृशी व्याघ्री बृहती कण्टकारिका ॥ ९३ ॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि।

(वि.) निदिग्धिकेति—निदिह्यतेऽङ्गोपाङ्गैरुपचीयत इति निदिग्धिका। 'दिह उपचये'। कण्टकित्वान्न स्पृश्यतेऽस्पृशी। 'स्पृश [1]स्पर्शने'। स्पृशीति वा पाठः। अत एव व्याघ्रीव तिष्ठतीति [2]व्याघ्री। कण्टकैर्बृहतीति[3] बृहती। 'बृह वृद्धौ[4]'। कण्टकानियर्तीति कण्टकारिका। 'ऋ गतौ'। [5]रुचिरत्वेन भोजनं [6]प्रचोदयतीति प्रचोदनी। '[7]चुद प्रेरणे'। कोलति [8]सान्द्रीभवतीति कुली। 'कुल संस्त्याने बन्धुषु च'। [9]वार्ताकीमपेक्ष्य [10]ह्रस्वत्वात् क्षुद्रा। दुःखेन स्पृश्यते कण्टकित्वात् दुःस्पर्शा। राष्ट्रे भवा राष्ट्रिका। कण्टकारिकानामानि। '[11]वांकुडुचेट्टु' ॥ ९३ ॥

[1] संस्पर्शने K_5, K_6. [2] व्याघ्रनखरसमानकण्टकत्वात् Pt_2. [3] बृहत इति K_6. [4] 'बृह बृंहि वृद्धौ' K_5, K_6. [5] रुचिकरत्वेन K_2, K_3, K_5; कण्टकैश्चोदयति प्रेरयतीति Pt_2. [6] B_1, J_2, K_2 add प्रति. [7] 'चुद संचोदने' F_2. [8] सार्द्रं J_2, K_6; संघीभवति Pt_2. [9] वार्ताकादिकं Pt_2. [10] क्षुद्रत्वात् Pt_2. [11] 'किरियुल्लु' J_2.

(पा.) निदिग्धिका—राष्ट्रिकेत्यपि। निदिग्धिकानामानि। 'वांकुडु' ॥ ९३ ॥

नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ९४ ॥
रञ्जनी श्रीफली तुत्था द्रोणी डोला च नीलिनी।

(वि.) नीलीति—नीलवर्णत्वान्नीली। काला च। [1]क्लीतकं विनिमयोऽस्या अस्तीति क्लीतकिका[2]। ग्रामे [3]भवतीति ग्रामीणा। [4]मधूनि मधुराणि पर्णान्यस्या मधुपर्णिका। रञ्जयति [5]पटादिकं नीलीकरोतीति रञ्जनी। 'रञ्ज रागे'। [6]रम्यफलत्वात् श्रीफली। फलनिष्पत्तिसमये तुद्यते पीड्यते तुत्था। 'तुद व्यथने'। अस्पृश्यतया द्विजोऽत्र द्रवतीति [7]द्रोणी। 'द्रु गतौ'। तूणीति वा पाठः। 'तुण संकोचने'। 'तूण प्रपूरणे' इति वा धातुः। डोल्यते वायुनेति डोला। 'डुल उत्क्षेपे'। दोलेति वा पाठः। नीलवर्णोऽस्या अस्तीति नीलिनी। नीलीनामानि। 'नीलिचेट्टु' ॥ ९४ ॥

[1] क्लीतकं K_6. [2] Pt_2 adds 'डुक्रीञ् द्रव्यविनिमये'. [3] भवा F_2, Pt_2. [4] मधुमासे Pt_2. [5] वस्त्रादिकं Pt_2. [6] फलवतीःवात् K_2. [7] द्रवन्ति जना अस्या अस्पृश्यत्वात् Pt_2.

(पा.) नीली—क्लीतकिका। क्लीतकीति पाठान्तरम्। ग्रामीणा। ह्रस्वमध्येति केचित्। मधुपर्णिका—नीलिनी। द्रोणी दोरेति वा। द्रोणी तूणी चेति केचित्। नीलीनामानि। 'नीलिचेट्टु' ॥ ९४ ॥

अवल्गुजः सोमराजी सुवल्ली सोमवल्लिका ॥ ९५ ॥
कालमेषी कृष्णफली वाकुची पूतिफल्यपि ।

(वि.) अवल्गुज इति—[1]पूतिगन्धित्वाद् अवल्गोररम्याद् बीजाज्जात:[2] अवल्गुजः[3]। सोमेनाह्लादेन राजत इति सोमराजी। 'राजृ दीप्तौ'। शोभना वल्ल्योऽस्या सन्तीति सुवल्ली। सोमा आह्लादका[4] वल्ल्योऽस्या इति सोमवल्लिका। कालवर्णेन मिष्यते [5]कृष्णफलेन शब्द्यत इति कालमेषी। 'मिष[6] शब्दे'। कृष्णवर्णानि फलान्यस्याः कृष्णफली। वाति क्रिमीन् हन्ति [7]कुष्ठादिरोगान् संकोचयतीति वाकुची। 'वा गतिगन्धनयोः'। 'कुच[8] संकोचने' इति च धातुः। पूतिः गन्धः फलेऽस्या इति पूतिफली। वाकुचीनामानि ॥ 'कारुगच्चपेरु' ॥ ९५ ॥

[1] असाम्यात् K_6; पूतिबीजत्वात् D_2, K_6. [2] जायत इति K_5, K_6. [3] G adds 'जनी प्रादुर्भावे.' [4] आह्लादकारिणी वल्ली Pt_2. [5] कृष्णफलीति G, J_2; फलेति B_1, K_2, Pt_2. [6] 'मिष मिश शब्दे' K_6. [7] वातं Pt_2. [8] 'कुच शब्दे तारे' Pt_2.

(पा.) अवल्गुजः—पूतिवल्ल्यपि। वाकुचीनामानि। 'वावंजि' 'वारुगच्च' ॥ ९५ ॥

कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ९६ ॥
ऊषणा पिप्पली शौण्डी कोलाथ करिपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वसिरः पुमान् ॥ ९७ ॥

(वि.) कृष्णेति—कृष्णवर्णत्वात् कृष्णा। कर्षति रोगानिति वा। 'कृष विलेखने'। [1]उपकोलति संस्त्यायत इति उपकुल्या। 'कुल संस्त्याने बन्धुषु च'। [2]विदेहाख्य-

देशे भवा वैदेही। [3]मगधदेशे भवा मागधी[4]। चपलः उष्णो रसः तद्योगाच्चपला[5]। कणाः सन्त्यस्याः कणा। [6]रोगानूषतीति ऊषणा। 'ऊष [7]रुजायाम्'। पिपर्ति पालयतीति पिप्पली। 'पॄ पालनपूरणयोः'। [8]रोगापनोदने शक्तित्वात् शौण्डी। [9]कोलति संस्त्यायतीति कोला। 'कुल संस्त्याने'। पिप्पलीनामानि। 'पिप्पलिपेरु'॥ [10]करिणः पिप्पली करिपिप्पली। [11]मर्कटरोमाभावयवयोगात् कपिवल्ली। कोलवद् वराहवत् स्थूला वल्ली यस्याः कोलवल्ली। श्रेयस्करत्वात् श्रेयसी। वस्यते [12]रोमभिराच्छाद्यत इति वसिरः। 'वस आच्छादने'। वशिर इति वा पाठः। गजपिप्पलीनामानि। 'गजपिप्पलिपेल्लु'[13]॥ ९६–७॥

[1] उपगता कुल्या जन्मभूमित्वेनानयेति Pt_2. [2] विदेहदेशे F_2, Pt_2. [3] मगधाख्य° J_2. [4] मागधी च only in K_2. [5] चपलाः कणा अस्याः सन्तीति G, K_5, K_6. [6] B_1 omits two lines. [7] 'ऊष दाहे' G. [8] K_6 adds त्रिदोष°. [9] कुल्यते K_5, K_6. [10] करियोग्या Pt_2. [11] कपि° Pt_2. [12] लोमभिः B_1, K_5. [13] 'गजहंपिप्पली' J_2.

(पा.) कृष्णा—कोला। पिप्पलीनामानि। 'पिप्पलि'॥ अथ करिपिप्पली—वशिरः पुमान्। श्रेयसी तु शिरः पुमानिति पाठान्तरम्। 'काण्डी[1] वशिरकाण्डीका[2] गृहाकाण्डा[3] शिरः पुमान्' इति वैजयन्ती (पृ. १२९, श्लो. ७८)। 'गजपिप्पलि'॥९६–७॥

[1] 'काण्डी वसीरकाण्डीरौ गृहकाण्डः शिरः पुमान्' इति मुद्रितग्रन्थे. [2] काण्डीरा B_3. [3] गृहकाण्डा B_3.

चव्यं तु चविकं कोकचिञ्चीगुञ्जे तु कृष्णला।
पलंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः॥ ९८॥
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि।

(वि.) चव्यमिति—चर्व्यत इति चव्यम्[1]। चविकं च। चविका च। 'चर्व अदने'। चव्यनामनी। 'चव्यमुपेल्लु'॥ कोकवर्णाश्चिञ्चाः प्रान्ता अस्या इति कोकचिञ्ची। काकचिञ्चीति वा पाठः। शुष्कदशायां[2] गुञ्जतीति गुञ्जा। 'गुजि अव्यक्ते शब्दे'। [3]कृष्णवर्णं प्रान्ते लातीति कृष्णला। 'ला आदाने'। गुञ्जानामानि। 'पूसलगुरिवेंदपेरु'॥ पलं मांसं कण्टकमुखेन कषतीति पलंकषा। 'कष हिंसायाम्'। इक्षोर्गन्ध इव गन्धोऽस्या अस्तीति इक्षुगन्धा[4]। शुनो दंष्ट्रेव हिंस्रत्वात् श्वदंष्ट्रा[5]। स्वादवः कण्टका अस्य [6]स्वादुकण्टकः। गवां कबलेषु कण्टको गोकण्टकः[7]। गवि [8]भूमौ क्षुर इव पाददुःखहेतुत्वाद् गोक्षुरकः। वने शृङ्गमिव [9]दुःखहेतुत्वादटति प्रतिपद्यत इति वनशृङ्गाटः[10]। 'अट[11] गतौ'। गोक्षुरनामानि। 'पल्लेरुचेट्टु'॥ ९८॥

[1] पृषोदरादि B_1. [2] शुष्कदलायां B_1. [3] कृष्णं वर्णं J_2. [4] इक्षुगन्धी J_2. [5] शुन इव दंष्ट्रा कण्टकात्मा Pt_2. [6] मृदुकण्टकत्वात् G, I, K_5, Pt_2. [7] गवां कण्टको बाधकः Pt_2; गोषु G, I. [8] भुवि G, I, K_3, Pt_2. [9] दुःखकरत्वमटतीति Pt_2. [10] वनशृङ्गाटकः B_1, D_2, K_5, K_6. [11] 'अट पट गतौ' K_5, K_6.

(पा.) चव्यं तु चविका। 'चव्यमु'॥ [1]काकबिम्बीगुञ्जे तु कृष्णला। शेषे—

'वर्तन्तेऽस्यां रक्तिका च ताम्रिका कृष्णरक्तिका।
चूडामा कपिलक्रोडा काकसाह्वा परा नव॥
काकशब्दा पीलुपाठ्यौ चिञ्चीणन्त्यदनी नखी।
जङ्घा रक्ता च दक्षा च॥'

रक्तगुञ्जानामानि। 'येर्‍गुरिज'॥ शेषे—'सा शुक्ला चेन्मधुस्रवा'। 'तेल्लगुरिज'॥ पलंकषा—वनशृङ्गाट इत्यपि। पलंकषानामानि। 'पल्लेरु'॥ ९८॥

[1]Reading found in B_3.

विश्वा विषा प्रतिविषातिविषोपविषारुणा॥ ९९॥
शृङ्गी महौषधं चाथ क्षीरावी दुग्धिका समे।

(वि.) विश्वेति—विशति [1]रोगिणामुदरमिति विश्वा। 'विश प्रवेशने'। कटुत्वेन शरीरं वेवेष्टीति विषा। 'विष्लृ व्याप्तौ'। विषस्य प्रति [2]प्रतिकारः प्रतिविषा[3]। विषमतिक्रान्ता अतिविषा। उपगता विषम् उपविषा। अपविषेति पाठे अपगतं विषमस्या अपविषा। विरुद्धलक्षणया अरुणकन्दत्वाद् अरुणा,[4] श्वेतकन्देत्यर्थः। शृङ्गयुक्तत्वात् शृङ्गी। महच्च तदौषधं च महौषधम्। अतिविषानामानि। 'अतिवस[5]'॥ क्षीरमवतीति[6] क्षीरावी। दुग्धमस्या इति दुग्धिका। दुग्धिकानामनी। '[7]चिरुपालचेट्टु'॥ ९९॥

[1] रोगिणो हृदये F_2, Pt_2. [2] प्रतीकारः J_2. [3] वीतिविषा G. [4] अरुणवर्णत्वात् Pt_2. [5] 'सिन्न अतिवसपेरु' K_3. [6] K_5, K_6 add रक्षतीति; 'अव रक्षणे' G, J_2, K_2, K_5. [7] 'करीबेल्लियगिड' J_2.

(पा.) विश्वा—महौषधं च। अतिविषानामानि। 'अतिवस'। अथ क्षीरावी—समे। क्षीरिणीलताया नामनी। क्षीरकाकोलीति गौडाः। 'पिन्नपाल'। अष्टकवर्गौषधम्।

'जीवकर्षभकर्द्धिवृद्धिमेधामहामेधाः।
काकालीक्षीरावीकाकोलीत्यष्टको वर्गः'॥ ९९॥

शतमूली बहुसुताभीरुरिन्दीवरी वरी ॥ १०० ॥
ऋश्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी ।
अहेरुरथ पीतद्रुकालेयकहरिद्रवः ॥ १०१ ॥
दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि ।

(वि.) शतमूलीति—शतं बहूनि मूलान्यस्याः सन्तीति शतमूली । बहवः सुता मूलान्यस्या इति बहुसुता । न भीरुः अभीरुः, स्थिरपत्रत्वात् । [1]उत्पलाभपत्रत्वाद् इन्दीवरी । भुवं मूलैर्वृणोतीति वरी । 'वृञ् वरणे' । ऋश्यैर्मृगैः प्रोक्ता [2]आश्रिता ऋश्यप्रोक्ता । ऋष्यप्रोक्तेति वा पाठः । अभीरूणि [3]कम्पशून्यानि पत्राण्यस्याः सन्तीति अभीरुपत्री । [4]नारायणाज्जाता नारायणी । शतमूलैरावृणोति भुवमिति शतावरी । 'वृञ् वरणे' । न हिनोतीति अहेरुः[5] । 'हि गतौ' । आहेरुरिति वा पाठो ग्राह्यः । शतावरीनामानि । 'पिल्लिपिच्चर पेल्लु' ॥ पीतो द्रुः स्कन्धोऽस्येति पीतद्रुः । [6]विरुद्धलक्षणया कालवर्णोऽस्येति कालेयकः । पीतवर्ण इत्यर्थः । कालयति दोषानिति कालीयक इति वा पाठः । 'कल किल क्षेपे' । हरिश्चासौ द्रुश्च हरिद्रुः । [7]दारुसंबन्धिनी दार्वी । अत्यर्थं रोगान् पचतीति पचंपचा । 'डुपचष् पाके' । [8]दारोर्हरिद्रा दारुहरिद्रा । कुष्ठादिरोगेभ्यः पिपर्तीति पर्जनी । 'पॄ पालनपूरणयोः' । पर्जनीनामानि । 'म्रानिपसुवुपेल्लु' ॥ १००–१ ॥

[1] पुष्पत्वात् K_5, K_6. [2] दर्शिता F_2, K_5, K_6. [3] दृढत्वेन भयरहितानि Pt_2. [4] विष्णुना सहजातत्वात् K_6; सहजत्वात् K_5; सहभावत्वात् B_1. [5] विरुद्धलक्षणया अहितत्वाद् अहेतुः K_6; अहेतुत्वात् G, J_2. [6] K_5 omits 3 lines. [7] दारोः K_2, K_6. [8] दारुसंबन्धिनी Pt_2.

(पा.) शतमूली—[1]वृष्यप्रोक्ता । ऋष्यप्रोक्ता वा । ऋश्यप्रोक्तेति तन्त्रान्तरम् । भीरुपत्रीनारायण्यः । द्वन्द्वाद्बहुवचनम् । शतावरी । आहेरुः[1] । अहेरुर्वा । शतावरीनामानि ।

'आहेरुः शतवीर्या स्यादभीरुः शतमूलिका ।
सहस्रवीर्याभीरुश्च ।'

इति प्रतापाभिधानादभीरुरपि । 'पिल्लपींचर' ॥ अथ पीतद्रु—पर्जनीत्यपि । दारुहरिद्रानामानि । 'मानुपनुपु' ॥ १००–१ ॥

[1] Reading adopted in B_3.

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥ १०२ ॥
शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका ।
वृषोऽटरूषः सिंहास्यो वासको वाजिदन्तकः ॥ १०३ ॥

(वि.) वचेति—अनया वक्तीति वचा[1]। 'वच परिभाषणे'। उग्रो दुःसहो गन्धोऽस्या इत्युग्रगन्धा। षड् ग्रन्थयः पर्वाण्यस्याः षड्ग्रन्था। गोरिव लोमान्यस्या गोलोमी। शतं बहूनि पर्वाण्यस्याः [2]शतपर्विका। वचानामानि। 'वसपेल्लु'॥ शुक्लवर्णत्वात्[3] शुक्ला। हिमवति भवा हैमवती। श्वेतमूलवचानाम। 'तेल्ल [4]वस पेरु'॥ वचादिशतपर्विकान्तानि पञ्च नामानि सामान्यवचाया एवेति केचित्॥ वैद्यानां मातेव [5]हितकारित्वाद् वैद्यमाता। हिनस्ति कासादिरोगानिति सिंही। 'हिसि हिंसायाम्'। ज्वरितादिभिर्वाश्यते स्तूयत इति वाशिका। 'वाश्टृ शब्दे'। उश्यते काम्यते वैद्यैरिति वा। 'वश कान्तौ'। [6]तिक्तं रसं वर्षतीति वृषः। 'वृषु सेचने'। अटतो[7] व्याप्तस्य रोगस्य रोषति अटरूषः। 'रुष हिंसायाम्'। [8]सिंहमुखाभपुष्पत्वात् सिंहास्यः। वासयतीति [9]वासिकः। वस्ते आच्छादयतीति वा। वाजिदन्ता इव केसराण्यस्य वाजिदन्तकः[10]। वाशिकानामानि। 'अड्डसरमु'॥ १०२-३॥

[1] 'वस पेरु' K_5, K_6; 'बजे' J_2. [2] 'नल्लवसपेरु' K_2, K_6. [3] पर्वत्वात् K_5. [4] 'बिळियबजे' J_2. [5] रोगभेदीति K_6. [6] मधु वर्षतीति Pt_2. [7] अटान् व्याप्तान् रोगान् Pt_2. [8] सिंहास्याकारपुष्पत्वात् Pt_2. [9] वाशिकाशब्दवद् वाशिक (वासिक D_2) शब्दव्युत्पत्तिः K_5, K_6. [10] वाजिदन्ताकारकेसरत्वात् Pt_2.

(पा.) वचोग्रगन्धा—शतपर्विका। वचानामानि। 'वस'॥ शुक्ला हैमवती। 'तेल्लवस'॥ वैद्यमातृसिंह्यौ—वृषा। स्त्रीलिङ्गः। वैद्यके पुंलिङ्गश्च दृश्यते॥ अटरूषः। दीर्घादिरपि[1]। सिंहास्यो—वाजिदन्तकः। वाशानामानि। 'अडसरमु'॥ १०२-३॥

[1] B_3 adds आटरूष इति.

आस्फोटा गिरिकर्णी स्याद् विष्णुक्रान्तापराजिता ।
इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ॥ १०४ ॥

(वि.) आस्फोटेति—[1]आस्फोटयति पित्तादीनित्यास्फोटा। 'स्फुट भेदने'। गिरेः[2] कर्णसादृश्याद् गिरिकर्णी। विष्णुना समाक्रान्ता विष्णुक्रान्ता[3]। विष्णोरिव क्रान्तिरस्या इति वा। अत एव भूतव्रातेनाप्रतिहता [4]अपराजिता। विष्णुक्रान्तानामानि।

'विष्णुक्रान्तमु' ।। इक्षोरिव [5]गन्धोऽस्या इति इक्षुगन्धा । काण्डे इक्षोरिव ग्रन्थयोऽस्य सन्तीति काण्डेक्षुः[6] । कोकिलस्य अक्षिणी इव पुष्पाण्यस्य कोकिलाक्षः[7] । इक्षुगन्धं [8]राति ददातीति इक्षुरः । 'रा दाने' । पारुष्यात् क्षुर इव क्षुरः । क्षुरतीति क्षुरः । 'क्षुर विलेखने' । इक्षुर एव क्षुरः । इकारलोपः । पिधानशब्दवत्[9] । कोकिलाक्षनामानि । '[10]गोलिमिडि' ।। १०४ ।।

[1] आस्फोटति, 'स्फुट विकसने' Pt_2. [2] सूक्ष्मगिरिवत् सूक्ष्माश्मवत् कर्णौ (कर्णिका J_2) ऽस्याः K_5, K_6. [3] रक्षाहेतुत्वाद् विष्णुना क्रान्ता Pt_2. [4] अपराजिता भूतैः Pt_2. [5] गन्ध इव गन्धः F_2, Pt_2. [6] काण्डेन इक्षुरिव Pt_2. [7] कोकिलाक्षाभपुष्पत्वात् K_5, K_6. [8] दिक्षु राति करोति K_5. [9] D_2, K_6 add द्रष्टव्यः. [10] 'सिन्न गोलिमिदिचेट्टु' K_3.

(पा.) आस्फोटा—स्यात् । शेषे—'शीपलाश्वखुरी च सा । सृण्डा च' गिरिकर्णिकानामानि । 'दिंटेन' ।।

'. . . अत्र सितायां तु श्वेतसारा गवार्दनी ।
चारणी कटुनी सूर्याश्वक्षुद्राश्वखुरा तथा ।।
श्वेतपुष्पी च' ।

श्वेतगिरिकर्णिकानामानि । 'तेल्लदिंटेन' ।। 'नीला तु नीलपुष्प्यतिमेचका । वनिता स्थूलपुष्पी च' । नीलगिरिकर्णिकानामानि । 'नल्लदिंटेन' ।। वैजयन्त्याम् (पृ. ५६, श्लो. १३३-४)—'अपराजिता । [1]विष्णुक्रान्तापरास्फोटाश्वखुरी शीतलात्र[2] तु' इत्युक्तत्वाद् विष्णुक्रान्तापराजिताशब्दौ गिरिकर्णिकायामपि ।। विष्णुक्रान्तापराजिता । विष्णुक्रान्तानामनी । 'विष्णुक्रान्त' । 'विष्णुक्रान्ता तु सुमुखी भवघ्नी स्यान्महारसा' । एतानि च ।। इक्षुगन्धा—काण्डेक्षा । काण्डेक्षुरिति वा । कोकिलाक्षा—क्षुराः । इक्षुगन्धानामानि । 'मुल्लिगोलिमिडि' । 'गोजाकर्णी फेनदुग्धा लूताशत्रुः पयस्विनी' इति क्षीरेक्षुगन्धापर्यायोऽपि पृथक् । 'पालगोलिमिडि' ।। १०४ ।।

[1] वरास्फोटा B_3; परास्फोतेति मुद्रितग्रन्थे. [2] तथा B_3.

शालेयः स्याच्छीतशिवा छत्रा मधुरिका मिसिः ।
मिश्रेयोऽप्यथ सिंहुण्डो वज्रद्रुः स्नुक्स्नुही गुडा ।। १०५ ।।
समन्तदुग्धाथो वेल्लममोघा चित्रतण्डुला ।
तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम् ।। १०६ ।।

(वि.) शालेय इति—शाल्यते श्लाघ्यते शाकाय भवतीति शालेयः। 'शाल श्लाघायाम्'। स्वपुष्पैः शालया गृहेणेवाच्छादितत्वात् इति वा। शीतवीर्यत्वात् शिवा भद्रा [1]शीतशिवा। छत्राकृतिरस्याः पुष्पेष्विति [2]छत्रा। [3]स्वादुत्वात् मधुरिका। मस्यति परिणमति तिक्तत्वेनेति [4]मिसिः। 'मसी परिणामे'। दुःखमिश्रितं श्रेयोऽत्रास्तीति मिश्रेयः। पुष्पैर्मिश्रयते[5] संश्लिष्यत इति वा। 'मिश्र संपर्के'। मधुरिकानामानि। 'सदापपेरु'॥ सिंहतुण्डाभशाखत्वात्[6] सिंहुण्डः। तकारलोपः। वज्र इव[7] प्लीहादिरोगान् दृणातीति वज्रद्रुः। 'दॄ विदारणे[8]'। वज्र इव द्रुः स्कन्धोऽस्येति वा। [9]स्नुह्यति क्षीरमिति स्नुक्। स्नुही च। 'ष्णुह उद्गिरणे'। गुडति प्लीहादिरोगेभ्यो गुडा। 'गुड रक्षायाम्'। समन्ताद् दुग्धं क्षीरमस्या इति समन्तदुग्धा। [10]सिंहुण्डनामानि। 'जेमुडुपेरु'॥ वेल्लति लघुत्वादिति वेल्लम्। 'वेल्ल [11]चलने'। [12]उपयोगिबीजत्वाद् अमोघा। चित्रास्तण्डुलाः सूक्ष्मबीजान्यस्याः चित्रतण्डुला। तण्डुलाः सन्त्यस्येति तण्डुलः। कृमीन् हन्तीति कृमिघ्नः। 'हन हिंसागत्योः'। विडति गुल्मादिग्रन्थीनिति विडङ्गम्[13]। 'विड भेदने'। विडङ्गनामानि। 'वायुविलङ्गमु पेरु'॥ १०५–६॥

[1] शितवीर्येण, शितशिवा K_5, K_6. [2] छादयति भुवनं Pt_2; छत्राकृतित्वात् J_2. [3] मधुररसयोगात् Pt_2. [4] मसिः B_1, J_2. [5] मिश्यते, 'मिश शब्दे रोषकृते च' K_5, K_6. [6] शाखात्वात् K_3. [7] वज्रमिव भेदकत्वात् F_2, Pt_2. [8] 'द्रु गतिहिंसाकौटिल्येषु' K_6. [9] स्नौति, 'ष्णु प्रस्रवणे' K_5, K_6. [10] 'गुड्डुकल्लि' J_2. [11] संचलने Pt_2. [12] उपयोग° J_2; सुप्रयोजनत्वात् F_2, Pt_2. [13] रोगं J_2, Pt_2.

(पा.) शालेयः—मिसिः। 'तालपर्णी शीतशिवा छत्रेति' प्रतापवचनात् स्त्रियां च। 'तालपर्णी मिसिः पुमान्' इति वचनात् मिसिः पुंलिङ्गः॥ मिश्रेयोऽपि। 'वन्यायां शतपुष्पायां मिश्रेया तालपत्रिका' इति प्रतापवचनात् स्त्रियामपि। वन्यशतपुष्पानामानि। 'अडवि सदाप'। अथ सिंहुण्डः—

> 'प्रायो जनाः सन्ति वनेचराद्याः[1] गोपादयः प्राकृतनामतज्ज्ञाः[2]।
> प्रयोजनार्थो वचनप्रवृत्तिर्यतस्ततः[3] प्राकृतमित्यदोषः॥'

इति धन्वन्तरिवचनात् (ध. नि. १. ८) प्राकृतग्रहणम्। '[4]सिंहुण्डः सिन्धुरप्यस्याम्' इति वैजयन्त्यामपि (पृ. ५३, श्लो. ९८) प्राकृतग्रहणमेव कृतम्॥ वज्रद्रुः—समन्तदुग्धा। सिंहुण्डनामानि। 'अकुचमुडु'। अनुक्तम्—'निष्पत्रिका तु गण्डीरी वज्रिका च त्रिकण्टकः'। कण्टकवतीस्नुहीनामानि। 'मुलुचमुडु'॥ अथो—पुंनपुंसकम्। विडङ्गनामानि। 'विडङ्गमु'॥ २०५–६॥

[1] °स्ते B₃. [2] °संज्ञा: B₃. [3] यस्मात् B₃. [4] 'सिद्धुण्ड:' इति मुद्रितग्रन्थे; सीहुण्ड इति पाठः क्षीरस्वामिटीकायाम् (पृ. १०७).

बला वाट्यालको घण्टारवा तु शणपुष्पिका।
मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च॥ १०७॥

(वि.) बलेति—बलन्त्यनया [1]बला। 'बल प्राणने'। वटति [2]वेष्टयति समीपदेशमिति वाट्यालकः। 'वट वेष्टने परिभाषणे च[3]'। बलानामनी। 'चिट्टामुदपुचेट्टु'॥ घण्टेव रौतीति[4] घण्टारवा। 'रु शब्दे'। शणस्येव पुष्पाण्यस्याः शणपुष्पिका। शणपुष्पिकानामनी। 'गिलकचेट्टु'॥ मृद्यत इति मृद्वीका। 'मृद क्षोदे'। मृदुत्वयोगाद्वा। गोस्तनाभफलत्वाद् गोस्तनी। द्राति द्रावयति दाहादिकमिति द्राक्षा। 'द्रा कुत्सायां गतौ' 'द्रु गतौ'। [5]स्वादुत्वात् स्वाद्वी। अत एव [6]मधुरसा च। द्राक्षानामानि। '[7]द्राक्षपेल्लु'॥ १०७॥

[1] बलति I, J_2, K_6; बलत्वसमा K_5. [2] K_5 adds गुल्मादिस्थलं. [3] 'वट परिवेष्टने' K_6. [4] D_2, I, J_2 add शुष्कदशायां; °दलायां B_1, K_2; घण्टाया रवो अस्या इति Pt_2. [5] स्वादुत्वयोगात् J_2, K_5, K_6. [6] मधुरसयोगात् Pt_2. [7] 'द्राक्षेयगिडु' J_2.

(पा.) बला वाट्यालकः। बलानामनी। 'मुत्तुवपुलगमु'। अनुक्तम्—'वाट्यपुष्ट्यामतिबला'। 'अतिबल'। 'वाट्यवन्यां महाबला'। 'महाबल'॥ घण्टारवा—शणपुष्पिका। घण्टारवानामनी। 'गिलगिच्च'॥ मृद्वीका। ह्रस्वमध्येति च कथयन्ति। 'मृद्वीका किङ्किणीकादेर्मृद्विका सौकुमार्यतः' इति। गोस्तनी—मधुरसेति च। द्राक्षानामानि। 'द्राक्षतींगे'। 'हारहूरा प्रियाला च कृष्णा स्वादुरसा गुडा'। एतानि च॥ १०७॥

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत्।
त्रिभण्डी रेचनी श्यामापालिन्द्यौ तु सुषेणिका॥ १०८॥
काला मसूरविदलार्धचन्द्रा कालमेषिका।

(वि.) सर्वानुभूतिरिति—[1]कषायमधुररसत्वात् सर्वैरनुभूयत इति सर्वानुभूतिः। 'भू सत्तायाम्'। रेचनीत्वात् सरतीति सरला। 'सृ गतौ'। त्रयः पुटा अस्या इति त्रिपुटा[2]। त्रिभिः पुटैर्व्रियते आच्छाद्यत इति त्रिवृता। 'वृञ् वरणे'। [3]वृत्यत

इति वा, 'वृतु [4]वरणे'। त्रिवृच्च[5]। कफहरत्वपित्तहरत्वरेचकत्वगुणैस्त्रिभिः प्रवृत्तिनिमित्तैर्भण्ड्यते[6] शब्द्यत इति त्रिभण्डी। 'भडि [7]परिभाषणे'। रेचयति विरेचयति रेचनी। 'रिचिर् [8]विरेचने'। रेचनहेतुत्वाद्वा। रोचनीति वा पाठः। [9]रुचिकरत्वात् रोचनी। रेचनीनामानि। 'तेल्लतिगडपेल्लु'॥ [10]श्यामवर्णत्वात् श्यामा। क्रिम्यादिरोगेभ्यः पालयतीति पालिन्दी। 'पाल रक्षणे'। पालिनीति वा पाठः। सुष्ठु सिनोति क्रिमीन् हन्तीति सुषेणिका। 'षिञ् बन्धने'। [11]कालवर्णत्वात् काला। [12]मसूराणि मृष्टानि विदलान्यस्या इति मसूरविदला। [13]अर्धचन्द्रा[14]कारदलत्वाद् अर्धचन्द्रा। [15]कालेति नाम्ना मिष्यते शब्द्यत इति कालमेषिका। '[16]मिष स्पर्धायाम्'। श्यामानामानि। 'नल्लतेगडपेल्लु'॥ १०८॥

[1] मधुरतिक्तादीनां सर्वरसानामनुभूतिरत्रेति Pt_2. [2] पुटत्रयशालिनीत्वात् D_2, J_2, K_5. [3] वर्त्यते J_2. [4] आच्छादने K_5, K_6. [5] कफहरणपित्तहरणरेचकत्वरूपाणां त्रयाणां गुणानां वृत्तिर्वर्तनमत्रेति Pt_2. [6] उद्घाट्यते K_6. [7] कल्याणे K_5, K_6. [8] पृथग्भावे Pt_2. [9] रुचिरत्वात् B_1, K_5. [10] कृष्ण° Pt_2. [11] कृष्णत्वात् I, K_2; कृष्णवर्णत्वात् K_5, K_6. [12] मसूर इव विदला Pt_2; मयूरविदलेति वा पाठः Pt_2. [13] Pt_2 adds कथंचित्. [14] सदृश for आकार F_2, Pt_2. [15] कालेन वर्णेन F_2, Pt_2. [16] 'मिष मिश शब्दे' K_6.

(पा.) सर्वानुभूतिः—रेचनी। श्वेतत्रिवृतानामानि। 'तेल्लतेगड'॥ श्यामा—कालमेषिका। नीलत्रिवृतानामानि। 'नल्लतेगड'॥ १०८॥

मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका॥ १०९॥
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री च या सिता।
अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका॥ ११०॥

(वि.) मधुकमिति—[1]मधुकरत्वेन मधुसमत्वात् मधुकम्। क्लीबत्वं तकति [2]प्रतिहन्तीति क्लीतकम्। 'तक [3]प्रतिघाते'। यष्ट्याकारत्वात् मधुद्रवत्वाच्च [4]यष्टिमधुकम्। मधुयष्टिका[5] च। यष्टिमधुकनामानि। 'अतिमधुरमु'॥ विदारयति भूमिमिति [6]विदारी। 'दॄ विदारणे'। क्षीरेव[7] शुक्लेवामलस्वरूपेति[8] क्षीरशुक्ला। इक्षोरिव गन्धोऽस्या इक्षुगन्धा। 'तेल्लनेलगुम्मुडु'॥ रोगान् नाशयामीति क्रोशतीति क्रोष्ट्री[9]। 'क्रुश आह्वाने रोदने च'। 'नल्लनेलगुम्मुडुपेल्लु'॥ विदार्यादीक्षुगन्धान्तानि नामानि क्रोष्ट्रीनामानीति केचित्॥ क्षीरवत् श्वेता विदारी क्षीरविदारी। स्वरूपतः कन्दतश्च क्षीरतश्च श्वेतत्वात् महाश्वेता। ऋक्षवत् क्रिम्यादिरोगान् गन्धयते नाशयतीति ऋक्ष-

गन्धिका। 'गन्ध अर्दने'। ऋक्ष्णुवन्ति हिंसन्तीति ऋक्षाः। 'ऋक्ष हिंसायाम्'। [10]ऋक्षान् पित्तादिरोगान् गन्धयत इति वा। क्षीरविदारीनामानि। 'पालगुम्मुडुपेल्लु' ॥ १०९–१० ॥

[1] मधुरत्वात् K_5, K_6. [2] हन्ति K_5. [3] हसने D_2, J_2. [4] यष्टिरूपं मधुकं Pt_2. [5] मधुना तुल्या यष्टिः F_2, Pt_2. [6] विदार्य पच्यत इति D_2, K_5, K_6. [7] क्षीरमिव K_5. [8] अमलस्वरूपिणी B_1, K_5. [9] मधुरत्वाद् वृष्यादिप्रयोगेषु समर्थाहमिति क्रोशतीति Pt_2. [10] ऋक्षसदृशान् हिंस्रान् F_2, Pt_2.

(पा.) मधुकं—मधुयष्टिका। अत्र द्वे नपुंसके। द्वे [1]स्त्रीलिङ्गे। मधुयष्टिकानामानि। 'यष्टिमधुकमु'॥ विदारी—या सिता। श्वेतविदारीनामानि। 'तेल्लनिनेलगुंमडि'॥ अन्या—ऋक्षगन्धिका। कृष्णभूमिकूश्माण्डनामानि। 'नल्लनिनेलगुंमडि'। महाश्वेतापदे विरोधिलक्षणा॥ १०९–१०॥

[1] यष्टिमधुकेति पारिजातानुसारी पाठः.

लाङ्गली शारदी तोयपिप्पली शकुलादनी।
खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः॥ १११॥

(वि.) लाङ्गलीति—[1]हलाकारफलयोगात् लाङ्गली। शरदि [2]भवा शारदी। [3]तोयजा पिप्पली तोयपिप्पली। शकुलानां [4]मत्स्यानामदनं[5] भवतीति शकुलादनी। जलपिप्पलीनामानि। 'नीरुपिप्पलिपेल्लु'॥ खरत्वम् उष्णत्वमश्नुत इति खराश्वा[6]। 'अशू व्याप्तौ'। कारुवत् सर्वौषधीनां भवतीति [7]कारवी। दीपनं करोतीति दीप्यः। दीप्यतेऽनेनेति वा। 'दीप दीप्तौ'। अग्निमान्द्यं मीनाति[8] नाशयतीति मयूरः। 'मीञ् हिंसायाम्'। लोचमुपनीतं मस्तकमस्येति लोचमस्तकः[9]। मयूरशिखानामानि॥ 'ओममु'॥ १११॥

[1] लाङ्गलाकारत्वात् F_2, Pt_2. [2] भवत्वात् K_5, K_6. [3] तोये D_2, J_2; जलजत्वात् B_1, K_3, K_5. [4] B_1 omits two lines. [5] अदनीभवति J_2; शकुलैर्मत्स्यैरद्यत इति Pt_2. [6] खरमत्युष्णमश्नुते D_2, K_2, K_5. [7] केन जलेन रौतीति करवः मयूरः, करवस्येयं F_2, Pt_2. [8] मिनोति, 'डुमिञ् प्रक्षेपणे' K_5, K_6. [9] मस्तकात् बीजानि लुच्यन्तेऽस्येति। 'लुञ्च अपनयने' K_5, K_6.

(पा.) लाङ्गली—शकुलादनी। नीरपिप्पलीनामानि। 'नीरुपिप्पलि'। 'मराटपुचेट्टन्नु'॥ खराश्वा—लोचमस्तकः। मयूरशिखानामानि। 'वोममनि कोंदरु' ॥ १११॥

गोपी श्यामा शारिबा स्याच्चन्दनोत्पलशारिबा।
योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥ ११२ ॥

(वि.) गोपीति—[1]अतिसाररोगिणं गोपायतीति गोपी। 'गुपू रक्षणे'। श्यामवर्णत्वात्[2] श्यामा। शीर्यन्तेऽनया दोषा इति शारिबा। 'शॄ हिंसायाम्'। चन्दयति [3]सुगन्धेनाह्लादयतीति चन्दना। 'चदि आह्लादने'। उत्पलाभपुष्पत्वाद् उत्पलशारिबा। उत्पलशारिबानामानि। 'सुगन्धिपालपेरु'॥ अष्टवर्गगतौषधियोगे साध्विति योग्यम्। ऋध्नोत्यनयेति ऋद्धिः। 'ऋधु वृद्धौ'। सिद्ध्यत्यारोग्यमनयेति सिद्धिः। 'षिधु संराद्धौ'। [4]लक्ष्यत इति लक्ष्मीः। 'लक्ष दर्शनाङ्कनयोः'। ऋद्ध्याख्यौषधिनामानि। 'ऋद्धियनुगन्धद्रव्यमु'॥ इमे [5]वृद्ध्याख्यौषधेरपि आह्वया नामानि॥ ११२॥

[1] अतिसारादि° K_5, K_6.　[2] °रूपत्वात् D_2, J_2.　[3] सौगन्ध्येन D_2, K_5, K_6.
[4] F_2, Pt_2 add अष्टवर्गयोगे.　[5] F_2, J_2 add वर्धतेऽनया वृद्धिः.

(पा.) गोपी—चन्दना। अनन्तेति केचित्। उत्पलशारिबा। शारिबानामानि। 'मामेन'॥ योग्यम्—लक्ष्म्यौ। ऋद्धेर्नामानि। 'ऋद्धि'॥ वृद्धेरपि—इमे। इमे योग्यादयो वृद्धिसंज्ञाया ओषधेरपि नामानि। 'वृद्धिपेल्लुन्नु'॥

'अष्टवर्गो महामेदा[1] मेदा[2] स्याज्जीवकर्षभौ।
काकोली क्षीरकाकोली ऋद्धिर्वृद्धिरितीरितः॥'

इति॥ ११२॥

[1] महामेधा B_3.　[2] मेधा B_3.

कदली वारणबुसा रम्भा मोचांशुमत्फला।
काष्ठीला मुद्गपर्णी तु काकमुद्गा सहेत्यपि ॥ ११३ ॥

(वि.) कदलीति—केन वायुना दल्यत[1] इति कदली। 'दल विशरणे'। वारणानां[2] बुसा घासः वारणबुसा। रमन्ते पक्षिणोऽत्रेति रम्भा। 'रमु क्रीडायाम्'। मुञ्चति त्वचमिति मोचा। 'मुच्लृ मोक्षणे'। अंशुमन्ति तेजस्वन्ति फलान्यस्या इति अंशुमत्फला। ईषदष्ठीला मज्जा अस्या अस्तीति काष्ठीला। कदलीनामानि। '[3]अरंटिचेट्टु'॥ [4]मुद्गस्येव पर्णान्यस्या मुद्गपर्णी। हीनमुद्गत्वात् काकमुद्गा। [5]सह्यते वातरोगोऽनया सहा। 'षह मर्षणे'। काकमुद्गानामानि। '[6]पिल्लिपेसरपेल्लु'॥ ११३॥

[1] दलतीति J_2, Pt_2. [2] वारणेन बुस्यत इति, 'बुस उत्सर्गे' Pt_2. [3] 'बाळेमर' J_2. [4] मुद्गपर्णाभपर्णयोगात् G, J_2, K_2, K_5. [5] सहते वातरोगं F_2, Pt_2. [6] 'मरुहेसरु' J_2.

(पा.) कदली वारणबुसा। वारणवृषा च। 'कदले पुनः। वृषा वारबुसा रम्भा' इति वैजयन्तीपाठात् (पृ. ५९, श्लो. १७३) कदलशब्दो वारबुसाशब्दश्च॥ रम्भा—काष्ठीला। कदलीनामानि। 'अरटिचेट्टु'। अनुक्तम्—'[1]शिलीन्ध्रः कदलीपुष्पम्'। तत्पुष्पनाम॥ मुद्गपर्णी—सहेत्यपि। मुद्गपर्णीनामानि। 'पिल्लपेसर'॥ ११३॥

[1] शिलीन्द्रः B_3.

वार्ताकी हिङ्गुली सिंही भण्डाकी दुष्प्रधर्षणी।
नाकुली सुरसा नागसुगन्धा गन्धनाकुली॥ ११४॥
नकुलेष्टा भुजंगाक्षी छत्राकी सुवहा च सा।

(वि.) वार्ताकीति—[1]वृत्तफलयोगाद् वार्ताकी। वार्तं निरामयं करोतीति वा। हिनोति वर्धत[2] इति हिङ्गुली। 'हि गतौ वृद्धौ च'। हिनस्ति कण्टकैरिति सिंही[3]। 'हिसि हिंसायाम्'। भण्ड्यते रुचिकरत्वाद् [4]भण्डाकी। 'भडि परिभाषणे'। भाण्डारीत्येके। भाण्डाकीत्यन्ये। कण्टकैर्दुःखेन प्रधृष्यत[5] इति दुष्प्रधर्षणी[6]। 'ञिधृषा प्रागल्भ्ये'। भण्डाकीनामानि। 'मुलकचेट्टु'॥ [7]नकुलानामियं प्रियेति नाकुली। शोभनो रसोऽस्या इति सुरसा। नागानां सर्पाणामिव सुगन्धोऽस्या इति नागसुगन्धा। [8]रास्ना, सुगन्धेति वा पाठः। गन्धतो[9] नकुलानां प्रिया[10] गन्धनाकुली। गन्धतो नकुलानामिष्टा नकुलेष्टा। सर्पनयनसदृशपुष्पत्वाद् [11]भुजंगाक्षी। छत्राभानि पर्णान्यकतीति छत्राकी[12]। 'अक कुटिलायां गतौ'। सुष्ठु वहत्यामोदं सुवहा। 'वह प्रापणे'। भुजंगाक्षीनामानि। 'सर्पाक्षिपेल्लु'॥ ११४॥

[1] आरोग्याय वर्तत इति, 'वृतु वर्तने' F_2, Pt_2. [2] वर्धयति J_2. [3] हिंस्री J_2. [4] भटति बिभर्त्यनया दीपनाग्निमिति भण्टाकी, 'भट भृतौ' F_2, Pt_2. [5] प्रधर्षत इति K_5, K_6. [6] दुष्प्रधर्षिणी D_2. [7] नकुलप्रियत्वात् G, I, K_6. [8] रस्यते रास्ना, 'रस आस्वादने' K_5. [9] गन्धेन Pt_2. [10] प्रियत्वात् J_2. [11] सर्पाक्षितुल्यपुष्पत्वात् J_2, K_5, K_6. [12] छत्राभपुष्पत्वात् D_2, K_5.

(पा.) वार्ताकी हिङ्गुली। हिङ्गुदीति केचित्। सिंही। क्षुद्रवार्ताकीनामानि। 'मुलक'। 'बृहत्यां प्रसहा काली वार्ताकी हिङ्गुली[1] कुली' इति वैजयन्ती (पृ. ५३, श्लो. १०४)। भण्टाकी दुष्प्रधर्षिणी। वार्ताकनामानि। 'वंग'।

'वातिङ्गणस्तु वार्ताकुर्वार्ताकः शाकबिल्वकः।
भाण्डाकी राजकूश्माण्डी वार्ताकी दुष्प्रधर्षिणी॥'

इति रभसकोशः। अनुक्तम्—'कटङ्काका राजमाता'। 'वंग'॥ नाकुली—सुवहा च सा। वैद्यके[2]—

'नाकुली सर्पगन्धा च सुगन्धा चोग्रगन्धिका।
अन्या महासुगन्धा तु सुवहा गन्धनाकुली॥
सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दिनी।'
'नाकुली[3] सुरसा रास्ना सुगन्धा गन्धनाकुली॥'

इत्युक्तत्वात् सर्पाक्ष्या रास्नायाश्च नामानि। 'सर्पाक्षिरास्नानु'॥ ११४॥

[1] हिङ्गुदीति मुद्रितग्रन्थे; वार्ताकुर्हिङ्गुलुरिति १०२ श्लोके. [2] धन्वन्तरीयनिघण्टुः (४. १०३–५) [3] भावप्रकाशे (Apte's Dict. p. 1341).

विदारिगन्धांशुमती सालपर्णी स्थिरा ध्रुवा॥ ११५॥
तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च।
भारद्वाजी तु सा वन्या शृङ्गी तु वृषभो वृषः॥ ११६॥

(वि.) विदारिगन्धेति—विदार्या इव गन्धोऽस्या इति विदारिगन्धा। [1]दीर्घा अंशवो मूलान्यस्याः सन्तीति अंशुमती। सालस्येव पर्णान्यस्याः सन्तीति सालपर्णी। [2]तिष्ठतीति स्थिरा। 'ष्ठा गतिनिवृत्तौ'। ध्रुवति स्थिरीभवतीति ध्रुवा। 'ध्रुव स्थैर्ये'। सालपर्णीनामानि। 'मुय्याकुपोन्नपेल्लु'॥ [3]तुण्डिकाद्वदनतो गवादीनीरयति प्रेरयतीति तुण्डिकेरी। 'ईर क्षेपे'। दूरप्रसरणात्[4] समुद्रान्ता। तन्त्वाद्यनेकलोकोपकाराय[5] कल्पत इति कार्पासी। 'कृपू सामर्थ्ये'। बदर्या इव फलान्यस्याः सन्तीति बदरा। कार्पासीनामानि। '[6]प्रत्तिचेट्टु'॥ भरद्वाजसृष्टत्वाद्[7] भारद्वाजी। वन्यकार्पासीनाम। [8]'अडविप्रत्ति'॥ वृषभशृंगाकारावयवयोगात् शृङ्गी। वृषभः। वृषश्च। ऋषभ इति वा पाठः। 'वृषभमहौषधमु'॥ ११५–१६॥

[1] दीर्घमूलरूपा अंशवः सन्त्यस्याः F_2, Pt_2. [2] दृढत्वात् स्थिरा D_2, K_5, K_6. [3] तुण्डिकान् वदनगतरोगान् B_1, F_2, Pt_2. [4] प्रसरात् Pt_2; प्रसारात् B_1, I, K_2. [5] जनोपकाराय F_2, Pt_2. [6] 'पत्ति' G_1, I; 'हत्ति' J_2. [7] भरद्वाजेन सृष्टा D_2, K_5, K_6. [8] 'मडदियहत्ति' J_2.

(पा.) विदारी—ध्रुवा। विदारीगन्धानामानि। 'मुय्याकुलपोन्न'। तुण्डिकेरी—बदरेति च। बदरं फलमस्यां बदरा। 'अर्शआदिभ्योऽच्' इति (५. २. १२७) सुभूतिटीकावचनाट्टाबन्तः। 'बदरं कोलकार्पास्योः फले स्याद्बदरी तयोः' इति विश्वप्रकाशवचनात् (पृ. १३४, श्लो. ११०) ङयन्तः। 'कार्पासो बदरः प्रोक्तः' इत्यमरमालावचनात् पुंलिङ्गोऽपि। कार्पासीनामानि। 'प्रत्तिचेट्टु'॥ भारद्वाजी—वन्या। वन्यकार्पासीनाम। 'अडविप्रत्तिचेट्टु'। वैद्यके—

'तुण्डिकेरी[1] समुद्रान्ता केसरा बदरा फला।
कार्पास्यक्ष्यत्र वन्यायां भारद्वाज्यपि कुष्ठनुत्॥'

इति। शृङ्गी—वृषः। वृषभाख्याया ओषधेर्नामनी। 'वृषभकमु'॥ ११५–१६॥

[1] 'तुण्डिकेर्यां रवा शीरा केसरा बदराफला' इति मुद्रितवैजयन्त्याम् (पृ. ५३, श्लो. ९९).

गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका।
धामार्गवो घोषकः स्यान्महाजाली स पीतकः॥ ११७॥

(वि.) गाङ्गेरुकीति—गङ्गाया[1] इदं [2]गाङ्गम्। जलमित्यर्थः। [3]तस्मिन्नीरयति प्रेरयतीति गाङ्गेरुकी। अथवा पवित्रत्वाद् गङ्गास्मरणफलमीरयतीति वा। 'ईर क्षेपे'। नागानां गजानां [4]बलकृत् नागबला। [5]झषति हिनस्ति रोगमिति झषा। 'झष हिंसायाम्'। ह्रस्वे स्वल्पे गवि जले एधत इति ह्रस्वगवेधुका। 'एध वृद्धौ'। नागबलानामानि। '[6]जिबिलिकचेट्टु'॥ धाम कफस्थानं कण्ठादिकम् [7]अर्जयतीति धामार्गवः। 'अर्ज अर्जने'। शुष्कदशायां [8]घोषयति शब्दायत इति घोषकः। 'घुषिर् विशब्दने'। घोषवल्लीनामनी। 'तेल्लपूवुल गल आवड चेट्टुपेल्लु'॥ [9]महाजालं वितानमस्या अस्तीति महाजाली। पीतवर्णघोषवल्लीनाम। 'पच्चपूवुलयावडचेट्टुपेरु'॥ ११७॥

[1] गङ्गायां K_5, K_6. [2] गाङ्गेयं J_2. [3] गाङ्गमीरयति Pt_2. [4] बलं K_5, K_6. [5] तीक्ष्णगन्धेन हिनस्ति D_2, F_2, K_6. [6] 'नागबलदहेद्यरु' J_2. [7] अर्जति F_2; मार्ष्टीति K_6; 'मृजूष् शुद्धौ' G, I. [8] घोषति J_2. [9] महत् जालं Pt_2.

(पा.) गाङ्गेरुकी—ह्रस्वगवेधुका। नागबलानामानि। वैद्यके—

'गाङ्गेरुकी नागबला [1]नीरबन्धनिका झषा।
विश्वदेवा तथारिष्टा [2]खञ्जा ह्रस्वगवेधुका॥'

इति। 'चिबिविक'॥ धामार्गवो—पीतकः। पीतकनामानि। 'आरवीर'। स इति सर्वनामनिर्देशः सांकर्यनिरासार्थः॥ ११७॥

[1] खरगन्धिनिकेति धन्वन्तरीयनिघण्टौ (१. २८४). [2] खण्डा ibid.

ज्यौत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका।
स्याल्लाङ्गलिक्यग्निशिखा काकाङ्गी काकनासिका॥ ११८॥

(वि.) ज्यौत्स्नीति—ज्योत्स्नेव रात्रौ [1]भासते ज्यौत्स्नी[2]। पटति विस्तीर्यत[3] इति पटोलिका[4]। पटं पटसदृशं पुष्पसमूहम् उलत्यावृणोतीति वा। 'उल आवरणे'। पुष्पे [5]जालसदृशत्वात् जाली। पटोलिकानामानि। 'पोट्लचेट्टुपेल्लु'॥ नद्यां भवा नादेयी। भूमौ जम्बूः भूमिजम्बुका[6]। नादेयीनामनी॥ [7]लाङ्गलवद् गर्भभेदकत्वात् [8]लाङ्गलिकी। अत एवाग्नेः शिखेव तिष्ठतीति अग्निशिखा[9]। लाङ्गलीनामनी। 'तरि[10] गोट्टु चेट्टु'॥ काकाङ्गसदृशफलमस्या अस्तीति [11]काकाङ्गी। काकनासिकासदृशफलमस्या[12] अस्तीति काकनासिका। काकनासिकनामनी। 'काकिदोण्डचेट्टु'॥ ११८॥

[1] अवभासते B_1, K_5. [2] 'भासृ दीप्तौ' G, F_2. [3] विस्तार्यते G, I, K_3, K_5. [4] 'पट गतौ' F_2; 'पट विस्तारे' K_5, K_6. [5] जालवत्त्वात् K_5, K_6. [6] जायते, 'जनी प्रादुर्भावे' D_2, K_5, K_6. [7] लाङ्गलीव F_2, Pt_2. [8] लाङ्गली Pt_2. [9] उष्णवीर्यत्वादग्निशिखा F_2, Pt_2. [10] 'तरियोरी' J_2. [11] काकस्येवाङ्गं फलमस्याः F_2, Pt_2. [12] °नासा° K_5, K_6.

(पा.) ज्योत्स्नी—जाली। पटोलिकानामानि। 'चेन्तिपोल्र'। अनुक्तम्—'बहुजाली कोकफला'। 'अडविबीर'॥ नादेयी—जम्बुका। भूमिजम्बूनामनी। 'नेलनेरेडु'॥ स्यात्—अग्निशिखा। लाङ्गलिकीनामनी। 'तरिगोर्'॥ काकाङ्गी—नासिका। वैद्यके[1]—'काकतुण्डफला च सा। सुरङ्गी तस्करस्नायुर्ध्वाङ्क्षतुण्डफला मता'॥ प्रतापे—

'काकजङ्घा नटी दासी काकसव्यपि लोमका।
पारावतपदी स्यातां पुंसि काण्डप्रचीवरौ॥'

इति॥ 'वन्यबिम्बी तु काकाङ्गी' इति गौडः। वैजयन्त्याम् (पृ. ५४, श्लो. १११) 'दास्यां षडश्रा शार्ङ्गेष्ठा[2] काकजङ्घा विलोमिका' इति। वन्यबिम्बीनामानि। 'काकिदोंड'॥ ११८॥

[1] धन्वन्तरीयनिघण्टुः (४. २५). [2] शार्ङ्गिष्ठा B_3.

गोधापदी तु सुवहा मुसली तालमूलिका ।
अजशृङ्गी विषाणी स्याद् गोजिह्वादार्विके समे ॥ ११९ ॥

(वि.) गोधापदीति—गोधाया[1] इव पादा मूलानि यस्याः गोधापदी । सुष्ठु वहत्यामोदं[2] सुवहा । 'वह प्रापणे' । गोधापदीनामनी । 'चेप्पुतट्टचेट्टु'[3] ॥ मुस्यति त्रिदोषानिति[4] मुसली । 'मुस खण्डने' । तालस्येव मूलमस्या इति तालमूलिका । मुसलीनामनी । 'नेलताटिपेल्लु[5]' ॥ अजशृङ्गाभफलयोगाद् अजशृङ्गी । अत[6] एव विषाणी च । अजशृङ्गीनामनी । 'दुष्टुवुतींगेपेल्लु' ॥ गोजिह्वाभपत्रत्वाद् गोजिह्वा । दारयति रोगान् दार्विका । 'दॄ विदारणे' । गोजिह्वानामनी । '[7]एद्दुनालुकचेट्टु' ॥११९॥

[1] गोधा इव Pt_2. [2] आरोग्यं F_2, Pt_2; आमोहं K_3. [3] 'हंसपादिन्नि' D_2. [4] रोगान् F_2, Pt_2. [5] 'नेलशलु' J_2. [6] तथैव K_5, K_6. [7] 'दर्विकपूचेट्टु' D_2, K_5, K_6; 'यतुनालगेयगिड' J_2.

(पा.) गोधापदी—सुवहा । हंसपदीनामनी । 'चप्पुतट्ट' ॥ मुसली—मूलिका । भूतालिनामनी । 'अर्शोघ्न्यां मुसली ताली तालमूली फलिन्यपि' इति वैजयन्ती (पृ. ६१, श्लो. २०३) । 'नेलताडि' ॥ अजशृङ्गी—स्यात् । साहचर्यात् स्त्रीलिङ्गः । वैजयन्त्याम्[1]—'अजशृङ्गी मेषशृङ्गी सर्पदंष्ट्रा च वर्तिका' इत्येतत्पर्यायत्वेन मेषशृङ्गी प्रोक्ता । वैद्यके—'मेषशृङ्गीफलं स्वादु तिक्तमुष्णं प्रमेहनुत्' इति फलप्रतिपादनादिमौ शब्दौ फलवद्वृक्षविशेषनामनी । 'टोङ्किचेट्टु' । लताविशेषनामानीति केचित् । 'दुट्टुगु' । कर्कटकशृङ्गीनामनी इत्यन्ये । शेषे—'कुलुङ्गी कर्कटाह्वया' । 'कुलीरशृङ्गी शृङ्गी च' । कुलुङ्ग्यादयः कर्कटशृङ्गीनामानि । 'कर्काटकशृङ्गी' ॥ गोजिह्वा—समे । गोजिह्वानामनी । 'येद्दनालिकचेट्टु' ॥ ११९ ॥

[1] मुद्रितग्रन्थे न दृश्यते; धन्वन्तरीयनिघण्टुः (१. ८७).

ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ।
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥ १२० ॥

(वि.) ताम्बूलवल्लीति—[1]ताम्बूलार्थं वल्ली ताम्बूलवल्ली । [2]ताम्बूलसाधनत्वात् ताम्बूली । नागलोकादाहृता वल्ली नागवल्ली । नागस्यैरावणस्यालाने [3]जातत्वाद्वा । नागवल्लीनामानि । '[4]तमलपाकुतींगेपेल्लु' ॥ द्विर्जायते द्विजा[5] । द्विजसादृश्याद्वा ।

[6]तृष्णादिकं हरतीति हरेणुः। 'हृञ् हरणे'। रेणुयोगाद् रेणुका। कुन्त्यै दुर्वाससा [7]दत्ता कौन्ती। कपिलवर्णत्वात् कपिला। भस्मना रेणुना [8]गन्धयति वासयतीति भस्मगन्धिनी। 'गन्ध अर्दने'। [9]हरेणुनामानि। 'तक्कोलमु'॥ १२०॥

[1] ताम्बूलस्य K_5, K_6. [2] ताम्यति विवशो भवति जनोऽनयेति Pt_2. [3] नागालाने यतो जाता नागवल्ली भविष्यति इति स्कान्दवचनम् Pt_2. [4] 'ताम्बूलदएलेवल्लि' J_2. [5] राजपुत्रीत्वात् K_5, K_6. [6] रोगान् F_2, Pt_2. [7] दत्तत्वात् D_2, K_5, K_6. [8] गन्धयते मदिराचूर्णं K_5, K_6. [9] K_5 adds केचित् हरिणरेणुवर्णमित्येव वदन्ति.

(पा.) ताम्बूलवल्ली—नागवल्ल्यपि। ताम्बूलवल्लीनामानि। 'तमलपाकुतींग'। अथ द्विजा। हरेणू रेणुका। 'ढ्रलोपे . . .' (६. ३. १११) इति दीर्घः। कुन्ती। कौन्तीत्यन्ये। कपिला भस्मगन्धिनी। रेणुकाख्यगन्धद्रव्यविशेषनामानि। 'रेणुकमु'। शेषे—'पाण्डुपत्नी राजपुत्री भस्मगर्भा च नन्दिनी'॥ १२०॥

एलावालुकमैलेयं सुगन्धि हरिवालुकम्।
वालुकं चाथ पालङ्क्या मुकुन्दः कुन्दकुन्दुरू॥ १२१॥

(वि.) एलावालुकमिति—एलावत् प्रियगन्धेन [1]वनस्थलं वलते [2]संवृणोतीत्येलावालुकम्। 'वल संवरणे'। इलायां[3] भवम् ऐलेयम्। [4]शोभनो गन्धो यस्येति सुगन्धि। हरिः[5] पिङ्गलवर्णः, तेन वलत इति हरिवालुकम्। वलते भुवं संवृणोतीति वालुकम्। 'वल संवरणे संचलने च'। वालुकनामानि। 'कूंतुरुवुडमु'॥ वैद्यैः पाल्यत इति पालङ्क्या। 'पाल रक्षणे'। पालेन रक्षणेन अङ्क्यत इति वा। 'अकि लक्षणे'। [6]मुखेन कुन्द इव प्रतिभातीति मुकुन्दः। कुन्द इव [7]भातीति कुन्दः[8]। कुं भुवं द्यति मूलैरिति कुन्दुरुः। 'दो अवखण्डने'। कुन्दनामानि। 'कुन्दुरुष्कमु[9]'॥ १२१॥

[1] वनस्थानं J_2. [2] आवृणोति J_2. [3] J_2 adds भुवि. [4] सुगन्धयोगात् सुगन्धि K_5, K_6. [5] हरि कपिलवर्णं वालुकं Pt_2. [6] मुखात् Pt_2. [7] प्रतिभाति K_3, Pt_2. [8] J_2 adds 'भा दीप्तौ'. [9] 'कुन्दरवृक्ष' J_2.

(पा.) एलावालुकम्—वालुकं च। एलावालुकनामानि। 'कून्तुरुवुडमु'॥ अथ पालङ्क्या—कुन्दकुन्दुरू। कुन्दुरुनामानि। 'कुन्दुरुलु'॥ १२१॥

वालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च।
कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु॥ १२२॥

शैलेयं तालपर्णी तु दैत्या गन्धकुटी मुरा ।
गन्धिनी गजभक्ष्या तु सुवहा सुरभी रसा ॥ १२३ ॥
महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।

(वि.) बालमिति—वलते भुवं मूलबाहुल्यात् बालम् । 'वल संवरणे संचलने च'। निगूढत्वेन ह्रीयुक्तमिव बेरमस्येति ह्रीबेरम्[1] । बर्हति वर्धत[2] इति बर्हिष्ठम् । 'बृह [3]वृद्धौ'। उदग्देशे भवमुदीच्यम्[4] । केशानामम्बुनां च नामान्यस्य सन्तीति केशाम्बुनाम । ह्रीबेरनामानि । '[5]कुरुवेरुपेल्लु' ॥ शीतोष्णाभ्यां[6] कालोऽनुसर्यतेऽनेनेति कालानुसार्यम् । [7]चिरस्थितत्वात् वृद्धम् । अश्मनः पुष्पमिव अश्मपुष्पम् । शीतवीर्येण शिवं शीतशिवम् । शिलायां भवं पुष्पं शैलेयम् । शैलेयनामानि । '[8]रातिपुव्वुपेल्लु' ॥ तालस्येव पर्णान्यस्या इति तालपर्णी । [9]मुराख्यदैत्यनामास्या अस्तीति दैत्या । [10]गन्धस्य कुटी गृहं गन्धकुटी । मुरतीति मुरा । 'मुर वेष्टने'। मुराख्यदैत्यनामयोगाद्वा । प्रशस्तो गन्धोऽस्या अस्तीति गन्धिनी । गन्धकुटीनामानि । 'मुरयनुगन्धद्रव्यमुपेल्लु' ॥ गजैर्भक्ष्यत इति [11]गजभक्ष्या । 'भक्ष अदने'। सुष्ठु वहत्यामोदं सुवहा । 'वह प्रापणे'। घ्राणतर्पणगन्धत्वात् सुरभिः । बहुरसयोगाद् रस्यत इति रसा । महदीरणं प्रेरणं गजानां भक्षणेऽस्या इति महेरणा । 'ईर प्रेरणे'। कुं भुवं द्यति मूलैरिति कुन्दुरुकी । 'दो अवखण्डने'। सत्कृत्य लक्यते आस्वाद्यते गजैरिति सल्लकी । 'लक आस्वादने'। ह्लादोऽस्या अस्तीति ह्लादिनी । ह्लादिनीति वा पाठः । सल्लकीनामानि । 'अन्दुगुचेट्टु-पेल्लु' ॥ १२२–३ ॥

[1] जिह्रेति वर्तत इति । 'ह्री लज्जायाम्'। धातूनामनेकार्थत्वाद् वर्तमानार्थोऽवगन्तव्यः K_5, K_6. [2] वर्धयति J_2. [3] 'बृह बृंहि वृद्धौ' D_2, K_5, K_6. [4] उदीच्यानामतिशयेन भवति F_2, K_5. [5] 'मुरिबाल' J_2. [6] हिमत्वात् हेमन्तकालमनुसरति K_5, K_6. [7] स्थायित्वात् Pt_2. [8] 'कल्लपूवु' J_2. [9] मुरदैत्यनामयोगात् F_2, Pt_2. [10] गन्धाश्रयत्वात् K_5, K_6. [11] गजभक्षा K_5, K_6.

(पा.) बालं—केशाम्बुनाम च । ह्रीबेरनामानि । 'कुरुवेलु' ॥ कालानुसार्य—शैलेयम् । शैलेयनामानि । 'रापुव्वु'। दैत्या—गन्धिनी । मुरानामानि । 'मुर अने गन्धद्रव्यमु' ॥ गजभक्ष्या—सुरभी रसा । 'ढ्रलोपे . . .' (६. ३. १११) इति दीर्घः । महेरणा—[1]ह्लादिनीति च । सल्लकीनामानि । 'अंदुगचेट्टु'। तस्य निर्यासो गन्धद्रव्यम् ॥ १२२–३ ॥

[1] B_3 adds ह्लादिनीति वा पाठः.

अग्निज्वालासुभिक्षे तु धातकी धातुपुष्पिका ॥ १२४ ॥
पृथ्वीका चन्द्रबालैला निष्कुटी बहुलाथ सा।
सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ॥ १२५ ॥

(वि.) अग्निज्वालेति—अग्निज्वालाभपुष्पयोगाद्[1] अग्निज्वाला। शोभना भिक्षा प्रार्थनास्यामिति [2]सुभिक्षा। 'भिक्ष याच्ञायाम्'। दधाति पुष्पाणीति धातकी। 'डुधाञ् धारणपोषणयोः'। धातुवद् [3]रक्तपुष्पयोगाद् धातुपुष्पिका। धातकीनामानि। 'धातकी-कुसुममु'॥ बहुफलयोगात् पृथ्वीका। चन्द्रस्य कर्पूरस्य बाला पुत्रिकेव स्थिता चन्द्रबाला। एलयति नाशयति मुखदौर्गन्ध्यमिति एला। 'इल स्वप्नक्षेपणयोः[4]'। निष्क्रान्ता कुटेः कोशादिति [5]निष्कुटी। बहूनि फलानि लातीति बहुला। 'ला दाने'। एलानामानि। 'पेद्दयेलकुलपेल्लु'॥ उपकुञ्चति स्वल्पीभवतीति उपकुञ्चिका। 'कुञ्च [6]कौटिल्याल्पी-भावयोः'। अत एव तुच्छत्वात् तुच्छेति वा पाठः। तुदति तापं तुत्था। 'तुद व्यथने'। कुरति शब्दायत इति कोरङ्गी। 'कुर [7]शब्दे'। पुटत्रयशालिनीत्वात्[8] त्रिपुटा[9]। सूक्ष्मत्वात् त्रुट्यतीति त्रुटिः। 'त्रुट भेदने'। सूक्ष्मैलानामानि। 'सन्नयेलकुलपेल्लु[10]' ॥ १२४–५ ॥

[1] पुष्पत्वात् F_2, J_2, Pt_2. [2] सुलभत्वात् K_5, K_6. [3] रक्तानि पुष्पाण्यस्याः F_2, Pt_2. [4] 'इल स्वप्नप्रेरणयोः' K_5, Pt_2. [5] निष्कुटिः F_2, Pt_2. [6] K_5, K_6, Pt_2 add गति°. [7] 'कुर कूर शब्दे' K_5, K_6. [8] °शालित्वात् K_3, K_5. [9] त्रिपुटाकारत्वात् F_2, Pt_2. [10] 'चिक्कयेलक्कि' J_2.

(पा.) अग्निज्वाला—धातुपुष्पिका। धातकीनामानि। 'येरुजाजि'। पुष्पगन्ध-द्रव्यम्॥ पृथ्वीका—बहुला। वैद्यके[1]—

'भद्रैला बृहदेला च त्रिदिवा[2] त्रिदिवोद्भवा[3]।
स्थूलैला त्वक्सुगन्धा च पृथ्वीका कन्यका पुटा ॥'

इति स्थूलैलानामानि। 'पेद्दयालकुलु'॥ अथ सा—त्रुटिः। वैद्यके—

'सूक्ष्मैला द्राविडी [4]तुत्था कोरङ्गी बहुला त्रुटिः।
एला कपोतवर्णा च चन्द्रबाला[5] च निष्कुटी[6] ॥'

इति। सूक्ष्मैलानामानि। 'सन्नपुयालकुलु'॥ १२४–५ ॥

[1] ध. नि. २. ४६. [2] त्रिपुटा B_3. [3] त्रिपुटोद्भवेति मुद्रितनिघण्टौ. [4] तुच्छा B_3. [5] °माला B_3. [6] ध. नि. २. ४४.

व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ।
शङ्खिनी चोरपुष्पी स्यात् केशिन्यथ वितुन्नकः ॥ १२६ ॥
झटामलाज्झटा ताली शिवा तामलकीति च ।

(वि.) व्याधिरिति—[1]कुष्ठव्याधिनामान्यस्य [2]सन्तीति व्याधिः । कौ[3] तिष्ठतीति कुष्ठम् । 'ष्ठा गतिनिवृत्तौ' । कुष्ठनामधेययोगाद्वा । पारिषु जलेषु भवतीति पारिभाव्यम् । वारिभाव्यमिति[4] वा पाठः । अत एव वाप्यां भवं वाप्यम् । व्याप्यमिति वा पाठः । त्रिदोषपरिपाकं लाति ददातीति पाकलम् । उत्पलाभपुष्पत्वाद् उत्पलम् । कुष्ठनामानि । 'चेंगल्वकोष्टुपेल्लु' ॥ [5]शङ्खाभपुष्पयोगात् शङ्खिनी । रात्रावेव पुष्प्यतीति[6] चोरपुष्पी । [7]केशप्ररोहत्वात् केशाः सन्त्यस्येति केशिनी । शङ्खिनीनामानि । 'कडिलट्टुपेल्लु' ॥ वितुद्यते पित्तं[8] श्लेष्म चानेनेति वितुन्नकः । 'तुद व्यथने' । झटः फलसंघातोऽस्या अस्तीति झटा । [9]विशदफलयोगाद् अमला । आश्चर्यकारी झटः फलसंघातोऽस्या अज्झटा[10] । अदिति आश्चर्ये वर्तते । मालाभानि फलान्यस्या अन्योन्यं ताडयन्तीति [11]ताली । ताडीति वा पाठः । 'तड आघाते' । आरोग्यरूपमङ्गलहेतुत्वात् [12]शिवा । तम्यते काङ्क्ष्यत इति तामलकी । 'तमु काङ्क्षायाम्' । तालीनामानि । 'नेलयुसिरि-कपेल्लु' ॥ १२६ ॥

[1] व्याधेः K_5, K_6. [2] संप्रयोगात् J_2. [3] K_5 adds भूमौ. [4] वारिषु जलाधारेषु K_6. [5] शङ्खवत् पाण्डुरत्वात् K_5, K_6. [6] D_2, K_5 add विकसति ; K_6 adds 'पुष्प विकसने'. [7] केशाकारावयवत्वात् D_2, G. [8] पित्तश्लेष्मादिकं F_2, Pt_2. [9] रोगहरत्वात् F_2, Pt_2. [10] आज्झटा, आ इत्याश्चर्ये वर्तते K_6. [11] ताडयति रोगानिति Pt_2. [12] विशदफलयोगात् D_2, K_5, K_6.

(पा.) व्याधिः । व्याधेर्नामान्यपि । 'पारिभाव्यं गदाह्वयम्' इति रभसकोशः । कुष्ठनामानि । 'कोष्टु' ॥ शङ्खिनी—केशिनी । शेषे—'ग्रन्थिका च निशाचरी चोरी धनहरी चण्डा' । शङ्खिनीनामानि । 'कट्लुतींगपद्मपुतींगातु' ॥ अथ वितुन्नकः—तामलकीति च । शेषे—'आमलक्युत्तमा चैव तमाला च तमालिनी'[1] । भूम्यामलकी-नामानि । 'नल उशिरिक' ॥ १२६ ॥

[1] 'तामलक्यजटा ताली तमालं तु तमालिनी ।
वितुन्नभूता तमकं भूधात्री भ्वामलक्यपि' ॥ ध. नि. ३. ८४.

प्रपौण्डरीकं पौण्डर्यमथ तुन्नः कुबेरकः ॥ १२७ ॥
कुणिः कच्छः कान्तलको नन्दिवृक्षोऽथ राक्षसी ।
चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥ १२८ ॥

(वि.) प्रपौण्डरीकमिति—पुण्डरीकस्येदं [1]पौण्डरीकम्। प्रकृष्टं पौण्डरीकं प्रपौण्डरीकम्। [2]पौण्डर्यमिति [3]देशीयपदम्। पौण्डर्यनामनी। 'पुण्डरीकमनु गन्धद्रव्यमु[4]'॥ तुद्यते हस्तादिभिरिति तुन्नः। 'तुद व्यथने'। कुत्सितं [5]वेरमस्यास्तीति कुबेरकः। शाखाभङ्गात् कौतीति कुणिः[6]। 'कु शब्दे'। कष्यते गजैरिति कच्छः। 'कष हिंसायाम्'। कस्य [7]जलस्यान्तं समीपं गच्छन्तीति कान्ता गजाः, तैर्लक्यत इति कान्तलकः। 'लक आस्वादने'। नन्दिसंज्ञको वृक्षो नन्दिवृक्षः। नन्दिवृक्षनामानि। 'नन्दिवृक्षमु[8]'॥ वनचरा गन्धाढ्यां मूर्तिं रक्षन्तीति राक्षसी[9]। 'रक्ष पालने'। तीक्ष्णत्वात् चण्डा। राक्षसीनामसाम्यात् चण्डत इति वा। 'चडि कोपे'। बहुमूल्यत्वाद्[10] धनं हरतीति धनहरी। 'हृञ् हरणे'। दीपनत्वेन क्षेमकरत्वात् क्षेमः। क्षियति वसति गन्धोऽस्मिन्निति वा। 'क्षि निवासगत्योः'। [11]दुष्टानि पत्राण्यस्य[12] दुष्पत्रः। दुष्पुत्र इति वा पाठः। सौरभ्यातिशयेन सर्वजनमुखविकासकरत्वाद् गणहासकः[13]। 'हसे हसने'। हासो विकासः। धनहरीनामानि। 'नल्लकचोरमुपेल्लु'॥ १२७–८॥

[1] पुण्डरीकस्यैव रूपान्तरं K_5; प्रकर्षेण पुण्डरीकस्येदं F_2, Pt_2. [2] Pt_2 adds अस्यैकदेशानुसारात्. [3] देशीयं I, K_3. [4] 'पुण्डरीकवेम्म औषध' J_2. [5] K_5, K_6 add शरीरम्. [6] कुत्सितशाखात्वात् G, K_5. [7] उदकस्य G, K_2. [8] 'नन्दिअनेडि वृक्षमु' K_6; 'नन्दियेम्ब वृक्ष' J_2. [9] रक्ष्यतेऽस्याः F_2, Pt_2. [10] मूल्यत्वेन F_2, Pt_2. [11] दुष्टाः पुत्राः पत्राण्यस्य दुष्पुत्रः K_5, K_6. [12] पुष्पाणि K_3. [13] गणं हासयतीति F_2, Pt_2.

(पा.) प्रपौण्डरीकं पौण्डर्यम्। द्रव्यावल्याम्—

'[1]प्रपौण्डरीकं चक्षुष्यं पुण्डर्यं पुण्डरीयकम्।
पुण्डरीकं श्वेतपुष्पं सुपुष्पं साधुमूलकम्।
मूलसाधनसंज्ञं च श्रीपुष्पं पुण्ड्रकाह्वयम्॥'

इति॥ 'पौण्डर्यकं सालपुष्पं दृष्टिकृत् पुण्डरीयकम्' इति रभसकोशः। पुण्डरीकाख्यगन्धद्रव्यनामानि। 'पुण्डरीकमन्नगन्धद्रव्यमु। अदे सालपुष्पमुन्नु'॥ अथ तुन्नः—

नन्दिवृक्षः। नन्दिवृक्षनामानि। 'नन्दिवृक्षमु'॥ अथ राक्षसी—गणहासकाः। शेषे— 'चोरकः शङ्कितस्तेनः कुहनः कितवो रिपुः'। चोराख्यगन्धद्रव्यनामानि। 'नल्लकचोरम्'। हस्तिकर्णीनामानि च। 'बलुरक्किस'॥ १२७–८॥

[1] प्रपौण्डरीकं—पुण्डरीयकम् ध. नि. ३. ९२.

व्यालायुधं व्याघ्रनखं करञ्जं चक्रकारकम्।
सुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली॥ १२९॥
धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी।

(वि.) व्यालायुधमिति—[1]व्यालस्य व्याघ्रस्यायुधं नखमिव तिष्ठतीति व्यालायुधम्। व्याघ्रनखं च। कमुदकं रञ्जयतीति करञ्जम्। 'रञ्ज रागे'। करजमिति वा पाठः। [2]धूपसमूहेन चक्रं मेलनं करोतीति चक्रकारकम्। 'डुकृञ् करणे'। व्याघ्रनखनामानि। 'पुलिगोरुचेट्टु'॥ [3]सुषिरं रन्ध्रमस्या अस्तीति सुषिरा। विद्रुमलताभत्वात्[4] विद्रुमलता। कपोताङ्घ्रिसदृशमूलत्वात् कपोताङ्घ्रिः। वायुवशान्नटति चलतीति नटी। 'नट[5] नृत्तौ'। नल्यते नली। 'णल [6]गन्धने'। सुषिरवत्त्वाद्[7] धम्यत इति धमनी। 'ध्मा[8] शब्दाग्निसंयोगयोः'। अञ्जनसदृशाः केशाः सूक्ष्ममूलान्यस्या इत्यञ्जनकेशी[9]। धमनीनामानि। 'नलियनुगन्धद्रव्यमु'॥ हन्त्यामयमिति[10] हनुः। 'हन हिंसागत्योः'। [11]हट्टवीथ्यां विलसतीति हट्टविलासिनी। 'लस श्लेषणक्रीडनयोः'॥ १२९॥

[1] K_5 omits 7 lines. [2] चक्रं धूपद्रव्यमेलनं Pt_2. [3] सुषिः F_2, Pt_2. [4] विद्रुमवत् रक्तत्वात् Pt_2. [5] 'नट स्पन्दने' Pt_2. [6] बन्धने च J_2. [7] सुषिरत्वधर्मात् K_5, K_6; धर्मयोगात् J_2. [8] 'ध्मा पूरणे' K_2, K_3, K_5. [9] अञ्जनाभसूक्ष्मबहुमूलत्वात् D_2, K_3, K_6. [10] भूतान् K_5, K_6; भूतानि I, K_3. [11] हट्टे पण्ये D_2, K_5, K_6.

(पा.) व्यालायुधं—चक्रकारकम्। शेषे—'त्र्यक्ष व्याघ्रतलं पादं कूटस्थं पुण्ड्रकं नखम्'। व्याघ्रनखाख्यवृक्षनामानि। 'व्याघ्रनखवृक्षमु'॥ नखनामकगन्धद्रव्यनामानीति केचित्॥ सुषिरा—नली। नलीनामवृक्षनामानि। 'नलीवृक्षमु'। 'सुषिरा धमनी शून्या निर्मथ्या नर्तकीति[1] च' इति धन्वन्तरिः (ध. नि. ३. ४३)। गन्धद्रव्यविशेषस्य कपोताङ्घ्रिनामौषधिविशेषस्य च नामानीति केचित्। 'नली अनि गन्धद्रव्यमुन्नु गुव्वकुतुकानु'॥ धमनी—हट्टविलासिनी॥ १२९॥

[1] नटीति मुद्रितग्रन्थे (ध. नि. ३. ४३).

शुक्तिः शङ्खः खुरः कोलदलं नखमथाढकी ॥ १३० ॥
काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ।

(वि.) शुक्तिरिति—शुक्त्याकृतित्वात्[1] शुक्तिः । [2]शङ्खसाम्यात् शङ्खः । खुरति [3]भूतान् हन्तीति खुरः । 'खुर विलेखने'। कोली बदरी तत्पत्रयोगात् [4]कोलः । कुल्यत इति कोलः । 'कुल संस्त्याने'। दलति भूतानीति दलम् । 'दल विशरणे'। कोलस्येव दलं कोलदलम् । नखति कुष्ठादिरोगान्[5] गृहीत्वा गच्छतीति नखम् । 'नख गतौ'। नखगन्धद्रव्यनामानि । 'नखमनेडिगन्धद्रव्यमु'॥ [6]आढक्याख्यधान्यतुल्यरसत्वाद् आढकी । कषति हिंसति कण्ड्वादिरोगानिति [7]काक्षी । 'कष हिंसायाम्'। प्रशस्ता मृत् मृत्स्ना । तुवरः कषायो [8]रसोऽस्यास्तुवरिका । म्रियते [9]विलीयते [10]सुवर्णमनेनेति मृतालकम् । 'मृङ् प्राणत्यागे'। मृत्तालकमिति वा पाठः । मृत्, तालकमिति पदद्वयमिति केचित् । मृद्यते मृत् । 'मृद क्षोदे'। तलन्ति प्रतिष्ठन्तेऽनेनेति तालकम् । सुराष्ट्रदेशे भवं[11] सुराष्ट्रजम् । तुवरिकानामानि । 'तोवरिमन्नु'॥ १३० ॥

[1] आकारत्वात् F_2, Pt_2. [2] शङ्खाकृतित्वात् D_2, K_5. [3] भूतानि B_1, I, K_2. [4] कोली K_5, K_6. [5] कुष्ठादीन् F_2, Pt_2. [6] तुवरीवाचकत्वात् F_2, Pt_2. [7] काङ्क्षी K_5, K_6. [8] तद्योगात् Pt_2. [9] निलीयते Pt_2. [10] हिरण्यम् J_2, K_5. [11] भवत्वात् K_5.

(पा.) शुक्तिः—नखम् । शेषे—

'नागहनुः सहः ।
चलः कोशी च केशी च शिल्पी कररुहस्तथा ।
सामुद्रो हस्तिकर्णश्च नखी ॥'

नखाख्यवृक्षनामानि । 'नखवृक्षमु'॥ 'धमन्यञ्जनकेश्यौ तु हनुर्हट्टविलासिनी' इति वैजयन्ती (पृ. १३१, श्लो. १०१) । अथाढकी—सुराष्ट्रजे । आढकीनामानि । 'कंदिचेट्टु'।

'तालकं . . . मृन्मृत्स्ना मृत्तिकाजिता ।
सौराष्ट्री तुवरी काक्षी[1] काची तालमृतालके ॥'

इतीन्दुः । सुराष्ट्रमृत्तिकानामानीति केचित् । 'तोगरिमन्नु'। 'अडवितोगरितींगेनु । सुरुगुडु'॥ १३० ॥

[1] 'काक्षी कामी सुराष्ट्रजा' (ध. नि. ३. १०५).

कुटन्नटं दाशपुरं वानेयं परिपेलवम् ॥ १३१ ॥
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ।
ग्रन्थिपर्णं शुकं बर्हपुष्पं स्थौणेयकुक्कुरे ॥ १३२ ॥

(वि.) कुटन्नटमिति—[1]कुटन् वक्रीभवन्नटतीति कुटन्नटम् । 'नट [2]नृत्तौ' । दशपुराख्यदेशे भवं दाशपुरम् । वनं जलमत्रास्तीति वानम् । वाने जलाशये भवं वानेयम्[3] । कोमलत्वात्[4] परितः पेलवं परिपेलवम् । [5]लघुतया प्लवत इति प्लवम् । 'प्लुङ् गतौ[6]' । अभक्ष्यतया गवां [7]पुरति अग्रे तिष्ठति[8] गोपुरम्[9] । 'पुर अग्रगमने' । [10]अरुचित्वेन गा नर्दयति क्रोशयतीति [11]गोनर्दम् । 'नर्द शब्दे' । केवर्तानां मत्स्यानां [12]भक्षणमिति कैवर्ती । मुस्यते वराहैरिति [13]मुस्तकम् । 'मुस खण्डने' । कैवर्तमुस्तकं तदिति वा पाठः । तथाष्टमं नाम त्रिलिङ्गम् । एवं भिन्नलिङ्गानां द्वन्द्वः कृत इति नावगन्तव्यम् । कैवर्तीमुस्तकनामानि । 'तुङ्गमुस्तलुपेल्लु' ॥ ग्रन्थिषु पर्णान्यस्मिन् सन्तीति [14]ग्रन्थिपर्णम् । शुकवत् पत्राण्यस्य शुकम् । बर्हतुल्यपुष्पत्वात् बर्हपुष्पम् । केचित्तु शुकबर्हमिति पठन्ति । तदा शुकस्य बर्हाणीव पत्राण्यस्येति विग्रहः । पुष्यतीति पुष्पं च । 'पुष्प विकसने' । [15]स्थूणाकृतित्वात् स्थौणेयम् । [16]शुनकाकारत्वात् कुक्कुरम् । ग्रन्थिपर्णनामानि ॥ '[17]स्थौणेयमनेडि गन्धद्रव्यमु' ॥ १३१–२ ॥

[1] कुटति J_2. [2] 'नट स्पन्दने' F_2, Pt_2. [3] वने जले जातं Pt_2. [4] अतिकोमलत्वात् B_1, J_2, K_5. [5] लघुत्वात् F_2, Pt_2. [6] जलोपरिसर्पणे च J_2. [7] पुरतः J_2. [8] सरतीति K_3. [9] गौर्जलं पुरं संस्थानमस्येति Pt_2. [10] रुचिकरत्वेन Pt_2. [11] गोनर्दः D_2, K_2, K_3; गोनर्दी K_6. [12] अदनं F_2, Pt_2. [13] वातकफौ मुस्यतीति I, K_5, K_6. [14] ग्रन्थिप्रधानानि पर्णानि D_2, I, K_6. [15] स्थूणस्येव रूपं Pt_2. [16] श्वाकृतित्वात् K_5, K_6. [17] 'स्थौणेयवेंब गन्धद्रव्य' J_2.

(पा.) कुटन्नट—कैवर्तीमुस्तकानि च । कैवर्तीमुस्तकमित्येकपदम् ।

'जायते मुस्तकाकारः शैवालदलसंचयः ।
कैवर्तीमुस्तकं नाम गन्धद्रव्यं तदुच्यते ॥'

इति ॥ 'कैवर्तीमुस्तके क्लीबं शोनके नाकुटं नटः' इति च । कैवर्ती पृथक्पदमिति केचित् । रूपभेदात् स्त्रीलिङ्गम् । नपुंसकमपि । 'कैवर्तं मुस्तकं तच्च तथा च करिवल्लभम्' इति तन्त्रान्तरोक्तत्वादित्याहुः । शेषे—

'प्लवनं कर्तनं मुस्ता सुगन्धिः कर्णपूरकः ।
शकुलादश्वेतमध्यो नादेयपिठरावपि ॥'

इति । तथा च वैजयन्त्याम्—

'जलमुस्ते तु प्लवनं [1]गोनर्दं परिपेलवम् ।
कुटन्नटं दशपुरं गोपुरं [2]वर्तकं प्लवम् ॥' (पृ. ६१, श्लो. २०१)

इति । जलमुस्तानामानि । 'कैवडिमुस्तलु ॥' ग्रन्थिपर्णं—कुक्कुरे । शेषे—

'बर्हपुष्पं बर्हिचूडं शुकपुष्पं शुकच्छदम् ।
विकचं शुकबर्हं च हरितं शीर्णलोमकम् ॥'

इति । ग्रन्थिपर्णनामानि । 'गंदिवनमुपचाकुन्तुमाचिपत्रिन्नि' ॥ १३१-२ ॥

[1] गोदर्भमिति मुद्रितग्रन्थे.　　[2] कर्तनं B_3.

मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥ १३३ ॥

(वि.) मरुन्मालेति—मरुतः माला अस्या इति [1]मरुन्माला । पदद्वयं वा । मरुता तुल्यत्वात् मरुत् । मालाकारत्वात् माला । गन्धं पिंशति सूचयतीति पिशुना[2] । 'पिश अवयवे' । स्पृशति दूरस्थं गन्धेनेति स्पृक्का[3] । 'स्पृश संस्पर्शने' । [4]देवपुत्रीसंज्ञकत्वाद् देवी । लतारूपत्वात् लता । लघुत्वात् [5]लघुः । [6]दूरप्रसरणात् समुद्रान्ता । उह्यते परिमलेन[7] वधूः । 'वह प्रापणे' । कोटिभिरग्रामिर्मधु[8] वर्षतीति कोटिवर्षा । 'वृष सेचने' । लङ्कायामुप्यते[9] लङ्कोपिका[10] । 'डुवप् बीजसन्ताने' । लङ्कोपिकानामानि । 'स्पृक्कयनुगन्धद्रव्यमुपेल्लु' ॥ १३३ ॥

[1] मरुच्चासौ माला च K_6; अत्र तुशब्दः पादपूरणार्थः K_6.　[2] गन्धसूचकत्वात् F_2, Pt_2.　[3] स्पृश्यते स्पृक्का D_2, K_6.　[4] K_5, K_6 omit संज्ञक.　[5] J_2 adds 'लघि गतौ'; 'अघि लघि गत्याक्षेपे' K_5, K_6.　[6] प्रसारणत्वात् J_2; प्रसरत्वात् Pt_2.　[7] आशावधूत्वात् B_1, K_5, K_6; °वहत्वात् J_2.　[8] नेमिभिः स्वरसं F_2, Pt_2.　[9] I adds वितन्यते.　[10] लङ्कोयिकेति वा पाठः, तदा लङ्कायामूय(य्य ?)ते तन्यते; 'ऊयी तन्तुसन्ताने' K_5, K_6.

(पा.) मरुन्माला—लङ्कोपिकेत्यपि । शेषे—'स्पृङ्कनिर्माल्या पङ्कमुष्टिर्माला च ब्राह्मणी मरुत्' । तथा च वैद्यके—

'स्पृङ्कनीरुता पङ्कमुष्टिर्माला देवी लता गुरुः ।
देवपुत्री देवजाता सिता पङ्कजमुष्टिका ॥

सुन्दरी च मरुत्कोटिवर्षा निर्मालिका वधूः ।
लङ्कोपिका ब्राह्मणी च निर्माल्या पिशुना तथा ॥'

इति । स्पृक्कानामानि । 'पिक्कचेट्टु' ॥ १३३ ॥

तपस्विनी जटा मांसी जटिला लोमशा मिसी ।
त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोदं वराङ्गकम् ॥ १३४ ॥

(वि.) तपस्विनीति—जटायोगसाम्यात् तपस्विनी । जटाः सन्त्यस्या इति जटा । जटिला च । मांससदृशावयवत्वात्[1] मांसी । जटामांसीति वा पाठः । लोमानीव जटा अस्याः सन्तीति [2]लोमशा । मस्यतीति मिसी[3] । 'मसी परिणामे' । जटामांसी-नामानि । 'जटामांसिअनेडि [4]गन्धद्रव्यमु' ॥ त्वग्भूयस्त्वात् त्वक् । त्वचं च । पत्रमिश्रितत्वात् पत्रम् । अतितीक्ष्णत्वाद् उत्कटम् । भृङ्गकार्ष्ण्यसाम्याद् भृङ्गम् । अग्निं चोदयतीति चोदम् । 'चुद प्रेरणे' । चोचमिति वा पाठः । वरं [5]श्रेष्ठमङ्गमस्येति वराङ्गकम् । वराङ्गकनामानि । '[6]लवङ्गपुचेट्टु' ॥ १३४ ॥

[1] अवयवयोगात् K_5, K_6; साम्यावयवत्वात् F_2, Pt_2. [2] लोमयोगात् F_2, Pt_2. [3] आमिषीति वा पाठः K_5, K_6. [4] 'जटामांसिवेम्बगन्धद्रव्य' J_2. [5] J_2, K_3 add त्वक्प्रचुरं. [6] 'लवङ्गदहेसरु' J_2.

(पा.) तपस्विनी—मिसी । 'स्यान्मांस्यां शतपुष्पायां मधुरायां मिसी स्त्रियाम्' इति रभसकोशपाठात् मिसी । 'जटिला लोमशी मांसी तपस्विन्यामिषी मिषी[1]' इति वैजयन्तीपाठात् (पृ. १३१, श्लो. १००) मिषी । शेषे—

'स्त्रियां तपस्विपिशितपिशाचाम्बार्थवाचकाः ।
तथा भूतजटा कृष्णजटा हिंस्रा च पूतना ॥'

स्त्रियां वर्तमानास्तपस्व्यादिपर्याया जटामांसीनामानि भवन्ति । यथा तपस्विनी तापसी पिशिती मांसी पिशाची क्रव्यादी अम्बा माता जननीत्यादयः । जटामांसीनामानि । 'जटामांसि' ॥ त्वक्पत्रं—वराङ्गकम् । त्वक्पत्रमेकपदमिति केचित् । 'मुखरोदं प्रियं वर्णं वल्कं सुरभिवल्कलम्' इति वैद्यके । लवङ्गद्रुमत्वचो नामानि । 'लवङ्गपुचेक्क' ॥ १३४ ॥

[1] 'जटा' इति मुद्रितग्रन्थे.

कर्चूरको द्राविडकः काल्यको वेधमुख्यकः ।
ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम् ॥ १३५ ॥

(वि.) कर्चूरक इति—[1]कर्जति रोगानिति कर्चूरकः । 'कर्ज व्यथने' । द्रावयति रोगानिति द्राविडकः । 'द्रु गतिहिंसाकौटिल्येषु' । कल्यं निरामयं करोतीति काल्यकः । प्लीहादिरोगवेधे[2] मुख्यत्वात् वेधमुख्यकः । 'व्यध ताडने' । कर्चूरकनामानि । 'गन्धकचोरमु' ॥ जातिमात्रे[3] फलपाकादिव्यक्तिमात्रे वर्तमान ओषधिशब्दः इकारान्त ईकारान्तो वा स्त्रीलिङ्गो भवति । अजातौ फलपाकादिव्यक्तेरन्यत्र वर्तमान ओषधिशब्दः औषधमित्यकारान्तनपुंसकलिङ्गो भवति ॥ १३५ ॥

[1] कृन्तति K_5, K_6; 'कृति छेदने' D_2, K_6. [2] भेदकत्वात् B_1, K_6. [3] लतादिजातय ओषध्यः न तु त्रिफलादयः । अजाताविति लतादिजातेरन्यत्र यत्किमपि रोगापनयनकरं तदौषधम् Pt_2.

(पा.) कर्चूरको—वेधमुख्यकः । द्रव्यावल्याम्—

'कर्चूरो गन्धमूलश्च द्रविकः[1] काल्य[1] एव च ।
वेधमुख्यो दुर्लभश्च कस्यचित्संमता [1]शटी ॥'

इति । कर्चूरनामानि । 'कचूरमु' ॥ ओषध्यो—स्युः । वनस्पतिवानस्पत्यक्षुपोलपलतातृणत्वक्सारादिभेदभिन्नोद्भिज्जातिमात्रे ओषध्यो वर्तन्ते । 'कृदिकाराद् . . .' इति[2] वा ङीष् । 'ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः' इति काशिका (पृ. ४४९, सू. ८. ४. ६) । उद्भिज्जातिनाम । 'चेट्लु मोदलयिनवि' ॥ अजातौ—औषधम् । रोगहरं फलमूलघृतचूर्णक्षौद्रादिसर्वमौषधं स्यात् । 'ओषधेरजातौ' (५. ४. ३७) इत्यण् । 'मन्दु' ॥ १३५ ॥

[1] द्राविडः, कार्श्यः, सढी इति ध. नि. ३. ९४. [2] गणसूत्रम् under 4. 1. 45.

शाकाख्यं पत्रपुष्पादि तण्डुलीयोऽल्पमारिषः ।
विशल्याग्निशिखानन्ता फलिनी शक्रपुष्पिका ॥ १३६ ॥

(वि.) शाकाख्यमिति—शक्यते भोक्तुमनेनेति शाकम् । 'शक्लृ शक्तौ' । पत्रपुष्पादि शाकाख्यं शाकनामकम् । अत्र [1]श्लोकः—

'मूलपत्रकरीराग्रफलकाण्डादिरूढकम् ।
त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम् ॥'

इति । [2]लघुतण्डुलाभबीजयोगात् तण्डुलीयः । अल्पं संमर्दनं मृष्यति सहत इत्यल्पमारिषः । 'मृष सहने' । अल्पामपि मारिं व्याधिं स्यतीति वा । 'षोऽन्तकर्मणि' । तण्डुलीयनामनी । 'चिर्रिकूरपेल्लु' ॥ विगतं शल्यमस्या इति विशल्या[3] । गर्भभेदकत्वाद् अग्निशिखेव तिष्ठतीत्यग्निशिखा[4] । बहुदेशव्यापित्वाद् अनन्ता[5] । फलानि सन्त्यस्या इति [6]फलिनी । शक्रप्रियपुष्पत्वात् शक्रपुष्पिका । शक्रपुष्प्यपीति वा पाठः । अग्निशिखानामानि । 'वेन्नवेदुरुकूर' ॥ १३६ ॥

[1] तदुक्तम् F_2, Pt_2. [2] °आभानि बीजान्यत्र Pt_2. [3] विशल्यं करोतीति F_2, Pt_2. [4] दीपनकारित्वात् Pt_2. [5] दूरप्रसरणात् D_2, K_5, K_6. [6] हलपर्यायसंज्ञकत्वात् हलिनीति वा पाठः Pt_2.

(पा.) शाकाख्यं—पुष्पादि । पत्रपुष्पफलमूलादिरूपभोज्यं शाकशब्दवाच्यं भवति ।

'मूलपत्रकरीराग्रफलकाण्डादिरूढजाः ।
[1]पुष्पं त्वक् कवचं चेति शाकं दशविधं स्मृतम् ॥'

'कूर' ॥ तण्डुलीयो — मारिषः ।

'[2]मारिषे जीवशाकः स्यादत्राल्पे[3] तण्डुलीयकः ।
मेघनादो[4] विगण्डीरम् ॥'

इति [5]यादववचनात् । 'चिर्रिकूर' । मारिषः, जीवः, शाकनाम । 'तोंबकूर' ॥ विशल्या—शक्रपुष्प्यपि । फलिनीशाकनामानि । 'नादंटिजालुकूर । अदे तरिगोग्रानुन्नु' ॥ 'तिन्दुकाकारपत्रस्तु विटपाग्निशिखा मता' ॥ १३६ ॥

[1] त्वक्पुष्पं कवकं चेति B_3. [2] मारिषः B_3. [3] तत्र B_3. [4] मेघनादोऽपि गण्डीरं B_3. [5] वैजयन्ती (पृ. ५७, श्लो. १५०—१.)

स्यादृक्षगन्धा छगलाण्ड्यावेगी वृद्धदारकः ।
जुङ्गो ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्लरी ॥ १३७ ॥

(वि.) स्यादिति—ऋक्षवत् क्रिमीन् [1]गन्धयतेऽर्दयतीति ऋक्षगन्धा । 'गन्ध अर्दने' । छगलस्याजस्येवाण्डान्यस्थीन्यस्या इति छगलाण्डी । [2]छगलाङ्गीति वा पाठः ।

धातुवृद्धिकरत्वाद् आवेगोऽस्या अस्तीति आवेगी[3]। वृद्धत्वं दारयतीति[4] वृद्धदारकः। 'दॄ विदारणे'। जुङ्गति कफाल्पादिदोषान्[5] वर्जयतीति जुङ्गः। 'जुगि वर्जने'। ऋक्षगन्धानामानि। 'बोद्दि कूरपेल्लु'॥ [6]पावनत्वात् ब्राह्मी। मत्स्याक्षितुल्यपुष्पत्वात् मत्स्याक्षी। [7]वयसि तिष्ठतीति वयःस्था। 'ष्ठा गतिनिवृत्तौ'। सोमवत् शीतवीर्यत्वात् सोमवल्लरी[8]। ब्राह्मीनामानि। 'पोन्नगण्टिकूरपेल्लु'॥ १३७॥

[1] गन्धयति K_5, K_6, Pt_2.　[2] छगलाङ्गसदृशावयवत्वात् छगलाङ्गी K_5, K_6. [3] वृष्यत्वादावेगोऽस्याः D_2, K_5.　[4] B_1, K_3, K_6 add नाशयति.　[5] °रोगान् D_2, K_3, K_5.　[6] ब्राह्मणीवत् पवित्रत्वात् B_1, D_2, K_3.　[7] वयः स्थापयति F_2, Pt_2. [8] सोमांशभूतवल्लरीत्वात् B_1, D_2, G.

(पा.) स्यादृक्षगन्धा—जुङ्गः। जुङ्गाख्यशाकनामानि। 'बोद्दिकूर'॥ ब्राह्मी तु। मण्डूकब्रह्मीनाम। 'ब्राह्मी कपोतवेगा स्यान्माण्डूकीति सुवर्चला' इति [1]वैजयन्ती॥ मत्स्याक्षी। लोहमारकनाम। 'पोन्नगंटि'॥ 'मत्स्याक्ष्यां [2]शालशारिण्डौ पत्तूरो लोहमारकः' इति वैजयन्ती (पृ. ५८, श्लो. १५६)॥ वयस्था—वल्लरी। सोमवल्लरीनामानि। 'सेंमेदकूर'। 'ब्रह्मयां सत्यवती [3]ब्राह्मी मत्स्याक्षी सोमवल्लरी' इति वैजयन्ती (पृ. ५७, श्लो. १४४)॥ १३७॥

[1] मुद्रितग्रन्थे न दृश्यते श्लोकार्धम्.　[2] शालीनौ इति मुद्रितग्रन्थे.　[3] ब्रह्मी B_3.

पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती।
हयपुच्छी तु काम्बोजी माषपर्णी महासहा॥ १३८॥

(वि.) पटुपर्णीति—पटूनि श्रेष्ठानि पर्णान्यस्या इति पटुपर्णी[1]। [2]हिमवति [3]प्रचुरत्वाद् हैमवती। स्वर्णवर्णं क्षीरमस्या इति [4]स्वर्णक्षीरी। हिमं[5] शीतलत्वमस्या इति हिमावती। स्वर्णक्षीरीनामानि। 'कंकोट्टुपुचेट्टु'॥ [6]हयपुच्छाभशाखात्वाद् हयपुच्छी। काम्बोजदेशे भवा [7]काम्बोजी। माषस्येव पर्णान्यस्या माषपर्णी। महान्[8] रोगः सह्यतेऽनया महासहा। 'षह मर्षणे'। माषपर्णीनामानि। 'कारुमिनुमु'॥ १३८॥

[1] श्रेष्ठपर्णत्वात् D_2, K_5, K_6; वरं श्रेष्ठं पर्णमस्या वरपर्णी K_2, K_3.　[2] हिमवद्गिरौ F_2, Pt_2.　[3] प्रचुरा K_3, K_5, K_6.　[4] स्वर्णवर्णक्षीरत्वात् K_5, K_6.　[5] हिमत्वमस्याः K_3, K_6; हेमवती D_2, K_2.　[6] हयपुच्छाकारत्वात् F_2, Pt_2.　[7] काम्भोजी K_2, K_6. [8] महारोगान् सहत इति Pt_2.

(पा.) पटुपर्णी—हिमावती। शेषे—'क्षीरिणी काञ्चनाह्वा च तिक्तदुग्धा च कर्षिणी'। हेमदुग्धिकानामानि। 'रेड्ंढिवारिनानावालु'।

'हेमपीतं पयस्तस्या हिमवद्भूमिसंभवा।
सा नागजिह्विकाकारा तन्मूलं वणिगौषधम्॥'

हयपुच्छी—महासहा। वनमाषनामानि। 'कारुमिनुमु'॥ १३८॥

तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि।
बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिका॥ १३९॥

(वि.) तुण्डिकेरीति—[1]तुण्डिकमोष्ठबिम्बमियर्त्यनुकरोतीति तुण्डिकेरी। 'ऋ गतौ'। [2]रक्तवर्णफलत्वाद् रक्तफला। फलैरोष्ठबिम्बमनुकरोतीति [3]बिम्बिका। पीलोरिव पर्णान्यस्याः पीलुपर्णी। तुण्डिकेरीनामानि। '[4]दोण्डचेट्टुपेल्लु'॥ कुटिलह्रस्वकेशाभत्वाद् बर्बरा[5]। [6]कबरी च। विरुद्धलक्षणया तुङ्गत्वात् [7]तुङ्गी। खराणि परुषाणि पुष्पाण्यस्याः खरपुष्पा[8]। अजस्येव गन्धोऽस्या अस्तीति अजगन्धिका। खरपुष्पानामानि॥ 'वायण्टचेट्टुपेल्लु'॥ १३९॥

[1] तुण्डं वदनमाश्रयत्वेनास्येति, तुण्डिकमोष्ठः F_2, Pt_2. [2] रक्तं फलमस्याः Pt_2. [3] ओष्ठस्य बिम्बमाकृतिरिव फलमस्याः F_2, Pt_2. [4] 'तोंडेयबीलु' J_2. [5] परुषपर्णत्वात् F_2, Pt_2. [6] केशसाम्यात् J_2, Pt_2. [7] अतितीक्ष्णत्वात् F_2, Pt_2. [8] तीक्ष्णपुष्पत्वात् F_2, Pt_2.

(पा.) तुण्डिकेरी—पीलुपर्ण्यपि। बिम्बिलतानामानि। 'दोंड'॥ बर्बरा—अजगन्धिका[1]। बर्बराशाकनामानि। 'दायिंट[2]'॥ १३९॥

[1] अजगन्धिनी B_3. [2] 'वायिंट' B_3.

एलापर्णी तु सुवहा रास्ना युक्तरसा च सा।
चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका॥ १४०॥

(वि.) एलापर्णीति—एलाया[1] इव पर्णान्यस्या इति एलापर्णी। सुष्ठु वहत्यामोदमिति[2] सुवहा। 'वह प्रापणे'। रस्यत इति रास्ना। 'रस आस्वादने[3]'। युक्तः प्रियो रसोऽस्या इति [4]युक्तरसा। एलापर्णीनामानि। 'सन्नरास्नमुपेल्लु'॥ [5]चाङ्गं

दन्तपटुत्वमीरयति अपगमयतीति चाङ्गेरी[6]। चकन्त्यनेनेति चुक्रः अम्लः। तद्योगात् चुक्रिका। 'चक तृप्तौ'। चुक्रिकेति वा पाठः। चुक्रयन्ति व्यथन्तेऽस्या उष्णवीर्यत्वात् [7]चुक्रिका। 'चुक्र व्यथने'। आम्लत्वाद् दन्तानां शठं करोतीति दन्तशठा[8]। अम्बेव तिष्ठतीति अम्बष्ठा[9]। अम्लरसेन दन्तान् लुनातीति अम्ललोणिका[10]। 'लूञ् छेदने'। अम्ललोणिकानामानि। 'पुलिचिन्तपेल्लु[11]'॥ १४०॥

[1] एलापर्णानीव पर्णानि B_1, J_2.　[2] रसं F_2, Pt_2.　[3] आस्वादे Pt_2. [4] रसेन युक्ता F_2, Pt_2.　[5] F_2, Pt_2 add चङ्गो दक्षः तस्य भावः चाङ्गं.　[6] K_6 adds 'ईर क्षेपे.'　[7] चक्रिका K_5, K_6.　[8] दन्तान् शठतीति, 'शठ हिंसासंक्लेशनकैतवेषु' K_5, K_6.　[9] अम्बे शब्दे D_2, K_5, K_6; अम्बशब्दे K_2; I adds 'ष्ठा गतिनिवृत्तौ'. [10] आम्ल° Pt_2.　[11] 'हुलिहुरुवे' J_2.

(पा.) एलापर्णी—युक्तरसा च सा। रास्नानामानि। 'कारुयालकि'॥ चाङ्गेरी—अम्ललोणिका। वैद्यके[1]—'क्षुद्राम्लिका तु चाङ्गेरी लोणिका चाम्ललोणिका'। इति। चाङ्गेरीनामानि। 'पुलिचिचलम्'। अम्बरोहिकेति पाठः साधुः। अम्वरोलिकेति केचित्॥ १४०॥

[1] ध. नि. ५. ३६.

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि।
नमस्कारी गण्डकाली समङ्गा खदिरेत्यपि॥ १४१॥

(वि.) सहस्रवेधीति—[1]सहस्रसंख्याकैर्मूलैर्भुवं विध्यतीति सहस्रवेधी। शतवेधी च। [2]चुक्रयन्ति व्यथन्तेऽस्मादुष्णवीर्यात् चुक्रः। 'चुक्र व्यथने'। [3]अम्लरससंयुक्तो वेतसः अम्लवेतसः। अम्लवेतसनामानि। 'पुल्ल प्रब्बलिपेल्लु'॥ [4]अञ्जलिरूपत्वान्नमस्करोतीव नमस्कारी। गण्डेषु ग्रन्थिषु कालिमास्या[5] अस्तीति गण्डकाली। समन्तादङ्गतीति समङ्गा। 'अगि गतौ'। सम्यगङ्गान्यस्या इति वा[6]। खदिरवत्[7] कृष्णसूक्ष्मपर्णत्वात् खदिरा। खदिरानामानि। '[8]मुनुगुदामरपेल्लु'॥ १४१॥

[1] सहस्रं रोगान् विध्यतीति, 'व्यध ताडने' F_2, K_3, Pt_2.　[2] चक्यन्ते वध्यन्ते दन्ता अनेनेति चुक्रः। 'चक प्रतिघाते' Pt_2.　[3] अम्लरसोपेतः D_2, K_5, K_6. [4] अञ्जल्याकारपर्णशालिनीत्वात् K_5, K_6; K_6 adds पर्णैर्नमस्कुर्वन्निव तिष्ठति.　[5] काली F_2, Pt_2.　[6] संकुचितानि पत्ररूपाण्यङ्गानि F_2, Pt_2.　[7] खदिर इव सूक्ष्मपत्रत्वात् F_2, Pt_2.　[8] 'मोगुडुदामर' K_6; 'मुगुलतावरे' J_2.

(पा.) सहस्रवेधी—शतवेध्यपि । अम्लवेतसनामानि । 'अम्लवेतसमु' । नमस्कारी—खदिरेत्यपि । वैद्यके—

'रक्तपादी[1] शमीपत्रा समङ्गाञ्जलिकारिका ।
लज्जालुर्गण्डकारी च रास्ना खदिरिकेत्यपि ॥'

इति । अञ्जलिकारिकानामानि । 'मुणुगुदामर' ॥ १४१ ॥

[1] पूर्वार्धम्—ध. नि. ४. १०९.

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः ॥ १४२ ॥

(वि.) जीवन्तीति—जीवन्ति [1]प्राणिनोऽनयेति जीवन्ती । जीवनी । जीवा । जीवनीया च । 'जीव प्राणधारणे' । [2]मधु स्रवतीति मधुस्रवा । 'स्रु[3] गतौ' । जीवन्तीनामानि । 'पालकूरपेल्लु' ॥ कूर्चवत् श्मश्रुवत् [4]शीर्षमस्येति कूर्चशीर्षः । मधुरत्वात् [5]मधुरकः । [6]शृङ्गाभावयवयोगात् शृङ्गः । [7]ह्रस्वान्यङ्गान्यस्य ह्रस्वाङ्गः । जीवयतीति जीवकः[8] । जीवकनामानि । '[9]जीवकमुसुगन्धद्रव्यमुपेल्लु' ॥ १४२ ॥

[1] F_2, J_2, Pt_2 omit. [2] B_1, J_2 omit 3 lines. [3] 'स्रु स्रवणे' Pt_2.
[4] समशीर्षत्वात् F_2, Pt_2. [5] मधुकरत्वात् मधुकरः K_5. [6] शृङ्गयोगात् F_2, Pt_2.
[7] ह्रस्वावयवत्वात् Pt_2. [8] K_6 adds 'जीव प्राणधारणे'. [9] 'जीवरमु' K_2; 'जीवर' J_2.

(पा.) जीवन्ती—मधुस्रवा । जीवन्तीनामानि ।

'चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा ।'

इति धन्वन्तरिः (ध. नि. १. १४१) । 'पालकूर' ॥ कूर्चशीर्षो—जीवकाः । शेषे—'दीर्घायुः[1] सर्जकः स्वादुः प्राणदश्चिरजीव्यपि' । जीवकनामानि । 'जीवकमु' ॥ १४२ ॥

[1] 'ह्रस्वाङ्गो मधुरः स्वादुः प्राणदश्चिरजीव्यपि' इति ध. नि. १. १२३.

किराततिक्तो भूनिम्बोऽनार्यतिक्तोऽथ सप्तला ।
विमला सातला भूरिफेना चर्मकषेत्यपि ॥ १४३ ॥

(वि.) किराततिक्त इति—तिक्तरसयोगात् तिक्तः, किरातदेशे भवस्तिक्तः किराततिक्तः । भुवि निम्बो भूनिम्बः । अनार्याः किराताः तद्देशे भवस्तिक्तः[1] अनार्यतिक्तः ।

भूनिम्बनामानि। 'नेलवेमुपेल्लु'॥ सपति स्वावयवेषु समेता[2] सप्तला। 'षप समवाये'। विगतं मलमनयेति[3] विमला। सातं सुखं लातीति[1] सातला[5]। सतां सुखं लातीति वा। भूरयः फेनबिन्दवोऽस्याः सन्तीति भूरिफेना। चर्म कषतीति चर्मकषा। 'कष हिंसायाम्'। चर्मकसेति पाठे चर्म कसति वर्धतेऽत्रेति चर्मकसा। 'कस गतौ'। सप्तलानामानि। 'सम्वरेनिपेल्लु'॥ १४३॥

[1] तिक्तरसश्च B_1, K_5.　[2] समवैति K_5, K_6.　[3] अस्याः D_2, K_5, K_6.
[4] D_2, K_5, K_6 add रोगाद्यपनयनेन.　[5] I, J_2 add 'ला दाने'.

(पा.) किराततिक्तो—अनार्यतिक्तः। भूनिम्बनामानि। 'नेलवेमु'। अनुक्तम्—'[1]काकजङ्घा तु शार्ङ्गष्ठा[2] षडश्रा च विलोमिका[3]'। 'वेलमलन्दि'। स भूनिम्बावान्तरभेदः॥ अथ सप्तला—चर्मकषेत्यपि। चर्मैव कसति वर्धत इति चर्मकसेति दन्त्योपधः सुभूतिटीकायां व्युत्पादितः। सातलानामानि।

'फेनाभबिन्दुयुक्तेयं पश्चाद्देशसमुद्भवा।
सातरिष्येव विख्याता गन्धद्रव्यं वणिग्धनम्॥'

'संबरेणि'॥ १४३॥

[1] 'दास्यां षडश्रा शार्ङ्गष्ठा काकजङ्घा विलोमिका' इति वैजयन्त्याम् (पृ. ५४, श्लो. १११).
[2] शार्ङ्गिष्ठा B_3.　[3] विलोलिका B_3.

वायसोली स्वादुरसा वयःस्थाथ मकूलकः।
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि॥ १४४॥

(वि.) वायसोलीति—वायसवदुलति चलतीति वायसोली। 'उल संचलने'। अवलीयत इति वा। 'ली श्लेषणे'। स्वादू रसोऽस्या इति स्वादुरसा। वयसि स्थीयतेऽनयेति वयःस्था। कायस्थेति पाठे काये बुध्ने तिष्ठतीति [1]कायस्था। 'ष्ठा गतिनिवृत्तौ'। वयःस्थानामानि। 'कारुगोलिमि'॥ [2]मङ्क्यते चित्रत्वात् मकूलकः। 'मकि मण्डने'। रसाधारत्वेन निश्चितः कुम्भो निकुम्भः। [3]कफादिदोषा दाम्यन्त्युपशाम्यन्त्यनयेति दन्तिका। 'दमु उपशमने'। प्रत्यक् तिर्यक् पर्णश्रेणयोऽस्याः सन्तीति [4]प्रत्यक्श्रेणी। उदुम्बरस्येव [5]पर्णान्यस्या उदुम्बरपर्णी। दन्तिकानामानि। 'दन्तिचेट्टुपेल्लु'॥ १४४॥

[1] क्रीयते ज्ञायते कयः । 'कि ज्ञाने' । कये बुध्ने तिष्ठतीति कयस्था K_5, K_6. [2] मङ्क्ते राजते B_1, J_2, K_3. [3] दम्यन्ते दोषा अनयेति F_2, Pt_2. [4] प्रत्यग्भवती(न्ती) प्रत्यक् श्रेणिरस्याः Pt_2. [5] पर्णानीव पर्णानि Pt_2.

(पा.) वायसोली—वयःस्था । कायस्थेति केचित् । अत्र कालिका काकोली शुक्लादयः शब्दाश्च । गौडदेशप्रसिद्धकाकोलीनामानि । 'काकोलीकारुकोरिञ्जि' ॥ अथ मकूलकः—उदुम्बरपर्ण्यपि । दन्तीनामानि । 'दन्तिचेट्टु' ॥ १४४ ॥

अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ।
मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥ १४५ ॥

(वि.) अजमोदेति—अजस्येव[1] मोदो गन्धोऽस्या अस्तीति अजमोदा । उग्रो गन्धोऽस्या उग्रगन्धा । ब्रह्मसंबन्धित्वात् दर्भाकारत्वाच्च ब्रह्मदर्भा[2] । यवानीव[3] सूक्ष्मपुञ्जसरूपत्वाद् [4]यवानिका । अजमोदानामानि । 'अजमोदमनुनोममुपेल्लु[5]' ॥ स्थलपद्मिनीमूलत्वेन पुष्करस्य मूलमिदं पुष्करम्[6] । [7]काश्मीरदेशे भवं काश्मीरम् । पद्मस्येव पत्राण्यस्य पद्मपत्रम् । पुष्करस्येदं पौष्करम् । पुष्करमूलनामानि । 'पुष्करमूलमुपेल्लु[8]' ॥ १४५ ॥

[1] अजवत् K_5, K_6. [2] ब्रह्मदर्भत्वात् D_2, K_5. [3] J_2 adds वृत्त°. [4] यवसादृश्यात् F_2, Pt_2. [5] 'ओमपूंगूरपेरु' I; 'अवत्तिका' J_2. [6] K_5, K_6 add पुष्णातीति पुष्करं; 'पुष पुष्टौ' K_6. [7] काश्मीरदेशजन्यत्वात् K_5, K_6; कश्मीर° K_2. [8] K_3 adds 'नालुगु'.

(पा.) अजमोदा—यवानिका । इयं द्विविधा । एका गन्धद्रव्यम् । अपरा क्षेत्रजा । द्वयोर्नामानि । 'अजमोदमुन्नु वोममुन्नु' ॥ मूले—पौष्करे । पौष्करे मूले पुष्करकाश्मीरपद्मपत्राणि स्युः । द्रव्यावल्यां तु—

'मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम् ।
काश्मीरं पुष्करजटाचीरं तत् पद्मपत्रकम् ॥
श्वासारिर्ब्रह्मतीर्थं च पद्मकं पुण्यसागरम् ॥'

इति मूलपौष्करशब्दौ पर्यायत्वेनोक्तौ ॥ १४५ ॥

अव्यथातिचरा पद्मा चारटी पद्मचारिणी ।
काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ॥ १४६ ॥

(वि.) अव्यथेति—न व्यथतेऽनयेति [1]अव्यथा। 'व्यथ भयचलनयोः'। अत्यर्थं चरति व्याप्नोतीति अतिचरा। 'चर[2] गतिभक्षणयोः'। [3]पद्मसादृश्यात् पद्मा। चरति व्याप्नोतीति चारटी। पद्ममिव चरतीति पद्मचारिणी। 'मेट्ट (काश्मीरदेशपु) [4]दामरपेल्लु'॥ कम्पिल्याख्यदेशे भवः काम्पिल्यः। कटुतिक्तोष्णरूपत्वात् कृणोतीति कर्कशः[5]। 'कृञ् हिंसायाम्'। रोगहरणेन[6] चन्दयत्याह्लादयतीति चन्द्रः। 'चदि आह्लादने'। रक्तमङ्गमस्येति रक्ताङ्गः। [7]रोचयति [8]रक्तपर्णेनेति रोचनी। 'रुच दीप्तौ'। रोचनीनामानि। 'कम्पिल्लमुपेल्लु'॥ १४६॥

[1] न व्यथयति K_5, K_6. [2] 'चर गतौ' D_2, K_5. [3] पद्माभत्वात् K_2, K_6. [4] '°मन्दलितामरपेरु' K_5. [5] कठिनत्वात् कर्कशः F_2, Pt_2. [6] पित्तश्लेष्मादिरोगिणो रोगहरत्वेन D_2, J_2, K_6. [7] रोचते Pt_2. [8] °वर्ण° I.

(पा.) अव्यथा—पद्मचारिणी। शेषे—'पद्मावती गन्धमूला लक्ष्मीः श्रेष्ठा च पुष्करा'। स्थलपद्मिनीनामानि। 'मेट्टदामर'॥ काम्पिल्यः—रोचनीत्यपि। 'रजतो रोहिताङ्गश्च कर्कशो रक्तचूर्णकः। करम्बः स्यात्' इतीन्दुः। काम्पिल्यनामानि। 'कम्पिल्लमु'॥ १४६॥

प्रपुन्नाटस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः।
पद्माट उरणाक्षश्च पलाण्डुस्तु सुकन्दकः॥ १४७॥

(वि.) प्रपुन्नाट इति—प्रकर्षेण पुमांसं नाटयतीति प्रपुन्नाटः। [1]प्रकर्षेण पुनातीति वा[2]। 'पूञ् पवने'। बलं प्रपुणतीति प्रपुण्णाट इति वा पाठः। 'पुण कर्मणि शुभे'। एडाभपुष्पत्वाद्[3] एडः। गज्यत[4] इति गजः। 'गज शब्दे'। एडश्चासौ गजश्च एडगजः। दद्रुं रोगं हन्तीति दद्रुघ्नः[5]। चक्राणि दद्रुमण्डलानि मृद्नाति नाशयतीति चक्रमर्दकः[6]। 'मृद[7] क्षोदे'। पद्मवदटति चरतीति पद्माटः। 'अट पट गतौ'। उरणो[8] मेषस्तदक्षिसदृशपुष्पत्वाद् उरणाक्षः। उरणाख्य इति वा पाठः। तदोरणस्य मेषस्याख्या अस्येति। पद्माटनामानि। 'तगिरसचेट्टुपेल्लु'॥ कफं पिपर्ति पूरयतीति पलाण्डुः। 'पृ पालनपूरणयोः'। शोभनः कन्दोऽस्यास्तीति सुकन्दकः। पलाण्डुनामनी॥ '[9]नीरुल्लि-पेरु'॥ १४७॥

[1] D_2, K_5, K_6 add कफहरत्वेन. [2] प्रपुनाटः K_2, K_3. [3] मेषाक्षितुल्यत्वात् K_5. [4] B_1, I, K_2 add शब्द्यते; श्रेष्ठत्वात् F_2, Pt_2. [5] F_2, Pt_2 add 'हन हिंसागत्योः'. [6] मर्दनः J_2. [7] 'मृद मर्दने' K_3, K_6. [8] उरणस्यैडस्याक्षितुल्यपुष्पत्वात् B_1, K_5. [9] 'केम्पुनीरुल्लि' J_2.

(पा.) प्रपुन्नाटः—उरणाक्षश्च । 'प्रपुन्नटः प्रपुन्नाडो[1] दद्रुपामनिघातकः' इति वैद्यके । प्रपुन्नाटनामानि । 'तंटेपुचेट्टु' ।। पलाण्डुस्तु सुकन्दकः । पलण्डुश्च पलण्डश्च पलाण्डुनामनी । 'नीरुल्लि' ।। १४७ ।।

[1] प्रपुन्नाटः B_3.

लतार्कदुर्द्रुमौ तत्र हरितेऽथ महौषधम् ।
लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ।। १४८ ।।

(वि.) लतार्क इति—[1]लताभिः शाखाभिरर्च्यत इति लतार्कः । अपवित्रत्वेन दुष्टो द्रुमो दुर्द्रुमः । हरितपलाण्डुनामनी । 'पच्चनिनीरुल्लिपेरु' ।। महच्च तदौषधं च महौषधम् । [2]अश्यते भुज्यत इति लशुनम् । 'अश भोजने' । गृञ्ज्यते कुत्सितं शब्द्यत इति गृञ्जनः[3] । 'गृजि शब्दे' । न [4]रिष्यतीत्यरिष्ट । 'रिष हिंसायाम्' । महान् कन्दो यस्य सः महाकन्दः । षट्सु रसेषु एकेनाम्लरसेनोनः [5]रसोनकः । लशुननामानि । 'वेल्लुल्लिपेल्लु' ।। १४८ ।।

[1] लतार्कस्यार्काह्वयस्यावयवसदृशावयवत्वात् लतार्कः B_1, D_2, K_5. [2] लशति कफादिकमिति, 'लश भेदने' D_2, I, K_2, K_5. [3] गृञ्जनं D_2, K_2, K_5. [4] रिष्यते K_6; नास्ति रिष्टं हिंसास्मादिति F_2, Pt_2. [5] अम्लरसेन कदूनत्वात् D_2, K_5, K_6.

(पा.) लतार्कदुर्द्रुमौ—हरिते । हरितपलाण्डुनामनी । 'पच्चनिनीरुल्लि' । अथ महौषधं—रसोनकाः । लशुननामानि । 'वेल्लुल्लि' । वैद्यके तु[1]—

'लशुनं दीर्घपत्रं च पिच्छागन्धो महौषधम् ।
पलण्डुश्च पलाण्डुश्च लतार्कश्च पताकिका ।।
गृञ्जनो यवनेष्टश्च पलाण्डोर्दश जातयः ।।'

इत्युक्तम् ।। १४८ ।।

[1] इति सुश्रुतेनोक्तत्वात्—भानुजीदीक्षितः (पृ. २०३).

पुनर्नवा तु शोथघ्नी वितुन्नं सुनिषण्णकम् ।
स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ।। १४९ ।।

(वि.) पुनर्नवेति—पुनः पुनर्नवो[1] भवतीति पुनर्नवा। पुनर्भव इति वा पाठः। [2]शोथं हन्तीति शोथघ्नी। शोफघ्न इति वा पाठः। 'हन हिंसागत्योः'। शोथघ्नीनामनी। '[3]गलिजेरुपेरु'॥ वितुद्यते विशेषेण छिद्यत इति वितुन्नम्। 'तुद व्यथने'। सुष्ठु निषीदन्ति [4]गुणा अत्रेति[5] सुनिषण्णकम्। 'षद्लृ विशरणगत्यवसादनेषु'। वितुन्ननामनी। नीरुचेञ्चलिपेल्लु॥ वातं करोतीति वातकः। अत एव शीतं लातीति शीतला। रोगैरपराजितत्वाद्[6] अपराजिता। शणस्येव पर्णान्यस्याः शणपर्णी। शणपर्णीनामानि। 'सोमिदपुचेट्टपेल्लु[7]'॥ १४९॥

[1] नवीभवति B_1, K_5. [2] शोफं J_2. [3] 'गणक्षिलु' J_2. [4] D_2, K_5, K_6 add दीपकत्वादि°. [5] अस्मिन् K_5, K_6. [6] रोगान् जिता, 'जि अभिभवे'. [7] 'उलिगु' J_2.

(पा.) पुनर्नवा—[1]शोफघ्नी। पुनर्नवानामनी। 'गलिजेरु'।

'शोभघ्न्यां पूरणा[2] पूरी वर्षाभ्वी जीवबोधिनी[3]॥
पुनर्नवा च रक्तायां तस्यां योग्या कटिल्लका[4]।
श्वेतायां वृश्चिकोऽल्पायां दीर्घपत्री विटाटिका॥
अस्या जात्यन्तरे [5]स्वल्पे पूरणी [6]हस्तिपूरणी॥'

इति वैजयन्ती (पृ. ५७, श्लो. १४५-७)। वितुन्नं सुनिषण्णकम्। जलचुक्रिकानामानि। 'नीरुचिंचिलम्'। स्याद्वातकः—शणपर्ण्यपि।

'बलापराजिता मोटा स्यन्दा शीतलवातलः।'

इत्यायुर्वेदप्रकाशोक्त्या शीतलवातल इत्येकपदमिति केचित्। शणपर्णीनामानि। 'सोमिदम्'॥ १४९॥

[1] शोभघ्नी B_3. [2] पूरणः पूरः B_3. [3] बोधनी B_3. [4] कटुल्लकः B_3. [5] सर्वे B_3. [6] हस्त° B_3.

पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता।
वार्षिकं त्रायमाणा स्यात् त्रायन्ती बलभद्रिका॥ १५०॥

(वि.) पारावताङ्घ्रिरिति—पारावताङ्घ्रिसदृशावयवयोगात् [1]पारावताङ्घ्रिः। कटत्यावृणोतीति [2]कटभी। 'कटे वर्षावरणयोः'। पण्यते स्तूयत[3] इति पण्या। 'पण

व्यवहारे स्तुतौ च'। ज्योतिरुष्णमस्या अस्तीति ज्योतिष्मती[4]। दूरप्रसरात्[5] लता[6]। ज्योतिष्मतीनामानि। 'एक्कुडुदिंगेपेल्लु'॥ वर्षासु भवं वार्षिकम्। रोगेभ्यस्त्रायत इति त्रायमाणा। 'त्रैङ् पालने'। त्रायन्ती च। बलेन प्राणेन भद्रत्वात् बलभद्रिका[7]। त्रायमाणानामानि। 'कटुगानुगुपेल्लु'॥ १५०॥

[1] रक्तत्वेन पारावताङ्घ्रिसदृशात् F_2, Pt_2. [2] कटतिः B_1; कटती J_2. [3] B_1, K_2, K_3 add मधुकरित्वात्; मेधाकरित्वात् I, J_2. [4] अग्न्याभावयवत्वात् D_2, K_3, K_6. [5] °प्रसरणात् K_5, K_6. [6] J_2 adds लतति, 'लति व्याप्तौ'. [7] बलेन भद्रिका F_2, Pt_2.

(पा.) [1]पारावताङ्घ्रिः—लता। शेषे—

'ज्योतिष्का साग्निभा सा च लवणोक्ता च दुर्मदा।
स्यात्सुपर्णलता चैद्या त्रिपर्णी किंशुकापि च॥'

ज्योतिष्मतीनामानि। 'मानेरुदीग'॥ वार्षिकं—बलभद्रिका। त्रायन्तीनामानि। 'कलुक्रान्त'॥ १५०॥

[1] कटभिरिति पाठः B_3.

विष्वक्सेनप्रिया घृष्टिर्वाराही बदरेति च।
मार्कवो भृङ्गराजः स्यात् काकमाची तु वायसी॥ १५१॥

(वि.) विष्वक्सेनप्रियेति—[1]विष्वक्सेनस्य प्रिया विष्वक्सेनप्रिया। वराहैर्घृष्यत इति [2]घृष्टिः। 'घृष संकर्षणे'। [3]वराहैराक्रान्ता वाराही। बदति स्थिरीभवतीति बदरा। 'बद स्थैर्ये'। वाराहीनामानि। 'पांचितींगेपेल्लु'॥ मार्कः संपर्कः औषधेषु तं वातीति मार्कवः[4]। 'वा गतिगन्धनयोः'। [5]भृङ्गवद् राजते भृङ्गराजः। 'राजृ दीप्तौ'। भृङ्गराजनामनी। [6]'गुंटगलगरपेल्लु'॥ काकान् मञ्चत इति काकमाची। 'मचि धारणोच्छ्रायपूजनेषु'। काकमूचीति पाठे काकवर्णेन मूयते संबध्यत इति काकमूची। 'मूङ् बन्धने'। वायसवर्णरसत्वाद् वायसी। 'कांचिचेट्टुपेल्लु[7]'॥ १५१॥

[1] विष्वक्सेनप्रियत्वात् F_2, Pt_2. [2] गृष्टिरिति पाठे प्रयोगबाहुल्याद् घकारस्य गकारः D_2, K_5, K_6. [3] वराहाक्रान्तत्वात् K_6. [4] शोफादिरोगान् मार्जयति मार्कवः। 'मृजूष् शुद्धौ' B_1, J_2, K_6; मार्जवः K_3. [5] K_5, K_6 add वर्णात्. [6] 'गरुडा' J_2. [7] 'कांचुरुकांगे' J_2.

(पा.) विष्वक्सेनप्रिया—बदरेत्यपि। यद्रसयोगेन तक्रस्यानता तल्लतानामानि। 'पांचितींगे'॥ मार्कवो—स्यात्। द्रव्यावल्याम्—

'अङ्गारको भृङ्गराजो भृङ्गः स्यात् केशरञ्जनः।
भृङ्गारकेशरागा च भृङ्गराजार्थवाचकाः॥'

इति। भृङ्गराजनामानि। 'गुंटकलगर'। काकमाची—वायसी। वैद्यके—'[1]काकार्थेभ्यः परा माची काकसाह्वा च वायसी' इति। अनेन ध्वाङ्क्षमाचीत्यादिरपि। काकी करटेत्यादिश्च। काकमाचीनामानि। 'कांचिचेट्टु। अदे नल्लबुडुसर'॥ १५१॥

[1] 'काकमाची ध्वाङ्क्षमाची काकाह्वा चैव वायसी' इति ध. नि. (४. २१).

शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः।
अवाक्पुष्पी कारवी च सारणी तु प्रसारिणी॥ १५२॥
तस्यां कटंभरा राजबला भद्रबलेति च।

(वि.) शतपुष्पेति—बहुपुष्पत्वात्[1] शतपुष्पा। [2]सितच्छत्राभानि पुष्पाण्यस्या इति सितच्छत्रा। छत्रमतिक्रान्ता अतिच्छत्रा। [3]विरुद्धलक्षणया मधुरत्वात् मधुरा। मस्यति परिणमतीति [4]मिसिः। 'मसी परिणामे'। अवाञ्च्यधोमुखानि पुष्पाण्यस्या अवाक्पुष्पी। कारेण यत्नेन वीयते खाद्यते, कटुतिक्तत्वादिति [5]कारवी। 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु'। मधुरानामानि। 'पेद्दसदापपेल्लु'॥ [6]सार्यते निःसार्यते पीडानयेति सारणी। प्रसारिणी च। 'सृ गतौ'। कटिं श्रोण्याद्यवयवं बिभर्ति पुष्णातीति[7] कटंभरा। '[8]डुभृञ् धारणपोषणयोः'। बलप्रदवस्तुषु राजवन्मुख्यत्वाद् राजबला। भद्रं बलमस्या अस्तीति भद्रबला। प्रसारिणीनामानि। [9]'गोन्तेमगोरुचेट्टुपेल्लु'॥ १५२॥

[1] °पुष्पयोगात् K_5, K_6. [2] सितानि छत्राकाराणि D_2, K_3. [3] F_2, Pt_2 add कटुतिक्तरसत्वेऽपि. [4] मसिः K_6. [5] करोतीति कारुः तस्येयं कारवी F_2, Pt_2. [6] सार्यन्ते वातसंकुचितान्यङ्गान्यनयेति F_2, Pt_2. [7] D_2, J_2 add वातहरणेन. [8] 'भृञ् भरणे' K_5, K_6, Pt_2. [9] 'हेसर्वणा' J_2.

(पा.) शतपुष्पा—कारवी च। शतपुष्पानामानि। 'सदाप'। सारणी—भद्रबलेति च। प्रसारिणीनामानि। 'गोंतेमगारु। दूसर'॥ १५२॥

जनी जतूका जननी जतुकृच्चक्रवर्तिनी ॥ १५३ ॥
संस्पर्शाथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।
कर्चूरोऽपि पलाशोऽथ कारवेल्लः कटिल्लकः ॥ १५४ ॥
सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः ।

(वि.) जनीति—जनयति शैत्यादिकं जनी । जननी च । 'जनी प्रादुर्भावे' । जतु लाक्षा तद्वद्रोगक्षयं करोतीति जतूका । [1]जतुकृच्च । चक्रे शाकानां समूहे वर्तत[2] इति चक्रवर्तिनी । 'वृतु वर्तने' । शीतगुणत्वात् सम्यक् स्पृश्यते [3]संस्पर्शा । 'स्पृश संस्पर्शने' । संस्पर्शोऽस्या इति वा । चक्रवर्तिनीनामानि । 'कीरिन्दचेट्टुपेल्लु' ॥ शटति कफादिरोगान् नाशयतीति शटी । 'शट रुजाविशरणगत्यवसादनेषु' । गन्धयुक्तं मूलमस्या इति [4]गन्धमूली । षड्ग्रन्थयोऽस्याः सन्तीति षड्ग्रन्थिका । कर्चूं चूर्यते दहतीति कर्चूरः[5] । 'चूरी दाहे' । पृथुपलाशत्वात् पलाशः[6] । व्रणस्थं पलं मांसमश्नुते वा । 'अशू व्याप्तौ' । गन्धमूलीनामानि । 'गंट्लकचोरमुपेल्लु' ॥ कारेण प्रयत्नेन यष्ट्यादिकमवलम्ब्य वेल्लति चलतीति कारवेल्लः[7] । 'वेल्ल[8] चलने' । कटत्यावृणोतीति[9] कटिल्लकः । 'कटे वर्षावरणयोः' । सुष्ठु सूयते फलानीति सुषवी । 'षूङ् प्राणिप्रसवे' । कारवेल्लनामानि । '[10]कांकरचेट्टु' ॥ कुत्सितं लक्यते आस्वाद्यत इति कुलकम्[11] । 'लक आस्वादने' । पटति सरतीति पटोलः । 'अट पट गतौ' । तिक्तरसत्वात् तिक्तकः[12] । देहपटुत्वयोगात् पटुः । कटुरिति वा पाठे कटुरसत्वात् कटुः । पटोलनामानि । 'चेन्दुपोट्लचेट्टु[13]' ॥ १५३–४ ॥

[1] जतु करोतीति जतुकृत् F_2, Pt_2. [2] D_2, J_2 add श्रेष्ठतया. [3] समीचीनः स्पर्शोऽस्या अस्तीति F_2, Pt_2. [4] ग्रन्थिमूली J_2. [5] कचतीति कच्चूरः । 'कच बन्धने' K_5, K_6. [6] मृदुपलाशत्वात् मृदुपलाशः D_2, K_5. [7] कारवेल्ली D_2, K_5, K_6. [8] 'वेल चलने' K_6. [9] B_1, K_3 add पञ्जरादिकं. [10] 'हलुगु' J_2. [11] कुलतीति कुलकं Pt_2. [12] तिक्तरसयोगात् F_2, Pt_2. [13] 'कैपटल' J_2.

(पा.) जनी—संस्पर्शा । लाक्षाजनकलताविशेषनामानि । 'कारिंद' । अथ शटी । मूर्धन्योपधः । गन्धमूली—पलाशः । ग्रन्थिकचोरनामानि । 'गंट्लकचोरमु' । कारवेल्लः—सुषवी च । कारवेल्लनामानि । 'कांकर' । अनुक्तम्—'सुकन्दरस्तु कर्कोटः' । तद्विशेषनामनी । 'मट्टुकांकर' ॥ अथ कुलकः—पटुः । वैद्यके—

'पटोलस्तिक्तकस्तिक्तस्तिलकः कर्कशच्छदः ।
राजिमान्[1] बीजगर्भश्च कुष्ठहा कासमर्दनः ॥

प्रतीककर्कशौ चैव तथा राजिपटोलकः ।
राजिराजामृतापाण्डुभूतेभ्यश्च फलः परः ॥
रवणश्चेति ॥'

यादवस्त्वाह—

'पटोलिका ह्रस्वफला कन्याकुब्जा यवीयसी ।
सा तिक्ता तिक्तफलिका वन्या[2] तिक्तपटोलिका ॥'

इति । पटोलनामानि । 'पोट्ल' ॥ '[3]पटोलायास्तु पर्यायैर्योजयेद्भिषगुत्तमः' इति धन्वन्तरिवचनात् (ध. नि. १. ५२) तिक्तपटोलनामान्यपि । 'चेंति पोट्लानुन्नु' ॥१५३–४॥

[1] राजनामा B_3.　　[2] कन्या B_3.　　[3] पटोऽस्य च B_3.

कूष्माण्डकस्तु कर्कारुरुर्वारुः कर्कटी स्त्रियौ ॥ १५५ ॥
इक्ष्वाकुः कटुतुम्बी स्यात् तुम्ब्यलाबूरुभे समे ।
चित्रा गवाक्षी गोतुम्बा विशाला त्विन्द्रवारुणी ॥ १५६ ॥

(वि.) कूष्माण्डक इति—कुत्सित[1] ऊष्मा अण्डेषु बीजेषु यस्य [2]कूष्माण्डकः । तृप्तिं करोतीति कर्कः । इयर्तीति अरुः । 'ऋ गतौ' । कर्कश्चासावरुश्च कर्कारुः । कूष्माण्डनामनी । '[3]गुम्मडिपेल्लु' ॥ कटुरसेन जिह्वामूर्वतीति उर्वारुः[4] । '[5]उर्वी हिंसायाम्' । कर्कापेक्षया ह्रस्वत्वात् कर्कटी[6] । उर्वारुनामनी । 'दोसचेट्टुपेल्लु' ॥ इक्षुमप्यकयति कुटिलयति तिक्तत्वेनेति इक्ष्वाकुः[7] । 'अक कुटिलायां गतौ' । कटुत्वेन जनं तुम्बयति पीडयतीति [8]कटुतुम्बी । 'तुबि अदर्शने अर्दने च' । कटुतुम्बीनामनी । '[9]चेंदुसोरपेल्लु' ॥ तुम्बयति पित्तं नाशयतीति तुम्बी । 'तुबि अर्दने' । न लम्बते जलेऽधो न गच्छति शुष्कदशायामिति अलाबूः । 'लबि शब्दे अवस्रंसने च' । अलाबूनामनी । 'मंचिसोरपेल्लु' ॥ चित्ररूपफलत्वात् चित्रा । वृषभाक्षितुल्यपुष्पयोगात् गवाक्षी । गोभिर्भक्षणेन तुम्ब्यते गोतुम्बा । 'तुबि अर्दने' । गवाक्षीनामानि । 'पिन्नपा-परपेल्लु' ॥ विशालफलयोगाद् विशाला[10] । इन्द्र [11]इव वृषभाक्षाभैः [12]फलैः स्वदेहं वृणोतीति इन्द्रवारुणी । 'वृञ् वरणे' । इन्द्रवारुणीनामनी । '[13]पेद्दपापर' ॥ १५५–६॥

[1] कु ईषत् ऊष्मा Pt_2.　　[2] कूदमाण्डकः K_5, K_6, Pt_2.　　[3] 'कुंबल' J_2.
[4] उरु मूत्रमारयति निःसारयतीति F_2, Pt_2.　　[5] 'उर्वी तुर्वी धुर्वी हिंसायाम्' K_5, K_6.
[6] करोति वर्षमिति Pt_2.　　[7] क्षत्रियधनत्वात् K_5, K_6.　　[8] कटुस्तिक्ता तुम्बी F_2, Pt_2.
[9] 'कैसोरे' J_2, W_2.　　[10] विशालफलत्वात् Pt_2.　　[11] इन्द्रवत् F_2, Pt_2.　　[12] पुष्पैः Pt_2.
[13] 'दोड्ड दामेके' J_2.

(पा.) कूश्माण्डकः—कर्कारुः । वैद्यके—

‘ कूश्माण्डश्चित्रकः सोमः पीतपुष्पो नृपात्मजः ।
वनवासः पुण्ड्रफलः कालिङ्गीपीतके स्त्रियौ ।
महाफला शाकफला सुभद्रा शकुलापि च ॥ ’

इति । वाक्चन्द्रिकायां तु—

‘ कूश्माण्डस्तु कलिङ्गः स्याच्चित्रको गर्भपातनः । ’

इति । कूश्माण्डनामानि । ‘ गुंमडि ’ ॥ उर्वारुः—स्त्रियौ । वैजयन्त्याम्—‘ भीरुस्त्विवर्वारुकर्कटी, ’ (पृ. ५८, श्लो. १६६) ‘ चोदन्युर्वारुपालक्यः ’[1], ‘ अल्पा[2] सा राजकर्कटी[3] ’ (पृ. ५८, श्लो. १६७) इति कर्कटीसामान्यनामानि । ‘ दोस ’ ॥ शेषे—‘ सुखवासी [4]शीर्णवृन्तस्तीव्रगन्धः सुवासकः ’ । तद्विशेषनामानि । ‘ कोरुबुडम ’ । शेषे—

‘ त्रिलिङ्ग्यां[4] त्रपुसेत्रालं डर्दिनी हस्तिपर्णिनी ।
विपाण्डुश्चिद्भिटीमूत्रफलः स्यात् तिक्तकर्कटी ॥ ’

त्रपुसा-इत्रालमिति छेदः । इतालमिति केचित् । तिक्तकर्कटीनामानि । ‘ चिंति-दोस ’ । ‘ करबुजमुन्नु ’ । ‘ [5]चिर्भटी पुनरुर्वारुः ’ इति वैजयन्ती । (पृ. ५९, श्लो. १७२) ‘ नक्कदोस ’ । ‘ विटङ्कोऽतिमृगेर्वारुः ’ इति वैजयन्ती (पृ. ५९, श्लो. १७२) । ‘ बुडुम ’ ॥ इक्ष्वाकुः—स्यात् । शेषे—

‘ अम्बा पिण्डफला तथा ।
उषा च क्षत्रियरसस्तिक्तबीजो महाफलः ।
बृहत्फला राजपुत्री ॥ ’

तिक्ततुम्बीनामानि । ‘ सदर ’ । ‘ चेंतिसोर ’ ॥ तुम्ब्यलाबूः—समे । अलाबूनामानि । ‘ अनुगमु ’ ॥ अनुक्तं—‘ कालिङ्ग्यां सोमकर्कारुर्वनवासक इत्युभौ ’ । कालिङ्गनामनी । ‘ पुच्चेट्टु ’ ॥ चित्रा—गोतुम्बा । ‘ चित्रा विशाला द्रवन्ती चेति ’ द्व्यर्थतन्त्राभिधाने सत्यपि विशालावान्तरभेदत्वाद् गवाक्षीपर्यायत्वेनोक्तिः । गवाक्षीनामानि । क्षुद्रफलेन्द्रवारुणीनामानि च । ‘ बुडुमानु ’ । ‘ पिन्नपांपरातु ’ ॥ विशाला—इन्द्रवारुणी । शेषे—ऐन्द्री-द्रसाह्वा त्रपुसी शक्रेर्वारुश्च तुम्बिनी ’ । इन्द्रवारुणीनामानि । ‘ पेद्दपांपर ’ ॥ १५५–६ ॥

[1] वालुक्य: इति मुद्रितग्रन्थे. [2] फल्या B_3. [3] °कर्कटि: B_3. [4] उग्रगन्ध इति, ‘ त्रिलिङ्गे त्रपुषे तालु छर्दनी हस्तिपर्णिनी ’ इति च मुद्रितवैजयन्त्याम् (पृ. ५९). [5] चिद्भिटे B_3.

अर्शोघ्नः सूरणः कन्दो गण्डीरस्तु समष्ठिला ।
कलम्ब्युपोदकास्त्री तु मूलकं हिलमोचिका ॥ १५७ ॥

(वि.) अर्शोघ्न इति—अर्शोरोगं हन्तीति अर्शोघ्नः।[1] सूयते प्रेर्यते भक्षणे [2]रुचित्वादिति [3]सूरणः। 'षू प्रेरणे'। अर्शोरोगिभिः कन्द्यतेऽन्विष्यत इति कन्दः[4]। 'कदि आह्वाने रोदने च'। सूरणनामानि। 'कन्दपेल्लु'॥ गण्डीन् ग्रन्थीनीरयत्यपनयतीति गण्डीरः। 'ईर [5]क्षेपे'। सम्यगस्थीन्यन्तर्वस्तूनि लात्यादत्ते समष्ठिला[6]। 'ला आदाने'। गण्डीरनामनी। '[7]एरुवंगपेल्लु'॥ के जले लम्बते कलम्बी[8]। '[9]तींगेबच्चलिपेरु'॥ उपगतमुदकं यस्याः सा उपोदका[10]। 'टुंबवच्चलि'॥ प्रशस्तानि मूलान्यस्येति मूलकम्[11]। 'मुल्लंगि'॥ हेलया रोगान् मोचयतीति हिलमोचिका। 'मुच्लृ मोक्षणे'। 'चिलुकक्कूर'॥ १५७॥

[1] I, Pt_2 add 'हन हिंसागत्योः'. [2] रुचिरत्वात् D_2. [3] सूर्यत इति सूरणः, 'सूरी हिंसायाम्' Pt_2. [4] कन्द्यते रोगोऽनेनेति Pt_2. [5] 'ईर गतौ' K_6, Pt_2. [6] सम्यगष्ठिला बीजं यस्याः F_2, Pt_2. [7] 'हल्लवदने' J_2. [8] कं शिरः अग्रं लम्बमानमस्याः D_2, K_5, K_6; 'लबि शब्दे अवस्रंसने च' J_2, K_3, Pt_2. [9] 'हब्बुबसले' J_2. [10] उपशब्दोऽधिकार्थः, अधिकमुदकमस्येति Pt_2. [11] मूलमधिकं करोतीति, 'डुकृञ् करणे' I.

(पा.) अर्शोघ्नः—कन्दः। शेषे—'कण्डूरश्चित्रदण्डकः। उल्लुश्च दैत्यमदनः'। सूरणनामानि। 'कंद'। 'कन्दं त्वस्त्री चित्रदण्ड उल्लुः कण्डूरसूरणौ' इति वैजयन्ती (पृ. ६२, श्लो. २०८)। अनुक्तम्—'अस्त्रियामानुवक्रोष्टि'। 'गेणुसु'॥ 'शकुटो जलकूचिका'। 'अडिविचाम'॥ 'बृहच्छदो महापद्मो मोहमाण इमे समाः'। 'बलुरक्किस'॥ 'वज्रवल्ली काण्डलता'। 'नल्लेरु'॥ 'कन्याह्वा तु स्थलेरुहा'। 'कलुबंद'॥ 'छत्राकस्तु शिलीन्ध्रोऽहिच्छत्रं भूस्फोटमित्यपि'। 'पुट्टगोड्डगु'॥ 'मुण्डिनी श्रमणी मुण्डा'। 'बोडतरमु'॥ 'कुणुञ्जो वनवास्तुकम्'। 'चञ्चलिकपित्थपत्रिझरसी'। 'चेंतलासि'॥ 'द्रोणपुष्पी कुरुण्टिका'। 'तुम्मि'॥ 'अरण्यवासिनी घोली'। 'घोलिकूर'॥ 'क्षुद्रा सैव विचिह्निका'। 'पावलिकूर'॥ गण्डीरः—समष्ठिला। गण्डीरनामनी। 'योरुवंग। तुरुजकूरातु'॥ कलम्बी—हिलमोचिका। कलम्ब्यादिपञ्चकं शाकविशेषवाचकम्। कलम्बी—'तीङ्गेबच्चवी'। उपोदका। 'अपोदका मत्स्यकाली'। इति [1]धन्वन्तरिपाठादपशब्दादिरपि। 'टुंफबच्चलि'। अस्त्री तु मूलकं। मूलकः। 'मुल्लंगि'। हिलमोचका—'चिलुकक्कूर'॥ १५७॥

[1] उपोदकीति मुद्रितग्रन्थे (ध. नि. ७. ७४)

वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विका।
सहस्रवीर्याभार्गव्यौ रुहानन्ताथ सा सिता ॥ १५८ ॥
गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः।

(वि.) वास्तुकमिति—वसन्त्यत्र त्रिदोषघ्नगुणा इति वास्तुकम्। 'वस निवासे'। 'चक्रवर्तिकूर[1]'॥ एते कलम्ब्याद्याः पञ्च शाकभेदा इत्युच्यन्ते॥ दूर्व्यते पशुभिरिति दूर्वा। 'दुर्वी हिंसायाम्'। दूरं वाति गच्छतीति वा। 'वा गतिगन्धनयोः'। [2]शतं पर्वाण्यस्यामिति शतपर्विका। महाप्रभावत्वात् सहस्रवीर्या। भृगोरियं भार्गवी। छिन्नापि रोहतीति रुहा[3]। 'रुह बीजजन्मनि प्रादुर्भावे च'। दूरप्रसरणाद्[4] अनन्ता। दूर्वानामानि। 'गरिकपेल्लु[5]'॥ गोरिव लोमान्यस्या इति गोलोमी। शतं[6] वीर्याणि प्रसरणरूपाण्यस्या इति शतवीर्या। सितदूर्वानामनी। 'तेल्लगरिकपेल्लु'॥ गण्डैर्ग्रन्थिभिरल्यते भूष्यत इति गण्डाली। 'अल भूषणादौ'। [7]मत्स्यनयनतुल्यग्रन्थियोगात् शकुलाक्षकः। शकुलाक्षकनामनी। 'तेल्लगरिक[8] यनि कोंदरु'॥ १५८॥

[1] 'चक्रोत' J_2. [2] बहुग्रन्थित्वात् D_2, K_5, K_6. [3] मूलैरेव रोहतीति K_5, K_6. [4] प्रसरत्वात् F_2, Pt_2. [5] 'करिके' J_2. [6] महाप्रभावत्वात् D_2, K_5, K_6. [7] मत्स्याक्षितुल्यग्रन्थित्वात् J_2, K_6. [8] 'बिलियकर्क' J_2.

(पा.) वास्तुकं—स्युः। वास्तुकं, वास्तूकमपि। 'वास्तूकं चक्रवास्तुकम्' इति वाग्भटः। 'चक्रवर्तमु'॥ शाकाख्यं पत्रपुष्पादीत्यारभ्य (श्लो. १३६) वास्तुकान्ताः (श्लो. १५८) शाकभेदाः स्युरित्युपसंहारः॥ दूर्वा तु शतपर्विका। तुशब्देन तृणप्रकरणारम्भो द्योत्यते। सहस्रवीर्या—अनन्ता। दूर्वानामानि। 'गरिकि'। अथ सा—शतवीर्या च। श्वेतदूर्वानामनी। 'तेल्लगरिकि'॥ गण्डाली शकुलाक्षकः। महादूर्वानामनी। 'अथ महादूर्वा परा पुनः। गण्डाली शकुलाक्षश्च' इति प्रतापः। 'तींगगरिकि'॥ १५८॥

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥ १५९ ॥
स्याद् भद्रमुस्तको गुन्द्रा चूडाला चक्रलोचटा।

(वि.) कुरुविन्द इति—कुरुदेशं विन्दत्याश्रयत्वेनेति कुरुविन्दः। 'विद्लृ लाभे'। [1]मेघनामान्यस्य सन्तीति मेघनामा। मुस्यति खण्डयति पित्तादिरोगानिति मुस्ता। 'मुस खण्डने'। मुस्तकं च। मुस्तानामानि। 'निडुपुगल तुंगमुस्तलपेल्लु'॥

भद्रश्चासौ मुस्तश्च[2] भद्रमुस्तकः। अतिसारादिरोगहरत्वगुणैर्द्रातीति[3] गुन्द्रा। 'द्रा कुत्सायां गतौ'। 'भद्रमुस्तलु[4]'॥ चूडां [5]लातीति चूडाला। 'ला दाने'। चक्राकारं लात्यादत्त इति चक्रला। उच्चटति रोगानिति उच्चटा[6]। 'चट[7] भेदने'। चूडालानामानि। 'वट्टुवमुस्तलपेल्लु'॥ १५९॥

[1] मेघस्य F_2, Pt_2. [2] मुस्तकः D_2, K_5, K_6. [3] गुणान् Pt_2. [4] 'भद्रमुस्ते बदनीरटे' J_2. [5] K_5, K_6 add आदत्ते. [6] उच्चाटा J_2. [7] 'चट स्फुट भेदने' K_5, K_6.

(पा.) कुरुविन्दो—मुस्तकमस्त्रियाम्। दीर्घमुस्तानामानि। 'निड्डुपुतुंगमुस्तेलु'। स्यात्—गुन्द्रा। भद्रमुस्तानामनी। 'भद्रमुस्तलु'। चूडाला—उच्चटा। वृत्तमुस्तानामानि। 'वट्लुवमुस्तलु'। आम्लपत्रतृणविशेषनामानीति [1]टीकासर्वस्वे (पृ. २०३, श्लो. १६०)॥ १५९॥

[1] 'अयमल्पपत्रस्तृणविशेषः' इति मुद्रितग्रन्थे.

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः॥ १६०॥
शतपर्वा यवफलो वेणुमस्करतेजनाः।

(वि.) वंश इति—[1]वन्यते सेव्यत इति वंशः। 'वन षण संभक्तौ'। [2]त्वचि सारो दार्ढ्यमस्येति त्वक्सारः। त्वचिसारश्च। मिथः संघट्टनादि कर्म इयर्तीति कर्मारः। 'ऋ गतौ'। तृणानां मध्ये मुख्यत्वात् तृणध्वजः[3]। शतमनेकानि पर्वाण्यस्येति [4]शतपर्वा। यवफलाभफलत्वाद् यवफलः[5]। वयन्त्यनेन कटादिकमिति वेणुः। 'वेञ् तन्तुसंताने'। मङ्कते नौकादिरनेनेति मस्करः। 'मकि मण्डने'। मा क्रियते[6] प्रतिषिध्यतेऽनेनेति वा। तेजयत्यग्निमिति तेजनः। 'तिज [7]निशाने'। वेणुनामानि। '[8]वेदुरुपेल्लु'॥ १६०॥

[1] D_2, K_5, K_6 add अङ्कुष्ठैः. [2] त्वचि सरति स्थैर्यमाप्नोतीति K_5, K_6. [3] तृणानां मुख्यः K_5, K_6. [4] बहुग्रन्थित्वात् D_2, J_2, K_6. [5] यवसदृशानि फलान्यस्येति F_2, Pt_2. [6] मा कीर्यते K_5; मङ्क्यते कटादिरनेन प्रसार्यते B_1. [7] निशातने K_6. [8] 'विदिरु' J_2.

(पा.) वंशे—तेजनाः। शेषे—'मृत्युपुष्पं च यः खेलः'। वंशनामानि। 'वेदुरु'॥ शेषे—भल्लुङ्गः। 'गट्टुवेदुरु'। कृष्णसारकः। 'नल्लनिवेदुरु'॥ १६०॥

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥ १६१ ॥
ग्रन्थिर्ना पर्वपरुषी गुन्द्रस्तेजनकः शरः ।
नडस्तु धमनः पोटगलोऽथो काशमस्त्रियाम् ॥ १६२ ॥
इक्षुगन्धा पोटगला पुंभूमनि तु बल्वजाः ।

(वि.) वेणव इति—ये वेणवोऽनिलोद्धता वायुना ताडिताः स्वनन्ति ते कीचका इत्युच्यन्ते । की चेति कायन्ति शब्दायन्त इति कीचकाः । 'कै शब्दे' । 'बोंगुवेदुळ्ळपेरु' ॥ ग्रन्थ्यते [1]सन्धिरूपेण बध्यत इति ग्रन्थिः । 'ग्रथि कौटिल्ये' 'ग्रन्थ सन्दर्भे' इति वा धातुः । पर्वति स्थूलो भवतीति पर्व । 'पर्व [2]पूरणे' । पिपर्तीति परुः । 'पॄ पालनपूरणयोः' । [3]सान्तोऽयं नपुंसकलिङ्गः । पर्वनामानि । 'वेदुरु [4]गणुपुलपेल्लु' ॥ गूयत इति गुन्द्रः । 'गूञ् शब्दे' । इन्द्र इति पाठे इन्दतीन्द्रः । 'इदि परमैश्वर्ये' । तेजयति पित्तादिरोगान्[5] तनूकरोतीति तेजनकः । 'तिज निशातने' । शृणाति [6]रोगं शरः । 'शॄ हिंसायाम्' । शरनामानि । '[7]काकिवेदुरुपेल्लु' ॥ वायुवशात् नलति चलतीति नडः[8] । 'नल गतौ' । सुषिरत्वात् ध्मायते पूर्यत इति धमनः । 'ध्मा[9] शब्दाग्निसंयोगयोः[9]' । पुटति[10] गलति चेति पोटगलः । 'पुट संश्लेषणे' । नडनामानि । '[11]किक्कसकसवुपेल्लु' ॥ काशत इति काशम् । 'काशृ दीप्तौ' । इक्षोरिव गन्धोऽस्या इति इक्षुगन्धा । गले मूलस्थाने पुटतीति पोटगला । 'पुट संश्लेषणे' । काशनामानि । 'रेल्लुकसवुपेल्लु' ॥ बल्वाख्ये विशेषस्थाने जायन्त इति बल्वजाः[12] । 'जनी प्रादुर्भावे' । अयं शब्दः पुंसि भूम्न्येव वर्तते । '[13] मोदयवुकसवुपेल्लु' ॥ १६१–२ ॥

[1] काण्डसंधिरूपेण D_2, K_6. [2] 'पर्व मर्व पूरणे' K_5, K_6. [3] सकारान्तः J_2, K_5. [4] 'गंणिनबसरु' J_2. [5] °रोगं J_2. [6] दाहकं D_2, K_5, K_6. [7] 'काकाबु' J_2. [8] नलति विध्यतीति, 'नल बन्धने' Pt_2. [9] 'ध्मा पूरणे' K_5, K_6. [10] गले मूले पुटति संश्लिष्यत इति D_2, K_5, K_6. [11] 'देवनालतृणमु' K_2. [12] बलन्ते संवृण्वन्ति स्तम्बबाहुल्याद् भुवमिति बल्बजाः F_2, Pt_2; वबयोरभेदः, 'वृञ् वरणे' Pt_2. [13] 'मोदे' J_2.

(पा.) वेणवः—अनिलोद्धताः । ये वंशा अनिलोद्धताः सन्तः स्वनन्ति ते वेणवः कीचकाश्च स्युः । 'बोंगुवेदुल्लु' । अनुक्तम्—'विषमो निःस्तुषौ रेणौ' । 'वोलुलेनि वेदुरु' ॥ ग्रन्थिः—पर्वपरुषी । सान्तद्विवचनम् । द्वे नपुंसके । ग्रन्थिनामानि । 'कणुपु' ॥ गुन्द्रः—शरः । शेषे—'शरनामा भद्रमुञ्जो मुञ्जेक्ष्वतिखराः समाः' । वंशकारतृण-विशेषस्य नामानि । 'कारिवेदुरुन्नु काकिचरुकुन्नु कनुमुन्नु' । अनुक्तम्—'लतावंशश्च वेत्रश्च भूधरश्च समार्थकाः' । 'पेमु' । नडस्तु—पोटगलः । शेषे—'रन्ध्री च

नर्तकः। विभीषणः शून्यमध्यो नलः'। अन्तः सरन्ध्रस्य तृणविशेषस्य नामानि। 'किक्किम'। अथो काशं—पोटगलः। अपचयविवक्षायां [1]स्त्रीलिङ्गो भवति काशीति। 'इक्षुगन्धा तु काण्डेक्षुकाशयोः' इति यादववचनात्। 'दर्भेऽश्ववालः काशिर्ना काशोऽस्त्री स्त्रीक्षुगन्धिका' इति वैजयन्तीवचनाच्च (पृ. ६३, श्लो. २२७) स्त्रीलिङ्गत्वमिक्षुगन्धाशब्दस्य। अश्ववालदर्भनामानि। 'रेल्लु'॥ पुंभूमनि—बल्बजाः। पुंलिङ्गो बहुवचनश्चायं शब्दः। 'एकश्च बल्बजो बन्धनेऽसमर्थः' इत्यर्थवत्सूत्रे (१. २. ४५) महाभाष्यप्रयोगदर्शनादेकवचनान्तत्वमपि। मुञ्जकल्पस्य तृणविशेषस्य नाम। 'मोदयमु'। केचिल्लिङ्गवचनद्योतनार्थस्तुशब्द इति काशादिबल्बजान्तान् पर्यायानेवाहुः॥ १६१–२॥

[1] गौरादित्वान्ङीष् इति टीकासर्वस्वे (पृ. २०५).

रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादयः॥ १६३॥
स्याद्वीरणं वीरतरं मूलेऽस्योशीरमस्त्रियाम्।
अभयं नलदं सेव्यममृणालं जलाशयम्॥ १६४॥
लामज्जकं लघुलयमवदाहेष्टकापथे।

(वि.) रसाल इति—रस्यत इति रसालः। 'रस आस्वादने'। रसेनालत इति वा। 'अल भूषणादौ'। इष्यते सर्वैरिति इक्षुः। 'इषु इच्छायाम्'। रसालनामनी। 'चेरुकुपेल्लु'॥ तद्भेदानाह। पुण्ड्राख्यदेशे भवः [1]पुण्ड्रः। काम्यत इति कान्तारकः। 'कमु कान्तौ'। पुण्ड्रनामनी। 'बंगालपुचेरुकु'॥ पूर्वः श्वेतरसालः, इतरमान्ध्राः बंगालमिति वदन्ति। इत्यादयः सन्ति॥ [2]वीरयति विक्रमति [3]तीक्ष्णत्वेनेति वीरणम्[4]। [5]वीरतरं च। 'वीर[6] विक्रान्तौ'। वीरणनामनी। '[7]अवुरुकसवुपेल्लु'॥ उश्यते काम्यते उशीरम्। 'वश कान्तौ'। न विद्यते भयमनेनेत्यभयम्[8]। नलत्यर्दयतीति नलं पित्तादिकम्। तद् द्यतीति [9]नलदम्। 'दो अवखण्डने'। 'नल गन्धने'। सेव्यते पित्तादिशमनार्थमिति[10] सेव्यम्। 'षेवृ [11]सेवायाम्'। मृणति हिनस्तीति मृणालं हिंस्रं, तन्न भवतीति [12]अमृणालम्। 'मृण हिंसायाम्'। जले आशेत इति जलाशयम्। 'शीङ् स्वप्ने'। [13]रक्तदोषं लाति नाशयतीति ला। ला मज्जासारोऽस्यास्तीति लामज्जकम्। [14]इक्षुरसवदगुरुत्वात् लघु। जठराग्नौ[15] लीयतेऽनेनेति लयम्। 'लीङ् श्लेषणे'। अवलीयते[16] दाहोऽनेनेत्यवदाहम्। पथि इष्टकमबाधकस्थानमस्येतीष्टकापथम्[17]। वारणमूलनामानि। 'तेल्लनिवट्टिवेरु[18]'॥ १६६–४॥

[1] पुणतीति पुण्ड्रः, 'पुण कर्मणि शुभे' F_2, Pt_2.   [2] वीरयते K_5, K_6.   [3] पशुषु तीक्ष्णतृणत्वेन D_2, J_2, K_6.   [4] वीरतृणं K_5, K_6.   [5] वीरतरुश्च D_2, J_2.   [6] 'शूर

वीर विक्रान्तौ' K_6. [7] 'वट्टिवेरुचेट्टु' K_2, K_6; 'लामंचद पूवु' J_2. [8] रोगहरत्वादभयम् D_2, K_5, K_6; K_2, K_5 add 'वट्टिवेरु'; 'लामंचदवेरु' J_2. [9] नलमत्यर्थं पित्तादिरोगं (रोगान् I) यति K_5, K_6. [10] रोगहरत्वात् D_2, K_6. [11] 'षेवृ सेवने' K_6. [12] हिममपि मृणालविलक्षणत्वात् K_5, K_6. [13] J_2, K_6 add जलूकावत्. [14] गुरुत्वाभावात् F_2, Pt_2. [15] जाठरोऽग्निः J_2, K_5. [16] अवनश्यति F_2, Pt_2. [17] वातवत्त्वेन गमननिरोधकत्वाद् इष्टं कापथमस्येति F_2, Pt_2. [18] 'बिलियलामञ्चदवेरु' J_2.

(पा.) रसाल इक्षुः। शेषे—

'पिप्पलरसो मधुतृणस्तथा।
खड्गपत्रं कर्कटकः कान्तारो वेणुनिःसृतिः।
मृत्युप्रसूनः॥'

इक्षुनामानि। 'चेरुकु'॥ तद्भेदा—कान्तारकादयः। आदिपदाच्छतपर्ववङ्गालनेपालादयो गृह्यन्ते। 'चेरुकु भेदालु'। अनुक्तम्—'अनिक्षुस्त्विक्षुनासिका'। 'नल्लजेरुकु'॥ स्यात्—वीरतृणम्। यन्मूलमुशीरं तत्तृणस्य नामनी। 'अवुरु'॥ मूलो—अमृणालम्। वीरणमूलस्य नामानि। 'वट्टिवेल्लु'। जलाशयं—इष्टकापथे। सेव्यामृणालशब्दौ लामज्जकेऽपि वर्तेते। तथा चोक्तं द्व्यर्थे—अमृणालं लामज्जकमुशीरं च। (अ. द्व. २. ७०) सेव्यं लामज्जकमुशीरं च। (अ. द्व. २. २१) अत एव उशीरलामज्जकयोर्भेदः।

'लामज्जकं [1]सुनालं स्यादमृणालं [2]लयं लघु।
इष्टकापथकं शीघ्रं दीर्घमूलं जलाशयम्॥'

इति वैद्यके (ध. नि. ३. ८६) दर्शनात् लघु लयमितिसंज्ञाद्वयमेतत्।

'लामज्जकं हितं तिक्तं रक्तपित्तविषार्तिनुत्।
उशीरं शीतलं तिक्तं दाहक्लमहरं च तत्॥'

इति वैद्यके च भेदो विवक्षितः। जलस्थवीरणमूलनामानि। 'नीटवट्टिवेल्लु'। केचिदभेदविवक्षयोशीरादीष्टकापथान्तानां पर्यायत्वमाहुः॥ १६३–४॥

[1] सुरालं B_3. [2] लवमिति मुद्रितनिघण्टौ (पृ. ११३).

नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि॥ १६५॥
अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम्।
पौरसौगन्धिकध्यामदेवजग्धकरौहिषम्॥ १६६॥

(वि.) नडादय इति—नडकाशादयः[1] गर्मुच्छ्यावकप्रमुखाश्च तृणं तृणभेदा इत्युच्यन्ते। गीर्यतेऽस्य धान्यं मनुष्यैरिति गर्मुत्। 'गॄ निगरणे'। श्यामवर्णमकति प्राप्नोतीति श्यामाकः। 'अक अग कुटिलायां गतौ'। एते प्रत्येकं तृणविशेषाः॥ तृण्यतेऽद्यते पशुभिरिति तृणम्। 'तृणु अदने'। कौ भूमौ[2] शेते कुशम्[3]। 'शीङ् स्वप्ने'। विप्रपाणिषु कुथ्यत इति कुथः[4]। 'कुथ[5] श्लेषणे'। दृणाति करादिकमिति दर्भः। 'दॄ विदारणे'। पुनातीति पवित्रम्[6]। 'पूञ् पवने'। दर्भनामानि। 'दर्भपेल्लु[7]'॥ [8]कुत्सितं तृणं कत्तृणम्। पुरे भवं पौरम्। शोभनो गन्धः प्रयोजनमस्येति सौगन्धिकम्[9]। ध्यायते पशुभिरप्रियत्वादिति[10] ध्यामम्। 'ध्यै चिन्तायाम्'। देवेन कालेन जक्ष्यत इति देवजग्धकम्[11]। 'जक्ष भक्षहसनयोः'। यत्र तत्र वा रोहतीति रौहिषम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। सौगन्धिकनामानि। '[12]कामंचिपूरिपेल्लु'॥ १६५–६॥

[1] नडकाशबल्बजेक्षुवीरणाः नडादयः सर्वे D_2, K_5, K_6. [2] भुवि J_2. [3] F_2, Pt_2 add कुं श्यति वा, 'शो तनूकरणे'. [4] विप्राः पाणिषु कुश्नन्ति J_2. [5] संश्लेषणे D_2. [6] पूयतेऽनेनेति F_2, Pt_2. [7] 'कुशपेरु' K_6. [8] Pt_2 adds पशूनामभक्ष्यत्वेन. [9] सुगन्धिकत्वात् D_2, K_5, K_6. [10] अप्रियत्वेन K_5, K_6. [11] देवेनाग्निना जग्धं देवजग्धम् F_2, Pt_2. [12] 'गंजिणिपेल्लु' B_1, I.

(पा.) नडादयः—प्रमुखा अपि। पूर्वोक्ता नडकाशाद्यास्तृणजातयस्तृणशब्देनोच्यन्ते। तथा गर्मुत् श्यामाकादयोऽपि। गर्मुत्—'गण्टे'। श्यामाकः—'चाम'। 'श्यामाको नीलपुष्पः स्यात्' इति वैजयन्ती (पृ. १२७, श्लो. ५८)। अस्त्री—कुथः। विप्रपाणिषु कुथ्यत इति। 'कुथ संश्लेषणे'। दर्भः पवित्रम्। शेषे—

'बर्हिरद्वयोः।
ऋषिशस्त्रो दीर्घमूलः पीनाहो यज्ञजागरः।
क्षुरवप्रो मुनिर्वीरा सूचिः॥'

कुशनामानि। 'कुशदर्भ'। 'लताकुशे तु शारिः स्त्री मुञ्जः स्याद् ब्रह्ममेखलः'॥ अथ कत्तृणं—रौहिषम्। सुगन्धितेजनतृणनामानि। 'कामञ्चि'। 'रामकर्पूरमु'॥ १६५–६॥

छत्रातिच्छत्रपालघ्नौ मालातृणकभूस्तृणे।
शष्पं बालतृणं घासो यवसं तृणमर्जनम्॥ १६७॥

(वि.) छत्रेति—छत्राकारत्वात् छत्रा। अत एव छत्रमतिक्रान्तोऽतिच्छत्रः। छत्रातिच्छत्र इत्येकं वा नाम। नैष्ठुर्यात् पालं पालकं रक्षकं हन्तीति [1]पालघ्नः। 'हन

हिंसागत्योः'। छत्रानामानि। 'छत्राकारमैनतृणमुपेल्लु'॥ मालारूपाणि तृणान्यस्येति मालातृणकम्[2]। भूरित्यव्ययम्। तस्यां तृणं भूस्तृणम्[3]। मालातृणकनामनी। 'चिप्पकसवुपेल्लु'॥ शस्यते पशुभिर्भक्षणेनेति शष्पम्। 'शसु हिंसायाम्'। 'शंसु स्तुतौ' वा धातुः। बालं च तत् तृणं च बालतृणम्। शष्पनामनी। 'तेंतकसवुपेल्लु'॥ घस्यते पशुभिरिति घासः। 'घस्लृ अदने'। यूयते [4]मिश्रीक्रियते लावकैर्बन्धनकाल इति यवसम्। 'यु मिश्रणे'। घासनामनी। 'वेंतपूरि'॥ तृण्यते पशुभिरिति तृणम्। 'तृणु अदने'। पशुग्रासार्थमर्जतेऽर्जनम्[5]। 'अर्ज [6]अर्जने'। अर्जुनमिति वा पाठः। तृणनामनी। 'सामान्यमुगा कसवुपेल्लु'॥ १६७॥

[1] पलं मांसं हन्ति तैक्ष्ण्यादिति पलघ्नः। पलघ्न एव पालघ्नः Pt_2. [2] मालारूपतृणत्वात् K_5, K_6. [3] भुवं संस्तृणातीति, 'स्तृञ् आच्छादने' Pt_2. [4] मिश्रीयते K_5; यौतीति F_2, Pt_2. [5] अर्ज्यते I. [6] 'अर्ज षर्ज अर्जने' K_6.

(पा.) छत्रा—पालघ्नौ। छत्रेति भिन्नं पदं, स्त्रीलिङ्गं च। अतिच्छत्रपालघ्नौ पुंलिङ्गेऽपि। तथा च रुद्रः—

'आतपत्रं मतं छत्रं छत्रा मधुरिका मता।
अतिच्छत्रोऽपि छत्रः स्याच्छत्रा धान्याकमुच्यते॥'

इति। छत्रातिच्छत्र इत्येकपदमिति केचित्। छत्रा द्रोणिका अतिच्छत्रपालघ्नौ देवद्रोणिकेति केचित्। 'ऋषणी द्रोणिका छत्रा चक्षुष्या द्रोणपुष्पिका' इति वैजयन्ती (पृ. ५५, श्लो. १२४)। देवद्रोणीति गोपालः। छत्राकारस्य तृणविशेषस्य नामानि। 'गुड्ढिकामंचि'। मालातृणकभूस्तृणे। सकाररहितं भूतृणमिति केचित्। यस्य ग्रन्थिस्थानेषु परिमण्डलावयवा भवन्ति स भूतृणाख्यः शाकविशेषः। 'तथा च भूस्तृणशिग्रुसर्षप—' इत्यादि शाकप्रकरणे विष्णुवचनं (विष्णुस्मृतिः ७९. १७) स्मृतिचन्द्रिकाकारः पपाठ। भूतृणनामनी। 'तुम्मिकूर'। वैद्यके तु—(ध. नि. ८. ४२).

'[1]भूस्तृणं रोहिणं[1] भूतिर्भूस्यूतिश्च[1] कुटुम्बकः।
मालातृणं च [1]पालघ्नः छत्रातिच्छत्रकस्तथा॥'

इति छत्रादिभूस्तृणान्तानां पर्यायत्वमाह। 'चिप्पकसवु'। शष्पं बालतृणम्। अमरमालायां पुंस्यप्युक्तम्। नवतृणनामनी। 'वेंतकसवु'। नीलदूर्वानामापि। 'नीलदूर्वा भवेच्छष्पं शाद्वलं हरिता तथा' इति माधवः। घासो—अर्जुनम्। तृणसामान्यनामानि। 'कसवु'। घासादिद्वयं पशुभक्ष्ये, तृणादिद्वयं तृणसामान्य इति वदन्ति। अन्ये शष्पादिचतुष्टयं बालतृणे, तृणादिद्वयं तृणमात्र इति वदन्ति॥ १६७॥

[1] भूतृणं, रोहिणः, भूतिकोऽथ, सुमालीति मुद्रितनिघण्टौ (पृ. ३६०).

तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः ।
तृणराजाह्वयस्तालो नालिकेरस्तु लाङ्गली ॥ १६८ ॥

(वि.) तृणानामिति—तृणानां समूहः तृण्या । '[1]गड्डिकुप्प' ॥ [2]नडतृणानां समूहो नड्या । 'किक्कसवुकसवुकुप्प' ॥ [3]तृणानां राजा मुख्यः तृणराजः । तृणराजः इत्याह्वयो यस्येति तृणराजाह्वयः । तलति प्रतिष्ठते दृढमूलत्वात् तालः । 'तल प्रतिष्ठायाम्' । तालनामनी । 'ताटिचेट्टुपेल्लु' ॥ नाल्या कमुदकमीरयतीति नालिकेरः । 'ईर क्षेपे' । नालीकानि नालयुक्तानि फलादीनीरयति वर्धयतीति वा । लाङ्गलवत् कुञ्चिताग्रावयवत्वात् [4]लाङ्गली । नालिकेरनामनी । 'नारिकेलवृक्षमु (टेंकायचेट्टु[5])' ॥ १६८ ॥

[1] 'वामि' K_6.   [2] नडसमूहो K_5; 'नड अनेडि कसवुकुप्प' K_6.   [3] तृणमध्ये मुख्यत्वात् D_2, K_5.   [4] लाङ्गलाकारपत्रत्वात् F_2, Pt_2.   [5] 'नालिकेर' J_2.

(पा.) तृणानां—तृण्या । तृणसमूहनाम । 'गड्डिसोपु । अदे कुप्पैतेनुवरड्ढमु' । 'वरण्डस्तृणसञ्चयः' इति वैजयन्ती (पृ. १२८, श्लो. ६५) । 'पूलमु' । 'पूलोऽस्त्री तृणपञ्चिका' इति वैजयन्ती (पृ. १२८, श्लो. ६४) ॥ नड्या—नडसंहतिः । नडसमूहनाम । 'किक्किसवासि' । शेषे—'पुञ्जिलस्तु तृणस्तम्बे' । तृणगुल्मनाम । 'गड्ढिदुब्बु' । 'इषीकात्र सकण्टके' । कण्टकसहिततृणस्तम्बनाम । 'मुंझ्दुब्बु' । 'मुञ्जस्तु यज्ञियो मेध्यो मृदुत्वग्ब्रह्ममेखलः' । मुञ्जदर्भनामानि । 'उल्लूनस्तूलपो दर्भ ऊर्ध्वमूलः खरच्छदः' । उलपदर्भनामानि ॥ तृणराजाह्वयस्तालः । शेषे—

'दीर्घस्कन्धो द्रुमेश्वरः ।
फलेरुहो महापत्रस्तलो भूमिपिशाचकः ॥
कालो दीर्घतरुर्लेख्यपत्रकश्च दुरारुहः ।
ध्वजद्रुमो द्रुमश्रेष्ठः ॥'

तालनामानि । 'ताडि' । नारिकेलः—लाङ्गली । शेषे—

'नारिकेलो रसफलः सुतुङ्गः कूर्चकेसरः ।
लालावृक्षो दृढफलो दाक्षिणात्यः सुपत्रकः ।
तृणराजो महाप्रांशुर्दृढमूलो महाफलः ।
जीवनध्रुवको रोही दीर्घदण्डः सुनीरकः ।
घटोदकः स्कन्धफलो बली चापि सुराफलः ॥'

नारिकेरनामानि । 'नारिकेरमु'।

'[1]नारिकेरे तु लाङ्गली ।
दाक्षिणात्यो नीरफलः सुतुङ्गः कूर्चकेसरः ।
सुराफलो नली च'।

इति वैजयन्ती (पृ. ६३, श्लो. २२०–१) । शेषे—'ह्रस्वे त्वखण्डुकः'। 'चेन्नंगि'। 'रक्तेऽग्निकः स्वर्णः'। 'येर्रनिकायलनारिकडमु'। 'अस्य पट्टके परिक्रोणा'। 'नारिकडपु दोत्ति'। 'फलं त्वस्य चोर्चं च घटसंज्ञकम्'। 'नारिकडपुकाय'॥ १६८॥

[1] 'नालिकेरः . . . अप्फलोऽबालः सुत(तु)ङ्गः कूर्चकेसरः । सदाफलो बली च' इति मुद्रितग्रन्थे (पृ. ६३).

घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु ।
फलमुद्वेगमेते च हिन्तालसहितास्त्रयः ॥ १६९ ॥
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।

इति वनौषधिवर्गः

(वि.) घोण्टेति—घुणन्ति भ्रमन्त्यनया [1]जना इति घोण्टा । 'गुण भ्रमणे'। [2]पुनाति मुखं फलेनेति पूगः। 'पूञ् पवने'। [3]क्रामन्त्यस्मिन् फलार्थिन इति क्रमुकः। 'क्रमु पादविक्षेपे'। गुवति मलं निःसारयत्यनेनेति गुवाकः। 'गु पुरीषोत्सर्गे'। खानीन्द्रियाणि प्रृणोतीति खपुरः। 'प्रृ प्रीतौ'। '[4]पोंकचेट्टु'॥ उद्गतो [5]वेगोऽस्येति उद्वेगम्। उद्विजन्तेऽस्माद् दुर्बला इति वा उद्वेगम्। 'ओविजी भयचलनयोः'। 'पोंकपण्डु'॥ हिनोति वर्धते तलति प्रतिष्ठत इति हिन्तालः। 'हि गतौ वृद्धौ च'। 'हितालमु'॥ हिन्तालसहिताः प्रागुक्तास्तृणराजा नालिकेरक्रमुकाख्यास्त्रयो वृक्षाः तृणद्रुमा इत्युच्यन्ते। खर्जति रक्तपित्तमिति खर्जूरः। 'खर्ज व्यथने'। 'खर्जूरमुपेरु'॥ कित्यते ज्ञायते गन्धेनेति केतकी[6]। 'कित ज्ञाने'। 'मोगलिचेट्टुपेरु'॥ तलति प्रतिष्ठते ताली। 'तल प्रतिष्ठायाम्'। 'श्रीतालमुपेरु[7]'॥ खर्जति रोगं खर्जूरी। 'खर्ज[8] व्यथने'। 'चिट्टींदुपेरु'॥ [9]एते चत्वारो वृक्षा अपि तृणद्रुमा इत्युच्यन्ते॥ १६९॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ वनौषधिवर्गः

[1] पुरुषाः K_5, K_6; नराः B_1, J_2. [2] पवते, 'पूङ् पवने' D_2, K_5, K_6. [3] क्राम्यन्त्यस्योपरि D_2, K_6. [4] 'अडकेरे' J_2. [5] K_5, K_6 add प्रवाहः. [6] गन्धोऽनेनेति K_6, Pt_2. [7] 'पेद्दयीन्दु' K_2, K_6. [8] 'खर्ज व्यथने पूजने च' B_1, D_2; खर्जयति K_6, Pt_2. [9] खर्जूरश्च केतकी च ताली च खर्जूरी च एते I.

(पा.) घोण्टा—गुवाकः। गूवाक इति वा। 'गुवाकोऽपि च गूवाकः' इत्युभयत्र तारपालः। खपुरः। शेषे—आसवः क्रूरः कषायस्त्रिवाटी रागवान् वीटिका। क्रमुकनामानि। 'पोंकमानु'॥ अस्य —अस्त्री स्यात्। शेषे—स्रंसिपर्कटम्। पूगादिशब्दाः नपुंसकलिङ्गाः सन्तः फलवाचकाः। घोण्टाशब्दः स्त्रीलिङ्गः सन्नेव फलवाचकः। तथा च प्रतापः—

'अस्य तु।
फलं पूगफलस्रंसि गुडा घोण्टा फलं भवेत्॥
उद्वेगश्चिक्कणश्चिक्का चिक्कणं च प्रकीर्तितम्।
तथा गोपफलं चेति॥'

क्रमुकफलनामानि। 'पोंकलु'। अत्र तु—'पक्के पोढम्'। 'पंडुपोंक'। 'खरं शुष्के'। 'येंडुपोंक'। 'मसृणे चिक्कचिक्कणे'। 'चिकिनीचक्क'। 'दीर्घवृन्ते रामपूगः'। 'तोडिमेनिडुवैनपोंक'। 'लतापूगे तु योजनः'। 'सूदिगोंटि'। 'भूपूगे लघुकः'। 'तोंटपोंक'। 'क्षुद्रफले बोदावकापि च'। 'सन्नपुपोंक'। 'गौलेयकः शैलजातपूगः'। 'कारुपोंक'। 'पूगस्य पटकी खपुरः'। 'पोंकजबर'। 'पुष्पपट्टे तु कुहली घटिकेति च'। 'पोंकपोत्ति'। तालागमाद्या एते च॥ हिन्तालः—तृणद्रुमाः। एते प्रागुक्तास्त्रयस्तालागमाद्यास्तालनारिकेलपूगा हिन्तालसहिताः खर्जूरादयश्चत्वारः शब्दास्तृणद्रुमा इत्युच्यन्ते। 'येनिमिदिन्नि तृणद्रुममुलु'। शेषे—'हिन्तालस्तृणराजश्च लताङ्कुरक इत्यपि'। हिन्तालनामानि। 'गिरुकताडि'। 'महारसो मधुक्षीरः परुषः पाण्डुरेव च। खर्जूरः'। खर्जूरनामानि 'खजूरमु'। 'पेरींदुन्नु'।

'पत्रलायां तु फलपाकान्तिकेत्यपि।
ताली दृढफला नाली श्रीतालो च वराङ्गना॥'

श्रीतालीनामानि। 'श्रीताडि'।

'[1]हलीमे केतकी न क्री दीनो व्यञ्जनजम्बुलौ[2]।
स्त्रीभूषणो[3] रजःपुष्पो गुप्तरागो बलीनकः॥'

इति वैजयन्ती (पृ. ६३, श्लो. १२३)। केतकीनामानि। 'मोगलि'। 'सा पीता मदनद्रोणी सुगन्धिः कनकच्छदा'। 'गेदंगि'। 'परूषी चापि खर्जूरी निस्त्वचा दृढकण्टका'। खर्जूरीनामानि। 'चिट्टीन्दु'॥ १६९॥

इति वनौषधिवर्गः

[1] हरिमः B_3. [2] जम्बुकौ B_3. [3] भूषणं B_3.

---

५. सिंहादिवर्गः

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः।
(कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः[1]।
पुण्डरीकः पञ्चनखचित्रकायमृगद्विषः॥)
शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः॥ १॥

(वि.) अथ सिंहादिवर्ग आरभ्यते—सिंह इति। हस्त्यादिकं [2]हिनस्तीति सिंहः। 'हिसि हिंसायाम्'। मृगाणामिन्द्रः श्रेष्ठः मृगेन्द्रः[3]। पञ्चत[4] इति पञ्चम्। 'पचि विस्तारे'। पञ्चं विस्तृतमास्यमस्येति[5] पञ्चास्यः। हरिणी कपिलवर्णेऽक्षिणी अस्येति हर्यक्षः[6]। के शिरसि सरन्तीति केसराः सटाः, तेऽस्य सन्तीति केसरी। हरति गजादिकं हरिः। 'हृञ् हरणे'। [7]सिंहनामानि। 'सिंहमुपेल्लु'॥ शृणाति बलीवर्दादिकमिति शार्दूलः। 'शॄ हिंसायाम्'। [8]द्वीपमाश्रयो यस्य स द्वीपी। व्याजिघ्रतीति व्याघ्रः[9]। 'घ्रा गन्धोपादाने'। व्याघ्रनामानि। 'पेद्दपुलिपेल्लु'॥ तरं प्लवमत्यर्थं क्षिणोतीति तरक्षुः। 'क्षिणु हिंसायाम्'। मृगानत्तीति मृगादनः। 'अद भक्षणे'। तरक्षुनामनी। 'सिवंगिपेल्लु'॥ १॥

[1] पिङ्गदृष्टिः Pt_2. [2] हन्तीति, 'हन हिंसागत्योः' J_2. [3] मृगेषु बलवान् D_2, K_5, K_6. [4] पञ्च्यते W_2. [5] D_2, K_6 add मुखं. [6] कपिलाक्षत्वात् D_2, K_6, W_2. [7] K_6, Pt_2 add कण्ठे रवो यस्य कण्ठीरवः। मृगाणां रिपुः। पिङ्गे दृष्टी यस्य। मृगाणामधिपः मृगाधिपः. [8] F_2, Pt_2 add निवासत्वेन. [9] K_6, Pt_2 add पञ्चा विस्तृता नखा नखरा यस्य पञ्चनखः, चित्रः कायो यस्य चित्रकायः, पुण्डं मांसं रीकति हरतीति पुण्डरीकः, मृगाणां द्विट् मृगद्विट्.

(पा.) सिंहो—हरिः। 'हलीक्ष्णस्तृणसिंहः स्यात् कुटरुर्मृगसिंहकः' इति वैजयन्ती (पृ. ६५, श्लो. २)। अभेदादत्रोक्तम्। शेषे—

'कण्ठीरवो मृगरिपुः पारीन्द्रः श्वेतपिङ्गलः।
महानादश्च शार्दूलो हरितोऽतुल्यविक्रमः।
सुगन्धिः सिन्धुरद्वेषी व्यादीर्णवदनो हरित्॥'

यादवप्रकाशेऽपि—

'कण्ठीरवो मृगरिपुः सुगन्धिर्हरितो हरित्।
व्यादीर्णास्यो महानादः शार्दूलोऽतुल्यविक्रमः।
हरिर्मृगेन्द्रो हर्यक्षः पारीन्द्रः श्वेतपिङ्गलः॥'

सिंहनामानि। 'सिंहमु'। हलीव हलवानिव कुटिलनखतया ईक्ष्यत इति हलीक्ष्णः। तृणमपि हिनस्तीति तृणसिंहः। मृगान् हिनस्ति मृगसिंहकः। शार्दूलद्वीपिनौ व्याघ्रे। शेषे—

'तत्र व्यालो गुहाशयः।
पुण्डरीकस्तीक्ष्णदंष्ट्रस्तरस्वी घोरदर्शनः।
मृगात्पञ्चनखो हुण्डो हिंसारुश्चण्डकश्च सः॥'

व्याघ्रनामानि। 'पुलि'। शेषे—

'खर्वेऽस्मिन् मेहनो मेही भेलश्चुलुकचित्रकौ।
द्वीपी पित्वश्चित्रकायः॥'

यादवप्रकाशेऽपि—

'स्वल्पकस्त्वयम्।
भेलो मेही च चुलुको द्वीपी पित्वश्च चित्रकः।
चित्रकायश्च॥'

इति। 'चिरुतपुलि'। तरक्षुः—मृगादनः। शेषे—

'तरक्षश्च मृगाजीवस्तिलित्सश्च मृगार्दनः।
मृगादद्देहिभेदे च तिलित्सः स्यात्॥'

इति गोपालः। कुर्कुरप्रायस्याल्पव्याघ्रस्य नामानि। 'शिवंगि'॥ १॥

वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ २ ॥

(वि.) वराह इति—वरं श्रेष्ठं [1]सस्यं पोत्रेणाहन्तीति[2] वराहः। 'हन हिंसागत्योः'। बहून्यपत्यानि सूते सूकरः। 'षूञ् प्राणिप्रसवे'। उन्नतप्रदेशान् [3]कूलादीन् घर्षतीति घृष्टिः। 'घृष [4]संकर्षणे'। कोलति संहताङ्गो भवतीति कोलः[5]। 'कुल संस्त्याने'। दीर्घं पोत्रं [6]मुखाग्रमस्यास्तीति पोत्री। पोत्रेण क्षितिं किरतीति किरिः। किर इति वा। 'कॄ विक्षेपे'। केटति[7] स्वयमेकाकी गच्छतीति किटिः। 'किट गतौ'। दंष्ट्रास्यास्तीति[8] दंष्ट्री। स्थूला घोणास्यास्तीति घोणी। स्तब्धानि रोमाण्यस्य सन्तीति स्तब्धरोमा। क्रुडति[9] क्रमेण घनत्वं प्राप्नोतीति क्रोडः। 'क्रुड घनत्वे'। [10]भुवं दारयतीति भूदारः। 'दॄ विदारणे'। [11]वराहनामानि ॥ 'अडवि पन्दिपेल्लु[12]' ॥ २ ॥

[1] शाल्यादिकं D_2, K_5, K_6. [2] J_2 adds आदत्ते. [3] कूलानि K_5, K_6. [4] संघर्षे B_1, D_2. [5] पीनत्वात् कोलः K_5, K_6. [6] मुखेऽस्तीति W_2. [7] किटति स्वैरं F_2, Pt_2. [8] सन्तीति Pt_2. [9] क्रोडति D_2, K_5, Pt_2. [10] J_2, K_5, W_2 add पोत्रेण. [11] अरण्यसूकरनामानि W_2. [12] 'काडहन्दि' J_2.

(पा.) वराहः—भूदार इत्यपि। किर इत्यकारान्तोऽपि। 'वराहश्च किरः किरिः' इति यादवः। शेषे—

'जलप्रियो वक्रदंष्ट्रः पीनस्कन्धस्तलेक्षणः।
काकरूपी स्थूलनासः कुमुखश्च बहुप्रजः ॥
[1]दंष्ट्रायुधश्चाफसिकः(?) पङ्कक्रीडश्च रोमशः ॥'

इति। वराहनामानि। 'दंष्ट्रायुधः कामरूपी कुंदारो मुखलाङ्गलः'। एतानि च ॥ २ ॥

[1] दंष्ट्रायोधः B_3.

कपिप्लवंगप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौका अथ भल्लुके ॥ ३ ॥
ऋक्षाच्छभल्लभालूका गण्डके खड्गखड्गिनौ ।
लुलायो महिषो वाहद्विषत्कासरसैरिभाः ॥ ४ ॥

(वि.) कपिरिति—प्रायेण कम्पते चलतीति कपिः। 'कपि चलने'। प्लवैरुल्लङ्घनैर्गच्छतीति प्लवंगः[1]। प्लवगश्च। 'गम्लृ[2] गतौ'। शाखासु संचारी मृगः शाखामृगः[3]। श्लथं चर्म वली, सा मुखेऽस्य वलीमुखः[4]। मिथः संश्लिष्टशाखासंकटे म्रियत इति मर्कटः। 'मृङ् प्राणत्यागे'। मर्कति गच्छतीति वा। 'मर्क ग्रहणे'। नर इव वानरः। की इत्यनुकरणशब्दं कर्तुमीष्टे कीशः। 'ईश ऐश्वर्ये'। वने[5] ओकः स्थानमस्य वनौकाः। सान्तः। वानरनामानि। 'कोन्तिपेल्लु'॥ [6]भल्लते हिनस्ति क्रिमीनिति भल्लुकः। भल्लूकश्च। 'भल्ल भल परिभाषणहिंसादानेषु'। [7]ऋक्ष्णोति हिनस्ति क्रिमीनिति ऋक्षः। 'ऋक्ष हिंसायाम्'। ऋष्यते गहनमनेनेति वा। 'ऋषी गतौ'। अच्छेनाभिमुख्येन भल्लते हिनस्तीति अच्छभल्लः। भलत इति भालूकः। 'भल परिभाषणहिंसादानेषु'। भल्लूकनामानि। '[8]एलुंगुपेल्लु'॥ प्रशस्तो गण्डोऽस्यास्तीति गण्डकः[9]। गण्डति वर्धयत्यास्यमिति वा। 'गडि वदनैकदेशे'। खडयति जिघांसन्तं भिनत्तीति [10]खड्गः। 'खडि भेदने'। खड्गो हिंस्रं शृङ्गमस्यास्तीति खड्गी। खड्गमृगनामानि। '[11]गण्डमृगमुपेल्लु'॥ पङ्के लुलति लोडतीति [12]लुलायः। 'लुड विलोडने'। डलयोरभेदत्वात्। 'लुल संश्लेषणे' इति वा धातुः। सत्त्ववत्वात् मह्यत इति महिषः। 'मह पूजायाम्'। मह्यां शेत इति वा। 'शीङ् स्वप्ने'। वाहानामश्वानां समूहो वाहं, तद् द्वेष्टीति वाहद्विषत्[13]। 'द्विष अप्रीतौ'। महाकायत्वात् ताड्यमानोऽपि का ईषत् सरतीति कासरः। 'सृ गतौ'। सीरा एषां सन्तीति सीरिणः बलीवर्दाः। सीरिभिः सह भातीति सैरिभः[14]। 'भा दीप्तौ'। महिषनामानि॥ '[15]कारेनुपोतुपेल्लु'॥३–४॥

[1] प्लवो लङ्घनं तेन गच्छतीति F_2, Pt_2; K_5, K_6 add 'प्लुङ् गतौ'. [2] 'गम्लृ सृप्लृ गतौ' I, J_2, W_2. [3] शाखाचारी (संचारी I, J_2) मृगः F_2, Pt_2. [4] वलयो मुखेऽस्य सन्तीति D_2, K_5, K_6. [5] वनं F_2, Pt_2. [6] भल्लति K_5, K_6. [7] ऋक्षति K_5, K_6. [8] 'करडि' J_2. [9] गण्डति गण्डस्थलवत् D_2, K_6. [10] खण्डयति तीक्ष्णत्वात् खड्गः शृङ्गं, तद्योगात् F_2, Pt_2. [11] 'खड्गमृगमु' Pt_2. [12] लोलनं लुलस्तमयतीति, 'अय गतौ' F_2, Pt_2. [13] वाहस्य हयस्य द्विषत् शत्रुः F_2, Pt_2. [14] सीरिभिर्हलयुक्तैः पशुभिः भान्तीति सीरिभाः कर्षकाः, तेषामयं F_2, Pt_2. [15] 'काडकोण' J_2.

(पा.) कपिः—वनौकाः। शेषे—

'च प्लवङ्गमः।
महावेगो दधिमुखः कुरङ्गो भल्लुकः [1]पृथुः।
सालावृको हरिश्चापि॥'

'भल्लूकौ कपिभल्लूकौ' इति चिन्तामणिः। 'महावेगो दधिमुखः कुरङ्गो भल्लुकः पृथुः' इति वैजयन्ती (पृ. ६८, श्लो. ४०)। कपिनामानि॥ अथ गोलाङ्गूलोऽसितााननः।

नीलशीर्षोऽपि। नीलशीर्षीति नकारान्तोऽपि। स्त्रियां नीलशीर्षीत्यपि। 'कोण्डमुच्चु' शेषे—अथ क्ष्विङ्को रक्तास्यः। स्त्रियाम्—क्ष्विङ्का। तथा च पुरुषमृग इत्यनुवाके। क्षुरे। 'सा ज्ञेया वानरी क्ष्विङ्का यस्या रक्तमुखं भवेत्' इति। 'चिंकलिक'। शेषे—नीलजः कपिः नीलकः। नीलेन वर्णेन नीलात्पर्वताद्वा जातो नीलजः। स नीलकः इत्युच्यते। 'कोंडेङ्ग'। शेषे—कर्म भावश्च कापेयम्। कर्मभावयोः कापेयशब्दः स्यात्। अथ भल्लुके—भल्लूकाः। बाल्लूक इत्यपि क्वचित्। शेषे—'भल्लाटो मृगधूर्तकः'। 'भल्लाच्छौ दीर्घरोमाक्षे'। 'भल्लौ भल्लूकबाणौ स्तः' इति धरणिः। 'अच्छौ निर्मल-भल्लूकौ' इत्यजयः। ऋक्षशब्द ऋकारादिः। 'भल्लूको दीर्घरोमर्क्षो भल्लाटो [2]वृकधूर्तकः' इति वैजयन्ती (पृ. ६५, श्लो. ७)। केषांचिद् रिशब्दादिरपि। '[3]रिक्षहर्यक्षकक्षरी' (द्विसं. १८. ५८) इति राघवपाण्डवीयम्। अच्छभल्ल इत्येकं नाम। 'विकरालो-ऽच्छभल्लश्च' इति वैजयन्ती (पृ. ६५, श्लो. ७)। केषांचिन्नामद्वयम्, 'अच्छः स्फटिक-भल्लूकनिर्मलेष्वच्छमव्ययम्' (पृ. ३१, श्लो. १)। 'भल्लो भल्ली च बाणे स्याद् भल्लो भल्लूक[4] इष्यते' (पृ. १५१, श्लो. ३०) इत्युभयत्र विश्वप्रकाशिका। भल्लूकनामानि॥ गण्डके खड्गखड्गिनौ। शेषे—'वार्धीणसो वनोत्साहस्तत्र वार्धोणसोऽपि च'। खड्गमृगनामानि॥ लुलायो—सैरिभाः। शेषे—

'लोहिताक्षः कृष्णशृङ्गो वीरस्कन्धो रजस्वलः।
जरन्तः कलुषः पोत्री जलात्मा गद्गदस्वरः।
स्कन्धशृङ्गो यमरथः कटादो दंशलालिकौ[5]।
[6]हंसकालीसुतः शृङ्गी हेरम्बः कृष्ण इत्यपि॥'

महिषनामानि। शेषे—'सृजयो गवलः कृष्णः'। कृष्णमहिषनामानि। 'स परस्वान-रण्यजः'। स महिषोऽरण्यजश्चेत् परस्वानित्युच्यते। 'कामाय परस्वान्' (तै. सं. ५. ५. ११. १) इत्यत्र परस्वानरण्यमहिष इति क्षुरे। परःशब्दोऽसुन्नन्तो मांसपर्यायः। अरण्य-महिषनाम॥ ३–४॥

[1] करी B_3. [2] मृग° B_3. [3] 'रिक्षकर्यर्थकक्षरि' इति मुद्रितग्रन्थे. [4] भल्लुक इति मुद्रितग्रन्थे. [5] 'कटाहो दंशलालिकः' इति वैजयन्त्याम् (पृ. ६५, श्लो. १०). [6] हास: B_3.

स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः।
सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः॥ ५॥
ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्।

AMARAKOS'A

[II]

Part 1

WITH THE UNPUBLISHED SOUTH INDIAN COMMENTARIES

AMARAPADAVIVṚTI OF LIṄGAYASŪRIN

AMARAPADAPĀRIJĀTA OF MALLINĀTHA

AND THE

AMARAPADAVIVARAṆA OF APPAYĀRYA

Critically edited with Introduction by

PROFESSOR A. A. RAMANATHAN

THE ADYAR LIBRARY SERIES

VOLUME ONE HUNDRED AND ONE

अमरकोशः

दाक्षिणात्यव्याख्योपेतः

AMARAKOS'A

[II]

WITH THE UNPUBLISHED SOUTH INDIAN COMMENTARIES

AMARAPADAVIVṚTI OF LIṄGAYASŪRIN

AMARAPADAPĀRIJĀTA OF MALLINĀTHA

AND THE

AMARAPADAVIVARAṆA OF APPAYĀRYA

Critically edited with Introduction by

PROFESSOR A. A. RAMANATHAN

THE ADYAR LIBRARY AND RESEARCH CENTRE

SBN 0-7229-7455-8
ISBN 0-8356-7455-X

Agents

Americas and Japan:
The Theosophical Publishing House,
P. O. Box 270, Wheaton,
Illinois 60187, U.S.A.

Australia, New Zealand, Indonesia and Fiji:
The Theosophical Society in Australia
121 Walker Street,
North Sydney, New South Wales 2060,
Australia.

Europe and the United Kingdom:
The Theosophical Publishing House Ltd.,
68 Great Russell Street,
London W.C. IB 3 BU, England.

India and Other Countries:
The Theosophical Publishing House,
The Theosophical Society,
Adyar, Madras 600 020, India.

PRINTED IN INDIA

At the Vasanta Press, The Theosophical Society,
Adyar, Madras 600 020

ADDITIONAL ABBREVIATIONS

अनर्घ.	अनर्घराघवम्
अ. सं.	अनेकार्थसंग्रहः
उ. च.	उत्तररामचरितम्
कठ.	कठोपनिषत्
का. आ.	काव्यादर्शः
का. प्र.	काव्यप्रकाशिका
काव्या. सू.	काव्यालंकारसूत्रवृत्तिः
कौ. अर्थ.	कौटिल्यार्थशास्त्रम्
गण. महो. / गणरत्न.	गणरत्नमहोदधिः
ग. सू.	गणसूत्रम्
गीता.	भगवद्गीता
छ. म.	छन्दोमञ्जरी
जै. ब्रा.	जैमिनीयब्राह्मणम्
तर्कसं.	तर्कसंग्रहः
ताण्डच.	ताण्डचब्राह्मणम्
तै. आ.	तैत्तिरीयारण्यकम्
तै. उ.	तैत्तिरीयोपनिषत्
तै. प्रा.	तैत्तिरीयप्रातिशाख्यम्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
तै. सं.	तैत्तिरीयसंहिता
द. रू.	दशरूपकम्
दे. माहा.	देवीमाहात्म्यम्
नागा.	नागानन्दम्
नाना. सं.	नानार्थार्णवसंक्षेपः
ना. शा.	नाटचशास्त्रम्
नृसिंह. उ.	नृसिंहोपनिषत्
पदम.	पदमञ्जरी
प. / परि.	परिभाषा
ब्र. सू.	ब्रह्मसूत्रम्
भ. का.	भट्टिकाव्यम्
भ. गी.	भगवद्गीता
मनु.	मनुस्मृतिः
म. भाष्य.	महाभाष्यम्
महावीर.	महावीरचरितम्
महोदधिः	गणरत्नमहोदधिः
मा. धा.	माधवीयधातुवृत्तिः
मालती.	मालतीमाधवम्
मालविका.	मालविकाग्निमित्रम्
मा. सू.	माहेश्वरसूत्राणि
मु. ग्र.	मुद्रितग्रन्थे
मुद्रारा.	मुद्राराक्षसम्
योगसू.	योगसूत्रम्
रत्ना.	रत्नावली
लिङ्गानु.	लिङ्गानुशासनम्
वरद. उप.	वरदतापिन्युपनिषत्
वाज. सं.	वाजसनेयिसंहिता
वायुपु.	वायुपुराणम्
वि. प्र.	विश्वप्रकाशिका
वृत्ति.	काशिकावृत्तिः
वेणी.	वेणीसंहारम्
वै. सू.	वैशेषिकसूत्रम्
श. द्रु.	शब्दकल्पद्रुमः
श. ब्रा.	शतपथब्राह्मणम्
शा. भा.	शाबरभाष्यम्
शु. नी.	शुक्रनीतिः
सर. कण्ठा.	सरस्वतीकण्ठाभरणम्
सर्व. संग्र.	सर्वदर्शनसंग्रहः
सि. कौ.	सिद्धान्तकौमुदी

PREFACE

PART two of the *Amarakośa* with the critical edition of South Indian commentaries now presented here contains the third Kāṇḍa of the text and the following commentaries: *Amarapadavivṛti* of Liṅgayasūrin, *Amarapadapārijāta* of Mallinātha and *Amarapadavivaraṇa* of Bommagaṇṭi Appayārya. The MSS. used for the critical edition of the first two commentaries have already been described in the Preface to the first part. The MSS. collated for the edition of Bommagaṇṭi Appayārya's *Amarapadavivaraṇa* are described below.

1. B5 Adyar Library. Palm-leaf No. 74046. 162 fo. 42.5×2.8 cm. 5 lines in a page. Grantha. Old. Injured. Good writing. Third Kāṇḍa complete.
2. B6 Adyar Library. Palm-leaf No. 75662. 156 fo. 48.75×4.4 cm. 7 lines in a page. Telugu. Old. Much injured. Illegible writing. Third Kāṇḍa complete except for the first leaf.
3. B7 Adyar Library. Visvabharati Collection. Palm-leaf No. 655. 221 fo. 40×3.2 cm. 8 lines in a page. Grantha. Old. Injured. Third Kāṇḍa complete.
4. Gm1 Government Oriental MSS. Library, Madras. Palm-leaf No. R. 1170. 205 fo. 41.25×3.45 cm. 6 lines in a page. Telugu. Old. Slightly injured. Good writing. Third Kāṇḍa incomplete; wants the first six leaves.

5. Gm2 Government Oriental MSS. Library, Madras. Paper No. R. 1401. 266 fo. 28.1×21.6 cm. 19 lines in a page. Telugu. Good condition. Good writing. Third Kāṇḍa incomplete.
6. Gm3 Government Oriental MSS. Library, Madras. Palm-leaf No. R. 4557. 161 fo. 48.75×3.2 cm. 7 lines in a page. Telugu. Old. Slightly injured. Good writing. Third Kāṇḍa complete.
7. Tj1 Tanjavur. Palm-leaf No. 4976. 246 fo. 45×4.4 cm. 5 to 6 lines in a page. Grantha. Old. Good writing. Third Kāṇḍa complete.
8. Tj2 Tanjavur. Palm-leaf No. 4977. 158 fo. 42.5×3.75 cm. 8 to 12 lines in a page. Grantha. Old. Good writing. Third Kāṇḍa complete.
9. Tv Trivandrum. Paper No. 1581 (T. 539). 596 pages. 35×20 cm. 19 lines in a page. 23 letters in a line. Devanāgarī. No. of Grantha-s 5350. Third Kāṇḍa complete.

Bommagaṇṭi's commentary is the most important among the South Indian commentaries, but unfortunately only the commentary of the third Kāṇḍa is available. The special features of this commentary as well as its importance have been discussed by Prof. A. A. Ramanathan in his introduction. Details about the other two commentaries and their authors have already been given in the Introduction to the first part.

A word index, index of quotations, etc. will be issued as Part III of the *Amarakośa* edition.

We are thankful to the Ministry of Education and Social Welfare (Department of Education), Government of India, for their grant-in-aid towards the publication of this volume.

We are also thankful to the authorities of the Government Oriental MSS. Library, Madras, the Tanjore Maharaja Serfoji's Sarasvati Mahal Library and the Oriental Research Institute and MSS. Library, University of Kerala, Trivandrum, for the use of their Manuscripts. Dr. V. Raghavan and Dr. K. Kunjunni Raja, Advisers to the Adyar Library and Research Centre, rendered help in the preparation of this work in various ways which we gratefully acknowledge.

1 January 1978.

RADHA BURNIER
Director,
Adyar Library and Research Centre

CONTENTS

Abbreviations ... v
Preface ... vii
Introduction ... xiii

तृतीयकाण्डः

१. विशेष्यनिघ्नवर्गः १–१५६
२. संकीर्णवर्गः १५६–२१९
३. नानार्थवर्गः २२०–६१०
४. अव्ययवर्गः ६१०–६५२
५. लिंङ्गादिसंग्रहवर्गः ६५२–७६२

INTRODUCTION

THE *Amarapadavivaraṇa* of Bommagaṇṭi Appayārya, the third South Indian commentary now published, may be considered as one of the best among the commentaries on the *Amarakośa*. Whereas the ancient commentary of Kṣīrasvāmin is well known for its brevity and expressiveness, that of Bhānujī Dīkṣita for its comprehensive grammatical derivations and that of Liṅgayasūrin for its lucid explanation, the commentary of Bommagaṇṭi shows all these desirable qualities with discrimination.

Appayārya, also called Appayācārya, hailed from the Telugu country and flourished in the court of King Siṃhabhūpāla of the Recarla dynasty in Āndhradeśa and he also occasionally gave Telugu equivalents for Sanskrit words. The concluding verses of the commentary describe him as an omniscient Brahmin who performed many Vedic sacrifices. The title Sarvajña[1] used seems to be justified in view of his 1925 citations from numerous works from the *Ṛgveda* down to those of his contemporaries. He quotes profusely from the *Tait. Sam.* His inclination towards Śaivism is seen in his reference to Haradatta as *Śivabhakto Haradattācāryaḥ* (p. 714). His knowledge of the Śrauta literature, as well as its practical application in rituals, especially of Āpastamba, is often in evidence. He was also a grammarian of outstanding ability. The concluding verses also say that he wrote commentaries on Nyāya, Vaiśeṣika, *Śabarabhāṣya* and the *Mahābhāṣya*.

[1] जैवातृकं बुधगुरुं निलयं कलानां सर्वज्ञमूर्धमणिमाश्रितशुद्धपक्षम् ।
श्रीबोम्मकण्ठ्युपपदाङ्कितमप्ययार्यं सर्वेष्टितोषितसुरं द्विजराजमाहुः ॥ (p. 760)

Appayārya's date can be fixed with some definiteness. It is clear that he flourished in the court of King Siṃhabhūpāla. Bommagaṇṭi eulogizes him as unrivalled in literary criticism,

> ख्यातः साहित्यविद्यायां केवलः शिङ्गभूपतिः । (p. 511)
> कुमारशिङ्गभूपेन लक्ष्यलक्षणवेदिना ।
> शोधितश्चेदयं ग्रन्थः किं शोध्यं शोधकान्तरैः ।। (p. 760)

and proudly asserts that this work was gone through by the king when he was a prince. This king is identified with the author of the *Rasārṇavasudhākara* who flourished in the latter half of the 14th century; hence the same date can be assigned to Bommagaṇṭi.[1]

He seems to have been the teacher of Harihara, son of Narasiṃha of the Bhāradvājagotra who wrote commentaries on the *Anargharāghava* and the *Tārkikarakṣāsāra-saṃgraha*.[2] T. Venkatacharya says that Bommagaṇṭi probably wrote a commentary on the *Rasārṇavasudhākara*.[3]

Comprehensive explanation not only of Amara, but also of additions made by later reviewers like Śeṣakāra is a striking feature of Bommagaṇṭi's commentary. *Karman* and *kriyā* are mentioned by Amara in the sense of action, but Śeṣakāra gives five additional words, all of which are derived and explained by Bommagaṇṭi (p. 158). Similarly eleven additional meanings given to *kālikā* are explained by him.

Amara does not exhaust all the synonyms. Bommagaṇṭi shows how additional synonyms are intended, though not expressly stated by Amara. The terms *nirveśa* and *upabhoga* also imply *nirveśana* and *upabhukti* (p. 189).

[1] V. Raghavan, (*IHQ*, XIX, p. 74) assigns him to A.D. 1385-1410.
[2] ibid.
[3] Int. to his ed. of the *Rasārṇavasudhākara*, Adyar Library.

Bommagaṇṭi's explanation of meanings is clear and full. *Paridhi* (a twig of holy tree) is explained with an apt citation from Āpastamba, referring to the seven sacred trees *palāśa*, *bilva*, etc. (p. 359). Of the preposition *āṅ* he illustrates 53 meanings (pp. 570-2), revealing the richness of the Sanskrit language. For the word *naigama* (p. 415) given in the sense of a citizen and a merchant, Bommagaṇṭi adds the etymological meaning, ' One who accepts the Veda as authoritative '.

Fullness of derivation, quoting the relevant *sūtra-s* of Pāṇini, is another noteworthy feature of this commentary. The word *lālasa* (eager) is derived from the root *lasa* (to embrace) with the suffix *yaṅ* and consequential changes for which several *sūtra-s* are quoted (p. 552). The derivation of *kṣīra* (milk) from *ghasḷ* is also given fully (p. 477). Four rules are quoted to explain the derivation of *stambaghna* (p. 209).

In the case of *sikatāḥ* (sand), Vāmana's *Liṅgānuśāsana* says that it should be plural, while Patañjali allows the singular as well (*kaseḥ sikatā*, *Bhāṣya*, p. 87). Bommagaṇṭi allows the singular when the word means sugar, and is derived from the root *sic*; but suggests the plural when it means a sandy bank (*sikatila*); this term *sikatāḥ* is formed by adding to the word *sikatā* the possessive suffix *aṇ* which is dropped by the *sūtra deśe lup-*.

The word *dūnaḥ* is derived from the root *ṭu du upatāpe*, with the lengthening of the vowel, and the changing of *ta* to *na* by the Vārttika *dugvordīrghaśca*. Bommagaṇṭi gives an alternative derivation from *dū upatāpe*, which is a *svādi* root. Perhaps it is to meet the criticism that in the first derivation, the Vārttika which refers to the root *du* may not apply to the root *ṭu du* (p. 143).

The term *lālāṭika* (p. 245) is explained as a servant with no initiative who looks at the forehead of his master to know, whether he is angry or pleased. Bommagaṇṭi also explains it

as indicating an incompetent person who is resigned to the idea that whatever is written on his forehead is inevitable, and does not raise a finger to do anything.

The word *kakud* (p. 352) is explained as a regular compound: *kaṃ sukhaṃ kuṃ bhūmiṃ ca dadāti* (that which gives happiness and the lordship of the earth). He also notes that the word can be *kakudaḥ* as well. Apt quotations are also given from Kālidāsa, Bhāravi and Rudra.

The subtle shades of meaning of *kaukkuṭika* (p. 243) are explained clearly. It means a pretender or one who walks slowly (pompously ?). The other meaning is 'a wandering mendicant who, like a cock, walks slowly, his vision restricted to a little space in front of him.'

Kiṃpacāna (a miser). It is derived in two ways:

(1) by adding *cānaś* to the root *paca* by *tācchīlya-* and explaining the absence of *mumāgama* by the general rule that no rule relating to augments is strict.

(2) by forming the word *pacā* by adding suffix *aṅ*, and explaining the form as *pacayā aniti.*

Purāṇa. The explanation *purā aṇyate* (narrated in bygone days) is rejected on the ground that the feminine form then will be *purāṇā*, instead of the correct form *purāṇī.* He derives it from *purātana*, dropping the augment *tuṭ* and having the consequent *ṇatva*, and depends on Pāṇini's usage (*nipātana*) *purāṇa-prokteṣu-*

Vyāla. The *Amara* statement *puṃsi* is explained as excluding only the neuter; and Kālidāsa is quoted in support of the feminine usage.

Dhiṣṇya. Since both masculine and neuter genders are in usage, the term *dhiṣṇyam* is explained as a *dvandvaikaśeṣa* compound (*dhiṣṇyaśca dhiṣṇyaṃ ca*) (p. 437).

Medura is explained by Amara as *sāndra-snigdha* (thickly unctuous). Derived from *ñi midā snehane*, it means unctuous only; Bommagaṇṭi notes Amara's suggestion that only things closely knit will be unctuous (p. 12).

Asvara (harsh voiced). Bommagaṇṭi points out that the negative particle *nañ* here does not imply total negation but only ' bad ' (*atra nañ viruddhārthaḥ*, p. 52).

Bommagaṇṭi also revels in discussing subtle points of grammar.

Nighna (dependent) is from the root *han*; since the elided *a* has *sthānivadbhāva*, *h* cannot become *gh*; to solve this problem Bommagaṇṭi says that the elided *a* will not have *sthānivadbhāva* because of the rule *ho hanteḥ*. The word *stambaghna* (p. 209) is also explained in the same way.

Gṛhayālu is from *gṛha grahaṇe* with *āluc* added by *spṛhi gṛhi-*. Bommagaṇṭi says that the *sūtra* shows that the *curādi* root *gṛhi* is meant here and not the *kryādi* (*grahi*); hence the reading *grahayālu* is wrong (p. 39).

Bommagaṇṭi discusses the correct form of the words whenever needed. He accepts the form *jaṭhara* (hard) (p. 107) and rejects *jaraṭha* accepted by Bhānujī and Svāmin; he also points out Amara's usage in the Nānārthavarga (p. 487). The use of the long form *koṭī* used by Amara is defended by referring to the exigency of metre and to the optional *ṅīṣ* sanctioned by the Gaṇasūtra *Kṛdikārād aktinaḥ* (p. 276).

The illustrations furnished by Bommagaṇṭi in explaining Amara's words are apt and telling. The example given for *śloka* (verse) from the *Rāmāyaṇa* is *mā niṣāda pratiṣṭhāṃ tvam*, etc., the first verse uttered by Vālmīki (p. 223).

In explaining *āśaṃsā* (fond hope) he gives illustrations such as '*prajāvān bhūyāsam, paśumān bhūyāsam*' (p. 550) which

have an appeal all their own with a familiar ring in the well-known prayer recited during worship. योऽपां पुष्पं वेद पुष्पवान् प्रजावान् पशुमान् भवति. The particle *ca* in the Nānārthāvyaya-varga has the meaning of *samuccaya* to illustrate which he gives the familiar and pleasing lines from the Camaka section of *Taittirīyasamhitā*, शं च मे मयश्च मे प्रियं च मे (p. 576).

For *svit* having the meaning of interrogation and doubt, it is hardly possible to find better examples than those found in the *Taittirīyasamhitā* and *Ṛgveda*. प्रश्ने यथा—कः स्विदेकाकी चरति (तै. सं. ७. ४. १८. ३); वितर्के यथा—अधः स्विदासीदुपरिस्विदासीत् (ऋग्वेदे १०. १२९. ५).

When illustrating *svāhā*, etc. in the Avyaya section he cites from the Vedic and *Śrauta* literature. अग्नये स्वाहा (तै. सं), अस्तु श्रौषट् (तै. सं.), सोमस्याग्ने वीहि वौषट् (ऐ. ब्रा.), इन्द्राय वषट् (तै. सं.).

For *hum*, expressive of contemptuous anger, the highly ironical outburst in the *Uttararāmacarita*, is given as an example.

वृद्धास्ते . . . हुं वर्तते इति भवभूतिः (उत्तर. ५. ३५) (p. 635).

His illustrative verses are not only apt in meaning but occasionally have the merit of pleasing sounds matching the word to be illustrated. Thus for *bhaṅgī* (p. 676) the citation is:

चञ्चद्द्विपञ्चीकलनादभङ्गीसंगीतमङ्गीकुरुते स्म भृङ्गी (p 676).

To illustrate the point that the word *lakṣa* (a hundred thousand) can also be in the fem. gender optionally, he gives a very fine verse:

कियती पञ्चसहस्री कियती लक्षाधिककोटिरपि कियती ।
औदार्योन्नतमनसां रत्नवती वसुमती कियती ।। (p. 709)

A distinctive feature of this commentary is the lucid and elaborate introduction to the five Varga-s of this Kāṇḍa

which Bommagaṇṭi furnishes. In the first place this Kāṇḍa is called *sāmānya* as all words in common usage are dealt with here in regard to meaning and gender in the five Varga-s. The first Varga is called Viśeṣyanighna as it deals with words whose gender and number are dependent on the nouns which they qualify. The second Varga is called 'mixed' or 'scattered' (Saṃkīrṇa) as the words explained here cannot fit in the previous Kāṇḍa-s, nor in the other sections of this Kāṇḍa, such as the first one, nor in the next one, the section on homonymous words. The third section enumerates words which have a number of meanings, beginning with words that end in *ka* (*nāka*) and ending with words that end in *ha* (*paribarha*). The fourth section contains words (*avyaya-s*) which are devoid of gender, number and case terminations. The fifth and last section gives briefly the rules for determining the gender of words in general, such as *ā*, *ī*, *ū* ending, to recognize the feminine ones.

Bommagaṇṭi gives a succinct gist of the various kinds of words dealt with in the various sections. The natue of the words in the first varga has been dealt with, they being Viśeṣya-nighna-s, beginning with words such as *sukṛti* and *puṇyavat* (fortunate) and ending with *hrasiṣṭha* (very short) and *vṛndiṣṭha* (very charming). The second varga, he says, cannot claim newness as its characteristic, as words like *jvara* (fever) *khyāti* (fame) have been mentioned before. Nor are the words exclusively of an abstract nature, as words like *upaghna* (contiguous support) and *stambaghna* (tool for cutting corn) are also mentioned. They cannot be considered as *āviṣṭaliṅga* (those words which always retain their gender in every situation) as *aparaspara* and others which are Viseṣyanighna are also given. Neither can the words here be considered as totally unconnected with those in Svargādivarga, as words like *rājaka* (assembly of kings) and *gāṇikya* (bevy of dancing

girls) are also found. Hence the name Saṃkīrṇavarga is a fitting title for this chapter; for it deals with words of a conglomerate nature अस्य च वर्गस्य संकीर्णपदाभिलक्ष्यत्वं ... संकीर्ण-संज्ञया व्यवहारः (pp. 156-7).

The third Varga is appropriately introduced by a verse which states that words and their synonyms have been set forth before and now the homonymous words are dealt with. The first objection against the composition of the Varga is that during the enumeration of synonyms a number of homonymous words have been already given. This objection is overruled by the consideration that words like *nāka* here are possessed of a number of meanings which have not been given exhaustively previously. Moreover words are of two kinds, popular and rarely used. The latter kind finds a place here, such as *kaḥ* which has various meanings such as air, Lord Brahmā, the sun, the *Ātman*, etc. Moreover a word like *nāka* is well known in the meaning of heaven and hence it is given by Amara both in the Svargādivarga and Nānārthavarga. As the same word is rarely used in the sense of the sky it is given in the latter Varga. Similarly the word *go* is in popular meaning a cow, and rare in the other meanings of an arrow, ray, etc. Again words like *sālāvṛka*, meaning a dog, wolf, monkey, etc. is not of frequent occurrence in usage and hence they are given in this Varga only. But some homonymous words like *bhānu*, *haṃsa*, etc. are popular in all their senses and hence they find a place both in the synonymous and homonymous sections.

The fourth Varga on Avyaya words (indeclinables) is treated by Bommagaṇṭi in his own particular way, as he considers that indeclinables, both synonymous and homonymous, should go together in one Varga. We have discussed this problem in the introduction to the previous volume. Suffice it to say that his view in this regard is unique, not shared by

the majority. He has treated these elaborately, adding a good number to Amara's text and also found additional meanings undreamt of in the original. These additions, both of words and meanings, are based on good authorities, the Śeṣakāra being the principal one. For instance, the first indeclinable, the particle *ā* (*āṅ*) is explained with 56 illustrations showing the different senses brought on by *ā* when added to different roots. Similarly the indeclinable *prati* is dealt with 34 illustrations (pp. 584-5). These and many others when handled by Bommagaṇṭi cannot but excite wonder in the reader of the richness of the Sanskrit language.

The fifth and final Varga is the most important contribution made by Amara for determining the gender of all words of current usage in Sanskrit . The introduction to this Varga discusses first the necessity for this Varga at all, as rules for determining gender have been given at the very beginning and in the course of the previous Varga-s. Bommagaṇṭi poses the question thus: The name of the work is *nāma-liṅga-anuśāsana*, as it deals with nouns, both synonymous and homonymous and the determination of gender by various rules. When explaining the words in the previous Varga-s, the gender too has been determined. What then is the necessity for the final Varga called 'the synopsis of gender determination, etc. (*lingādisaṃgrahavarga*)?

As it is an impossible task to enumerate individually all words of the language and state their gender, some ways of grouping words must be found and thus our purpose achieved. This has not been done before. In the Saṃkīrṇavarga, for instance, the determination of gender was confined to a few suffixes alone. But the grammatical rules on the formation of these words were not distinctly set forth. Hence the rules enunciated in the previous Varga-s are incomplete. Now the formation of words by different *kṛt* suffixes is given,

as also a few samples by way of illustration. Thus the suffix *ka* which brings no change of meaning to the basic word is mentioned in examples like *bālaka*, *śaśaka*, etc., where no change of gender also takes place. When the suffix is one which definitely pertains to the fem. gender, such suffixes as *aṅ* in *ṣidbhidādibhyo'ṅ*, *ṅīp*, etc. are added. Other suffixes based on *sūtra-s* such as 'स्त्रियां क्तिन्' 'अकारोत्तरपदो द्विगुः स्त्रियामिष्यते', 'घञन्ताः पुंसि', नपुंसके भावे क्तः' 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' etc. clearly denote the particular gender to the class of words mentioned (p. 653).

Sometimes conflict in gender is seen due to the previous and later rules. Thus *pātram* is said to be neuter in *pātrāmatraṃ ca bhājanam* (vol. I, p. 573) and in this Varga it is said that *pātra* can take all the three genders in *triṣu pātrī* (p. 744). Bommagaṇṭi's answer is that there is **no** real conflict, as what is said here is only an additional attribution of the other two genders. It is then argued that the previous mention of *pātram* as neuter is redundant as all the three genders are mentioned in the later rule. Bommagaṇṭi's answer is that the gender most commonly used is given in the other Varga-s and full and complete information is furnished here. Thus there is no real conflict at all. In other places, if there appears to be a conflict, the special rule cancels the general rule.

Homely and captivating illustrations are added by Bommagaṇṭi so as to bring home the exact concept intended by Amara. The word *channa* (screened) is paraphrased as *ācchāditasya* by Bhānujī (p. 440) and ignored by Svāmin, whereas Bommagaṇṭi gives attractive examples such as the sun screened by clouds, etc. मेघच्छन्नो दिनकरः, सिचयच्छन्नं कुचयुगम् इत्यादि (p. 138). Again he gives an illustrative meaning to the word *ārdram* (wet), such as clothes, etc. which are compact, as the water element in them has not yet evaporated

by breeze or sunshine, whereas Bhānujī merely says *klinnasya*. आतपवातादिभिरनपाकृतजलावयवसुश्लेषस्य वस्त्रादेर्नामानि (p. 147). The word *paritrāṇam* is described as वध्यघातुकयोर्मध्येऽनुप्रविश्य घातुकहस्तस्य धारणं कृत्वा यद् वध्यस्य परिरक्षणं तत् (p. 156). *Anukāraḥ* (imitation) is brought true to life when he says: परकृतचेष्टावेषभाषादिसदृशचेष्टादियोगित्वस्य नामनी (p. 186). *Pulāka* (cooked rice) is: भक्तसिक्थकं नाम स्थाल्यां पाकवशेन विक्लिन्नो महत्वमापन्नः तण्डुलपरिणाम ओदनरूपः (p. 227). *Kālikā*, the price of an article to be paid by instalments, is: वस्तुनः क्रयकालेऽस्य पण्यस्य क्रयमेतावदियता कालेन दिनक्रमेण मासक्रमेण दास्यामीति क्रायिकेण संप्रतिपद्य देयं मूल्यम् (p. 242). An appealing example from everyday life is the description of *kāca* as the special material which is the basis of bangles and rings worn by poor women: मृद्भेदस्तु दरिद्रयोषिदादिधारणीयानां वलयाङ्गुलीयकादीनां प्रकृतिभूतो मृत्तिकाविशेषः (p. 263). The description of *vālukā* (sand) is apt and unmistakable. वालुकाशब्देन शुष्कनदीमध्यगतः सर्षपादप्यल्पपरिमाणः पाषाणप्रायो मृद्विशेष उच्यते (p. 324). Words, well known but difficult to explain, are put in a clear, simple and appealing way. *Indrajāla* (magic) is: इन्द्रजालं नाम असदर्थप्रकाशनसमर्थो मन्त्रौषधादिप्रयोगः । (p. 506). *Paṭala*, an eye-defect, is: नेत्ररोगः पटलाख्यः नेत्रगोलकयोस्तिरोधायकः सूक्ष्मः श्लेष्मादिधातुविकारः (p. 508).

Misplaced enthusiasm of some admirers of Amara to justify some of his statements in the wrong way, due to insufficient grasp of the intricacies of grammar, is set right by Bommagaṇṭi by pointing out the correct way of interpretation. The word *bhrātṛvya* (p. 424) means both one's brother's son and also an enemy. One admirer[1] says that a brother's son sometimes quarrels seriously with his paternal uncle in regard to division of ancestral property and on account of the similarity of this overbearing attitude to that of an enemy, the latter is

[1] Bommagaṇṭi rarely mentions the name of the commentator when serious errors are made, out of generosity and objectivity.

called *bhrātṛvya*, a *rūḍha* sense being equivalent to the primary sense of the word. This says Bommagaṇṭi is unfair. *Bhrātṛvya* formed with the suffix *vyat* and meaning a brother's son has the circumflex accent (*svarita*), whereas the other formed of *vyan* suffix and meaning an enemy has the acute accent (*udātta*) on the first syllable and hence the two words are not identical. It is like the famous *indraśatrur vardhasva* discussed by Patañjali. भ्रातुरपत्यमिति विग्रहे 'भ्रातुर्व्यच्च' इति व्यत्प्रत्यये भ्रातृव्यः । 'व्यन् सपत्ने' इति . . . शत्रावभिधेये व्यन्प्रत्यये भ्रातृव्यः । अत्र कश्चिदाह–भ्रातृपुत्रः कदाचिद् दायहरत्वेन . . . तदनुपपन्नम् । . . . स्वरवैलक्षण्यानुपपत्तेः (pp. 425-6).

The brevity practised in some places by the other principal commentators is such that, far from elucidating Amara, only greater obscurity results. In explaining *rodasī* (heaven and earth) Svāmin says, 'that which obstructs everything is *rodaḥ*' (*ruṇaddhi sarvaṃ rodaḥ*) and Bhānujī, 'that wherein everyone cries' (*roditi sarvam asmin, asun*). Bommagaṇṭi fully elucidates this word with apt quotations from the *Ṛgveda* and *Vikramorvaśīya*. This word, he says, can be interpreted both as a *sakārānta* word, neuter in gender, as *rodasī* in the dual and as an *īkārānta* word in the feminine, expressed in the dual as *rodasyau*, the peculiarity here being that this word is always used in the dual alone. He gives the example for the former '*vedānteṣu yamāhurekapuruṣam. .*' from Kalidāsa and for the latter '*hotāram. . . rodasyoḥ*' from the *Ṛgveda* (4.3.1). He derives the word fully, the root being *rudh*, the suffix *asun* and with the explanation for the change of *dh* of the root to *d* in *rodasī*. He also adds that the word can be recognized as neuter by its very appearance (*rūpabheda*) and that the feminine form is possible by the rule '*ugitas ca*'. Finally he adds that this word may be treated as an indeclinable as well, as the authoritative *Gaṇaratnamahodadhi* sanctions it in its chapter on the indeclinables.

पृथिव्यन्तरिक्षे द्वे अपि सकृदुच्चरितेन ङीबन्तत्वेन द्विवचनान्तेन रोदसी-शब्देन, सकारान्तेन च नपुंसकलिङ्गेन . . यथा 'होतारं सत्ययजं रोदस्योः' इति (ऋग्वेदे ४. ३. १), तथा 'वेदान्तेषु यमाहुरेकपुरुषं . . . रोदसी' इति विक्रमोर्वशीये (१. १) . . . रूपभेदादेव नपुंसकत्वम् । . . . 'उगितश्च' इति ङीपि रोदस्यौ । गणरत्नमहोदधौ . . . अव्ययगणेऽभिहितम् (p. 552).

In conformity with his deep religious orthodoxy and sacerdotal learning, Bommagaṇṭi's humour, though delightful, is subdued and not boisterous like that of Malli. Vagaries of commentators in giving contradictory meanings to the same word is subtly hinted at by Bommagaṇṭi when he simply quotes them, leaving the appropriate conclusion to the reader. *Pulāka* is chaff to Sūbhuticandra, but *śyāmāka* grain to Subodhinīkāra. तुच्छधान्यं तण्डुलशून्यं पलालमिति सुभूतिचन्द्रः, . . . क्षुद्रधान्यमिति सुबोधिनीकारः (p. 227). The word *kauśika* means an owl because Indra once assumed the form of an owl. इन्द्रेण . . . उलूकवेषः परिगृहीत इति घूकोऽपि कौशिकः (p. 233). There are persons whose faith in fate is so strong and satisfying that they see no need to work at all. 'यथा ललाटे लिखितं तत्तथा न तदन्यथा' इति सर्वदा स्वललाटमेव पश्यति (p. 245). *Riṣṭa* has two diametrically opposite meanings of good and bad, and what is more, its opposite *ariṣṭa* too keeps company with it. मिथो विरुद्धशुभाशुभवचनस्य रिष्टशब्दस्य नञ्समासे सति अरिष्टशब्दस्यापि शुभाशुभवचनत्वम् (p. 275). *Nāgara* is a kind of coitus; he is not acquainted with details and may look elsewhere. सुरतकाले स्त्रीपुंसयोरवयवसंनिवेशविशेषे सुरतबन्धे नागरं नपुंसकम् । नागरलक्षणमुक्तं ग्रन्थान्तरे (p. 486). *Kevala* means 'all' for which the illustration is 'In this village all are beggars'. इह ग्रामे केवला भिक्षवः (p. 511). A double-tongued person is one, who, knowing that words need not enjoy the monopoly of a situation, uses them in one way when facing a person and another way when his back is turned! अत्र वचनस्य च द्वैविध्यं समक्षपरोक्षयोरेकरूपत्वाभावादवसेयम् (p. 406).

Bommagaṇṭi's style is simple and lucid. He is a master in adapting it to suit the subject matter. In the introduction to all the five Varga-s his style is high flown and dignified as he has to defend Amara in the choice of words in them, and has the majesty of Bāṇa's style without the use of very long compounds. Expressions like इहेदमनुसंधेयम् (p. 2); इदानीं तथाविधानि पदान्यनुक्रामति (p. 5) इत्यादिना क्षिप्रकारिणो नामान्युक्तानि ; इह तु कृतबुद्धेरिति नार्थपौनरुक्त्यम्; इदमिदानीं निरूप्यते (p. 644); लिङ्गानि जानीयात्, कथं जानीयात्? ननु . . . किमनेन . . . इत्यत आह, लक्षणं चिह्नं ज्ञापकमिति यावत् are characteristics of his style. The enthusiasm of the writer bubbles out of every one of the sentences, as the style is in conformity with the subject.

Often his style is reminiscent of the way that the Śāstrakāra-s adopt, for instance, explaining *saparyāyāḥ* in the text he says: कथं भूताः सपर्यायाः? अमरनिर्जरादिभिः . . . . पर्यायैः सहिताः । पुनः कथं भूताः? सभेदानुचराः (p. 683). Sometimes his style is distinctly that of the grammarians when he discusses some points of etymology. कषादिग्रहणं किम्? कुण्डलं बलम् . . . इत्यादौ मा भूत् । अदन्ता इति किम्? केका भूषा . . . इत्यादौ मा भूत् (p. 689). This adoption of the style so as to conform to the nature of the subject works wonders by its appealing character. Thus in a purely grammatical discussion his style is that of the *Kāśikā*: एकाच् एकस्वरं पदं च स्त्रियां भवति . . . एकाजिति किम्? ग्रामणीः, प्रतिभूः । ईदूद्विरामेति किम्? कः, स्वमिति (p. 656).

When deriving words he sees to it that only the most essential *sūtra-s* are quoted and at the same time sees that the crucial ones are not omitted or taken for granted. He has a specially appealing style when discussing the philosophy underlying the meaning of some words. ननु–अत्रापि . . . . संख्याशब्देन . . . स्यादिति चेत्, सत्यम् । तत्र . . . इति सर्वं सुस्थम् (p. 749). When explaining words denoting everyday simple things of

life, his style reflects that simplicity. When explaining terms pertaining to Śrauta sacrifices, his style has a grandeur all its own. Thus when explaining the word *upaśāyaḥ* the holy atmosphere and the picturesque setting of the Vedic scholars in a sacrificial session is presented before our vision. यज्ञेषु द्विजन्मनां . . . . (p. 208). His style is also tinged with humour when he comments on the conflicting views presented by some commentators.

Bommagaṇṭi is a scholar of profound learning. He is at home in all the subjects dealt with by Amara, whether it is Vedic learning, Śrauta ritual, the six systems of Hindu philosophy, epic grandeur, Purāṇic etymology and anecdotes, primary sciences like arithmetic and *gaṇita*, medical literature, politics of the Arthaśāstra, Alaṃkāraśāstra, and above all the artistic Kāvya-s of the classical poets.

अमरकोशः

दाक्षिणात्यव्याख्योपेतः

तृतीयकाण्डः

१. विशेष्यनिघ्नवर्गः

अथ [1]सामान्यं [2]तृतीयं [3]काण्डमारभते[4]—

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ।। १ ।।

(वि.) विशेष्यनिघ्नैरिति—[5]विशेष्यनिघ्नैर्विशिष्टैः[6] संकीर्णैरस्मिन् काण्डे काण्डान्तरे च प्रकीर्णैः नानार्थैरनेकार्थैः[7], अव्ययैरलिङ्गैः, लिङ्गादिसंग्रहैः स्त्रीलिङ्गादिलिङ्गसंग्रहैर्वाक्यैः[8] हेतुभूतैः शब्दैः सामान्ये तृतीयकाण्डे वर्गसंश्रयाः, नानार्थे कान्तखान्तादिवर्गः, अव्ययवर्गे[9] नानार्थाव्ययवर्गः[9] एकार्थतया[10] अव्ययवर्गश्च, लिङ्गसंग्रहवर्गे[11] स्त्रीलिङ्गपुंलिङ्गादिवर्गः । एतान् वर्गान् संश्रयन्त इति वर्गसंश्रयाः । एवं पञ्च वर्गाः क्रमेणोच्यन्ते ।।१।।

[1] K_5 omits. [2] तृतीयः K_5. [3] काण्डः K_5. [4] आरभ्यते J_2, K_5, Z_1. [5] J_2, K_3, K_5, Z_1 add अस्यार्थः. [6] K_3, Z_1 add विशेषैः; विशेषणैः K_5. [7] J_1, K_5 omit. [8] ° संग्रहवाक्यैः K_5. [9] ° वर्गे: K_2. [10] एकार्थाव्यय° K_2. [11] K_5 omits वर्गे.

(विव.) **सर्वज्ञं सर्वगतं भजत सदा शैलजार्धसंकीर्णम् ।**
नानार्थप्रदमव्ययमनेकलिङ्गैः प्रकाशितस्फूर्तिम् ।।

एवं काण्डद्वयेन [1]तत्तल्लोकप्रतिनियतार्थानि नामान्यनुशिष्य संप्रति साधारणं काण्डान्तरमारभमाणः प्रेक्षावत्प्रवृत्तिसिद्धये वक्ष्यमाणं संगृह्य दर्शयति [2]विशेष्यनिघ्नैरिति ।

विशेष्यनिघ्नैः—वर्गसंश्रयाः। सकललोकसाधारणार्थनिरूपणादस्य काण्डस्य सामान्यत्वम्। तथाहि—वक्ष्यमाणाः सुकृतिप्रभृतयः [3]शब्दाः प्रागुक्तमनुष्यादि-विशेषणतया साधारणाः, संकीर्णवर्गीयाः कर्मादयस्तु[4] नरसुरादिसाधारणा एव। नाकलोकादिशब्दाश्च तत्तदर्थवाचकत्वेन, आङादीन्यप्यव्ययानि तु [5]प्रागुक्ताना-मेवावध्यवधिमद्भावादिप्रतिपादकत्वेन, स्त्रियामीदूदादयस्तु तेषामेव पूर्वोक्तशब्दानां लिङ्गप्रतिपादकत्वेन—इत्येवं द्रष्टव्यम्। तत्र गुणकर्मादिभिरवच्छेद्यं यद्वस्तु तद् विशेष्यम्। तल्लिङ्गवचनायत्ते लिङ्गवचने येषां पदानां तानि विशेष्यनिघ्नानि। इह संकीर्णशब्देन यानि नामानि पूर्वस्मिन् [6]काण्डद्वयेऽपि साक्षादसंगतानि नाप्यस्मिन् काण्डे विशेष्यनिघ्नत्वादितत्तदुपाधिवैधुर्येण प्रथमतृतीयादिवर्गेष्व-संगतानि विप्रकीर्णरूपाणि तान्युच्यन्ते। यानि पदान्यनेकार्थवाचकानि तानि नानार्थानि। यानि च लिङ्गविभक्तिहीनानि शब्दरूपाणि तान्यव्ययानि। यानि च [7]प्रत्ययतदर्थाद्युपसंग्राहकमुखेन शब्दानां लिङ्गसंग्राहकवाक्यानि स्त्रियामीदूद् इत्यादीनि—आदिशब्देन लङ्काशेफालिकेत्यादीनि [8]स्वरूपतो लिङ्गसंग्राहकवा-क्यानि गृह्यन्ते—तान्युभयानि लिङ्गादिसंग्रहशब्देन उच्यन्ते। तैः[9] पञ्च-प्रकारभिन्नैः शब्दैः [10]पञ्चवर्गा इह सामान्यकाण्डे उक्ताः। पूर्वकाण्डप्रथम-श्लोकात्* मण्डूकप्लुतिन्यायेन उदिता इति पदमनुषज्यते, [11]वक्तुं समारब्धा इत्यर्थः।

इहेदमनुसंधेयम्। इह सामान्यकाण्डे श्रूयमाणसुपो लुप्तसुपश्चेति द्विविधाः शब्दाः प्रतिपादयिष्यन्ते। अत्र प्रस्तावादनन्तरम् आदौ सुबन्ता एव वक्तव्याः। ते च पर्यायरूपा नानार्थाश्चेति द्विप्रकाराः। काण्डद्वये पर्यायनिरूपणप्रस्तावाद् नानार्थेभ्यः प्राक् पर्याया एव वक्तव्याः। तत्रापि विशेष्यनिघ्नत्वरूपोपसंग्राहकक्रोडी-कृतत्वाद् विशेष्यनिघ्नपदानामतथाभूतेभ्यः प्रागुद्देशः[12] कृतः। [13]तदनन्तरं विप्र-कीर्णार्थपर्यायजातस्य, अनन्तरं श्रूयमाणसुबन्तत्वसाधर्म्याद् नानार्थशब्दानामतथा-भूतेभ्योऽव्ययेभ्यः प्राङ्निरूपणम्। [14]अनन्तरमव्ययानाम्। अनन्तरं सर्वशेषित्वात्[15] लिङ्गसंग्रहस्य इत्युद्देशक्रमनियमः। किंभूता वर्गा वर्गसंश्रया अवान्तरवर्गाणामा-श्रयभूताः। तथा हि—नानार्थवर्गे कान्तखान्तादयोऽपि बहवो वर्गाः। अव्ययवर्गे च नानार्थपर्यायभेदेन द्वौ वर्गौ। लिङ्गादिसंग्रहे [16]त्रिलिङ्गवर्गादयो बहवः। प्रथम-द्वितीययोर्वर्गयोः अवान्तरवर्गसंश्रयत्वाभावेऽपि 'बाहुल्येन व्यपदेशा भवन्ति' इति न्यायेन[17] तथात्वव्यपदेश उपपन्नः। सामान्यैः वर्गसंग्रहः इति केचित् पठन्ति। तत्र [18]प्रथमोद्दिष्टानां विशेष्यनिघ्नशब्दानां स्वरूपं तेषामौत्सर्गिकं लिङ्गमनुशास्ति ॥१॥

[1] प्रीति° for प्रति° Tv; °नियतनामानि Tj2. [2] Gm3 omits. [3] B5, Tj2 omit. [4] B6, Gm3 omit तु; B5, Tj1, Tj2 add तद्व्यापारतया. [5] B6, Gm3 add अर्थानां [6] B6, Gm3 omit द्वये. [7] प्रत्ययेन B5. [8] प्रत्येकसंदर्भ-निरूपक° B6, Gm3. [9] B5, Tj2 add अवयवस्थानीयैः... [10] अवयविस्थानीयाः B5, Tj2. [11] वदितु (गदितु Tj2) मारब्धाः B6, Gm3. [12] उपदेशः Tv [13] B5, Tv omit तद्. [14] B5 adds प्रथमतो नानार्थानाम् [15] ° शेष° B6, Gm3, Tj1. [16] स्त्रीलिङ्ग° Gm3, Tj2. [17] B5, Tj2 add छत्रिणो गच्छन्तीतिवत्. [18] अभिधित्सितानां Gm3.

* वर्गाः पृथ्वी ... इहोदिताः (२. १. १).

(पा.)　अरालकुरलावलीवलदलीकपालीमिल-
　　त्कलातरलपालिकायमललाल्यमानाननाम् ।
　वरालवरमोटिकानटनचातुरीवल्गित-
　　स्तनोपरिसरां परां नमत धेनुवागम्बिकाम् ।।
　पुराणं करिणं देवं पुरारातितनूभवम् ।
　वराकारमहं वन्दे सुराधिपनमस्कृतम् ।।

विशेष्य—संश्रयाः । सामान्ये साधारणकाण्डे विशेष्यनिघ्नादिभिः वर्ग-संश्रयाः । वर्गाः क्रियन्त इति शेषः ।। १ ।।

[1] स्त्रीदाराद्यैर्यद्विशेष्यं [1]यादृशैः प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ।। २ ।।

(वि.) स्त्रीति—अत्राद्यशब्देन कलत्रशब्दो [2]गृह्यते । यादृशैः पदैः स्त्रीदाराद्यं यद् विशेष्यं प्रस्तुतं तेन[3] गुणद्रव्यक्रियाशब्दास्तस्य तथा[4] भेदकाः स्युः । विशेष्यं विशेषयितुमिष्टं, यादृशैः [5]यद्रूपभेदादिभिः, प्रस्तुतमुपस्थितं वक्तुमिष्टम् । पदैः सुबन्तैः, गुणद्रव्यक्रियाशब्दाः [6]प्रवीणदन्तिपाठकादिशब्दाः, तथा विशेष्य-रूपधारिणः स्युः भवन्ति । तस्य विशेष्यस्य भेदका विशेषणानि । तात्पर्यार्थस्तु—यस्य विशेष्यस्य यानि विशेषणानि[7] तानि तल्लिङ्गान्येव भवन्तीत्यर्थः ।। २ ।।

[1] स्त्रीदाराद्यमिति यादृशमिति च 'विवृतौ' पाठः. [2] लक्ष्यते K2. [3] ते Z1. [4] K5 omits. [5] यादृग्° K5. [6] प्रवणदिग्धपाचकादिशब्दाः K5. [7] J1 adds उक्तानि तानि विशेषणानि.

(विव.) स्त्रीदाराद्यैः—भेदकाः। [1]इह स्त्रीशब्देन [2]योषानदीबलाकादयः सर्वेऽपि स्त्रीलिङ्गशब्दाः विवक्षिताः। पुंलिङ्गेन दारशब्देन च वृक्षप्लक्षादयः पुंलिङ्गशब्दाः सर्वेऽपि संगृहीताः। आद्यशब्देन च कलत्रमित्रादयो[3] नपुंसकलिङ्गाः[4]। तथा[5] चायमर्थः—यादृशैः यादृग्रूपलिङ्गवचनविभक्तियुक्तैः स्त्रीदारकलत्रादिभिः सुबन्तशब्दैः यद्विशेष्यं [6]कर्तृत्वकरणत्वाद्यर्थविशेषलिङ्गसंख्यावच्छिन्नमर्थस्वरूपं[7] भार्यादिकं प्रस्तुतमुपस्थापितं[8] तस्य तादृशपदोपस्थापितस्य तथाभूतविशेष्यरूपार्थस्य भेदकाः [9]गुणद्रव्यक्रियायोगोपाधिलक्षणस्वार्थद्वारेणावच्छेदकाः शब्दाः तथा स्युः। विशेष्यवाचकस्त्रीदारादिशब्दवल्लिङ्गसंख्योपाधिकरूपविशेषभाजो भवन्तीत्यर्थः। लिङ्गसंग्रहेऽपि वक्ष्यति—'गुणद्रव्यक्रियायोगोपाधयः[10] परगामिनः' (३. ५. ४४) इति। तत्र गुणयोगवचना यथा—सुकृतिनो दाराः। सुकृतिनी स्त्री। सुकृति कलत्रम् इत्यादि। द्रव्ययोगवचना यथा—धनी श्रीमान् इत्याद्याः[11]। क्रियायोगवचनास्तु चलनं कम्पनं पाचकवाचकादयः। इह गुणद्रव्यक्रियाशब्दा इत्यनेन जातिसंज्ञाव्यतिरिक्ताः शब्दा एवोक्ताः[12]। तेनाभावविशिष्टवचना निर्धननिर्गुणकाणमूकादिशब्दाश्च लिङ्गत्रयेऽप्युदाहार्याः। इह [13]ग्रन्थादौ प्रायशो रूपभेदेन[14] (१. १. ३) लिङ्गनिर्णयः परिभाषितः। तथैवात्रापि वर्गे लिङ्गनिर्णयो भूयादिति दर्शयितुं स्त्रीदाराद्यैरित्यारब्धम्[15]।

केचित्तु स्त्रीदाराद्यं यद्विशेष्यम् इति प्रथमान्तं पठन्ति। तत्र स्त्रीदारादिकमर्थरूपं यादृशैः[16] पदैः प्रस्तुतमिति व्याख्येयम्[17] ॥ २ ॥

[1] अत्र स्त्रीलिङ्गेन B5, Tj1, Tj2. [2] B5, Tj1 omit योषानदी° [3] °छत्रादयः B5, Tj1; मित्राद्याः Tj2. [4] B5, Tv add संगृह्यन्ते. [5] ततश्चायं Tj2, Tv. [6] विभक्त्यर्थ° B5, Tj2. [7] B5, Tj2 omit स्व. [8] उपस्थितं Tj1, Tj2. [9] °क्रियाशब्दाः शुक्लादिभिर्गुणैः, दण्डादिभिर्द्रव्यैः, चलनादिक्रियया B5, Tj1. [10] °उपाधिभिः B5, Tj2. [11] B5, Tj1, Tj2 add जल्पाको वाचाट इत्याद्याः. [12] विवक्षिताः Gm3, Tj1, Tj2. [13] शास्त्रे Tj2, Tv. [14] ततश्चात्रापि रूपभेदादेव लिङ्गनिर्णय इति भ्रान्तिं निराकर्तुं B5, Gm3, Tj2. [15] Tj1, Tv add इति वेदितव्यम्. [16] B5, Tj1 add स्त्रीदारादिरूपैः सुबन्तैः पदैः. [17] विज्ञेयम् Tv.

(पा.) स्त्रीदाराद्यैः—भेदकाः। [1]स्त्रीदाराद्यैतादृशशब्दैः यद् यादृशं विशेष्यं प्रस्तुतं स्यात्, तस्य विशेष्यस्य[2] गुणद्रव्यक्रियाशब्दाः तथैव विशेषकाः स्युः। [3]सुकृतिनी स्त्री, सुकृतिनो दाराः, सुकृति कलत्रम्। भुक्तमोदनम्। भुक्त ओदनः[4]।

तुङ्गा गिरितटी। तुङ्गो गिरितटः। तुङ्गं गिरितटम्[5]। प्रधानं ब्राह्मण इत्यादावाविष्टलिङ्गत्वाद् [6]विशेष्याधीनलिङ्गता न भवति। अल्पं स हन्तीत्यादौ [7]क्रियाविशेषणत्वान्नपुंसकत्वम् ।। २ ।।

[1] स्त्रीदाराद्यैर्यद्विशैः पदैः यद्विशेष्यं प्रस्तुतमभिहितम् C_1. [2] विशेषस्य A_1. [3] C_1 omits. [4] B_3 omits. [5] B_3, C_1 add इत्यादि. [6] विस्फुलिङ्गी न भवति A_1. [7] तिङ्विशेष° A_1.

सुकृती पुण्यवान् धन्यो महेच्छस्तु महाशयः।
हृदयालुः [1]सुहृदयो महोत्साहो महोद्यमः ।। ३ ।।

(वि.) सुकृतीति—सुकृतमस्यास्तीति सुकृती। पुण्यमस्यास्तीति पुण्यवान्। धने धर्मे साधुः धन्यः। सुकृतिनामानि ।। महती इच्छा अस्यास्तीति [2]महेच्छः। महानाशयोऽभिलाषो यस्य[3] सः महाशयः। अधिकेच्छावतो नामनी ।। प्रशस्तं हृदयमस्यास्तीति हृदयालुः। प्रशस्तहृदयेन सह वर्तत इति [4]सहृदयः। प्रशस्तमनसो नामनी ।। महानुत्साहो यस्येति महोत्साहः। [5]महानुद्यमो यस्येति महोद्यमः। [6]दुःसाध्यकार्योद्योगवतो नामनी ।। ३ ।।

[1] सहृदय इति पाठभेदः. [2] महेच्छुः J_2, P. [3] अस्यास्ति J_1, K_2. [4] सुहृदयः K_5; सहृदय इति विवृत्यादृतः पाठः. [5] K_2 adds महानुभावः. [6] मनःसाधनकार्येऽपि K_5; दुःसाध° K_2; °कार्येषु J_2.

(विव.) इदानीं तथाविधानि पदान्यनुक्रामति—सुकृती—धन्यः। पुण्यशीलस्य नामानि। आद्यौ व्यक्तयोगौ[1]। [2]पुरुषार्थसाधनत्वाद् [3]इह धनशब्देन पुण्यमभिप्रेतम्[4]। 'तत्र साधुः' (४. ४. ९८) इति यत्प्रत्यये धन्यः[5] ।। महेच्छस्तु महाशयः। पुरुषार्थकर्मारम्भणेच्छावतो[6] नामनी ।। हृदयालुः सहृदयः[7]। स्वच्छान्तःकरणस्य नामनी। प्रशस्तं हृदयमस्येति हृदयालुः। 'हृदयाच्चालुरन्यतरस्याम्'[8] (वा. ५.२.१२२) इति प्रशंसायामालुच्[9]। हृदयेन सह वर्तत इति सहृदयः। 'वोपसर्जनस्य' (६. ३. ८२) इति सहशब्दस्य सभावः[10] ।। महोत्साहो महोद्यमः। कृच्छ्रसाध्यार्थेऽपि उद्योगवतो नामनी। व्यक्तयोगे च ।। ३ ।।

[1] व्यक्तौ B5. [2] Tj1, Tj2 add धनस्य; धनवत्पुरुषार्थे° B5. [3] अत्र B5, Tj1, Tj2. [4] विवक्षितम् B5, Gm3, Tj2. [5] 'धनगणं लब्धा' (४.४.८४) इति यदिति भानुजीदीक्षितः (पृ. ४०७). [6] °ईहावतः Tv. [7] सुहृदयः Gm3, Tj1. [8] Gm3 adds इति वक्तव्यम्; वक्तव्येन B5, Tj1. [9] Tj1 adds प्रत्ययः. [10] B5 adds बहुव्रीहिसमासे; 'तेन सहेति...' (२. २. २८) समासः Tv; शोभनहृदयत्वेन सुहृदय इति केचित् पठन्ति B5, Tji, Tj2.

(पा.) सुकृती—धन्यः। भाग्यवतो नामानि।। 'क्षेमंकरोऽरिष्टतातिः शिवतातिः शिवंकरः (वैज. पृ. २०५, श्लो. ५५)। शुभंकरस्य नामानि।। महेच्छस्तु महाशयः। अधिकाभिप्रायस्य पुंसो[1] नामनी। 'यनमैनयच्छगलवांडु'।। अनुक्तम्[2] —'उदीर्ण उद्बलोदारावुदात्तश्च महामनाः'। उन्नतचित्तस्य नामानि।। हृदयालुः सुहृदयः। [3]प्रशस्तहृदयनामनी।। महोत्साहो महोद्यमः। [4]महद्भूतकार्यारम्भवतो नामनी।। ३।।

[1] C1 omits. [2] B3, C1 add the half-verse. [3] °हृदयस्य B3, C1. [4] C1 omits महत्.

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि।। ४।।

(वि.) प्रवीण इति—[1]प्रकृष्टा वीणास्यास्तीति प्रवीणः। निपुणति शुभकर्म करोतीति निपुणः। 'पुण कर्मणि शुभे'[2]। अभितः सर्वतः[3] सुवर्णादिपरीक्षां जानातीति अभिज्ञः। विशेषेण जानीत इति विज्ञः[4]। 'ज्ञा अवबोधने'। निष्णाति नितरां कौशलं [5]स्नाति प्रकटयतीति[6] निष्णातः। 'ष्णा शौचे'। शिक्षा संजातास्येति शिक्षितः। विज्ञानं [7]शिल्पबुद्धिः [8]प्रयोजनमस्येति वैज्ञानिकः। कृतं [9]संस्कृतं मुखं मुख्यकर्मानेनेति कृतमुखः। प्रशस्तं [10]कृतमस्यास्तीति कृती। तीक्ष्णान् कुशान् लात्युपादत्ते प्रौढिम्नेति कुशलः। 'ला आदाने'। प्रवीणनामानि।। ४।।

[1] प्रशस्ता K5. [2] शुभकर्मणि Ji, K4, P, Pt2. [3] J1 adds परीक्षां. [4] K6, P omit the word; जानाति Pt2. [5] J1 omits. [6] प्रकटयन् स्नाति J2, K5. [7] K5 omits शिल्प°. [8] विज्ञानं शिल्पं, तेन चरतीति Pt2. [9] कृतमभ्यस्तं मखमुपायोऽनेन Pt2. [10] Pt2 adds कृत्यं.

(विव.) प्रवीणे—इत्यपि। प्रवीणादयो दश लौकिके वैदिके [1]वा कर्मणि कृतबुद्धेर्नामानि। प्रकृष्टा वीणास्येति[2] योगवशात् प्रवीणशब्दो यद्यपि [3]वीणावादनशीले वर्तितुमर्हति, तथापि 'रूढिर्योगमपहरति' इति न्यायाद्, उद्गातृशब्दो यथा छन्दोगे महर्त्विजि वर्तते, न तु यस्मिन् कस्मिंश्चिद्[4] उच्चैर्गातरि, तथा बुद्धिवैशद्यसाधर्म्यात् प्रवीणशब्दोऽपि निपुणपर्यायत्वेनानुशिष्ट इत्यवधेयम्। तदुक्तम्[5]—

'निरूढलक्षणाः[6] काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्तेऽद्यतनैः[7] काश्चित् काश्चिन्नैव त्वशक्तितः॥'

इति। नितरां पुणति स्वकृतं कर्म शुभं करोतीति निपुणः। 'पुण [8]शुभकर्मणि'। [9]इगुपधलक्षणार्थः कप्रत्ययः (३. १. १३५)। अभितः साकल्येन वस्तुतत्त्वं जानातीति अभिज्ञः। विज्ञश्च[10]। नितरां कौशलं प्रकाशयन् स्नातीति निष्णातः। 'ष्णा शौचे'। 'निनदीभ्यां स्नातेः कौशले' (८. ३. ८९) इति [11]षत्वम्। अत्रापि रूढ्या योगस्यापहारो द्रष्टव्यः। शिक्षा संजातास्येति शिक्षितः। 'तदस्य संजातं...' इति इतच् (५. २. ३६)। विज्ञानं शिल्पशास्त्रं प्रयोजनमस्येति वैज्ञानिकः। [12]'तदस्य प्रयोजनम्' (५. १. १०९) इति ठञ्। कलाभिर्विद्याभिः कृतं संस्कृतं मुखमस्येति कृतमुखः। [13]कृतमनेनेति कृती। 'इष्टादिभ्यश्च' (५. २. ८८) इति इनिप्रत्ययः। कुशान् लातीति कुशलः। 'आतोऽनुपसर्गे कः' (३. २. ३)। अत्रापि कण्टकप्रचुराणां कुशानां हस्तेनादानं [14]कृतबुद्धिनैव कर्तुं शक्यत इति कुशलशब्दः प्रौढप्रज्ञे निरूढः। शूद्रवर्गे तु 'दक्षे तु चतुरपेशल...' (२. १०. १९) इत्यादिना क्षिप्रकारिणो नामान्युक्तानि। इह तु कृतबुद्धेरिति नार्थपौनरुक्त्यम्॥ ४॥

[1] च B_5, Tv. [2] Tj_1 adds प्रवीणः. [3] वीणावादे B_6; °वादके Gm_3. [4] Tj_1, Tj_2 add गायति. [5] तन्त्रवार्त्तिके (पृ. ६८३). [6, 7] निरूढा लक्षणाः, सांप्रतम् इति च मुद्रितग्रन्थे. [8] कर्मणि शुभे Tv. [9] 'इगुपधज्ञाप्रीकिरः कः'. [10] विशेषेण जानातीति Tv. [11] इति स्नातिसकारस्य मूर्धन्यादेशः B_5. [12] '"चरति" (४. ४. ८) इति ठक्' इति टीकासर्वस्वे (पृ. ३); 'तत्र नियुक्तः' (४. ४. ६९) इति ठगिति भानुजीदीक्षितः (पृ. ४०८). [13] B_5, Tj_2 add प्रशस्तं. [14] बुद्धिमतैव B_5, Tj_2; कृतिमतैव Gm_3.

(पा.) प्रवीणे—कुशल इत्यपि। [1]कार्यज्ञनामानि। अनुक्तम्— 'चतुरः कृतहस्तश्च कृतकर्मा नदीष्णवत्'[2]। एतानि चत्वारि च॥ ४॥

[1] प्रवीण° C_1. [2] 'ततो नदीष्णान् पथिकान् गिरिज्ञान्' इति भट्टिः (२. ४३) C_1.

पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः ।
दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ।। ५ ।।

(वि.) पूज्य इति—पूजामर्हतीति[1] पूज्यः [2] । यावता कालेनागच्छति तावत् प्रतीक्षणीय[3] इति प्रतीक्ष्यः[4] । 'ईक्ष दर्शने'[5] । पूज्यस्य[6] नामनी ।। संशयं प्राप्तः सांशयिकः । संशयापन्नमानसस्य[7] नाम ।। पटुत्वादिना [8]दक्षिणामर्हतीति दक्षिणीयः । दक्षिण्यश्च । दक्षिणार्हस्य नामनी ।। ५ ।।

[1] अर्हते J_2, P. [2] पूजयितुं योग्यः Pt_2. [3] Pt_2 adds विवाहयज्ञादिषु. [4] 'भक्तिः प्रतीक्ष्येषु कुलोचिता ते' इति रघुवंशे (५. १४) Pt_2. [5] दर्शनाङ्कनयोः J_2. [6] मान्यस्य K_5, J_2. [7] संशयमापन्नं संशयापन्नं मानसं यस्य सः K_5; संदेहवतो नाम K_5. [8] यागादौ ऋत्विगादीनामानतिद्वारा कर्मसाद्गुण्यार्थं तेभ्यो दीयमानं गोहिरण्यादिकं दक्षिणा Pt_2.

(विव.) पूज्यः प्रतीक्ष्यः। गुर्वादिर्मान्यस्य नामनी। पूजामर्हति पूज्यः। विवाहमहोत्सवादिषु[1] [2]संनिधानार्थं प्रतीक्षितुमर्हतीति प्रतीक्ष्यः। 'अर्हे कृत्यतृचश्च' (३. ३. १६९) इति [3]यत्। 'भक्तिः प्रतीक्ष्येषु कुलोचिता ते' इति रघुवंशे प्रयोगः (५. १४).

सांशयिकः—मानसः। संशयमापन्नं[4] संदेहयुक्तमित्यर्थः। तथाभूतं[5] मनो यस्मिन् ग्राह्ये स्थाण्वादिविषये[6] स विषयः सांशयिकः। 'संशयमापन्नः' (५.१.७३) इति ठञ्प्रत्ययः। अत्र[7] न्यासकारः—'द्वितीयाप्रकरणे पुनर्द्वितीयोच्चारणमिष्टविषये[8] यथा स्यादित्येवमर्थम्। तेन यद्यपि द्वे कर्तृकर्मणी संशयमापन्ने तथापि यद्विषये संशय उत्पद्यते तत्रैव कर्मणि स्थाण्वादिके प्रत्ययो भवति। न तु संशयस्य कर्तरि पुरुषे'[9] इति। अनभ्यासदशायां सांशयिकत्वादिति संशयकर्मण्येव उदयनाचार्यस्य[10] प्रयोगः। 'संशयकर्तुरिदं नाम' इति सुभूतिचन्द्रः। अनुष्टुप्छन्दोमध्ये 'पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः' इति नवाक्षरपादः प्रमादात् पठितः। मिश्रवृत्तप्रभेदेन[11] वा समाधेयः[12] ।।

दक्षिणीयो—इत्यपि। यागादौ ऋत्विगादीनामानतिद्वारा कर्मसाद्गुण्यार्थं तेभ्यो दीयमानं [13]गोहिरण्यादिकं दक्षिणा, तां योऽर्हति तस्य ते नामनी। तदर्हती-

त्यर्थे ‘ कडंगरदक्षिणाच्छ च ’ (५. १. ६९) इति छप्रत्यये दक्षिणीयः। चकाराद् यत्प्रत्यये दक्षिण्यः ।। ५ ।।

[1] °यज्ञादिषु Gm3, Tv. [2] B5, Tj2 add दैवादनागतश्चेद् आगमनपर्यन्तं. [3] यत्प्रत्ययः Tj2; ‘ऋहलोर्ण्यत्’ (३. १. १२४) इति भानुजीदीक्षितः (पृ. ४०८). [4] B5, Tj2 add संशयापन्नं. [5] तादृशं मानसं B5, Tj2. [6] स्थाण्वादौ Tj1, Tj2. [7] B5, Tj2 add सूत्रे. [7] अत्रापि, [8] द्वितीयान्तात्, [9] अनभिधानात् इति च मुद्रितग्रन्थे (पृ. ३५). [10] B5, Tj2 omit आचार्यस्य. [11] °प्रभेदत्वेन Gm3. [12] समाधानं कथंचिद् विधेयम् B5, Tv. [13] यद्धिरण्यादिकं दीयते सा B5, Tj2.

(पा.) पूज्यः प्रतीक्ष्यः । पूजयितुमर्हः[1] प्रतीक्ष्यः स्यात् । ‘ प्रतिपाल्यः[2] प्रतीक्ष्यः स्यात् ’। ‘प्रतिक्ष्यौ प्रतिपाल्यार्च्यौ[3]’ इति वैजयन्ती (पृ. २५५, श्लो. १७) । सांशयिकः—मानसः। संशयापन्नं मानसं यस्येति[4] संशयकर्ता सांशयिकः स्यात् । ‘ जनमाकलय्य भुवि सांशयिकम् ’ इति प्रयोगात् संशयविषये प्रत्ययविधिरिति [5]वृत्ति-कारादयः। सांशयिकः स्थाणुः ।। दक्षिणीयो—इत्यपि । दक्षिणदेयभेदे (?) स्त्रीति व्याडिः । दक्षिणाया अर्हो नरः[6] दक्षिणीयो दक्षिण्यश्च स्यात् ।। ५ ।।

[1] B3, C1 add पूजार्हः. [2] प्रतिपाद्यः A1. [3] अर्ह्यौ B3. [4] B3, C1 add व्युत्पत्त्या. [5] काशिका (२, पृ. १७) [6] C1 omits नरः.

स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे ।
जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित् ।। ६ ।।

(वि.) स्युरिति—मदीयं धनमिदमर्थिभ्यो[1] दीयतामिति [2]वदतीति वदान्यः । [1]अर्थिभ्यो दातुं स्थूलं बहुलं [3]लक्षयतीति स्थूललक्षः। ‘लक्ष दर्शनाङ्कनयोः’। स्थूललक्ष्य[4] इति वा पाठः । दाने शौण्डः [5]सक्त इति दानशौण्डः। बहु प्रददातीति बहुप्रदः। ‘डुदाञ् दाने’। [6]बहुप्रदस्य नामानि ।। चिरकालं जीवतीति जैवातृकः। ‘जीव प्राणधारणे’। [7]दीर्घमायुरस्यास्तीति आयुष्मान् । दीर्घायुषो नामनी ।। अस्य शास्त्ररूपा वाणी शिष्याणाम् अन्तश्चित्ते[8] वर्तत इति अन्तर्वाणिः[9]। शास्त्रं वेत्तीति शास्त्रवित्[10] । शास्त्रज्ञस्य[11] नामनी ।। ६ ।।

[1] अतिथिभ्यः K_5. [2] 'वद व्यक्तायां वाचि' J_1, J_2, K_2; उद्यते स्तूयत इति वदान्यः Pt_2. [3] K_2, K_3, P add पश्यति. [4] स्थूलं लक्ष्यमस्य J_2. [5] शक्तः J_2, K_2. [6] बहुद्रव्यस्य प्रदातृ° J_1. [7] अधिकं Pt_2. [8] अन्तःशरीरे Pt_2. [9] Pt_2 adds अन्तः सभामध्ये प्रसरन्ती वाणी यस्य. [10] J_1, K_4 add 'विद ज्ञाने'. [11] K_4 omits °स्य.

(विव.) स्युः—बहुप्रदे। प्रभूतद्रव्यवितरणशीलस्य नामानि। अर्थिभ्यः प्रार्थितं दीयतामिति यो वदति स वदान्यः। 'वदेरान्यः' (उ. ३. १०४) इति आन्य-प्रत्ययः। स्थूलं बहुलं देयत्वेन[2] लक्षयतीति स्थूललक्षः। '[3]शुण्डा पानभूमिः' इति द्वितीयकाण्डे[4] (२. १०. ४०) अभिहितम्। शाश्वतकोशे[5] तु 'शुण्डा कादम्बरी [6]मता' (पृ. ३०, श्लो. ३४५) इत्युक्तम्। शुण्डायां भवः शौण्डः, तत्रैवासक्त[7] इत्यर्थः। इह तु शौण्डशब्देन सामान्यतः प्रसक्तिमात्रं लक्ष्यते। दाने शौण्डः[8], दान-प्रसक्त इत्यर्थः। 'सप्तमी शौण्डैः' (२. १. ४०) इति समासः॥ जैवातृकः—आयुष्मान्। [9]चिरजीविनो नामनी। चिरकालं जीवतीति जैवातृकः। 'जीव प्राण-धारणे'। [10]'जीवेरातृकन् वृद्धिश्च' (उ. १. ८३) इति आतृकन् प्रत्ययः, धातोर्वृद्धिश्च। दीर्घमायुरस्यास्तीति आयुष्मान्॥ अन्तर्वाणिस्तु शास्त्रवित्। अन्तः सभामध्ये प्रसरन्ती वाणी वागस्येति अन्तर्वाणिः। समासान्तस्यानित्यत्वात्, 'नद्यृतश्च' (५. ४. १५३) इति कप् न भवति। 'गोस्त्रियोरुपसर्जनस्य' (१. २. ४८) इति ह्रस्वत्वम्[11]। द्वितीयो व्यक्तयोगः। [12]अभ्यस्तशास्त्रस्य नामनी॥ ६॥

[1] Tj_1, Tj_2 omit °शील. [2] देयं B_5, Tj_2. [3] 'शुण्डा पानं मदस्थानम्' इत्यस्मिन् मुद्रितग्रन्थे. [4] शूद्रवर्गे B_5, Tj_2. [5] शाश्वतेन B_6, Tj_1. [6] तथा B_5, मुद्रितग्रन्थे च. [7] Tv adds भवति. [8] Gm_3 adds दानशौण्डः. [9] चिरंजीविनः Gm_3. [10] 'जीवेरातुः' (१. ८२); 'आतृकन् वृद्धिश्च' (१. ८३) इति कौमुद्याम् (पृ. ४६८). [11] क्लेशेयं परिभाषा। महाकविप्रयोगाद् वाणिशब्दो ह्रस्वान्तोऽपि दृश्यते. [12] स्वभ्यस्त° B_5, Gm_3.

(पा.) स्युः—बहुप्रदे। बहुप्रदनामानि। स्थूललक्षशब्दो वहुव्ययेऽपि स्यात्। 'स्थूललक्षो[1] बहुव्ययी[2]' इति हलायुधः (अ. मा. २. २१०)। जैवातृकः—आयुष्मान्। दीर्घायुष्मान् जैवातृकः स्यात्॥ अन्तर्वाणिस्तु शास्त्रवित्। शास्त्रज्ञो[3]ऽन्त-

र्वाणिः स्यात्। 'शास्त्रार्थविदन्तर्वाणिः' इति वैजयन्तीकारः[4] (पृ. २०३, श्लो. ३१)। अनुक्तम्—'व्युत्पन्नः प्रहितः क्षुण्णः संस्कृतश्च समार्थकाः'। व्युत्पन्ननामानि ॥ ६ ॥

[1] °लक्ष्यः B_3. [2] बहुव्ययः B_3, C_1. [3] °विज्ञः A_1. [4] B_3 omits °कारः; 'अन्तर्वाणिस्तु शास्त्रवित्' इत्येव मुद्रितग्रन्थे.

परीक्षकः कारणिको वरदस्तु समर्धकः।
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः॥ ७॥

(वि.) परीक्षक इति—ब्राह्मणादीन्[1] परीक्षते[2] परीक्षकः। 'ईक्ष दर्शने'। परीक्षाकारणं प्रयोजनमस्येति कारणिकः[3]। यो दाने [4]पात्रज्ञानार्थं ब्राह्मणादीन् परीक्षते तस्य नामनी॥ वरं श्रेष्ठं [5]भागं पुत्रेभ्यो ददातीति वरदः। [6]'डुदाञ् दाने'। [7]समृध्नोति श्रेष्ठभागेन [8]समर्धकः। 'ऋधु वृद्धौ'। श्रेष्ठभागदस्य पित्रादेर्नामनी॥ हृष्यति सुखमनुभवतीति[9] हर्षमाणः। 'हृष तुष्टौ'। विकरोति [10]हर्षावेशात् शरीरं [11]विकारयतीति विकुर्वाणः[12]। प्रकृष्टं मनोऽस्येति प्रमनाः। हृष्टं मानसं यस्येति हृष्टमानसः। तुष्टचित्तस्य नामानि॥ ७॥

[1] °आदि J_1. [2] अवधारयति Pt_2; पात्रापात्रज्ञानार्थं J_2, K_5. [3] तत्त्वनिर्णये कारणानि वेत्ति Pt_2. [4] J_1 adds होतृ°. [5] वाञ्छितं पशुपुत्रादिकं Pt_2. [6] दाण् J_1, K_2, K_4. [7] समर्थयति समर्थकः J_1, K_2. [8] वर्धयति अभीष्टदानेन Pt_2. [9] Pt_2 adds ताच्छील्येन. [10] सुखावेशात् K_4. [11] विकारं नयति J_1, J_2, K_2, K_4. [12] J_2, Pt_2 add 'डुकृञ् करणे'.

(विव.) परीक्षकः कारणिकः। जिज्ञासितमर्थं प्रमाणमुखेन परीक्षते निर्धारयति स परीक्षकः[1]। तत्त्वनिर्णये कारणानि हेतून् वेत्तीति कारणिकः। [2]ठक्। अथवा हानोपादानहेतवो विषयगता दोषाश्च कारणानि, [3]तैर्व्यवहरतीति कारणिक[4]ः। अथ संदेहे निर्णयार्थं [5]राजाधिकृतस्य नामनी॥ वरदस्तु समर्धकः। वरं वाञ्छितं पशुपुत्रादिकं ददातीति वरदः। 'आतोऽनुपसर्गे कः' (३. २. ३)। सम्यगर्धयति याचमानं वाञ्छितेन योजयतीति समर्धकः। 'ऋधु वृद्धौ'। ण्वुल् (३. १. १३३)। इष्टार्थदायकस्य देवतादेर्नामनी॥ हर्षमाणो—हृष्टमानसः।

हृष्यति ताच्छील्येनेति हर्षमाणः। 'हृष तुष्टौ'। 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९)। विकरोति पूर्वावस्थातो विकृतो भवतीति विकुर्वाणः। पूर्ववच्चानश्। अथवा 'अकर्मकाच्च' (१. ३. ३५) इत्यात्मनेपदे[6] शानच्[7]। प्रमुदितं[8] मनो यस्य प्रमनाः[9]। हृष्टान्तःकरणस्य नामानि॥ ७॥

[1] 'ण्वुल्तृचौ' (३. १. १३३) इति ण्वुल्. [2] 'तदधीते तद्वेद' (४. २. ५९) B5. [3] B5, Gm3 add गुणाः. [4] चरति (४. ४. ८) इति ठक्. [5] राज्ञा° B6. [6] आत्मनेपदत्वे Gm3. [7] B5, Tj2 add विकुर्वाणः. [8] प्रमुदीभूतं B5. [9] Tj1 adds हृष्टं मानसमस्येति.

(पा.) परीक्षकः कारणिकः। परीक्षकनामनी॥ वरदस्तु समर्धकः[1]। तवर्गतृतीयमध्यः[2]। वरप्रदनामनी॥ हर्षमाणो—चेतनः।[3] हृष्टचित्तनामानि ॥७॥

[1] समर्द्धकः B3. [2] A1 omits °मध्यः. [3] संतुष्ट° B3.

दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः।
दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि॥ ८॥

(वि.) दुर्मना इति—[1]दुष्टं मनो यस्येति दुर्मनाः। [2]विरुद्धं मनो यस्येति विमनाः। [3]अन्तर्लीनं [4]मनो यस्येति अन्तर्मनाः। महाखेदाद् दुष्टचित्तस्य नामानि॥ उद्गतं मनो यस्येति उत्कः[5]। उन्मनाश्च। [6]सोत्कण्ठस्य नामनी॥ दक्षते परकार्यं शीघ्रं करोतीति दक्षिणः। 'दक्ष [7]वृद्धौ शीघ्रार्थे च'। सरति परेच्छामनुसरतीति सरलः। 'सृ गतौ'। उदियर्ति परकार्यं कर्तुमेतीति उदारः। 'ऋ गतौ'। परेच्छानुसारिणो नामनी॥ [8]शोभना [9]कलास्येति सुकलः। त्यागभोगकलासु[10] कुशलस्य नाम॥ ८॥

[1] दुःखितं K4, Pt2. [2] K2 omits. [3] J1, Pt2 add चिन्तावेशात्. [4] अन्तर्धीरं J1, K2, P. [5] K4 omits. [6] उत्कण्ठस्य J1. [7] प्रवृद्धौ J1, K5. [8] K5 omits 4 lines. [9] Pt2 adds त्यागभोगयोः. [10] °कलाकुशल° J1.

(विव.) दुर्मनाः—स्यात्। दुरवस्थमनस्कत्वेन दुर्मनाः। विमुखं मनो यस्येति विमनाः। अन्तरेव[1] लीनं मनो यस्येति अन्तर्मनाः। शोकरोषादिना वैमनस्य-युक्तस्य नामानि॥ उत्क उन्मनाः। प्रियदर्शनार्थमुद्गतं मनो यस्येति उत्कः। 'उत्क

उन्मनाः' इति [2]सूत्रे (५.२.८०) उच्छब्दाद् स्वार्थे कन् प्रत्यय इति काशिकाकारः। उत्कण्ठासहितस्य नामनी ।। दक्षिणे सरलोदारौ। दक्षिणे दाक्षिण्यवति परेच्छानुवर्तनशीले शब्दद्वयं स्यात्। दक्षते शीघ्रं करोतीति दक्षिणः। दक्षतेः शीघ्रार्थे औणादिक इनन्[3] प्रत्ययः (उ. २. ५२)। सरति परेच्छामनुसरतीति सरलः। 'सृ गतौ'। अलच् प्रत्ययः[4] (उ. १. १११)। उदियर्ति परकीय[5]प्रयोजनेषु इत्युदारः। 'ऋ गतिप्रापणयोः'। घञ्।। सुकलो—भोक्तरि। त्यागभोगशीलयुक्तस्य नाम। शोभना कला त्यागभोगयोर्यस्येति सुकलः।। ८।।

[1] B_5, Gm_3 add बहिरप्यावृतं. [2] इत्यत्र सूत्रे काशिका—उच्छब्दात् संसाधनक्रियावचनात् तद्वति कन् प्रत्ययो निपात्यते Tv; मुद्रितग्रन्थे च (पृ. ४५). [3] 'द्रुदक्षिभ्यामिनन्'. [4] 'वृषादिभ्यश्चित्' (उ. १. १११). [5] परक्रिया° B_6.

(पा.) दुर्मनाः—स्यात्। [1]दुष्टचित्तनामानि। उत्क उन्मनाः। उत्कण्ठितचित्तनामनी।। अनुक्तम्—'वैहासिकः केलिकीलः'। वैहासिकपुमान्[2] केलिकीलः स्यात्। 'नविंचेवांडु'। दक्षिणे सरलोदारौ। [3]दक्षिणनायकनामानि। 'जाणैनवांडु'। 'अग्राम्ये सरलोदारविदग्धच्छेकदक्षिणाः' इति वैजयन्ती (पृ २०२, श्लो. २०)। सुकलो—भोक्तरि। दाता[4] भोक्ता च यः स सुकलः स्यात्।। ८।।

[1] दून° B_3; दुःख° C_1. [2] नाम for पुमान् C_1. [3] B_3 omits नायक°. [4] B_3 adds च after दाता.

तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः।
प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः।। ९।।

(वि.) तत्पर इति—[1]तस्याभिमतवस्तुनः परोऽधीनः तत्परः। प्रसिनोति अभिमतविषये चित्तमिति प्रसितः। 'षिञ् बन्धने'। [2]इष्टवस्तुनि आसजति [3]संगच्छत इति आसक्तः। 'षञ्ज सङ्गे'। अभिमतविषयतत्परस्य नामनी।। अतिशयेनोद्योगोऽस्त्यस्येति उत्सुकः। [4]इष्टार्थे उद्युक्तस्य नाम।। स्वजनं प्रत्येतीति प्रतीतः। 'इण् गतौ'। प्रथत इति प्रथितः। 'प्रथ [5]प्रख्याने'। ख्यायत इति ख्यातः[6]। विद्यते[7] ज्ञायत इति वित्तः। 'विद ज्ञाने'। विशेषेण ज्ञायत इति विज्ञातः।

'ज्ञा अवबोधने'। विशेषेण श्रूयत[8] इति विश्रुतः। 'श्रु श्रवणे'। [9]प्रसिद्धस्य नामानि ।। ६ ।।

[1] J1, K5 omit तत्परः. [2] अभिमतविषये J1, J2, K4. [3] संगच्छति J2, K6. [4] इष्टार्थम् K5. [5] ख्यातौ J1, K4. [6] J1, K2 add 'ख्या प्रकथने'. [7] J1, K2 add अयमसाविति. [8] J2, K2, K5 add विज्ञायते. [9] J1 omits °स्य.

(विव.) तत्परे—आसक्तौ। यदभिमतं तत्रैव वस्तुनि पर एकाग्रचित्तः तत्परः। [1]तस्य नामनी। अभिमतवस्तुनि प्रकर्षेण चित्तं सिनोति[2] बध्नातीति प्रसितः। 'षिञ् बन्धने'। अभिमतविषये सितो बद्ध इति वा। आसजति क्वचिदतिशयेन सक्तो भवतीत्यासक्तः। 'षञ्ज सङ्गे'। कर्तरि क्तः (३. ४. ७२) ।। इष्टार्थे—उत्सुकः। अभिमतवस्तुन्युद्योगयुक्तः इष्टार्थोद्युक्तः[3]। उच्छब्द उद्योगार्थः। सुशब्दोऽतिशयार्थः। कशब्दः सुखवचनः। उद्योगेनातिशयितं सुखमस्येति उत्सुकः। भोजराजस्तु[4]—

'उदित्युद्योगमाचष्टे स्वित्याधिक्यमभीप्सिते।
तदस्यास्तीति मत्वर्थे कनि स्यादुत्सुको मतः।।'

इति। स्वेप्सितमर्थं प्राप्तुमयं प्रचलितावस्थ इति पूर्वस्मादस्य भेदः।। प्रतीते—विश्रुताः। गुणेन दोषेण वा येन केनचित् प्रसिद्धस्य नामानि। यथा प्रथितपराक्रमः। प्रख्यातपातकः[5]। विश्रुतचरितः इत्यादि। 'इण् गतौ' इति [6]धातोर्निष्ठायाम् इत इति रूपम्। प्रतीत्युपसर्गस्य व्याप्तिरर्थः। गत्यर्थानां ज्ञानार्थत्वात् प्रतिपुरुषम् इतः[7] ज्ञातः प्रतीतः। प्रथते प्रसिद्धो भवतीति प्रथितः। 'प्रथ प्रख्याने'। क्तः (३.४.७२)। ख्यायते सर्वैरिति ख्यातः। 'ख्या प्रकथने'। क्तः (३. २. १०२)। विद्यते ज्ञायत इति वित्तः। 'विद ज्ञाने'। क्तप्रत्ययः (३. २. १०२)। 'वित्तो भोगप्रत्यययोः' (८. २. ५८) इति निपातनसूत्रे काशिकाकारेण (२, पृ. ४१०) 'वित्तोऽयं मनुष्यः' इत्युदाहृत्य प्रतीत[8] इति व्याख्यातम्। न्यासकारेणापि (भाग २, पृ. १००१) 'प्रतीतो ज्ञात इत्यर्थः'[9] इति विवृतम्। अतश्च 'विद ज्ञाने' इति धातोर्वित्त इति निपातित इति ज्ञायते। विदेर्लाभार्थाद् वित्त इति निष्ठानत्वाभावो निपातित इति सर्वानन्दः[10] (४, पृ. ५)। 'नुदविदोन्दत्रा ...' इत्यादिसूत्रे (८. २. ५६) वार्त्तिककारोऽप्याह—

'वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते।
वित्तेर्विन्नश्च वित्तश्च भोगे[11] विन्नश्च विन्दतेः॥'

इति (काशिका २, पृ. ४१०)। विशेषेण ज्ञायते विज्ञातः। विशेषेण श्रूयते विश्रुतः॥ ६॥

[1] तत्र शब्दद्वयं स्यात् B5, Tj2. [2] Gm3 adds स्म. [3] अभिमते वस्तुनि उद्योगवान् उद्युक्तः। इष्टार्थे उद्युक्तः B5, Tj1, Tv. [4] B5, B6 add आह. [5] °पाठकः B5, Tj2. [6] B5 adds अस्मात्. [7] इतो गतोऽवगतो ज्ञात इति यावत् Tj1, Tj2. [8] प्रतीत इत्यर्थः B5, मुद्रितग्रन्थे च. [9] 'प्रतीत आख्यात इत्यर्थः' इति मुद्रितग्रन्थे. [10] 'विदिर्लाभे'। 'वित्तो भोगप्रत्यययोः' इति निपातनान्न नत्वम् इति मुद्रितग्रन्थे. [11] लाभे Gm3, Tv.

(पा.) तत्परे—आसक्तौ। [1]आसक्तनामानि॥ इष्टार्थे—उत्सुकः। इष्टार्थे उद्युक्तः उत्सुकः स्यात्॥ प्रतीते—विश्रुताः। [2]प्रसिद्धनामानि॥ ६॥

[1] तत्परनामनी B3, C1. [2] विख्यातस्य B3.

गुणैः प्रतीते तु कृतलक्षणाहृतलक्षणौ।
इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता॥ १०॥
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः।

(वि.) गुणैरिति—[1]कृताः सत्कृता लक्षणरूपा गुणा यस्य स कृतलक्षणः। आहतास्ताडिता[2] उद्घोषिता लक्षणरूपा[3] गुणा यस्य सः [4]आहतलक्षणः। [5]प्रख्यातस्य नामनी॥ [6]इभवन्नीराजनादिपूजामर्हतीति इभ्यः। आध्यायन्ति तदुपजीविन एनं स्मरन्तीति आढ्यः। 'ध्यै चिन्तायाम्'। धनमस्यास्तीति धनी। धनिनो नामानि॥ स्वमैश्वर्यमस्यास्तीति स्वामी[7]। ईष्टे[8] इतीश्वरः। ईशिता च। 'ईश ऐश्वर्ये'। पाति[9] सेवकानिति पतिः। 'पा रक्षणे'। अधि [10]सेवकानामुपरि भवतीत्यधिभूः। नयति स्वसेवकान् [11]नियुङ्क्त इति नायकः। नेता च। 'णीञ् प्रापणे'। प्रभवति समर्थो भवतीति प्रभुः। 'भू सत्तायाम्'। [12]परिबृंहति सेवकान् पोषयतीति परिवृढः। 'बृहि वृद्धौ'। अधिकं[13] पातीत्यधिपः। स्वामिनो नामानि॥ १०॥

[1] कृतमभ्यस्तं लक्षणं नाम... 'लक्षणं नामचिह्नयोः' Pt2. [2] आहतं गुणितमसकृदुच्चरितं लक्षणं Pt2. [3] °रूपगुणाः J1. [4] आहितलक्षण इति वा पाठः K5; 'इक्ष्वाकुवंश्यः... इत्याहितलक्षणोऽभूत्' (रघु. ६. ७१) Pt2. [5] K5 adds गुणैः; J1, K2 omit °स्य. [6] इभमर्हति Pt2. [7] K2, Pt2 add नान्तः. [8] Pt2 adds ताच्छील्येन. [9] K4, Pt2 add स्वानुजीविनः. [10] Pt2 omits सेवकानाम्. [11] विनियुङ्क्ते J2, Pt2. [12] परिबृंहयति K5. [13] Pt2 omits °कं.

(विव.) गुणैः—लक्षणौ। [1]त्यागशौर्यादिगुणैः प्रसिद्धस्य नामनी। कृतं मुहुरभ्यस्तं लक्षणं नामास्येति कृतलक्षणः। 'गुणिताहते' (श्लो. ८९) इत्यत्रैव वर्गे वक्ष्यति। आहता गुणिता असकृदुच्चारिता इत्यर्थः। लक्षणशब्देन च व्यावृत्तिजनकतया[2] शौर्यधैर्यादयो गुणा उक्ताः। आहितानि लक्षणान्यस्येति आहितलक्षण इति संप्रदायविदः। अन्ये त्वन्यथा व्याचक्रुः। आहितं निहितं जनमुखे स्थापितं लक्षणं गुणजातमस्येत्याहितलक्षण इति। अत्र [3]गुणैरिति पदस्यात्यन्तव्यवहितपूर्वार्धगतप्रतीतिपदेन (श्लो. ९) संबन्धे कारणाभावादव्यवहितानन्तरपठितप्रतीतपदेनाकाङ्क्षितार्थप्रतिपादकत्वाद् गुणप्रतीतिपदयोरुभयोरपि एकपदप्रायत्वेन 'त्वन्ताथादि न पूर्वभाक्' (१. १. ५) इति परिभाषया विरोधाभावो निर्वोढव्यः। 'इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत्' इति रघुवंशे प्रयोगः (६. ७१)॥ इभ्यः—धनी। बहुधनस्य नामानि। इभं गजमर्हतीति इभ्यः। 'दण्डादिभ्यो यत्' (५. १. ६६) इति यत्प्रत्ययः। आध्यायन्त्येनं सेवका इत्याढ्यः। 'ध्यै चिन्तायाम्'। पृषोदरादिः। अन्यो व्यक्तयोगः[4]॥ स्वामी—अधिपः। जीवनप्रदानादिना[5] रक्षकस्य नामानि। स्वमैश्वर्यं प्राधान्यमस्येति स्वामी। 'स्वामिन्नैश्वर्ये' (५. २. १२६) इति स्वशब्दाद् ऐश्वर्यवचनाद् मत्वर्थे आमिन्प्रत्ययो निपातितः। ईष्टे ताच्छील्येन ईश्वरः। 'ईश ऐश्वर्ये'। 'स्थेशभासपिसकसो वरच्' (३. २. १७५) इति वरच्। स्त्रियां टापि ईश्वरा[6]। 'विन्यस्तमङ्गलमहौषधिरीश्वरायाः' इति भारविप्रयोगः (किरा. ५. ३३)। सर्वानन्दस्त्वाह—' "अश्नोतेराशुकर्मणि वरट् च" (उ. ५. ५८) इति वरट् प्रत्ययः। धातोरादेरकारस्य च ईकारादेशः' (टी. स. ४, पृ. ५)। तन्मते स्त्रियां टित्वेन ङीपि ईश्वरी[7]। '[8]ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्' इति प्रयोगः (तै. आ. १०. १. १०)॥ पाति स्वानुजीविन इति पतिः। 'पातेर्डतिः' (उ. ४. ५८) इति डतिप्रत्ययः। स्त्रीलिङ्गे [9]शुचिशब्दवत्, नपुंसके वारिशब्दवद् रूपमुन्नेयम्। 'ईश ऐश्वर्ये' इत्यस्मादेव

ताच्छील्यार्थे तृन् प्रत्यये (३. २. १३५) ईशिता ।। अधि [10]स्वानुजीविनामुपरि भवतीति अधिभूः । भवतेः क्विप्[11] (३. २. १७६) ।। नयति स्वजनं प्रापयतीति नायकः । 'णीञ् प्रापणे' । ण्वुल् (३. १. १३३) ।। तृच्प्रत्यये नेता ।। इतरापेक्षया प्रकर्षेण भवतीति प्रभुः । 'विप्रसंभ्यो ड्वसंज्ञायाम्' (३. २. १८०) इति भवतेर्डुप्रत्ययः । डित्त्वेन टिलोपः ।। परिबृंहति वर्धत इति परिवृढः । [12]'बृहि वृद्धौ' । 'प्रभौ परिवृढः' (७. २. २१) इति क्तप्रत्ययः, इडागमाभावः प्रत्ययतकारस्य ढत्वं च, नकारहकारयोर्लोपश्च निपात्यते ।। अधि पातीत्यधिपः । कप्रत्ययः (३. १. १३६) ।। १० ।।

[1] °औदार्य° Tv. [2] °जनकत्वेन° B5, Tj2. [3] B5, Tv omit 5 lines. [4] धनिशब्दः । बहु धनमस्येति । इनिः (५. २. ११५). [5] B5, Tj1 omit. [6] 'पुंयोगविवक्षाभावान्न ङीष्' इति घण्टापथे मल्लिनाथः (पृ. ११०). [7] केचित्तदन्यथा व्याचक्षते—'आतो मनिन् क्वनिब्वनिपश्च' (३. २. ७४) । 'अन्येभ्योऽपि दृश्यन्ते' (३. २. ७५) इति सूत्रेण अनाकारान्तस्यापि । 'ईश ऐश्वर्ये' इत्यस्मादेव वनिप्प्रत्यये 'वनो र च' (४. १. ७) इति ङीपि रेफादेशे च ईश्वरीति B5. [8] Tv omits the line. [9] रुति° B5. [10] स्वसेवकजनस्य° B5, Gm3. [11] 'भुवः संज्ञान्तरयोः.' [12] बृहबृहि Gm3.

(पा.) गुणैः—लक्षणौ । [1]गुणप्रसिद्धनामनी ।। इभ्यः—धनी । [2]धनिनामानि । 'अर्थवानस्तिमानपि'[3] । एते द्वे च । स्वामी—अधिपः । प्रभुनामानि ।। १० ।।

[1] गुणैः C1. [2] धनिक° C1 [3] अंशुमान् B3, C1.

अधिकर्धिः समृद्धः स्यात् कुटुम्बव्यापृतस्तु यः ।। ११ ।।
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।

(वि.) अधिकर्धिरिति—अधिका ऋद्धिर्यस्येति अधिकर्धिः । सम्यग् [1]ऋद्धं यस्येति समृद्धः । समृद्धिरिति पाठे संपूर्णा ऋद्धिर्यस्येति [2]समृद्धिः । अधिकसंपन्ननामनी ।। अभि अभित [3]आगारे [4]भवः वर्तमानः [5]अभ्यागारिकः । अस्य उप समीपे रक्षणाय कुटुम्बं निधीयत इत्युपाधिः[6] । कलत्रादिपोषणे व्यापारवतो नामनी ।। ११ ।।

[1] ऋद्धिः Pt2. [2] K3, K5 add 'ऋधु वृद्धौ.' [3] अगारे K5. [4] J1 omits.
[5] अगारं भक्तिरस्येत्यागारिकः, अभि अधिकः आगारिकः Pt2. [6] उपदधाति कुटुम्बमिति, 'डुधाञ् . . .', नियतपुंलिङ्गश्च Pt2.

(विव.) अधिकर्धिः—स्यात् । अतिशयेन [1]धनधान्यसमृद्धस्य नामनी । 'ऋधु वृद्धौ' इत्यस्मात् संपूर्वान्निष्ठायां (३.४.७२) समृद्धः । कुटुम्ब—पुमानयम् । अत्र कुटुम्बशब्देन पुत्रकलत्रादिवर्ग[2] उच्यते । तत्र [3]व्यापृतः पोषणादिव्यग्रः, तस्यैते नामनी । अत्र अगारशब्दः कुटुम्बोपलक्षकः । अगारं भक्तिसेव्यमस्येति आगारिकः । भक्तिरित्यनुवृत्तौ 'अचित्तादेशकालाट्ठक्' (४. ३. ९६) इति ठक्[4] । अभ्यधिक आगारिकः अभ्यागारिकः ।। उपेत्युपसर्गः समीपवचनः । सर्वदा उप गृहसमीप एवाधीयत इत्युपाधिः । 'डुधाञ् धारणपोषणयोः' । 'उपसर्गे घोः किः' (३. ३. ९२) इति किप्रत्ययः । कित्वादाकारलोपः[5] (६. ४. ६४) । अयमुपाधिशब्दो योषिदादिविशेषणत्वेऽपि आविष्टलिङ्गत्वात् पुंलिङ्ग एवेति दर्शयितुं पुमानित्युक्तम् ।। ११ ।।

[1] °धान्यादि° B5, Tj1. [2] पोष्यवर्गः B6, Tj2. [3] B5 adds पोषणादि°
[4] ठक्प्रत्ययः B5, Tj2. [5] 'आतो लोप इटि च'.

(पा.) अधिकर्द्धिः—स्यात् । अधिकसंपद्वतो[1] नाम ।। कुटुम्व—पुमानयम् । कुटुम्बपोषणरतनामनी[2] ।। ११ ।।

[1] ऋद्धिमतः C1. [2] °निरत° B3, C1.

वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ।। १२ ।।
निर्धार्यः कार्यकर्ता यः संपन्नः सत्त्वसंपदा ।
अवाचि मूकोऽथ मनोजवसः पितृसंनिभः ।। १३ ।।

(वि.) वराङ्गेति—सिंहस्येव संहननं शरीरमस्येति [1]सिंहसंहननः । वराङ्गरूपोपेतस्य नाम ।। निर्धार्यते जनेभ्यः [2]सत्त्वसंपत्त्या [3]पृथगुपदिश्यत इति निर्धार्यः । 'धृञ् धारणे' । निर्वार्य इति वा पाठः । कार्यस्य कर्ता कार्यकर्ता । चित्तोत्कर्षसंपन्नस्य कार्यकर्तुर्नामनी ।। मूयते[4] वाक्प्रवृत्तिरस्येति मूकः । 'मूञ् बन्धने' ।

वागिन्द्रियविकलस्य नाम ।। मनोऽस्मिन् पितृबुद्धया [5]जवते धावतीति मनोजवसः । 'जु गतौ' । पितृमनोजेऽभिलाषे वसतीति वा मनोजवसः[6] । पितृसंनिभस्य नाम ।। १२-१३ ।।

[1] श्रेष्ठावयवसौन्दर्यसहितो यः पुरुषः स सिंहसंहनन इत्युच्यते Pt_2. [2] K_4, P omit. [3] °व्यपदिश्यते Pt_2. [4] बध्यते K_4, Pt_2. [5] जवति K_4, K_5; जुरिति सौत्रो धातुः K_3, P. [6] J_2, K_2 add 'वस निवासे'.

(विव.) वराङ्ग—हि सः । वरैः [1]स्वोचितसंस्थानविशेषतया [2]श्रेष्ठैरङ्गैः अवयवैः रूपेण सौन्दर्येण च यः संहितः, सिंहस्येव संहननं शरीरमस्येति कृत्वा, स सिंहसंहनन उच्यते ।। निर्धार्यः—संपदा । सत्यपि दुःखादिकारणे विकाररहितं मनः सत्त्वम् । तथाभूतया मनोवृत्त्या संपन्नो युक्त एव यः कार्यं करोति स निर्धार्यः । केचित्तु 'संपतन् सत्त्वसंपदा' इति पठन्ति । तत्रापि संपतन् संगच्छमान इत्यर्थः । निर्धार्यते सत्त्वसंपत्त्या[3] जनेभ्यः पृथगपदिश्यत[4] इति निर्धार्यः ।। अवाचि मूकः । [5]अविद्यमानं वागिन्द्रियमस्येति अवाक् । तत्र [6]मूकशब्दः । मूयते प्रतिबध्यते भाषणक्रियायामिति मूकः[7] । 'मूञ् बन्धने' ।। अथ—संनिभः । अवयवसंनिवेशसारूप्यात् गुणसाधर्म्याद् वा यः पित्रा सदृशः स पितृसंनिभः । [8]तस्येदं नाम । पितैवायमिति जनानां मनो जवतेऽस्मिन्निति मनोजवसः । जु इति सौत्रो धातुः । [9]औणादिकोऽसच्प्रत्यय इति स्वामी (पृ. २३८) ।। १२–१३ ।।

[1] स्वस्वोचित° B_5, Tj_2. [2] विशिष्टैः B_5, Tj_1. [3] संपदतिशयेन B_5. [4] °उपदिश्यते B_5, Tj_2. [5] अविद्यमाना वागस्येति B_5, Tv. [6] B_5 omits शब्दः. [7] 'मू' इति कायति, 'आतोऽनुपसर्गे कः' इति भानुजीदीक्षितः (पृ. ४१०). [8] स मनोजवस इत्युच्यते B_5, Tj_2. [9] 'औणादिकोऽसः—चमसादिवत्' इति मुद्रितग्रन्थे (पृ. २३८).

(पा.) वराङ्ग—हि सः । यः सर्वाङ्गसुन्दरः स सिंहसंहननः स्यात् ।। निर्धार्यः—संयुक्तः[1] सत्त्वसंपदा । यः सत्त्वसंपत्त्या [2]संयुक्तः सन् कार्यकर्ता स निर्धार्यः स्यात् ।। अवाचि मूकः । वागिन्द्रियविकलो मूकः स्यात् ।। अथ—पितृसंनिभः । पितृसमानः पुत्रो मनोजवसः स्यात् ।। [3]'मनोजवसं पितृसधर्माणम्' इत्यमरमालाकारः ।। अनुक्तम्—'आमुष्यायण उत्पन्नो यः [4]प्रसिद्धकुलात् पितुः' ।

प्रसिद्धकुलात् पितुरुत्पन्नः पुत्र आमुष्यायणः स्यात् ।। 'स तु स्यादर्जुनो यस्तु मातुरेकतनूभवः' । मातुरेक [5]एव सुतोऽर्जुनः स्यात् ।। १२-१३ ।।

[1] संपन्नः B3, C1. [2] B3 omits सम्. [3] 'मनोजवपितृसधर्माणः' इति नाममालेति भानुजीदीक्षितः (पृ. ४११). [4] विख्यात° A1, C1. [5] B3 omits एव.

सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।
लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु वत्सलः ।। १४ ।।

(वि.) सत्कृत्येति—कूकुं कन्यां ददातीति कूकुदः । 'डुदाञ् दाने' । कोकते महत् पुण्यमादत्त इति वा । 'कुक आदाने' । कूपद इति वा पाठः । तदा कूपं [1]सत्कृत्यालंकृतां कन्यां [2]ददातीति कूपदः । ब्राह्मविवाहकर्तुर्नाम ।। लक्ष्मीः संपदस्यास्तीति लक्ष्मीवान् । लक्ष्मणश्च । श्रियं लात्यादत्त इति श्रीलः[3] । 'ला आदाने' । श्रीरस्यास्तीति श्रीमान् । संपद्युक्तस्य नामानि ।। स्निह्यतीति स्निग्धः । 'ष्णिह् प्रीतौ' । स्नेहेन युक्तः स्निग्धो वा । वत्सः स्नेहः, [4]सोऽस्यास्तीति वत्सलः । स्नेहयुक्तस्य नामनी ।। १४ ।।

[1] संस्कृत्य J2. [2] यो ददाति सः K5. [3] श्लील इति वा पाठः Pt2. [4] J1, K2 omit सः.

(विव.) सत्कृत्य—कूकुदः । यः स्वसंपदनुसारेण वस्त्राभरणालंकृतां कन्यां कुलशीलाय वराय विधिवद् ददाति स कूकुदः स्यात् । स्मृतिरपि—'[1]कूकुरित्युच्यते कन्या तद्दाता कूकुदः स्मृतः' इति ।। लक्ष्मीवान्—श्रीमान् । एतानि धनधान्यदासीदासादिसमृद्धियुक्तस्य [2]चत्वारि नामानि । पूर्वोक्त इभ्यादिशब्दवाच्यस्तु [3]केवलधनयुक्त इत्यनयोर्भेदः । लक्ष्मीरस्यास्तीति लक्ष्मणः । 'लक्ष्म्या अच्च' (वा. ५. २. १००) इति [4]पामादिसूत्रेण (५. २. १००) लक्ष्मीशब्दात् मत्वर्थीयो नप्रत्ययः, अकारश्चान्तादेशः । श्रियं लात्यादत्ते श्रीलः । 'आतोऽनुपसर्गे कः' (३. २. ३) । सिध्मादित्वेन (५. २. ९७) वा श्रीशब्दाद् मत्वर्थीयो लच्प्रत्ययः । रलयोरभेदत्वेन श्लील इति लकारद्वयवानिति सुबोधिनी[5] । [6]कपिलकादित्वाद् (वा. ८. २. १८) रेफस्य लत्वमिति सुभूतिचन्द्रः । रेफसहितस्तु अप-

पाठः[7] ॥ स्निग्धस्तु वत्सलः । स्नेहयुक्तस्य नामनी । वयस्ये स्निग्धशब्दः [8]प्रागुक्तः (२. ८. १२) । वत्सः स्नेहोऽस्यास्तीति वत्सलः । 'वत्सांसाभ्यां कामबले' (५. २. ९८) इति लच्प्रत्ययः । अत्र सूत्रे [9]वत्सशब्दस्य कामपदेनार्थाभिधानाद् वत्सलः स्नेहवानिति [10]काशिकाकारेण (२, पृ. ४९) व्याख्यातत्वाच्च वत्सशब्दः स्नेहवचन इति गम्यते[11] ॥ १४ ॥

[1] कुकुः Gm3, Tj1.　[2] वाचकानि B5, Tv.　[3] श्लो. १०; केवलधनिकादस्य भेदः B5, Tj2.　[4] 'लोमादिपामादिपिच्छादिभ्यः शनेलचः'.　[5] Tv adds °कारः.　[6] 'कपिलकादीनां संज्ञाच्छन्दसोर्वा रो लमापद्यत इति वक्तव्यम्'.　[7] श्रीर इति.　[8] 'ष्णिह प्रीतौ', क्तः.　[9] B5, Tv add लच्प्रत्ययप्रकृतिभूतस्य.　[10] अत एव काशिका 'वत्सल इति स्नेहवानुच्यते' इति B5, मुद्रितग्रन्थे च (२, पृ. ४९).　[11] क्षत्रियवर्गे वयस्यपर्यायत्वेन स्निग्धशब्द उक्तः । अत्र तु स्नेहवन्मात्रे पित्रादावपीति न पौनरुक्तयम् B5.

(पा.) सत्कृत्य—कूकुदः । [1]अलंकारसहितां कन्यां वरं सत्कृत्य प्रदाता पिता कूकुदः स्यात् ॥ लक्ष्मीवान्—श्रीमान् । श्रीमतो नामानि ॥ स्निग्धस्तु वत्सलः । [2]वात्सल्यवतो नाम ॥ १४ ॥

[1] सालंकारकन्यकाप्रदाता B3, C1.　[2] स्नेहवतः B3, C1.

स्याद् दयालुः कारुणिकः कृपालुः सूरतः समाः ।
स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १५ ॥

(वि.) स्यादिति—दयास्यास्तीति दयालुः । दयते ताच्छील्येनेति [1]वा । [2]करुणास्यास्तीति कारुणिकः । कृपास्यास्तीति कृपालुः । कृपां लातीति वा । 'ला आदाने' । [3]सूरवत् दयालुर्महिम्ना तपति प्रकाशत इति सूरतः[4] । सुरत इति पाठे सुष्ठु रमते दययेति सुरतः । कृपावतो नामानि ॥ [5]स्वः आत्मा तन्त्रं प्रधानमस्येति स्वतन्त्रः । अपगतमावृतम् आवरणं नियामकपुरुषान्तरमस्येति अपावृतः । स्वेन स्वेच्छयैव [6]इर्यति चरतीति स्वैरी । 'ऋ गतौ' । स्वकीय एव छन्दोऽभिलाषोऽस्येति स्वच्छन्दः । निष्क्रान्तोऽवग्रहः [7]परप्रेरणमस्येति निरवग्रहः । स्वतन्त्रनामानि ॥ १५ ॥

[1] 'देङ् रक्षणे' J2, Pt2. [2] कारुण्यं Pt2. [3] सूर्यवत् K3, P; सूर्य इव Pt2. [4] K3, Pt2 add 'तप संतापे'. [5] स्वम् P, Pt2. [6] ईरितुं शीलमस्य Pt2. [7] परग्रहणं K4, P; करग्रहणं J1; अवग्रहात् Pt2.

(विव.) स्याद् दयालुः—समाः। आपन्नरक्षणेच्छया तदुपायप्रवृत्तिशीलस्य नामानि। दयते दयालुः[1]। 'स्पृहिगृहिपतिदयि[2] ...' (३. २. १५८) इत्यदिना आलुच्। [3]कारुण्यशब्दाद् 'अत इनिठनौ' (५. २. ११५) इति मत्वर्थीये ठनि 'हलस्तद्धितस्य' (६. ४. १५०) इति यकारलोपे कारुणिकः। कृपां लातीति कृपालुः। 'डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्' (वा. ३. २. १८०) इति डुप्रत्ययः। सूरः सूर्य इव तपति प्रसिद्धतया प्रकाशत इति सूरतः। 'तप संतापे'। 'अन्येष्वपि दृश्यते' (३. २. १०१) इति डः॥ स्वतन्त्रो—निरवग्रहः। [4]स्वेच्छावृत्तेर्नामानि। स्वमेव तन्त्रं प्रधानमस्येति स्वतन्त्रः। अपगतमावृतं प्रावरणं प्रतिबन्धः पुरुषान्तरकृतमस्येति अपावृतः। स्वेन स्वचित्तवशेन ईर्ते प्रवर्तत इति स्वैरी[5]। 'सुप्यजातौ णिनिः ...'[6] (३. २. ७८) इति णिनिः। 'स्वादीरेरिणोः ...'[7] (वा. ६. १. ८९) इति वृद्धिः। स्वकीय एव छन्दोऽभिप्रायः प्रवृत्तिहेतुरस्येति स्वच्छन्दः। निष्क्रान्तः पुरुषान्तरकृतोऽवग्रहः[8]प्रतिबन्धोऽस्मादिति निरवग्रहः॥१५॥

[1] Gm3, Tv add 'देङ् रक्षणे'. [2] 'निद्रातन्द्राश्रद्धाभ्य आलुच्' इत्यालुच्प्रत्ययः B5, Tj2. [3] दुर्घटेयं वृत्तिः। करुणा शीलमस्य, 'शीलम्' (४. ४. ६१) इति ठगिति सुवचत्वात्. [4] स्वतन्त्रस्य B5, Tv. [5] Tv adds 'ईर गतौ कम्पने च'. [6] ताच्छील्ये Tj1, Tj2. [7] Gm3 adds वृद्धिर्वक्तव्या. [8] प्रतिषेधः B5, Tj2.

(पा.) स्याद् दयालुः—समाः। [1]दयावतो नामानि॥ स्वतन्त्रो—निरवग्रहः। स्वाधीननामानि। 'स्वैरः स्वाधीनः स्वरुचिः [2]पथगामी निरङ्कुशः।' एतानि च॥ १५॥

[1] कारुण्यवतः B3. [2] पथागामी C1.

परतन्त्रः पराधीनः परवान् नाथवानपि।
अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ॥ १६॥

(वि.) परतन्त्र इति—[1]परः तन्त्रं प्रधानमस्येति परतन्त्रः। [2]परस्मिन् [3]अधीनः पराधीनः। परो [4]नियन्तास्येति परवान्। नाथोऽस्यास्तीति नाथवान्। [5]अध्युपरि इनः स्वामी यस्य अधीनः। नियम्यते प्रभुणा तिरस्क्रियत[6] इति निघ्नः। आयत्यते [7]एककर्मसु नियुज्यत[8] इत्यायत्तः। 'यती प्रयत्ने'। [9]स्वच्छन्दो न भवतीति अस्वच्छन्दः। गृह्यते पुरुषार्थनियोगेनेति[10] गृह्यकः । 'ग्रह उपादाने'। परतन्त्रनामानि॥ १६॥

[1] स्वस्मादन्यः Pt_2. [2] परस्य K_5. [3] गुणभूतः Pt_2. [4] नियामकः J_2, K_4. [5] अधिगतः Pt_2. [6] निहन्यते पीडयते J_1, Pt_2. [7] J_2 omits एक. [8] J_1, K_4, P omit. [9] न स्वच्छन्दः J_1, K_2. [10] °निरोधेन J_1, J_2. [11] स्वीक्रियते व्यापारेषु Pt_2.

(विव.) परतन्त्रः—गृह्यकोऽप्यसौ। परतन्त्रादयो नव [1]परायत्तवृत्तेर्नामानि। परः स्वस्मादन्यः श्रेष्ठो वा तन्त्रं प्रधानमस्येति परतन्त्रः। परस्मिन् आत्मनोऽन्यस्मिन् अधि गुणभूतः पराधीनः। 'सप्तमी शौण्डैः' (२.१.४०) इति समासः। 'अषडक्ष ...' [2]इत्यादिना (५.४.७) खः। अत्र काशिका—'अध्युत्तरपदस्तत्पुरुषः। अधिशब्दः शौण्डादिषु पठ्यते। उत्तरत्र विभाषाग्रहणात् नित्य [3]एवायं प्रत्ययः' (२, पृ. ८१)। पराधीनः परमधिकृत्य गुणीभूत इत्यर्थः। परः श्रेष्ठो नियामकोऽस्यास्तीति परवान्, नाथवानपि। अधि स्वस्योपरि इनः प्रभुरस्येति[4] अधीनः॥ निहन्यते प्रतिकूलमाचरन् बाध्यत इति निघ्नः। 'घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्' (वा. ३. ३. ५८) इति[5] घञर्थभूते कर्मणि हन्तेः कप्रत्ययः। 'गमहनजन ...' (६.४.९८) इत्यादिना हन्तेरुपधालोपः। यद्यप्यत्र लोपाजादेशस्य स्थानिवद्भावप्राप्तिरस्ति तथापि 'हो हन्तेः ...' (७.३.५४) इत्यादिसूत्रे काशिकाकारेणैव (२, पृ. ३४१) 'स्थानिवद्भावकृतं[6] यदानन्तर्यं तदविघातकं [7]वचनारम्भसामर्थ्यत्' इत्युक्तत्वाद् नकारपरतया हकारस्य कुत्वम्॥ आयत्यते नियुज्यते स्वामिनेति आयत्तः। 'यती प्रयत्ने'। 'आङित्युपसर्गः पारतन्त्र्यार्थे' इति उपसर्गवृत्तौ आयत्त इत्युदाहृतम्। न स्वः छन्दोऽस्येति अस्वच्छन्दः। गृह्यते स्वीक्रियते व्यापारेषु स्वामिनेति गृह्यः। 'पदास्वैरिबाह्यापक्ष्येषु च' (३.१.११९) इति गृहेरस्वैरिरूपार्थे क्यप्प्रत्ययः। '[8]गुणगृह्या वचने विपश्चितः'

इति भारविप्रयोगः (किरा. २. ५)। ततः[9] स्वार्थे कन्प्रत्ययः (ज्ञापित. ५. ४. ५)॥ १६॥

[1] °वृत्तौ वर्तन्ते Tv. [2] 'अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः' इति खप्रत्ययः B5. [3] नित्यश्चायं प्रत्ययः इति मुद्रितग्रन्थे (पृ. ८१). [4] B5, Tj2 add बहुव्रीहिः. [5] B5, Tv add वक्तव्येन. [6] °शास्त्रकृतमिति मुद्रितग्रन्थे. [7] Printed text omits °आरम्भ°. [8] B5, Tv omit the line. [9] ततोऽनुकम्पायां B5, Tv.

(पा.) परतन्त्रः—नाथवानपि। [1]परतन्त्रनामानि॥ अधीनो—गृह्यकोऽप्यसौ। अधीननामानि॥ १६॥

[1] स्वाधीन° A1, C1.

खलपूः स्याद् बहुकरो दीर्घसूत्रश्चिरक्रियः।
जाल्मोऽसमीक्ष्यकारी स्यात् कुण्ठो मन्दः क्रियासु यः॥ १७॥

(वि.) खलपूरिति—खलं[1] पुनाति शोधयतीति खलपूः। 'पूञ् पवने'। [2]कृष्यादिधान्यं[3] बहु करोतीति[4] बहुकरः। बहुधान्यार्जकस्य नामनी॥ दीर्घेण कालेन [5]सूत्रयते कार्यं बध्नातीति दीर्घसूत्रः। '[6]सूत्र वेष्टने'। चिरेण क्रियते कार्यमनेनेति [7]चिरक्रियः। विमृश्य कार्यं [8]कुर्वतो नामनी॥ जडति जडीभवतीति जाल्मः। 'जड [9]शून्ये'। अविमृश्य [10]कुर्वतो नाम॥ कुण्ठत्यालस्येन[11] कार्यं हन्तीति कुण्ठः। 'कुठि प्रतिघाते'। कार्येषु मन्दस्य नाम॥ १७॥

[1] J2, Pt2 add खलस्थधान्यं. [2] कृष्यादिना J2, K5. [3] धान्यसंग्रहं J1, K3, P. [4] 'डुकृञ् करणे' J1. [5] सूत्रं विचारोऽस्य Pt2. [6] 'सूत्र विमोचने', विमोचनं मोचनाभावः J2, K4, K5. [7] चिरं क्रियास्येति Pt2. [8] K4 adds क्रमेण. [9] घातने J1, K4. [10] °कारिणः J1, K5. [11] क्रियासु मन्दो भवति Pt2.

(विव.) खलपूः—करः। यः खले संमार्जनादिना निर्बुसं धान्यं राशीभावेन संगृह्णाति तस्यैते नामनी। खलं पुनातीति खलस्थं धान्यं निःशेषं [1]गृह्णाति

खलपूः।[1] 'पूञ् पवने'। क्विप् (३. २. ७६)॥ क्षेत्रसंस्कारधान्यसंग्रहणराशीकरणादिरूपाणि[2] बहूनि कर्माणि करोतीति बहुकरः। 'कियत्तद्...' इत्यादिना[3] (वा. ३. २. २१) अच्प्रत्ययः। स्त्रियां तु टापि बहुकरा॥ दीर्घसूत्रश्चिरक्रियः। [4]कर्तव्यार्थविषये विलम्बकरणशीलस्य नामनी। चिरेण[5]कालेन सूत्रयते क्रमबद्धानि कर्माणि [6]करोतीति दीर्घसूत्रः। 'सूत्र विमोचने'। चुरादिः। विमोचनं मोचनाभावो [7]ग्रथनमिति धातुवृत्तौ (पृ. ५७१)। पचादिः। चिरकालेन क्रियास्येति चिरक्रियः। चिरशब्दोऽकारान्तोऽप्यस्ति। [8]अत एव 'सायंचिरंप्राह्णे...' इति सूत्रे (४. ३. २३) काशिका— '[9]सायादयः शब्दा अनव्यया अपि' इति॥ जाल्मो—स्यात्। अविमृश्य करणशीलस्य नामनी। [10]जाल्मः पामरे व्युत्पादितः (२. १०. १६)। असमीक्ष्य गुणदोषानविमृश्य करोतीति असमीक्ष्यकारी। 'सुप्यजातौ णिनिस्ताच्छील्ये' (३. २. ७८) इति णिनिः॥ कुण्ठो—यः। क्रियामुपक्रम्य कृतविलम्बः कुण्ठ उच्यते। प्रक्रान्तं कर्म कुण्ठति आलस्येन प्रतिहन्तीति कुण्ठः[11] 'कुठि प्रतिघाते'। 'पचाद्यच्' (३. १. १३४)॥ १७॥

[1] B5, Tv add पुनाति.　[2] °राशीकरणानि Tv.　[3] 'कियत्तद्बहुषु कृञोऽज्विधानम्' B5, Gm3, Tv.　[4] अविलम्बेन कर्तव्यमप्यर्थं विलम्बेन चिरकालेन यः करोति तस्यैते नामनी Tv.　[5] चिलकालेन Tv.　[6] ग्रथ्नाति Tv.　[7] ग्रन्थनमिति मुद्रितग्रन्थे.　[8] Tv omits अत एव.　[9] 'यस्तु स्यतेरन्तकर्मणो घञि सायशब्दस्तस्येदमकारान्तत्वं प्रत्ययसन्नियोगेन निपात्यते।... चिरशब्दस्यापि मकारान्तत्वं निपात्यते' इति मुद्रितकाशिकायाम् (१, पृ. ३३७).　[10] शूद्रवर्गे B5, Tv; जालयति हिताहितज्ञानं दूरीकरोतीति जाल्मः। बाहुलकात् मः इति शब्दकल्पद्रुमकोशः (पृ. ५३३).　[11] 'मन्दस्तुन्दपरिमृज...' (२. १०. १८) इत्यादिना शूद्रवर्गे आलस्यवतो नामानुशासनं कृतम्। इह तु क्रियामुपक्रम्य कृतविलम्बस्य नामेत्यपौनरुक्त्यम् B5, Tv.

(पा.) खलपूः—करः। बहुकरः खलपूः स्यात्॥ दीर्घसूत्रश्चिरक्रियः। [1]विलम्ब्य कार्यकारिणो नामनी॥ जाल्मो—स्यात्। पूर्वमपरं चासमीक्ष्य[2] करोति यः स जाल्मः स्यात्॥ कुण्ठो—यः। [3]योऽनुद्योगाद् मन्दं मन्दं करोति स कुण्ठः स्यात्॥ १७॥

[1] विलम्बकनाम A1, C1.　[2] असमीक्ष्यकारी A1.　[3] कर्मसु मन्दः कुण्ठः स्यात् B3, C1.

कर्मक्षमोऽलंकर्मीणः क्रियावान् कर्मसूद्यतः ।
स कार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः ।। १८ ।।

(वि.) कर्मक्षम इति— [1]कर्मणे अलं समर्थो भवतीति अलंकर्मीणः । [2]कर्मणि शक्तस्य[3] नाम ।। क्रियास्यास्तीति क्रियावान् । कार्योद्युक्तस्य नाम ।। कर्मकरणं शीलमस्येति [4]कार्मः । कर्मकरणस्वभावस्य नाम ।। कर्मणि शूरः कर्मशूरः । कर्मणि [5]घटते चेष्टत इति कर्मठः । 'घट चेष्टायाम्' । कर्मणि शूरस्य नाम ।। १८ ।।

[1] कर्मसु K2, K5. [2] Pt2 adds कर्मणि क्षमः कर्मक्षमः. [3] कर्मक्षमस्य K5. [4] Pt2 adds कर्मशीलश्च. [5] मठति, 'मठ मदनिवासयोः' K5.

(विव.) कर्मक्षमोऽलंकर्मीणः । [1]यः कृषिकार्येण भारवहनादिकं कर्म कर्तुं क्षमः शक्तः स प्रारम्भात् प्राग् अलंकर्मीण इत्युच्यते । अलं कर्मणे कर्तुं समर्थ इत्यलंकर्मीणः । 'अषडक्ष...' इत्यादिना (५. ४. ७) अलंकर्मशब्दात् स्वार्थे खप्रत्ययः ।। क्रियावान्—उद्यतः । यः कर्मणि कृतोद्योगः स क्रियावान् उच्यते । क्रियास्यास्तीति । मतुप्[2] (५. २. ९४) ।। स कार्मः—यः । [3]सर्वदा यत्किंचित्करणस्वभावस्य नाम । कर्मकरणं शीलमस्येति कार्मः । 'छत्रादिभ्यो णः' (४. ४. ६२) इति णप्रत्यये 'कार्मस्ताच्छील्ये' (६. ४. १७२) इति टिलोपो निपातितः ।। कर्म—कर्मठः । यः प्रयाससहो भूत्वा कृच्छ्रसाध्यमपि[4] यागादिकं वैदिकं लौकिकं वा कर्म फलपर्यन्तं निर्वोढुं समर्थः [5]स कर्मठः । कर्मणि घटते [6]चेष्टत इति कर्मठः । 'कर्मणि घटोऽठच्' (५. २. ३५) इति कर्मशब्दात् सप्तमीसमर्थाद् अठच्प्रत्ययः[7] । 'नस्तद्धिते' (६. ४. १४४) इति टिलोपः । अनायासेन कर्मकरणसामर्थ्यात् [8]पूर्वोक्तादलंकर्मीणाद् अस्य कर्मठस्य प्रयाससहत्वेन भेदोऽगवन्तव्यः ।। १८ ।।

[1] प्रयासमन्तरेणैव चिकीर्षितं कर्म कर्तुं क्षमः B5, Tv. [2] 'तदस्यास्त्यस्मिन्निति मतुप्', 'मादुपधायाश्च मतोर्वो...' इति मतोर्व इत्यादेशः Tj2. [3] प्रारब्धकर्मनिर्वहणस्वभावयुक्तः कार्म इत्युच्यते B5, Tv. [4] Gm1, Gm2 add कर्म. [5] Gm2 omits सः. [6] चेष्टामत्यर्थं करोति Gm1, Gm2. [7] Gm1 omits प्रत्ययः. [8] पूर्वस्मात् Gm1.

(पा.) कर्मक्षमोऽलंकर्मीणः। कर्मणि [1]दक्षोऽलंकर्मीणः स्यात् ।। क्रियावान्—उद्यतः। [2]कर्मण्युद्युक्तः क्रियावान् स्यात् ।। स कार्मः—यः। क्रियाशीलः कार्मः स्यात् ।। कर्म—कर्मठः। क्रियाशूरः कर्मठः स्यात् ।। १८ ।।

[1] समर्थः C_1.　[2] कर्मसु B_3.

भरण्यभुक् कर्मकरः कर्मकारस्तु तत्क्रियः।
अपस्नातो मृतस्नात आमिषाशी तु शौष्कलः ।। १९ ।।

(वि.) भरण्यभुगिति—भरण्यं वेतनं भुङ्क्त इति भरण्यभुक्[1]। कर्मण्यभुगिति वा पाठः। परार्थं कर्म [2]करोतीति कर्मकरः। भृतिं गृहीत्वा [3]क्रियाकारिणो नामनी ।। कर्म [4]करोति वेतनं विना कर्मकारः। 'डुकृञ् करणे'। कर्मकरक्रियावतो वेतनाग्राहकस्य नाम ।। अमङ्गलस्नानेन संस्कृत इत्यपस्नातः[5]। मृते मरणे स्नातो मृतस्नातः। पुत्रादिना उपचारात् स्नापितस्य मृतस्य नामनी ।। आमिषमश्नातीति आमिषाशी। [6]शुष्कलं शुष्कमांसमत्तीति शौष्कलः। शाष्कुल इति पाठे शष्कुलीवद् दुर्जरमांसमश्नातीति शाष्कुलः। आमिषाशिनो नाम ।। १९ ।।

[1] K_3 adds 'भुज पालनाभ्यवहारयोः'.　[2] Pt_2 adds भृत्यर्थं.　[3] कर्म° J_2.
[4] कारयति K_3, J_2.　[5] अप निकृष्टं स्नातः Pt_2.　[6] शुष्काणां मांसखण्डानां समूहो शौष्कम्। तल्लाति Pt_2.

(विव.) भरण्यभुक् कर्मकरः। भरण्यशब्दो भृतिपर्यायत्वेन प्रागुक्तः (२. १०. ३८)। भरण्यं [1]भुङ्क्तेऽनुभवतीति भरण्यभुक्। यो भृतिग्रहणेन कर्म करोति, न पुनरात्मार्थं परोपकारार्थं वा, स कर्मकरः। 'कर्मणि भृतौ' (३. २. २२) इति टः। [2] 'भृतको भृतिभुक् कर्मकरः' (२. १०. १५) इति [3]शूद्रवर्गोक्तस्य कर्मकरस्येहापि पुनरभिधानं प्रागनुक्तस्य भरण्यभुग् [4]इति कथनार्थमिति कश्चित् पौनरुक्त्यं[5] परिजहार। तदनुपपन्नम्। तत्रैव भरण्यशब्दस्य भृतिपर्यायत्वेनाभिधानात्। शूद्रवर्गोक्तभृतिभुक्पदेनैव भरण्यभुगित्यस्याप्युक्तप्रायत्वात्[6]। अन्यथा वेतनभुग् इत्यादिपदानामपि वक्तव्यताप्रसङ्गः। अन्ये त्वन्यथा समादधते। कर्मकरकर्मकारशब्दयोरेकप्रकरणपाठे कृते तयोरर्थभेदः सुव्यक्तो भवतीति [7]प्रागुक्त-

स्याप्यत्र निरूपणमिति। स्वामी तु 'कर्मण्यभुक् कर्मकरः' इति पाठमाश्रित्य पौनरुक्तयदोषं परिहृतवान्[8]। तथा हि—'कर्मण्या तु विधा भृत्या' (२. १०. ३८) इति स्त्रीलिङ्गः कर्मण्याशब्द उक्तः। इदानीं कर्मण्यशब्दो [9]नपुंसकलिङ्गोऽप्यस्तीति व्याजेन दर्शयितुं कर्मण्यभुगित्युक्तमिति। अपरे तु शूद्रस्य भृतिवृत्तितया तत्प्रस्तावेन कर्मकरः [10]प्रागुक्तः। इदानीं तु क्रियावचनत्वेन[11] विशेष्यनिघ्नत्वादुच्यत[12] इत्याहुः॥ कर्मकारस्तु तत्क्रियः। यो हि भृतिमगृहीत्वैव[13] कर्मकर इव क्रियाः करोति [14]शिष्यगर्भदासादिः स कर्मकार उच्यते। 'कर्मण्यण्' (३. २. १) इत्यण्प्रत्यये कर्मकारः॥ अपस्नातो मृतस्नातः। यः पित्रादौ मृते सति कृतस्नानः सोऽपस्नातः। अपेत्युपसर्गो विरुद्धार्थः। मङ्गलस्नानविरुद्धेन स्नानेन संस्कृतोऽपस्नात इत्यर्थः। सुबोधिनीकारस्तु व्याचष्टे[15]—'यो मृतः पश्चात् पुत्रादिना संस्कारार्थं स्नातः स्नापितः सोऽपस्नात इति॥ आमिषाशी तु शौष्कलः। आमिषमश्नातीत्यामिषाशी। 'सुप्यजातौ ...' (३. २. ७८) इति णिनिः। शुष्काणां मांसखण्डानां[16] समूहः शौष्कम्। वल्लूरसंघात इत्यर्थः। तल्लाति आदत्त इति शौष्कलः। 'आतोऽनुपसर्गे कः' (३. २. ३)। यो हि यत्र प्रियो भवति स तद्वस्तु चूतफलरसादिकं [17]दुर्लभमिति मत्वा शुष्कं विधाय कालान्तरे भक्षयति तद्वन्मांसप्रियोऽपि कश्चित् वल्लूराणि संगृह्य भक्षयतीति शौष्कल इत्युक्तः[18]। सुबोधिनीकारस्तु शाष्कुल इति पठित्वा व्याचष्ट। शष्कुलीशब्दोऽत्र दुर्जरत्वगुणयोगाद् आमिषे वर्तते। तमश्नातीत्यर्थे 'प्राग्दीव्यतोऽण्' (४. १. ८३) इति अण्प्रत्यये शाष्कुल इति॥ १६॥

[1] वृत्तिं करोति Gm1, Gm2. [2] शूद्रवर्गे Gm1. [3] अनेनैवोक्तस्य Gm1. [4] Gm1 adds पदस्य. [5] पौनरुक्तयदोषं B5, Gm2. [6] अस्यापि संगृहीतत्वात् B5, B6. [7] Gm1, Tv add कर्मकरशब्दस्य. [8] समाधात् B5; समाधानात् Gm2. [9] नपुंसके B6, Gm1. [10] प्राग्दर्शितः Gm1, Tv. [11] °वचनेन Gm1, Tv. [12] उक्तः B5, Tv. [13] °ग्रहणाभावात् Gm1, Tv. [14] शिष्यवर्ग° Tj2. [15] आह Gm1, Tv. [16] मांसानां Gm2, Tv. [17] Gm1 adds कालान्तरे. [18] उच्यते B6, Tv.

(पा.) [1]भरण्यभुक्— तत्क्रियः। मूल्योपाधिकर्मकर्ता कर्मकरः स्यात्। निरुपाधिककर्मकर्ता कर्मकारः स्यात्॥ अनुक्तम्—'उत्तालः कर्मसु व्यग्रः'।

कर्मसु [2]व्यग्रः उत्तालः स्यात् । 'विस्रब्धः कर्मणि स्थिरः ।' कर्मणि स्थिरो विस्रब्धः स्यात् ।। अपस्नातो मृतस्नातः । मृतानां स्नातः अपस्नातः । अपस्नातो देवदत्तः । अपस्नातं देवदत्तेन[3] ।। आमिषाशी तु शौष्कलः । मांसभोजी शौष्कलः स्यात् ।। १९ ।।

[1] भरण्यभृत् C_1.　[2] द्रुतः B_3.　[3] A_1 adds अपस्नानं देवदत्तस्य.

बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः ।
परान्नः परपिण्डादो भक्षको घस्मरोऽद्मरः ।। २० ।।

(वि.) बुभुक्षित इति—बुभुक्षा संजातास्येति बुभुक्षितः। क्षुध्यतीति क्षुधितः, क्षुदस्य संजाता वा। 'क्षुध बुभुक्षायाम्'। अत्तुमिच्छुः जिघत्सुः। 'अद भक्षणे'। अशनाया संजातास्येति अशनायितः। अशनमात्मन इच्छतीति वा। भोजनेच्छावतो नामानि ।। [1]परस्मादेवान्नं भोजनमस्यास्तीति परान्नः। परपिण्डं [2]परान्नमत्तीति परपिण्डादः । 'अद भक्षणे'। सर्वदा परान्नभोक्तुर्नामनी ।। सर्वमपि भक्षयतीति भक्षकः[3] । 'भक्ष अदने'। घसति ताच्छील्येनेति घस्मरः[4] । 'घस्लृ अदने'। अत्ति ताच्छील्येनेत्यद्मरः[5] । भक्षणस्वभावस्य नामानि ।। २० ।।

[1] परस्यान्नमस्येति J_2, Pt_2.　[2] परस्मादन्नपिण्डं J_1, K_3.　[3] भक्षयत्यधिकं J_1, Pt_2; अतिभक्षयति K_2.　[4] घसनशीलः K_3, K_5.　[5] अदनशीलः, 'अद भक्षणे' J_1, K_3, K_5.

(विव.) बुभुक्षितः—अशनायितः । भोजनेच्छावतो नामानि । अशनाया-बुभुक्षाशब्दौ वैश्यवर्गे व्युत्पादितौ (२. ९. ५४) । ताभ्यां 'तदस्य संजातम्' (५. २. ३६) इत्यर्थे तारकादित्वाद् इतच्प्रत्यये अशनायितः, बुभुक्षितः ।। [1]क्षुध्यतीति क्षुधितः । 'क्षुध बुभुक्षायाम्'। [2]कर्तरि क्तः (३. ४. ७२) । 'वसतिक्षुधोरिट्' (७. २. ५२) इति निष्ठायामिडागमः ।। अत्तुमिच्छुः जिघत्सुः । 'अद भक्षणे'। इच्छायां सनि[3] घस्लादेशे च तदन्तात् ताच्छील्ये 'सनाशंसभिक्ष उः' (३. २ १६८) इत्युप्रत्ययः ।। परान्नः परपिण्डादः । यः सर्वदा परकीयमेवान्नमश्नाति स्वगृहे तु प्रायेण न भुङ्क्ते[4] , तस्य नामनी । परान्नमत्तीति विग्रहे प्रातिपदिकाद् धात्वर्थे णिचि 'पचाद्यचि' (३ १. १३४) परान्नः । परस्यान्नमस्येति व्यधिकरणो बहुव्रीहिः ।। परस्मात् लब्धमेव पिण्डमन्नमत्तीति[5] परपिण्डादः । 'कर्मण्यण्'

(३. २. १) ।। भक्षको—अद्मरः । यः प्रायेण [6]शष्कुलिकुल्माषफलादिभक्षणस्वभावो[7] भवति तस्य नामानि । भक्षयतीति भक्षकः[8] । ण्वुल् (३. १. १३३) ।। घसति ताच्छील्येन घस्मरः । 'घस्लृ अदने' । 'सृघस्यदः क्मरच्' (३. २. १६०) इति क्मरच् ।। अदनशीलोऽद्मरः[9] । पूर्वसूत्रेण[10] क्मरच् ।। २० ।।

[1] क्षुध्यत इति Gm1. [2] 'गत्यर्थाकर्मकेति' Gm3. [3] 'लुङ्सनोर्घस्लृ'. [4] Gm1 adds स परान्नः. [5] B5 adds अश्नाति. [6] अपूर्व° Tv; अपूप° B5. [7] °भक्षणशीले भक्षकादित्रयम् Tj1, Tv; °शीलः Gm1. [8] Tv adds 'भक्ष अदने.' [9] B5, B6 add अपि. [10] पूर्ववत् B5.

(पा.) बुभुक्षितः—अशनायितः । [1]भोक्तुमिच्छावतो नामानि ।। परान्नः परपिण्डादः । परैः सततदत्तान्नस्य [2]पुंसो नामनी । 'कूपिकापरिवांडु' ।। भक्षको —अद्मरः[3] । [4]सर्वभक्षकनामानि । 'तिंडिपोतु' ।। २० ।।

[1] क्षुधितस्य B3, C1. [2] B3 omits पुंसः. [3] चर्वरो . . . इति पाठान्तरम् A1. [4] A1 adds उत्पन्न°.

आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ।
उभौ त्वात्मंभरिः कुक्षिभरिः स्वोदरपूरके ।। २१ ।।

(वि.) आद्यून इति—आ ईषद् दीव्यति क्रीडत्यन्यत्रासक्तत्वाद् आद्यूनः । 'दिवु [1]क्रीडादौ' । उदरे आसक्तः[2] औदरिकः । उदरासक्तत्वाद् [3]अनुद्योगवतो नामनी ।। आत्मानं [4]स्वदेहमेव बिभर्ति [5]पोषयतीति आत्मंभरिः । स्वकुक्षिमेव बिभर्तीति[6] कुक्षिंभरिः । 'डुभृञ् धारणपोषणयोः' । भृत्यपोषणं विनैव स्वकीयोदर-[7]पूरकस्य नामनी[8] ।। २१ ।।

[1] क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु K3, P. [2] प्रसितः J1. [3] अनुत्साहस्य K5. [4] स्वमेव J2, Pt2. [5] K4 omits पोषयति. [6] K4 adds पोषयति. [7] °पोषकस्य J2. [8] Pt2 adds स्वोदरमेव पूरयतीति स्वोदरपूरकः.

(विव.) आद्यूनः—विवर्जिते । ऐहिकामुष्मिकोपयोगिव्यापारपरित्यागेन[1] यथाकथंचित् स्वोदरपूरणमात्रपरितुष्टस्य नामनी । आदीव्यति ईषत्क्रीडत्यन्यत्रा-सक्तत्वादिति आद्यूनः । 'दिवु [2]क्रीडादौ' । क्तप्रत्ययः (३. ४. ७२) । 'च्छ्वोः

शूडनुनासिके च' (६. ४. १९) इति वकारस्य ऊडादेशे, इकारस्य यणादेशः (६. १. ७७)। 'दिवोऽविजिगीषायाम्' (८. २. ४९) इत्यविजिगीषाविषयत्वाद् निष्ठातकारस्य नत्वम् ।। उदरे प्रसित औदरिकः। प्रसित इत्यनुवृत्तौ[3] 'उदराट्ठगाद्यूने' (५. २. ६७) इति ठक् प्रत्ययः ।। उभौ—पूरके। [4]कलत्रादिकमुपेक्ष्य [5]स्वोदरपूरणमात्रनिरतस्य नामनी। आत्मानं स्वमेव बिभर्तीत्यात्मंभरिः। 'फलेग्रहिरात्मंभरिश्च' (३. २. २६) इति निपात्यते। [6]अत्र सूत्रे चकारेण उपपदस्य मुमागमे भृञ इन्प्रत्यये कुक्षिंभरिशब्दः[7] ।। २१ ।।

[1] व्यापारं परित्यज्य यः केवलमुदरपूरण (पोषण Gm1) मात्रपरितुष्टस्तस्यैते नामनी B5, Tv. [2] Tv gives the full *Sūtra*. [3] B5, Gm1 add उदरशब्दात् सप्तमीसमर्थात्. [4] Gm1, Tv add पोष्यजनं. [5] स्वोदरमेव पूरयति तस्यैते नामनी Gm1, Tv. [6] 'आत्मशब्दस्य उपपदस्य मुमागम इन् प्रत्ययश्च भृञो निपात्यते। अनुक्तसमुच्चयार्थश्चकारः। कुक्षिंभरिः। उदरंभरिः।' काशिका (१, पृ. १७९). [7] B6, Gm1, Tv add साधुरित्युक्तः.

(पा.) आद्यूनः—विवर्जिते। पौरुषशून्यस्य[1] नामानि ।। उभौ—पूरके। स्वकीयोदरमात्रपूरणे[2] निरतस्य नामानि। 'आत्मोदरकुक्षिषु भृञः खिः' (४. ३. २९) इति कातन्त्रसूत्राद् उदरंभरिरपि स्यात् ।। २१ ।।

[1] क्षुधयातिपीडितस्य A1. [2] स्वोदरपूरणमात्रे B3.

सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः।
लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभौ ।। २२ ।।

(वि.) सर्वान्नीन इति—[1]सर्वमन्नं [2]भक्षयतीति सर्वान्नीनः। [3]सर्वान्नभोक्तुर्नाम। गृध्यति भृशमभिकाङ्क्षतीति[4] गृध्नुः। गर्धनश्च। 'गृधु अभिकाङ्क्षायाम्'। विषयेषु सस्पृहस्य नामनी ।। लुभ्यति भृशमभिकाङ्क्षतीति लुब्धः। 'लुभ गार्ध्ये'। भृशमभिलषतीति[4] अभिलाषुकः। 'लष कान्तौ'। तृष्णातुल्या इच्छास्यास्तीति [5]तृष्णक्। जान्तः। विषयेऽत्यन्तसस्पृहस्य[6] नामनी ।। भृशं लोलुप्यते [7]विमुह्यतीति लोलुपः। 'लुप विमोहने'। भृशं लोलुभ्यते गृध्यतीति लोलुभः। 'लुभ गार्ध्ये'। [7]विषयलम्पटवतो नामनी ।। २२ ।।

[1] सर्वान्नं J1, Pt2. [2] भुङ्क्ते K3, K5. [3] Pt2 adds सर्वान्नं भुङ्क्ते सर्वान्नभोजी. [4] ताच्छील्येन Pt2. [5] तृष्यति ताच्छील्येनेति Pt2. [6] सुखस्पर्शस्य K5. [7] J1, Pt2 add विषये.

(विव.) सर्वान्नीनः—[1]भोजी । [2]यः सर्वेषां वर्णानां संबन्धि मृष्टममृष्टं वा उष्णमनुष्णं वा भिक्षाटनेन लब्धं सर्वमन्नं भक्षयति स सर्वान्नीनः । 'अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु' (५. २. ९) इति [3]खप्रत्ययः ।। गृध्नुस्तु—तृष्णक् । गृध्यतीति गृध्नुः । 'गृधु अभिकाङ्क्षायाम्' । दिवादिः । 'त्रसिगृधिधृषिक्षिपेः क्नुः' (३. २. १४०) इति [4]क्नुप्रत्ययः ।। 'जुचङ्क्रम्यदन्द्रम्यसृगृधि . . .' इत्यादिना (३. २. १५०) युचि गर्धनः ।। लुभ्यतीति लुब्धः । 'लुभ गार्ध्ये' । दिवादिः । 'गार्ध्यमभिकाङ्क्षा'[5] इति धातुवृत्तिः (पृ. ४४१) । कर्तरि क्तः ।। अभिलषतीत्यभिलाषुकः । 'लष कान्तौ' । कान्तिरिच्छा । 'लषपतपदस्था . . .' इत्यादिना (३. २. १५४) उकञ् ।। तृष्यतीति तृष्णक् । 'ञितृषा पिपासायाम्' । दिवादिः । पिपासाशब्देन इच्छामात्रं लक्ष्यते । 'स्वपितृषोर्नजिङ्' (३. २. १७२) । ङित्त्वाद्[6] गुणाभावः । [7]णत्वकुत्वे च । पञ्चापि लोभाख्यगुणयुक्तस्य नामानि । [8]केचित्तु—आद्यं द्वयं परद्रव्यविषयेच्छायुक्ते, लुब्धादित्रयं तु [9]यत्किंचिन्मात्रविषयेच्छायुक्त इत्याहुः ।। समौ—लोलुभौ । तृष्णातिशययुक्तस्य नामनी । लोलुप्यते भृशं [10]मुह्यतीति लोलुपः । 'लुप विमोहने' । लोलुभ्यते भृशमभिकाङ्क्षतीति लोलुभः । 'लुभ गार्ध्ये' । अत्रोभयत्रापि उभाभ्यां धातुभ्यां 'धातोरेकाचो हलादेः . . .' इत्यादिना (३. १. २२) यङ्प्रत्ययः[11] । तदन्तात् पचाद्यचि 'यङोऽचि च' (२. ४. ७४) इति यङो लुक् । 'न धातुलोप . . .'[12] इत्यादिना (१. १. ४) गुणप्रतिषेधः ।। २२ ।।

[1] Gm1 omits 4 lines. [2] यदन्नं . . . तत्सर्वं B5, Tv. [3] सर्वान्नशब्दात् खप्रत्ययः । द्वितीयो व्यक्तयोगः B6, Tv. [4] Gm1 omits प्रत्ययः. [5] आकाङ्क्षा इति मुद्रितमाधवीयधातुवृत्तौ (पृ. ४४२). [6] १. १. ५. [7] ८. ४. १; ८. २. ३०. [8] अन्ये तु B5, Gm1. [9] Gm1 omits °मात्र°. [10] विमुह्यति Gm1, Tv. [11] 'लुपसद . . .' (३. १. २४) इति यङन्तादजिति भानुजीदीक्षितः (पृ. ४१३). [12] Gm1, adds आर्धधातुके.

(पा.) सर्वान्नीनः—भोजी । सर्वेषामन्नभोजी सर्वप्रकारान्नभोजी च यः स सर्वान्नीनः स्यात् ।। गृध्नुस्तु—तृष्णक् । तृषिधातोर्नजिङि[1] तृष्णक्[2] । जान्तत्वात्

तृष्णजौ तृष्णज इत्यादि । लुब्धनामानि ।। समौ––लोलुभौ । लम्पटनामनी । 'लोलुपं लोलुभं लोलं लम्पटं लालसं विदुः' इति हलायुधः (२. १९८) ।। २२ ।।

[1] B3 adds 'स्वपितृषोर्नजिङ्' (३. २. १७२) इति नजिङ्प्रत्ययः. [2] A1 adds तृषिधातोः 'तत् करोति' (वा. ३. १. २६) इति ण्यन्ताद् ण्वुलि तृष्णक इति अजन्तोऽपि स्यात्.

सोन्मादस्तून्मदिष्णुः स्यादविनीतः समुद्धतः ।
मत्ते शौण्डोत्कटक्षीबाः कामुके कमितानुकः ।। २३ ।।
कम्रः कामयिताभीकः कमनः कामनोऽभिकः ।

(वि.) सोन्माद इति––उन्मादेन सह [1]वर्तत इति सोन्मादः । सून्माद इति वा पाठः। उन्मदश्च। [2]उन्माद्यति ताच्छील्येनेति उन्मदिष्णुः । 'मदी हर्षग्लपनयोः'।[3] भूतावेशादिकृतचित्तविभ्रमस्य नामनी ।। न [4]विनीतोऽशिक्षितोऽविनीतः । समुद्धन्यते सर्वैरपि ताड्यत इति समुद्धतः । 'हन हिंसागत्योः' । अशिक्षितस्य नामनी ।। [5]माद्यतीति मत्तः । 'मदी हर्षे' । [6]शुण्डा सुरा मदहेतुत्वेनास्यास्तीति शौण्डः । उत्क्रान्तः कटिवसनादिति [7]उत्कटः । क्षीबते माद्यतीति क्षीबः । 'क्षीबृ मदे' । सुरापानमत्तस्य नामानि ।। कामयते परस्त्रियमिति[8] कामुकः । 'कमु कान्तौ' । कमिता च । अनु कामयत इत्यनुकः । कम्रः । कामयिता च । अभिकामयते अभीकः, अभिकश्च । कमनः कामनश्च । 'कमु कान्तौ' । कामुकनामानि ।। २३ ।।

[1] सहितः J2, Pt2. [2] उन्मादशीलः Pt2. [3] ग्लेपनयोः Pt2. [4] विनीतो न भवतीति K4. [5] K5 omits 3 lines. [6] शुण्डा पानागारं सुरा वा Pt2. [7] उद्भूतः प्रकाशितः कटः श्रोणिभागोऽस्य Pt2. [8] अपि for इति K5.

(विव.) सोन्मादः––स्यात् । भूतावेशकृतचित्तविभ्रमस्य नामनी । उन्मादेन सह वर्तत इति सोन्मादः । उन्माद्यति ताच्छील्येनेति उन्मदिष्णुः । 'अलंकृञ् निराकृञ्...' इत्यादिना (३. २. १३६) 'मदी हर्षग्लेपनयोः' इत्यस्मादुत्पूर्वाद् इष्णुच् । 'उन्मत्त उन्मादवति' (२. ६. ६०) इत्यत्र मनुष्यवर्गे उन्मादाख्यरोगयुक्तस्य नामकथनम् । इह तु भूतावेशकृतचित्तविभ्रमसहितस्य नामानुशासनमिति[1] न पौनरुक्त्यम् ।। अविनीतः समुद्धतः । वाचा कर्मणा वा [2]परदुःखजनकस्वभाववतो

नामनी[3]। सम्यगुद्धतः गर्वितः समुद्धतः। हन्तेः क्तः॥ मत्ते—क्षीबाः। मद्यपानकृतचित्तविभ्रमस्य[4] नामानि। माद्यति स्म मत्तः। 'न ध्याख्यापॄमूर्च्छिमदाम्' (८. २. ५७) इति निष्ठानत्वप्रतिषेधः॥ 'शुण्डा कादम्बरी मता' इति [5]शाश्वतोक्तेः (पृ. ३०, श्लो. ३४५) शुण्डाशब्देन[6] सुरोच्यते। पानागारं वा। तत्र भवः शौण्डः। शैषिकोऽण् (४.२.९२)॥ उद्भूतः प्रकाशितः कटः श्रोणीभागोऽस्य[7] उत्कटः। क्षीबदशायां कदाचिन्नग्नतया[8] कटिभागः प्रकाशितो भवति। अथवा 'संप्रोदश्च कटच्' (५. २. २९) इति कटच्प्रत्यये उत्कटः॥ क्षीबते माद्यति स्मेति क्षीबः। 'क्षीबृ मदे'। क्तप्रत्ययः। 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (८. २. ५५) इति [9]निष्ठातकारलोपः इडभावश्च निपातितः॥ कामुके—अभिकः। [10]स्त्रीजनासक्तचित्तस्वभावस्य नामानि। कामयते ताच्छील्येनेति कामुकः। 'कमु कान्तौ'। 'लषपतपद..' इत्यादिना (३. २. १५४) उकञ्। तस्मादेव धातोस्ताच्छील्यार्थे[11] तृन्प्रयये इडागमे च कमिता॥ 'कमेर्णिङ' (३. १. ३०), 'आयादय आर्धधातुके वा' (३. १. ३१) इति पाक्षिके णिङप्रत्यये कामयिता[12]॥ 'अनुकाभिकाभीकः कमिता' (५. २. ७४) इति निपातनात् कमितेत्यर्थे अनुकः, अभिकः, अभीकः इति त्रयः शब्दाः कन्प्रत्ययान्ताः साधवः॥ 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (३. २. १६७) इति रप्रत्यये कम्रः॥ 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युचि कमनः। [13]तत एव [14]धातोर्वैकल्पिके णिङप्रत्यये (३. १. ३०) पूर्ववद् युचि कामनः॥ २३॥

[1] Gm1, Tv add अर्थभेदात्. [2] °जननस्वभावस्य B5, B6. [3] व्यक्तयोगे च B5, Gm1. [4] चित्तविभ्रमे मत्तादिचतुष्टयम् B6, Gm1. [5] शाश्वताभिधानात् B5, Gm1. [6] Gm1 omits शब्देन. [7] यस्येति B5, Tv. [8] वस्त्रस्रंसने कटिप्रदेशः B6, Tv. [9] B5, Tj2 omit निष्ठा. [10] कामुकादिनवकं स्त्रीप्रसङ्गायत्तस्वभावे वर्तते Gm1, Tv. [11] ताच्छील्येन B5, Gm1. [12] Gm1, Tv add तदन्तात् सनादित्वेन धातुसंज्ञायां तृन्प्रत्यये. [13] अत एव Tv. [14] Gm1 adds कर्मणि द्योत्ये(?).

(पा.) सोन्मादः—[1]स्यात्। उन्मत्तनामनी॥ अविनीतः समुद्धतः। अशिक्षितनामनी॥ मत्ते—क्षीबाः। मत्तनामानि॥ कामुके—अभिकः। कामुकनामानि। अनुक्तम्—'भुजङ्गी नर्मठो मिण्ठः षिद्गः पल्लविको विटः।' [2]विटनामानि॥ २३॥

[1] उन्मदिता अपि B3. [2] वेश्यागन्तृ° A1.

विधेयो विनयग्राही वचनेस्थित आश्रवः ।। २४ ।।
वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः ।
धृष्टे धृष्णग् वियातश्च प्रगल्भः प्रतिभान्विते ।। २५ ।।

(वि.) विधेय इति—'सत्यं वद' (तै. उ. १. ११) इत्यादिवाक्यविधातव्यत्वाद् विधेयः[1] । 'डुधाञ् धारणपोषणयोः' । [2]विनयग्राहिणो नाम ।। आशृणोति [3]मान्यवाक्यमित्याश्रवः । 'श्रु श्रवणे' । मान्यवाक्यानुल्लङ्घकस्य नाम ।। वशं गतो वश्यः । [4]प्रकर्षेण वशं नेतुं शक्यत्वात् प्रणेयः । 'णीञ् प्रापणे' । औषधादिना वशीकर्तुर्वशंगतस्य नामनी ।। नितरां सर्वैर्भ्रियत इति निभृतः । [5]'भृञ् भरणे' । निश्चलवागिन्द्रियत्वाद् विनेतुं योग्यो विनीतः[6] । प्रश्रयते नतो[7] [8]भवतीति प्रश्रितः । 'श्रिञ् सेवायाम्' । अचपलस्य नामानि ।। धर्षयतीति धृष्टः । धृष्णुश्च । 'धृष प्रसहने' । धृष्णगिति वा पाठः । विशेषेण [9]यातो वियातः । धृष्टनामानि ।। [10]प्रगल्भत इति प्रगल्भः । 'गल्भ धाष्टर्चे' । [11]प्रतिभान्वितस्य नाम ।। २४-५ ।।

[1] विधातुं नियोक्तुं योग्यः Pt2. [2] J2, Pt2 add विनयं गृह्णाति विनयग्राही. [3] गुर्वादिभिरादिष्टं Pt2. [4] प्रणेतुं शक्यः K4, Pt2. [5] 'डुभृञ् धारणपोषणयोः' Pt2. [6] विनीतेन्द्रियत्वात् K5; विनीयते शिक्ष्यते Pt2. [7] सज्जः K5. [8] भजति J1. [9] आभिमुख्यं याति Pt2. [10] प्रौढिमातनोति K4. [11] उन्मेषशालिन्या धियान्वितस्य नाम J2, K4.

(विव.) विधेयो—आश्रवः । [1]वचने गुर्वादिकृतवाक्ये कर्तव्याकर्तव्यविषये स्थितोऽविचलितः, तत्र विधेयादयस्त्रयः शब्दा भवन्ति । विधिनिषेधवाक्यैरप्रमत्ततया विधातुं योग्यो विधेयः । 'अचो यत्' (३. १. ९७) इति यत् । 'ईद्यति' (६. ४. ६५) 'सार्वधातुकार्धधातुकयोः' (७. ३. ८४) इति गुणः । 'स्यादाश्रवो विधेयः स्यात्' इति रत्नकोशाभिधाने त्रयाणां पर्यायत्वावगमात् । इदं कार्यमिदमकार्यमिति गुर्वाद्युपदेशो विनयः । तं गृह्णातीति विनयग्राही । 'नन्दिग्रहि . . .' इत्यादिना (३. १. १३४) णिनिः ।। गुर्वादिभिरादिष्टमर्थमाशृणोति अङ्गीकरोतीत्याश्रवः[2] । पचाद्यच् (३. १. १३४) । 'आश्रवोऽस्मि भवतः सहानुजः' इति माघकाव्ये (शिशु. १४. ११) प्रयोगः ।। वश्यः प्रणेयः । वश्येत्यादि परचित्तानु-

सरणशीलस्य नामनी। 'वशं गतः' (४. ४. ८६) इति वशशब्दात् यत्प्रत्यये वश्यः। परानुसरणं प्रकर्षेण नेतुमर्हः प्रणेयः। 'अचो यत्' (३. १. ९७)॥ निभृत—समाः। विनययुक्तवाचकत्वेन त्रयोऽपि शब्दाः समास्तुल्या इत्यर्थः। 'भृञ् भरणे' 'णीञ् प्रापणे' 'श्रिञ् सेवायाम्'। एतेभ्यः सोपसर्गेभ्यो धातुभ्यः क्तप्रत्यये [3]क्रमेण निभृतः, विनीतः, प्रश्रितश्च। विनययुक्तस्य नामानि॥ धृष्टे—वियातश्च। [4]गुरुराजादिसमक्षमात्मश्लाघादिपूर्वकं[5] त्यक्तसंकोचतया व्यापारवतो नामानि। धृष्णोति राजविद्वत्सभासु निर्लज्जतया प्रगल्भत इति धृष्टः। 'ञिधृषा प्रागल्भ्ये'। स्वादिः। क्तः (३. ४. ७२)। यद्यपि 'आदितश्च' (७. २. १६) इति निष्ठायां इडागमः प्रतिषिद्ध एव, तथापि 'धृषिशसी वैयात्ये' (७. २. १९) इत्यर्थविषये नियम्यते॥ 'त्रसिगृधिधृषिक्षिपेः क्नुः' (३. २. १४०) इति क्नुप्रत्यये धृष्णुः। धृष्णक् इति पाठे 'धृषेश्चेति वक्तव्यम्' (वा. ३. २. १७२) इति नजिङ्प्रत्ययः, नकारस्य णत्वे[6] च धृष्णक्। जकारान्तः॥ विशेषेणाभिमुख्यं यातो वियातः। [7]वैयात्यमविनीतत्वमिति॥ प्रगल्भः प्रतिभान्विते। प्रत्युत्पन्नमतित्वं प्रतिभा। तदुक्तम्—'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता'[8]। लौकिके वैदिके वा कर्मणि प्रतिभया युक्ते प्रगल्भशब्दः। प्रगल्भते प्रौढिमातनोतीति प्रगल्भः। 'गल्भ धाष्टर्ये'। भ्वादिः। पचाद्यच् (३. १. १३४)॥ २४-५॥

[1] 'सत्यं वद, धर्मं चर, निषिद्धं परिहर' इत्यादिकं पित्रादिकृतमुपदेशं हितबुद्ध्या यः शृणोति तस्य नामानि Gm1, Tv. [2] यो हि तिष्ठेति स्वाम्यादिवाक्ये स्थितः तदनतिक्रम्य करणशीलः तत्राश्रवशब्दः B5, Gm1. [3] क्तान्तास्त्रयः शब्दाः Tv. [4] °राजादेः Tv. [5] Gm1, Tv have समीपे for समक्षं. [6] णत्वं च Gm3. [7] Gm1 omits the sentence. [8] इति रुद्रः इति भानुजीदीक्षितः (पृ. ४१४).

(पा.) विधेयो विनयग्राही। विनयग्रहीता[1] विधेयः स्यात्। वचनेस्थित आश्रवः। वचनानुल्लङ्घी आश्रवः स्यात्। वश्यः प्रणेयः। वशंगतनामनी॥ निभृत—समाः। विनीतनामानि॥ धृष्टे—वियातश्च। धृष्टनामानि। धृष्णुर्वियातश्चेति पाठान्तरम्॥ प्रगल्भः प्रतिभान्विते। प्रतिभावान्[2] प्रगल्भः स्यात्। अनुक्तम्—'खसूचिः स्यान्निष्प्रतिभः'। प्रतिभाहीनः खसूचिः स्यात्। खषूचिरिति मूर्धन्यमध्यश्च॥ २४-५॥

[1] °ग्राहिता B3. [2] प्रतिभावति B3.

स्यादधृष्टे तु शालीनो विलक्षो विस्मयान्विते ।
अधीरे कातरस्त्रस्नौ भीरुभीरुकभीलुकाः ।। २६ ।।

(वि.) स्यादिति—शालां स्वगृहमेव प्रवेष्टुमर्हतीति[1] शालीनः। अधृष्टनाम ।। विगतं लक्षं [2]प्रस्तुतार्थविषयज्ञानमस्येति[3] विलक्षः[4]। [5]विस्मयान्वितस्य[6] नाम ।। भयवशात्[7] का ईषत्तरतीति कातरः[8]। 'तॄ प्लवनतरणयोः'। त्रस्यति बिभेति ताच्छील्येनेति त्रस्नुः। 'त्रसी उद्वेगे'[9]। त्रस्त इति वा पाठः। बिभेतीति भीरुः। भीरुकः। भीलुकश्च। 'ञिभी भये'। भयशीलस्य नामानि ।। २६ ।।

[1] शीलमस्य O, P.　[2] प्रकृत° Pt2.　[3] विज्ञेयं K5.　[4] Pt2 adds 'लक्ष दर्शनाङ्कनयोः'.　[5] विस्मित° J1.　[6] विस्मयेनान्वितो विस्मयान्वितः Pt2.　[7] भयावेशेन K5.　[8] केन सुखेन न तीर्णः प्राप्तो न भवतीति Pt2.　[9] 'त्रसु उद्वेजने' K3, K6.

(विव.) स्यात्—शालीनः। अधृष्टे प्रागुक्तधृष्टत्वरहिते[1] शालीनशब्दः। सलज्जत्वेन सभासु स्थातुमसमर्थतया [2]स्वशालामेव प्रवेष्टुमर्हतीति शालीनः। 'शालीनकौपीने अधृष्टाकार्ययोः' (५. २. २०) इति शालाशब्दात् खञ्प्रत्ययः, उत्तरपदलोपश्च[3] निपात्यते ।। विलक्षो विस्मयान्विते। कदाचित् केनचिद् [4]रहसि कृतेऽप्यनुचितव्यापारे[5] कथंचित् प्रकटीभूते सति [6]रहसि मया कृतमिदं कर्म [7]प्रकाशमभूदिति कर्तुर्मनसि विस्मयो भवति लज्जा च जायते, तदुभयमप्यत्र विस्मयशब्देन लक्ष्यते, तद्युक्ते विलक्षशब्दो वर्तत इत्यर्थः। तदुक्तमालंकारिकैः—

'आत्मनश्चरिते सम्यग्ज्ञाते ऽन्यैर्यस्य जायते ।
अपत्रपातिमहती स विलक्ष इति स्मृतः ।। '

इति। प्रतिपत्तिमूढतया विगतं लक्षं ज्ञानविषयोऽस्येति विलक्षः ।। अधीरे—भीलुकाः। भयशीलस्य नामानि। धीराद् [8]धैर्ययुक्तादन्योऽधीरः। कुशब्द ईषदर्थः। ईषत् तरति भयस्थानमिति कातरः[9] (६. ३. १०५)। केन सुखेन न तीर्णः, प्राप्तो न भवतीति वा कातरः ।। त्रस्यतीति त्रस्नुः। 'त्रसी उद्वेजने'। उद्वेजनं भयम्। 'त्रसिगृधि..' इत्यादिना (३. २. १४०) ताच्छील्ये क्नुः ।। बिभेतीति भीरुः। 'ञिभी भये'। 'भियः क्रुक्लुकनौ' (३. २. १७४) इति क्रुप्रत्यये भीरुः।

[10]कित्त्वाद् गुणाभावः (१.१.५)।। क्लुकन्प्रत्यये भीलुकः। भियः 'क्रुकन्नपि वक्तव्यः' (वा. ३.२.१७४) इति क्रुकन्प्रत्यये भीरुकः।। अस्मिन् प्रकरणे शब्दाः प्रायेण ताच्छीलिकप्रत्ययान्ताः।। २६।।

[1] °प्रागल्भ्यरहिते Gm1. [2] °शालायां B5, B6. [3] प्रवेशनमित्युत्तरपदम्। शालाप्रवेशनमर्हति, खञ् Tv. [4] गूढतया Gm1, Tv. [5] अकार्ये B5; स्वकार्ये Tv. [6] रहःकृतं Tv; रहस्यकृतं B5. [7] Gm1, Tv add कथं वा; कथं B5. [8] धैर्यवतः Gm1, Tv. [9] 'ईषदर्थे' इति कोः कादेशः. [10] B5, Gm1 omit the sentence.

(पा.) स्यात्--शालीनः। अधृष्टनामनी।। विलक्षो विस्मयान्विते। विस्मयेनान्वितो[1] विलक्षः स्यात्। [2]लज्जयान्वितोऽपि भवति।

'आत्मनश्चरिते सम्यग्गीतेऽन्तर्यस्य जायते।
[3]अपत्रपातिमहती स विलक्ष इति स्मृतः।।'

अधीरे--भीलुकाः। [4]भयशीलस्य नामानि। अनुक्तम्--'[5]दरिते भीतचकितत्रस्तान्तरितशङ्किताः'। भीतवतो[6] नामानि। 'वेरचिनवांडु'।। २६।।

[1] °अन्विते B3. [2] लज्जान्वितः B3. [3] अङ्गे त्रपा B3, C1. [4] बिभ्यतः A1. [5] दलिते A1. [6] A1 omits °वतः.

**आशंसुराशंसितरि गृहयालुर्ग्रहीतरि।
श्रद्धालुः श्रद्धया युक्ते पतयालुस्तु पातुके।। २७।।**

(वि.) आशंसुरिति--आशंसते प्रियमाकाङ्क्षतीति[1] आशंसुः, आशंसिता च। 'शंसु स्तुतौ'। अप्राप्तप्रियकामस्य नामनी।। गृहयते ताच्छील्येन गृहयालुः। 'गृह ग्रहणे'। ग्रहीतुं शीलमस्यास्तीति ग्रहीता। 'ग्रह उपादाने'। ग्रहणशीलस्य नामनी।। श्रद्धत्ते [2]श्रद्धास्यास्तीति श्रद्धालुः। 'डुधाञ् धारणपोषणयोः'। श्रद्धायुक्तस्य नाम।। [3]पतितुं शीलमस्यास्तीति पतयालुः। पातुकश्च। 'पत्लृ गतौ'। पतनशीलस्य नामनी।। २७।।

[1] अभिकाङ्क्षति K3. [2] J1, K2, K3 omit. [3] पतति ताच्छील्येन Pt2.

(विव.) आशंसुराशंसितरि । स्वप्रियार्थविषयेच्छायुक्तस्य नामनी । 'आङः शसि इच्छायाम्'[1] इति धातोः 'सनाशंसभिक्ष उः' (३. २. १६८) इति उप्रत्यये आशंसुः । तृन्प्रत्यये (३. २. १३५) आशंसिता ।। गृहयालुर्ग्रहीतरि । [2]ग्रहणशीलस्य नामनी । 'गृह ग्रहणे' इति धातुरदन्तश्चौरादिकः[3] । तत्र 'स्पृहि-गृहि . . .' इत्यादिना (३. २. १५८) आलुच्प्रत्यये 'अयामन्ताल्वाय्येत्न्विष्णुषु' (६. ४. ५५) इति णेरयादेशे गृहयालुः । ग्रहयालुरिति रेफसहितः[4] पाठो भ्रान्ति-मूलः ।। 'ग्रह उपादाने' [5]इत्यतः तृन् प्रत्यये (३. २. १३५) ग्रहीता[6] (७. २. ३७) ।। श्रद्धालुः श्रद्धया युक्ते । आस्तिक्यबुद्धिः श्रद्धा । तद्युक्तः श्रद्धालुः । श्रद्धत्ते ता-च्छील्येनेति । '[7]श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्या' इति श्रत्पूर्वाद् दधातेः 'स्पृहिगृहि . . .' इत्यादिना[8] (३. २. १५८) आलुच् ।। पतयालुस्तु पातुके । गुरुत्वादिना पतनशीलस्य नामनी । 'पत गतौ' इत्यदन्तात् चौरादिकात् पूर्ववदालुचि (३. २. १५८) पतयालुः ।। 'लषपत . . .' इत्यादिना (३. २. १५४) उकञ्प्रत्यये पातुकः ।। २७ ।।

[1] 'शंसु स्तुतौ' B5, Gm1; 'आङः शसि इच्छायामित्यस्य ग्रहणं, न शंसेः स्तुत्यर्थस्य' काशिका (पृ. २०३). [2] Gm1, Tv add स्वप्रियार्थं. [3] चौरादिः Gm3. [4] सरेफपाठः Gm1, B5. [5] इत्यस्मात् Gm1, Gm3. [6] 'ग्रहोऽलिटि दीर्घः'. [7] काशिका (१, पृ. २२३). [8] B5, Gm1, Gm3 give the full *sūtra:* 'स्पृहिगृहिपति-दयिनिद्रातन्द्राश्रद्धाभ्य आलुच्'.

(पा.) आशंसुराशंसितरि । [1]आशंसनशीलनामनी ।। गृहयालुर्ग्रहीतरि । ग्रहणशीलनामनी ।। श्रद्धालुः श्रद्धया युक्ते । [2]श्रद्धायुक्तः श्रद्धालुः स्यात् । श्राद्धोऽपि स्यात् । 'श्राद्धः श्रद्धालुरास्तिकः' इति वैजयन्ती (पृ. २०४, श्लो. ३७) । पत-यालुश्च पातुके । पतनशीलनामनी ।। २७ ।।

[1] आशीर्वादशीलनाम A1. [2] श्रद्धायुक्ते B3.

लज्जाशीलेऽपत्रपिष्णुर्वन्दारुरभिवादके ।
शरारुर्घातुको हिंस्रः स्याद् वर्द्धिष्णुस्तु वर्धनः ।। २८ ।।

(वि.) लज्जाशील इति— [1]अपत्रपितुं शीलमस्यास्तीति अपत्रपिष्णुः । त्रपूष् लज्जायाम्' । [2]लज्जाशीलस्य नाम ।। [3]वन्दनशीलो वन्दारुः । [4]अभि-

वादकश्च। 'वदि अभिवादनस्तुत्योः'। अभिवादनशीलस्य नामनी ।। शृणाति ताच्छील्येनेति शरारुः। 'शॄ हिंसायाम्'। [5]हन्तुं शीलमस्यास्तीति घातुकः। 'हन हिंसागत्योः'। हिनस्ति ताच्छील्येनेति हिंस्रः। 'हिसि हिंसायाम्'। हिंसनशीलस्य नामानि ।। [6]वर्धितुं शीलमस्यास्तीति वर्धिष्णुः। वर्धनश्च। 'वृधु वृद्धौ'। वृद्धिशीलस्य नामनी ।। २८ ।।

[1] अपत्रपते ताच्छील्येन Pt2. [2] लज्जा शीलमस्येति लज्जाशीलः Pt2. [3] वन्दते ताच्छील्येन K6. [4] अभिवादयत इत्यभिवादकः Pt2. [5] हन्ति ताच्छील्येन Pt2. [6] वर्धते ताच्छील्येन Pt2.

(विव.) लज्जाशीलेऽपत्रपिष्णुः। [1]व्रीडायुक्तस्वभावस्य नामनी। अपत्रपते अपत्रपिष्णुः। 'त्रपूष् लज्जायाम्'। 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रप...' इत्यादिना (३. २. १३६) इष्णुच् ।। वन्दारुरभिवादके[2]। अभिवादनशब्देन स्वस्तिवादप्रयोजको नमस्कार उच्यते। तस्य कर्ता वन्दारुः। 'वदि अभिवादनस्तुत्योः'। वन्दते। 'शॄवन्द्योरारुः' (३. २. १७३) इत्यारुः ।। 'वद व्यक्तायां वाचि' इत्यतः सोपसर्गाद् औणादिके बाहुलक उकञ्प्रत्यये अभिवादुकः। 'अभिवादुक एनं भ्रातृव्यो भवति' इति श्रुतौ प्रयोगः[3]। ण्वुल्प्रत्यये अभिवादक इति केचित् ।। शरारुर्घातुको हिंस्रः। 'शॄ हिंसायाम्' इत्यतो धातोः पूर्ववद् आरुप्रत्यये (३. २. १७३) शरारुः ।। हन्तीति घातुकः। 'लषपतपद...' इत्यादिना (३. २. १५४) उकञ्। 'हो हन्तेर्ञ्णिन्नेषु' (७. ३. ५४) इति कुत्वम्। 'हनस्तोऽचिण्णलोः' (७. ३. ३२) इति तकारः ।। हिनस्तीति हिंस्रः। 'हिसि हिंसायाम्'। 'नमिकम्पि...' इत्यादिना (३. २. १६७) रः। हननशीलस्य नामानि ।। स्यात्––वर्धनः। वृद्धिशीलस्य नामनी। 'वृधु वृद्धौ'। वर्धते ताच्छील्येनेति वर्धिष्णुः। 'अलंकृञ्...' (३. २. १३६) इत्यादिना इष्णुच् ।। तत एव धातोः 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युचि वर्धनः ।। २८ ।।

[1] लज्जमानस्वभावस्य Gm1, Tv. [2] अभिवादुक इति उकञ्प्रत्ययान्तपाठः चिन्त्यः Tv. [3] दर्शनात् Gm3.

(पा.) लज्जाशीलेऽपत्रपिष्णुः। लज्जाशीलोऽपत्रपिष्णुः स्यात्[1] ।। वन्दारुरभिवादके। [2]वन्दनशीलनाम ।। शरारुर्घातुको हिंस्रः। [3]हिंसाशीलनामानि ।। स्याद्वर्धिष्णुस्तु वर्धनः। वृद्धिशीलनामनी ।। २८ ।।

[1] लज्जाशीलनाम B3.　[2] वन्दना° A1.　[3] हिंसन° B3.

उत्पतिष्णुस्तूत्पतितालंकरिष्णुस्तु मण्डनः ।
भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनः समौ ॥ २६ ॥

(वि.) उत्पतिष्णुरिति— [1]उत्पतितुं शीलमस्यास्तीति उत्पतिष्णुः[2] । उत्पतिता च । [3]उत्पतनशीलस्य नामनी ॥ [4]अलंकर्तुं शीलमस्यास्तीति अलंकरिष्णुः[5] । मण्डयति ताच्छील्येनेति मण्डनः । 'मडि भूषायाम्' । अलंकरणशीलस्य नामनी ॥ [6]भवितुं शीलमस्यास्तीति भूष्णुः । भविष्णुः । भविता च । 'भू सत्तायाम्' । पुनः पुनर्भवनशीलस्य केशादेर्नामानि ॥ [7]वर्तितुं शीलमस्यास्तीति वर्तिष्णुः । वर्तनश्च । 'वृतु वर्तने' । वर्तनशीलस्य कालादेर्नामनी ॥ २६ ॥

[1] उत्पततीति Pt2.　[2] 'पत्लृ गतौ' K3, K4.　[3] ऊर्ध्वगमन° K4.　[4] अलंकरोति Pt2.　[5] K4, Pt2 add 'डुकृञ् करणे'.　[6] भवति Pt2.　[7] वर्तते ताच्छील्येन Pt2.

(विव.) उत्पतिष्णुस्तूत्पतिता । उत्पतनशीलस्य विहगादेर्नामनी । ऊर्ध्वं पतति गच्छतीत्युत्पतिष्णुः[1] । इष्णुच् (३. २. १३६) । तृन्प्रत्यये उत्पतिता (३. २. १३५) ॥ अलंकरिष्णुस्तु मण्डनः । [2]गृहाद्यलंकरणशीलस्य नामनी । पूर्ववद् इष्णुच्प्रत्यये अलंकरिष्णुः[3] ॥ 'मडि भूषायाम्' । 'क्रुधमण्डार्थेभ्यश्च' । (३. २. १५१) इति युचि मण्डनः ॥ भूष्णुः—भविता । पुनः पुनर्भवनशीलस्य [4]केशनखादेर्नामानि । [5]ताच्छील्येन भवतीति भूष्णुः । 'ग्लाजिस्थश्च ग्स्नुः' (३. २. १३९) इति सूत्रे चकरात् भवतेरपि ग्स्नुप्रत्यये भूष्णुः ॥ 'भुवश्च' (३. २. १३८) इति इष्णुचि भविष्णुः ॥ तृन्प्रत्यये (३. २. १३५) भविता ॥ वर्तिष्णुः—समौ । वर्तनशीलस्य नामनी । [6]वर्तते ताच्छील्येनेति वर्तिष्णुः । [7]इष्णुच् (३. २. १३६) ॥ 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युचि वर्तनः ॥ २६ ॥

[1] Tj2, Tv add 'पत्लृ गतौ'.　[2] देहादि° Gm3.　[3] अलंपूर्वात् करोतेः Tj1, Tv.　[4] राजादेः B5.　[5] पुनः पुनः B5.　[6] 'वृतु वर्तने' Gm3.　[7] B5 adds 'अलंकृञ्...' इत्यादिना.

(पा.) उत्पतिष्णुस्तूत्पतिता। उत्पतनशीलनामनी।। अलंकरिष्णुस्तु मण्डनः। अलंकरणशीलनामनी ।। भूष्णुः—भविता । [1]भवनशीलनामानि ।। वर्तिष्णुः—समौ । [2]वर्तनशीलनामनी ।। २९ ।।

[1] B3 adds पुनःपुनः. [2] वृत्त° A1.

निराकरिष्णुः क्षिप्नुः स्यात् सान्द्रस्निग्धस्तु मेदुरः ।
ज्ञाता तु विदुरो विन्दुर्विकासी तु विकस्वरः ।। ३० ।।

(वि.) निराकरिष्णुरिति—[1]निराकर्तुं शीलमस्यास्तीति निराकरिष्णुः । क्षिपति प्रतिपक्षमिति क्षिप्नुः । 'क्षिप प्रेरणे' । परपक्षनिराकरणशीलस्य नामनी ।। सान्द्रमत्यन्तं स्निग्धः सान्द्रस्निग्धः । मेद्यति स्निह्यतीति मेदुरः । 'ञिमिदा स्नेहने' । वनश्रेष्ठस्य [2]शादादेर्नामनी ।। ज्ञातुं[3] शीलमस्यास्तीति ज्ञाता । 'ज्ञा अवबोधने' । वेदितुं[4] शीलमस्यास्तीति विदुरः । विन्दुश्च । 'विद ज्ञाने' । पण्डितस्य नामानि ।। विकसति ताच्छील्येनेति विकासी[5] । 'कस गतौ' । विकस्वरश्च । विकसनशीलस्य पुष्पादेर्नामनी ।। ३० ।।

[1] निराकरोति Pt2; K4 adds तिरस्कर्तुं, 'डुकृञ् करणे'. [2] शादो बालतृणम्. [3] जानाति ताच्छील्येन Pt2. [4] वेत्ति ताच्छील्येन Pt2. [5] K4, Pt2 add नान्तः.

(विव.) निराकरिष्णुः क्षिप्नुः स्यात् । [1]अधिक्षेपकरणशीलस्य नामनी । निराकरोतीति निराकरिष्णुः । [2]इष्णुच्प्रत्ययः (३. २. १३६) । क्षिपति [3] अधिक्षिपति क्षिप्नुः । 'क्षिप प्रेरणे' । 'त्रसिगृधिधृषिक्षिपेः क्नुः' (३. २. १४०) इति क्नुः[4] ।। सान्द्रस्निग्धस्तु मेदुरः । सान्द्रो निबिडावयवारब्धः, स्नेहाख्यगुणयोगेन कार्कश्यरहितः स्निग्धः, सान्द्रश्चासौ स्निग्धश्च सान्द्रस्निग्धः, [5]तथाविधः तरुणवृषभनवजल[6]धरादिर्मेदुर उच्यते । मेद्यतीति मेदुरः । 'ञिमिदा स्नेहने' । 'भञ्जभासमिदो घुरच्' (३. २. १६१) इति घुरच् । अत्र धात्वर्थपर्यालोचनायां स्नेहनमात्रमेव मेदुरशब्दप्रवृत्तिनिमित्तम् । ततश्च स्निग्धत्वं निरन्तरावयवसंश्लेषे[7] सत्येव भवतीति सान्द्रस्निग्धत्वयोः द्वयोरपि कथनम् ।। ज्ञाता विन्दुः । [8]वस्तुविषययाथार्थ्यज्ञानयुक्तस्य नामानि । 'ज्ञा अवबोधने' । तृन्प्रत्यये (३. २.

१३५) ज्ञाता ।। सम्यग् वेत्तीति विदुरः । 'विद ज्ञाने' । 'विदिभिदिछिदेः कुरच्' (३. २ १६२) इति कुरच् ।। 'विन्दुरिच्छुः' (३. २. १६९) इति निपातनात् तत एव [9]धातोर्विन्दुः ।। विकासी तु विकस्वरः । विकसनशीलस्य कुसुमादेर्नामनी । विविधं कसति गच्छतीति विकासी । 'कस गतौ' । 'सुप्यजातौ णिनिस्ताच्छील्ये' (३. २. ७८) इति णिनिप्रत्ययः । अत्र सूत्रे[10] 'सुब्ग्रहणमुपसर्गनिवृत्त्यर्थम्' इति यद्यपि वृत्तावुक्तं (काशिका १, पृ. १८८) तथापि क्वचिदुपसर्गपूर्वकत्वेऽपि णि-निर्भवति । तथा च न्यासकारः (पृ. ६२२)—'अन्येभ्योऽपि दृश्यन्ते (३. २. ७५) इत्यत्र अपिशब्दः सर्वोपाधिव्यभिचारार्थोऽनुवर्तते । तेन[11] उदासारिण्यः प्रत्यासारिण्यः इत्याद्युपसर्गेऽपि णिनिर्भवति' इति[12] ।। 'स्थेशभासपिसकसो वरच्' (३. २. १७५) इति वरच्प्रत्यये विकस्वरः ।। ३० ।।

[1] निरसनशीलस्य B5, Tv.   [2] B6 adds पूर्ववत्.   [3] आक्षिपति प्रतिपक्षं Tv.
[4] Gm3 adds किन्त्वाद् न गुणः.   [5] तदुभयविध: B6, Tv.   [6] मेघादि: B5.
[7] °योगे B5.   [8] लौकिकं वैदिकं वा कार्यतत्त्वं यो जानाति तस्य ज्ञातादयः त्रयः शब्दाः स्युः Gm1, Tv.   [9] विदेर्ज्ञानार्थत्वात् Tj1, Tv.   [10] सुपीत्यनुवृत्तौ B5; सुपीति वर्तमाने इति मुद्रितग्रन्थे (पृ. १८८).   [11] न प्रसारणीत्यादौ Tv; 'तेनोदासारिण्य इत्यत्रोपसर्गे णिनिर्भवति' इति मुद्रितग्रन्थे (पृ. ६२२).   [12] 'वौ कषलस...' इत्यादिसूत्रं (३. २. १४३) वौ कसेत्यादि पठित्वा घिनुणि विकासीत्युक्तं टीकासर्वस्वे (पृ. १५). एवमेव भानुजीदीक्षितः (पृ. ४१६).

(पा.) निराकरिष्णुः क्षिप्नुः स्यात् । निराकरणशीलनामनी ।। [1]सान्द्रस्निग्धस्तु मेदुरः । स्नेहशीलनामनी ।। ज्ञाता—विन्दुः । ज्ञानशीलनामानि ।। विकासी तु विकस्वरः । [2]विकसनशीलनामनी ।। ३० ।।

[1] सान्द्रः A1.   [2] विकास° A1.

विसृत्वरो विसृमरः प्रसारी च विसारिणि ।
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ।। ३१ ।।

(वि.) विसृत्वर इति— [1]विसर्तुं शीलमस्यास्तीति विसृत्वरः । विसृमरः । प्रसारी च । 'सृ गतौ' । विसर्पणशीलस्य जलोपरिस्थितस्य[2] तैलबिन्द्वादेर्नामानि ।।

सोढुं शीलमस्यास्तीति सहिष्णुः[3]। सहनश्च। 'षह मर्षणे'। क्षाम्यति[4] ताच्छी-ल्येनेति क्षन्ता। क्षमिता। क्षमी च। 'क्षमू[5] सहने'। तेजयति ताच्छील्येन सहत इति तितिक्षुः। 'तिज निशातने[6] क्षमायां[7] च'। सहनशीलस्य नामानि ॥ ३१ ॥

[1] विसरति ताच्छील्येन Pt2. [2] °उपरिस्थस्य K4. [3] सहते ताच्छील्येन Pt2. [4] क्षमते K5, Pt2. [5] क्षमूष् Pt2. [6] निशाने K4, K5. [7] K2, K4, Pt2 omit.

(विव.) विसृत्वरो—विसारिणि। परितः सर्पणशीलस्य जलस्थतैलबि-न्द्वादेर्नामानि। विशेषेण सरति विसृत्वरः। 'सृ गतौ'। 'इण्नश्जिसर्तिभ्यः क्वरप्' (३. २. १६३)। कित्त्वाद् गुणाभावः। पित्त्वात्तुगागमश्च[1] (६. १. ७१)। [2]स्त्रियां तु ङीपि (४. १. १५) विसृत्वरी ॥ [3]सृघस्यदः क्मरच्' (३. २. १६०) इति क्मरच्प्रत्यये विसृमरः॥ 'प्रे लपसृद्रुमथवदवसः' (३. २. १४५) इति घिनुण्प्रत्यये प्रसारी ॥ विपूर्वात् सरतेर्ग्रह्यादिणिनिप्रत्यये (३. १. १३४) विसारी[4] ॥ सहिष्णुः—क्षमी। एतानि

'बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते सति।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता ॥'

इत्युक्तलक्षणक्षमायुक्तस्य नामानि। सहते ताच्छील्येनेति सहिष्णुः। 'षह मर्षणे'। 'अलंकृञ्...' इत्यादिना (३. २. १३६) इष्णुच् ॥ 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युचि सहनः। क्षमत इति क्षमः। 'क्षमूष् सहने'। पचाद्यच् (३. १. १३४)। अस्य धातोः ऊदित्वेनेडागमस्य वैकल्पिकत्वात्[5] (७. २. ४४) तदभावपक्षे तृनि क्षन्ता। इडागमपक्षे क्षमिता ॥ 'शमित्यष्टाभ्यो घिनुण्' (३. २. १४१) इति घिनुण्प्रत्यये क्षमी ॥ 'तिज निशातने' इति धातोः 'गुप्तिज्किद्भ्यः सन्' (३. १. ५) इत्यत्र 'निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते' (इष्टिः ३. १. ५) इति क्षमायां सन्प्रत्यये 'सनाशंसभिक्ष उः' (३. २. १६८) इत्युप्रत्यये तितिक्षुः ॥ ३१ ॥

[1] 'ह्रस्वस्य पिति कृति तुक्.' [2] 'टिड्ढाणञ्...' इत्यादिना ङीपि Tj1, Tv. [3] Tj2 adds तत एव धातोः. [4] विसरणम्। घञ् (३. ३. १८)। विसारोऽस्यास्ति। इनिः (५. २. ११५) इति भानुजीदीक्षितः (पृ. ४१६). [5] 'स्वरतिसूतिसूयतिधूञूदितो वा' इति वा इडागमः.

(पा.) विसृत्वरो—विसारिणि । [1]विसरणशीलनामानि ।। सहिष्णुः—क्षमी । क्षमाशीलनामानि[2] ।। ३१ ।।

[1] प्रसरण° B3, C1.　　[2] सहनशील° C1.

क्रोधनोऽमर्षणः कोपी चण्डस्त्वत्यन्तकोपनः ।
जागरूको जागरिता घूर्णितः प्रचलायितः ।। ३२ ।।

(वि.) क्रोधन इति—क्रुध्यति [1]ताच्छील्येनेति क्रोधनः । 'क्रुध [2]कोपे' । न मृष्यति[3] न सहत इत्यमर्षणः । 'मृष [4]तितिक्षायाम्' । कोपो ऽस्यास्तीति कोपी[5] । कोपनशीलस्य नामानि ।। [6]चण्डतेऽतीव कुप्यतीति चण्डः । 'चडि [7]कोपने' । अत्यन्तकोपनस्य नामनी ।। जागर्ति ताच्छील्येनेति जागरूकः । जागरिता च । 'जागृ निद्राक्षये' । जागरणशीलस्य नामनी ।। घूर्णते इतस्ततो डोलयत इति घूर्णितः । '[8]घुण घूर्ण भ्रमणे' । प्रचल इवाचरतीति प्रचलायितः । क उपविश्यैव निद्रां गतस्य नामनी ।। ३२ ।।

[1] Pt2 omits.　　[2] क्रोधे Pt2.　　[3] Pt2 adds ताच्छील्येन.　　[4] सहने K6, Pt2.　　[5] K2 adds कुप क्रोधे; कोपे Pt2.　　[6] चण्डति K6, Pt2.　　[7] कोपे K2, Pt2.　　[8] K3 omits घुण.

(विव.) क्रोधनो—कोपी । क्रोधशीलस्य नामानि । क्रुध्यतीति क्रोधनः[1] । 'क्रुधमण्डार्थेभ्यश्च' (३. २. १५१) इति युच् ।। [2]'मृष सहने' इति धातोः 'अनुदात्तेतश्च . . .' (३. २. १४९) इति युचि मर्षणशब्देन सहनशील उक्तः, तादृशो न भवतीत्यमर्षणः ।। 'कुप कोपे' इत्यस्मादावश्यके[3] णिनिप्रत्यये (३. ३. १७०) कोपी ।। चण्डस्त्वत्यन्तकोपनः । 'चडि कोपे' इत्यस्मात् पचाद्यचि (३. १. १३४) चण्डः ।। 'क्रुधमण्ड . . .' (३. २. १५१) इत्यादिना युचि कोपनः ।। अतिशयेन [4]कोपनशीलोऽत्यन्तकोपनः[5] ।। जागरूको जागरिता । निद्रारहितस्य नामनी । जागर्तीति जागरूकः । 'जागृ निद्राक्षये' । 'जागुरूकः' (३. २. १६५) इति ऊकप्रत्ययः ।। तृन्प्रत्यये (३. २. १३५) जागरिता ।। घूर्णितः प्रचलायितः । स्वप्नावस्थातः पूर्वं मनसो निमीलनावस्थामापन्नस्य नामनी । घूर्ण्यते इतस्ततो

डोलायते स्म घूर्णितः। 'घुण घूर्ण भ्रमणे'। क्तः ।। प्रचल इवाचरतीति प्रचलायितः। [6]उपमानादाचार इत्यर्थे कर्तुः क्यङ (३. १. ११) । सनाद्यन्तत्वेन धातुसंज्ञायां क्तप्रत्ययः ।। ३२ ।।

[1] Tj1, Tj2 add 'क्रुध कोपे'. [2] मृष्यत इति मर्षण: Gm3, Tv. [3] 'आवश्यकाधमर्ण्ययोर्णिनिः'. [4] कोपशील: B6. [5] Tv adds क्रुधातिशयवतो नामनी. [6] 'उपमानादाचारे' (३. १. १०).

(पा.) क्रोधनो––कोपी । कोपनशीलनामानि ।। चण्डस्त्वत्यन्तकोपनः । [1]अतिकोपशीलनामनी ।। अनुक्तम्––'गोष्ठश्वस्तु स यो द्वेष्टि स्थान एव स्थितः परान्'। स्थान एव स्थितः सन् परान् यो द्वेष्टि स गोष्ठश्वः स्यात् । [2] 'गेहेनर्दी गृहेशूरः'। स्वगृहे शौर्यवतो नामनी ।। जागरूको जागरिता । जागरणशीलनामनी ।। घूर्णितः प्रचलायितः । तन्द्रीवशात् पुनः पुनः पतनशीलनामनी[3] ।। ३२ ।।

[1] अतिकोपन° C1. [2] गेहेशूरः B3. [3] A1 adds 'कुनिकेटिवांडु'.

स्वप्नक् शयालुर्निद्रालुर्निद्राणशयितौ समौ ।
पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ।। ३३ ।।

(वि.) स्वप्नगिति––स्वपिति ताच्छील्येनेति स्वप्नक् । 'ञिष्वप् शये'। शेते ताच्छील्येनेति शयालुः । 'शीङ स्वप्ने'। निद्राति ताच्छील्येनेति निद्रालुः । 'द्रा कुत्सायां गतौ'। निद्राणशीलस्य[1] नामानि ।। [2]निद्रातीति निद्राणः । शेते स्म शयितः[3] । सुप्तस्य नामनी ।। परमञ्चतीति पराक् । पराङ मुखं यस्य पराङ्मुखः । पराक् एव पराचीनः[4] । 'अञ्चु गतिपूजनयोः'। पराङ्मुखस्य नामनी ।। अव अञ्चति [5]मुखमिति अवाङ । अपिशब्दाद् अवाचीनश्च । अधोमुखस्य नामनी ।।३३।।

[1] °शीलवतः K5. [2] निद्रां गच्छति K4. [3] K5, Pt2 add 'शीङ स्वप्ने'. [4] पराञ्चति मुखमिति पराचीनः K2, K4, K6. [5] Pt2 omits मुखं and adds अधो मुखं यस्येत्यधोमुखः.

(विव.) स्वप्नक्––निद्रालुः । निद्राशीलस्य[1] नामानि । स्वपितीति स्वप्नक् । 'स्वपितृषोर्नजिङ' (३. २. १७२) ।। शेत इति शयालुः । 'शीङ स्वप्ने'।

'आलुचि शीङो ग्रहणं कर्तव्यम्' (वा. ३. २. १५८) इत्यालुच् ।। नितरां द्रातीति निद्रालुः । 'द्रा कुत्सायां गतौ' । 'कुत्सिता गतिः पलायनं स्वप्नश्च' इति धातुवृत्तिः[2] (मा. धा. पृ. ३६३) । 'स्पृहिगृहि...' इत्यादिना (३. २. १५८) आलुच् ।। निद्राणशयितौ समौ । निद्रावस्थापन्नस्य नामनी । निद्राति स्मेति निद्राणः । 'द्रा कुत्सायां गतौ' । क्तः । 'संयोगादेरातो धातोर्यण्वतः' (८. २. ४३) इति निष्ठानत्वम् ।। शेते स्म शयितः । इडागमः । 'निष्ठा शीङ...' इत्यादिना (१. २. १९) कित्त्वप्रतिषेधाद् गुणायादेशौ ।। पराङ्मुखः पराचीनः । पार्श्वतः पश्चाद्वा भुग्नशिरसो नामनी । पराञ्चति[3] पुरस्तादप्यर्थाद् अन्यतो मुखं प्रसारयतीति पराङ । 'अञ्चु गतौ' । 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (३. २. ५९) इति क्विन्प्रत्ययः । तदन्तात् प्रातिपदिकाद् 'विभाषाञ्चेरदिक् स्त्रियाम्' (५. ४. ८) इति स्वार्थिके खप्रत्यये पराचीनः । पराग्भूतं मुखमस्येति पराङ्मुखः । स्यादवाङप्यधोमुखः । पुरोभागनमितशिरस्कस्य नामनी । अवेति निपातोऽधोदेशे वर्तते । अवाञ्चतीति अवाङ । [4]पूर्ववदेव क्विन् (३. २. ५९) । स्त्रियां तु ङीपि अवाची । अपिशब्दात् पूर्ववदेव विकल्पेन स्वार्थिके खप्रत्यये (५. ४. ८) अवाचीनश्च ।। ३३ ।।

[1] निद्रावस्थापन्नस्य Tj1, Tj2.　[2] स्वापश्च इति स्वामी इति मुद्रितग्रन्थे.
[3] Tv adds परावर्तते.　[4] Tj1, Tv add ऋत्विगादिना.

(पा.) स्वप्नक्—निद्रालुः । निद्राशीलनामानि[1] ।। निद्राण—समौ । कृतनिद्रस्य[2] नामनी ।। पराङ्मुखः पराचीनः । [3]पराक्कृतमुखनामनी[4] ।। स्यादवाङप्यधोमुखः । अधोमुखनामनी ।। अनुक्तम्—'उत्पश्य उन्मुखस्तुल्यौ' । उपरि पश्यतो नामनी ।। ३३ ।।

[1] B3 adds स्वप्नक् स्वप्नजौ स्वप्नजः.　[2] निद्रावतः B3.　[3] °मुखस्य A1.
[4] A1 adds 'वेनकमुंदैनवांडु'.

देवानञ्चति देवद्र्यङ विष्वद्र्यङ विष्वगञ्चति ।
यः सहाञ्चति सध्र्यङ स स तिर्यङ यस्तिरोऽञ्चति ।। ३४ ।।

(वि.) देवानिति—देवान् प्रति अञ्चति [1]गच्छतीति देवद्र्यङ । देवानुद्दिश्याभिमुख्येन गच्छतो नाम ।। विष्वक् सर्वतोऽञ्चतीति[2] विष्वद्र्यङ । यः क्रमेण

सर्वतो गच्छति तस्य नाम ।। सहाञ्चतीति सध्रचङ् । योऽन्येन सह गच्छति तस्य नाम ।। तिरोऽञ्चति गच्छतीति तिर्यङ्[3] । यस्तिरो गच्छति तस्य नाम ।। ३४ ।।

[1] K_2, Pt_2 add पूजयतीति वा, 'अञ्चु गतिपूजनयोः'. [2] K_2, K_4 add गच्छति. [3] स्त्रीलिङ्गे सध्रीची, तिरश्ची Pt_2.

(विव.) देवा––देवद्रचङ् । यः सेवार्थं [1]हरिहरादीन् गच्छति तत्र देवद्रचङ् शब्दः ।। विष्वद्रचङ् विष्वगञ्चति । यः क्रमेण विष्वक् सर्वत्राञ्चति गच्छति तत्र विष्वद्रचङ्शब्दः । 'अञ्चु गतिपूजनयोः' । 'विष्वग्देवयोश्च टेरद्रचञ्चतौ वप्रत्यये' (६. ३. ९२) इति [2]अद्रिः । देवशब्दस्य टेरद्र्यादेशे देवद्रचङ्शब्दोऽपि तद्वदेव ।। यः सहा––सः । [3]'सहस्य सध्रिः' (६. ३. ९५) इति सहशब्दस्य सध्र्यादेशः । स्त्रियां तु देवद्रीची, विष्वद्रीची, सध्रीचीत्यादयो ङीप्प्रत्ययान्ताः ।। स तिर्यङ् यस्तिरोऽञ्चति । तिर्यग्गच्छति[4] तिर्यङ् । तिरोऽञ्चति । 'तिरसस्तिर्यलोपे' (६. ३. ९४) इति तिरःशब्दस्य तिर्यादेशः ।। ३४ ।।

[1] शिवलिङ्गशिवप्रतिमादीनां प्रति यो गच्छति तत्र Tj_1, Tv. [2] B_5, Gm_3 add वप्रत्ययान्तेऽञ्चतौ परतः. [3] Gm_1, Tv add अन्येन सह योऽञ्चति गच्छति अत्रापि अञ्चतौ परतः. [4] Tv adds वक्रं गच्छति.

(पा.) देवा––देवद्रचङ् । देवान् प्रति यो याति[1] स देवद्रचङ् । स्त्री चेद् देवद्रीची ।। विष्वद्रचङ् विष्वगञ्चति । सर्वतो[2] यो गच्छति स विष्वद्रचङ् स्यात् । स्त्री चेद् विष्वग्द्रीची ।। यः सहा––सः । यः सह गच्छति स सध्रचङ् स्यात्, स्त्री चेत् सध्रीची ।। स तिर्यङ् यस्तिरोऽञ्चति । तिर्यग् यो गच्छति स तिर्यङ् स्यात् । स्त्री चेत् तिरश्ची ।। ३४ ।।

[1] B_3 adds पूजार्थं. [2] सर्वत्र A_1.

वदो वदावदो वक्ता वागीशो वाक्पतिः समौ ।
वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि ।। ३५ ।।

(वि.) वद इति––वदतीति वदः । वदावदश्च । 'वद व्यक्तायां वाचि' । वक्तीति वक्ता[1] । 'वच परिभाषणे' । मुख्यवक्तुर्नामानि ।। वाचामीशो वागीशः ।

वाचां पति: वाक्पति: । [2]प्रबन्धादिकरणसमर्थस्य वाग्युक्तस्य नामनी ।। [3]वाचां युक्तौ प्रयोगे पटु: वाचोयुक्तिपटु: । प्रशस्ता वागस्येति वाग्मी । वावद्यते भृशं [4]वदतीति वावदूक: । विवक्षितार्थकथनप्रवीणस्य नामानि ।। ३५ ।।

[1] Pt_2 adds ऋकारान्त:. [2] K_4, Pt_2 add गद्यपद्यादि°. [3] वाचोयुक्तिर्वचसां प्रयोग:, तत्र Pt_2. [4] वक्तीति K_3; वक्तेति K_5; K_2, Pt_2 add 'वद व्यक्तायां वाचि.'

(विव.) वदो––वक्ता । राजब्रह्मसभादौ निर्भीकत्वेनाभिवदनशीलस्य नामानि । वदतीति वद: । 'वद व्यक्तायां वाचि' । पचाद्यच् (३. १. १३४) ।। 'चरिचलिपतिवदीनां द्वित्वमच्याक् चाभ्यासस्य'[1] (वा. ६. १. १२) इति वदे: पचाद्यचि[2] विकल्पेन द्विर्वचने आगागमे वदावद: । अभ्यासस्याग्विधानादेव 'हलादि: शेष:' (७. ४. ६०) अत्र[3]न भवति ।। तृचि वक्ता (३. १. १३३) ।। वागीशो––समौ । गद्यपद्यादिप्रबन्धनिर्माणपाटवसंपन्नस्य नामनी[4] ।। वाचोयुक्ति––वक्तरि । वाचोयुक्तिर्वचसां प्रयोग: । 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' (वा. ६. ३. २१) [5]इत्यलुक् । तत्र पटु: चतुरो वाचोयुक्तिपटु: ।। [6]युक्तियुक्तवचसामभिधानशीलतया प्रशस्ता वागस्येति वाग्मी । 'वाचो ग्मिनि:' (५. २. १२४) इति प्रशंसारूपे मत्वर्थे ग्मिनि: ।। वावद्यते साधु वदतीति वावदूक: । 'यजजपदशां यङ:' (३. २. १६६) इति सूत्रे वदेरनुप्रवेश: कार्य: इति [7]पदकारवाक्याद् ऊकप्रत्यय: इति क्षीरस्वामी (पृ. २४३) । [8]यङन्तानां, 'यजिजपिदंशिवदामूक:' इति कालापा: इति सर्वानन्द: (टी. स. पृ. १८) । 'उलूकादयश्च' (उ. ४. ४१) इति वदेर्यङन्ताद् ऊकप्रत्यये[9] वावदूक:, इति सुभूतिचन्द्र: ।। तृनि वक्ता (३. २. १३५) ।। ३५ ।।

[1] Tj_1, Tv add वेति वक्तव्यम्. [2] Gm_3 adds परत:. [3] B_5 adds अभ्यासस्य परलोप:. [4] Tj_2, Tv add वाचामीशो वागीश:, वाचां पति: वाक्पति:. [5] Tv adds यथासंख्यमलुग्वक्तव्य: इति षष्ठ्या: अलुक्. [6] Gm_3, Tv add विद्वन्मध्ये. [7] वृत्तिकार° Tv. [8] चेक्रीयीतान्तानामिति मुद्रितग्रन्थे. [9] Tv adds एव वा.

(पा.) वदो––वक्ता । [1]भाषणाभिज्ञनामानि ।। वागीशो––समौ । [2]निपुणभाषिणो नामनी ।। वाचोयुक्ति––वक्तरि । समञ्जसभाषिणो नामानि[3] ।। ३५ ।।

[1] वक्तृनामानि B_3. [2] A_1 adds अत्यन्तभाषण° [3] 'मञ्जिमाटलाडिवांडु' A_1.

स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।
दुर्मुखे मुखराबद्धमुखौ शक्लः प्रियंवदे ।। ३६ ।।

(वि.) स्यादिति—बहु जल्पतीति जल्पाकः[1] । 'जप जल्प व्यक्तायां वाचि' । कुत्सिता वागस्येति[2] वाचालः । वाचाटश्च । बहुनिन्दायुक्तवचसो नामानि[3] ।। [4]मुखनिर्गतं दुष्टं वचनमस्येति मुखरः । अबद्धमनियन्त्रितं [5]मुखनिःसृतं वचनमस्येति अबद्धमुखः । दुर्वचसो नामानि ।। शक्नोति प्रियमेव वक्तुमिति शक्लः । [6]श्लक्ष्ण इति वा पाठः । 'शक्लृ शक्तौ' । [7]प्रियंवदस्य नामनी ।। ३६ ।।

[1] जल्पति कुत्सितं वदति Pt_2. [2] वाचः सन्ति K_4. [3] Pt_2 adds बह्व्यः गर्ह्या वाचो यस्येति बहुगर्ह्यवाक्. [4] K_3, Pt_2 add दुष्टं मुखं वचनमस्येति दुर्मुखः. [5] मुखमस्येति Pt_2. [6] श्लिष्यते सर्वैरिति श्लक्ष्णः Pt_2. [7] प्रियं वदतीति प्रियंवदः, 'वद व्यक्तायां वाचि' Pt_2.

(विव.) स्यात्—बहुगर्ह्यवाक् । यः बहूनि प्रकृतानुपयुक्तानि गर्ह्याणि निन्द्यानि च वाक्यानि वक्ति तस्य[1] जल्पाकादयः शब्दाः । जल्पतीति जल्पाकः । 'जल्प व्यक्तायां वाचि'। 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' (३. २. १५५) इति षाकन्प्रत्ययः । स्त्रियां तु षित्त्वाद् ङीषि जल्पाकी ।। बह्वी कुत्सिता वागस्येति वाचालः । वाचाटश्च । 'आलजाटचौ बहुभाषिणि'[2] (५. २. १२५) इति सूत्रस्य पदसामर्थ्यादेव वाचां गर्ह्यत्वमपि लभ्यते । न्याययुक्तपरःसहस्रवादिन्यपि बहुभाषित्वव्यपदेशाभावात् ।। दुर्मुखे—मुखौ । मुखशब्देनात्र वचनं लक्ष्यते । दुर्मुखे दुर्वचसि देशजातिकुलाद्याक्षेपकनिष्ठुरवचने [3]मुखरादिशब्दद्वयम् । दुष्टं मुखं वचनमस्येति दुर्मुखः । 'खमुखकुञ्जेभ्यो र इति वक्तव्यम्' (वा. ५. २. १०७) इति निन्दारूपे मत्वर्थे रप्रत्यये मुखरः ।। अबद्धम् असंबद्धम् अनियन्त्रितं मुखमस्येति अबद्धमुखः ह्रस्वादिः ।। शक्लः प्रियंवदे । शक्नोति प्रियमेव वक्तुमिति शक्लः । [4]औणादिको लप्रत्ययः[5] कल्प्य इति सुबोधिनीकारः । प्रायेण प्रियमेव वदतीति प्रियंवदः । 'प्रियवशे वदः खच्' (३. २. ३८) इति खच्, मुमागमश्च ।। ३६ ।।

[1] ततः B5, Gm1. [2] Gm3, Tv add कुत्सित इति वक्तव्यम्. [3] B6, Gm3 omit मुखरादि°. [4] Tv adds 'शक्लृ शक्तौ'. [5] 'मृशक्यादिभ्यः क्लः' (उ. ४. ११०).

(पा.) स्यात्—बहुगर्ह्यवाक् । [1]बहुभाषिणो नामानि ।। दुर्मुखे—मुखौ । असंबद्धवचोवक्तृनामानि । 'वठरः स्यान्मातृमुखः'। 'वराकवठरैरहो जगदिदं महद्वञ्चितम्'। इत्येते द्वे च ।। श्लक्ष्णः प्रियंवदे । [2]प्रियवादिनामनी[3] ।। ३६ ।।

[1] B3 adds निन्द्य°. [2] प्रियंवद° A1. [3] शक्ल इति वा पाठः A1.

लोहलः स्यादस्फुटवाग् गर्ह्यवादी तु कद्वदः ।
समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः ।। ३७ ।।

(वि.) लोहल इति—लोहति स्थानप्रयत्नवैकल्यं [1]करोतीति लोहलः । 'लुह् कत्थनादौ'[2] । अस्फुटवचसो नाम ।। कुत्सितं वदतीति कद्वदः । 'वद व्यक्तायां वाचि'। [3]निन्द्यवादिनो नाम ।। कुत्सितः परदोषप्रख्यापनशीलो वादो भाषणं यस्येति कुवादः । कुत्सितं वदतीति कुवद इति वा पाठः[4] । कुत्सितं चरतीति कुचरः[5] । 'चर गतौ'। कुत्सितं चरति भाषते कुचरः । 'चर गतिभक्षणयोः'। परदोषख्यापनशीलस्य नामनी ।। विरुद्धः श्रवणकटुः स्वरो यस्येत्यस्वरः[6] । असौम्यस्वरवतो नाम ।। ३७ ।।

[1] K2, K3 omit करोति. [2] 'लुह् गार्ध्ये' इति बोपदेवः इति भानुजीदीक्षितः (पृ. ४१७). [3] Pt2 adds गर्ह्यं वदतीति गर्ह्यवादी. [4] K3, K5 add 'वद व्यक्तायां वाचि'. [5] K4, K5, K6 add सम्यग्गमनासमर्थस्य नाम. [6] सुखविरुद्धः स्वरोऽस्येत्यस्वरः K2, K4.

(विव.) लोहलः स्यादस्फुटवाक् । स्थानप्रयत्नवैकल्याद् अव्यक्तवचनस्य नाम । [1]लोहति । 'लुह्[2] गार्ध्ये' इत्यस्माद् भौवादिकाद् अलप्रत्यये लोहलः इति केचित् । लुनाति वाक्यं मध्ये भिनत्तीति लोहल इत्यन्ये[3] । लोहम् अतिमांसलतया काठिन्येन लोहसदृशं रसनाताल्वादिकर्म लातीति लोहलः (३. २. ३) इत्यपरे ।। गर्ह्यवादी तु कद्वदः । यो गर्ह्यं कुत्सितं वचनमल्पमेव वदति ताच्छील्येन स गर्ह्यवादी कद्वदः । [4]वाचाटस्तु बहुभाषीति कद्वदाद् भिन्नः । कुत्सितं वदतीति कद्वदः ।

'रथवदयोश्च' (६. ३. १०२) इति कोः कदादेशः ।। समौ कुवादकुचरौ । कुत्सितः परदोषप्रख्यापनशीलो वादो भाषणं यस्येति कुवादः इति सर्वानन्दः[5] । सुबोधिनी-कारस्तु द्वितीयमक्षरमोष्ठ्यवर्गप्रथमयुक्तं[6] पठित्वा कुत्सितः पदः पादसाध्यं गमन-मस्येति व्याख्याय तत्संवादत्वेन '[7]कुपदे कुचरः' इति वैजयन्तीसंवादं (पृ. २०५, श्लो. ४८) दर्शितवान् । कुत्सितं चरति भाषते गच्छति वा कुचरः । पचाद्यच् (३. १. १३४) ।। स्यादसौम्यस्वरोऽस्वरः । असौम्यः काकस्वरघर्घरादिरश्राव्य-स्वरो यस्येति असौम्यस्वरः । विरुद्धः श्रवणकटुः स्वरो यस्येति अस्वरः । अत्र नञ् विरुद्धार्थः[8] ।। ३७ ।।

[1] लुह्यते B5, Gm1. [2] लुह कत्थनादौ इति स्वामी Tv; कथनादौ Gm3. [3] 'लूञ् छेदने' Tj1. [4] प्रागुक्ताद् बहुभाषिणो वाचाटादस्य भेदः Tv, Gm3. [5] परदोष-कथनशीले कुवादद्वयम् । कर्मण्यणि कुवादः इति मुद्रितग्रन्थे (टी. स. पृ. २८). [6] कुपाद इति Tv. [7] कुपथे B5, Tj1; कुवदे इत्येव मुद्रितग्रन्थे. [8] तद्विरोधार्थः Gm1, Tv.

(पा.) लोहलः स्यादस्फुटवाक् । [1]म्लिष्टवचननामनी । [2]'तोक्किमाट लांडिवांडु'। 'लोहलोऽव्यक्तवाग् भवेत्' इति हलायुधः (अ. मा. २. २३२) ।। गर्ह्यवादी तु कद्वदः । [3]गर्ह्यवादी कद्वदः स्यात् ।। समौ कुवादकुचरौ । [4]निकृष्ट-वाचिनो नामनी[5] ।। स्यात्—अस्वरः । [6]हीनकण्ठस्य नामनी । 'ओरलुकुत्ति-कवांडु' ।। ३७ ।।

[1] स्खलद्वचन° A1. [2] B3 omits. [3] गर्ह्यवादिनाम B3. [4] म्लेच्छभाषण-वद्भाषिणः A1. [5] 'नेसचमाटलंवांडु' A1. [6] क्रोशध्वनिनामनी A1.

रवणः शब्दनो नान्दीवादी नान्दीकरः समौ ।
जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ।। ३८ ।।

(वि.) रवण इति—रौति ताच्छील्येन [1]शब्दायते रवणः । 'रु शब्दे' । शब्दयत इति शब्दनः । 'शब्द शब्दक्रियायाम्'[2] । ध्वनिकरणशीलस्य नामनी ।। नान्दीं मङ्गलवाद्यं वदतीति नान्दीवादी । नान्दीं मङ्गलपाठं करोतीति नान्दीकरः । मङ्गलपाठकस्य नामनी ।। जडति जडीभवतीति जडः । 'जल[3] घातने' । न जाना-तीत्यज्ञः । 'ज्ञा अवबोधने' । जडस्य[4] नामनी ।। एडो बधिरः, स चासौ मूकश्च

एडमूकः । अनेडमूक इति पाठे, एडमूको मूकसदृशो भवतीति *अनेडमूकः । अव्युत्पन्नदशायां[5] वक्तुं श्रोतुं वा [6]शिक्षितस्य नाम ।। ३८ ।।

[1] K_2, Pt_2 omit शब्दायते. [2] शब्दे K_2, K_4, K_5; आविष्कारे K_6. [3] जड जाड्ये K_5; शून्ये K_2. [4] अज्ञनामनी K_2, K_3, K_4. [5] भाषायां K_5. [6] च अशिक्षितस्य K_4, K_5. * अत्र नञ्शब्दः सादृश्यार्थे.

(विव.) रवणः शब्दनः। नरतिर्यगादिकारणभेदाविवक्षया [1]श्रोतृग्राह्य-शब्दप्रवृत्तिहेतोः करितुरगसमुद्रभेरीवीणादेर्नामनी । रौति शब्दायते ताच्छील्येन रवणः । 'रु शब्दे' ।। शब्दयतीति शब्दनः । 'शब्द शब्दे' [2] । चुरादिः । शब्दः शब्दनमिति तद्वृत्तौ । 'चलनशब्दार्थादकर्मकाद् युच्' (३. २. १४८) इत्युभयत्र[3] युच् । नान्दीवादी—समौ ।

'देवद्विजनृपादीनां [4]स्तुतिर्यत्र प्रवर्तते ।
आशीर्वचनसंयुक्ता [5]सा नान्दी नन्दिनो मुदे ।।' (ना. शा. ५. २४)
'नाटचादौ पठचते यत्तु सा नान्दी कथिता बुधैः ।
सा स्यात् पदैर्द्वादशभिरष्टाभिर्वाप्यलंकृता ।।'

इत्यादिना कोहलादिभिरुक्तलक्षणः पद्यविशेषो नान्दीत्युच्यते । यत्किंचिन्मङ्गल-सूचकं वाक्यमात्रं वा । तथा च 'नान्दीमुखं कर्म' इति मङ्गलमुखमित्यर्थः । तथा च 'मदकलकलविङ्कीकाकुनान्दीकरेभ्यः' इति मुरारिप्रयोगश्च (अ. रा. २. ४५) । नान्दीं वदति [6]ताच्छील्येनेति नान्दीवादी । 'सुप्यजातौ णिनिस्ताच्छील्ये' (३. २. ७८) इति णिनिः । नान्दीं मङ्गलं करोति वदतीति नान्दीकरः । 'दिवाविभानिशा . . . बहुनान्दी . . .' इत्यादिना (३. २. २) करोतेष्टप्रत्ययः ।। जडोऽज्ञे । अज्ञे मन्दबुद्धौ जडशब्दः ।

'इष्टं वानिष्टं वा [7]सुखमितरद्वा न वेत्ति यो मोहात् ।
तूष्णीकः परवशगः स भवति जडसंज्ञकः पुरुषः ।।'

इति । जलतीति जडः । 'जल [8]घात्ये' । घात्यं तीक्ष्णत्वाभावः । पचाद्यच् (३. १. १३४) । डलयोरभेदः।। एडमूकस्तु—अशिक्षिते। [9]संस्कृतभाषादौ कृतबुद्धिषु

व्यवहरत्सु यः स्वयमव्युत्पन्नतया तदीयवाक्यानि श्रोतुं प्रतिवक्तुं च समर्थो न भवति स एडमूक उच्यते। एडो बधिरो मूको वागिन्द्रियरहितः, एडश्चासौ मूकश्चेति [10]विशेषणसमासः। श्रुतावधारणशक्तिराहित्यप्रतिवचनशक्तिराहित्यलक्षणोभय सादृश्याल्लक्षणाशब्दोऽयम् एडमूक इति। केचित्तु—जडो ऽज्ञेऽनेडमूकः इति पठित्वा व्याचक्षते। एडमूक इव भवतीति अनेडमूकः। अत्र नञ्शब्द इवार्थे। तदुक्तम्—'नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थावगतेः' इति। अयमर्थः—नञ्युक्त-मिव युक्तं चान्यस्मिन् सदृशे वर्तते लोके तथैवार्थसंप्रत्ययादिति। 'न खल्वनेडमूका वा सर्वे एते महर्षयः' इति सुभूतिचन्द्रेण हर्षप्रयोगो दर्शितः॥ ३८॥

[1] अवर्णात्मक° Tv. [2] शब्दक्रियायाम् Tj1, Tj2. [3] B5, B6 omit उभयत्र. [4,5] नित्यं यस्मात् प्रयुज्यते, तस्मान्नान्दीति कीर्तिता in the printed text (p. 70). [6] Gm1, B6 omit ताच्छील्येन. [7] सुखदुःखे वा इति टीकासर्वस्वे (पृ. १९). [8] घातने Tv. [9] असंस्कृत° Tv. [10] विशेषेण° Gm3.

(पा.) रवणः शब्दनः। क्रोशनशीलनामनी॥ नान्दीवादी—समौ। [1]आशी-र्वादकनामनी॥ 'देवद्विजनृपादीनामाशीर्नान्दीति [2]कीर्त्यते' इति रभसकोशः। [3]खेलिवादकनामन्यपि स्याताम्। 'दुन्दुभिस्त्वानको भेरी भंभा[4] नासूश्च नान्द्यपि' इति वैजयन्ती (पृ. १४६, श्लो. १३३)॥ जडोऽज्ञः। अज्ञनामनी॥ अनेडमूकस्तु —अशिक्षिते। सम्यगुक्तं वक्तुं श्रोतुं चाशिक्षितः सन् स्ववक्रिमाणं यो न जहाति सोऽनेडमूकः स्यात्। [5]वाक्छ्रोत्रेन्द्रियविकलश्चेद् एडमूकः स्यात्। 'एडमूकस्त्ववा-क्छ्रुतिः' इति वैजयन्ती (पृ. २०२, श्लो. १३)॥ ३८॥

[1] प्रयोक्तृ for वादक in B3. [2] नान्दी प्रकीर्तिता B3. [3] A1 reads ताडक for वादक. [4] बंभा A1. [5] वागिन्द्रियश्रोत्रेन्द्रिय° A1.

तूष्णींशीलस्तु तूष्णीको नग्नोऽवासा दिगम्बरे।
निष्कासितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः॥ ३९॥

(वि.) तूष्णीमिति—तूष्णीं शीलमस्यास्तीति [1]तूष्णीकः। तूष्णीं-[2] स्वभावस्य नामनी॥ न लज्जते व्रीडयतीति नग्नः। 'ओलस्जी [3]व्रीडने'। अविद्य-मानं वासोऽस्येति अवासाः। दिश एवाम्बरं यस्य सः दिगम्बरः। वस्त्रहीनस्य

नामानि ।। निष्कास्यते निर्वास्यत[4] इति निष्कासितः । 'कस गतौ' । अवकृष्यते बलात्कारेणेति अवकृष्टः । 'कृष विलेखने' । गृहान्निर्वासितस्य नामनी ।। अपध्वस्यत इत्यपध्वस्तः । 'ध्वंसु भ्रंसु [5]अवस्रंसने' । [6]धिक्कृतं तव वर्तनम् इत्येवमुक्तो धिक्कृतः । न्यक्कृतस्य नामनी ।। ३६ ।।

[1] Pt2 adds तूष्णींशीलः. [2] K5, Pt2 omit व्रीडयति. [3] व्रीडे K3; नजते नग्नः, 'नज व्रीडने' K6; ओनजी' K5. [4] K5 omits. [5] अधःपतने K4; गतौ K5. [6] धिगिति कृतः उच्चारितः, 'डुकृञ् करणे', करोतिरत्र उच्चारणे Pt2.

(विव.) तूष्णींशीलस्तु तूष्णीकः । तूष्णीमित्यव्ययं वाङ्मुद्रणे वर्तते । तदेव शीलं यस्य सः तूष्णींशीलः । 'तूष्णीमः शीले को मलोपश्च' (वा. ५. ३. ७१) इति ताच्छील्ये कप्रत्यये तूष्णीकः । मौनशीलस्य नामनी ।। नग्नोऽवासा दिगम्बरः । परिधानप्रावारोभयवस्त्ररहितः पुरुषो नग्नादिशब्दैरुच्यते[1] । परिधानराहित्येन सभामध्ये लज्जत इति[2] नग्नः । 'ओलस्जी व्रीडे' । क्तप्रत्ययः (३. ४. ७२) । 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम् । कुत्वे सति गकारः । [3]वर्णव्यत्ययाद् नग्न इति सर्वानन्दः । [4]नजिधातोरेवेति सुबोधिनीकारः । अथवा 'छन्दांसि वै नग्ना' इति श्रुतेः नग्नशब्देन वेदा उच्यन्ते । 'तस्माद् यज्ञोपवीत्येवाधीयीत' इति श्रुतेः विवसनस्य वेदाध्ययनाधिकाराभावाद् अविद्यमानवेदत्वेन नग्न इति ।। अविद्यमानवस्त्रत्वाद् अवासाः ।। दिश एवाम्बरं वस्त्रसदृशमस्येति दिगम्बरः ।। निष्कासितोऽवकृष्टः स्यात् । गृहग्रामादिभ्यो बहिर्निःसारितस्य नामनी । निरित्युपसर्गो निषेधे । [5]तत्पूर्वात् 'कस गतौ' इति धातोर्णिचि निष्ठायाम् 'इसुसोः सामर्थ्ये' (८. ३. ४४) इति षत्वे च निष्कासितः । समीपस्थितिं निषिध्य बहिर्निःसारित इत्यर्थः ।। अवज्ञया कृष्यते बहिः क्रियते इत्यवकृष्टः[6] ।। [7]अपध्वस्तस्तु धिक्कृतः । अल्पापराधेषु राजादिभिः 'तव चरित्रं धिक्' इति प्राप्तवाग्दण्डो धिक्कृतः । धिगिति कृत उक्त इत्यर्थः । सः अपध्वस्तः, अपध्वस्यते स्म धिक्कारेण न्यक्क्रियते स्म अपध्वस्तः । क्तः[8] ।। ३६ ।।

[1] कथ्यते B5, Tj1, Tj2. [2] इव Tv. [3] लग्न एव वर्णव्यत्ययान्नग्नः इति मुद्रितग्रन्थे (टी. स. पृ. २०). [4] 'ओनजी व्रीडे,' क्तः (३. ४. ७२). [5] निःपूर्वात् Tv. [6] B6 adds 'कृष विलेखने', क्तः. [7] Tv omits the word. [8] Tj1 adds 'ध्वंसु अधःस्रंसने गतौ च'.

(पा.) तूष्णींशीलस्तु तूष्णीकः । तूष्णींस्वभावमापन्नः तूष्णीकः [1]स्यात् ।। नग्नोऽवासा दिगम्बरः । अवसननामानि । जिनमुनिनामान्यपि स्युः । [2]'क्षपणः श्रमणो नग्नो नग्नाटश्च दिगम्बरः' इति वैजयन्ती (पृ. २०२, श्लो. १५) ।। निष्कासितोऽवकृष्टः स्यात् । [3]गृहात् परिहृतस्य नामनी ।। अपध्वस्तस्तु धिक्कृतः । निर्भर्त्सनेन [4]बहिष्कृतस्य नामनी ।। ३९ ।।

[1] मौनिनामनी B3. [2] क्षपणश्रमणौ इति मुद्रितग्रन्थे. [3] अर्धचन्द्रहस्तप्रहारगृहादिनिष्कासितोऽवकृष्टः स्यात् A1. [4] A1 omits निर्भर्त्सनेन.

आत्तगर्वोऽभिभूतः स्याद् दापितः साधितः समौ ।
[1]प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृतः ।। ४० ।।
निकृतः स्याद् विप्रकृतो विप्रलब्धस्तु वञ्चितः ।
मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ।। ४१ ।।

(वि.) आत्तगर्व इति—नृपादिना आत्तो [2]हृतो गर्वो यस्येत्यात्तगर्वः । आत्तगन्ध इति वा पाठः । अभिभूयत इत्यभिभूतः । राज्ञा हृताभिमानस्य नामनी ।। राज्ञा दाप्यत इति दापितः । 'डुदाञ् दाने' । साध्यते [3]साक्ष्यादिनेति साधितः । [4]'साध संसिद्धौ' । [5]राज्ञा विवादेऽपराजितस्य नामनी ।। प्रत्यादिश्यते निराक्रियते प्रत्यादिष्टः । 'दिश अतिसर्जने' । निराकृतस्य नाम । निरस्यते स्म निरस्तः । 'असु क्षेपणे' । प्रत्याख्यायते स्म प्रत्याख्यातः । 'ख्या प्रकथने' । निराक्रियते स्म निराकृतः । 'डुकृञ् करणे' । विप्रकृतश्च । विप्रलभ्यते स्म विप्रलब्धः । वञ्चयते स्म वञ्चितः । 'डुलभष् प्राप्तौ' । 'वञ्चु प्रलम्भने' । मनसि हतः मनोहतः । मनसि प्रतिहन्यते स्म प्रतिहतः । 'हन हिंसागत्योः' । मनसि प्रतिबध्यते स्म प्रतिबद्धः । 'बन्ध बन्धने' । हन्यते स्म हतः । 'हन हिंसागत्योः' ।। ४०-१ ।।

[1] Most of the MSS. consider the three hemistichs beginning with प्रत्यादिष्टः as interpolations and omit them. [2] K3, K5 omit. [3] साक्षिवाक्यादिना K5. [4] K5 adds राध. [5] K3 adds °आदि°.

(विव.) आत्तगर्वोऽभिभूतः स्यात् । महायुद्धेषु पलायनेन, जल्पवितण्डादौ परवादिकृतनिग्रहप्रापणेन, महापराधेषु धनदण्डमुण्डादिना वा [1]हृताभिमानोऽभि-

भूतः[2]। अभिभूयते तिरस्क्रियते स्म अभिभूतः। क्तः। आत्तगन्ध इति केचित् पठन्ति। 'गन्ध अर्दने' इति धातोः पीडावचनात् पचाद्यचि (३. १. १३४) गन्धः। आत्तः स्वीकृतो गन्धो दुःखं येनेति आत्तगन्धः॥ दापितः साधितः समौ। अर्थविवादेषु पराजितस्यैते नामनी। विवादास्पदीभूतं धनं धनिने दाप्यते स्मेति दापितः। ददातेर्णिचि पुगागमे (७. ३. ३६) च निष्ठा। सुभूतिचन्द्रस्तु[3]—द्वितीयमक्षरं प्रथमान्तस्थं पठित्वा व्याचष्ट; 'दय दानगतिरक्षणहिंसादानेषु' इति धातोरिदं रूपमिति पुरुषोत्तम इति। सर्वानन्दस्तु[4] पाठद्वयेनापि व्याख्यातवान्॥ प्रतिवादिना साक्षिलेख्यादिभिः साध्यते स्मेति साधितः। अत्राह सुभूतिचन्द्रः—'साधिताधिक्षिप्तशब्दयोः (श्लो. ४०, ४२) मध्ये क्वचित् पुस्तके,

"प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृतः।
निकृतः स्याद् विप्रकृतो विप्रलब्धस्तु वञ्चितः।
मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः॥"

इति सार्धश्लोकस्य पाठो दृश्यते। स त्ववान्तरे[5] प्रक्षिप्तः। पुरातनव्याख्यातृभिः अव्याख्याततत्वाद्' इति। दशटीकासर्वस्वकारः सर्वानन्दोऽपि प्रत्यादिष्टादिकमर्धत्रयं परित्यक्तवानेव। तथापि इदानींतनपुस्तकेषु केषुचिद् विद्यमानत्वात् सुबोधिनीकारेण[6] व्याख्याततत्वाच्च अस्माभिरपि तद्व्याख्यानुसारेण[7] विविच्यते[8]। तत्र प्रत्यादिष्टादिचतुष्टयं प्रागेकदा पराभूते पुनरपि प्राड्न्यायादिना पराभूते वर्तत इति[9]। प्रतीत्युपसर्गः पौनःपुन्ये, निरिति निश्चये यथायथम् उपसर्गवशात् पूर्वोक्त एवार्थे वर्तमानेभ्यः 'दिश अतिसर्जने', 'असु क्षेपणे', 'ख्या प्रकथने', 'डुकृञ् करणे' इत्येतेभ्यो धातुभ्यः कर्मणि क्तप्रत्यये क्रमेण प्रत्यादिष्टः, निरस्तः, प्रत्याख्यातः, निराकृत इत्येते चत्वारः शब्दा भवन्ति। निराकृतादिद्वयं परकृततिरस्कारदुःखार्थे वर्तते। निपूर्वो विप्रपूर्वो वा करोतिधातुः शत्रुकृततिरस्कारसंजाते दुःखविशेषे वर्तते। तथा च 'नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः' इति भारविः (किरा. ३. ४४)। 'तस्मिन् विप्रकृताः काले तारकेण दिवौकसः' इति कालिदासश्च (कु. सं. २. १)। ततः कर्मणि निष्ठायां निकृतो विप्रकृतश्च॥ विप्रलब्धादिद्वयम् अनाप्तवचनादिना प्रमाणाभासेन विसंवादिज्ञानयुक्ते। उपसर्गद्वयवशेन वञ्चनार्थात् लभतेः कर्मणि निष्ठायां विप्रलब्धः। वञ्च्यते स्म वञ्चितः। 'वञ्चु प्रलम्भने'। प्रलम्भनं मिथ्याज्ञानमिति [10]धातुवृत्तौ (मा. धा. पृ. ६३)।

मनोहतादिचतुष्कं प्रतिकूलार्थप्राप्त्या निरुत्साहे मनसि हतः ताडित इव भवतीति मनोहतः। प्रतिहन्यते स्म प्रतिहतः। प्रतिबध्यते स्म निरुद्धः[11] क्रियत इति प्रतिबद्धः[12]। निश्चेष्टत्वेन हतसदृशतया हतः ॥ ४०-१ ॥

[1] अपहृत° Tv. [2] Tv adds इत्युच्यते. [3] Gm_1 omits सुभूति°. [4] आत्तगन्ध इति पाठ इत्यन्यः (टी. स. पृ. २०). [5] अवान्तरः B_5, B_6. [6] Tj_2, Tv add साधितपदानन्तरं. [7] B_6 adds किंचिदस्माभिः. [8] Gm_1 omits 3 lines. [9] Tv adds सुबोधिनी. [10] °वृत्तिः Tv; प्रलम्भनं मिथ्याफलाख्यानम् इति मुद्रितग्रन्थे. [11] निरुद्धोद्योगः Tv. [12] Tv adds 'बध संयमने'.

(पा.) आत्तगन्धोऽभिभूतः स्यात्। तिरस्कृतनामनी ॥ दापितः साधितः समौ। अत्यन्तनिर्बन्धेन क्लेशितनामनी[1] ॥ [2]प्रत्यादिष्टो—निराकृतः। निराकृतनामानि ॥ निकृतः स्याद् विप्रकृतः। अपकृतस्य नामनी ॥ विप्रलब्धस्तु वञ्चितः। प्रतारितस्य नामनी ॥ मनोहतः—हतश्च सः। हतमनस्कस्य नामानि ॥ ४०-१ ॥

[1] 'कुरकुरपड्डवांड्' A_1. [2] A_1 omits the three hemistichs.

अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ।
आपन्न आपत्प्राप्तः स्यात् कान्दिशीको भयद्रुतः ॥ ४२ ॥

(वि.) अधिक्षिप्त इति—अधिक्षिप्यते तिरस्क्रियत इत्यधिक्षिप्तः। [1]प्रतिक्षिप्यत इति प्रतिक्षिप्तः। 'क्षिप प्रेरणे'। सभायां जितस्य कूटसाक्ष्यादेर्नामनी ॥ कील्यते स्मेति कीलितः। 'कील बन्धने'। संयम्यते बध्यते स्म संयतः। 'यम उपरमे'। [2]रज्ज्वादिना बद्धचोरादेर्नामानि ॥ आपद्यते आपदं[3] प्राप्नोतीति आपन्नः। 'पद गतौ'। आपदं प्राप्तस्य नाम[4] ॥ कां दिशं व्रजामीति विह्वलो [5]भवतीति कान्दिशीकः[6]। [7]भयद्रुतस्य नाम ॥ ४२ ॥

[1] K_2, K_5 omit. [2] K_4 adds बध्यते स्म बद्धः. [3] आपदः K_3. [4] Pt_2 adds आपदं प्राप्तः आपत्प्राप्तः, 'आप्लृ व्याप्तौ'. [5] K_5 omits भवति. [6] कां दिशं गच्छामीति चिन्तयन् पलायितः Pt_2. [7] Pt_2 adds भयेन द्रुतः भयद्रुतः, 'द्रु गतौ'.

(विव.) अधिक्षिप्तः प्रतिक्षिप्तः। सभामध्ये कूटसाक्षित्वादिदोषेण सभ्यैः परेण वा निन्दितस्य नामनी। 'क्षिप प्रेरणे' इत्यस्माद उपसर्गवशेन[1] निन्दारूपार्थ-

त्वाद् धातोः कर्मणि क्तप्रत्यये (३. २. १०२) अधिक्षिप्तः प्रतिक्षिप्तश्च ।। बद्धे कीलितसंयतौ । चौर्याद्यपराधेषु रज्जुशृङ्खलादिना [2] बद्धस्य नामनी । कील्यते बध्यते स्म कीलितः । 'कील बन्धने' । क्तः । रज्ज्वादिना संयम्यते स्म संयतः । 'यमु उपरमे' । क्तप्रत्यये सति अनुनासिकलोपः[3] (६. ४. ३७) ।। आपन्न आपत्प्राप्तः स्यात् । राज्यभ्रंशसर्वस्वनाशादिदुर्दशां प्राप्तस्य नामनी । पद्यतिरत्र आङ्पूर्वो [4]विपत्तिवचनः । तथा चोक्तम्—'विपत्त्यां[5] विपदापदौ' इति (२. ८. ८२) । आपद्यते स्म आपन्नः । 'पद[6] गतौ' । 'रदाभ्याम् . . .' इत्यादिना (८. २. ४२) निष्ठानत्वम् ।। आपदं प्राप्तः आपत्प्राप्तः । 'द्वितीया[7] श्रित . . .' इत्यादिना (२. १. २४) समासः ।। कान्दिशीको भयद्रुतः । शात्रवादिनिमित्ताद् भयात् [8]कां दिशं व्रजामीति चिन्तयन् पलायितः कान्दिशीकः । पृषोदरादित्वात् (६. ३. १०९) साधुः ।। ४२ ।।

[1] अधिप्रत्युपसर्गवशात् Gm1, Gm3.　[2] बद्धे कीलितद्वयम् B5, B6.　[3] 'अनुदात्तोपदेश . . . झलि क्ङिति'.　[4] Tv adds उपसर्गमहिम्ना.　[5] 'विपत्तौ' इत्यस्मिन् ग्रन्थे.
[6] पद्लृ B5, B6.　[7] 'प्राप्तापन्ने च द्वितीयया' (२. २. ४) इति क्षीरस्वामी (पृ. २४४).　[8] Tj1, Tj2, Tv omit the five words कां, etc.

(पा.) अधिक्षिप्तः प्रतिक्षिप्तः । [1]आरोपितदोषस्य नामनी ।। बद्धे कीलितसंयतौ । [2]शृङ्खलादिना बद्धस्य नामनी ।। आपन्न आपत्प्राप्तः स्यात् । [3]विपदाविष्टनामनी ।। कान्दिशीको भयद्रुतः । भयात् पलायितस्य नामनी[4] ।। ४२ ।।

[1] चौर्यादिदोषेणारोपित° A1.　[2] कृतदारुमयपादबन्धनस्य A1.　[3] °नष्ट° B3
[4] यो नष्टः सन् दिगन्तानभिद्रवति स कान्दिशीकः स्यात्, 'चडिपारिनवांडु' A1.

आक्षारितः क्षारितोऽभिशस्ते संकसुकोऽस्थिरे ।
व्यसनार्तोपरक्तौ द्वौ विहस्तव्याकुलौ समौ ।। ४३ ।।

(वि.) आक्षारित इति—आक्षार्यते [1]व्याकुप्यते आक्षारितः । क्षारितश्च । [2]'क्षर संचलने ।' अभिशस्यते [3]वाक्यसायकैः प्रतुद्यत इत्यभिशस्तः । 'शसु हिंसायाम्' । वाक्यपारुष्यात् ब्रह्महत्यादिना[4] दूषितस्य नामनी ।। [5]संकसति इतस्ततो गच्छतीति संकसुकः । 'कस गतौ' । [6]'अस्थिरस्य कूटसाक्ष्यादेर्नाम ।। [7]व्यसनमियर्ति

प्राप्नोतीति व्यसनार्तः । 'ऋ गतौ' । दुराग्रहेण मुखमुपरज्यतेऽस्येति उपरक्तः । 'रञ्ज रागे' । प्राप्तव्यसनस्य नामनी ।। [8]विगतव्यापारौ हस्तौ यस्येति विहस्तः । व्याकुल्यते मनोऽस्येति व्याकुलः । 'कुल संस्त्याने' । किंकर्तव्यतामूढस्य नामनी ।। ४३ ।।

[1] स्वरूपाच्चाल्यते Pt2. [2] K2, K3, K5 omit. [3] वाग्बाणैः Pt2. [4] K5 omits °ना°. [5] सम्यक् कसति Pt2. [6] Pt2 adds स्थिरो न भवतीति अस्थिरः. [7] व्यसनेन ऋतः Pt2. [8] व्यापाररहिताविव K5; J1 omits two lines.

(विव.) आक्षारितः—अभिशस्ते । अगम्यागमनमुद्घोष्य[1] दूषिते [2]आक्षारितद्वयम् । आक्षार्यते[3] दुःसहवाक्यैः संचाल्यते स्म आक्षारितः, क्षारितश्च । णिचि कर्मणि क्तः । अभिशस्यते तीव्रवाक्यैरित्यभिशस्तः । 'शसु हिंसायाम्' । क्तः[4] ।। संकसुकोऽस्थिरे । असंदिग्धेऽप्यर्थे यः सदा संदिग्धे तत्र चलप्रकृतौ संकसुकशब्द इति [5]सर्वानन्द-सुभूतिचन्द्रौ (टी. स. पृ. २१) । सम्यक् कसति चलतीति संकसुकः । 'कस गतौ' । 'समि कस उकन्' (उ. २. ३२) इति उकन्प्रत्ययः ।। व्यसनार्तोपरक्तौ द्वौ । समावित्यर्थः । द्यूतमृगयादावत्यन्ताग्रहो व्यसनम् । तेन ऋतः प्राप्तो व्यसनार्तः । 'ऋते च तृतीयासमासेऽवर्णाद् वृद्धिर्वक्तव्या' (वा. ६. १. ८९) इति पूर्वपरयोर्वृद्धिः । व्यसनेनार्त इति वा ।। द्यूतादिविषयदुराग्रहेणोपरज्यत इति उपरक्तः । अथवा राहुणा ग्रस्तोऽर्कश्चन्द्रो वा । अयमपि दुस्त्यजदुराग्रहग्रहग्रस्तत्वेन तत्सादृश्यादुपरक्त इत्युक्तः । विहस्तव्याकुलौ समौ । शोकादिना किंकर्तव्यतामूढवाचकत्वेन[6] समावित्यर्थः । निर्व्यापारतया विगताविव हस्तावस्येति विहस्तः ।। विशेषेणाकीर्णं कुलमस्येति व्याकुलः ।। ४३ ।।

[1] उद्घाट्य Tj1, Tj2. [2] शब्दद्वयम् Gm1, Gm3. [3] Tv adds 'क्षर संचलने'. [4] Gm3 adds 'घृषिशसी वैयात्ये' (७. २. १९) इति नेट्. [5] असंदेहविषयेऽपि यः संदेहकृत् इति मुद्रितग्रन्थे. [6] °मूढस्य पर्यायौ Gm3, Tv.

(पा.) आक्षारितः—अभिशस्ते । अभिशस्तनामानि । 'बीडिंपवडिनवांडु' ।। अनुक्तम्—'आक्षिप्तो हतकः समौ' । [1] सर्वैर्नष्ट इत्युक्तस्य[2] नामनी । '[3]चड्डुमामाटलपाडवांडु' ।। संकसुकोऽस्थिरे । क्षणिकप्रकृतिकः संकसुकः स्यात् ।।

व्यसनार्तोपरक्तौ द्वौ । [4]दण्डपीडितस्य नामनी ।। विहस्तव्याकुलौ समौ । अस्वस्थहृदयनामनी ।। ४३ ।।

[1] सर्वैरपि A1.　[2] A1 adds पुंसः.　[3] B3 omits.　[4] दण्डपीडया स्पृष्टस्य A1.

विक्लवो विह्वलः स्यात् तु विवशोऽरिष्टदुष्टधीः ।
कश्यः कशार्हे सन्नद्धे त्वाततायी वधोद्यते ।। ४४ ।।

(वि.) विक्लव इति—विक्लवते [1]कातरीभवतीति विक्लवः । 'क्लब कातर्ये' । विरुद्धलक्षणया ह्वलतीति विह्वलः[2] । 'ह्वल [3]चलने' । [4]भयावेशादुत्पन्नप्रतिभयस्य नामनी ।। विरुद्धं चिरं [5]जीवितं वष्टि कामयत इति विवशः । 'वश कान्तौ' । अरिष्टैरत्यासन्नमरणचिह्नैर्दुष्टबुद्धेर्नाम ।। कशामर्हतीति कश्यः[6] । [7]कशाताडनार्हस्य नाम ।। आततं विस्तृतमधिकमपराधमेति[8] इत्याततायी[9] । 'इण् गतौ' । यो वधोद्यतः आसन्नद्धः तस्य नाम ।। ४४ ।।

[1] शक्तो न भवति K2, Pt2.　[2] विरुद्धं ह्वलति K3, K5.　[3] संचलने Pt2.
[4] °आवेशेन J1, K5.　[5] Pt2 omits चिरं जीवितं.　[6] Pt2 adds कशार्हश्च.
[7] कश° J1.　[8] पाप° for अपराध° in Pt2.　[9] Pt2 adds आतं पलायमानं तयते जिघांसया गच्छतीति, 'तय गतौ'.

(विव.) विक्लवो विह्वलः । भयादिनिमित्तेन स्वशरीरधारणेऽपि असमर्थस्य[1] नामनी । विक्लबते शक्तो न भवतीति विक्लबः । 'धातुपारायणेऽपठितोऽपि क्लबिधातुरुन्नेयः, पाठस्य प्रदर्शनार्थत्वात्' इति सुबोधिनीकारः[2] । विक्लव इत्यव्युत्पन्नं पदमिति केचित् ।। विशेषेण ह्वलति चलतीति विह्वलः । 'ह्वल संचलने' । अच् (३. १. १३४) ।। स्यात्तु—दुष्टधीः । अरिष्टम् आसन्नमहाव्यापत्तिलिङ्गदर्शनम् । तेन दुष्टा कातरा धीर्बुद्धिः यस्य स विवश इत्युच्यते । विविधमरिष्टनिरसनोपायं वष्टि कामयते विवशः । 'वश कान्तौ' । पचाद्यच् (३. १. १३४) ।। कश्यः कशार्हः । कृतापराधस्य चोरादेर्नामनी । 'अश्वादेस्ताडनी कशा' इति प्रागुक्तां (२. १०. ३१) तामर्हतीति कश्यः । 'दण्डादिभ्यो यः' (५. १. ६६) इति यः ।। संनद्धे—वधोद्यते । अत्र वधोद्यतपदेन—

'अग्निदो गरदश्चैव [3]शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव[4] षडेते[5] आततायिनः ।।' (शु. नी. ३. ४२)

इति स्मृत्युक्ताः परानिष्टकारिणो गृह्यन्ते । संनद्धे कृतसंनाहे गृहदाहाद्यनिष्ट-कारिणि आततायिशब्दः । आङ्पूर्वाद् 'अत सातत्यगमने' इति धातोः पचाद्यच् (३. १. १३४) । आतशब्देन समन्ततः पलायमानः उक्तः, तं तयते जिघांसया गच्छतीति आततायी । 'तय गतौ' । 'सुप्यजातौ णिनिः' (३. २. ७८) । आततं यथा भवति तथा अयति ताच्छील्येन गच्छतीति वा ।। ४४ ।।

[1] असमर्थे विक्लवादिद्वयम् Gm3, Tv. [2] 'विक्लबते कातरीभवतीति विक्लबः, क्लबिधातुर्यद्यपि धातुपाठेऽनुक्तः, तथापि धातुपाठो धातूनां प्रदर्शनार्थः, न पुनरपठिता न धातव इति, परिसंख्यानार्थं इति प्रयोगबाहुल्यादुन्नेयोऽपि धातुरेव'. *Subodhinī* MS. Adyar Library, Viśvabhāratī MS. 657. [3, 4, 5] शस्त्रोन्मत्तः, चैतान्, षड् विद्यात् इति मुद्रितग्रन्थे.

(पा.) विक्लबो विह्वलः । विह्वलनामनी ।। स्यात्तु—दुष्टधीः । [1]अशुभेन मतिभ्रष्टो विवशः स्यात् ।। कश्यः कशार्हे । कशाघातार्हः कश्यः स्यात्[2] ।। संनद्धः—वधोद्यते । वधोद्युक्तनामनी ।। ४४ ।।

[1] शस्त्रघातादिभिः A1. [2] A1 adds प्रघणघातार्हः प्रघण्यः । अश्वचोदनदण्डचः.

द्वेष्ये त्वक्षिगतो वध्यः शीर्षच्छेद्य इमौ समौ ।
विष्यो विषेण यो वध्यो मुसल्यो मुसलेन यः ।। ४५ ।।

(वि.) द्वेष्य इति—द्वेषमर्हतीति द्वेष्यः[1] । 'द्विष अप्रीतौ' । अक्षिगत-शूकादिवत्[2] पीडाकरत्वाद् अक्षिगतः । [3]द्वेष्यनामनी ।। वधमर्हतीति वध्यः । शीर्षच्छेदमर्हतीति शीर्षच्छेद्यः । वधार्हस्य नामनी ।। विषेण वध्यो विष्यः । [4]विषवध्यस्य नाम ।। [5]मुसलेन [6]वधमर्हतीति मुसल्यः । मुसलवध्यस्य नाम ।। ४५ ।।

[1] द्वेष्टुं योग्यः Pt2. [2] J2, Pt2 add °सिकत°. [3] द्वेष्यस्य K5. [4] विषेण K5. [5] J1, J2 omit the word. [6] वध्यः Pt2.

(विव.) द्वेष्ये त्वक्षिगतः । द्वेषविषयमहानिष्टकारिणि अक्षिगतः । नेत्र-मध्यपतिततृणसिकतादिवद् दुःखकारित्वसादृश्याद् अक्षिगत इति रूढलक्षणा ।। वध्यः—इमौ समौ । ब्रह्महननादिमहापराधकरणेन वधरूपदण्डार्हस्य वाचका-

वित्यर्थः । वधमर्हतीति वध्यः । 'दण्डादिभ्यो यः' (५. १. ६६) ।। [1]शीर्षच्छेदं शिरसश्छेदनमर्हतीति शीर्षच्छेद्यः । 'शीर्षच्छेदाद्यच्च' (५. १. ६५) इति यत् ।। विष्यो —वध्यः । यो निगूढापकारकारी[2] विषप्रयोगव्यतिरिक्तोपायासंभवाद् विषप्रयोगेणैव वध्यो भवति महामात्यादिः स विष्य उच्यते । 'नौवयोधर्मविषमूल . . .' इत्यादिना (४. ४. ९१) विषशब्दात् तृतीयासमर्थाद् वध्यार्थे यत्प्रत्ययः ।। मुसल्यो मुसलेन यः । वध्यत इत्यनुवर्तते । यः सुवर्णस्तेयादिप्रायश्चित्ताद्यर्थं मुसलेनैव वध्यः स मुसल्यः । 'दण्डादिभ्यो यः' (५. १. ६६) [3]इति यः ।। ४५ ।।

[1] शीर्षस्य शिरसः छेदः, तमर्हतीति Gm3, Tv. [2] °अपराध° B5, B6. [3] Tj1, Tj2 omit इति यः.

(पा.) द्वेष्ये त्वक्षिगतः । [1]द्वेष्टुं [2]योग्यनामनी । 'अनिष्टो दुर्भगोऽपि सः' । एते द्वे च ।। वध्यः—इमौ समौ । शिरश्छेत्तुं योग्यस्य नामनी ।। विष्यो—वध्यः । विषेण हन्तुं [3]योग्यो विष्यः स्यात् ।। मुसल्यो मुसलेन यः । मुसलेन [4]वध्यस्य नाम ।। अनुक्तम्—'स त्वायःशूलिको यस्तु साध्यः स्यात् तीक्ष्णसाधनैः' । तीक्ष्णसाधनैः साधयितुं योग्य आयःशूलिकः स्यात् ।। ४५ ।।

[1] विद्वेष्टुं A1. [2] योग्यस्य B3. [3] योग्यस्य नाम B3. [4] हन्तुं योग्यो मुसल्यः स्यात् A1, C1.

शिश्विदानोऽकृष्णकर्मा चपलश्चिकुरः समौ ।
दोषैकदृक् पुरोभागी निकृतस्त्वनृजुः शठः ।। ४६ ।।

(वि.) शिश्विदान इति—श्विन्दते [1]कर्मणि [2]शुद्धत्वं प्राप्नोतीति शिश्विदानः । 'श्विदि श्वैत्ये' । अकृष्णं शुद्धं कर्म यस्येति [3]अकृष्णकर्मा । शुद्धकर्मणो नामनी ।। [4]चपति मानसस्य प्रीतिमापादयतीति चपलः । 'चप [5]सान्त्वने' । [6]चरित्रे चकते प्रीणातीति चिकुरः । 'चक तृप्तौ प्रतिघाते च' । चञ्चलस्य विद्युत्प्रकाशादेर्नामनी ।। पुरः ताच्छील्येन दोषं भजति गृह्णातीति पुरोभागी । 'भज सेवायाम्' । [7]दोषैकग्राहिणो नामनी ।। आशां निकृणोति हिनस्तीति निकृतः । 'कृञ् हिंसायाम्' । कुटिलहृदयत्वाद् अनृजुः । शठतीति शठः । 'शठ कैतवे'[8] । कुटिलहृदयस्य नामानि ।। ४६ ।।

[1] कर्मणा शुद्धो भवति K3, Pt2. [2] शुद्धं J1, J2. [3] Pt2 adds नान्तः. [4] चोपति, 'चुप मन्दायां गतौ' Pt2. [5] संचलने K5. [6] चरिते K5. [7] Pt2 adds दोषमेकं पश्यति दोषैकदृक्, 'दृशिर् प्रेक्षणे'. [8] हिंसासंक्लेशनकैतवेषु J1, J2.

(विव.) शिश्विदानः कृष्णकर्मा । कृष्णं पापं तथाभूतं कर्म यस्य सः कृष्णकर्मा पापाचरणशीलः । शिश्विदान इति सर्वानन्दसुभूतिचन्द्रौ (टी. स. पृ. २२) । सुबोधिनीकारस्तु शिश्विदानोऽकृष्णकर्मा इति पठित्वा पापादन्यद् अकृष्णं निष्पापं कर्म यस्यासौ अकृष्णकर्मेति व्याख्यातवान् । अत्र च व्याख्याने 'सुकृती पुण्यवान्' (श्लो. ३) इत्यनेनास्य पौनरुक्त्यं परिहरणीयम् । [1]कापुरुषनामानुशासनप्रस्तावे तद्विलक्षणस्यास्य प्रायपाठोऽपि सोढव्यः । चिरंतनप्रयोगदर्शनाद् निघण्ट्वन्तरगवेषणाच्च शब्दार्थनिर्णयोऽधिगन्तव्यः । अथवा अरिष्टशब्दस्य मिथोविरुद्धशुभाशुभार्थद्वयवत्, शिश्विदानशब्दोऽपि पुण्यापुण्यकृल्लक्षणोभयार्थवाचक इत्यवधातव्यम् । श्वेतते पापविशेषाद् वैवर्ण्यं [2]प्राप्नोतीति श्विततेः 'छन्दसि लिट्' (३. २. १०५) इति लिट् । 'लिटः कानज्वा' (३. २. १०६) इति कानजादेशः । 'लिटि धातोरनभ्यासस्य' (६. १. ८) इति द्विर्वचनम् । कानच्प्रत्ययस्य भाषायामप्यस्ति प्रयोगः । तथा च 'लिटः कानज्वा' इति सूत्रे न्यासकारः (पञ्जिका पृ. ६३२)—'असंयोगान्तेभ्यो [3]हि "असंयोगाल्लिट् कित्" (१. २. ५) इत्येव कित्त्वं सिद्धं, संयोगान्ता अपि भाषायामेव[4] प्रयोजयन्ति "न छन्दसि" इत्यादिना महता संदर्भेण भाषायामेव कित्त्वमर्थवद्भवति' इति प्रत्यपीपदत् ॥ चपलश्चिकुरः समौ । समौ इत्यनवस्थितचित्तस्य वाचकावित्यर्थः । [5]प्रागुक्तः संकसुकः संदिहानस्वभावः[6] (श्लो. ४३) । अयं तु नित्यचञ्चलनिश्चयस्वभाव इति ततोऽस्य भेदः । 'चुप मन्दायां गतौ' । चोपति । 'चुपेरच्चोपधायाः' (उ. १. ११६) इति कलप्रत्यये उपधाया अकारश्च । अथवा 'चप सान्त्वने' इति धातोः पचाद्यचि (३. १. १३४) [7]चपः प्रियवादी, तं लात्यात्मसात्करोतीति चपलः (३. २. ३) । चिकुरः केशेषु व्युत्पादितः[8] (२. ६. ९५) ॥ दोषैकदृक् पुरोभागी । एकस्मिन्नेव दृङ् मनो यस्येत्येकदृक् । दोष एव एकदृक् दोषैकदृक् । न तु वस्तुगतं गुणमाद्रियत इत्यर्थः ॥ पुरोऽग्रतो दोषमेव भजति जानातीति पुरोभागी । 'भज सेवायाम्' । 'संपृचानुरुधा...' इत्यादिना (३. २. १४२) ताच्छील्ये घिनुण् । 'चजोः कु घिण्ण्यतोः' (७. ३. ५२) इति कुत्वम् ॥ निकृतस्त्वनृजुः शठः । निगूढापकारकारिणो नामानि । निगूढं कृणोति हिनस्तीति निकृतः । 'कृञ् हिंसायाम्' । क्तः। निकृष्टं

कृतमस्येति वा निकृतः ।। ऋजोः कपटरहितादन्योऽनृजुः । अथवा 'अनुदरा कन्या' इतिवत् नञि ईषदर्थे मनोवाक्कायकर्मणां मध्ये वाङ्मात्रेणैवार्जवप्रकाशनाद् ईषद्भाव आर्जवस्य । 'शठ कैतवे' इति धातोः पचाद्यचि (३. १. १३४) शठः । 'गूढविप्रियकृच्छठः' इत्यालंकारिकाः[9] ।। ४६ ।।

[1] कुपुरुष° B6, Tj2. [2] प्राप्त इति निष्पापतया नैर्मल्येन शुद्धो जात इति 'श्विता वर्णे', 'श्विदि श्वैत्ये च' इति Gm3, Tj2. [3, 4] मुद्रितग्रन्थे न दृश्यते. [5] प्रागुक्तात् Tv. [6] °स्वभावात् संकसुकात् निरन्तरचञ्चलनिश्चयरूपज्ञानयुक्तत्वेनास्य भेदः Tv. [7] चपतीति चपः Gm1, Gm3. [8] 'चिनोति चिकुरः, चकेर्वा रूपम्' इति क्षीरस्वामी (पृ. २४५); 'चि' इति अव्यक्तं कुरति । 'कुर शब्दे' । 'इगुपध...' इति कः इति भा. दी. (पृ. ४२०); टीकासर्वस्वे (पृ. २२) चपलद्वयं चपले—

'अविमृश्य तु यः कार्यं पुरुषो वधबन्धनाद्यमाचरति ।
अविनिश्चितकारित्वात् स तु खलु चपलो बुधैर्ज्ञेयः ।।' इति.

[9] दशरूपकम् (२. ७).

(पा.) शिश्विदानोऽकृष्णकर्मा । दुराचारनामनी । 'शिश्विदानो दुराचारो [1]निषेधैकरुचिः खरुः'[2] इति वैजयन्ती (पृ. ८४, श्लो. १२) ।। चपलश्चिकुरः समौ । चपलनामनी ।। [3]दोषैकदृक् पुरोभागी । सदा दोषान्वेषी पुरोभागी स्यात् ।। निकृतस्त्वनृजुः शठः । शठनामनी । 'जालिको [4]ढण्डुकश्चायम्' । एते द्वे च ।। ४६ ।।

[1] निषिद्ध° इति मुद्रितग्रन्थे. [2] ककुः A1. [3] A1 adds 'दोषमुने वेदुकुवानि पेल्लु'. [4] दुण्डुकः A1.

कर्णेजपः सूचकः स्यात् पिशुनो दुर्जनः खलः ।
नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चकः ।। ४७ ।।

(वि.) कर्णेजप इति—कर्णे जपति सूचयतीति कर्णेजपः । 'जप[1] व्यक्तायां वाचि' । सूचयति परकीयदोषानिति सूचकः । 'सूच पैशुन्ये' । पिंशति [2]अनृतस्यावयवो भवतीति पिशुनः । 'पिश अवयवे' । दुष्टो जनो दुर्जनः[3] । खलति [4]स्वदत्तभाषाविषये चलतीति खलः । 'खल [5]संचलने' । दुर्जननामानि ।। नृन्

परपीडाकरान्[6] शंसतीति[7] नृशंसः । 'शंसु स्तुतौ' । प्राणिनं हन्तीति घातुकः । 'हन हिंसागत्योः' । क्रणोति हिंसयति प्राणिनमिति क्रूरः[8] । 'क्रञ् हिंसायाम्' । महत् पापमस्यास्तीति पापः । परपीडारतस्य नामानि ॥ धूर्वति हिनस्तीति धूर्तः । 'धुर्वी हिंसायाम्' । [9]वञ्चयतीति वञ्चकः । 'वञ्चु प्रलम्भने' । यः पराधिक्यं न प्रकाशयति तस्य नामनी ॥ ४७ ॥

[1] K_2, K_4, K_5 add जल्प. [2] K_2 adds आस्यतः; भाषाविषये K_6; K_4, K_5 add यः परदोषं राज्ञे कथयति तस्य नामानि. [3] दुष्टं जनयतीति, 'जनी प्रादुर्भावे' K_3, K_4. [4] K_4 adds राज्ञे. [5] संचये J_1, J_2. [6] °पीडारतान् K_2, K_4. [7] Pt_2 adds शसति च, 'शसु हिंसायाम्'. [8] क्रन्ततीति क्रूरः, 'कृती छेदने' Pt_2. [9] वञ्चयते J_2.

(विव.) **कर्णेजपः सूचकः स्यात् । राजादीनां कर्णे जपति व्यक्तं [1]वदति परकीयदोषानिति कर्णेजपः । 'जप व्यक्तायां वाचि' । 'स्तम्बकर्णयो रमिजपोः' (३. २. १३) इत्यत्र 'हस्तिसूचकयोरिति वक्तव्यम्' इत्यच् । 'हलदन्तात् सप्तम्याः संज्ञायाम्' (६. ३. ९) इति सप्तम्या अलुक् ॥ सूचयति परदोषानिति सूचकः । 'सूच पैशुन्ये' । ण्वुल् (३. १. १३३) । तदुक्तम् (शुक्र. ४. ५. ६९)—**

'[2]राजादिभिर्नियुक्तो यः परदोषानवेक्षितुम्[3] ।
[4]तदग्रे सूचयन् ज्ञात्वा सूचकोऽयमुदाहृतः[5] ॥'

इति ॥ पिशुनो दुर्जनः खलः । संहतेषु मिथो भेदकारिणो नामानीति सुभूतिचन्द्रः । पिंशति दोषकारिणमङ्गुल्यादिना सूचयतीति पिशुनः । 'पिश अवयवे' । अवयवोऽङ्गुल्यादिना सूचनमिति धातुवृत्तौ[6] (मा. धा. पृ. ७४) । उनन् प्रत्ययः[7] (उ. ३. ५५) ॥ दुष्टो जनो दुर्जनः ॥ खलति [8]धर्मादिति खलः । 'खल संचलने' । पचाद्यच् (३. १. १३४) । खं रन्ध्रस्थानं लात्यादत्त इति वा । 'आतोऽनुपसर्गे कः' इति कः (३. २. ३) । कर्णेजपपञ्चकं [9]परदोषख्यापकमात्र इति केचित् ॥ नृशंसो—पापः । परद्रोहाचरणशीलस्य[10] नामानि । नॄन् प्राणिनः शसति हिनस्तीति नृशंसः । [11]'शसु हिंसायाम्' । पचाद्यच्[12] (३. १. १३४) । नैरुक्तो वर्णागमः ॥ हन्ति ताच्छील्येनेति घातुकः । 'लषपतपद . . .' (३. २. १५४) इत्यादिना हन्तेरुकञ्प्रत्ययः । 'हो हन्तेः . . .' इत्यादिना (७. ३. ५४) कुत्वम्, वृद्धिश्च ॥

कृन्ततीति क्रूरः । 'कृती छेदने' । 'कृतेश्छः क्रू च' (उ. २. २३) इति रक् । धातोश्च क्रू इत्यादेशः ।। पापमस्यास्तीति पापः । अर्शआद्यच् (५. २. १२७) ।। धूर्तस्तु वञ्चकः । प्रतारणशीलस्य नामनी । धूर्तशब्दोऽक्षदेविनि व्युत्पादितः[13] (२. १०. ४३) । वञ्चकः सृगाले (२. ५. ५) ।। ४७ ।।

[1] वक्ति Tv. [2, 3, 4, 5] नृपेण विनियुक्तः, °अनुवीक्षणे, नृपं संसूचयेत्, सः इति मुद्रितग्रन्थे. [6] 'अवयव इति अवयवक्रियोच्यते' इति मु. ग्र. (पृ. ७४). [7] 'क्षुधिपिशिमिथिभ्यः कित्'. [8] स्यति ज्ञातार्थान् Tv; स्वप्रतिज्ञातार्थात् Tj1, Tj2. [9] एकार्थमिति Tj1. [10] °शीले नृशंसादिचतुष्टयम् Tj1. [11] 'शंसु स्तुतौ', अयं हिंसायामपीति दुर्गः (मा. धा. पृ. १८०). [12] कर्मण्यण्; अजन्त इति मुकुटोक्तं न सम्यक् अजपवादस्याणो जागरूकत्वात् भा. दी. (पृ. ४२१). [13] धूर्वति हिनस्तीति धूर्तः । 'धुर्वी हिंसायाम्' । 'हसिमृग्रिण् . . .' (उ. ३. ८६) इति तन् । 'राल्लोपः' इति भा.दी. (पृ.४२१)

(पा.) कर्णेजपः—पिशुनः । द्विजिह्वनामानि[1] ।। दुर्जनः खलः । दुष्टजननामनी ।। नृशंसो—पापः । [2]हिंसकनामानि ।। धूर्तस्तु वञ्चकः । धूर्तस्तु व्यंसक इति पाठान्तरम् ।

'[3]यदतीव प्रयत्नेन संयोगादेरगौरवम् ।
न [4]छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः ।।'

इति सरस्वतीकण्ठाभरणवचनाद् (१. १२३) अत्र श्लथोच्चारणम् । वञ्चकनामनी[5] ।। अनुक्तम्—'समौ दुर्वृत्तदुरटौ' । दुर्वृत्तनामनी ।। 'ठक्के मायाविमायिनौ' । ठक्कनामनी ।। ४७ ।।

[1] 'कोंड मुंजपुवानिपेल्लु' A1. [2] मनुष्यहिंसाकर° A1. [3] यदा तीव्र° इति मुद्रितग्रन्थे (पृ. १०२). [4] °भङ्गमप्याहुः A1; °भञ्जकं B3. [5] 'अटमर्दिचेवांडु' A1.

अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।
कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ।। ४८ ।।

(वि.) अज्ञ इति—[1]किमपि न जानातीत्यज्ञः । 'ज्ञा अवबोधने' । मुह्यति कार्येष्विति मूढः । 'मुह वैचित्ये' । मूर्खश्च । बुद्धिहीनतया यथाजाता

बुद्धिरस्येति यथाजातः[2]। अज्ञत्वेन विधातव्यत्वाद् विधेयः[3]। स एव वैधेयः। बालते आप्लवते मनसि बालिशः[4]। 'बाडृ आप्लाव्ये'। मूर्खनामानि ॥ कुत्सितोऽर्यः स्वामी कदर्यः। अल्पमेव व्ययं कर्तुं कल्पते समर्थो भवतीति कृपणः[5]। 'कृपू सामर्थ्ये'। क्षुणत्ति यवाग्वादि कर्तुं तण्डुलादीन् पिनष्टीति क्षुद्रः[6]। 'क्षुदिर् संपेषणे'। किंचिदेवान्नं पचतीति किंपचानः। [7]मितमेवान्नं पचतीति मितंपचः। 'डुपचष् पाके'। लोभिनो नामानि ॥ ४८ ॥

[1] Pt2 omits किमपि. [2] जात इव विवेकशून्यत्वात् Pt2. [3] विधातुं योग्यः J2, Pt2. [4] परदत्तं बलिं पूजां श्यतीति Pt2. [5] कल्पते कुटुम्बपीडनेनापि जीवनाय समर्थो भवति Pt2. [6] क्षुद्नाति K3, K6, Pt2. [7] Pt2 adds अत्यल्पं.

(विव.) अज्ञे—बालिशाः। विवेकरहितस्य[1] [2]नामानि। जानातीति ज्ञः, विद्वान्। [3]ततोऽन्योऽज्ञः ॥ मुह्यति कार्येषु व्यामोहं गच्छतीति[4] मूढः। 'मुह् वैचित्ये'। क्तप्रत्यये (३. ४. ७२) 'हो ढः' (८. २. ३१) इति ढत्वं ष्टुत्वं (८. ४. ४१), ढलोपे दीर्घश्च (६. ३. १११) ॥ [5]उत्पत्त्यवस्थायां यथा मन्दबुद्धिस्तथैव सर्वदापीति यथाजातः ॥ मुह्यतीति मूर्खः। 'मुहेः खो मुर्च' (उ. ५. २२) इति खप्रत्ययः, धातोर्मुरादेशश्च। 'हलि च' (८. २. ७७) इत्युपधादीर्घः ॥ स्वयं [6]ज्ञानरहितत्वेन त्वयेदं कर्माचरणमित्थं कर्तव्यमिति परैर्विधातुं योग्यो विधेयः। ततः स्वार्थिकेऽण्प्रत्यये वैधेयः। [7]देवतार्थं दत्तमपूपादिर्बलिं श्यति भक्षणेन तनूकरोतीति बलिशः। 'शो तनूकरणे'। ततः स्वार्थेऽण्प्रत्यये बालिशः ॥ कदर्ये—मितंपचाः। [8]लोभातिशयेन कुटुम्बभरणं कुर्वाणस्य नामानि। तथा चोक्तं स्मृतिकारैः—

'आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत्।
लोभाद् यः पितरौ भृत्यान् स कदर्य इति स्मृतः ॥'

इति। [9]अर्यशब्दः स्वामिन्यर्थे निपातितः (३. १. १०३)। कुत्सितोऽर्यः कदर्यः। 'कोः कत्तत्पुरुषेऽचि' (६. ३. १०१) इति कुशब्दस्य कदादेशः ॥ [10]कुटुम्बपीडनेनापि जीवनाय कल्पते समर्थो भवतीति कृपणः। 'कृपू सामर्थ्ये'। बाहुलकः क्युन्प्रत्ययः। 'कृपो रो लः' (८. २. १८) इति प्राप्तस्य [11]लत्वस्याभावश्च। अन्यस्त्वाह—कुत्सितं पणते व्यवहरति कृपणः। 'पण व्यवहारे स्तुतौ च'। पृषोदरादित्वाद् आद्यवर्णस्यान्यथाभाव इति ॥ क्षुणत्ति कुटुम्बं पिनष्टि पीडयतीति क्षुद्रः।

'क्षुदिर् संपेषणे'। 'स्फायितञ्चि...' (उ. २. १३) इति रक्प्रत्ययः ॥ किंचिदेव पचानः किंपचानः। 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९)। आगमशासनस्यानित्यत्वाद् मुमागमो नास्ति। अथवा पचतेर्धातोः 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इत्यङ्प्रत्यये टापि पचाशब्देन पाक उक्तः। किमित्येतदव्ययं किंचिदर्थे[12]। अत्यल्पया पचया पाकेन अनिति प्राणितीति किंपचानः। 'अन प्राणने'। पचाद्यच् (३. १. १३४) ॥ मितम् अत्यल्पमेव पचतीति मितंपचः। 'मितनखे च' (३. २. ३४) इति खश्। मुमागमश्च (६. ३. ६७)। मितशब्देनार्थग्रहणाद् अल्पंपचोऽप्यस्तीति रक्षितः इति सर्वानन्दः[13] (टी. स. पृ. २४) ॥ ४८ ॥

[1] °रहिते Tj1, Tj2.　[2] अज्ञादिषट्कं Tv.　[3] तस्मात् Tj1.　[4] प्राप्नोति Tj1, Tj2.　[5] जनन° Tj1.　[6] Tj1, Tv add लौकिकवैदिककर्मकरणकाले.　[7] गृहद्वारादौ दत्तं Tj1, Tv.　[8] कदर्यादिपञ्चकं कुटुम्बभरणमकुर्वाण° Tj1, Tj2, Tv.　[9] 'अर्यः स्वामिवैश्ययोः' (३. १. १०३) इति निपातनाद् अर्यशब्देन स्वामी कथ्यते Tj1.　[10] कुटुम्बं पीडयित्वा Tj1, Tj2, Tv.　[11] B6 adds बाहुलकत्वात्.　[12] Gm3, Tv add यथा—किंनरः, किंपुरुष इति.　[13] 'पान्तावल्पंपचान् मुनीन्' इति भट्टिरिति (भ. का. ६. ९६) रक्षित इति मुद्रितग्रन्थे (पृ. २४).

(पा.) अज्ञे—बालिशाः। [1]मूर्खनामानि। 'यो देवानांप्रियोऽनेडः'। एते द्वे च ॥ कदर्ये—मितंपचाः। [2]कार्पण्यवतो नामानि। [3]'लोभि' ॥ ४८ ॥

[1] A1 adds 'येड्डेपातु'.　[2] कदर्य° B3.　[3] 'किनासिवांडु' A1.

निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः।
वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४९ ॥

(वि.) निःस्व इति—न विद्यते स्वं धनमस्येति [1]निःस्वः। [2]दुष्टा विधा प्रकारोऽस्येति दुर्विधः। दीयते क्षीयत इति दीनः। 'दीङ् क्षये'। दरिद्राति दुर्गतिं प्राप्नोतीति दरिद्रः। 'दरिद्रा दुर्गतौ'। दुरवस्थां गतो दुर्गतः[3]। दरिद्रनामानि ॥ वनति याचत इति वनीयकः[4]। 'वनु याचने'। [5]याचतीति याचनकः। याचकश्च। 'टुयाचृ याच्ञायाम्'। [6]दातारमेव मार्गयतीति मार्गणः। 'मार्ग अन्वेषणे'। अर्थयत इत्यर्थी। 'अर्थ [7]उपयाच्ञायाम्'। याचकनामानि ॥ ४९ ॥

[1] निर्गतः स्वादिति Pt2. [2] Pt2 adds जीर्णवस्त्रधारणकदन्नभोजनादिरूपा. [3] K4 adds 'गम्लृ गतौ'. [4] K5 adds वनीपक इति पाठे वनीं पातीति विग्रहः. [5] याचते J2, K3, K5. [6] द्वारमेव K4, K5. [7] K3, K6 omit उप; याचने J2.

(विव.) निःस्वस्तु—दुर्गतोऽपि सः । **धनधान्यादिजीवनोपायरहितस्य नामानि[1] । निष्क्रान्तः स्वाद् धनादिति निःस्वः । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा. १. ४. ७९) इति समासः ।। दुष्टा जीर्णवस्त्रधारणकदन्नभोजनादिरूपा विधा प्रकारा यस्येति दुर्विधः ।। दीयते क्षीयत इति दीनः । 'दीङ क्षये' । कर्तरि क्तप्रत्यये स्वादीनामोदित्त्वपरिभाषया[2] निष्ठानत्वम् (८. २. ४५)[3] ।। दरिद्राति दुर्गतो भवतीति दरिद्रः । 'दरिद्रा दुर्गतौ' । पचादिः (३. १. १३४) ।। दुःखं गतो दुर्गतः ।। वनीपको—याचकार्थिनौ । [4]याच्ञालब्धमात्रजीवनोपायस्य नामानि । 'वनु याचने' इत्यस्मादिन्प्रत्यये[5] (उ. ४. ११९) वा ङीषि वनी । वनिशब्देन याच्ञाभिधीयते । तां पाति रक्षति सर्वदावतीति वनीपकः । 'संज्ञायां कन्' (५. ३. ७५) । 'नवकदम्बकदम्बकसन्ततप्रसवनीपवनीपकषट्पदः' इति कप्फिणाभ्युदये[6] । सर्वानन्दस्तु (टी. स. पृ. २४) वनीयक इति तालव्यान्तस्थमध्याक्षरपाठेन व्याचष्ट । वनीं याच्ञां आत्मन इच्छतीति [7]क्यचि (३. १. ८) ण्वुलि वनीयक इति ।। [8]याचते याचनः । 'टुयाचृ याच्ञायाम्' । अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच् । तदन्तात् सञ्ज्ञायां कनि (५. ३. ७५) याचनकः ।। याचति । ण्वुलि (३. १. १३३) याचकः ।। मार्गति अन्वेषते दातारमिति मार्गणः । 'मार्ग अन्वेषणे' । नन्द्यादिः (३. १. १३४) ।। 'अर्थाच्चासंनिहिते' (वा. ५. २. १३५) इत्यर्थशब्दाद् इनिप्रत्यये अर्थी ।। ४९ ।।**

[1] निःस्वाद्याः पञ्च निर्धने स्युः Tv. [2] 'स्वादय ओदितः'—*gaṇasūtra*. [3] 'ओदितश्च' इति निष्ठानत्वम् Tj1. [4] वनीयकादिपञ्चकं याच्ञाप्राप्तमात्रजीवनोपाये Tv. [5] 'सर्वधातुभ्य इन्'. [6] यमककाव्ये प्रयोगः Tv. [7] 'सुप आत्मनः क्यच्'. [8] याच्यते ऽनेनेति याचनशब्देन देहीत्यादिकं पदमभिधीयते । याचनं कायति वरयतीति याचनकः । 'आतोऽनुपसर्गे कः' Tv.

(पा.) निःस्वस्तु—दुर्गतश्च सः । दरिद्रनामानि ।। '[1]कठेरोऽकिंचनो-दुःस्थः' । एतानि त्रीणि च ।। वनीपको—याचकार्थिनौ । याचकनामानि ।। अनुक्तम्—'यद्भविष्यो दैवपरः' । [2]स्वप्रयत्नशून्यस्य नामनी[3] ।। 'वराको नामवर्जितः' । अनामधेयनाम ।। ४९ ।।

[1] कण्ठेदः A1, B3. [2] मुखगतमक्षिकानिवारणासमर्थनामनीA1. [3] 'येभ्यराशि, अंदु' A1.

[1]अहंकारवानहंयुः शुभंयुस्तु शुभान्वितः ।
दिव्योपपादुका देवा नृगवाद्या जरायुजाः ॥ ५० ॥

(वि.) अहमिति—अहंकारोऽस्यास्तीत्यहंयुः[2] । अहंकारवतो नाम ॥ [3]शुभमस्यास्तीति शुभंयुः । शुभान्वितस्य नाम ॥ दिवि भवा दिव्याः । उपपादुका अयोनिजशरीरिणः[4] । दिव्याश्च ते उपपादुकाश्च दिव्योपपादुकाः देवाः । [5]देवानां नाम ॥ जरायोर्गर्भाशयात् [6]जाता जरायुजाः । मनुष्यगवादीनां नाम ॥ ५० ॥

[1] 'अहंयुः स्यादहंकारी' इति वा पाठः. [2] Pt2 adds अहमिति मान्तमव्ययम्; अहंकारी च. [3] शुभमिति मान्तमव्ययम् Pt2. [4] Pt2 adds मात्रादिनिरपेक्षेण. [5] देवादेः° K5. [6] K4 adds उत्पत्तिसमये.

(विव.) अहंयुः स्यादहंकारी । अहमिति निपातोऽहंकारार्थः । अहंकारो गर्वोऽस्यास्तीति अहंयुः । 'अहंशुभमोर्युस्' (५. २. १४०) । अत्र सकारानुबन्धः 'सिति च' (१. ४. १६) इति पदसंज्ञार्थः । ततश्च 'वा पदान्तस्य' (८. ४. ५९) इति[1] परसवर्णविकल्पः ॥ शुभंयुस्तु शुभान्विते । अहंशुभमोरिति (५. २. १४०) सूत्रनिर्देशादेव शुभमिति[2] मकारान्तमव्ययमस्तीति सूचितम् । शुभं मङ्गलम् अस्यास्तीति शुभंयुः । पूर्ववद् युस्प्रत्ययः (५. २. १४०) ॥ दिव्योपपादुका देवाः । इन्द्रादयो देवाः, ते दिव्योपपादुका उच्यन्ते । दिवि स्वर्गे भवा दिव्याः । [3]'द्युप्रागपागुदक्प्रतीचो यत्' (४. २. १०१) । शुक्लशोणितादिकारणमनपेक्ष्य धर्मविशेषादेवोपपद्यन्त इत्युपपादुकाः । 'लषपतपद ...' इत्यादिना (३. २. १५५) उकञ् । दिव्याश्च ते उपपादुकाश्चेति कर्मधारयः । नारकाणामपि [4]योन्यादिकमनपेक्ष्यैव धर्मवशादुपपादुकत्वमस्तीति तद्व्यावृत्त्यर्थं दिव्यपदम् । अत एव 'स्वर्गोपपादुका देवाः' इति त्रिकाण्डे स्वर्गपदं [5]व्यावर्तकतयोक्तम् । नृगवाद्या जरायुजाः । [6]उत्पत्तिसमये जरायोर्निर्गत्य जाता जरायुजाः[7] । आद्यशब्देन अश्वमहिषादयो[8] गृह्यन्ते ॥ ५० ॥

[1] B5, Gm3 add अनुस्वारस्य. [2] °निर्देशेन शुभमित्यव्ययममन्तं मङ्गलवाचकमस्तीति गम्यते Tj1, Tv. [3] 'दिगादिभ्यो यत्' (४. ३. ५४) B5, Gm3, Tj2.

[4] योन्यादिकारणं Tj1, Tv. [5] व्यावर्तकत्वेन Tv. [6] गर्भवाससमये Gm3, Tj1, Tv. [7] 'पञ्चम्यामजातौ' (३. २. ९८) इति जनेर्डः Gm3. [8] महिषाद्याः Gm1, Tj1, Tv.

(पा.) अहंयुः स्यादहंकारी । [1]अहंकारिणो नामनी । 'गर्विकः स्तब्ध उद्ग्रीवः शौण्डीरो दृप्त इत्यपि' । एतानि पञ्च च ॥ शुभंयुस्तु शुभान्विते । शुभ-युक्तनाम ॥ अनुक्तम्—'नीलीरागः स्थिरप्रेमा'[2] । स्थिरस्नेहः नीलीरागः स्यात् ॥ 'हरिद्रारागकोऽन्यथा' । अस्थिरस्नेहः हरिद्रारागकः स्यात् ॥ दिव्योपपादुका देवाः । देवताः दिव्योपपादकारणत्वाद् दिव्योपपादुकाः ॥ नृगवाद्या जरायुजाः । नृगवाद्या जरायुकारणत्वात् जरायुजाः ॥ ५० ॥

[1] अहंकारयुक्त° A1. [2] स्थिरस्नेहः B3.

स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः ।
उद्भिदस्तरुगुल्माद्या उद्भिदुद्भिज्जमुद्भिदम् ॥ ५१ ॥

(वि.) स्वेदजा इति—स्वेदसंगृहीतेभ्यः[1] पार्थिवपरमाणुभ्यो जाताः स्वेदजाः[2] । कृमिदंशादीनां नाम ॥ अण्डाज्जायन्त इत्यण्डजाः[3] । पक्षिसर्पादीनां नाम ॥ भुवमुद्भिनत्तीति उद्भित् । उद्भिदं च । 'भिदिर् विदारणे' । उद्भिद्य उद्भिदो जायन्त इति उद्भिज्जाः[4] । अङ्कुरजातानां वृक्षगुल्मादीनां नामानि ॥ ५१ ॥

[1] स्वेदपरमाणुभ्यः K5. [2] स्वेदाद् भौमोष्मणः Pt2. [3] K3, K5 add 'जनी प्रादुर्भावे'. [4] भूमेरुद्भेदनमुद्भित् ततो जातमुद्भिज्जम् Pt2.

(विव.) स्वेदजाः कृमिदंशाद्याः । अत्र घर्मवाचिना स्वेदशब्देन भौमोष्म-विशेषो विवक्षितः । कृमिदंशादीनां पार्थिवपरमाणुजन्यत्वेऽपि स्वेदोपग्रहमन्तरेणा-नुत्पत्तेः । [1]तदभिसंधाय स्वेदजत्वमुक्तम् । स्वेदात् जाताः स्वेदजाः । 'पञ्चम्याम-जातौ' (३. २. ९८) इति डः । आद्यशब्देन मशकमत्कुणादीनां ग्रहणम् । पक्षिसर्पादयोऽण्डजाः । गर्भस्थानान्निर्गतम् [2]उत्पत्स्यमानप्राण्यावारकं शुक्लवर्णं गोलाकारमण्डमिति प्रागुक्तम् (२. ५. ३७) । अण्डाज्जाता अण्डजाः । डः (३. २. ९८) । आदिशब्देन पिपीलिकादीनां ग्रहणम् ॥ उद्भिज्जास्तरुगुल्माद्याः । 'भिदिर् विदारणे[3]' । 'संपदादिभ्यः क्विप्' (वा. ३. ३. ९४) इति क्विपि

भिच्छब्देन भेदनमुच्यते। भूमौ आलवालादिगर्तदेशाद् ऊर्ध्वभागभेदनात् जाता उद्भिज्जाः। डः। आद्यशब्देनात्र तृणौषध्यादीनां ग्रहणम्। एवं च[4] केषांचित् प्राणिनाम् अयोनिजत्वम्, इतरेषां च जरायुजाण्डजस्वेदजोद्भिज्जनिरूपणात् चातुर्विध्यं चेति दर्शितम्। एषां [5]चतुर्विधानामपि एकत्र प्रकरणे स्वर्गादावितः पूर्वं सांगत्याभावाद् [6]बालबुद्धिवैशद्यार्थमेकत्रैव चातुर्विध्यनिरूपणीयतायां विशेष्यनिघ्नप्रस्तावादत्र कथनमित्यवगन्तव्यम्॥ उद्भिदुद्भिज्जमुद्भिदम्। उद्भिज्जप्रसङ्गात् तत्पर्यायानाह। भुवमुद्भिनत्तीति उद्भित्। कर्तरि क्विप् (३. १. ६१)। इगुपधलक्षणे कप्रत्यये (३. १. १३५) उद्भिदम्। विशेष्यनिघ्नशब्दे निर्देशकामचारादत्र [7]नपुंसकत्वम्॥ ५१॥

[1] तत्प्राधान्येन स्वेदजत्वम् Gm1, Tj1, Tv. [2] 'पेशी कोशो द्विहीनेऽण्डम्' (पृ. ३५७) इत्यत्र जनिष्यमाण° Gm3, Tj2. [3] Gm3, Tv add इत्यस्मात्. [4] Tv adds दिव्योपपादुका इत्यादिना. [5] सर्वेषां Tv. [6] शब्द° for बालबुद्धि° Tj1, Tj2. [7] नपुंसकनिर्देशः Tv.

(पा.) स्वेदजाः कृमिदंशाद्याः। स्वेदकारणत्वात्[1] स्वेदजाः॥ पक्षिसर्पादयोऽण्डजाः। पक्षिसर्पाद्याः[2] अण्डकारणत्वाद्[3] अण्डजाः॥ उद्भिदस्तरुगुल्माद्याः। तरुगुल्माद्या[2] भूम्युद्भेदकारणत्वाद्[3] उद्भिदः॥ उद्भिदुद्भिज्जमुद्भिदम्। [4]एतानि त्रीण्यपि एकार्थकानि॥ ५१॥

[1] B3 adds कृमिदंशाद्याः. [2] °आदयः B3. [3] °कारणक° B3. [4] अमूनि उद्भिदुद्भिज्जोद्भिदानि A1.

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्॥ ५२॥
(रम्यं मनोहरं सौम्यं भद्रकं रामणीयकम्।)

(वि.) सुन्दरमिति—सुष्ठु नन्दयतीति सुन्दरम्[1]। 'टुनदि समृद्धौ'। रुचिं मनःप्रीतिं राति ददातीति रुचिरम्[2]। 'रा दाने'। चरति मनोऽस्मिन्निति चारु। 'चर [3]गतौ'। सुष्ठु समत्वमत्रास्तीति सुषमम्। साध्नोति सिध्यतीति साधु। '[4]साध संसिद्धौ'। शोभत इति शोभनम्। '[5]शुभ दीप्तौ'। काम्यत इति

कान्तम् । 'कमु कान्तौ' । मनो रमयतीति मनोरमम् । 'रमु क्रीडायाम्' । मनो हरतीति मनोहरमिति वा पाठः । रोचत इति रुच्यम् । 'रुच दीप्तावभिप्रीतौ[6] च' । मनसा ज्ञेयं मनोज्ञम्[7] । 'ज्ञा अवबोधने' । सर्वैर्मन्यत इति मञ्जु । मञ्जुलं च । 'मन ज्ञाने' । [8]मनोहरवस्तुनामानि ।। ५२ ।।

[1] सुतरामाद्रियते, 'दृङ् आदरे' Pt2. [2] रोचत इति Pt2. [3] गतिभक्षणयोः J2, K6. [4] K4, K5 add राध. [5] 'शुभ शुम्भ शोभार्थे' K3, K6. [6] K3, K6 omit अभिप्रीतौ. [7] मनोरूपमिन्द्रियं ज्ञातृभूतमत्रेति K4, K5. [8] मनोहरस्य वस्तुनः K5, K6.

(विव.) सुन्दरं—मञ्जुलम् । सुन्दरादयो द्वादश शब्दाः सर्वेषामनुकूलवेदनीयस्य[1] वस्तुनो वाचकाः । सुष्ठु आदरो यत्रेति सुन्दरम् । गौरादिपाठात् (४. १. ४१) साधुः । अत एव स्त्रियां ङीष्[2] (४. १. ४१) ।। रुचिं प्रीतिं राति ददातीति रुचिरम्[3] ।। चरति मनोऽस्मिन्निति चारु । 'चर [4]गतौ' । 'दृसनिजनिचरिचटिभ्यो ञुण्' (उ. १. ३) इति ञुण् । अत्र द्व्यनुबन्धग्रहणं 'जनिवध्योश्च' (७. ३. ३५) इति वृद्धिप्रतिषेधो मा भूदित्येवमर्थं कृतम् ।। सर्वेषामप्यभिलाषविषयत्वेन तुल्यतया सुष्ठु समं सुषमम् । 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' (८. ३. ८८) इति षत्वम् ।। साध्नोति सुखसाधनतयेति साधु । 'साध संसिद्धौ ।' 'कृवापाजि...' इत्यादिना (उ. १. १) उण्प्रत्ययः ।। शोभत इति शोभनम् । 'शुभ दीप्तौ'[5] । 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच् ।। काम्यत इति कान्तम् । 'कमु कान्तौ' । क्तः (३. २. १०२) । कस्य सुखस्य अन्तो निश्चयोऽत्रेति वा ।। मनो हरत्याकर्षति स्वाधीनं करोतीति मनोहरम् । 'हरतेरनुद्यमनेऽच्' (३. २. ९) इत्यच् । केचित् मनो रमयतीति व्युत्पत्त्या मनोरममिति पठन्ति ।। रोचत इति रुच्यम् । 'रुच दीप्तौ'[6] । 'राजसूयसूर्यमृषोद्यरुच्य...' (३. १. ११४) इत्यादिनिपातनात् साधुत्वम् ।। मनसा ज्ञायत इति मनोज्ञम्[7] । 'द्वन्द्वमनोज्ञादिभ्यश्च' (५. १. १३३) इति निर्देशात् साधुत्वम् ।। द्रव्यवचनाद् मञ्जुशब्दाद् भावमात्रविवक्षायां मत्वर्थीये लच्प्रत्यये सति श्यामश्यामलमृदुमृदुलशब्दवद्[8] मञ्जु मञ्जुलमिति शब्दद्वयमपि समार्थम् ।। ५२ ।।

[1] °वेदनीये वस्तुनि वर्तन्ते Tv. [2] 'षिद्गौरादिभ्यश्च'. [3] Tv adds आतोऽनुपसर्गे कः'. [4] गतिभक्षणयोः Gm3; गतौ औणादिक उप्रत्ययः Tv. [5] शोभार्थे

Tj1, Tj2.　[6] B5, B6 add अभिप्रीतौ च.　[7] 'ज्ञा अवबोधने' Tj2.　[8] °शब्दवदिहापि मञ्जुमञ्जुलशब्दावेकार्थाविति स्थितिः Tv.

(पा.) सुन्दरं—मञ्जुलम् । [1]शोभननामानि[2] । 'चक्षुष्यं सुभगं रम्यं लटहं[3] हारि वल्गु च' । एतानि षट् च ॥ ५२ ॥

[1] सुन्दर° B3.　[2] A1 adds 'चक्कदनमु'.　[3] लडहम् A1.

तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।
अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५३ ॥

(वि.) तदिति—आसिच्यते आप्यायते [1]दृगिन्द्रियमनेनेति आसेचनकम् । [2]'षिच क्षरणे' । यस्य दर्शनात् तृप्तेरन्तो नास्ति तस्य चन्द्रमण्डलादेर्नाम ॥ आभिमुख्येनेष्यते प्राप्यत इति अभीष्टम् । 'इष गतौ'[3] । आभिमुख्येनाप्तुमिष्टम् अभीप्सितम् । 'आप्लृ व्याप्तौ' । हृदयस्य प्रियं हृद्यम् । दयते चित्तमादत्त इति दयितम् । 'दय दानगतिरक्षणहिंसादानेषु' । [4]वल्लते प्रीणातीति वल्लभम् । 'वल्ल प्रीतौ'[5] । प्रीणातीति प्रियम् । 'प्रीञ् [6]तर्पणे कान्तौ च' । प्रियवस्तुनो नामानि ॥ ५३ ॥

[1] त्वगिन्द्रियम् K4.　[2] षिचिर् K3, K6, Pt2.　[3] इच्छायाम् Pt2; K2 omits.
[4] वल्लति K3, K4, Pt2.　[5] संवरणे J2.　[6] प्रीणने K3, K6.

(विव.) तदासेचनकं—दर्शनात् । यस्य चन्द्रमण्डलादेः दर्शनात्[1] चक्षुरादीनां तृप्तेरन्तो नास्ति, किंतु पुनःपुनः दिदृक्षाद्यतिशय एव भवति तच्चन्द्रमण्डलादिकम् आसेचनकमुच्यते। आसिच्यते आपूर्यते दृगिन्द्रियादिकम् अनेनेति आसेचनकम् । [2]'षिच क्षरणे' । आङ्पूर्वः। ल्युट्[3] (३. ३. ११७) । 'संज्ञायां कन्' (५. ३. ७५) । सुभूतिचन्द्रस्तु ह्रस्वादिमाह। न सिञ्चन्ति न क्षरन्ति चक्षुरादीन्यस्मादिति असेचनकमिति । [4]सर्वानन्दोऽपि ह्रस्वत्वमेवाह (टी. स. पृ. २५, श्लो. ५१) ॥ अभीष्टे—प्रियम् । [5]इच्छाविषयस्य वस्तुनो नामानि । आभिमुख्येन इष्यत इत्यभीष्टम् । 'इषु इच्छायाम्' । क्तः (३. २. १०२) । आभिमुख्येनाप्तुमिष्टम् अभीप्सितम् । 'आप्लृ व्याप्तौ' । सन् (३. १. ७) । 'आप्ज्ञप्यृधामीत् (७. ४. ५५) । क्तः (३. २. १०२) ॥ 'हृदयस्य प्रियः' (४. ४. ९५)

इति हृदयशब्दात् यत् । 'हृदयस्य हृल्लेखयदण्लासेषु' (६. ३. ५०) इति हृदादेशः ।। दय्यते याच्यत इति दयितम् । 'दय दानगतिरक्षणयाचनेषु' । क्तः ।। वल्लते प्रीणयतीति वल्लभम्[6] । वल्लिः सौत्रो धातुः । 'रासिवल्लिभ्यां च' (उ. ३. १२५) इत्यभच्प्रत्ययः ।। प्रीणातीति प्रियम् । 'प्रीञ् तर्पणे' । [7]इगुपधेत्यादिना (३. १. १३५) कः ।। ५३ ।।

[1] Gm3 adds ज्ञानात्. [2] षिचिर् B5, B6, Tj2. [3] 'करणाधिकरणयोश्च'. [4] B5 omits the sentence. [5] अभीष्टादिषट्कमिच्छाविषये वस्तुनि Tv. [6] Tj1, Tj2 add 'वल्ल संवरणे'. [7] 'इगुपधज्ञाप्रीकिरः कः'.

(पा.) तदासेचनकं—दर्शनात् । यस्य वस्तुनो दर्शनात् तृप्तेरन्तो नास्ति तत् आसेचनकं स्यात् ।। अभीष्टे—प्रियम् । [1]प्रियवस्तुनामानि[2] ।। 'हृदिस्पृग्घृदयंगमम्' । एते द्वे च ।। ५३ ।।

[1] अभीष्टवस्तु° B3. [2] A1 adds 'पिप्पितमुपेरु'.

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।
कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ।। ५४ ।।

(वि.) निकृष्टेति—निकृष्यते तिरस्क्रियत इति निकृष्टः । [1]प्रतिकृष्टश्च । 'कृष विलेखने' । अर्वति [2]श्रेयोलवमनुगच्छतीति अर्वा । नान्तोऽयम् । 'अर्व गतौ' । [3]रिफति हिनस्ति दूषयतीति रेफः । 'रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' । याप्यन्ते गुणा यस्माद् दूष्यन्त इति याप्यः[4] । 'या [5]प्रापणे' । अवमत्वाद् अधमत्वाद् अवमः[6] । अधमत्वाद् अधमः । कुत्सितं यथा भवति तथा पूयते विशीर्यत इति कुपूयः । 'पूयी विशरणे' । कुत्स्यते सभ्यैरिति कुत्सितः[7] । 'कुत्स अवक्षेपणे' । न उद्यते नोच्यत इत्यवद्यः । 'वद व्यक्तायां वाचि' । [8]खेटति सभ्यैराक्षिप्यत इति खेटः । 'खिट त्रासे' । सभ्यैर्गर्ह्यत इति गर्ह्यः[9] । 'गर्ह कुत्सायाम्' । अणति बहु जल्पतीत्यणकः । 'अण शब्दे' । जात्या हीनस्य नामानि ।। ५४ ।।

[1] Pt2 adds प्रतिकृष्यते स्म. [2] श्रेयांसं K4, K5; अपकर्षं Pt2. [3] रेफति J1, K5, Pt2; Pt2 adds वर्तनं. [4] यापनीयो याप्यः Pt2. [5] जुगुप्सायाम् K5, K6. [6] अवस् अधस् इत्येतौ निपातौ । अवः अस्यास्तीति अवमः Pt2. [7] कुत्सास्य संजाता Pt2. [8] खिट्यते K5. [9] गर्हितुं योग्यः Pt2.

(विव.) निकृष्ट—अणकाः समाः । [1]निकृष्यते निकृष्टः । प्रतिकृष्यते प्रतिकृष्टः । 'कृष विलेखने' । उपसर्गद्वयं न्यग्भावे वर्तत इति उपसर्गवृत्तौ । यथा —निकृतः प्रतिक्षिप्त इति ।। अर्वति [2]सेवार्थम् अन्यमुपगच्छतीति अर्वा । 'अर्व गतौ' । [3]वनिप्प्रत्ययः (३. २. ७५) । 'अर्वणस्त्रसावनञः' (६. ४. १२७) इति प्राप्तस्त्रादेशस्तु अश्ववचनस्यैव नान्यस्य, प्रयोगाणामदर्शनात् इति वैजयन्ती-व्याख्यायामुक्तम् ।। [4]रिफति सर्वत्र कलहं करोतीति रेफः। 'रिफ [5]कत्थनयुद्धनिन्दा-हिंसादानेषु' । पचाद्यच् (३. १. १३४) । अकारान्तः । 'रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गवत्' इति फकारान्तेषु [6]मार्तण्डेनाभिधानात् ।। याप्यन्ते गुणा अस्मादिति याप्यः । 'याप्ये पाशप्' (५. ३. ४७) इति निर्देशात् साधुः । यापयत्या-त्मानं कृच्छ्रजीवनेनेति वा याप्यः । णिचि पुगागमे[7] (७. ३. ३६) 'अचो यत्' (३. १. ९७) इति यत् ।। अवस् अधस् इत्येतौ द्वावुपसर्गौ निकर्षार्थौ[8] । निकर्षोऽस्यास्तीति अवमः, अधमश्च । 'अवोऽधसोर्लोपश्च'[9] इति वक्तव्या-दुभाभ्यामपि निपाताभ्यां मत्वर्थीयो मक्प्रत्ययः । सलोपश्च ।। कुत्सितं पूयते विशीर्णो भवतीति कुपूयः । 'पूयी विशरणे' । पचाद्यच् (३. १. १३४) । लघूपधत्वाभावाद् गुणाभावः (७. ३. ८६) ।। कुत्सा संजाता अस्येति कुत्सितः । तारकादित्वादितच् (५. २. ३६) ।। नोद्यते नोच्यते न प्रशस्यत इत्यवद्यः । 'वद व्यक्तायां वाचि' । 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' (३. १. १०१) इति नञ्पूर्वात् वदेर्यत्प्रत्ययान्तो गर्ह्यरूपार्थे निपातितः ।। खेटति सत्पुरुषानिति खेटः । 'खिट उत्त्रासने' । [10]उत्त्रासनं भयजननमिति धातुवृत्तौ[11] (मा. धा. पृ. १०९) । अच् ।। सभ्यैर्गर्ह्यत इति गर्ह्यः । 'गर्ह कुत्सायाम्' । 'ऋहलोर्ण्यत्' (३. १. १२४) ।। अणति बहु जल्पतीति अणः । अच् (३. १. १३४) । 'अणतेः क्वुन्, ह्रस्वादिः' इति सर्वानन्दः (टी. स. पृ. २६) ।। ५४ ।।

[1] नीत्युपसर्गश्च न्यग्भावे Tv. [2] जीवनार्थं Gm3, Tv. [3] वन्नन्तो निपातः Tj1, Tj2. [4] रेफति B5, B6, Gm1. [5] युद्धादौ Gm3. [6] मार्ताण्डेन Gm1, Gm3; रभसेनेति टी. स. (पृ. २६). [7] 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ'. [8] निकर्षवाचकौ Tj1, Tv. [9] मुद्रितोणादौ तु 'अवद्यावमाधमार्वरेफाः' इत्येव दृश्यते (उ. ५. ५४). [10] '"खिट त्रासे", इह त्रासो भयोत्पादनम्' इत्येव मुद्रितग्रन्थे (पृ. १०९). [11] °वृत्तिकारः Gm1, Gm3.

(पा.) निकृष्टे—अधमाः । 'खेटं पापं च रेफं[1] च संप्राहुः' इति हलायुधः (अ. मा. २. १८२) । कुपूय—अणकाः समाः । निकृष्टनामानि[2] । अनु-क्तम्—'स स्यादलंजः किंजश्च यस्य जन्म निरर्थकम्' । [3]यस्य पुंसो जन्म व्यर्थं स अलंजः किंजश्च स्यात् ।। ५४ ।।

[1] रेफसं प्राहुः इति मुद्रितग्रन्थे (पृ. ३७). [2] A1 adds 'किड्'. [3] निरर्थ-कजन्मनो नामानि B3.

मलीमसं तु मलिनं कच्चरं मलदूषितम् ।
पूतं पवित्रं मेध्यं च वीध्रं तु विमलार्थकम् ।। ५५ ।।

(वि.) मलीमसमिति—[1]मलोऽस्यास्तीति मलीमसम् । मलिनं च । कुत्सितं चरतीति कच्चरम् । 'चर [2]गतौ । [3]मलदूषितस्य नामानि ।। पुनाति देहादिकमिति पूतम् । पूयतेऽनेनेति पवित्रम् । 'पूञ् पवने' । मेधनीयं देहशोधकत्वात् संगमनीयं मेध्यम् । 'मेधृ संगमने'[4] । शुद्धिहेतुभूतस्य वस्तुनो नामानि ।। विशेषेण इन्धे दीप्यत[5] इति वीध्रम् । 'ञिइन्धी दीप्तौ' । निर्मलस्फटिकादेर्नाम ।। ५५ ।।

[1] मलम् J2, Pt2. [2] गतिभक्षणयोः K6, Pt2. [3] Pt2 adds मलेन दूषितं मलदूषितम्. [4] संगमे Pt2. [5] J1, Pt2 omit.

(विव.) मलीमसं—मलदूषितम् । यत् सहजेन आगन्तुकेन वा किट्टादिना मलेन दूषितं सत् वैवर्ण्यं प्रापितं कांस्यताम्रपात्रादिकं [1]तस्य नामानि । मलोऽस्यास्तीति मलीमसम् । मलिनं च । 'ज्योत्स्नातमिस्रा ...' इत्यादिसूत्रे (५. २. ११४) मलशब्दाद् ईमसच्इनच्प्रत्ययान्तौ मलीमसमलिनशब्दौ द्वावपि मत्वर्थे निपातितौ ।। कुत्सितं चरतीति कच्चरम् । चरतेः पचाद्यचि (३. १. १३४) 'रथवदयोश्च' (६. ३. १०२) इति चकारात् कोः कदादेशः [2](६. ३. १०१) । केचिदाहुः[3]—काशब्दः कुत्सितार्थः । ततश्च काचर इति दीर्घादिरिति ।। पूतं पवित्रं मेध्यश्च । पूतपवित्रशब्दौ द्वावपि ब्रह्मवर्गे स्वभावशुद्धपरिव्राजकादिवचनावुक्तौ (२. ७. ४५) । इह तु द्रव्यान्तरशुद्धिहेतुवस्तुवचनादित्यपौनरुक्त्यम् । पुनाति देहादिकमिति पूतम् । पूयतेऽनेन देहादिकमिति पवित्रम् । 'पूञ् पवने' । इत्रप्रत्ययः[4] (३. २. १८६) । शोधनद्रव्येण सङ्गमनाय योग्यो[5] मेध्यः । 'मेधृ

सङ्गमे'। ण्यत्प्रत्ययः[6] (३. १. १२४)॥ **वीध्रं तु विमलार्थकम्**। स्वभावशुद्धस्फटिकादिवचनं विमलशब्दसमानार्थमित्यर्थः। विशेषेण इन्धे वीध्रम्। 'ञिइन्धी दीप्तौ'। औणादिकः क्रन् प्रत्ययः (उ. २. २९)। कित्त्वाद् उपधानकारस्य लोपः[7] (६. ४. २४)॥ ५५॥

[1] तत्र मलीमसादिचतुष्कं स्यात् Tj1, Gm3. [2] 'कोः कत्तत्पुरुषेऽचि'. [3] केचित्तु कौ भूमौ चरतीत्याहुः Tv. [4] 'कर्तरि चर्षिदेवतयोः'. [5] योग्यं मेध्यम् Tv. [6] 'ऋहलोर्ण्यत्'. [7] 'अनिदितां हल उपधायाः क्ङिति'.

(पा.) मलीमसं—मलदूषितम्। [1]मलवतो नामानि॥ पूतं—मेध्यं च। पवित्रनामानि। 'शिवं पुण्यं च पावनम्'। एतानि त्रीणि च॥ वीध्रं तु विमलार्थकम्। 'विमले वीध्रं मलिने द्वौ कच्चरमलीमसौ' इति वैजयन्ती (पृ. २०६, श्लो. ६६)। [2] निर्मलनामानि॥ ५५॥

[1] बहुमलयुक्त° A1. [2] विमल° B3.

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम्।
असारं फल्गु शून्यं तु वशिकं तुच्छरिक्तके॥ ५६॥

(वि.) निर्णिक्तमिति—निर्णिज्यते शोध्यत[1] इति निर्णिक्तम्। 'णिजिर् शौचपोषणयोः'। शोध्यत इति शोधितम्। 'शुध शौचे'। [2]मृज्यत इति मृष्टम्। [3]'मृजूष् शुद्धौ'। निर्गतं शोध्यात् परित्याज्यादिति निःशोध्यम्। अविद्यमानोऽवस्करोऽस्येति अनवस्करम्। शोधितद्रव्यनामानि॥ [4]न [5]सारोऽस्येत्यसारम्। शीघ्रमेव फलतीति फल्गु। 'ञिफला विशरणे'। निःसारस्य तूलादेर्नामनी॥ [6]बाधकाभावेन[7] शुने हितं शून्यम्। वश्यते काम्यते उपवेशनायेति वशिकम्। 'वश कान्तौ'। तुदति शून्यत्वात् मनः क्लेशयतीति तुच्छम्। 'तुद व्यथने'। रिच्यते वस्तुभिर्हीयत इति रिक्तकम्। 'रिचिर् विरेचने'। [8]वस्तुविरहितस्य गृहादेर्नामानि॥ ५६॥

[1] K5, Pt2 omit. [2] मार्ज्यते स्म K4, K5, Pt2. [3] मृजू K2, K4, K5. [4] न विद्यते Pt2. [5] परित्यागांशोऽत्र K3, K5; परित्याज्यांशः Pt2. [6] निवारकाभावात Pt2. [7] °रहितम् K5. [8] भूतादिभिः Pt2.

(विव.) निर्णिक्तं—अनवस्करम् । वस्त्रगालनप्रक्षालनादिभिरपसारितहेयभागस्य द्रव्यस्य नामानि । निर्णिज्यते शोध्यत इति निर्णिक्तम् । 'णिजिर् शौचपोषणयोः'[1] । क्तः (३.२.१०२) । 'उपसर्गादसमासेऽपि णोपदेशस्य' (८.४.१४) इति णत्वम् ।। शोध्यत इति शोधितम् । 'शुध शौचे' । णिचि क्तप्रत्ययः । [2]मृज्यते मृष्टम् । 'मृजूष् शुद्धौ' । 'व्रश्चभ्रस्जसृजमृज . . .' इत्यादिना (८.२.३६) षत्वम् ।। निष्क्रान्तं शोध्यात् परिहरणीयभागाद् इति निःशोध्यम् ।। इह अवस्करशब्देन वर्चस्कवाचिना त्याज्यं वस्तुमात्रं लक्ष्यते । अविद्यमानोऽवस्करो यत्र इत्यनवस्करम्[3] ।। असारं फल्गु । यत् सारभागरहितं शिग्रुकाष्ठादिकम्, यच्च ततोऽन्यदपि उपादेयांशरहितं वाक्यादिकं तत्सर्वं फल्गुशब्देनोच्यते । फलति निःसारत्वेन शीघ्रं विशीर्यत इति फल्गु । 'ञिफला विशरणे' । औणादिक उप्रत्ययः गुगागमश्च[4] (उ. १. १८) । शून्यं तु—रिक्तके । [5]स्वसमुचितमनुष्याद्याधेयरहितस्य गृहादेर्नामानि[6] । यथा—शून्यं गृहम्, शून्यो घट इत्यादि । शुने हितं शून्यम् । 'उगवादिभ्यो यत्' इत्यत्र 'शुनः संप्रसारणं वा च दीर्घत्वम्' (ग. सू. ५. १. २) इति गणसूत्रे श्वन्शब्दस्य यत्प्रत्यये परतः संप्रसारणं भवति, विकल्पेन दीर्घश्च ।। जनान्तरानवरुद्धत्वेन वशः स्वाधीनत्वमत्रास्तीति वशिकम् । 'वश कान्तौ' । मत्वर्थे ठन्प्रत्ययः ।। 'तुद व्यथने' इत्यस्मात् संपदादिक्विपि (वा. ३. ३. ९४) तुच्छब्दो दुःखवचनः । तुदं श्यति संबन्धरहितत्वेन [7]तनूकरोति, छ्यति छिनत्तीति, तुच्छम् । 'शो तनूकरणे' 'छो छेदने' इति वा धातुः । 'आतोऽनुपसर्गे कः' (३.२.३) । रिच्यते [8]पृथगवस्थितवस्तुभिर्वियुज्यत इति रिक्तम् । 'रिचिर् विरेचने' । क्तप्रत्ययः (३.२.१०२) । कुत्वं च (८.२.३०) । स्वार्थे कन् (५.४.५) ।। ५६ ।।

[1] B5, B6 omit पोषणयोः. [2] मार्ज्यते B5, Gm3. [3] अनवस्करः Tv.
[4] 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च'. [5] Tj1, Tv add शून्यादिचतुष्कम्.
[6] गृहादौ Tj2, Tv. [7] Tv adds प्रक्षेपादिव्यवहारयोग्यत्वेन. [8] °अवस्थितैः Gm3, Tj1.

(पा.) निर्णिक्तं—अनवस्करम् । [1]क्षालनादिक्रियया निर्मलवस्तुनामानि । असारं फल्गु । असारनामनी । शून्यं तु—रिक्तके । शून्यनामानि ।। 'वशिकविशिखाविहारिणीष्वभिसारिकासु' इति हर्षचरितप्रयोगात्[2] वशिकं तालव्यशकारम् ।। ५६ ।।

[1] क्षालनादिना B3, C1. [2] सागरानुप्रासात् A1.

क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रबर्होऽनवरार्ध्यवत् ।। ५७ ।।
परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ।।

(वि.) क्लीव इति—प्रधत्ते[1] स्वोपसर्जनीभूतं[2] धारयतीति प्रधानम् । प्रकृष्टं मुखमिव प्रियमानसत्वमस्येति प्रमुखः । प्रकृष्टो वेकः [3]पृथक्त्वमस्ति असामान्यमस्येति प्रवेकः[4] । अस्मादुत्तमो[5] नास्तीत्यनुत्तमः । उद्गतानाम् उत्कृष्टानामयम् अतिशयेनोन्नत[6] इति उत्तमः । मुखमिव प्रधानं प्रियमानसत्वमस्येति मुख्यः । वरणीयो[7] वर्यः । वरेण्यश्च । 'वृञ् वरणे' । प्रकर्षेण बृहति स्वशेषभूतानुद्धरतीति [8]प्रबर्हः । 'बृहू उद्यमने' । गणस्यानपरार्धे मुख्यभागे भवो वर्तमानोऽनपरार्ध्यः । परार्ध्यश्च । [9]अनवरार्ध्य इति वा पाठः । गणकार्यमकृत्वा न गच्छतीत्यग्रः[10] । प्राग्रं सभायां मुख्यस्थानं[11] हरतीति प्राग्रहरः । प्राग्रे मुख्यस्थाने भवो वर्तमानः प्राग्र्यः । अग्रे मुख्यस्थाने भवो वर्तमानोऽग्र्यः । अग्रियः, अग्रीयश्च । मुख्यनामानि ।। ५७ ।।

[1] K_5, K_6 add अस्य. [2] °भूतान् K_5. [3] विशेषज्ञानम् K_5. [4] K_4 adds 'विचिर् पृथग्भावे'. [5] K_5 adds अधिकः. [6] अतीवोन्नतः K_5; अतिशयेनोत्कृष्टः Pt_2. [7] Pt_2 adds स्वाश्रितैर्भजनीयः. [8] प्रकृष्टो बर्हं उद्यमो यस्य Pt_2. [9] अवरार्धे भवोऽवरार्ध्यः जघन्यः । स न भवतीति अनवरार्ध्यः Pt_2. [10] अङ्गत्युत्कर्षमित्यग्रः । 'अगि गतौ' Pt_2. [11] श्रेष्ठं रत्नकुण्डलादिकं Pt_2.

(विव.) क्लीबे—अग्रियम् । सार्धश्लोकेन प्रधानाद्याः सप्तदश शब्दाः तत्तज्जातीयसमूहापेक्षया गुणातिशययुक्तस्य[1] वाचकाः । प्रकर्षेण धत्ते स्वोपसर्जनीभूतान् [2]पुष्णातीति प्रधानम् । ल्युट् (३. ३. ११३) । अस्य प्राकरणिकं विशेष्यनिघ्नत्वं नास्तीति दर्शयितुं क्लीब इत्युक्तम् । [3]ततश्च गुणेषु विनयः प्रधानम्, विद्वत्सु वैयाकरणः प्रधानम् इत्येव भवति । अतश्च 'न जाने सप्रधानो मे शूरो हस्ती सदामदः' इति देवीमाहात्म्येऽपि (१. १४) प्रधानेन सह वर्तत इति बहुव्रीहिरेवेति सर्वानन्दः[4] (टी. स. पृ. २८) ।। प्रकृष्टं मुखं वागारम्भोऽस्येति प्रमुखः ।। प्रकृष्टो वेकः पृथक्त्वम् इतरापेक्षमुत्कर्षलक्षणं वैलक्षण्यमस्येति प्रवेकः ।। नास्त्युत्तमोऽस्मादित्यनुत्तमः ।। उदिति निपातः उत्कर्षार्थः[5] । अतिशयेन उत्कृष्टः उत्तमः । अतिशायने तमप्प्रत्ययः (५. ३. ५५) ।। मुखमिव प्राधान्येन[6] प्रतीयमानत्वेन

6

मुख्यः । इवार्थे 'शाखादिभ्यो यः' (५. ३. १०३) इति यः ।। वरणीयः स्वशेषभूतैर्भजनीय इति वर्यः । 'वर ईप्सायाम्'[7] । चुरादौ अदन्ताद् 'अचो यत्' (३. १. ९७) इति यत् ।। व्रियते सेव्यत इति वरेण्यः । 'वृञ् वरणे' । 'वृञ एण्यः' (उ. ३. ९८) इत्यौणादिकैण्यप्रत्ययः ।। प्रकर्षेण बृंहति वर्धते प्रबर्हः । 'बृह वृहि वृद्धौ' । पचादिः (३. १. १३४) । वरः श्रेष्ठः, ततोऽन्योऽवरः । अवरार्धे निकृष्टभावे भवः अवरार्ध्यः[8] । 'परावराधमोत्तमपूर्वाच्च' (४. ३. ५) इति यत्प्रत्ययः । ततो नञ्समासे (२. २. ६) सति अनवरार्ध्यः ।। [9]प्रधानादिशब्दानां प्रबर्हादिशब्दसाम्यप्रतिपादको वतिप्रत्ययः पादपूरणार्थः ।। परार्धे श्रेष्ठभागे भवः परार्ध्यः । पूर्ववदेव यत्प्रत्ययः (४. ३. ५) ।। अङ्गति पुरो गच्छतीत्यग्रः । 'अगि गतौ' । 'अग्राद्यत्' (४. ४. ११६) इति निर्देशाद् बाहुलको रक्प्रत्ययः नकारलोपश्च ।। प्रकर्षेण अग्रं श्रेष्ठं रत्नकुण्डलपट्टांशुकादिकं हरति स्वीकर्तुमर्हतीति प्राग्रहरः । 'हरतेरनुद्यमनेऽच्' (३. २. ९) इति अच्प्रत्ययः ।। प्राग्रे [10]पुरःप्रदेशे भवः प्राग्र्यः । अग्रस्थाने भवोऽग्र्यः । 'अग्राद्यत्' (४. ४. ११६) इति यत्प्रत्ययः ।। 'घच्छौ च' (४. ४. ११७) इति छप्रत्यये अग्रीयः । घप्रत्यये अग्रियः (७. १. २) ।। ५७ ।।

[1] °युक्ते भवन्ति Tj1, Tv. [2] धारयति Tj2, Gm3. [3] अतः Gm1. [4] 'इति चण्डीपाठः सह प्रधानेन वर्तत इति साधुः' इति मुद्रितग्रन्थे. [5] उत्कर्षे वर्तते Gm3, Tj2. [6] प्राधान्ये Tv. [7] इच्छायाम् B5, B6, Gm1. [8] परः श्रेष्ठः, ततोऽन्योऽपरः । अपरार्धे निकृष्टभावे भवः अपरार्ध्यः Tv. [9] प्रबर्हादिशब्दैस्तुल्याः प्रधानादयः शब्दाः Tj1, Tv. [10] पुरतः Gm1, Gm3.

(पा.) क्लीबे—अग्र्याग्रीयम् । दीर्घादि । अग्रियम् । मुख्यवस्तुनामानि ।। ५७ ।।

श्रेयान् श्रेष्ठः पुष्कलः स्यात् सत्तमश्चातिशोभने ।। ५८ ।।
स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ।। ५९ ।।

(वि.) श्रेयानिति—अतिशयेन प्रशस्यत इति श्रेयान् । श्रेष्ठश्च । 'शंसु स्तुतौ' । महिम्ना [1]पुष्यतीति पुष्कलः । 'पुष पुष्टौ' । अतिशयेन

सन् सत्तमः । [2]अतिशोभनस्य नामानि ।। व्याघ्रः, पुंगवः, ऋषभ[3]ः, कुञ्जरः, सिंहः, शार्दूलः, नागः, आद्यग्रहणात् चन्द्रादयश्च । एते व्याघ्रादयः शब्दा [4]उत्तरपदानि सन्तः पुंसि पुरुषे[5] श्रेष्ठार्थवाचकाः[6] [7]श्रेष्ठार्थप्रतिपादनपराः स्युः भवेयुः । अत्रोदाहरणानि—पुरुषव्याघ्रः, मुनिपुंगवः, राजर्षभः, नृपकुञ्जरः, पुरुषसिंहः,[8] मुनिशार्दूलः, गोनागः, मुखचन्द्रः इत्यादि ।। ५८-९ ।।

[1] पुष्णाति Pt2. [2] Pt2 adds अत्यन्तं शोभनोऽतिशोभनः. [3] वृषभः J2, K6. [4] उत्तरपदे वर्तमानाः K5. [5] पुरुषविषये K5. [6] °गोचराः K5. [7] K5 has श्रैष्ठ्य° for श्रेष्ठार्थ°. [8] पुरुषर्षभः J2.

(विव.) **श्रेयान्—अतिशोभने** । [1]अत्यन्तप्रशंसाविषयस्य नामानि । अन्यापेक्षया अतिशयेन प्रशस्यः श्रेयान् । 'द्विवचनविभज्य . . .' इत्यादिना (५. ३. ५७) ईयसुन्प्रत्ययः ।। '[2]अतिशायने तमबिष्ठनौ' (५. ३. ५५) इति प्रशस्यशब्दादेव इष्ठन्प्रत्यये श्रेष्ठः । उभयत्रापि प्रशस्यशब्दस्य श्रादेशः[3] (५. ३. ६०) ।। पुष्यति पुनः पुनराधिक्यं प्राप्नोतीति पुष्कलः । 'पुष पुष्टौ' । 'पुषः कित्' 'कलंश्च' (उ. ४. ४-५) इति कलन्प्रत्ययः[4] ।। अतिशायनार्थे सत्-शब्दात् तमप्प्रत्यये सत्तमः[5] । 'अग्रं प्राग्रहरं श्रेष्ठं मुख्यं वर्यं प्रबर्हणम्' इति [6]त्रिकाण्डशेषे पाठात्, '[7]श्रेष्ठं प्रधानं युक्तमनुत्तमं सत्तमं प्रबर्हणं च' इति नाममालायां पाठाच्च प्रधानाद्या एकविंशतिः शब्दा एकार्था इति केचित् ।। **स्युरुत्तरपदे—श्रेष्ठार्थगोचराः** । अस्यार्थः—पुरुषमुनिराजादीनामुपमितशब्दानां पूर्वपदत्वे सति उत्तरपदत्वेन समस्यमाना उपमानवचना व्याघ्रादयो नागान्ताः शब्दाः आद्यशब्दसंगृहीता वृषभवृषचन्द्रवराहादयोऽपि महाकविप्रयोगेषु परिदृश्यमानाः शब्दाश्च श्रेष्ठार्थगोचराः, स्वार्थव्याघ्रादिगतसजातीयगुणयुक्तेषु पुरुषादिषु पूर्वपदार्थेषु गुणातिशयप्रतिपादनपरा भवन्तीति । यथा—पुरुषव्याघ्रः, मुनिपुंगवः, पुरुषर्षभः, वादिसिंहः, गोनागः, राजचन्द्र इत्यादयः प्रयोगानुरोधाद् अवगन्तव्याः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (२. १. ५६) इति समासः । व्याघ्रादिश्चाकृतिगणः । पुंसीत्यनेन व्याघ्राद्युत्तरपदानामाविष्टलिङ्गत्वमिति दर्शितम् । तेन योषिद्व्याघ्रः, कलत्रशार्दूलः, [8]अपत्यसिंह इत्यादिकमेव भवति ।। ५८-९ ।।

[1] अतिशोभनमतिप्रशंसाविषयः, तत्र श्रेयआद्याः शब्दाः स्युः Gm3, Tj1. [2] Tv adds अत एव. [3] 'प्रशस्यस्य श्रः'. [4] कलप्रत्ययः B6, Gm1. [5] अतिशयेन

सन् सत्तमः Tj1, Tj2. [6] मुद्रितग्रन्थे न दृश्यते; त्रिकाण्डे इति टी. स. (पृ. २८). [7] वर्यमिति पाठः भा. दी. (पृ. ४२५). [8] अपत्यव्याघ्रः Tj1, Tj2.

(पा.) श्रेयान्––अतिशोभने । [1]अत्यन्तमुख्यभूतवस्तुनामानि ।। स्युरुत्तरपदे––श्रेष्ठार्थगोचराः । उत्तरपदीभूता व्याघ्रादिशब्दाः पूर्वपदार्थश्रैष्ठ्यगमकाः । पुरुषव्याघ्रः, गजपुंगवः, हयकुञ्जरः, ब्राह्मणर्षभः, राजपुण्डरीकः, गोवृषभः, कविवराहः । पुंनिर्देशः पूर्वपदसापेक्षः । [2]तेन स्त्रीसत्तमा, कुमारीश्रेष्ठा इत्यादि ।। ५८-९ ।।

[1] अतिमुख्यवस्तु° B3. [2] A1 omits तेन.

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।
विशङ्कटं पृथु बृहद् विशालं पृथुलं महत् ।। ६० ।।
रुन्द्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे ।

(वि.) अप्राग्र्यमिति––न प्राग्र्यं [1]भवतीत्यप्राग्र्यम् । प्रधानं न [1]भवतीत्यप्रधानम् । उपसृज्यते प्रधानीभूतेनेति[2] उपसर्जनम् । 'सृज विसर्गे' । अमुख्यस्य नामानि ।। [3]विस्तीर्यत इति विशङ्कटम् । विशालं च । प्रथत इति पृथु । पृथुलं च । 'प्रथ प्रख्याने'[4] । बर्हति सर्वतो वर्तत इति बृहत् । 'बृह[5] वृद्धौ' । महति पूजयतीति महत् । 'मह पूजायाम्' । रवतेऽवयवद्वारैर्गच्छतीति रुन्द्रम् । 'रुङ गतिरेषणयोः' । ऊर्णोति आच्छादयतीति उरु । 'ऊर्णुञ् आच्छादने' । विपोलति महत्त्वमाप्नोतीति विपुलम् । 'पुल महत्त्वे' । महत्त्वमापन्नस्य जलादेर्नामानि ।। प्यायते वर्धत इति पीनम् । पीवरं च । 'ओप्यायी वृद्धौ' । स्थूलयते स्थूलम् । 'स्थूल परिबृंहणे' । पीनस्य वृषभस्कन्धादेर्नामानि ।। ६० ।।

[1] J2, K6 omit भवति. [2] Pt2 adds नियुज्यते. [3] विशीर्यते J2, K4, K5. [4] प्रख्यातौ K5. [5] K5, K6 add बृहि.

(विव.) अप्राग्र्यं––उपसर्जने । [1]गुणभूतस्य नामानि । प्राग्र्याद् मुख्यादन्यद् अप्राग्र्यम् । प्रधानादन्यदप्रधानम् । उपसृज्यते नियुज्यते प्रधानभूतेनेति

उपसर्जनम् । 'सृज विसर्गे' । ल्युट् (३. ३. ११३) । अप्रधानम् उपसर्जनं [2]चेति द्वे पदे नपुंसकलिङ्गे इत्यर्थः ।। विशङ्कटं—विपुलम् । [3]द्रव्यान्तरापेक्षया महत्त्वाधिकरणपरिमाणयुक्तस्य नामानि । गृहादङ्गणं विशालम् । कुवलादामलकं महत् । दर्पणाद् रथाङ्गं महद् इत्यादि । विस्तारार्थात् 'वेः शालच्छङ्कटचौ' (५. २. २८) इति शालच्प्रत्यये विशालम् । शङ्कटचि विशङ्कटम् ।। प्रथत इति पृथु । 'प्रथ प्रख्याने' । 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' (उ. १. २८) इति कुप्रत्ययः संप्रसारणं च । [4]पृथुलं च ।। बर्हति वर्धत इति बृहत् । 'बृह वृद्धौ' । उणादौ निपातनात् (उ. २. ८४) अतिप्रत्ययः ।। महति पूजयति श्रेयःस्थानमिति महत् । 'मह पूजायाम्' । 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ. २. ८४) इति अतिप्रत्ययान्तत्वेन शब्दद्वयमपि निपातितं शतृवच्च कार्यं भवति ।। पृथुशब्दाद् भावमात्रविवक्षायां मत्वर्थीये लच्प्रत्यये[4] (५. २. ९७) श्यामलमञ्जुलादिशब्दवत् पृथुलशब्दः । पृथुत्वं लात्यादत्त इति वा पृथुलम् (३. २. ३) ।। भूयोऽवयवत्वेन परितो रुन्धन् द्राति कुटिलं गच्छतीति रुन्द्रः । 'द्रा कुत्सायां गतौ' । मूलविभुजादिः । पृषोदरादित्वात् साधुः । रुन्द्रं प्रातिपदिकमव्युत्पन्नमिति केचित् ।। ऊर्णोति स्वाधारदेशमाच्छादयतीति उरु । 'ऊर्णुञ् आच्छादने' । 'ऊर्णोतेर्नुलोपश्च' इत्यनुवृत्तौ 'महति ह्रस्वश्च' (उ. १. ३२) इति कुप्रत्ययः ।। विशेषेण पोलति महद् भवतीति विपुलम् । 'पुल महत्त्वे' । इगुपधलक्षणः कः (३. १. १३५) ।। पीनपीव्नी तु स्थूलपीवरे । [5]वेणुदण्डाद्यपेक्षया परिणाहातिशयवतः स्तम्भादेर्नामानि । यथा—तृणकाण्डाद् इक्षुदण्डः पीवरः, ततोऽपि कीचकः, ततोऽपि स्तम्भः इत्यादि । प्यायते वर्धत इति पीनम् । 'ओप्यायी वृद्धौ' । क्तप्रत्यये (३. ४. ७२) 'प्यायः पी' (६. १. २८) इति धातोः पीभावः, 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम् ।। तत एव धातोः 'अन्येभ्योऽपि दृश्यते' (३. २. ७५) इति क्वनिप्प्रत्यये दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वेन संप्रसारणे च पीवा । स्त्रियां तु 'वनो र च' (४. १. ७) इति ङीपि रेफे च पीवरी । 'छित्वरछत्वरधीवरपीवर...' इत्याद्युणादिसूत्रे (उ. ३. १) प्यायतेः पिबतेर्वा पीभावः ष्वरच्प्रत्ययश्च निपात्यत इति वृत्तिकारः[6] । स्थूलयत इति स्थूलम् । 'स्थूल परिबृंहणे' । पचाद्यच् (३. १. १३४) ।। ६० ।।

[1] अप्राग्र्यादित्रयं गुणीभूते Tj1, Tj2, Tv. [2] इति शब्दद्वयं द्विहीने द्वाभ्यां स्त्रीलिङ्गपुंलिङ्गाभ्यां रहिते नपुंसके इत्यर्थः Gm3, Tj1. [3] विशङ्कटादिनवकम् आयामविस्ताराभ्यां तुल्यरूपे ... रथचक्रादौ स्यात् Gm1, Tj2. [4] 'सिध्मादिभ्यश्च'. [5] Gm3, Tv

add स्वसदृश°. [6] मुद्रितमाधवीयवृत्तौ न दृश्यते; कौमुदीव्याख्यायां तु-(पृ. ५१३) पा पाने . . . त्रयाणामीत्वमन्तस्य निपात्यत इत्येके । अन्ये तु पीव . . . स्थौल्ये । एभ्यः क्वरचि 'लोपो व्योः-' इति लोपमाहुः .

(पा.) अप्राग्र्यं––उपसर्जने । अमुख्यभूतवस्तुनामानि । द्वयहीने नपुंसके । 'उपाग्र[1] तु गुणः पुंसि क्लीबे स्यादुपसर्जनम्' इति वैजयन्ती (पृ. २०६, श्लो. ६४) ।। विशङ्कटं––विपुलम् । [2]विपुलनामानि । 'विस्तीर्णं विकरालं च व्यूढं वितन्तमाततम्'। इमानि पञ्च च ।। पीनपीव्नी तु स्थूलपीवरे । स्थूलस्य नामानि ।।६०।।

[1] उपाग्रः इति मुद्रितग्रन्थे. [2] विशालभूतवस्तु° A_1.

स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं दभ्रं कृशं तनु ।। ६१ ।।
स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः ।
अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ।। ६२ ।।

(वि.) स्तोकेति––[1]स्तूयत इति स्तोकः । 'ष्टुञ् स्तुतौ' । अल्यते महद्वस्तुषु निवार्यत इत्यल्पः । 'अल निवारणे'[2] । क्षुद्यते संपिष्यत इति क्षुल्लकः । 'क्षुदिर् संपेषणे' । सुष्ठु उक्ष्यते सिच्यत इति सूक्ष्मम् । 'उक्ष सेचने' । स्वरन्ध्रेषु श्लिष्यतीति श्लक्ष्णम् । 'श्लिष आलिङ्गने' । दभ्यते शिलादौ संपिष्यत इति दभ्रम् । 'दम्भु विक्षेपे'[3] । कृश्यत इति कृशम् । 'कृश तनूकरणे' । तन्यत इति तनु । 'तनु विस्तारे' । सूक्ष्मस्य तन्त्वादेर्नामानि ।। [4]मीयत इति मात्रा । 'माङ माने' । त्रुट्यते छिद्यत इति त्रुटिः । 'त्रुट [5]छेदने' । लूयत इति लवः । 'लूञ् छेदने' । लिशति[6] अल्पीभवतीति लेशः । 'लिश अल्पीभावे' । कणति[7] सूक्ष्मत्वात् कणः । 'कण निमीलने' । अणति कांस्यादौ [8]पतितः शब्दायत इत्यणुः । 'अण शब्दे' । स्वल्पनामानि ।। [9]अतिशयेनाल्पम् अत्यल्पम् । अल्पिष्ठम् । अल्पीयः । कनीयश्च । अतिशयेनाणुः अणीयः । अपिशब्दात् कनिष्ठाणिष्ठशब्दावप्यूह्यौ । अत्यल्पस्य नामानि ।। ६१–२ ।।

[1] एवं स्तौति K_6; एनं J_2, K_2. [2] भूषणपर्याप्तिवारणेषु K_5. [3] 'दम्भु आज्ञापने' K_2; क्षीणे K_4; रोधने Pt_2. [4] माति Pt_2. [5] भेदने K_3, K_6.

[6] लिश्यति K6, Pt2.　　[7] Pt2 adds निमीलति.　　[8] अणयति कांस्यादिकम् Pt2.
[9] K5 omits 3 lines.

(विव.) स्तोकाल्प—कृशं तनु । [1]बह्ववयवारब्धापेक्षया न्यूनावयवारब्धस्य नामानि । स्तूयत इति स्तोकः । 'स्तोकान्तिक ...' (२. १. ३९) इति निर्देशात् साधुः । अल्यते निवार्यत इत्यल्पम् । 'अल भूषणादौ' । 'बह्वल्पार्थात् ...' (५. ४. ४२) इति निर्देशात् साधुः ।। क्षुल्लकशब्दः पामरे निरुक्तः * (२. १०. १६) ।। सूच्यत इति सूक्ष्मम् । 'सूच पैशुन्ये' । 'सूचेः स्मन्' (उ. ४. १७८) इति [2]स्मन् ।। श्लिष्यति सर्वत्र लग्नो भवतीति श्लक्ष्णम् । 'श्लिषेरच्चोपधायाः' (उ. ३. १९) इति क्स्नप्रत्ययः उपधाया अकारादेशश्च । 'षढोः कः सि' (८. २. ४१) इति षकारस्य ककारः । 'इण् कोः' इत्यादिना (८. ३. ५९) षत्वं, णत्वं च (८. ४. १) ।। दभ्यते क्षिप्यत इति दभ्रम् । 'दम्भु क्षेपे' । रक्[3] (उ. २. १३) ।। कृशतीति कृशम् । 'कृश तनूकरणे' । इगुपधलक्षणः कः (३. १. १३५) । अथवा क्तप्रत्यये सति 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (८. २. ५५) इति निपातनात् साधुत्वम् । निष्ठातकारस्य लोपः, इडागमाभावश्च ।। तनुशब्दः शरीरे व्युत्पादितः[4] (२. ६. ७१) ।। स्त्रियां मात्रा—कणाणवः । [5]परिमाणाल्पविश्रान्तिस्थानस्य परमाण्वादेर्नामानि । मात्रा च त्रुटिश्चेति कृतद्वन्द्वसमासाभ्यामपि 'स्त्रियाम्' इति पदं संबध्यते । 'पुंसि' इति पदं तु लवादिभिश्चतुर्भिरिति षण्णामपि विशेष्यनिघ्नत्वं नास्तीति दर्शितम् ।। स्वगतगुरुत्वज्ञानाय तुलया मीयते परिच्छिद्यत इति मात्रा । 'मा माने' । त्रन् (उ. ४. १६९) ।। त्रुट्यते छिद्यत इति त्रुटिः । 'त्रुट छेदने' । 'इगुपधात् [6]किः' (उ. ४. १२०) इत्यौणादिकः किः ।। लूयते छिद्यत इति लवः (३. ३. ५७) ।। लिशति अल्पादप्यल्पीभवतीति लेशः । 'लिश अल्पीभावे' । तुदादिः । अच् (३. १. १३४) ।। कणति स्वल्पपरिमाणत्वेन संकुचितो भवतीति कणः । 'कण निमीलने' । 'निमीलनं संकोचनम्' इति धातुवृत्तिः[7] (मा. धा. पृ. १४७) । अच् (३. १. १३४) ।। गुरुत्वातिशयाभावाद् नोदनाभिघातयोरसंभवेन शब्दोत्पत्तौ कारणाभावाद् विरुद्धलक्षणया अणति शब्दायत इत्यणुः । 'अण शब्दे' । 'अणश्च' (उ. १. ८) इत्यौणादिक उप्रत्ययः ।। अत्यल्पे—अणीय इत्यपि । स्वल्पपरिमाणद्रव्यान्तरापेक्षया न्यूनपरिमाणद्रव्यस्य नामानि । अतिशयेनाल्पम् अल्पिष्ठम् । 'अतिशायने तमबिष्ठनौ' (५. ३. ५५) इत्यल्पशब्दाद् इष्ठन्प्रत्ययः । 'द्विवचनविभज्य ...' इत्यादिना (५. ३. ५७)

ईयसुन्प्रत्यये अल्पीयः। 'युवाल्पयोः कनन्यतरस्याम्' (५.३.६४) इत्यल्पशब्दस्य विकल्पेन कन् इत्यादेशे कनीयः। कनिष्ठशब्दस्याप्युपलक्षणमेतत् ॥ अणुशब्दादीयसुन्प्रत्यये (५.३.५७) अणीयः। अपिशब्दाद् अणिष्ठमपि ॥ ६१–२ ॥

उत्तरश्लोकपठिताः प्रभूतादयो द्वादश शब्दाः प्रकृतकार्योपयुक्तापेक्षया अधिकपरिमाणे वर्तन्ते ॥

[1] स्तोकाद्यष्टकं भूयोऽवयवारब्धकूश्माण्डफलाद्यपेक्षया न्यूनावयवारब्धे मातुलुङ्गफलादौ स्यात् Gm1, Tj1, Tv. [2] णिलोपे कुत्वषत्वे. [3] स्फायितञ्चि ... दम्भि ... शुभिभ्यो रक्. [4] तन्यत इति तनु। 'तनु विस्तारे'। 'भृमृशी ... तनि ... मस्जिभ्य उः' (उ. १. ७). [5] मात्रादिषट्कं ... परमाण्वादौ वर्तते Tj2. [6] 'कित्। केचित्तु इगुपधात् किरिति पठित्वा इणोऽपवादः किप्रत्ययः इति व्याचख्युः। तन्न। प्रत्ययस्वरेण ऋष्यादीनामन्तोदात्ततापत्तेः। न चेष्टापत्तिः' इत्यादि कौमुदीव्याख्या (पृ. ५३१). [7] निमेषणं संकोचः इति मुद्रितग्रन्थे. * क्षुदिर् संपेषणे। 'संपदादिभ्यः क्विप्'। क्षुदं लाति। 'आतोऽनुपसर्गे कः', 'तोर्लि', स्वार्थे कन् इति भा. दी. (पृ. ४२६).

(पा.) स्तोकाल्प––कणाणवः। [1]अल्पनामानि। मात्रादयो धर्मिधर्मवचनाः। तव लेशोऽपि न विद्यते प्रियम्। सुखस्य लेशोऽपि न विद्यते भवे ॥ अत्यल्पे––अणीय इत्यपि। अत्यल्पनामानि ॥ ६१-२ ॥

[1] सूक्ष्म° B3; स्वल्प° C1.

प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु।
पुरुभूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥ ६३ ॥

(वि.) प्रभूतमिति––स्वकार्यमापादयितुं[1] प्रभवतीति प्रभूतम्[2]। [3]प्रचीयते बहुभिरवयवैरिति प्रचुरम्। 'चिञ् चयने'। बहूकर्तुमेकत्र [4]प्राज्यते क्षिप्यत इति प्राज्यम्। 'अज गतिक्षेपणयोः'। न दभ्रमदभ्रम्[5]। बंहते संग्रहणेन वर्धत इति बहु। बहुलं[6] च। 'बहि महि वृद्धौ'। पुर्वित्यनया संज्ञया भूयते ऽनुभूयत इति पुरुभूः। पुरुहूरिति वा पाठः। पूर्यत इति पुरु। 'पूरी आप्यायने'। अतिशयेन बहु भूयिष्ठम्। भूयश्च। स्फायते वर्धत इति स्फारम्[7]। 'स्फायी वृद्धौ'। [8]अनल्पतया भवतीति भूरि। 'भू सत्तायाम्'। अनल्पस्य नामानि ॥ ६३ ॥

[1] आसादयितुं K5.   [2] K5, Pt2 add 'भू सत्तायाम्'.   [3] प्रकर्षेण चीयते J2.
[4] प्रकर्षेण अज्यते Pt2.   [5] दभ्रमल्पं न भवतीति Pt2.   [6] बहु बहुत्वमस्त्यस्येति Pt2.
[7] स्फीतम् K2, K4.   [8] भवत्यनल्पमिति Pt2.

(विव.) प्रभूतं—भूरि च। प्रभवति समर्थो भवतीति प्रभूतम्। क्तः (३. ४. ७२)। प्रकर्षेण चीयते उपचीयत इति प्रचुरम्[1]॥ प्रकर्षेण अज्यते व्यक्तीक्रियत इति प्राज्यम्। 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'। क्यप्प्रत्यये[2] (वा. ३. १. १०९) 'अनिदितां...' (६. ४. २४) इत्यनुनासिकलोपः॥ दभ्रादल्पाद् अन्यद् अदभ्रम्॥ बंहते वर्धत इति बहु। 'बहि महि वृद्धौ।' 'लङ्घिबंह्योर्नलोपश्च' (उ. १. २९) इति उप्रत्ययः नलोपश्च[3]॥ ततो भावमात्रवचनाद् मत्वर्थीये लच्प्रत्यये श्यामलादिशब्दवद्[4] बहुलम्[5]॥ पिपर्ति पूर्यते वा पुरु। 'पॄ पालनपूरणयोः'। 'पृभिदिव्यधिगृधिधृषिभ्यः' (उ. १. २३) इति कुप्रत्ययः। 'उदोष्ठ्यपूर्वस्य' (७. २. १०२) इत्युत्वम्[6]॥ पुरुभिरवयवैर्भवतीति पुरुभूः। भवतेः क्विप् (३. २. ७६)॥ 'पुरु इत्यनया संज्ञया हूयत इति पुरुहूः' इति सुबोधिनीकारः ऊष्मोपधामाह। सर्वानन्दस्तु (टी. स. पृ. २९) पुरून् [7]हरति हन्ति वा पुरुहम्। 'अन्येष्वपि दृश्यते' (३. २. १०१) इति डप्रत्ययः, इत्यकारान्तमूष्मोपधं चाह॥ अतिशयेन बहु भूयिष्ठम्। इष्ठन्प्रत्यये (५. ३. ५५) 'इष्ठस्य यिट् च' (६. ४. १५९) इति यिडागमः, बहोर्भूभावश्च[8] (६. ४. १५८)॥ स्फायते वर्धत इति स्फारम्। 'स्फायी वृद्धौ'। 'स्फायितञ्चि...' (उ. २. १३) इति रक्। स्फिरमिति पाठे 'अजिरशिशिरशिबिरशिबिलस्थिरस्फिरस्थविरखदिराः' (उ. १. ५६) इत्यौणादिकनिपातनात् स्फायतेः किरच्प्रत्ययः, आकारयकारयोर्लोपश्च॥ बहुशब्दाद् अतिशायनविवक्षायाम् ईयसुन्प्रत्यये (५. ३. ५७) 'बहोर्लोपो भू च बहोः' (६. ४. १५८) इति बहोर्लोपे भूभावे च भूयःशब्दः। सकारान्तः॥ अनल्पत्वेन भवतीति भूरि। क्रिन्प्रत्ययः[9] (उ. ४. ६५)॥ ६३॥

[1] B5, Tj2 add 'चिञ् चयने'.   [2] 'आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्'.
[3] Gm3, Tj1 add 'बह्वल्पार्थात्...' (५. ४. ४२) इति निर्देशात् साधुः.   [4] श्यामल-पृथुलशब्दवद् बहुलशब्दः B5, Tv.   [5] सिध्मादिषु (५. २. ९७) बहुशब्दो न दृश्यते। बहूनर्थान् लातीति सर्वानन्दः (टी. स. पृ. २९).   [6] रपरत्वं च.   [7] हरतिशब्दो मुद्रितग्रन्थे न दृश्यते.   [8] 'बहोर्लोपो भू च बहोः'.   [9] 'अदिशदिभूशुभिभ्यः क्रिन्'.

(पा.) प्रभूतं—प्राज्यं [1]वहलं वहुलं वहु। अदभ्रं वहुलमिति पाठान्तरम्। [2]पुरुहं पुरु—भूरि च। वहुलनामानि ॥ 'समग्रं पुष्कलं स्फारमदभ्रमतिमात्रकम्'। एतानि पञ्च च ॥ ६३ ॥

[1] वहुकं B3. [2] पुरुहू: B3.

परःशताद्यास्ते येषां परा संख्या शतादिकात्।
गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम् ॥ ६४ ॥
विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥ ६५ ॥

(वि.) परःशताद्या इति—[1]येषां संख्येयानां शतादिकात् शतसहस्रादिकात् परा अधिका संख्या या विद्यते तया [2]परःशताद्या भवन्ति। आदिग्रहणेन परःसहस्रादयः। [3]गणितव्यं गणनीयम्। गणेयं च। 'गण संख्याने'। संख्येयस्य तारकादेर्नामानि ॥ गण्यते संख्यायत इति गणितम्। [4]संख्यातस्य [5]क्रमुकादेर्नाम ॥ समति न्यूनत्वं न प्राप्नोतीति समम्। 'षम अवैकल्ये'। सर्वति स्वसंवन्धिवर्गोपेतं गच्छतीति सर्वम्[6]। 'षर्व गतौ'। [7]विशत्यंशेन सह संविशतीति विश्वम्। 'विश प्रवेशने'। नास्ति शेषोऽस्येत्यशेषम्। कृत्यते व्याप्यते स्थानादि कर्म वानेनेति कृत्स्नम्। 'कृती वेष्टने'। समस्यते ऊरीक्रियत[8] इति समस्तम्। 'असु क्षेपणे'। खिलादुपेक्षितांशाद्[9] निवृत्तं निखिलम्। नास्ति खिलमुपेक्षितांशोऽत्रेति अखिलम्। [10]शेषान्निष्क्रान्तमिति निःशेषम्। संगतमग्रमग्रांशोऽत्रेति[11] समग्रम्। कलाभिः[12] सह वर्तत इति सकलम्। पूर्यत इति पूर्णम्। 'पूरी आप्यायने'। न खण्डमखण्डम्। न विद्यते ऊनत्वमत्रेति अनूनकम्[13]। [14]अभिन्नस्य पुटादेर्नामानि ॥ ६४-५ ॥

[1] शतात् परा येषां ते परःशताः Pt2. [2] संख्येयाः परःशताः भवन्ति K4, K5. [3] गणयितुं शक्यं गणनीयम् Pt2. [4] J2 adds संख्यायते स्म संख्यातम्. [5] कामुकादेः K5. [6] श्री[स्त्रि]यते सजातीयैरिति Pt2. [7] विशति सर्वत्र Pt2. [8] एकीक्रियते J2. [9] खिलात् शून्यात् Pt2. [10] निर्गतम् J2. [11] अग्रेण Pt2. [12] K5 adds भागैः. [13] अनूनः J2, K4. [14] संपूर्णस्यान्नादेर्नामानि K5.

(विव.) परःशताद्याः--शतादिकात् । अत्र [1]शतादिकाद् इत्यादिशब्देन सहस्रादीनां ग्रहणम् । ततश्च येषां संख्येयानां गजतुरगादीनां संख्या शतसहस्रादेः परा अधिका भवति ते परःशतपरःसहस्रादिशब्दैरुच्यन्ते । शतात् परा इति विग्रहे 'पञ्चमी' (२. १. ३७) इति योगविभागात् समासे राजदन्तादित्वात् (२. २. ३१) परशब्दस्य पूर्वनिपाते पारस्करादित्वात् (६. १. १५७) सुडागमे च परःशता अश्वाः, परःशतान्यश्वीयानि, परःकोटयो गजता इत्यादि भवति । 'आलोकयामास हरिर्महीधरानधिश्रयन्तीर्गजताः परःशताः' इति माघः (शिशु. १२. ५०) । 'ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्रं शरदस्तपांसि' इति भवभूतिश्च (उ. च. १. १५) । अत्र सर्वानन्दः (टी. स. पृ. ३०)--'गवां परःशतं, गवां परःसहस्रमित्यादि संख्यानमात्रेऽपि[2] नपुंसकलिङ्गत्वेन प्रयोगोऽस्ति' इति ।। गणनीयं तु गणेयम् । गणनार्हद्रव्यस्यैते नामनी । 'गण संख्याने' इति चौरादिकाददन्ताद् धातोः 'तव्यत्तव्यानीयरः' (३. १. ९६) इत्यनीयर्प्रत्यये गणनीयम् । तत एव धातोः 'अचो यत्' (३. १. ९७) इति यत्प्रत्यये 'ल्यपि लघुपूर्वात्' 'क्यस्य विभाषा' (६. ४. ५०) इत्यनुवर्तमानस्य विभाषाग्रहणस्य व्यवस्थितविभाषात्वात् 'णेरनिटि' (६. ४. ५१) इति णिलोपाभावे गणेयमिति भवति इति धातुप्रदीपिकायामुक्तम् । 'गण्यमिति तु चिन्त्यम्' इति सर्वानन्दः (टी. स. पृ. ३०) । 'गणेरेयः' इति औणादिकसूत्रेण[3] एयप्रत्यये गणेयमिति सुबोधिनीकारः ।। संख्याते गणितम् । निश्चितसंख्याविशेषस्य क्रमुकादिद्रव्यस्य गणितमिति क्तप्रत्ययान्तं (३. २. १०२) नाम ।। अथ समं सर्वमित्यादि यस्य[4] वस्तुनः संबन्धिनो लोके वेदे वा प्रसिद्धा यावन्तोऽवयवगुणकर्मादयः सन्ति मात्रयापि वैकल्यरहिता भवन्ति तावत्संबन्धं तद् द्रव्यगुणकर्मादिकमनूनमुच्यते । तत्र समादयः पूर्णान्तास्त्रयोदश शब्दाः स्युः ।। अथ समम्--स्यादनूनके । समतीति समम् । '[5]षम ष्टम वैक्लव्ये' । अच् (३. १. १३४) । वैकल्याभावान्निर्भीकत्वेन विरुद्धलक्षणया वैक्लव्यं द्रष्टव्यम् । सर्वादिगणेषु पाठादस्य सर्वनामसंज्ञा ।। सृतमनेनेति सर्वम्[6] । 'सृ गतौ' । 'सर्वनिघृष्व ...' इत्यादिना (उ. १. १५६) औणादिकसूत्रेण कर्तृव्यतिरिक्तार्थे वन्प्रत्ययान्तः सर्वशब्दो निपातितः ।। विशतीति विश्वम् । 'विश प्रवेशने' । 'अशूप्रुषि ...' इत्यादिना (उ. १. १५७) क्वन्प्रत्ययः ।। अविद्यमानः शेषोऽस्येति अशेषम् ।। कृत्यते तिरोधीयते[7] स्वाधारोऽनेनेति कृत्स्नम् । 'कृती [8]वेष्टने' । 'कृत्यशूभ्यां क्स्नः' (उ. ३. १७) इति क्स्नः ।। समस्यते[9] स्वगुणीभूतैः एकीक्रियत इति समस्तम् । 'असु क्षेपणे' । क्तः ।।

निवृत्तं [10]खिलमाहतमस्मादिति निखिलम् ।। अविद्यमानं खिलमत्रेत्यखिलम् ।। निष्क्रान्तं शेषादिति निःशेषम् ।। संगतमग्रम् अग्रभागोऽस्येति समग्रम् ।। कलाभिरवयवैः सह वर्तत इति सकलम् ।। विकलावयवभागो हि खण्डमुच्यते । नास्त्यस्य खण्डमित्यखण्डम् ।। पूर्यते स्वावयवैरिति पूर्णम् । 'पूरी आप्यायने' । क्तः (७. २. २७)[11] । पूरितपर्यायोऽपि पूर्णशब्दोऽवगम्यते । आदिशब्देन पुष्कलाविकलाभिन्नादीनां ग्रहणम् ।। 'ऊन परिहाणे' इत्यस्मात् चौरादिकात् पचाद्यचि (३. १. १३४), स्वार्थिके कप्रत्ययः (५. ४. ५) । ततो नञ्समासे (२. २. ६) सति अनूनकम् ।। ६४-५ ।।

[1] शतादिशब्देन Tj2, Tv. [2] शतादिकं वर्तत इति मुद्रितग्रन्थे. [3] कौमुद्यां न दृश्यते तादृशं सूत्रमुणादिषु. [4] Tv adds घटादेः. [5] षम ष्टम अवैकल्ये इत्यपि धातुपाठः. [6] सरति वस्तुमात्र इति सर्वः। गणपाठादेव प्रवर्तते Gm3, Tv. [7] भिद्यते Gm1; छाद्यते Tv. [8] छेदने B5, B6. [9] Gm1, Tj2, Tv add स्वावयवाद्यैः. [10] अप्रहतं Tv. [11] 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः'.

(पा.) <u>परःशताद्याः</u>—<u>शतादिकात्</u> । [1]येषां संख्येयानां [2]शतादिकात् परा संख्या ते परःशताद्याः ।

'स जवेन पतन् परःशतानां

पततां व्रात इवारवं वितेने' । (किरा. १३. २६)

इति । वैयधिकरण्येनापि प्रयोगः[3], 'परःसहस्रं करिणां ममारेः' इति ।। <u>गणनीयं तु गणेयम्</u> । संख्यातुं योग्यस्य नामनी ।। <u>संख्याते गणितम्</u> । संख्यातनाम ।। <u>अथ समं—स्यादनूनके</u> । समस्तनामानि । [4]समः समौ समे । समस्मै । समेषाम् । समं सर्वार्थे इति नियमादितरार्थेषु सर्वनामसंज्ञा न भवति । तेन समाय समानायेत्यर्थः । [5]समानां संवत्सरणामित्यर्थः । समे साधावित्यर्थः । 'समा स्त्री वत्सरे साधुसर्वतुल्येषु वाच्यवत्' इति <u>वैजयन्ती</u> (पृ. २३७, श्लो. ६५) ।। अनुवतम्—'खण्डनेमोनविकलाः' । असमस्तनामानि ।। ६४-५ ।।

[1] येषां केषां A1. [2] शताद्यर्थात् A1. [3] वक्तुं सुकरम् A1, C1. [4] A1 omits 4 words. [5] B3 omits 8 words.

घनं निरन्तरं सान्द्रं पेलवं विरलं तनु ।
समीपे निकटासन्नसंनिकृष्टसनीडवत् ।। ६६ ।।
सदेशाभ्याशसविधसमर्यादसवेशवत् ।
उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ।। ६७ ।।

(वि.) घनमिति---वायुजलादिना हन्यत इति घनम् । 'हन हिंसागत्योः' । निर्गतमन्तरमत्रेति[1] निरन्तरम् । सह अन्द्यते [2]वध्यत इति सान्द्रम् । 'अदि बन्धने' । निबिडसंयोगावयवस्य[3] गोण्यादेर्नामानि ।। [4]पेल्यते क्षिप्यते शिथिल-संयोगावयवेष्विति पेलवम् । 'पिल क्षेपे' । विशेषेणावयवानामन्तरं [5]रातीति विरलम् । 'रा दाने' । तन्यते विस्तीर्यत इति तनु । 'तनु विस्तारे'। शिथिलसंयो-गावयवस्य पटादेर्नामानि ।। संगता आपोऽत्रेति[6] समीपः । निकटति [7]निवध्नातीति निकटः । 'कटे वर्षावरणयोः' । आसीदन्त्यत्रेत्यासन्नः । 'षद्लृ [8]विशरणे' । संनिकृष्यतेऽस्मादिति[9] संनिकृष्टः । 'कृष विलेखने' । समानं नीडमस्येति सनीडः । समानो देशोऽत्रेति सदेशः । [10]अभ्यश्यते व्याप्यत इति अभ्याशः । 'अशू व्याप्तौ' । समाना विधा अस्येति सविधः । समाना मर्यादा अत्रेति समर्यादः । समानो वेशः प्रवेशोऽत्रेति सवेशः । उपगतः [11]कण्ठमित्युपकण्ठः । अन्तोऽस्यास्तीति अन्तिकः । अभ्यर्द्यते गम्यत इत्यभ्यर्णः । 'अर्द गतौ' । अभिमुखमग्रमत्रेत्यभ्यग्रः । [12]अभित इत्यव्ययम् । समीपस्य नामानि ।। ६६-७ ।।

[1] अस्येति J2, Pt2. [2] संबध्यते K4, K6. [3] °संयोगावहस्य K6. [4] पिल्यते Pt2. [5] लाति, 'ला दाने' K6. [6] अस्मिन्निति Pt2. [7] बध्नाति, 'कट बन्धने' K6. [8] विशरणादौ J2, K4. [9] Pt2 omits अस्मात्. [10] अभितः अश्यते Pt2; अभ्यस्यत इति अभ्यास इति वा पाठः K5. [11] कण्ठस्य समीपे उपकण्ठम् J2, K4. [12] अभि-गच्छतीत्यभितः Pt2.

(विव.) घनं निरन्तरं सान्द्रम् । दृढावयवसंयोगस्य प्राकाराद्यवयविनो नामानि । निबिडावयवतया वाय्वादिभिर्हन्यत इति घनम् । 'हन हिंसागत्योः' । 'मूर्तौ घनः' (३. ३. ७७) इत्यप्प्रत्ययः, धातोर्घनादेशश्च ।। निर्गतमन्तरम् अवयवव्यवधानमस्येति निरन्तरम् ।। स्वावयवैः सह अन्द्यते बध्यत इति सान्द्रम् । 'अदि बन्धने' । रक्प्रत्ययः ।। पेलवं विरलं तनु । प्रशिथिलावयवसंयोगस्य

तूलपटादेर्नामानि । 'पिल क्षेपे' इति धातोर्घञ् (३. ३. १८) । पेलशब्देन शिथिलत्वमुच्यते । पेलं वाति गच्छतीति पेलवम् । कः ।। स्वगतशैथिल्येन तृणशलाकादिद्रव्यान्तरस्य प्रवेशं विशेषेण रान्ति ददतीति विराः अवयवाः, तान् लातीति विरलम् ।। तनुशब्दः शरीरे व्युत्पादितः* (२. ६. ७१) ।। समीपे—अभितोऽव्ययम् । [1]निकटादयश्चतुर्दशशब्दाः समीपे देशतः कालतो वा प्रत्यासन्ने वर्तन्ते । उपकण्ठादिशब्दानां निकटसदेशादिभिरेकार्थत्वलक्षणसादृश्यप्रतिपादकौ वतिप्रत्ययौ । संगता आपोऽत्र समीपम् । ऋक्पूरब्धू . . . (५. ४. ७४) इत्यादिना अकारः समासान्तः । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (६. ३. ९७) इतीत्वम् ।। [2]नीत्युपसर्गात् कटच्प्रत्यये (५. २. २९) निकटः । अथवा निश्चयेन कटति स्वानन्तरदेशमावृणोतीति निकटः । 'कटे वर्षावरणयोः' । पचाद्यच् (३. १. १३४) ।। आसीदति स्म आसन्नम् । क्तः ।। संनिकृष्यते स्म संनिकृष्टम् ।। समानमेकं नीडं स्थानमस्येति सनीडः । 'वोपसर्जनस्य' (६. ३. ८२) इति समानस्य[3] सभावः । एवं सदेशसविधसमर्यादसवेशशब्दाः [4]वक्तव्याः ।। अभितोऽश्यते व्याप्यते इत्यभ्याशः । 'अशू व्याप्तौ' । घञ् । तालव्योपध इति केचित् । 'समीपेऽभ्यसनेऽभ्यासः' इति दन्त्योपधेषु रभसवाक्याद् दन्त्योपधोऽयम् । तालव्योपधस्तु चिन्त्य इति सुभूतिचन्द्रसर्वानन्दौ (टी. स. पृ. ३१) ।। उपगतः कण्ठमित्युपकण्ठः । [5]'प्रादयो गताद्यर्थे प्रथमया' (वा. २. २. १८) इति समासः ।। अन्तोऽस्यास्तीति अन्तिकः । मत्वर्थे ठन्प्रत्ययः[6] (५. २. ११५) ।। [7]अभ्यर्दतीति अभ्यर्णः । 'अर्द गतौ' । क्तः । 'अभेश्चाविदूर्ये' (७. २. २५) इति निष्ठायामिडभावः । 'रदाभ्याम् . . .' इत्यादिना (८. २. ४२) निष्ठानत्वम्, पूर्वदकारस्य च नकारः । 'हलो यमां यमि लोपः' (८. ४. ६४) इति धातुनकारस्य लोपः । 'रषाभ्यां . . .' (८. ४. १) इति णत्वम् ।। अभिमुखमग्रम् अस्य अभ्यग्रः ।। अभीत्युपसर्गात् [8]तसिल्प्रत्यये (५. ३. ९) अभित इत्येतदव्ययम् ।। ६६–७ ।।

[1] निकटादिशब्दचतुष्टयेन तुल्यतया सदेशादिपञ्चकेन च तुल्यतया चत्वारः शब्दाः उपकण्ठादयः° Gm3, Tj1. [2] 'संप्रोदश्च कटच्' (५. २. २९) इति सूत्रे चाद्विकटमित्येव काशिकायां (पृ. ३४) कौमुद्यां च (पृ. २८३). स्वामी तु 'निकटं, संप्रोदश्चेति कटच्' इत्याह (पृ. २५०) । तदनुसृत्य इतरे व्याख्यातारो भानुजीदीक्षितादयः (पृ. ४२८). [3] समानशब्दस्य Tj1, Tj2. [4] निर्वक्तव्याः Tj1. [5] 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा. २. २. १८) इति भा. दी. (पृ. ४२९). [6] 'अत इनिठनौ'. [7] अभ्यर्द्यते Tj1

[8] तसिप्रत्यये B_5, Gm_1.　　* तन्यते आहारेणेति तनुः । 'तन विस्तारे' । 'भूमृशी . . . तनि . . . मस्जिभ्य उः' (उ. १. ७) इति उः.

(पा.) घनं निरन्तरं सान्द्रम् । निर्गतान्तरनामानि । [1]'दट्टमैनदानिपेल्लु' । 'निबिडं निविरीसं च' । एते द्वे च ।। पेलवं विरलं तनु । विरलनामानि । [2]'पलुचनिदानि पेल्लु' ।। समीपे—अभितोऽव्ययम् । समीपनामानि । 'समीपाद्याः। धर्मे क्ली तद्वति त्रिषु' इति वैजयन्तीवचनात् (पृ. २१२, श्लो. १४३) धर्मिणि त्रिलिङ्गाः,[3] धर्मे नपुंसकलिङ्गाः । समीपः पर्वतः । पर्वतस्य समीपम् । अभितःशब्दो धर्मधर्मिणोरप्यलिङ्गः । अभितो नगरी । नगरीमभितः ।। ६६-७ ।।

[1] 'ओत्तैनदि' A_1.　　[2] 'पलचैनैनदि' A_1.　　[3] A_1 adds भवन्ति.

संसक्ते त्वव्यवहितमपदान्तरमित्यपि ।
नेदिष्ठमन्तिकतमं स्याद् दूरं विप्रकृष्टकम् ।। ६८ ।।

(वि.) संसक्त इति—संसज्यत इति संसक्तम् । 'षञ्ज सङ्गे' । न व्यवधीयत इति अव्यवहितम् । 'डुधाञ् धारणपोषणयोः' । नास्ति तिरस्करणार्थेन [1]पदेनान्तरमिति अपदान्तरम् । अपटान्तरमिति वा पाठः । तदा अपगतं पटेनान्तरमिति विग्रहः । अत्यन्तश्लिष्टस्य नामनी ।। अतिशयेनान्तिकं नेदिष्ठम् । समीपतमस्य नाम ।। दुःखेनेयत[2] इति दूरम् । 'इण् गतौ' । विप्रकृष्यते समीपादिति विप्रकृष्टम्[3] । दूरनामनी ।। ६८ ।।

[1] व्यवधानमस्येति Pt_2.　　[2] Pt_2 adds प्राप्यते.　　[3] J_2 adds 'कृष विलेखने'.

(विव.) संसक्ते—अपदान्तरमित्यपि । अव्यवहितलग्नस्य नामानि । सज्यते स्म सक्तम् । 'षञ्ज [1]सङ्गे' । क्तः । सम्यक् सक्तं संसक्तम् । संलग्नमित्यर्थः । [2]वस्त्वन्तरेण यद् व्यवधीयते तद् व्यवहितम् । [3]ततोऽन्यद् अव्यवहितम्[4] । पदं पदमात्रपरिमितम् अन्तरं मध्यभागोऽस्य नास्तीति अपदान्तरम् । केचित्तु—नास्ति पटेन वस्त्रेणान्तरं व्यवधानमस्येति अपटान्तरमिति पठित्वा व्याचक्षते ।। नेदिष्ठमन्तिकतमम् । अन्यापेक्षया अतिशयेनान्तिकं संनिकृष्टम् अन्तिकतमम् ।

अतिशयेनान्तिकं नेदिष्ठम्[5] । 'अन्तिकबाढयोर्नेदसाधौ' (५. ३. ६३) इति अन्तिकशब्दस्य [6]इष्ठनि[7] परतो नेदादेशः । तमप्प्रत्यये अन्तिकतमम् (५. ३. ५५) ॥ स्याद् दूरं विप्रकृष्टकम् । दुःखेन ईयते गम्यत इति दूरम् । 'इण् गतौ' । 'दुरीणो लोपश्च' (उ. २. २२) इति रन्प्रत्ययः । धातोर्लोपश्च । 'रो रि' (८. ३. १४) इत्युपसर्गरेफलोपः । 'ढ्रलोपे...' (६. ३. १११) इति दीर्घः[8] ॥ द्रव्यान्तरापेक्षया संयुक्तासंयोगभूयस्त्वं विप्रकर्षः । तद्युक्तं विप्रकृष्टम्[9] ॥ ६८ ॥

[1] परिष्वङ्गे Tj1. [2] द्रव्यान्तरेण Gm1, Tj1, Tv. [3] तस्मात् Tj1, Tv. [4] नञ्समासः Tj1, Tv. [5] इतरापेक्षयात्यन्तसंनिकृष्टं Tj1, Tj2. [6] Tj2 adds 'अतिशायने तमबिष्ठनौ'. [7] इष्ठन्प्रत्यये Gm3, Tj2. [8] Tj2 adds उपसर्ग°. [9] समीपात् विप्रकृष्यते स्म विप्रकृष्टम् Tj1, Tj2; स्वार्थे कन् विप्रकृष्टकम्.

(पा.) संसक्ते—अपदान्तरमित्यपि । [1]संसक्तनामानि ॥ नेदिष्ठमन्तिकतमम् । [2]अत्यन्तसमीपनामनी ॥ स्याद् दूरं विप्रकृष्टकम् । दूरनामनी ॥ ६८ ॥

[1] अव्यवहितस्य° B3. [2] अतिसमीप° B3.

दवीयश्च दविष्ठं च सुदूरं दीर्घमायतम् ।
वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतम् ॥ ६९ ॥

(वि.) दवीय इति—अतिशयेन दूरं दवीयः । दविष्ठं च । सुतरां दूरं सुदूरम् । अत्यन्तदूरनामानि ॥ [1]दृणाति दूरस्थितं[2] विदारयतीति दीर्घम् । 'दॄ विदारणे' । आयम्यते विस्तीर्यत इत्यायतम् । 'यम उपरमे' । दीर्घस्य नामनी ॥ वर्तते भुवि परिवर्तत इति वर्तुलम् । वृत्तं च । 'वृतु वर्तने' । निर्गतं तलमत्रेति निस्तलम् । वर्तुलस्य कन्दुकादेर्नामानि ॥ बध्नात्युन्नतत्वेन सहावनतत्वमिति[3] बन्धुरम् । 'बन्ध बन्धने' । उन्नतानतस्य [4]स्तनादेर्नाम ॥ ६९ ॥

[1] दृणोति K5, K6. [2] दूरस्थितत्वादिति Pt2. [3] अवनतं K5. [4] स्थानादेः J2.

(विव.) दवीयश्च—सुदूरे । इतरापेक्षया अतिशयेन दूरमिति विग्रहे 'द्विवचनविभज्य...' इत्यादिना (५. ३. ५७) ईयसुन्प्रत्यये 'स्थूलदूर...'

इत्यादिना (६. ४. १५६) दूरशब्दस्य यणादिलोपे पूर्वस्य च गुणे[1] दवीयः। इष्ठन्प्रत्यये[2] (५. ३. ५५) पूर्ववदेव दविष्ठम्। अतिशयेन दूरं[3] सुदूरम्॥ दीर्घमायतम्। [4]आयामाख्यपरिमाणयुक्तस्य वेणुदण्डादेर्नामनी। दृणाति दूरं दारयतीति दीर्घम्। 'दॄ विदारणे'। बाहुलकात् घञ्[5]॥ दूरदेशमभिव्याप्य यम्यते नियम्यत इति आयतम्। 'यम उपरमे'। क्तप्रत्ययः। आङोऽभिव्याप्तिरर्थः॥ वर्तुलं निस्तलं वृत्तम्। [6]कुत्रापि समप्रदेशरहितस्य [7]कन्दुककपित्थफलादेर्नामानि। भुवि [8]वर्तते नैकत्र तिष्ठतीति वर्तुलम्। 'वृतु वर्तने'। बाहुलक उलच्प्रत्ययः॥ तलति प्रतितिष्ठतीति तलशब्देन समदेशो विवक्षितः। 'तल प्रतिष्ठायाम्'। निर्गतं तलमस्मादिति निस्तलम्॥ क्तप्रत्यये वृत्तम् (३. ४. ७२)। [9]बिम्बग्रहणभागस्य तलयुक्तत्वेऽपि दर्पणादावश्रिरहितत्वसादृश्याद् वृत्तशब्दप्रयोगः॥ बन्धुरं तून्नतानतम्। यदेकमेव स्वभावादुन्नतम् उपाधिवशात् प्रदेशान्तरे चानतम् ईषन्नम्रं लज्जानतमस्तकादि तद् बन्धुरम्[10]। बध्नाति स्वैकदेशमवस्थान्तरं प्रापयतीति बन्धुरम्। 'बधि संयमने'। उरच्प्रत्ययः (उ. १. ४३)। बन्धूरमिति दीर्घमध्योऽप्यस्ति। तथा च रभसः—'बन्धूरबन्धुरौ रम्ये नम्रे हंसे च बन्धुरः' इति॥ ६६॥

[1] Tj2, Tv add अवादेशे च. [2] Tj1, Tj2 add सति. [3] इतरापेक्षया Tj2, Tv. [4] स्वगतपृथुत्वापेक्षया भूप्रदेशस्य संयोगातिशयोपलक्षितव्यायामाख्यपरिमाणयुक्तस्य नामनी Tj1, Tj2. [5] 'अतो दीर्घो यञि' इति सूत्रनिर्देशात् साधुः Tj1. [6] Gm1, Tj2 add समन्ततस्तुल्यारोहपरिणाहे. [7] °बिल्वफलादौ वर्तुलादित्रयम् Gm1, Tj1, Tj2. [8] विवर्तते Tj2. [9] ऊर्ध्वाधोभागयोः समदेशरहिते दर्पणादौ अश्रिरहितत्वसाम्याद् वर्तुलवृत्तशब्दयोः प्रयोगः Tj1, Tv. [10] Gm1, Tj1 add स्यात्। फलभारबन्धुरशाखास्तरवः इति। लज्जायां—बन्धुरवदना इत्यादि.

(पा.) दवीयश्च। सान्तोऽयम्। दविष्ठं च सुदूरे। अतिदूरनामानि॥ दीर्घमायतम्। दीर्घनामनी। 'निड्वु'[1]॥ वर्तुलं निस्तलं वृत्तम्। वर्तुलनामानि॥ अनुक्तम्—'सुवृत्तं परिमण्डलम्'।[2] अतिवर्तुलनामनी।[3] बन्धुरं तून्नतानतम्। मध्योन्नतं पार्श्वनतं च यत् तद्बन्धुरं स्यात्। अनुक्तम्—'स्थपुटं विषमोन्नतम्'। मध्यनतं पार्श्वोन्नतं स्थपुटं स्यात्[4]॥ ६६॥

[1] B3 omits. [2] जनतिलकवद् वृत्त° A1. [3] A1 adds चन्द्रवत्. [4] यदस्ति वस्तु तत् A1.

उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गेऽथ वामने ।
न्यङ्नीचखर्वह्रस्वाः स्युरवाग्रेऽवनतानतम् ।। ७० ।।

(वि.) उच्चेति—उच्चीयत ऊर्ध्वमुपचीयत इत्युच्चः । 'चिञ् चयने' । प्राश्नुते प्रकर्षेणोर्ध्वमिति प्रांशुः । 'अशू व्याप्तौ' । [1]उन्नमत्यूर्ध्वमित्युन्नतः[2] । 'णम प्रह्वत्वे शब्दे च' । उद्गतमग्रमस्येत्युदग्रः । उच्छ्रीयत ऊर्ध्वं श्रयत इत्युच्छ्रितः । 'श्रिञ् सेवायाम्' । तुञ्ज्यते वाय्वादिना भज्यत इति तुङ्गः । 'तुजि हिंसायाम्' । उन्नतस्य प्रासादादेर्नामानि ।। वामो [3]वल्गुत्वमस्यास्तीति वामनः । निम्नमञ्चति गच्छतीति न्यक् । 'अञ्चु गतौ' । [4]नीचैस्त्वं विद्यतेऽस्येति नीचः । खर्वत्यवयव-दाढर्येन [5]दृप्यतीति खर्वः । 'खर्व दर्पे' । दैर्घ्याभावाद् ह्रसतीति ह्रस्वः । 'ह्रस शब्दे अल्पत्वे च' । अनुन्नतस्य नामानि ।। अवनतमग्रमस्येत्यवाग्रम् । अधो नमतीत्यवनतम्[6] । आ ईषन्नतम् आनतम् । अधोमुखस्य नामानि ।। ७० ।।

[1] उन्नम्यते J2, K2, K5. [2] K5 adds उन्नीयते. [3] वटुत्वम् K2.
[4] नीचत्वं K6. [5] तुष्यति J2, K2. [6] अवाङ्नतम् K5.

(विव.) उच्चप्रांशू—तुङ्गे । [1]उत्सेधाख्यपरिमाणयुक्ते[2] [3]तालसालादौ उच्चादिषट्कं वर्तते । उच्चीयते ऊर्ध्वं चीयत इत्युच्चः । 'चिञ् चयने' । [4]'अन्येष्वपि दृश्यते' (३. २. १०२) इति डप्रत्ययः ।। प्रकृष्टा उन्नतत्वेन प्रकाशमाना अंशवोऽवयवा अस्येति प्रांशुः ।। उन्नमति स्म उन्नतः । 'णम प्रह्वत्वे शब्दे' । कर्तरि क्तः (३. ४. ७२) । [5]उद् ऊर्ध्वं गतमग्रमस्येत्युदग्रः । ऊर्ध्वदेशं श्रयति स्म उच्छ्रितः । 'श्रिञ् सेवायाम्' । क्तः ।। तुञ्जयते वाय्वादिना हिंस्यत[6] इति तुङ्गः । 'तुजि हिंसायाम्' । कर्मणि घञ्प्रत्यये (३. ३. १९) 'चजोः कु घिण्यतोः' (७. ३. ५२) इति कुत्वम् । विशेष्यनिघ्नेषु कामचारात् पुंलिङ्गनिर्देशः[7] कृतः ।। अथ वामने—ह्रस्वाः स्युः । [8]द्रव्यान्तरापेक्षया स्वल्पोच्छ्राययुक्तस्य नामानि । नीत्युपसर्गो निकर्षवचनः । 'अञ्चु गतौ' । निकृष्टं अञ्चतीति न्यङ् । 'ऋत्विग्दधृक्...' इत्यादिना (३. २. ५९) अञ्चतेः क्विन् प्रत्ययः । 'क्विन्प्रत्ययस्य कुः' (८. २. ६२) इति कुत्वम् । चकारान्तः । स्त्रियां तु ङीपि नीची[9] ।। नीचैःशब्देन स्वल्पपरिमाणमुच्यते । तद्योगाद् अर्शआद्यचि (५. २. १२७) अव्ययानां भमात्रे टिलोपे (वा. ६. ४. १४४) नीचः ।

नीचशब्दोऽकारान्तः पामरेऽपि व्युत्पादितः (२. १०. १६)। यथा हिरण्यलोहवाहिनीलतादयः शब्दाः सामान्यविशेषोभयरूपार्थाः तद्वदिहापि ।। मनुष्यवर्गे 'खर्वो ह्रस्वश्च वामनः' इति मनुष्यविशेषे (२. ६. ४६) दर्शिताः। तत्रैव कृतनिर्वचनाश्च[10]। इह तु स्वल्पोच्छ्राययुक्तद्रव्यमात्रवचनत्वेनोच्यन्त इति ज्ञेयम् ।। अवाग्रेऽवनतानतम्। अवाग्रेऽधोमुखे द्वयम्। अवनतमग्रमस्येति अवाग्रम्। अवनमति स्म अवनतम्। क्तः। ईषन्नमति स्म आनतम्। आङ ईषदर्थः। अवनतम् आननं मुखमस्येति अवनताननमिति सुभूतिचन्द्रः ।। ७० ।।

[1] उत्सेधार्थ° Gm1, Tv. [2] Tj1, Tj2 add द्रव्ये. [3] °सालवृक्षादौ Tj2 Tv. [4] अन्येभ्योऽपि B5, Tv. [5] उदित्युपसर्ग ऊर्ध्वशब्दार्थे वर्तत इति धातुवृत्तौ Tv. [6] Gm1, Tj1, Tj2 add भज्यते. [7] पुंलिङ्गत्वेनानुशासनं कृतम् Gm1, Tj2. [8] अत्र वामनखर्वह्रस्वशब्दास्त्रयोऽपि द्रव्यमात्रवचनाः तद्विशेषवचनाश्च Tj2, Tv. [9] नीचाहस्तेन निमृज्यात् इत्यादौ प्रयोगान्तरेऽपि Tj1, Tj2. [10] खर्वति। 'खर्व गतौ'। पचाद्यच् ।। ह्रसति। 'ह्रस शब्दे'। बाहुलकाद्वन् ।। वामयति। 'टुवम उद्गिरणे'। ल्युट्.

(पा.) उच्चप्रांशू—तुङ्गे। तुङ्गनामानि ।। अथ वामने—ह्रस्वाः स्युः। वामननामानि[1] ।। अवाग्रेऽवनतानतम्। [2]अवनताग्रनामानि[3] ।। ७० ।।

[1] A1 adds 'पोट्टिवांडु'. [2] अवाग्गताग्र° A1. [3] A1 adds 'वंगिनदि'.

अरालं वृजिनं जिह्ममूर्मिमत् कुञ्चितं नतम्।
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ।। ७१ ।।

(वि.) अरालमिति—अरा वेष्टनान्यस्य सन्तीत्यरालम्। [1]वर्ज्यते आर्जवमनेनेति वृजिनम्। 'वृजी वर्जने'। जहात्यार्जवमिति जिह्मम्। 'ओहाक् त्यागे'। ऊर्मयो [2]वक्रभावाः सन्त्यस्येति ऊर्मिमत्। कुञ्चति वक्रतया[3] अल्पीभवतीति कुञ्चितम्। 'कुच गतिकौटिल्याल्पीभावयोः'। नमतीति नतम्। 'णम प्रह्वत्वे शब्दे'। ईषद्विद्धमाविद्धम्[4]। 'व्यध ताडने'। कुटति कौटिल्यं[5] प्राप्नोतीति कुटिलम्। 'कुट कौटिल्ये'। भुजतीति भुग्नम्। 'भुज कौटिल्ये'। वेल्लति [6]श्लक्ष्णतया चलतीव [7]तिष्ठतीति वेल्लितम्। 'वेल्ल चलने'। वञ्चति कौटिल्यं प्राप्नोतीति [8]वक्रम्। 'वञ्चु गतौ'। कुटिलस्य केशादेर्नामानि ।। ७१ ।।

[1] वृज्यते K5, Pt2. [2] भङ्गाः Pt2. [3] कुटिलतया J2, K5. [4] आविध्यत इति K3, K4. [5] K4, Pt2 omit. [6] चलति कुटिलतया Pt2. [7] K4 omits. [8] वङ्कनाद् वक्रम् । 'वकि कौटिल्ये गतौ च' K3, K6.

(विव.) अरालं—वक्रमित्यपि । अरालमित्यादिश्लोकेन एकादशनामानि आर्जवविरुद्धावयवसंस्थाने[1] वक्रनाम्ना प्रसिद्धे आन्दोलिकादण्डादौ वर्तन्ते । अरमत्यर्थमल्यते कार्यानुपयोगित्वेन निवार्यत इत्यरालम् । 'अल भूषणपर्याप्तिवारणेषु' ।। इह वृजिनशब्देन पापवाचिना तद्गतं हेयत्वं लक्ष्यते । तद्योगाद् अर्शआद्यच्[2] (५. २. १२७) । वृजिनम् ।। जहाति त्यजत्यार्जवमिति जिह्मम् । 'ओहाक् त्यागे' । मन्प्रत्ययः[3] (उ. १. १४६) ।। अवयवसंकोचनिबन्धनास्त्ववक्संकोचरूपावलय एव सादृश्यात् ऊर्मिशब्देन विवक्षिताः । तद्योगाद् ऊर्मिमत् । मतुप् (५. २. ९४) ।। कुञ्चति अवयवसंकोचेनाल्पीभवतीति कुञ्चितम् । 'कुञ्च क्रुञ्च गतिकौटिल्याल्पीभावयोः' । क्तः ।। नमति प्रह्वीभवतीति नतम् । कर्तरि क्तः (३. ४. ७२) ।। शरादिभिरीषद्विद्धः आविद्धः । 'व्यध ताडने' । क्तः[4] । स हि दुःसहव्यथाभराद् ईषत्संकुचितावयवो भवति । तत्सादृश्यादिदमपि[5] आविद्धमित्युच्यते ।। अत्र कुटशब्देन गृहवाचिना सादृश्यात् संकुचितावयवभागो[6] विवक्षितः । 'कुट कौटिल्ये' । ततो मत्वर्थे पिच्छादित्वाद्[7] इलचि (५. २. १००) कुटिलम् ।। भुजति कुटिलो भवतीति भुग्नम् । 'भुजो कौटिल्ये' । 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम् ।। वेल्लति स्वसंनिवेशात् चलतीति वेल्लितम् । 'वेल्ल चलने' । क्तः ।। वञ्चति अग्रावयवैर्मूलभागं गच्छतीति वक्रम् । 'वञ्चु गतौ' । 'स्फायितञ्चिवञ्चि...' इत्यादिना (उ. २. १३) रक्प्रत्ययः । अनुनासिकलोपः[8] । न्यङ्क्वादिः (७. ३. ५३) ।। ७१ ।।

[1] संस्थानयोगे Tj1. [2] °अचि Gm1, Tj1. [3] 'जहातेः सन्वदालोपश्च'. [4] 'ग्रहिज्या...' (६. १. १६) इति संप्रसारणम्. [5] Tj1 adds कुटिलमपि. [6] °भाग उच्यते Gm1, Tj1. [7] काशिकायां कौमुद्यां च पिच्छादिपाठे कुटशब्दस्यादर्शनात् 'सलिकलि...भूभ्य इलच्' (उ. १. ५७) इत्यनेन बाहुलकात् कुटिलमिति सुवचम्. [8] Gm1 omits.

(पा.) अरालं—वक्रमित्यपि । कुटिलनामानि । [1]'डोंकनदि' । अनुक्तम्—'विकटं तु विरूपकम्' । [2]अतिवक्रनामनी ।। ७१ ।।

[1] B3 omits. [2] अत्यन्त° A1, C1.

ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ ।
शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ।। ७२ ।।

(वि.) ऋजाविति—ऋज्यते आदरेण[1] संपाद्यत इति ऋजुः । 'ऋज गतिस्थानार्जनोपार्जनेषु' । न जिह्म इत्यजिह्मः[2] । प्रकृष्टोऽवक्रत्वगुणोऽस्येति प्रगुणः । ऋजुनामानि ।। व्यस्यते विपर्यस्यत[3] इति व्यस्तः । [4]प्रकृष्टगुणयोगाभावाद् अप्रगुणः । आकोलति [5]एकीभवतीत्याकुलः । 'कुल संस्त्याने बन्धुषु च' । व्याकीर्णस्य नामानि ।। शश्वद् वर्तमानः शाश्वतः । ध्रुवतीति ध्रुवः । 'ध्रुव स्थैर्ये' । नियतं भवो[6] नित्यः । सदा भवः सदातनः । सनातनश्च । विनाशरहितस्य नामानि ।। ७२ ।।

[1] आधारेण उपयुज्यते K5; आदरेणैवार्ज्यते J2. [2] न जिह्मयति K4; जिह्मो न भवति Pt2. [3] Pt2 omits, but adds 'असु क्षेपणे'. [4] न विद्यते प्रकृष्टगुणोऽस्य J2, Pt2. [5] ईषत् संस्त्यानो भवति Pt2. [6] भवतीति J2.

(विव.) **ऋजावजिह्मप्रगुणौ । वक्रविरुद्धस्य [1]दीर्घवेणुदण्डादेर्नामानि । [2]ऋज्यते कार्योपयोगित्वेन संपाद्यत इति ऋजुः । 'ऋज गतिस्थानार्जनोपार्जनेषु' । औणादिकः कुप्रत्ययः (उ. १. २७) ।। जिह्माद् भिन्नोऽजिह्मः ।। प्रकृष्टो गुण उपादेयत्वलक्षणोऽस्येति प्रगुणः ।। व्यस्ते त्वप्रगुणाकुलौ । [3]विप्रकीर्णसंनिवेशस्य[4] नामानि । व्यस्यते विरुद्धं क्षिप्यत इति व्यस्तम् । 'असु क्षेपणे' । कर्मणि क्तः ।। रमणीयत्वाभावेन प्रकृष्टगुणाभावाद् अप्रगुणः ।। आ समन्तात् कोलति संस्त्यानो भवतीति आकुलः । 'कुल संस्त्याने'[5] । मूलविभुजादिः[6] (वा. ३. २. ५) ।। शाश्वतस्तु—सनातनाः । विनाशरहितस्य नामानि[7] । शश्वदिति कालत्रयवाचकमव्ययम् । तत्र भवो वर्तमानः शाश्वतः । 'तत्र भवः' (४. ३. ५३) इत्यण् । 'आराच्छश्वतोर्नेष्यते' इति निषेधात् 'अव्ययानां भमात्रे—' (वा. ६. ४. १४४) इति टिलोपस्याभावः ।। [8]ध्रुवनित्यशब्दौ प्रथमकाण्डे व्युत्पादितौ (१. ३. २०, १. १. ६७) ।। सदासनाशब्दौ कालत्रयवचनाव्ययेषु वक्ष्येते (३. ४. २२, १७) । ताभ्यामुभाभ्यामपि भवार्थे 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्टयुटयुलौ तुट् च' (४. ३. २३) इति टयुप्रत्यये तुडागमे च सदातनः, सनातनश्च । शाश्वतिकशब्दोऽप्यत्र ।। ७२ ।।**

[1] °दण्डादौ ऋज्वादित्रयं वक्रव्यतिरिक्ते Tj1, Tv. [2] कौमुद्यां तु (पृ. ४६४)—'अर्ज अर्जने', अस्य ऋजिरादेशः। अर्जयति गुणान् ऋजुः। 'अर्जिदृशि...' इत्यादिना कुः (उ. १. २७). [3] व्याकीर्ण° Gm1, Tj1. [4] °संनिवेशे केशवेशादौ व्यस्तादित्रयम् Gm1, Tj1. [5] Tv adds बन्धुषु च. [6] इगुपधज्ञाप्रीकिरः कः (३. १. १३५) इति भा. दी. (पृ. ४३०). [7] शाश्वतादिपञ्चकं विनाशरहिते परमाण्वादौ वर्तते Tv. [8] ध्रुवति। 'ध्रुव स्थैर्ये'। 'इगुपध...' इति कः; नियतं भवः। 'त्यब् नेर्ध्रुवे' (वा. ४. २. १०४).

(पा.) ऋजावजिह्मप्रगुणौ। ऋजुनामानि। [1] 'चक्कनिदि'। व्यस्ते त्वप्रगुणाकुलौ। व्यस्तनामानि। [1] 'वेरे बुंडेदि'। अनुक्तम्—'करम्बः कम्बरो मिश्रः'। मिश्रनामानि। [1] 'कलशिनदि'। शाश्वतस्तु—सनातनाः। [2] स्थिरनामानि ॥ ७२ ॥

[1] B3 omits. [2] ध्रुवस्य° A1.

स्थास्नुः स्थिरतरः स्थेयानेकरूपतया तु यः।
कालव्यापी स कूटस्थः स्थावरो जङ्गमेतरः ॥ ७३ ॥

(वि.) स्थास्नुरिति—तिष्ठति [1] चिरकालं ताच्छील्येनेति स्थास्नुः। 'ष्ठा गतिनिवृत्तौ'। अतिशयेन स्थिरः स्थिरतरः। स्थेयांश्च। [2] चिरकाले वर्तमानस्य नामानि ॥ कूटेन निश्चलत्वेन तिष्ठतीति कूटस्थः[3]। वाल्याद्यवस्थारहितत्वेन[4] भूतभविष्यद्वर्तमानकालव्यापितस्यात्मादेर्नाम ॥ तिष्ठति ताच्छील्येनेति स्थावरः। जङ्गमादितरस्य नाम ॥ ७३ ॥

[1] चिरं कालं K5, K6. [2] स्थिरकाले K2, K4; स्थिरकालेन K6. [3] J2, K2, K5 add 'ष्ठा गतिनिवृत्तौ'. [4] °राहित्येन J2, K4.

(विव.) स्थास्नुः—स्थेयान्। [1] आशुविनाशिजलबुद्बुदापेक्षया चिरकालावस्थायिनः पाषाणादेर्नामानि। चिरं[2] तिष्ठतीति स्थास्नुः। 'ग्लाजिस्थश्च ग्स्नुः'[3] (३. २. १३९) इति [4] ताच्छील्यार्थे ग्स्नुप्रत्ययः॥ इतरापेक्षया अतिशयेन स्थिर इति विग्रहे 'द्विवचनविभज्य...' इत्यादिना (५. ३. ५७) तरप्प्रत्यये स्थिरतरः॥ ईयसुन्प्रत्यये (५. ३. ५७) 'प्रियस्थिर...' इत्यादिना (६. ४. १५७) स्थिरशब्दस्य स्थादेशे च स्थेयान्॥ एकरूपतया—कूटस्थः। एकेनैव

स्वभावेन निरवधिकालत्रयव्यापको[5] नित्यचैतन्यादिः कूटस्थ इत्युच्यते । 'कूटं निश्चलम्' इति नानार्थे वक्ष्यते (३. ३. ३७) । नैश्चल्येन स्वभावान्तरराहित्येन तिष्ठतीति कूटस्थः (३. २. ४)[6] ।। स्थावरो जङ्गमेतरः । [7]जङ्गमात् चलनस्वभावात् मनुष्यादेरन्यः पर्वतादिः स्थावरः स्यात् । तिष्ठति ताच्छील्येनेति स्थावरः । 'स्थेशभास ...' इत्यादिना (३. २. १७५) वरच् ।। ७३ ।।

[1] घटपटाद्यपेक्षया चिरकालस्थायिनि पाषाणादौ स्थास्नुप्रभृतित्रयम् Gm1, Tv. [2] चिरकालं Gm1. [3] क्स्नु° B5, Tj2. [4] ताच्छीलिके Gm1, Gm3. [5] °व्यापके नित्यचैतन्यादौ B6, Gm1. [6] 'सुपि स्थः' इति कः. [7] मनुष्यपश्वादेरन्यः पार्थिवः पर्वतादिः स्थावरः स्यात् B5, Tv.

(पा.) स्थास्नुः---स्थेयान् । अतिस्थिरनामानि ।। एकरूपतया---कूटस्थः । एकस्वरूपतया [1]कालव्यापि आकाशादिद्रव्यं कूटस्थं स्यात् ।। स्थावरो जङ्गमेतरः । [2]जङ्गमादितरः शैलवृक्षादिः स्थावरः स्यात् ।। ७३ ।।

[1] सकलकालेषु वर्तमानं B3. [2] वृक्षादिद्रव्यनाम A1, C1.

चरिष्णु जङ्गमचरं त्रसमिङ्गं चराचरम् ।
चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ।। ७४ ।।
चञ्चलं तरलं चैव पारिप्लवपरिप्लवे ।

(वि.) चरिष्ण्वति---चरति ताच्छील्येनेति चरिष्णु । चरम् । चराचरं च । 'चर गतिभक्षणयोः' । कदाचित् [1]कुटिलं गच्छतीति जङ्गमम् । 'गम्लृ गतौ' । त्रस्यति [2]चिरचलत्वादिति त्रसम् । 'त्रसु उद्वेगे'[3] । इङ्गति चलतीति इङ्गम्[4] । 'इगि गतौ' । गमनशीलस्य नामानि ।। चलति ताच्छील्येनेति चलनम् । 'चल कम्पने' । कम्पते ताच्छील्येनेति कम्पनम् । कम्प्रं च । 'कपि चलने' । चलनशीलस्य नामानि ।। चलतीति चलम् । चलाचलं च । [5]लोडति चलतीति लोलम् । 'लुड विलोडने' । चञ्चतीति चञ्चलम् । 'चञ्चु गतौ' । तरतीति[6] तरलम् । 'तॄ प्लवनतरणयोः' । परिप्लवते गच्छतीति पारिप्लवम् । परिप्लवं च । 'प्लुङ् गतौ' । चलतो वृक्षादेर्नामानि ।। ७४ ।।

[1] भृशं Pt2. [2] भीतवत् K5. [3] उद्वेजने J2, K6. [4] Pt2 adds भृशं चरतीति चराचरम्। 'चर गतिभक्षणयोः'. [5] लुड्यते वाय्वादिनेति लोलम्। डलयोरेकत्वात् Pt2. [6] K5 adds चरति.

(विव.) चरिष्णु--चराचरम्। चलनस्वभावस्य [1]मनुष्यपश्वादेर्नामानि। चरतीति चरिष्णु[2]। 'अलंकृञ्निराकृञ्...' इत्यादिना (३. २. १३६) इष्णुच्॥ कुटिलं गच्छतीति जङ्गमम्। 'गम्लृ गतौ'[3]। 'नित्यं कौटिल्ये गतौ' (३. १. २३) इति यङ। 'सन्यङोः' (६. १. ९) इति द्विर्वचनम्[4]। 'नुगतोऽनुनासिकान्तस्य' (७. ४. ८५) इति नुक्। अस्य चानुस्वारपरसवर्णौ। पचाद्यच् (३. १. १३४)। 'यङोऽचि च' (२. ४. ७४) इति यङो लुक्॥ चरतीति चरम्। पचाद्यच् (३. १. १३४)। त्रस्यतीति त्रसम्। 'त्रसी उद्वेगे'। अच्॥ इङ्गति गच्छतीति इङ्गम्। 'इगि गतौ'। अच्॥ चरतीति चराचरम्। 'चरिचलिपति...' (वा. ६. १. १२) इति पचाद्यचि विकल्पेन द्विर्वचनागागमयोः चराचरम्। [5]द्विर्वचनाभावपक्षे चरम्॥ चलनं--कम्प्रम्। [6]चलनस्वभावस्य नामानि। 'चल गतौ', 'कपि चलने' इत्याभ्यां धातुभ्यां 'चलनशब्दार्थादकर्मकाद्युच्' (३. २. १४८) इति ताच्छील्यार्थे कर्तरि युच्प्रत्यये चलनम्, कम्पनम्। 'नमिकम्पि...' इत्यादिना (३.२.१६७) रप्रत्यये कम्प्रम्॥ चलं--परिप्लवे। [7]कादाचित्कचलनयुक्तस्य हस्तादेर्नामानि। 'चल गतौ' इति धातोः पचाद्यचि (३. १. १३४) चलम्॥ [8]लोलति लोलम्। लुड इत्येके पठन्ति। धातोः पचाद्यचि लडयोरभेदः। लुडतिरपठितो धातुरिति माघव्याख्याने वल्लभाचार्यः[9] (शिशु. ३. ७२)॥ चलतीति चलाचलम्। [10]चराचरशब्दवत्॥ चञ्चतीति चञ्चलम्। 'चञ्चु गतौ'। औणादिकः कलच्प्रत्ययः। तरति [11]देशान्तरं प्रति प्लवत इति तरलम्। 'तॄ प्लवनतरणयोः'। अलच्प्रत्ययः॥ [12]परिप्लवते, 'प्लुङ गतौ' इति धातोः परिपूर्वात् पचाद्यचि (३. १. १३४) परिप्लवम्। ततः स्वार्थिके अण्प्रत्यये (५. ४. ३८) पारिप्लवम्॥ ७४॥

[1] °पश्वादौ चरिष्ण्वादिषट्कम् B5, Gm1. [2] B5, Gm1 add 'चर गतौ'. [3] Gm1 adds सृप्लृ. [4] द्वित्वम् Tv; 'स्वाम्यादिस्तु भृशार्थ एव यङमिच्छति' इति भानुजीदीक्षितः (पृ. ४३१); 'अकौटिल्येऽप्यभिधानाद् यङ' इति मुद्रितस्वामिव्याख्याने (पृ. २५२). [5] द्विर्वचनादि° B5, Gm1. [6] चलनादित्रयं चलनस्वभावे Tv. [7] चलादिसप्तकं...हस्तादौ B5. [8] लोडति B5, B6. [9] काश्मीरमुद्रितवल्लभव्याख्याने (३. ७१) न दृश्यते. [10] चराचरवत् शब्दनिर्वाहः B5. [11] प्रदेश° B5. [12] परितः प्लवते गच्छतीति B5, Tv.

(पा.) चरिष्णु जङ्गमचरम् । [1]एकवद्भावाद् नपुंसकत्वम् । त्रसमिङ्गम् । संचरणशीलस्य मनुष्यादेर्नामानि ।। चराचरं । स्थावरजङ्गमोभयनाम[2] । 'उभयं [3]तच्चराचरम्' इति वैजयन्ती (पृ. २०६, श्लो. ६२) ।। चलनं—परिप्लवे । [4]चलननामानि ।। ७४ ।।

[1] अत्रैकवद्भावो विभाषा A1. [2] °उभयद्रव्य° A1. [3] 'उभयं तु' इति मुद्रित-ग्रन्थे. [4] चल° A1, C1.

अतिरिक्तः समधिको दृढसंधिस्तु संहतः ।। ७५ ।।
कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ।
जठरं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितम् ।। ७६ ।।

(वि.) अतिरिक्त इति—अतिरिच्यत इत्यतिरिक्तः । 'रिचिर् [1]विरेचने' । सम्यगधिकः समधिकः । क्लृप्ताधिकस्य नामनी ।। संहन्यते [2]संधिप्रदेशेषु संश्लिष्यत इति संहतः । 'हन हिंसागत्योः' । दृढसंधिहस्तपादाद्यवयवस्य नामनी ।। कृणोति पीडयतीति कर्कशम्, [3]क्रूरं च । 'कृञ् हिंसायाम्' । कक्खट इति वा पाठः । तदा 'कखे हसने' इति धातुः । कठति अनेकक्लेशेन[4] जीवतीति कठिनम् । कठोरं च । 'कठ कृच्छ्रजीवने' । निन्दितमिव तिष्ठतीति निष्ठुरम्[5] । 'ष्ठा गतिनिवृत्तौ' । दृंहतीति दृढम् । 'दृहि वृद्धौ' । जीर्यतेऽनेनेति जठरम् । जरठमिति वा पाठः । 'जॄष् वयोहानौ' । मूर्तिः [6]काठिन्यमस्यास्तीति मूर्तिमत् । मूर्तं च । कठिनद्रव्यस्य नामानि ।। [7]प्रवर्धत इति प्रवृद्धम् । 'वृधु वृद्धौ' । प्रकर्षेण [8]वृद्धिं वहतीति प्रौढम् । 'वह प्रापणे' । एधत इत्येधितम् । 'एध वृद्धौ' । प्रवृद्धस्य[9] नामानि ।। ७५-६ ।।

[1] रेचने K5. [2] Pt2 omits. [3] कृन्ततीति, 'कृती छेदने' Pt2. [4] K5, Pt2 omit अनेक. [5] निशि न तिष्ठति K5; नितरां Pt2. [6] कायम् K5. [7] प्रवर्धयति K4, K5. [8] ऊढं Pt2. [9] J2, K8 add पैत्र्यादेः.

(विव.) **अतिरिक्तः समधिकः । [1]स्वापेक्षितपरिमाणादभ्यधिकपरिमाण-द्रव्यस्य[2] नामनी । अतिरिच्यते स्म अतिरिक्तः । 'रिचिर् विरेचने'[3] । क्तः (३. २. १०२) । अपेक्षितादपि सम्यगधिकः समधिकः ।। दृढसंधिस्तु संहतः । दृढावयव-संधानस्य शरीरादेर्नामनी । दृढः संधिर्यस्य दृढसंधिः । संहन्यते स्म संहतः । 'हन**

हिंसागत्योः'। क्तः ।। कर्कशं--जठरं मूर्तिमन्मूर्तम् । [4]कर्कशादिनवकम् अतिनिबिडावयवसंयोगारब्धे दारुपाषाणादौ वर्तते । कर्को नाम दृढगात्रोऽश्वविशेषः । तमपि श्यति तनूकरोति स्वावयवसंयोगेनेति कर्कशम् । 'शो तनूकरणे' । कप्रत्ययः (३. २. ३) । कठति क्लेशेन जीवति, दुःखकरत्वादस्येति कठिनम् । 'कठ कृच्छ्रजीवने' । इनच्प्रत्ययः (उ. २. ५१) । तत एव धातोः 'कठिचकिभ्यामोरन्' (उ. १. ६७) इत्योरन्प्रत्यये कठोरम् । घातुके क्रूर उक्तः (श्लो. ४७) । परपीडायां निष्ठां [5]तात्पर्यं रातीति निष्ठुरम् । पृषोदरादिः ।। 'दृढःस्थूलबलयोः' (७. २. २०) इति निपातनाद् बलवति दृढशब्दो निपातितः [6] ।। [7] जठरशब्दः कुक्षौ व्युत्पादितः (२. ६. ७७) ।। रेफोपधोऽयं शब्दः । अत एव 'जठरः कठिनेऽपि स्यात्' इति नानार्थवर्गे रेफान्तेषु वक्ष्यते (३. ३. १८६) ।। मूर्तिः काठिन्यमस्यास्तीति मूर्तिमत् । मतुप् (५. २. ९४) ।। अर्शआद्यचि (५. २. १२७) मूर्तम् [8] ।। प्रवृद्धं प्रौढमेधितम् । पूर्वावस्थातो महत्त्वमापन्ने प्रवृद्धादित्रयम् । प्रकर्षेण वर्धते स्म प्रवृद्धम् । 'वृधु वृद्धौ' । क्तः ।। प्रकर्षेणोह्यते स्म प्रौढम् । 'वह प्रापणे' । क्तप्रत्ययः । 'प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या' (वा. ६. १. ८९) इति वृद्धिः ।। एध्यते स्म एधितम् । 'एध वृद्धौ' । कर्मणि क्तप्रत्ययः । ७५-६ ।।

[1] °अप्यधिक° B5, Tv. [2] °परिमाणस्य दार्वादेरेते द्वे B5, B6. [3] रिक्तीकरणे B5, Gm3. [4] B5, Tv add अत्र त्रिपाद्या. [5] B5, B6 omit. [6] 'किमत्र निपात्यते । दृहेः क्तप्रत्यये इडभावः । हकारनकारयोर्लोपः । परस्य ढत्वम्' इति काशिका (पृ. ३०३). [7] जरठ इति पाठे 'जीर्यति, "जॄष् वयोहानौ," बाहुलकादठच्' इति भा. दी. (पृ ४३२). [8] मूर्च्छति मूर्तम् इति स्वामी (पृ. २५२); मूर्च्छति स्म । क्तः । 'राल्लोपः' (६. ४. २१) इति छलोपः । 'न ध्याख्यापॄमूर्च्छिमदाम्' (८. २. ५७) इति निष्ठातकारस्य न नकारादेशः.

(पा.) अतिरिक्तः समधिकः । अत्यधिकनामनी । [1]'वेग्गलमैनदि' । 'उल्वणं चोत्कटोद्रेकौ' । एतानि त्रीणि च ।। दृढसंधिस्तु संहतः । दृढसंयोगवतो[2] नामनी । 'विग्गिलाकट्टिनदि' । अनुक्तम्--'श्लथं शिथिलमित्यपि'[3] । तद्विपरीतनामनी ।। कर्कशं--मूर्तम् । कठिननामानि ।। प्रवृद्धं--एधितम् । [4] प्रवृद्धनामानि ।। ७५-६ ।।

[1] B3 omits. [2] दृढबद्ध° A1. [3] A1 adds 'वदलैनदि'. [4] अभिवृद्ध° A1.

पुराणे प्रतनप्रत्नपुरातनचिरंतनाः ।
प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ।। ७७ ।।
नूत्नश्च सुकुमारं तु कोमलं मृदुलं मृदु ।

(वि.) पुराण इति—पुरा [1]भवः पुराणः । पुरातनश्च । पुराणार्थत्वात् प्रतनः[2] । प्रत्नश्च । चिरं भवतीति चिरंतनः । पूर्वभूतस्य कालादेर्नामानि ।। [3]प्रतिगतमग्रमस्येति प्रत्यग्रः । अभिनूयत इत्यभिनवः । नवश्च । 'णु स्तुतौ' । नव एव नव्यः । नवीनः । नूतनः । नूत्नश्च । अभिनवस्य नामानि ।। [4]अल्पाभिघातादिकेन[5] सुष्ठु कुत्सितं म्रियत इति सुकुमारम्[6] । 'मृङ प्राणत्यागे' ।। [7]कम्यते जनैरिति कोमलम् । 'कमु कान्तौ' । मृद्यते वाय्वादिनेति मृदुलम्[8] । मृदु च' । 'मृद क्षोदे' । कोमलस्य पुष्पादेर्नामानि ।। ७७ ।।

[1] भवतीति Pt2. [2] प्राग्भव इति Pt2. [3] अग्रजत्वम् K4, K6. [4] °अभिघातन° K4. [5] °आदिनैव J2, K5. [6] सुष्ठु कुमारयन्त्यनेनैवेति', 'कुमार क्रीडायाम्' Pt2. [7] काम्यते K4, K5, Pt2. [8] मृदु मृदुत्वमस्यास्तीति Pt2.

(विव.) पुराणप्रतन—चिरंतनाः । अतिविप्रकृष्टभूतकालसंबन्धिमात्रस्य[1] नामानि । पुरेत्यव्ययं चिरविप्रकृष्टं भूतकालमाह । अत एव वक्ष्यति— 'स्यात् प्रबन्धे चिरातीते' (३. ४. २५३) इत्यादि । [2]पुराशब्दात्[3] तत्र भव इत्यर्थे 'सायं चिरं...' इत्यादिना (४. ३. २३) ट्युप्रत्यये तस्य तुडागमे च पुरातनम् । 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (४. ३. १०५) इति निर्देशसामर्थ्यात् तुडागमाभावे पुराणम् । स्त्रियां तु ङीपि पुराणी । पुरा [4]पूर्वकालेऽण्यते शब्द्यत इति विग्रहस्तु स्त्रियामनिष्टः । टाबन्तत्वं [5]प्रापयेदिति परिहरणीयः । 'नश्च पुराणे प्रात्' (वा. ५. ४. २५) इति वार्त्तिकचकारवचनेन पुराणार्थे वर्तमानार्थात् प्रशब्दात् त्नप् प्रत्यये प्रत्नः । तनप्प्रत्यये प्रतनः । चिरमित्यव्ययात् पूर्ववदेव (४. ३. २३) ट्युप्रत्यये चिरंतनः ।। प्रत्यग्रो—नूत्नश्च । [6]संनिकृष्टभूतकालसंबन्धिनो नामानि । प्रतिगतमग्रमस्येति प्रत्यग्रः ।। अभितो नूयते स्तूयत इत्यभिनवः । 'णु स्तुतौ' । 'ऋदोरप्' (३. ३. ५७) इत्यप्प्रत्ययः ।। 'पादार्घाभ्यां च' (५. ४. २५) इति सूत्रे काशिकाकारः (२, पृ. ८५)— 'अत्र चकारोऽनुक्तसमुच्चयार्थः । तेन यथादर्शनमन्यत्रापि यत्प्रत्ययो भवति' इति । ततश्च नवशब्दात् यत्प्रत्यये नव्यः ।। नव एव

नवीनः । 'नवस्य नू आदेशस्त्नप्तनप्खाश्च प्रत्ययाः' (वा. ५. ४. २५) इति[7] नवशब्दात् स्वार्थे त्नप्रत्यये नवशब्दस्य नू इत्यादेशे नूत्नः। तनप्प्रत्यये नूतनः। खप्रत्यये नवीनः ।। सुकुमारं—मृदु। एतानि[8] कुसुमादेः कोमलद्रव्यस्य नामानि। सुष्ठु कुत्सितेनापि अभिघातेन [9]मार्यते विनाश्यत इति सुकुमारम् ।। काम्यत इति कोमलम् । 'कमु कान्तौ' इति धातोः अलच्प्रत्यये उपधाया ओकारादेशे च कोमलम् इति धातुवृत्तावुक्तम् ।। मृद्यते स्वल्पाभिघातेनापि क्षुद्यत इति मृदु। 'मृद क्षोदे'। औणादिकः कुप्रत्ययः[10] । ततो भावमात्रविवक्षायां मत्वर्थीये लच्प्रत्यये[11] (५. २. ९७) श्यामश्यामलशब्दवत्[12] मृदुलम् ।। ७७ ।।

[1] °मात्रे पुराणादिपञ्चकम् B5, Tv. [2] पुरेत्येतत् B5. [3] B5, B6 add अव्ययात्. [4] B5 omits. [5] आपद्येतेति B5, Tv. [6] प्रत्यग्रादिसप्तकं .... संबन्धिनि वर्तते B5, Tv. [7] B5, B6 add वार्त्तिककारवचनेन. [8] B5, Tv add सुकुमारादीनि. [9] म्रियते नश्यति Tj1, Tv. [10] 'प्रथिमृदि ...' इति कुः (उ. १. २८). [11] 'सिध्मादिभ्यश्च'. [12] पृथुपृथुलशब्दवत् B5.

(पा.) पुराणप्रतन—चिरंतनाः। चिरत्नमपि स्यात् । 'चिरत्नरत्नाधिकमुच्चितं चिरात्' इति नैषधः (१. १०७) । [1]पुरातननामानि ।। प्रत्यग्रो—नूतनश्च । [2]नूतननामानि ।। सुकुमारं—मृदु । कोमलनामानि[3] ।। ७७ ।।

[1] B3 omits. [2] नूतनवस्तु° A1. [3] सुकुमार° B3.

अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ।। ७८ ।।
प्रत्यक्षं स्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ।

(वि.) अन्वगिति—अनुगच्छन्तं पश्चादञ्चते[1] गच्छतीति अन्वक् । 'अञ्चु गतौ'। अत्राव्ययमिति संबध्यते । अक्षस्य पुरोगामिनः अनु पश्चाद् गच्छतीति अन्वक्षम् । [2]पदस्य पुरोगामिनः अनु पश्चाद् गच्छतीति अनुपदम् । यो गच्छन्तमनु पश्चाद् गच्छति तस्य नामानि[3] ।। प्रत्यक्ष्णोति पुरो व्याप्नोतीति प्रत्यक्षम् । 'अक्षू व्याप्तौ'। इन्द्रियैर्ग्राह्यम् ऐन्द्रियकम्। इन्द्रियग्राह्यस्य रूपरसादेर्नामिनी ।। प्रत्यक्षं न भवतीत्यप्रत्यक्षम् । अधिगतमक्षमिन्द्रियम्[4] अध्यक्षम्[5] । तदतिक्रान्तम् अत्यध्यक्षमिति वा पाठः । इन्द्रियाण्यतिक्रान्तमतीन्द्रियम् । इन्द्रियैरग्राह्यस्य नामनी ।। ७८ ।।

[1] अञ्चति K4, K5.　[2] K4 omits two lines.　[3] अनुगन्तुर्नामानि K5.
[4] K5 omits इन्द्रियम्.　[5] अक्षमतिक्रान्तमत्यक्षम् K4, K5.

(विव.) अन्वक्—अव्ययम्। यो गच्छन्तमनुगच्छति [1]तस्य नामानि। अनु पश्चाद् अञ्चति गच्छतीति अन्वक्। 'अञ्चु [2]गतिपूजनयोः'। 'ऋत्विग्...'[3] इत्यादिना (३. २. ५९) क्विन् प्रत्ययः। चकारान्तः। 'आगच्छतोऽनूचि गजस्य घण्टयोः' इति माघः[4] (शिशु. १२. ३४)। स्त्रियां तु[5] ङीपि अनूची॥ अनुगतमक्षं पादरूपं कर्मेन्द्रियमस्येति अन्वक्षम्॥ पुरोगतापेक्षया अनुगतं [6]पश्चाद्भूतं पदमस्येति अनुपदम्। बहुव्रीहित्वोपाधिकवक्ष्यमाणपरोपगत्वव्युदासाय क्लीबमित्युक्तम्। [7]अतश्च गुरोरनुपदमन्तेवासी भर्तुरनुपदं पत्नी इत्याद्येव भवति। यदा तु पदस्य पुरोगतस्य[8] पश्चादिति विग्रहो विवक्षितः, तदा 'अव्ययं विभक्ति...' इत्यादिना (२. १. ६) पश्चादर्थेऽव्ययीभावादव्ययत्वम्। केचित्तु 'क्लीबमव्ययम्' इति शब्दद्वयस्य प्रागुक्तगत्या अन्वक्षशब्देनापि संबन्धमाहुः[9]॥ प्रत्यक्षं स्यादैन्द्रियकम्। बुद्धीन्द्रियग्राह्यस्य [10]रूपरसादेर्नामनी। प्रतिगतम् अक्षमिन्द्रियमिति प्रत्यक्षम्। प्रतीतमक्षेणेति वा। यथा प्रत्यक्षा बुद्धिः। प्रत्यक्षो घटः। प्रत्यक्षं रूपमित्यादि। अध्यक्षमिति केषांचित् पाठः। [11]तत्रापि पूर्ववदेव निरुक्तिक्रमः। इन्द्रियादागतम् ऐन्द्रियकम्। [12]कुलालादेः (४. ३. ११८) आकृतिगणत्वाद् वुञ्॥ अप्रत्यक्षमतीन्द्रियम्। पूर्वोक्तात् प्रत्यक्षादन्यद् अप्रत्यक्षम्। अतिक्रान्तमध्यक्षम्[13] अत्यध्यक्षम् इति केचित्। इन्द्रियमतिक्रान्तम् अतीन्द्रियम्॥ ७८॥

[1] तस्मिन् अन्वगादिचतुष्टयम् B5, Tv.　[2] गतौ याचने च Tj1, Tj2.　[3] B5 adds दधृक्.　[4] माघकाव्ये प्रयोगः B5, B6.　[5] B5, Tv add 'अञ्चतेः...' (वा. ४. १. ६).　[6] पश्चाद्गतं Gm3, Tv.　[7] ततश्च B5.　[8] B5 omits.　[9] इच्छन्ति Tv.　[10] रसादेरेते Tv.　[11] अत्रापि B5.　[12] 'कुलालादिभ्यो वुञ्' इति वुञ् B5, B6.　[13] अतिक्रान्तमक्षम् अत्यक्षम् B5, Tv.

(पा.) अन्वक्—अव्ययम्। [1]अनुगतनामानि। 'वेनुसनिनदि'[2]। अनुक्तम्—'सहितं संहितं युक्तयुतमन्वीत[3]मन्वितम्'। युतनामानि। [2]'कूडिनदि'॥ प्रत्यक्षं स्यादैन्द्रियकम्। चक्षुरादीन्द्रियविषयनामनी। अध्यक्षसमक्षशब्दावपि स्तः। 'अध्यक्षप्रत्यक्षौ तु समक्षवत्' इति वैजयन्ती (पृ. २१२, श्लो. १३३)॥ अप्रत्यक्ष-

मतीन्द्रियम् । अप्रत्यक्षनामनी । परोक्षशब्दोऽप्यस्ति । 'परोक्षेऽतीन्द्रियः'[4] इति वैजयन्ती (पृ. २१२, श्लो. १३३) ।। ७८ ।।

अनुगमन° A1. [2] B3 omits. [3] A1 adds दीर्घमध्यम्. [4] अतीन्द्रियम् B3.

एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ।। ७९ ।।
अप्येकसर्ग एकाग्र्योऽप्येकायनगतोऽपि च ।

(वि.) एकतान इति—एकस्मिन्नेव [1]विषये तानो बुद्धिविस्तारोऽस्येति एकतानः । अन्यस्मिन्नेव विषये वृत्तिर्यस्येति अन्यवृत्तिः[2] । न अन्यवृत्तिरनन्यवृत्तिः । एकमग्रम् [3]एकदेशस्थं ज्ञेयमस्येति एकाग्रः । [4]एकमेवायनं गतिरस्येति एकायनः । एकविषयः सर्गो निश्चयोऽस्य एकसर्गः । एकाग्र एव एकाग्र्यः । ऐकाग्र्य इति वा पाठः । एकमेवायनं गतिं गतः प्राप्तःएकायनगतः । एकाग्रचित्तस्य[5] नामानि ।। ७९ ।।

[1] तानो विषयो J2, K6. [2] न विद्यतेऽन्या वृत्तिर्व्यापारो यस्य Pt2. [3] अग्रदेशसंज्ञेयम् K5, Pt2. [4] एकस्मिन्नेव विषयेऽयनं ज्ञानं J2, Pt2. [5] एकविषयकस्य K5.

(विव.) एकतानो—गतोऽपि च । एकतानादिसप्तकं तदेकायत्तचित्ते । 'तनु[1] श्रद्धोपकरणयोः' इति चुरादिः, ण्यन्तात् [2]'एरचि' (३. ३. ५६) तानो विस्तारः । एकस्मिन्नेव विषये तानोऽस्यास्तीति एकतानः ।। एकमग्रम् अग्रस्थं ज्ञेयमस्येति एकाग्रः । स्वार्थिकेऽण्प्रत्यये सति ऐकाग्रः । एकस्मिन्नेव विषयेऽयनमिन्द्रियगतिरस्येति एकायनः । एकस्मिन्नेव विषये सर्गो निश्चयोऽस्येति एकसर्गः । एकमग्र्यं ज्ञेयमस्य एकाग्र्यः । एकमयनं विषयस्थानं गतः एकायनगतः ।। ७९ ।।

[1] 'तनु यज्ञोप°' B5, B6. [2] 'एरच्' Tj1, Tj2.

(पा.) एकतानो—गतोऽपि च । एकाग्रनामानि ।। ७९ ।।

पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम् ।। ८० ।।
अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम् ।

(वि.) पुंसीति—आदीयते [1]प्रथममुपादीयत इत्यादिः । [2]'दा दाने' । पूर्वतीति पूर्वः । 'पूर्व पूरणे'[3] । [4]पुरः पूर्वस्मिन् काले देशे वा भवः पौरस्त्यः ।

प्रथतेऽनेनाद्वितीयेनेति[5] प्रथमः । 'प्रथ [6]प्रख्या ' । आदौ भवः आद्यः । प्रथम-भाविनः पदार्थस्य नामानि ।। [7]अमति उपान्त्यपङ्क्तिपदार्थमतिक्रम्य गच्छतीति अन्तः । 'अम गत्यादिषु' । जघने पश्चाद् भवं जघन्यम् । चरति उपान्तं [8]पर्यन्तमतिक्रम्य तदनन्तरस्थानं गच्छतीति चरमम्[9] । अन्ते भवमन्त्यम् । पश्चाद् भवं पाश्चात्यम् । पश्चिमं च । [10]अन्तिमस्य पदार्थस्य नामानि ।। ८० ।।

[1] प्रारम्भसमय एव व्यवह्रियते Pt2.　[2] 'डुदाञ् दाने' J2, Pt2.　[3] 'पुर्व पर्व मर्व पूरणे' K3, K5.　[4] पूर्वः K6.　[5] सद्वितीयेन K5; सहद्वि° J2.　[6] ख्यातौ K3, K6.　[7] अनति पुनाति J2.　[8] K5 omits पर्यन्तम्.　[9] 'चर गतिभक्षणयोः' Pt2.　[10] अन्तस्य K2.

(विव.) पुंस्यादिः—प्रथमाद्याः । [1]यत्किंचिदपेक्षया प्राक्कालसंबन्धिनः पञ्च नामानि । आदीयते प्रारम्भसमय[2] एव व्यवह्रियत इत्यादिः[3] । 'उपसर्गे घोः किः' (३. ३. ९२) । [4]भार्याकलत्रादिविशेषणत्वेऽपि आदिशब्दः पुंलिङ्ग एवेति नियम्यते ।। [5]पुरं वाति गच्छति श्रेष्ठत्वेनेति पूर्वः । 'वा गतिगन्धनयोः' । 'आतोऽनुपसर्गे कः' (३. २. ३) ।। पुरः पूर्वस्मिन् काले देशे वा भवः पौरस्त्यः । [6]'दक्षिणापश्चात्पुरसस्त्यक्' (४. २. ९८) इति त्यक्प्रत्ययः । 'किति च' (७. २. ११८) इति वृद्धिः ।। प्रथते द्वितीयादिभिः सहेति प्रथमः । 'प्रथ प्रख्याने' । 'प्रथेरमच्' (उ. ५. ६८) इत्यमच्प्रत्ययः ।। आदौ देशे काले वा भवः आद्यः । 'दिगादिभ्यो यत्' (४. ३. ५४) इति यत्प्रत्ययः ।। अथास्त्रियाम्—पश्चिमम् । षडेतानि [7]दानादानादिक्रियासु गणनासमाप्तिस्थानस्य नामानि । अमति समाप्तिं गच्छतीत्यन्तः । 'अम गत्यादिषु' । कर्तरि क्तः (३. ४. ७२) । अन्तशब्दस्य योषिदादौ विशेष्यभूतेऽपि पुंनपुंसकलिङ्गयोरन्यतरत्वमेवेति दर्शयितुम् अस्त्रिया-मित्युच्यते । जघन्यादयस्तु शब्दा लिङ्गत्रयेऽपि भवन्ति । जघने पश्चाद्भागे भवतीति जघन्यम् । दिगादित्वाद् (४. ३. ५४) यत् ।। प्रथमप्रतीतिस्थानमुपक्रम्य[8] चरतीति चरमम् । 'चर गतौ' । 'प्रथेरमच्' इत्यनुवृत्तौ 'चरेश्च' (उ. ५. ६९) इत्यमच् ।। अन्तेऽवसाने भवम् अन्त्यम् । दिगादित्वाद् (४. ३. ५४) यत् । पश्चाद् देशे काले वा भवं पाश्चात्यम् । 'दक्षिणापश्चात्पुरसस्त्यक्' (४. २. ९८) इति त्यक् ।। पश्चाद् भवं पश्चिमम् । 'अग्रपश्चाड्डिमच्' (वा. ४. ३. २३) इति डिमच् । [9]डित्त्वात् टिलोपः ।। ८० ।।

[1] पञ्चैते शब्दाः B5, Gm3, Tv. [2] B5 omits समये. [3] B5, Tv add 'डुदाञ् दाने'. [4] स्त्रीलिङ्गपदार्थे विशेष्येऽपि B5, Gm1, Tv. [5] पूर्वेति, 'पूर्व पूरणे,' अच् (३. १. १३४) इति स्वामिभानुजीदीक्षितौ. [6] दिगादित्वात् B5. [7] दानादानक्रमसमाप्ति° B5, Tv. [8] अतिक्रम्य B5, B6. [9] Gm1, Gm3 omit the sentence.

(पा.) पुंस्यादिः—प्रथमाद्याः । आदिनामानि ।। अथास्त्रियाम्—पश्चिमम् । अन्त्यनामानि ।। ८० ।।

मोघं निरर्थकं स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ।। ८१ ।।
साधारणं तु सामान्यं एकाकी त्वेक एककः ।
भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि ।। ८२ ।।

(वि.) मोघमिति— [1]मुह्यत्यस्मिन्निति मोघम् । 'मुह वैचित्ये' । निर्गतोऽर्थः प्रयोजनमस्मादिति निरर्थकम् । निरर्थकस्य [2]वस्तुनो नामनी ।। अज्ञानं स्पशते बाधत इति स्पष्टम् । 'स्पश बाधनस्पर्शनयोः' । स्फुटति प्रकाशत इति स्फुटम् । 'स्फुट विकसने'[3] । अतिव्यक्तस्य नामनी ।। [4]प्रकृष्टं व्यज्यत इति प्रव्यक्तम् । 'अञ्चू व्यक्तिम्रक्षण[5]कान्तिगतिषु' । उल्वणति हठात् दर्शनं गच्छतीति उल्वणम्[6] । 'वण गतौ' । हठाद्दर्शनेन [7]ज्ञायमानवस्तुनो नामनी ।। समानमाधारणम् एकस्थानमस्येति साधारणम् । समानस्य भावः सामान्यम् । अप्रातिस्विकपदार्थस्य नामनी ।। एति कार्यं कर्तुं स्वयमेव गच्छतीत्येकः । [8]एकाकी । एककश्च । 'इण् गतौ' । सहायरहितस्य नामानि ।। अनिति पृथगेव प्राणितीति अन्यः । 'अन प्राणने' । अन्य एवान्यतरः । एति पृथग्गच्छतीत्येकः । त्विषति पृथग् भासत इति त्वः । 'त्विष दीप्तौ' । एकतर इति वा पाठः । स्वयमेतीति इतरः[9] । प्रकृतादन्यार्थस्य[10] नामानि ।। ८१-२ ।।

[1] मुह्यत्यत्र पुरुषो भ्रान्तिवशात् Pt2. [2] J2, K6 omit. [3] विदलने K5. [4] प्रकर्षेण K3, K5. [5] °श्लक्ष्ण° K3, K6, Pt2. [6] उत्कृष्टत्वेन बण्यते शब्द्यते, 'बण शब्दे' Pt2. [7] जायमान° K6. [8] K2, Pt2 add एक एव. [9] एति पृथगेव गच्छति स्वयमेव K5. [10] K5 omits अर्थ.

(विव.) मोघं निरर्थकम् । स्वगतधर्मवैकल्यवशात् निरर्थकस्यैते नामनी । मुह्यत्यत्र[1] पुरुषो कार्यसाधकत्वभ्रान्त्येति[2] मोघम् । 'मुह वैचित्ये' । 'हलश्च'

(३. ३. १२१) इति घञ्[3]। [4]न्यङ्क्वादिकुत्वम् (७. ३. ५३) ।। निष्क्रान्तोऽर्थः प्रयोजनमस्मादिति निरर्थकम् ।। स्पष्टं स्फुटम् ।। [5]स्वगतजातिगुणादिवैशिष्ट्येन प्रतीयमानस्यैते नामनी । स्पशते स्वविषयमज्ञानं बाधत इति स्पष्टम् । 'स्पश बाधनस्पर्शनयोः'। कर्तरि क्तः[6] (३. ४. ७२) । [7]षत्वष्टुत्वे[8] ।। स्फुटति विकासितमिव प्रकाशत इति स्फुटम् । 'स्फुट विकसने'। इगुपधलक्षणः कः (३. १. १३५) । व्यक्तशब्दोऽप्यत्र ।। प्रव्यक्तमुल्बणम् । अतिदूरत्वादिदोषसंभवेऽपि स्वगतसकलधर्मवैशिष्ट्येन [9]प्रतीयमानस्यैते नामनी । प्रकर्षेण व्यज्यत इति प्रव्यक्तम् । 'अञ्जू व्यक्तौ'। क्तः । अथवा 'अञ्चु गतिपूजनयोः'। गत्यर्थाः ज्ञानार्थाः । कर्मणि क्तः (३. २. १०२) । 'यस्य विभाषा' (७. २. १५) इति निष्ठायामिडभावः । [10]कुवलादामलकं व्यक्तम् इत्यपादानविषयत्वाद् 'अञ्चोऽनपादाने' (८. २. ४८) इति निष्ठानत्वं न भवति ।। उत्कृष्टत्वेन बण्यते शब्द्यत इति उल्बणम् । 'बण शब्दे'। पृषोदरादित्वाद् वर्णव्यत्ययः[11] । स्पष्टादयश्चत्वारोऽप्येकार्था इति केचित्[12] ।। साधारणं तु सामान्यम् । यो [13]ह्यनेकव्यक्तीनां तुल्यरूपो गुणकर्मादिः, यश्चानेकानुभवयोग्यो ग्रामादिः, तस्य द्विविधस्यापि नामनी । साधारणसमानशब्दौ सदृशपर्यायेषु शूद्रवर्गे व्युत्पादितौ[14] (२. १०. ३७) । समान एव सामान्यम् । चातुर्वर्ण्यादित्वात् (वा. ५. १. १२४) स्वार्थिकः[15] ष्यञ् । 'सामान्योऽयं धर्मसेतुर्नृपाणाम्' इति प्रयोगः । धर्मयोरेव साधारण्यम्, सादृश्यं तु धर्माश्रययोरिति साधारणसदृशयोर्भेदः ।। एकाकी त्वेक एककः । असाहयस्य नामानि । एति पृथगेव गच्छतीति एकः । 'इण् गतौ'। 'इण्भीकापाश . . .' इत्यादिना (उ. ३. ४३) कन्प्रत्ययः ।। एक एव एकाकी । 'कन्लुकौ च' (४. ३. ५१) इति वर्तमाने 'एकादाकिनिच्चासहाये' (५.३.५२) इत्याकिनिच्प्रत्यये एकाकी । चकारात् कन्प्रत्यये एककः । तस्य वैकल्पिके लुकि एकः ।। भिन्नार्थका——इतरावपि । भिन्नशब्दस्य योऽर्थः प्रकृतादन्यत्वलक्षणः, तदर्था अन्यतरादयः पञ्च शब्दा इत्यर्थः । अनिति प्राणिति जीवति प्रतियोगिसद्भावेनेति अन्यः । 'अन प्राणने'। अघ्न्यादिगणपाठात् (उ. ४. ११२) साधुः ।। अल्पाच्तरमिति (२. २. ३४) ज्ञापकाद् अन्यशब्दादपि स्वार्थ एव तरप्प्रत्यये अन्यतरः । एकशब्दो व्युत्पादितः ।। त्वशब्दस्त्वखण्ड एव भिन्नार्थ इति सुबोधिनीकारः । 'उतो त्वस्मै तन्वं विसस्रे' (ऋक्. १०. ७१. ४) इति श्रुतौ प्रयोगः ।। एति पृथगेव गच्छतीति इतरः । 'इण् गतौ'। स्वार्थीयतरप्प्रत्ययः । इतं रातीति वा[16] ।। ८१-२ ।।

[1] अस्मिन् B5, Tv. [2] भ्रान्तिवशात् Tj1, Tj2. [3] B5, B6, Gm3 add 'करणाधिकरणयोश्च'. [4] °आदित्वात् B5. [5] °जात्यादि° B5, B6. [6] क्तप्रत्ययः B5. [7] व्रश्च ... (८. २. ३६). [8] ष्टुना ष्टुः (८. ४. ४१). [9] प्रकाशमानस्य Tj1, Tj2. [10] कोलात् Tv. [11] पक्षे लः इति स्वामी (पृ. २५३). [12] टी. स. (पृ. ३७). [13] स्थाणुपुरुषादि° B5, Gm1, Tv. [14] सह आधारणेन वर्तते । 'वोपसर्जनस्य' इति सभावः, साधारणः ; समानं मानमस्येति समानः । 'समानस्य छन्दसि ...' इति सः इति भा. दी. (पृ. ४०३). [15] स्वार्थे Gm3, Tv. [16] 'आतोऽनुपसर्गे कः' (३. २. ३).

(पा.) मोघं निरर्थकम् । [1]व्यर्थनामनी । 'अन्तर्गडु निरर्थकम्' इत्यस्मिन्नर्थे हलायुधः (अ. मा. ४. ८९) ।। स्पष्टं—उल्बणम् । व्यक्तनामानि । 'प्रकटं विशरं चापि' । एते द्वे च ।। साधारणं तु सामान्यम् । [2]अनेकसंबन्धकार्थनामनी । 'चतुर्मुखकुटुम्बिनी द्रविडमात्रसाधारणी' । 'विक्रमव्यतिहारेण सामान्याभूद् द्वयोरपि' (रघु. १२. ९३) ।। एकाकी—एककः । असहायनामानि ।। भिन्नार्थका—इतरावपि । भिन्ननामानि । 'वेरैनवानि [3]पेरु' । 'अन्यतरादीनि सर्वनामानि' इत्येतानि सर्वनामानि । अन्यतरस्मात् । एकस्मात् । [4]त्वत्त्वपदावन्यार्थकाविति त्वच्छब्दोऽपि त्वशब्दार्थ एव ।। ८१-२ ।।

[1] निरर्थनाम A1. [2] °संबन्धिभूतैकार्थ° A1. [3] B3 omits. [4] B3 adds अस्मात्.

उच्चावचं नैकभेदमुच्चण्डमविलम्बितम् ।
अरुंतुदं तु मर्मस्पृगबाधं तु निरर्गलम् ।। ८३ ।।

(वि.) उच्चावचमिति—[1]उच्चं च तदवाक् च उच्चावचम् । नैकेऽनेके भेदा अस्य सन्तीति नैकभेदम् । अनेकप्रकारस्य [2]चित्रादेर्नामनी ।। उच्चण्डति कोपेनाशु भवतीत्युच्चण्डम् । 'चडि कोपे' । न विद्यते विलम्बितमस्येत्यविलम्बितम् । कोपेन क्रियमाणापकारवद् आशुकृतस्य नामनी ।। अरूंषि[3] व्रणानि[3] तुदतीत्यरुंतुदम् । 'तुद व्यथने' । मर्माणि स्पृशतीति मर्मस्पृक् । 'स्पृश संस्पर्शने' । मर्मव्यथाकरस्य[4] वचनादेर्नामनी ।। न विद्यते बाधा[5] अस्येत्यबाधम् । निष्क्रान्तमर्गलाद् नियामकादिति निरर्गलम् । उच्छृङ्खलशीलस्य नामनी ।। ८३ ।।

[1] उच्चमवचञ्चति, 'चञ्चु गतौ' J2, K6. [2] विश्वादेः K5. [3] K5 adds इव. [4] °व्यथाकारस्य K2. [5] Pt2 adds निरोधः.

(विव.) उच्चावचं नैकभेदम् । अविद्यमान एको भेदः[1] स्वगतावान्तरविशेषोऽस्येति नैकभेदम् । स्थावरजङ्गमात्मकं जगदादि तदुच्चावचमुच्यते । उदक् चावाक् च उच्चावचम् । मयूरव्यंसकादिपाठात् साधुः । 'उच्चावचैरुपगतेषु सहस्रसंख्याम्' इति माघकाव्ये प्रयोगः (शिशु. ४. ४६) ।। उच्चण्डमविलम्बितम् । 'चण्डस्त्वत्यन्तकोपनः' इति प्रागुक्तम् (श्लो. ३२) । त्वरायाः कोपकार्यत्वात् त्वरायुक्त एव कारणप्राधान्येन[2] उच्चण्ड इत्युक्तः । स्वर्गवर्गोक्तस्यापि (पृ. ४४) अविलम्बितपर्यायान्तरकथनार्थमत्राभिधानमिति ज्ञेयम्[3] ।। अरुंतुदं तु मर्मस्पृक् । [4]अतिदुःखजनकस्य शस्त्रप्रहाराभिशंसनादेर्नामनी । अरूंषि व्रणानि तत्सदृशानि मर्माणि वा तुदतीति अरुंतुदम् । 'तुद व्यथने' । 'विध्वरुषोस्तुदः' (३. २. ३५) इति खश् । 'अरुर्द्विषत्...' इत्यादिना (६. ३. ६७) मुमागमः । संयोगान्तलोपः (८. २. २३) ।। 'स्पृश [5]स्पर्शने' । 'स्पृशोऽनुदके क्विन्' (३. २. ५८) इति क्विन्प्रत्यये कुत्वे च[6] (८. २. ६२) मर्मस्पृक् ।। अबाधं तु निरर्गलम् । अनिवारितोद्योगस्य नामनी । अविद्यमानो बाधः प्रतिरोधोऽस्येति अबाधम् ।। निष्क्रान्तोऽर्गलात् प्रतिबन्धकादिति निरर्गलम् ।। ८३ ।।

[1] Tv adds प्रकारः. [2] °व्यपदेशेन Tv. [3] न पौनरुक्तचम् Tv. [4] मर्मपीडाकरस्यैते नामनी Gm3, Tv. [5] उपतापे Tj1, Tj2. [6] 'क्विन्प्रत्ययस्य कुः'.

(पा.) उच्चावचं नैकभेदम् । 'नञो नलोपो यः प्रोक्तो न स मध्यपदे परे' इति नलोपो न भवति । [1]बहुप्रकारकनामनी ।। उच्चण्डमविलम्बितम् । [2]विलम्बशून्यस्य नामनी ।। अरुंतुदस्तु मर्मस्पृक् । मर्मस्थानव्यथकनामनी ।। अबाधं तु निरर्गलम् । अप्रतिरोधकनामनी । 'अपि निर्यन्त्रणोद्दामोच्छृङ्खलानर्गलादि च' । एतान्यपि । [3]'स्यादनर्गलमुद्दाममुच्छृङ्खलमयन्त्रितम्' इति [4]वैजयन्ती (पृ. २१२, श्लो. १३२) ।। ८३ ।।

[1] °प्रकारभूते A1, C1. [2] अकालक्षेप° A1. [3] वशे इति मुद्रितग्रन्थे. [4] A1 adds एतस्मिन्नर्थे.

प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ।
वामं शरीरे सव्यं स्यादपसव्यं तु दक्षिणे । ८४ ।।

(वि.) प्रसव्यमिति—प्रगतं सव्याद् वामभागाद् दक्षिणं[1] प्राप्तमिति प्रसव्यम् । प्रतिस्पर्धि कूलमस्येति प्रतिकूलम्[2] । अपगतं सव्याद् [3]वामभागादिति अपसव्यम् । [4]अपतिष्ठत्यनुकूलमपास्येति[5] अपष्ठु । 'ष्ठा गतिनिवृत्तौ' । प्रतिकूलस्य नामानि ।। [6]वमयति यज्ञसूत्रमनेनेति[7] वामम् । 'टुवमु उद्गिरणे' । सूयते यज्ञसूत्रमनेनेति[8] सव्यम् । 'षुञ् अभिषवे' । शरीरस्य वामभागस्य नामनी ।। अपक्रान्तं सव्यभागादिति अपसव्यम् । दक्षते वलवत्तया वर्धत इति दक्षिणम् । 'दक्ष वृद्धौ शीघ्रार्थे च' । शरीरस्य [9]दक्षिणभागार्धस्य नामनी ।। ८४ ।।

[1] K5 adds भागं. [2] K6 omits. [3] Pt2 omits. [4] आनुकूल्यं वर्जयित्वा Pt2. [5] K5 adds तिष्ठति. [6] वमति J2, K5, Pt2. [7] Pt2 omits अनेन. [8] अत्र Pt2. [9] दक्षिणार्धभागस्य K5.

(विव.) प्रसव्यं—अपष्ठु च । [1]प्रस्तुतार्थविरोधिनोऽर्थस्य [2]नामानि । [3]स्रोतसः स्वारसिकगमनविरोधिकूलाभिमुखवचनः प्रतिकूलशब्दः स्वाभाविकार्थविरोधिकमात्रसाधर्म्येण विरुद्धमात्रे वर्तते । प्रगतमपसृतं सव्यादिति दक्षिणभागस्थितं प्राचीनावीताख्यं ब्रह्मसूत्रं प्रसव्यापसव्याभ्यामुच्यते । तत्साधर्म्येण [4]शुभकार्यविरुद्धमात्रेणान्यदपि प्रकृतकार्यविरोधि [5]प्रसव्यापसव्यशब्दाभ्यामुक्तम् । अपेत्युपसर्गो वर्जने । अपतिष्ठत्यानुकूल्यं वर्जयित्वा तिष्ठतीति अपष्ठु । 'अपदुःसुषु स्थः' (उ. १. २५) इति तिष्ठतेः कुप्रत्ययः । कित्त्वादाकारलोपः (६. ४. ६४) । 'अम्बाम्ब ...' इत्यादिना (८. ३. ९७) षत्वम् । 'तव धर्मराज इति नाम कथमिदमपष्ठु पठ्यते' इति इति माघकाव्ये प्रयोगः (शिशु. १५. १७) ।। वामं—सव्यं स्यात् । शरीरस्य वामार्धं सव्यं स्यात् । वमतीति वामम् । 'टुवम उद्गिरणे' । [6] ज्वलादित्वाद् णप्रत्ययः (३. १. १४०) ।। सूयते सव्यम् । 'षुञ् अभिषवे' । 'अचो यत्' (३. १. ९७) । 'सव्यं वामे च दक्षिणे' इत्यजयः ।। अपसव्यं तु दक्षिणम् । [7]शरीरस्य दक्षिणमर्धम् अपसव्यम् । अपक्रान्तं सव्यादित्यपसव्यम् । दक्षते वीर्ययुक्तत्वेनेति दक्षिणम् । 'तस्माद् दक्षिणोऽर्ध आत्मनो वीर्यवत्तरः' इति श्रुतेः । 'दक्ष वृद्धौ' । इनन्प्रत्ययः[8] (उ. २. ५०) ।। ८४ ।।

[1] प्रकृतकार्य° Gm3, Tv. [2] Gm1, Tv add एतानि चत्वारि. [3] प्रवाहस्य स्वच्छन्दगमन° Gm3, Tv. [4] °विरोधित्व° Tj1, Tv. [5] प्रसव्यं भवति। एवमपसव्यमपि Gm3, Tv. [6] घञ्प्रत्ययः (३. ३. १९), सुनोतीति सव्यम् Gm3, Tv. [7] Tv adds शरीर इत्यनुवर्तते. [8] B5, Tv add 'द्रुदक्षिभ्यामिनन्'.

(पा.) प्रसव्यं—अपष्ठु च। प्रतिकूलनामानि ॥ वामं—स्यात्। वामं[1] दक्षिणेतरत्। तत् शरीरे सव्यं[2] स्यात् ॥ अपसव्यं तु दक्षिणम्। दक्षिणं नाम वामेतरत्। तत्तु शरीरेऽपसव्यं स्यात्। सव्यमपि स्यात्[3]। [4]'सव्यवामे च दक्षिणे' इति जयकोशः। 'सव्यहस्ते च खड्गः' इति पुरातनप्रयोगः ॥ ८४ ॥

[1] A1 adds नाम. [2] सव्यतः A1, C1. [3] C1 omits. [4] सव्यम् C1; 'सव्यसव्यहस्तैकखड्गः' A1.

संकटं ना तु संबाधः कलिलं गहनं समे।
संकीर्णे संकुलाकीर्णे मुण्डितं परिवापितम् ॥ ८५ ॥

(वि.) संकटमिति—[1]संकटन्त्यन्योन्यमत्रेति संकटम्। 'कटे वर्षावरणयोः'। अस्मिन् परस्परं संबाध्यन्त[2] इति संबाधः। 'बाधृ लोडने'[3]। संकोचस्थलनामनी ॥ कल्यते क्षिप्यते मतिरत्रेति कलिलम्। 'कल किल क्षेपे'। गाहते मतिरत्रेति गहनम्। 'गाहू विलोडने'। दुर्विज्ञेयस्य नामनी ॥ संकीर्यते नैरन्तर्येणेति संकीर्णम्। 'कॄ विक्षेपे'। संकोलति निरन्तरीभवतीति संकुलम्। 'कुल संस्त्याने'। आकीर्यत इत्याकीर्णम्। संकीर्णस्य नामानि ॥ [4]मुण्ड्यते खण्ड्यत इति मुण्डितम्। 'मुडि खण्डने'। परिवाप्यते खण्ड्यते परिवापितम्[5]। 'डुवप् बीजसंताने'। [6]क्षुरादिनापसारितकेशश्मश्रुशिरसो नामनी ॥ ८५ ॥

[1] संकुचति Pt2. [2] सम्यक् बाध्यन्ते K5; Pt2 adds जनाः. [3] विलोडने J2, K6. [4] Pt2 adds स्म. [5] परितः शिरसि वापः केशखण्डनं जातोऽस्य Pt2. [6] क्षुरोत्सारित° K5.

(विव.) संकटं—संबाधः। [1]बहुद्रव्यसंकीर्णस्याल्पीयस आधारस्य नामनी। संकोचरूपार्थात् समित्युपसर्गात् 'संप्रोदश्च कटच्' (५. २. २९) इति कटच्प्रत्यये संकटम् ॥ [2]अन्योन्यसंमर्देन[3] बाध्यन्तेऽत्र जना इति संबाधः। 'बाधृ विलोडने'। अधिकरणे घञ् (३. ३. १२१)। [4]संबाधशब्दस्य विशेष्यायत्तलिङ्गत्वाप-

वादार्थं नेत्युक्तम् । ततश्च विप्रसंबाधः सभा, जनसंबाधो राजद्वारम् इत्येव भवति ।। कलिलं—समे । दुष्प्रवेशस्यैते नामनी । कलिं विवादं लात्याादत्त इति कलिलम् । [5]' कल किल क्षेपे ' इति वा धातोः इलच्प्रत्यये[6] (उ. १. ५४) कलिलम् ।। गहनं वने व्युत्पादितम्[7] (२. ४. १) ।। संकीर्णं संकुलाकीर्णम् । नैरन्तर्येण बहुविधद्रव्यै-रधिष्ठितस्य हट्टादेर्नामानि । संकीर्यते नैरन्तर्येण क्षिप्यत इति संकीर्णम् । आकीर्णं च । ' कॄ विक्षेपे ' । ' ॠत इद्धातोः ' (७. १. १००) इति इत्वम् । क्तः । ' र्वोरुप-धाया . . . ' (८. २. ७६) इति दीर्घः । ' रदाभ्याम् . . . ' इत्यादिना (८. २. ४२) निष्ठानत्वम् ।। सम्यक् कोलति संस्त्यानं भवतीति संकुलम् । ' कुल संस्त्याने ' । मूलविभुजादिः (वा. ३. २. ५) । ' शकि शङ्कायाम् ' इत्यस्माद् उलच्प्रत्यये शङ्कुलमिति तालव्यादिरिति गोवर्धनः ।। मुण्डितं परिवापितम् । क्षुरेण मूलपर्यन्तं कृत्तकेशश्मश्रोः पुरुषस्य नामनी । मुण्ड्यते स्म मुण्डितम् । ' मुडि खण्डने ' । क्तः ।। धातूनामनेकार्थत्वाद् वपिर्मुण्डनार्थः[8] । ' केशश्मश्रु वपते ', ' केशश्मश्रुनखानि वाप-यित्वा ' इत्यादयः प्रयोगाः । परितः शिरसि वापः केशखण्डनं संजातोऽस्येति परिवापितम् ।। ८५ ।।

[1] प्रचुर° Gm3, Tv. [2] परस्पर° B5, B6, Tv. [3] °संवन्धेन Tv. [4] स्त्रीनपुंसकयोरपि विशेष्ययोस्त्वयं पुंलिङ्ग एवेति दर्शयितुं नेत्युक्तम् Gm3, Tv. [5] कल्यते क्षिप्यतेऽत्र बुद्धिरिति Gm1, Tv. [6] Tv adds ' सलि कलि . . . ' इत्यादिना. [7] ' गाहू विलोडने ' । ' बहुलमन्यत्रापि ' (उ. २. ७८) इति युच् । पृषोदरादित्वात् ह्रस्वः ' इति भानुजीदीक्षितः (पृ. ४३५). [8] ' तथा च भाष्यम्—" वपिः प्रकिरणे दृष्टो मुण्डने चापि दृश्यते " इति । स्वार्थिकणिचि परिवापितम् ' इति टी. स. (पृ. ३८).

(पा.) संकटं—संबाधः । [1]संकटनामनी ।। ' इद्वाडिम्विदि '[2] कलिलं—समे । प्रवेष्टुमशक्यनामनी । ' चोररानिदि ' ।। संकीर्णं संकुलाकीर्णम् । संकीर्ण-नामानि । ' संदडिचिनदि ' ।। मुण्डितं परिवापितम् । परितः छिन्ननामनी । [3]लोमच्छेदननामनी अपि । ' वपिः प्रकिरणेऽपीष्टः केशच्छेदेऽपि दृश्यते ' इति धातुप्रदीपः ।। ८५ ।।

[1] निर्बन्ध° A1. [2] B3, C1 omit. [3] A1 adds निजवरपट्टविलोमच्छेदनाम.

ग्रथितं ग्रन्थितं दृब्धं विसृतं विस्तृतं ततम् ।
अन्तर्गतं विस्मृतं स्यात् प्राप्तप्रणिहिते समे ।। ८६ ।।

(वि.) ग्रथितमिति—[1]ग्रथ्यते वध्यत इति ग्रथितम् । 'ग्रन्थ संदर्भे' । ग्रन्थितं च । 'ग्रथि कौटिल्ये' । दृभ्यते ग्रथ्यत इति दृब्धम् । 'दृभी [2]ग्रन्थे' । ग्रथितस्य [3]पुष्पादेर्नामनी ।। विस्रियत इति विसृतम् । 'सृ गतौ' । विस्तीर्यत इति विस्तृतम् । 'स्तृञ् आच्छादने' । तन्यत इति ततम् । 'तनु विस्तारे' । विस्तृतस्य नामानि ।। [4]अन्तर्गतवद् न प्रकाशत इति अन्तर्गतम् । विस्मर्यत इति विस्मृतम् । 'स्मृ आध्याने' । विस्मृतस्य नामनी ।। प्राप्यत इति प्राप्तम् । 'आप्लृ व्याप्तौ' । प्रणिधीयत इति प्रणिहितम् । प्राप्तस्य वस्तुनो नामनी ।। ८६ ।।

[1] ग्रन्थ्यते K5, K6.　　[2] ग्रथने K3, K6.　　[3] पुष्पमाल्यादेः J2, K5.
[4] अन्तरेव गच्छति स्म Pt2.

(विव.) ग्रथितं—दृब्धम् । आनुपूर्वीविशेषेणैवावयवकृतस्य पुष्पमालादेः कविनिबद्धश्लोकादेश्च [1]नामानि । ग्रथ्यते संदर्भ्यते कुसुमादिभिरिति ग्रथितम् । 'ग्रन्थ संदर्भे' । क्र्यादिः । 'संदर्भो निबन्धनम्' इत्युक्तं धातुवृत्तौ[2] । क्तप्रत्यये 'अनिदिताम्[3]...' (६.४.२४) इत्युपधानकारलोपः ।। 'ग्रथि कौटिल्ये' इति भौवादिकः । 'कौटिल्यं कुसृतिर्बन्धश्च' इति धातुवृत्तौ (पृ. ६४) । क्तः । 'इदितो नुम्धातोः' (७.१.५८) इति नुम् । सर्वानन्दस्त्वाह—धातूनामनेकार्थत्वेन ग्रन्थरूपार्थे वर्तमानाद् 'मृद क्षोदे' इति धातोर्ण्यन्तात् स्वार्थे मर्दितम् इति[4] । अन्ये तु संदीयते संहतत्वेन सूच्यादिना सच्छिद्रं क्रियत इति संदितम् इत्याहुः ।। दृभ्यत इति दृब्धम् । 'दृभी ग्रन्थे' । क्तः (३. २. १०२) । ग्रन्थो ग्रन्थनम् ।। विसृतं—ततम् । परिणाहवतः प्रसारितस्य कटकम्बलादेर्नामानि । विस्रियते प्रसार्यते स्म विसृतम् । 'सृ गतौ' । क्तः (३.४.७२) ।। विस्तीर्यते स्म विस्तृतम् । 'स्तृञ् आच्छादने' । क्तः । [5]तायते स्म ततम् । तनोतेः क्तप्रत्ययः । 'अनुदात्तोपदेशवनतितनोति...' इत्यादिना (६. ४. ३७) नकारलोपः ।। अन्तर्गतं—स्यात् । पूर्वकालोपलब्धस्य संस्कारप्रमोषाद् बुद्ध्यनारूढस्य नामनी । [6]अन्तर्गतवदप्रकाशमानत्वाद् अन्तर्गतम् ।। अत्र वीत्युपसर्गो निषेधे । तत्पूर्वात् 'स्मृ चिन्तायाम्'[7] इति धातोः कर्मणि क्तप्रत्यये (३. २. १०२) विस्मृतम् ।। प्राप्तप्रणिहिते समे । प्रत्यासन्नवस्तुवाचकत्वेन तुल्ये इत्यर्थः । [8]प्रकर्षेण आप्यत इति प्राप्तम्[9] । प्रकर्षेण निधीयते संनिधौ स्थाप्यत इति प्रणिहितम् । उपसर्गद्वयपूर्वाद् दधातेः क्तप्रत्ययः । दधातेर्हिरादेशः (७. ४. ४२) । 'नेर्गदनदपतपदघुमास्यति...' इत्यादिना (८. ४. १७) णत्वम् ।। ८६ ।।

[1] B5, Tv add त्रीणि. [2] मुद्रितमाधवीयधातुवृत्तौ न दृश्यते. [3] 'अनिदितां हल उपधायाः क्ङिति'. [4] ग्रन्थनेऽपि वृत्तिः इति मु. ग्र. (पृ. ३६). [5] तन्यते स्म, 'तनु विस्तारे' Tj1, Tj2. [6] अप्रकाशमानत्वसादृश्यात् B6, Tj2. [7] 'स्मृ स्मरणे' Gm1, Gm3. [8] प्राप्यते स्म Tv. [9] Tj1, Tv add 'आप्लृ व्याप्तौ'.

(पा) ग्रथितं—दृब्धम् । तन्त्वादिना [1]गुम्फितस्य नामानि ।। विसृतं—ततम् । [2]विस्तृतनामानि ।। अन्तर्गतं—स्यात् । [3]अनाध्यातनामनी । [4]'मरवपड्ढदि'।। प्राप्त—समे । प्राप्तनामनी । [4]'दोरकपड्ढदि' । अनुक्तम्—उपस्थितं तृपनतमुपपन्नमिति त्रयम् । उपस्थितनामानि ।। 'उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः सुरभि सुरविमुक्तं पुष्पवर्षं पपात' इति रघुवंशः (१२. १०२) । [5]तत्र मणिबन्धः पट्टाभिषेकसमयः ।। ८६ ।।

[1] रचित° A1. [2] तत° A1. [3] विस्मृतस्य° B3. [4] B3 omits. [5] C1 omits.

वेल्लितप्रेङ्खिताधूतचलिताकम्पिता धुते ।
नुत्तनुन्नास्तनिष्ठचूताविद्धक्षिप्तेरिताः समाः ।। ८७ ।।

(वि.) वेल्लितेति—[1]वेल्लति चलतीति वेल्लितः । 'वेल्ल चलने' । [2]प्रेङ्खति चलतीति प्रेङ्खितः । 'इखि गतौ' । आधूनुते कम्पत इति आधूतः[3] । धुतश्च । 'धूञ् कम्पने' । [4]चलतीति चलितः । 'चल कम्पने' । आकम्पत इति आकम्पितः[5] । 'कपि चलने' । कम्पितस्य शाखादेर्नामानि ।। नुद्यते प्रेर्यत इति नुत्तः । नुन्नश्च । 'नुद प्रेरणे' । अस्यत इत्यस्तः । 'असु क्षेपणे' । निष्ठीव्यत इति निष्ठचूतः[6] । 'ष्ठिवु निरसने' । आविध्यत इत्याविद्धः । 'व्यध ताडने' । क्षिप्यत इति क्षिप्तः । 'क्षिप प्रेरणे' । ईर्यत इतीरितः । 'ईर प्रेरणे' । प्रेरितस्य शरादेर्नामानि ।। ८७ ।।

[1] वेल्लयते स्म Pt2. [2] प्रेङ्ख्यते स्म Pt2. [3] आधूयते स्म Pt2. [4] चाल्यते स्म Pt2. [5] आकम्प्यते स्म Pt2. [6] निष्ठीव्यते स्म Pt2.

(विव.) वेल्लित—धुते । [1]वाय्वभिघातादिनिमित्तेन[2] चलनक्रियायुक्तस्य नामानि । वेल्लति स्म वेल्लितम् । 'वेल्ल चलने' । अत्र धातुवृत्तिकारः—'धातोरसंयोगान्तत्वेऽपि प्रयोगवशाद् द्विर्बद्धो लकारः' इति । प्रकर्षेण इङ्खति स्म प्रेङ्खितः ।

'इखि गतौ'। आधूनुते स्म आधूतः। 'धूञ् कम्पने'। आङ्पूर्वः। चलति स्म चलितः[3]॥ 'कपि चलने' इत्यस्माद् आङ्पूर्वात् क्तः आकम्पितः। 'धूञ् कम्पने' इत्यतो ह्रस्वान्तात् धुतः॥ नुत्त––समाः। [4]नोदनाख्यसंयोगादिना प्रेरितस्य शरादेर्नामानि। 'णुद प्रेरणे' इत्यतो धातोः कर्मणि क्तप्रत्यये 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' (८. २. ५६) इति वैकल्पिके निष्ठानत्वे नुन्नः। तदभावपक्षे नुत्तः॥ 'असु क्षेपणे' इत्यस्माद् अस्तः॥ 'ष्ठिवु निरसने' इत्यस्माद्धातोर्निष्ठायां 'च्छ्वोः शूडनुनासिके च' (६. ४. १९) इत्यूठादेशे[5] निष्ठ्यूतः। रूढ्या वृत्त्या मुखवाय्वभिघातेन मुखकुहराद् बहिः प्रेरिते श्लेष्मलालादिके वर्तमानोऽपि निष्ठ्यूतशब्दः प्रेरितत्वसादृश्याद्[6] अन्यत्रापि शरादौ वर्तते॥ आविध्यते स्म आविद्धः। 'व्यध ताडने'। क्तप्रत्यये 'ग्रहिज्यावयिव्यधि . . .' इत्यादिना (६. १. १६) संप्रसारणम्। 'झषस्तथोर्धोऽधः' (८. २. ४०) इति निष्ठातकारस्य धत्वम्॥ 'क्षिप प्रेरणे' इति धातोः क्षिप्तः॥ ईर्यते स्म ईरितः। 'ईर प्रेरणे'। चुरादिः। क्तप्रत्यये इडागमः। 'निष्ठायां सेटि' (६. ४. ५२) इति णिलोपः॥ ८७॥

[1] वाय्वादि° Gm3, Tv. [2] °निमित्तान्तरेण B5, B6. [3] Tv adds 'चलि गतौ'; 'चल कम्पने' Tj1, Tj2. [4] Gm1, Tv add सप्तैते. [5] °आदेशे कृते B6, Gm3. [6] साम्यात् Tv.

(पा.) वेल्लित––धुते। चलितनामानि[1]। करेण कम्पितः खड्गः। 'प्रेङ्खोलितस्तरलितो लोलितान्दोलितावपि'। आन्दोलितनामानि। [2]'अल्लाडिपड्डदि'॥ 'आन्दोलिता करतले [3]नवशक्तिकेयम्'। 'पृथुलजघनभारं मन्दमान्दोलयन्ती' इति बाणः॥ नुत्त––समाः। क्षिप्तनामानि। [2]'दोब्बलवड्डदि'। अनुक्तम्–– [4]'आवर्हितोच्छूतोत्खातोत्पाटितोन्मूलिताः समाः'। [5]उत्पाटितनामानि। 'पेरकपड्डदि'॥ ८७॥

[1] कम्पित° B3, C1. [2] B3 omits. [3] °शाक्तिका° C1. [4] °उत्पात° A1. [5] उन्मूलित° B3, C1.

परिक्षिप्तं तु निवृतं मूषितं मुषितार्थकम्।
प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताहते॥ ८८॥

(वि.) परिक्षिप्तमिति—[1]परिक्षिप्यते समन्ताद् वेष्टयत इति परिक्षिप्तम् । 'क्षिप प्रेरणे' । नितरां व्रियते निवृतम् । 'वृञ् वरणे' । नियतं भ्रियते[2] निभृतमिति वा पाठः । [3]कण्टकादिपरिवेष्टितस्य क्षेत्रादेर्नामनी ।। मूष्यत इति मूषितम् । 'मूष स्तेये' । मुष्यत इति मुषितम् । 'मुष स्तेये' । तस्करितस्य नामनी ।। [4]प्रकर्षेण वर्धत इति प्रवृद्धम् । 'वृधु वृद्धौ' । प्रसरतीति प्रसृतम् । 'सृ गतौ' । [5]प्रसृतस्य जङ्घादेर्नामनी ।। व्ययादौ न्यस्यते स्वामिनेति न्यस्तः । 'असु क्षेपणे' । निसृज्यते स्वामिनेति निसृष्टः[6] । कार्येषु स्वामिना नियुक्तस्य ग्रामाधिपादेर्नामनी[7] ।। गुण्यत इति गुणितम् । 'गुण अभ्यासे' । आहन्यतेऽभ्यस्यत[8] इति आहतम् । अभ्यस्तवेदादेर्नामनी ।। ८८ ।।

[1] परितः क्षिप्यते Pt2. [2] 'भृञ् भरणे' K2. [3] कङ्कादि° J2, K6. [4] प्रवर्धते स्म Pt2. [5] वर्धितस्य K5. [6] 'सृज विसर्गे' K2, K5. [7] भूमौ निहितस्य वस्तुनः K5. [8] संख्यान्तरेण Pt2.

(विव.) परिक्षिप्तं तु निवृतम् । [1]यदृच्छागतपश्वादिसंचारपरिहाराय कण्टकशाखादिभिरावृतस्यारामादेर्नामनी । परितः क्षिप्यते बहिःसंचाराद् निरस्यत इति परिक्षिप्तम्[2] ।। नितरां व्रियते कण्टकशाखादिभिरिति निवृतम् । 'वृञ् वरणे' । क्तः ।। मूषितं मुषितार्थकम् । स्तेनापहृतवचनो मुषितशब्दः, तत्समानार्थो मूषितशब्द इत्यर्थः । 'मुष स्तेये' इत्यतो लघूपधाद् धातोः क्र्यादेः क्तप्रत्यये मुषितम् । दीर्घोपधात्तु[3] भौवादिकाद् मूषितम् ।। प्रवृद्धप्रसृते । एतदादिश्लोकद्वयान्तस्थितं[4] समे (श्लो. ९०) इति पदम् एतदादिभिर्द्वादशभिर्वाक्यैः संबध्यते । प्रपूर्वो वृधिः प्रसरणे वर्तते । तथा च—'तस्मादयं प्रववृधे पृथिवीपतीनामुद्गीतपुण्यचरितो भुवनेषु वंशः'[5] इति भवभूतिप्रयोगः । प्रौढेऽपि प्रवृद्धमुक्तम्[6] (श्लो. ७६) । प्रसरति स्म प्रसृतम् । 'सृ गतौ' । क्तः ।। न्यस्तनिसृष्टे । चोरादिपरिहाराय[7] परहस्ते स्थापितस्य सुवर्णादेर्नामनी । दानोपभोगादिभ्यो निवार्य अस्यते क्षिप्यत इति न्यस्तम् । नियमेन सृज्यते दीयत इति निसृष्टम् । 'सृज विसर्गे' । क्तप्रत्ययः । [8]षत्वं ष्टुत्वं[9] च ।। गुणिताहते । यं कंचिदेकादिसंख्याव्यञ्जकमङ्कं फलकादौ [10]क्वचिद् विन्यस्य सोऽङ्को यत्संख्यागुणितो विधित्सितः तत्संख्याङ्कमधो विन्यस्य गणितशास्त्रोक्तक्रमेण उपरितनमङ्कमाहत्य अङ्कान्तरं निधायाभ्यस्तं सत् गुणिताहत-

शब्दाभ्यामुच्यते । गुण्यतेऽभ्यस्यते स्म गुणितम् । 'गुण अभ्यासे' ।। [11]गणकै- रङ्कान्तरेणाहन्यत इति आहतम् । 'हन हिंसागत्योः' । क्तः ।। ८८ ।।

[1] चोरादि° for पश्वादि Tv. [2] Tj1 adds 'क्षिप प्रेरणे'. [3] Tv adds 'मूष स्तेये'. [4] °द्वयान्ते श्रूयमाणं B6, Tv. [5] रूढः Gm1, Gm3. [6] Tv adds अस्मिन्नेव वर्गे. [7] परिहारार्थं Gm3, Tv. [8] 'व्रश्च ...' (८. २. ३५). [9] ८. ४. ४१. [10] उपरिपङ्क्तौ निधाय Gm1, Gm3. [11] Tv adds यः कश्चिदङ्कः

(पा.) परिक्षिप्तं तु निवृतम् । परितः वेष्टितस्य[1] नामनी । [2]'मुसुरुको- पड्डदि' ।। मूषितं मुषितार्थकम् । चोरितं मुषितं स्यात्[3] ।। प्रवृद्धप्रसृते । प्रसृतना- मनी । [2]'प्रसरेपड्डदि' । 'तस्मादयं प्रववृधे पृथिवीपतीनामुद्गीतपुण्यचरितो[4] भुवनेषु वंशः' इति धर्मशर्माभ्युदयः[5] ।। न्यस्तनिसृष्टे । समर्पितनामनी । 'ग्रामेष्वात्म- निसृष्टेषु'[6] (रघु. १. ४४) ।। गुणिताहते । द्वे चत्वारि अष्टावित्यावर्तना- मनी ।। ८८ ।।

[1] छादित° B3, C1. [2] B3 omits. [3] मुषितनाम B3, C1. [4] उद्रिक्त° for उद्गीत° in B3. [5] मुद्रितग्रन्थे न दृश्यते. [6] °विसृष्टेषु इति मु. ग्र. (पृ. १४).

निदिग्धोपचिते गूढगुप्ते गुण्ठितरूषिते ।
द्रुतावदीर्णे उद्गूर्णोद्यते कारितशिक्षिते ।। ८९ ।।

(वि.) निदिग्धेति—निदिह्यत उपचीयत इति निदिग्धम् । 'दिह उपचये' । उपचीयत इति उपचितम् । 'चिञ् चयने' । उपचितस्य धान्यादेर्नामनी ।। गुह्यत इति गूढम् । 'गुहू संवरणे' । [1]गुप्यत इति गुप्तम् । 'गुपू रक्षणे' । गुप्तस्य [2]धान्यादेर्नामनी ।। गुण्ठ्यते [3]माल्यादिनेति गुण्ठितम् । 'गुठि वेष्टने' । रूष्यत इति रूषितम् । 'रुष हिंसायाम्'[4] । माल्यादिना रूषितस्तनादेर्नामनी ।। द्रूयत इति द्रुतम् । 'द्रु गतौ' । अवदीर्यत इति अवदीर्णम् । 'दॄ विदारणे' । विदारितस्य नामनी ।। उद्गूर्यत इति उद्गूर्णम् । 'गुरी उद्यमने' । उद्यम्यत इति उद्यतम्[5] । उद्युक्तस्य नामनी ।। कार्यते शिक्ष्यत इति कारितम्[6] । शिक्ष्यत इति शिक्षितम् । 'शिक्ष विद्योपादाने' । शिक्षितस्य [7]विद्यादेर्नामनी ।। ८९ ।।

[1] गोप्यते J2, K5, K6. [2] धनादेः K4, K5. [3] धूल्यादिना K5, Pt2. [4] 'रूष व्याप्तौ' Pt2. [5] 'यम उपरमे' K4, K5. [6] काचमारोपितं काचितम्, शिक्यमारोपितं शिक्यितम् Pt2. [7] शिष्यादेः K5.

(विव.) निदिग्धोपचिते। हरितालसुधाहिङ्गुलादिलिप्तस्य कुडयादेर्नामनी। नितरां दिह्यते[1] स्म निदिग्धम्। 'दिह उपचये'। क्तः[2]॥ उपचीयते द्रव्यान्तरेण वर्ध्यत इति उपचितम्। 'चिञ् चयने'। क्तः। उपसर्गवशादत्र वृद्धिरर्थः॥ गूढगुप्ते। यस्य कस्यचिदप्रकटीभूतस्य[3] वस्तुनो नामनी। गुह्यते स्म गूढम्। 'गुहू संवरणे'। क्तप्रत्यय[4]ढत्व[5]ष्टुत्वढलोपाः[6]॥ [7]गुप्यते स्म गुप्तम्। [8]'गुपू रक्षणे'। क्तः॥ गुण्ठितरूषिते। द्रव्यान्तरेणाच्छादितस्य[9] नामनी। यथा—उत्तरीयावगुण्ठितं कुचमण्डलम्। रेणुरूषितं शिरः[10] इत्यादि। 'गुठि वेष्टने' इति धातोः कर्मणि क्तप्रत्यये गुण्ठितम्॥ रूषिः लौकिको धातुः व्याप्त्यर्थो भूवादिषु विज्ञेयः। ततः कर्मणि निष्ठायां रूषितम्॥ द्रुतावदीर्णे। द्रवीभूतस्य मांसादेर्नामनी। द्रूयते स्म द्रुतम्। 'द्रु गतौ'॥ अवदीर्यते स्म प्रशिथिलावयवत्वेनेत्यवदीर्णम्। 'दॄ विदारणे'। कर्मणि क्तप्रत्यये ॠत इत्वं[11] निष्ठानत्वं च॥ उद्गूर्णोद्यते। ऊर्ध्वदेशसंयोगं प्राप्तस्य[12] खड्गलगुडादेर्नामनी। [13]उद्गूर्यते स्म उद्गूर्णम्। 'गुरी उद्यमने'। निष्ठानत्वम् (८. २. ४२), उपधादीर्घश्च (८. २. ७७)॥ 'यम उपरमे' इत्यस्माद् निष्ठायामनुनासिकलोपे (६. ४. ३७) उद्यतः। उद्गूर्णोच्छ्रिते इति केचित् पठन्ति। 'श्रिञ् सेवायाम्' इत्यतः उत्पूर्वात् क्तप्रत्यये उच्छ्रितम्॥ कारितशिक्षिते। समे इत्येव। लौकिके वैदिके वा कर्मणि[14] कृताभ्यासस्य नामनी। यथा कारितो युद्धकर्मणि, शिक्षित इत्यर्थः। शिक्षां कार्यते स्मेति कारितम्। कृञो णिचि निष्ठा॥ शिक्ष्यते स्म शिक्षितम्। 'शिक्ष विद्योपादाने'। क्तः। सुभूतिचन्द्रस्तु काचितशिक्यिते इति पठित्वा व्याचष्ट। काचवद् अञ्चितं कृतं काचितम्। शिक्यवत् कृतं शिक्यितम्। संहतमित्यर्थः इति। टीकासर्वस्वकारोऽपि तमेव पाठं मनसि निधाय व्याकृत। 'काचितादिद्वयं शिक्यारोपिते वर्तते। "प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च" (ग. सू. ७. ४. ६७) इति काचशब्दात् शिक्यशब्दाच्च णिचि तदन्ताद् धातुद्वयादपि क्तप्रत्यये काचितं शिक्यितं चेति' (पृ. ४०)॥ ८६॥

[1] Tv adds उपचीयते. [2] 'झषस्तथो...' इति धत्वम्। [3] अप्रकटीकृतस्य Tj1, Tv. [4] 'हो ढः'. [5] 'ष्टुना ष्टुः'. [6] 'ढो ढे लोपः' 'ढ्रलोप...' इति

दीर्घश्च. 　[7] गोप्यते स्म B5, B6. 　[8] 'गुप गोपने' Gm1, Gm3. 　[9] अभिभूतरूपस्य Tv. 　[10] पटः Tj1, Tv. 　[11] 'हलि च' इति दीर्घः 　[12] प्रापितस्य Tv. 　[13] उद्गुरते उद्युङ्क्ते स्म Tv. 　[14] लौकिकेषु वैदिकेषु वा कर्मसु Tv.

(पा.) निदिग्धोपचिते[1] । अवचितनामनी । [2]'पेंपवड्डिदि' ।। गूढगुप्ते । गुप्तनामनी । 'दांचबड्डिदि' । गुण्ठितरूषिते । परागादिना छन्ननामनी ।। द्रुतावदीर्णे । स्वयं विदीर्णनामनी । 'द्रुतं शीघ्रे[3] शीघ्रगतेऽप्यवदीर्णविलीनयोः' इति वैजयन्ती (पृ. २२८, श्लो. ८) । 'द्रु गतौ' इत्यर्थपाठो[4] निदर्शनम् । तदुक्तम्—

'निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृता लोके पाठस्तेषां निदर्शनम् ।।'

उद्गूर्णोद्यते । उत्क्षिप्तनामनी । उद्गूर्णः करवालः ।। काचितशिक्यिते । [5]कारडिकायन्त्रे कृतस्य नामनी ।। ८९ ।।

[1] 3 pages break in A1. 　[2] C1 omits. 　[3] शीघ्रम् B3, C1. 　[4] अर्धपाठः C1. 　[5] कारटिका° C1.

घ्राणघ्राते दिग्धलिप्ते समुदक्तोद्धृते समे ।
वेष्टितं स्याद् वलयितं संवीतं रुद्धमावृतम् ।। ९० ।।

(वि.) घ्राणेति—घ्रायत[1] इति घ्राणम् । घ्रातं च । 'घ्रा गन्धोपादाने' । घ्रातस्य पुष्पादेर्नामनी ।। दिह्यत इति दिग्धम् । 'दिह उपचये' । लिप्यत इति लिप्तम् । 'लिप उपदेहे' । लिप्तस्य भित्त्यादेर्नामनी ।। समुदच्यत इति समुदक्तम् । 'अञ्चु गतिपूजनयोः' । उद्ध्रियत इति उद्धृतम् । 'हृञ् हरणे' । उद्धृतस्य शल्यादेर्नामनी ।। वेष्ट्यत इति वेष्टितम् । 'वेष्ट वेष्टने' । वलयाकारः[2] संजातोऽस्येति वलयितम् । वेष्टितस्य वस्त्रादेर्नामनी । संवीयत[3] इति संवीतम् । 'व्येञ् संवरणे' । रुध्यते आव्रियत इति रुद्धम् । 'रुधिर् आवरणे' । आव्रियत इत्यावृतम् । 'वृञ् वरणे' । वस्त्रादिना आवृतस्य देहादेर्नामनी ।। ९० ।।

[1] घ्रायते स्म Pt2. 　[2] वलयः K5. 　[3] J2 adds आच्छाद्यते; संव्यायतं K6.

(विव.) घ्राणघ्राते । घ्राणेन्द्रियानुभूतगन्धस्य कुसुमादेर्नामनी । घ्रायते स्म घ्रातम् । 'घ्रा गन्धोपादाने' । कर्मणि क्तप्रत्ययः । 'नुदविदोन्द ...' इत्यादिना (८. २. ५६) वैकल्पिके निष्ठानत्वे घ्राणम्[1] ।। दिग्धलिप्ते । चन्दनादिना लिप्तस्य नामनी । दिह्यते स्म दिग्धम् । 'दिह उपचये' । उपचयो लेप इति धातुवृत्तौ[2] । क्तप्रत्यये 'दादेर्धातोर्घः' (८. २. ३२) इति घत्वे 'झषस्तथोर्धोऽधः' (८. २. ४०) इति धत्वम् ।। लिप्यते स्म लिप्तम् । 'लिप उपदेहे' । क्तः ।। समुदक्तोद्धृते समे । कूपादेरधःप्रदेशाद्[3] ऊर्ध्वप्रदेशमात्रं नीतस्य जलादेर्नामनी । सम्यग् उदच्यते उद्ध्रियते स्म समुदक्तम् । 'अञ्चु गतिपूजनयोः' । अत्राञ्चतेः पूजार्थत्वाभावाद् 'अञ्चेः पूजायाम्' (७. २. ५३) इति प्राप्तस्य [4]इडागमस्याभावः । 'उदितो वा' (७. २. ५६) इति इडागमस्य क्त्वाप्रत्यये वैकलिपकत्वाद् 'यस्य विभाषा' (७. २. १५) इति निष्ठायामिडभावः । 'उदक्तमुदकं [5]कूपात्' इत्यादिवद् अञ्चनस्यापि अपादानविषयत्वाद् 'अञ्चोऽनपादाने' (८. २. ४८) इति निषेधाद् निष्ठानत्वस्याभावः[6] ।। समुदस्तेति क्वाचित्के पाठे सोपसर्गद्वयात् 'असु क्षेपणे' इति धातोः कर्मणि क्तप्रत्ययः ।। उद्ध्रियते स्मेति उद्धृतम् । 'हृञ् हरणे' । क्तः । प्रागुक्तम्[7] उद्गूर्णमुद्यतं चेति[8] शब्दद्वयं तु स्वशरीरापेक्षया उपरिप्रदेशं नीते लगुडादौ वर्तत इति न पौनरुक्तयम् । [9]क्वचिद् अर्थसांकर्यप्रयोगो लक्षणया निर्वोढव्यः ।। वेष्टितं स्याद् वलयितम् । लतादिना वेष्टितस्य वृक्षप्रकाण्डादेर्नामनी । 'वेष्ट वेष्टने' इति धातोर्निष्ठायां वेष्टितम् ।। वलयो वलयाकारोऽस्य संजात इति वलयितम् (५. २. ३६) ।। संवीतं रुद्धमावृतम् ।। हिमधूमाद्यावरकद्रव्यव्याप्तसर्वावयवस्य पर्वतादेर्नामानि । समन्ततो वीयते उद्यत इति संवीतम् । 'व्येञ् संवरणे' । क्तप्रत्यये यजादित्वात् (६. १. १५) संप्रसारणे परपूर्वत्वे[10] च (६. १. १०८) 'हलः' (६. ४. २) इति दीर्घः ।। 'रुधिर् आवरणे' इत्यतः क्तप्रत्यये रुद्धम् ।। 'वृञ् वरणे' इत्यस्माद् आङ्पूर्वाद् आवृतम् ।। वेष्टितादयः पञ्चैकार्था इति केचित् ।। ६० ।।

[1] Gm3, Tv add तदभावे घ्रातम्. [2] दिह्यते उपलिप्यते इति मा. धा. वृत्तौ दृश्यते (पृ. ३२३). [3] Tv adds भूतलात्. [4] अवकाशाभावात् B6, Tv. [5] काशिका (पृ. ४०८). [6] निष्ठानत्वं न भवति Tv. [7] Tj1, Tv add उदाहरणम्. [8] श्लो. ८६. [9] Gm1, Gm3, Tv omit the sentence. [10] 'संप्रसारणाच्च' इति पूर्व एकादेशः.

(पा.) घ्राणघ्राते । [1]आघ्राततनामनी ।। दिग्धलिप्ते । पङ्कादिना लिप्तनामनी ।। समुदक्तोद्धृते समे । [2]उद्धृतस्य जलादेर्नामनी ।। वेष्टितं—रुद्धमावृतम् । [3]परिवेष्टितनामनी ।। ९० ।।

[1] आघ्राततस्य पुष्पादेः C_1.　[2] C_1 adds कूपात्.　[3] B_3 adds नद्यादिना.

रुग्णं भुग्नेऽथ निशितक्ष्णुतशातानि तेजिते ।
स्याद् विनाशोन्मुखं पक्वं ह्रीणह्रीतौ तु लज्जिते ।। ९१ ।।

(वि.) रुग्णमिति—रुज्यत इति रुग्णम् । 'रुजो भङ्गे' । भुज्यत इति भुग्नम् । [1]'भुजो कौटिल्ये' । भुग्नस्य रथादेर्नामनी ।। निशायते तनूक्रियत इति निशितम् । शातं च । 'शो तनूकरणे' । क्ष्णूयते तनूक्रियत इति क्ष्णुतम् । 'क्ष्णु तेजने' । [2]तेज्यते निशायत[3] इति तेजितम् । 'तिज निशातने' । शाणादिना तीक्ष्णीकृतस्य खड्गादेर्नामानि ।। पच्यते स्मेति पक्वम् । 'डुपचष् पाके' । [4]पतनोन्मुखस्य [5]फलादेर्नाम ।। जिह्रेतीति ह्रीणः । ह्रीतश्च[6] । 'ह्री लज्जायाम्' । लज्जास्य संजातेति लज्जितः । व्रीडितस्य नामानि[7] । ९१ ।।

[1] भुज J_2, K_4, K_6.　[2] तिज्यते Pt_2.　[3] Pt_2 omits.　[4] विनाश° K_5.
[5] सस्यादेः K_4, K_5.　[6] ह्रीरस्य संजाता K_5.　[7] लज्जायुक्तस्य वध्वादेः K_5.

(विव.) रुग्णं भुग्ने । [1]आनताग्रभागस्य नामनी । यथा—फलभारभुग्नास्तरवः इति । 'रुजो भङ्गे' 'भुजो कौटिल्ये' । आभ्यां धातुभ्यां कर्मणि क्तप्रत्यये 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वेन रुग्णम् । भुग्नं च ।। अथ—तेजिते । शाणादिनिघर्षणेन तीक्ष्णीकृतधाराप्रदेशस्य [2]खड्गादेर्नामानि । 'शो तनूकरणे' इत्यतो निपूर्वात् कर्मणि क्तप्रत्यये 'शाच्छोरन्यतरस्याम्' (७. ४. ४१) इति विकल्पेन इत्वे निशितम् । [3]तदभावपक्षे शातम् । क्ष्णूयत इति क्ष्णुतम् । 'क्ष्णु तेजने' । तेजनं तनूकरणम् । 'तिज निशाने' इत्यतः चौरादिकात् तेजितम्[4] ।। स्यात्—पक्वम् । विनाशः विलयनम्, तत्र उन्मुखम् । आसन्नविनाशमित्यर्थः । यथा—पक्वो ज्वरः । पक्वः प्रतिश्यायः इत्यादि । परिणतेऽपि पक्वं वक्ष्यते[5] । पच्यते स्म पक्वम्[6] । 'पचो वः' (८. २. ५२) इति निष्ठातकारस्य वकारः ।। ह्रीणह्रीतौ तु लज्जिते । व्रीडायुक्तस्य नामनी । जिह्रेति स्म ह्रीणः । ह्रीतश्च । 'ह्री लज्जायाम्' ।

'मुदविद...' इत्यादिना (८. २. ५६) विकल्पेन निष्ठानत्वम् ।। लज्जास्य संजाता[7] लज्जितः । तारकादिः (५. २. ३६) ।। ६१ ।।

[1] Gm3, Tv add स्वकीयमूलं प्रति. [2] क्षुरिका° Tj1, Tj2. [3] इत्वाभाव° B5, B6. [4] ७. ३. ८६. [5] श्लो. ६६. [6] B6 adds 'डुपचष् पाके'. [7] इति विग्रहे तारकादित्वाद् इतच्प्रत्यये लज्जितः Gm1, Gm3, Tv.

(पा.) रुग्णं भुग्ने । [1]भुग्ननामनी ।। अथ––तेजिते । उत्तेजितनामानि ।। स्यात्––पक्वम् । आसन्नविनाशनाम[2] । 'पक्वो मानज्वरः स्त्रीणाम्' ।। ह्रीण––लज्जिते । लज्जितनामानि ।। ६१ ।।

[1] वक्रस्य° C1. [2] आसन्नविनाशं पक्वं स्यात् C1.

वृते तु वृत्तवावृत्तौ संयोजित उपाहितः ।
प्राप्यं गम्यं समासाद्यं स्यन्नं रीणं स्रुतं स्नुते ।। ६२ ।।

(वि.) वृत इति––व्रियते[1] कन्यादिनेति वृतः । 'वृञ् वरणे' । वृत्यते स्मेति वृत्तः । 'वृतु वर्तने' । वावृत्यते व्रियते स्मेति वावृत्तः । 'वावृतु वरणे' । कन्यादिना वृतस्य वरादेर्नामानि ।। संयोज्यते[2] युगादिनेति संयोजितः । 'युजिर् योगे' । उप समीपे आधीयते स्थाप्यत इत्युपाहितः । युगादिना संयोजितस्य बलीवर्दादेर्नामनी ।। प्राप्तुं योग्यं प्राप्यम् । 'आप्लृ व्याप्तौ' । गन्तुं [3]योग्यं गम्यम् । समासादितुं प्राप्तुं योग्य समासाद्यम् । 'षद्लृ विशरणादौ' । प्राप्तव्यस्य वस्तुनो नामानि ।। स्यन्दते स्मेति स्यन्नम् । 'स्यन्दू प्रस्रवणे' । रीयते [4]प्रस्रवतीति रीणम् । 'रीङ [5]स्रवणे' । स्रवतीति स्रुतम् । 'स्रु गतौ' । स्नौति स्रवतीति[6] स्नुतम् । 'ष्णु प्रस्रवणे' । [7]सुषिरद्वारान्निःसृतस्य जलादेर्नामानि ।। ६२ ।।

[1] Pt2 adds स्म. [2] संयुज्यते K5, Pt2. [3] J2, K4, K6 add प्राप्तुं. [4] स्रवति J2, K6. [5] प्रस्रवणे K3, K4, K6. [6] K5 omits. [7] K3, K4 omit द्वारात्.

(विव.) वृते––वावृत्तौ । [1]प्रसन्नदेवतां प्रति प्रार्थितार्थस्य नामानि । व्रियते स्म वृतम् । 'वृञ् वरणे' । क्तः । यथा वृतः पुत्र इति ।। 'तप ऐश्वर्ये' इत्यनन्तरं

दिवादिषु 'वावृतु वर्तने' इति पठ्यते। तत्र वाग्रहणं पूर्वस्य धातोः दैवादिकविकल्पनार्थमिति [2]व्याख्याने 'वृतु वर्तने' इत्यस्मादेव धातोः कर्मणि क्तप्रत्यये वृत्तम्। अपरे तु—वाशब्दमप्युत्तरधात्ववयवमाहुः। तन्मते वावृत्यते स्मेति वावृत्तम्। 'वावृतु वर्तने'। वर्तनं वरणमिति धातुवृत्तिः[3]। कर्मणि क्तप्रत्ययः। तथा च— 'ततो वावृत्यमानासौ रामशालां न्यविक्षत' इति भट्टिः (४. २८)। अत्र वावृत्यमाना वृण्वतीत्यर्थः॥ संयोजित उपाहितः। द्रव्यान्तरेण सह प्रापितसंयोगस्य वस्तुनो नामनी। सम्यग् योजितः संयोजितः॥ [4]उप समीपे आधीयते स्म उपाहितः[5]। 'उपाहितां वक्षसि पीवरस्तने' इति भारविः[6] (किरा. ८. ३७)॥ प्राप्यं—समासाद्यम्। प्राप्तुं शक्यं ग्रामादिकं प्राप्यम्। [7]'ऋहलोर्ण्यत्' (३. १. १२४)॥ 'गम्लृ गतौ' इत्यतः 'पोरदुपधात्' (३. १. ९८) इति यत्प्रत्यये गम्यम्॥ [8]आङि सदिः पद्यर्थे इति चौरादिकाद्धातोः शक्यार्थे ण्यत्प्रत्यये (३. १. १२४) समासाद्यम्॥ स्यन्नं—स्नुतम्। प्रशिथिलावयवावारब्धतटाकसेतुघटादेः बहिर्निःसृतजलक्षीरादेर्नामानि। 'स्यन्दू प्रस्रवणे' इत्यतः कर्तरि क्तप्रत्यये (३. ४. ७२) 'रदाभ्याम्...' इत्यादिना (८. २. ४२) निष्ठानत्वे स्यन्नम्। रीयते स्म रीणम्। 'रीङ् गतौ' दैवादिकाद्धातोः 'स्वादय ओदितः' (ग. सू.) इत्यतिदेशाद् 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम्॥ स्रवति स्म स्रुतम्। 'स्रु स्रवणे'[9]॥ स्नौति स्म स्नुतम्। 'ष्णु प्रस्रवणे'॥ ९२॥

[1] स्वेच्छया प्रार्थितार्थे वृतादित्रयम्। यथा—वृतो वरः, वृतं राज्यमित्यादि Gm_3, Tv. [2] इति केचिद् व्याचक्षते। तन्मते Gm_1, K_5, Tv. [3] मा. धा. वृत्तौ न दृश्यते. [4] उपपूर्वात् 'अह व्याप्तौ' इत्यस्मात् क्तः Tv. [5] Gm_3 adds दधातेः क्तः। 'दधातेर्हिः' (७. ४. ४२). [6] माघः Tj_1; एवं सति 'उपाहितैर्वपुषि निवातवर्मभिः' (१७. ५१). [7] Gm_3, Tv add 'आप्लृ व्याप्तौ'. [8] 'आङः षदः पद्यर्थे' इति मा. धा. (पृ. ५६५). [9] Gm_3 adds 'जालुपेरु'.

(पा.) वृते—वावृत्तौ[1]। वृतनामानि। 'ततो [2]वावृत्तमाना सा रामशालां न्यविक्षत' इति भट्टिः (४. २८)॥ संयोजित उपाहितः। द्रव्यान्तरेण मिश्रितस्य नामनी। क्षीरेणोपाहितं नीरम्॥ प्राप्यं—समासाद्यम्। प्राप्तुं योग्यनामानि॥ स्यन्नं—स्नुतम्। स्यन्ननामानि[3]॥ ९२॥

[1] व्यावृत्तौ B_3. [2] व्यावृत्त° B_3. [3] प्रस्नुत° C_1.

संगूढः स्यात् संकलितोऽवगीतः ख्यातगर्हणः ।
विविधः स्याद् बहुविधो नानारूपः पृथग्विधः ।। ६३ ।।

(वि.) संगूढ इति––संगुह्यते[1] संकल्यत इति संगूढः । 'गुहू संवरणे' । संकल्यत[2] इति संकलितः । संकलितस्य भारतमञ्जर्यादेर्नामनी ।। [3]अवगीयते पापिष्ठोऽसाविति शब्द्यतेऽवगीतः । 'गैं शब्दे' । ख्यातं गर्हणं यस्येति ख्यातगर्हणः । प्रख्यातनिन्दस्य नामनी ।। विचित्रा विधा प्रकारोऽस्येति विविधः । बह्व्यो विधाः प्रकारा अस्येति बहुविधः । पृथग्विधश्च[4] । नानाविधानि रूपाण्यस्येति नानारूपः । बहुरूपस्य मयूरादेर्नामानि ।। ६३ ।।

[1] संगूह्यते J2, K6, Pt2. [2] Pt2 adds संक्षेप्य गण्यते स्म. [3] अव निकृष्टं गीयते स्म Pt2. [4] J2 adds पृथग्विधा यस्येति.

(विव.) संगूढः स्यात् संकलितः । [1]बहुविधोऽप्यर्थः क्वचिदेकत्र संक्षिप्तः संगूढादिशब्दद्वयेनोच्यते । यथा––श्रीमहाभारतार्थो बालभारताख्ये काव्ये[2] । यथा वा––श्रीरामायणार्थः संक्षेपरामायणे इत्यादि । गणितज्ञैरप्युक्तम्––

'यद्वस्तु भिन्नकृत्येषु विभज्य विनियोजितम् ।
अङ्गैरेकीकृताङ्गं चेत् संकलीकृतमुच्यते ।।'

इति । [3]संक्षेपेण गुह्यते संव्रियत इति संगूढः । 'गुहू संवरणे' । क्तः । गुप्तेऽपि गूढ उक्तः ।। संकल्यते संक्षिप्यत इति संकलितः । कलतिः [4]सर्वार्थो धातुः ।। अवगीतः ख्यातगर्हणे । लोकप्रसिद्धमहापातकादिदोषदूषितस्य[5] नामनी । अवगीयते [6]सगर्हं शब्द्यत इति अवगीतः । 'गै शब्दे' । क्तः[7] । अवेत्युपसर्गो गर्हार्थः ।। विविधः––पृथग्विधः । विचित्ररूपस्य मयूरादेः कालभेदेन वा नानाप्रकारस्य मेघमण्डलादेर्नामानि । विचित्रा विधा प्रकारो यस्येति विविधः । अन्ये व्यक्तयोगाः ।। ६३ ।।

[1] भूमाप्यर्थः Gm3, Tv. [2] Tj1, Tj2 add संक्षिप्तः. [3] संगूह्यते B5, B6. [4] सकलार्थः B5, Gm1. [5] निन्दाग्रस्तस्य Gm3, Tv. [6] सगर्वं Tv. [7] 'घुमास्था—' (६. ४. ६६) इतीत्वम्.

(पा.) संगूढः स्यात् संकलितः । भूगतत्वेन कृतस्य नामनी ।। अवगीतः ख्यातगर्हणः । प्रकटनिन्दायुक्तो[1] ऽवगीतः स्यात् । पुनः पुनः प्रेक्षितमपि । 'अव-

गीतं मुहुर्दृष्टम्' इति हलायुधः (अ. मा. ४. ७०) ।। विविधः—पृथग्विधः । नानाविधनामानि ।। ९३ ।।

1 °निन्दायुक्तस्य नामनी C_1.

अवरीणो धिक्कृतश्चाप्यपध्वस्तोऽवचूर्णितः ।
अनायासकृतं फाण्टं स्वनितं ध्वनितं समे ।। ९४ ।।

(वि.) अवरीण इति—अवरीयते भृशं पीडचत इति अवरीणः । 'री गतिरेषणयोः'[1] । धिक्क्रियते तिरस्क्रियत इति धिक्कृतः । अपध्वस्यते पीडचत इति अपध्वस्तः । 'ध्वंसु भ्रंसु अवस्रंसने'[2] । अवचूर्ण्यते संपिष्यत[3] इति अवचूर्णितः । 'चूर्ण संपेषणे' । परैरत्यन्तपीडितस्य नामानि ।। फणति [4]द्रवत्वाद् गच्छतीति फाण्टम् । 'फण गतौ' । आयासं विनैव कृतस्य [5]सोमकषायादिविशेषनाम ।। स्वन्यत इति स्वनितम् । 'स्वन शब्दे'[6] । ध्वन्यत इति ध्वनितम् । 'ध्वन शब्दे' । कृतनिनदस्य भेर्यादेर्नामिनी ।। ९४ ।।

1 'रीङ स्रवणे' J_2, K_6.　2 अधःपतने K_4; Pt_2 omits भ्रंसु.　3 पीडचते Pt_2.
4 द्रवरूपत्वान्नैकत्रावतिष्ठते Pt_2.　5 सोष्णस्य कषाय° K_2.　6 K_2, K_3, K_5 add अव्यक्ते.

(विव.) अवरीणो—अवचूर्णितः । 'परैरत्यन्तं पीडितस्य चत्वार्येतानि नामानि' इति सुबोधिनीकारः । अवगर्हितं यथा भवति तथा रीयते भृशं पीडचत इति अवरीणः । 'री गतिरेषणयोः' । रेषणं हिंसेति धातुवृत्तिः[1] । क्तः । 'ल्वादिभ्यः' (८. २. ४४) इति निष्ठानत्वम् । अत्र केचित्—अधरीण इति द्वितीयाक्षरं दन्त्यवर्गचतुर्थं पठन्ति । तत्राधरशब्दात् खप्रत्ययोपपत्तिश्चिन्तनीया ।। धिक् इत्यव्ययं [2]भर्त्सनशब्दस्य विषयः । [3]कृतो धिक्कृतः ।। ध्वसिः धातुपारायणे गत्यर्थः पठितः । प्रयोगे तु हिंसायां वर्तते । ततः कर्मणि क्तप्रत्यये ऽपध्वस्तः ।। दुःखजनकत्वसादृश्यात् चूर्णशब्देन परकृतस्तिरस्कारो विवक्षितः । अवकीर्णं चूर्णमस्मिन्निति, अवचूर्णः कृतोऽवचूर्णितः । टीकासर्वस्वकारस्तु अपध्वस्तादिद्वयं क्षिप्तचूर्णे वर्तत इति व्याचष्ट[4] (पृ. ४२) । अवचूर्णयतीति णिचि (३. १. २५) क्तप्रत्यये अवचूर्णितः ।। अनायासकृतं फाण्टम् । आयासः प्रयत्नाधिक्यम् । तदन्तरेणैव स्वल्पव्यापारमात्रात्

कषायरूपं यद्भवति तत् फाण्टमित्युच्यते । फणति गच्छति द्रवरूपत्वाद्[5] नैकत्रावतिष्ठत इति फाण्टम् । 'फण गतौ' । क्तप्रत्यये सति 'क्षुब्धस्वान्त... फाण्टबाढानि...' इत्यादिना (७. २. १८) निपातनाद् इडागमाभावः । ष्टुत्वं च । अत्र सूत्रे काशिका—'यदपक्वम्[6] अपिष्टं कषायम् उदकसंपर्कमात्राद् विभक्तरसम् ईषदुष्णं भवति तत्फाण्टमुच्यते । अल्पप्रयाससाध्यत्वाद् अनायासेन लक्ष्यते' इति (पृ. ३०३) । अत्र टीकासर्वस्वकारोऽपि—

[7] 'द्रव्यादचूर्णितात् तोये प्रतप्ते विनिवेशिते ।
रसो निर्याति यः सद्यः स फाण्ट इति संस्तुतः ॥'

इति । [8]सुभूतिरप्याह—'यदुदकनिमज्जनमात्रेण तस्मिन्नेवाहनि निर्यासविनिर्गमात् संपन्नमौषधं कषायद्रव्यात्मकं तदनायासकृतं फाण्टमिति' ॥ स्वनितध्वनिते समे । ताड्यमानस्य भेर्यादेर्नामनी । व्यक्तयोगे च ॥ ९४ ॥

[1] रेषणं वृकशब्दः इति मा. धा. (पृ. ५२६). [2] भर्त्सने धिगिति B_5, Gm_1, Tj_1. [3] कृतः Gm_3. [4] मुद्रितग्रन्थे तु 'दृप्तचूर्णे(?) लेखादौ' इति दृश्यते. [5] °रूपत्वेन Gm_3. [6] 'यदशृतं ...अल्पप्रयत्नं' इति मुद्रितग्रन्थे. [7] 'द्रव्यादायोत्थितात्... चैव संस्थिते... संस्कृतः' इति मु. ग्रन्थे. [8] सुभूतिचन्द्रोऽपि Tj_1, Tj_2.

(पा.) अवरीणो धिक्कृतः । निन्दितनामनी[1] ॥ अवध्वस्तोऽवचूर्णितः । चूर्णीकृतनामनी । अनुक्तम्—'अवज्ञातोऽपहस्तितः' । करविसृष्टनामनी ॥ अनायासकृतं फाण्टम् । आयासेन विना रचितं फाण्टं स्यात्[2] । फाण्टमौषधम् ॥ स्वनितं ध्वनितं समे । शब्दितनामनी ॥ ९४ ॥

[1] धिक्कृत° C_1. [2] अनायासकृतनाम C_1.

बद्धे संदानितं मूतमुद्दितं संदितं सितम् ।
निष्पक्वं क्वथितं पाके क्षीराज्यहविषां शृतम् ॥ ९५ ॥

(वि.) बद्ध इति—बध्यते स्म बद्धम् । 'बध संयमने' । संदान्यते बध्यत इति संदानितम्[1] । 'दान खण्डने' । मूयत इति मूतम्[2] । 'मूञ् बन्धने' । उद्दीयत[3] इति उद्दितम् । संदीयत इति संदितम् । 'दो ऽवखण्डने' । सीयत इति सितम् । 'षिञ् बन्धने' । रज्ज्वादिना बद्धस्य [4]पश्वादेर्नामानि ॥ निःशेषेण[5] पक्वं[6] निष्पक्वम् ।

क्वथ्यते [7]निःशेषेण पच्यते क्वथितम् । 'क्वथे निष्पाके' । अष्टभागावशिष्टस्य [8]कषायादेर्नामनी ॥ श्रायते पच्यत इति शृतम् । 'श्रा पाके' । क्षीराज्यहविषां पाकस्य नाम ॥ ९५ ॥

[1] संदानं बन्धनमस्य संजातम् Pt2. [2] Pt2 adds मूर्णमिति वा पाठः. [3] J2, Pt2 add बध्यते. [4] अश्वादेः K4. [5] नितरां Pt2. [6] पच्यते K3, Pt2. [7] निष्पच्यते Pt2. [8] कषायित° K6.

(विव.) बद्धे—सितम् । रज्ज्वादिना निगलितावयवस्य बलीवर्दादेर्नामानि । 'बध संयमने'[1] इत्यतः कर्मणि क्तप्रत्यये बद्धम् । [2]'दाम संदानम्' इति पूर्वमुक्तम्[3] (१, पृ. ५९६) । तत् संजातमस्येति संदानितम् । तारकादिः (५.२.३६) । 'मूङ बन्धने' इति धातोर्मूतम् । टीकासर्वस्वकार आह (पृ. ४३)—'मुर्वी बन्धने' इत्यतः कर्मणि क्तप्रत्यये[4] [5]वकारलोपे "र्वोरुपधाया दीर्घ इकः" (८.२.७६) इत्युपधादीर्घे च मूर्णम्' इति ॥ [6]उत्पूर्वः संपूर्वश्च द्यतिधातुः बन्धने वर्तते । अत एव प्रागुक्तम् (१, पृ. ४९९) 'समे तूद्दानबन्धने' इति । ततः क्तप्रत्यये सति उद्दितम् । संदितं च । 'द्यतिस्यति...' इत्यादिना (७.४.४०) इत्वम् ॥ 'षिञ् बन्धने' इत्यतः क्तप्रत्यये धात्वादिसत्वे (६.१.६४) च सितम् ॥ निष्पक्वं क्वथितम् । अग्निसंयोगेनाष्टमभागाद्यवशेषितस्य त्रिफलाकषायादेर्नामनी । निःशेषेण पच्यते स्म निष्पक्वम्[7] ॥ 'क्वथे निष्पाके' इत्यतः कर्मणि क्तप्रत्यये क्वथितम् ॥ पाके—शृतम् । पक्वेषु [8]पुरोडाशाज्यक्षीरेषु प्रत्येकं शृतशब्दो वर्तत इत्यर्थः । 'शृतं मयि श्रयताम्' (तै. ब्रा. ३.७.६.१२) इति क्षीरे प्रयोगः। 'आग्नीध्रो हवींषि सुशृतानि करोति' इति हविर्मात्रे इत्यादि । हविर्ग्रहणेनैव क्षीरस्यापि ग्रहणे 'शृतं पाके' (६.१.२७) इति सूत्रे [9]'क्षीरहविषोरिति वक्तव्यम्' इति वार्त्तिकच्छायया पृथग्ग्रहणम् । 'घृतमाज्यं हविः' (१, पृ. ५८५) इत्यादौ हविःशब्दस्य घृतमात्रे रूढत्वात् तस्यैव ग्रहणं मा भूदित्याज्यस्याप्युपादानं कृतम् । क्वचित्तु 'पाके स्यात् क्षीरहविषोः शृतम्' इत्येव पाठः । श्रायत इति शृतम् । 'श्रा पाके' इति क्षीरहविषोरर्थयोः [10]शृभावो निपातितः ॥ ९५ ॥

[1] 'बन्ध बन्धने' Tj1, Tj2. [2] Gm3, Tv add वैश्यवर्गे. [3] प्रागुक्तम् Gm3. [4] वलोपदीर्घनत्वानि इति मु. ग्रन्थे. [5] 'राल्लोपः' (६.४.२१). [6] 'दो अवखण्डने' इति धातुः Gm3, Tv. [7] 'पचो वः' (८.२.५२). [8] अत्र हविःशब्देन चरुपुरोडा-

शादिकं विवक्षितम् Gm3, Tv. [9] 'पाकग्रहणं निपातनविषयप्रदर्शनार्थं तेन क्षीरहविषोरेव' इति काशिकायाम् (पृ. १२०). [10] 'श्रृतं पाके' इति सूत्रेण.

(पा.) बद्धे—सितम् । बद्धनामानि ।। निष्पक्वं[1] क्वथितम् । नितरामग्निना [2]संतप्तनामनी ।। पाके—श्रृतम् । क्षीरादीनां पाके श्रृतं स्यात् । श्रृतं क्षीरमाज्यं हविर्वा । अन्यत्र श्राणा यवागूः ।। ९५ ।।

[1] निष्पक्वे B3. [2] क्वथितस्य C1.

निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गतानिले ।
पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते ।। ९६ ।।

(वि.) निर्वाण इति—निर्वाति शाम्यति स्मेति निर्वाणः । 'वा गतिगन्धनयोः' । शान्तमुनिवह्न्योर्मोक्षादेर्नाम ।। निर्गतो वातोऽस्येति निर्वातः[1] । निवृत्तसंचारस्य वायोर्नाम ।। पच्यते [2]कालक्रमेणेति पक्वम् । 'डुपचष् पाके' । परिणमति अवस्थान्तरमापद्यत इति परिणतम् । 'णमु प्रह्वत्वे शब्दे च' । कालेन परिणामं[3] गतस्य [4]बुद्ध्यादेर्नामनी ।। गूयते गुदेनोत्सृज्यते गूनम् । 'गु पुरीषोत्सर्गे' । हद्यते गुदेनेति हन्नम् । 'हद पुरीषोत्सर्गे' । गुदान्निःसृतस्य[5] पुरीषादेर्नामनी ।। मिह्यते [6]सिच्यतेऽनेनेति मीढम् । 'मिह सेचने' । मूत्र्यते प्रस्रूयत इति मूत्रितम्[7] । 'मूत्र प्रस्रवणे' । मेहनेनोत्सृष्टस्य मूत्रस्य नामनी ।। ९६ ।।

[1] निर्वाति स्म Pt2. [2] J2 omits काल. [3] परिपाकं K3, K5. [4] °पर्णमूलादेः J2, K5; Pt2 adds पक्वा बुद्धिः, पक्वं फलम्. [5] निर्गतस्य K5. [6] परिषिच्यते K5. [7] मूत्रम् K3, K4, K5.

(विव.) निर्वाणो मुनिवह्न्यादौ । निर्वाति स्म निर्वाणः । 'वा गतिगन्धनयोः'। क्तः । 'निर्वाणोऽवाते' (८. २. ५०) इति वातव्यतिरिक्तार्थे निष्ठान्तत्वेन निपातितः । यथा—निर्वाणो मुनिः, मुक्त इत्यर्थः । निर्वाणो गजः, मग्न इत्यर्थः । निर्वाणो मोक्ष इत्यादि ।। निर्वातस्तु गतेऽनिले । [1]वातरहित इत्यर्थः । निर्वाति स्म निर्वातः । निर्वातो देशः । निर्वाता शाला । निर्वातं [2]मन्दिरमित्यादि ।। पक्वं परिणते । कालवशेन परिपाकं गते[3] अवस्थान्तरापन्नत्वेन पक्वसादृश्यात् पक्वम् । यथा—पक्वा बुद्धिः, पक्वं कार्यम् इत्यादि । पक्वशब्दोऽत्रैव वर्गे व्युत्पादितः[4]

(श्लो. ६१) ।। परिणमति स्म परिणतम् । पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः । 'उपसर्गादसमासेऽपि णोपदेशस्य' (८. ४. १४) इति णत्वम् ।। गूनं हन्ने । गुदमुखाद् बहिरुत्सृष्टस्य पुरीषादेर्नामनी । यथा—गूनं पुरीषम् । गूना यवागूः इत्यादिमनुष्यवर्गोक्तानि उत्सृष्टानुत्सृष्टसाधारणपुरीषस्येति न पौनरुक्त्यम् । [5]गूयते स्मेति गूनम् । 'गु पुरीषोत्सर्गे' । 'दुग्वोर्दीर्घश्चेति वक्तव्यम्' (वा. ८. २. ४४) इति निष्ठानत्वं दीर्घश्च । हद्यते पायुदेशादिति हन्नम् । 'हद पुरीषोत्सर्गे' । 'रदाभ्याम् . . .' (८. २. ४२) इति निष्ठानत्वम्[6] । केचित्तु शब्दद्वयमपि कर्तरि निष्ठायां कृतपुरीषोत्सर्गे प्राणिनि वर्तत इत्याहुः[7] ।। मीढं तु मूत्रिते । बहिरुत्सृष्टस्य मूत्रस्य नामनी । मिह्यते सिच्यते स्म मीढम् । 'मिह सेचने' । क्तप्रत्यये 'हो ढः' (८. २. ३१) इति ढत्वे 'झषस्तथोर्धोऽधः' (८. २. ४०) इति निष्ठातकारस्य धत्वे, ष्टुत्वे (८. ४. ४१) ढलोपे[8] (८. ३. १३) दीर्घश्च (६. ३. १११) ।। मूत्र्यते प्रस्रूयत इति मूत्रितम् । 'मूत्र प्रस्रवणे' । शब्दद्वयमपि पूर्ववत् कर्तरि निष्ठायाम् उत्सृष्टमूत्रे प्राणिनि वर्तत इति केचित् । यथा मूत्रितो बाल इत्यादि ।। ६६ ।।

[1] श्रान्तवायौ निवातः, वायुरहितो भवतीति निर्वातः Gm3, Tv.　[2] गृहम् B5, B6.　[3] बुद्धयादौ पक्वशब्दः Tj1, Tj2.　[4] विनाशोन्मुखे पक्वशब्दो निरुक्तः Tv.　[5] Gm3 adds उत्सृज्यते.　[6] Tv adds गूनं पुरीषं, गूना विष्ठा; हन्नं पुरीषं, हन्ना विष्ठा.　[7] इति पूर्ववत् पौनरुक्त्यपरिहारः Gm3, Tv.　[8] 'ढो ढे लोपः' इति लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घः Tv.

(पा.) निर्वाणो मुनिवह्न्यादौ । मुनिवह्निप्रभृतौ निर्वाणः स्यात् । निर्वाणो मुनिः । मुक्त इत्यर्थः । निर्वाणो वह्निः, दीपो वा । विनश्वरतया[1] स्थित इत्यर्थः । निर्वाणो हस्ती । जले निमग्न इत्यर्थः । 'निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने' इति विश्वप्रकाशिका[2] (पृ. ५२, श्लो. ५६) ।। निर्वातस्तु गतेऽनिले । वायावपि निर्वातः स्यात् । निर्वातो वायुः । स्थिर इत्यर्थः ।। पक्वं परिणते । परिपक्वनामनी ।। गूनं हन्ने । कृतपुरीषस्य नामनी ।। मीढं तु मूत्रिते । कृतमूत्रस्य नाम ।। ६६ ।।

[1] विनष्टतया B3.　[2] 'निर्वाणमस्तंगमने निर्वृतौ गजमज्जने' इति मु. ग्रन्थे.

पुष्टे तु पुषितं सोढे क्षान्तमुद्वान्तमुद्गते ।
दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः ।। ६७ ।।

(वि.) पुष्ट इति––पुष्यत इति पुष्टम् । पुषितं च । 'पुष पुष्टौ' । पुष्टावयवस्य नामनी ।। सह्यते मृष्यते स्मेति सोढम् । 'षह मर्षणे' । क्षम्यत इति क्षान्तम् । 'क्षमूष् सहने' । [1]सहनादेर्नामनी ।। [2]उद्वम्यते उद्वान्तम् । 'टुवमु उद्गिरणे' । [3]उद्गम्यते स्म उद्गतम् । त्वगादिकं भित्त्वोद्गतस्य [4]लोहितादेर्नामनी ।। दम्यते शिक्ष्यत इति दान्तः । दमितश्च । 'दमु [5]उपशमने' । आचार्यादिशिक्षया शिक्षितस्य नामनी[6] ।। शम्यते स्मेति शान्तः । शमितश्च । 'शमु उपशमने' । शान्तस्य मुन्यादेर्नामनी ।। [7]प्रार्थ्यत इति प्रार्थितः । 'अर्थ उपयाच्ञायाम्' । अर्द्यते स्म अर्दितः । 'अर्द गतौ याचने च' । याचितस्य पदार्थस्य नामनी ।। ६७ ।।

[1] मर्षितस्य शपनादेः K5; क्षमादेः K4; K2 omits. [2] उद्वमति स्म Pt2. [3] उद्गच्छति स्म Pt2; K6 omits. [4] रोहित° K2, K6. [5] उपशमे K4. [6] 'पूर्वं तपःक्लेशसह उक्तम् । इदानीं सामान्येन वहनादिक्लेशसहे दान्तद्वयम्' इति टी. स. (पृ. ४४). [7] अर्थ्यत इति K6.

(विव.) पुष्टे तु पुषितम् । मृष्टाहारादिभिः उपचितावयस्य नामनी । [1]पुष्यते स्म पुष्टम् । 'पुष पुष्टौ' । दिवादिः । अनिट्कारिकासु पुष्यति शुष्यतीति दैवादिकस्य ग्रहणात् इडागमो नास्ति । भौवादिकात्तु कर्मकर्तरि क्तप्रत्यये भवत्येव । स्वयमेव पुष्यते स्म पुषितम् ।। सोढे क्षान्तम् । [2]अनादृतस्य वाक्पारुष्यादेरपराधस्य नामनी । यथा––सोढाः परुषालापाः, सोढः कशाघातः इति । सह्यते स्म सोढम् । 'षह मर्षणे' । क्तप्रत्ययः । ढत्वधत्वष्टुत्वढलोपेषु 'सहिवहोरोदवर्णस्य' (६. ३. ११२) [3]इत्योकारादेशः ।। क्षम्यते स्म क्षान्तम् । 'क्षमूष् सहने' । कर्मणि क्तप्रत्यये सति 'अनुनासिकस्य क्विझलोः क्ङिति' (६. ४. १५) इत्युपधादीर्घः, अनुनासिकस्य परसवर्णादेशश्च (८. ४. ५८) ।। उद्वान्तमुद्गते । वल्मीककुहरादेरुद्गच्छतो[4] दन्दशूकादेर्नामनी । उद्वम्यते बहिरुद्गीर्यते स्मेति उद्वान्तम् । क्तप्रत्ययः । उपधादीर्घः (६. ४. १५), परसवर्णादेशश्च (८. ४. ५८) ।। 'ओहाङ गतौ' इति धातोः उत्पूर्वात् 'ओदितश्च' (८. २. ४४) इति निष्ठानत्वे सति उद्धानमिति सुभूतिचन्द्रादयः । [5]गमेरुत्पूर्वात् कर्तरि क्तप्रत्यये (३. ४. ७२) उद्गतः ।। दान्तस्तु दमिते । कर्मकरणभारवहनादिक्लेशसहत्वेन कृतशिक्षस्य [6]भृत्यबली-

वर्दादेर्नामनी । [7]ब्रह्मवर्गोक्तस्यापि दान्तस्य (१, पृ. ४७४) विशेष्यनिघ्नप्रस्तावे वैकल्पिकरूपान्तरप्रदर्शनार्थमभिधानमित्यपौनरुक्त्यम् । दम्यते स्वामिना नियम्यत इति दमितः । 'दमु उपशमे'। हेतुमण्णिजन्तात् कर्मणि क्तप्रत्यये इडागमे 'निष्ठायां सेटि' (६.४.५२) इति णिलोपः । 'वा दान्तशान्त . . .' इत्यादिना (७.२.२७) विकल्पेन निपातनाद् इडागमाभावे दान्तः ।। शान्तः शमिते । [8]प्रतिक्रिया-निर्वर्तितस्य[9] रोगादेर्नामनी । 'शमु उपशमे' इत्यतो हेतुमण्णिचि पूर्ववदेव शमितः, शान्त इति रूपद्वयसिद्धिः ।। प्रार्थितेऽर्दितः । याचितस्य [10]धनादेर्नामनी । 'अर्थ उपयाच्ञायाम्' इत्यस्मात् चुरादिण्यन्तात् कर्मणि क्तप्रत्यये प्रार्थितः ।। 'अर्द गतौ याचने च' इत्यतः कर्मणि क्तप्रत्यये इडागमे च अर्दितः ।। ९७ ।।

[1] पुष्यति B5, Tj1. [2] यथाकथंचिदापादितगुर्वादिचित्तविक्षेपशिष्यादिकृतापराधस्य नामनी Tv. [3] Gm3, Tv add ढ्लोपे. [4] अदृश्यप्रदेशादूर्ध्वमुद्गच्छतां Tj1, Tv. [5] 'गम्लृ गतौ' इत्यस्मात् B6, Tj2. [6] Tv adds शिष्य°. [7] ब्रह्मवर्गे तपःक्लेशसहो दान्त उक्तः । इदानीं तु सामान्येन Tv. [8] चिकित्सादिकरणेन Gm1, Gm3. [9] निवृत्तस्य Tv. [10] पदार्थस्य Gm3, Tv.

(पा.) पुष्टे तु पुषितम् । पुष्टनामनी ।। सोढे क्षान्तम् । [1]सोढनामनी ।। उद्वान्तमुद्गते । उद्गतनामनी । दान्तस्तु दमिते । दमितनामनी । दान्तोऽश्वः[2] ।। शान्तः शमिते । शमितनामनी । शान्तो रोगः ।। प्रार्थितेऽर्दितः[3] । याचित-नामनी ।। ९७ ।।

[1] क्षान्तस्य C1. [2] C1 adds बलीवर्द इत्यादि. [3] अर्थितः B3.

ज्ञप्तस्तु ज्ञापिते छन्नश्छादिते पूजितेऽञ्चितः ।
पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः ।। ९८ ।।

(वि.) ज्ञप्त इति—ज्ञाप्यत इति ज्ञप्तः । ज्ञापितश्च । 'ज्ञा अवबोधने' । उपाध्यायादिना[1] ज्ञापितस्य पदार्थस्य नामनी ।। छद्यत इति छन्नः । 'छद अपवारणे' । छादितश्च । [2]छादितस्य [3]पङ्कजादेर्नामनी ।। पूज्यत इति पूजितः । 'पूज पूजायाम्'। अञ्च्यते पूज्यत इति अञ्चितः । 'अञ्चु गतिपूजनयोः[4] । पूजितस्य देवादेर्नामनी । पूर्यत इति पूर्णः । पूरितश्च । 'पूरी आप्यायने' । जलादिना पूरितस्य कुम्भादेर्नामनी ।। क्लिश्यते[5] बाध्यत इति क्लिष्टः । क्लिशितश्च[6] ।

'क्लिशू विबाधने'। दारिद्र्यादिना [7]पीडितस्य नामनी ।। अवस्यति पर्यवस्यति स्मेति अवसितः। सितश्च। 'षोऽन्तकर्मणि'। [8]समाप्तस्य कार्यादेर्नामनी ।।९८।।

[1] उपाध्यायेन J2, K6. [2] आच्छादितस्य K5. [3] पञ्जरादेः K5. [4] पूजायाम् K3, K6. [5] दुःखादिना K5. [6] क्लेशितः K4. [7] बाधितस्य J2. [8] सक्तस्य J2, K4, K6.

(विव.) ज्ञप्तस्तु ज्ञापिते। गुरूपदेशादिना प्रकाशितस्यार्थस्य नामनी। यथा--[1]ज्ञप्तोऽयमर्थः। ज्ञापितोऽयमर्थः। 'ज्ञा अवबोधने' इत्यस्माद् हेतुमण्ण्यन्ताद् 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः' (७. २. २७) इति सर्वार्थसाधारण्येन निपातनादिडागमाभावे ज्ञप्तः। इडागमपक्षे ज्ञापितः। केचित्तु--ज्ञपित इति ह्रस्वादिं पठित्वा ज्ञपिते संज्ञपिते छागादौ वर्तत इति व्याचक्षते। तत्र 'ज्ञा मारण-तोषणनिशामनेषु' इति धातुसूत्रेण मित्सञ्ज्ञायां सत्यां 'मितां ह्रस्वः' (६. ४. ९२) इति ह्रस्वत्वे च ज्ञपितमिति भवति। ज्ञप्तशब्दस्य तु सर्वार्थसाधारण्येन निपातनाद् मारिताद्यर्थत्रयेऽपि साधुत्वम्। यथा--'संज्ञप्तहोमं[2] जुहोति' (आप. श्रौ. ७. १७. ३) इत्यादि ।। छन्नश्छादिते। आवरणकद्रव्येणाप्रकाशितरूपस्य नामनी। यथा--मेघच्छन्नो दिनकरः, [3]सिचयच्छन्नं कुचयुगम् इत्यादि। छाद्यते स्म छन्नः। छादितश्च। 'छद अपवारणे'। अत्रापि पूर्ववद् विकल्पेन निपातनात् शब्दद्वय-सिद्धिः ।। पूजितेऽञ्चितः। 'पूज पूजायाम्' इत्यतः कर्मणि क्तप्रत्यये पूजितः। 'अञ्चु गतिपूजनयोः'। 'अञ्चेः पूजायाम्' (७. २. ५३) इति नियमाद् 'यस्य विभाषा' (७. २. १५) इतीडागमप्रतिषेधो[4] नास्ति। 'नाञ्चेः पूजायाम्' (६. ४. ३०) इत्युपधानकारलोपाभावे सति अञ्चितः। 'स्यादर्हिते नमस्यित . . .' (श्लो. १०१) इत्यादिना वक्ष्यमाणाद् गुर्वादिरूपात् पूजिताद् अन्यादृश एवायं पूजितः केनचिद्विशेषेण प्राप्तोत्कर्षलक्षणः। [5]तत्राञ्चितशब्दः। यथा--'हासाञ्चिता वचोभङ्गी वलनाञ्चितमीक्षणम्' इति ।। पूर्णस्तु पूरिते। उदकादिना[6] पूरितस्य कटकादेर्नामनी। [7]पूर्यते स्म पूर्णः। पूर्ववन्निपातनात् (७. २. २७) साधुः। वैकल्पिक इडागमे सति पूरितः ।। क्लिष्टः क्लिशिते। पुत्रशोकादिना पीडितस्य नामनी। क्लिश्यते स्म क्लिष्टः। [8]'क्लिशू विबाधने'। क्तः। क्लिशितश्च, 'क्लिशः क्त्वानिष्ठयोः' (७. २. ५०) इति विकल्पेनेडागमः ।। अवसिते सितः। समाप्तस्य[9] नामनी। अवस्यति अन्तं गच्छति स्म अवसितः। सितश्च।

'षोऽन्तकर्मणि'। क्तप्रत्ययः। 'द्यतिस्यतिमास्थामित्ति किति' (७. ४. ४०) इति धातोराकारस्येत्वम् ।। ९८ ।।

[1] विज्ञप्तः Tv.　[2] °होमान् B5, B6.　[3] वस्त्रच्छन्नं Gm3, Tv.　[4] °अभावः Tj1, Tj2.　[5] तथाञ्चित° Gm1, Tv.　[6] उदकादिभिः Tv.　[7] Gm3, Tv add 'पूरी आप्यायने'.　[8] क्लिश B5, B6.　[9] Gm3, Tv add शास्त्रव्याख्यानादेः.

(पा.) ज्ञप्तस्तु ज्ञापिते। घटादिपाठाद् बोधितनामनी। चुरादिपाठाद् बुद्धनामनी ।। छन्नश्छादिते। [1]आच्छादितनामनी ।। पूजितेऽञ्चितः। पूजार्थेऽञ्चितः स्यात्। सेट्। अन्यत्रानिट्। उदक्तमुदकं कूपात् ।। पूर्णस्तु पूरिते। पूरितनामनी ।। क्लिष्टः क्लिशिते[2]। क्लेशितनामनी। [3]'उढिकिंपपङ्कवांडु'। अवसिते सितः। निश्चितनामनी ।। ९८ ।।

[1] छादित° A1, C1.　[2] क्लेशिते B3, C1.　[3] B3 omits.

प्रुष्टप्लुष्टोषिता दग्धे तष्टत्वष्टौ तनूकृते।
वेधितच्छिद्रितौ विद्धे विन्नवित्तौ विचारिते ।। ९९ ।।

(वि.) प्रुष्टेति—[1]प्रुष्यत इति प्रुष्टः। 'प्रुष दाहे'[2]। प्लुष्यते प्लुष्टः। 'प्लुष दाहे'। उष्यत इत्युषितः। 'उष दाहे'। दह्यत इति दग्धः। 'दह भस्मीकरणे'। दग्धस्य तृणादेर्नामानि ।। तक्ष्यत इति तष्टः। 'तक्षू तनूकरणे'। त्वक्ष्यत इति त्वष्टः। 'त्वक्षू तनूकरणे'। [3]वर्धक्यादिना तनूकृतस्य काष्ठादेर्नामनी ।। वेध्यते स्मेति वेधितः[4]। 'विध विधाने'। छिद्रं संजातमस्येति छिद्रितः। विध्यत इति विद्धः। 'व्यध ताडने'। सूच्यादिना विद्धस्य [5]कर्णमूलादेर्नामानि ।। विद्यते विचार्यते विन्नः। वित्तश्च। 'विद विचारणे'। विचार्यत इति विचारितः। 'चर गतिभक्षणयोः'[6]। विचारितस्य कार्यादेर्नामानि ।। ९९ ।।

[1] प्रोष्यते K5.　[2] प्रुष प्लुष दाहे K5, Pt2.　[3] वास्यादिना K5.　[4] वेधोऽस्य संजातः Pt2.　[5] K5 omits मूल.　[6] 'विचिर् पृथग्भावे' K3, K4, K6.

(विव.) प्रुष्ट—दग्धे। भस्माङ्गारावशेषितस्य काष्ठादेर्नामानि। 'प्रुष प्लुष दाहे'। 'उष दाहे'। 'दह भस्मीकरणे'। एतेभ्यः कर्मणि क्तप्रत्यये [1]प्रुष्टः, प्लुष्टः, उषितः, दग्धश्चेति चत्वारः शब्दाः क्रमेण निर्वक्तव्याः ।। तष्टत्वष्टौ तनूकृते।

[2]वाश्यादिव्यापारकृतेन बहिरवयवापसारणेन स्वल्पपरिमाणीकृतस्य स्तम्भादेर्नामानि। 'तक्षू त्वक्षू तनूकरणे'। आभ्यां धातुभ्यां कर्मणि क्तप्रत्यये 'स्कोः संयोगाद्योरन्ते च' (८. २. २९) इति संयोगादिभूतस्य ककारस्य लोपे निष्ठातकारस्य ष्टुत्वे तष्टं त्वष्टं च ।। वेधितच्छिद्रितौ विद्धे। सूच्यादिना सरन्ध्रीकृतस्य नामानि। वेधः सूच्यादिकृतं रन्ध्रं संजातोऽस्येति वेधितः। 'विध विधाने' इत्यस्माद्वा चुरादिण्यन्तात् कर्मणि निष्ठा ।। छिद्रं रन्ध्रं संजातमस्येति छिद्रितः ।। विद्धम् इहैव वर्गे[3] व्युत्पादितम् (श्लो. ८७) ।। विन्नवित्तौ विचारिते। उभयत्र गुणदोषतारतम्यचिन्तया ग्राह्यत्वेन निर्धारितार्थस्य नामानि। 'विद विचारणे' इति धातोः कर्मणि निष्ठायां 'नुदविद...' इत्यादिना (८. २. ५६) विकल्पेन निष्ठानत्वे विन्नः, वित्तश्च ।। ९९ ।।

[1] 'यस्य विभाषा' (७. २. १५) इति नेट्. [2] तक्षणादिना Gm3, Tv. [3] Tj1, Tj2 add प्राक्.

(पा.) प्रुष्ट—दग्धे। दग्धनामानि ।। तष्ट—तनूकृते। [1]वास्यादिनाल्पीकृतनामानि। [2]'चक्कपड्डुदि'। वेधित—विद्धे। विद्धनामानि। [2]'कोरयपड्डुदि' ।। विन्न—विचारिते। विचारितनामनी ।। ९९ ।।

[1] वाश्यादिना स्वल्पीकृत° B3, C1. [2] B3 omits.

निष्प्रभे विगतारोकौ विलीने विद्रुतद्रुतौ ।
सिद्धे निर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ ।। १०० ।।

(वि.) निष्प्रभ इति—निर्गता प्रभा अस्मादिति [1]निष्प्रभः। विशेषेण गता प्रभा अस्मादिति विगतः[2]। न विद्यते रोको दीप्तिर्यस्येति अरोकः[3]। दिवा निष्प्रभस्य चन्द्रमण्डलादेर्नामानि ।। विलीयतेऽग्नाविति विलीनः। 'ली द्रवीकरणे'[4]। विद्रवत्यग्निसंयोगादिति विद्रुतः। द्रुतश्च। 'द्रु गतौ'। अग्निसंयोगाद् विलीनस्य घृतादेर्नामानि ।। सिद्ध्यतीति सिद्धः। 'षिधु संराद्धौ'। निर्वर्तत इति निर्वृत्तः[5]। 'वृतु वर्तने'। निष्पद्यत इति निष्पन्नः। 'पद गतौ'। पाकादिना सिद्धस्यौदनादेर्नामानि। दार्यत[6] इति दारितः। 'दृ विदारणे'। भिद्यत इति भिन्नः। भेदितश्च। 'भिदिर् विदारणे'। प्रहारादिना भिन्नस्य घटादेर्नामानि ।। १०० ।।

[1] निर्गतः प्रभायाः Pt2. [2] विशेषेण रतः उपरतः विरतः Pt2. [3] विशेषेण गतः आरोकः आरोचनं दीप्तिरस्येति विगतारोकः, 'रुच दीप्तौ' K5. [4] 'लीङ श्लेषणे' K5. [5] निर्वर्त्यते स्म Pt2. [6] K4, K5 add विदार्यते.

(विव.) निष्प्रभे विरतारोकौ[1]। कान्तिहीनस्य दिवातनचन्द्रादेर्नामानि। निर्गता प्रभा कान्तिरस्मादिति निष्प्रभः। विरतश्च अरोकश्चेति द्वन्द्वः। सतोऽप्यर्थक्रियाकारित्वाभावाद् विरतः उपरतसदृश इत्यर्थः[2]। 'रुच दीप्तौ' इत्यस्माद्धातोः घञि (३. ३. १८) रोको दीप्तिः। स नास्त्यत्रेति अरोकः। एष चिरंतनव्याख्यातृसंमतः पाठः। कश्चित्तु—विगतः आलोकः प्रकाशोऽस्येति विगतालोक इति पाठेन व्याचष्ट ॥ विलीने विद्रुतद्रुतौ। अग्निसंयोगादिना द्रवीभूतस्य सर्पिर्जतुसुवर्णादेर्नामानि। विलीयत इति विलीनम्। 'लीङ द्रवीकरणे'। क्तः। 'आज्यं विलाप्य' इत्यादिप्रयोगः॥ द्रवत्वगुणयोगाद् द्रवति गच्छति नैकत्रावतिष्ठत इति द्रुतम्। विद्रुतं च। 'द्रु गतौ'। क्तः (३. ४. ७२)॥ सिद्धे निर्वृत्तनिष्पन्नौ। पाकादिसंस्कारनिष्पन्नस्य भक्तव्यञ्जनादेर्नामानि। यथा—[3]'सिद्धस्य हविष्यस्य जुहुयात्' इति। 'षिधु संराद्धौ' इत्यतः[4] सिद्धम्। निर्वृत्तनिष्पन्नशब्दावपि उपसर्गवशात् तदर्थाविव[5]॥ दारिते भिन्नभेदितौ। कुठारादिभिराग्रादामूलं द्विधाकृतस्य वेणुदलादेर्नामानि। दार्यते स्म दारितम्। 'दॄ विदारणे'। क्तः। भिद्यते स्म भिन्नः। 'भिदिर् विदारणे'। रुधादिः। चुरादावप्ययं धातुः पठ्यते। ततो ण्यन्तात् कर्मणि क्तप्रत्यये भेदितः॥ १००॥

[1] विगतालोकौ Gm1, Gm3. [2] अविद्यमानसादृश्याद् विगतः Gm3. [3] सिद्धमोदनम्। 'अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयात्' Tv. [4] इत्यस्मात् कर्मणि क्तप्रत्यये Tj2, Tv. [5] निर्वर्तते स्म। 'वृतु वर्तने'। क्तः। निष्पद्यते स्म। 'पद गतौ'। क्तः.

(पा.) निष्प्रभे विगतारोकौ[1]। अप्रतिभस्य नामानि। [2]विगतोऽपि स्यात्। 'विगतौ वीतनिष्प्रभौ' इति रुद्रः॥ विलीने विद्रुतद्रुतौ। वह्न्यादिना द्रवीभूतस्य[3] नामानि। [4]'करगपङ्कदि'॥ सिद्धे निर्वृत्तनिष्पन्नौ। परिसमाप्तनामानि[5]॥ दारिते भिन्नभेदितौ। द्वेधाकृतनामानि[6]॥ १००॥

[1] विगतालोकः A1. [2] विगतालोकविगतौ निष्प्रभौ B3. [3] विलीन° A1, C1. [4] B3 omits. [5] समाप्ति° A1. [6] दारित° A1; द्वैधीकृत° C1.

ऊतं स्यूतमुतं चेति त्रितयं तन्तुसंतते ।
स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितम् ।। १०१ ।।

(वि.) ऊतमिति––ऊय्यते तन्तुभिः संतन्यत इति ऊतम् । 'ऊयी तन्तु-संताने'[1] । सीव्यत इति स्यूतम् । 'षिवु तन्तुसंताने' । ऊयते तन्तुभिः संतन्यत इति उतम् । 'वेञ् तन्तुसंताने'[2] । बहुतन्तुसमूहस्य कन्थादेर्नामानि ।। अर्ह्यत इत्यर्हितम् । 'अर्ह पूजायाम्' ।। [3]नमः कृतं नमस्यितम् । नमसितं च । 'णमु प्रह्वत्वे शब्दे च' । अपचाय्यते पूज्यत इत्यपचायितम् । अपचितं च । 'चायृ पूजानिशामनयोः' । अर्च्यत इत्यर्चितम् । 'अर्च पूजायाम्' । अर्चितस्य [4]देवगृहा-देर्नामानि ।। १०१ ।।

[1] K3 adds इति प्रथमो धातुः. [2] इति द्वितीयो धातुः K6. [3] नमस्यत इति K3, K6, Pt2. [4] गुर्वादेः K5; गृहादेः K4.

(विव.) ऊतं––तन्तुसंताने । तन्तुभिः संतन्यते सूचीमूलस्थरन्ध्रप्रवेशितैः सूक्ष्मसूत्रैर्व्याप्यत इति तन्तुसंततः कन्थाकूर्पासादिः तत्रेत्यर्थः[1] । 'ऊयी तन्तुसंताने' इत्यतः क्तप्रत्यये ऊतम् । स्यूतशब्दो वैश्यवर्गे व्युत्पादितः[2] (पृ. ५६६) ।। [3]'वेञ् तन्तुसंताने' इत्यतः क्तप्रत्ययसंप्रसारण[4]पूर्वरूपत्वेषु[5] उतम् ।। स्यादर्हिते––अपचितम् । इतो वर्गसमाप्तिपर्यन्तं वृत्तद्वादशकमार्याच्छन्दः । पूजितो हरिहरगुर्वादिः, तत्रैते शब्दा वर्तन्ते । अर्ह्यते स्म अर्हितम् । 'अर्ह पूजायाम्' । हरिहरगुर्वादिः नमस्यते पूज्यते स्मेति नमस्यितः । 'नमो वरिवश्चित्रङः क्यच्' (३. १. १९) इत्यत्र नमसः पूजायाम् इति वक्तव्येन पूजाकरणार्थे क्यच्प्रत्यये सति सनाद्यन्तत्वेन धातु-संज्ञायां कर्मणि क्तप्रत्यये इडागमश्च ।। 'क्यस्य विभाषा' (६. ४. ५०) इति वैकल्पिके यकारलोपे नमसितः ।। अपचाय्यते पूज्यते स्म अपचायितः । 'चायृ पूजानिशामनयोः' इति कर्मणि क्तप्रत्यये इडागमश्च ।। तत एव धातोः 'अपचितं च' (७. २. ३०) इति सूत्रेण निष्ठायामनिट्त्वस्य चिभावस्य च निपातनाद् अपचितम् ।। अर्च्यते स्मेति अर्चितम् । 'अर्च पूजायाम्' ।। १०१ ।।

[1] Tv adds त्रय एते शब्दाः स्युः. [2] सीव्यते स्म । 'षिवु तन्तुसंताने' क्तः । 'च्छ्वोः...' (६. ४. १९) इति ऊठ्. [3] Tj1, Tj2 add ऊयते स्म. [4] 'ग्रहिज्या...' इति संप्रसारणम्. [5] 'संप्रसारणाच्च' इति पूर्वरूपम्.

(पा.) ऊतं—तन्तुसंतते । [1]तन्तुसंतानितनामानि । [2] 'कुट्टपङ्क्ति' ॥ स्यादर्हिते—अपचितम् । पूजितनामानि[3] ॥ १०१ ॥

[1] तन्तुभिः संवेष्टितस्य° B3. [2] B3 omits. [3] A1 adds कर्मणि क्तान्ताः सर्वे.

वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ।
संतापितसंतप्तौ धूपितधूपायितौ च दूनश्च ॥ १०२ ॥

(वि.) वरिवसित इति—वरिवस्यत उपास्यत[1] इति वरिवसितम् । वरिवस्यितं च । उपास्यते सेव्यत इति उपासितम् । 'आस उपवेशने'[2] । उपचर्यते सेव्यत इति उपचरितम् । 'चर गतौ'[3] । शिष्यादिभिः संसेवितस्य उपाध्यायादेर्नामानि ॥ संतप्यते स्म संतापितः । संतप्तश्च । 'तप संतापे' । [4]धूप्यते संतप्यत इति धूपितः । धूपायितश्च । 'धूप संतापे' ॥ दूयत इति दूनः । 'दूङ परितापे' । [5]अग्न्यादिसंतप्तस्य[6] नामानि ॥ १०२ ॥

[1] K4 omits. [2] Pt2 adds उपपूर्वः सेवायाम्. [3] J2, Pt2 add भक्षणयोः. [4] Pt2 adds धूपाय्यते स्म. [5] अग्न्यादिना K4. [6] K4 adds पीडितस्य.

(विव.) वरिवसिते—चोपचरितं च । पुत्रशिष्यादिभिः कृतपरिचर्याविशेषस्य[1] पितृगुर्वादेर्नामानि । 'नमो वरिवश्चित्रङः क्यच्' (३. १. १९) इत्यत्र वरिवसः [2]परिचर्याकरणरूपेऽर्थे क्यच्प्रत्यये[3] पूर्ववदेव वैभाषिके यलोपे वरिवसितम्, वरिवस्यितं च[4] ॥ उपास्यते स्म उपासितम् । 'आस उपवेशने' ॥ उपचर्यते स्म उपचरितम् । 'चर गतौ'[5] । उपपूर्वः सेवार्थ इति धातुवृत्तौ[6] ॥ संतापित—दूनश्च । निदाघक्षुत्तृष्णादिभिः पीडितस्य नामानि । 'तप संतापे' इत्यस्मात् चौरादिकात् संपूर्वात् कर्मणि क्तप्रत्यये संतापितः । भौवादिकात्तु संतप्तः ॥ धूप्यते स्म धूपितः । 'धूप संतापे' । 'गुपूधूप...' (३. १. २८) इत्यादिसूत्रे 'आयादय आर्धधातुके वा' (३. १. ३१) इति विकल्पेनायप्रत्यये धूपायितः ॥ 'टुदु उपतापे' इत्यस्माद् 'दुग्वोर्दीर्घश्च' (वा. ८. २. ४४) इति [7]निष्ठानत्वे दूनः[8] । यद्वा 'दूङ परितापे' इत्यस्मात् स्वादय ओदित इति प्रतिज्ञानाद् 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वे दूनः ॥ १०२ ॥

[1] °परिचर्यस्य Tv. [2] परिचर्यायामिति वक्तव्यबलेन Gm3, Tv. [3] B5, B6 add सति. [4] Gm3, Tv add इति रूपद्वयम्. [5] गतिभक्षणयोः Tj1, Tj2. [6] माधवीयधातुवृत्तौ न दृश्यते. [7] इति दीर्घनिष्ठानत्वयोः Gm3, Tv. [8] कौमुद्यां तु (पृ. ४७६) 'टुदु उपतापे' इत्ययं न गृह्यते सानुबन्धकत्वात्। मृदुतया दुतयेति माघः (६. ५६) इति। अत्र मल्लिनाथः—'दुतया पीडितया। "टुदु उपतापे" इति धातोः सौवादिकत्वात् कर्मणि क्तः' (पृ. १५८).

(पा.) वरिवसिते—चोपचरितं च। [1]सेवितनामानि ॥ संतापित—दूनश्च। [2]संतप्तनामानि ॥ १०२ ॥

[1] B3 adds गुर्वादिः. [2] अग्न्यादिना C1.

हृष्टे मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः।
छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ॥ १०३ ॥

(वि.) हृष्ट इति—हृष्यतीति हृष्टः। 'हृष तुष्टौ'। माद्यति तुष्यतीति मत्तः। 'मदी हर्षे'[1]। तृप्यतीति तृप्तः। 'तृप तृप्तौ'[2]। प्रह्लादते स्म प्रह्लन्नः। 'ह्लादी सुखे अव्यक्तशब्दे च'[3]। प्रमोदत इति प्रमुदितः। 'मुद हर्षे'। प्रीयते स्म प्रीतः। 'प्रीङ प्रीणने'। [4]हृष्टस्य नामानि ॥ छिद्यते स्म छिन्नम्। 'छिदिर् द्वैधीकरणे'। छायते स्म छातम्। छितं च। 'छो छेदने'। लूयते स्म लूनम्। 'लूञ् छेदने'[5]। कृत्यते स्म कृत्तम्। 'कृती छेदने'। [6]दायते स्म दातम्। 'दाप् लवने'। दीयत इति दितम्। 'दो अवखण्डने'। वृश्च्यते स्म वृक्णम्। 'ओव्रश्चू छेदने'। लवित्रादिना छिन्नस्य वस्त्रादेर्नामानि ॥ १०३ ॥

[1] 'मदी हर्षग्लेपनयोः' K2, K4, K6. [2] प्रीणने J2, Pt2. [3] K3, K4 omit अव्यक्तशब्दे. [4] संतुष्टस्य J1, J2. [5] भेदने K2. [6] K5 adds छिद्यते.

(विव.) हृष्टो—प्रीतः। [1]इष्टप्राप्तिजनितानन्दयुक्तस्य नामानि। हृष्यति स्म हृष्टः[2]। सर्व एते कर्तरि क्तप्रत्ययान्ताः ॥ माद्यति स्म मत्तः। 'मदी हर्षे'। 'न ध्याख्यापॄमूर्च्छिमदाम्' (८. २. ५७) इति निष्ठानत्वप्रतिषेधः। क्षीबेऽपि मत्त उक्तः (श्लो. २३)। तृप्यति स्म तृप्तः। [3]तृपिर्दिवादिः ॥ प्रह्लादते स्म प्रह्लन्नः। 'ह्लादी सुखे च'। 'ह्लादो निष्ठायाम्' (६. ४. ९५) इति ह्रस्वत्वम्। रदाभ्यामिति (८. २. ४२) निष्ठानत्वम् ॥ 'मुद हर्षे' इत्यस्माद्

मुदितः । प्रीयते स्म प्रीतः[4] ॥ छिन्नं––वृक्णम् । लवित्रादिना छिन्नस्य तृणादेर्नामानि । [5]सर्वाण्यपि कर्मणि क्तप्रत्ययान्तानि[6] । छिद्यते स्म छिन्नम् । 'छिदिर् द्वैधीकरणे' । निष्ठानत्वे (८. २. ४२) छिन्नम् ॥ [7]'छो छेदने' । क्तः । छातम् । 'शाच्छोरन्यतरस्याम्' (७. ४. ४१) इति विकल्पेनेत्वे छितम् ॥ 'लूञ् छेदने' लूनम् । 'ल्वादिभ्यः' (८. २. ४४) इति निष्ठानत्वम् ॥ कृत्यते छिद्यते स्म कृत्तम् । 'कृती छेदने' । 'श्वीदितो निष्ठायाम्' (७. २. १४) इति इडागमप्रतिषेधः ॥ दायते स्म दातम् । 'दाप् लवने' ॥ दीयते खण्डयते स्म दितम् । 'दो अवखण्डने' । 'द्यतिस्यतिमास्थामित्ति किति' (७. ४. ४०) इति इत्वम् ॥ वृश्च्यते स्म वृक्णम् । 'ओव्रश्चू छेदने' इत्यस्मात् 'स्कोः संयोगाद्योरन्ते च' (८. २. २९) इति संयोगादिभूतस्य [8]सकारस्य लोपः । 'ग्रहिज्या . . .' इत्यादिना (६. १. १६) संप्रसारणम्[9] ॥ १०३ ॥

[1] °प्रापित° Tv. [2] Tj1, Tj2 add 'हृष तुष्टौ'. [3] 'तृप प्रीणने' दिवादिः Tv. [4] B5, B6 add 'प्रीङ् प्रीणने'. [5] सर्व एते Gm3, Tv. [6] °प्रत्ययान्ताः Gm3, Tv. [7] Tv adds छायते स्म. [8] धातुपाठे व्रश्चू इत्यत्र व्रस् च् इति स्थिते सस्य श्चुत्वेन शकारनिर्देशः इति बालमनोरमायाम् (पृ. १५८). [9] 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम्.

(पा.) [1]हृष्टो––प्रीतः । हृष्टनामानि[2] ॥ छिन्नं––वृक्णम् । छिन्ननामानि ॥ १०३ ॥

[1] हृष्टः इति पारिजातपाठः. [2] संतुष्ट° C1.

स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ।
लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ॥ १०४ ॥

(वि.) स्रस्तमिति––[1]स्रस्यते स्रस्तम् । 'स्रंसु अवस्रंसने' । ध्वस्यते ध्वस्तम् । 'ध्वंसु अवस्रंसने' । भ्रश्यत इति भ्रष्टम् । 'भ्रंशु [2]अवस्रंसने' । [3]स्कद्यत इति स्कन्नम् । 'स्कन्दिर् गतिशोषणयोः' । पद्यते स्रस्यते पन्नम् । 'पद[4] गतौ' । [5]च्यूयत इति च्युतम् । 'च्युङ गतौ' । गल्यत इति गलितम् । [6]'गल स्रवणे' । स्रस्तस्य वस्त्रादेर्नामानि ॥ लभ्यत इति लब्धम् । 'डुलभष् प्राप्तौ' । प्राप्यत इति प्राप्तम् । 'आप्लृ व्याप्तौ' । विद्यत इति विन्नम् । 'विद्लृ लाभे' । भाव्यत इति भावितम्, भूतं च । 'भू प्राप्तौ' । आसाद्यते प्राप्यत इति आसादितम् । 'षद्लृ [7]विशरणादौ' । [8]लब्धस्य दानादेर्नामानि ॥ १०४ ॥

[1] स्रंसते स्म, ध्वंसते स्म, 'स्रंसु ध्वंसु अवस्रंसने' Pt2. [2] अधःपतने Pt2. [3] स्कन्दति स्म Pt2. [4] पद्लृ J1, J2, Pt2. [5] च्यवते स्म Pt2. [6] गलति स्म, 'गल संक्षरणे' Pt2. [7] विशरणगत्यवसादनेषु K3, K6. [8] प्राप्तस्य वस्तुनः K5.

(विव.) स्रस्तं—गलितम् । [1]नूतनघटादेरधःप्रसृतस्य [2]तैलजलादेर्नामानि । 'स्रंसु अवस्रंसने' 'ध्वंसु गतौ', 'भ्रंसु [3]अधःपतने', 'स्कन्दिर् गतिशोषणयोः', 'पद गतौ', 'च्युङ गतौ', 'गल स्रवणे' । एतेभ्यः सप्तभ्यो धातुभ्यः कर्तरि क्तान्ताः स्रस्तादयः सप्त शब्दा वेदितव्याः । चतुर्थपञ्चमयोस्तु रदाभ्यामिति (८. २. ४२) निष्ठानत्वम् ॥ लब्धं—भूतं च । यथेष्टविनियोगत्वेन प्राप्तस्य नामानि । 'डुलभष् प्राप्तौ' इत्यतः लब्धम् । प्रपूर्वाद् आप्नोतेः [4]प्राप्तम् । 'विद्लृ लाभे' इत्यतो निष्ठानत्वे विन्नम् ॥ 'भू प्राप्तौ' इत्यात्मनेपदी [5]धृषादौ पठितः । तस्माद् 'आधृषाद्वा'[6] इति विकल्पेन णिचि भावितम् । तदभावपक्षे भूतम् । [7]आङः सदिः पद्यर्थ इति चौरादिकाद् आङ्पूर्वाद् आसादितम् । सर्व एते कर्मणि निष्ठान्ताः ॥ १०४ ॥

[1] शरावादेः Tj1, Tv. [2] घृतादेः Gm3, Tv. [3] अवस्रंसने B6. [4] Tj1, Tj2 add 'आप्लृ व्याप्तौ'. [5] Gm3 adds चौरादिको धातुः. [6] गणसूत्रम् (७. ४. २). [7] षद्लृ विशरणादौ'.

(पा.) स्रस्तं—गलितम् । [1]च्युतनामानि ॥ लब्धं—भूतं च । [2]लब्ध-नामानि ॥ १०४ ॥

[1] गलित° B3. [2] प्राप्त° C1.

अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ।
आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ॥ १०५ ॥

(वि.) अन्वेषितमिति—अन्वेष्यत[1] इत्यन्वेषितम् । 'एषृ[2] गतौ' । गवेष्यत इति गवेषितम् । 'गवेष मार्गणे' । अन्विष्यत इत्यन्विष्टम् । 'इषु इच्छायाम्'[3] । मार्ग्यत इति मार्गितम् । 'मार्ग अन्वेषणे' । मृग्यत इति मृगितम् । 'मृग अन्वेषणे' । आदराद् विचेतव्यस्य वस्तुनो नामानि ॥ अर्द्यत पीड्यत इत्यार्द्रम् । 'अर्द हिंसायाम्' । आर्द्रेण[4] सह वर्तत इति सार्द्रम् । क्लिद्यत इति क्लिन्नम् । 'क्लिदू आर्द्रीभावे' । तिम्यत[5] इति तिमितम् । 'तिम आर्द्रीभावे' । स्तिम्यत इति

स्तिमितम् । 'ष्टिम आर्द्रीभावे'। [6]समुद्यत आर्द्रीक्रियत इति समुन्नम् । उत्तं च । 'उन्दी क्लेदने'। आर्द्रीभूतस्य नामानि ॥ १०५ ॥

[1] अन्विष्यते Pt2. [2] इष K3, K4. [3] Pt2 adds अनुपूर्वोऽन्वेषणे. [4] आर्द्र- मार्द्रत्वम् Pt2. [5] तिम्यति, स्तिम्यति Pt2. [6] सम्यग् उनत्तीति Pt2.

(विव.) अन्वेषितं—मृगितम् । आदरातिशयेनजिज्ञासितार्थस्य नामानि । [1]'एषृ गतौ', अनुपूर्वः, 'गवेष मार्गणे', 'इषु इच्छायाम्' 'मार्ग अन्वेषणे' 'मृग अन्वेषणे'; एतेभ्यो धातुभ्यः कर्मणि निष्ठान्ता अन्वेषितादयः पञ्च शब्दाः ॥ आर्द्रं—उत्तं च । आतपवातादिभिरनपाकृतजलावयवसुश्लेषस्य[2] वस्त्रादेर्नामानि । अर्द्यते रसग्रहणार्थं पीडयते स्म आर्द्रम् । 'अर्द हिंसायाम्' । आङ्पूर्वः, रक्प्रत्ययः[3] (उ. २. १८) ॥ आर्द्रशब्देन धर्ममात्रविवक्षायाम् आर्द्रत्वेन सह वर्तत इति सार्द्रोऽपि[4] ॥ क्लिद्यते स्म क्लिन्नम् । 'क्लिदू आर्द्रीभावे' । निष्ठानत्वं च (८. २. ४२) ॥ 'तिम ष्टिम आर्द्रीभावे' इत्याभ्यां धातुभ्यां कर्मणि क्तप्रत्यये इडागमे च क्रमेण तिमितं स्तिमितं च ॥ 'उन्दी क्लेदने' इत्यतः 'नुदविदोन्दत्रा...' इत्यादिना (८. २. ५६) विकल्पेन निष्ठानत्वे समुन्नम् । अभावपक्षे उत्तं च ॥ १०५ ॥

[1] इष Tv. [2] °संक्लेशस्य पङ्कादेः Tv. [3] Gm3, Tv add 'अर्देर्दीर्घश्च'. [4] B5, B6 omit अपि.

(पा.) अन्वेषितं—मृगितम् । [1]अन्वेषितनामानि । [2]'वेतकपङ्क्वदि' ॥ आर्द्रं—उत्तं च । आर्द्रनामानि ॥ १०५ ॥

[1] मार्गित° A1. [2] B3 omits.

त्रातं त्राणं रक्षितमवितं गोपायितं च गुप्तं च ।
अवगणितमवमतावज्ञाते अवमानितं च परिभूते ॥ १०६ ॥

(वि.) त्रातमिति—त्रायत इति त्रातम् । त्राणं च । 'त्रैङ पालने' । रक्ष्यत इति रक्षितम् । 'रक्ष पालने' । अव्यत इत्यवितम् । 'अव रक्षणे'[1] । गोप्यत[2] इति गोपायितम् । गुप्तं च । 'गुपू रक्षणे' । रक्षितस्य नामानि ॥ अवगण्यते नाद्रियत[3] इत्यवगणितम् । 'गण संख्याने' । अवमन्यतेऽवश्लाघ्यत

इत्यवमतम् । 'मन ज्ञाने' । अवज्ञायते तिरस्क्रियत इति अवज्ञातम्[4] । अवमान्यत इत्यवमानितम् । 'मान पूजायाम्' । परिभूयत इति परिभूतम् । 'भू सत्तायाम्'[5] । तिरस्कृतस्य नामानि ।। १०६ ।।

[1] रक्षणादौ Pt_2. [2] गोपाय्यते J_1, K_3, K_4. [3] J_2, K_6 omit. [4] J_1, J_2 add 'ज्ञा अवबोधने'. [5] Pt_2 adds परिपूर्वस्तिरस्कारे.

(विव.) त्रातं—गुप्तं च । चोरव्याघ्रादिभयाद्यपाकरणेन[1] रक्षितस्य नामानि । षडमी शब्दाः कर्मणि निष्ठान्ताः । त्रायते स्म त्रातम् । 'त्रैङ् पालने' । 'नुदविदोन्दत्रा . . .' इत्यादिना (८. २. ५६) विकल्पेन निष्ठानत्वे त्रातं त्राणं च । 'रक्ष पालने'[2], रक्षितम् । 'अव रक्षणे'[3], अवितम् । 'गुपू रक्षणे' इत्यस्माद् गुप्तम् । 'आयादय आर्धधातुके वा' (३. १. ३१) इत्यायप्रत्यये तदन्ताद्धातोः क्तप्रत्यये [4]गोपायितम् ।। अवगणितं—परिभूते । परिभूयते [5]आदरविषयतया न स्वीक्रियते स्मेति परिभूतम् । तत्र अवगणितादयः शब्दाः वर्तन्ते[6] । 'गण संख्याने'[7], 'मन ज्ञाने' दैवादिकः, 'ज्ञा अवबोधने', 'मान पूजायाम्'; अवेत्युपसर्गवशाद् अवज्ञालक्षणेऽर्थे वर्तमानेभ्यः चतुर्भ्यो धातुभ्यः क्रमेण अवगणितम्, अवमतम्[8], अवज्ञातम्, अवमानितं चेति चत्वारः शब्दाः स्युः ।। १०६ ।।

[1] °आदिनिमित्तभयनिरसनेन Gm_3, Tv. [2, 3] Tj_1, Tj_2 add इत्यतो, इत्यस्मात्. [4] B_5, B_6 omit क्तप्रत्यये. [5] अनादर° Tj_2. [6] स्युः Tv. [7] B_6 adds चुरादौ अदन्तः. [8] Gm_1, Gm_3 add यश्च श्यनि पठ्यते मनिरिति [काशिका] पाठादत्रेडागमो नास्ति.

(पा.) त्रातं—गुप्तं च । रक्षितनामानि ।। अवगणितं—परिभूते । [1]परिभूतनामानि ।। १०६ ।।

[1] अवमानित° B_3; तिरस्कृत° C_1.

त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम् ।
उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् ।। १०७ ।।

(वि.) त्यक्तमिति—[1]त्यज्यत इति त्यक्तम् । 'त्यज हानौ' । [2]हीयत इति हीनम् । 'ओहाक् त्यागे' । विधूयत इति विधुतम् । 'धुञ् कम्पने' । समुज्झ्यत इति समुज्झितम् । 'उज्झ उत्सर्गे' । धूयत इति धूतम् । 'धू विधूनने' ।

उत्सृज्यत इति उत्सृष्टम् । 'सृज विसर्गे' । [3]त्यक्तस्य नामानि ।। उच्यत इत्युक्तम् । 'वच परिभाषणे' । भाष्यत इति भाषितम् । 'भाष व्यक्तायां वाचि' । उद्यत इति उदितम् । 'वद व्यक्तायां वाचि' । जल्प्यत इति जल्पितम् । [4]'जल्प व्यक्तायां वाचि' । आख्यायत इति आख्यातम् । 'ख्या प्रकथने' । अभिधीयत इत्यभिहितम् । 'डुधाञ् धारणपोषणयोः' । लप्यत इति लपितम् । 'लप व्यक्तायां वाचि' । भाषितस्य नामानि ।। १०७ ।।

[1] Pt_2 adds स्म. [2] K_5 omits two lines. [3] K_5 adds अन्योद्देशं विना. [4] जप जल्प° K_2, K_3.

(विव.) त्यक्तं—उत्सृष्टम् । **दृष्टादृष्टोपकारकोद्देशं विनैव वैराग्येण परिहृतस्य नामानि । सर्व एते कर्मणि क्तप्रत्ययान्ताः । 'त्यज हानौ' । [1]त्यक्तम् ।। हीयते स्म हीनम् । क्तः । 'घुमास्थागापाजहातिसां हलि' (६. ४. ६६) इति ईकारादेशे हीनम्[2] ।। 'धूञ् कम्पने' [3]इत्यतो ह्रस्वादेर्विपूर्वाद् विधुतम् ।। 'उज्झ त्यागे' संपूर्वः । उज्झितम्[4] ।। 'धू विधूनने' । तौदादिकाद् दीर्घादेर्धूतम् ।। 'सृज विसर्गे' इत्यतः उत्पूर्वाद् उत्सृष्टम्[5] ।। उक्तं—लपितम् । [6]कण्ठरवेण व्यक्ततया प्रकाशितस्य वचसस्तदर्थस्य च नामानि । 'वच परिभाषणे' । 'वचिस्वपि . . .' इत्यादिना (६. १. १५) संप्रसारणे उक्तम् ।। 'भाष व्यक्तायां वाचि' इत्यतो भाषितम् ।। 'वद व्यक्तायां वाचि' इत्यतो यजादिसंप्रसारणे (६. १. १५) सति उदितम् ।। 'जल्प व्यक्तायां वाचि' इत्यतो जल्पितम् ।। 'ख्या प्रकथने' इत्याङ्-पूर्वतः आख्यातम् ।। अभि इत्युपसर्गवशाद् [7]अर्थान्तरेण वर्तमानात् कर्मणि क्तप्रत्यये 'दधातेर्हिः' (७. ४. ४२) इति हिरादेशे सति अभिहितम् ।। [8]'लप व्यक्तायां वाचि' इत्यतो[9] लपितम् ।। १०७ ।।**

[1] Tv adds त्यज्यते स्म. [2] Gm_3, Tv add ओदितश्च इति निष्ठानत्वम्; ओहाक् त्यागे इति धातुः. [3] विधूयते स्म Gm_3, Tv. [4] समुज्झ्यते स्म Gm_3, Tv. [5] उत्सृज्यते स्म Gm_3, Tv. [6] यद् व्यक्तमुक्तं Tv. [7] उक्ते अर्थे Tj_1, Tj_2. [8] रप लप Tj_1, Tj_2. [9] इत्यस्मात् B_5, B_6.

(पा.) त्यक्तं—उत्सृष्टम् । त्यक्तनामानि ।। उक्तं—लपितम् । [1]उक्त-नामानि ।। १०७ ।।

[1] भाषित° B_3, C_1.

बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ।
ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ।। १०८ ।।
संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ।

(वि.) बुद्धमिति––बुध्यत इति बुद्धम् । 'बुध अवगमने' । [1]बुध्यत इति बुधितम् । 'बुध बोधने' । मन्यते स्म मनितम् । 'मन अवबोधने' । विद्यत इति विदितम् । 'विद ज्ञाने' । प्रतिपद्यते ज्ञायत इति प्रतिपन्नम् । 'पद गतौ'[2] । अवसीयत[3] इत्यवसितम् । 'षोऽन्तकर्मणि' । अवगम्यत इत्यवगतम्[4] । 'गम्लृ गतौ' । ज्ञातस्य नामानि ।। ऊरीक्रियतेऽङ्गीक्रियत इति ऊरीकृतम् । उररीक्रियत इति [5]उररीकृतम् । अङ्गीक्रियत इत्यङ्गीकृतम्[6] । आश्रूयतेऽङ्गीक्रियत इत्याश्रुतम् । संश्रुतम् उपश्रुतं च । 'श्रु श्रवणे' । प्रतिज्ञायत इति प्रतिज्ञातम् । संगीर्यतेऽङ्गीक्रियत इति संगीर्णम् । 'गॄ शब्दे'[7] । विद्यत इति विदितम् । 'विद ज्ञाने' । समाधीयतेऽङ्गीक्रियत इति समाहितम् । 'डुधाञ् धारणपोषणयोः' । उपगम्यत इत्युपगतम् । अङ्गीकृतस्य नामानि ।। १०८ ।।

[1] बोध्यते J_1, K_6. [2] Pt_2 adds सर्वे गत्यर्थाः ज्ञानार्थाः. [3] J_2, K_2, K_5 add ज्ञायते. [4] Pt_2 adds अवपूर्वो ज्ञानार्थः. [5] ऊररीकृतमिति वा पाठः Pt_2. [6] J_2, K_2, K_5 add 'डुकृञ् करणे'. [7] निगरणे K_5.

(विव.) बुद्धं––अवगते । [1]ज्ञातार्थस्य नामानि । [2]'बुध अवगमने' । अनिट्कारिकासु शुध्यति बुध्यतीति पाठाद् अस्य बुध्यतेर्दैवादिकत्वेन इडागमाभावे बुद्धम्[3] । 'बुध बोधने' इति तु भौवादिकाद् इडागमे सति बुधितम् ।। 'मन अवबोधने' इति स्वादेरिडागमे मनितम् । 'मन ज्ञाने' इत्यस्य तु दैवादिकत्वेन 'यश्च श्यनि पठ्यते मनिः' (काशिका २, पृ. २९९) इति पाठाद् इडागमो नास्ति । अथवा––मनःशब्दात् 'तत्करोति' (ग. सू.) इति णिचि टिलोपे मनितम् ।। 'विद ज्ञाने' इत्यतो[4] विदितम् ।। [5]'पद गतौ', प्रतिपूर्वो ज्ञानार्थः । निष्ठानत्वे (८. २. ४२) प्रतिपन्नम् ।। 'षोऽन्तकर्मणि' । धातुरवपूर्वो ज्ञानार्थः । [6]'द्यतिस्यति . . .' इत्यादिना (७. ४. ४०) इत्वेऽवसितम् ।। अवगम्यते स्म अवगतम् ।। सर्वे शब्दाः कर्मणि निष्ठान्ताः ।। ऊरीकृतं––उपगतम् । [7]ऊरीकृतमित्यादिश्लोकेनैकादशशब्दाः अभ्युपगतार्थवाचकाः । ऊरी-उररीतिशब्दयोः अङ्गीकरणार्थे वर्तमानयोः 'ऊर्यादिच्विडाचश्च' (१. ४. ६१) इति गतिसंज्ञायां 'कुगतिप्रादयः' (२. २. १८) इति

कृदन्तेनोत्तरपदेन समासे ऊरीकृतम् उररीकृतं च । अत्र आद्यो दीर्घादिः । द्वितीयो ह्रस्वादिः । आर्यावृत्तानुरोधात् । नैषधकाव्ये तु 'अर्थिषु स्वयमुरीकृतकाम्या' (५. ११७) इति प्रथमो ह्रस्वादिरपि प्रयुक्तः[8] । द्वितीयस्तु दीर्घादिरप्यस्तीति *अव्ययवर्गे (३. ३. २५४) वक्ष्यते[9] ।। अङ्गीक्रियते स्म अङ्गीकृतम् ।। आश्रूयते स्म आश्रुतम् । 'श्रु श्रवणे' । उपसर्गवशाद् अङ्गीकारार्थत्वम् । अत एव संश्रुतम् उपश्रुतं च ।। प्रतिपूर्वत्वेनाङ्गीकारार्थात् जानातेः प्रतिज्ञातम्[10] ।। संपूर्वस्य 'गॄ निगरणे' इति धातोरङ्गीकारार्थत्वं प्रसिद्धम् । 'ॠत इद्धातोः' (७. १. १००) इति इत्वम् । 'रदाभ्यां . . .' (८. २. ४२) इति निष्ठानत्वे च संगीर्णम्[11] ।। धातूनामनेकार्थत्वाद् 'विद ज्ञाने' इत्यस्माद् इडागमप्रतिषेधाभावाद् विदितम् ।। सम्यगाधीयते स्म समाहितम् । 'दधातेर्हिः' (७. ४. ४२) ।। उपगम्यते स्म उपगतम् ।। सर्वत्रोपसर्गवशादत्र धातूनामङ्गीकारार्थत्वं[12] विज्ञेयम् ।। १०८ ।।

[1] ज्ञातस्य Tv. [2] Tv adds बुध्यते स्म. [3] 'झषस्तथोर्धोऽधः' इति धत्वम् । 'झलां जश् झशि' इति जशादेशः. [4] Gm3, Tv add प्रतिषेधाभावादिडागमे. [5] प्रतिपद्यते स्म प्रतिपन्नम् Tv. [6] अवसीयते स्म Tv. [7] अभ्युपगतार्थस्य एतान्येकादश नामानि Tv. [8] पठितः Tj1, Tj2. [9] 'ऊर्यूरी चोररी च' इति . . . Tv. [10] Gm3, Tv add 'समः प्रतिज्ञाने' (१. ३. ५२) इति सूत्रे प्रतिज्ञानमङ्गीकार इति (अभ्युपगम इति मु. ग्रन्थे पृ. ५४) काशिकाकारः. [11] 'हलि च' इति इको दीर्घः. [12] अनेकार्थत्वम् B5, B6. * नानार्थाव्ययवर्गे.

(पा.) बुद्धं—अवगते । [1]अवगतनामानि ।। ऊरीकृतं—उपगतम् । अङ्गीकृतनामानि ।। १०८ ।।

[1] विदित° B3, C1.

ईडितशस्तपणायितपनायितप्रणुतपणितपनितानि ।। १०९ ।।
अवगीर्णवर्णिताभिष्टुतेलितानि स्तुतार्थानि ।

(वि.) ईडितेति—ईड्यत इतीडितम् । ईलितं च । 'ईड स्तुतौ' । शस्यत इति शस्तम् । 'शंसु स्तुतौ' । [1]पणाय्यते स्तूयते पणायितम् । पणितं च । 'पण व्यवहारे स्तुतौ च' । [2]पनाय्यते पनायितं पनितं च । [3]'पन स्तुतौ' । प्रणूयत इति प्रणुतम् । 'णु स्तुतौ' । [4]अवगीर्यते स्तूयत इत्यवगीर्णम् । 'गॄ शब्दे' ।

वर्ण्यत इति वर्णितम् । 'वर्ण[5] वर्णक्रियाविस्तारगुणवचनेषु' । अभिष्टूयत इत्यभिष्टुतम् । स्तुतं च । 'ष्टुञ् स्तुतौ' । स्तुतस्य नामानि ।। १०९ ।।

[1] पण्यते J2, K6, Pt2. [2] पन्यते स्म Pt2. [3] पन च J2. [4] अपिगीर्ण ... इति भानुजीदीक्षितीये पाठः; अभिगीर्ण ... इति टीकासर्वस्वे. [5] वर्ण स्तुतौ Pt2; J2 adds वर्ण वर्णक्रियायाम्; वर्ण स्तुतौ इति धातुः K3.

(विव.) ईडित—स्तुतार्थानि । ईडितादयः शब्दा एकादश स्तुतशब्दसमानार्थाः । ईड्यते स्तूयते स्म ईडितम् । 'ईड स्तुतौ' । लडयोरेकत्वे ईलितं च ।। शस्यते स्म शस्तम् । 'शंसु स्तुतौ' ।। पण्यते स्म पणितम् । 'पण व्यवहारे स्तुतौ च' । मूर्धन्यपञ्चम-मध्यम् । 'पन च' इति धातोस्तु पनितमिति दन्त्यपञ्चममध्यम् । आभ्यामेव धातुभ्याम् 'आयादय आर्धधातुके वा' (३. १. ३१) इति विकल्पेन आयादेशे पणायितं पनायितं च ।। 'णु स्तुतौ' इत्यस्मात् प्रपूर्वात् प्रणुतम् । 'उपसर्गादसमासेऽपि ...' (८. ४. १४) इति णत्वम् । 'गॄ शब्दे' इत्यस्माद् [1]अवपूर्वाद् अवगीर्णम् ।। 'वर्ण स्तुतौ'[2] इत्यस्माद् वर्णितम् ।। 'ष्टुञ् स्तुतौ' इत्यस्मात् स्तुतम् । तत एवाभिपूर्वाद् अभिष्टुतम्[3] ।। १०९ ।।

[1] अभिपूर्वाद् अभिगीर्णम् B5, B6. [2] वर्णक्रियाविस्तारगुणवचनेषु Tj1, Tj2. [3] उपसर्गात् सुनोति ... इति षत्वम्.

(पा.) ईडित—स्तुतार्थानि । स्तुतनामानि ।। १०९ ।।

भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातम् ।। ११० ।।
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते ।

(वि.) भक्षितेति—भक्ष्यत इति भक्षितम् । 'भक्ष अदने' । [1]चर्व्यत इति चर्वितम् । 'चर्व अदने' । लिप्यते भक्ष्यत इति लिप्तम् । 'लिप उपदेहे' । लीढमिति वा पाठः[2] । प्रत्यवसीयत[3] इति प्रत्यवसितम् । 'षोऽन्तकर्मणि' । [4]गिल्यत इति गिलितम् । 'गिल अदने' । खाद्यत इति खादितम् । 'खादृ भक्षणे' । प्सायत इति प्सातम् । [5]'प्सा रक्षणभक्षणयोः' । अभ्यवह्रियते भक्ष्यत इति अभ्यवहृतम्[6] । अद्यत इत्यन्नम् । जग्धं च । 'अद भक्षणे' । ग्रस्यत इति ग्रस्तम् । ग्लस्यत इति ग्लस्तम् । 'ग्रसु ग्लसु अदने' । अश्यत इत्यशितम् । 'अश भोजने'[7] । भुज्यत इति भुक्तम् । 'भुज पालनाभ्यवहारयोः' । भुक्तस्य[8] नामानि ।। ११० ।।

[1] K3 omits 4 lines. [2] लीढमिति पाठे लिह्यते भक्ष्यत इति लीढम् । 'लिह आस्वादने' K2. [3] K3, K6 add भक्ष्यते. [4] गीर्यत इति गिलितम् । 'गॄ निगरणे' K4, K6. [5] 'प्सा भक्षणे' K5, K6. [6] J2, K2 add 'हृञ् हरणे'. [7] भक्षणे K5. [8] K2, K5 add अन्नादेः.

(विव.) भक्षित—भुक्ते । भुक्तस्यान्नादेर्नामानि । 'भक्ष अदने' इत्यस्माद् भक्षितम्[1] ।। 'चर्व अदने' इत्यस्मात् चर्वितम् ।। धातूनामनेकार्थत्वाद् भक्षणरूपार्थे वर्तमानात् 'लिप उपदेहे' इत्यस्मात् लिप्तम् ।। [2]उपसर्गद्वयवशाद्[3] भक्षणे वर्तमानात् स्यतेः प्रत्यवसितम् ।। 'गिल अदने' इत्यतो[4] गिलितम् ।। 'खादृ भक्षणे' इत्यतः खादितम् ।। 'प्सा भक्षणे' इत्यस्मात् प्सातम् ।। अभ्यवपूर्वाद्[5] 'हृञ् हरणे' इत्यस्माद् अभ्यवहृतम् ।। अद्यते स्म जग्धम् । 'अद भक्षणे' । 'अदो जग्धिर्ल्यप्ति किति' (२. ४. ३६) इति जग्धादेशः । अस्मादेव धातोः 'अन्नाण्णः' (४. ४. ८५) इति निर्देशसामर्थ्याद् अन्नम् ।। 'ग्रसु ग्लसु अदने' इत्याभ्यां धातुभ्यां ग्रस्तं ग्लस्तं च ।। अश्यते स्म अशितम् । 'अश भोजने' । भुज्यते स्म भुक्तम्[6] ।। ११० ।।

[1] Tj1, Tj2 add सर्वत्र क्तः. [2] B5, B6 add 'षोऽन्तकर्मणि'. [3] °वशेन Tv. [4] इत्यस्मात् Tv. [5] हरतेः Gm3, Tv. [6] Gm1, Gm3 add 'भुज पालनाभ्यवहारयोः'.

(पा.) भक्षित—भुक्ते । भुक्तनामानि ।। ११० ।।

क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ।। १११ ।।
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः ।

(वि.) क्षेपिष्ठेति—अतिशयेन क्षिप्रः क्षेपिष्ठः । अतिशयेन क्षुद्रः क्षोदिष्ठः । अतिशयेन प्रियः प्रेष्ठः । अतिशयेन उरुः वरिष्ठः । अतिशयेन स्थूलः स्थविष्ठः । अतिशयेन बहुलः[1] बंहिष्ठः । एते[2] शब्दाः क्रमात् क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहूनां प्रकर्षार्था अतिशयार्था भवन्ति ।। १११ ।।

[1] बहुः J2, K4. [2] एतेषां K6.

(विव.) क्षेपिष्ठ—प्रकर्षार्थाः । क्षिप्रादीनां बह्वन्तानां [1]षण्णां मध्ये ये पदार्थाः क्षिप्रत्वादितत्तद्धर्मप्रकर्षवन्तो भवन्ति तथाभूतार्थवचना इष्ठन्प्रत्ययान्ताः[2]

क्षेपिष्ठादयः षडपि शब्दाः क्रमेण भवन्तीत्यर्थः । अतिशयेन क्षिप्र इति विग्रहे 'अतिशायने तमबिष्ठनौ' (५. ३. ५५) इतीष्ठन्प्रत्यये, 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' (६. ४. १५६) इति यणादिपरस्य लोपे पूर्वस्य च गुणे क्षेपिष्ठः । एवं क्षुद्रशब्दादपि क्षोदिष्ठः ।। द्वितीयार्धे वृत्तानुरोधात् प्रयुक्तेन अभीप्सितपदेन तत्पर्यायः प्रियशब्दो लक्षितः । ततश्च अतिशयेन प्रिय इति विग्रहे 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः' (६. ४. १५७) इति सूत्रेण प्रियशब्दस्य [3]प्रादेशे प्रेष्ठः ।। पृथुशब्देन तत्पर्यायः[4] उरुशब्दो लक्ष्यते । ततश्च अतिशयेन उरुरिति विग्रहे उरुशब्दस्य 'प्रियस्थिर . . .' इत्यादिना (६. ४. १५७) वरादेशे च वरिष्ठः ।। पीवरशब्देन तत्समानार्थः स्थूलशब्दोऽभिप्रेतः । ततश्च अतिशयेन स्थूल इति विग्रहे इष्ठनि यणादिलोपे गुणे च स्थविष्ठः ।। बहुशब्देन बहुलशब्दोऽभिप्रेतः । तस्य 'प्रियस्थिर . . .' इत्यादिना (६. ४. १५७) बंहादेशे बंहिष्ठः ।। १११ ।।

[1] षड्विधानां B6. [2] Tv adds प्रथमार्थे द्वन्द्वसमासः. [3] प्र इत्यादेशे Tj1, Tj2. [4] तत्पर्यायभूत° Gm3, Tv.

(पा.) क्षेपिष्ठ—प्रकर्षार्थाः । क्षेपिष्ठादयः शब्दाः क्षिप्रादीनां प्रकर्षार्थकाः । अतिशयेन क्षिप्रः क्षेपिष्ठः । अतिशयेन क्षुद्रः क्षोदिष्ठः । अतिशयेन प्रियः प्रेष्ठः । अतिशयेन उरुः वरिष्ठः । अतिशयेन स्थूलः स्थविष्ठः । अतिशयेन वहुलो बंहिष्ठः[1] ।। १११ ।।

[1] प्रियोरुस्थूलशब्दानां अभीप्सितपृथुपीवरशब्दाः छन्दोभङ्गभयात् B3.

साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ।। ११२ ।।
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ।।

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने विशेष्यनिघ्नवर्गः

(वि.) साधिष्ठेति—अतिशयेन वाढः[1] साधिष्ठः । अतिशयेन दीर्घो द्राघिष्ठः । अतिशयेन स्फिरः[2] स्फेष्ठः । अतिशयेन गुरुः गरिष्ठः । [3]अतिशयेन ह्रस्वो ह्रसिष्ठः । अतिशयेन वृन्दारको मनोज्ञो[4] वृन्दिष्ठः । एते शब्दाः क्रमेण बाढव्यायतबहुगुरुवामनवृन्दारकाणाम् अतिशयार्था भवन्ति ।। ११२ ।।

इति वंगलभट्टोपाध्यायसूरिसुतलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ
विशेष्यनिघ्नवर्गः समाप्तः

[1] साधुः K5. [2] K5 adds स्फीतः. [3] K3 omits. [4] मनोज्ञतया J2.

(विव.) साधिष्ठ—अतिशये । अत्रातिशयशब्दोऽतिशयवति[1] वर्तते । बाढादीनां मध्ये तत्तद्धर्मातिशययोगिनि[2] प्रथमार्थे द्वन्द्वसमाससंगृहीता इष्ठन्प्रत्ययान्ताः साधिष्ठादयः शब्दा वर्तन्ते । अतिशयेन बाढ इति विग्रहे 'अन्तिकबाढयोर्नेदसाधौ' (५. ३. ६३) इति साधादेशे सति साधिष्ठः ॥ अत्रापि [3]वृत्तानुरोधात् प्रयुक्तेन व्यायतशब्देन तत्पर्यायो दीर्घशब्दोऽभिप्रेतः । अतिशयेन दीर्घ इति विग्रहे 'प्रियस्थिर...' इत्यादिना (६. ४. १५७) दीर्घशब्दस्य द्राघ्यादेशे द्राघिष्ठः ॥ बहुशब्देन तत्पर्यायस्फिरशब्दो गृह्यते । तस्य स्फ इत्यादेशे स्फेष्ठः ॥ गुरुशब्दस्य [4]गरादेशे गरिष्ठः ॥ इह वामनशब्देन ह्रस्वशब्दो विवक्षितः । तस्य 'स्थूलदूर...' इत्यादिना (६. ४. १५६) यणादिलोपे ह्रसिष्ठः ॥ 'वृन्दारके सुरे श्रेष्ठे मनोज्ञे वाच्यलिङ्गवत्' इति [5]प्रतापमार्तण्डेनाभिधानाद् इह वृन्दारकशब्देन मनोज्ञः श्रेष्ठश्च विवक्षितः । तत्र अतिशयविवक्षायां वृन्दादेशे वृन्दिष्ठः ॥ उपलक्षणमेतत् । एवमेव क्षुद्रादिशब्देभ्यः तत्तदतिशयविवक्षायां तमप्प्रत्ययान्ता अप्युदाहार्याः । यथा—क्षिप्रतमः, प्रियतम इत्यादयः । तथा 'द्विवचनविभज्योपपदे तरबीयसुनौ' (५. ३. ५७) इति सूत्रेण तरप्प्रत्ययान्ता ईयसुन्प्रत्ययान्ताश्च विशेष्यनिघ्नत्वेन विज्ञेया इति सर्वं समञ्जसम् ॥ ११२ ॥

बोम्मगण्टचप्पयार्येण नामलिङ्गानुशासने ।
विशेष्यनिघ्नवर्गस्य संक्षिप्य व्याकृतिः कृता ॥
इह यत्त्यक्तमज्ञानादालस्याद् यदुपेक्षितम् ।
प्रमादादन्यथोक्तं यत् तद्विद्वद्भिर्विशोध्यताम् ॥

इति विशेष्यनिघ्नविवरणं समाप्तम्

[1] अतिशये B6. [2] °योगिन्यर्थे Tj1, Tj2. [3] छन्दोऽनुरोधात् Gm3. [4] गर् इत्यादेशे Tv. [5] प्रतापमार्ताण्ड° Gm3, Tv.

(पा.) साधिष्ठ—अतिशये । साधिष्ठादयो बाढादीनामतिशयार्थकाः । अतिशयेन बाढः साधिष्ठः । अतिशयेन दीर्घो द्राघिष्ठः । अतिशयेन स्फिरः

स्फेष्ठः । अतिशयेन गुरुर्गरिष्ठः । अतिशयेन ह्रस्वो ह्रसिष्ठः । अतिशयेन वृन्दारको वृन्दिष्ठः[1] ।। ११२ ।।

इति [2]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते विशेष्यनिघ्नवर्गः

[1] B3 adds दीर्घस्फिरह्रस्वशब्दानां व्यायतबहुवामनशब्दाः पूर्ववत्. [2] °नरसिंह° A1.

---

२. संकीर्णवर्गः

प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिङ्गमुन्नयेत् ।
कर्म क्रिया तत्सातत्ये गम्ये स्युरपरस्पराः ।। १ ।।

(वि.) अथ संकीर्णवर्गमुपक्रमते[1] प्रकृतीति––प्रत्ययेतरभागः प्रकृतिः । [2]प्रकृतेरितरः प्रत्ययः । प्रकृतिभागस्य अभिधेयमर्थः । [3]आद्यशब्देन रूपभेद-[4]साहचर्ये च । एतैः प्रकृत्यादिभिः संकीर्णेऽस्मिन् वर्गे लिङ्गं स्त्रीपुंनपुंसकमुन्नयेत् उत्प्रेक्षेत ।। पुनः पुनः क्रियत इति कर्म क्रिया च । 'डुकृञ् करणे' । एते[5] व्यापारस्य नामनी ।। अपरे च परे च अपरस्पराः । वहुभिरविच्छेदेन क्रियमाणाया गत्यादेर्नाम ।। १ ।।

[1] उच्यते J2. [2] प्रकृतीतरः K5, K6. [3] आदि° J2. [4] सहचर्या J2. [5] एतौ K4.

(विव.) प्रकृति––लिङ्गमुन्नयेत् । उद्देशक्रमानुरोधेन (श्लो. ३. १. १) संकीर्णवर्गं वक्तुमुपक्रमते । प्रकृतिः प्रातिपदिकम् । प्रत्ययः कृत्तद्धितरूपः । अर्थोऽभिधेयरूपः । [1]इह संकीर्णवर्गे विधेयशब्दस्य लिङ्गसंदेहे तत्तल्लिङ्गविशेष-नियतैः प्रकृत्यादिभिः यथासंभवं लिङ्गमुत्प्रेक्षेतेत्यर्थः । अस्य च वर्गस्य संकीर्ण-पदाभिलक्ष्यत्वमिह वक्ष्यमाणार्थानामुपसंग्रहैकनिगमाभावात् । तथा हि––न तावत् तेषामर्थानां प्रागनुक्तत्वं[2] समानो धर्मः । उक्तानामपि ज्वरहूतिख्यातिसंग्रहादीना-मभिधानात् । नापि धर्ममात्रत्वम् । धर्मिणामपि उपघ्नस्तम्बघ्नादीनामपि

(श्लो. १६, ३५) वक्ष्यमाणत्वात्। नाप्याविष्टलिङ्गत्वम्। अपरस्परस्तम्बघ्नादीनामपि कथनात्। नापि प्रागुक्तस्वर्गव्योमादिसंबन्धित्वादिलक्षणसर्वोपसंग्राहकात्यन्ताभावः। राजकगाणिक्यादिवद् (२. ८. ३, २. ६. २२) मानुष्यककारीषादीनां (श्लो. ४२, ४३) सत्यपि मनुष्यसंबन्धे तत्तत्प्रकरणपाठपरिहाणेनात्रैव[3] निरूपणाद्[4] भूविशेषस्य संस्तावस्यापि (श्लो. ३४) अत्रैव प्रस्तुतत्वात्। अन्यस्यापि कस्यचित् समानधर्मस्य दुर्निरूपत्वेनानन्तरवर्गस्य लूनविशीर्णप्रायार्थसंकुलत्वेन सकीर्णसंज्ञया व्यवहारः उपपद्यते।

तत्र प्रकृत्या लिङ्गोन्नयनं यथा—अपरे च परे चेति द्वन्द्वसमासे अपरस्पराः। क्रियासातत्ये सुडागमो निपातितः। अत्र परवल्लिङ्गतानियमात् परशब्दस्य च सर्वनामत्वेन वाच्यलिङ्गतानियमाद् अपरस्परप्रातिपदिकस्यापि वाच्यलिङ्गत्वं निश्चीयते। अपरस्पराः सार्था यान्ति। अपरस्पराणि ब्राह्मणकुलानि इत्यादि। *तथा 'तद्युक्तात् कर्मणोऽण् (५. ४. ३६) इति सूत्रेण नपुंसकलिङ्गात् कर्मशब्दात् स्वार्थ एव उत्पन्नतद्धितान्तस्य कार्मणशब्दस्यापि प्रकृतिवदेव नपुंसकलिङ्गत्वम्। अत एव बालो बालकः। शारी शारिका। स्थानमेव स्थानकम् इत्यादिस्वार्थिकप्रत्ययान्तानां प्रकृतिलिङ्गत्वमेव। चातुर्वर्ण्यादिषु तु 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति वचनात् प्रकृतिलिङ्गातिवृत्तिः तत्र तत्र विशेषविधानादवगन्तव्या। दान्तिः शान्तिः कान्तिः इत्यादीनां स्त्र्यधिकारविहितप्रत्ययान्तानां (३. ३. ९४) प्रत्ययवशेनैव स्त्रीत्वनिश्चयः। प्लोषश्लेषग्रहजयादिशब्दानामत्र सप्तमीविभक्तयन्तत्वेन पाठात् लिङ्गसंदेहे 'घञन्ताः पुंसि' (श्लो. ३. ५. १५) इति पुंलिङ्गत्वं प्रत्ययैरेवावगम्यते। गतम् इत्यादौ नपुंसकत्वं भावविहितक्तप्रत्ययेन (३. ३. ११४) निश्चीयते इत्यादि। अर्थेन यथा—त्राणशब्दो (श्लो. ८) निष्ठान्तो वाच्यलिङ्गः। ल्युडन्तश्चेद् नपुंसकलिङ्गः (३. ३. ११५)। एवं च 'रक्षणस्त्राणे' (श्लो. ८) इत्यत्र भाववचनरक्षणशब्दसमभिव्याहृतत्राणशब्दस्य नपुंसकलिङ्गत्वं रक्षणरूपभावार्थेन[5] निर्णीयते[6]। 'गीर्णे गिरौ' (श्लो. ११) इत्यत्र गिरिशब्दस्य स्त्रीलिङ्गपुंलिङ्गयोस्तुल्यरूपत्वेऽपि पर्वतवाचकस्य पुंलिङ्गत्वावधारणाद् इह तद्विलक्षणगरणरूपभावार्थेन स्त्रीलिङ्गत्वमवसीयते। प्रत्ययार्थाभ्यां समुच्चिताभ्यां यथा—सहस्रमस्यास्तीत्यर्थे 'तपःसहस्राभ्यां विनीनी' 'अण् च' (५. २. १०२-३) इति मत्वर्थीयेऽण्प्रत्यये साहस्राः सामन्ता इत्यादिरूपेण साहस्रशब्दो वाच्यलिङ्गः। समूहार्थे तु भिक्षादिषु (४. २. ३८) पाठाद् अण्प्रत्यये सति नपुंसकलिङ्गः। एवं च सति साहस्रकारीष... (श्लो. ४३) इत्यत्र द्वन्द्व-

समासमध्यवर्तितया साहस्रशब्दस्य लिङ्गसंदेहे सति अण्प्रत्ययस्य समूहार्थावलम्बनेन भैक्षादिशब्दवत् (४. २. ३८) नपुंसकत्वनिर्णायकत्वमित्यादि यथासंभवमुदाहार्यम् ।

आद्यशब्दगृहीतेन रूपभेदेन यथा—शमथः, दमथः (श्लो. ३); छिदा, भिदा (श्लो. ५); विधूननं, विधुवनम् (श्लो. ४) इत्यादि । विशेषविधिना यथा—'वेदना न ना' (श्लो. ६) । 'अथास्त्रियां तु निष्ठेवः' (श्लो. ३७) इत्यादि । 'डिम्बे डमरविप्लवौ' (श्लो. १४) इत्यादौ साहचर्यात् समासाच्च लिङ्गनिश्चय इति द्रष्टव्यम् ।। अत्र संकीर्ण इत्युपलक्षणम् । तथा चेह ग्रन्थे सर्वत्रापि नाम्नामेष एव लिङ्गनिर्णयोपायो बोद्धव्यः । ननु यद्येवं ग्रन्थादावेवेदं वक्तव्यमिति चेत् सत्यम् । प्रागुक्ते स्वर्गादिवृन्दिष्ठान्ते (श्लो. ३. १. ११२) शब्दप्रपञ्चे परिचितनिरुक्तिमार्गस्य प्रकृतिप्रत्ययविवेकः सुकरः इत्यत्रैवेदमुक्तम् । अत एव लिङ्गसंग्रहवर्गादावप्ययमर्थः कथयिष्यत इति सर्वमनवद्यम् ।।

कर्म क्रिया इत्येते व्यापारस्य नामनी । क्रियत इति कर्म । औणादिको मनिन्प्रत्ययः (उ. ४. १४५) । 'कर्म व्याप्ये क्रियायां च पुंनपुंसकयोर्मतम्' इति रुद्रवचनात् कर्मशब्दः पुंनपुंसकलिङ्ग इति दशटीकासर्वस्वकारः (३, पृ. ५१) । 'क्षपयत्यशुभं कर्म कर्माणं चिनुते शुभम्' इति प्रयोगश्च तेनैव दर्शितः । 'कृञः श च' (३. ३. १००) इति भावार्थे शप्रत्यये तस्य ङिद्वद्भावेन गुणाभावे सति 'रिङ शयग्लिङक्षु' (७. ४. २८) इति रिङादेशे च क्रियाशब्दः । अत्र शेषकारः—'कारः कृत्यं न ना कारिः प्रश्नोक्त्योः कारिका कृतिः' इति । 'डुकृञ् करणे' इत्यतो भावे घञि कारः । 'विभाषा कृवृषोः' (३. १. १२०) इति भावार्थे क्यप्प्रत्यये कृत्यम् । न ना; पुंलिङ्गं न भवतीत्यर्थः । 'कृञः श च' (३. ३. १००) इति चकारेण क्यप्प्रत्यये कृत्याशब्दः स्त्रीलिङ्गः । 'विभाषाख्यानपरिप्रश्नयोरिञ् च' (३. ३. ११०) इति इञ्प्रत्यये कारिशब्दः स्त्रीलिङ्गः । 'कां कारिमकार्षीः' इत्यादिप्रश्नोत्तरयोरेव कारिशब्दस्य साधुत्वम् । धात्वर्थनिर्देशे ण्वुलि (३. १. १३३) कारिका । स्त्रियां क्तिनि (३. ३. ९४) कृतिः ।।

तत्सातत्ये गम्ये स्युरपरस्पराः । संततस्य भाव इति संततशब्देन विग्रहेऽपि 'अविरविकन्यायेन' सततशब्दात् तद्धितोत्पत्तौ सातत्यमिति रूपम् । तस्या अध्ययनगत्यादिकायाः क्रियायाः सातत्ये अपरैः परैः संघीभूय बहुभिरविच्छेदेन क्रियमाणायाः प्रबन्धे विवक्षिते सति अपरस्परा इत्ययं शब्दः प्रवर्तत[7] इत्यर्थः । अपरे च परे

चेति द्वन्द्वसमासे 'अपरस्पराः क्रियासातत्ये' (६. १. १४४) इति सूत्रेण सुडागमो निपातितः । अत्र काशिकाकारेण 'अपरस्पराः सार्था यान्ति'[8] इत्युदाहरणं प्रदर्श्य, तस्यार्थोऽपि दर्शितः[9] 'संततमविच्छेदेन गच्छन्तीत्यर्थः' इति (२, पृ. १४७) । अत्र द्वन्द्वसमासे परवल्लिङ्गतानियमात् (२. ४. २६) परशब्दस्य च सर्वनामत्वेन वाच्यलिङ्गत्वाद् 'अपरस्पराणि ब्राह्मणकुलानि वहन्ति' इत्युदाहार्यम्[10] । क्रियाप्रबन्धविवक्षाया अभावे तु अपरस्परा सुडागमरहित एव प्रयोज्यः[11] । अत्र सुभूतिचन्द्रः—'तत्सातत्य इत्यत्र सातत्यं क्रियावतां क्रियायाश्च विशेषणम् । तथा च यत्र क्रियावतां तत्र वाच्यलिङ्गत्वम् अपरस्परशब्दस्य । यत्र क्रियायास्तत्र नपुंसकत्वमिति पूर्णचन्द्रः । अत एव "निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परम्" इति भागुरिः । क्रियाविशेषणत्वे यथा—अपरस्परमधीयन्ते माणवकाः' इति ॥ १ ॥

[1] Tv adds आद्यशब्देन प्रायशो रूपभेदेन साहचर्यविशेषविधीनां ग्रहणम् । तथा चात्र शेषकारः—'रूपेणोक्त्या साहचर्याल्लिङ्गोत्प्रेक्षा प्रकीर्णके' इति. [2] °क्तार्थत्वं Gm3, Tv. [3] °प्रकरणाविपातेनात्रैव Tj1, Tj2. [4] कथयिष्यमाणत्वात् Tv. [5] 'यजयाच ... नङ्' भावार्थे विधीयते. [6] निश्चीयते B5, B6. [7] युज्यते Gm3, Tv. [8] गच्छन्तीति मुद्रितग्रन्थे. [9] विवृतः B5, B6. [10] Tv adds दर्शयितुं तत्सातत्य इत्युक्तम्. * Tv adds: तथा आनन्दनसभाजने (श्लो. ७) इत्यत्र समासे सुपो लुकि कृते निर्देशसाधारण्याद् आनन्दनशब्दस्य पुंनपुंसकत्वसंदेहः । सभाजनशब्दस्य द्विवचनान्तस्य स्त्रीनपुंसकविषयः संदेह एव । [11] अपरपरा इति.

(पा.) [1]प्रकृति—अपरस्पराः । प्रस्तावभावाद्युपाधिभिः पूर्वोक्तप्रकीर्णशब्दसंग्रहार्थेऽस्मिन् संकीर्णवर्गे प्रकृत्यर्थप्रत्ययार्थरूपभेदैर्लिङ्गं तर्कयेत् । अपरस्पराः इत्यत्र प्रकृत्यर्थो लिङ्गगमकः[2] । 'स्फातिर्वृद्धौ' (श्लो. ६) इत्यत्र प्रत्ययार्थः । कर्म क्रिया इत्यत्र रूपभेदः । [3]भ्रमिर्भ्रमे इत्यत्र साहचर्यमगोचरम् । विशेषविधेरनुक्तत्वात् तदनुपादानम् । गीर्णिर्गिरौ (श्लो. ११) इत्यत्र साहचर्यम् । 'संवेदो वेदना न ना' (श्लो. ६) इति क्वचिद् विशेषविधिः ।। क्रियासातत्ये विषये क्रियावत्सु त्रिलिङ्गोऽपरस्परशब्दः स्यात् । अपरे च परे च अपरस्परे । अपरस्परा वाहनार्थं गच्छन्ति । क्रियायां नपुंसक एव । अपरस्परं गच्छन्ति । 'निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परम्' इति भागुरिः ।। १ ।।

[1] A1 adds an invocatory verse:

कृपाशीलां बालां विपुलगुणशालां भ्रमरकै-
र्लसत्फालां कालान्तर[सु]कुलपालां शिवकलाम् ।

त्रयीमूलाजालां दररुचिरडोलान्तरगतां
चिदुद्वेलां [का]लाङ्कुरनिकुरलीलां हृदि भजे ।।

धेनुवागीश्वर्यै नमः ।
[2] 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) इति परशब्दस्य सर्वनामत्वात् त्रिलिङ्गता.
[3] 'भ्रमो भ्रमौ' इति ९ श्लोके.

साकल्यासङ्गवचने पारायणतुरायणे ।
यदृच्छा स्वैरिता हेतुशून्या त्वास्था विलक्षणम् ।। २ ।।

(वि.) साकल्येति––पारं साकल्यमयन्ते प्राप्नुवन्ति येनेति पारायणम् । 'अय पय गतौ' । साकल्यवचनस्य वेदपारायणादेर्नाम । तुरया त्वरया अयन्ते येन तुरायणम् । परायणमिति वा पाठः । धर्ममेव परमित्ययन्ते[1] येन परायणम् । [2]आसक्तिवचनस्य [3]धर्मपरायणादेर्नाम ।। स्वयमृच्छा[4] इच्छा यदृच्छा । स्वैरिणः स्वतन्त्रस्य भावः स्वैरिता । स्वेच्छानामनी ।। हेतुशून्या[5] आस्था अकारणस्थितिः विलक्षणमुच्यते । विगतं [6]लक्षणमालोचनमत्रेति विलक्षणम् । [7]विलक्षणनाम ।।२।।

[1] K_2, K_4 add नियतं गच्छन्ति. [2] आसङ्ग° K_5. [3] °पारायणादेः K_4, K_6.
[4] K_5 omits ऋच्छा. [5] प्रयोजनशून्या Pt_2. [6] कारणं for आलोचनं Pt_2.
[7] अकारण° K_2, K_3, K_4.

(विव.) साकल्य––तुरायणे । वेदसंहितादेः यस्य कस्यचिद् ग्रन्थस्य साकल्येन कथनं साकल्यवचनम् । सङ्गः स्खालित्यम् । तद्राहित्येन कथनम् असङ्गवचनम् । तयोरुभयोरर्थयोः क्रमेण द्वावपि शब्दौ भवतः[1] । पारं साकल्यम् अयन्ते प्राप्नुवन्ति येन तत् पारायणम् । त्वरणं तूः । 'ञित्वरा संभ्रमे' । भावे क्विप् । 'ज्वरत्वर...' इत्यादिना (६. ४. २०) ऊठ् । तुरा त्वरया असक्तमयन्ते गच्छन्ति येन तत् तुरायणम् । 'पारायणतुरायणचान्द्रायण...' (५. १. ७२) इति निर्देशात् साधुत्वम् । [2]चिरंतनव्याख्यातारस्तु––'पारायणपरायणे' इति पठित्वा व्याचक्रुः––'साकल्यमासङ्गश्च तौ वदतः' इति । अत्र साकल्यार्थः पारायणशब्दः । तथा च भट्टिकाव्ये––'रत्नपारायणं नाम[3] लङ्केयं मम मैथिलि' इति (५. ८९) । अत्र साकल्यार्थो गम्यत इति साकल्यवचनत्वम् । आसङ्ग आसक्तिः । तद्वाचकः परायणशब्दः । यथा––'अथ मोहपरायणा सती' (कु. सं. ४. १) इति । मोहासक्तिमतीत्यर्थः । यदृच्छा स्वैरिता । [4]स्वैरी स्वतन्त्रः । तस्य भावः स्वैरिता ।

स्वेच्छाकृतव्यापारो यदृच्छेत्यर्थः । 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' इति गत्यर्थाद् धातोरकारप्रत्यये (३. ३. १०३) ऋच्छा । स्वयमृच्छा स्वेच्छा । 'ऋलृक्' (मा. सू. २) इति सूत्रे 'लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः' इति वार्त्तिककारोच्चारणात् साधुत्वम् । 'स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया' इति माघश्लोकव्याख्याने (शिशु. १. ७१) वल्लभाचार्यः[5] । 'यदृच्छाशब्दो स्वेच्छार्थो व्युत्पत्तिरहितः । न ह्यत्रावयवार्थानुसारिणी व्युत्पत्तिरस्तीति' ।। हेतुशून्या त्वास्था[6] विलक्षणम् । प्रयोजनरहिता यत्र कुत्रचिदास्था स्थितिर्विलक्षणमुच्यते । विगतं लक्षणं स्थितिज्ञापकं प्रयोजनमत्रेति विलक्षणम् ।। २ ।।

[1] Gm3, Tv add इत्यर्थः [2] सुभूतिचन्द्रसर्वानन्दादयस्तु Gm3, Tv. [3] नाम्ना इति मुद्रितग्रन्थे. [4] 'मन्दस्वच्छन्दयोः स्वैरः' इति वक्ष्यते (३. ३. १९२) । स्वतन्त्रप्रवृत्तिमान् स्वैरी । तस्य भावः स्वैरिता । स्वेच्छाकृतव्यापारो यदृच्छेत्यर्थः Tj1, Tj2, Tv. [5] काश्मीरीयवल्लभदेवव्याख्याने न दृश्यते. [6] आस्था B5, B6.

(पा.) साकल्य—परायणे[1] । पारायणशब्दः साकल्यवचनः । साकल्यं कात्स्न्र्यम् । [2]परायणशब्दः आसङ्गवचनः । आसङ्ग आश्रयः । 'त्रिषु स्यात् तत्परेऽभीष्टेऽप्याश्रये क्ली परायणम्' इति रभसः । 'अथ मोहपरायणा सती' (कु. सं. ४. १.) इत्यत्र वहुव्रीहिवशात् स्त्रीलिङ्गः ।। यदृच्छा स्वैरिता । नियमत्यागनामनी । 'यदृच्छा नियमोज्झितिः' इति वैजयन्ती (पृ. १९२, श्लो. ६) ।। हेतु—विलक्षणम् । [3]हेतुशून्यं विलक्षणं स्यात् ।। २ ।।

[1] तुरायणे C1. [2] तुरायणशब्दः C1. [3] हेतुशून्या A1.

शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः ।
अपदानं कर्मवृत्तं काम्यदानं प्रवारणम् ।। ३ ।।

(वि.) शमथ इति—शमनं शमथः । शमः, शान्तिश्च । 'शम [1]उपशमे' । क्रोधाद्युपरमस्य नामानि ।। दमनं दान्तिः । दमथः, दमश्च । 'दमु उपशमे'[2] । क्लेशसहनस्य नामानि ।। अपदायते शोध्यत[3] इति अपदानम् । 'दैप् शोधने' । अवदानमिति वा पाठः । वृत्तस्य [4]शुद्धकर्मणो नाम ।। [5]प्रवार्यतेऽशुभादिकमनेनेति प्रवारणम् । 'वृञ् वरणे' । ऐच्छिकदानस्य नाम[6] ।। ३ ।।

[1] उपशमने J2, K2. [2] उपशमने J2, K5. [3] शुध्यते Pt2. [4] शुद्धस्य K4, K6. [5] K5, K6 omit. [6] J2 adds काम्येन काम्यस्य वा दानं काम्यदानम्.

(विव.) शमथः—शान्तिः। कामक्रोधाद्युपरमस्य नामानि। 'शमु उपशमे' इत्यस्मात् 'शमिदमिभ्यामथच्' इत्यौणादिके[1] अथच्प्रत्यये शमथः ।। घञि (३. ३. १८) 'नोदात्तोपदेशस्य...' (७. ३. ३४) इति [2]वृद्धिप्रतिषेधे शमः ।। स्त्रियां क्तिनि (३. ३. ९४) 'अनुनासिकस्य क्विझलोः क्ङिति' (६. ४. १५) इति दीर्घे शान्तिः ।। दान्तिः—दमः। मनसः प्रत्याहारादिक्लेशसहिष्णुतायाः नामानि। 'दमु उपशमे' इति धातोः पूर्ववदेव शब्दत्रयं व्युत्पादनीयम् ।। अपदानं कर्मवृत्तम्। [3]वृत्तं दृढं शुद्धमित्यर्थः। निर्व्यूढमित्येके। तथाभूतं कर्म अपदानम्। अप इति निपातो वर्जनार्थः। पुरुषोऽपदायते शुध्यते इतरसाधारण्यपरिहारेण[4] सोत्कर्षः प्रतीयतेऽनेनेति अपदानम्। 'दैप् शोधने'। करणे ल्युट् (३. ३. ११५) ।। काम्यदानं प्रधारणम्। [5]काम्यस्य कमनीयस्य कनकरत्नादेर्वस्तुनः कामनापूर्वकं च दानं[6] प्रधारणमिति सुभूतिचन्द्रः। दातृप्रतिग्रहीत्रोः प्रकृष्टं मनसो धारणमत्रेति प्रधारणम्। अन्ये तु पाठान्तरेण निर्ब्रुवते—प्रभूतधनप्राप्त्या याचकैरलंबुद्ध्या कृतं प्रकृष्टं वारणं निवारणम्[7] अत्रेति [8]प्रवारणमिति ।। ३ ।।

[1] 'बाहुलकाच्छमिदमिभ्याम्' [अथः] इति कौमुद्याम् (उ. ३. ११३). [2] वृद्ध्यभावः Gm3, Tv. [3] Gm1, Gm3 add वृत्तं शुद्धं. [4] इतरासाधारण्येन Tj1, Tj2. [5] कामस्य कमितुः Tv. [6] दानं प्रदानमित्यर्थः इति सुभूतिः Tv. [7] Tj1, Tj2 add प्रतिषेधवचनम्. [8] प्रचारणमिति टीकासर्वस्वे (३, पृ. ५२).

(पा.) शमथः—शान्तिः। [1]क्रोधरागादिराहित्यनामानि ।। दान्तिः—दमः। क्लेशसहिष्णुतानामानि ।। अपदानं कर्मवृत्तम्। अन्तस्थद्वितीयं [2]पवर्गद्वितीयं च स्यात्। वृत्तं कर्म [3]अपदानं स्यात् ।। काम्यदानं प्रवारणम्। काम्यवस्तुप्रदानं प्रवारणं स्यात् ।। ३ ।।

[1] कामक्रोधादि° B3, C1. [2] B3 omits. [3] अवदानं A1, C1.

वशक्रिया संवननं मूलकर्म तु कार्मणम्।
विधूननं विधुवनं तर्पणं प्रीणनावनम् ।। ४ ।।

(वि.) वशक्रियेति—संवन्यते वशीक्रियतेऽनेनेति संवननम्[1]। 'वन संभक्तौ'[2]। वशीकरणस्य नाम ।। कर्मैव कार्मणम् । मूलैरौषधादिमूलैर्यत् क्रियते तस्य कर्मणो नाम ।। विधूयतेऽनेनेति विधूननम्[3]। 'धूञ् कम्पने'। विधुवनं च । 'धू विधूनने'। व्यजनादेश्चालनस्य[4] नामनी ।। [5]तृप्यतेऽनेनेति तर्पणम् । 'तृप प्रीणने'। प्रीयतेऽनेनेति प्रीणनम् । 'प्रीञ्[6] तर्पणे'। अव्यतेऽनेनेत्यवनम् । 'अव रक्षणादौ'[7]। ब्राह्मणादीनाम् अन्नादितर्पणस्य नामानि ।। ४ ।।

[1] सम्यग्वननं व्यापारः Pt2.　[2] 'वनु व्यावृत्तौ' Pt2.　[3] विधुतिः Pt2.
[4] J2 adds इतस्ततः.　[5] J2, Pt2 add तृप्यति भोक्ता.　[6] 'प्रीङ् प्रीणने' K2, O.
[7] 'अव प्रीतौ' K6.

(विव.) वशक्रिया संवननम्। मणिमन्त्रादिभिर्वशीकरणस्य नामनी। वशस्य स्वानुवृत्तेः[1] क्रिया करणं वशक्रिया। सम्यग् वननं संवननम् (३. ३. ११५)। वनु[2] इति धातुः। अस्यायमर्थः। वनुधातुरस्मिन्नर्थे वर्तत इति शृङ्गग्राहिकया नोच्यते। किंतु सर्वेऽप्यर्थाः अस्य धातोरिति। अतोऽत्र वशीकरणमर्थः।। मूलकर्म तु कार्मणम्। 'तस्येदम्' (४. ३. १२०) इत्यण्। 'अन्' (६. ४. १६७) इति प्रकृतिभावः। 'कार्मणं मन्त्रतन्त्रादियोजने [3]कर्मणि स्मृतम्' इति विश्वप्रकाशः (पृ. ५२, श्लो. ५६)। तथा च मुरारिनाटके (अनर्घ. ३. १६) प्रयोगः—

'निर्माय कार्मणमृचामघमर्षणीना-
मुन्मार्जनिर्जगदघानि तवाद्य वाचः'।

इति। अघमर्षणमन्त्राणां वशीकरणं विधाय तन्मन्त्रनिर्वर्त्यसकलदुरितविध्वंसन-कार्यस्य स्वयमेव विधायकास्तव वाच इत्यर्थः। अथवा इह प्रवृत्तिहेतुभूतं वाचिकं मूलशब्देनोच्यते। 'यद्वाचा वदति तत्कर्मणा करोति' इति श्रुतेः (नृसिंह. उ. १)। वाचिकं श्रुत्वा यत्कर्मणा क्रियते तत् कार्मणमित्यर्थः। तथा च 'तद्युक्तात् कर्मणोऽण्' (५. ४. ३६) इत्यत्र काशिकाकारः (२, पृ. ८६)—'व्याहृतार्थया वाचा यत्कर्म युक्तं तदभिधायिनः कर्मशब्दात् स्वार्थेऽण्प्रत्ययो भवति। कर्मैव कार्मणम्। वाचिकं श्रुत्वा तथैव यत्कर्म क्रियते तत्कार्मणमित्युच्यते' इति। कात्योऽपि—'श्रुत्वा तु वाचिकं कर्म क्रियमाणं तु कार्मणम्' इति। अत्रापि व्याख्याने प्राक्प्रदर्शित एव प्रयोगः। [4]निर्मायं कैतवरहितम्। तच्च तत्कार्मणं चेति निर्माय-

कार्मणमित्येकं पदम् । अघमर्षणमन्त्रव्याहृतार्थयुक्तकर्मरूपत्वात् कार्मणमिति वाचामाविष्टलिङ्गं विशेषणम् । अत एव जगदघानामुन्मार्जनशीला इति स्वार्थिकप्रत्ययान्तानां प्रकृतिलिङ्गकत्वं स्यात् । वर्गसिद्धत्वाद् इह रूपभेदेन कार्मणशब्दस्य नपुंसकलिङ्गत्वं प्रकाश्यते ।। विधूननं विधुवनम् । वक्ष्यमाणशेषकारोक्तशब्दसहिता विधूननादयो द्वादशशब्दा व्यजनपादपादिचलनप्रयोजकव्यापारस्य वाचकाः । विधूयते व्यजनादिकमनेन प्रयोजकव्यापारेणेति विधूननम् । 'धूञ् कम्पने' । विपूर्वो हेतुमण्णिचि (३. १. २७) 'धूञ्प्रीञोर्नुग्वक्तव्यः' (वा. ७. ३. ३७) इति करणे ल्युटि (३. ३. ११५) 'णेरनिटि' (६. ४. ५१) इति णिलोपः ।। विपूर्वाद् 'धू विधूनने' इत्यतो ल्युटि (३. ३. ११५) [5]कुटादित्वेन (१. २. १) गुणाभावाद् उवङादेशे विधुवनम् । शेषे—

'विधूनना विधवनं विधूतिर्विधुतिः स्त्रियौ ।
विधून्यं च विधव्यं च विधूयं च विधाव्यवत् ।।
विधुवो विधवस्तुल्यौ' ।

इति । 'धूञ् कम्पने' इत्यस्मात् णिचि नुकि (वा. ७. ३. ३७) 'ण्यासश्रन्थो युच्' (३. ३. १०७) इति युचि विधूननाशब्दो रूपभेदात् स्त्रीलिङ्गः ।। क्र्यादेः स्वादेर्वा 'धुञ् कम्पने' इत्यतो ह्रस्वात् ल्युटि गुणे विधवनम् ।। 'धूञ् कम्पने' इत्यतो दीर्घान्तात् क्र्यादेः स्वादेर्वा 'धू विधूनने' इत्यतः तौदादिकाद्वा स्त्रियां क्तिनि (३. ३. ९४) विधूतिः । 'धुञ् कम्पने' इत्यतो ह्रस्वान्ताद् विधुतिः ।। विपूर्वाद् धूनयतेः 'अचो यत्' (३. १. ९७) इति यत्प्रत्यये विधून्यम् । 'धू विधूनने' इत्यस्मात् कुटादेर्यति विधूयम् । 'ओरावश्यके' (३. १. १२५) इति धुनातेर्धुनोतेर्वा ण्यति वृद्धौ 'वान्तो यि प्रत्यये' (६. १. ७९) इति वान्तादेशे च विधाव्यम् । धुवतेः कुटादेरप्रत्यये उवङादेशे विधुवः । स्वादेः क्र्यादेर्वा अप्रत्यये गुणे च विधवः । अन्तिमयोर्द्वयोः लिङ्गतः समत्वमिति शेषकारीयतुल्यशब्दस्यार्थः ।। तर्पणं प्रीणनावने । अन्नादिना यत् परस्य तृप्तिजननं तस्य नामानि । तृप्यति भोक्ता अनेनेति तर्पणम् । 'तृप प्रीणने' (३. ३. ११५) ।। [6]प्रीयतेऽनेनेति प्रीणनम् । णिचि 'धूञ्प्रीञोर्नुग्वक्तयः' (वा. ७. ३. ३७) इति नुगागमः ।। अव्यतेऽनेन पुमानिति अवनम् (३. ३. ११५) । 'अव [7]रक्षणगतिप्रीतिषु' ।। ४ ।।

[1] °वर्तित्वस्य Gm1, Tv. [2] 'वनु क्रियासामान्यार्थे' Tj1, Tj2. [3] कर्मकारके

इति मु. ग्र.　[4] मुरारिश्लोके.　[5] 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति ङित्त्वाद् गुणाभावः.
[6] Tv adds 'प्रीञ् तर्पणे'.　[7] Tv gives the full sūtra, 'अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छावाप्त्यालिङ्गनहिंसादानभागवृद्धिषु'.

(पा.) वशक्रिया संवननम्। वश्यकर्म [1]संवननं स्यात्। 'संवननं समालोचे वशीकारे प्रकीर्तितम्' इति विश्वप्रकाशिका (पृ. ९८, श्लो. १५६)। मूलकर्म तु कार्मणम्। मन्त्रतन्त्रादियोजनानाम। 'कार्मणं मन्त्रतन्त्रादियोजने कर्मकारके' इति विश्वः (पृ. ५२, श्लो. ५९)॥ मूलकर्म च कार्मणम्, इति पाठोऽप्युपपन्नः। 'संवननं कार्मणं वशीकरणम्' इति हलायुधः (अ. मा. ४. ३१)॥ विधूननं विधुवनम्। [2]विधुतिनामनी। 'विदिरिंचुट'[3]॥ तर्पणं प्रीणनावनम्। [4]तृप्तिनामानि। 'तनिवि'[3]॥ ४॥

[1] संवदनं A1, C1.　[2] विधूति° C1.　[3] B3 omits.　[4] तृप्तजन° B3.

पर्याप्तिः स्यात् परित्राणं हस्तधारणमित्यपि।
सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा॥ ५॥

(वि.) पर्याप्तिरिति—[1]परिरक्षितुमाप्तिः पर्याप्तिः। 'आप्लृ व्याप्तौ'। परित्रायतेऽनेनेति परित्राणम्[2]। 'त्रैङ पालने'। वधोद्यतस्य हस्तस्य धारणमत्रास्तीति हस्तधारणम्। वध्यरक्षणस्य[3] नामानि॥ सीव्यते तन्तुभिः संतन्यत इति सीवनम्। सेवनम्। स्यूतिश्च। 'षिवु तन्तुसंताने'। छिन्नवस्त्रादेः सूच्यादिना सीवनस्य[4] नामानि॥ विदीर्यत इति विदरः। 'दॄ विदारणे'। स्फुटचत इति स्फुटनम्। 'स्फुटिर् विशरणे'[5]। भिद्यत इति भिदा। 'भिदिर् विदारणे'। घटादिच्छेदनस्य[6] नामानि॥ ५॥

[1] रक्षितुं परितः आप्यते K2.　[2] परितः त्राणनं J2, K3.　[3] रक्ष्यस्य K4, K6.
[4] सेवनस्य K5.　[5] विदारणे K6.　[6] °भेदनस्य J2.

(विव.) पर्याप्तिः—इत्यपि। वध्यघातुकयोर्मध्येऽनुप्रविश्य घातुकहस्तस्य धारणं कृत्वा यद् वध्यस्य परिरक्षणं तस्यैतानि[1] नामानीति सुबोधिनीकारः। त्रायस्व त्रायस्वेति विक्रोशमुपश्रुत्य मारणोद्यतस्य निषेधः[2] पर्याप्त्यादित्रयमिति सुभूतिचन्द्रश्च। 'पर्याप्नोतु[3] सुहृदं महाभागः' इति महावीरनाटके प्रयोगश्च।

पर्याप्नोतु वालिना हन्यमानं सुग्रीवं रक्षतु रामः[4] इत्यर्थः। परिरक्षितुमाप्तिः पर्याप्तिः। क्तिन् (३. ३. ९४)। भावे ल्युटि (३. ३. ११५) परित्राणम्। मारकहस्तस्य धारणं निर्व्यापारीकरणमत्रेति हस्तधारणम्। रक्षकहस्तेन वध्यस्य धारणं रक्षणमिति वा हस्तधारणम्। [5]घातकहस्तस्य [6]वारणं निवारणमत्रेति निरुच्य[7] हस्तवारणमिति केचित् पठन्ति॥ सेवनं—स्यूतिः। छिन्नवस्त्रादेः सूच्यादिसंधानकरणस्य नामानि। 'षिवु तन्तुसंताने' इति धातोर्ल्युटि (३. ३. ११५) लघूपधगुणे (७.३.८६) च सेवनम्। 'ष्ठिवुसिव्योर्दीर्घश्च' (सर. कण्ठा. २. ४. १६७) इति[8] विकल्पेन दीर्घे सीवनम्॥ तस्मादेव स्त्रियां क्तिनि (३.३.९४) 'च्छ्वोः शूडनुनासिके च' (६. ४. १९) इति ऊठि यणादेशे च स्यूतिः॥ विदरः स्फुटनं भिदा। वेणुदण्डादीनामग्रादामूलं द्विधाकरणस्य नामानि। 'दॄ विदारणे' इति धातोः 'ॠदोरप्' (३. ३. ५७) इत्यप्प्रत्यये विदरः॥ 'स्फुट विशरणे' इति धातोर्ल्युटि कुटादित्वेन ङित्त्वाद् (१. २. १) गुणाभावे स्फुटनम्॥ अत एव धातोर्घञि ङित्त्वाभावेन गुणे स्फोटश्च॥ 'भिदिर् विदारणे' इत्यतः 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इति अङ्प्रत्यये भिदा[9]। घञि भेदः, ल्युटि भेदनं च॥ ५॥

[1] Tj2 omits एतानि. [2] निषेधे Tj2. [3] 'पर्याप्तो नु' इति टीकासर्वस्वे (३, पृ. ५३). [4] Tj2 omits. [5] मारक° B5, B6. [6] धारणं B5, Gm1. [7] कृत्वा Tj2. [8] पृषोदरादित्वाद् वा दीर्घः इति भा. दी. (पृ. ४४७). [9] Tv adds 'शेषे—स्फोटभेदौ च भेदने' इति; ङित्त्वाभावेन गुणे घञि स्फोटः.

(पा.) पर्याप्तिः—[1]इत्यपि। अलमिति [2]वचननामानि। [3]'चालुनु अंट्टु'। सेवनं—स्यूतिः। सूच्यादिना स्यूतिनामानि। 'कुट्टुट'। विदरः[4]—भिदा। विदारणनामानि[5]। 'चीरुट'॥ ५॥

[1] हस्तवारणमिति पाठः A1, C1. [2] बुद्धि° B3. [3] B3 omits. [4] विदारः A1. [5] द्विकरण° B3.

आक्रोशनमभीषङ्गः संवेदो वेदना न ना।
संमूर्च्छनमभिव्याप्तिर्याच्ञा भिक्षार्थनार्दना॥ ६॥

(वि.) आक्रोशनमिति—आक्रोशति अनेनेत्याक्रोशनम्। 'क्रुश आह्वाने रोदने च'। अभिषज्यत इत्यभीषङ्गः[1]। 'षञ्ज सङ्गे'। शपनस्य नामनी॥

संविद्यत[2] इति संवेदः । वेदना च । 'विद ज्ञाने' । मिथः संवित्तेर्नामिनी ॥ संमूर्च्छ्यते[3] व्याप्यत इति संमूर्च्छनम् । 'मूर्च्छा मोहसमुच्छ्राययोः' । अभिव्याप्यत इत्यभिव्याप्तिः[4] । 'आप्लृ व्याप्तौ' । धूपगन्धादेः समन्ताद् व्याप्तेर्नामिनी[5] ॥ याच्यत इति याच्ञा । 'टुयाचृ याच्ञायाम्' । भिक्ष्यत इति भिक्षा । 'भिक्ष भिक्षायाम्'[6] । अर्थ्यत इत्यर्थना । 'अर्थ उपयाच्ञायाम्' । अर्द्यते[7] याच्यत इत्यर्दना । 'अर्द गतौ याचने च' । याचनानामानि ॥ ६ ॥

[1] अभिषङ्गः K6. [2] संवेदनं Pt2. [3] समन्ताद् मूर्च्छनं व्याप्तिः Pt2. [4] अभितो व्याप्तिः J2. [5] व्यापन° K5. [6] याच्ञायाम् K3, K6. [7] अर्दनं Pt2.

(विव.) आक्रोशनमभीषङ्गः । दुरात्मनानेन गर्हितं कर्माचरितमित्यादिरूपेण निष्ठुरभाषणस्य नामनी । आक्रोशन्ति जना अनेनेत्याक्रोशनम् । 'क्रुश आह्वाने रोदने च' । करणे ल्युट् (३. ३. ११५) ॥ आभिमुख्येन शापवचनानां सञ्जनं करणमभीषङ्गः । 'षञ्ज सङ्गे'[1] । अभिपूर्व आक्रोशने । [2]'उपसर्गात् सुनोति . . .' इति (८. ३. ६५) षत्वम् । 'उपसर्गस्य घञि . . .' (६. ३. १२२) इति दीर्घः ॥ संवेदो वेदना न ना । [3]ययोः कयोश्चित् मिथः संप्रतिपत्तेर्नामनी इति केचित् । ज्ञानविशेषस्यानुभवस्य नामनी इति सर्वानन्दः[4] । 'विद ज्ञाने' इत्यतः संपूर्वाद् घञि (३. ३. १८) संवेदः ॥ 'घट्टिवन्दिविदिभ्य उपसंख्यानम् (वा. ३. ३. १०७) इति युचि वेदना ॥ न ना इति । पुंलिङ्गो न भवतीत्यर्थः । ल्युटि (३. ३. ११५) वेदनम् ॥ संमूर्च्छनमभिव्याप्तिः । [5]धूमादीनामन्ततः प्रसरणस्य नामनी । समन्ततो मूर्च्छनं संमूच्छनम् । 'मूर्च्छा मोहसमुच्छ्राययोः' । ल्युट् (३. ३. ११५) । अभितः समन्ततो व्याप्तिः अभिव्याप्तिः । क्तिन् (वा. ३. ३. ९४)[6] ॥ याच्ञा भिक्षार्थनार्दना । [7]दातारं प्रति स्वाभीष्टवस्तुविषयवाञ्छाविष्करणस्य नामानि । 'टुयाचृ याच्ञायाम्' इति धातोः 'यजयाच . . .' इत्यादिना (३. ३. ९०) नङ्प्रत्यये श्चुत्वेन च याच्ञा ॥ 'भिक्ष याच्ञायाम्' इत्यस्माद् 'गुरोश्च हलः' (३. ३. १०३) इत्यकारप्रत्यये भिक्षा[8] । 'अर्थ उपयाच्ञायाम्' इति चौरादिकाद् युचि (३. ३. १०७)[9] अर्थना ॥ 'अर्द गतौ याचने च' इति धातोः 'हेतुमति च' (३. १. २६) इति चकारेण स्वार्थे णिच्प्रत्यये युचि च अर्दना ॥ ब्रह्मवर्गोक्ताया अपि (पृ. ४६९) याच्ञायाः प्रागनुक्तपर्यायान्तरप्रदर्शनार्थं पुनरिहानुक्रमणमिति[10] ज्ञेयम् ॥ ६ ॥

[1] घञ् (३. ३. १८), 'नोदात्त...' इति (७. ३. ३४) वृद्धयभावः. [2] Tv gives the full Sūtra—'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्'. [3] एते वादिप्रतिवादिनोः अन्ययोर्वा मिथः Tv. [4] 'संवेदद्वयमनुभवे' इति मु. ग्र. (३, पृ. ५४). [5] Gm3, Tv add सर्जरस°. [6] 'क्तिन्नाबादिभ्यश्च वक्तव्यः'. [7] वाचा कर्मणा वा परकीयवस्तुविषयवाञ्छा° Gm3, Tv. [8] स्त्रियामप्रत्ययः (३. ३. १०२). [9] 'ण्यासश्रन्थो युच्'. [10] नपौनरुक्त्यम् Tj1, Tj2.

(पा.) आक्रोशनमभीषङ्गः। निर्भर्त्सननामनी। 'तिट्टुट'[1]। संवेदो वेदना न ना। ज्ञाननामनी। 'तेलिवि'॥ संमूर्च्छनमभिव्याप्तिः। सर्वतः प्रसरणनामनी। 'शिलोच्चये मूर्च्छति मारुतस्य' इति (रघु. २. ३४)॥ याच्ञा भिक्षार्थनार्दना। [2]याच्ञानामानि॥ ६॥

[1] B3 omits. [2] याचना° B3, C1.

वर्धनं छेदनेऽथ द्वे आनन्दनसभाजने।
आप्रच्छनमथाम्नायः संप्रदायः क्षये क्षिया॥ ७॥

(वि.) वर्धनमिति—[1]वर्ध्यते छिद्यत इति वर्धनम्। 'वर्ध छेदनपूरणयोः'। छिद्यत इति छेदनम्। 'छिदिर् द्वैधीकरणे'। छेदननामनी॥ [2]आनन्द्यत इत्यानन्दनम्। 'टुनदि समृद्धौ'। सभाज्यते प्रीयतेऽनेनेति सभाजनम्। 'सभाज [3]प्रीतिसेवनयोः'। [4]आपृच्छ्यत इत्याप्रच्छनम्। 'प्रच्छ ज्ञीप्सायाम्'। सुहृदाद्यालिङ्गनसंभाषणादिसुखावहस्य[5] नामानि॥ आम्नायते गुरुपारंपर्येणाभ्यस्यत इत्याम्नायः। 'म्ना अभ्यासे'। सम्यक् सरहस्यं [6]प्रदीयत इति संप्रदायः। 'डुदाञ् दाने'। गुरुपरंपरायातस्य विद्यास्थानस्य नामनी॥ क्षीयत इति क्षयः। क्षिया च। 'क्षि क्षये'[7]। आचारादिनाशस्य नामनी॥ ७॥

[1] वर्धो वर्धनम् Pt2. [2] आनन्दः Pt2. [3] प्रीतिदर्शने J2; प्रीतिदर्शनयोः K5, K6. [4] आपृच्छा Pt2. [5] °जन्यसुखस्य K5. [6] K6 adds अस्मै; शिष्याय J2. [7] 'क्षीष् हिंसायाम्' K4, K6.

(विव.) वर्धनं छेदने। घटपटादिवस्तूनां [1]शकलीकरणस्य नामनी। 'वर्ध छेदनपूरणयोः' इत्यतः चौरादिकात् ल्युटि (३. ३. ११५) वर्धनम्॥ 'छिदिर् द्वैधीकरणे' इत्यस्मात् छेदनम्। [2]वर्धनसाहचर्यात् प्रत्ययार्थवशेन च नपुंसकत्वम्।

युच्प्रत्ययान्तत्वे तु शब्दद्वयस्यापि स्त्रीलिङ्गः। एवमुत्तरत्रापि तत्र तत्र प्रत्ययवशेन लिङ्गविशेषनिर्णयः कार्यः ॥ अथ द्वे—आप्रच्छनम्। [3]प्रयाणादिसमये सुहृद्बान्धवादीनामालिङ्गनसंलापादिसंजातसुखानुभवस्य[4] नामानि। 'टुनदि समृद्धौ' इति धातोः आङ्पूर्वात् ल्युटि (३. ३. ११५) आनन्दनम्। 'मन्त्रि गुप्तभाषणे' इत्यत आङ्पूर्वात् ल्युटि आमन्त्रणमिति केचित् पाठान्तरेण[5] व्याचक्रुः ॥ 'सभाज प्रीतिसेवनयोः' इत्यतः चौरादिकात् ल्युटि सभाजनम्। 'सभाजनायोपगतान् [6]मुनीन्द्रान्' इति रघुवंशे (१४. १८) प्रयोगः ॥ 'प्रच्छ ज्ञीप्सायाम्' इति धातुः आङ्पूर्वं [7]आनन्दनार्थः। यथा—'आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्' इति कालिदासः (मेघ. १. १२)। ततो ल्युटि आप्रच्छनम् ॥ अथाम्नायः संप्रदायः। सद्गुरुपरंपरोपदेशप्राप्तस्य वेदव्याकरणादेः विद्यास्थानस्य नामनी। वेदमात्रेऽपि आम्नाय उक्तः। आम्नायते गुरुपारंपर्येणाभ्यस्यत इत्याम्नायः। 'म्ना अभ्यासे'। सम्यक् सरहस्यं शिष्याय प्रदीयत इति संप्रदायः। उभयत्रापि कर्मणि घञि (३. ३. १८) 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युगागमः। शब्दद्वयमपि [8]भावविहितघञन्तत्वेन सद्गुरुपरंपरागतसरहस्योपदेशमात्रवचनमिति केचित् ॥ क्षये क्षिया। क्षये आचारनाशलक्षणक्षयविशेषे क्षियाशब्दो वर्तत इत्यर्थः। अत एव 'क्षियाशीः प्रैषेषु तिङाकाङ्क्षम्' (८. २. १०४) इति सूत्रे काशिकाकारः (२, पृ. ४२०)—'क्षिया आचारभेदः,' धर्मव्यतिक्रम इति। 'क्षि क्षये' इत्यस्माद् 'एरच्' (३. ३. ५६)[9] क्षयः। 'क्षीष् हिंसायाम्'। 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इत्यङि क्षिया। एरचः पुंलिङ्गविषयः। अङस्तु स्त्रीलिङ्गः। अतो विषयभेदाद् न बाध्यबाधकभावः। यथा बाधाबाध इति गणवृत्तावप्युक्तम्। [10]स्वयं रथेन याति उपाध्यायं पदातिं गमयति इत्याद्याचारभेदः क्षियेति। शब्दद्वयमपि [11]अपचयमात्रवचनमिति केचित् ॥ ७ ॥

[1] Tv adds अनेक°. [2] B5, B6 omit वर्धन°. [3] गमनादि Gm3. [4] संभाषण° for संलाप° Gm3, Tv. [5] पाठान्तरमाहुः Gm1, Gm3. [6] स दिव्यान् इति मु. ग्र. (पृ. २८१). [7] साधो यामीत्यामन्त्रणेन सभाजय इति मल्लिनाथः. [8] घञ्प्रत्ययस्य भावार्थतया Tv. [9] Gm3, Tv add 'क्षि क्षये' इत्यस्माद् अच्प्रत्यये क्षयः. [10] स्वयमोदनं भुङ्क्ते, उपाध्यायं सक्तून् पाययति Tv. [11] नाशमात्रमिति Tj1, Tj2.

(पा.) वर्धनं छेदने। छेदननामनी। [1]'नरकुट'। अथ द्वे[2]—आप्रच्छनम्। यात्रादिषु [3]बन्धुमित्रादीनाम् अनुज्ञावाप्तिनामानि। 'आपृच्छस्व प्रियसखममुम्'

इति (मेघ. १. १२)। अथाम्नायः संप्रदायः। वंशपारंपर्यनामनी ।। क्षये क्षिया।[4] क्षयनामनी ।। ७ ।।

[1] B3 omits. [2] आमन्त्रण° B3, C1. [3] B3 omits मित्र. [4] A1, C1 add भये भियेति पाठे—भीतिनामनी.

ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे ।
व्यधो वेधे पचा पाके हवो हूतौ वरो वृतौ ।। ८ ।।

(वि.) ग्रह इति—[1]गृह्यत इति ग्रहः। ग्राहश्च। 'ग्रह उपादाने'। पत्राद्युपादानस्य नामनी ।। [2]उश्यते काम्यत इति वशः। 'वश कान्तौ'। काम्यत इति कान्तिः। 'कमु कान्तौ'। इच्छानामनी।। [3]रक्ष्यत इति रक्षणः। [4]रक्ष इति वा पाठः[5]। त्रायत इति त्राणम्। 'त्रैङ पालने'। रक्षणस्य नामनी ।। रण्यत[6] इति रणः। 'रण शब्दे'। क्वणनं क्वणः। 'क्वण शब्दे'। वीणादिक्वाणनामनी ।। विध्यत इति व्यधः। वेधश्च। 'व्यध ताडने' 'विध विधाने'। मणिमुक्तादिच्छिद्रक्रियानामनी ।। पच्यत इति पचा। पाकश्च। 'डुपचष् पाके'। शाकादिपक्तिनामनी[7] ।। हूयत इति हवः। हूतिश्च। 'ह्वेञ् स्पर्धायां शब्दे च'। आह्वानस्य नामनी ।। व्रियत इति वरः। वृतिश्च। 'वृञ् वरणे'। कन्यादिवरस्य[8] नामनी ।। ८ ।।

[1] ग्रहणं Pt2. [2] वशनं Pt2. [3] रक्षणं Pt2. [4] रक्षा J2, K2. [5] K2, K3 add 'रक्ष पालने'. [6] J2 adds शब्द्यते. [7] पचन° K5. [8] °वरणस्य K4, K6.

(विव.) ग्रहे ग्राहः। प्राप्तार्थस्य स्वीकरणस्य नामनी। 'ग्रह उपादाने' इति धातोः भावार्थे 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्प्रत्यये ग्रहः। घञि ग्राहः।। वशः कान्तौ। इच्छाया नामनी। 'वश कान्तौ'। कान्तिरिच्छा इति धातुवृत्तौ[1]। 'वशिरण्योरुपसंख्यानम्' (वा. ३. ३. ५८) इत्यपि वशः।। कमेः स्त्रियां क्तिनि[2] (३. ३. ९४) कान्तिः।। रक्षणस्त्राणे। रक्षणस्य नामनी। 'रक्ष पालने' इति धातोः 'यजयाच...' इत्यादिना (३. ३. ९०) नङ्प्रत्यये रक्षणः।। 'त्रैङ पालने' इत्यतो भावे ल्युटि त्राणम्।। अत एव प्रत्ययवशाद् नपुंसकत्वम्।। रणः क्वणे। शब्दकरणस्य नामनी। 'रण शब्दे'। 'वशिरण्योरुपसंख्यानम्' (वा. ३. ३. ५८) इत्यप्प्रत्यये रणः।। 'क्वण शब्दे'। 'क्वणो वीणायां च' (३. ३. ६५) इत्यपि

क्वणः। घञि क्वाणः ।। व्यधो वेधे। मणिमुक्तादौ छिद्रकरणस्य नामनी। 'व्यध ताडने'। 'व्यधजपोरनुपसर्गे' (३. ३. ६१) इत्यपि व्यधः ।। 'विध विधाने' इत्यतो भावे घञि (३. ३. १८) वेधः ।। पचा पाके। ओदनपचनक्रियाया नामनी। 'डुपचष् पाके'। षित्त्वादङि[3] (३. ३. १०४) पचा ।। घञि पाकः। पुंलिङ्गः। 'स्थागापापचो भावे' (३. ३. ९५) इति क्तिनि पक्तिरपि ।। हवो हूतौ। आह्वानस्य नामनी। 'ह्वेञ् स्पर्धायां शब्दे च'। 'ह्वः संप्रसारणम्...' (३. ३. ७२) इत्यनुवृत्तौ 'भावेऽनुपसर्गस्य' (३. ३. ७५) इत्यपि हवः। स्त्रियां क्तिनि (३. ३. ९४) [4]यजादिसंप्रसारणे (६. १. १५) पूर्वरूपत्वे[5] (६. १. १०८) दीर्घे हूतिः। शब्दादिवर्गोक्ताया (१, पृ. १०९) अपि हूतेः पर्यायान्तरप्रदर्शनार्थमिहाभिधानम्[6] ।। वरो वृतौ। वृतिर्वरणम् इष्टवस्तुविषयः प्रार्थनाविशेषः। तत्र वरशब्दो वर्तते। 'वृञ् वरणे'। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इति अप्प्रत्यये वरः। स्त्रियां क्तिनि वृतिः। अत्र सुभूतिचन्द्रः—वृतिर्ग्रामादिवेष्टनम्। तत्र वरशब्दो वर्तत इति। यस्तु प्रसन्नदेवताद्यनुग्रहलभ्यः पुत्रपश्वादिरूपो वरः सोऽत्र न विवक्षितः, [7]भावार्थवचनशब्दप्रस्तावाद् वृतिशब्दस्य तत्र प्रयोगाभावाच्च ।। ८ ।।

[1] मुद्रितमाधवीयधातुवृत्तौ न दृश्यते. [2] 'आयादयः...' (३. १. ३१) इति णिङभावे क्तिन् इति भा. दी. (पृ. ४४८); अनुनासिकस्य ... इति उपधाया दीर्घः. [3] 'षिद्भिदादिभ्योऽङ'. [4] 'वचिस्वपियजादीनां किति'. [5] 'संप्रसारणाच्च'. [6] Tv adds इति ज्ञेयम्. [7] भाववचनसमभिव्याहारात् Gm_3, Tv.

(पा.) ग्रहो ग्राहः। ग्रहणनामनी। 'ग्रहिंचु'[1] ।। वशः कान्तौ। अभिलाषनामनी। 'कोरिक'[1] ।। रक्षणस्त्राणे। रक्षा[2] त्राणे इति पाठान्तरम्। [3]रक्षणनामनी ।। रणः क्वणे। ध्वनिनामनी ।। व्यधो वेधे। वेधननामनी। 'कोरसुट' ।। पचा पाके। पाकनामनी। अनुक्तम्—'मांस्पाकः स्यान्मांस्पचनम्'। मांसपचननामनी ।। हवो हूतौ। आह्वाननामनी ।। वरो वृतौ। वरणनामनी ।। ८ ।।

[1] B_3 omits. [2] रक्षेति B_3, C_1. [3] रक्ष° A_1.

ओषः प्लोषे नयो नाये ज्यानिर्जीर्णौ भ्रमो भ्रमौ ।
स्फातिर्वृद्धौ प्रथा ख्यातौ स्पृष्टिः पृक्तौ स्नवः स्रवे ।। ९ ।।

(वि.) ओष इति—[1]उष्यत इति ओषः। 'उष दाहे'। [2]प्लुष्यत इति प्लोषः। 'प्लुष दाहे'[3]। दाहस्य नामनी ।। नीयते प्राप्यते नयः। नायश्च। 'णीञ् प्रापणे'। प्राप्तिनामनी ।। जिनाति वयोहानिमापद्यते ययेति ज्यानिः। 'ज्या वयोहानौ'। जीर्यत इति जीर्णिः। 'जॄष् वयोहानौ'। वयोहानेर्नामनी ।। भ्रमणं भ्रमः। भ्रमिश्च। 'भ्रमु अनवस्थाने'। भ्रान्तिनामनी ।। स्फाय्यत इति स्फातिः। 'स्फायी वृद्धौ' ।। वर्धत इति वृद्धिः। 'वृधु वृद्धौ'। वृद्धिनामनी ।। [4]प्रथ्यत इति प्रथा। 'प्रथ [5]प्रख्याने'। ख्यायत इति ख्यातिः। 'ख्या प्रकथने'। [6]प्रख्यातिनामनी ।। स्पृश्यत इति स्पृष्टिः। 'स्पृश संस्पर्शने'। पृष्टिरिति वा पाठः। तदा 'पृची संपर्के' इति धातुः। पृच्यत इति पृक्तिः। पूर्वोक्त एव धातुः। संपर्कस्य नामनी ।। स्नूयत इति स्नवः। 'ष्णु प्रस्रवणे'। स्रूयत इति स्रवः[7]। 'स्रु गतौ'। जलादिस्रवणस्य नामनी ।। ९ ।।

[1] ओषणं Pt2. [2] प्लोषणं Pt2. [3] 'उष प्लुष दाहे' K5. [4] प्रथनं Pt2.
[5] ख्यापने K3, K6; ख्याने Pt2. [6] ख्याति° J2. [7] K5, K6 add स्रुतिश्च.

(विव.) ओषः प्लोषे। [1]वह्निसंयोगजस्य तृणादेर्भस्मीभावस्य नामनी। 'उष दाहे' 'प्लुष दाहे' इति धातुद्वयाद् घञ् (३.३.१८) क्रमेण ओषः प्लोषश्च। 'प्रुष दाहे' इति धातोः प्रोष इति रेफादिर्वा ।। नयो नाये। प्रापणस्य नामनी। 'णीञ् प्रापणे'। 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति बहुलग्रहणाद् अचि नयः (३.३.५६)। 'श्रिणीभुवोऽनुपसर्गे' (३.३.२४) इति घञि नायः ।। ज्यानिर्जीर्णौ। [2]शरीरादेः कालविशेषापादितनिःसारत्वरूपावस्थाविशेषनामनी। 'ज्या वयोहानौ' इति धातोः 'ग्लाम्लाज्याहाभ्यो निर्वक्तव्यः' (वा. ३. ३.९४) इति क्तिन्प्रत्ययापवादत्वेन निप्रत्यये ज्यानिः। 'जॄष् वयोहानौ'। क्तिनि 'ॠकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम्' (वा. ८. २. ४४) इति नत्वे[3] जीर्णिः। शब्दद्वयमपि स्त्रीलिङ्गम् ।। भ्रमो भ्रमौ। भ्रमणरूपक्रियाविशेषस्य नामनी। 'भ्रमु अनवस्थाने'। भावे घञि नोदात्तोपदेशाद् (७. ३. ३४) इति वृद्धिप्रतिषेधे भ्रमः।। 'इक् कृष्यादिभ्य इति वक्तव्यम्' (वा. ३. ३. १०८) इति भावे स्त्रियामिक्प्रत्यये भ्रमिः। वा ङीषि भ्रमी[4] च ।। स्फातिर्वृद्धौ। शरीरादीनामवयवोपचयस्य नामनी। 'स्फायी वृद्धौ' इत्यतः स्त्रियां क्तिनि 'लोपो व्योर्वलि' (६. १. ६६) इति यकारलोपे स्फातिः ।। 'वृधु वृद्धौ' इत्यतो क्तिनि वृद्धिः। द्वयमपि प्रत्ययतः

स्त्रीलिङ्गम् ।। प्रथा ख्यातौ । कुलशीलविद्याद्युत्कर्षजनितायाः प्रसिद्धेर्नामनी । 'प्रथ प्रख्याने' इति धातोः 'घटादयः षितः' (ग. सू.)[5] इति परिभाषया 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इत्यङि प्रथा ।। 'ख्या प्रकथने' इत्यतः स्त्रियां क्तिनि ख्यातिः ।। स्पृष्टिः पृक्तौ । हस्तादिना घटादिस्पर्शनस्य नामनी । 'स्पृश संस्पर्शने'। स्त्रियां क्तिनि व्रश्चेत्यादिना[6] (८. २. ३६) षत्वे स्पृष्टिः । 'पृची संपर्के' इति धातोः स्त्रियां क्तिनि (३. ३. ९४) पृक्तिः । प्रत्ययतो द्वावपि स्त्रीलिङ्गौ ।। स्नवः स्रवे । अपक्वघटादेर्बहिर्भागे[7] जलादिप्रस्रवणस्य नामनी । 'ष्णु प्रस्रवणे'। 'स्रु [8]गतौ'। आभ्यां धातुभ्याम् 'ऋदोरप्' (३. ३. ५७) इत्यप्प्रत्यये स्नवः स्रवश्च । बाहुलके घञि स्रावोऽप्यस्ति ।। ९ ।।

[1] वह्निसंबन्धजननेन काष्ठादेः Gm1, Tv. [2] शरीरस्य वा अन्यस्य वा घटपटादेः Tj1, Tj2. [3] B6 adds रदाभ्यामिति, णत्वे च. [4] तत्र भ्रमी गौरादिरपि इति टी. स. (पृ. ५६). [5] कौमुदी (पृ. ३५९). [6] 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः'. [7] अधः पार्श्वभागे वा Gm3, Tv. [8] स्रवणे B5, B6.

(पा.) ओषः प्लोषे । [1]दाहनामनी ।। नयो [2]नाये । नीतिनामनी ।। ज्यानिर्जीर्णा । जरानामनी ।। भ्रमो भ्रमौ । भ्रमणनामनी ।। अत्र भ्रमिशब्दस्य [3]पूर्वापरसाहचर्यं लिङ्गज्ञापकम् । वैजयन्त्यां तु (पृ. १९२, श्लो. १०) 'चक्रावर्तो भ्रमो भ्रान्तिर्भ्रमिर्घूर्णिश्च घूर्णनम्' इति स्वपर्यायसाहचर्य एव । स्फातिर्वृद्धौ । [4]शरीराद्यभिवृद्धिनामनी ।। प्रथा ख्यातौ । [5]प्रसिद्धिनामनी ।। स्पृष्टिः पृक्तौ । स्पर्शननामनी ।। स्नवः स्रवे । स्रवणनामनी ।। ९ ।।

[1] दहन° B3, C1. [2] न्याये A1. [3] पूर्वपर्याय° A1. [4] शरीरोपचय° B3. [5] प्रसिद्ध° A1.

एधा समृद्धौ स्फरणं स्फुरणे प्रमितौ प्रमा ।
प्रसूतिः प्रसवे श्च्योते प्राघारः क्लमथः क्लमे ।। १० ।।

(वि.) एधेति—एध्यत इत्येधा[1] । 'एध वृद्धौ' । समृध्यत इति समृद्धिः । 'ऋधु वृद्धौ' । समृद्धिनामनी ।। स्फर्यत इति स्फरणम् । स्फुर्यत इति स्फुरणम् । 'स्फर स्फुर स्फुरणे'[2] । [3]स्फुरणेति वा पाठः । ओष्ठादिचलनस्य नामनी ।। प्रमीयते

सम्यगनुभूयत[4] इति प्रमितिः। प्रमा च। 'माङ माने'। सम्यगनुभवस्य[5] नामनी॥ प्रसूयत इति प्रसूतिः। प्रसवश्च। 'षूङ प्राणिप्रसवे'[6]। 'षू प्रेरणे' इति वा धातुः। प्राणिप्रसवस्य नामनी॥ श्च्युत्यत[7] इति श्च्योतः। 'श्च्युतिर् क्षरणे'। प्रकर्षेण जिघर्त्यनेनेति प्राघारः। 'घृ क्षरणदीप्त्योः'। क्षरणस्य नामनी॥ क्लाम्यत इति क्लमथः[8]। क्लमश्च। 'क्लमु ग्लानौ'। क्लान्तिनामनी॥ १०॥

[1] विधा इति भानुजीदीक्षितीये पाठः। तदा विपूर्वाद् 'डुधाञ् धारणपोषणयोः' इत्यतः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्. [2] चलने K3, K6. [3] 'स्वार्थण्यन्ताद्युच् (३. ३. १०७)। संज्ञापूर्वकत्वान्न गुणः' इति भा. दी. (पृ. ४४६). [4] अनुमीयते K5. [5] अनुभूतसाधनस्य J2, K6. [6] प्राणिगर्भविमोचने K6. [7] श्च्योत्यते K6. [8] क्लमथुः J2, K2.

(विव.) एधा समृद्धौ। धनधान्याद्यतिशयस्य नामनी। 'एध वृद्धौ' इत्यतः 'गुरोश्च हलः' (३. ३. १०३) इत्यकारप्रत्यये एधा। सुभूतिचन्द्रस्तु— विपूर्वाद् दधातेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङि विधेति पाठान्तरेण व्याख्यातवान्[1]। तत्संवादत्वेन [2]'विधानर्द्धिप्रकारेषु गजान्ने वेतने विधा' इति रुद्राभिधानमप्युदाजहार।

> 'उत्क्षिप्तहस्ततलदत्तविधानपिण्ड-
> स्नेहस्रुतिस्नपितबाहुरिभाधिराजम्'।

इति माघकाव्ये (शिशु. ५. ५१) प्रयोगः॥ 'ऋधु वृद्धौ'। संपूर्वस्य क्तिनि समृद्धिः॥ स्फरणं स्फुरणे। ओष्ठनयनपक्ष्मादिस्पन्दनस्य[3] नामनी। 'स्फर स्फुर स्फुरणे'। तत्र प्रथमाद्धातोः कण्ठ्यस्वरोपधात् ल्युटि स्फरणम्। द्वितीयाद्[4] ओष्ठ्यस्वरोपधात् कुटादित्वेन (१. २. १) गुणप्रतिषेधे ल्युटि स्फुरणम्। स्पन्दनशब्दोऽप्यत्र[5]॥ प्रमितौ प्रमा। सम्यगनुभवस्य नामनी। 'माङ माने' इत्यस्माद् धातोः सोपसर्गाद् भावे क्तिनि 'द्यतिस्यतिमास्था...' इत्यादिना (७. ४. ४०) धातोरित्वे क्तिनि प्रमितिः॥ 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङि प्रमा॥ प्रसूतिः प्रसवे। गर्भविमोचनस्य नामनी। [6]'षूङ प्राणिप्रसवे' 'षू प्रेरणे'[7] इति वा धातोः स्त्रियां क्तिनि प्रसूतिः॥ 'ऋदोरप्' (३. ३. ५७) इत्यप्प्रत्यये प्रसवः॥ श्च्योते प्राघारः। [8]घटादिगतस्य [9]क्षीरघृतादेरुपरिप्रदेशादुच्चलनेनाधोदेशे क्षरणस्य नामनी।

'इच्युतिर् क्षरणे'। घञि श्च्योतः ॥ 'घृ क्षरणदीप्त्योः' इत्यस्मात् प्रपूर्वाद् घञि 'उपसर्गस्य घञि ...' (६. ३. १२२) इति दीर्घे प्राघारः ॥ क्लमथः क्लमे। व्यायामादिना मनसः निःसहत्वनामनी। 'क्लमु ग्लानौ'। [10]औणादिकोऽथच्-प्रत्ययः[11] ॥ घञि क्लमः[12] (७. ३. ३४) ॥ १० ॥

[1] व्याख्याय Gm1, Tv.　[2] विधानार्थे Tv.　[3] चलनस्य Tj1, Tj2. [4] उकारोपधात् B6, Tv.　[5] Tv adds केचित् स्पन्दने इति पठित्वा 'स्पन्द किंचिच्चलने' इति धातोः स्पन्दनमित्याहुः　[6] °गर्भविमोचने Tv.　[7] प्रसवैश्वर्ययोः Tv.　[8] पूर्णस्य Tv.　[9] जल° Tj1, Tj2.　[10] शमादिभ्यो ऽथच् इति भा. दी. (पृ. ४५०).　[11] उका-रान्तस्त्वपपाठः Tv.　[12] 'नोदात्तोपदेश ...' इति न वृद्धिः.

(पा.) एधा समृद्धौ। [1]धनधान्यसमृद्धिनामनी। 'एधा ऋद्धिप्रकारेषु गजानां वेतने विधा' इति रुद्रः[2] ॥ [3]स्फुलनं स्फुरणे। स्फुरणनामनी। [4]'निग-निगसेरुसुट'। 'स्फर संचलने' इति केषांचित् सकारसहितफकारोपधम् ॥ प्रमितौ प्रमा। यथार्थज्ञाननामनी[5] ॥ प्रसूतिः प्रसवे। गर्भमोचननामनी ॥ श्च्योतः प्राघारे। धारानामनी। 'व्यक्तस्कन्धकबन्धबन्धरुधिरप्राघार[6]निष्यन्दिना' इति भवभूतिः (मालती. ५. २९) ॥ क्लमथः क्लमे। ग्लानिनामनी ॥ १० ॥

[1] धनादि° B3.　[2] 'विधा गजान्ने ऋद्धौ च' इति मेदिनी (भा. दी. पृ. ४४९). [3] स्फुरणम् A1.　[4] B3 omits.　[5] प्रमाणसाध्यनामनी A1.　[6] °प्राग्भार° इति निर्णयसा. मु. ग्र.

उत्कर्षोऽतिशये संधिः श्लेषे विषय आश्रये।
क्षिपायां क्षेपणं गीर्णिर्गिरौ गुरणमुद्यमे ॥ ११ ॥

(वि.) उत्कर्ष इति—[1]उत्कृष्यतेऽतिशय्यत इति उत्कर्षः। 'कृष विले-खने'। अतिशय्यत[2] इत्यतिशयः। 'शीङ् स्वप्ने'। [3]आभिमुख्यनामनी ॥ [4]संधीयत इति संधिः। 'डुधाञ् धारणपोषणयोः'। श्लिष्यते संबध्यत इति श्लेषः। 'श्लिष आलिङ्गने'। संबन्धनामनी ॥ [5]विसीयत इति विषयः। 'षिञ् बन्धने'। आ समन्तात् [6]श्रीयत इत्याश्रयः। 'श्रिञ् सेवायाम्'। स्थानस्य नामनी ॥ क्षिप्यत इति क्षिपा। क्षेपणं च। 'क्षिप प्रेरणे'। क्षेपणस्य नामनी ॥ गीर्यत इति गीर्णिः। गिरिश्च। 'गॄ निगरणे'। निगरणस्य नामनी ॥ गूर्यत इति गुरणम्[7]। 'गुरी

उद्यमने'। उद्यम्यत इत्युद्यमः। 'यम उपरमे'। उपसर्गवशाद् धातोरुद्योगार्थः। उद्योगस्य नामनी ॥ ११ ॥

[1] उद् ऊर्ध्वं कर्षणम् Pt2. [2] अतिशयनम् Pt2; अतिशयितः K6. [3] आधिक्य° J2, K3. [4] संधानं Pt2. [5] विशेषेण सीयन्ते वस्तून्यत्रेति Pt2. [6] श्रयते K6. [7] गूरणमिति वा पाठः K3, K4.

(विव.) उत्कर्षोऽतिशये। [1]विद्याशौर्यधनादीनां पराकाष्ठाविश्रान्तेर्नामनी। 'कृष विलेखने' इत्यतः उत्पूर्वाद् घञि (३. ३. १८) उत्कर्षः॥ 'शीङ स्वप्ने' इत्यतः सोपसर्गादेरचि (३. ३. ५६) अतिशयः॥ संधिः श्लेषे। संबन्धस्य नामनी। संपूर्वाद् दधातेः 'उपसर्गे घोः किः' (३. ३. ९२) इति किप्रत्यये [2]आकारलोपे च संधिः॥ 'श्लिष आलिङ्गने' इत्यतो घञि श्लेषः॥ विषय आश्रये। आलम्बनस्य नामनी। यथा घटादिविषयं ज्ञानं संग्रामाश्रयोऽयमभिनिवेश इति विशेषेण सीयते बन्ध इव तिष्ठत्यत्रेति विषयः। 'षिञ् बन्धने'। [3]अधिकरणे 'एरच्' (३. ३. ५६)। 'परिनिविभ्यः सेवसितसय...' इत्यादिना (८. ३. ७०) षत्वम्। 'विषयो गोचरे देशे रूपादौ नित्यसेविते' इत्यजयः॥ आ समन्तात् श्रीयत इत्याश्रयः। 'श्रिञ् सेवायाम्'। 'एरच्' (३. ३. ५६)। सर्वानन्दस्तु (पृ. ५७) 'शीङ स्वप्ने' इति धातोर्विपूर्वाद् एरचि विशयः, आशय इति शब्दद्वयमपि तालव्योष्ममध्यं रेफरहितं चाह। यथा—आमाशयः, पक्वाशयः, जलाशय इति॥ क्षिपायां क्षेपणम्। प्रेरणाया नामनी। 'क्षिप प्रेरणे'। भिदादित्वाद् अङि (३. ३. १०४) क्षिपा। ल्युटि क्षेपणम्॥ गीर्णिर्गिरौ। निगरणस्य नामनी। 'गॄ निगरणे' इत्यतः क्तिन्प्रत्यये (३. ३. ९४) ऋत इकारादेशे (७. १. १००) 'ऋकारल्वादिभ्यः क्तिन् निष्ठावद्भवति' (वा. ८. २. ४४) इति वक्तव्यान्निष्ठावद्भावेन तकारस्य नत्वे [4]गीर्णिः॥ 'इक् कृष्यादिभ्यः' (वा. ३. ३. १०८) इति इक्प्रत्यये गिरिः। शेषे— 'स्यादुद्गिरणमुद्गिरौ'। 'टुवमु उद्गिरणे' इति धातुनिर्देशाद् उद्गिरणशब्दः साधुः। तथा च निगरणावगरणादावस्त्येव गुणः॥ गुरणमुद्यमे। [5] ताडनादिहेतोर्लगुडादेरुद्यमनस्य नामनी। 'गुरी उद्यमने'। ल्युटि कुटादित्वाद् (१. २. १) गुणाभावे गुरणम्। 'यमः समुपनिविषु च' (३. ३. ६३) इति नियमाद् उत्पूर्वाद् यमिधातोरप्प्रत्ययो नास्त्येव। किंतु 'हलश्च' (३. ३. १२१) इति घञा भाव्यम्। तथापि 'गुरी उद्यमे' इति धातुनिर्देशसामर्थ्यादुद्यमशब्दः साधुः।

चौरादिकात्तु 'गुरी उद्यमे' इति धातोर्युचि (३. ३. १०७) गोरणा। ल्युटि गोरणं च ॥ ११ ॥

[1] विद्यागुणादीनां Tv. [2] 'आतो लोप इटि च'. [3] 'एरच्' इति सूत्रे अकर्तरि संज्ञायां भावे इत्येवानुवृत्तेः भावे इत्येव सुवचम्। 'भावप्रत्ययानामेव पूर्वापरयोर्दर्शनेन अधिकरणार्थस्यानौचित्यात्। ल्युट्प्रसङ्गाच्च' इति भा. दी. (पृ. ४५०). [4] 'हलि च' इति दीर्घः. [5] ताडनादिसाधन° K_5, K_6. [6] Tv adds 'गुरणे गोरणं न ना'। स्त्रीनपुंसकयोरित्यर्थः.

(पा.) उत्कर्षोऽतिशये। अतिशयनामनी। [1]प्राग्भारोऽपि। 'प्राग्भारोऽतिशयः स्मृतः' इत्यस्मिन्नर्थे हलायुधः[2] ॥ संधिः श्लेषे। [3]संयोगनामनी। [4]संभेदसंनिपातसंश्लेषादीनि अस्मिन्नर्थे इति वैजयन्ती (पृ. १९४, श्लो. २६) ॥ विषय आश्रये। [5]नित्यसेवितनिद्राहारादीनां नामनी। 'विषयो गोचरे देशे रूपादौ नित्यसेविते' इत्यजयकोशः ॥ क्षिपायां क्षेपणम्। प्रेरणनामनी। 'नूकुट' ॥ गीर्णिर्गिरौ। गिलननामनी। 'मृगुट' ॥ [6]गुरणमुद्यमे। उद्यमननामनी। 'येत्तुट' ॥ ११ ॥

[1] A1 omits. [2] हलायुधकोशे न दृश्यते। वैजयन्त्यां तु 'प्राग्भारोऽतिशयो भरः' (पृ. १९२, श्लो. ३) इति दृश्यते. [3] कूट° A1. [4] 'संभेदः संनिपातसंश्लेषौ' C1, मुद्रितग्रन्थे च. [5] B3 omits निद्राहारादीनां. [6] गूरणम् A1.

उन्नाय उन्नये श्रायः श्रयणे जयने जयः।
निगादो निगदे मादो मद उद्वेग उद्भ्रमे ॥ १२ ॥

(वि.) उन्नाय इति—(उद्) ऊर्ध्वं नीयत[1] इत्युन्नायः। उन्नयश्च। 'णीञ् प्रापणे'। [2]ऊर्ध्वनयनस्य वा उत्प्रेक्षाया वा नामनी ॥ श्रीयत इति श्रायः। श्रयणं च। 'श्रिञ् सेवायाम्'। सेवाया नामनी ॥ 'श्रावः[3] श्रवणे' इति पाठे 'श्रु श्रवणे' इति धातुः। श्रुतेर्नामनी ॥ जीयत इति जयनम्। जयश्च। 'जि अभिभवे' इति प्रथमो[4] धातुः। 'जि जये' इति द्वितीयो धातुः। [5]पराभिभवस्य नामनी ॥ निगद्यत इति निगादः। निगदश्च। 'गद व्यक्तायां वाचि'। स्फुटकथनस्य नामनी ॥ माद्यत इति मादः। मदश्च। 'मदी [6]हर्षे'। विद्याधनाधिक्यनिबन्धनहर्षस्य नामनी ॥ उद्विज्यते ऊर्ध्वं चाल्यत इत्युद्वेगः। 'ओविजी भयचलनयोः'। उद्भ्राम्यत इत्युद्भ्रमः। 'भ्रमु चलने'। ऊर्ध्वचलनस्य नामनी ॥ १२ ॥

[1] ऊर्ध्वं नयनं Pt2. [2] K2, K6 add अनुसरणस्य वा; ऊर्ध्वप्रेरणस्य K5. [3] श्रव: K4. [4] K5 omits. [5] पराभवस्य K4; पराभवनस्य K5. [6] K2, K4, K5 add ग्लपनयोः.

(विव.) उन्नाय उन्नये। यस्य कस्यचिद् द्रव्यस्य[1] ऊर्ध्वदेशं प्रति प्रापणस्य नामनी। मुसलमुन्नयति। [2]ऊहस्य नामनी इत्यपरे। यथा—'भाविकार्यमुन्नयेत्'[3] इति। 'अवोदोर्नियः' (३. ३. २६) इति घञि उन्नायः। बाहुलकाद् एरचि (३.३.५६) उन्नयः॥ श्रायः श्रयणे। आश्रयस्य नामनी। 'श्रिञ् सेवायाम्'। 'श्रिणीभुवोऽनुपसर्गे' (३. ३. २४) इति घञि श्रायः। ल्युटि श्रयणम्॥ जयने जयः। सर्वोत्कर्षेण वृत्तेः पराभिभवनस्य नामनी। 'जि अभिभवने'। ल्युटि जयनम्। एरचि (३. ३. ५६) जयः। 'जि जये' इति वा॥ निगादो निगदे। व्यक्तभाषणस्य नामनी। 'गद व्यक्तायां वाचि' इत्यतो वेति वर्तमाने 'नौ गदनदपठस्वनः' (३. ३. ६४) इति पाक्षिके अप्प्रत्यये निगदः। पक्षे 'हलश्च' (३. ३. १२१) इति घञि निगादः॥ मादो मदे। [4]विद्याभिजनधनादिसमृद्धिजनितहर्षातिशयस्य नामनी। 'मदी हर्षे' इत्यतः 'सध मादस्थयोश्छन्दसि' (६. ३. ९६) इति सूत्रे घञ्प्रत्ययान्तत्वेन निर्देशाद् मादशब्दः साधुः[5]॥ 'मदोऽनुपसर्गे' (३.३.६७) इत्यप्प्रत्यये मदः॥ उद्वेग उद्भ्रमे। ऊर्ध्वचलनस्य नामनी इति सुबोधिनी। उद्भ्रमः चमत्कार इति [6]सर्वानन्दसुभूतिचन्द्रौ। अनवस्थितचित्तत्वमित्यपरे। 'ओविजी भयचलनयोः'। भावे घञ्। 'चजोः ...' (७. ३. ५२) इति [7]कुत्वे गुणे च उद्वेगः॥ 'भ्रमु चलने' इत्यतो घञि भ्रमः[8]॥ १२॥

[1] Tv adds अधोदेशावस्थितस्य. [2] तस्मात् सकृदुन्नीय नापरमुन्नयते इत्याद्यूहस्य नामनी Gm3, Tv. [3] उन्नयते Tj1, Tj2. [4] Tv omits अभिजन°. [5] 'क्वचिदपवादः...' इति न्यायाद्वा घञ् इति भा. दी. (पृ. ४५०). [6] उद्वेगद्वयं चमत्कारे इति सर्वानन्दः (पृ. ५८). [7] 'चजोः कु घिण्ण्यतोः' इति कुत्वम्. [8] 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इति न वृद्धिः.

(पा.) उन्नाय उन्नये। [1]निमग्नादेरुद्धरणनामनी। [2]'पोडवुगापेट्टुट'॥ श्रायः श्रयण। [3]श्रयणनामनी॥ जयने जयः। विजयनामनी। 'गेलुचुटनु'। सर्वोत्कर्षनामापि स्यात्। [4]'सा जयति सरस्वती देवी'। 'स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः' इति नैषधः (२. १६)॥ निगादो निगदे। [5]व्यक्तोक्ति-

नामनी । 'पलुकुट' ।। मादो मदे । मदनामनी ।। उद्वेग उद्भ्रमे । [6]उद्भ्रमनामनी । 'उब्बचेसुट' ।। १२ ।।

[1] A1 omits.　[2] B3 omits.　[3] आश्रयण° A1.　[4] वासवदत्ता १.
[5] °भाषित° C1.　[6] उद्भ्रमण° C1.

विमर्दनं परिमलेऽभ्युपपत्तिरनुग्रहः ।
निग्रहस्तु निरोधः स्यादभियोगस्त्वभिग्रहः ।। १३ ।।

(वि.) विमर्दनमिति—[1]विमृद्यत इति विमर्दनम् । 'मृद क्षोदे' । मिथः परिमल्यत इति परिमलः[2] । 'मल मल्ल धारणे' । द्रव्ययोरन्योन्यघट्टनस्य[3] नामनी ।। [4]अभ्युपपद्यत इत्यभ्युपपत्तिः । 'पद गतौ' । अनुगृह्यते स्वीक्रियत इत्यनुग्रहः । 'ग्रह उपादाने' । उपकारस्य नामनी ।। [5]नियमेन गृह्यत इति निग्रहः । निरुध्यत इति निरोधः । 'रुधिर् आवरणे' । तद्विरुद्धस्यानुग्रहविरुद्धस्य[6] नामनी ।। (अभि) आभिमुख्येन युज्यत इत्यभियोगः । 'युजिर् योगे' । आभिमुख्येन गृह्यत इत्यभिग्रहः । 'ग्रह उपादाने' । आभिमुख्येनोद्यमनस्य नामनी ।। १३ ।।

[1] विशेषेण मर्दनं Pt2.　[2] परिमल्यते धार्यतेऽनेनेति Pt2.　[3] °संघट्टनस्य K4.
[4] अभ्युपपादनं Pt2.　[5] नियमनाय ग्रहणं J2, Pt2.　[6] K5 adds अपकारस्य.

(विव.) विमर्दनं परिमलः । कुङ्कुमकर्पूरादिद्रव्ययोः परस्परसंघट्टनस्य नामनी । 'मृद क्षोदे' । क्षोदः संपेषणम् । भावे ल्युटि (३. ३. ११५) विमर्दनम् ।। 'मल मल्ल धारणे' इत्यतो भावे घञि (३. ३. १८) वृद्धिविधेः संज्ञापूर्वकत्वात् 'संज्ञापूर्वको विधिरनित्यः' इति परिभाषया [1]वृद्धिरत्र न भवति ।। अभ्युपपत्तिरनुग्रहः । [2]मनःप्रसादपूर्वकस्य संमाननाविशेषस्य नामनी । 'पद गतौ' । अभ्युपपूर्वोऽनुग्रहे वर्तते । तथा च—'रतिमभ्युपपत्तुमादरात्' [3]इति कालिदासः (कु. सं. ४. २५) । ततः स्त्रियां क्तिनि अभ्युपपत्तिः[4] ।। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इति गृह्णातेरनुपूर्वाद् अप्प्रत्यये अनुग्रहः ।। निग्रहस्तु निरोधः स्यात् । अपकारकरणस्य नामनी । नियमनाय ग्रहणं निग्रहः । निपूर्वस्य गृह्णातेरप् (३. ३. ५८) ।। नितरां रोधः[5] निरोधः । विशेषेण रोधो विरोध इति केचित् पठन्ति । सुबोधिनीकारस्तु—'निग्रहस्तद्विरुद्धः स्यात्', तद्विरुद्धोऽनुग्रहविरुद्धोऽपकारकः इति व्याचष्ट ।।

अभियोगस्त्वभिग्रहः। अपचिकीर्षया प्रबलेन दुर्बलस्याक्रमणम् अभियोगः[6] इति सुभूतिचन्द्रः। अभियोगादिद्वयम् उद्योगे वर्तत इति सर्वानन्दः (पृ. ५९)। बहुश्रुतत्वादिना जातस्योत्कर्षस्य[7] नामनी इति भोजराजः[8]। 'अभियुक्ताः पुनरेवमाहुः' इति प्रयोगश्च ।। १३ ।।

[1] 'अत उपधायाः' (७. २. ११६) इति वृद्धिः. [2] Gm3, Tv add दानमानादिपूर्वक°. [3] आतुराम् इति मुद्रितग्रन्थे. [4] 'खरि च'. [5] 'रुधिर् आवरणे' घञ्. [6] अभिपूर्वस्य 'युजिर् योगे' इति धातोः घञ्; गृह्णातेः अप् (३. ३. ५८) अभिग्रहः. [7] परिचयातिशयस्य Gm1, Tv. [8] नाचिराजः Tj1, Tj2.

(पा.) विमर्दनं परिमलः। [1]कुङ्कुमचन्दनादिभिः संमर्दननामनी। [2]कस्तूरिकादेः पेषणनामापि ।। अभ्युपपत्तिरनुग्रहः। अनुग्रहनामनी ।। निग्रहस्तु निरोधः स्यात्। निग्रहनामनी ।। अभियोगस्त्वभिग्रहः। अभिगम्याक्रमननामनी[3]। 'अभिपूर्वौ ग्रहियुजी अभिगम्याक्रमे स्मृतौ' इति उपसर्गमञ्जरी। अनुक्तम्— 'परस्परं स्यादन्योन्यमितरेतरमित्यपि'। परस्परनामनी[4]। एते अमन्ते। [5]इमे सख्यौ परस्परं प्रयच्छतः। इमाः सख्यः परस्पराद् बिभ्यति। शाकटायनमते पुंलिङ्गैकवचने स्याताम्। इमे सख्यौ परस्परस्ते प्रयच्छतः। इमाः सख्यः परस्पराद् बिभ्यति ।। १३ ।।

[1] B3 omits कुङ्कुम°. [2] कस्तूरिकां बिल्वमध्ये निक्षिप्य A1. [3] °आक्रमण° B3, C1. [4] A1 adds 'तमलो तमरु अनुट'. [5] B3 omits the four lines.

मुष्टिबन्धस्तु संग्राहो डिम्बे डमरविप्लवौ।
बन्धनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि ।। १४ ।।

(वि.) मुष्टीति—मुष्टेर्बन्धः मुष्टिबन्धः[1]। संगृह्यते मुष्टिरत्रेति संग्राहः। 'ग्रह उपादाने'। मल्लयोरन्योन्यमुष्टिबन्धनस्य नामनी ।। डीयते जनोऽनेनेति डिम्बः। 'डीङ विहायसा गतौ'। दाम्यत इति डमरः। 'दमु उपशमे'[3]। विप्लाव्यते [4]विद्राव्यते जनोऽनेनेति विप्लवः। 'प्लुङ गतौ'। उपद्रवनामानि ।। बध्यत इति बन्धनम्। 'बन्ध बन्धने'। प्रसीयते [5]बध्यत इति प्रसितिः। 'षिञ् बन्धने'। चरति मन्दमनेनेति चारः। 'चर गतौ'। बन्धनस्य नामानि ।। स्पृशत्युपतापयतीति

स्पर्शः । स्प्रष्टा च । 'स्पृश उपतापे' । उपतापयतीति उपतप्ता । 'तप संतापे' । [6]उपतापकारिणो वैर्यादेर्नामानि ॥ १४ ॥

[1] J2, K6 omit. [2] K3, K4 omit विहायसा. [3] उपशमने K3, K4, K6. [4] द्राव्यते K4. [5] पीडचते K4, K6. [6] स्वारयति उपतापयति स्वारः । 'स्वृ शब्दोपतापयोः' K2, K4, K6.

(विव.) मुष्टिबन्धस्तु संग्राहः । संगृह्यत इति कर्मणि घञन्तत्वेन फलकस्य मुष्टिग्राह्यो भागः क्षत्रियवर्गे (पृ. ५३७) संग्राह उक्तः । इह तु संगृह्यन्ते संक्षिप्यन्तेऽङ्गुलयोऽत्रेति अधिकरणव्युत्पत्त्या मल्लादेरङ्गुलिसंनिवेशविशेषः संग्राह उच्यत इत्यपौनरुक्त्यम् । [1]'समि मुष्टौ' (३. ३. ३६) इति घञ् । तथा च 'खटको मुष्टिः स्त्रियां च संग्राहः' इति बोपालितेन मुष्टिपर्यायत्वेन कथितः । 'खादयन्तः फलरसं मुष्टिसंग्राहपीडितम्' इति भट्टिः[2] (भ. का. ७. ४०) ॥ डिम्बे डमरविप्लवौ । परचक्राक्रमणनिमित्तस्य [3]प्रजापलायनग्रामदाहधनधान्यादिनाशरूपस्य क्षोभस्य नामानि । डयन्ते पलायन्ते प्रजा अत्रेति डिम्बः[4] । 'डीङ विहायसा गतौ' । अतो डिम्बप्रत्यये टिलोपे च डिम्ब इति पवर्गतृतीयोपधः । अस्मादेव धातोः डमरप्रत्यये पूर्ववत् टिलोपे च डमरः[5] ॥ स्वदेशं विहाय प्लवः पलायनं विप्लवः । 'प्लुङ गतौ' । 'ऋदोरप्' (३.३.५७) ॥ बन्धनं प्रसितिश्चारः । येन निगडादिना बध्यते तत्र बन्धनादित्रयमिति टीकासर्वस्वकारेण व्याख्याय चारशब्दस्य बन्धनवचनत्वे 'बन्धापसर्पयोश्चारः' इति रुद्राभिधानं दर्शितम् (पृ. ५६) । अपरे तु 'समे तूद्दानबन्धने' इति प्रागुक्तस्यैव (पृ. ४६६) बन्धनस्य पर्यायान्तरप्रदर्शनमित्याहुः । 'इदं किल तस्याश्चारजनदुःसंचारं चारागारम्' इति ययातिचरितनाटके प्रयोगश्च । चारागारं बन्धनशालेत्यर्थः ॥ 'षिञ् बन्धने' । स्त्रियां क्तिनि प्रसितिः ॥ मन्दं चरत्यनेनेति चारः । 'चर गतौ' । करणे घञ् । चारा गूढचारिणः सन्त्यत्रेति वा । अर्शआद्यच् (५. २. १२७) ॥ स्पर्शः स्प्रष्टोपतप्तरि । उपतापजनकरोगस्य नामानि । स्पृशति उपतापं जनयतीति स्पर्शः । 'स्पृश उपतापे' । 'पदरुजविशस्पृशो घञ्' (३. ३. १६) इत्यत्र 'स्पृश उपताप इति वक्तव्यम्' इति[6] वचनात् कर्तरि घञ् । 'रुजायां स्पर्शके स्पर्शो दानस्पर्शनयोरपि' इति रुद्रः । वासरूपविधिना[7] (३. १. ९४) च तृच्प्रत्यये 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' (६. १. ५९) इत्यमागमे स्प्रष्टा ॥ उपपूर्वात् तपतेः तृचि (३. १. १३३) उपतप्ता ।

अत्र शेषकारः--'स्पर्ष्टा च स्वरिता स्वर्ता' इति स्पृशेरेव तृचि अमागमाभावपक्षे गुणे सति स्पर्ष्टा। 'स्वृ शब्दोपतापयोः' इत्यस्मात् कर्तरि तृचि 'स्वरतिसूतिसूयति...' इत्यादिना (७. २. ४४) इडागमस्य वैकल्पिकत्वात् स्वरिता स्वर्ता च इति रूपद्वयम्। केचित्तु--पूर्ववाक्ये बन्धनादिपदद्वयमेव पर्यायत्वेन व्याख्याय, समनन्तरपदं स्पार इति पठित्वा तदादिचतुष्कमपि उपतापजनकरोगवाचकमाहुः। तत एव धातोः स्वार्थण्यन्ताद् अच्प्रत्यये स्पार इति निर्ब्रुवते। अपरे तु--'बन्धनं प्रसितिः स्पर्शः स्परस्प्रष्टोपतप्तरि' इति पठित्वा स्परतेः पचाद्यचि स्पर इत्याहुः ।। १४ ।।

[1] Tv adds संपूर्वस्य गृह्णातेः. [2] भट्टिकाव्ये प्रयोगः Tv. [3] प्रजापरिपालनधर्मनाशादिरूपक्षोभस्य Tv. [4] डयनं विद्रवो डिम्बः, 'डीङ गतौ' इति स्वामी; डिम्बनम्। 'डि विनोदे'। घञ् इति भा. दी. [5] डयनं डमरः इति स्वामी; 'डम' इति शब्दस्य राणम्। 'रा दाने'। बाहुलकात् घञर्थे कः इति भा. दी. [6] वा. ३. ३. १६. [7] 'वासरूपोऽस्त्रियाम्'.

(पा.) मुष्टिबन्धस्तु संग्राहः। मुष्टिबन्धः संग्राहः स्यात्। [1]'अक्लीबौ मुष्टिमुस्तू द्वौ संग्राहो [2]मुचुटिः स्त्रियाम्' इति मुष्टिमात्रे वैजयन्ती (पृ. १७९, श्लो. ७९) ।। डिम्बे डमरविप्लवौ। मुष्टिप्रहारादीनां नामानि। [3]'पिडिकिटिपोट्लु'।। 'उपलिङ्गमुपद्रवः'। एते द्वे च।। बन्धनं प्रसृतिश्चारः। बन्धननामानि। 'बन्धोपसर्पयोश्चारः' इति रुद्रः।। स्पर्शः स्प्रष्टोपतप्तरि। रोगनामानि। 'रुजायां स्पर्शके स्पर्शो दानस्पर्शनयोरपि' इति रुद्रः ।। १४ ।।

[1] अस्त्रियां A1, C1. [2] मुचिटुः A1. [3] B3 omits.

निकारो विप्रकारः स्यादाकारस्त्विङ्ग इङ्गितम्।
परिणामो विकारो द्वे समे विकृतिविक्रिये ।। १५ ।।

(वि.) निकार इति--[1]निकृष्टं करणं निकारः। [2]विरुद्धप्रकारेण करणं विप्रकारः। [3]खलीकरणस्य नामनी ।। आक्रियते आविष्क्रियतेऽभिप्रायोऽनेनेत्याकारः। 'डुकृञ् करणे'। [4]इङ्गति जानाति निगूढमभिप्रायमनेनेति इङ्गितम्। इङ्गश्च। 'इगि गतौ'। चेष्टितस्य नामानि ।। [5]परिणमति कालेनेति परिणामः।

'णमु प्रह्वत्वे [6]शब्दे च'। विक्रियत इति विकारः। विकृतिश्च। [7]विक्रिया च। विकारस्य नामानि ॥ १५ ॥

[1] निकृष्टकरणं Pt2. [2] विरुद्धकरणं Pt2. [3] दुर्जनीकरणस्य K4, K6. [4] इङ्ग्यते ज्ञायतेऽभिप्रायोऽनेन Pt2. [5] परिणतिः कालेनान्यथेति Pt2. [6] J2, K2, K4 omit शब्दे च. [7] विरुद्धा क्रिया Pt2.

(विव.) निकारो विप्रकारः स्यात्। अकृत्यार्थकरणोद्घाटनेन दुर्जनीकरणस्य नामनी। अपकारमात्रस्य नामनी इत्यपरे। निकृष्टं करणं निकारः। विरुद्धप्रकारेण करणं विप्रकारः। भावे घञ्[1] (३. ३. १८) ॥ आकारस्त्विङ्ग इङ्गितम्। यद्यप्यत्र, [2]'आकारैरिङ्गितैर्गत्या ज्ञायतेऽन्तर्गतं मनः' इति स्मृतौ (म. स्मृ. ८. २६); 'तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च' इत्यादिमहाकविप्रयोगे च (रघु. १. २०) इङ्गिताकारयोरस्त्येव भेदः। आलंकारिका अप्याहुः[3]— 'आकारशब्दस्य द्वावर्थौ, इङ्गितम् आकृतिश्च' इति। अत एव वक्ष्यति— 'आकाराविङ्गिताकृती' (३. ३. १६२) इति। तथा चात्र इङ्गितपर्यायेनोक्त इति। इङ्गति जानाति गूढमर्थमनेनेति इङ्गः। 'इगि गतौ'। गतिर्ज्ञानम्। करणे घञ्॥ [4]'नपुंसके भावे क्तः' (३. ३. ११४) इति क्तप्रत्यये इङ्गितम्। उपचारात् करणे तस्य वृत्तिः॥ परिणामो विकारे। पूर्वरूपपरित्यागेन रूपान्तरापत्तिलक्षणे विकारविशेषे परिणामशब्दः स्यात्। यथा क्षीरस्य परिणामो दधि। मृत्पिण्डस्य घटः। काष्ठस्य भस्म इत्यादि। 'णम प्रह्वत्वे शब्दे च' इत्यस्मात् परिपूर्वात् भावे घञि 'उपसर्गादसमासेऽपि...' (८. ४. १४) इति णत्वे परिणामः[5]। 'षोडशकश्च विकारः' (सांख्य. ३) इत्यादावुपचाराद् भाववचनयोरपि परिणामविकारशब्दयोः प्रयोगः॥ द्वे समे विकृतिविक्रिये। परिणामरूपस्यान्यस्य वा प्रकृतेरन्यथात्वमात्रस्य नामनी। यथा—भ्रूविकृतिः, स्वरविक्रिया इत्यादि। स्त्रियां क्तिनि (३. ३. ९४) विकृतिः॥ 'कृञः श च' (३. ३. १००) इति शप्रत्यये[6] विक्रिया। इमे द्वे उपपदेऽर्थतो लिङ्गतश्च समे तुल्ये इत्यर्थः॥ १५ ॥

[1] 'अचो ञ्णिति' (७. २. ११५) इति वृद्धिः. [2] मनुस्मृतौ पूर्णश्लोकस्तु— 'आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः' इति. [3] Gm3, Tv add: 'चेष्टा निगूढभावा च बोधिका कथितेङ्गितम्। भ्रुकुटीमुखरागादिराकार इति शब्द्यते' इति. [4] Tj1, Tj2 add अस्मादेव धातोः. [5] B5, B6 add

भावे घञि विकारः. [6] Tv adds सार्वधातुके यक् (३. १. ६७), 'रिङ शयग्लिङक्षु' (७. ४. २८) इति रिङादेशे च.

(पा.) निकारो विप्रकारः स्यात् । [1]दन्तनिष्पीडनादिजनितमुखविकारादि-नामनी ।। आकारस्त्विङ्ग इङ्गितम् । [2]भ्रुकुटिबन्धाद्यङ्गविकारनामनी ।। परिणामो विकारः । प्रकृत्यन्यथाभावनामनी ।। द्वे—विक्रिये । अमार्गनामनी । 'अमार्गो विक्रिया स्त्रियाम्' इत्यमरमाला । अनुक्तम्—'भङ्गिस्तु व्याकृतिर्भवेत्'। पृथ-क्प्रकारनामनी । [3]'वेरेवोकपैनदि' ।। १५ ।।

[1] B3 omits °आदि°. [2] भ्रुकुटयादि° B3, C1. [3] B3 omits.

अपहारस्त्वपचयः समाहारः समुच्चयः ।
प्रत्याहार उपादानं विहारस्तु परिक्रमः ।। १६ ।।

(वि.) अपहार इति—[1]अपह्रियत इत्यपहारः । 'हृञ् हरणे' । अप-चीयते हीयत[2] इति अपचयः । 'चिञ् चयने' । [3]हानेर्नामनी ।। एकत्र समाह्रियत इति समाहारः[4] । एकत्र समुच्चीयत इति समुच्चयः । अनेकस्य एकत्र समावेशस्य नामनी ।। प्रत्याह्रियत इति प्रत्याहारः । उपादीयत इति उपादानम्[5] । 'डुदाञ् दाने' । अङ्गनादिविषयेभ्य इन्द्रियादीनामाकर्षणस्य नामनी ।। विशेषेण चित्त-माह्रियत इति [6]विहारः । परितः क्रम्यत इति परिक्रमः । 'क्रमु पादविक्षेपे' । क्रीडासंचारनामनी ।। १६ ।।

[1] अपहरणं Pt2. [2] क्षीयते K5. [3] हरणादेः J2. [4] समाहरणं Pt2. [5] उप समीपे आदानं Pt2. [6] विहरणं Pt2.

(विव.) अपहारस्त्वपचयः । पूर्वावस्थापेक्षया जातह्रस्वत्वस्य[1] नामनी । यथा—आचारापहारः, विद्यापहार इति । अपेत्युपसर्गो ह्रस्वार्थे । तथा हि—'अपान्यथात्वे विश्लेषे ह्रस्वोद्घाटनवारणे' इति उपसर्गवृत्तौ । ततश्च 'हृञ् हरणे' इत्यस्माद् भावे घञि (३. ३. १८) अपहारः ।। 'चिञ् चयने' इत्यस्माद् एरचि (३. ३. ५६) अपचयः ।। समाहारः समुच्चयः । अनेकेषामेकत्र समावेशस्य नामनी । यथा—स्मृतिसमुच्चयः, शब्दसमुच्चयः[2] इति ।। प्रत्याहार उपादानम् ।

इन्द्रियार्थेभ्यो[3] रूपादिभ्य आकृष्य [4]चक्षुरादीनामुपादानं स्वायत्तताकरणम्, स प्रत्याहार इत्युच्यते । प्रत्याहरणं प्रत्याहारः । भावे घञ् । दाञो ल्युटि (३. ३. ११५) उपादानम् ।। विहारस्तु परिक्रमः । क्रीडार्थमुद्यानादौ संचरणस्य नामनी । 'क्रमु पादविक्षेपे' । भावे घञ् । 'नोदात्त . . .' इति (७. ३. ३४) न वृद्धिः ।। १६ ।।

[1] °हीनत्वस्य Gm1, Tv. [2] Gm3, Tv add प्रमाणसमुच्चयः; समा इत्युपसर्गद्वयाद् हृञ्धातोः घञि समाहारः, समुदिति उपसर्गद्वयात् चिनोतेः एरचि समुच्चयः. [3] इन्द्रियार्थं B5, B6. [4] चक्षुरादिना B6.

(पा.) अपहारस्त्वपचयः । [1]बहुन्यल्पाहरणनामनी । [2]' अधिकमंदु अल्पमुदिनुट ' ।। समाहारः समुच्चयः । भिन्नानामेकत्र समावेशनामनी । ' वोखदिक्कुन गूडुट '[2] ।। प्रत्याहार उपादानम् । प्रवहत्करणप्रत्याहरणनामनी[3] ।। विहारस्तु परिक्रमः । विलाससंचारनामनी । [2]' नडपाडु ' ।। १६ ।।

[1] बहुलेऽल्पापहारनामनी A1, C1. [2] B3 omits. [3] °स्वाधीनकरणं° C1.

अभिहारोऽभिग्रहणं निर्हारोऽभ्यवकर्षणम् ।
अनुहारो ऽनुकारः स्यादर्थस्यापगमे व्ययः ।। १७ ।।

(वि.) अभिहार इति—आभिमुख्येन ह्रियत[1] इति अभिहारः । आभिमुख्येन ग्रहणमभिग्रहणम्[2] । आभिमुख्येन[3] ग्रहणस्य नामनी ।। [4]निर्ह्रियत इति निर्हारः । अभ्यवकृष्यत इति अभ्यवकर्षणम् । 'कृष विलेखने' । यन्त्रयुक्त्या शल्यादीनां बहिष्करणस्य नामनी ।। अनुह्रियत इत्यनुहारः[5] । अनुक्रियत इत्यनुकारः[6] । [7]रूपाद्यनुकरणस्य नामनी ।। [8]व्यय्यते येन व्ययः । 'व्यय वित्तसमुत्सर्गे' । अर्थापगमस्य[9] नामनी ।। १७ ।।

[1] हरणम् 'हृञ् हरणे' Pt2. [2] J2, Pt2 add 'ग्रह उपादाने'. [3] अभिमुखहरणस्य K5. [4] नितरां हरणं Pt2. [5] Pt2 adds अनुपूर्वो हरतिः सादृश्ये. [6] अनुकरणं, 'डुकृञ् करणे' Pt2. [7] K6 omits आदि. [8] व्ययति K4, K6. [9] °अपगमनस्य K4, K5.

(विव.) अभिहारोऽभिग्रहणम् । चौर्येणाभिमुख्यस्य ग्रहणस्य नामनी । अत एव वक्ष्यति—'अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च' (३. ३. १६८)

इति[1] ।। निर्हारोऽभ्यवकर्षणम् । शरीरादौ प्रविष्टस्य शल्यादेर्बहिराकर्षणस्य नामनी। 'कृष निष्कर्षे' इत्यस्मादभ्यवपूर्वात् ल्युटि अभ्यवकर्षणम् ।। अनुहारोऽनुकारः स्यात् । परकृतचेष्टावेषभाषादिसदृशचेष्टादियोगित्वस्य नामनी । अनु सादृश्ये, तद्योगाद् धातुद्वयस्यापि तादर्थ्यम् ।। अर्थस्यापगमे व्ययः । दृष्टार्थमदृष्टार्थं वा साधनादिवियोगस्य नामनी । 'व्यय वित्तसमुत्सर्गे' इति चौरादिकाद् धातोरचि 'अतो लोपः' (६. ४. ४८) इत्यकारलोपे व्ययः[2] ।। १७ ।।

[1] हृञ् हरणे । अभिपूर्वाद् घञि अभिहारः; 'ग्रह उपादाने' । अभिपूर्वात् ल्युटि अभिग्रहणम्. [2] व्ययनम् । 'व्यय वित्तसमुत्सर्गे' । अदन्तः । घञ् । एरच् (३. ३. ५६) वा इति भा. दी.

(पा.) अभिहारोऽभिग्रहणम् । मार्गप्रहरणनामनी । [1]'तेरुवाटुगोठ्टुट' ।। निर्हारोऽभ्यवकर्षणम् । [2]सस्योपघातुक[3]तृणाद्युत्पाटननामनी । 'कलप्रतिचुट'[1] ।। अनुहारोऽनुकारः स्यात् । अनुकरणनामनी । [1]'पोविके' ।। अर्थस्यापगमे व्ययः । अर्थापगमनामनी[4] । 'वेच्चम्'[1] ।। १७ ।।

[1] B3 omits. [2] °अपहारक° A1. [3] C1 omits °तृण°. [4] °अपगमः व्ययः स्यात् A1.

प्रवाहस्तु प्रवृत्तिः स्यात् प्रवहो गमनं बहिः ।
वियामो वियमो यामो यमः संयामसंयमौ ।। १८ ।।

(वि.) प्रवाह इति—[1]प्रवाह्यत इति प्रवाहः । 'वह प्रापणे' । प्रवर्त्यते प्रवाह्यत इति प्रवृत्तिः[2] । 'वृतु वर्तने' । [3]उदकादेरविच्छेदेन प्रवर्तनस्य नामनी ।। प्रकर्षेण वहनं गमनं प्रवहः । बहिर्गमनस्य नाम ।। विविधो यामो वियामः[4] । वियमश्च । 'यम उपरमे' । [5]परिपीडाद्युपशमस्य[6] नामनी ।। यमनं यामः । यमश्च । उपरतिमात्रस्य नामनी ।। संयम्यत इति संयामः । संयमश्च[7] । अत्यन्तोपरमस्य नामनी ।। १८ ।।

[1] प्रकर्षेणाविच्छेदेन वहतीति Pt2. [2] प्रवर्तत इति Pt2. [3] उल्कादेः J2. [4] विशेषेण यमनं Pt2. [5] परिक्रीडा° J2. [6] °शमनस्य K3, K5. [7] K2 adds 'यम उपरमे'; उपशमने J2.

(विव.) प्रवाहस्तु प्रवृत्तिः स्यात्। जलादेरन्यस्य वा विच्छेदरहितानुवृत्तेर्नामनी। यथा—नदीप्रवाहः, विद्याप्रवाह इति। प्रकर्षेण वाहो वहनं विषयान्तरप्राप्तिः प्रवाहः[1]। प्रकृष्टा विच्छेदरहिता वृत्तिः प्रवृत्तिः[2]।। प्रवहो गमनं बहिः। गृहनगरादेर्बहिर्गमनस्य नाम। 'प्रवहः स्याद् बहिर्यात्रा' इति भागुरिः[3]। प्रकृष्टो वहः प्रवहः। 'गोचरसंचरवह...' इत्यादिना (३. ३. ११९) साधुः। बहुलग्रहणादच्प्रत्ययो वा ।। वियामो—संयमौ। परोपद्रवादिभ्य उपरतेर्नामानि। वेत्यनुवृत्तौ 'यमः समुपनिविषु च' (३. ३. ६३) इति सोपसर्गाद् अनुपसर्गादपि पाक्षिकेऽप्प्रत्यये यमः, वियमः, संयमः इति त्रयः शब्दाः। तदभावपक्षे 'हलश्च' (३. ३. १२१) इति घञि वियामः, संयामः, यामः इति शब्दत्रयम्। केचिदत्र व्याकुर्वते—वियामादिद्वयं मनोवाक्कायपूर्वकविरोधोपरतिवाचकम्। यामादिद्वयम् उपरतिमात्रवचनम्। संयामादिद्वयम् आत्यन्तिकोपरतिवाचकमिति ।। १८ ।।

[1] 'वह प्रापणे', घञ्. [2] 'वृतु वर्तने', क्तिन् (३. ३. ९४). [3] इति [भागुरिनिर्मित] त्रिकाण्डः इति टी. स. (पृ. ६२).

(पा.) प्रवाहस्तु प्रवृत्तिः स्यात्। [1]परंपरानामनी। 'प्रवाहस्तु परंपरा' इति वैजयन्ती (पृ. १९५, श्लो. ३९) ।। प्रवहो गमनं वहिः। 'प्रवासो गमनं बहिः' इति पाठान्तरम्। बहिर्गमनं प्रवहः[2] स्यात् ।। वियामो—संयमौ। हिंसाद्युपरतिनामानि ।। १८ ।।

[1] अविच्छेदगमन° C_1. [2] B_3 adds प्रवासश्च.

हिंसाकर्माभिचारः स्याद् जागर्या जागरा द्वयोः।
विघ्नोऽन्तरायः प्रत्यूहः स्यादुपघ्नोऽन्तिकाश्रये ।। १९ ।।

(वि.) हिंसाकर्मेति—[1]परमभिभवितुं चारः[2] चरणम् अभिचारः। हिंसाकर्मणो नाम ।। जागरणं जागर्या। जागरा च। 'जागृ निद्राक्षये'। निद्राभङ्गस्य[3] नामनी ।। कार्याणां विहननं[4] विघ्नः। अन्तरा मध्येऽयनं [5]विच्छेदोऽन्तरायः। 'अय पय गतौ'। प्रतिकूलमूहनं प्रत्यूहः। 'ऊह वितर्के'। प्रारब्धकार्याणां प्रतिकूलस्य नामानि ।। [6]उपहन्यत इत्युपघ्नः। 'हन हिंसागत्योः'। अत्र धातोर्गत्यर्थः। अन्तिकाश्रयणस्य नामनी ।। १९ ।।

[1] परान् Pt2. [2] J2, K2 omit चारः. [3] निद्राभावस्य J2, K6. [4] हननं कार्यस्य Pt2. [5] K3, K6 omit विच्छेदः. [6] उप समीपे हन्यते गम्यते K4, K5.

(विव.) हिंसाकर्माभिचारः स्यात्। परमारणार्थमनुष्ठेयं श्येनादिकर्म अभिचार उच्यते। परमभिचरितुं चरणमभिचारः। 'चर गतिभक्षणयोः'। अभिपूर्वो हिंसायां वर्तते[1]। यथा—'प्रत्यगेनमभिचारः स्तृणुते', 'श्येनेनाभिचरन् यजेत' इति ॥ जागर्या जागरा द्वयोः। निद्रानाशस्य नामनी। 'कृञः श च' (३. ३. १००) इत्यत्र 'जागर्तेरकारो वा'[2] (वा. ३. ३. १०१) इत्यकारप्रत्ययश-प्रत्ययौ। तत्र शप्रत्ययपक्षे 'सार्वधातुके यक्' (३. १. ६७) इति यक्। उभयत्र 'जाग्रोऽविचिण्णल्ङित्सु' (७. ३. ८५) इति गुणे जागर्या जागरेति शब्दद्वयम् इति सुबोधिनीकारः। 'रिङ्शयग्लिङ्क्षु' (७. ४. २८) इति रिङादेशे जाग्रिया इति धातुपारायणम् इति सर्वानन्दः (पृ. ६२)। अकारप्रत्ययबलेन केवलस्य स्त्रीलिङ्गस्यैव उन्नयनं मा भूदिति द्वयोरित्युक्तम्। तेन घञ्प्रत्यये पुंलिङ्गोऽप्यस्तीति दर्शितम् ॥ विघ्नोऽन्तरायः प्रत्यूहः। कार्यसिद्धिप्रतिबन्धनस्य नामानि। यथा—घटसिद्धेश्चक्रचीवराद्यभावः। अर्थसिद्धेः पिशुनव्यापार इति। विहन्त्यनेन पुरुषः कार्यसिद्धिमिति विघ्नः। 'हन हिंसागत्योः'। 'घञर्थे कविधानं स्थास्नापाव्यधिहनि-युध्यर्थम्' (वा. ३. ३. ५८) इति घञर्थे कप्रत्ययः। 'गमहनजन ...' इत्यादिना उपधालोपः, 'हो हन्तेः' (७. ३. ५४) इति कुत्वम् ॥ अन्तरा मध्ये आयः[3] अयनं कार्यव्यवधानमत्रेति अन्तरायः ॥ प्रतिकूलम् ऊह्यतेऽनेनेति प्रत्यूहः। 'ऊह वितर्के'[4] ॥ स्यादुपघ्नोऽन्तिकाश्रये। समीपभूत आश्रये उपघ्नशब्दः। उप समीपे हन्यते गम्यत इत्युपघ्नः। 'हन हिंसागत्योः'। 'उपघ्न आश्रये' (३. ३. ८५) इति निपातितः। 'आश्रयशब्दः [5]सामीप्यं प्रत्यासत्तिं [6]लक्षयति' इति काशिका (१, पृ. २२०) ॥ १९ ॥

[1] Tv adds ततो घञ्. [2] B5, B6 add इति वक्तव्यम्. [3] 'अय गतौ' घञ्. [4] Tj1, Tj2 add घञि प्रत्यूहः. [5] Gm3, Tv omit. [6] उपलक्षयति Gm1, Tv.

(पा.) हिंसाकर्माभिचारः स्यात्। हिंसानामनी ॥ जागर्या जागरा द्वयोः। [1]निद्राक्षयनामनी ॥ विघ्नो—प्रत्यूहः। विघ्ननामानि ॥ स्यादुपघ्नोऽन्तिकाश्रये। समीपाश्रयनाम[2]। 'छेदादिवोपघ्नतरोर्व्रतत्यौ' इति रघुवंशे[3] (१४. १) ॥ १९ ॥

[1] °नाश° A1, C1.　[2] A1 adds 'अडरु'.　[3] A1 omits रघुवंशे.

निर्वेश उपभोगः स्यात् परिसर्पः परिक्रिया ।
विधुरं तु प्रविश्लेषोऽभिप्रायश्छन्द आशयः ।। २० ।।

(वि.) निर्वेश इति—[1]निर्विश्यते उपभुज्यत इति निर्वेशः । 'विश प्रवेशने' । [2]उपभुज्यत इति उपभोगः । 'भुज पालनाभ्यवहारयोः' । सुखदुःख-साक्षात्कारस्य नामनी ।। परितः [3]सर्पणं परिसर्पः । 'सृप्लृ गतौ' । परितः सर्पण-क्रिया[4] परिक्रिया । समन्तात् सर्पणस्य नामनी ।। विगता धूः कार्यभारोऽत्रेति विधुरम् । प्रविश्लिष्यते [5]कार्यभारोऽत्रेति प्रविश्लेषः । 'श्लिष आलिङ्गने' । विरहस्य नामनी ।। अभिप्रयन्ति पदार्था अस्मिन्निति अभिप्रायः । 'इण् गतौ' । छन्दयन्ति आच्छादयन्त्यत्रेति छन्दः । 'छदि संवरणे'[6] । आशेरते पदार्था अत्रेत्या-शयः । 'शीङ् स्वप्ने' । अभिप्रायस्य नामानि ।। २० ।।

[1] निर्वेशनं Pt2.　[2] उपभुक्तिः Pt2.　[3] सर्प्यते K5; सृप्यते J2.　[4] सर्पणम् K5, K6.　[5] K5 omits भारः.　[6] आच्छादने दीप्तौ च K3, K6; 'छदि आह्लादने' Pt2.

(विव.) **निर्वेश उपभोगः स्यात्** । सुखदुःखसाक्षात्कारस्य नामनी । निरुपसर्गपूर्वाद् 'विश प्रवेशने' इत्यतो भावे घञि (३. ३. १८) निर्वेशः ।। 'भुज परिपालनाभ्यवहारयोः' इत्यस्माद् उपपूर्वाद् भावे घञि उपभोगः । एवमादौ तदर्थविहितप्रत्ययान्तरान्तानि निर्वेशनमुपभुक्तिरित्यादीनि पर्यायतया द्रष्टव्यानि ।। **परिसर्पः परिक्रिया** । समन्तात् सर्पणस्य नामनी । परितः सर्पणं परिसर्पः । 'सृप्लृ गतौ' । घञ् ।। परितः सर्पणरूपा क्रिया परिक्रिया[1] ।। **विधुरं तु प्रविश्लेषः** । प्रकर्षेण विश्लेषो दूरभूतत्वं वा विधुरमुच्यते । विगता धूः कार्यभारोऽत्रेति विधुरम्[2] । 'वैफल्येऽपि च विश्लेषे विधुरं विक्लवे त्रिषु' इति रभसः । 'विधुरं किमतः परं [3]वद' इति भारविप्रयोगः (किरा. २. ७)[4] ।। **अभिप्रायश्छन्द आशयः** । मनो-गतार्थस्य नामानि । अभिप्रायः 'इण् गतौ' । पचाद्यच् (३. १. १३४) । अभिप्रीणाति श्रोतॄन् इति वा । 'प्रीञ् [5]तर्पणे कान्तौ च' । घञ् ।। छन्दयति आह्लादयति । 'छदि[6] आह्लादने' । घञ् । साहचर्येण पुंलिङ्गत्वाद् अकारान्तत्वम् । 'छन्दानुवृत्तिदुःसाध्याः' इति [7]प्रयोगः (शिशु. २. १०५) ।। आसमन्ताच्छेते मानसमिति आशयः । 'शीङ् स्वप्ने'[8] ।। २० ।।

1 'कृञः श च' इति शः। 'सार्वधातुके यक्' इति यक्। 'रिङ शयग्लिङक्षु' इति रिङ, क्रिया. 2 'ऋक्पूरब्धूःपथामानक्षे' इत्यकारप्रत्ययः. 3 परैः इति मु. ग्रन्थे. 4 प्रविपूर्वात् 'श्लिष आलिङ्गने' इत्यतो भावे घञि प्रविश्लेषः. 5 प्रीणने B5, B6. 6 छदिधातुः भिन्नाभिप्रायो दृश्यते विविधग्रन्थेषु. 7 Gm1 adds माघ°. 8 एरचि (३. ३. ५६) आशयः.

(पा.) निर्वेश उपभोगः स्यात्। उपभोगनामनी ।। परिसर्पः परिक्रिया। [1]परिजनपरिवेष्टननामनी ।। विधुरं तु प्रविश्लेषे। विकलत्वनामनी[2]। 'वैकल्येऽपि च विश्लेषे विधुरं [3]तद्वति त्रिषु' इति त्रिकाण्डशेषः (पृ. ३३, श्लो. ६२५) ।। अभिप्रायश्छन्द आशयः। भावार्थनामानि। 'आकूतिमतमाकूतं भावोऽभिप्राय आशयः' इति वैजयन्ती (पृ. ६७, श्लो. १७४) ।। २० ।।

1 °परिचेष्ट° A1. 2 C1 adds विश्लिष्टे तु त्रिलिङ्गकम्. 3 विकले इति मुद्रितग्रन्थे.

संक्षेपणं समसनं पर्यवस्था विरोधनम्।
परिसर्या परीसारः स्यादास्या त्वासना स्थितिः ।। २१ ।।

(वि.) संक्षेपणमिति--[1]बह्व एकत्र संक्षिप्यन्त इति संक्षेपणम्[2]। 'क्षिप क्षेपणे'। समस्यन्तेऽत्रेति[3] समसनम्। 'असु क्षेपणे'। प्रकीर्णानां पदार्थानामेकत्र स्थापनस्य नामनी ।। पर्यवस्थीयत इति पर्यवस्था[4]। 'ष्ठा गतिनिवृत्तौ'। विरुध्यत इति विरोधनम्। 'रुधिर् आवरणे'। सहानवस्थानादिलक्षणविरोधस्य नामनी ।। परितः सरणं परिसर्या। परीसारश्च[5]। 'सृ गतौ'। [6]परितः संचारस्य नामनी ।। आसनमास्या[7]। आसना च। 'आस उपवेशने'। [8]स्थीयत इति स्थितिः। 'ष्ठा गतिनिवृत्तौ'। उपवेशनस्य नामानि ।। २१ ।।

1 बहुरेकत्र संक्षिप्यते K6. 2 संक्षेपः संक्षेपणम् Pt2. 3 J2 adds क्षिप्यन्ते. 4 परितः नानादेशेषु अवस्थानम् Pt2. 5 K5 adds परिसारश्च. 6 खले बलीवर्दाद्यटनक्रियानामनी J2, K6, Z1. 7 आस्यत इति, आसनं च K5. 8 संस्थानं Pt2.

(विव.) संक्षेपणं समसनम्। विप्रकीर्णानां पदार्थानामेकत्र राशीकरणस्य नामनी। संहततया क्षेपणं संक्षेपणम्[1] ।। 'असु क्षेपणे' इत्यस्मात् ल्युटि (३. ३. ११५) असनम्। संभूय असनं समसनम्। 'संक्षेपः संहारः[2] समाससंग्रहः समाहारः'

इति श्लोकार्थपर्यायेषु बोपालितः ।। पर्यवस्था विरोधनम् । सहानवस्थानादि-लक्षणविरोधस्य नामनी । मिथो विरोधेन परितो नानादेशेषु अवस्थानं पर्यवस्था । 'ष्ठा गतिनिवृत्तौ' । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ ।।[3] परिसर्या परीसारः। सर्वतो भ्रमणशीलस्य नामनी । परितः सरणं परिसर्या । 'सृ गतौ' । 'परिचर्यापरि-सर्यामृगयाटाटचानामुपसंख्यानम्' (वा. ३. ३. १०१) इति साधुः ।। सरतेर्घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति दीर्घे परीसारः ।। स्यादास्या त्वासना स्थितिः । उपवेशस्य नामानि[4] । 'आस उपवेशने' । 'ऋहलोर्ण्यत्' (३. १. १२४) आस्या वासरूपपरिभाषया[5] (३. १. ९४) ।। 'ण्यासश्रन्थो युच्' (३. ३. १०७) इति युचि आसना ।। 'स्थागापापचो भावे' (३. ३. ९५) इति क्तिन् । 'द्यतिस्यतिमास्थामित्ति किति' (७. ४. ४०) इति इकारादेशे स्थितिः ।। २१ ।।

[1] संपूर्वस्य क्षिपेर्ल्युटि संक्षेपणम्.　[2] संभावः Tj1, Tj2.　[3] 'रुधिर् आवरणे' । विपूर्वस्य ल्युटि विरोधनम्.　[4] Gm1 omits 4 lines.　[5] 'वासरूपोऽस्त्रियाम्' असमानरूपः प्रत्ययोऽपवादो वा भवति.

(पा.) संक्षेपणं समसनम् । [1]बहुना ग्रन्थेन वक्तव्यस्याल्पेन कथननामनी ।। पर्यवस्था विरोधनम् । शत्रुत्वस्वीकरणनामनी ।[2] 'पगवट्टुट' ।।परिसर्या परीसारः । [3]गिरिनगरादीनां [4]समीपस्थं मार्गमनुसृत्य गमननामनी ।[2] 'पर्वतादुलवोत्तुपट्टिपोवुट' ।। स्यादास्या त्वासना स्थितिः । उपवेशनामानि ।। २१ ।।

[1] बहुलग्रन्थेनोच्यमानमर्थम् A1.　[2] B3, C1 omit.　[3] गिर्यादीनां B3.
[4] समीपमार्गं B3.

विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः ।
स्यान्मर्दनं संहननं विनाशः स्याददर्शनम् ।। २२ ।।

(वि.) विस्तार इति—विस्तीर्यत इति विस्तारः[1] । 'स्तॄञ् आच्छादने' । विविच्य ग्रहणं विग्रहः[2] । विविच्य असनं क्षेपो व्यासः[3] । 'असु क्षेपणे' । विस्तारस्य नामानि ।। विस्तीर्यत इति विस्तरः । शब्दविस्तरस्य नाम ।। मृद्यतेऽङ्गमनेनेति मर्दनम् ।[4] 'मृद मर्दने' । संहन्यते मृद्यत इति संहननम् । संवाहनमिति पाठे संवाह्यन्ते

ऽङ्गान्यनेनेति संवाहनम्। [5]'वह प्रापणे'। अङ्गमर्दनस्य नामनी ।। विनश्यत इति विनाशः। 'णश अदर्शने'। [6]अदर्शनस्य नाम ।। २२ ।।

[1] विस्तृतिः विस्तारः Pt2. [2] J2, K2 add 'ग्रह उपादाने'. [3] विविधमासनं, 'आस उपवेशने' Pt2. [4] 'मृद क्षोदे' Pt2. [5] 'वाहृ प्रयत्ने' Pt2. [6] दर्शनाभावस्य K5.

(विव.) विस्तारो विग्रहो व्यासः। कटकम्बलादिसंबन्धिनो विस्तीर्णत्वस्य नामानि। 'स्तृञ्[1] आच्छादने' विपूर्वः, 'प्रथने वावशब्दे' (३. ३. ३३) इति घञ्प्रत्ययः ।। विविच्य ग्रहणं विग्रहः[2] ।। विविधं विविच्य वा [3]असनं व्यासः। 'असु क्षेपणे'। भावे घञ् ।। स तु शब्दस्य विस्तरः। स व्यासः शब्दसंबन्धी चेद् विस्तर उच्यते। 'प्रथने वावशब्दे' (३. ३. ३३) इति शब्दविषये घञ्निषेधाद् 'ॠदोरप्' इत्यप्प्रत्यये विस्तरः। स्यान्मर्दनं संहननम्। करचरणादिसुखकरस्य संपीडनस्य नामनी। मृद्यतेऽङ्गान्यनेनेति मर्दनम्। 'मृद क्षोदे'। ल्युट् ।। संहन्यते निपीड्यतेऽङ्गमनेनेति संहननम्। 'संवाहनं संहननम्' इति सुभूतिचन्द्रस्य पाठः। 'वाहृ प्रयत्ने संमर्दने च'। अस्माद् भावे ल्युटि संवाहनम्।

'कान्ताजनं सुरतखेदनिमीलिताक्षं
संवाहितुं समुपयानिव मन्दमन्दम्।'

इति भारविः (किरा. ९. ७६)। 'संवाहयामि चरणावुत पद्मताम्रौ' इति कालिदासश्च (शाकु. ३. २०)। 'श्रान्तसंवाहनं रोगिपरिचर्या सुरार्चनम्' इति स्मृतौ'[4] (या. स्मृ. १. ९. २०९)। 'संवाहनं [5]संवहने भारादेरङ्गमर्दने' इति विश्वप्रकाशश्च (पृ. ९८, श्लो. १६४) ।। विनाशः स्याददर्शनम्। [6]ध्वंसनिमित्तस्तिरोभावनिमित्तो वा ज्ञानविषयत्वाभावो वा विनाश उच्यते। 'ध्रुवं प्रणाशे[7] प्रहितस्य पत्रिणः शिलोच्चये तस्य विमार्गणं नयः' इति तिरोधाननिबन्धने भारविप्रयोगः (किरा. १४. ९)। घटनाशः पटनाशः इत्यादौ अन्यत्र प्रसिद्ध एव। 'णश अदर्शने' इत्यतो विपूर्वाद् भावे घञि (३. ३. १८) विनाशः ।। २२ ।।

[1] 'स्तृञ् आच्छादने' B5, B6. [2] 'ग्रह उपादाने'। 'ग्रहवृदृ...' इत्यप्प्रत्ययः. [3] आसनं Tj1, Tj2. [4] स्मृतिश्च Gm1. [5] वाहनेऽपि इति मुद्रितग्रन्थे. [6] दर्शन° Gm1, Tv. [7] प्रणाशः इति मु. ग्र.

(पा.) विस्तारो विग्रहो व्यासः । स्वल्पस्यानल्पीकरणनामानि ।[1] 'पिन्नदि पेट्टचेनुट' ।। स च शब्दस्य विस्तरः । अनल्पशब्देन कथनं विस्तरः स्यात्[2] । शब्द-प्रपञ्चनाम इत्यर्थः ।। संवाहनं मर्दनं स्यात् ।[3]पादाद्यङ्गमर्दननामनी । 'संवाहयामि चरणावुत पद्मताम्रौ' (शाकु. ३. २०); किंच 'संभोगान्ते मम समुचितो हस्त-संवाहनानाम्'[4] इति मेघसंदेशे (२. ३६) ।। विनाशः स्याददर्शनम् । अदर्शननाम[5] । 'अणुगुटि'[6] ।। २२ ।।

[1] B3 omits. [2] अनल्पत्वं शब्दस्य चेद् विस्तरः B3. [3] B3, C1 omit पादादि. [4] A1 adds 'यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम्'. [5] लोपनाम A1. [6] B3, C1 add 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ'.

संस्तवः स्यात् परिचयः प्रसरस्तु विसर्पणम् ।
निवाकस्तु प्रयामः स्यात् संनिधिः संनिकर्षणम् ।। २३ ।।

(वि.) संस्तव इति—संस्तूयते परिचीयत[1] इति संस्तवः[2] । 'ष्टुञ् स्तुतौ' । परिचीयत इति परिचयः । 'चिञ् चयने' । परिचयनामनी ।। प्रकर्षेण सरणं प्रसरः[3] । 'सृ गतौ' । विशेषेण सर्पणं विसर्पणम् । 'सृप्लृ गतौ' । तैलबिन्द्वादेः प्रसरणस्य[4] नामनी ।। नियतं वचनं निवाकः । नीवाकश्च । 'वच परिभाषणे' । प्रकर्षेण यमनं प्रयामः । 'यम उपरमे' । न्यूनाधिक्यरहितप्रमाणवचनस्य नामनी ।। [5]संनिधीयत इति संनिधिः । 'डुधाञ् धारणपोषणयोः' । संनिकृष्यत[6] इति संनि-कर्षणम् । 'कृष विलेखने' । प्रत्यासत्तेर्नामनी ।। २३ ।।

[1] K5 omits परिचीयते. [2] संस्तवनं Pt2. [3] प्रसार्यत इति K5. [4] प्रसरस्य J2. [5] संनिधानं Pt2. [6] संनिकर्षः J2, K2.

(विव.) संस्तवः स्यात् परिचयः । स्नेहपूर्वकस्य विस्रम्भस्य नामनी । 'ष्टुञ् स्तुतौ' । 'ऋदोरप्' (३. ३. ५७) ।। 'चिञ् चयने' । 'एरच्' (३. ३. ५६) । उपसर्गवशाद् धातुद्वयस्य परिचयार्थत्वम् ।। प्रसरस्तु विसर्पणम् । स्वल्पलता-विटपादेः समन्ताद् व्यापनस्य नामनी । 'सृ गतौ' । [1]बहुलग्रहणात् स्वार्थे प्रपूर्वा-दप्प्रत्यये प्रसरः ।। विशेषेण सर्पणं विसर्पणम्[2] । परिसर्पः परिक्रिया (श्लो. २०) परिसर्या परीसारः (श्लो. २१) प्रसरस्तु विसर्पणम् (श्लो. २३) इति विप्रकीर्ण-पठितस्य पादत्रयस्यावान्तरभेदश्रयणेऽर्थभेदोऽनुसंधेयः[3] । पर्यायान्तरदर्शनाभिप्रायेण[4]

वा पौनरुक्त्यं परिहरणीयम् ।। निवाकस्तु प्रयामः स्यात् । न्यूनाधिकभावरहितस्य प्रमाणभूतवचनस्य नामनी । वाको वचनम् । नियतं वाको निवाकः । 'वच परिभाषणे' । भावे घञ् (३. ३. १८) । [5]कुत्वम् (७. ३. ५२), [6]' उपसर्गस्य ...' इत्यादिना (६.३.१२२) दीर्घे च नीवाकः ।। प्रकर्षेण यमो[7] न्यूनाधिकभावाभ्या-मुपरमणमत्रेति, 'हलश्च' (३. ३. १२१) इति घञि प्रयामः । संनिधिः संनि-कर्षणम् । प्रत्यासत्तेर्नामनी । दधातेः संनिपूर्वाद् 'उपसर्गे घोः किः' (३. ३. ९२) इति पुंलिङ्गः[8] । [9]कृषेर्ल्युटि संनिकर्षणम् ।। २३ ।।

[1] 'कृत्यल्लुटो बहुलम्' (३. ३. ११३). [2] 'सृप्लृ गतौ', ल्युट्. [3] °आश्रयणेन° B5. [4] °प्रदर्शन° B5. [5] 'चजोः कु घिण्यतोः'. [6] उपसर्गस्य घञ्यमनुष्ये बहुलम्'. [7] यमनं Gm1. [8] 'आतो लोप इटि च' इत्याकारलोपः. [9] B6 adds 'कृष विलेखने'.

(पा.) संस्तवः स्यात् परिचयः । [1]अभ्यासनामनी । 'अभ्यासः स्यात् परिचयः' इति वैजयन्ती (पृ. १२०, श्लो. १९५) ।। प्रसरस्तु विसर्पणम् । [2]कण्डूत्या-दिविसर्पणनामनी । 'शिब्बमुतिंपपट्टुट' ।। नीवाकस्तु प्रयामः स्यात् । जयघण्टि-कादिमुखेन धान्याद्यर्घप्रख्यापननामनी । 'धान्यादुलघुवचेसुट' ।। संनिधिः संनि-कर्षणम् । [3]समीपनामनी । 'पोंट्टुट'[4] ।। २३ ।।

[1] परिचय° C1. [2] सिहुल्लिकाकण्डूतिप्रसृति° A1. [3] प्राप्तिनाम A1. [4] B3 omits.

लवोऽभिलावो लवने निष्पावः पवने पवः ।
प्रस्तावः स्यादवसरस्त्रसरः सूत्रवेष्टनम् ।। २४ ।।

(वि.) लव इति—लूयत[1] इति लवः । अभिलावः । लवनं च । 'लूञ् छेदने' । तृणादिच्छेदनस्य नामानि ।। नितरां [2]पूयते धान्यमत्रेति निष्पावः । पवनं च । पवश्च । 'पूञ् पवने' । धान्यादेर्निस्तुषीकरणस्य नामानि ।। प्रसङ्गेन [3]कार्यमत्र स्तूयत इति प्रस्तावः । 'ष्टुञ् स्तुतौ' । कार्यं कर्तुमवसरतीति अवसरः । 'सृ गतौ' । [4]अवसरस्य नामनी ।। त्रस्यति[5] भीतवदितस्ततश्चलतीति त्रसरः । 'त्रसी उद्वेगे'[6] । [7]सूत्राणां वेष्टनं सूत्रवेष्टनम् । 'वेष्ट वेष्टने' । सूत्रस्य[8] वेष्टन-क्रियाया नामनी ।। २४ ।।

[1] J2 adds छिद्यते.　[2] पवनं Pt2.　[3] स्तवनं K6, Pt2.　[4] J2, K2 add राजादेः.　[5] K3, K4 add सूत्रमवेक्ष्यते.　[6] उद्वेजने K2, K3, K5.　[7] सूत्रं वेष्टयतेऽत्र J2, K2, K5.　[8] K5 adds यन्त्रवहनार्थम्.

(विव.) लवो ऽभिलावो लवने। लवित्रादिना व्रीह्यादिस्तम्बच्छेदनस्य[1] नामानि। 'लूञ् छेदने'। 'ऋदोरप्' (३. ३. ५७) इत्यपि लवः। 'निरभ्योः पूल्वोः' (३. ३. २८) इति घञि अभिलावः[2]॥ निष्पावः पवने पवः। धान्यादीनां निस्तुषीकरणस्य बहुलीकरणस्य नामानि। 'पूञ् पवने'। 'निरभ्योः पूल्वोः' (३. ३. २८) इति घञि निष्पावः॥ ल्युटि पवनम्। 'ऋदोरप्' (३. ३. ५७) इत्यपि पवः॥ प्रस्तावः स्यादवसरः। कर्तव्यार्थोचितकालस्य[3] नामनी। प्रस्तूयते कार्यमस्मिन्निति प्रस्तावः। 'ष्टुञ् स्तुतौ'। 'प्रे द्रुस्तुस्रुवः' (३. ३. २७) इत्यधिकरणे घञ्॥ अवसरन्ति कार्यं कर्तुमवनता गच्छन्त्यत्रेत्यवसरः। 'सृ गतौ'। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः[4]॥ त्रसरः सूत्रवेष्टनम्। तन्तुवायैः [5]पटवासार्थं कल्पितस्य दीर्घतन्तुवेष्टितस्य नामनी। त्रस्यति भीतवद् इतस्ततश्चलतीति त्रसरः। 'त्रसी उद्वेगे'[6]। औणादिकोऽरन्प्रत्ययः। सर्वानन्दस्तु (टी. स. पृ. ६५) तसर[7] इति प्रथमाक्षरं रेफरहितमाह॥ सूत्रं वेष्टयतेऽत्रेति सूत्रवेष्टनम्। रूपभेदाद् नपुंसकत्वम्॥ २४॥

[1] °छेदस्य Gm1.　[2] B6 adds ल्युटि लवनम्.　[3] उचितस्य B5.　[4] बाहुलकादप्. इति भा. दी. (पृ. ४५४).　[5] पटार्थं Tv.　[6] उद्वेजने Tj1, Tj2.　[7] Sarvānanda adds—'तन्यृषिभ्यां क्सरन्' (उ. ३. ७५).

(पा.) लवोऽभिलावो लवने। [1]सस्यादीनां [2]छेदननामानि। [3]'चेनुकोसुट'॥ निष्पावः पवने पवः। वायुना धान्यनिस्तुषीकरणनामानि। [3]'तूर्पेत्तुट'॥ प्रस्तावः स्यादवसरः। वेलानामनी। 'प्रस्तावोऽवसरो वेला' इति वैजयन्ती[4]॥ त्रसरः सूत्रवेष्टनम्। तन्तुवायोपकरणनामनी[5]। 'परटे'॥ २४॥

[1] क्षेत्रे व्रीह्यादीनां C1.　[2] A1 adds शाकटादिना.　[3] B3 omits.　[4] मुद्रितग्रन्थे न दृश्यते.　[5] °सूत्रवेष्टन° A1.

प्रजनः स्यादुपसरः प्रसरप्रणयौ समौ।
धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रमो दुर्गसंचरः॥ २५॥

(वि.) प्रजन इति—प्रजायन्ते पशवोऽस्मिन्निति[1] प्रजनः। 'जनी प्रादुर्भावे'। उपसरति वृषोऽस्मिन्निति उपसरः[2]। 'सृ गतौ'। पशूनां गर्भग्रहणस्य[3] नामनी ॥ प्रीत्या प्रसार्यत इति प्रसरः[4]। प्रश्रय इति वा पाठः। प्रणीयते प्रार्थ्यत इति प्रणयः। 'णीञ् प्रापणे'। प्रीत्या प्रार्थनस्य नामनी ॥ निष्क्रम्यते वहिष्क्रियतेऽज्ञानमनेनेति निष्क्रमः। 'क्रमु पादविक्षेपे'। [5]धीशक्तेः प्रज्ञासामर्थ्यस्य नाम ॥ संक्रामन्ति [6]संक्लेशेन गच्छन्त्यत्रेति संक्रमः। दुर्गे दुर्गमे प्रवाहादौ संचरन्त्यनेनेति दुर्गसंचरः। 'चर [7]गतौ'। दुस्तरप्रवाहादौ काष्ठादिभिर्बद्धस्य सेत्वादेर्नामनी ॥ २५ ॥

[1] अनेन Pt2. [2] उपसरणम् Pt2. [3] °ग्रहणकालस्य K6. [4] J2, K5 add 'सृ गतौ'. [5] J2 adds धियः शक्तिः धीशक्तिः. [6] K5 omits सं; संचरन्ति Pt2. [7] गतिभक्षणयोः J2, K2, Pt2.

(विव.) प्रजनः स्यादुपसरः। [1]पुंगवादीनां मैथुनोपसर्पणस्य नामनी। गर्भग्रहणस्य कालस्येत्यन्ये। प्रजायन्ते पशवोऽत्रेति प्रजनः। 'जनी प्रादुर्भावे'। अधिकरणे घञ्प्रत्यये 'जनिवध्योश्च' (७.३.३५) इति वृद्धिप्रतिषेधः ॥ उपसरति[2] वृषभो गां गर्भमाधातुमत्रेति उपसरः। 'प्रजने सर्तेः' (३.३.७१) इत्यप् ॥ प्रसरप्रणयौ समौ। प्रीतिपूर्वकप्रार्थनानामनी इति केचित्। विनयस्य नामनी इत्यपरे[3]। प्रीतिप्रकर्षेण सरणं प्रसरः। 'ऋदोरप्'[4] ॥ प्रीत्यानयनं प्रणयः[5]। 'उपसर्गादसमासेऽपि...' (८.४.१४) इति णत्वम् ॥ धीशक्तिर्निष्क्रमः। धियो बुद्धेः शक्तिः सामर्थ्यविशेषः।

'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥'

इत्युक्तलक्षणः[6]; स निष्क्रमः। निष्क्रम्यते बहिः क्रियते तत्त्वज्ञानजननद्वारेणाज्ञानमनेनेति[7] निष्क्रमः[8]। 'निष्क्रमो बुद्धिसंपत्तौ निर्गमे दुष्कुलेऽपि च' इति विश्वप्रकाशः (पृ. ११३, श्लो. ३८) ॥ अस्त्री—दुर्गसंचरः। जलपङ्कादिप्रायदेशे शकटादीनां गमनागमनसौलभ्यार्थं पाषाणादिभिर्बद्धस्य सेत्वादेर्नामनी। संक्रामन्ति सुखेन गच्छन्ति अनेनेति संक्रमः। करणे घञ् ॥ [9]दुर्गेऽपि मार्गे सम्यक् चरन्त्यनेनेति दुर्गसंचरः। 'गोचरसंचर...' इत्यादिना (३.३.११९) साधुः ॥ २५ ॥

[1] पुंगवानां स्त्रीगवीषु गर्भाधानाय मैथुनाभियोगस्य नामनी B5, Tj1, Tv. [2] Tj2 adds उपभोगेषु. [3] अन्ये Tj2. [4] बहुलग्रहणात् स्वार्थे प्रपूर्वादप्प्रत्यये प्रसरः इति पूर्वमुक्तम् (श्लो. २४). [5] 'णीञ् प्रापणे' 'एरच्'; प्रश्रय इति पाठे 'श्रिञ् सेवायाम्' 'एरच्'. [6] B5 adds इति अष्टलक्षणस्य. [7] द्वारा for द्वारेण B5, Tj2. [8] 'क्रमु पादविक्षेपे', घञ्, नोदात्तेति (७. ३. ३४) न वृद्धिः. [9] दुर्गमे पथि पङ्कादिना विषमे मार्गे संचरन्ति B5, Tj2.

(पा.) प्रजनः स्यादुपसरः। गोमहिष्यादिबालगर्भनामनी। [1]'लेत-चूलुतान'। उपचर इति पाठान्तरम्। [2]प्रसादप्रणयौ समौ। प्रसन्नतानामनी। 'प्रसादः प्रणयो [3]मतः' इति हलायुधः (अ. मा. ४. ८८)॥ धीशक्तिर्निष्क्रमः। [4]बुद्धिशक्तिः निष्क्रमः स्यात्॥ अस्त्री—दुर्गसंचरः। दुर्गपथनामनी॥ २५॥

[1] B3 omits. [2] प्रसर इति पाठान्तरम् C1. [3] स्मृतः इति मुद्रितग्रन्थे. [4] बुद्धिसंपत् A1.

प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रमः।
स्यादभ्यादानमुद्घात आरम्भः संभ्रमस्त्वरा॥ २६॥

(वि.) प्रत्युत्क्रम इति—प्रत्युत्क्रमणमुद्योगः प्रत्युत्क्रमः। प्रयोगोऽर्थो यस्येति प्रयोगार्थः। प्रयोगस्य कर्म कर्तुमुत्पन्नप्रयत्नस्य नामनी। प्रत्युद्गमः प्रयोगार्थमिति पाठे प्रकृष्टयुद्धार्थं भटनिर्गमनस्य नाम॥ प्रक्रम्यत इति प्रक्रमः। उपक्रम्यत इत्युपक्रमः। 'क्रमु पादविक्षेपे'। कर्मणः प्रथमयोगस्य[1] नामनी॥ आभिमुख्येनादानं स्वीकरणमभ्यादानम्। 'दा दाने'। उद्घन्यते प्रारभ्यते क्रियमाणं कर्मानेनेति उद्घातः[2]। 'हन हिंसागत्योः'। आरभ्यत इत्यारम्भः। 'रभ राभस्ये'[3]। बीजावापार्थं व्यापारोपक्रमस्य नामानि। संभ्रमणं संभ्रमः। 'भ्रमु अनवस्थाने'। त्वर्यत इति त्वरा। 'ञित्वरा संभ्रमे'। [4]व्यग्रतानामनी[5]॥ २६॥

[1] °प्रयोगस्य K5. [2] उद् हननं गमनमुद्घातः Pt2. [3] J2, K2 omit. [4] संभ्रम° J2. [5] K4 has a break of one page.

(विव.) प्रत्युत्क्रमः प्रयोगार्थः। यस्य कस्यचिदर्थस्य स्वयमाचरणेन परेषां पुरः प्रकाशनं प्रयोगः। तदुक्तम्—

'सत्त्वेनाङ्गेन वा वाचा वस्तुनस्तद्विदां पुरः ।
प्रकाशनं प्रयोगः स्यात् ॥'

इति । यथा [1]नाटचप्रयोगः, यज्ञप्रयोगः, शब्दप्रयोगः । तेन प्रयोगशब्देन समानार्थः प्रत्युत्क्रमशब्द इत्यर्थः । कर्तव्यार्थं प्रति उत्क्रम उद्योगः प्रत्युत्क्रमः[2] । सुबोधिनीकारस्त्वाह—प्रकृष्टो योगः प्रयोगः, युद्धमिति यावत् । तदर्थस्ततप्रयोजनो भटनिर्गमः प्रत्युत्क्रम इति ॥ प्रक्रमः स्यादुपक्रमः ॥ क्रियायाः प्रारम्भस्य नामनी । यथा—अध्ययनस्य प्रणवोच्चारणम्, पाकक्रियायाः चुल्लीसंमार्जनमित्यादि । 'क्रमु पादविक्षेपे' । प्रोपेत्युपसर्गद्वयम् आरम्भार्थे । घञ्[3] (३. ३. १८) ॥ स्यात्—आरम्भः । कर्मप्रारम्भस्य नामानि । यथा—स्थाल्यां [4]क्षालिततण्डुलप्रक्षेपणं पाककर्मणि[5] आरम्भः । एकाहाध्ययनं [6]स्वाध्यायाध्ययनस्यारम्भः । द्वितीयदिनाध्ययनमन्वारम्भः इत्यादि । स्मृतावपि—

'प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं[7] विवाहादौ श्राद्धे पाकपरिक्रिया ॥'

इति । आभिमुख्येनादानं स्वीकरणम् अभ्यादानम्[8] । 'ओमभ्यादाने' (८. २. ८७) । अभ्यादानमारम्भ[9] इति काशिकाकारः (पृ. ४१७) । उद्गतस्य घातो[10] गमनमत्रेति उद्घातः । अत्र हन्तिर्गत्यर्थः ॥ आरम्भणमारम्भः । 'रभ राभस्ये' । घञ्[11] । राभस्यं [12]कार्योपक्रम इति धातुवृत्तौ (मा. धा. पृ. २७२) । अन्ये तु व्याचक्षते—प्रत्युत्क्रमादयः पञ्चैकार्था इति । तथा च शेषे—'उद्घातः स्यादुपोद्घातः' इति । उपोद्घातो नाम भविष्यदर्थस्योपयुक्तस्यार्थस्य उपक्षेप[13] इति । तदुक्तम्—'चिन्तां प्रकृतिसिद्धचर्थामुपोद्घातं प्रचक्षते' इति । संभ्रमस्त्वरा । व्यग्रताया नामनी । संभ्रमणं संभ्रमः । 'भ्रमु अनवस्थाने' । घञ् ॥ 'ञित्वरा संभ्रमे' इति धातोर्घटादित्वेन [14]षित्परिभाषया 'षिद्भिदादिभ्योऽङ' (३. ३. १०४) इति अङ्प्रत्यये त्वरा ॥ २६ ॥

[1] नाटचे Tj2. [2] 'प्रत्युत्क्रमः प्रयुद्धार्थम्' इति भागुरिः (टी. स. ३, पृ. ६६). [3] नोदात्तेति न वृद्धिः B5. [4] प्रक्षालित° Tj2. [5] °कर्मणः B5. [6] स्वाध्यायस्य Tj2. [7] °मुखे Tj2. [8] भावे ल्युट्. [9] प्रारम्भः इति मुद्रितग्रन्थे. [10] हन्, घञ्; 'हनस्तोऽचिण्णलोः' इति तकारादेशः. [11] 'रभेरशब्लिटोः' इति नुम् (भा. दी. p. 454 fn.).

[12] राभस्यमुपक्रमः इति मुद्रितग्रन्थे. [13] आरम्भः B5, Tj2. [14] घटादयः षितः (गणसूत्रम्).

(पा.) प्रत्युत्क्रमः प्रयोगार्थः। प्रयोगनामनी ॥ प्रक्रमः स्यादुपक्रमः। ज्ञात्वारम्भनामनी ॥ स्यात्—आरम्भः। आरम्भनामानि। 'दोरक्कोट'[1] ॥ संभ्रमस्त्वरा। संभ्रमनामनी। [2]संरम्भपाठोऽपि। 'आवेशः संवेगः संरम्भः संभ्रमस्त्वराटोपः' [3]इति हलायुधः (अ. मा. ४. ३७) ॥ २६ ॥

[1] B3 omits. [2] 'संरम्भः सभ्रमस्त्वरा' इति पाठोऽप्युपपन्नः A1. [3] संभ्रमस्तथाटोपः इति मुद्रितग्रन्थे.

प्रतिबन्धः प्रतिष्टम्भोऽवनायस्तु निपातनम् ।
उपलम्भस्त्वनुभवः समालम्भो विलेपनम् ॥ २७ ॥

(वि.) प्रतिवन्ध इति—[1]प्रतिवध्यते रुध्यत इति प्रतिवन्धः। 'बन्ध [2]बन्धने'। प्रातिकूल्येन स्तम्भनं प्रतिष्टम्भः[3]। 'स्तन्भु [4]रोधनस्तम्भनयोः'। निरोधस्य नामनी ॥ अवनीयते अधः प्राप्यत इति अवनायः। 'णीञ् प्रापणे'। नियात्यते [5]अधःक्रियत इति नियातनम्[6]। 'यत [7]निराकारोपस्कारयोः'। निपातनमिति वा पाठः। अधःपातनस्य नामनी ॥ [8]उपलभ्यते ज्ञायत इति उपलम्भः। 'डुलभष् प्राप्तौ'। अनुभूयते ज्ञायत इत्युनुभवः। 'भू सत्तायाम्'। स्मृतिव्यतिरिक्तज्ञानस्य नामनी ॥ [9]समालभ्यते लिप्यत इति समालम्भः। विलिप्यत इति विलेपनम्। 'लिप उपदेहे'। विलेपनस्य नामनी ॥ २७ ॥

[1] प्रातिकूल्येन बन्धनं Pt2. [2] संयमने K3, K6. [3] प्रतिष्टभ्यत इति J2, K6. [4] प्रतिबन्धने K4. [5] अधःपात्यते K5. [6] नितरां यातनम् Pt2. [7] नियमावस्कन्दनयोः K6. [8] उपलब्धिः Pt2. [9] K5 omits 4 lines.

(विव.) प्रतिबन्धः प्रतिष्टम्भः। कार्यप्रतिबन्धनस्य[1] नामनी। प्रातिकूल्येन बन्धनं प्रतिबन्धः। 'बन्ध बन्धने'। घञ्[2]। प्रातिकूल्येन स्तम्भनं प्रतिष्टम्भः। स्तम्भेः सौत्राद् धातोः 'स्तन्भेः' (८. ३. ६७) इति मूर्धन्यादेशः ॥ अवनायस्तु निपातनम्। अधोनयननामनी। अवनयनम् अधः पातनम् अवनायः। 'णीञ् प्रापणे'। 'अवोदोर्नियः' (३. ३. २६) इति घञ् ॥ निकृष्टं पातनं निपातनम्[3]।

नियातनमिति पाठे 'यत [4]निकारोपस्कारयोः' इत्यतो ण्यन्तात् ल्युट् (३.३.११५)। उपलम्भस्त्वनुभवः। स्मृतिव्यतिरिक्तज्ञानस्य नामनी। 'डुलभष् प्राप्तौ'। भावे घञ्। 'उपसर्गात् खल्घञोः' (७.१.६७) इति नुमागमः।। 'भू सत्तायाम्'। 'ऋदोरप्' (३.३.५७) इत्यप्प्रत्यये अनुभवः।। समालम्भो विलेपनम्। चन्दनादिना गात्रघर्षणस्य नामनी। आङ्पूर्वो लभिः स्पर्शे वर्तते। समित्युपसर्गस्य सम्यक्त्वमर्थः। सम्यक् चासौ आलम्भश्चेति समालम्भः[5]। आलम्भनस्य सम्यक्त्वं चन्दनादिसहितहस्तकृतत्वेन भवतीति [6]समालम्भनेनानुलेपनमुच्यते।। 'लिप उपदेहे' इत्यस्मात् ल्युटि विलेपनम्।। २७।।

[1] प्रतिघातस्य Tj2. [2] 'हलश्च' (३. ३. १२१). [3] पततेर्ण्यन्तात् ल्युट्. [4] निराकार° Tj2. [5] भावे घञ्। 'उपसर्गात् खल्घञोः' इति नुम्. [6] समालम्भ-शब्देन Tj2.

(पा.) प्रतिबन्धः प्रतिष्टम्भः। प्रतिहृतिनामनी। [1]'तडसुब'।। अवनायस्तु निपातनम्। [2]पातननामनी। [1]'पडदोब्बुट'।। उपलम्भस्त्वनुभवः। [3]स्खलितभिन्नज्ञाननामनी। 'तेल्सिनदितिरुगतेल्सुट'।। समालम्भो विलेपनम्। चन्दनाद्यनुलेपननामनी।। २७।।

[1] B3 omits. [2] निपातनस्य° C1. [3] ज्ञातस्य पुनर्ज्ञानिनामनी A1.

विप्रलम्भो विप्रयोगो विलम्भस्त्वतिसर्जनम्।
विश्रावस्तु प्रविख्यातिरवेक्षा प्रतिजागरः।। २८।।

(वि.) विप्रलम्भ इति—[1]विप्रलभ्यते वियुज्यत इति विप्रलम्भः[2]। विप्रयुज्यत इति विप्रयोगः[3]। 'युजिर् योगे'। दम्पत्योः परस्परं विरहस्य विसंवादस्य वा नामनी।। विलभ्यते दीयत इति विलम्भः। 'डुलभष् प्राप्तौ'। अतिसृज्यते दीयत इति अतिसर्जनम्। [4]'सृज विसर्गे'। दानस्य नामनी।। विश्रूयते दिगन्तेष्विति विश्रावः[5]। प्रविख्यायते प्रकथ्यते दिगन्तेष्विति प्रविख्यातिः[6]। 'ख्या प्रकथने'। प्रतिख्यातिरिति वा पाठः। [7]ख्यातेर्नामनी।। अवेक्ष्यत इत्यवेक्षा। 'ईक्ष दर्शने'। प्रतिजागरणं प्रतिजागरः। 'जागृ निद्राक्षये'। अवधानस्य नामनी।। २८।।

[1] विप्रकर्षेण लम्भनं Pt2. [2] J2, Pt2 add 'डुलभष् प्राप्तौ.' [3] विप्रयुक्तिः Pt2. [4] K3, K6 omit. [5] J2, K2 add 'श्रु श्रवणे.' [6] प्रतिख्यायते प्रतिख्यातिः K5. [7] प्रसिद्धेः K5.

(विव.) विप्रलम्भो विप्रयोगः। विप्रकृष्टः प्रलम्भः प्राप्तिरत्रेति विप्रलम्भः[1] ॥ विप्रयोगोऽपि[2] तद्वत्। यत्र पुनर्नायिकानायकयोः मिथः संबन्धो भावी स एव विश्लेषः पूर्वानुरागादिरूपः शृङ्गारविशेषो विप्रलम्भ उच्यते। न तु विश्लेषमात्रम् ॥ विलम्भस्त्वतिसर्जनम्। 'विपूर्वो लम्भतिर्दाने वर्तते' इत्युपसर्गवृत्तौ।

'स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे'।

इति काव्यप्रकाशिकोदाहरणश्लोके (पृ. ७२, श्लो. ४८) दानार्थत्वेनास्य प्रयोगः ॥ 'सृज विसर्गे'। [3]ल्युटि अतिसर्जनम्। ब्रह्मवर्गोक्तस्यापि दानार्थस्य[4] (पृ. ४६७) पर्यायान्तरप्रदर्शनार्थमिहापि वचनमिति ज्ञेयम्[5] ॥ विश्रावस्तु प्रविख्यातिः। विशिष्टं श्रवणं दिगन्तरेषु प्रसिद्धिर्विश्रावः। 'श्रु श्रवणे'। 'वौ क्षुश्रुवः' (३. ३. २५) इति घञ्। प्रकृष्टा[6] विख्यातिः प्रविख्यातिः[7] ॥ अवेक्षा प्रतिजागरः। पूर्वानुभूतार्थप्रत्यक्षस्य नामनी। प्रागनुभूतस्य पुनरनुसंधानम् अवेक्षा[8]। [9]'गुरोश्च हलः' (३. ३. १०३) इत्यप्रत्ययः। अत एव स्त्रीलिङ्गत्वम् ॥ पूर्ववृत्तमर्थं प्रति जागरणम् ऐकाग्र्यं प्रतिजागरः[10] ॥ २८ ॥

[1] विप्रपूर्वस्य लभेर्भावे घञि 'उपसर्गात् खल्घञोः' इति नुम्. [2] 'युजिर् योगे' घञ्. [3] B5 adds इत्यस्मात्. [4] 'दानमुत्सर्जनविसर्जने' इति ब्रह्मवर्गे. [5] Tv adds एवं सर्वत्र पौनरुक्त्यं परिहार्यम् (परिहरणीयम् B5). [6] अतिशयिता B5, Gm3, Tv. [7] 'ख्या प्रकथने' क्तिन् (३. ३. ९४). [8] प्रत्यवेक्षा B5, B6. [9] 'ईक्ष दर्शने' [10] 'जागृ निद्राक्षये'। घञ्। 'जाग्रोऽविचिण्णल्ङित्सु' (७. ३. ८५) इति गुणः.

(पा.) विप्रलम्भो विप्रयोगः। [1]सानुरागयोः स्त्रीपुरुषयोरसंप्राप्तिनामनी ॥ विलम्भस्त्वतिसर्जनम्। वितरणनामनी ॥ विश्रावस्तु परिख्यातिः[2]। प्रसिद्धिनामनी ॥ अवेक्षा प्रतिजागरः। संरक्षणनामनी। [3]'अरयकपेरु' ॥ २८ ॥

[1] वियोगनामनी B3. [2] प्रतिख्यातिः B3; प्रविख्यातिः C1. [3] B3 omits.

निपाठनिपठौ पाठे तेमस्तेमौ समुन्दने ।
आदीनवास्रवौ क्लेशे मेलके सङ्गसंगमौ ।। २९ ।।

(वि.) निपाठेति—निपठ्यत[1] इति निपाठः । निपठः । पाठश्च । 'पठ व्यक्तायां वाचि' । स्तुत्यादिपठनस्य नामानि ।। [2]तिम्यत इति तेमः । 'तिम आर्द्रीभावे' । स्तिम्यत इति स्तेमः । 'स्तिम आर्द्रीभावे' । समुद्यते सिच्यत इति समुन्दनम् । 'उन्दी क्लेदने' । सेचनस्य नामानि ।। [3]आदीनं परिक्षीणं वाति गच्छतीति आदीनवः । 'वा गतिगन्धनयोः' । आस्रवन्ति इन्द्रियाण्यनेनेति आस्रवः । 'स्रु गतौ' । क्लेशस्य[4] नामनी ।। मेल्यते सेव्यत इति मेलनम् । 'मिल [5]संगमे' । सज्यत इति सङ्गः । 'षञ्ज सङ्गे' । संगम्यत इति संगमः[6] । संश्लेषणस्य नामानि ।। २९ ।।

[1] निपठनं Pt2. [2] तेमनं तेमः, स्तेमनं स्तेमः Pt2. [3] आ समन्ताद् दीनान् वाति गच्छति Pt2. [4] J2 adds क्लेशनं क्लेशः, 'क्लिशू विबाधने'. [5] संगमने J2, K2, K4. [6] K4, K5 add 'गम्लृ (सृप्लृ J2) गतौ'.

(विव.) निपाठनिपठौ पाठे । गद्यपद्यादिपठनस्य नामानि । 'पठ व्यक्तायां वाचि' इति धातोः 'नौ गदनदपठस्वनः' (३. ३. ६४) इति पाक्षिके अप्प्रत्यये निपठः । तदभावपक्षे घञि निपाठः । पाठश्च (३. ३. १८) ।। तेमस्तेमौ समुन्दने । [1]वस्त्रशरीरादीनामार्द्रीभवनस्य[2] नामानि । 'तिम ष्टिम आर्द्रीभावे' इति धातुभ्यां घञि क्रमेण तेमः स्तेमश्च ।। 'उन्दी क्लेदने' इत्यस्मात् ल्युटि (३. ३. ११५) समुन्दनम् ।। आदीनवास्रवौ क्लेशे । रागद्वेषादिलक्षणक्लेशस्य नामानि । आ समन्ताद् दीना[3] अत्यन्तपरिक्षीणाः, तान् वातीति आदीनवः । 'वा गतिगन्धनयोः' । 'आतोऽनुपसर्गे कः' (३. २. ३) ।। आस्रवति शिथिलीभवत्यनेनेति आस्रवः[4] । 'यद्वासुदेवेनादीनमनादीनवमीरितम्' इति माघः[5] (शिशु. २. २२) ।।

'जीवाजीवास्रवा बन्धसंवरावपि निर्जरः ।
मोक्षश्चेतीह तत्त्वानि सप्त स्युर्जिनशासने ।।'

इति क्लेशपदार्थे जैनानामास्रवशब्दः प्रसिद्धः[6] ।। मेलके सङ्गसंगमौ । संश्लेषस्य नामानि । मिलधातुर्लौकिकः संश्लेषणार्थः । घञि मेलः । स्वार्थे कप्रत्यये (५. ४. ५)

मेलकः। 'द्रव्यादिषट्कविच्छेदमेलकेन विवर्जिताः' इति लीलावत्यां वल्लभाचार्य-प्रयोगः। ल्युटि मेलनमिति केचित् पठन्ति ।। 'षञ्ज सङ्गे' इति धातोः भावे घञ्प्रत्यये कुत्वे च[7] (७. ३. ५२) सङ्गः ।। 'गम्लृ गतौ'। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्प्रत्यये गमः। सम्यग् गमः संगमः ।। २९ ।।

[1] B5, Gm3, Tv add जलादिना. [2] °आर्द्रीभावस्य B5, Gm3, Tv. [3] 'दीङ क्षये', भावे क्तः, 'स्वादय ओदितः' (गणसूत्रं), 'ओदितश्च' (८. २. ४५) इति नत्वम् इति भा. दी. [4] 'स्रु गतौ', 'ऋदोरप्'. [5] माघकाव्ये प्रयोगः B5. [6] 'जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षास्तत्त्वानि' (तत्त्वार्थाधिगमसूत्रम् १. ४) इति सर्वदर्शन-संग्रहे (पृ. ७३). [7] 'चजोः कु घिण्ण्यतोः'.

(पा.) निपाठनिपठौ पाठे। [1]पाठनामानि ।। [2]तेमस्तेमौ समुन्दने। सेचन-नामानि। 'तडुपुट'[3] ।। आदीनवास्रवौ क्लेशे। क्लेशनामानि। [4]'दोषे त्वादीन-वास्रवौ' इति दोषार्थे वैजयन्ती (पृ. १९२, श्लो. ४) ।। मेलके सङ्गसंगमौ। [5]मेलननामानि। 'मेलमु'[3] ।। २९ ।।

[1] पठनस्य C1. [2] A1 adds सान्तोऽयम्. [3] B3 omits. [4] 'रोषे त्वादीनवाश्रवौ' इति मुद्रितग्रन्थे. [5] मेल° A1, C1.

अन्वीक्षणं विचयनं मार्गणं मृगणा मृगः।
परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ।। ३० ।।

(वि.) अन्वीक्षणमिति—[1]अन्वीक्ष्यते मृग्यत इत्यन्वीक्षणम्[2]। 'ईक्ष दर्शने'। उपसर्गवशाद् धातूनामनेकार्था भवन्ति। [3]विचीयते मृग्यत इति विचयनम्। 'चिञ् चयने'[4]। मार्ग्यत इति मार्गणम्। 'मार्ग अन्वेषणे'। मृग्यत इति मृगणा। मृगश्च। 'मृग अन्वेषणे'। अन्वेषणस्य नामानि ।। [5]परिरभ्यते आलिङ्ग्यत इति परिरम्भः। 'रभ राभस्ये'। [6]परिष्वज्यत इति परिष्वङ्गः। 'ष्वञ्ज परिष्वङ्गे'। संश्लिष्यत इति संश्लेषः। 'श्लिष आलिङ्गने'। उपगूह्यते आलिङ्ग्यत इति उपगूहनम्[7]। आलिङ्गनस्य नामानि ।। ३० ।।

[1] अनुसृत्य ईक्षणम् Pt2. [2] K5 adds संवीक्षणमिति वा पाठः. [3] विचिति-विचयनम् Pt2. [4] K3, K8 add विपूर्वः अन्वेषणे. [5] परिरम्भणं परिरम्भः Pt2. [6] परितः स्वञ्जनं Pt2. [7] K5 adds 'गुहू संवरणे'; 'ऊदुपधाया गोहः' इति ऊकारादेशः.

(विव.) अन्वीक्षणं––मृगः। प्रियवस्तुविषयस्यान्वेषणस्य नामानि। मुहुरीक्षणम् अन्वीक्षणम्। 'ईक्ष दर्शने'। ल्युट्। [1]सम्यग् ईक्षणं समीक्षणमिति पाठान्तरेण केचित् प्रवर्तन्ते।। 'चिञ् चयने' इति धातोरुपसर्गवशाद् अर्थान्तरे वर्तमानात् ल्युटि विचयनम्।। 'मार्ग अन्वेषणे' [2]इत्यतो ल्युटि मार्गणम्।। 'मृग अन्वेषणे' इत्यस्मात् चौरादिकाद् अदन्ताद् युचि[3] (३.३.१०७) मृगणा। अदन्तत्वाद् गुणाभावः।। [4]तत एव धातोः 'एरजण्यन्तानाम्'[5] इति ण्यन्तनिषेधस्य प्रायिकत्वाद् अचि प्रत्यये णिलोपे च मृगः। घञि वा मृगः।। शेषे––'अथ मार्गणा। मृगणं विचयोऽन्वीक्षाप्यन्वेषणगवेषणे स्त्रीक्लीबयोः' इति। ब्रह्मवर्गे तु (पृ. ४६९) अन्वेषणागवेषणाशब्दौ स्त्रीलिङ्गावुक्तौ[6]। अतः शब्दद्वयमपि स्त्रीनपुंसकोभयलिङ्गम्।। परिरम्भः––उपगूहनम्। आलिङ्गनस्य नामानि। 'रभ राभस्ये' इति धातोः परिपूर्वाद् घञि 'रभेरशब्लिटोः' (७.१.६३) इति नुमागमे परिरम्भः।। 'ष्वञ्ज परिष्वङ्गे' इत्यतो घञि कुत्वे[7] च (७.३.५२) 'उपसर्गात् सुनोति...' इत्यादिना (८.३.६५) षत्वे च परिष्वङ्गः।। 'श्लिष आलिङ्गने' इत्यतो घञि संश्लेषः।। 'गुहू संवरणे' इत्यस्मादुपपूर्वात्[8] ल्युट्प्रत्यये लघूपधगुणे (७.३.८६) 'ऊदुपधाया गोहः' (६.४.८९) इत्यूकारादेशे [9]सति उपगूहनम्।। ३०।।

[1] कश्चित्तु समीक्षणमिति पाठमाह B6. [2] इति धातोः Tv. [3] 'ण्यासश्रन्थो युच्' इति युच्. [4] तस्मात् Tv. [5] स्वामिटीकायामपि एवं दृश्यते (पृ. २६६). [6] Gm3, Tv add 'लीलावत्याम् अन्वेषणगवेषणशब्दौ स्त्रीनपुंसकयोर्वर्तेते' इत्यर्थः. [7] 'चजोः कु घिण्ण्यतोः'. [8] Tv adds आलिङ्गनार्थात्. [9] B5 adds कृते.

(पा.) अन्वीक्षणं––मृगः। मृगयेति वा पाठः। अन्वेषणनामानि।। [1]परिरम्भः––उपगूहनम्। आलिङ्गननामानि। 'आलिङ्गनं [2]तथा क्रोडीकरणं चाङ्कपाल्यपि'। एतानि त्रीणि च।। ३०।।

[1] परीरम्भः C1. [2] A1 omits तथा.

निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्।
प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः।। ३१।।

(वि.) निर्वर्णनमिति––[1]निर्वर्ण्यते दृश्यत इति निर्वर्णनम्। [2]'वर्ण वर्णक्रियाविस्तारगुणवचनेषु'। [3]निध्यायते दृश्यत इति निध्यानम्। 'ध्यै चिन्तायाम्'।

दृश्यत इति दर्शनम्[4]। आलोक्यत इति आलोकनम्। 'लोकृ दर्शने'। ईक्ष्यत इति ईक्षणम्। 'ईक्ष दर्शने'। ईक्षणस्य नामानि ॥ [5]प्रत्याख्यायते निराक्रियत इति प्रत्याख्यानम्। 'ख्या प्रकथने'। निरस्यत इति निरसनम्। 'असु क्षेपणे'। प्रत्यादिश्यत इति प्रत्यादेशः। 'दिश अतिसर्जने'। [6]निराक्रियत इति निराकृतिः। निराकरणस्य नामानि ॥ ३१ ॥

[1] नितरां वर्णनं Pt2.　[2] वर्ण स्तुतौ K5.　[3] नितरां ध्यानं Pt2.　[4] J2, K2 add 'दृशिर् प्रेक्षणे'.　[5] प्रतिविरुद्धमाख्यानं Pt2.　[6] निकृष्टम् आ समन्तात् करणं Pt2.

(विव.) निर्वर्णनं—ईक्षणम्। [1]चाक्षुषज्ञानविषयीकरणस्य नामानि। 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु'। 'ध्यै चिन्तायाम्'। एतावुपसर्गवशाद् ईक्षणार्थौ। 'दृशिर् प्रेक्षणे' 'लोकृ दर्शने' 'ईक्ष दर्शने'। एतेभ्यः क्रमेण ल्युडन्ताः निर्वर्णनादयः [2]शब्दाः॥ प्रत्याख्यानं—निराकृतिः। निराकरणस्य नामानि। 'ख्या प्रकथने'। 'असु क्षेपणे'। आभ्यां ल्युटि क्रमेण प्रत्याख्यानं निरसनं च। 'दिश अतिसर्जने' [3]इत्यतो घञि प्रत्यादेशः। करोतेः स्त्रियां क्तिनि (३. ३. ९४) निराकृतिः। उपसर्गवशाद् धातुचतुष्टयस्यापि एकार्थत्वम् ॥ ३१ ॥

[1] चक्षुरिन्द्रियविषयीकरणनामानि Gm1, Tv.　[2] Tj1, Tj2 add पञ्च.　[3] इति धातोः Tv.

(पा.) निर्वर्णनं—ईक्षणम्। अत्रैकवद्भावः। दर्शननामानि। [1]'निभालननिशामने'। एते द्वे च ॥ प्रत्याख्यानं—निराकृतिः। निराकरणनामानि[2] ॥३१॥

[1] निफालन° A1.　[2] उपसर्गवशादर्थविशेषः C1.

उपशायो विशायश्च पर्यायशयनार्थकौ।
अर्तनं च ऋतीया च हृणीया च घृणार्थकाः॥ ३२ ॥

(वि.) उपशाय इति—[1]उपशय्यते पर्यायेण निद्रायत इति उपशायः। विशायश्च। 'शीङ् स्वप्ने'। पर्यायशयनस्य नामनी ॥ ऋत्यत इति अर्तनम्। ऋतीया च। [2]'ऋति घृणायाम्'[3] इति सौत्रो धातुः। हृणीयत इति हृणीया। 'हृणीङ् रोषणे लज्जायां च'। [4]घृणानामानि ॥ ३२ ॥

[1] उपशाय्यते K6; उपशयनं Pt2. [2] 'ऋतिः सौत्रो धातुः घृणायां वर्तते' (काशिका पृ. १५३). [3] जुगुप्सायाम् Pt2. [4] 'घृ सेचने'। बाहुलकान्नक्। घृणा। इति भा. दी. (पृ. ८८).

(विव.) उपशायो—अर्थकौ। नगरप्राकारादिरक्षणे[1] नियुक्तानां[2] मध्ये केषुचित् जाग्रत्सु केषांचित् शयनम्, शयितेषु जाग्रत्सु पूर्वं जाग्रतां शयनम्। एवंक्रमेण स्वेच्छापरिकल्पितप्रहरमुहूर्ताद्यवच्छेदेन शयनं पर्यायशयनम्। तत्र उपशायविशाय-शब्दौ भवतः। जाग्रतामुप समीपे शयनमुपशायः॥ वैपरीत्येन विपर्यासेन वा शयनं विशायः। 'व्युपयोः शेतेः पर्याये' (३. ३. ३९) इति घञ्॥ अर्तनं—घृणार्थकाः। ऋतिः सौत्रो धातुः। घृणार्थ इति काशिका (पृ. १५३)। अत्र न्यासकारः (१, पृ. ५२१)—'सूत्र एव पठितत्वात् सूत्रे भवः सौत्रः। घृणा जुगुप्सा, [3]तस्यामयं धातुर्वर्तते' इति। तथा च अर्तनादयस्त्रयः शब्दा जुगुप्सावचना इत्यर्थः। ततश्च ऋतेर्धातोर्भावे ल्युटि (३. ३. ११५) गुणे च अर्तनम्॥ तस्मादेव धातोः 'आयादय आर्धधातुके वा' (३. १. ३१) इति 'ऋतेरीयङ्' (३. १. २९) इति ईयङ्प्रत्यये सति तदन्तस्य धातुसंज्ञायाम् (३. १. ३२) 'अप्रत्ययात्' (३. ३. १०२) इति भावे स्त्रियामकारप्रत्यये [4]टापि च ऋतीया॥ हृणीङ्[5] इति कण्ड्वादौ पठ्यते। ततः 'कण्ड्वादिभ्यो यक्' (३. १. २७) इति यकि पूर्ववदकारप्रत्यये (३. ३. १०२) हृणीया॥ ३२॥

[1] रक्षणार्थम् Tv. [2] Gm3, Tv add भृत्यादीनां. [3] स्वभावत एव वर्तते इति मुद्रितग्रन्थे. [4] Tj1, Tj2 omit टापि. [5] Tv adds 'हृणीङ् रोषे लज्जायां च.

(पा.) उपशायो—अर्थकौ। उपशायविशायशब्दौ [1]पर्यायशयनार्थकौ स्याताम्। पर्यायार्थमात्रकाविति हलायुधः[2] (अ. मा. ४. ५४)।

'परिपाट्यानुपूर्वी स्यादुपशायोऽनुपात्ययः।
अनुक्रमश्च पर्यायो विशायः परिकीर्तितः॥'

इति। अर्तनं—घृणार्थकाः। [3]जुगुप्सानामानि॥ ३२॥

[1] पर्यायशयननामनी B3. [2] इति केचित् B3. [3] घृणा° C1.

**स्याद् व्यत्यासो विपर्यासो व्यत्ययस्तु विपर्ययः।
पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः॥ ३३॥**

(वि.) स्यादिति—व्यतिक्रम्यासनं व्यत्यासः। [1]वैपरीत्येनासनं विपर्यासः। 'असु क्षेपणे'। व्यतिक्रम्यायनं व्यत्ययः। विपर्ययश्च। 'इण् गतौ'। [2]कर्मणो व्यत्ययादेर्नामानि ॥ क्रमं परित्यज्यायनं पर्ययः। अतिक्रमणमतिक्रमः। अतिक्रम्य पतनमतिपातः। 'पत्लृ गतौ'। उपपन्नस्य अत्ययः[3] उपात्ययः[4]। [5]आचारव्यतिक्रमस्य नामानि ॥ ३३ ॥

[1] विपरीतमसनं K3, Pt2.　　[2] कर्मणां व्यतिक्रमस्य K5.　　[3] अत्ययनं Pt2.
[4] J2, K5 add 'इण् गतौ'.　　[5] आचाराद्यतिक्रमस्य J2, K5.

(विव.) स्याद्—विपर्यासः। नियतस्थानस्य सतः स्थानान्तरापत्तेर्नामनी। यथा—व्यत्यस्तपदान्वयः श्लोकः। मन्त्रविपर्यासः। तन्त्रविपर्यास इति। प्राप्तस्थानमतिक्रम्य तद्विरोधेनासनं क्षेपणं व्यत्यासः॥ उचितं स्थानं परिहाय विरोधेनासः क्षेपणं विपर्यासः। 'असु क्षेपणे'। घञ्॥ व्यत्ययस्तु विपर्ययः। प्रतिलोमक्रमस्य नामनी। यथा—'विपरीतौ परिग्रहावेके समामनन्ति। एतद्वा विपरीतम्' इति। सहजसिद्धस्य पूर्वापरभवस्य व्यतिलङ्घनेन तद्विपरीतस्य अयनं प्राप्तिः व्यत्ययः॥ [1]पर्ययो नाम क्रमातिक्रमः। विरुद्धश्चासौ पर्ययश्चेति विपर्ययः॥ पर्ययो—उपात्ययः। तस्मिन्नतिक्रम इत्यर्थः। ततश्च पर्ययादयश्चत्वारः शब्दाः पर्याया इत्युक्तं भवति। ब्रह्मवर्गे पूर्वमानुपूर्वप्रसङ्गाद् अतिक्रमे बुद्धिस्थे तद्वाचकत्वेन पर्ययातिपातोपात्ययशब्दास्त्रयोऽप्युक्ताः[2] (पृ. ४७१), व्युत्पादिताश्च। इह तु व्युत्क्रमालंकारादौ प्रतिलोमक्रमातिक्रमणेऽप्येषां शब्दानां प्रवृत्तिरस्तीति दर्शयितुं त एव शब्दा उच्यन्त इति न पौनरुक्त्यम्। अतिक्रमस्य उपात्ययरूपत्वेन 'इण् गतौ' इति धातोः 'परावनुपात्यय इणः' (३. ३. ३८) इति घञ्प्रतिषेधे[3] 'एरच्' (३. ३. ५६) इत्येरचि पर्ययः॥ क्रमस्यातिलङ्घनमतिक्रमः। अति क्रमस्य पतनं प्राप्तिरतिपातः। उपपन्नस्य क्रमस्यात्ययः उपात्ययः। 'इण् गतौ'। एरच्[4] ॥ ३३ ॥

[1] विपर्ययोऽतिक्रमः। तस्मिन्नतिक्रमात् क्रमविपर्यय इत्युक्तम् Tv.　　[2] Tv adds 'पर्यायोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः'; आनुलोम्यविरुद्धश्च पर्ययश्च विपर्ययः.　　[3] Tj1, Tj2 add सति.　　[4] एते शब्दाः प्रागपि व्युत्पादिताः Tv.

(पा.) स्याद्—व्यत्ययश्च विपर्यये। विपर्यासनामानि। 'तडमडुट'॥ पर्ययो—उपात्ययः। अतिक्रमणनामानि ॥ ३३ ॥

प्रेषणं यत् समाहूय तत्र स्यात् प्रतिशासनम् ।
स संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ।। ३४ ।।

(वि.) प्रेषणमिति—[1]प्रतिशास्यत इति प्रतिशासनम् । 'शासु अनुशिष्टौ' । भृत्यादिकं समाहूय यत्प्रेषणं तस्य नाम ।। संस्तुवन्ति [2]इन्द्रादीन् उद्गात्रादयोऽत्रेति संस्तावः । 'ष्टुञ् स्तुतौ' । [3]द्विजन्मनां क्रतुषु या स्तुतिभूमिः तस्या नाम ।। ३४ ।।

[1] भृत्यान् प्रति शासनं Pt2. [2] इन्द्रादयः संस्तूयन्तेऽत्रेति J2, K3. [3] द्विजन्मनां क्रतुभूमिषु या स्तुतिः स संस्तवः K6.

(विव.) प्रेषणं—प्रतिशासनम् । आह्वानेन अभिमुखीभूतानां शिष्य-पुत्रादीनां कर्तव्यार्थे यत् प्रेषणं नियोजनं तत्र प्रतिशासनशब्दः । [1]कार्यमर्थं प्रति शासनं प्रतिशासनम् । 'शासु अनुशिष्टौ' । ल्युट् । यथा—आग्नीध्र व्रीहिणौ पुरोडाशौ अधिश्रयेत्यादि ।। स संस्तावः—द्विजन्मनाम् । क्रतुषु अग्निष्टोमादि-यज्ञेषु द्विजन्मनाम् [2]उद्गात्रादीनां [3]स्तोत्रकरणार्थमुपविष्टानामधिकरणभूता सौमिकवेद्या उत्तरांससमीपस्था वा सदःशालायामौदुम्बर्यन्तरा[4] वा या भूमिः स संस्ताव उच्यते । संस्तुवन्त्यत्र उद्गात्रादय इति संस्तावः । 'ष्टुञ् स्तुतौ' । 'यज्ञे समि स्तुवः' (३. ३. ३१) इत्यधिकरणे घञ् ।। ३४ ।।

[1] कर्तव्य° Gm1, Tv. [2] छन्दोगानां Tv. [3] Gm3, Tv add बहिष्पवमानादि°. [4] मध्यमस्थूणासमीपे Tj1, Tj2.

(पा.) प्रेषणं—प्रतिशासनम् । समाहूय[1] प्रेषणं [2]प्रतिशासनं स्यात् ।। संस्तावस्तु—द्विजन्मनाम् । यज्ञेषु ब्राह्मणानामृक्पाठभूमिः[3] संस्तावः स्यात् । क्वचिदर्थसंस्तावमुपलभ्य स्थिता इति पाठक्रमेऽपि स्यात् ।। ३४ ।।

[1] C1 adds भृत्यान्. [2] A1 adds यत् तत्. [3] स्तुतिभूमिः C1.

निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।
स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ।। ३५ ।।

(वि.) निधायेति—उद्घन्यते तनूक्रियते [1]तक्षणीयं काष्ठमत्रेत्युद्घनः । 'हन हिंसागत्योः'। [2]तक्षणाश्रयदारुनाम ।। स्तम्बो [3]हन्यतेऽनेनेति स्तम्बघ्नः । स्तम्बघनश्च । स्तम्बो येन हन्यते तस्य[4] नामनी ।। ३५ ।।

[1] K5 omits. [2] यत्र काष्ठे काष्ठं निधाय तक्ष्यते तस्याधिकरणीभूतस्य काष्ठस्य नाम J2, K2, K4. [3] निहन्यते K5. [4] J2, K2, K4 add लवित्रादेः.

(विव.) निधाय—उद्घनः । [1]तक्ष्यमाणकाष्ठस्याधारभूतं काष्ठमुद्घन इत्युच्यते । उद्घन्यते [2]तक्षणीयकाष्ठमत्र तनूक्रियत इति उद्घनः । 'उद्घनोऽत्याधानम्' (३. ३. ८०) इति निपातनात् साधुः ।। स्तम्बघ्नस्तु—निहन्यते । येन खनित्रादिना वीरुत्तृणादिस्तम्बः समूलं निहन्यते छिद्यते स स्तम्बघ्नः । 'करणे हनः' इति पदद्वयस्यानुवृत्तौ 'स्तम्बे क च' (३. ३. ८३) इति कप्रत्यये 'गमहन ...' इत्यादिना (६. ४. ९८) उपधालोपे 'हो हन्तेः'[3] (७. ३. ५४) इति कुत्वे च स्तम्बघ्नः । अत्र उपधालोपस्य स्थानिवद्भावो नास्ति । तथा च काशिकाकारः (पृ. ३४१)—'ञ्णित्प्रत्ययो हन्तेर्विशेषणम् । नकारो हकारस्य । नकारे परतो हन्तेर्हकारस्य इति संनिपातकृतमानन्तर्यमाश्रीयते । स्थानिवद्भावकृतं तु यदनानन्तर्यं तदविघातकं वचनसामर्थ्यात्' इति । महाभाष्यकारस्तु (१. १. ५८, पृ. १५३)—'क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्' इति नपदान्तसूत्रस्थवार्त्तिकमाश्रित्य स्थानिवद्भावं परिजहार । सूत्रस्थचकारादप्प्रत्यये घनादेशे च स्तम्बघनः । यथा [4]इषीकया स्तम्बो हन्यते । तत्र स्त्रीलिङ्गविषये कप्रत्ययस्य सर्वापवादत्वात् स्तम्बघ्नेति केचित् । 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इति निपातनस्य सर्वापवादत्वात् स्तम्बहा इति भवितव्यमित्यपरे । सूत्रस्य चकारादप्प्रत्यये घ्नादेशे च स्तम्बघ्नः । स्त्रीत्वविवक्षायां तु—'अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन' (वा. ३. ३. १२६) इति वार्तिककारवचनाद् अप्प्रत्ययबाधकत्वेन प्रसक्तः स्त्रीप्रत्ययं बाधित्वा सक्तुधानी तिलपीडनी इतिवत् स्तम्बहननीति भवितव्यमिति । तदेतन्महाभाष्ये 'स्तम्बे क च' (३. ३. ८३, पृ. १५१) इति सूत्रे स्पष्टमुक्तम् ।। ३५ ।।

[1] काष्ठस्य तक्षणार्थं तदधःस्थापितमाधारभूतं Tv. [2] तक्ष्णा Tv. [3] 'हो हन्तेर्ञ्णिन्नेषु'. [4] एषीकयेति महाभाष्ये (३. ३. ८३).

(पा.) निधाय––उद्घनः । यत्र काष्ठे काष्ठं निक्षिप्य तक्ष्यते स तक्ष्यमाणस्तरुः उद्घनः स्यात् । अनुक्तम्––' यत्र निक्षिप्य कूटेन हन्यते सा निघातिका ' । यत्र निक्षिप्यायसमुद्गरेण निहन्यते सा निघातिका[1] स्यात् । [2]' यिनुमुकोट्टिदागलि ' ।। स्तम्बघ्नस्तु––निहन्यते । शाल्यादिस्तम्बो येन निहन्यते [3]छिद्यते [4]तादृशो लवित्रादिः स्तम्बघ्नः स्तम्बघनश्च स्यात् । [2]' बंडिकाडवलि ' ।। ३५ ।।

[1] निघानका इति वैजयन्त्याम् (पृ. १३७, श्लो. २६). [2] B3 omits. [3] छेद्यते A1. [4] तादृशं शकटलवित्रं K1.

आविधो विध्यते येन तत्र विष्वक्समे निघः ।
उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ।। ३६ ।।

(वि.) आविध इति––आ [1]समन्ताद् [2]विध्यतेऽनेनेति आविधः । ' व्यध ताडने ' । सूच्यादिनाम ।। [3]नियतं हन्यते [4]ताड्यत इति निघः[5] । समन्तात् समस्य वेदिकादेर्नाम ।। उत्कीर्यते धान्यमिति[6] उत्कारः । निकीर्यत इति निकारः । ' कॄ विक्षेपे ' । धान्योत्क्षेपणस्य नामनी ।। ३६ ।।

[1] K4, K5 omit. [2] K4, K5 add कर्णादिकं. [3] निहन्यते K6. [4] दीर्यते K5. [5] ' हन हिंसागत्योः ' J2. [6] धान्यमत्रेति K6.

(विव.) आविधो विध्यते येन तत्र । येन सूच्यादिना मणिमुक्तादिकं विध्यते सरन्ध्रं क्रियते तत्र [1]आविधशब्दः । आविध्यतेऽनेनेति आविधः । ' व्यध ताडने ' । ' घञर्थे कविधानम् स्थास्नापाव्यधिहनियुध्यर्थम् ' (वा. ३. ३. ५८) इति कप्रत्ययः[2] । अत्र शेषकारः[3]––

' आविधो मणिदार्वादेः सरन्ध्रीकृतिसाधनम् ।
पाषाणप्रेरकं यत्र चाविद्धं केचिदूचिरे ।। '

इति ।। विष्वक्समे निघः । समन्ततः समे तुल्यारोहपरिणाहे द्रव्ये निघशब्दः । यथा––निघाः वृक्षाः । निघाः शालयः । निघो धान्यराशिरित्यादि । नियतं हन्यते समन्ततः सम्यक्प्राप्त्यर्थं ताड्यत इति निघः[4] । ' निघो निमितम् ' (३. ३. ८७) इति निपातनाद् अप्प्रत्ययः, टिलोपः, घत्वं च ।। उत्कारश्च––उत्क्षेपणार्थकौ । पलालतृणशेषापगमार्थं[5] धान्यस्य शूर्पादिभिरूर्ध्वक्षेपणं राशीकरणं वा धान्योत्क्षेपणम्, तदभिधायकावित्यर्थः । [6]' उन्न्योः ' इत्यनुवृत्तौ ' कॄ धान्ये ' (३. ३. ३०) इति सूत्रेण ' कॄ विक्षेपे ' इति धातोर्घञि उत्कारः, निकारश्च ।। ३६ ।।

[1] आविद्ध° Tj1, Tj2. [2] 'ग्रहिज्या...' इत्यादिना संप्रसारणम् [3] धनंजयः Tv. [4] Gm1, Tv add 'हन हिंसागत्योः'. [5] अपसरणार्थम् B5, B6. [6] 'उन्न्योर्ग्रः' (३. ३. २९).

(पा.) आविधो विध्यते येन तत्र। येन विध्यते स [1]आविधः स्यात्[2] ॥ विष्वक्समे निघः। निघ इति पाठ एव साधुः। सदृशारोहपरिणाहवान्निघः स्यात्। [3]'बडिशलमुदलैनदि'। अनुक्तम्—'स्नेहे तिलानां तैलं स्याद् अन्येषामन्यपूर्वकम्'। तिलानां स्नेहः तैलं स्यात्। अन्येषां स्नेहः अन्यवाचकवद् एरण्डतैलमित्यादि। 'अविसोढाविदूसाविमरीसानि पयस्यवेः'। अवेः पयसि अविसोढादिशब्दत्रयं[4] स्यात् ॥ उत्कारश्च—उत्क्षेपणार्थकौ। उत्कारनिकारशब्दौ द्वौ धान्यानामुत्क्षेपणार्थकौ स्याताम् ॥ ३६ ॥

[1] आविद्धः A1, C1. [2] A1 adds शशयष्टयादिनाम। 'बडिकोलमोदलैनदि'. [3] B3 omits. [4] °आदित्रयः शब्दाः स्युः A1.

निगारोद्गारविक्षावोद्ग्राहा निगरणादिषु।
आरत्यवरतिविरतय उपरामेऽथास्त्रियां तु निष्ठेवः ॥ ३७ ॥
निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिन्नानि।

(वि.) निगार इति—निगीर्यत इति निगारः[1]। 'गॄ निगरणे'। निगरणस्य नाम ॥ उद्गीर्यत इत्युद्गारः[2]। वमननाम ॥ विक्षूयत इति विक्षावः[3]। 'टुक्षु शब्दे'। कासस्य नाम ॥ उद्गृह्यत इत्युद्ग्राहः। 'ग्रह उपादाने'। उद्ग्रहणस्य नाम ॥ आरम्यत उपरम्यत[4] इत्यारतिः। अवरतिः। विरतिः[5]। उपरामश्च। 'रमु क्रीडायाम्'। कार्यादेर्निवृत्तिनामानि ॥ निष्ठीव्यत इति निष्ठीवः। निष्ठेवः[6]। निष्ठ्यूतिः। निष्ठेवनम्। निष्ठीवनं च। 'ष्ठिवु निरसने'। आस्यगतश्लेष्मादिनिरसनस्य नामानि ॥ ३७ ॥

[1] निगरणं निगारः Pt2. [2] उद्गरणम् Pt2. [3] विरुद्धं क्षवः Pt2. [4] K5 adds उपरम्यत इत्युपरतिः. [5] विरम्यत इति K5. [6] नितरां ष्ठेवः Pt2.

(विव.) निगार—तु गरणादिषु। निगारादयश्चत्वारः शब्दा यथाक्रमं निगरणोद्गिरणक्षवनोद्ग्रहणरूपेष्वर्थेषु वर्तन्त इत्यर्थः। तत्र निगारोऽभ्यवहरणम्। [1]'गीर्णिगिरौ' इत्युक्तम् (श्लो. ११)। तथापि शब्दान्यत्वाद् उद्गारशब्दप्रसङ्गाच्च

निगारोऽप्युच्यत इति न पौनरुक्त्यम्। उदानवायोः सशब्दमास्यमुखान्निर्गमनं वमनं वा उद्गारः। 'उन्न्योर्ग्रः (३. ३. २९) [2]इत्युभयत्रापि घञ्॥ विक्षावः कासः। 'टुक्षु शब्दे' इति धातोः 'वौ क्षुश्रुवः' (३. ३. २५) इति घञ्॥ कस्यचिदूर्ध्वीकृत्य ग्रहणम् उद्ग्राहः। यथा—[3]'पदवीमुद्गृहीतालकान्ताः' इति कालिदासः (मेघ. १.८)। 'उदि ग्रहः' (३.३.३५) इति घञ्॥ अथार्यावृत्तद्वयम्। आरति—उपरामे। निवृत्तिनामानि। 'रमु क्रीडायाम्' इति धातोः स्त्रियां क्तिनि (३. ३. ९४) 'अनुदात्तोपदेश...' इत्यादिना (६.४.३७) अनुनासिकलोपे च आरतिः, अवरतिः विरतिश्च। तस्मादेव धातोरुदात्तोपदेशाभावाद् 'नोदात्तोपदेश...' इत्यादिना (७. ३. ३४) वृद्धिप्रतिषेधो नास्ति। 'यम उपरमे' इति वृद्धिरहितत्वेन सत्यपि निर्देशे 'अबाधकान्यपि निपातनानि' इति वचनाद् वृद्धिबाधो नास्ति। किं तु उपरामशब्दोऽप्यस्ति। अत एव 'नोदात्तोपदेशस्य...' (७. ३. ३४) इति सूत्रे काशिकाकारः (पृ. ३३५)—'यमु उपरमे' इति निपातनाद् उपरमशब्दोऽप्यनुसर्तव्यः[4] इति॥ अथास्त्रियां—अभिन्नानि। आस्यगतश्लेष्मादिनिरसनरूपार्थाभिधायकत्वेन चत्वारः शब्दा [5]एकार्था इत्यर्थः। 'ष्ठिवु निरसने'। ह्रस्वोपधाद् धातोर्भावे घञि (३. ३. १८) लघूपधगुणे च (७. ३. ८६) निष्ठेवः। 'सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः' (वा. १. ३. ५) इति वचनाद् धात्वादेः सत्वं न भवति। तु शब्दः पादपूरणार्थः इति सुबोधिनीकारः। सर्वानन्दस्तु (पृ. ७०) 'वा स्त्रियाम्' इति पठित्वा निष्ठेवशब्दो रूपभेदात् पुंलिङ्गः। विकल्पेन स्त्रीत्वविधानात् स्त्रियां टापि निष्ठेवेत्याह। सुभूतिचन्द्रस्तु तमेव पाठमाश्रित्य आकारप्रश्लेषेण व्याचष्ट। 'अस्त्रियामित्यत्र नञ् सादृश्यार्थत्वाद् अस्त्रीशब्देन स्त्रीसदृशनपुंसकव्यक्तचभिधानाद् निष्ठेवशब्दो विकल्पेन नपुंसकलिङ्गः, रूपभेदात् पुंलिङ्गश्च' इति॥ तत एव धातोः क्तिनि 'च्छ्वोः शूडनुनासिके च' (६. ४. १९) इत्यूठि निष्ठ्यूतिः। 'ष्ठिवुसिव्योर्ल्युटि वा दीर्घः' (सर. कण्ठा. २. ४. १६७) इति ल्युटि विकल्पेन दीर्घे च निष्ठीवनम्। पक्षे लघूपधगुणे (७. ३. ८६) निष्ठेवनम्॥ ३७॥

[1] Tv adds यद्यपि. [2] इति 'गॄ निगरणे' इति धातोः. [3] Gm3, Tv add त्वामारूढं पवन°. [4] मुद्रितग्रन्थे 'निपातनादनुगन्तव्यः' इति दृश्यते. [5] एकार्थाभिधायकाः Tv.

(पा.) निगार—तु गरणादिषु। निगारादयः शब्दा गरणादिष्वर्थेषु स्युः। निगारो निगरणं भोजनम्। उद्गार उद्गरणं वमनम्। विक्षावो विक्षवणं ध्वनिः। [1]'विक्षावस्तत्र लोकानां जामदग्न्यमिहाह्वयत्' इति भट्टिः। उद्ग्राह उद्ग्रहणं च धाराणार्थं [2]कलशादिकण्ठवद्धरज्जुनामनी[3]॥ आरति—उपरामे। [4]विश्रान्तिनामानि॥ अथास्त्रियां—अभिन्नानि। निष्ठीवननामानि। [5]'क्षशि-उमुयिट'॥ ३७॥

[1] विक्षावैस्तोयविश्रावं तर्जयन्तो महोदधेः' इति भट्टिकाव्ये (७. ३६) दृश्यते. [2] कलशाननबद्ध° A1, C1. [3] C1 adds 'उग्गमु'. [4] विराम° B3. [5] B3 omits.

जवने जूतिः सातिस्त्ववसाने स्यादथ ज्वरे जूर्तिः॥ ३८॥
उदजस्तु पशुप्रेरणमकरणिरित्यादयः शापे।
गोत्रान्तेभ्यस्तस्य वृन्दमित्यौपगवकादिकम्॥ ३९॥

(वि.) जवन इति—जवतेऽनेनेति जवनम्[1]। जूतिश्च। 'जु गतौ'। [2]वेगगतिनामनी॥ सीयत इति सातिः। 'षोऽन्तकर्मणि'। अवसानस्य नाम॥ ज्वर्यत इति ज्वरः[3]। जूर्तिश्च। 'ज्वर रोगे'। ज्वरस्य नामनी॥ उदज्यते पशवोऽनेनेति उदजः। 'अज गतिक्षेपणयोः'। पशुप्रेरणस्य नाम॥ अकरणिरित्यादयः शापे वर्तन्ते। न क्रियत इत्यकरणिः। आदिग्रहणाद् अजननिः, [4]अवग्राहः, निग्राहः इत्यादयः शापे वर्तन्त। शापस्य नामानि॥ [5]गोत्रप्रत्ययान्तेभ्यः शब्देभ्यः तस्य समूह इत्यस्मिन्नर्थे औपगवकम् इत्यादयः शब्दा [6]वर्तन्ते। उपगोरपत्यानि औपगवाः। तेषां समूह औपगवकम्। आदिग्रहणाद् गार्गकम्। दाक्षकमित्यादि[7]॥ ३८–९॥

[1] जवो जवनम् Pt2. [2] वेगवतः K6. [3] ज्वरणं Pt2. [4] निग्रहः, अवग्रहः J2, K6. [5] J2, K2, K4 omit प्रत्यय. [6] प्रवर्तन्ते J2. [7] J2, K2 add वात्सकम्.

(विव.) जवने जूतिः। वेगगतेर्नामनी। जु इति सौत्रो धातुर्गत्यर्थः। 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इति निपातनात् क्तिन्प्रत्ययो दीर्घश्च। [1]ल्युटि जवनम्॥ सातिस्त्ववसाने स्यात्। अवसानं क्रियायाः समाप्तिः। 'षोऽन्तकर्मणि' इति धातोः पूर्ववद् निपातनात् (३. ३. ९७) सातिशब्दः साधुः।

अथ ज्वरो जूर्तिः। ज्वराख्यरोगविशेषस्य नामनी। 'ज्वर रोगे' इति धातोर्घञि घटादित्वेन मित्त्वपरिभाषया[2] (६. ४. ९२) वृद्धचभावे ज्वरः॥ 'स्त्रियां क्तिन्' (३. ३. ९४)। 'ज्वरत्वर...' इत्यादिना (६. ४. २०) वकारस्योपधायाश्च ऊडादेशे जूर्तिः॥ उदजस्तु पशुप्रेरणम्। गवादिपशूनां प्रदेशान्तरं प्रति चालनमुदजः। 'अज गतिक्षेपणयोः' इत्यस्मात् 'समुदोरजः पशुषु' (३. ३. ६९) इत्यप्प्रत्यये उदजः॥ अकरणिरित्यादयः शापे। [3]शाप आक्रोशः। 'आक्रोशे नञ्यनिः' इत्याक्रोशरूपार्थे गम्यमाने करोतेः अनिप्रत्ययः। अकरणिस्ते वृषल भूयात्, कृष्यादिकर्मणः फलं मा भूद् इत्यर्थः। 'तस्याजननिरेवास्तु जननीक्लेशकारिणः' इति माघकाव्ये (शिशु. २. ४५)। जन्मफलस्य पौरुषस्याभावे जन्मैव[4] मा भूदित्यर्थः। तथा 'आक्रोशेऽवन्योर्ग्रहः' (३. ३. ४५) इत्याक्रोशरूपार्थे भावे घञि अवग्राहो निग्राहश्च। 'अवग्राहोऽद्य वृषल ते भूयात्, निग्राहस्ते वृषल भूयात्' [5]इत्यादयः प्रयोगा अवसेयाः॥ गोत्रान्तेभ्यः—आदिकम्। तस्य वृन्दम् इत्या वर्गपरिसमाप्तेरधिकारः। गोत्रमपत्यम्। गोत्रान्तेभ्यः 'तस्यापत्यम्' (४. १. ९२) इत्यादिना [6]ये विहिता अणादिप्रत्ययाः तदन्तेभ्य औपगवगार्ग्यदाक्ष्यादिशब्देभ्यः 'तस्य समूहः' इत्यर्थे (४. २. ३७) औपगकम्। गार्गकम्। दाक्षकम् इत्यादीनि शब्दरूपाणि भवन्ति। 'गोत्रोक्षोष्ट्रोरभ्र...' इत्यादिना (४. २. ३९) वुञ्प्रत्ययः, अकादेशश्च[7] (७. १. १)॥ ३८–९॥

[1] B5, B6 omit. [2] 'मितां ह्रस्वः'; संज्ञापूर्वकत्वाद् वृद्धचभावः इति भा. दी. (पृ. ४५७). [3] शापे आक्रोशे Tj1, Tj2. [4] जननमेव Gm3, Tv. [5] इत्यादयो ग्राह्याः Tv. [6] विहिताणादिप्रत्ययान्तेभ्यः Tj1, Tj2. [7] 'युवोरनाकौ'.

(पा.) जवने जूतिः। वेगनामनी॥ सातिस्त्ववसाने स्यात्। अवसान-नामनी। [1]'तिक्कर्णि'॥ अथ ज्वरे जूर्तिः। ज्वरनामनी॥ उदजस्तु पशुप्रेरणम्। [2]गवादीनां पश्चाच्चोदननामनी। [1]'पसुलवन्नाड्ट'॥ अकरणिरित्यादयः शापे। आक्रोशेऽकरण्यादयः शब्दाः स्युः। अकरणिस्ते भूयात्[3]। 'आक्रोशे नञ्यनिः' (३. ३. ११२) इति अनिप्रत्ययः। निग्राहस्ते भूयात्। अवग्राहस्ते भूयात्। 'आक्रो-शेऽवन्योर्ग्रहः' (३. ३. ४५) इति घञ्॥ अनुक्तम्—'विधिर्नियोगः संप्रेषः'। नियो-गनामानि॥ 'निर्बन्धोऽभिनिवेशवत्'। निर्बन्धनामनी॥ 'परभागो [4]गुणोत्कर्षः'। गुणोत्कर्षनामनी॥ 'प्रभवन्ती प्रभाविता'। प्रभावनामनी॥ 'अस्तुंकारोऽभ्यु-

पगमः'। अङ्गीकारनामनी ।। 'तत्परत्वं तु तत्परा'। तात्पर्यनामनी ।। 'प्रणामः प्रणिपातः स्यात्'। प्रणामनामनी ।। 'प्रश्रयोऽनुनयः समौ'। अनुनयनामनी ।। 'अभ्युत्थानं गौरवं स्यात्'। [5]गौरवनामनी ।। 'प्रतिपत्तिः प्रगल्भता'। प्रागल्भ्यनामनी ।। [6]गोत्रान्तेभ्यः—आदिकम्। औपगवाद्यपत्यप्रत्ययान्तेभ्यः शब्देभ्यस्तस्य समूह इत्यर्थे औपगवकादिशब्दाः स्युः। औपगवकम्। कापटकम्। गार्गकम् इत्यादि ।। ३८–९ ।।

[1] B3 omits.　[2] गवादिपश्चादटननाम A1.　[3] B3, C1 add अजीवनिस्तेऽस्तु. [4] गुणोत्करः A1, C1.　[5] अभ्युत्थान° A1.　[6] B3 adds गोत्रोक्षोष्ट्रेत्यादिना (४. २. ३९) वुञ्प्रत्यये.

आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम् ।
माणवानां तु माणव्यं सहायानां सहायता ।। ४० ।।

(वि.) आपूपिकमिति—अपूपानां समूह आपूपिकम्। अपूपसमूहस्य नाम। शष्कुलीनां समूहः शाष्कुलिकम्। शष्कुलीसमूहस्य नाम। अचेतनानां पर्वतादीनामेवमादीनि [1]समूहनामानि भवन्ति। माणवानां समूहो माणव्यम्[2]। सहायानां समूहः सहायता ।। ४० ।।

[1] °आदिसमूह° K5.　[2] माणवा बालास्तेषां समूहः Pt2; K4 omits 3 lines.

(विव.) आपूपिकं—अचेतसाम्। अचेतसां चेतनरहितानां प्राणिव्यतिरिक्तानामिति यावत्। तेषामपूपादीनां समूहाः [1]यथातथं ठक्प्रत्ययान्तैः शब्दैरुच्यन्ते। अपूपानां समूह आपूपिकम्। शष्कुलीनां समूहः शाष्कुलिकम्। आद्यशब्देन[2] पर्वतानां समूहः पार्वतिकम्। इत्यादय उदाहर्तव्याः। अत्र सर्वत्र 'अचित्तहस्तिधेनोष्ठक्' (४. २. ४७) इति ठक्प्रत्ययः ।। माणवानां तु माणव्यम्। माणवानां बालानां समूहो माणव्यम्। 'ब्राह्मणमाणवबाडवाद्यन्' (४. २. ४२) इति यन्प्रत्ययः ।। सहायानां सहायता। [3]सहायानां साहाय्यकारिणां समूहः सहायता। 'ग्रामजनबन्धुसहायेभ्यस्तल्' (४. २. ४३) ।। ४० ।।

[1] यथाकथं B5, Tj1.　[2] Tj2 adds अन्येषामप्यचेतनानां.　[3] सहकारिवचनात् सहायशब्दात् समूहार्थे तल्प्रत्यये सति सहायता Tj2, Tv.

(पा.) आपूपिकं—अचेतसाम् । अपूपाद्यचित्तानां समूह आपूपिकशाष्कुलिकादिशब्दाः स्युः । अपूपं भक्ष्यम् । 'औगुलु' । तेषां समूह आपूपिकम् । [1]शष्कुलिः [2]कर्णाकारभक्ष्यम् । 'चक्किलमु' । तेषां समूहः शाष्कुलिकं स्यात् । लड्डुका भक्ष्यविशेषाः । तेषां समूहो लाड्डुकिकम् । केकुन्दा मोदकाः । 'टंटकुडमुलु' । तेषां समूहः कैकुन्दिकम् ।। माणवानां तु माणव्यम् । माणवकसमूहो माणव्यं स्यात् ।। सहायानां सहायता । सहायसमूहः सहायता स्यात् । [3]साहायकमपि ।। ४० ।।

[1] शष्कुली B3. [2] A1 adds नाम. [3] साहाय्यकम् A1.

हल्या हलानां ब्राह्मण्यबाडव्ये तु द्विजन्मनाम् ।
द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमिति क्रमात् ।। ४१ ।।

(वि.) हल्येति—हलानां समूहो हल्या । ब्राह्मणानां समूहो ब्राह्मण्यम् । बाडवानां [1]विप्राणां समूहो बाडव्यम् । [2]पर्शुकानां समूहः पार्श्वम् । [3]पृष्ठानां समूहः पृष्ठ्यम् ।। ४१ ।।

[1] K5 omits. [2] पर्शुकाः पार्श्वास्थीनि तेषां समूहः Pt2. [3] पृष्ठानां यज्ञसंबन्धिस्तोत्रविशेषाणां समूहः Pt2.

(विव.) हल्या हलानाम् । हलानां सीराणां समूहो हल्या । 'पाशादिभ्यो यः' (४. २. ४९) इति [1]यप्रत्ययः ।। ब्राह्मण्य—द्विजन्मनाम् । ब्राह्मणपर्यायेषु बाडवशब्दोऽप्युक्तः[2] । तेषां समूहो ब्राह्मण्यं बाडव्यं च । 'ब्राह्मणमाणवबाडवाद्यन्' (४. २. ४२) इति यन् ।। द्वे पर्शुकानां—अनुक्रमात्[3] । 'पार्श्वास्थनि तु पर्शुका' इति प्रागुक्तम् (पृ. ४०६) । पर्शुरेव पर्शुका । स्वार्थे कप्रत्ययः पादपूरणार्थः । 'अश्वपशुमनडुत्पर्शुं वा दत्तः' इति प्रयोगदर्शनात् । पर्शूनां समूहः पार्श्वम् । 'पर्श्वा णस् वक्तव्यः' (वा. ४. २. ४२) इति णस्प्रत्ययः । अत्र 'सिति च' (१. ४. १६) इति पर्शुशब्दस्य पदसंज्ञायाम् [4]आकडारपरिभाषया (१. ४. १) [5]भसंज्ञानिमित्तगुणाभावेन यणादेशे पार्श्वम् ।। अत्र पृष्ठशब्दो यज्ञसंबन्धिस्तोत्रविशेषवचनः । न शरीरावयववचनः । [6]तथा च रथन्तरबृहद्वैरूपवैराजशाक्वररैवतरूपाणि षट् पृष्ठानि, तेषां पृष्ठानां समूहः पृष्ठ्यम् । 'पृष्ठादुपसंख्यानम्' (वा. ४. २. ४२) इति यन्प्रत्ययः ।। ४१ ।।

[1] इति यः Tj2.　[2] २. ७. ४ (पृ. ४५२).　[3] इति क्रमात् इति वा पाठः Tj1, Tj2.　[4] आ कडारादेकसंज्ञया Tj2.　[5] भसंज्ञानिवृत्तेर्गुणाभावेन Tj2.　[6] ततश्च Tj2.

(पा.) हल्या हलानाम्। हलसमूहो हल्या स्यात् ।। ब्राह्मण्य—द्विजन्मनाम्। द्विजसमूहो ब्राह्मण्यं बाडव्यं च स्यात् ।। द्वे पर्शुकानां—अनुक्रमात्। [1]पर्शूनां समूहः पार्श्वं स्यात्। पृष्ठानां समूहः पृष्ठ्यं [2]स्यात् ।। ४१ ।।

[1] पर्शुकानां B3.　[2] B3 adds च.

खलानां खलिनी खल्याप्यथ मानुष्यकं नृणाम् ।
ग्रामता जनता धूम्या पाश्या गल्या पृथक् पृथक् ।। ४२ ।।
अपि साहस्रकारीषचार्मणाथर्वणादिकम् ।

इति संकीर्णवर्गः ।

(वि.) खलानामिति—खलानां समूहः खलिनी। खल्या च। मनुष्याणां समूहो [1]मानुष्यकम्। ग्रामाणां समूहो ग्रामता। जनानां समूहो जनता। धूमानां समूहो धूम्या। पाशानां समूहः पाश्या। गलानां समूहो गल्या। सहस्राणां समूहः साहस्रम्[2]। करीषाणां समूहः कारीषम्। चर्मणां समूहः चार्मणम्। वार्मणमिति पाठे वर्मणां कवचानां समूहः। अथर्वाणां समूहः आथर्वणम्। आदिशब्दाद् आङ्गारम्। पादातम्। दाक्षिणमित्यादि। एतानि क्रमात् तत्तत्समूहनामानि ।। ४२ ।।

इति श्रीवङ्गलकामयभट्टोपाध्यायसूनुलिङ्गयसूरिरचितायाममरकोशपदविवृतौ संकीर्णवर्गः

[1] मानुष्यम् J2.　[2] साहस्रकम् J2.

(विव.) खलानां खलिनी खल्यापि। खलो धान्यकणिशशातनस्थानम्। तेषां समूह इत्यर्थे 'खलगोरथात्' (४. २. ५०) इति खलशब्दाद् यप्रत्यये खल्या। 'इनित्रकट्यचश्च' (४.२.५१) इति इनिप्रत्यये खलिनी ।। अथ मानुष्यकं नृणाम्। नृणां मनुष्याणां समूह इत्यर्थे नृशब्दपर्यायभूताद् मनुष्यशब्दाद् 'गोत्रोक्षोष्ट्र . . .' इत्यादिना (४. २. ३९) वुञ्प्रत्यये मानुष्यकम्। 'प्रकृत्याके राजन्यमनुष्ययुवानः'

(वा. ६. ४. १६३) इति प्रकृतिभावाद् 'आपत्यस्य च तद्धितेऽनाति' (६. ४. १५१) इति यलोपस्याभावः ॥ ग्रामता—आथर्वणादिकम् । ग्रामादयः पञ्च शब्दाः सहस्रकरीषवर्माथर्वशब्दाश्चत्वार इत्येवं नवभ्यः शब्देभ्यः प्रत्येकं तेषां ग्रामादीनां समूहेऽर्थे विवक्षिते ग्रामताजनतादयो नव शब्दाः प्रत्येकं वर्तन्ते । ग्रामतादिशब्दानां[1] पर्यायित्वं मा भूदिति पृथक्पृथगित्युक्तम् । 'ग्रामजनबन्धुसहायेभ्यस्तल्' (४. २. ४३) इति समूहार्थे ग्रामता जनता च । पाशादित्वेन यप्रत्यये (४. २. ४९) धूम्यादयस्त्रयः शब्दाः । धूमानां समूहो धूम्या । पाशानां समूहः पाश्या । गलानां समूहो गल्या । पाशादौ पोटगल इति पठ्यते[2] । तत्र पोटगलो बृहत्काश इति वृत्तिकारेण विवरणं कृतम् । ततश्च गल्येति शब्देन पोटगल्येति शब्द उपलक्षित इति केचित् । अपरे तु गणपाठे पोटशब्दो गलशब्दश्चेति शब्दद्वयं मत्वा गलानां कण्ठानां समूहो गल्येत्याहुः। सहस्राणां समूहः साहस्रम् । करीषाणां शुष्कगोमयानां समूहः कारीषम् । वर्मणां कवचानां समूहो वार्मणम् । अथर्वनामा कश्चिद् ऋषिः । 'तमथर्वान्वविन्दत्' 'अथर्वा त्वा [3]प्रथमो निरमन्थत्' (तै. सं. ४. १. ३. २[4]) इति श्रुतौ दर्शनात् । तेन दृष्टो वेदभागोऽपि अभेदोपचाराद् अथर्वशब्देनोच्यते । तथा च स्मृतिः— [5]'वेदाथर्वपुराणानि सेतिहासानि शक्तितः' (याज्ञ. १. ५. १०१) इति । 'अथाथर्वनिधेस्तस्य' इति कालिदासश्च (रघु. १. ५९) । अथर्वणां समूह आथर्वणम् । अथवा अथर्वमन्त्राध्येतार अथर्वणाः तेषां समूह आथर्वणम् । सर्वत्र 'भिक्षादिभ्योऽण्' (४. २. ३८) इत्यण् । अन्ये त्वाहुः—अथर्वणा प्रोक्तम् आथर्वणम् । तदधीयत इत्याथर्वणिकाः । तेषां समूह आथर्वणम् । 'आथर्वणिकस्येकलोपश्च' (४. ३. १३३) इत्यणि इकलोप इति ॥ आदिशब्देन अङ्गाराणां समूहः आङ्गारम् । चर्मणामजिनानां समूहश्चार्मणम् इत्यादीनि भिक्षादिगणपठितानि सर्वाण्यपि प्रातिपदिकानि अण्प्रत्ययान्तत्वेनोदाहर्तव्यानि । [6]इह मूलग्रन्थकारेणापठिताः केचन शब्दाः शेषकारेण दर्शिताः । यथा—'परभागो गुणोत्कर्षः' । गुणातिशयनामनी । 'प्रतिपत्तिः प्रगल्भता' । दाढर्चस्य नामनी । 'श्रन्थनं [7]ग्रन्थनं गुम्फः संदर्भो रचना न ना' । गद्यपद्यादिनिर्माणस्य नामानि । 'प्रणिपातस्त्वनुनयः प्रणयः सान्त्वना न ना' । सामवादस्य नामानि । 'क्रीडा विनोदः' । क्रीडाया नामनी । 'खेदस्तु निर्वेदश्चावसन्नता' । नैष्फल्यबुद्धेर्नामानि । 'स्त्र्यङ्कपालिः परिष्वङ्गः' । आलिङ्गनस्य नामनी । 'विगानं वचनीयता' । निन्दाया नामनी । 'विवृतिः पञ्चिका टीका' । व्याख्यानग्रन्थस्य नामानि । 'कूतमाकूतमाशयः' । अभिप्राय-

नामानि । 'आभाणकः प्रवादः स्यादैतिह्यं लोकविश्रुतिः' । अनिश्चितमूलस्य[8] लोकप्रवादस्य नामानि ॥ ४२ ॥

बोम्मगण्टचप्पयाचार्यः पदवाक्यप्रमाणवित् ।
संकीर्णवर्गं व्याचष्ट नामलिङ्गानुशासने ॥
इह यत्त्यक्तमज्ञानादालस्याद्यदुपेक्षितम् ।
प्रमादादन्यथोक्तं यद् विद्वद्भिस्तद्विशोध्यताम् ॥
श्लोकाः [9]संकीर्णवर्गे स्युर्द्विचत्वारिंशदीरिताः ।

इति संकीर्णविवरणं समाप्तम् ।

[1] प्रत्येकं प्रतिनियतार्थवचनत्वमेव । न तु पर्यायत्वम् Gm3, Tv. [2] मुद्रितकौमुदीगणपाठे गल इति शब्दो दृश्यते (पृ. ६५१). [3] त्वाङ्गिरसो निरमन्थत् Tv. [4] वाज. सं. ११. ३२. [5] Gm3, Tv add ऋचो यजूंषि सामानि अथर्वाङ्गिरसश्च ये. [6] अत्र ग्रन्थकारेणानुक्तानां केषांचिदर्थानां पर्यायाः° Tv. [7] ग्रथनं B5, B6. [8] Tj2 adds लोकविश्रुतस्य वा. [9] संकीर्णगाः सार्धाः द्वि° Tv.

(पा.) खलानां खलिनी खल्यापि । खला दुर्जनाः । खलाः कुलटाः । 'खलो नीचः खलेत्वरी' इति वैजयन्ती (पृ. २३२, श्लो. २५) । तेषां तासां च समूहः खलिनी खल्या च स्यात् ॥ अथ मानुष्यकं नृणाम् । मनुष्यसमूहो मानुष्यकं स्यात् ॥ ग्रामता—पृथक् । ग्रामतादयो ग्रामादिसमूहवचनाः । गल्याशब्दः[1] पोटगलसमूहवचनः । पाशादिषु गल इति पोटगलस्य संघातविगृहीतस्य ग्रहणमिति गणकोशटीकाकारः ॥ अपि साहस्र—आथर्वणादिकम् । साहस्रं कारीषं वार्मणम् आथर्वणं भार्मणम् आङ्गारमित्येतानि सर्वाण्यपि तत्तत्समूहवचनानि ॥ ४२ ॥

इति [2]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचिते
अमरपदपारिजाते संकीर्णवर्गः

[1] A1 adds पृथक्पृथक्. [2] °नरसिंह° A1.

३. नानार्थवर्गः

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ।। १ ।।

(वि.) अथ नानार्थवर्गमुपक्रमते—

नानार्थवर्गविवृतिर्वृत्तरूपेण कथ्यते ।
[1]अनुक्ता ग्रन्थकारेण ग्रन्थगौरवभीरुणा ।। 1 ।।
तन्त्रान्तरस्थो नानार्थपदस्यार्थो यथामति ।
चापित्वादिपदाधाराद्विस्तरेणेह कथ्यते ।। 2 ।।

अस्यार्थः—अत्र कान्तखान्तादिवर्गेषु[2] ये केऽपि कतिचिन्नानार्थाः शब्दाः कीर्तिताः । येषु पर्यायेष्वपि ये भूरिप्रयोगाः तेषु पर्यायेषु[3] त एव भूरिप्रयोगाः शब्दा वक्ष्यन्ते[4] । अत्र [5]कान्ताः पूर्वमुच्यन्ते ।। १ ।।

[1] अनुक्तः J_2. [2] वर्गेष्वेव K_6. [3] K_5 omits. [4] पठचन्ते J_2. [5] कान्तः उच्यते J_2.

(विव.) [1]एकार्थानेकपर्यायाः प्रथमं प्रतिपादिताः ।
पदमेकमनेकार्थं संप्रति प्रतिपाद्यते ।।

ननु इतः प्रागेव तत्तत्पर्यायप्रस्तावेषु अनेकार्थशब्दानामप्युक्तत्वेन[2] तेषामनेकार्थत्वस्यापि व्यक्तत्वाद् वक्तव्यान्तराभावेन व्यर्थोऽयं वर्गान्तरारम्भः । [3]अथ मतम्—वक्ष्यमाणानां नाकादिशब्दानां प्रागाकाशादिपर्यायशब्देष्वेवाभिहितत्वाभावात् तादर्थ्यप्रतिपत्तये वर्गान्तरारम्भ इति । र्ताह तेषां स्वर्गादिरूपार्थत्वस्य कथितत्वाद् इह तादर्थ्याभिधानं व्यर्थमेव स्यात् । यदि शब्दश्रवणसमनन्तरमेव तेषामनेकार्थप्रतिपत्तये युगपदेव संगृह्य सर्वार्थाभिधानमित्युच्यते[4] तर्हि श्लोकसालावृकादिशब्दानामिव (श्लो. २, १२) नाकादिशब्दानामपि नानार्थवर्ग एव ग्रथनमात्रेण बह्वर्थताप्रतीतेः पर्यायकाण्डे तत्कथनप्रयासो[5] निरर्थक एव स्यात् । किंच—इह कतिपयानामेव नानार्थशब्दानामभिधानं क्रियते, न सर्वेषाम् । तेषामपि न सर्वेऽप्यर्थाः [6]पठचन्ते । किमनेनाभिधानवैरूप्येणेत्यत्राह—नानार्थाः—पर्यायेष्वपि तेषु ते ।

अस्यार्थः—शब्दानामर्थाभिधाने विरलप्रयोगत्वं प्रचुरप्रयोगत्वं चेति द्वैरूप्यम्। तत्र कतिपयशब्दा अत्र नानार्थवर्गान्तर्गतकान्तखान्ताद्यवान्तरवर्गेष्वेव तत्तदर्थवाचकत्वेन कीर्तिताः, न तु तत्पर्यायप्रस्तावे। कुतः? तत्प्रयोगस्य क्वाचित्कत्वेन यत्र क्वापि तदुक्तिमात्र एव तात्पर्यात्। यथा—'मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोः' (श्लो. ५) इत्यादि। ये तु शब्दा येष्वर्थविशेषेषु भूरिप्रयोगाः प्राचुर्येण प्रयुक्ताः ते शब्दाः तेषु तदर्थवाचकेषु पर्यायेषु अपिशब्दात् कान्तादिवर्गेष्वपि कीर्तिता इत्यर्थः। अत्रायमभिप्रायः—नाकशब्दस्य स्वर्गरूपार्थ एव प्रचुरप्रयोगत्वाद् उभयत्राभिधानम् (१.१.६, ३.३.२)। आकाशरूपार्थे तु प्रयोगस्य क्वाचित्कत्वाद् नानार्थवर्ग एवाभिधानम्। गोशब्दस्य सौरभेय्यां प्रयोगप्राचुर्याद् उभयत्र कथनम् (२.९.६६, ३.३.२५)। इष्वाद्यर्थेषु विरलप्रयोगत्वाद् नानार्थवर्ग एव निरूपणम्। सालावृकादिशब्दानां (श्लो. १२) तु वानराद्यर्थत्रयेऽपि क्वाचित्कप्रयोगत्वाद् अनेकार्थमध्य एव कथनम्। चित्रभानुभानुहंसादीनां सर्वार्थेषु प्रसिद्धसाम्याद् उभयत्राभिधानमित्यादि सर्वत्र विवेचनीयम्।

अत्र केऽपीत्यनेनायमर्थः सूचितः। नाकादिशब्दानां प्रदर्शनमात्रपरत्वादत्रानुक्ता अपि सर्वज्ञेश्वरनादेयीप्रभृतयोऽपि शब्दाः पर्यायकाण्डे तत्पर्यायप्रत्यवेक्षणाद् अभिधानान्तरपरिशीलनाच्च नानार्थत्वेनोन्नेया इति कान्तादिवर्गेष्वित्यनेनैतत् सूचितम्। स्वग्रन्थे नानार्थकाण्डीयशब्देष्वन्तिमव्यञ्जननियम एव। न तु ग्रन्थान्तरे इव द्व्यक्षरत्र्यक्षरादिनियम इति। अस्य च नियमस्याकरणे 'प्रतिष्ठा कृत्यमास्पदम्' (श्लो. ९४) 'उत्सेधः कार्य उन्नतिः' (श्लो. ९६) 'संज्ञा स्यात् चेतना नाम' (श्लो. ३३) इत्यादौ विधेयशब्दसंदेहः स्यात्[7] ॥ १ ॥

[1] Gm3 adds अथ नानार्थवर्गारम्भः.　[2] °उक्तत्वेनानेकार्थं° Gm3 Tv.
[3] कथमत्र वक्ष्यमाणानां Tv.　[4] उच्येत Gm3 Tv.　[5] कथनप्रयोजनं निरर्थकम् Tv.
[6] कथ्यन्ते Tv.　[7] Gm3, Tv add: अथवा अस्य श्लोकस्यायमर्थः। नानार्थ इति पदद्वयम्, कर्मधारयो वा। इह वर्गे नाकादिशब्दानां नानाभूताः भिन्नप्रकाराः केचिदर्थाः कान्तादिवर्गेष्वेव कीर्तिताः। न पर्यायकाण्डे। तेष्वाकाशादिरूपार्थेषु तेषां नाकादिशब्दानां प्रयोगः.

(पा.)　पदनतविबुधालिः प्रोल्लसद्गण्डपाली
　　सुमगुणवृतचूली बाहुचञ्चन्मृणाली।
　पुरहरकुलपाली धामसिन्धुप्रणाली
　　हृतदितिसुतमौलिर्भ्राजते भद्रकाली ॥

नानार्थाः—तेषु ते। पूर्वमेकस्मिन्नर्थे अनेके शब्दा उक्ताः। इदानीमनेकेष्वर्थेषु एकः शब्दः कथ्यते। तत् केन प्रकारेणेति चेदत्रैव कान्तादिवर्गेषु केऽपि कीर्तिताः। अस्मिन् वर्गे कान्तखान्तादिप्रकरणेषु केचन प्रदर्शिताः। 'शरे खड्गे च सायकः' (श्लो. २) इति ये केऽपि भूरिप्रयोगाः ते केऽपि पर्यायेष्वपि प्रदर्शिताः। किंच येष्वर्थेषु ये केचन शब्दाः भूरिशः काव्यनाटकादिप्रयुक्ताः तेष्वर्थेषु त एव शब्दाः केचन पर्यायेषूक्ताः। अपिशब्दो नियमप्रतीत्यर्थः। 'सुरलोको द्योदिवौ द्वे' (१, पृ. ६), 'द्योदिवौ द्वे स्त्रियामभ्रम्' (पृ. ५०) इति पर्यायेषूक्ता अत्रापि केचन कथिताः। 'आशुगौ वायुविशिखौ' (श्लो. १९) इत्येकतरस्य पर्यायोक्तावपि। 'जम्बुकौ क्रोष्टुवरुणौ' (श्लो. ३) इति मिलिता अपि केचन कीर्तिताः ॥ १ ॥

आकाशे त्रिदिवे नाको लोकस्तु भुवने जने।
पद्ये यशसि च श्लोकः शरे खड्गे च सायकः ॥ २ ॥

(वि.) [1]अम्बरे सुरलोके च नाकशब्दः[2] प्रकीर्तितः।
[3]न विद्यतेऽकं दुःखमत्रेति नाकः।

ब्रह्मलोकादिके लोके जने लोक उदाहृतः ॥ 3 ॥

लोक्यते आलोक्यत[4] इति लोकः। 'लोकृ दर्शने'।

समाख्यावृत्तयोश्चैव श्लोकशब्द उदाहृतः।

श्लोक्यत इति श्लोकः। 'श्लोकृ संघाते'[5]।

बाणे [6]खड्गान्तरे क्षीणे सायकः परिकीर्तितः ॥ 4 ॥

स्यति सायतीति वा सायकः। 'षोऽन्तकर्मणि', 'षै क्षये' ॥ २ ॥

[1] आकाशे J_2. [2] नाकलोकः K_3. [3] J_2 omits the sentence. [4] J_2 omits.
[5] शब्दसंघाते K_5. [6] खड्गेऽन्तके J_2, K_5.

(विव.) अथ नानार्थशब्दा उच्यन्ते—आकाशे त्रिदिवे नाकः। स्वर्गवदन्तरिक्षस्यापि पुण्यफलप्राप्यत्वाद् नास्ति अकं दुःखमत्रेति नाकः।

शब्दा नानार्थवर्गीयाः पूर्वं कृतनिरुक्तयः।
केचिन्नात्र निरुच्यन्ते ग्रन्थविस्तरतो भयात् ॥

लोकस्तु भुवने जने । भुवनशब्देन [1]त्रीणि [2]सप्त [3]चतुर्दश वा भुवनानि विवक्षितानि । जनशब्देन च शिरःपाण्याद्यङ्गसंस्थानविशेषयुक्तं तिर्यग्व्यतिरिक्तं मनुष्यादिप्राणिमात्रमुच्यते । यथा—'अयं जनः प्रष्टुमनास्तपोधने' (कु. सं. ५. ४०), 'जनाय शुद्धान्तचराय शंसते' (रघु. ३. १६), सुजनो दुर्जनः इत्यादिप्रयोगदर्शनात् । क्वचित्तु समुदायेऽपि प्रयुज्यते । यथा—'सखीजनोद्वीक्षणकौमुदीसुखम्'[4] (रघु. ३. १), 'अप्सरोजनसंकीर्णे विमाने' इत्यादि । इह तु जनशब्दः समूहार्थः । तत्र लोकशब्दो यथा—[5]'स्त्रीलोकः परिकलयांचकार तुल्यम्', राजलोक इति ।। पद्ये यशसि च श्लोकः । पद्ये पादबद्धे । यथा—'मा निषाद प्रतिष्ठां त्वमगमः' (रामा. १. २. १५) इत्यादौ । श्लोक्यत इति श्लोकः । 'श्लोकृ संघाते' । घञ् । यशसि च यथा—पुण्यश्लोकः इत्यादि ।। शरे खड्गे च सायकः । स्यति [6]प्रतिपक्षं नाशयतीति सायकः । 'षोऽन्तकर्मणि' । कर्तरि ण्वुल् (३. १. १३३) । 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युगागमः । चकारसूचितमर्थान्तरं शेषकारेण दर्शितम् । 'सायको क्षेतृसातारौ [7]त्रिलिङ्गौ' इति । 'क्षि क्षये' इत्यस्मात् तृजन्तेन क्षेतृशब्देन क्षित उच्यते । सातृशब्देन नाशकरः । अस्मिन्नेवार्थद्वये त्रिलिङ्गौ वाच्यलिङ्गौ इत्यर्थः ।। २ ।।

[1] भूः, भुवस्, स्वर्. [2] भूः, भुवस्, स्वर्, महर्, जनस्, तपस्, सत्यम्. [3] भूः-सत्यम्, अतल, वितल, सुतल, रसातल, तलातल, महातल पातालाः. [4] °मुखमिति मुद्रितग्रन्थे. [5] त्रिलोकः Tv. [6] परपक्षं Tj1, Tj2. [7] त्रिलिङ्गाविति निश्चितौ Gm3, Tv.

(पा.) आकाशे—सायकः । [नाकः] भूम्यामपि स्यात् । [1]'स्वर्गे भूम्यम्बरे नाकः' इति हलायुधः (अ. मा. ५. १५) । ग्रन्थविस्तरभीत्या[2] अत्र दुर्बोधांशमात्रस्यैव[3] विवरणम् ।। २ ।।

[1] 'कथ्यतेऽम्बरे नाकः' इत्येव मुद्रितग्रन्थे दृश्यते (पृ. ८५). [2] भयात् B3. [3] °मात्रविवरणम् B3, C1.

जम्बुकौ क्रोष्टुवरुणौ पृथुकौ चिपिटार्भकौ ।
आलोकौ दर्शनोद्योतौ भेरीपटहमानकौ ।। ३ ।।

(वि.) वरुणे फेरवे नीचे जम्बुकोऽयमुदाहृतः ।
जमतीति जम्बुकः । 'जमु अदने' ।

[1]भृष्टे तिलकृते भक्ष्ये शिशौ च पृथुको मतः ।। 5 ।।

पृथु अत्यर्थं कायतीति पृथुकः । 'कै शब्दे' ।।

आलोको वर्तते दीप्तावीक्षणे वन्दिभाषणे ।

आलोक्यतेऽवधार्यत[2] इत्यालोकः ।

आनको मुरजे भेर्यां पटहे [3]गर्जदम्बुदे ।। 6 ।।

आ समन्तादनितीत्यानकः[4] । 'अन प्राणने' । 'अण शब्दे' इत्यस्माद् आणक इति वा पाठः ।। ३ ।।

[1] भृष्टव्रीहिकृते भक्षे J2, K2, K5. [2] K5 omits. [3] स्वनदम्बुदे K3, K5. [4] अनकमिति वा पाठः K4.

(विव.) जम्बुकौ क्रोष्टुवरुणौ । जम्बुकश्च जम्बुकश्च जम्बुकौ इत्येकशेषः । सृगालोऽपि जम्बुकः, पश्चिमदिक्पतिरपि जम्बुक इत्यर्थः । एवमुत्तरत्रापि द्विवचनबहुवचनान्तानां विधेयशब्दानामेकशेषार्थोऽनुसंधेयः । जमतीति जम्बुकः[1] । 'जमु अदने' । शेषे—'अथ जम्बुकः । नीचे स्याज्जम्बुकस्तद्वत्' । जम्बुकोऽपि तद्वत् जम्बुकशब्दवद् अर्थत्रयेऽपि वर्तत इत्यर्थः ।। पृथुकौ चिपिटार्भकौ । भृष्टावहतव्रीह्यादिकृतो भक्ष्यविशेषः चिपिटः । अर्भकः शिशुः । तयोरुभयोः प्रत्येकं [2]पृथुकशब्दः ।। आलोकौ दर्शनोद्योतौ । चक्षुर्जन्यं ज्ञानं दर्शनम् । सौरादिकप्रकाश उद्योतः । तयोरर्थयोः क्रमेण भावे करणे च घञि आलोकः । शेषे—'बन्दिभाषण आलोकः' । अवधारय आलोकयेत्यादिरूपे बन्दिभाषणे आलोकशब्दो वर्तत इत्यर्थः । आलोक्यते राजादिरनेनेत्यालोकः । करणे घञ् । [3]'आलोकशब्दं वयसां विरावैः' इति कालिदासः (रघु. २. ९) । अन्यत्रापि—

'स राजककुदव्यग्रपाणिभिः पार्श्ववर्तिभिः ।
ययावुदीरितालोकः'[4] ।।

इति (रघु. १७. २७) ।। भेरीपटहमानकौ । भेरी च पटहश्च वाद्यविशेषौ । तत्र प्रत्येकम् आनकशब्दो वर्तते । आनको दन्त्यपञ्चममध्याक्षरः । केचित्तु 'अण शब्दे' इत्यस्माद् अणति शब्दायत इति द्वितीयाक्षरं मूर्धन्यपञ्चममाहुः । भेरीपटहम् इत्यत्र 'जातिरप्राणिनाम्' (२. ४. ६) इत्येकवद्भावः । तूर्याङ्गिके तु

मार्दङ्गिकपाणविकम् इत्यादि द्वन्द्व[5] एवोदाहरणम्। शेषे—'मृदङ्गे स्वनदम्बुद आनकः' इति। विश्वप्रकाशेऽपि—'आनकः पटहे भेर्यां मृदङ्गे स्वनदम्बुदे' इति (पृ. ८, श्लो. ६६) ॥ ३ ॥

[1] मृगय्वादिः (उ. १. ३७)। 'मितद्र्वादयश्च' (वा. ३. २. १८०) इति साधुः इति भा. दी. (पृ. २१५, ४५८). [2] पृथुरेव [पृथुकः]। संज्ञायां कन् (५. ३. ७५)। प्रथते। 'प्रथ प्रख्याने'। 'अर्भकपृथुकपाका वयसि' (उ. ५. ५३) इति साधुर्वा (भा. दी. पृ. ४५८). [3] 'आलोको जयशब्दः स्यात्' इति विश्वः (रघु. पृ. ३०); [4] इति हलायुधः (रघु. पृ. ३४१) इति मल्लिनाथव्याख्या। उभयत्र मुद्रितग्रन्थयोः न दृश्यते. [5] काशिका (१, पृ. १२७).

(पा.) जम्बुकाविति—वरुणः पश्चिमदिक्पालः। [1]नीचोऽपि। 'जम्बुकः [2]फेरवे नीचे प्रतीचीदिक्पतावपि' इति विश्वः (पृ. १३, श्लो. १४१) ॥ चिपिट इति धानाः। 'अटुकुलु' ॥ (आलोकः) वन्दिभाषणेऽपि स्यात्। 'आलोको दर्शने द्योते आलोको बन्दिभाषणे' इति विश्वः (पृ. १०, श्लो. १०३) ॥ भेरीपटहम्। अत्र तूर्याङ्गत्वादेकवद्भावः ॥ आनकौ। [3]मृदङ्गस्वनदम्बुदावपि स्याताम्[4]। 'आनकः पटहे भेर्यां मृदङ्गे स्वनदम्बुदे' इति विश्वः (पृ. ८, श्लो. ६६) ॥ ३ ॥

[1] A1 omits. [2] श्वापदे इति मुद्रितग्रन्थे. [3] A1 adds मृदु°. [4] B3 omits.

उत्सङ्गचिह्नयोरङ्कः कलङ्कोऽङ्कापवादयोः।
तक्षको नागवर्धक्योरर्कः स्फटिकसूर्ययोः ॥ ४ ॥

(वि.) स्थानान्तिकोरुचिह्नेषु [1]कोपे रूपकभूषयोः।
नाटकादिपरिच्छेदे चित्रे युद्धेऽङ्क उच्यते ॥ 7 ॥

अमन्ति [2]बाला अस्मिन्निति अङ्कः। 'अम गत्यादिषु' ॥

सिंहाणनिन्दयोश्चिह्ने कलङ्कः परिकीर्तितः।

[3]कल्यतेऽङ्कचत[4] इति कलङ्कः। 'कल शब्दसंख्यानयोः'[5] ॥

तक्षको वृक्षभेदे स्याच्चक्षुःश्रवसि तक्षणि ॥ 8 ॥

तक्ष्णोतीति तक्षकः। 'तक्षू [6]त्वक्षू तनूकरणे' ॥

अर्कः शक्रेऽर्कपर्णे स्यात् ताम्रे स्फटिकसूर्ययोः ।

अर्च्यत इत्यर्कः । 'अर्च पूजायाम्' ।। ४ ।।

[1] क्रोडे J2. [2] वाक्यानि K5. [3] काल्यते J2, K6. [4] K5 adds अनेन [5] संस्त्याने K3, K4. [6] J2 omits त्वक्षू.

(विव.) उत्सङ्गचिह्नयोरङ्कः । उत्सङ्ग ऊरुप्रदेशः । 'वामोत्सङ्गगता देवी' इत्यादिप्रयोगात् । चिह्नं लाञ्छनम् । ज्ञापकमिति यावत् । अङ्क्यत इत्यङ्कः । 'अकि लक्षणे' । क्रमात् कर्मणि करणे च घञ् । शेषे—'अङ्कश्चित्रयुद्धे भूषान्तिकपरिच्छिदि । स्थाने च रूपके क्रोडे' इति । चित्रयुद्धं द्वन्द्वयुद्धम् । अत्र भूषाशब्देन गोपालस्त्रीभिः प्रकोष्ठे धारणीयो देशभाषायाम् अङ्काख्ययैव प्रसिद्ध आभरणविशेषो विवक्षितः । परिच्छिदीति क्लीबन्तशब्देन परिच्छेद उक्तः । स च नाटकादावेकाहचरितरूपकः शब्दसंदर्भः । रूपकं तु नाटिकादिषु प्रसिद्धम्[1] । क्रोडं भुजान्तरम् । विश्वप्रकाशेऽपि—

'अङ्कः स्थानेऽन्तिके [2]मन्तौ रूपकोत्सङ्गलक्ष्मसु ।
नाटिकादिपरिच्छेदे चित्रयुद्धे च भूषणे' ।। (पृ. ५, श्लो. ३८)

इति ।। कलङ्कोऽङ्कापवादयोः । अङ्कोऽत्र चिह्नम् । कल्यते क्षिप्यत इति कलः । 'कल किल क्षेपे' । [3]अङ्क्यतेऽनेनेत्यङ्कः । कलश्चासावङ्कश्च कलङ्कः । शकन्ध्वादित्वात् पररूपम् (वा. १. १. ६४) । शेषे—'कलङ्को लोहकिट्टकः' इति ।। तक्षको नागवर्धक्योः । नागः सर्पविशेषः तक्षकनाम्ना प्रसिद्धः । तक्ष्णोति त्वगादिकमिति तक्षकः । 'तक्षू त्वक्षू[4] तनूकरणे' ।। अर्कः स्फटिकसूर्ययोः । अर्च्यत इत्यर्कः । 'अर्च पूजायाम्' । कर्मणि घञ् । विश्वप्रकाशे—'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ' इति (पृ. ४, श्लो. २७) ।। ४ ।।

[1] B5, B6 add नवममङ्कसंज्ञयैव प्रसिद्धं करुणरसप्रायम्. [2] क्रोडे Tj1, Tj2. [3] Tv omits अनेन. [4] Gm1 omits त्वक्षू.

(पा.) उत्सङ्ग—अङ्कापवादयोः । उत्सङ्गशब्देन [1]उपरिदेशोरूपरिदेशयोरत्र ग्रहणम् । 'अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः' इति उरोदेशे माघः (शिशु. २. ५३) । 'कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं संचरन्ती'

इति ऊरुपरिदेशे[2] बाणः (काद. पृ. २६०) ।। अङ्कश्चिह्नम् । नागः सर्पविशेषः । [अर्कः] ज्येष्ठभ्रातर्यपि स्यात् । 'अर्कोऽर्कपर्णे[3] स्फटिके ज्येष्ठभ्रातरि भास्वति' इति वैजयन्ती (पृ. २१४, श्लो. ४) ।। ४ ।।

[1] उरोदेशोरुभागयोः A1.	[2] ऊरुभागे A1.	[3] अर्कवर्णे B3, C1.

मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोः ।
स्यात् पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ।। ५ ।।

(वि.) ब्रह्मात्मानिलबर्ह्यग्निकृतान्तार्केषु पुंसि कः ।। 9 ।।
कं [1]शीर्षजलसौख्येषु सर्वनाम्नि त्रिषु स्मृतः ।

कायते स्तूयत इति कः । 'कै शब्दे' ।।

पुलाकः क्षुद्रधान्ये स्यात् क्षिप्रे[2] भक्तकणेऽपि च ।। 10 ।।

पुलति पाकेन महत्त्वमापद्यत इति पुलाकः । 'पुल महत्त्वे'[3] ।। ५ ।।

[1] शिरः J2.	[2] क्षिप्ते K5, K6.	[3] J2 adds क्षिप्रे च; क्षिप्रत्वे च K2, K3, K4.

(विव.) मारुते—शिरोऽम्बुनोः । पुंसि आत्मनीत्यर्थः । [1]वायौ ब्रह्मणि सूर्ये आत्मनि इत्येवमर्थचतुष्टये रूपभेदादेव कशब्दः पुंलिङ्गः । मूर्धनि जले च नपुंसकलिङ्गः । कनति प्रकाशत इति कम् । [2]'कनी दीप्तिकान्तिगतिषु' । 'अन्येष्वपि दृश्यते'[3] (३. २. १०१) इति डप्रत्ययः । [4]अत्र विश्वप्रकाशः (पृ. ४, श्लो. २४)— 'को ब्रह्मात्मानिलार्केषु . . . सुखशीर्षजलेषु कम्' इति । शिरोजलवाचकं कमित्यव्ययवर्गे वक्ष्यते (श्लो. २५०) ।। स्यात् पुलाकः—सिक्थके । 'तुच्छधान्यं तण्डुलशून्यं पलालम्' इति सुभूतिचन्द्रः । 'प्रियङ्गुश्यामाकादिक्षुद्रधान्यम्' इति सुबोधिनीकारः । संक्षेपो नाम विस्तरविरोधिसंकोच इति प्रसिद्धः । तथा च [5]बुद्धचरिते प्रयोगः— 'निबोध किंचित्तु पुलाकमात्रं वाक्यं मुनेर्वाक्यविदां वरस्य' इति । भक्तसिक्थकं नाम स्थाल्यां पाकवशेन विक्लिन्नो महत्त्वमापन्नः तण्डुलपरिणाम ओदनरूपः । यथा— 'स्थालीपुलाकन्यायः' इति । पुलति महत्त्वमापद्यत इति पुलाकः । 'पुल महत्त्वे' । 'पिनाकादयश्च' इति उणादिषु (४. १५) निपातितः । अथवा इगुपधलक्षणे

कप्रत्यये (३. १. १३५) पुलशब्देन महत्त्वपरिणामवद् द्रव्यं तण्डुलादिकमुच्यते। तदकतीति पुलाकः। 'अक अग कुटिलायां गतौ'। भावार्थे क्विपि पुलं महत्त्वम् अकतीति वा ॥ ५ ॥

[1] वायुब्रह्मसूर्यात्मरूपचतुष्टये Tv. [2] 'कन दीप्तौ' B5, B6. [3] अन्येभ्योऽपि Gm1, Tv. [4] Tv adds अत्र शाश्वतकोशः—'कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दतः। कश्चात्मनि समाख्यातः कः प्रकाश उदाहृतः' इति। मुद्रितग्रन्थे तु 'कं वारिशिरसोः कश्च प्रजापत्यात्मवायुषु' (पृ. १८, श्लो. १९९), 'कं सुखेऽपि विजानीयात्' (पृ. ६६, श्लो. ७७१) इति दृश्यते. [5] एवं टीकासर्वस्वे (पृ. ७४); असंपूर्णमुद्रितग्रन्थे श्लोकोऽयं न दृश्यते.

(पा.) मारुते—शिरोऽम्बुनोः। [कः] पुंस्यात्मन्यपि[1]। 'प्रजापत्यात्मवातार्के कः शिरोऽम्बुसुखेषु कम्' इति रभसकोशः। स्यात् पुलाकः—सिक्थके। [2]भक्तसिक्थकमन्नकणः। [3]'पंट्टकं मेतुकु'। [4]'ग्रासोद्गलितसिक्थेन किं न्यूनं करिणो भवेत्' ॥ ५ ॥

[1] A1 omits अपि. [2] भक्तसिक्थं नामान्नांशः A1. [3] B3 omits. [4] ग्रासाद् गलित° B3, C1.

उलूके करिणः पुच्छमूलोपान्ते च पेचकः।
कमण्डलौ च करकः सुगते च विनायकः ॥ ६ ॥

(वि.) पेचको गजलाङ्गूलमूले वायसवैरिणि।
पचति स्वेन नेत्रज्योतिषा काकानिति पेचकः। 'डुपचष् पाके' ॥
कुण्डिदाडिमवर्षाश्मपक्षिभेदकरेषु[1] च ॥ 11 ॥
कीकसे [2]मस्तके चापि करकः परिकीर्तितः।
कीर्यत इति करकः। 'कॄ विक्षेपे' ॥
विनायकस्तार्क्ष्यविष्णुविघ्नेशेषु गुरौ जिने[3] ॥ 12 ॥
वीनां पक्षिणां नायको विनायकः। 'णीञ् प्रापणे' ॥ ६ ॥

[1] भेदे J2. [2] मस्तकस्यापि K4, K6. [3] जने K6.

(विव.) उलूके—पेचकः ॥ पुच्छमूलस्य अधः समीपे गुदाच्छादकमांसपिण्ड इति सुभूतिचन्द्रः। 'पेचको गजलाङ्गूलमूलपर्यन्तघूकयोः' इति विश्वप्रकाशः

(पृ. ६, श्लो. ८६)। केचित्तु[1] पुच्छमूले पुच्छप्रान्ते चेत्यर्थद्वयपरत्वेन व्याचक्षते। तथा च प्रतापः—'उलूके गजलाङ्गूले मूलपर्यन्तयोरपि' इति। अयं शब्दः प्रागेव [2]व्युत्पादितः (२. ५. १५)। कमण्डलौ च करकः। कमण्डलुः कुण्डिका। चकारादन्यत्रापि। तथा च प्रतापः—

करकः पक्षिभेदे स्यात् कमण्डलुकरङ्कयोः।
करदाडिमयोः पुंसि स्त्रियामपि घनोपले॥

इति। पक्षिभेदः कृकराख्यः। 'करङ्को [3]मस्तके शस्यनारिकेलफलास्थनि' इति विश्वप्रकाशवचनात्[4] (पृ. १४, श्लो. १४८)॥ सुगते च विनायकः। चकारसमुच्चितोऽर्थः शेषे— 'विनायकस्तु हेरम्बे गरुत्मति गुरावपि' इति। वीनां पक्षिणां नायकत्वाद् विनायको गरुत्मान्। गुरावपि। विनेतृत्वाद् विनायकः॥ ६॥

[1] Tj1, Tj2 omit केचित्तु. [2] पचति संतपति, पच्यते वा दुःखेन। 'डुपचष पाके'। 'पचिमच्योरिच्चोपधायाः' (उ. ५. ३७) इति वुन्। अत इत्वम्। 'पुगन्त...' इति गुणः इति भा. दी. (पृ. २१९). [3] मस्तकास्थि स्यात् B5, Gm1. [4] Tv adds प्रताप एव वर्षप्रस्तावे वर्षशब्दस्य वर्षोपलवचनस्य द्विलिङ्गत्वमाह—वर्षग्रावाणः करका द्वयोरिति.

(पा.) उलूके—पेचकः[1]। कमण्डलौ च करकः। वर्षोपलदाडिमयोरपि स्यात्। चशब्दः उक्तसमुच्चये ऽनुक्तसमुच्चये च, अनुकूलवचनं लिखितम्॥ सुगते च विनायकः। हेरम्बादयोऽपि। 'विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने[2] जिने[3] गुरौ' इति विश्वः (पृ. १७, श्लो. १८८)॥ ६॥

[1] उलूकादिषु पेचकशब्दः स्यात् C1. [2] विघ्ने A1. [3] जने A1, B3.

किष्कुर्हस्ते वितस्तौ च शूककीटे च वृश्चिकः।
प्रतिकूले प्रतीकस्त्रिष्वेकदेशे तु पुंस्ययम्॥ ७॥

(वि.) वितस्तौ कुत्सिते किष्कुर्माने[1] हस्तप्रकोष्ठके[2]।
किमपि [3]कूयतेऽनेनेति किष्कुः। 'कु शब्दे'॥

वृश्चिको भेषजे[4] राशौ शूककीटे[5] विषक्रिमौ॥ 13॥

वृश्चतीति वृश्चिकः। 'ओव्रश्चू छेदने'॥

प्रतीकः प्रतिकूले स्यादङ्गे[6] [7]वैलोम्यभाषिणि।

[प्रत्येति] प्रतिकूलमेतीति प्रतीकः। 'इण् गतौ'।। ७ ।।

[1] याते Z1; महा° K5. [2] °प्रकोष्ठयोः K2, K4. [3] कायते K6; कौतीति J2, K5. [4] वृषभे K6. [5] °कीले K3, K6. [6] अन्ने J2. [7] अङ्गवैलोम्य° Z1.

(विव.) किष्कुर्हस्ते वितस्तौ च। चतुर्विंशत्यङ्गुलो हस्तः। वितस्तिः द्वादशाङ्गुलः। [1]अत्र रुद्रोऽपि—'किष्कुर्हस्ते वितस्तौ च[2] प्रकोष्ठेऽप्यनपुंसकम्'[3] इति। किंचिदिति कूयते शब्द्यत इति किष्कुः। 'कु शब्दे'। बहुलग्रहणात् कर्मणि डुप्रत्ययः। 'अविहितलक्षणः सुट् पारस्करादिषु द्रष्टव्यः' इति सुडागमः।। शूककीटे च वृश्चिकः। [4]पुच्छाग्रे शूकवान् कीटः शूककीटः। रक्तभ्रमर इत्यन्ये। चकाराद् द्रोणे इति प्रागुक्तः (१, पृ. ३३६)। शेषे—'वृश्चिकस्त्वौषधे राशौ' इति। औषधम् [5]ओषधिविशेषः। वृश्चिको राशिस्तुलाराशेरनन्तरः।। प्रतिकूले—पुंस्ययम्। [6]प्रतीकः प्रतिकूलार्थश्चेद् विशेष्यानुरोधात् त्रिलिङ्गः। एकदेशोऽवयवः। तत्र पुंलिङ्गः।। ७ ।।

[1] Gm3, Tv add शेषे—प्रकोष्ठे कुत्सिते किष्कुर्द्विचत्वारिंशदङ्गुलः. [2] ना B5, B6. [3] पुंनपुंसकम् Tj1, Tj2. [4] पुच्छाग्रोपरि Tv. [5] गुल्मविशेषः। आन्ध्रभाषायां 'तेलुमणिचेट्टुपेरु' Gm1. [6] प्रत्येति, प्रतीयते वा। 'इण् गतौ'। 'अलीकादयश्च' (उ. ४. २५) इति साधुः इति भा. दी. (पृ. २५८).

(पा.) किष्कुर्हस्ते—वृश्चिकः। [1]वृश्चिकेऽपि स्यात्।। प्रतिकूले—पुंस्ययम्। अनुकूलेऽपि त्रिलिङ्गः[2]। 'नाङ्गे[3] प्रतीकस्त्रिषु तु प्रतिकूलानुकूलयोः'[4] इति वैजयन्ती (पृ. २६१, श्लो. ५४)।। ७ ।।

[1] राशौ मासे वा. [2] B3 omits. [3] मुखे इति मुद्रितग्रन्थे. [4] °अनुरूपयोः इति मुद्रितग्रन्थे.

स्याद् भूतिकं तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च।
ज्योत्स्निकायां च घोषे च कोशातक्यथ कट्फले।। ८ ।।

(वि.) भूनिम्बे भूतिकं [1]ध्यामे दीप्यके भूस्तृणे मतम्।। 14 ।।

भुवि ऊतिर्यस्येति भूतिकम्। 'ऊयी तन्तुसंताने'।।

कोशातकी कचे[2] ज्योत्स्नाघण्टालीघोषकेषु[3] च ।
मृदङ्गफलकाक्ष्वेडादेवतालीषु[4] वर्तते ।। 15 ।।

कोशमतति कोशातकी । 'अत सातत्यगमने' ।। ८ ।।

[1] ध्याने J2; नाम K5. [2] करे J2. [3] °घण्टारी° K6. [4] देवदाडिषु J2, K6.

(विव.) स्याद् भूतिकं—भूस्तृणेऽपि च । भूनिम्बः किराततिक्तः । कत्तृणं देवजग्धाख्यं सौगन्धिकम् । भूस्तृणमपि प्रागुक्तम् (१, पृ. ३१९) । भुवि ऊतिरस्येति भूतिकम् । 'अन्येषामपि दृश्यते' (६. ३. १३७) इति दीर्घे[1] भूतीकमपि । तथा च विश्वप्रकाशे—'भूतीकमपि [2]भूनिम्बे कर्पूरतृणदीप्ययोः' इति (पृ. ११, श्लो. ११०) । कर्पूरतृणं भूस्तृणम्[3] । स्वामी तु (पृ. २७०)—कत्तृणमित्यस्य स्थाने कट्फल इति पठित्वा कट्फलः [4]श्रीपर्णीति व्याचष्ट ।। ज्योत्स्निकायां—कोशातकी । ज्योत्स्निका पटोलिका । घोषोऽत्र धामार्गवाख्यस्तिक्तफलः लताविशेषः । [5]तथा च माधवः—'घोषो धामार्गवे पल्ल्यां कोशातक्यां ध्वनावपि' इति । कोशाख्यं जालाकारं बीजपिधानम् अतति व्याप्नोतीति कोशातकी । हरीतक्यादिः[6] (४. ३. १६७) ।। ८ ।।

[1] दीर्घविकल्पे Tv. [2] भूनिम्बदीप्यकर्पूरकत्तृणे इति मु. ग्र. [3] Gm3, Tv add तथा च वामनः प्रदीपे—'स्याद् भूतिकं गन्धतृणं मालाकर्पूरनाम च' इति. [4] श्रीफलः Tj1, Tj2. [5] अत एव Gm1, Tv. [6] गौरादिः Tv.

(पा.) स्याद् भूतिकं—भूस्तृणेऽपि च । भूतीकमिति दीर्घमध्यमपि । 'भूतीकमपि[1] [2]भूनिम्बदीप्यकर्पूरकत्तृणे' इति विश्वः (पृ. ११, श्लो. ११०) ।। ज्योत्स्निकायां—कोशातकी । कोशातक्याः त्रयः ।। ८ ।।

[1] इति B3, C1. [2] भूनिम्बे दिव्य° B3.

सिते च खदिरे सोमवल्कः स्यादथ सिह्लके ।
तिलकल्के च पिण्याको बाह्लीकं रामठेऽपि च ।। ९ ।।

(वि.) [1]कैटर्ये [2]खदिरे सोमवल्कशब्दोऽभिधीयते ।
सोमवत् श्वेतं [3]वल्कमस्येति सोमवल्कः ।

पिण्याकस्तिलकल्के स्यात् कुङ्कुमे चैव [4]सिह्लके ।। 16 ।।

पिण्डवदकतीति पिण्याकः। 'अक अग कुटिलायां गतौ'। सिह्लः[5] सल्लकीत्वगादिना कृतो धूपः ।।

याजकाङ्कुशवीरेषु हिङ्ग्वश्वविषयेषु च ।
बाह्लीकं बाह्लिकं चापि कुङ्कुमे च प्रकीर्तितम् ।। 17 ।।

वीरमुशीरम् । [6]प्रायेण बाह्लिकदेशभवत्वाद् बाह्लिकम् ।। ९ ।।

[1] कैडर्ये K_2, K_5. [2] कदरे K_4, K_6. [3] वल्कलम् K_3, K_6. [4] हिङ्गुनि K_4, K_6. [5] सिल्हः K_5, K_6. [6] प्रायः J_2.

(विव.) अथ कट्फले––सोमवल्कः स्यात्। कट्फलः श्रीपर्णी। सित इति खदिरविशेषणम्। [1]कदराख्यो वृक्षविशेष इत्यर्थः। सोमस्य [2]यज्ञियलताविशेषस्य वल्कमिव वल्कं त्वगस्येति सोमवल्कः ।। अथ सिल्हके––पिण्याकः। [3]सल्लकीत्वक्सुगन्धादिकृतो धूपस्तु सिल्हक इत्युक्तलक्षणः (१, पृ. ४४३) ।। तिलकल्कं चात्र यन्त्रनिष्पीडनेनोद्धृततैलं कल्कम्। पिण्डं पिण्डाकारमकतीति पिण्याकः। वर्णव्यत्ययः। शेषे––'पिण्याको हिङ्गुकुङ्कुमे'। हिङ्गु च कुङ्कुमं चेति समाहारद्वन्द्वः। विश्वप्रकाशेऽपि––'पिण्याकः सिल्हके[4] हिङ्गौ तिलचूर्णे च[5] कुङ्कुमे' (पृ. ६, श्लो. ८३) ।। बाह्लीकं रामठेऽपि च। रामठं हिङ्गु। तत्र रूपभेदाद् नपुंसकलिङ्गः। प्रायेण बाह्लीकदेशे भवत्वाद्[6] बाह्लीकम्। शेषे––'बाह्लीको विषयाश्वयोः। नप् कुङ्कुमे च वीरे च बाह्लीकं बाह्लिकं समम्' इति। विषयो बाह्लीकाख्यो देशः। अश्वः तद्देशप्रभवः। तत्र उभयत्र रूपभेदात् पुंलिङ्गः। वीरम् उशीरम्। तत्र नप् नपुंसकलिङ्गमित्यर्थः। [7]बाह्लीकमिति मध्यदीर्घोऽप्यस्ति। तथा च शब्दभेदप्रकाशे––'बाह्लीको बाह्लिकश्चापि गाण्डीवो गाण्डिवोऽपि च' इति ।। ९ ।।

[1] खदिराख्यः B_5. [2] यज्ञीय° Tv. [3] Tv omits सल्लकीत्वक्. [4] सिह्लके इति मु. ग्र. [5] अपीति मु. ग्र. [6] जातत्वात् B_5, B_6. [7] बाह्लीकशब्दो मध्यदीर्घो मध्यह्रस्वश्च। द्वयमेकार्थम्। कुङ्कुमवीरहिङ्गुषु नपुंसकम्, अन्यत्र पुंलिङ्गः Tv.

(पा.)　अथ कट्फले—[1]रामठेऽपि च । चशब्देन पिण्याकेऽपि । 'पिण्याकः [2]सिल्हके हिङ्गौ तिलचूर्णे [3]च कुङ्कुमे' इति विश्वः (पृ. ६, श्लो. ८३) ॥ ९ ॥

[1] बाह्लिकं A1.　[2] सिह्लके इति मु. ग्र.　[3] अपि इति मु. ग्र.

महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः ।
रुक्तापशङ्कास्वातङ्कः स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥ १० ॥

(वि.)　विश्वामित्रमुनौ शक्रे गुग्गुलावाहितुण्डिके ।
चण्डिकायां नदीभेदे कुशाख्यग्रन्थवेत्तरि ॥ 18 ॥
उलूके नकुले चैव [1]खनके कौशिको भवेत् ।

कुशिकस्यापत्यं कौशिकः । अन्यत्र व्युत्पत्तिर्यथार्हमूह्या[2] ॥

रोगातञ्चनशङ्कासु तापे चातङ्क इष्यते[3] ॥ 19 ॥

आतञ्चनं [4]क्षीरादिद्रव्यपरिणमनम् । आतङ्कत्यनेन कृच्छ्रेण जीवतीति आतङ्कः । 'तकि कृच्छ्रजीवने गतौ च'[5] ॥

स्वल्पघातुकनिःस्वेषु क्षुल्लकः परिकीर्तितः ।

[6]क्षुधं लातीति क्षुल्लकः । 'ला आदाने' ॥ १० ॥

[1] कनके K5.　[2] यथाकथंचित् J2.　[3] उच्यते K2, K4, K5.　[4] K5 omits द्रव्य°.　[5] K3, K4 omit गतौ च.　[6] क्षुदं क्षोदं K6; क्षुतं K5.

(विव.)　महेन्द्र—कौशिकः । कोशो धनसमृद्धिः प्रयोजनमस्येति कौशिकः इन्द्रः, स एवात्र महेन्द्रशब्देनोक्तः । 'महान् वा अयमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वम्' इति श्रुतेः (ऐ. ब्रा. ३. २१) । इन्द्रेण केनचित् कारणवशेन कदाचिद् उलूकवेषः परिगृहीत इति [1]घूकोऽपि कौशिकः । कोशेन [2]सर्पग्रहणपेटिकया व्यवहरतीति कौशिकः व्यालग्राही । गुग्गुलुवृक्षे प्रागुक्तः (१, पृ. २३६) । शेषे—

'कौशिको मुनिभेदे च नकुले कोशवत्यपि ।
उद्गातरि कुशाजीवे गौरीनद्योस्तु कौशिकी ॥'

इति। मुनिभेदः विश्वामित्रः। नकुलो बभ्रुः। कोशो धनस्य समूहः[3]। पुराणादिग्रन्थसंदर्भो वा। सोऽस्यास्तीति वा कोशवान्। कोशं वेत्तीति वा कौशिकः[4]। त्रिवृत्पञ्चदशादिस्तोत्रियेषु[5] गणनायौदुम्बराः शङ्कवः कुशा उच्यन्ते। ताभिर्व्यवहरतीति कौशिकः। उद्गाता प्रथमः छन्दोगेषु। कुशो दर्भः, कुशं जलं, कुशीत्ययोविकारश्च। तेन जीवतीति कौशिकः। पार्वत्यां नदीभेदे च कौशिकीति ङीबन्तस्त्रीलिङ्गः। कुशिकात् जाता कौशिकी ॥ रुक्—आतङ्कः। आतङ्कति कृच्छ्रेण जीवत्यनेनेति आतङ्कः। 'तकि कृच्छ्रजीवने'। अधिकरणे करणे वा (३. ३. १२१) घञ्। रुग् रोगः। तापः पीडा। शङ्का भयम्। शेषे—'आतञ्चने स्यादातङ्कः'। क्षीरस्य [6]रूपपरिणामहेतुभूतं [7]दध्यादिकमातञ्चनमुच्यते॥ स्वल्पेऽपि क्षुल्लकस्त्रिषु। स्वल्पं सूक्ष्मम्। शेषे—'दरिद्रे क्षुल्लकस्त्रिषु'। 'क्षुध बुभुक्षायाम्'। क्षुधं लातीति क्षुल्लकः ॥ १० ॥

[1] उलूकोऽपि Tv. [2] °वारण° Gm3, Tv. [3] Tj1 adds तद्वान्. [4] सोऽपि कौशिक उच्यते Tv. [5] °स्तोमेषु B5, B6. [6] Tv adds दधि°. [7] Tj1, Tj2 add क्षीरावाप्यं.

(पा.) महेन्द्र—कौशिकः। कौशिकस्य एते चत्वारः। रुक्—आतङ्कः। मुरजध्वनावपि स्यात्। 'आतङ्को रोगसंतापशङ्कासु मुरजध्वनौ' इति विश्वः (पृ. १४, श्लो. १५१) ॥ स्वल्पेऽपि[1] क्षुल्लकस्त्रिषु। क्षुद्रशङ्खेऽपि[2]। 'शम्बूकास्ते क्षुल्लकाः क्षुद्रशङ्खाः' इति हलायुधः (अ. मा. ३. ४२) ॥ १० ॥

[1] तु A1. [2] A1 adds पुंलिङ्गः.

जैवातृकः शशाङ्केऽपि खुरेऽप्यश्वस्य वर्तकः।
व्याघ्रेऽपि पुण्डरीको ना यवान्यामपि दीपकः ॥ ११ ॥

(वि.) जैवातृकः[1] पुत्रजलभैषज्यायुष्मदिन्दुषु ॥ 20 ॥
[2]जीवतीति जैवातृकः। 'जीव प्राणधारणे'॥

[3]वर्तका पक्षिभेदे स्याद् वर्तकोऽश्वखुरे मतः।
भुवि वर्तत इति वर्तकः। 'वृतु वर्तने'[4] ॥

व्याघ्रदिग्गजभैषज्यसितच्छत्रसिताम्बुजे ॥ 21 ॥
कोशकृज्जन्तुभेदे च पुण्डरीकोऽभिधीयते ।

पुणतीति पुण्डरीकः । 'पुण कर्मणि शुभे' ॥

मयूरस्य शिखायां च भूषणे जीरके तथा ॥ 22 ॥
प्रदीपेऽप्यजमोदायां दीपकः परिकीर्तितः ।

दीपयतीति दीपकः । 'दीप दीप्तौ'[5] ॥ ११ ॥

[1] जैवातृकं J2. [2] जीवयति J2, K3, K4. [3] वर्तकः K5. [4] K5 omits. [5] कान्तौ J2.

(विव.) जैवातृकः शशाङ्केऽपि । अपिशब्दाद् आयुष्मति प्रागुक्तः (२. १. ६) । विश्वप्रकाशे—'जैवातृकः [1]कृषे चन्द्रे भेषज्यायुष्मतोरपि' (पृ. १८, श्लो. २०४) इति । कृषः कृषकः[2] । 'जैवातृकः कुडुम्बी च क्षेत्रकृत् कृष इत्यपि' इति शेषकारेण[3] पर्यायकाण्डेऽभिधानात् ॥ खुरेऽप्यश्वस्य वर्तकः । अपिशब्दात् पक्षिभेदे प्रागुक्तः (१, पृ. ३५५) ॥ व्याघ्रेऽपि पुण्डरीको ना । पुण्डरीकपत्राकारचर्मगतरेखासादृश्यात्[4] पुण्डरीकशब्देनोच्यते । तद्योगाद् अर्शआद्यचि (५. २. १२७) पुण्डरीको व्याघ्रः । अत्र विशेषाद् व्याघ्रवाचकः पुंलिङ्गः । सिताम्भोजे तु नपुंसकं प्रागुक्तम् (१, पृ. १८१) 'पुण्डरीकं [5]सिताम्भोजम्' इति । 'पुण्डरीको व्याघ्रभेदे दिग्गजेक्षुप्रभेदयोः' इत्यजयः । यवान्यामपि दीपकः । यवानी अजमोदा । शेषे—'दीपकः स्यादलंकारे यवानीर्बर्हिचूडयोः' इति । अलंकारे दीपकाख्यः प्रसिद्धः[6] । शेषस्थेन यवानीशब्देन जीरको विवक्षितः । 'दीपनीया दीपनी च यवानी जीरकोऽपि च'[7] इति नामावल्यामभिधानात् । विश्वप्रकाशेऽपि—[8]'दीपकस्त्वजमोदायां यवानीर्बर्हिचूडयोः' (पृ. १२, श्लो. १२१) इति । बर्हिचूडा मयूरशिखाख्य ओषधिविशेषः ॥ ११ ॥

[1] कृशे इति मु. ग्र. [2] कर्षकः Tv. [3] 'जैवातृकः कृशे चन्द्रे दीर्घायुषि च स त्रिषु' इति त्रिकाण्डशेषे (पृ. २३, श्लो. ५७५). [4] °युक्तत्वात् Gm3, Tv. [5] सिताम्भोजे सितच्छत्रेऽपि कीर्तितम् Gm3, Tv. [6] B5 adds शब्दालंकारेषु. [7] Tv adds अजाजी चैव जीवा च दीपको दीप्यकस्तथा. [8] 'दीप्यकं चाजमोदे स्याद् यवानीर्बर्हिचूडयोः' इति (पृ. १२, श्लो. १२१), 'दीपकं वागलंकारे दीपको दीप्तिकारके' (पृ. १०, श्लो. १००) इति च मुद्रितग्रन्थे.

(पा.) जैवातृकः शशाङ्केऽपि। 'जैवातृकश्चन्द्रभिषगायुष्मत्सु कृषीवले' इति वैजयन्ती (पृ. २७७, श्लो. ६)। खुरेऽप्यश्वस्य वर्तकः। वृत्तिकर्तरि त्रिलिङ्गः॥ व्याघ्रेऽपि पुण्डरीको ना। व्याघ्रो व्याघ्रभेदः।

'पुण्डरीकं सितच्छत्रे सिताम्भोजे च कीर्तितम्।
पुण्डरीको व्याघ्रभेदे दिग्गजे क्षुद्रभेकयोः॥'

इति जयकोशः। यवान्यामपि दीपकः[1]। जीरकेऽपि स्यात्[2]। 'अजाजी तु जया दीप्यो जीरको जीरणः [3]सितः' इति वैजयन्ती (पृ. १२६, श्लो. ८३)॥ ११॥

[1] दीप्यक इति पारिजाते पाठः. [2] B3, C1 omit स्यात्. [3] शितः A1.

सालावृकाः कपिक्रोष्टुश्वानः स्वर्णेऽपि गैरिकम्।
पीडार्थेऽपि व्यलीकं स्यादलीकं त्वप्रियेऽनृते॥ १२॥

(वि.) कपौ शुनि च गोमायौ सालावृक उदाहृतः॥ 23॥
स्यति वर्कते चेति सालावृकः। 'षोऽन्तकर्मणि'। 'वृक आदाने'॥

पर्वतोद्भवधात्वादौ गैरिकं कनकेऽपि च।

गिरौ भवं गैरिकम्॥

[1]व्यलीकमप्रियाकार्यवैलक्ष्यानृतपीडने॥ 24॥

शुभं व्यलति [2]निवारयतीति व्यलीकम्। 'अल [3]वारणे'॥

अलीकमनृते प्रोक्तं ललाटाप्रिययोरपि।

अलतीत्यलीकम्। 'अल [4]भूषणपर्याप्तिवारणेषु'॥ १२॥

[1] °वैलक्षण्य° K3. [2] K5 omits नि. [3] निवारणे K2, K3, K4.
[4] भूषणे K2, K6.

(विव.) सालावृकाः—श्वानः। सालान् वृक्षादिवर्तिनो जीवान् आवर्कन्ते भक्षयन्तीति सालावृकाः। [1]'वृक आदाने'। दन्त्यादिः। वैजयन्त्यां नानार्थकाण्डे दन्त्यादिप्रकरणेऽभिधानात्[2]। 'इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्' इति श्रुतेः

(ताण्ड्य. ८. १. ४)। [3]तालव्यादिरिति सुभूतिचन्द्रः। स्वर्णेऽपि गैरिकम्। अपि शब्दाद् 'गैरिकं तु विशेषतः'[4] इति प्रागुक्तधातुविशेषे (१, पृ. २१३)। गिरौ भवं गैरिकमिति अविरविकन्यायेन गिरिशब्देन[5] विगृह्य गिरिकशब्दात् तद्धितोत्पत्तिः॥ पीडार्थेऽपि व्यलीकं स्यात्। विशेषेण सौमुख्यमलति वारयतीति व्यलीकम्। 'अल भूषणपर्याप्तिवारणेषु'। 'अलीकादयश्च' (उ. ४. २५) इतीकन्प्रत्ययान्तो निपातितः। पीडा दुःखमिति टीकासर्वस्वकारेण व्याख्यातम्[6] (पृ. ७३)। दक्षिणावर्तस्तु—'व्यलीकनिश्वासमिवोत्ससर्ज' इति कुमारसंभवश्लोकव्याख्याने (३. २५) व्यलीकं लज्जेति व्याख्याय तत्संमतित्वेन 'व्रीडार्थेऽपि व्यलीकं स्यात्' इत्यमरसिंहाभिधानं पपाठ। तथा च 'सत्रान्ते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान्' इति कालिदासप्रयोगः (रघु. ४. ८७)। [7]शेषे—'व्यलीकमप्रियाकार्यवैलक्ष्यानृतकामजे' इति। कामजः कामावेशकृतोऽपराधः॥ अलीकं त्वप्रियेऽनृते। अप्रियमनिष्टम्। शेषे—'अलीकं तु ललाटे स्यात्' इति॥ १२॥

[1] Tj1, Tj2 add कुक. [2] मुद्रितग्रन्थे तु (पृ. २६८, श्लो. ४६) 'सालावृको वृके' इति शेषकाण्डे पुंलिङ्गाध्याये दृश्यते. [3] शालावृक इति. [4] विशेषकम् B5, B6. [5] गिरिणा Tv. [6] मुद्रितग्रन्थे 'अप्रियाकारविलक्षेष्वपि व्यलीकम्। दीर्घमध्यम्' इत्येव दृश्यते. [7] अपिशब्दार्थः शेषे Tv.

(पा.) सालावृकाः—गैरिकम्। जाजिन्यपि स्यात्। व्रीडार्थेऽपि व्यलीकं स्यात्। प्रतारणेऽपि स्यात्[1]। 'व्यलीकं स्यात् प्रतारणम्' इति हलायुधः (अ. मा. ४. ६३)। 'पीडार्थेऽपि व्यलीकं स्यात्' इति पाठे[2] पीडनेऽपि स्यात्[3]॥ अलीकं त्वप्रियेऽनृते॥ १२॥

[1] B3 omits स्यात्. [2] पाठेन A1. [3] C1 omits.

शीलान्वयावनूके द्वे शल्के शकलवल्कले।
साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले॥ १३॥
दीनारेऽपि च निष्कोऽस्त्री

(वि.) [1]गतजन्मन्यनूकः[2] स्यादनूकं शीलवंशयोः॥ 2 ॥

अनूच्यत इत्यनूकम्। 'उच समावाये'॥

शकले वल्कले चैव शल्कशब्द उदाहृतः ।

[3]शलतीति शल्कम् । 'शल [4]आशुगमने' ।।

सुवर्णाष्टोत्तरशते वक्षोभूषणकर्षयोः ।। 26 ।।
[5]स्वर्णदीनारपलयोर्निष्कः स्यात् पुंनपुंसकम् ।

नितरां कायते स्तूयत इति निष्कः । 'कै शब्दे' ।। १३ ।।

[1] गजतन्वनि(?) K_5, K_6. [2] अनूकं K_2. [3] J_2 omits the line. [4] चलन-संवरणयोः इति मुद्रितग्रन्थेषु. [5] स्वर्णे K_4, K_5.

(विव.) शीलान्वयावनूके । शीलं स्वभावः । अन्वयः वंशः । उभयत्र[1] रूपभेदाद् नपुंसकम् । अनूच्यति प्रजासु समवैति इत्यनूकम् । 'उच समवाये' । कप्रत्ययः[2] (३. १. १३५) । न्यङ्क्वादिः (७. ३. ५३) । शेषे—'अनूकं गतजन्मनि' इति । शेषस्थं केचित् पुंलिङ्गं पठन्ति ।। द्वे शल्के शकलवल्कले । शकलं खण्डम् । वल्कं वृक्षादित्वक् । ते उभे शल्कवाच्ये । 'साम्यं गतेनाशनिना मघोनः [3]शशाङ्कशल्काकृतिपाण्डुरेण' इति शल्कशब्दस्य खण्डवाचकत्वे भारविप्रयोगः (किरा. १७. ५१) । 'शल्कैस्तां रात्रिमग्निमिन्धते' इति श्रुतिश्च[4] । अथवा शकलं मत्स्यानां कवचप्राया त्वक् । तद्योगाद् मत्स्यः शकलीत्युच्यते । 'तथा पाठीनराजीवसशल्काश्च द्विजातिभिः' इति प्रयोगः (या. स्मृ. १. ७. १७७) । शलन् गच्छन् कायति शल्कम् । 'शल [5]आशुगमने' । 'कै शब्दे ।। साष्टे शते—निष्कोऽस्त्री । अष्टाभिः सह वर्तत इति विग्रहे 'तेन सहेति तुल्ययोगे' (२. २. २८) इति बहुव्रीहिसमासे सति साष्टन्शब्दात् सप्तम्येकवचने आत्वे नपुंसकह्रस्वत्वे च साष्टे इति भवति । नकारान्तमिदम् । अत्र 'बहुव्रीहौ संख्येये डज्...' इत्यादिना (५. ४. ७३) डच्प्रत्यये साष्टमित्यकारान्तमिति केचित्[6] । तदुक्तम्—'संख्याया-व्यय...' (२. २. २५) इति यो बहुव्रीहिः तस्येदं ग्रहणमिति काशिकाकारेण (१, पृ. ६५) डच्प्रत्ययविधायकसूत्रे व्याख्यातत्वात् प्रत्येकं कर्षपरिमितानां सुवर्णानां साष्टे अष्टोत्तरशत इत्यर्थः । हेम्नि पलषोडशांशपरिमिते हेम्नीत्यर्थः । 'गवामभावे निष्कः स्यात्' इत्यादौ तथाभूते प्रयोगदर्शनात् परिमाणविशेषमनादृत्य हेममात्र एवेति केचित् । उरोभूषणमिह पदकसंज्ञया लोके प्रसिद्धो वक्षोभूषणविशेषः । 'हरिचक्रेण तनास्य कण्ठे निष्कमिवार्पितम्' इति कालिदासप्रयोगः (कु. सं. २. ४६) । अत्र

पलशब्देन राजतं पलं विवक्षितम् । 'द्वे कृष्णले रूप्यमाषः' (या. स्मृ. १. १३. ३६४) इत्यादिरजतपरिमाणाधिकारे 'निष्कं सुवर्णाश्चत्वारः' (या. स्मृ. १. १३. ३६५) इति याज्ञवल्क्येनाभिधानात् । तत्रैव विज्ञानेश्वरेणापि 'पूर्वोक्ताश्चत्वारः सुवर्णा एको [7]राजतनिष्को भवति' इति व्याख्याततत्वाच्च । दीनारो देशान्तरे स्वनाम्नैव[8] प्रसिद्धः इति सर्वानन्दः (टी. स. पृ. ७७) । 'दीनारमाहतं हेमसप्तत्या कृष्णलैर्मतम्' इत्यपरे । अत्रार्थपञ्चके प्रत्येकं निष्कशब्दो वर्तते । अपिशब्दात् पलचतुर्थांशोऽपि । तथा च वैजयन्त्याम् (पृ. २३३, श्लो. ४५)—

> निष्कोऽस्त्री हेम्नि दीनारे [9]साष्टकर्षशते पले ।
> वक्षोविभूषणे कर्षे ।।

इति । निश्चयेन कायति स्तूयत[10] इति निष्कः । कः [11] (३. १. १३६) ।। १३ ।।

[1] उभयत्रापि Tv.　[2] 'इगुपधज्ञाप्रीकिरः कः'.　[3] शशाङ्कखण्डेति मु. ग्र. (पृ. ३९५).　[4] 'शल्कैरग्निमिन्धानः' इति तै. ब्रा. (१. २. १. १५).　[5] 'शल गतौ' Tv.　[6] केनचिदुक्तम् । तदनुपपन्नम् Tv.　[7] राजतो निष्कः इति मु. ग्र. (पृ. १११).　[8] स्वनामप्रसिद्धे इति मु. ग्र. (पृ. ७७).　[9] साष्टे इति मु. ग्र.　[10] काम्यत इति स्वामी (पृ. २७१).　[11] 'आतश्चोपसर्गे'.

(पा.) शीलान्वयावनूके द्वे । गतजन्मनि पुंलिङ्गः[1] । 'अनूकं तु कुले शीलेऽप्यनूको गतजन्मनि' इति विश्वः (पृ. ११, श्लो. ११४) ।। शल्के शकलवल्कले । वल्केऽपि स्याताम् । 'वल्कं तु वल्कले खण्डे शल्कं[2] शकलवल्कयोः' इति विश्वः (पृ. ६, श्लो. ४३) ।। साष्टे शते—निष्कोऽस्त्री ।। १३ ।।

[1] B_3, C_1 add एव.　[2] शल्कं वल्कलखण्डयोः C_1.

कल्कोऽस्त्री शमलैनसोः ।
दम्भेऽप्यथ पिनाकोऽस्त्री शूलशंकरधन्वनोः ।। १४ ।।

(वि.) विट्किट्टभदम्भेषु[1] कल्कः[2] शमलपापयोः ।। 27 ।।

शमलं विनीयाख्यं[3] द्रवचूर्णम् । पापं कलयतीति कल्कः । 'कल संख्याने' ।।

त्रिशूले पांसुवर्षे स्यात् पिनाको हरकार्मुके ।

अपि नाकतीति पिनाकः । 'अक अग[4] कुटिलायां गतौ' ।। १४ ।।

[1] °इभदन्तेषु इति भा. दी. (पृ. ४६०). [2] कल्कं K5. [3] हुडाख्यद्रव्यचूर्णम् K5. [4] J2 omits अग.

(विव.) कल्कोऽस्त्री—दम्भेऽपि । [1]कषायपानकादिद्रव्ये वस्त्रनिष्पीडनेन निःस्नाविते सति यद्वस्त्रलग्नमवशिष्टं [2]सद्रवमौषधचूर्णं शमलशब्देन विवक्षितम् । पुरीषं च । एनः पापम् । स्वभावतो दोषयुक्तस्य सभ्यवेषाभिनयो दम्भः । सर्वानन्दस्तु—मलेन पापेन सह वर्तत इति 'समलः पापाशयः' इति दन्त्यादिं पठित्वा व्याचष्ट (टी. स. पृ. ७७) । तथा च रुद्रः—'त्रिषु पापाशये कल्कोऽस्त्री विट् किट्टेभदम्भयोः' इति ।। कल्यते क्षिप्यते निरस्यत इति कल्कः । 'कल किल क्षेपे' । 'मुञ्जकल्कहलिषु' (३. १. ११७) इति निर्देशात् साधुः ।। अथ पिनाको—धन्वनोः । शूलम् आयुधविशेषः । साहचर्यात् तदपि शांकरमेवेति स्वामी[3] (पृ. २७२) ।। १४ ।।

[1] काषाय° Gm3. [2] सद्रस° Tv. [3] त्रिशूलं शांकरमेवात्र इति स्वामी; Tv adds °सुबोधिनीकारौ; पाति । 'पिनाकादयश्च' (उ. ४. १५) इति पातेराक इत्वं नुम् च इति भा. दी. (पृ. १७).

(पा.) कल्कोऽस्त्री—शंकरधन्वनोः । धन्वसाहचर्यात्[1] शूलमायुधविशेषः[2] । 'पिनाको हरकोदण्डे [3]पांसुवर्षत्रिशूलयोः' इति विश्वः (पृ. ९, श्लो. ८३) ।। १४ ।।

[1] सामानाधिकरण्यं स्यात् A1. [2] A1 omits विशेषः. [3] पांशुवर्ष° इति मु. ग्र.

धेनुका तु करेण्वां च मेघजाले च कालिका ।
कारिका यातनावृत्त्योः* कर्णिका कर्णभूषणे ।। १५ ।।
करिहस्ताङ्गुलौ पद्मबीजकोश्यां त्रिषूत्तरे ।

(वि.) करेणुगौर्योर्धेन्वां च कृपाण्यां धेनुका मता ।। 28 ।।

[1]वत्सो धयत्येनामिति धेनुः । 'धेट् पाने' । धेनुरेव धेनुका ।।

मेघवृन्दे श्यामिकायां योगिन्यां च मलीमसे ।
बुद्धाभिधान्यां धूमाल्यां कृष्णायां नववारिदे ।। 29 ।।

रोमालिवृश्चिकावल्योः सुरायां काकयोषिति ।
क्रमदेयद्रव्यमूल्ये [2]काकमूलीपटोलयोः ।। 30 ।।
[3]ज्वालामालाख्यभैषज्ये कालिका परिकीर्तिता ।

कालवर्णत्वात् कालिका ।।

क्रियाविवरणश्लोकशिल्पेषु नटयोषिति ।। 31 ।।
[4]नारकीवेदनायां च कारिकाशब्द उच्यते ।

क्रियत इति कारिका[5] ।।

क्रमुकादिजटांशे च [6]कुट्टिन्यां कर्णभूषणे ।। 32 ।।
पद्मकोश्यां हस्तिहस्ते मध्याङ्गुल्यां च कर्णिका ।

कृणाति स्त्रीमस्तकादि यया सा कर्णिका[7] ।। १५ ।।

[1] K3, K4 omit the derivation of धेनु. [2] काकमाची° J2. [3] चटामांसा° J2, K5. [4] नारके K3; नारक्यां K5. [5] J2 adds 'डुकृञ् करणे'. [6] कुट्टन्यां K6. [7] J2 adds मता. *कृत्योः इति पाठान्तरम्.

(विव.) धेनुका तु करेण्वां च। धयत्येनां वत्स इति धेनुका। 'धेट् पाने'। शेषे—'धेनुका त्वश्वयोषिति। भवान्यां च कृपाण्यां च प्रसूतायां पशौ गवि' इति। अश्वयोषिद् बडवा ।। मेघजाले च कालिका। मेघजालं मेघसंघः। कृष्णवर्णत्वात् कालिका। जानपदादिसूत्रेण (४. १. ४२) कालशब्दाद् [1]वर्णरूपार्थे ङीषि तदन्तादेव 'प्रातिपदिकस्य ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (परिभाषा ४. १. १) इति न्यायेन 'कालाच्च' (५. ४. ३३) इति स्वार्थिके कन्प्रत्यये 'केऽणः' (७. ४. १३) इति ह्रस्वे च कालिका। न च वाच्यं विप्रतिषेधात् तद्धितबलीयस्त्वम् इति ङीषं बाधित्वा तद्धित एव प्राप्नोतीति। 'ङ्याप्प्रातिपदिकात्' (४. १. १) इत्यत्र ङीप्ग्रहणसामर्थ्याद् ङ्यन्तादेव तद्धितोत्पत्त्युपपत्तेः। ङ्याप्प्रातिपदिकाद् इत्यत्र ङीप्ग्रहणं प्रत्याख्यातवतो महाभाष्यकारस्य मते तु कालशब्दाद् वर्णवचनाद् अर्शआद्यचि (५. २. १२७) द्रव्यवचनात् 'कालाच्च' (५. ४. ३३) इति स्वार्थिके कन्प्रत्यये सति ततः स्त्रीत्वविवक्षायां टापि 'प्रत्ययस्थात्...' (७. ३. ४४) इति इत्वे च कालिकाशब्दसिद्धिः[2]। *कालितरेत्यादौ तु ङीपोऽन्तरङ्गस्य बहिरङ्गेण तरपा सह नास्ति विप्रतिषेधः।

[3]परनित्यान्तरङ्गेति न्यायात् (परिभाषा १. ३. ११)। ततश्च ङीप्युत्पन्ने [4]लिङ्ग-विशिष्टादपि प्रातिपदिकात् प्रातिपदिकत्वनिबन्धनात् तद्धितोत्पत्तिरित्यलमेतावता। चशब्दार्थः शेषे—

'दोषे स्वर्णादिधातूनां कृष्णावृद्धिसुरासु च।
क्रमदेये वस्तुमूल्ये योगिन्यम्बिकयोरपि॥
[5]पटोलशाखारोमालीमांसीकाकीषु कालिका॥'

इति। धातुदोषः श्यामिकाख्यः[6]। कृष्णा कृष्णवर्णा काचित् मषीमृदादिका। ऋणग्रहणकाले धनिकाधमर्णसंप्रतिपत्त्या कृतकाले देया वृद्धिः कालिकेति स्मृतिषु प्रसिद्धा। सुरा मद्यम्। वस्तुनः क्रयकालेऽस्य पण्यस्य क्रयमेतावदियता कालेन दिनक्रमेण मासक्रमेण दास्यामीति क्रायिकेण संप्रतिपद्य देयं मूल्यम्। योगिनी चतुःषष्टिसंख्यासु योगिनीषु[7] कालिका नाम महाकालस्थाने प्रसिद्धा। अम्बिका पार्वती। रोमाली नाभिदेशादूर्ध्वस्था रोमराजिः। धूमालिरिति क्वचित्पाठः[8]। तत्र धूमरेखेत्यर्थः। मांसी जटामांसी। काकी काकस्त्री। काकमाची नाम गुल्मविशेष इति केचित्॥ कारिका यातनावृत्त्योः। यातना नरकदुःखम्। कारिका श्लोक-रूपेण कृता व्याख्यावृत्तिः। यथा—शाबरभाष्ये प्रथमपादस्य भट्टपादैः कृता। यथा वा आपस्तम्बीयकल्पसूत्रस्य त्रिकाण्डी। 'कॄ हिंसायाम्' 'डुकृञ् करणे'। क्रमेण धात्वर्थनिर्देशे ण्वुलि (वा. ३. ३. १०८) कारिका। शेषे—'कारिका नट-योषायां दिवाकीर्त्यादिशिल्पके' इति[9]। श्मश्रुकर्मचेलधावनादिरूपं शिल्पम्, दिवा-कीर्त्यादिशिल्पकरणं च कारिका॥ कर्णिका—बीजकोश्याम्। [10]कर्णिका तालपत्रे पूर्वमुक्ता (१, पृ. ४२८)। अङ्गुलिरग्रभागः। तत्र तु किरति जलमिति कर्णिका। 'कॄ विक्षेपे'। नप्रत्यये (उ. ३. १०) स्वार्थे कः (५. ४. ५)। पद्मबीजकोशी वराटकाख्या कर्णिकासदृशाकारत्वात् कर्णिका॥ १५॥

[1] वर्णवचनाद् अर्शआद्यचि Tv. [2] °निष्पत्तिः Gm1, Gm3. [3] 'परनित्यान्त-रङ्गापवादानामुत्तरोत्तरं बलीयः'. [4] 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'. [5] °रोमालि° B5, B6. [6] कालिकाख्यः TJ1, TJ2. [7] योगिनी कालिकानाम्न्येव Tv. [8] °पुस्तकपाठः B5, B6. [9] Tv adds विश्वप्रकाशेऽपि—कारिका नटयोषिति। कृतौ विवरणश्लोके यातनायां च कारिका। नापितादिकशिल्पेऽपि (पृ. १५, श्लो. १६०–२). [10] कर्णभूषणं तालपत्रम्। तत्र व्युत्पत्तिरुक्ता Tv. * घरूपेति ह्रस्वः.

(पा.) धेनुका तु करेण्वां च । [1]सद्यःसूतगवादिकेऽपि स्यात् ॥ मेघजाले च कालिका । [2]स्वर्णदोषे सुरायां च काल्यां कालीत्वे च स्यात् ॥ कारिका यातना-वृत्त्योः । वृत्तिर्नाम विवरणश्लोकः । [3]'वृत्तौ विवरणश्लोके यातनायां च कारिका । नापितादिकशिल्पेऽपि' इति विश्वः (पृ. १५, श्लो. १६०) ॥ कर्णिका—बीज-कोश्याम् । [4]पद्मबीजकोश्यां पुंलिङ्गश्च स्यात् । 'कर्णिका [5]कर्णिकश्चाथ पद्माक्षं पद्मकर्कटी' इति वैजयन्ती (पृ. १५७, श्लो. ४६) । अन्यत्र स्त्रीलिङ्ग एव । 'कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि । क्रमुकादिच्छटांशे च कर्णिका[5] कर्ण-भूषणे' इति विश्वः (पृ. १५, श्लो. १५७–८) ॥ १५ ॥

[1] A1 adds धेन्वामपि स्यात्. [2] A1 omits the two words. [3] कृतौ इति मु. ग्र. [4] C1 omits °बीज°. [5] कर्णिकम् इत्येव मु. ग्र.

वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः ॥ १६ ॥
स्याद् दाम्भिकः कौक्कुटिको यश्चादूरेरितेक्षणः ।
लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः ॥ १७ ॥
(भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम् ।
रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टकः ॥)

इति कान्तवर्गः

(वि.) मनोज्ञमुख्यदेवेषु वृन्दारक उदाहृतः ॥ 33 ॥

प्रशस्तं वृन्दमस्यास्तीति वृन्दारकः ॥

संख्यासंख्येयमुख्यान्यासहायेष्वेक उच्यते ।

स्वयमेव एतीत्येकः । 'इण् गतौ' ॥

[1]दाम्भिकोऽत्यन्तविक्षिप्तदृष्टौ कौक्कुटिकेऽपि च ॥ 34 ॥

दम्भः प्रयोजनमस्येति दाम्भिकः । कौक्कुटिको मायावी ॥

कार्याशक्ते स्वामिभावदर्शी लालाटिकः स्मृतः ।

कोपप्रसादचिह्नं प्रभुललाटं पश्यतीति लालाटिकः ॥

कटकः कङ्कणे शैलनितम्बे राष्ट्रकेऽपि च ॥ 35 ॥

कटतीति कटकः । 'कटे वर्षावरणयोः' ॥

द्रुमस्य [2]तीक्ष्णावयवे [3]सूच्यग्रक्षुद्रवैरिणोः ।
रोमाञ्चे परुषालापे कण्टकः परिकीर्तितः ॥ 36 ॥

कणत्यनेन [4]ताडित इति कण्टकः । 'कण शब्दे' ॥ १६-१७ ॥ ॥

इति कान्तवर्गः

[1] °अधिक° K_2, K_3, K_4; °अन्तिक° K_5. [2] सूक्ष्म° K_3, K_6. [3] सूच्यग्रे K_4, K_5. [4] तापितः K_2.

(विव.) वृन्दारकौ रूपिमुख्यौ । रूपी सुरूपः । मुख्यः श्रेष्ठः । प्रशस्तं वृन्दं स्वोपसर्जनीभूतमस्यास्तीति वृन्दारकः । 'शृङ्गवृन्दाभ्यामारकन् वक्तव्यः' (वा. ५. २. १२२) । लिङ्गत्रयेऽप्युदाहार्यम् । स्त्रीत्वविवक्षायां तु 'न यासयोः' (७.३.४५) इति सूत्रे 'वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानम्' (वा.७.३.४५) इति वचनादपि परतः इत्वप्रतिषेधेऽस्य वैकल्पिकत्वादत्र स्त्रीलिङ्गे वृन्दारका वृन्दारिकेति रूपद्वयमस्ति[1] । देवतापर्यायेषु प्रागुक्तः (१, पृ. ६) ॥ एके मुख्यान्य-केवलाः । मुख्ये यथा—सर्वसत्त्वैकबन्धुः । अन्यार्थे यथा—[2]इत्येके प्राहुः[3] । केवलः सहायरहितः । तत्र यथा—'एकोऽजयद् रिपुपुराणि हरः खरादीन्' इति[4] । एति गच्छति इत्येकः । 'इण् गतौ' । औणादिकः कन् (उ. ३. ४३) । शेषे—'एकः संख्येयभेदे स्यात्' इति । एको घटः[5] । इत्यादि ॥ स्याद् दाम्भिकः—ईक्षणः । दम्भः प्रयोजनमस्येति दाम्भिकः[6] । तदुक्तम्—

'मृषैव यायजूकादिवेषमालम्ब्य जीवति ।
आत्मस्तुतिपरो यश्च स हि दाम्भिक उच्यते ॥'

इति[7] । यश्च परिव्राजकादिर्गमनसमये कुक्कुटवत् चक्षुःसंयमनेन किंचित् किंचित् पुरोदेशं पश्यन् शनैर्गच्छति स अदूरेरितेक्षणः । तावुभौ कौक्कुटिकशब्देनोच्येते । 'मिथ्याचर्या कल्पना स्यात् कुक्कुटिः कुहना तथा' इति रत्नकोशे ।

कुक्कुटिं कुहनां पश्यतीति कौक्कुटिकः। 'संज्ञायां ललाटकुक्कुटचौ पश्यति' (४. ४. ४६) इति ठकि कौक्कुटिको दाम्भिकः। कुक्कुटवन्मन्दं मन्दं चरतीति कौक्कुटिको द्वितीयः। एष स्वाभाविकचेष्टायुक्तः, प्रथमस्तु प्रतारक इत्यनयोर्भेद इति सुभूतिचन्द्रः॥ लालाटिकः—कार्याक्षमश्च यः। भालं ललाटम्। प्रभोः कोपप्रसादाभिव्यञ्जकभ्रूकुटिरेखादिपरिज्ञानाय [8]भालं ललाटं यः पश्यति स लालाटिकः। भावदर्शीति पाठे भावोऽभिप्रायः, तदर्थमिति[9] ललाटमेव पश्यतीति लालाटिकः। 'संज्ञायां ललाटकुक्कुटचौ पश्यति' (४. ४. ४६) इति ठक्प्रत्ययः। यश्च स्वकीयमन्यदीयं वा कर्तुं न शक्नोति, किं तु 'यथा ललाटे लिखितं तत्तथा न तदन्यथा' इति सर्वदा स्वललाटमेव पश्यति, न तु क्वचिदप्युद्युङ्क्ते, सोऽपि लालाटिकः॥ 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम्'। भूभृतः पर्वतस्य नितम्बो मध्यभागः इत्येकमभिधेयम्, वलयः करभूषणं, चक्रं सैन्यम्। एषु कटकद्वयसारविच्चक्रं राष्ट्रम् इत्यपरे। यथा—आन्ध्रकटकं, कर्णाटककटकम् इति। सुभूतिचन्द्रसर्वानन्दौ तु—भूभृन्नितम्बेत्यादिकं श्लोकार्धं प्रक्षिप्तं मन्यमानौ न व्याचक्रतुः। अत एव त्रिषूत्तरे इत्यत्र कान्तवर्गसमाप्तिपर्यन्ताः शब्दाः वाच्यलिङ्गा इति व्याचक्रतुश्च। सुबोधिनीकारादयस्तु—पठित्वा व्याख्यातवन्तः। [10]'रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे[11] च कण्टकः'। कं सुखं टङ्कयति [12]बध्नातीति कण्टकः। 'टकि बन्धने'। एतदपि श्लोकार्धं प्रक्षिप्तमेव नामरसिंहीयमिति संप्रदायः॥ १६-१७॥

इति कान्तवर्गः

[1] Tv adds योषिद्वृन्दारका, कलत्रवृन्दारकम् इत्यादि। [2] एके आचार्याः Gm3, Tv. [3] Tj1, Tj2 add अन्य इत्यर्थः. [4] Tv adds 'चकितमनसः क्षुद्रस्यैकाकिनोऽपि कुतो भयम्' इति. [5] पटः B6. [6] 'प्रयोजनम्' (५. १. १०९) इति ठञ्; 'चरति' इति ठक् वा. [7] B5 adds इत्युक्तलक्षणः. [8] फालं Tj1. [9] तदर्थमिव Tj1. [10] सूच्यग्रे Tv. [11] रोमहर्षे Tv. [12] प्रतिबध्नाति Tj1.

(पा.) वृन्दारकौ रूपिमुख्यौ। त्रिषूत्तरे इत्यधिकारात् त्रिलिङ्गः। वृन्दारिका कन्या वृन्दारकं कुलमिति वरयितुर्भाग्यम्। एके मुख्यान्यकेवलाः। 'देवेष्वेको महादेवो देवानेकान्न मन्महे'॥ स्याद् दाम्भिकः—ईक्षणः। दाम्भिकौ दूरेरितेक्षणौ पुरुषौ कौक्कुटिकौ स्याताम्॥ लालाटिकः—अक्षमश्च यः। यः प्रभोर्भावदर्शी[1], भावजिज्ञासुः प्रभोः, कार्याक्षमः कार्यालसः स लालाटिकः स्यात्॥ १६-१७॥

अनुक्तम्—

कृपायामपि शूकः स्यादपयाने सृगालिका ।

अपयानं पलायनम् ।।

द्रावकस्तु विदग्धेऽपि मातुल्यामपि चाम्बिका ।।
वा द्रोण्यां कविवेकः स्यान्मृणालेऽपि च कोरकम् ।
कवाटकुटकेऽपि स्यात् [2]कूचिकाथ कनीनिका ।।
स्वल्पाङ्गुलौ चालिरुते वस्त्रभङ्गेऽपि चोर्मिका ।

स्वल्पाङ्गुलिः कनिष्ठिका । वस्त्रभङ्गः 'नेरिं' ।

करिण्यां चापि गणिका वन्धकी नर्तकी तथा ।।
स्याद् रत्नकङ्कणाङ्गारशकटचोरपि पुष्पकम् ।
भयानकस्तु शार्दूले सिंहिकातनयेऽपि च ।।

सिंहिकातनयो राहुः ।।

कौतुकं हस्तसूत्रे स्यान्नर्मण्यपि च विस्मये ।
भवेज्जलकरङ्कस्तु नारिकेलफलेऽम्बुदे ।।
लोचकस्त्वक्षितारे स्याद् भुवि रक्तांशुके जने ।
पुलको हस्तिकवले रोमाञ्चे सूक्ष्मजन्तुषु ।।
घोलको भग्नभाण्डे स्याद् भटानां च शिरस्त्रके ।
नालीकं स्यात् पद्मषण्डे पद्मे च विशिखे पुमान् ।।
[3]नालिको ग्रामकूटे स्याद् विधवायां तु जालिका ।
रुण्डिका दूतिकायां स्याद् रणभूमौ च रुण्डिका ।।
[4]रक्तको रक्तवस्त्रे स्यादनुरक्तेऽपि रक्तकः ।
अनुरागे स्त्रीजिते स्यात् काकरूकश्च निर्धने ।।
रुचकौ भूषणरवौ खड्गिखड्गौ करालिकौ ।
खनकौ चोरवित्तज्ञौ कर्कौ [5]कुलिरदर्पणौ ।।

भवेद् गुणनिका नृत्ये पाठस्यावर्तनेऽपि च ।
स्यात्तु घर्घरिका क्षुद्रघण्टिकाभृष्टधान्ययोः ॥
खद्योते चिलिमिलिका कण्ठिका विद्युति स्रजि ।

कण्ठिका कण्ठमाला ॥

इति कान्ताः

[1] °भालदर्शी B3.　[2] कुञ्चिका 'कुञ्चकोल' A1.　[3] जालिकं, ग्रामकूटो ग्रामग्रन्थिः A1.　[4] रक्तकम् C1.　[5] कुलक° A1.

अथ खान्तवर्गः—

मयूखस्त्विट्करज्वालास्वलिबाणौ शिलीमुखौ ।
शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्रीन्द्रियेऽपि खम् ॥ १८ ॥
घृणिज्वाले अपि शिखे ।

इति खान्ताः

(वि.)　रश्मिकान्त्योर्मयूखः स्याज्ज्वालायां ज्वलनस्य च ।

मिनोत्यन्धकारमिति मयूखः । 'डुमिञ् प्रक्षेपणे' ॥

मधुव्रते [1]रणे बाणे शिलीमुख उदाहृतः ॥ 37 ॥

शिली शल्यं मुखे यस्य शिलीमुखः ॥

शङ्खः कम्बौ ललाटास्थिनिधिसंख्यौषधेष्वपि[2] ।

शं सुखं खनति [3]जनयतीति शङ्खः । 'खनु अवदारणे'[4] ।

इन्द्रियस्वर्गनगरसुखक्षेत्राम्बरेषु च ॥ 38 ॥
संवेदने शून्यबिन्दौ खशब्दः परिकीर्तितः[5] ।

खन्यत इति खम् ।

ज्वालाकिरणचूडासु शिफायां च शिखा स्मृता ।। 39 ।।

शाखतीति शिखा । 'शाखृ व्याप्तौ'। । १८ ।।

इति खान्तवर्गः[6]

[1] शरे K5, K6. [2] निधौ नाम्नचौषधेऽपि च J2, K5. [3] K4 omits जनयति. [4] K2, K4, K6 add जननार्थे च. [5] परिभाषितः K2, K3, K4. [6] K3, K5 ad dखान्तशब्दसंख्या—५.

(विव.) मयूख—ज्वालासु । त्विट् कान्तिमात्रम् । करः किरणः । ज्वाला वह्निशिखा ।। अलिबाणौ शिलीमुखौ । अलिः भ्रमरः[1] ।। शङ्खे—न स्त्री । निधिः शङ्खाख्यो निधिविशेषः । ललाटास्थि ललाटस्य प्रान्तभागस्थमस्थि । 'ललाटास्थिनिस्तोदशङ्खयोस्तथा' इति वाग्भटः । रूपभेदादर्थद्वयेऽपि पुंलिङ्गः । कम्बुवाचकश्चेत् पुंनपुंसकलिङ्गः । शं सुखं खनति [2]जनयतीति शङ्खः । 'खनु अवदारणे' । डप्रत्ययः (३. २. १०१)[3] ।। इन्द्रियेऽपि खम् । इन्द्रियं चक्षुरादिकं खन्यत इति खम् । व्याडिश्च—'खं क्लीबे शून्यबिन्दौ[4] च स्वर्गाकाशेन्द्रियेषु च' इति । 'तस्मिन् गते [5]खं सुकृतोपपन्नम्' इति स्वर्गे प्रयोगो रघुवंशे (१८. २२) ।। घृणिज्वाले अपि शिखे । घृणिः मरीचिः । ज्वाला वह्निसंबन्धिनी । 'कचबन्धे[6] शिफारश्म्योश्चूडाग्निज्वालयोः शिखा' इत्यजयः ।। १८ ।।

इति खान्तवर्गः[7]

[1] Tj1 adds बाणः सायकः. [2] जन्यते Tj1. [3] 'अन्येष्वपि दृश्यते'. [4] °बिम्बे Tv. [5] द्यां सुकृतोपलब्धाम्, स्वः सुकृतोपलब्धम् इति च मु. ग्र. [6] शिखा° B6, Gm1. [7] इति खान्ताः शब्दाः Tj1.

(पा.) मयूख—ज्वालासु । त्विट् प्रभा । करः [1]किरणः ।। अलिबाणौ— इन्द्रियेऽपि [2]खम् । 'खमिन्द्रियसुखे स्वर्गे शून्ये बिन्दौ विहायसि' इति विश्वः (पृ. २२, श्लो. १) ।। घृणि—शिखे । 'शिखा ज्वालाकेकिमौल्योः शिखा[3] शाखाग्रमौलिषु' इति वैजयन्ती (पृ. २२३, श्लो. ४०) ।। अनुक्तम्—

उपलेपे च गोमुखम् ।
मुख्योपायद्वार्ष्‌ मुखं सुखमानन्दतोययोः ।
नपुंसकं तु पाताले [4]पुंस्यौर्वे वडवामुखः ।।
त्रिशिखं [5]शेखरे शूले प्रेङ्खाश्वगतिनृत्तयोः ।। १८ ।।

इति खान्ताः

[1] B3 adds ज्वाला वह्निशिखा. [2] B3, C1 add अपिशब्दात्. [3] शिफा इति मु. ग्र. [4] पुंसीशे C1. [5] शिखरे A1.

अथ गान्तवर्गः—

शैलवृक्षौ नगावगौ ।
आशुगौ वायुविशिखौ शरार्कविहगाः खगाः ।। १९ ।।

(वि.) गिरिद्रुमार्कसर्पेषु नगागौ परिभाषितौ[1] ।
न गच्छतीति नगः । [2]अगश्च । [3]'गम्लृ सृप्लृ गतौ' ।।
जङ्घाले मारुते बाणेऽप्याशुगः परिकीर्तितः ।। 40 ।।
आशु गच्छतीत्याशुगः ।।
बाणार्कपक्षिदेवेषु ग्रहेषु च [4]खगो मतः ।
खे गच्छतीति खगः ।। १९ ।।

[1] परिकीर्तितौ J2, K6. [2] K4 omits. [3] K5 omits सृप्लृ. [4] खगा मताः K5.

(विव.) शैलवृक्षौ नगावगौ । अगशब्दो नगशब्दश्च प्रत्येकं पर्वते पादपे च वर्तते । न गच्छतीति नगः[1] । 'नगोऽप्राणिष्वन्यतरस्याम्' (६. ३. ७७) इति विकल्पेन नञः प्रकृतिभावः । तदभावपक्षे नलोपे सत्यगः । 'अगो भुजङ्गे शैले च वृक्षभास्करयोरपि' इति प्रतापः । आशुगौ वायुविशिखौ । विशिखो बाणः । जङ्घालेऽप्याशुगशब्दः । [2]आशु गच्छति । डः (वा. ३. २. ४८) ।। शरार्कविहगाः खगाः । शरो बाणः । विहगः पक्षिमात्रम् । 'खगो विहङ्गशरयोर्ग्रहसूर्यामरेष्वपि' इति प्रतापः ।। १९ ।।

[1] Tv adds 'गम्लृ गतौ', 'डप्रकरणेऽन्येष्वपि दृश्यते' (वा. ३. २. ४८). [2] B5, Gm3 omit the derivation.

(पा.) शैलवृक्षौ नगावगौ। [1]शैलवृक्षौ नगौ अगौ च स्याताम्। आशुगौ—खगाः। 'पतङ्गः शलभे शालौ मार्जारेऽग्नौ[2] रवौ खगे' इति वैजयन्ती (पृ. २४२, श्लो. ४०) ॥ १९ ॥

[1] A1 omits शैलवृक्षौ. [2] अर्के खगे शरे B3, C1.

पतङ्गौ पक्षिसूर्यौ च पूगः क्रमुकवृन्दयोः।
पशवोऽपि मृगा वेगः प्रवाहजवयोरपि ॥ २० ॥

(वि.) दिवाकरे [1]शालिभेदे [2]विशेषे विहगस्य च ॥ 41 ॥
पारदे शलभे चैव पतङ्गः परिकीर्तितः।

पततीति पतङ्गः। 'पत्लृ गतौ' ॥

क्रमुकाख्यद्रुमे वृन्दे पूगशब्दः प्रकीर्तितः ॥ 42 ॥

पुनातीति पूगः। 'पूञ् पवने' ॥

पशौ नक्षत्रभेदे च [3]हरिणे कुञ्जरान्तरे।
मृगयायां च याच्ञायां मृगशब्दोऽभिधीयते ॥ 43 ॥

मृग्यत इति मृगः। 'मृग अन्वेषणे' ॥

बले नदीप्रवाहे च महाकालफलेऽपि च।
विण्मूत्रादिप्रवृत्तौ स्याद् वेगः शृङ्गारभावने[4] ॥ 44 ॥

विज्यत[5] इति वेगः। 'ओविजी भयचलनयोः' ॥ २० ॥

[1] शारिभेदे K5. [2] निःशेषे J2. [3] कुञ्जरे हरिणेऽपि च J2. [4] °भावजे J2; संस्कारभेदके K5. [5] वीयते, 'वी गत्यादिषु' K5.

(विव.) पतङ्गौ पक्षिसूर्यौ च। पक्षी शलभाख्यः प्रागुक्तः (१,पृ. ३५१)। पततीति पतङ्गः[1]। शेषे—'शालिभेदे पक्षिमात्रे पतङ्गः पारदेऽपि च' इति ॥

पूगः क्रमुकवृन्दयोः । इह क्रमुकशब्देन [2]ब्रह्मदारु गुवाकश्चेत्युभयं विवक्षितं वनौषधिवर्गे (पृ. २४०, ३२२), तदुभयपर्यायेषु क्रमुकपूगशब्दयोरपि[3] पाठात् । एकजातीयानामेककर्मोपजीविनां समूह एव पूगशब्दस्य मुख्योऽर्थः । 'नृपेणाधिकृताः पूगाः श्रेणयोऽथ [4]कुलानि च' इत्यादिषु[5] च (या. स्मृ. २. २. ३०) प्रसिद्धः । समूहमात्रे तूपचारात् प्रयोगः । फले तु क्लीबम् ।। पशवोऽपि मृगाः । पशवः गोमहिष्यादयः । अपिशब्दात् सिंहप्रभृतयश्च सिंहादिवर्गे मृगशब्देनोक्ताः[6] (पृ. ३३४) । तद्विशेषः कुरङ्गः । तथा च प्रतापः—'मृगो नक्षत्रभेदे स्यात् कुरङ्गे कुञ्जरान्तरे । मृगव्याघ्यापशुषु' इति । नक्षत्रभेदो मृगशीर्षाख्यः । कुञ्जरान्तरं च गजविशेषः । तदुक्तम्—

'भद्रो [7]मन्द्रो मृगश्चेति विज्ञेयास्त्रिविधा गजाः[8] ।
वनप्रचारसारूप्यसत्त्वभेदविनिश्चिताः ।।'

इति ।। वेगः प्रवाहजवयोरपि । विजते चलत्यनेनेति वेगः । 'ओविजी भयचलनयोः' । करणे घञ् । कुत्वं [9]च (७. ३. ५२) । प्रवाहे यथा—'नदी वेगेन शुध्यति' (मनु. ५. १०८) । शेषे यथा—'वेगो महाकालफले विण्मूत्रादिविनिर्गमे' इति । महाकालफलः किंपाकसंज्ञो वृक्षविशेषः । [10]'वेगान्न धारयेद् वातविण्मूत्रक्षवतृट्क्षुधाः' इति विष्ठादेर्बहिःप्रवृत्तौ ।। २० ।।

[1] 'पतेरङ्गच् पक्षिणि' (उ. १. १२४). [2] ब्रह्मदारु पूगश्च Tv. [3] Tj1 adds उभयोः. [4] धनिकुलानि Tv. [5] Tj1 adds स्थलेषु. [6] 'इत्यादयो मृगेन्द्राद्याः गवाद्याः पशुजातयः' इत्येव मूले (पृ. ३३४). [7] मन्दः B5, B6. [8] First hemistich quoted in Apte's Dict., p. 1284. Attributed to *Mātaṅgalīlā* by Nīlakaṇṭha's Comm. on *Rām.* 1. 6. 25. [9] 'चजोः कु घिण्यतोः'. [10] 'न वेगान् धारयेद् धीमान्' इति चरकसंहितायाम् अ. ७, श्लो. १.

(पा.) पतङ्गौ—मृगाः । पशवः सिंहादयः । 'गवेषणायां सिंहादौ सौम्यर्क्षे हरिणे मृगः' इति रुद्रः । वेगः प्रवाहजवयोरपि ।। २० ।।

परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि ।
गजेऽपि नागमातङ्गावपाङ्गस्तिलकेऽपि च ।। २१ ।।

(वि.) चन्दने पुष्परजसि [1]धूलिस्नानीयचूर्णयोः ।
उपरागेऽस्तशैले च [2]परागः परिकथ्यते ॥ 45 ॥

परागच्छतीति परागः । 'गम्लृ गतौ' ॥

नागकेसरपुंनागनागदन्तगजेषु च ।
[3]क्रूराचारे पन्नगे च वारिदे वायुसेनयोः[4] ॥ 46 ॥
रङ्गे स्त्रीकरणे चैव नागशब्दोऽभिधीयते ।

स्त्रीकरणं नाम [5]रतिकालक्रियमाणनागवन्धः[6] । नाग इव क्रूरो नागः ॥

दन्तावले च चण्डाले मातङ्गः समुदाहृतः ॥ 47 ॥

मतङ्गात् जायत इति मातङ्गः ॥

अपाङ्गस्तिलके च स्यान्नेत्रप्रान्ताङ्गहीनयोः ।

अपगतमङ्गं यस्येत्यपाङ्गः ॥ २१ ॥

[1] धूली° J2. [2] परागस्त्वभिधीयते K5. [3] क्रूराकारे J2. [4] °सीसयोः J2.
[5] रतिकाले K4, K5. [6] °क्रियमाणः K4.

(विव.) परागः—रजस्यपि । कौसुम इति रेणुविशेषणम् । पुष्पप्रभवं रज इत्यर्थः । स्नानकाले शरीरोद्वर्तनार्थं सुगन्धि चूर्णं स्नानीयम् । आदिशब्देन पटवासकुन्तलवासकादिकं गृह्यते । रजःशब्देन रेणुमात्रं विवक्षितम् ॥ गजेऽपि नागमातङ्गौ । नागो मातङ्गश्चेति शब्दद्वयमत्र प्रतिपाद्यम् । तत्र नागशब्दस्य अपिशब्दसूचितोऽर्थः[1] शेषे—

'नागकेसरपुंनागनागदन्तेषु पन्नगे ।
क्रूराचारे च मेघे च वायौ नागः पुमान् भवेत् ॥
नागं स्त्रीकरणे रङ्गसीसयोः स्त्री तु योषिति ।'

इति । नागकेसरश्चाम्पेयः । पुंनागो देववल्लभः । नागदन्तो निर्यूहाख्यः । एषु त्रिष्वर्थेषु [2]नामैकदेशन्यायेन नागशब्दो वर्तते । पन्नगः काद्रवेयः प्रागुक्तः (पृ. १४८) । उपमानात् क्रूरकर्मणि । अगो गमनरहितो न भवतीति व्युत्पत्त्या वायुमेघयोः । एष्वर्थेषु पुंलिङ्गः । स्त्रीकरणं नाम सुरतसमये स्त्रीपुंसयोरवयवसंश्लेषविशेषः[3]

नागबन्धाख्यम्। रङ्गं त्रपु। सीसं प्रसिद्धम्। अस्मिन्नर्थत्रये रूपभेदाद् नपुंसकम्। योषिच्छब्देन तद्विशेषो विवक्षितः। गजजातीयसर्पजातीयवृत्तौ[4] वर्तमानश्चेत् स्त्रीलिङ्गः। तत्र जानपदादिसूत्रेण (४.१.४२) नागी [5]स्थौल्यार्थी। 'जातेरस्त्री...' (४.१.६३) इति ङीषि नागी। स्थूला गजी [6]गजयोषिद्वेत्यर्थः। मातङ्गशब्दस्तु चण्डाले प्रागुक्तः (पृ.६३१)॥ अपाङ्गस्तिलकेऽपि च। तिलकः तमालपत्रम् (१,पृ.४४०)। अपि शब्दाद् नेत्रान्ते। अपगतोऽङ्गाद् अपाङ्गः। अपजनपूर्वाङ्गपदे पुंलिङ्गे। [7]'नित्यमिमनिजन्ताश्च' इति लिङ्गानुशासनवचनात् पुंलिङ्गत्वम्। अङ्गहीने तु वाच्यलिङ्गः॥ २१॥

[1] °सूचनार्थः Tj1. [2] Tj1 omits two lines. [3] अवयवावयव° Tj1. [4] स्त्रीव्यक्तौ for वृत्तौ Tj1. [5] स्थौल्यार्थे Tv. [6] नागयोषिद्वा B5. [7] 'इमनन्तो यथाणिमा' इति हर्षवर्धनकृतलिङ्गानुशासने (पृ. २७, श्लो. ३१).

(पा.) परागः—रजस्यपि। स्नानीयं गन्धचूर्णम्[1]। गजेऽपि नागमातङ्गौ। [2]'ग्राहाभ्राहिगजा नागाः' इति वैजयन्ती (पृ. २१६, श्लो. ३०)। 'पार्वत्यामपि मातङ्गी' इति वैजयन्ती (पृ. २७२, श्लो. १४)। अपाङ्गस्तिलकेऽपि च। अपिशब्देन[3] नेत्रान्तेऽपि स्यात्[4]॥ २१॥

[1] °चूर्णः A1. [2] ग्राहाद्रचहि° A1. [3] °शब्दात् C1. [4] C1 omits अपि स्यात्.

सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु।
योगः संनहनोपायध्यानसंगतियुक्तिषु॥ २२॥

(वि.) स्वभावे [1]निश्चये मोक्षे सृष्टौ त्यागात्मनोरपि॥ 48॥
अध्याये च तथोत्साहे सर्गशब्दोऽभिधीयते[2]।

सृज्यत इति सर्गः। 'सृज विसर्गे'॥

[3]अपूर्ववस्तुसंप्राप्तावुपायध्यानयुक्तिषु॥ 49॥
वपुःस्थैर्ये संनहने[4] द्रव्ये विस्रम्भघातिनि।
[5]कार्मणौषधयोर्योगो विष्कम्भादौ च संगतौ॥ 50॥

युज्यत इति योगः। 'युजिर् योगे'॥ २२॥

[1] निश्चले J2. [2] शब्दः प्रकीर्तितः J2. [3] अपूर्ववसु° K4. [4] संहनने K6. [5] कर्मण्य° K5, K6.

(विव.) सर्गः—सृष्टिषु। अनागन्तुको धर्मः स्वभावः। उत्पत्तिसिद्ध इत्यर्थः। यथा जलस्य [1]शैत्यं निसर्गः। निर्मोक्षः त्यागः। यथा बाणविसर्गः। निश्चयोऽध्यवसायः। यथा—'गृहाण शस्त्रं यदि सर्ग एष ते' (रघु. ३. ५१) इति। अध्यायो नाम रामायणादिमहाकाव्येषु कथानां विश्रान्तिस्थानम्। यथा—'सर्गबन्धो महाकाव्यम्' (काव्यादर्श १. १४)। सृष्टिरुत्पादनम्।यथा—'सर्गस्थित्यन्तकारणम्'[2] इति। 'सृज विसर्गे' इति धातोर्यथायथं कर्मणि करणे भावे च घञि सर्गः ।। योगः—युक्तिषु। महाकर्मसु संभृतसंभारस्य तदेकतानत्वं संनहनम्। यथा—'सेतुबन्धे कृतोद्योगः' इति। संनहनं कवचादिकमिति केचित्। सामदानादिरुपायः। यथा—'तन्त्रावापविदा[3] योगैर्मण्डलान्यधितिष्ठता' इति माघकाव्ये (शिशु. २. ८८)। ध्यानं चित्तवृत्तिनिरोधः। यथा—'योगेनान्ते तनुत्यजाम्' इति रघुवंशे (१. ८)। संगतिः संश्लेषः। यथा—रत्नवियोगः काञ्चनस्य इति। युक्तिः योग्यता, यथार्हत्वमित्यर्थः। यथा—यथायोगमितरेषाम् इति। 'युजिर् योगे' इति धातोर्यथायथं भावे कर्मणि करणे च घञि योगः। शेषे—'योगः सूत्रे द्रव्यलाभे विष्कम्भादौ च भेषजे' इति। पाणिन्यादीनां सूत्रे यथा योगविभागादिष्टसिद्धिः इति। अलब्धद्रव्यलाभे यथा—'उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये' (या. स्मृ. १. ५. १००)। 'विष्कम्भः प्रीतिरायुष्मान्' इत्यादयः सप्तविंशतिर्योगाः ज्योतिःशास्त्रे प्रसिद्धाः। भेषजमौषधम्। यथा—गुग्गुलुयोगः, पिप्पल्यादियोगः ।। २२ ।।

[1] नैल्यम् Tv. [2] 'प्रलयस्थितिसर्गाणाम् एकः कारणतां गतः' इति कुमारसंभवे (२. ६). [3] °विदां Tv.

(पा.) सर्गः—सृष्टिषु। निर्मोक्षस्त्यागः। निश्चयो निर्णयः। 'गृहाण शस्त्रं यदि सर्ग एष ते' (रघु. ३. ५१)। अध्यायः काव्यपरिच्छेदः। सृष्टिर्निर्माणम् ।। योगः—युक्तिषु। संनहनं कवचम्। [1]'जागरः कंकटो[2] योगः संनाहः स्यादुरच्छदः' इति रत्नकोशः। उपायः सामादिः[3]। [4]संगतिः सङ्गः। अपूर्वसंप्राप्तेरन्यः। 'योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु' इति विश्वः[5] (पृ. २४, श्लो. ११)। युक्तिर्युजिधात्वर्थः, नियोगोपयोगादिः ।। २२ ।।

[1] जगरः A1, C1. [2] कंकपः C1. [3] समाधिः A1. [4] C1 omits two words. [5] रुद्रः B3, C1.

भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः ।
चातके हरिणे पुंसि सारङ्गः शबले त्रिषु ॥ २३ ॥

(वि.) सुखे [1]वेश्याभृतौ रिक्थे फणिनः फणदेहयोः ।
रक्षणेऽभ्यवहारे च [2]वर्तने भोग उच्यते ॥ 51 ॥

भुज्यत इति भोगः । [3]'भुज पालनाभ्यवहारयोः' ॥

सारङ्गो हरिणे भृङ्गे चातके शवले गजे ।

सारं गच्छतीति सारङ्गः[4] ॥ २३ ॥

[1] वश्या° K5, K6. [2] चेतने J2. [3] K2, K6 omit. [4] J2 adds 'गम्लृ सृप्लृ गतौ'.

(विव.) भोगः—काययोः । सुखं सुखानुभवः । यथा—'भोगी परिजनैः सह' इति । वश्यस्त्रीणां रिरंसुभिः देयं धनादिमूल्यं स्त्र्यादिभृतिः । यथा—'भोगं तु म आचक्ष्व [1]यस्मादिह स्त्रियो भोगमेव हारयन्ते' इति । आदिशब्देन स्वकीयधान्यादिप्रापणार्थं परकीयाणां घोटकबलीवर्दादीनाम् अध्वयोजनानुसारेण कल्पितं मूल्यं गृह्यते । 'भुज परिपालनाभ्यवहारयोः' इति धातोः भावादौ घञि भोगः । शेषे—'कौटिल्ये पालने च स्याद् [2]दाने च द्रविणेऽपि च' इति । 'भुजो कौटिल्ये' इति धातोः निष्पन्नस्य कौटिल्यमर्थः ॥ चातके—शबले त्रिषु । चातकः पक्षिविशेषः प्रागुक्तः (पृ. ३४०) । हरिणः कुरङ्गः । शबलः कर्बुरवर्णः । शेषे—'हस्तिभृङ्गौ च सारङ्गौ' इति । विश्वप्रकाशेऽपि—'सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे' (पृ. २७, श्लो. ४६) इति । सजातीयैररम् अत्यर्थं गच्छतीति सारङ्गः (वा. ३. २. ३८)[3] । साराणि श्रेष्ठानि अङ्गान्यवयवानि अस्येति वा सारङ्गः । शकन्ध्वादित्वात् पररूपत्वम्[4] (वा. ६. १. ९४) ॥ २३ ॥

[1] तस्मादिह B5, B6. [2] स्यादादाने (?). [3] 'खच्च डिद्वा वक्तव्यः'. [4] शकन्ध्वादिषु पररूपं वक्तव्यम्.

(पा.) भोगः—काययोः। स्त्र्यादिभृतिर्नाम [1]लञ्जिकादिवेतनम्। [2]'चिरड्डुपुमुदलैनदि'॥ चातके—शबले त्रिषु। भृङ्गकुरङ्गगजेषु च पुंलिङ्गः। 'सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे' इति विश्वः (पृ. २७, श्लो. ४९) ॥ २३ ॥

[1] लञ्जिकायाः एकवेलासंभोगार्थं दीयमानवस्त्रदानादि A1. [2] B3 omits.

कपौ च प्लवगः शापे त्वभिषङ्गः पराभवे ।
यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु ॥ २४ ॥

(वि.) शाखामृगे च मण्डूके प्लवगः सूर्यसारथौ ॥ 52 ॥

[1]प्लवैरुल्लङ्घनैर्गच्छतीति प्लवगः[2] ॥

पराभवे चाभिषङ्गस्तथैव क्लेशशापयोः[3] ।

अभिषज्यत इत्यभिषङ्गः। 'षञ्ज सङ्गे' ॥

युगो रथाद्यवयवे युगं हस्तचतुष्टये ॥ 53 ॥
कृतत्रेतादिके चैव युग्मे वृद्धयाख्यभेषजे ।

युज्यत इति युगः। 'युजिर् योगे'[4] ॥ २४ ॥

[1] J2 omits derivation. [2] K3 adds 'गम्लृ गतौ'. [3] °तापयोः J2. [4] J2 omits.

(विव.) कपौ च प्लवगः। प्लवैरुल्लङ्घनैर्गच्छतीति प्लवगः[1]। चशब्दाद् मण्डूके। यस्तु प्लवेनोडुपेन गच्छति, यश्च उत्प्लुत्य गच्छति सोऽपि प्लवगः॥ शापे—पराभवे। अपकारिणामनिष्टाशंसनं शापः। मिथ्याभिशंसनं वा। तिरस्कारः पराभवः। दोषाणामभिषञ्जनम् अभिषङ्गः। 'षञ्ज सङ्गे'। घञ् (३. ३. १८, ८. ३. ६५)[2]। 'आक्रोशे शपथेऽपि स्यादभिषङ्गः पराभवः' इति रुद्रः॥ यानाद्यङ्गे—कृतादिषु। यानं रथः। आदिशब्देन शकटलाङ्गलादेः ग्रहणम्। तस्याङ्गे उपकरणे तुरगबलीवर्दादिस्कन्धनिधेये काष्ठविशेष इत्यर्थः। तत्र युगशब्दः पुंलिङ्गः। पाणिपादादिवस्तुद्वयसमुदायरूपे युग्मम्। कृतत्रेताद्वापरकलिषु वर्तमानो नपुंसकलिङ्गः। युगशब्दः प्रागेव व्युत्पादितः[3] (पृ. ३५८)। शेषे—'युगं हस्तचतुष्के स्यादौषधे वर्षपञ्चके' इति। 'युगेन पतितं त्यजेत्' इति हस्तचतुष्टये

प्रयोगः। औषधे वृद्धिसंज्ञे। 'इमे हि षष्टिः प्रभवादयोऽब्दाः युगानि हि द्वादश पञ्चकं च' इति ज्योतिःशास्त्रप्रसिद्धो वर्षपञ्चके युगशब्दः ॥ २४ ॥

[1] 'डप्रकरणेऽन्येष्वपि दृश्यते' (वा. ३. २. ४८) इति डः. [2] 'उपसर्गात् सुनोति...' इत्यादिना षः. [3] युजिर् योगे। घञ्। कुत्वम् (७. ३. ५२)। 'तद्वहति रथयुग...' इति निपातनान्न गुणः.

(पा.) कपौ च प्लवगः। 'प्लवगो वानरे भेके सारथौ चोष्णदीधितेः' इति विश्वः (पृ. २६, श्लो. २८)। शापे—पराभवे। शापशब्देन शपथाक्रोशयोरेव ग्रहणम्। 'आक्रोशे शपथेऽपि स्यादभिषङ्गः पराभवे' इति [1]वैजयन्ती (पृ. २६५, श्लो. १०) ॥ यानाद्यङ्गे—कृतादिषु। हस्तचतुष्टयेऽपि नपुंसकम्[2]। 'युगं हस्तचतुष्केऽपि रथसीराङ्गयोर्युगः' इति विश्वः[3] (पृ. २४, श्लो. ४) ॥ ॥ २४ ॥

[1] इति विश्वः B3; मुद्रितवैजयन्त्यां 'अभिषङ्गस्त्वभिभवे संग आक्रोशनेऽपि च' इति, विश्वप्रकाशिकायां 'अभिषङ्गस्तु शपथे स्यादाक्रोशे पराभवे' इति च दृश्यते (पृ. २८, श्लो. ५६). [2] नपुंसकः A1. [3] बोम्मगण्टीयविवरणे 'इति रुद्रः' इति दृश्यते.

स्वर्गेषुपशुवाग्वज्रदिग्नेत्रघृणिभूजले ।
लक्ष्यदृष्टया स्त्रियां पुंसि गौर्लिङ्गं चिह्नशेफसोः ॥ २५ ॥

(वि.) पशुदिग्वज्रनेत्रेषु स्वर्गबाणजलेषु च ॥ 54 ॥
मेदिन्यां किरणे वाचि गोशब्दः परिकीर्तितः[1] ।

गोशब्दस्य लक्ष्यदृष्टया यथार्हं लिङ्गमुन्नेयम्। गच्छतीति गौः।

सांख्योक्तप्रकृतौ चिह्ने तथा शेफानुमानयोः ॥ 55 ॥
शिवमूर्तिविशेषे च लिङ्गशब्दोऽभिधीयते[2] ।

लिङ्गति लयं गच्छत्यस्मिन् [3]जगदिति लिङ्गम्[4] ॥ २५ ॥

[1] परिकथ्यते J2. [2] लिङ्गं समभिधीयते J2, K4, K5. [3] K6 omits जगत्. [4] K4 adds 'लिगि गतौ'.

(विव.) स्वर्गेषु—पुंसि गौः। इषुः बाणः। पशुः गोत्वजात्याक्रान्ता व्यक्तिः स्त्री च पुमांश्च। वज्रः कुलिशः। घृणिः रश्मिः। [1]गोशब्दः स्वर्गादिष्वर्थेषु वर्तमानो लक्ष्यदृष्टचा प्रयोगानुसारेणार्थविशेषेषु स्त्रीलिङ्गः पुंलिङ्गश्च विज्ञेय इत्यर्थः। अत्र लिङ्गव्यवस्था सर्वानन्दसुभूतिचन्द्रोदाहृतत्रिकाण्डशेषाभिधाने (पृ. २४, श्लो. ६११–२) दर्शिता। तथा हि—

'स्वर्गे रश्मौ च वज्रे च बलीवर्दे च गौः पुमान्।
स्त्री बाणरोहिणीदृग्दिग्वाग्भूमिष्वप्सु[2] भूम्नि च[3] ॥'

इति। स्वर्गाद्यर्थचतुष्टये पुंलिङ्गः। बाणाद्यर्थेषु षट्सु स्त्रीलिङ्गः। अप्सु जले स्त्रीलिङ्गो बहुवचनान्तश्च भवतीत्यर्थः॥ लिङ्गं चिह्नशेफसोः। [4]चिह्नम् अनुमिति-साधनम्। यथा—धूमोऽग्नेर्लिङ्गम् इति। असाधारणधर्ममात्रं च चिह्नम्। यथा—'स वर्णिलिङ्गी विदितः समाययौ' इति (किरा. १. १)। 'यद्विष्णोर्लिङ्गधारणम्' इति च। शेफो मेहनम्। यथा—'अन्तर्लिङ्गं न शोधयेत्', 'एका लिङ्गे गुदे तिस्रः' इति (मनु. ५. १३६)। लिङ्गति ज्ञापयति गूढमर्थं गमयतीति लिङ्गम्। 'लिगि गतौ'। घञ्। सांख्योक्तप्रकृतौ च लिङ्गस्य व्यवहारः। शिवमूर्तिविशेषश्च। [5]'बाणलिङ्गे शिवः साक्षात्' इति॥ २५॥

[1] गच्छतीति गौः। 'गमेर्डोः' (उ. २. ६८). [2] मुद्रितग्रन्थे °दृग्धीदिग्वाग्भूषु इति दृश्यते. [3] ककुप्सु च (टी. स. पृ.८१). [4] लिङ्गम् Tv. [5] नर्मदानद्युद्भवं धवलशिवलिङ्गम्.

(पा.) स्वर्गेषु—चिह्नशेफसोः। स्वर्गादिषु पुंलिङ्गः। इष्वादिषु स्त्रीलिङ्गः।

'गौः स्वर्गे वृषभे रश्मौ [1]वज्रे चन्द्रमसि स्मृतः।
[2]अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौः स्मृता[3] ॥'

इति विश्वः (पृ. २४, श्लो. १)॥ २५॥

[1] अभ्रे A1. [2] अर्जुने C1, मुद्रितग्रन्थे च. [3] मता B3.

शृङ्गं प्राधान्यसान्वोश्च वराङ्गं मूर्धगुह्ययोः।
भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु॥ २६॥

इति गान्तवर्गः

(वि.)　सानौ [1]विषाणे प्राधान्ये शिखरे पर्वतस्य च ।। 56 ।।
क्रीडाम्बुजलयन्त्रे च शृङ्गशब्दः प्रयुज्यते[2] ।

शृणातीति शृङ्गम् । 'शॄ हिंसायाम्' ।।

मातङ्गेऽपि वराङ्गं स्याद् गुह्ये मूर्ध्नि गुडत्वचि ।। 57 ।।

[3]वरं च तदङ्गं च वराङ्गम् ।।

भगो माहात्म्यवीर्यश्रीकीर्तिवैराग्ययुक्तिषु[4] ।
[5]ज्ञानेच्छायत्नगुह्येषु धर्मे चैश्वर्यसूर्ययोः ।। 58 ।।

भज्यते सेव्यत[6] इति भगः । 'भज सेवायाम्' ।। २६ ।।

इति गान्तवर्गः[7]

[1] विशेषे K6.　[2] उदाहृतः J2; प्रकीर्तितः K4, K5.　[3] J2 omits. [4] भूमिषु J2.　[5] ज्ञानेच्छायत्त° J2.　[6] J2, K5 omit.　[7] K4 adds गान्त-शब्दसंख्या २४.

(विव.)　शृङ्गं प्राधान्यसान्वोश्च । प्रधानस्य भावः प्राधान्यम् । प्रभुत्वमिति यावत् । यथा—'शृङ्गं स दृप्तविनयाधिकृतः परेषामत्युच्छ्रितं न ममृषे न तु दीर्घमायुः' (रघु. ९. ६२) इति । सानु गिरिशिखरम्, प्रस्थश्च । [1]तथा च कात्यः—'शृङ्गं शिखरं सान्वपि' इति । शृङ्गशब्दः पुंलिङ्गेऽप्यस्ति । तथा च वैजयन्त्याम् (पृ. २३७, श्लो. ८७)—'क्रीडाम्बुयन्त्रे शृङ्गोऽस्त्री पर्वताग्रप्रभुत्वयोः । पश्वङ्गे च' इति । कूर्चशीर्षे पुंलिङ्गः प्रागुक्तः (पृ. ३०२) । मद्गुरस्य प्रियायां (पृ. २७२) विषायां च (पृ. २७३) क्लीबन्तः प्रागुक्तः[2] ।। वराङ्गं मूर्धगुह्ययोः । गुह्यं योनिः । अवयवेषु श्रेष्ठ्यादुभयोर्वराङ्गत्वम् । 'गुडत्वचि वराङ्गं स्याद् योनौ मूर्ध्नि गजे तु ना' इति रभसः ।। भगः—कीर्तिषु । श्रीः संपत्तिः कान्तिश्च । कामो योनिः इच्छा च । माहात्म्यशब्देन ज्ञानवैराग्यैश्वर्ययोगो विवक्षितः । वीर्यमकुण्ठिता शक्तिः । यत्न उत्साहः । अर्कः सूर्यः । कीर्तिः साधुवादः । रूपभेदात् पुंलिङ्ग इति सुभूतिः । रभसकोशे तु—'भगं श्रीयोनिवीर्येषु ज्ञानवैराग्यधर्मयोः' इत्यादि

नपुंसककाण्डेऽभिहितम् । रुद्रस्तु—'ज्ञानवैराग्ययोर्योनौ भगमस्त्री रवौ तु ना' इति । भज्यत इति भगः । 'भज सेवायाम्' । घप्रत्ययः[3] (३. ३. ११८) ।। २६ ।।

इति गान्तवर्गः

[1] कात्यस्तु इति स्वामी (पृ. २७५). [2] वृ(ऋ)षभाख्यौषधिविशषे च (पृ. २८३).
[3] 'पुंसि संज्ञायां घः प्रायेण', कुत्वं च (७. ३. ५२).

(पा.) शृङ्गं—सान्वोश्च । प्राधान्यं प्रभुत्वम् । सानुः पर्वताग्रम् ।

'प्रभुत्वे पर्वतस्याग्रे पशोरवयवेऽपि च ।
क्रीडापानीययन्त्रे च शृङ्गं ना कूर्चशीर्षके ।।'

इति रभसः[1] । वराङ्गं—कीर्तिषु ।

'भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु ।
यशोवीर्यप्रयत्नेच्छाश्रीधर्मरविमुक्तिषु ।।'

इति विश्वः (पृ. २४, श्लो. ३) । 'भगं योन्यां भगो यत्नयशोवीर्यार्किभूतिषु' इति वैजयन्ती (पृ. २३४, श्लो. ११५) । 'ज्ञानवैराग्ययोर्योनौ [2]भगमस्त्री तु भास्करे' इति रुद्रः । अनुक्तम्—

रागोऽनुरागे मात्सर्ये गानाङ्गे रोचनादिषु ।

अनुरागे—वीतरागो जनः । मात्सर्ये—सपत्न्यौ व्यतिरज्येते । गानाङ्गे—[3]गुर्जरीरागेण गायति । रोचनादिषु—रोचनिकं वस्त्रम् । हारिद्रं वस्त्रम् ।। रङ्गो रणाजिरे नृत्येऽपि । अवसरसंगररङ्गे रङ्गत्वे तुरंगमास्तुङ्गाः ।।

अमुख्योपाययोरङ्गं कालिङ्गो राजसर्पयोः[4] ।।

छत्रभङ्गस्तु वैधव्येऽस्वातन्त्र्ये च नृपात्यये ।
कथाप्रसङ्गस्तु विषवैद्ये [5]वाताधिकेऽपि च ।। २६ ।।

इति गान्तवर्गः

[1] रुद्रः B3. [2] भगं न स्त्री A1. [3] गुर्जर्या A1. [4] सर्पगजयोः A1.
[5] वार्तादिके A1.

अथ घान्तवर्गः—

परिघः परिघातेऽस्त्रेऽप्योघो वृन्देऽम्भसां रये ।
मूल्ये पूजाविधावर्घोऽंहोदुःखव्यसनेष्वघम् ।। २७ ।।
त्रिष्विष्टेऽल्पे लघुः

(वि.)　अर्गले काचकलशे योगे प्राकारगोपुरे ।
[1]अस्त्रे घट्टे मुद्गरे च परिघः परिकीर्त्यते[2] ।। 59 ।।

[3]परिहन्यत इति परिघः । 'हन हिंसागत्योः' ।।[4]

ओघः परंपरावृन्दवार्वेगेषु लयान्तरे ।

उह्यत इति ओघः । 'वह प्रापणे' ।।

अर्घः [5]पूज्योपहारे च मूल्ये द्रव्यस्य वर्तते ।। 60 ।।

अर्ह्यतेऽनेनेत्यर्घः । 'अर्ह पूजायाम्' ।।

अघं दुःखे किल्विषे स्यादक्षादिव्यसनेऽपि च ।

[6]कारिणमङ्घत इत्यघम् । 'अघि गत्याक्षेपे' ।।

[7]इष्टाल्पासारशीघ्रेषु स्पृक्कायामगुरौ लघुः ।। 61 ।।

लङ्घ्यत इति लघुः । 'लघि गतौ' ।। २७ ।।

इति घान्तवर्गः[8]

[1] अस्त्री K6. [2] परिकथ्यते K4; परिपठ्यते J2, K5. [3] परितो हन्यते K3, K4. [4] K6 omits. [5] पूजोपहारे K2, K3, K5; उपचारे J2. [6] कारणं K6. [7] °अल्पाचार° K6. [8] K4 adds घान्तशब्दसंख्या ५.

(विव.)　<u>परिघः—अस्त्रेऽपि</u> । परितो हननं परिघातः । परितो हन्यतेऽनेनेति व्युत्पत्त्या परिघशब्देन सर्वतो लोहवलयबद्धं लगुडाख्यमस्त्रमुच्यते । 'परौ घः' (३. ३. ८४) इति भावकर्मणोरर्थयोः हन्तेरप्प्रत्यये घत्वम्[1] ।

'परिघः काचकलशे घट्टे प्राकारगोपुरे ।
परिघाते योगभेदे मुद्गरार्गलयोरपि ॥'

इति नानार्थसंग्रहः। काचनिर्मितः कलशः काचकलशः। गिर्यरण्यादिप्राचुर्येण दुष्प्रवेशस्थलं घट्टम्। योगभेदो विष्कम्भादिष्वन्यतमः। अर्गलं द्वारपिधानस्य विष्कम्भः॥ ओघो—रये[2]। 'वह प्रापणे'। पचाद्यचि (३. १. १३४) न्यङ्क्वादित्वात् (७. ३. ५३) साधुः॥ मूल्ये पूजाविधावर्घः। महार्घः पट इति मूल्ये। 'तमर्घ्यमर्घादिकयादिपूरुषः' (शिशु. १. १४) इति पूजायाम्। विक्रेयः पटादिर्गुर्वादिर्वा अर्घः। 'अर्ह पूजायाम्'। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः। न्यङ्क्वादिः (७. ३. ५३)॥ अंहो—अघम्। अंहः पापम्। व्यसनं मद्यपानद्यूतादि। 'अघि गतौ'[3] इति धातोः पचाद्यच् (३. १. १३४)॥ त्रिष्विष्टेऽल्पे लघुः। इष्टे यथा—'दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः' इति[4] (रघु. ११. १२)। अल्पे यथा—लघ्वाहार इति॥

'कृष्णागरुणि शीघ्रे च क्लीबे लघ्वगुरौ त्रिषु ।
निःसारे च मनोज्ञे च स्पृक्कायां च लघुः स्त्रियाम् ॥'

इति[5]। शीघ्रत्वगुणयुक्ते तु त्रिलिङ्गः प्रागुक्तः (१, पृ. ४४)। अगुरौ गुरुत्वगुणरहिते तृणतूलादौ। निःसारे सारांशरहिते शिग्रुकाष्ठादौ॥ २७॥

इति घान्तवर्गः[6]

[1] घादेशश्च Tv. [2] Tj1, Tj2 add व्यक्तयोगे च. [3] 'अघि गत्याक्षेपे' B5, B6. [4] Tv adds रघुवंशप्रयोगः. [5] इति रभसः इति भा. दी. (पृ. ४६३). [6] B5 adds शब्दाः ५.

(पा.) परिघः—अस्त्रेऽपि। परिघातो घातः। 'परिघो मुद्गरे शस्त्रे कथ्यतेऽर्गलघातयोः' इति जयकोशः। ओघो—रये। परंपरायामपि स्यात्। 'ओघः परंपरायां स्याज्जलस्रोतसि संचये' इति वैजयन्ती (पृ. २१४, श्लो. १०)॥ मूल्ये—अल्पे लघुः। [1]अपराध्यर्थेऽपि त्रिलिङ्गः। 'लघु त्वसारगुरुणोरिष्टे क्षिप्रमनोज्ञयोः' इति वैजयन्ती (पृ. २२६, श्लो. १५)॥ २७॥

इति घान्तवर्गः

[1] B3 omits the sentence.

अथ चान्तवर्गः—

काचाः शिक्यमृद्भेददृग्रुजः ।
विपर्यासे विस्तरे च प्रपञ्चः पावके शुचिः ॥ २८ ॥
मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु ।
अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् ॥ २९ ॥

(वि.) दृग्रोगमणिशिक्येषु मृद्भेदे काच इष्यते[1] ।
शिक्यं रज्जुयन्त्रम् । [2]कच्यत इति काचः । 'कच दीप्तिवन्धनयोः'[3] ।

संचये च विपर्यासे प्रपञ्चो विस्तरे मतः ॥ 62 ॥

विपर्यासो मायाप्रतरणम् । प्रपञ्च्यत इति प्रपञ्चः । 'पचि [4]विस्तारवचने' ।

शृङ्गारधर्मयोर्वह्नावुपधौ शुद्धमन्त्रिणि ।
आषाढमासे[5] मेध्ये च शुभ्रे शुचिरुदाहृतः ॥ 63 ॥

[6]शुच्यति शुद्धो भवतीति शुचिः । 'शुचिर् पूतीभावे' ॥

रागेच्छारश्मिशोभासु ज्वालायां च रुचिर्मता ।

रोचत इति रुचिः । 'रुच दीप्तौ'[7] ॥ २८–९ ॥

इति चान्तवर्गः[8]

[1] उच्यते J2. [2] K5 adds रज्जु. [3] बन्धने J2. [4] विस्तारे K2, K4. [5] °मासि K5. [6] शोचति, 'शुच शोके' K4, K6. [7] अभिप्रीतौ च इति धातुपाठे. [8] K4 adds चान्तशब्दसंख्या ४.

(विव.) काचाः—दृग्रुजः । घटादिधारणार्थो रज्जुकृतो यन्त्रविशेषः शिक्यम् । मृद्भेदस्तु दरिद्रयोषिदादिधारणीयानां वलयाङ्गुलीयकादीनां प्रकृतिभूतो मृत्तिकाविशेषः । दृशः नेत्रस्य रुग् रोगः काचाख्यः प्रसिद्धः । 'कच दीप्तिबन्धनयोः' इति धातोः कर्मण्यधिकरणे च यथायोगं घञ् । 'न क्वादेः' (७. ३. ५९) इति कुत्वप्रतिषेधः ॥ विपर्यासे—प्रपञ्चः । अतस्मिन् तदिति प्रत्ययो विपर्यासः ।

यथा—'प्रपञ्चस्य लयो ज्ञानात्' इति। विस्तरः शब्दबाहुल्यम्। यथा—'अलमतिप्रपञ्चेन' इति। पदार्थप्रपञ्चः इत्यादौ शब्दव्यतिरिक्ते प्रपञ्चे शब्द औपचारिकः। 'पचि विस्तारवचने' इत्यस्मात् चौरादिकात् 'एरजण्यन्तानाम्' इति ण्यन्तपर्युदासस्य प्रायिकत्वाद् एरचि (३. ३. ५६) प्रपञ्चः॥ पावके—सिते त्रिषु। अत्र मासिशब्देनाषाढमासो विवक्षितः। [1]'शौचाचारपरिज्ञानममात्यानामुपधा' इति कौटिल्यः (अर्थशास्त्रे १. १०)। परिज्ञानोपायश्च क्षत्रियवर्गे प्रपञ्चितः (पृ. ४६६)। तामतिक्रान्तोऽत्युपधः, उपधाशुद्ध इति यावत्। पावकाद्यर्थत्रये पुंलिङ्गः। पवित्रे धवलद्रव्ये च वाच्यलिङ्गः। शृङ्गाररसेऽपि शुचिशब्दः पुंलिङ्गः प्रागुक्तः (१, पृ. १३१)॥ [2]अभिषङ्गे—रुचिः स्त्रियाम्। अभिषङ्गः आसक्तिः। यथा—वेदाभ्यासरुचिः इति। स्पृहा वाञ्छा। यथा—'भिन्नरुचिर्हि लोकः' इति (रघु. ६. ३०)। तिग्मरुचिरिति गभस्तौ। 'रुच दीप्तौ' इत्यस्माद् 'इगुपधात् कित्' (उ. ४. १२०) [3]इतीन्प्रत्यये रुचिः॥ २८—९॥

इति चान्तवर्गः

[1] 'उपधाभिः शौचाशौचपरिज्ञानममात्यानाम्' इति मु. ग्र. (पृ. १०). [2] अभिष्वङ्गे Tv. [3] इति कित्प्रत्यये B5, B6.

(पा.) काचाः—दृग्रुजः। मृद्भेदः। 'गाजु'॥ विपर्यासे—प्रपञ्चः। [1]विस्तरः शब्दविस्तृतिः॥ पावके—त्रिषु। अत्युपधशब्दोऽमात्यविशेषणम्।

> 'शुचिः [2]शब्देऽनुपहते शृङ्गाराषाढयोः सिते।
> ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणि॥'

इति विश्वः (पृ. ३०, श्लो. ६)॥ [3]अभिषङ्गे—रुचिः स्त्रियाम्। अभिषङ्गोऽत्यासक्तिः। स्पृहा बुभुक्षा॥ अनुक्तम्—

> श्मश्रुण्यपि च कूर्चः स्यात् कचः शुष्कव्रणेऽपि च।
> पिशाचः स्याद् बिडालेऽपि नाराचोऽम्बुकरिण्यपि[4]॥
> चञ्चः किरातभेदे स्याच्चञ्चा स्त्री तृणपूरुषे।

[5]कणीचिः पुष्पितलतागुञ्जयोः शकटेऽपि च ॥
रतनारीचः शुनके सीत्कारे च नतभ्रुवाम् ।

इति चान्तवर्गः

परिधानाञ्चले कच्छः पार्श्वे पुष्पवनेऽपि च ।
पुच्छः पश्चात्प्रदेशेऽपि म्लेच्छः पापरतेऽपि च ॥ २८–९ ॥

इति छान्ताः

[1] प्रपञ्चः शब्दविस्तृतिः B3.　[2] शुद्धे इति मु. ग्र.　[3] अभिष्वङ्गे B3, C1. [4] अम्बुकरी जलगजः.　[5] कणीची B3, C1.

अथ जान्तवर्गः--

केकिताक्ष्यार्वहिभुजौ दन्तविप्राण्डजा द्विजाः ।
अजा विष्णुहरच्छागा गोष्ठाध्वनिवहा व्रजाः ॥ ३० ॥

(वि.)　अहिभुङ्नकुलेऽपि स्याद् वैनतेयमयूरयोः ॥ 64 ॥

अहिं भुङ्क्त इत्यहिभुक्[1] ॥

त्रैवर्णिकेषु दन्तेषु पक्षिसर्पादिषु द्विजः ।
रेणुकायां च भार्ग्यां च द्विजाशब्द उदाहृतः[2] ॥ 65 ॥

[3]द्विर्जायत इति द्विजः । 'जनी प्रादुर्भावे' ॥

हरे हरौ विधौ कामे छागे रघुसुतेऽप्यजः ।

विधिर्ब्रह्मा । न जायत इत्यजः ॥

गोस्थानाध्वसमूहेषु [4]व्रजशब्दोऽभिधीयते ॥ 66 ॥

व्रजतीति व्रजः । 'व्रज गतौ' ॥ ३० ॥

[1] K4 adds 'भुज पालनाभ्यवहारयोः'.　[2] प्रकीर्तितः K2, K3.　[3] J2 omits. [4] K3 omits 7 lines.

(विव.) [1]अनन्तरमच्छकच्छतुच्छादीनां सद्भावेऽपि तेषां प्रयोगप्राचुर्याभावात् तानुपेक्ष्य जान्तानाह—केकिताक्ष्यविहिभुजौ । निगदव्याख्यातम् । नकुलेऽप्यहिभुक्शब्दः ॥ दन्तविप्राण्डजा द्विजाः । विप्रग्रहणं त्रैवर्णिकोपलक्षणम् । तथा च स्मृतिः—

[2]'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।'
[3]'तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ।'
[4]'ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ।'

इति । अत एव द्विर्जाता द्विजाः । वृत्तिविषये सुच्प्रत्ययस्य लोपः । अण्डजाः पक्षिसर्पाद्याः । [5]भार्ग्यां रेणुकायां च द्विजा स्त्रीलिङ्गा प्रागुक्ता (पृ. २६८, २८६) ॥ अजा विष्णुहरच्छागाः । न जायत इत्यजः । अजति गच्छतीति वा अजः । 'विधीशविष्णुकामेषु पुंस्यजः प्रकृतौ स्त्रियाम्' इति नानार्थसंग्रहः[6] । रघुपुत्रोऽप्यजः प्रसिद्धः ॥ गोष्ठाध्वनिवहा व्रजाः । गोष्ठं गोस्थानम् । निवहः समूहे । व्रजन्त्यस्मिन्निति व्रजः । 'गोचरसंचरवहव्रजव्यजापणनिगमाश्च' (३. ३. ११९) इति घप्रत्ययान्तो निपातितः ॥ ३० ॥

[1] पुच्छतुच्छ° Gm3, Tv. [2] याज्ञ. स्मृ. १. २. ३९. [3] मनु. २. १७०. [4] याज्ञ. स्मृ. १. २. ३९. [5] 'हञ्चिका ब्राह्मणी पद्मा भार्गी' इत्येव दृश्यते; हेमचन्द्रस्तु—'द्विजा भार्गीरेणुकयोः' इत्याह (अ. सं. पृ. ८, श्लो. ७१). [6] अजयपालकृतनानार्थसंग्रहे—'अजः पितामहे छागे केशवे च महेश्वरे' इति दृश्यते (पृ. २, श्लो. १७).

(पा.) केकिताक्ष्य—मयूरयोः । [1]अण्डजः पक्षी ॥ अजा विष्णु—व्रजाः । ब्रह्मपितामहानादयोऽपि । 'अजः पितामहेऽनादौ छागे विष्णौ हरे [2]रवौ' इति वैजयन्ती (पृ. २३०, श्लो. ४) ॥ ३० ॥

[1] B3 omits. [2] अब्जजे A1, C1.

धर्मराजौ जिनयमौ कुञ्जो दन्तेऽपि न स्त्रियाम् ।
बलजे क्षेत्रपूर्द्वारे बलजा वल्गुदर्शना ॥ ३१ ॥

(वि.) धर्मराजो जिनेऽपि स्याद् युधिष्ठिरकृतान्तयोः ।

[1]धर्मस्य राजा धर्मराजः ॥

गजदन्ते निकुञ्जे च सानौ कुञ्ज उदाहृतः ।। 67 ।।

कुञ्जतीति कुञ्जः । 'कुञ्ज शब्दे'[2] ।।

सस्यक्षेत्रे पुरद्वारे समरे [3]वलजं मतम् ।
वलजा वरकान्तायां मेदिन्यामपि संमता ।। 68 ।।

बलेन जायत इति वलजा । 'जनी प्रादुर्भावे' ।। ३१ ।।

[1] J2, K5 omit derivation. [2] 'कुञ्ज कौटिल्याल्पीभावयोः' इति बृहद्धातुरूपावल्याम् (पृ.३९९); 'कौ जायते । "सप्तम्यां जनेर्डः" । पृषोदरादिः' इत्यादि भा. दी. (पृ. ४६४). [3] वलजः स्मृतः K5.

(विव.) धर्मराजौ जिनयमौ । जिनः सुगतः । युधिष्ठिरेऽपि धर्मराजशब्दः ।। कुञ्जो दन्तेऽपि न स्त्रियाम् । कुजिः लौकिको धातुः आवरणार्थ इति सुबोधिनी । कुञ्जति आवृणोति स्वावासस्थानमिति कुञ्जः । दन्ते गजदन्ते । यथा कुञ्जर इति । अपिशब्दात् 'लतादिपिहितोदरे' इति प्रागुक्तः (१, पृ. २१३) ।। वलजे—वल्गुदर्शना । क्षेत्रं च नगरद्वारं च प्रत्येकं नपुंसकलिङ्गेन वलजशब्देनोच्यते । वल्गुदर्शना वामलोचना । योषेति यावत् । सा स्त्रीलिङ्गस्य वलजाशब्दस्यार्थः । [1]बले जातं वलजम्[2] । वबयोरभेदः ।

**'वलजं गोपुरे[3] क्षेत्रे सस्यसङ्गरयोरपि ।
वलजा वारयोषायां वसुमत्यामपि स्मृता ।।'**

इति विश्वप्रकाशिका (पृ. ३३, श्लो. १७) । [4]'वलजं धान्यराशौ स्यात्' इति वैजयन्ती (पृ. १२८, श्लो. ६५) । 'कर्षकेण [5]वलजं पुपूषता' इति माघः (शिशु. १४. ७) ।। ३१ ।।

[1] बलेन B5, B6. [2] 'सप्तम्यां जनेर्डः' (३. २. ९७). [3] गोक्षुरे इति मुद्रितग्रन्थे. [4] 'धान्यराशिस्तु वलजा' इति मु. ग्र.; 'वलजो धान्यराशिः स्यात्' इति वैजयन्तीति माघव्याख्याने मल्लिनाथः (पृ. ३३४). [5] वलजान् इति मु. ग्र.

(पा.) धर्मराजौ जिनयमौ । युधिष्ठिरोऽपि स्यात् । 'धर्मराजो यमे बुद्धे धर्मराजो युधिष्ठिरे' इति विश्वः (पृ. ३४, श्लो. ३०) ।। कुञ्जो दन्तेऽपि न स्त्रियाम् । दन्तो गजदन्तः । [1]'येनुगदवड' ।। [2]कुञ्जो निकुञ्जेऽपि हनौ भवेद्

दन्ते च दन्तिनाम्' इति विश्वः (पृ. ३३, श्लो. १२) ।। वलजे—वल्गुदर्शना । वलजेति तन्त्रेण स्त्रीनपुंसकयोरेव ग्रहणम् । 'वलजा वरनार्यां [3]स्त्री क्षेत्रे द्वारे च सा न ना' इति वैजयन्ती (पृ. २६३, श्लो. ७८) ।। ३१ ।।

[1] B3 omits. [2] 'गञ्जः कुञ्जो निकुञ्जेऽपि हनौ दन्ते च दन्तिनाम्' इति मु. ग्र. [3] चेति मु. ग्र.

समे क्ष्मांशे रणेऽप्याजिः प्रजा स्यात् संततौ जने ।
अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये निजं त्रिषु ।। ३२ ।।

(वि.) युद्धे च समभभागे क्षणेऽप्याजिः प्रकीर्तितः[1] ।

अजन्ति क्षिपन्ति शस्त्राण्यत्रेत्याजिः । 'अज गतिक्षेपणयोः' ।।

जनेऽप्यभिजने चैव प्रजाशब्दः प्रकीर्तितः ।। 69 ।।

प्रजायत इति प्रजा । [2]'जनी प्रादुर्भावे' ।।

अब्जो धन्वन्तरौ शङ्खे पद्मेन्दुनिचुलेषु च ।

अद्भ्यो [3]जातोऽब्जः ।।

सनातने स्वकीये च निजशब्द उदाहृतः[4] ।। 70 ।।

[5]नितरां जायत इति निजः । 'जनी प्रादुर्भावे' ।। ३२ ।।

इति जान्तवर्गः[6]

[1] प्रकीर्तिता K2, K4; उदाहृता J2. [2] K2, K5 omit. [3] जायत इति K6. [4] प्रकीर्तितः K2, K4, K5. [5] K5, K6 omit derivation. [6] K2, K4 add जान्तशब्दसंख्या ११.

(विव.) समे क्ष्मांशे रणेऽप्याजिः । समपदं भूभागस्य विशेषणम् । 'आजिः समभुवि स्त्रियाम्' इति भूवर्गे शेषकारेणोक्तत्वात् । रणः युद्धम् । अपिशब्दात् क्षणरूपकाल इति सुबोधिनी । 'युद्भूभागक्षणेष्वाजिः' इति दुर्गोक्तेश्च ।। प्रजा स्यात् संततौ जने । संततिरपत्यपरंपरा । यथा—प्रजावान् भूयासमिति ।

जने यथा—'अथ प्रजानामधिपः प्रभाते' इति (रघु. २. १)॥ अब्जौ शङ्खशशाङ्कौ च। शेषे—'अब्जो निचुलवैद्ययोः' इति। निचुलो हिज्जलः[1]। वैद्यः धन्वन्तरिः। रूपभेदादेष्वर्थेषु पुंलिङ्गः। व्यक्तयोगश्च। 'शङ्खे धन्वन्तरौ चन्द्रे पुंस्यब्जः क्लीबमम्बुजे' इति संग्रहः॥ स्वके नित्ये निजं त्रिषु। स्वकं निजसंबन्धि। यथा—निजगृहम्। निजं वस्त्रमिति। नित्यं यावद् द्रव्यभावि गुणादिकम्। यथा—निजो धर्मः। निजं गाम्भीर्यमिति। नितरां जायत इति निजम्[2]। त्रिषु वाच्यलिङ्ग इत्यर्थः॥ ३२॥

इति जान्तवर्गः[3]

[1] हिज्जुलः B5.　[2] 'उपसर्गे च संज्ञायाम्' (३. २. ९९) इति डः इति भा. दी. (पृ. ४९४).　[3] Tj1 adds शब्दा दश; एकादश Tv.

(पा.) समे क्ष्मांशे—जने। संततिरपत्यम्॥ अब्जौ शङ्खशशाङ्कौ च। 'अब्जो धन्वन्तरौ शङ्खे चन्द्रे क्ली लवणेऽम्बुजे' इति वैजयन्ती (पृ. २३०, श्लो. ३)॥ स्वके नित्ये निजं त्रिषु। स्वभावे नपुंसकम्। 'सहजं निजमाजानं धर्मसर्गौ निसर्गवत्' इति वैजयन्ती (पृ. १९२, श्लो. १)॥ अनुक्तम्—

जूराकाशे सरस्वत्यां पिशाच्यां ना तु राक्षसे।
अङ्गजं रुधिरे क्लीबं पुमान् पुत्रमनोजयोः।
कारुजः करिपोते स्यात् स्वयंजाततिलेऽपि च।
परञ्जस्तैलयन्त्रे स्याद् डिण्डिरे छुरिकाफले[1]।
पटहेऽपि च गुञ्जा स्यात् कस्तूर्यामपि चाण्डजा।

पक्षिसर्पादिषु पुंलिङ्गः[2]।

राजराजः शशाङ्केऽपि लाजः स्याच्चार्द्रतण्डुले।

भृष्टधान्ये बहुवचनान्तः॥ ३२॥

इति जान्तवर्गः

[1] छूलिकाफले A1.　[2] पुंलिङ्गम् A1.

अथ ञान्तवर्गः—

पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः ।
संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ।। ३३ ।।

(वि.) प्रवीणे [1]चात्मनि तथा क्षेत्रज्ञः समुदाहृतः ।

[2]क्षेत्रं जानातीति क्षेत्रज्ञः । 'ज्ञा अवबोधने' ।।

संज्ञा स्याद् भानुभार्यायां गायत्र्यां चैव नामनि ।। 71 ।।
चेतनायां च हस्ताद्यैः[3] सूचनायां च वस्तुनः ।

[4]सम्यक् ज्ञायत इति संज्ञा ।। ३३ ।।

इति ञान्तवर्गः[5]

[1] अप्यात्मनि K5. [2] J2 adds वर्ष्म; K3 शरीरम्. [3] हस्तादेः J2. [4] संज्ञायते J2. [5] K2 adds ञान्तशब्दसंख्या २; ञान्तवर्ग° J2.

(विव.) अनन्तरं ज्ञान्तानां क्लिष्टकल्प्यतया तानुपेक्ष्य ञान्तानाह— पुंस्यात्मनि—वाच्यलिङ्गकः। क्षेत्रं शरीरं स्वभोगसाधनत्वेन जानातीति क्षेत्रज्ञो [1] जीवात्मा। क्षेत्रं स्थानविशेषं जानातीति क्षेत्रज्ञो निपुणः।। संज्ञा स्यात्—अर्थसूचना। चेतना ज्ञानम्। नाम नामधेयम्। आद्यशब्देन भ्रूनिकोचादेर्ग्रहणम्। तैरर्थस्य प्रयोजनस्य वस्तुनो वा सूचना ज्ञापनमित्यर्थः। संपूर्वात् जानातेः 'आतश्चोपसर्गे' (३. ३. १०६) इति यथायोगमर्थत्रये भावे करणे च अङि संज्ञा।

'संज्ञा स्याद् भानुभार्यायां गायत्र्यां चैव नामनि ।
चेतनायां च हस्ताद्यैः सूचनायां च वस्तुनः ।।'

इति नानार्थसंग्रहः[2]। शेषे—'नामस्मृत्योरभिज्ञा स्यात् ज्ञस्तु सौम्ये विपश्चिति' इति ।। ३३ ।।

इति ञान्तवर्गः

[1] 'आतोऽनुपसर्गे कः'. [2] अजयपालकृतौ न दृश्यते । राघवकृतनानार्थमञ्जर्यां तु दृश्यते (पृ. २२, श्लो २१७–१८).

(पा.) पुंस्यात्मनि—अर्थसूचना । चेतना नाम मूर्च्छाविपर्ययः ।

'मूर्च्छासु मूर्खासु तिरोभवन्ति कपालमिन्दुः करिचर्मनागाः ।
काश्यामथो[1] कण्ठगतस्य जन्तोः ॥'

अनुक्तम्—

दोषज्ञौ वैद्यविद्वांसौ ज्ञो विद्वान् सोमजोऽपि च ।

सोमजो बुधः ।

[2]सर्वज्ञौ सुगतेशानौ कालज्ञौ ज्ञानिकुक्कुटौ ॥ ३३ ॥

इति ञान्तवर्गः

[1] मदः A_1.　　[2] B_3, C_1 add the hemistich.

अथ टान्तवर्गः—

काकेभगण्डौ करटौ गजगण्डकटी कटौ ।
शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ३४ ॥

(वि.) गजगण्डे वाद्यभेदे कुसुम्भे निन्द्यजीवने ॥ 72 ॥
एकादशाहश्राद्धे च वायसे करटो मतः ।

के रटतीति करटः । 'रट [1]परिभाषणे' ॥

अतिरेके शवे प्रेतक्रियाकर्तृकिलिञ्जयोः ॥ 73 ॥
कटः श्मशाने समये श्रोणिमातङ्गगण्डयोः ।

कटचत इति कटः । 'कटे वर्षावरणयोः' ॥

नारायणे महेशाने खर्वाटे दुष्टचर्मणि[2] ॥ 74 ॥
शिपिविष्टस्तु पिशुनवादिन्यपि च वर्तते ।

शिपौ [3]चर्मणि विष्टं दोषव्याप्तिरस्येति शिपिविष्टः । 'विष्लृ व्याप्तौ' ॥
हरिहरपक्षे यथा[4]—शिपिषु पशुषु[5] जनेषु विष्टो व्याप्त इति शिपिविष्टः ॥ ३४ ॥

[1] शब्दे K5. [2] जल्पादेर्दुष्टकर्मणि K6. [3] J2, K6 omit. [4] तु K5.
[5] K3 omits पशुषु.

(विव.) काकेभगण्डौ करटौ। के रटति शब्दं करोतीति करटः। 'रट परिभाषणे'। करोति मदमिति करटः गजकपोलः। 'शकादिभ्योऽटन्' (उ. ४. ८२) इति अटन्। अत्र प्रतापः—

'करटो वाद्यभेदे स्यात् कुसुम्भकरिगण्डयोः।
एकादशे च श्राद्धे च वायसे निन्द्यजीविनि ॥'

इति ॥ गजगण्डकटी कटौ। कटिः श्रोणिः। शेषे—

[1]'कटोऽतिरेकशवयोः क्रियाकारिश्मशानयोः।
किलिञ्जे समये स्त्री तु कटिः श्रोण्यां कटी च सा ॥'

इति। अतिरेके यथा—प्रकटो विकटः। शवे यथा—वर्जयेत् कटधूममिति। क्रियाकारिणि प्रेतकर्मकारिणि यथा—'सकटान्नं च नाश्नीयात्' (या. स्मृ. ३. १. १५) इति। [2]किलिञ्जके यथा—कटे शेते। समये यथा—'वक्तव्यमिह बौद्धकटरूढैः' इति ॥ शिपिविष्टस्तु—महेश्वरे। खलतिः केशोत्पत्तिरहितशिरोभागयुक्तः पुरुषः। निकृत्तमेहनावरणचर्मा[3] दुश्चर्मा। कुष्ठीत्येके। [4]'शिपिविष्टस्तु [5]दुश्चर्मखल्वाटहरिशंकराः' इति नानार्थसंग्रहे। दोषव्याप्तं शिपिरुच्यत इति स्वामी[6] (पृ. २७७)। तेन विष्टं व्याप्तं शरीरमस्येति शिपिविष्टः। महेश्वरे तु—'यज्ञो वै विष्णुः पशवः शिपिः' इति श्रुतौ दर्शनात् पशवः शिपिशब्देनोच्यन्ते। तैर्विष्टो व्याप्तः सेवितः, तत्पतिरिति यावत्। तदुक्तं स्कान्दपुराणे—

'आत्मानः पशवः प्रोक्ताः सर्वे संसारवर्तिनः।
तेषां पतित्वाद् विश्वेशो भवः पशुपतिः स्मृतः ॥'

इति। 'शिपयो रश्मयः, [7]तैर्विष्टो व्याप्त इति शिपिविष्टो विष्णुः' इति सहस्रनामभाष्ये (पृ. ७८) व्याख्यातम्। 'विष्णुः शिपिविष्टः' इति श्रुतिश्च (वाज. सं. ८. ५५) ॥ ३४ ॥

[1] श्लोकोऽयं नानार्थमञ्जर्यां दृश्यते (पृ. २४, श्लो. २३२–३). [2] किलिञ्जकः कटः. [3] °अग्रावरण° Tv. [4] ना. म. (पृ. २५, श्लो. २४१). [5] °शंभुषु इति

मुद्रितनानार्थमञ्जर्याम्. [6] मुद्रितग्रन्थे—शिपिश्चर्म विष्टं दोषव्याप्तमस्य—इति दृश्यते. [7] तेषु निविष्ट इति वा इति मु. ग्र.

(पा.) काकेभगण्डौ—महेश्वरे । खलतिः [1]इन्द्रलुप्तव्याधिमान् । [2]'वट्टतलवांडु'। 'खल्वाटः खलतिर्बभ्रुः' इति वैजयन्ती (पृ. १८५, श्लो. १४७) ।। ३४ ।।

[1] इन्द्रलुप्ति° A1. [2] A1 adds 'वेंट्रिकलतोगूडाजेपेत्तिन तलवांडु'.

देवशिल्पिन्यपि त्वष्टा दिष्टं दैवेऽपि न द्वयोः ।
रसे कटुः कट्वकार्ये त्रिषु मत्सरतीक्ष्णयोः ।। ३५ ।।

(वि.) अमराणां [1]वर्धकौ च सूर्ये त्वष्टा प्रकीर्तितः ।। 75 ।।

[2]त्वक्षति तनूकरोतीति त्वष्टा । 'त्वक्षू तनूकरणे' ।।

दैवेऽतिसर्जने काले दिष्टशब्दोऽभिधीयते ।

दिश्यते निर्दिश्यत[3] इति दिष्टम् । 'दिश अतिसर्जने' ।।

रसे सुगन्धे पुंसि स्यादकार्ये न द्वयोः कटुः ।। 76 ।।
स्त्री क्षवे रोहिणीकङ्ग्वोस्त्रिषु मत्सरतीक्ष्णयोः ।

क्षवोऽत्र [4]कृष्णसर्षपः । कटतीति कटुः । 'कटी गतौ'[5] ।। ३५ ।।

[1] वर्धके K6. [2] त्वेषत इति त्वष्टा । 'त्विष दीप्तौ' K3, K4. [3] J2, K5 omit. [4] K3 omits कृष्ण°. [5] 'कटे वर्षावरणयोः' J2, K5.

(विव.) देवशिल्पिन्यपि त्वष्टा । देवशिल्पी विश्वकर्मा । अपिशब्दात् सूर्ये । वर्धकिमात्रे तु प्रागुक्तः (पृ. ६२५) ।। दिष्टं दैवेऽपि न द्वयोः । दैवं पुराकृतं कर्म । न द्वयोरिति निषेधो नित्यानुवादः पादपूरणार्थः । अपिशब्दात् काले पुंलिङ्गः प्रागुक्तः (१, पृ. ७३) । दिश्यते निर्दिश्यत इति दिष्टः । अतिसृष्टे तु त्रिलिङ्गः ।। रसे कटुः—तीक्ष्णयोः । रसे शुण्ठीमरीचादिसंबन्धिनि पुंलिङ्गः प्रागुक्तः (१, पृ. ९६) । अकार्ये कर्तुमनर्हे दण्डपारुष्यादौ तु रूपभेदान्नपुंसकलिङ्गः । यथा—कटु कर्म करोतीति । बोपालितस्तु—'अकार्याप्रिययोः कटुः' इति

वाच्यलिङ्गप्रकरणे प्राह। [1]संग्रहे तु––अन्यदीयशुभद्वेषो मत्सरः। तद्युक्ते तीक्ष्णे कृपाणादौ च वाच्यलिङ्गः। तीक्ष्णशब्देन कटुरसयुक्तं सर्षपादिकमिति विवक्षितम्। तत्रापि वाच्यलिङ्गः। तीक्ष्णशब्देन निष्ठुरशब्दोऽपि विवक्षितः। यथा––कटु रटति काकः इति। कटति वर्षति दुःखमिति वा, कटत्यावृणोति परोत्कर्षमिति वा कटुः[2]। शेषे––'क्षवे प्रियङ्गुरोहिण्यां स्त्रियां गन्धे पुमान् कटुः' इति। [3]क्षवः सर्षपो राजिकाख्यः। प्रियङ्गुः फलिनी। रोहिणी कटुरोहिणी। गन्धे यथा––कटुगन्धा निर्गुण्डी इति ॥ ३५ ॥

[1] अजयपालकृतनानार्थसंग्रहे––'कटुस्तीक्ष्णे रसे गन्धे कट्वकार्ये तु मत्सरे' इति दृश्यते (पृ. २४, श्लो. १६). [2] 'कटे वर्षावरणयोः'। 'मृगय्वादयश्च' (उ. १. ३५) इति कुः. [3] क्षवः कृष्णसर्षपः Tv.

(पा.) देवशिल्पिन्यपि त्वष्टा। [1]अपिशब्दाद् वर्धकावपि स्यात्॥ दिष्टं दैवेऽपि न द्वयोः। काले पुंलिङ्गः॥ रसे कटुः––तीक्ष्णयोः। [2]रसे रसविशेषे ॥ ३५ ॥

[1] A1 omits अपिशब्दात्. [2] रसो नाम पिप्पल्यादिरसः A1.

रिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाशुभे।
मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ॥ ३६ ॥
अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्।

(वि.) अशुभे कुशले रिष्टमभावे च प्रकीर्तितम् ॥ 77 ॥

रिष्यत इति रिष्टम्। 'रिष हिंसायाम्' ॥

तक्रे निम्बद्रुमे काके शुभे मरणलक्षणे।
अशुभे सूतिकागेहेऽप्यरिष्टः फेनिलद्रुमे ॥ 78 ॥

न रिष्यत इत्यरिष्टः[1] ॥

मायायामनृते यन्त्रे तुच्छे पुच्छे च कैतवे।
राशावयोघने दम्भे हलाङ्गे लोहमुद्गरे ॥ 79 ॥
शैलशृङ्गे गोपुरे च निश्चले कूट उच्यते।

कूटयत इति कूटः 'कूट आप्रदाने'[2] ॥ ३६ ॥

[1] K4 adds 'रिष हिंसायाम्'.　[2] कौटिल्ये K2, K3, K4.

(विव.) रिष्टं क्षेमाशुभाभावेषु। क्षेमं कल्याणम्। अशुभममङ्गलम्। अभावो नाशः। रिष्यति दुःखमिति वा रिष्टम्। 'रिष हिंसायाम्'[1]॥ अरिष्टे तु शुभाशुभे। मिथोविरुद्धशुभाशुभवचनस्य रिष्टशब्दस्य नञ्समासे सति अरिष्टशब्दस्यापि शुभाशुभवचनत्वम्।

'क्लीबं शुभेऽशुभे तक्रे सूत्यागारान्तचिह्नयोः।
अरिष्टो लशुने काके निम्बफेनिलवृक्षयोः[2]॥'

इति रभसः। अन्तचिह्नं मरणचिह्नम्। यथा—स्वस्थारिष्टमशिरस्कपुरुषच्छायादर्शनम् इति॥ माया—कूटमस्त्रियाम्। *मायादीनां सप्तानां द्वन्द्वः। [3]यन्त्रमन्त्रौषधादिप्रयोगेण परव्यामोहजननं माया। निश्चलं निर्विकारम्। यथा—'कूटस्थोऽक्षर उच्यते' (भ.गी. १५. १६) इति। यन्त्रं मृगपक्षिवन्धनसाधनम्, यत्संबन्धाद् वैतंसिकस्य कौटिक इति संज्ञा। इषुर्बाणः। वस्तुस्वरूपस्य कपटेनान्यथाकरणं कैतवम्। यथा— कूटलेख्यः कृतः इति। अनृतमसत्यवचनम्। यथा—[4]कूटसाक्षी इति। राशिः धान्यपुञ्जः। यत्र निधाय तप्तं लोहं हन्यते स अयोघनः। यथा—[5]'त्वष्टुः कूटे भविष्यति चन्द्रमाः' इति मुरारिः (अ. रा. २. ८०)। शैलशृङ्गं गिरिशिखरम्। सीराङ्गं वक्रदारुरूपम्। फाल इत्येके। 'कुट कौटिल्ये' इति धातोः इगुपधलक्षणकप्रत्यये (३. १. १३५) कूटः कौटिल्यं कुसृतिबन्धश्च इति धातुवृत्तौ[6]। पृषोदरादित्वाद् उपधादीर्घः। केषुचिदर्थेषु 'कूट [7]दाहे' इति धातुः॥ ३६॥

[1] क्तः (३. ३. ११४).　[2] फेनिलयोरपि B5, Tj1.　[3] तत्र मन्त्र° Tv.　[4] कूटसाक्षिणं पापैः इति या. स्मृ. (२. ५. ७७).　[5] त्वष्टुः कुन्दे इति मु. ग्र. (२. ८०).　[6] माधवीये न दृश्यते.　[7] परितापे Tv.　* इषुरिति पृथक्पदमस्मिन् व्याख्याने। तस्मात् पदानि सप्त.

(पा.) रिष्टं—शुभाशुभे।

'अरिष्टः फेनिले निम्बे लशुने वायसे तथा।
अरिष्टं सूतिकागारे तक्रे [1]वाप्यशुभे शुभे॥'

इति कथ्यमानेतरार्थाः[2] पर्यायिष्वेव प्रकीर्तिताः॥ मायानिश्चल—कूटमस्त्रियाम्। निश्चलमविकारमाकाशादि। यन्त्रं मृगग्रहणदारुपञ्जरम्[3]। 'वोनु'। इषुः शरव्यभेदः[4]॥ ३६॥

[1] चाप्यशुभे C1. [2] इतरार्थपर्यायेषु B3. [3] B3, C1 omit °दारु°. [4] °वेधः; सीराङ्गं 'मोलकप्रासेटुगुंटुग' A1.

सूक्ष्मैलायां त्रुटिः स्त्री स्यात् कालेऽल्पे संशयेऽपि सा ॥ ३७ ॥
अत्युत्कर्षाश्रयः कोट्यो मूले लग्नकचे जटा ।
व्युष्टिः फले समृद्धौ च दृष्टिर्ज्ञानेऽक्ष्णि दर्शने ॥ ३८ ॥

(वि.) सूक्ष्मैलायामल्पकाले त्रुटिः [1]संदेहलेशयोः ॥ 80 ॥

त्रुट्यत इति त्रुटिः । 'त्रुट छेदने' ॥

[2]अश्रौ च खड्गधारायां कोटिरुत्कर्षसंख्ययोः ।

[3]अश्रिः धनुष्कोटिः । [4]कुट्यत इति कोटिः । 'कुट कौटिल्ये' ॥

अत्यन्तश्लिष्टकेशेषु शिफायां च जटा मता ॥ 81 ॥

जटति संघीभवतीति जटा । 'जट संघाते' ॥

व्युष्टिः प्रयोजने स्तोत्रे[5] समृद्धौ च प्रकीर्तिता ।

[6]व्युच्छ्यते समाप्यत इति व्युष्टिः । 'उच्छी विवासे' ॥

ज्ञानलोचनयोश्चैव दर्शने दृष्टिरुच्यते ॥ 82 ॥

दृश्यतेऽनयेति दृष्टिः । 'दृशिर् प्रेक्षणे' ॥ ३७–८ ॥

[1] संशय° J2, K2. [2] अर्तौ J2, K4. [3] अर्तिः J2, K4. [4] K2, K6 omit. [5] घातौ K6; सूतौ K4. [6] व्युच्छनं व्युष्टिः K5.

(विव.) सूक्ष्मैलायां––संशयेऽपि सा। सूक्ष्मैला नाम काचिदेलावान्तरजातिभेदः। कालः कालविशेषः। स च सूच्यग्रेण सरोजदलाष्टकस्य व्यतिभेदपरिच्छिन्नः। लघ्वक्षरोच्चारणपरिच्छिन्नः कालस्त्रुटिरिति केचित्। अल्पे लेशे यथा––[1]'त्रुटिमात्रं सुवर्णस्य लिङ्गस्यादाय मूर्धनि' इति पुराणम् (भागवत. १०. १३. ४०)। संशयोऽत्र मरणविषय एवेति। यथा––'त्रुटिं प्राप्तो रोगी'

इति । स्वोपाधिना त्रुट्यते परिच्छिद्यत इति त्रुटिः कालविशेषः । त्रुट्यते तत्त्वज्ञानेन भिद्यत इति त्रुटिः संशयः । [2]'त्रुटिः स्त्री संशये लेशे सूक्ष्मैलाकालभेदयोः'[3] इति विश्वप्रकाशः (पृ. ३८, श्लो. २८) ।। अर्त्युत्कर्षाश्रियः कोट्यः । अर्तिः चापाग्रम् । यथा—धनुःकोटिः इति । उत्कर्षोऽतिशयः । यथा—परां कोटिमारूढ इति । अश्रिः कोणः । यथा—शतकोटिर्वज्र इति । शतलक्षात्मकः संख्याविशेषश्च कोटिरुच्यते । कोटिशब्दः [4]क्षत्रवर्गे व्युत्पादितः[5] (पृ. ५३३, ५३६) । कोटिशब्दात् कृदिकारादिति ङीषि[6] (ग. सू.) कोटीशब्दस्यापि विद्यमानत्वाद् वृत्तानुरोधेन कोटीशब्दोऽपि ङीषन्तः प्रयुक्तः । एतेन ह्रस्वोपधकोटिशब्दस्य स्त्रीलिङ्गत्वं व्यक्तीकृतम् ।। मूले लग्नकचे जटा । वृक्षसंबन्धिनी शिफा मूलम् । लग्नाः परस्परं संश्लिष्टाः कचाः केशा यस्मिन् केशसमूहे स लग्नकचः । जटति संहतीभवतीति जटा । 'जट संघाते' ।। व्युष्टिः फले समृद्धौ च । फलं कर्मसाध्यं सुकृतादि । यथा (रामा. ६. ९५. २९)—

> 'तस्यैव तपसो व्युष्ट्या[7] प्रसादाच्च स्वयंभुवः ।
> नासुरेभ्यो न देवेभ्यो भयं मम कदाचन ।।'

इति सर्वानन्ददर्शितः प्रयोगः (टी. स. पृ. ८६) । 'एषा [8]व्युष्टिः समाख्याता' इति वामनवृत्तौ प्रयोगः । व्युच्छ्यते समाप्यते व्यापारोऽनेनेति व्युष्टिः । 'उच्छी विवासे' । विवासः समाप्तिरिति धातुवृत्तौ[9] (पृ. ९७) । विपूर्वः करणे स्त्रियां क्तिन् (३. ३. ९४), व्रश्च ... इत्यादिना (८. २. ३६) षत्वं च । [10]चकारात् स्तोत्रेऽपीति स्वामी (पृ. २७८) ।। दृष्टिर्ज्ञानेऽक्ष्णि दर्शने । अक्षिण नेत्रे । करणे क्तिन्प्रत्ययः (३. ३. ९४) । दर्शनं ज्ञानम् । भावे क्तिन् । यथा—न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति ।। ३७—८ ।।

[1] Mb. 1. 25. 14; Apte's Dict. p. 793. [2] स्यात् त्रुटिरिति मु. ग्र. [3] कालमानयोरिति मु. ग्र. [4] क्षत्रियवर्गे Tv. [5] 'कूट परितापे'। 'अच इः' (उ. ४. १३९). [6] 'कृदिकारादक्तिनः' सि. कौ. (पृ. १२०). [7] व्युष्ट्याम् इति मु. ग्र. [8] व्युष्टिसमाख्याता Tj1, Tj2. [9] समाप्तिर्विवास इति तरङ्गिण्याम्, 'विपूर्वश्चायं प्रायः प्रयुज्यते' इति पुरुषकारे इति मुद्रित मा. धा. [10] चशब्दः स्तुतौ इति मु. ग्र.

(पा.) सूक्ष्मैलायां—संशयेऽपि सा । कालो लघ्वक्षरचतुर्भागोच्चारणकालः । अल्पो लेशः ।। आर्त्युत्कर्षाश्रियः कोट्यः । आर्तिरटनिः । [1]'निंट्टुकोप्पु' । 'कोटि-

रश्नौ प्रकर्षेऽग्रे संख्यायामटनौ तथा' इति वैजयन्ती[2] (पृ. २२०, श्लो. ११) ।। मूले लग्नकचे जटा। [3]लग्नकचस्तपस्विनां जटा। 'जुड'।। व्युष्टिः फले—दर्शने। फलं हेतुकृतम्। 'तस्यैव तपसो व्युष्टिः प्रसादो हि स्वयंभुवः'[4] ।। ३७–८ ।।

[1] B3 omits. [2] 'कोटिस्त्वश्रौ प्रकर्षेऽग्रे दशोपायगमे गतिः' इति मु. ग्र. [3] A1 adds मूलं नाम दारुधनुः। 'आनुविल्लु'. [4] टी. स. पृ. ८६.

इष्टिर्यागेच्छयोः सृष्टं निश्चिते बहुनि त्रिषु ।
कष्टे तु कृच्छ्रगहने दक्षामन्दागदेषु तु ।। ३९ ।।
पटुर्द्वौ वाच्यलिङ्गौ च

इति टान्तवर्गः

(वि.) यज्ञे च संग्रहश्लोके काङ्क्षायामिष्टिरुच्यते[1] ।

इष्यत इति इष्टिः । 'इष इच्छायाम्' ।।

सृष्टं वहुनियुक्ते च निर्मिते निश्चिते [2]मतम् ।। 83 ।।

सृज्यत इति सृष्टम् । 'सृज विसर्गे' ।।

कृच्छ्रे गहनसामादौ कष्टशब्दोऽभिधीयते ।

कषिष्यति कृच्छ्रं भविष्यतीति कष्टम् । 'कष हिंसायाम्' ।।

[3]प्रवीणे रोगरहिते धृष्टे च पटुरुच्यते ।। 84 ।।

पटतीति पटुः । 'पट गतौ' । पटुकष्टशब्दौ वाच्यलिङ्गौ ।। ३९ ।।

इति टान्तवर्गः[4]

[1] इष्यते K_4, K_5. [2] अपि च K_5. [3] लवणे K_6. [4] K_2 adds टान्तशब्दसंख्या १८.

(विव.) इष्टिर्यागेच्छयोः। [1]'श्रुयजिदृशिस्तुभ्यः करणे' (वा. ३. ३. ९४) इति यजतेर्धातोः क्तिन्प्रत्यये इष्टिः यागः। 'इषु इच्छायाम्'। भावे क्तिनि ष्टुत्वे

च (८. ४. ४१) इष्टिरिच्छा । 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते' [2]इति वार्तिककारीयवचनविशेषेऽपि इष्टिशब्दः ।। सृष्टं निश्चिते बहुनि त्रिषु । निश्चितमसंदिग्धम् । यथा—घृतसृष्टं भोजनम् इति । घृतप्रचुरमित्यर्थः । 'सृष्टं तु निश्चिते प्राज्ये [3]मुक्तिनिर्मितयोस्त्रिषु' इति रुद्रः । सृज्यते स्म सृष्टम् । क्तः ।। कष्टे तु कृच्छ्रगहने । कृच्छ्रं दुःखम् । गहनं दुष्प्रवेशस्थानम् । कषिष्यति पीडयिष्यतीति कष्टम् । 'कष हिंसायाम्' । कष्टं भविष्यतीत्याहुरिति महाभाष्यकारेण भविष्यदर्थे क्तप्रत्ययान्तशब्दप्रयोगाद् भविष्यदर्थे क्तप्रत्ययः । 'कृच्छ्रगहनयोः कषः' (७. २. २२) इति [4]इडागमप्रतिषेधः ।। दक्षामन्दा—वाच्यलिङ्गौ च । पटुर्दक्षः क्षिप्रकारी । अमन्दः आलस्यरहितः । अगदो रोगरहितः । पाटयतीति पटुः । 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ. १. १८) इत्यौणादिकसूत्रेण 'पट गतौ' इति धातोः ण्यन्तादुप्रत्ययः । धातोः पटादेशश्च । द्वौ वाच्यलिङ्गौ पूर्वोक्तौ कष्टपटुशब्दावित्यर्थः ।। ३६ ।।

इति टान्तवर्गः

[1] *Kāśikā* omits दृशि (p. 221); *Kaumudī* adds इषि (p. 549). [2] *Kāśikā* (p. 6). [3] मुक्त° Tv. [4] Tv adds निष्ठायाम्.

(पा.) इष्टि—बहूनि त्रिषु । बहूनि प्राज्ये । 'मुक्तनिर्मितयोः प्राज्ये त्रिषु सृष्टं च निश्चिते' इति रुद्रः ।। कष्टे तु—वाच्यलिङ्गौ च । कष्टमसत्त्वे त्रिलिङ्गम् । दुःखे नपुंसकम् ।। अनुक्तम्—

[1]घटा गोष्ठीघटनयोः कूपीटमुदरे जले ।
हृष्टो हृषितवद्रोमाञ्चितविस्मितयोस्त्रिषु ।।
[2]स्याद् भृष्टिः शून्यवाटयां[3] स्याददृष्टोऽतिशयेऽपि च ।
चिपिटः [4]पिच्छितेऽपि स्यादवटः स्यात् प्रहावपि ।।

प्रहिः कूपः ।

कुक्कुटोऽग्निकणेऽपि स्यात् कुकुटिः कपटेऽपि च ।
वर्णाटो गायने चित्रकरे स्त्रीकृतजीवने ।।
कुण्डकीटस्तु [5]दार्यां च मृषावादविचक्षणे ।

कीकटौ निःस्वकृपणौ शैलाटौ सिंहदेवलौ ।।
रेवटं दक्षिणावर्तशङ्खं रेणुस्तु रेवटः ।। ३९ ।।

इति टान्तवर्गः

[1] A1 adds घटा गोष्ठी घटना च. [2] सा भृष्टिः B3, C1. [3] A1 adds 'शून्यवाटि' 'गोडलवाड'. [4] पिच्छिले A1, B3. [5] दानेऽपि A1.

अथ ठान्ताः——

नीलकण्ठः शिवेऽपि च ।
पुंसि कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा ।। ४० ।।

(वि.) महेश्वरे मयूरे च दात्यूहे खञ्जने तथा ।
कलविङ्के चैव नीलकण्ठशब्दोऽभिधीयते[1] ।। 85 ।।

[2]नीलः कण्ठो यस्य नीलकण्ठः ।

जठराभ्यन्तरे चैव भवनाभ्यन्तरे तथा ।
अश्मीये च कुसूले च कोष्ठशब्दः प्रवर्तते[3] ।। 86 ।।

कुष्यतेऽस्मादिति कोष्ठः । 'कुष निष्कर्षे'[4] ।। ४० ।।

[1] उदाहृतः J2. [2] नीलवर्णः कण्ठे K4, K6. [3] प्रकीर्तितः J2, K5. [4] निष्कोषे J2; निकर्षे K2, K6.

(विव.) नीलकण्ठः शिवेऽपि च। शिवे शंकरे। अपिशब्दाद् 'दात्यूहे ग्रामचटकखञ्जरीटमयूरेषु' इति सुभूतिचन्द्रः। पुंसि——अन्तर्गृहं तथा। अन्तर्जठरं कुक्षेरन्तःप्रदेशः। कुसूलो मृदादिनिर्मितो धान्यावपनस्थानम्। अन्तर्गृहं [1]गृह-मध्यगतमपवरकाख्यम्। कुष्यते निष्कृष्यते मलादिकमस्मादिति कोष्ठः। 'कुष निष्कर्षे'। निष्कर्षणं निःसारणमिति धातुवृत्तौ[2]। 'उषिकुषिगर्तिभ्यः[3] स्थन्' (उ. २. ४.) इति स्थन्प्रत्यये गुणः ष्टुत्वं[4] च ।। ४० ।।

[1] B5, B6 add गृहाभ्यन्तरं. [2] 'निष्कर्षो बहिर्निःसारणम्' इति मुद्रित मा. धा. (पृ. ५३१). [3] °काशिभ्यः Tv. [4] टुत्वं B5.

(पा.) नीलकण्ठः शिवेऽपि च । [1]मयूरेऽपि स्यात् ।। पुंसि—अन्तर्गृहं तथा । कुसूलो धान्यभाण्डारम्[2] । [3]'धान्यकोष्ठे कुसूलोऽस्त्री'[4] इति वैजयन्ती । (पृ. १६४, श्लो. ६४) ।। ४० ।।

[1] A1 adds कामगेऽपि स्यात् । 'पिचुक'. [2] B3 omits; भण्डारः A1. [3] धान्यकोशः A1, C1. [4] अथ इति मु. ग्र.

निष्ठा निष्पत्तिनाशान्ताः काष्ठोत्कर्षे स्थितौ दिशि ।
त्रिषु ज्येष्ठोऽतिशस्तेऽपि कनिष्ठोऽतियुवाल्पयोः ।। ४१ ।।

इति ठान्तवर्गः

(वि.) निष्ठा कार्यस्य निष्पत्तौ [1]याच्ञायां प्रत्ययेऽपि च ।
नाशान्तयोर्निर्वहणे निष्ठा स्यात् परमागतौ ।। 87 ।।

नियतं तिष्ठतीति निष्ठा । 'ष्ठा गतिनिवृत्तौ' ।।

मर्यादायां कालभेदे [2]स्थितौ दारुहरिद्रयोः ।

प्राच्यादिदिशि चोत्कर्षे काष्ठाशब्दः प्रकीर्त्यते[3] ।। 88 ।।

काशत इति काष्ठा । 'काशृ दीप्तौ' ।।

[4]ज्येष्ठोऽग्रजेऽतिविख्याते नक्षत्रे मासवृद्धयोः ।

अतिशयेन वृद्धो[5] ज्येष्ठः ।।

अतिस्वल्पेऽवयस्थे च कनिष्ठो वाच्यलिङ्गकः ।। 89 ।।

[6]अतिशयेनाल्पः कनिष्ठः ।। ४१ ।।

इति ठान्तवर्गः[7]

[1] याच्ञाप्रत्यययोरपि K6. [2] स्याच्च K5; धातु° K4, K6. [3] प्रकीर्तितः K5; प्रकथ्यते J2. [4] लोकेऽपि J2. [5] K3 adds प्रसिद्धः शब्दः. [6] J2 omits derivation. [7] K2, K3 add ठान्तवर्गसंख्या ६; ठान्तशब्द° J2.

(विव.) निष्ठा निष्पत्तिनाशान्ताः। निष्पत्तिः निर्वहणम्। नाशो दर्शनाभावः। अन्तो विनाशः। यथा—नैष्ठिक इति। [1]तिष्ठतेः सोपसर्गाद् 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङि निष्ठा। 'क्तक्तवतू निष्ठा' (१. १. २६) इति परिभाषितप्रत्यययोऽपि निष्ठा ॥ काष्ठोत्कर्षे स्थितौ दिशि। स्थितिः मर्यादा। काशत इति काष्ठा। 'हनिकुषिनिरमिकाशिभ्यः क्थन्' इति थन्प्रत्ययः (उ. २. २)। [2]षत्वष्टुत्वे (८.२.३६,८.४.४१)। दारुणि नपुंसकलिङ्गः प्रागुक्तः (१,पृ.२२२)। अष्टादशनिमेषाः[3] काष्ठा इति प्रागुक्ता (१, पृ. ७६) ॥ त्रिषु ज्येष्ठोऽतिशस्तेऽपि। 'ज्य च' (५.३.६१) इति सूत्रेण प्रशस्यशब्दस्य ज्यादेशे [4]इष्ठन्प्रत्यये (५.३.५५) च ज्येष्ठः। वृद्धशब्दादप्यतिशायनार्थे 'वृद्धस्य च' (५.३.६२) इति इष्ठन्प्रत्यये ज्यादेशे च ज्येष्ठशब्दोऽत्यन्तवृद्धवचनः। शेषे—'ज्येष्ठोऽग्रजे स्त्रियां ज्येष्ठा [5]देवीनक्षत्रभेदयोः' इति ॥ कनिष्ठोऽतियुवाल्पयोः। यूनि अत्यल्पे चेत्यर्थः। 'युवाल्पयोः कनन्यतरस्याम्' (५. ३. ६४) इति युवाल्पशब्दाभ्यामतिशायनार्थे इष्ठन्प्रत्यये कनित्यादेशे[6] कनिष्ठः ॥ ४१ ॥

इति ठान्तवर्गः[7]

[1] Tj1, Tj2 add 'ष्ठा गतिनिवृत्तौ'. [2] 'व्रश्चभ्रश्च . . . छशां षः'. [3] निमेषास्तु इति मूलपाठः. [4] 'अतिशायने तमबिष्ठनौ'. [5] देवी गङ्गा लक्ष्म्याः ज्यायसी वा. [6] कन्नादेशे B5, B6. [7] Tv adds शब्दसंख्या षट्.

(पा.) निष्ठा निष्पत्तिनाशान्ताः। निष्पत्तिः परिसमाप्तिः। नाशोऽदर्शनम्। अन्तः प्रध्वंसः ॥ काष्ठोत्कर्षे स्थितौ दिशि। स्थितिर्मर्यादा ॥ त्रिषु ज्येष्ठो—युवाल्पयोः। 'ज्यायान् ज्येष्ठश्चाग्रजन्मन्यतिशस्तातिवृद्धयोः'[1] इति वैजयन्ती (पृ. २२८, श्लो. ७) ॥ अनुक्तम्—

भिक्षापात्रेऽपि कमठं जरठस्तु जरत्यपि।

कच्छपे पुंलिङ्गः [कमठः] ॥

पृष्ठं चरममात्रेऽपि षष्ठी गिरिसुतापि च ॥
काण्डपृष्ठः कीर्तिसुते[2] गतेऽपि च कुलात्कुलम्।
अजातपाणिग्रहणे वण्ठः स्याद् वामनेऽपि च ॥ ४१ ॥

इति ठान्तवर्गः

[1] °अतिवृद्धातिशस्तयोः इति मु. ग्र.　　　[2] कीर्तिसुतः कृतकपुत्रः.

अथ डान्ताः—

दण्डोऽस्त्री लगुडेऽपि स्याद् गुडो गोलेक्षुपाकयोः ।
सर्पमांसात्पशू व्याडौ गोभूवाचस्त्विडा इलाः ॥ ४२ ॥

(वि.)　[1]उपाये दमने मन्थे व्रतिभिर्धार्यवेणुके ।
लगुडे [2]व्यूहभेदे च दण्डशब्दो विवक्षितः[3] ॥ 90 ॥

[4]दाम्यत्यनेनेति दण्डः । 'दमु उपशमने' ॥

हस्तिसंनहने गोले [5]गुलिकेक्षुविकारयोः ।
गुडः स्नुह्याख्यवृक्षे स्याद् व्याडो मांसात्पशावहौ ॥ 91 ॥

गुडतीति गुडः । 'गुड रक्षायाम्' ॥ [6]मांसात्पशुर्व्याघ्रादिः । व्यडति हन्तुमुद्युङ्क्त इति व्याडः । 'अड उद्यमने' ॥

बुधपत्न्यामिडा चेला गवि वाचि क्षितौ तथा ।

इल्यत इति इला इडा च । 'इल स्वप्नक्षेपणयोः' ॥ ४२ ॥

[1] उपायदमने K4, K6.　[2] राजभेदे K5, K6.　[3] अभिधीयते K3.
[4] दम्यते K5.　[5] गुडिका° K5.　[6] K5 adds मांसमत्तीति मांसात्.

(विव.) दण्डोऽस्त्री लगुडेऽपि स्यात् । दम्यतेऽनेन पुरुष इति दण्डः । 'दमु उपशमे' । 'ञमन्ताड्डः' (उ. १. ११९) । शेषे—'दण्डस्तु मानभेदे स्यात् सैन्योपायदमेषु च' इति । मानभेदो जलसारसंग्रहेऽभिहितः 'क्षेत्रज्ञैः कथितो दण्डः सविंशतिशताङ्गुलः' इति । 'सामदाने भेददण्डौ' इत्युपायः प्रागुक्तः (पृ. ४९६) । दमो नाम दुष्टनिग्रहार्थं राजभिः क्रियमाणो धिग्दण्डादिः प्राणवियोजनान्तम् । यथा—'दण्डं दुष्टेषु[1] पातयेत्' (या. स्मृ. १. ३. ३६८) । धरणिग्रन्थेऽपि—

'दण्डो लगुडमन्थानसैन्योपायदमेषु[2] च ।
[3]व्यूहभेदे मानभेदे चण्डांशोः पारिपार्श्वके ॥'

इति (पृ. ४५, श्लो. २९७) ।। गुडे गोलेक्षुपाकयोः । गोलो नाम मृत्पिण्डादिकृतो वृत्तावयवसंनिवेशो गुलिकाख्यः । इक्षुपाकस्तु [4]फाणितादप्युत्कृष्टः शर्कराया अपकृष्टो घनीभूतो गुडाख्यया प्रसिद्धः । 'गुड रक्षायाम्'[5] इत्यस्माद् इगुपधलक्षणे कप्रत्यये (३. १. १३५) गुडः । गुडाशब्दष्टाबन्तः स्नुहीवचनः प्रागुक्तः (१, पृ. २७६) । 'गुडः स्याद् गोलके [6]हस्तिसंनाहेक्षुविकारयोः' इति विश्वप्रकाशः (पृ. ४३, श्लो. १) ।। सर्पमांसात्पशू व्याडौ । मांसभक्षकः पशुः मांसात्पशुः सिंहव्याघ्रादिः । सर्पश्च मांसात्पशुश्चेति द्वन्द्वः । विशेषेणाभिमुख्येनाडति प्राणिवधार्थमुद्युङ्क्त इति व्याडः । 'अड उद्यमने' । अच्प्रत्ययः (३. १. १३४) ।। भूगोवाचस्त्विडा इलाः । अत्र गोशब्देन स्त्रीव्यक्तिरेव विवक्षिता । भूम्यादित्रयं प्रत्येकं [7]शब्दद्वयेनोच्यते । लडयोरभेदाद् उभयोः शब्दयोरर्थसाम्याच्च लाघवार्थमन्तस्थोपधाशब्दस्यापि प्रकरणादुत्कृष्यात्रैवानुशासनं कृतम् । इलन्ति स्वपन्त्यत्रेति भूः इला, इल्यते क्षिप्यत इति गौर्वाक् च । 'इल स्वप्नक्षेपणयोः' (३. १. १३५) । लडयोरभेदादेकस्मादेव धातोः शब्दद्वयम् । इलाशब्दो बुधभार्यायामपि, यस्याः पुत्रः पुरूरवाः ।। ४२ ।।

[1] दण्डचेषु इति मु. ग्र. [2, 3] यमसैन्येषु वाजिनि इति; दण्डो दमे इति च मु. ग्र.
[4] फाणितं गोरसविकारः, पक्वेक्षुरसो वा. [5] रक्षणे Gm_1, Tj_1. [6] हस्ते संनाहे B_5, B_6.
[7] इडा इलेति.

(पा.) दण्डोऽस्त्री लगुडेऽपि स्यात् । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे दमे' इति वैजयन्ती (पृ. २३३, श्लो. ३८) ।। गुडो गोलेक्षुपाकयोः । गोलो मृच्छिलादिपिण्डः । इक्षुपाकः इक्षुविकारः । 'गुडः स्याद् गोलके [1]हस्तिसंनाहेक्षुविकारयोः' इति विश्वः (पृ. ४३, श्लो. १) ।। सर्पमांसात्पशू व्याडौ । मांसात्पशुः व्याघ्रः । 'व्याडो व्याघ्रे खले सर्पे' इति जयकोशः[2] ।। भूगोवाचस्त्विडा इलाः । बुधयोषिदपि स्यात् ।। ४२ ।।

[1] हस्ते संनाहे इति मु. ग्र. [2] रभस इति भा.दी. (पृ. ४६६).

क्ष्वेडा वंशशलाकापि नाडी कालेऽपि षट्क्षणे ।
काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु ।। ४३ ।।
स्याद् भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने ।

इति डान्तवर्गः

(वि.) कर्णरोगे विषे ध्वाने दुर्लभे कुटिले शणे ।। 92 ।।
[1]लोहिताक्षे फले चैव भटानां सिंहनिस्वने ।
क्ष्वेडा वंशशलाकायां भटे दन्तोष्ठवाद्यके ।। 93 ।।

क्ष्वेडयतीति क्ष्वेडा । 'क्ष्वेड अव्यक्ते शब्दे' ।

[2]दूर्वाप्रणाल्योर्नाडी स्यात् सिराङ्गान्ते[3] व्रणान्तरे ।
नाडी षट्क्षणकाले च चर्यायां कुहनस्य[4] च ।। 94 ।।

[5]नालयतीति नाडी । 'णल गन्धने बन्धने च' ।।

नाले बाणेऽर्वति जले वर्गावसरयोरपि ।
गजानां वन्धनस्तम्भे रहस्ये काण्ड उच्यते ।। 95 ।।

अर्वाग्र कुत्सितः । काम्यत इति काण्डः । 'कमु कान्तौ' ।।

नदीपाते भूषणे च तुरङ्गाणां च भूषणे ।
मूलद्रव्येऽपि वणिजो भाजने भाण्डमिष्यते[6] ।। 96 ।।

भण्डयतीति भाण्डम् । 'भडि कल्याणे' ।। ४३ ।।

इति डान्तवर्गः[7]

[1] रोहिताक्षे K4; °ताक्षफले J2, K5. [2] °प्रणाड्योः K5. [3] स्थिरगन्धे J2.
[4] कुहकस्य J2, K4. [5] नलति K4; 'नल गतौ' K3, K6. [6] उच्यते J2.
[7] K2 adds डान्तशब्दसंख्या ८.

(विव.) क्ष्वेडा वंशशलाकापि। छत्रपञ्जरादिनिर्माणार्थं पुनः पुनः विपाटच तनूकृता वंशशलाका क्ष्वेडेति शब्दायते। 'क्ष्वेड अव्यक्ते शब्दे'[1]। शेषे— 'दन्तोष्ठवाद्ये क्ष्वेडा[2] स्त्री पुंसि कर्णमले विषे' इति ।। नाडी कालेऽपि षट्क्षणे। कालः घटिकारूपः। अपिशब्दात् शरीरगतशि[सि]रायां च प्रागुक्ता (पृ. ४०२)।। काण्डोऽस्त्री—वारिषु। दण्डे यथा—कदलीकाण्डः सूरणकाण्ड इति। बाणे यथा— [3]अकाण्डवातजानां लोकप्रहाराणाम् इति। अर्वा कुत्सित इति सुबोधिनीकारादयो व्याकृतवन्तः। वर्गो महाप्रबन्धेषु वक्तव्यसमुदायैकदेशः। यथा—सप्तकाण्डं रामा-

यणम् । त्रिकाण्डोऽमरकोश इति । अवसरे यथा—अकाण्डे ताण्डवम् इति । वारिणि जले यथा—'रामायणकथेव विविक्तकाण्डा शरदः' इति नलचरिते श्लेषार्थे। काम्यत इति काण्डः। 'कमु कान्तौ'। 'अमन्ताड्डः' (उ. १. ११९) । हस्तिबन्धनस्तम्भेऽपि ।। स्याद् भाण्डं—वणिग्धने । [4]सुवर्णादिकृतमश्वाभरणमात्रं चामरादिकं वा भाण्डशब्दार्थः। अमत्रं मृन्मयमन्यद्वा कांस्यादिपात्रमात्रम्। यथा—भाण्डशुद्धिरिति । वस्त्रधान्यादिपण्यक्रयणकाले वणिजा विक्रेत्रे दत्तं धनं मूलवणिग्धनम् । यद्वा—देशान्तरे कालान्तरे वा भाविलाभार्थं वणिजा स्थापितं विक्रेयं धान्यादिरूपं धनं मूलवणिग्धनम्। यथा—'तरीषु तत्रत्यमफल्गु भाण्डं सांयात्रिकानावपतोऽभ्यनन्दत्'[5] इति माघकाव्ये (शिशु. ३. ७६) ।। ४३ ।।

इति डान्तवर्गः

[1] पचाद्यच् (३. १. १३४). [2] क्ष्वेला B5, Gm3. [3] अकाण्डपातजातानां B6.
[4] Tv omits 3 lines. [5] आपतत: B5, Tj1.

(पा.) क्ष्वेडा वंशशलाकापि। सिंहनादेऽपि[1] स्यात् ।। नाडी कालेऽपि षट्क्षणे । सिरायामपि स्यात् ।। काण्डोऽस्त्री—वारिषु । दण्डः पलाशादिः[2] । अर्वं निकृष्टम्। तच्च 'निकृष्टप्रतिकृष्टार्व°' इत्युक्तमेव (पृ. ७६) ।। स्याद् भाण्डम्—वणिग्धने । आभरणमात्रेऽपि स्यात् । 'वणिङ्मूलधने पात्रे भाण्डं भूषाश्वभूषयोः' इति वैजयन्ती (पृ. २२५, श्लो. २३) ।। अनुक्तम्—

कुण्डं जलाग्न्योश्चाधारे मुण्डः स्याच्च विधुंतुदे ।
चण्डी प्रियतमायां च रण्डा वारस्त्रियामपि ।।
शिरस्स्रजि च पीडा स्याच्चूडा बाह्वोश्च भूषणे ।
मारुण्डोऽण्डे [3]भुजङ्गीनां गोमायूनां च मण्डले ।।
जलरुण्डो जलावर्ते [4]जलरेणौ जलोरगे ।। ४३ ।।

इति डान्तवर्गः

[1] °नादश्च B3, C1. [2] रम्भादिविटपः A1. [3] भुजङ्गानां A1.
[4] जलरेणुर्जलबिन्दुः; पयोरेणौ भुजङ्गमे इति वि.प्र. (पृ. ४६, श्लो. ३९).

अथ ढान्ताः—

भृशप्रतिज्ञयोर्बाढं प्रगाढं भृशकृच्छ्रयोः ॥ ४४ ॥
शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्तसंहतौ ।

(वि.) अङ्गीकारे भृशार्थे च बाढशब्दोऽभिधीयते[1] ।

बाहत इति बाढम् । 'बाहृ प्रयत्ने' ॥

[2]प्रगाढः स्याद् भृशार्थे च कृच्छ्रे [3]वलयुते दृढे ॥ 97 ॥

[4]कृच्छ्रं कष्टम् । प्रगाहत इति प्रगाढम् । 'गाहू विलोडने' ॥

भृशे स्थूले प्रगाढे च शक्ते त्रिषु दृढः स्मृतः ।

दृंहतीति दृढः । 'दृहि वृद्धौ' ॥

संहते रचिते व्यूढः पृथुले वाच्यलिङ्गकः ॥ 98 ॥

व्यूहत इति व्यूढः । 'ऊह वितर्के' ॥ ४४ ॥

इति ढान्तवर्गः[5]

[1] प्रयुज्यते J_2.　[2] प्रगढं K_3, K_5.　[3] बलवति K_4.　[4] J_2 omits.
[5] K_2 adds ढान्तशब्दसंख्या ४; ढान्तवर्ग° J_2.

(विव.) भृशप्रतिज्ञयोर्बाढम् । भृशमत्यर्थम् । प्रतिज्ञा अङ्गीकारः । 'क्षुब्धस्वान्त...' इत्यादिना (७. २. १८) भृशार्थे बाढशब्दो निपातितः ॥ प्रगाढं भृशकृच्छ्रयोः । कृच्छ्रं गहनम् । प्रयत्नेन गाह्यते प्रविश्यत इति प्रगाढम् । 'गाहू [1]विलोडने' । क्तः ॥ शक्तस्थूलौ—संहतौ । शक्तो बलवान् । स्थूलः पीनः । 'दृढस्थूलबलयोः' इति निपातितः (७. २. २०) । विन्यस्तं रचनाविशेषेण स्थापितं चतुरङ्गबलम् । यथा—व्यूढा सेना । संहतः मिलितः । यथा—[2]व्यूढा ब्राह्मणा इति । शेषे—'व्यूढस्तु पृथुले त्रिषु' इति । पृथुले यथा—'व्यूढोरस्कः' इति (रघु. १. १३) । प्रगाढादयश्चत्वारः शब्दा वाच्यलिङ्गाः ॥ ४४ ॥

इति ढान्तवर्गः[3]

[1] प्रवेशने B5, Gm3. [2] व्यूढो ब्राह्मणः Tj1, Tj2. [3] B5, B6 add अत्र शब्दाः ४.

(पा.) भृशप्रतिज्ञयोर्बाढम् । बाढेन कृतम् । 'बाढं त्वनुमतौ भृशे' इत्यव्ययेषु जयकोशः । बाढं कृतम् ।। प्रगाढं--संहतौ ।। ४४ ।।

इति ढान्तवर्गः

अथ णान्ताः--

भ्रूणोऽर्भके स्त्रैणगर्भे बाणो बलिसुते शरे ।। ४५ ।।
कणोऽतिसूक्ष्मे धान्यांशे संघाते प्रमथे गणः ।

(वि.) स्त्रीणां गर्भे च शिशुके भ्रूणशब्दोऽभिधीयते[1] ।

मात्रा भ्रियत[2] इति भ्रूणः । 'डुभृञ् धारणपोषणयोः' ।।

बाणो दैत्ये पृषत्के च शराङ्गे केवले भवेत् ।। 99 ।।

बणतीति बाणः । 'बण[3] शब्दे' ।।

कणोऽतिसूक्ष्मे धान्यांशे पिप्पल्यां जीरके कणा ।

कणतीति कणः । 'कण शब्दे' ।।

संख्यायां प्रथमे स्तोमे सैन्याङ्गे गण उच्यते ।। 100 ।।

गण्यत इति गणः । 'गण संख्याने' ।। ४५ ।।

[1] प्रकथ्यते J2. [2] भ्रूण्यते । 'भ्रूण आशायाम्' । घञ् इति भा. दी. (पृ. ४६७). [3] 'बण क्वण शब्दे' K4, K5.

(विव.) [1]भ्रूणोऽर्भके स्त्रैणगर्भे । अर्भको बालः । व्रीह्यादिगर्भनिवृत्त्यर्थं स्त्रैणग्रहणम् ।। बाणो बलिसुते शरे । बलिसुतो बाणासुरः । झिण्टीवचनः बाणशब्दः[2] स्त्रीपुंसयोः प्रागुक्तः (१,पृ. २५६) ।। [3]कणोऽतिसूक्ष्मे धान्यांशे । अतिसूक्ष्मेऽत्यल्पे यथा--'चिच्छेद कणशः शरान्' इति । धान्यस्य व्रीहितण्डुलादे-

रेकदेशे यथा—कणभुक् इति। पिप्पल्यां जीरके च स्त्रीलिङ्गः प्रागुक्तः (१, पृ. २७१, ५७६)। संघाते प्रमथे गणः। संघातः समूहः। प्रमथा रुद्रानुचरा भृङ्गिरिटिप्रमुखाः। गण्यत इति गणः। 'गण संख्याने'। गुल्मत्रिगुणरूपे सेनाविशेषे गणः प्रागुक्तः (१, पृ. ५३०) ॥ ४५ ॥

[1] भ्रियते भ्रूणः इति स्वामी (पृ. २८१); भ्रूण्यते 'भ्रूण आशायाम्' घञ् इति भा. दी. (पृ. ४६७). [2] बाणयति। 'बण शब्दे'। स्वार्थण्यन्तः। पचाद्यच् इति भा. दी. (पृ. ४६७). [3] कणति। 'कण निमीलने'। पचाद्यच् इति भा. दी. (पृ. ४६७).

(पा.) भ्रूणोऽर्भके स्त्रैणगर्भे। गर्भिणीश्रोत्रिययोरपि स्यात्। 'भ्रूणोऽर्भके स्त्रैणगर्भे गर्भिण्यां [1]श्रोत्रियद्विजे' इति वैजयन्ती (पृ. २१७, श्लो. ४०)। कणोऽतिसूक्ष्मे—गणः ॥ ४५ ॥

[1] श्रोत्रिये द्विजे B3, C1.

पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ४६ ॥
मौर्व्यां द्रव्याश्रिते सत्त्वशुक्लसंध्यादिके गुणः ।

(वि.) द्यूताद्युत्सृष्टधनयोर्मूल्यवेतनयोरपि ।
कार्षिके व्यवहारे च पणशब्दः प्रकीर्तितः ॥ 101 ॥

पण्यत इति पणः। 'पण व्यवहारे स्तुतौ च' ॥

मौर्व्यां सूदे भीमसेने कूपस्तम्भाप्रधानयोः ।
संध्यादौ स्पर्शरूपादौ [1]शौर्यविद्यादिकेऽपि च ॥ 102 ॥
द्रव्याश्रिते [2]च शुक्लादौ गुणः सत्त्वादिकेऽपि च ।

संध्यादिः संधिविग्रहादिः। गुण्यत इति गुणः। 'गुण अभ्यासे'[3] ॥ ४६ ॥

[1] शौर्यवीर्य° K5; °विद्याधिके K6. [2] स्यात् K5. [3] आमन्त्रणे इति मुद्रितग्रन्थेषु.

(विव.) पणो द्यूत—धनेऽपि च। आदिशब्देन कुक्कुटयुद्धादिपरिग्रहः। द्यूतादीनामुपक्रमकाले जितवते पराजितेन देयतया संप्रतिपन्नरूपकादिकं द्यूतादिषूत्सृष्टमुच्यते। भृतिर्वेतनम्। वस्त्रादिक्रयणकाले विक्रेतुर्देयं धनं मूल्यम्। तद्व्यति-

रिक्तं धनमात्रं च। 'ताम्रिके कार्षिके पणः' इति प्रागुक्तः (पृ. ६०७)॥ मौर्व्यां—गुणः। गुणाश्रयो द्रव्यमिति काणादाः। पृथिव्यादिद्रव्यसमवेतेषु चतुर्विंशतिसंख्याकेषु रूपरसादिषु। आदिशब्दः प्रत्येकं सत्त्वादित्रयेण संबध्यते। ततश्च सांख्यप्रसिद्धेषु सत्त्वरजस्तमोगुणेषु[1] सर्वप्रसिद्धेषु धैर्यशौर्यगाम्भीर्यादिषु, नीतिशास्त्रप्रसिद्धेषु क्षत्रियवर्गोक्तसंध्यादिषु[2] षट्सु (पृ. ४९४) चेत्यर्थः। शेषे—'गुणोऽभ्यासाप्रधानयोः' इति। अभ्यास आवृत्तिः। यथा—द्विगुणः, त्रिगुण इति। अप्रधाने यथा—वयमिह गुणभूताः; दधिलक्षणो गुणः इति। औदनिके (पृ. ५७०), रज्जौ (पृ. ६३६), [3]कूपके च (पृ. १६३) प्रागुक्तः[4]॥ ४६॥

[1] गुणाः सत्त्वं रजस्तमः (पृ. ९०). [2] संधिर्ना विग्रहो . . .षड्गुणाः. [3] 'कूपको गुणवृक्षकः' इति वारिवर्गे. [4] पण्यतेऽनेनेति पणः। 'नित्यं पणः परिमाणे' (३. ३. ६६) इत्यप्॥ गुण्यत इति गुणः। 'गुण आमन्त्रणे'। घञ् (३. ३. १९) इति भा. दी. (पृ. ४६७).

(पा.) पणो द्यूत—धनेऽपि च। अत्र चोत्सृष्टे द्यूतग्लहे। 'पणो विक्रेयशाकादिमुष्टौ द्यूतग्लहे भृतौ' इति जयकोशः। मौर्व्यां—गुणः। द्रव्याश्रितं रूपादि। द्रव्यशब्दस्य भव्यत्ववाचकत्वाद् विद्याशौर्यादिकं च द्रव्याश्रितम्।

'गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे।
[1]शुल्बे सत्त्वादिसंध्यादिविद्यादिहरितादिषु॥'

इति विश्वः[2]। शुल्बं रज्जुः। सत्त्वादिकं सत्त्वरजस्तमांसि। [3]संध्यादिकं संधिविग्रहादि॥ ४६॥

[1] शुक्ले B3. [2] मुद्रितविश्वप्रकाशिकायां न दृश्यते. [3] A1 adds शुक्लादिकं शक्लमृद्वादि.

निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः॥ ४७॥
वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे।

(वि.) निर्व्यापारासने [1]भृत्ये पूर्णिमादिकपर्वणि॥ 103॥
उत्सवे कालभेदे च क्षणशब्दः प्रकीर्तितः।

क्षण्यत इति क्षणः। 'क्षणु हिंसायाम्'॥

विप्रक्षत्रियवैश्यादौ शुक्लादौ कीर्तिलेपयोः ॥ 104 ॥
स्तुतौ [2]कुथायां वर्णः स्यादक्षरे वर्णमद्वयोः ।

वर्ण्यत इति वर्णः । 'वर्ण [3]वर्णक्रियाविस्तारगुणवचनेषु' ॥ ४७ ॥

[1] नृत्ये K2, K4.　　[2] कृपायाम् K6.　　[3] स्तुतौ K2, K3, K6.

(विव.) निर्व्यापार—क्षणः । व्यापारान्तरपरित्यागेन क्वचित्कर्मणि एकतानत्वं निर्व्यापारस्थितिः । यथा—'श्राद्धे क्षणः क्रियताम्' इति । कालविशेषः त्रिंशत्कलात्मकः । अत्यल्पकालमात्रेऽपि क्षणशब्दः । यथा—[1]'क्षणं निमील्य चक्षुः' इति ॥ वर्णो—तु वाक्षरे । प्रथमेनादिशब्देन क्षत्रवैश्यशूद्रा विवक्षिताः । द्वितीयेन नीलपीतलोहितादयो वर्णविशेषाः । स्तुतिः प्रशंसा । अस्मिन्नर्थत्रये रूपभेदात् पुंलिङ्गः । अकारककाराद्यक्षरेषु तु विकल्पेन । यथा—'दलेषु विलिखेद् वर्णान्' इति पुंलिङ्गे । 'ह्रस्वमवर्णं प्रयोगे' इति नपुंसके । शेषे—

'वर्णस्तालविशेषे स्याद् ब्रह्मचर्ये विशेषणे ।
विलेपने कुथायां च ॥'

इति । विलेपनमङ्गरागः । विशेषणं व्यावर्तनम् । यथा—'ध्वजं वानरवर्णितम्' इति ॥ ४७ ॥

[1] 'उन्मील्य चक्षुः क्षणम्' इति नागानन्दे (१. १); 'क्षणं निमील्य नेत्रे' इति कु. सं. (५. ५७).

(पा.) निर्व्यापार—क्षणः । कालविशेषो मुहूर्तादिः ।

'मुहूर्तद्वादशांशे च मुहूर्ते [1]पर्ववेलयोः ।
अल्पकाले च विद्वांसः क्षणशब्दं प्रयुञ्जते ॥'

वर्णो द्विजादौ—वर्णं तु [2]वाक्षरे ॥ ४७ ॥

[1] सर्व° B3, C1.　　[2] चाक्षरे C1.

अरुणो भास्करेऽपि स्याद् वर्णभेदेऽपि च त्रिषु ॥ ४८ ॥
स्थाणुः शर्वेऽपि च द्रोणः काकेऽपि च रवे रणः ।

(वि.) अव्यक्तरागे कपिले संध्यारागे दिवाकरे ।। 105 ।।
अनूरुकुष्ठनिःशब्देष्वरुणो गुणिनि त्रिषु ।

[1] इयर्तीत्यरुणः । 'ऋ गतौ' ।।

स्थिरे पिनाकपाणौ च शङ्कौ स्थाणुरुदाहृतः ।। 106 ।।

चिरं तिष्ठतीति स्थाणुः । [2]'ष्ठा गतिनिवृत्तौ' ।।

आचार्याढकमानेषु काकोले द्रोण उच्यते ।
द्रोणी स्याद् देशभेदेऽम्बुवाहिन्यां गोस्तृणस्थले[3] ।। 107 ।।

द्रवत्यत्र द्रोणः । 'द्रु गतौ' ।।

भेरीवादनकोणे च रवे युद्धे रणो मतः ।

रणतीति रणः । 'रण शब्दे' ।। ४८ ।।

[1] ऋच्छति J2. [2] J2 omits. [3] गोत्रिणस्तटे K5.

(विव.) अरुणो—अपि च त्रिषु । 'अव्यक्तरागस्त्वरुणः' इति प्रागुक्ते (१, पृ. १००) वर्णविशेषे पुंलिङ्गः । वर्णस्य भेदो विशेषोऽस्येति समासे सति द्रव्यवचनत्वे वाच्यलिङ्गः । तथा च प्रतापः—

**'अरुणः कपिले कुष्ठे संध्यारागेऽर्कसारथौ ।
अव्यक्तरागे निःशब्दे द्रव्ये त्रिषु निरूपितः ।।'**

इति[1] ।। स्थाणुः शर्वेऽपि । शर्वे महादेवे । अपिशब्दाद् ध्रुवे पुंलिङ्गः । नपुंसकलिङ्गः प्रागुक्तः[2] (१, पृ. २१९) ।। अथ द्रोणः काकोलेऽपि । काकोलः काकशब्दः प्रागुक्तः[3] (पृ. ३४४) । अत्र विश्वप्रकाशः (पृ. ४८, श्लो. ७–८)—

**'द्रोणः कृपीपतौ [4]कृष्णवायसे पर्वतेऽपि च ।
आढकानां चतुष्केऽपि द्रोणः स्यान्नीवृदन्तरे[5] ।।
द्रोणी काष्ठाम्बुवाहिन्यां गवां घासपरिस्थले ।।'**

इति। कृपीपतिर्द्रोणाचार्यः। पर्वतविशेषो द्रोण इति प्रसिद्धः। नीवृदन्तरं देश-विशेषः[6]॥ रवे रणः। 'रण शब्दे'। 'वशिरण्योरुपसंख्यानम्' (वा. ३. ३. ५८) इत्यप्। पूर्ववाक्यानुषक्तेन अपिशब्देन युद्धे प्रागुक्तः (पृ. ५४५)। विश्वप्रकाशे[7]— 'रणः[8] कोणक्वणादिषु' इति। कोणो वीणादिवादनदण्डः॥ ४८॥

[1] ऋच्छति। 'ऋ गतौ'। 'अर्तेश्च' (उ. ३. ६०) इत्युनन् इति भा. दी. (पृ. ४६७). [2] तिष्ठति। 'स्थो णुः' (उ. ३. ३७) इति भा. दी. (पृ. ४६७). [3] 'द्रोणकाकस्तु काकोलः' इति (पृ. ३४४). [4] कृष्णकाके स्यादाढकेऽपि च इति मु. ग्र. [5] घासभुजि स्थितौ इति मु. ग्र. [6] द्रवति। 'द्रु गतौ'। 'कृवृजॄसि...' (उ. ३. १०) इति नः इति भा. दी. (पृ. ४६७). [7] मु. ग्र. न दृश्यते. [8] रणतीति रणः। पचाद्यच्.

(पा.)　अरुणो—स तु त्रिषु। आदिशब्देन भास्करसारथावपि॥ स्थाणुः शर्वेऽपि च। [1]शाखाशून्यवृक्षविशेषेऽपि स्यात्॥ द्रोणः काकेऽपि। 'परिमाणे दारुपात्रे द्रोणोऽस्त्री वायसे पुमान्' इति वैजयन्ती (पृ. २३३, श्लो. ४०)॥ अथ रवे रणः। युद्धे नपुसकं च[2]॥ ४८॥

[1] °वृक्षस्कन्धे B3, C1.　[2] A1 omits च.

ग्रामणीर्नापिते पुंसि त्रिषु श्रेष्ठेऽधिपे त्रिषु॥ ४९॥
ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवौ।

(वि.)　ग्रामाधिपे श्रेष्ठपुंसि नापिते भोगिकेऽपि च॥ 108॥
　　पण्याङ्गनानीलिकयोर्ग्रामणीर्ग्रामकारिणि।

ग्रामं स्ववशं नयतीति ग्रामणीः। 'णीञ् प्रापणे'॥

　　अजमेषादिलोम्न्यूर्णा भ्रूमध्यावर्तके तथा[1]॥ 109॥

[2]ऊर्णोत्याच्छादयतीत्यूर्णा। 'ऊर्णुञ् आच्छादने'॥ ४९॥

[1] J2, K6 add ऊर्णः स्वर्णे वृक्षभेदे चातुर्वर्ण्याध्वरेन्दुषु.　[2] ऊर्णूयते J2, K6.

(विव.)　ग्रामणीः—ग्रामाधिपे त्रिषु। नापितः क्षुरकर्मोपजीवी। तत्र पुंलिङ्गः। [1]अर्थान्तरे वाच्यलिङ्गः। श्रेष्ठो यूथपतिः। यथा—अश्वग्रामणीः।

पुरुषग्रामणीः इति। ग्रामं नयति तत्तत्कार्यार्थं स्वस्थानं नयतीति ग्रामणीः। 'सत्सूद्विष...' इत्यादिना (३.२.६१) नयतेः क्विप्। 'अग्रग्रामाभ्यां नयतेर्णो वक्तव्यः'[2] (वा. ३.२.६१) इति णत्वम्॥ ऊर्णा—चान्तरा भ्रुवौ। आदिशब्देन शशकमूषकादीनां ग्रहणम्। भ्रुवावित्यत्र 'अन्तरान्तरेण युक्ते' इति द्वितीया (२.३.४)। भ्रूद्वयमध्यवर्तिरोमावर्त इत्यर्थः। यथा नागानन्दे—'उष्णीषः स्फुट एष मूर्धनि विभात्युर्णेयमन्तर्भ्रुवोः'[3] इति (१.१७; ५.३२)। ऊर्णोति आच्छादयतीत्यूर्णा। 'ऊर्णुञ् आच्छादने'। ऊर्णोतेर्डप्रत्ययः[4] (३.२.१०१)॥ ४९॥

[1] B5 omits the Sentence. [2] वाच्यः B5. [3] Tj1, Tj2 add 'नो विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यति'. [4] ऊर्णोतेर्डः इति° B5, Gm3.

(पा.) ग्रामणीर्नापिते—चान्तरा भ्रुवौ॥ ४९॥

हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या॥ ५०॥
त्रिषु पाण्डौ च हरिणः स्थूणा स्तम्भेऽपि वेश्मनः।

(वि.) हरिणी सुरयोषायां [1]वृत्तभेदपिशङ्गयोः।
कनकप्रतिमायां च मृगीहरितयोरपि॥ 110॥
हरिणः कृष्णसारे स्यात् पीतपाण्डुरयोरपि[2]।

मनो हरतीति हरिणः। 'हृञ् हरणे'॥

स्थूणा लोहप्रतिकृतौ गृहस्तम्भे गदान्तरे[3]॥ 111॥

चिरं तिष्ठतीति स्थूणा। [4]'ष्ठा गतिनिवृत्तौ'॥ ५०॥

[1] वृक्ष° J2. [2] °पाण्डुरवर्णयोः J2, K2, K4. [3] व्याधिविशेषे. [4] J2, K6 omit.

(विव.) हरिणी—हरिता च या। हरिणशब्दाद् मृगपर्यायात् [1]'जातेरस्त्रीविषयात्...' इत्यादिना (४.१.६३) ङीषि हरिणी कुरङ्गी। हरति मन इति विग्रहे हरतेः औणादिके इनच्प्रत्यये (उ. २.४८) गौरादिङीषि[2] (४.१.४१) हरिणी स्वर्णप्रतिमा। हरितशब्दात् पलाशवर्णवचनाद् 'वर्णादनुदात्तात्तोपधात्तो नः' (४.१.३९) इति ङीपि प्रत्यये उपधातकारस्य नत्वे

च या काचन स्त्रीलिङ्गपदाभिधेया दूर्वालतिका हरिणीत्युच्यते। शेषे—'हरिणी वृत्तभेदेऽपि [3]यूथिकासुरयोषितोः' इति। ।' रसयुगहयैन्सौ म्रौ स्लौ गो यदा हरिणी मता' इति वृत्तरत्नाकरोक्तलक्षणविशेषो (३. ९६) वृत्तविशेषः। सुरयोषिति यथा—'प्रजिघाय समाधिभेदिनी हरिरस्मै हरिणीं सुराङ्गनाम्' (रघु. ८. ७९) इति। हरिणशब्दः पाण्डुवर्णे द्रव्ये वाच्यलिङ्गः (१, पृ. ९९)। वर्णमात्रे तु पुंसीति[4] प्रागुक्तः (१, पृ. १०१)॥ स्थूणा स्तम्भेऽपि वेश्मनः। स्थूणा[5] गृहस्तम्भः। चकारात् लोहप्रतिमायां प्रागुक्ता (पृ. ६४१)॥ ५०॥

[1] 'पुंयोगादाख्यायाम्' ङीष् इति भा. दी. (पृ. ४६८). [2] 'षिद्गौरादिभ्यश्च'. [3] पाण्डुरा° B5. [4] Tj1 omits पुंसि. [5] तिष्ठति। 'रास्नासास्नास्थूणावीणाः' (उ. ३. १५) इति साधुः इति भा. दी. (पृ. ४६८).

(पा.) हरिणी—हरिता च या। [1]हरितवर्णा काञ्चनमयीत्यर्थः॥ त्रिषु पाण्डौ च हरिणः। कृष्णसारेऽपि स्यात्॥ स्थूणा स्तम्भेऽपि वेश्मनः। लोहप्रतिमायामपि॥ ५०॥

[1] B3 omits the Sentence; हरितवर्णया A1.

तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे॥ ५१॥
वणिक्पथे च विपणिः सुरा प्रत्यक् च वारुणी।

(वि.) उदन्यातर्षयोस्तृष्णा निन्दाकारुण्ययोर्घृणा।

तृष्यत्यनयेति तृष्णा। 'ञितृष पिपासायाम्'॥ [1]घृण्यतेऽनयेति घृणा। 'घृणु दीप्तौ'॥

आपणे पण्यवीथ्यां च पण्ये विपणिरुच्यते॥ 112॥

[2]विपणन्त्यत्रेति विपणिः। 'पण व्यवहारे'॥

प्रतीचीमद्ययोर्गण्डदूर्वायां वारुणी मता।

वरुणस्येयं वारुणी॥ ५१॥

[1] घृणति K6; घृणत्यनया K2. [2] विपण्यत इति K5.

(विव.) तृष्णे—द्वे। अभिलाषमात्रं[1] स्पृहा। यथा—धनतृष्णा विद्यातृष्णेति, यद्विशेषः पिपासा। यथा—'अम्भोधिनापि किं तेन येन तृष्णा न शाम्यति' इति। 'ञितृष पिपासायाम्' इति धातोः [2]पिपासावृत्तित्वेऽपि तृष्णाशब्दस्य निरूढलक्षणतया मुख्यतुल्यत्वाद् नानार्थत्वं युक्तम्। एवमेव तर्षतृषातृट्शब्दाश्च नानार्थतया बोद्धव्याः॥ जुगुप्साकरुणे घृणे[3]। अत्र जुगुप्साशब्देन बीभत्सरसस्थायिभावो गृह्यते। करुणा दया॥ वणिक्पथे च विपणिः। वणिक्पथो हट्टः। 'आपणे पण्यवीथ्यां च [4]पण्ये च विपणिः स्त्रियाम्' इति रुद्रः। 'नाडित्रोट्याजिराजिभ्रुकुटिविपणयो दीधितिर्धूलिरालिः' इति स्त्रीलिङ्गप्रकरणे वाचस्पतिलिङ्गानुशासनं च॥ सुरा प्रत्यक् च वारुणी। [5]प्रत्यगिति दिग्वाचकमव्ययम्। वरुणस्येयमिति [6]वारुणी। प्रतीची दिक्। 'सुरा च वरुणात्मजा' इत्यागमः। अत एव सुरापर्यायेषु वरुणात्मजा इत्युक्तम् (पृ. ६४३)॥ ५१॥

[1] B5 omits मात्रम्. [2] पिपासावति B5. [3] घ्रियते सिच्यते हृदयमनया। 'घृ सेचने'। बाहुलकाद् नक्। स्त्रियां टाप् इति श. द्रु. (पृ. ३९४). [4] पणे B5. [5] B5 adds प्रत्यगञ्चति दिशां मध्ये. [6] 'तस्येदम्' इत्यण् (४. ३. १२०).

(पा.) तृष्णे स्पृहा—विपणिः। 'आपणे पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम्' इति रुद्रः॥ सुरा प्रत्यक् च वारुणी॥ ५१॥

करेणुरिभ्यां स्त्री नेभे द्रविणं तु बलं धनम्॥ ५२॥
शरणं गृहरक्षित्रोः श्रीपर्णं कमलेऽपि च।

(वि.) करेणुः कर्णिकारे स्याद्धस्तिनीगजयोरपि॥ 113॥

[1]के रेणुरस्येति करेणुः॥

बले पराक्रमेऽपि[2] स्याद् द्रविणं काञ्चने धने।

द्रवतीति द्रविणम्। 'द्रु गतौ'॥

शरणं वधरक्षित्रोर्गृहरक्षणयोरपि॥ 114॥

शीर्यत इति शरणम्। 'शॄ हिंसायाम्'॥

श्रीपर्णमग्निमन्थाब्जभद्रपर्णीषु[3] कथ्यते ।

श्रीयुतपर्णत्वात् श्रीपर्णम् ।। ५२ ।।

[1] करं नयतीति करेणुः J2, K4; K5 omits. [2] च K5. [3] °पर्णेषु K5.

(विव.) करेणुरिभ्यां स्त्री नेभे । हस्तिन्यां [1]करेणुशब्दः स्त्रीलिङ्गः । [2]पुंगजे तु ना पुंलिङ्ग इत्यर्थः । मत्तावस्थायां के मूर्ध्नि विक्षिप्तो रेणुरस्येति करेणुः ।। द्रविणं तु बलं धनम् । बलं शौर्यम् । धनं सुवर्णरजतादिवित्तमात्रम् । तद्विशेषे[3] काञ्चनेऽपीति केचित्[4] ।। शरणं गृहरक्षित्रोः । शृणाति विपदं हिनस्तीति शरणम् । 'शॄ हिंसायाम्' । 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति कर्तरि ल्युट् । [5]'प्रतिशरणमशीर्णज्योतिरग्न्याहितानाम्' इति[6] प्रयोगः (शिशु. ११. ४१) । 'शरणं तरुणेन्दुशेखरः' इति रक्षके । [7]रूपभेदाद् नपुंसकत्वम् । 'शरणं रक्षणे वधे' इति विश्वप्रकाशः (पृ. ५०, श्लो. ३७) ।। श्रीपर्णं कमलेऽपि च । श्रीः शोभा पर्णेष्वस्येति श्रीपर्णम् । अपिशब्दाद् अग्निमन्थाख्यवृक्षे प्रागुक्तम् (१, पृ. २५४) । भद्रपर्ण्यां कट्फले च ङीबन्तोऽपि प्रागुक्तः (पृ. २३७, २३६) ।। ५२ ।।

[1] B5 adds कलेणु°. [2] B5 omits पुम्. [3] तद्विशेषेण काञ्चनम् B5. [4] द्रवतीति द्रविणम् । 'द्रु गतौ' । 'द्रुदक्षिभ्यामिनन्' (उ. २. ५३) इतीनन्प्रत्ययः. [5] °अशीर्य° Tj1, Tj2. [6] B5 adds गृहे. [7] रूपभेदावकल्पनम् B5.

(पा.) करेणुरिभ्यां—बलं धनम् । काञ्चनेऽपि स्यात् । 'द्रविणं काञ्चने वित्ते द्रविणं च पराक्रमे' इति विश्वः (पृ. ५१, श्लो. ४४) ।। शरणं गृहरक्षित्रोः । रक्षणवधयोरपि स्यात्[1] । 'शरणं [2]वधरक्षित्रोः शरणं रक्षणे गृहे'[3] इति विश्वः (पृ. ५०, श्लो. ३७) ।। श्रीपर्णं कमलेऽपि च । [4]वृक्षविशेषेऽपि स्यात् ।। ५२ ।।

[1] B3, C1 omit स्यात्. [2] गृह° A1. [3] वधे A1. [4] श्रीवृक्ष° A1.

विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु ।। ५३ ।।
प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ।

(वि.) तीक्ष्णं तिग्मे विषे क्रूरे शस्त्राभिमरयोरपि ।। 115 ।।

अभिमरो [1]मारकं युद्धम् । [2]तेजयतीति तीक्ष्णम् । 'तिज [3]निशाने' ।।

मर्यादाहेतुशास्त्रेषु नित्येयत्ताप्रमातृषु ।
[4]सत्यवादिन्येकतायां प्रमाणं [5]हिंसके भवेत् ॥ 116 ॥

प्रमीयत इति प्रमाणम् । 'माङ माने'। [6]हिंसके तु 'मीञ् हिंसायाम्' इति धातुः ॥ ५३ ॥

[1] मारयुद्धम् J2. [2] तिज्यते K5. [3] निशातने K2, K4. [4] सत्त्व° K6. [5, 6] हिंसने J2, K4.

(विव.) विषाभिमर—खरे त्रिषु । विषं कालकूटादिकम्, सहजं कृत्रिमं च । अभिमरो युद्धम् । [1]लोहः शस्त्रकम् । [2]अर्थत्रयेऽपि रूपभेदाद् नपुंसकत्वम् । खरे दुःसहे सूरकिरणादौ विशेष्यनिघ्नः । 'ते तीक्ष्णा ये धनेच्छातो युध्यन्ति द्विरदादिभिः' इति नीतिषट्साहस्र्याम् ॥ प्रमाणं—प्रमातृषु । अत्र हेतुशब्देन [3]ज्ञप्तिकारणं विवक्षितम् । यथा—'सम्यगनुभवसाधनं प्रमाणम्' इति । मर्यादा अवधिः । यथा—ग्रामयोरनयोः पर्वतः प्रमाणमिति । शास्त्रे यथा—अस्मिन्नर्थे मनुवचनं प्रमाणमिति । ज्ञानसाधनत्वाकारेण शास्त्रस्यापि हेतूपदेशेनैव ग्रहणेऽप्यलौकिकाकारेण ततो वैलक्षण्यात् पृथगुपादानं कृतम् । अथवा शास्त्रशब्देन तद्विशेषो विवक्षितः यथा—'पदवाक्यप्रमाणज्ञः' इति (मा. माघ. ७) । इयत्ता अवच्छेदः । यथा—[4]'कियत्प्रमाणमुदकम्' इति । (भो. प्र. पृ. ४०, श्लो. १८५) । प्रमातरि प्रमाश्रये यथार्थानुभवयुक्त इत्यर्थः । यथाहुर्नैयायिकाः—'प्रमासाधनप्रमाश्रययोरन्यतरत्वं [5]प्रमाणलक्षणम्' इति । 'तन्मे प्रमाणं शिवः' इति च । रभसोऽपि—

'इयत्ताहेतुशास्त्रेषु प्रमाणं सत्यवादिनि ।
मर्यादानित्ययोश्च स्यादेकतायां प्रमातरि ॥'

इति । प्रमातर्यभिधेये तद्गतबहुत्वे सत्यपि तद्विशेषणस्य प्रमाणशब्दस्य नित्यमेकवचनान्तमेवेत्यर्थः । यथा—मन्वादयः प्रमाणम् इति । सत्यवादिमात्रे यथा—प्रमाणभूतो देवदत्त इति । नित्ये यथा—'वाचा विरूप नित्यया' (ऋग्वेद ८. ७५. ६) इति । प्रमाणभूतयेत्यर्थः । 'माङ माने' इति धातोर्यथायोगं भावकरणादौ ल्युट् (३. ३. ११५, ११७, ११३) । क्वचिदर्थविशेषे तु—[6]'मीञ हिंसायाम्' इति धातोः 'मीनातिमिनोति . . .' (६. १. ५०) इत्यात्वम् ॥ ५३ ॥

[1] लोहं B5.　[2] अत्रार्थत्रये Tv.　[3]संज्ञप्ति° B5.　[4] 'कियन्मानं जलं विप्र' इति मु. ग्र.　[5] प्रमा° B5, B7.　[6] B5 adds तुर्वी.

(पा.) विषाभिमर—खरे त्रिषु । अभिमरो युद्धम् । खरमुष्णम् । 'तीक्ष्ण-मुष्णे क्ष्णुते युद्ध आत्मत्यजि[1] विषेऽयसि' इति वैजयन्ती (पृ. २३३, श्लो. ३७) ।। प्रमाणं—प्रमातृषु । हेतौ—[2]अग्निज्ञाने धूमः प्रमाणम् । मर्यादायाम्—ग्रामयोर्नदी प्रमाणम् । शास्त्रे—वेदान्तः प्रमाणम् । इयत्तायाम्—स्तनयोः [3]कञ्चुकं प्रमाणम् । प्रमातरि एकवचनमेव । 'प्रमाणमन्तःकरणप्रवृत्तयः' (शाकु. १. २२) । [4] 'इयत्ता-हेतुशास्त्रेषु प्रमाणं सत्यवादिनि' इति रभसकोशः ।। ५३ ।।

[1] आजीविषे A1.　[2] वह्नि° B3, C1　[3] कञ्चुकप्रमाणम् A1.　[4] 'मर्यादानित्ययोरेकतायामेव प्रमातरि' B3, C1.

करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि ।। ५४ ।।
प्राण्युत्पादे संसरणमसंबाधचमूगतौ ।
घण्टापथेऽथ वान्तान्ने समुद्धरणमुन्नये ।। ५५ ।।

(वि.) अङ्गहारे क्रियाभेदे गीते कर्मेन्द्रियेष्वपि ।
संवेशे साधकतमे करणं क्षेत्रगात्रयोः ।। 117 ।।
शूद्राविशोरपत्येऽपि कायस्थे करणो[1] भवेत् ।

किरन्त्यत्रेति करणम् । 'कॄ विक्षेपे' ।।

घण्टापथे रणारम्भे संसारे पुरनिर्गमे ।। 118 ।।
पुरद्वारे संसरणमसंकटचमूगतौ ।

संसरन्त्यस्मादिति संसरणम् । 'सृ गतौ' ।।

[2]समुद्धरणमुन्मूलवान्तान्नोन्नयनेष्वपि[3] ।। 119 ।।

समुद्ध्रियत इति समुद्धरणम्[4] ।। ५४–५ ।।

[1] करणं K6.　[2] उन्मूलतृणानां J2.　[3] च for अपि K2, K4.　[4] K2, K5 add समुद्धरणशब्दोऽप्येतेष्वभिधेयेषु वर्तते.

(विव.) करणं--इन्द्रियेष्वपि । क्रियाप्रसिद्धौ प्रकृष्टोपकारकः कारकविशेषः साधकतमः[1] । यथा--'करणाधिकरणयोश्च' (३. ३. ११७) । क्रियते संस्क्रियते कृषीवलैरिति कर्मणि ल्युटि (३. ३. ११५) करणं क्षेत्रम् । किरति बीजमत्रेति वा । अर्थान्तरेषु करणे ल्युट् (३. ३. ११७) । गात्रं शरीरम् । इन्द्रियं चक्षुरादिकं त्वगादिकं च । शेषे--'करणं रतिबन्धेषु नृत्तसंस्थानकर्मणोः' इति । रतिबन्धाः कामशास्त्रप्रसिद्धाः नागबन्धजृम्भितादयः । संगीतसारे--

[2]'नृत्तवादित्रगीतानां प्रयोगवशभेदिनाम् ।
संस्थानभेदान् नाटचज्ञाः करणानि प्रचक्षते ।।'

इति । यथा कुमारसंभवे (६. ४०)--

[3]'शिखराबद्धमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ।।'

इति । कर्मणि यथा--नवीकरणम्, शिथिलीकरणम् इति । प्राण्युत्पादे--घण्टापथे । जीवानां स्वस्वकर्मवशेन नरतिर्यगादीनां योनिषु संभवः प्राण्युत्पादः । संसार इति यावत् । [4]मार्गे विपुलतया असंबाधेन परस्परानुपमर्दन सेनायाः प्रसरणमसंबाधचमूगतिः । सम्यगसंबाधेन सरन्त्यत्रेति संसरणम्[5] । घण्टापथः[6] रथ्या । शेषे--'रणारम्भे संसरणं गोपुरे पुरनिर्गमे' इति ।। अथ वान्तान्ने--उन्नये । उद्ध्रियते कुक्षिकुहरादूर्ध्वं नीयत इति समुद्धरणं छर्दितान्नम् । भावसाधनत्वे तु उन्नय उत्तोलनम् । 'तत्रोद्धृतममत्रेभ्यः' (४. २. १४) इत्यत्र काशिका (पृ. ३०५) [7]'भुक्तोज्झितमुद्धृतमुच्यते, यस्योद्धरणमिति प्रसिद्धिः'[8] इति । केचित्तु--सम्यगुद्धरणं समुद्धरणमिति विगृह्य मूलग्रन्थं पठित्वा व्याचक्षते ।। ५४-५ ।।

[1] साधकतमम् B5, Gm1; °तमे Tv. [2] नृत्य° B5. [3] शिखरासक्त° इति मु. ग्र. [4] मार्गविपुलतया B5. [5] ल्युट् (३. ३. ११७). [6] 'घण्टापथः संसरणम्' इति भूमिवर्गे (१, पृ. १६४). [7, 8] भुक्तोच्छिष्ट°, प्रसिद्धेः इति मु. ग्र.

(पा.) करणं--इन्द्रियेष्वपि ।

'करणं कारणे [1]काये साधनेन्द्रियकर्मसु ।
कायस्थे [2]व्रतबन्धे च नाटचगीतप्रभेदयोः ।।'

इत्यजयः[3] ।। प्राण्युत्पादे—घण्टापथे । प्राण्युत्पादः संसारः ।

'संसरणं रणारम्भे पुरनिर्गमगोपुरे ।
घण्टापथे च संसारेऽप्यसंबाधचमूगतौ ।।'

इति विश्वः (पृ. ५४, श्लो. ८७'–८) ।। अथ वान्तान्ने समुद्धरणमुन्नये । उन्नय उद्धारः । 'उद्धरणं समुद्धारवान्तान्नोन्मूलनेष्वपि' इति विश्वः (पृ. ५४, श्लो. ८६) ।। ५४–५ ।।

[1] कायसाधन° A1.　　[2] रति° A1.　　[3] जयः A1, B3; अजय इति भा. दी. (पृ. ४६८).

अतस्त्रिषु विषाणं स्यात् पशुशृङ्गेभदन्तयोः ।
प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ।। ५६ ।।
संकीर्णौ निचिताशुद्धावीरिणं शून्यमूषरम् ।

इति णान्तवर्गः

(वि.)　विषाणं पशुशृङ्गेऽपि क्रोडदंष्ट्रेभदन्तयोः ।
अजशृङ्ग्याख्यौषधेऽपि विषाणी परिकथ्यते[1] ।। 120 ।।

विषाणशब्दः [2]सत्त्ववति त्रिषु लिङ्गेषु वर्तते । स [3]विशेष्याश्रयात् । वेवेष्टीति विषाणम् । 'विष्लृ व्याप्तौ' ।।

क्रमनिम्नक्षितितले क्षान्तप्रगुणयोरपि ।
प्रह्वे चतुष्पथे चैव प्रवणो वाच्यलिङ्गकः ।। 121 ।।

[4]प्रवणतीति प्रवणः । 'वण शब्दे' ।।

अपवित्रे च निचिते संकीर्णः समुदाहृतः ।

सम्यक् कीर्णो व्याप्तः संकीर्णः ।।

ईरिणं शून्यदेशे स्यादूषरे चापि संमतम्[5] ।। 122 ।।

ईरयतीति ईरिणम् । 'ईर क्षेपे' ।। ५६ ।।

इति णान्तवर्गः[6]

[1] परिपठ्यते K4. [2] स्वत एव K4. [3] सविशेष° K6. [4] प्रवनति, 'वन षण संभक्तौ' K3, K4, K6. [5] संगतम् K5. [6] K2 adds णान्तशब्दसंख्या ३४.

(विव.) अथ त्रिषु––इभदन्तयोः । [1]अथ णकारान्तसमाप्तिपर्यन्तं चत्वारः शब्दा लिङ्गत्रये वर्तन्ते । त्रिलिङ्गत्वमात्रे साधर्म्यम् । न तु सर्वदा । ततश्च विषाण-शब्दः तटमण्डलादिशब्दवत् स्वभावादेव त्रिलिङ्गः । इतरे तु विशेष्यनिघ्नाः ।। पशूनां गोमहिष्यादीनां शृङ्गे गजदन्ते [2]च विषाणम् । विशेषेण स्यति नाशयति विरोधिनमिति विषाणम् । 'षोऽन्तकर्मणि' । ल्युः (३. १. १३४) । 'उपसर्गात् सुनोतिसुवतिस्यति ...' (८. ३. ६५) इति षत्वम् । स्त्रीलिङ्गे तु शृङ्गवचनस्य अजादिपाठात् टाबन्तत्वे विषाणा । 'कृष्णविषाणया कण्डूयते' इति टाबन्तस्य प्रयोगः । अशृङ्गिवचनत्वे तु पिप्पल्यादिपाठाद् विषाणीति ङीषन्तः प्रागुक्तः (१, पृ. २८६) । विश्वप्रकाशे (पृ. ५२, श्लो. ६४–५)–– [3]'विषाणा तु क्रोड-द्विरददंष्ट्रयोः' इति ।। प्रवणं––चतुष्पथे । पुरोभागे किंचिदवनतायां भूमौ वाच्यलिङ्गः । न तु विषाणशब्दवद् स्वभावतः । यथा––प्राचीनप्रवणो देशः, उदक्प्रवणा भूमिः । इत्यादि । चतुष्पथे तु ना पुंलिङ्ग इति त्रिलिङ्गत्वस्या-पवादः । विशेषेण क्लेशराहित्येन प्रवन्ते जना अत्रेति प्रवणः । 'प्रुङ [4]गतौ' । प्रकर्षेण वनुते वा । 'प्रनिरन्तःशर ...' इत्यादिना (८. ४. ५) णत्वम् । प्रह्वे यथा––भक्तिप्रवण इति । विद्याप्रवणो धर्मप्रवण इत्यादौ अनुकूलार्थे लक्षणया प्रयोगः ।। संकीर्णौ निचिताशुद्धौ । निचितो व्याप्तः । यथा––म्लेच्छसंकीर्णो देश इति । अशुद्धे यथा––संकीर्णा जातिरिति ।। इरिणं शून्यमूषरम् । शून्यं [5]मानुष-पश्वादिसंचाररहितं गृहादिकम् । क्षारमृत्तिकाप्रायं स्थलमूषरं च । इर्यति सस्या-भावादनिरुद्धो गच्छत्यत्रेति इरिणः । 'ऋ गतौ' । 'अर्तेः किदिच्च' (उ. २. ५५) इति इनन्प्रत्ययः, धातोरिरित्यादेशश्च । कित्त्वाद् गुणाभावः । ह्रस्वादिरयं शब्दः । 'तत्स्वकृतमिरिणोऽभवत्' इति श्रुतौ दर्शनात्[6] । 'ईरिणं शून्यमूषरम्' इति दीर्घादौ रभसः पठितवान् इति सुभूतिचन्द्रः ।। ५६ ।।

इति णान्तवर्गः

[1] B5, B6 omit अथ. [2] अपि for च B5. [3] 'विषाणं तु क्रोडद्विरददन्तयोः। पशोः शृङ्गे विषाणा तु मेषशृङ्ग्यां प्रकीर्तिता' इति मु. ग्र. [4] ल्युट् (३. ३. ११७). [5] मनुष्य° B5. [6] 'तृष्यन्नेत्यवेरिणम्' *RV.* VIII. 4. 3.

(पा.) अथ त्रिषु—इभदन्तयोः। स्त्रीलिङ्गे गौरादित्वाद् ङीष्[1]। प्रवणं—चतुष्पथे। अथ त्रिष्वित्यधिकारात् चतुष्पथवर्जं त्रिलिङ्गः। प्रवणो देशः। प्रवणा भार्या। तत्परेत्यर्थः। 'उच्यते प्रवणः प्रह्वस्तत्परश्च परायणः' इति हलायुधः (अ. मा. २. १९७)॥ संकीर्णे—इरिणं शून्यमूषरम्। 'इरिणं तूषणं शून्यमिष्वासोऽस्त्रमिषुक्षिपा' इति ह्रस्वादिषु जयकोशः। 'ईक्षणं दर्शने दृष्टावीरिणं शून्यमूषरम्' इति दीर्घादिषु रभसकोशः[2]॥

अनुक्तम्—

पार्ष्णिः पाश्चात्यभागेऽपि वृष्णिः पाषण्डकेऽपि च।
[3]परश्वधेऽपि द्रुघणा निकषेऽपि च रोषणः।

मुद्गरे द्रुघणः पुंलिङ्गः। [4]रोषणः त्रिलिङ्गः॥

ज्यारवेऽपि व्याकरणं सुरतेऽपि च धर्षणम्।
वयःसंधौ च नारीणां गर्भे [5]दोहदलक्षणम्।
वातरायण उन्मत्ते पुरुषे चाप्रयोजने॥ ५६॥

इति णान्तवर्गः

[1] B3 adds विषाणी. [2] जयकोशः B3, C1. [3] परश्वथे A1. [4] रोषणी B3. [5] दौहृद° B3.

देवसूर्यौ विवस्वन्तौ सरस्वन्तौ नदार्णवौ॥ ५७॥
पक्षिताक्ष्यौं गरुत्मन्तौ शकुन्तौ भासपक्षिणौ।

(वि.) अमरे चापि मार्ताण्डे विवस्वानभिधीयते।

प्रभया विवस्त इति विवस्तेजोऽस्यास्तीति वा विवस्वान्। 'वस आच्छादने'॥

नदे समुद्रे रसिके सरस्वान् [1]परिकीर्त्यते॥ 123॥

गोवाङ्नदीभारतीषु स्त्रीरत्ने च सरस्वती ।

सरः सर्वतः सरणमस्यास्तीति सरस्वान् ॥

वैनतेये विहङ्गे च गरुत्मान् समुदाहृतः ॥ 124 ॥

गरुतः पक्षा अस्य सन्तीति गरुत्मान् ॥

शकुन्तः कीटभेदे स्याद् [2]रक्तकाके विहङ्गमे ।

गन्तुं शक्नोतीति शकुन्तः । 'शक्लृ शक्तौ' ॥ ५७ ॥

[1] परिकथ्यते J2. [2] रक्तशाके K3.

(विव.) देवसूर्यौ विवस्वन्तौ । देवशब्देन देवतामात्रमुच्यते ॥ सरस्वन्तौ नदार्णवौ । सरस्वानित्येव प्रसिद्धो नदविशेष इति केचित् । शोणादिनदमात्रमित्यपरे । अत्र प्रतापः—

'सरस्वती नदीभेदे [1]गोवाग्देवतयोर्गिरि ।
स्त्रीरत्ने धनदे पुंसि सरस्वान् रसिके बुधौ ॥'

इति । नदीभेदः कुरुक्षेत्रे सरस्वत्याख्ययैव प्रसिद्धा । गवि यथा—'इडे रन्तेऽदिते सरस्वति'[2] इति (तै. सं. ७. १. ६. ८) । वाग्देवता शारदा । गिरि वचसि यथा—'व्याजहार सरस्वतीम्' इति । स्त्रीरत्नं श्रेष्ठा स्त्री । रसिकः सहृदयः । पक्षिताक्ष्यौं गरुत्मन्तौ । पक्षिजातीयो यः कश्चित् । ताक्ष्यो वैनतेयः ॥ शकुन्तौ भासपक्षिणौ । [3]भासो गृध्रसदृशः पक्षिविशेषः । पक्षी विहगमात्रम् ॥ ५७ ॥

[1] °वाग्देव्या° B5. [2] Tj1, Tj2 add प्रिये प्रेयसि. [3] 'भासो भासि समाख्यातो गोष्ठकुक्कुटगृध्रयोः' इति विश्वः । मुद्रितग्रन्थे तु 'घोष्ट°' इति दृश्यते (पृ. १७४, श्लो. २).

(पा.) देवसूर्यौ—नदार्णवौ । नदी सरस्वती । 'सरस्वती स्यात् स्त्रीरत्ने नद्यां नद्यन्तरे गवि' इति [1]जयकोशः । पक्षिताक्ष्यौं—भासपक्षिणौ । भासो [2]नाम गोष्ठकुक्कुटः । 'निगद्यते गोष्ठकुक्कुटो भासः' इति [3]रत्नमाला ॥ ५७ ॥

[1] अजयः इति टी. स. (पृ. ६२). [2] B3, C1 omit नाम. [3] 'कोष्ठकुक्कुटको भासः' इति टी. स. (पृ. ६२).

अग्न्युत्पातौ धूमकेतू जीमूतौ मेघपर्वतौ ॥ ५८ ॥
हस्तौ तु पाणिनक्षत्रे मरुतौ पवनामरौ ।

(वि.) उत्पाते धूमकेतुः स्यात् पावकग्रहभेदयोः[1] ॥ 125 ॥

धूमः [2]केतुर्यस्यासौ धूमकेतुः ॥

[3]वृत्तिकाराद्रिशक्रेषु जीमूतो गर्जदम्बुदे ।

[4]जीवो मूयतेऽत्रेति जीमूतः । 'मूङ वन्धने' ॥

पाणौ केशकलापे स्याद्धस्तस्तारेभहस्तयोः ॥ 126 ॥

[5]हन्यतेऽंशुकादिरनेनेति हस्तः । 'हन हिंसागत्योः' ॥

समीरणे निर्जरेऽपि मरुच्छब्दः प्रकीर्तितः ।

[6]कुपितेनानेन म्रियत इति मरुत् । 'मृङ प्राणत्यागे' ॥ ५८ ॥

[1] °ग्रहयोरपि K_2; K_5 omits 4 lines. [2] केतौ J_2, K_6. [3] वृत्तिकारः पोषकः ; मृद्विकार° J_2, K_2, [4] जीवनं J_2, K_6. [5] K_6 omits अंशुकादिः. [6] कुतो नानेन K_6.

(विव.) अग्न्युत्पातौ धूमकेतू । धूमलिङ्गत्वेन धूमकेतुरग्निः । यस्यां तारकायां धूमसदृशो रश्मिरुत्पद्यते स तारकाविशेषो धूमचिह्नत्वाद् धूमकेतुः । जगदनिष्टकारित्वाद् उत्पातशब्देनोक्तः । 'उपप्लवाय लोकानां धूमकेतुरिवोत्थितः' इति कालिदासः (कु. सं. २. ३२) ॥ जीमूतौ मेघपर्वतौ । जीवनस्य जलस्य मूतो [1]बन्धकविशेषो जीमूतः । पृषोदरादित्वेन शेषलोपः (६. ३. १०९) । [2]देवताडे प्रागुक्तः (१, पृ. २५६) ॥ [3]हस्तौ तु पाणिनक्षत्रे । पाणिः पञ्चशाखः । हस्ताख्यं नक्षत्रं च । कचपर्यायोत्तरत्वे तु प्रशंसावचनः (पृ. ४२५) । यथा—केशहस्त इति ॥ मरुतौ पवनामरौ । अमरो देवतामात्रम् । यथा—'इन्द्रो मरुत्वान्' इति (१, पृ. ३०) । [4]स्पृक्कायां तु मरुच्छब्दः स्त्रीलिङ्गः प्रागुक्तः[5] (१, पृ. २९५) ॥ ५८ ॥

[1] बन्धन° Tv; बद्धक° B5. [2] देवतान्तरे B6. [3] हसति। 'हस हसने'। 'हासे मृग्रिण्—' (उ. ३. ८६) इति तन् इति भा. दी. (पृ. ४६६). [4] 'स्पृक्का देवी लता लघुः' इत्योषधिविशेषे. [5] म्रियते प्राण्यनेन विनेति मरुत्। 'मृङ् प्राणत्यागे'। 'मृग्रोरुतिः' (उ. १. ९९) इति उतिप्रत्ययः.

(पा.) अग्न्युत्पातौ—पवनामरौ। [1]पर्वतोऽपि मरुत्। 'शिखरी त्रिककुन्मरुत्' इति धनंजयः ॥ ५८ ॥

[1] B3, C1 omit the sentence.

यन्ता हस्तिपके सूते भर्ता धातरि पोष्टरि ॥ ५९ ॥
यानपात्रे शिशौ पोतः प्रेतः प्राण्यन्तरे मृते ।

(वि.) हस्त्यारोहे सारथौ च [1]यन्तृशब्दोऽभिधीयते ॥ 127 ॥

[2]यच्छतीति यन्ता। 'यम उपरमे' ॥

पोषके दानशीले [3]च भर्तृशब्दोऽभिधीयते[4] ।

[5]बिभर्तीति भर्ता। 'डुभृञ् धारणपोषणयोः' ॥

यानपात्रे बालके च पोतः समभिधीयते ॥ 128 ॥

पुनातीति पोतः। 'पूञ् पवने' ॥

प्रेतस्तु प्राप्तपञ्चत्वे भवेन्नारकदेहिनि[6] ।

[7]प्रकृष्टमितः प्रेतः। 'इण् गतौ' ॥ ५९ ॥

[1] यन्ता° J2. [2] यमयति J2. [3] अपि J2. [4] विवक्षितः J2. [5] K6 omits derivation. [6] नरकदाहिनि J2. [7] प्रकर्षेण K4.

(विव.) यन्ता हस्तिपके सूते। हस्तिपको हस्त्यारोहः। सूतः सारथिः॥ भर्ता धातरि पोष्टरि। बिभर्ति। 'डुभृञ् धारणपोषणयोः'। [1]तृच् (३. १. १३३)। धारके यथा—वज्रस्य भर्ता। पोष्टा पोषकमात्रम्। पत्यौ प्रागुक्तः (पृ. ३८२)॥ यानपात्रे शिशौ पोतः। यानपात्रं [2]वहित्रम्। शेषे—'दशवर्षे गजे पोतः' इति।

यथा—करिपोतः[3] ।। प्रेतः प्राण्यन्तरे मृते । प्राण्यन्तरं नरकलोकस्थः प्राणिविशेषः प्रागुक्तः (१, पृ. १५३)। अथवा मरणादूर्ध्वमकृतसपिण्डीकरणे [4]प्रेतशब्दः । यथा— 'सपिण्डीकरणादूर्ध्वं प्रेतत्वं विनिवर्तते' इति । मृतमात्रेऽपि यथा— प्रेतसंस्कार इति ।। ५९ ।।

[1] तृचि Gm3, Tv.　[2] वहित्रे Gm3.　[3] पुनाति । 'पूञ् पवने'। 'हसिमृग्रिण्...' (उ. ३. ८६) इति तन्.　[4] प्रकृष्टां दशामितः। 'इण् गतौ'। क्तः ।।

(पा.) यन्ता—प्राण्यन्तरे मृते ।। ५९ ।।

ग्रहभेदे ध्वजे केतुः पार्थिवे तनये सुतः ।। ६० ।।
स्थपतिः कारुभेदेऽपि भूभृद् भूमिधरे नृपे ।

(वि.) उत्पाते स्याद् ग्रहे केतुः कान्तौ लक्ष्मणि केतने ।। 129 ।।

[1]कित्यते ज्ञायत इति केतुः । 'कित ज्ञाने' ।।

[2]पार्थिवे तनये चैव सुतशब्दः प्रकीर्तितः ।

सूयत इति सुतः । [3]'षु प्रसवैश्वर्ययोः' ।।

स्थपतिर्यष्टृभेदे स्यात् सूतकञ्चुकितक्षसु ।। 130 ।।

[4]यष्टा बृहस्पतिसवनयाजी । स्थापयतीति स्थपतिः । तिष्ठत्यस्मिन्निति स्थः[5] । स्थश्चासौ पतिश्चेति वा स्थपतिः ।।

पर्वते पार्थिवे चापि भूभृत् समभिधीयते ।

भुवं बिभर्तीति भूभृत् ।। ६० ।।

[1] केत्यते J2, K5; K6 omits ज्ञायते.　[2] आत्मजे पार्थिवे J2.　[3] 'षूङ् प्राणिप्रसवे' J2.　[4] बृहस्पतियागयाजी K5; बृहस्पतियज्वा J2; °सवयाजी K2.　[5] K2 adds 'ष्ठा गतिनिवृत्तौ'.

(विव.) ग्रहभेदे ध्वजे केतुः । नवमो ग्रहविशेषः केतुसंज्ञकः । ध्वजो लिङ्गम्[1] । धूमकेतुरग्निः । कित्यते ज्ञायतेऽनेनेति[2] केतुः । 'कित ज्ञाने'[3] । पता-

कायामपि। यथा—केतुदण्डः इति ॥ पार्थिवे तनये सुतः। सौति सर्वस्येश्वरो भवतीति सुतः। 'षु प्रसवैश्वर्ययोः'। क्तः। [4]अभिषुतोऽपि। यथा—सुतः सोम इति ॥ स्थपतिः कारुभेदेऽपि। कारुभेदः शिल्पिविशेषः तक्षा। अपिशब्देन 'स गीष्पतीष्टचा स्थपतिः' इति प्रागुक्तः (१, पृ. ४५५)। तिष्ठत्यत्र व्यापार इति स्थः। 'घञर्थे कविधानम्'[5] (वा. ३. ३. ५८) इति कः। स्थश्चासौ पतिश्च स्थपतिः। कञ्चुकिन्यपि। अन्तःपुररक्षणेऽधिकृतः कञ्चुकी ॥ भूभृद् भूमिधरे नृपे। भूमिधरः पर्वतः। [6]व्यक्तयोगश्च ॥ ६० ॥

[1] चिह्नम् Tj1, Tj2. [2] अनेनापि B5, B6. [3] चाय्यते अनेन वा। 'चायृ पूजानिशामनयोः'। 'चायः किः' (उ. १. ७६) इति तुः इति भा. दी. (पृ. ४६६).
[4] 'षुञ् अभिषवे' इति धातुः. [5] Gm3, Tv add 'स्थास्नापाव्यधिहनियुध्यर्थम्'.
[6] भुवं बिभर्तीति भूभृत्। 'डुभृञ् धारणपोषणयोः'। क्विप् (३. २. ७६)। 'ह्रस्वस्य पिति कृति तुक्' इति तुक्.

(पा.) ग्रहभेदे ध्वजे केतुः। ग्रहभेदे केषांचित् तस्यैव वहुवचनमिष्टम्। 'केतवो ब्रह्मपुत्राः स्युः राहुकाः शिखिनश्च ते'॥ पार्थिवे—कारुभेदेऽपि। 'स्थपतिः शिल्पिभेदेऽपि स्थपतिः कञ्चुकिन्यपि' इति विश्वः (पृ. ६८, श्लो. १५४) ॥ भूभृद् भूमिधरे नृपे ॥ ६० ॥

मूर्धाभिषिक्तो भूपेऽपि ऋतुः स्त्रीकुसुमेऽपि च ॥ ६१ ॥
विष्णावप्यजिताव्यक्तौ सूतस्त्वष्टरि सारथौ।

(वि.) ब्राह्मणात् क्षत्रियाजाते प्रधाने क्षत्रियेऽपि [1]च ॥ 131 ॥
मूर्धाभिषिक्तो राजन्ये सारथावपि वर्तते[2]।

[3]मूर्धनि अभिषिक्तो[4] मूर्धाभिषिक्तः। 'षिच क्षरणे' ॥

ऋतुर्धीरे मासि कालभेदे स्त्रीरजसि स्मृतः ॥ 132 ॥

इयर्तीति ऋतुः। 'ऋ गतौ' ॥

अजितो वल्लभेऽपि स्यादपराजितबुद्धयोः।

न जितोऽजितः[5]।

प्रधाने शंकरे विष्णौ महदादिकमूर्खयोः ।। 133 ।।
परमात्मन्यस्फुटे स्यादव्यक्तस्त्वभिधेयवत्[6] ।

न व्यक्तोऽव्यक्तः ।।

जाते जातौ[7] सम्यगूते तक्ष्णि[8] सारथिनुन्नयोः ।। 134 ।।
ब्राह्मण्यां क्षत्रियाज्जाते सूतो वन्दिनि पारदे ।

पारदः पादरसः । सूयत इति सूतः ।। ६१ ।।

[1] अपि वा J2. [2] कथ्यते J2, K5. [3] मूर्ध्नि J2. [4] अभिषिच्यते J2, K2, K5. [5] K3 adds 'जि अभिभवे'. [6] शाश्वतेऽपि च J2, K5. [7] जाते K6. [8] तीक्ष्णे K3.

(विव.) मूर्धाभिषिक्तो भूपेऽपि । पट्टाभिषिक्ते राजनि क्षत्रियमात्रे प्रागुक्तः (पृ. ४८४) । मुख्यामात्येऽपि मूर्धाभिषिक्त[1] उच्यते । मूर्धावसिक्त इति पाठे ब्राह्मणेन क्षत्रियस्त्रियामुत्पादितः पुत्रोऽपिशब्दार्थः ।। ऋतुः स्त्रीकुसुमेऽपि च । इर्यात नियतकालं प्राप्नोतीति ऋतुः । 'ऋ गतौ'[2] । स्त्रीणां प्रतिमासं जायमानं रजःपुष्पं स्त्रीकुसुमम् । अपिशब्दाद् वसन्तग्रीष्मादिरिति[3] ।। विष्णावप्यजिताव्यक्तौ । न जीयते केनापि नाभिभूयत इत्यजितो विष्णुः । अपिशब्दाद् अपराजितश्च । न व्यज्यत इत्यव्यक्तो[4] विष्णुः ।

'अव्यक्तः शंकरे विष्णावव्यक्तं महदादिके ।
आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत् ।।'

इति [5]शाश्वतः । 'त्रिष्वस्फुटे स्यादव्यक्तं क्लीबं तु परमात्मनि' इति रुद्रश्च[6] । सूतस्त्वष्टरि सारथौ । सूते रथादिकं जनयतीति सूतः तक्षा । 'षूञ् प्राणिप्रसवे' । सुवति प्रेरयत्यश्वादिकमिति सूतः सारथिः । शेषे—'सूतो रसे जातिभेदे बन्दिसुष्ठूतयोरपि' इति । रसः पारदः । जातिभेदस्तु—'ब्राह्मण्यां क्षत्रियात् सूतः' इति (या. स्मृ. १. ४. ६३) । सुष्ठु ऊयते शब्दं करोतीति सूतो बन्दी । सुष्ठु ऊतमुतं वेति विग्रहे 'ऊयी तन्तुसंताने' 'वेञ् तन्तुसंताने' इति धातुद्वयाद् निष्ठायां सूतशब्दो विशेष्यनिघ्नः ।। ६१ ।।

[1] अभिपूर्वात् 'षिच क्षरणे' इति धातोः क्तः. [2] 'अर्तेश्च तुः' (उ. १. ७४). [3] Tv adds प्रागुक्तः (पृ. ८१, ८४). [4] 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'। क्तः. [5] 'अव्यक्तशब्दं जानीयादस्फुटे परमात्मनि' इत्येव मु. ग्र. (पृ. ३३, श्लो. ३८३); विश्वप्रकाशे तु श्लोकोऽयं दृश्यते (पृ. ६४–५, श्लो. १०). [6] 'त्रिषु स्यादस्फुटोऽव्यक्तः क्लीबं तु परमात्मनि' इति टी. स. (पृ. ६४).

(पा.) मूर्धाभिषिक्तो भूपेऽपि । 'मूर्धाभिषिक्तो भूपाले प्रधाने क्षत्रियेऽपि च' इति विश्वः (पृ. ७५, श्लो. २२८) ।। ऋतुः—अजिताव्यक्तौ । अजितशब्दोऽनिर्जितेऽपि स्यात् । अव्यक्तशब्दोऽस्फुटेऽपि स्यात् ।। सूतस्त्वष्टरि सारथौ । 'क्षत्रियाद् ब्राह्मणीजाते[1] सूतः पारदबन्दिनोः' इति विश्वः (पृ. ५७, श्लो. ११) ।। ६१ ।।

[1] ब्राह्मणीजेऽपि इति मु. ग्र.

व्यक्तः प्राज्ञेऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ।। ६२ ।।
क्षत्ता स्यात् सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे ।

(वि.) मनीषिणि स्फुटे चापि व्यक्तशब्दोऽभिधीयते ।। 135 ।।

व्यज्यत इति व्यक्तः । 'अञ्जू [1]व्यक्तिम्रक्षणकान्तिगतिषु' ।।

दृष्टान्तो वर्तते शास्त्रे शास्त्रोदाहरणेऽपि च ।

दृष्टोऽन्तः निश्चयोऽत्रेति दृष्टान्तः ।।

क्षत्रियाशूद्रजे [2]द्वाःस्थे भुजिष्यातनये तथा ।। 136 ।।
क्षत्ता स्याद् देवरन्यायप्रजासृजि च सारथौ ।

[3]क्षदतीति क्षत्ता । 'क्षदि गतिहिंसनयोः' ।। ६२ ।।

[1] °श्लक्ष्ण° for °म्रक्षण° K_2, K_3. [2] द्वास्थे K_2. [3] क्षदते J_2.

(विव.) व्यक्तः प्राज्ञेऽपि । प्राज्ञः प्रतिभावान्[1] । स हि सर्वत्र प्रसिद्धत्वाद् व्यक्तः । [2]स्पष्टार्थे प्रागुक्तः (पृ. ११२) । 'व्यक्तः स्फुटमनीषिणोः' इति विश्वप्रकाशः (पृ. ५६, श्लो. ३५) ।। दृष्टान्तावुभे शास्त्रनिदर्शने । शास्त्रं व्याकरणादि ।

निदर्शनं वादिनोः संप्रतिपत्तिस्थानम्[3] । यथा—धूमवत्त्वेनाग्निमत्त्वे साधने महानसादिकम् । दृष्टः संप्रतिपन्नोऽन्तो निश्चयोऽत्रेति दृष्टान्तः ।। क्षत्ता स्यात्—शूद्रजे । द्वाःस्थे द्वारपालके । वैश्यायामपि शूद्रजः इति केषांचित् पाठो भ्रान्तिमूलः । तथा च याज्ञवल्क्यः—'क्षत्रिया मागधं वैश्याच्छूद्रात् क्षत्तारमेव च' इति (या. स्मृ. १. ४. ६४) । 'क्षत्तार्याशूद्रयोः सुतः' इति शूद्रवर्गस्योक्तस्यापि (पृ. ६२१) यथा न विरोधः तथा तत्रैव व्याख्यातम् । क्षदतीति क्षत्ता । 'क्षदिर् गतिहिंसनयोः'[4] ।। ६२ ।।

[1] प्रतिभानवान् Tv.　[2] B6 adds प्रव्यक्तः.　[3] उदाहरणमित्यर्थः.　[4] 'क्षदिः सौत्रो धातुः शकलीकरणे भक्षणे च' इति सि. कौ. (पृ. ५११) । 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (उ. २. ५३) इति तृच्.

(पा.)　व्यक्तः प्राज्ञेऽपि । स्फुटेऽपि स्यात् ।। दृष्टान्त—शूद्रजे । [1]आर्याशूद्रजे पर्यायपठितः (पृ. ६२१[2]) ।। ६२ ।।

[1] अर्या° B3, C1.　[2] 'क्षत्तार्याशूद्रयोः सुतः'.

वृत्तान्तः स्यात् प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः ।। ६३ ।।
आनर्तः समरे नृत्यस्थाननीवृद्विशेषयोः ।

(वि.)　कार्त्स्न्ये विशेषवार्तायां भावे प्रकरणे तथा ।। 137 ।।

वृत्तान्तः स्यादवसरे प्रवृत्त्येकान्तकर्मसु ।

वृत्तोऽन्तो यस्येति वृत्तान्तः[1] ।।

आनर्तो देशभेदे स्याद् नृत्तस्थाने रणे जले[2] ।। 138 ।।

आनृत्यन्त्यत्रेत्यानर्तः । 'नृती गात्रविक्षेपे' ।। ६३ ।।

[1] वृत्तस्यान्तः J2.　[2] जने रणे इति वि. प्र. (पृ. ६२, श्लो. ७८).

(विव.)　**वृत्तान्तः—वार्तयोः । [1]वृत्तो निवृत्तोऽन्तः स्वरूपमत्रेति वृत्तान्तः । प्रकरणं प्रस्ताव इत्यर्थः । निष्पन्नः संदिग्धार्थविषयो निश्चयोऽनेनेति वृत्तान्तः[2] । प्रकारो विशेषो व्यावर्तकधर्म इति यावत् । निर्वृत्तोऽन्तो विच्छेदोऽत्रेति वृत्तान्तः**

कृत्स्नम्। अलंकारवृत्तान्तो भोजराजपर्यवसित इति; साकल्यमित्यर्थः। वार्ता जनश्रुतिः। आख्यायिका च॥ आनर्तः—विशेषयोः। नृत्तस्थानं [3]रङ्गशालामण्डपादि। नीवृद्विशेषो देशभेदः पश्चिमाम्बुधिसमीपगतः[4]। समन्ताद् नृत्यन्त्यत्र यथार्हं कबन्धा नर्तका वा जना वात्रेत्यानर्तः। 'नृती [5]गात्रविनामे'। अधिकरणे घञ्[6] (३. ३. १२१)। आनर्तदेशवासी जनोऽप्यानर्तः॥ ६३॥

[1] B5 omits वृत्तः. [2] Gm3 omits derivation. [3] रङ्गशील° B6. [4] सौराष्ट्रः (Apte's Dict. p. 334). [5] °विक्षेपे Tv. [6] 'हलश्च'.

(पा.) वृत्तान्तः—वार्तयोः। प्रकरणं प्रक्रिया। प्रकारो विशेषः। 'वृत्तान्तः प्रक्रियायां स्यात्[1] कार्त्स्न्ये वार्ताविशेषयोः' इति रुद्रः॥ आनर्तः—विशेषयोः। नृत्तस्थानं नाटचशाला॥ ६३॥

[1] च for स्यात् B3, C1.

कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु॥ ६४॥
श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः॥ ६५॥

(वि.) परेतनायके चापि शास्त्रसिद्धान्तयोरपि।
[1]अक्षेमकर्मणि क्रूरे[2] कृतान्तः स्याच्छुभाशुभे॥ 139॥

कृतोऽन्तोऽनेनेति कृतान्तः॥

शब्दादौ हरितालादौ [3]वातश्लेष्मादिकेऽपि च।
मनःशिलाहिरण्यादौ श्रोत्राद्ये भूतपञ्चके॥ 140॥
[4]भूवादिशब्दयोनौ स्याद् धातू [5]रक्तरसादिके।

धत्ते [6]मिथो [7]व्यावर्तनं रूपमिति धातुः। [8]'डुधाञ् धारणपोषणयोः'॥ ६४–५॥

[1] अन्ते कर्मणि J2. [2] क्रूरेऽपि J2. [3] °श्लेष्मातके K3, K6. [4] भूतादौ K6. [5] °वसादिके K5. [6] J2 omits मिथः. [7] व्यावर्तकं J2. [8] K3, K6 omit.

(विव.) कृतान्तो—कर्मसु। यमो वैवस्वतः। कपिलकणादादिभिराचार्यैः स्वकृतग्रन्थेष्वभ्युपगतार्थः सिद्धान्तः। दैवं प्राग्भवीयं शुभाशुभकर्म। सांप्रतिकं तु प्राणिहिंसनादिकमकुशलकर्म। अलसमूर्खादिभिः कृतं कर्म अकुशलकर्मेति केचित्। कृतस्यान्तो नाशो निश्चयः स्वरूपं फलं वा यथायथमत्रेति कृतान्तः ॥ श्लेष्मादि—धातवः। श्लेष्मादीत्यनेन वातपित्तश्लेष्मणां ग्रहणम्। अशितपीताहारस्य सारो विकारो रसः। आदिशब्देन 'वसासृङ्मांसमेदोऽस्थिमज्जाशुक्लानि धातवः' इति वैद्यकोक्तानां ग्रहणम् (वाग्भट १.८)। रसशब्दस्यानेकार्थत्वात् तन्मात्रग्रहणे द्रवद्रव्याद्यर्थान्तरप्रतिशङ्कावारणाय[1] रसरक्तयोर्द्वयोरुपादानं कृतम्। महाभूतानि पृथिव्यादीनि पञ्च। तद्गुणाः पृथिव्यादिगुणा गन्धरसरूपस्पर्शशब्दाः। इन्द्रियाणि चक्षुःश्रोत्रादीनि। अश्मविकृतिर्गैरिकमनःशिलादिः। शब्दयोनिरिरिति जात्यभिप्रायमेकवचनम्। तेन धातुगणपठिताः क्रियावचना भूवादय उक्ताः। एतानि श्लेष्मादीनि धातुशब्दवाच्यानि। दधाति शरीरादिकमिति धातुः। 'डुधाञ् धारणपोषणयोः'। 'सितनिगमि ...' इत्यादिना (उ. १.७२) तुन्प्रत्ययः।

'सुवर्णं रजतं ताम्रमारकूटं तथैव च।
लोहं त्रपु तथा सीसं धातवः सप्त कीर्तिताः ॥'

इत्युक्ता धातवः चशब्देन सूचिताः ॥ ६४–५ ॥

[1] °शङ्कां वारयितुं B5, B6, Gm3.

(पा.) कृतान्तो—कर्मसु। सिद्धान्तः शास्त्रभेदः। दैवं शुभाशुभप्रदातृ। अकुशलकर्म पापव्यापारः ॥ श्लेष्मादि—धातवः ॥ [1]महाभूतानि, तद्गुणाः शब्दस्पर्शादयः। अश्मविकृतिः [2]हेममनःशिलादिः। शब्दयोनिर्भूवादिः ॥ ६४–५ ॥

[1] C1 adds पृथिव्यादीनि.　　[2] B3 reads लोह° for हेम°.

कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे।
कासूसामर्थ्ययोः शक्तिर्मूर्तिः काठिन्यकाययोः ॥ ६६ ॥

(वि.) सर्वागम्यागारमध्ये शुद्धान्तोऽन्तःपुरो भवेत् ॥ 141 ॥

शुद्धो रक्षितोऽन्तोऽस्येति शुद्धान्तः ॥

प्रभुमन्त्रादिके [1]कास्वां सामर्थ्ये शक्तिरुच्यते ।

कासूः [2]सर्वलाख्यमायुधम् । शक्यतेऽनया जेतुमिति शक्तिः । 'शक्लृ शक्तौ' ।।

मूर्तिर्बन्धे मोहमित्योः[3] काठिन्योच्छ्रायवर्ष्मसु ।। 142 ।।

[4]मूर्च्छ्यत इति मूर्तिः । 'मुर्च्छा मोहसमुच्छ्राययोः' । 'मुर्वी बन्धने' इति वा धातुः ।। ६६ ।।

[1] काण्डे K5. [2] सबलाख्य° K6; शर्वलाख्य° J2. [3] लोहमिते J2; मितिः परिमितिरिति शेषकारः. [4] मूर्च्छति K6.

(विव.) [1]कक्ष्यान्तरे—गोचरे । सप्तम्यन्तपदद्वयं समानाधिकरणं रहस्यभूते राजसंबन्धिनि प्रकोष्ठ इत्यर्थः । तथा च अजयः—'शुद्धान्तोऽन्तःपुरे गुह्यकक्ष्याभेदे च भूपतेः' इति । अन्तःपुरे प्रागुक्तः (१, पृ. २०२) । शुद्धान्तःकरणे च ।। कासूसामर्थ्ययोः शक्तिः । कासूः [2]सर्वलाख्य आयुधविशेषः । सामर्थ्यं नाम प्रभुत्वमन्त्रोत्साहजाः शास्त्रप्रसिद्धाः तिस्रः शक्तयः[3] । यथा—'षड्गुणाः शक्तयस्तिस्रः' इति माघः (शिशु. २. २६) । अथवा प्रतिवस्तुगतः कश्चिदतीन्द्रियो धर्मविशेषः सामर्थ्यम् । यथा—अग्नेर्दाहकत्वशक्तिरिति । शब्दस्य वाचकत्वं शक्तिरित्यादि । 'शक्लृ शक्तौ' । करणे भावे क्तिन् (३. ३. ६४) ।। मूर्तिः काठिन्यकाययोः । काठिन्यं दृढत्वम् । शेषे—'उच्छ्रायमोहबन्धेषु मूर्तिः परिमिताविपि' इति । 'मुर्च्छा मोहसमुच्छ्राययोः' । 'मुर्वी बन्धने' । आभ्यां क्तिन्[4] । परिच्छेदः परिमाणं च ।। ६६ ।।

[1] कक्षान्तरे B6. [2] सबलाख्य° Gm3, Tv. [3] शक्तयस्तिस्रः (पृ. ४६४). [4] 'राल्लोपः' (६. ४. २१) इति छकारवकारयोर्लोपः; 'उपधायां च'.

(पा.) कक्षान्तरे—गोचरे । अन्तःपुरे ।। कासूसामर्थ्ययोः शक्तिः । कासूरायुधविशेषः । 'तोमरोऽस्त्री [1]लोहहालदण्डे कासूश्च सर्वला' इति वैजयन्ती (पृ. ११७, श्लो. १६६) ।। मूर्तिः काठिन्यकाययोः ।। ६६ ।।

[1] लोहहुलदण्डे इति मु. ग्र. [हुल आयुधविशेषः].

विस्तारवल्ल्योर्व्रततिर्वसती रात्रिवेश्मनोः ।
क्षयार्चयोरपचितिः सातिर्दानावसानयोः ॥ ६७ ॥

(वि.) लतायामपि विस्तारे व्रततिः परिकीर्त्यते ।

[1]प्रतनोतीति व्रततिः । 'तनु विस्तारे' । पकारस्य वकारः ॥

अवस्थाने मन्दिरे च यामिन्यां वसतिर्भवेत् ॥ 143 ॥

वसन्त्यत्रेति वसतिः । 'वस निवासे' ॥

पूजायां स्यादपचितिः क्षये त्यागे च निष्कृतौ ।

[2]अपचायनमपचितिः । 'चायृ [3]पूजानिशामनयोः' ॥

अवसाने क्षये चापि सातिर्दानेऽपि कथ्यते ॥ 144 ॥

[4]स्यतीति सातिः । 'षोऽन्तकर्मणि' ॥ ६७ ॥

[1] प्रतन्यते J2; प्रतनुते K6. [2] अपचायत इति K6. [3] पूजायाम् K2, K3.
[4] सनोति, 'षणु दाने' K2; 'क्षै क्षये' क्षातिः J2, K5.

(विव.) विस्तारवल्ल्योः प्रततिः । प्रकृष्टा ततिः प्रततिरिति विग्रहे विस्तारार्थत्वम् । बहुव्रीहिसमासेऽपि लतार्थत्वम् । 'विस्तारे प्रततिवल्ल्याम्' इति पवर्गप्रथमादिषु रभसः । केचित्तु व्रततिरिति दन्त्योष्ठ्यमन्तःस्थमाहुः । तथा च व्रतव्रातव्रतत्याद्यर्थे[1] व्रतिधातुरुन्नेय इति श्रीभोजराजः ॥ वसती रात्रिवेश्मनोः । वसन्त्यस्मिन्निति वसतिः । 'वस निवासे' । 'वहिवस्यर्तिभ्यश्चित्' (उ. ४. ६०) इत्यतिप्रत्ययः । शेषे—'वसतिः स्यादवस्थाने' इति । यथा—'वने वसतिरस्माकम्' इति ॥ क्षयार्चयोरपचितिः । क्षयः शरीरादेरवयवापगमः । 'चिञ् चयने' इत्यतः क्तिन्प्रत्यये (३. ३. ९४) अपचितिः । उपसर्गवशादर्थान्तरे वृत्तिः । अर्चा पूजा । तत्र तु 'चायृ पूजानिशामनयोः' इति धातोः प्राक् व्युत्पादिता (पृ. ४७०)॥ सातिर्दानावसानयोः । 'षणु दाने' इति धातोर्भावे क्तिनि 'जनसन...' इत्यादिना (६.४.४२) नकारस्याकारादेशे सातिर्दानम् । 'षोऽन्तकर्मणि' इत्यस्माद् 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इति निपातनात्[2] सातिरव-

सानम् । [3]विराम इत्यर्थः । [4]'क्षै क्षये' इति धातोः 'आदेच उपदेशेऽशिति' (६. १. ४५) इत्यात्वे क्षातिशब्दः (३. ३. ९४) क्षये वर्तते ।। ६७ ।।

[1] °व्रतत्यादिसिद्ध्यर्थमिति स्वामी (पृ. २८५). [2] Tv adds साधुः. [3] यम इत्यर्थः Tj1, Tj2. [4] B6 adds क्षातिरिति पाठे.

(पा.) विस्तार—अवसानयोः । वेश्मशब्देन जिनवेश्मनोऽपि ग्रहणम् । 'वसतिस्तु निशि स्थित्यां जैनानामाश्रमे[1] गृहे' इति वैजयन्ती (पृ. २४८, श्लो. २३) ।। ६७ ।।

[1] आश्रये A1, C1.

आर्तिः पीडाधनुष्कोटयोर्जातिः सामान्यजन्मनोः ।
प्रचारस्यन्दयो[1] रीतिरीतिर्डिम्बप्रवासयोः ।। ६८ ।।

(वि.) धनुष्कोटौ च पीडायामार्तिशब्दोऽभिधीयते[2] ।

अर्द्यतेऽनयेत्यार्तिः । 'अर्द तर्द पीडायाम्'[3] ।।

[4]चुल्लीकम्पिल्लगोत्रेषु छन्दःसामान्यजन्मसु ।। 145 ।।
मालतीजातिफलयोर्जातिर्धात्र्यामलंकृतौ ।

धात्री आमलकी । जायन्ते नानारूपाण्यत्रेति जातिः । 'जनी प्रादुर्भावे' ।।

आरकूटे प्रचारे च मर्यादाव्यवहारयोः[5] ।। 146 ।।
स्यन्दे च लोहकिट्टे च रीतिशब्दोऽभिधीयते ।

रीयत इति रीतिः । 'रि गतौ' 'रीङ स्रवणे' वा ।।

ईतिः स्यादतिवृष्ट्यादौ डिम्बे[6] प्रवसनेऽपि च ।। 147 ।।

ईयत इतीतिः । 'ईङ गतौ' ।। ६८ ।।

[1] °स्यन्दयोरित्यत्र 'रो रि' इति रेफलोपः. [2] अर्तिरिति पाठान्तरम्. [3] हिंसायाम् J2, K4; बृ. धा. (पृ. ३८२, ४४२). [4] कम्पिल्लः वृक्षविशेषः. [5] °विधवात्ययोः (?) K6. [6] डिम्बः उपद्रवः.

(विव.) आर्तिः पीडाधनुष्कोटचोः। 'अर्द गतौ याचने च' इत्यत्र *याचने चेति एके पेठुरित्युक्तं धातुपारायणे। तस्माद् भाववचनाद् आर्तिः पीडा (३. ३. ६४)। अर्द्यतेऽनयेति व्युत्पत्त्या धनुःकोटिरर्थः। मौर्वीसंधानप्रदेश इति यावत्। ह्रस्वादिरयं शब्द इति [1]सुभूतिचन्द्रादयः। 'शिरोऽर्ति नाशयत्याशु रसोऽयं मुचुकुन्दकः' इत्यादिप्रयोगाश्च तैरेव दर्शिताः। अपरे तु धातोराङ्पूर्वत्व-माश्रित्य दीर्घादिमाहुः। तथा च—'यस्य सायं दुग्धं हविरार्तिमार्च्छति' इति प्रयोगः॥ जातिः सामान्यजन्मनोः। भिन्नेष्वभिन्नाभिधानप्रत्ययहेतुद्रव्यादिनिष्ठो धर्मः सामान्यम् इति प्रागभिहितम् (१. ४. ३१)। उत्पत्तिः जन्म। जनेर्धातोः क्रमेण भावे करणे च क्तिन्प्रत्यये 'जनसनखनाम्...' इत्यात्वे (६. ४. ४२) जातिः। शेषे—'जातिर्धात्र्यां च [2]कम्पिल्ले छन्दोऽलंकारभेदयोः' इति। धात्री आमलकी। छन्दोभेदो वृत्तविशेषेषु छन्दोविचित्यां प्रसिद्धः। [3]अलंकारविशेषश्च। मालत्यां तु प्रागुक्ता (१, पृ. २५८)॥ प्रचारस्यन्दयो रीतिः। प्रचारो व्यवहारः। यथा—'सतां रीतिमनुस्मरन्' इति। 'प्रकारस्यन्दयोः' इति केचित् पठन्ति। तत्र तु प्रकारः स्वभाव इत्यर्थः। यथा—चापलं योषितां रीतिरिति। नूतनघटादावति-सूक्ष्मजलकणानां बहिर्निःसरणं स्यन्दः। [4]'रि गतौ' इत्यस्मात् क्तिनि रीतिः। आरकूटे प्रागुक्तः (पृ. ६११)। [5]'प्रवाहस्यन्दयो रीतिर्लोहकिट्टारकूटयोः' इति रुद्रश्च॥ ईतिर्डिम्बप्रवासयोः। डयन्ते पलायन्तेऽनेनेति डिम्बः उपद्रवः। 'डीङ विहायसा गतौ'। डिम्बप्रत्ययः। स चोपद्रवो बहुविधः।

'अतिवृष्टिरनावृष्टिः शलभा मूषिकाः शुकाः।
अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥'

इत्युक्तः[6]। स्वग्रामादन्यत्र वासः प्रवासः। ईयन्ते देशान्तरं गच्छन्त्यनयेति ईतिः। 'ईङ गतौ'। दिवादिः॥ ६८॥

[1] Tv adds सुबोधिनीकार°.　[2] मालत्याम् B_6.　[3] संस्कृतप्राकृतयोः समा जातिः (Apte' Dict. p. 733).　[4] 'री गतिरेषणयोः' B_6.　[5] प्रचारे स्यन्दे च इति विश्वः (भा. दी. पृ. ४७१); प्रसारे इति मु. ग्र. (पृ. ६१, श्लो. ५५).　[6] कामन्दकः इति मल्लिनाथः (रघु. १. ६३).　* पीडने (?).

(पा.) [1]अर्तिः पीडाधनुष्कोटचोः। पीडायां दीर्घादिश्च स्यात्[2]। अर्ते-राङ्पूर्वत्वात् क्तिनि प्रादीनाम् [3]'ऋति धातौ' (६. १. ९१) इत्यात्वमिति

षिद्भिदादिसूत्रे (३. ३. १०४) जिनेन्द्रः[4] ॥ जातिः सामान्यजन्मनोः । सामान्यं गोत्वादि । प्रचारस्यन्दयो रीतिः । प्रचारः कुलाचारः ॥ ईतिर्डिम्बप्रवासयोः । डिम्बः अतिवृष्टयादि. ॥ ६८ ॥

[1] आर्तिः A1. [2] B3 omits स्यात्. [3] 'उपसर्गादृति धातौ'. [4] 'अर्त्तेराङ्पूर्वस्य क्तिन्। "उपसर्गादृति धातौ" इत्येकादेशः। रपरत्वम्' इति मुद्रितपञ्जिकायाम् (पृ. ७१४).

उदयेऽधिगमे प्राप्तिस्त्रेता त्वग्नित्रये युगे ।
वीणाभेदेऽपि महती भूतिर्भस्मनि संपदि ॥ ६९ ॥

(वि.) महोदये व्यधिगमे प्राप्तिशब्दोऽभिधीयते[1] ।

प्राप्यत इति प्राप्तिः । 'आप्लृ व्याप्तौ' ॥

अग्नीनां त्रितये त्रेता युगेऽपि परिकथ्यते ॥ 148 ॥

त्रीन् धर्मपादानग्नीन् इता प्राप्ता त्रेता ॥

विशाले च त्रिलिङ्गयां स्याद्[2] महद् राज्य तु न द्वयोः ।
शततन्त्रीविपञ्चयां तु महती परिकीर्तिता ॥ 149 ॥

मंहत इति महती । 'महि [3]बृहि वृद्धौ' ॥

प्राप्तौ [4]मातङ्गशृङ्गारे सत्तायामवकल्कने ।
संपत्तिभस्मजननेष्वपि भूतिरुदाहृता ॥ 150 ॥

भवतीति भूतिः । 'भू सत्तायाम्'[5] । 'भू अवकल्कने'[6] ॥ ६९ ॥

[1] विवक्षितः J2, K2, K4. [2] च for स्यात् K6. [3] J2 omits बृहि. [4] गजालंकरणे. [5] J2, K2, K4 add 'भू प्राप्तौ'. [6] 'भुवोऽवकल्कने' K5, K6.

(विव.) उदयेऽधिगमे प्राप्तिः। उदयो लाभः। अधिगमः संबन्धः। प्रपूर्वादाप्नोतेः क्तिनि प्राप्तिः (वा. ३. ३. ९४)[1]। शक्तिशब्दाद्या (श्लो. ६६) एतदन्ता एकादश[2] प्रत्ययवशेन स्त्रीलिङ्गाः॥ त्रेता त्वग्नित्रये युगे। अग्नित्रयं

गार्हपत्यादिकम् । त्रेता [3]साध्ययज्ञानुष्ठानयोगाद् युगमपि त्रेताशब्देनोच्यते । तदुक्तम्—'ध्यायन् कृते यजन् यज्ञैस्त्रेतायाम्' इत्यादि । अथवा—त्रीन् धर्मस्य पादान् इता प्राप्ता त्रेता। तदुक्तम्[4]—'त्रेतायुगे समायाते[5] धर्मः पादोनतां गतः' इति । पृषोदरादित्वाद् वर्णव्यत्ययः ।। वीणाभेदेऽपि महती । नारदसंबन्धिनी वीणेत्यर्थः । तदुक्तं स्वरप्रकरणे—

'विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती ।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी ।।'

इति[6] । मह्यत इति महती । 'मह पूजायाम्' । 'वर्तमाने पृषन्महद्बृहत्...' इत्यादिना (उ. २. ८४) शतृवद्भावे ङीप्[7] । अपिशब्दाद् महत्त्वगुणयुक्ता शाला-मालादिका या काचित् ।। भूतिर्भस्मनि संपदि । भस्म भसितम् । भवत्यनया श्रीमानिति भूतिः । [8]भवतादिति वा । 'क्तिच्क्तौ च संज्ञायाम्' (३. ३. १७४) इति कर्तरि क्तिच् । 'भूतिर्मातङ्गशृङ्गारे सत्तायामपि जन्मनि' इति[9] । 'भू सत्तायाम्' 'भू प्राप्तौ' 'भुवोऽवकल्कने' यथायोगं धातवः । ऐश्वर्ये प्रागुक्ता (१, पृ. २७) ।। ६९ ।।

[1] 'आबादयः प्रयोगतोऽनुसर्तव्याः' (काशिका पृ. २२१); 'क्तिन्नाबादिभ्यः' इति भा. दी. (पृ. ४७१). [2] एकादशशब्दानां लिङ्गसहोक्तिः B5, Gm3. [3] साध्ययज्ञानयागात्(?) Tj1, Tj2. [4] पाद्मे क्रियायोगसारः इति श. द्रु. (पृ. ६६४). [5] तु संप्राप्ते B5, Gm3, Tv. [6] श्लोकोऽयं वैजयन्त्यां दृश्यते (पृ. १४५, श्लो. ११९). [7] 'उगितश्च' (४. १. ६). [8] भवतीति Gm1, Gm2. [9] 'भूतिर्भस्मनि संपदि । मांसपाकविशेषे च जनने गजमण्डने' इति अमरशेषः (*Ak.* BSS 1886, p. 303).

(पा.) उदयेऽधिगमे प्राप्तिः । अधिगमो लाभः । त्रेता—महती । 'महद् राज्ये विशाले च महती वल्लकीभिदि' इति विश्वः (पृ. ६७, श्लो. १३८) ।। भूतिर्भस्मनि संपदि । [1]मातङ्गशृङ्गारेऽपि स्यात् । 'भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि संपदि' इति विश्वः (पृ. ६१, श्लो. ५७) ।। ६९ ।।

[1] गजशृङ्गारे B3, C1; शृङ्गारोऽत्रालंकरणम्.

नदीनगर्योर्नागानां भोगवत्यथ संगरे ।
सङ्गे सभायां समितिः क्षयवासावपि क्षितिः ।। ७० ।।

(वि.) नदीपुर्योर्भुजङ्गानां मानवंशजयोषिति[1] ।
स्याद् भोगवती कौटिल्यभुक्तिरक्षावतीषु च ।। 151 ।।

भोगो भुक्तिः कौटिल्यं वास्यास्तीति भोगवती ।।

समितिः स्यात् सभायां च समाने युधि संगमे ।

समानमिति युक्तम् । [2]संयच्छन्ते संगच्छन्तेऽत्रेति समितिः । 'यम उपरमे' ।।

क्षये वासे [3]गतौ भूम्यां हिंसायां क्षितिरुच्यते ।। 152 ।।

[4]क्षीयत इति क्षितिः । 'क्षि निवासगत्योः' । 'क्षि क्षये' । 'क्षिणु[5] हिंसायाम्' ।। ७० ।।

[1] मूलवंशजयोरपि J2. [2] संयच्छते K6. [3] गते K5. [4] क्षय्यते J2.
[5] 'क्षि हिंसायाम्' K3.

(विव.) नदी—भोगवती । नागलोके तत्रस्थनदीविशेषे च सर्पशरीरयोगाद् उपभोगयोगाद्वा प्रत्येकं भोगवतीशब्दः । भोगशब्दस्य कौटिल्याद्यनेकार्थवृत्तित्वाद् [1]मतुप्प्रत्यये भोगयोगिन्यां स्त्रियामपि भोगवतीशब्दो वेदितव्यः ।। अथ संगरे—समितिः । संभूय यन्ति गच्छन्त्यत्रेति समितिः युद्धम् । सभा च । संबन्धरूपार्थे तु भाववचनः । 'इण् गतौ' । क्तिन् । युद्धपर्यायेषु समितिशब्दोक्तचा प्रत्ययतः स्त्रीलिङ्गत्वम्[2] ।। क्षयवासावपि क्षितिः । क्षयो नाशः । वासो गृहम् । 'क्षि क्षये' इति धातोः भावे क्तिनि नाशार्थत्वम् । [3]क्षियन्ति निवसन्त्यत्रेति अधिकरणार्थे विवक्षायां क्षितिः गृहम् । 'क्षिणु हिंसायाम्' इति धातोः क्तिनि 'अनुदात्तोपदेश ...' इत्यादिना (६. ४. ३७) अनुनासिकलोपे क्षितिशब्दो हिंसावचनः । भूमिपर्यायेषु प्रागुक्तः (पृ. १८५) ।। ७० ।।

[1] Tv adds तदस्यास्त्यस्मिन्निति. [2] स्त्रीलिङ्गत्वमित्यापरिच्छेदेन सहिते तु वाच्यलिङ्गः Tv. [3] 'क्षि निवासगत्योः'.

(पा.) नदीनगर्योः—क्षितिः ।। ७० ।।

रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ।
जगती जगति च्छन्दोविशेषेऽपि क्षितावपि ।। ७१ ।।

(वि.)　[1]वह्नौ तेजसि सूर्यांशौ शस्त्रे हेतिरुदाहृतः[2]।

[3]हिनोतीति हेतिः। 'हि गतौ वृद्धौ च'॥

छन्दोभेदे क्षितौ चैव जने च जगती मता॥ 153॥
विष्टपे जङ्गमे वाते [4]जगच्छब्द उदाहृतः।

[5]जङ्गम्यत इति जगती। 'गम्लृ सृप्लृ गतौ'॥ ७१॥

[1] वह्नि° K5.　[2] उदाहृता J2.　[3] हन्यतेऽनया J2.　[4] जगच्च समुदाहृतम् J2. [5] K5 adds भृशं गच्छति.

(विव.)　रवेरर्चिश्च—हेतयः। हन्यतेऽनया तमः शत्रुर्वेति हेतिः। 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इति निपातितः। क्तिन्नन्तस्यापि शस्त्रवचनस्य [1]पुंलिङ्गत्वमस्ति। तथा च—'हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम्' इति रघुवंशे (१०. १२)। 'निमार्ष्टचसौ नीतिमयेन हेतिना' इति कप्फणाभ्युदयेऽपि (२. ३८)॥ जगती—क्षितावपि। जगती भुवनमात्रे, [2]छन्दोविशेषे द्वादशाक्षरपादे च। क्षितिर्भूमिः (पृ. १८८)॥ ७१॥

[1] 'न क्ली हेतिःशस्त्रमस्त्रम्' इति वैजयन्ती (पृ. ११७, श्लो. १५७).　[2] 'जगत्या आदित्याः' इति पिङ्गलीयच्छन्दःशास्त्रे (३. ४).

(पा.)　रवेरर्चिश्च—क्षितावपि। 'जगती [1]भुवने क्ष्मायां छन्दोभेदे जनेऽपि च' इति विश्वः (पृ. ६७, श्लो. १३९)॥ ७१॥

[1] छन्दसि B3.

पङ्क्तिश्छन्दोऽपि दशमं स्यात् प्रभावेऽपि चायतिः।
पत्तिर्गतौ च मूले तु पक्षतिः पक्षभेदयोः॥ ७२॥

(वि.)　पङ्क्तिः स्याद् [1]दशमच्छन्दोदशसंख्यावलीष्वपि[2]॥ 154॥

पञ्चयत इति पङ्क्तिः। 'पचि विस्तारे'॥

आगामिकाले यमने प्रभावे दैर्घ्य आयतिः।

यमनं संयमः। आयम्यत इत्यायतिः[3] ॥

गतौ वीरे सैन्यभेदे पदातौ पत्तिरुच्यते ॥ 155 ॥

पद्यत इति पत्तिः। 'पद गतौ' ॥

अर्धमासस्य मूले स्यात् [4]पक्षमूले च पक्षतिः।

पक्षयोर्मूलं पक्षतिः ॥ ७२ ॥

[1] दशमं K6. [2] °संख्यावतिषु K6; °वतीषु K4. [3] J2 adds 'यम उपरमे'.
[4] गरुत्° K4, K5.

(विव.) पङ्क्तिश्छन्दोऽपि दशमम्।

[1]'उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥'

इति (छ. म. १. १६) पाठक्रमेण पङ्क्तिच्छन्दसो दशमत्वम्। [2]द्वे परिमाणेऽस्य छन्दस इति पङ्क्तिः। 'पङ्क्तिविंशतित्रिंशत्...' इत्यादि (५. १. ५९) निपातनात् साधुः। 'वीथ्यालिरावलिः पङ्क्तिः' इत्युक्तम् (पृ. २१६)। पङ्क्तेः शतसहस्रादित्यादिना दशत्वसंख्यायामप्युक्तः ॥ स्यात् प्रभावेऽपि चायतिः। प्रभावः प्रभुत्वशक्तिः[3]। 'आयतिस्तूत्तरे काले स्याद् दीर्घत्वप्रभुत्वयोः' इत्यजयः। पत्तिर्गतौ च। गतिर्गमनम्। 'पद गतौ'। 'पत्लृ गतौ' इति वा। क्तिन्। 'पत्तिः पदातौ पुंसि स्यात् सैन्यभेदे गतौ स्त्रियाम्' इति नानार्थसंग्रहः[4]। 'एकेभैकरथा' इति प्रागुक्तः (पृ. ५२९) ॥ मूले तु पक्षतिः पक्षभेदयोः। इह पक्षशब्दस्य द्वावर्थौ। शुक्लः कृष्णो वा अर्धमासरूपकः[5]। अपरस्तु हंसमयूरादिपत्त्ररूपः। तयोरुभयोः पक्षयोर्मूलयोः प्रतिपदि गरुत्प्ररोहभङ्गे[6] च प्रत्येकं [7]पक्षतिशब्दो वर्तत इत्यर्थः ॥ ७२ ॥

[1] उक्थात्युक्था इति मु. ग्र. (पृ. १२). [2] पञ्च परिमाणमस्य पङ्क्तिश्छन्दः इति काशिका (पृ. १४). [3] Tv adds अपिशब्दाद् आगामिनि काले दैर्घ्ये च. [4] राघवकृतनानार्थमञ्जर्यां दृश्यते (पृ. ३४, श्लो. ३३५). [5] Tv adds एकः. [6] अधमभागे Tv.
[7] पक्षति। पक्ष्यतेऽनेन वा। 'पक्ष परिग्रहे'। अच्। घञ् वा ॥ 'पक्षात्तिः' (५. २. २५) इति भा. दी. (पृ. ३३६, ४७२).

(पा.) पङ्क्तिश्छन्दोऽपि दशमम्। आवलिदशसंख्ययोरपि[1] स्यात्॥ स्यात् प्रभावेऽपि चायतिः। आयामागामिकालयोरपि स्यात्। पत्तिर्गतौ च। पदातावपि स्यात्॥ मूले—पक्षभेदयोः। पक्षभेदौ गरुत्तिथिसमुदायौ। तयोर्मूले॥ ७२॥

[1] A1 omits °संख्य°; राजिदशसंख्ययोरपि पङ्क्तिः इति टी. स. (पृ. ६६).

प्रकृतिर्योनिलिङ्गे च कैशिक्याद्याश्च वृत्तयः।
सिकताः स्युर्वालुकापि वेदे श्रवसि च श्रुतिः॥ ७३॥

(वि.) प्रजायां धातुलिङ्गादौ [1]सहजे परमात्मनि॥ 156॥

अमात्ये च प्रधाने च योनौ प्रकृतिरुच्यते।

योनिरुपादानकारणम्। प्रक्रियत इति प्रकृतिः[2]॥

[3]कैशिकीभारतीत्यादौ [4]कृष्यादौ वर्तनेऽपि च॥ 157॥
काशिकादौ विवरणे वृत्तिशब्दोऽभिधीयते[5]।

वर्ततेऽनयेति वृत्तिः। 'वृतु वर्तने'॥

शर्करायां वालुकायां रोगभेदे तथैव च॥ 158॥
[6]वालुकान्वितदेशेऽपि [7]सिकताः परिकीर्तिताः।

सिकताशब्दव्युत्पत्तिरुन्नेया॥

शास्त्रे स्वराङ्गे श्रवणे [8]वेदवृत्तान्तयोरपि॥ 159॥
श्रोत्रे श्रोत्रक्रियायां च श्रुतिशब्दोऽभिधीयते।

श्रूयत इति श्रुतिः। 'श्रु श्रवणे'॥ ७३॥

[1] संहते K6. [2] J2 adds 'डुकृञ् करणे'. [3] कैशिक्यां K2, K6. [4] क्षित्यादौ K5. [5] अभिकथ्यते J2, K4. [6] वालुकास्फीतदेशेषु J2. [7] सिकता परिकीर्तिता K6. [8] °सद्वृत्तयोरपि K6.

(विव.) प्रकृतिर्योनिलिङ्गे च। घटाद्युपादानं मृदादिकं योनिः। यथा भूतप्रकृतीनि शरीराणि। लिङ्गं स्त्रीपुंनपुंसकमिति। यथा—तृतीया प्रकृतिः।

प्रक्रियतेऽनया कार्यमिति प्रकृतिः (३. ३. ९४)। प्रधाने (१, पृ. ८६), राज्याङ्गेषु सप्तसु (पृ. ४६३), स्वभावे च (पृ. १४४) प्रागुक्ता[1]। कृत्तद्धितप्रत्ययानां प्रथमभागादौ तु प्रातिपदिकादिभागाश्च प्रकृतिशब्देनोच्यन्ते। यथा—'प्रकृति-प्रत्यययोरिवानुबन्धः' इति भारविः[2] (किरा. १३. १९)। 'दर्शपूर्णमासाविष्टीनां प्रकृतिः' इत्यादौ प्रकृतिशब्दः स्वभाववचनः। विकृतिभूतानामन्वारम्भणीयानां देवतायामितिकर्तव्यतायां वा यत्किंचिद्वैरूप्याद् विकृतित्वम्॥ कैशिक्याद्याश्च वृत्तयः। आद्यशब्देन—

'कैशिकी सात्वती चैव भारत्यारभटी तथा।
चतस्रो वृत्तयस्तेषां यासु नाट्यं प्रतिष्ठितम्॥'

इत्युक्तानां (ना. शा. ६. २५) ग्रहणम्। तल्लक्षणानि च संगीतसारे कथितानि—

'एवं नाट्ये विधातव्यो नायकः सपरिच्छदः।
तद्व्यापारात्मिका वृत्तिश्चतुर्धा तत्र कैशिकी॥
गीतनृत्तविलासाद्यैर्मृदुशृङ्गारचेष्टितैः।
[4]सात्वती कार्यसंरोषत्यागधैर्यदयोज्ज्वलैः॥
भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।
मायेन्द्रजालसंग्रामक्रोधभ्रान्त्यादिचेष्टितैः॥
विज्ञेयारभटी तज्ज्ञैः॥'

इति। 'स्त्रियां[3] कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः' इत्युक्ताः (पृ. ५५४) जीविकायामपि। स्वभावे यथा—साधुवृत्तिरिति। सूत्रव्याख्याने च यथा—काशिकावृत्तिः, लघुवृत्तिरिति॥ सिकताः स्युर्वालुकापि। वालुकाशब्देन शुष्क-नदीमध्यगतः सर्षपादप्यल्पपरिमाणः पाषाणप्रायो मृद्विशेषः उच्यते। सा बहु-वचनान्तेन स्त्रीलिङ्गेन सिकताशब्देनोच्यते। 'बहवश्च समाः सिकताः' इति वामनीयलिङ्गानुशासनोक्तेर्बहुवचननियमः (पृ. १६, श्लो. २३)। अपि च 'षिच क्षरणे' इति सिच्यन्ते जलैरिति व्युत्पत्त्या सूत्रनिर्देशात् (५. २. १०४) सिकता-शब्दः साधुरिति केचिदाहुः। 'छन्दसि निष्टक्यं...' इति सूत्रे (३. १. १२३) [5]कसेः सिकताशब्द इति महाभाष्यकारः (म. भा. पृ. ८७)। अपिशब्देन सिकतावान् देशोऽपि सिकताः। अत्र हि 'सिकताशर्कराभ्यां च' (५. २. १०४) इत्युत्पन्नस्य

मत्वर्थीयस्य 'देशे लुबिलचौ च' (५. २. १०५) इति लुपि सति व्यक्तिवचनयोः युक्तवद्भावेन स्त्रीत्वे बहुत्वे च सिकता इत्येव, एकवचनान्तेन पुण्ड्रेक्षुविकारः सिकता शर्करोच्यत[6] इत्याहुः ।। वेदे श्रवसि च श्रुतिः । श्रवसि कर्णे । चशब्देन षड्जादिस्वरांशे यथा—'पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः' इति (शिशु. १. १०) । श्रवणक्रियायां वार्तायां च ।। ७३ ।।

[1] प्रागुक्तः B5, Gm3.　[2] 'प्रकृतिर्धात्वादिः । प्रत्ययः सनादिः । तयोर्मध्यमनुबन्ध इत्संज्ञको वर्णः । यथा भूतं भूतिरित्यादौ ककारः' इति मल्लिनाथव्याख्या (पृ. २६०). [3] B5, B6 omit स्त्रियां.　[4] Gm3 omits the two verses.　[5] 'यथा—कृतेस्तर्कः, कसेः सिकता, हिंसेः सिंहः' (पृ. ८७).　[6] Tv adds व्यज्यत इति.

(पा.) प्रकृतिर्योनिलिङ्गे च । लिङ्गं तत्त्वविशेषः । 'लिङ्गं चिह्नेऽनुमानेऽपि सांख्योक्तप्रकृतावपि' इति विश्वः (पृ. २५, श्लो. २०) । कैशिक्याद्याश्च वृत्तयः । 'वृत्तिर्विवरणे [1]जीव्ये कैशिक्यादिषु चेष्यते' इति विश्वः (पृ. ६१, श्लो. ५८) सिकताः स्युर्वालुकापि । वालुकावत्प्रदेशेऽपि स्यात् । बहुत्वं केषांचिदसंमतम्[2] ।

'सिकता वालुकायां स्युः सिकताप्यामयान्तरे ।
सिकतान्वितदेशे च शर्करायां च कीर्तिता ।।'

इति विश्वः (पृ. ६८, श्लो. १५०) ।। वेदे श्रवसि च श्रुतिः । श्रवः [3]श्रवणकर्मण्यपि स्यात् ।। ७३ ।।

[1] जीवे A1.　[2] अननुमतम् A1.　[3] A1 omits श्रवण°.

वनिता जनितात्यर्थानुरागायां च योषिति ।
गुप्तिः क्षितिव्युदासेऽपि धृतिर्धारणधैर्ययोः ।। ७४ ।।

(वि.) याचिते सेविते प्राप्ते वनितं स्यात् त्रिलिङ्गकम् ।। 160 ।।
अत्यन्तजातानुरागयोषायां[1] वनिता भवेत् ।

वन्यत इति वनिता । [2]'वन षण संभक्तौ' । 'वनु याचने' ।।

कारागृहे शैलदुर्गे [3]गुप्तिर्भूगर्तरक्षयोः ।। 161 ।।

[4]गुप्यत इति गुप्तिः । 'गुपू रक्षणे' ॥

योगान्तरे धारणे च [5]सप्ततन्तौ सुखेऽपि च ।
धैर्यसंतोषयोश्चैव धृतिशब्द उदाहृतः ॥ 162 ॥

ध्रियत इति धृतिः । 'धृञ् धारणे' । 'धृङ अवस्थाने' ॥ ७४ ॥

[1] योषाणाम् J2. [2] K_2 adds शब्दे च. [3] °भूगर्भ° K_2, K_6. [4] गोप्यते K_6.
[5] सप्ततन्तुरध्वरः.

(विव.) वनिता—योषिति । स्वकीयपुरुषे जनित उत्पादितोऽतिशायितो ऽनुरागः प्रेमा[1] । तथाभूतायां स्त्रियां योषिन्मात्रे च वनिताशब्दः । 'वन संभक्तौ' । 'वनु याचने' इति धातुभ्यां क्तप्रत्यये वनिताशब्दो वाच्यलिङ्गोऽव-गन्तव्यः ॥ गुप्तिः क्षितिव्युदासेऽपि । क्षितिव्युदासो भूगर्तः । तथा च शाश्वतः[2]— 'गुप्तिः कारा च रक्षा च [3]दीर्णं च विवरं भुवः' इति । कारा बन्धनागारम् । [4]'गुप्तिस्फोटमर्कः करोति' इति प्रयोगः । रक्षणम् । 'गुपू रक्षणे' इत्यस्माद् अधिकरणे भावे च क्तिन् (३. ३. ९४) ॥ धृतिर्धारणधैर्ययोः । [5]द्रव्यस्य [6]पतन-प्रतिबन्धकरणं धारणम् । सत्यपि दुःखकारणे विषादराहित्यं धैर्यम् । ध्रियतेऽव-तिष्ठतेऽनेनेति धृतिर्धैर्यम् । शेषे—'धृतिः स्त्रियां योगभेदे छन्दोभेदे सुखेऽध्वरे' इति । योगभेदो विष्कम्भादिष्वष्टमः । छन्दोभेदो ऽष्टादशाक्षरपादः । सुखे यथा— 'कामिभिर्बहुरसा [7]धृतिरूहे' इति (किरा. ९. ४०) ॥ ७४ ॥

[1] प्रेमायां Tv. [2] बेर्लिन्नगरमुद्रितग्रन्थे न दृश्यते; शाश्वत इति स्वामी (पृ. २८७) भा. दी. च (पृ. ४७२). [3] जीर्णमिति स्वामी (पृ. २८७). [4] गुप्तिः B_5, B_6. [5] धैर्यस्य B_6. [6] वर्तन° Gm_3, Tv. [7] धृतिः संतोष इति मल्लिनाथव्याख्या (पृ. १९१).

(पा.) वनिता—योषिति । योषिन्मात्रेऽपि स्यात् ॥ गुप्तिः क्षितिव्यु-दासेऽपि । क्षितिव्युदासो भूगर्तः । [1]'पांतर' । 'गुप्तिः कारागृहे प्रोक्ता भूगर्ते रक्षणे यमे' इति विश्वः (पृ. ६१, श्लो. ६१) ॥ धृतिर्धारणधैर्ययोः । सुखेऽपि स्यात्[2] । 'धृतिः सौख्येऽपि धारणे' इति वैजयन्ती (पृ. २२१, श्लो. २०) ॥७४॥

[1] B_3 omits. [2] B_3, C_1 omit स्यात्.

बृहती क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ।
वासिता स्त्रीकरिण्योश्च वार्ता वृत्तौ जनश्रुतौ ॥ ७५ ॥

(वि.) कण्टकार्यां वारिधान्यां छन्दोवसनवाक्षु च ।
बृहती क्षुद्रवार्ताक्यां महत्यां त्रिषु कीर्तिता ॥ 163 ॥

बृहतीति बृहती । 'बृह [1]बृहि वृद्धौ' ॥

करिण्यामङ्गनायां च वाशिता वासिता मता ।

वाश्यत इति वाशिता[2] । 'वश कान्तौ' । 'वाशृ शब्दे' ॥

वृत्तावुदन्ते कृष्यादौ वार्ताशब्दः प्रकीर्तितः ॥ 164 ॥

कृष्यादिवृत्तिरत्रास्तीति वार्ता । 'वृतु वर्तने' ॥ ७५ ॥

[1] J2, K4 omit बृहि.	[2] K2 adds वासिता वा.

(विव.) बृहती—महत्यपि । क्षुद्रवार्ताकी हिङ्गुली । छन्दोविशेषो नवाक्षरपादः । 'षट्त्रिंशदक्षरा बृहती' इति श्रुतेः[1] (जै. ब्रा. २. ३०) । सा हि अनुष्टुबपेक्षया बृहत्त्वात् बृहती । बृहत्त्वगुणयुक्ता या काचन स्त्रीलिङ्गाभिधेया रथ्याशाखादिका । अपिशब्दात् कण्टकारी च[2] (पृ. १, २७०) ॥ वासिता स्त्रीकरिण्योश्च । स्त्री योषिन्मात्रम् । करिणी हस्तिनी । रक्षणार्थं गृहे वास्यत इति वासिता । 'वस निवासे' । दन्त्योष्ममध्यः । 'स्त्रियां स्त्रीमात्रवर्तिन्योर्वासिता भाविते त्रिषु' इति रुद्रोक्तत्वात् । अत्रैव शेषकारोऽप्याह—'वासितं कृतवासे स्याच्छादिते स्तम्भिते त्रिषु' इति । कृतवासे कर्पूरादिद्रव्यान्तरमिश्रणेन सुरभीकृत इत्यर्थः । 'तुल्ये भावितवासिते' (पृ. ५८१) इत्यत्र 'वासितं भावितं त्रिषु' (पृ. ४४५) इत्यन्यत्र वायं शब्दो दर्शितः । [3]छादिते तु 'वस आच्छादने' इति धातुः । स्तम्भितार्थे तु 'वसु स्तम्भे' इति धातुः । उभाभ्यां णिचि कर्मणि क्तप्रत्ययः । वाशितेति तालव्यमध्यं पठित्वा कश्चिदाचष्ट[4] । तत्र किं वा मूलमिति स एव प्रष्टव्यः । वार्ता वृत्तौ जनश्रुतौ । वृत्तिः जीवनोपायः । जनश्रुतिः किंवदन्ती । उभयत्र रूपभेदात् स्त्रीलिङ्गः । वृत्तिर्वर्तनमस्त्यत्रेति वार्ता । 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१) इति णप्रत्ययः[5] ॥ ७५ ॥

[1] श्रुतिः Tv; मुद्रितजैमिनीयब्राह्मणे 'षट्त्रिंशिनी बृहती' इति दृश्यते (२. ३०, पृ. १६७). [2] 'बृहती कण्टकारिका'. [3] 'उत्तरीयेऽपि बृहती' इति टी. स. (पृ. १००). [4] 'वाश्यते काम्यते वशे स्थाप्यते वाशते वा वाशिता। वासितेति गौडाः पेठुः, 'कृतवासेति च व्याख्यन्' इति स्वामी (पृ. २८७). [5] B5, B6 omit; 'वृत्तेश्च' इति वार्त्तिकं सूत्रमध्ये काशिकायां प्रज्ञा . . . वृत्तिभ्य इति पठितम् (पृ. ५०).

(पा.) बृहती—महत्यपि। वासिता स्त्रीकरिण्योश्च। [1]दन्त्यमध्यः। 'वासिता करिणीनार्योर्वासितं सुरभीकृते' इति विश्वः (पृ. ६८, श्लो. १५१)॥ वार्ता वृत्तौ जनश्रुतौ ॥ ७५ ॥

[1] दन्त्यसकारः; C1 adds वासिता.

वार्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृतामृते।
कलधौतं रूप्यहेम्नोर्निमित्तं हेतुलक्ष्मणोः ॥ ७६ ॥

(वि.) आरोग्यफल्गुनोर्वार्तं नपुंसकमुदाहृतम्।
घृतमाज्ये प्रदीप्ते च सलिलेऽपि[1] त्रिलिङ्गकम्[2] ॥ 165 ॥

जिघर्तीति घृतम्। 'घृ क्षरणदीप्त्योः' ॥

अमृतं यज्ञशेषे [3]च पीयूषे सलिले घृते।
अयाचिते च मोक्षे च षट्सु क्लीबमुदाहृतम् ॥ 166 ॥
[4]पथ्या धात्री गुलूची स्त्री ना तु धन्वन्तरौ सुरे।

न म्रियतेऽनेनेत्यमृतम्[5] ॥

कलधौतं रूप्यहेम्नोः कलधौतः कलध्वनौ ॥ 167 ॥

कलः कालिका धौतोऽस्येति कलधौतम्[6]। 'धावु गतिशुद्ध्योः' ॥

हेतौ च लक्षणे चैव निमित्तं परिकथ्यते[7]।

नितरां मीयत इति निमित्तम्[8]। 'माङ माने' ॥ ७६ ॥

[1] च for अपि J2. [2] त्रिलिङ्गकः K5, K6. [3] स्यात् J2, K3. [4] पथ्या हरीतकी, धात्री आमलकी. [5] K3 adds 'मृङ प्राणत्यागे'. [6] कलया धावतीति

J2, K3. [7] परिपठ्यते J2. [8] निमेद्यति इति स्वामी (पृ. २८७), 'ञिमिदा स्नेहने' इति भा. दी. (पृ. ४७३).

(विव.) वार्तं—त्रिषु। फल्गुनि निःसारे रूपभेदाद् नपुंसकत्वम्। यथा—वार्तरहितमेतत् इति। रोगरहिते तु वाच्यलिङ्गः॥ अप्सु च घृतामृते। घृतममृतं चेति शब्दद्वयं जले। चशब्दाद् घृतशब्द आज्ये प्रदीप्ते च। यथा—घृतप्रतीकः इति (तै. ब्रा. १. २. १. ११)। अमृतशब्दः पीयूषादौ। तथा च व्याडिः—

> 'अमृतं [1]वारिसुरयोर्निर्वाणे चातिसुन्दरे।
> अयाचिते यज्ञशेषे पुंसि धन्वन्तरौ भवेत्॥'

इति[2]। अभयागुलूच्यामलकीषु स्त्रीलिङ्गाः प्रागुक्ताः (पृ. २५०, २६४, २४८)॥ कलधौतं रूप्यहेम्नोः। रूप्यं रजतम्। हेम सुवर्णम्॥ निमित्तं हेतुलक्ष्मणोः। हेतुः कारणम्। यथा—विद्यानिमित्तो धनलाभः। लक्ष्म शुभाशुभावेदकं भुजनेत्रस्पन्दनादिकम्। 'निमित्तं सूचयित्वा' इति। 'निमित्तं कारणे चिह्नम्' इत्यजयश्च। हेतुलक्ष्ययोः इति पाठे लक्ष्यं शरव्यम्। यथा—

> 'निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम्।' (शिशु. 2. 27 b.)
> 'वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुः॥'

इति [3]रङ्गराजोदाहृतमभिधानं च। नितरां मेद्यति स्म निमित्तम्। 'ञिमिदा स्नेहने'[4]। 'स्नुक्रमोरनात्मनेपदनिमित्ते' (७. २. ३६) इति निर्देशाद् निष्ठानत्वस्याभावः॥ ७६॥

[1] वारिशुभयोः Tv. [2] 'अयाचिते यज्ञशेषे निर्वाणे चापि सुन्दरे। अमृतं वारिणि प्रोक्तमतिहृद्ये च वस्तुनि॥' इति व्याडिरिति टी. स. (पृ. १००). [3] वैजयन्तीति मल्लिनाथः। मुद्रितवैजयन्त्यां तु 'वेध्यं शरव्यं न नरि' इत्यादि दृश्यते [4] 'ञीतः क्तः' (३. २. १८७), संज्ञापूर्वकत्वान्न नत्वम् इति भा. दी. (पृ. ४७३).

(पा.) वार्तं—त्रिषु। अरोगे तु त्रिष्विति रोगरहिते त्रिलिङ्गः। [1]आरोग्ये नपुंसकमेव। 'वृत्तिमन्नीरुजोर्वार्ता वार्तमारोग्यफल्गुनोः' इति विश्वः (पृ. ६०, श्लो. ४६)॥ अप्सु च घृतामृते। आज्यपीयूषयोरपि स्याताम्। कलधौतं रूप्यहेम्नोः। कलस्वने त्रिलिङ्गः। 'कलधौतं रूप्यहेम्नोः [2]शण्डे त्रिषु

कलध्वनौ ' इति वैजयन्ती (पृ. २७७, श्लो. ५) ।। निमित्तं हेतुलक्ष्मणोः । लक्ष्म शुभाशुभसूचकम् । ' शकुनं च निमित्तं च [3]सुखादेः सूचकेऽपि च ' इति वैजयन्ती (पृ. २७४, श्लो. १६) ।। ७६ ।।

[1] रोगाभावे B3. [2] षण्डस्त्री तु इति मु. ग्र. [3] शुभादेः इति मु. ग्र.

श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतम् ।
अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ।। ७७ ।।

(वि.) श्रुतं शास्त्रे [1]चावधृते नपुंसकमुदाहृतम् ।। 168 ।।

श्रूयते विद्वद्भिरिति श्रुतम्[2] ।।

कृतं युगेऽपि पर्याप्ते विहिते हिंसिते फले ।

क्रियतेऽनेनेति कृतम् । ' डुकृञ् करणे ' ।।[3]

अत्याहितं महाभीतौ जीवानाकाङ्क्षिकर्मणि[4] ।। 169 ।।

आहितमतिक्रान्तमत्याहितम् ।। ७७ ।।

[1] चावधृतौ J2. [2] J2, K2 add ' श्रु श्रवणे '. [3] ' कृञ् हिंसायां ' वा J2.
[4] जीवनानिष्टकर्मणि J2.

(विव.) श्रुतं शास्त्रावधृतयोः । शास्त्रं व्याकरणादि । यथा––बहुश्रुतो विप्रः । अवधृतमाकर्णितम् । यथा––बहुधाश्रुतोऽयमर्थ इति । ' श्रु श्रवणे ' । कर्मणि क्तः (३. २. १०२) ।। युगपर्याप्तयोः कृतम् । कृतं युगाख्यं प्रथमम् । पर्याप्तमिति भावे निष्ठा । पर्याप्तिः निवारणमित्यर्थः । शेषे––' कृतं फले क्रियायां च वाच्यवद्विहिते हते ' इति । फले यथा––[1]' तपसः कृतमेतद्धि यदीश तव दर्शनम् ' इति । क्रियायां यथा––कृतस्य प्रतिकृतमासीदिति । विहिते यथा––कृतमाह्निकमिति । हते यथा––[2]उपाकृतः पशुरिति । ' कृते पशौ पुरोडाशं निर्वपति ' इति ।। अत्याहितं––जीवानपेक्षि च । पुत्रमरणाद्यनिष्टशङ्काजनितं भयमत्याहितम् । जीवानपेक्षि कर्म भृगुपतनव्याघ्रयोधनादिसाहसम् । दधातिरुपसर्गद्वयवशादर्थविशेषे वर्तते[3] । शेषे––

'अत्याहितमुपश्लिष्टे' इति। अत एव अत्याधानमुपश्लेषणम्[4] इति काशिका च (१. ४. ७५, पृ. ७८) ॥ ७७ ॥

[1] तपसा B5, B6. [2] १, पृ. ४६५. [3] 'दधातेर्हिः' (७. ४. ४२) इति हितम्. [4] उपश्लेषः Tj1, Tj2.

(पा.) श्रुतं—जीवानपेक्षि च ॥ ७७ ॥

युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु।
वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ॥ ७८ ॥

(वि.) भूतं क्ष्मादौ पिशाचादौ न्याये [1]सत्यसमानयोः।
समेऽतीते देवलके[2] वृत्ते प्राप्तेऽभिधेयवत् ॥ 170 ॥

भवतीति भूतम्[3] ॥

वृत्तोऽतीते दृढे ख्याते वर्तुलेऽपि वृते मृते।
वाच्यवद् वर्तते वृत्तं [4]चारित्रच्छन्दसोरपि ॥ 171 ॥

[5]वृत्यत इति वृत्तम्। 'वृतु वर्तने' ॥ ७८ ॥

[1] सत्यापमानयोः J2, K4. [2] देवलोके K5, K6. [3] J2, K2 add 'भू सत्तायाम्'. [4] चरित्र° K2, K4. [5] वर्त्यते K6.

(विव.) युक्ते—समे त्रिषु। युक्तं न्यायम्। युक्ते यथा—'विद्वांसो भूतकारिणः' इति। क्ष्मादौ पृथिव्यादिपञ्चके यथा—'पञ्चानामपि भूतानाम्' इति (रघु. ४. ११)। ऋते सत्ये यथा—'भूतमप्यनुपन्यस्तं हीयते व्यवहारतः' इति (या. स्मृ. २. २. १९)। अत्रार्थत्रयेऽपि रूपभेदाद् नपुंसकलिङ्गो भूतशब्दः। प्राण्यतीत इति द्वन्द्वैकवद्भावः। तत्र प्राणिशब्देन तद्विशेषः। 'पिशाचो गुह्यकः सिद्धो भूतः' इत्युक्ताः विवक्षिताः (१, पृ. १०)। तत्र स्वभावादेव भूतशब्दः स्त्रीलिङ्गः। यथा—'ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः' (तै. आ. १०. ६७. २) इति। 'भूतानि यानीह वसन्ति तानि' इति। अतीते निष्पन्ने यथा—भूतो घटः, भूतमन्नम्, प्रभूता संपत्। समे सदृशे यथा—पितृभूतो ज्येष्ठः, मातृभूता भगिनी, गृहभूतं तरुतलम् इत्यादि। भूतशब्दस्य समासोत्तरपदत्वे[1]

सत्येव तादृशार्थत्वम्। न तु विगृहीतस्य। 'स्युरुत्तरपदेत्वमी निभसंकाश' इत्यादिना[2] (पृ. ६४२) प्रागप्ययमर्थो दर्शितः। सुभूतिचन्द्रस्तु—प्राण्यतीत इत्यत्र प्राणीति प्रथमान्तं छित्वा सकलमपि शरीरमात्रं रूपभेदादेव नपुंसकलिङ्गभूतवाच्यमिति व्याचष्ट। यथा—'तं भूतान्यभ्यक्रोशन्' इति। 'यां सदा सर्वभूतानि' इति। शेषे—'भूतो देवलके पुंसि त्रिषु प्राप्तेऽवकल्किते' इति। प्राप्ते यथा—कंचित्प्रकारं प्राप्त इत्थंभूतः। 'भू प्राप्तौ' इति धातुश्च। 'भुवोऽवकल्कने' इत्यत्र अवकल्कनं चिन्तनमिति धातुवृत्तौ[3]। यथा—'त्वद्भूताः सुखमेधन्ते मम प्रकृतयः सदा' इति। त्वद्भूताः त्वया चिन्तिता इत्यर्थः। विकल्कन इति पाठे विकल्कनं विपापकरणम्। यथा—'तपोभूतात्मनो युष्मान्' इति। तपसा निष्पापीकृतात्मन इत्यर्थः। अनुकल्कन इति पाठेऽनुकल्कनं मिश्रीकरणम्। यथा—दध्ना भूत ओदन इति। विश्वप्रकाशेऽपि—

'भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः।
भूतो देवलके प्राप्ते[4] तथा वृत्तेऽभिधेयवत्॥'

इति (पृ. ५७–८, श्लो. १७)॥ वृत्तं—दृढनिस्तले। पद्यं छन्दोबद्धपादम्, इन्द्रवज्रादि। चरित्रं शीलम्। उभयत्र रूपभेदाद् नपुंसकम्[5]। दृढे यथा—वृत्तावयवसंस्थाने इति। निस्तलं वर्तुलम्। अतीताद्यर्थत्रये वाच्यलिङ्गः॥ ७८॥

[1] °पदत्वेन इत्येव Tv. [2] आदिना भूतरूपकल्पादयः. [3] मुद्रितमाधवीयधातुवृत्तौ न दृश्यते; बृहद्धातुरूपावल्यां (पृ. ४७८) अवकल्कनं मिश्रीकरणं चिन्तनं वा इति दृश्यते. [4] प्राप्तवृत्तयोरभिधेयवत् इति मु. ग्र. [5] नपुंसकत्वम् Tv.

(पा.) युक्ते—समे त्रिषु। त्रिष्विति यथासंभवं विशेषणम्। 'खादौ जन्तौ च भूतं क्ली समातीतोचिते त्रिषु' इति वैजयन्ती (पृ. २३४, श्लो. ५६)। [1]अथवा प्राणीति सप्तम्यन्तम्। क्ष्मादिषु पञ्चसु भूतन्यायसमीचीनजन्तुषु प्रथमेति क्लीवकाण्डेषु गोपालितः॥ वृत्तं—दृढनिस्तले॥ ७८॥

[1] B3 omits अथवा and has सप्तम्यन्तं वा.

महद्राज्यं चावगीतं जन्ये स्याद् गर्हिते त्रिषु।
श्वेतं रूप्येऽपि रजतं हेम्नि रूप्ये सिते त्रिषु॥ ७९॥

(वि.)　वीणाभेदेऽपि महती महद् राज्यविशालयोः ।

मह्यत इति महती । 'मह पूजायाम्' ॥

[1]श्वेतं रूप्ये वाच्यलिङ्गं द्वीपभेदाद्रिभेदयोः[2] ॥ 172 ॥

श्वेतत इति श्वेतम् । 'श्विता वर्णे' । श्वयति मनोऽस्मिन्निति वा श्वेतम् । 'टुओश्वि गतिवृद्धयोः' ॥

सुवर्णे धवले रूप्ये रजतं स्यात् त्रिलिङ्गकम् ।
नपुंसकं दन्तिदन्ते हारतारकयोरपि ॥ 173 ॥

रज्यते ताम्रादिकमनेनेति रजतम्[3] । 'रञ्ज रागे' ॥ ७९ ॥

[1] अवगीतपदस्य व्याख्या न दृश्यते.　[2] J2 adds श्वेता वराटिकाकाष्ठपाटलाशङ्खिनीषु च.　[3] K3 adds रज्यतेऽनेनेति रक्तम् । 'रञ्ज रागे' ॥

(विव.)　महद् राज्यं च । राज्ञः कर्म जनपदपरिपालनादिरूपं राज्यम् । यथा—[1]'सादिताखिलनृपं महन्महः संप्रति स्वनयसंपदैव ते' इति माघकाव्ये (शिशु. १४. १३) । राज्यं तेज इत्यर्थः । महामहदिति पाठे महाराज्यमित्यर्थः । यत्किंचिदपेक्षया बहुदेशव्यापकं गृहमहीधराकाशादिकमपि चशब्दार्थः । [2]बुद्धितत्त्ववचने तु पुंलिङ्गः । तथा हि—'प्रकृतेर्महान्' इति सांख्याः । महति मह्यते वा सर्वैरिति महत् । 'मह पूजायाम्'[3] ॥ अवगीतं—त्रिषु । जनस्य जल्पो जन्यम् । निन्देति यावत् । यथा—'आत्मव्यापादनं श्लाध्यमवगीतेन जीवनात्' इति । तत्र रूपभेदात्[4] पुंलिङ्गः । गर्हिते निन्दिते निषिद्धभक्षणादौ वाच्यलिङ्गः । अवगीयते कुत्सितं शब्द्यत इति अवगीतम् । 'गै शब्दे' । क्तप्रत्ययः (३. २. १०२) ॥ श्वेतं रूप्येऽपि । रूप्यं रजतम् । रूपभेदेन क्लीबम् । श्वेतत इति श्वेतम् । 'श्विता वर्णे' । शेषे—'द्वीपाद्रिकुष्ठनागेषु श्वेतो ना स्त्री वराटके' इति । द्वीपः श्वेतद्वीप इति प्रसिद्धः[5] । कुष्ठविशेषः श्वित्राख्यः । नागः सर्पविशेषः । यथा—'अप श्वेत पदा जहि' इति श्रुतौ (आपस्तम्बमन्त्रपाठः[6] २. १७. २६) । तथा—'श्वेताय वैदर्वाय नमः' इति (आ. पाठ. २. १७. २७) । नागो गजविशेषः ऐरावत इति केचित् । तदापस्तम्बीयमन्त्रपठनानुसंधानवैयर्थ्यनिबन्धनभ्रान्तिमूलमित्युपेक्षणीयम् ।

कपर्दिकायां तु स्त्रीलिङ्गः। ओषधिविशेषे प्रागुक्तः[7] (१, पृ. २७६)। धवलवर्णे तद्वति चोक्तः (१, पृ. ६६)॥ रजतं—त्रिषु। सिते धवले वाच्यलिङ्गः। 'रजतां त्वा हरितगर्भाम्' इति श्रुतौ प्रयोगः। 'रजतं विशदे दन्तिदन्ते [8]हारतारकयोरपि' इति विश्वप्रकाशः (पृ. ६३, श्लो. ८६)। तारकं नक्षत्रम् ७९॥ ॥

[1] साधिता° Tj1, Tj2. [2] Tv omits two lines. [3] 'वर्तमाने पृषत्...' (उ. २. ८४) इति साधुरिति भा. दी. (पृ. ४७३). [4] क्लीबम्। गर्हाविचनत्वे तु पुंलिङ्गः Tv. [5] B6 adds अद्रिः श्वेताद्रिरिति प्रसिद्धः. [6] आश्व. गृ.सूत्रे च (२. ३. ३). [7] महाश्वेतर्क्षगन्धिकेति. [8] दन्तिदन्तयोस्तारहारयोः इति मु. ग्र.

(पा.) [1]श्वेतं रूप्येऽपि। [2]अपिशब्दाद् धवलवर्णेऽपि स्यात्॥ रजतं—त्रिषु। [3]हेमनामा द्रुमः। 'रजतं धवले रूप्ये शोणिते द्रुमहारयोः' इति जयकोशः॥ ७९॥

[1] महदवगीतशब्दयोः व्याख्या न दृश्यते. [2] A1 omits अपिशब्दात्. [3] हेम-नामद्रुमः A1.

त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादिरागि च।
अवदातः सिते पीते शुद्धे बद्धार्जुनौ सितौ॥ ८०॥

(वि.) [1]अवदातः सिते पीते [2]शुद्धे च प्रचलेऽपि च।

अवदायत इत्यवदातः। 'दैप् शोधने'॥

सितः समाप्ते धवले निबद्धज्ञानयोरपि॥ 174॥

सिनोतीति सितः। 'षिञ् बन्धने'॥ ८०॥

[1] श्वेतजगद्रक्तशब्दानां व्याख्या न दृश्यते; J2 ग्रन्थे एव 'रक्तं स्यात् कुङ्कुमे ताम्रे प्राचीनामलके स्रजि। अनुरागिणि नील्यादिरञ्जिते लोहिते त्रिषु' इति, 'इङ्गे गतेऽपि सर्पे च जङ्गमे जगदुच्यते' इति च दृश्यते. [2] विशुद्धौ J2, K4.

(विव.) त्रिष्वितः। इतःपरं वक्ष्यमाणा जगदादयः समाहितान्तास्त-कारान्ताः वाच्यलिङ्गा इत्यर्थः॥ जगदिङ्गेऽपि। इङ्गं स्वाभाविकचलनयुक्तम्। 'वर्तमाने पृषत्...' इत्यादिना (उ. २. ८४) जगच्छब्दो निपातितः। 'स्याज्ज-

गद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु' इति रुद्रः। जगन्मृगकदम्बकम्। जगती हरिणीत्यादि ॥ रक्तं नील्यादिरागि च। [1]शुक्लस्य वर्णान्तरकरणं रञ्जेरर्थ इति न्यासकारः[2] (पञ्जिका पृ. ६२७)। नीलीमञ्जिष्ठाहरिद्रादिरागयुक्तं नील्यादिरागि। शेषे—'असृक्कुङ्कुमयोः क्लीबं रक्तं त्रिष्वनुरागिणि' इति। रक्ताः प्रजाः, रक्तं भृत्यकुलमित्यादि। शोणवर्णे तु प्रागुक्तः (१, पृ. १००) ॥ अवदातः—शुद्धे। विजातीयसंसर्गाभावाद् अवदायते स्मेति अवदातः। 'दैप् शोधने'। शुद्धे निर्मले यथा—अवदातचरित इति। 'दाप् लवने' इति धातोरवदातः समूलभिन्नः ॥ बद्धार्जुनौ सितौ। बद्धो रज्ज्वादिना संदानितः। अर्जुनो धवलः। 'षिञ् बन्धने'। 'षोऽन्तकर्मणि' इत्यतश्चेद् अवसितः समाप्तः। अवसितोऽर्थ इति ज्ञानेऽपि। शेषे—'श्वित्रे सितं भार्गवे ना [3]शर्करायां सिता स्त्रियाम्' इति ॥ ८० ॥

[1] Tv adds रक्तं त्रिष्वनुरागिणि.　　[2] 'शुक्लस्य वर्णान्तरापादनं रञ्जेरिहार्थः' इति मु. ग्र.　　[3] कर्करायाम् Tv.

(पा.)　त्रिष्वितो—इङ्गेऽपि। वायुभुवनयोरपि[1]। अधिकारस्य उक्तमात्रविषयत्वात् जगद् इङ्ग एव त्रिलिङ्गकम्[2]। रक्तं नील्यादिरागि च। रुधिरकुङ्कुमे[3] रक्ते स्याताम्। पूर्वन्यायाद् नील्यादिरागवचनमेव त्रिलिङ्गम्। नील्या रक्तं वस्त्रम्। लाक्षया रक्तोऽधरः[4] ॥ अवदातः—सितौ। अर्जुनो वर्णः ॥ ८० ॥

[1] A1 adds स्यात्.　　[2] त्रिलिङ्गम् B3, C1.　　[3] °कुङ्कुमादिरक्तेऽपि स्यात् B3.
[4] रथः B3, C1.

युक्तेऽतिसंस्कृते मर्षिण्यभिनीतोऽथ संस्कृतम्।
कृत्रिमे लक्षणोपेतेऽप्यनन्तोऽनवधावपि ॥ ८१ ॥

(वि.)　[1]युक्तेऽतिसंस्कृते मर्षिण्यभिनीत उदाहृतः।

अभिनीयत इति अभिनीतः। 'णीञ् प्रापणे' ॥

संस्कृतं कृत्रिमे [2]शस्ते भूषिते लक्षणान्विते ॥ 175 ॥

संस्क्रियत इति संस्कृतम्[3]।

विष्णुशेषानवधिषु पुंसि व्योम्नि नपुंसकम् ।
[4]भूगुडूचीहैमवतीलाङ्गलीशारिबासु च ।। 176 ।।
दूर्वाविशल्ययोः स्त्री स्यादनन्तः कथ्यते बुधैः ।

न विद्यतेऽन्तो यस्यासावनन्तः ।। ८१ ।।

[1] तिरस्कृतेऽयुक्तेऽमर्षिण्यविनीत उदाहृतः । न विनीयत इत्यविनीतः K6. [2] शास्त्रे J2. [3] J2, K2 add 'डुकृञ् करणे'. [4] भूगुलूची° K5, K6.

(विव.) युक्ते तु संस्कृते मर्षिण्यभिनीतः । [1]शास्त्रोक्तानुकरणमभिनयं नीतः प्रापितोऽभिनीतः युक्तार्थः । लौकिकेन वैदिकेन वा कर्मणि प्रापितातिशयत्वाद् अभिनीतशब्दः संस्कृतवचनः । भिया भयेन रहितमिति विग्रहे तर्जनभर्त्सनादिकमभिशब्देनोच्यते । तत्कर्म नीतः प्रापितोऽभिनीत इति [2]रोमहर्षणार्थः ।। अथ—लक्षणोपेतेऽपि । द्रव्यान्तरसंसर्गकरणादिलौकिकव्यापारेण वा प्रोक्षणादिवैदिकव्यापारेण वा निष्पादितगुणाधानं वस्तु कृत्रिमम् । यथा—मरीचजीरकादिभिर्व्यञ्जनानि संस्कृतानि । प्रोक्षणादिना व्रीह्यादयः संस्कृताः । पाणिन्याद्युक्तलक्षणयुक्तं सुशब्दादिकं लक्षणोपेतम् । यथा—संस्कृतं भाषा । संस्कृतं काव्यमिति । संपूर्वात् करोतेः कर्मणि निष्ठायां 'संपर्युपेभ्यः करोतौ भूषणे' (६. १. १३७) इति 'संपूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते'[3] इति सुडागमः ।। अनन्तोऽनवधावपि । अवधिः इयत्तावच्छेदः । तद्रहितो दिक्कालादिः अनवधिः । नास्त्यन्त उत्तरावधिरस्येत्यनन्तः । यथा—अनन्ता वै वेदाः इति । विश्वप्रकाशे (पृ. ६६–७, श्लो. १२९–३०)—

अनन्तः शेषविष्णोः स्यादनन्तं[4] सुरवर्त्मनि ।
अनन्ता शारिबादूर्वाविशल्यालाङ्गलीषु च ।
अनन्ता हैमवत्यां च गुडूच्यां चावनावपि[5] ।।

इति । हैमवती हरीतकी[6] ।। ८१ ।।

[1] °करणरूपम् Tv. [2] रोषणार्थः B5, B6. [3] वा. ६. १. १३७. [4] अनन्तः इति मु. ग्र. [5] निरूप्यते इति मु. ग्र. [6] 'हरीतकी हैमवती' (पृ. २५०).

(पा.) युक्ते तु संस्कृतेऽमर्षिण्यभिनीतः । अमर्षी असहिष्णुः । अथ—लक्षणोपेते । कृत्रिमं घटादिकार्यम् । [1]लक्षणोपेतो वृक्षः तिष्ठतीत्यादिशब्दः ।।

अनन्तोऽनवधावपि । अनन्तो मार्गः । [2]अनन्ता सरणिः । अनन्तं वर्त्म । भूमौ स्त्रीलिङ्गः[3] । आकाशे नपुंसक एव[4] ॥ ८१ ॥

[1] लक्ष्मणोपेतः A_1.　[2] A_1 omits the sentence.　[3] B_3, C_1 add एव.
[4] A_1 omits एव.

ख्याते हृष्टे प्रतीतोऽभिजातस्तु कुलजे बुधे ।
विविक्तौ पूतविजनौ मूर्च्छितौ मूढसोच्छ्रयौ ॥ ८२ ॥

(वि.)　प्रसादख्यातहृष्टेषु प्रतीतः परिकीर्तितः ॥ 177 ॥

प्रख्यातिमितः प्राप्तः प्रतीतः[1] ॥

विद्वत्कुलजयोर्जातो जातं [2]जात्यौघजन्मसु ।

जायत इति जातः[3] ॥

विविक्तमपसंवृत्तपूतान्वितरहःसु च ॥ 178 ॥

विविच्यते कार्याकार्यमत्रेति विविक्तम् । ‘ विचिर् पृथग्भावे ’ ॥

दृढसोच्छ्रायमूढेषु मूर्च्छितः परिकीर्तितः ।

मूर्च्छास्य संजातेति मूर्च्छितः[4] । ‘ मुर्च्छा मोहसमुच्छ्राययोः ’ ॥ ८२ ॥

[1] K_2 adds ‘ इण् गतौ ’.　[2] जूत्यौघ° K_6.　[3] K_2, K_4 add ‘ जनी प्रादुर्भावे ’.
[4] मूर्च्छ्यतेऽनेन J_2.

(विव.)　ख्याते हृष्टे प्रतीतः । ख्यातः प्रसिद्धः । हृष्टः संतुष्टः । ज्ञातार्थेऽपि प्रतीतशब्दः[1] ॥ अभिजातस्तु कुलजे बुधे । कुलजो महाकुलप्रसूतः । [2]बुधः सकलस्तुत्यत्वेनाभिहितः । सर्वतः प्रादुर्भूतत्वाद् अभिजातः ॥ विविक्तौ पूतविजनौ । अपाकृतहेयभागं धान्यादिकं पूतम्, शुद्धमित्यन्ये । यथा––विविक्ता पदार्था इति । विगतो जनोऽस्मादिति विजनो रहस्यस्थानम् । विविच्यते निरसनीयद्रव्यात् पृथक् क्रियत इति विविक्तः[3] । मूर्च्छितौ मूढसोच्छ्रयौ । मोह उच्छ्रायश्च मूर्च्छितशब्दस्यार्थः । मूर्च्छास्य संजाता मूर्च्छितः[4] ॥ ८२ ॥

[1] प्रतीयत इति प्रतीतः। 'इण् गतौ'। क्तः. [2] Gm3 omits बुधः. [3] 'विचिर् पृथग्भावे'। क्तः. [4] 'तदस्य सजातं...' (५. २. ३६) इतीतच्.

(पा.) ख्याते [1]हृष्टे प्रतीतः। [2]दृष्टे प्रतीत इति क्वचित् पाठः। 'प्रथिते दृष्टे [3]हृष्टे च ज्ञाते मनीषिते' इति जयकोशः ।। अभिजातस्तु––मूढसोच्छ्रयौ। 'मूर्च्छितो मूढवृद्धयोः' इति जयकोशः ।। ८२ ।।

[1] दृष्टे A1. [2] हृष्टे A1. [3] B3 omits हृष्टे.

द्वौ चाम्लपरुषौ शुक्तौ शिती धवलमेचकौ ।
सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ।। ८३ ।।

(वि.) आम्ले च परुषे पूते शुक्तः स्याद् वाच्यलिङ्गकः ।। 179 ।।

[1]शुच्यत इति शुक्तः। '(ई) शुचिर् पूतीभावे' ।।

मेचके धवले चैव शितिशब्दः प्रकीर्तितः।

शीयत इति शितिः। 'शिञ् [2]निशाने' ।।

सत् प्रशस्ते विद्यमाने सत्याभ्यर्हितसाधुषु ।। 180 ।।

अस्तीति [3]सत्। 'अस भुवि' ।। ८३ ।।

[1] शोच्यत इति शुक्तः। 'शुच शोके' K2, K4. [2] निशातने K2, K3, K4.
[3] पापं स्यतीति सत्। 'षोऽन्तकर्मणि' K2, K3, K4.

(विव.) द्वौ चाम्लपरुषौ शुक्तौ। इहाम्लशब्देन चिरकालपरिवाससंजातरसान्तर ओदनषाडवादिरम्लविशेष उच्यते। निष्ठुरो वाग्विशेषः परुषः। परिहरणीयत्वेनाम्लसदृशत्वात् परुषवाक्ये शुक्तशब्दस्यौपचारिकत्वेऽपि निरूढत्वेन मुख्यतुल्यत्वाद् नानार्थत्वेनाभिधानम्। अत एव स्वामी (पृ. २८९)––'परुषे शुक्तशब्द[1] उपचारात्' इति। शुच्यते क्लिन्नो भवतीति शुक्तः। (ई) शुचिर् पूतीभावे'। [2]ईदित्वादिडागमस्याभावः ।। शिती धवलमेचकौ। शिनोति स्वबाहुल्येन वर्णान्तरं तनूकरोतीति शितिः। 'शिञ् [3]निशातने'। अथवा 'शो तनूकरणे'। [4]'शाछोरन्यतरस्याम्' (७. ४. ४१) इतीत्वम् ।। सत्ये

साधौ—च सत्। सत्ये यथा—सद्ब्रह्म। साधौ–सत्पुत्र इति। सन् घटः, सदाकाशम् इति विद्यमाने। सत्कर्मेति प्रशस्ते। अभ्यर्हितः पूजितो यथा—सत्पुरुषः। शेषे—'भवान्यां तु सती स्त्री स्यान्नक्षत्रे तु नपुंसकम्' इति। 'गगनमिव सत्पथोपशोभि'। [5]नगरमिति शेषः। अस्तीति सन्। 'अस भुवि'। शतृप्रत्ययः। 'श्नसोरल्लोपः' (६. ४. १११) इत्यकारलोपः॥ ८३॥

[1] 'परुषे शुक्त उपचारात्' इति मु. ग्र. [2] 'श्वीदितो निष्ठायाम्' (७. २. १४) इति इडागमो न भवति. [3] निशाने Tv. [4] क्तिन् (३. ३. ९४). [5] नक्षत्रम् Gm3; Tv omits.

(पा.) द्वौ चाम्लपरुषौ—अभ्यर्हिते च सत्। सत्ये इति धर्मवचनम्। धर्मे नपुंसकमेव। 'सत् प्रशस्ते विद्यमाने त्रिषु क्ली सत्यतारयोः' इति शाश्वतः[1]॥ ८३॥

[1] मुद्रितग्रन्थे तु 'सत् सत्येऽभ्यर्हिते साधौ विद्यमानप्रशस्तयोः' इति दृश्यते (अने. स. पृ. २७, श्लो. ३०४).

पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते।
निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत्॥ ८४॥

(वि.) पुरस्कृतः स्वीकृते चाप्यभियुक्तेऽग्रतः कृते।
अभिग्रस्ते पूजिते च शक्ते चाप्यभिधीयते[1]॥ 181॥

पुरस्क्रियत इति पुरस्कृतः[2]॥

निवातो दृढसंनाहस्थानावातसुवर्मसु।

निर्गतो वातोऽत्रेति निवातः॥ ८४॥

[1] अभिधेयवत् J2. [2] J2, K2 add 'डुकृञ् करणे'.

(विव.) पुरस्कृतः—अग्रतः कृते। पुरस्कृते गौरवबुद्धिविषये, शत्रुणा अभिक्रान्ते, पुरोभागावस्थापितमात्रे च। 'पुरोऽव्ययम्' (१. ४. ६७) इति गतिसंज्ञायाम्, 'नमस्पुरसोर्गत्योः' (८. ३. ४०) इति विसर्जनीयस्य सकारः॥

निवातौ—वर्म यत् । नियतं वायते गम्यत इति निवातः आश्रयः । यथा—' निवात एषामभये स्याम ' इति श्रुतिः (तै. सं. ५. ७. २. ४) । निषिद्धो वातोऽत्रेति व्युत्पत्त्या वातरहितो देशो निवातः । ' निवातपद्मस्तिमितेन चक्षुषा ' इति कालिदासः (रघु. ३. १७) । अभेद्यकवचे यथा—निवातकवचा इति ।। ८४ ।।

(पा.) पुरस्कृतः—वर्म यत् । [1]आश्रयावातौ—निवातो देशः । निवाता वसतिः । शस्त्राभेद्यवर्मणि—निवातं तनुत्रम्, निवाता त्रातिः ।। ८४ ।।

[1] B_3 omits अवात.

जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिता उत्थितास्त्वमी ।
वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ सादरार्चितौ ।। ८५ ।।

इति तान्तवर्गः

(वि.) उच्छ्रितो वृद्धियुक्ते च [1]प्रोद्धृतोत्पन्नयोरपि ।। 182 ।।

उच्छ्रीयत इति उच्छ्रितः । ' श्रिञ् सेवायाम् '

[2]आदृतः सादरेऽपि स्यादर्चिते वाच्यलिङ्गकः ।

आद्रियत इत्यादृतः । ' दृङ आदरे ' ।।

उदास्थितः प्रतीहारेऽप्यध्यक्षे प्रणिधौ चरे[3] ।। 183 ।।

ऊर्ध्वमास्थीयत इति उदास्थितः[4] ।।

समाहितो योगभेदे [5]समाधिस्थे यथात्मनि ।
वाच्यवन्निहिते सिद्धे समाधाने समाहितम् ।। 184 ।।

समाहीयत इति समाहितम् । ' हि गतौ वृद्धौ च ' ।। ८५ ।।

इति तान्तवर्गः[6]

[1] प्रयतो° J_2. [2] उत्थितशब्दव्याख्या न दृश्यते. [3] चले K_6. [4] K_2, K_4 add ' ष्ठा गतिनिवृत्तौ '. [5] समाधिश्रयतात्मनि J_2. [6] K_2 adds तान्तशब्दसंख्या ६४.

(विव.) जातोन्नतप्रवृद्धा स्युरुच्छ्रिताः । जात उत्पन्नः । उन्नतश्च । [1]उद्धतमिति पाठे गर्वितः । प्रवृद्धो [2]बहुलत्वं गतः । यथा—प्रवृद्धो निदाघः इति । 'श्रिञ् सेवायाम्' इत्यतः उत्पूर्वात् क्तः ।। उत्थितास्त्वमी—उत्पन्नाः । [3]वृद्धिमान समृद्धः । यथा—[4]उत्थितो राजा । प्रोद्यत उद्यतः, उपविष्टः उद्गतश्च । यथा—[5]शयनादुत्थितः । उत्पन्नो जातः । यथा—उत्थितः कोलाहलः । तिष्ठतेरुत्पूर्वात् क्तप्रत्ययः । 'उदः स्थास्तम्भोः'[6] (८. ४. ६१) इति सलोपः ।। आदृतौ सादरार्चितौ । आदरेण सह वर्तते विषयत्वेनेति सादरशब्देनादरस्य कर्मकारकं विवक्षितम् । यथा—शिष्टैरादृतो मनुः इति । 'दृङ आदरे' । कर्मणि क्तः । अथवा सादरशब्देन कर्ता विवक्षितः । यथा—आदृतः करोति इति । तत्र कर्माविवक्षायां 'गत्यर्थाकर्मक ...' इत्यादिना (३. ४. ७२) कर्तरि क्तप्रत्ययः । तथा च पदमञ्जरी (पृ. ३३२)— 'सकर्मकेभ्यः कर्मविवक्षायामन्यत्रापि[7] क्तः' इति । अर्चितः पूजितः । यथा—लोकादृतोऽयं देव[8] इति ।। ८५ ।।

इति तान्तवर्गः[9]

[1] उन्नद्ध° Tj1, Tj2. [2] बहुत्वं Tv. [3] वृद्धिः समृद्धिः B6. [4] सूत्थितः B5.
[5] सहसा B6. [6] Tv adds पूर्वस्य. [7] भावे क्तः इति मु. ग्र. [8] जीवः Gm3.
[9] B6 adds शब्दसंख्या ६४.

(पा.) जातोन्नद्ध—सादरार्चितौ । अनुक्तम्—

सौहार्देऽपि प्रीतिभक्ती प्राणिद्यूतं रणेऽपि च ।
पङ्केऽपि पलितं कीर्तिः पद्धतिश्चेति च त्रयम् ।।
श्वेते तिलेऽपि जामाता यमेऽपि पृथिवीपतिः ।
स्वैरिण्यामपि मुक्ता स्याद् रिक्तं स्यात् काननेऽपि च ।।
तातः स्यादनुकम्प्येऽपि मातापि गुहमातरि ।
कन्तुः [1]कुसूलकेऽपि स्याद् वृतं स्याच्चूचुकेऽपि च ।।
कामुक्यां च त्रिगर्ता स्यादक्षतं [2]षण्डकेऽपि च ।

[3]देशविशेषे पुंलिङ्गः ।

उद्भूतोऽङ्घ्रेश्चालनेऽप्युषितं व्युषितेऽपि च ।।

व्युषितं नाम पर्युषितम् ।।

स्तिमितं निश्चलेऽपि स्यात् सूनृतं मङ्गलेऽपि च ।
द्वौ पृषत्पृषतौ स्यातां वेदबिन्दुयुतेऽपि च ।।
विनीतो वाणिजेऽपि स्यान्निर्ऋतिर्नैर्ऋतेऽपि च ।
कुट्टन्यां च किराती स्यात् किरातोऽल्पतनावपि ।।

अल्पतनुः पृश्निः । [4]'कालुचेयिमणिगिनवांडु' ।।

विच्छित्तिरङ्गरागेऽप्यलक्ते पल्लवितं तथा ।
चर्मण्वती च कदली लक्ष्मीपतिरगेऽपि च ।।

अगे सहकारे ।।

रतध्वनौ तु [5]हारीतं कोकिलक्वणितेऽपि च ।
रङ्गमाता तु लाक्षायां कुट्टन्यामपि सा भवेत् ।।
वसन्तदूती वासन्त्यां चूतकोकिलयोऽस्तु ना ।
अस्वन्तं मरणे चुल्ल्यां द्वास्थेऽध्यक्षेऽप्युदास्थितः ।
कच्छपे पञ्चगुप्तः स्याच्चार्वाकाणां मतेऽपि च ।
[6]धान्यादिबन्धने मूतं राज्ञां हस्तोपधानके ।।
उत्पातः प्रतिबन्धे स्यादुत्खातं विषमस्थले ।
दिवाभीतस्तु चोरे स्यादुलूके कुमुदाकरे ।। ८५ ।।

इति तान्तवर्गः

[1] कुशूलके A_1. [2] पण्डके A_1, C_1. [3] देशे A_1. [4] B_3, C_1 omit.
[5] हरितम् B_3. [6] A_1 adds सुखेऽह्नि च करस्थितम्.

अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।
निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ ।। ८६ ।।

(वि.) [1]अर्थः प्रकारे विषये वित्तकारणवस्तुषु ।
अभिधेये च शब्दानां निमित्ते च प्रयोजने ।। 185 ।।

अर्थ्यत इत्यर्थः । 'अर्थ [2]याच्ञायाम्' ।।

तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु ।
अवतारर्षिजुष्टाम्भोनिपानस्त्रीरजःसु[3] च ॥ 186 ॥

जवेन पापानि तरन्त्यनेनेति तीर्थम्[4] । 'तॄ प्लवनतरणयोः' ॥ ८६ ॥

[1] J2, K2, K4 add:

अनीकस्थो रणखरे स्थानस्थे गजशिक्षके ।
राजरक्षिषु चिह्ने च वीरमर्दलकेऽपि च ॥

अनीके तिष्ठतीत्यनीकस्थः । 'ष्ठा गतिनिवृत्तौ'.
[2] उपयाच्ञायाम् इति धातुपाठग्रन्थेषु.
[3] °अम्भोनिपाः स्त्रीणां रजस्यपि K6; °रजःसु च J2.
[4] अनेनावतरति K4, K6.

(विव.) अर्थो—निवृत्तिषु । अभिधेयः शब्दप्रत्याय्यः । यथा—शब्दार्थौ काव्यम् इति । राः धनम् । यथा—न्यायेनार्जनमर्थानाम् इति । वस्तु प्रमाणसिद्धं स्वरूपम् । यथा—षट् पदार्थाः, षोडश पदार्थाः इति । प्रयोजनमुद्देश्यम् । यथा—ओदनार्थास्तण्डुलाः । ओदनप्रयोजना इत्यर्थः । धर्मार्था पत्नी । किमर्थं [1]गमनम् । कोऽर्थोऽनेन साध्यते । [2]'एका क्रिया द्व्यर्थकरी प्रसिद्धा' (म. भाष्य. १. १. १.) । निवृत्तिवचनस्यार्थसिद्धस्य नित्यसमासनियमः । तथा च शब्दप्रकाशे भोजराजः—'बहुव्रीहावुत्तरः स्यादर्थशब्दो निवृत्तिवाक्' इति । निवृत्तिवचनस्यार्थशब्दस्य समस्तत्वमुत्तरपदत्वं च नियतमित्यर्थः । यथा—मशकार्थो धूमः । तस्करार्थोऽर्गलबन्धः इत्यादि । अर्थ्यते प्रार्थ्यत इत्यर्थः[3] । अथवा 'ऋ गतौ' । 'उषिकुषिगार्तिभ्यस्थन्' (उ. २. ४) इति । इन्द्रियार्थे रूपादयः । अर्थोल्लेखि[4] ज्ञानमित्यादौ विषयरूपार्थेऽप्यर्थशब्दः । तत्र विषयप्राकटचस्य प्रयोजनत्वात् कथंचित् प्रयोजनपदेनैव संगृहीतः ॥ निपान—गुरौ । [5]'निपानमाहावः' इति प्रागुक्तम् (पृ. १७३)। यथा—'वेदतीर्थमिदं शास्त्रं सुलभं धर्ममिच्छताम्' इति । 'निदानागमयोः' इति केचित् पठन्ति । तत्र निदानं मूलकारणम् । यथा—ज्ञानतीर्थं गुरोर्वचः इति । आगमः शास्त्रम् । यथा—तीर्थंकर इति । महर्षिसेवितजले[6]—तीर्थयात्राप्रसक्तोऽयमिति । गुरौ यथा—तीर्थाप्तविद्य इति । तरत्यनेन पापमज्ञानं वेति तीर्थम् । 'तॄ प्लवनतरणयोः' । थक्प्रत्ययः[7] । 'ॠत इद्धातोः' (७. १. १००) इतीत्वम् । 'र्वोरुपधाया दीर्घ इकः' (८. २. ७६) इति दीर्घः । अन्यत्रापि—

'तीर्थं शास्त्रेऽध्वरे क्षेत्रोपायोपाध्यायमन्त्रिषु ।
अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च शब्द्यते ।।'

इति । अध्वरे यज्ञे । यथा––तीर्थेष्वालभते पशून् इति । उपाध्याये यथा–– 'बलवान् प्रकृतिस्थोऽपि विना तीर्थं विनश्यति' । मन्त्रिणि यथा––सत्तीर्थन्यस्तभार इति । अत्र मन्त्रिग्रहणं मन्त्रिसेनापतिपुरोहितादीनां नीतिशास्त्रप्रसिद्धानामष्टादशानामप्युपलक्षणम् । तेषामुद्देशलक्षणविषये ग्रन्थगौरवभयादुपरम्यते । अवतारो जलावतरणमार्गः । यथा––'कृततीर्थः पयसामिवाशयः' (किरा. २. ३) इति । स्त्रीरजसि यथा––'चण्डालीसदृशी ज्ञेया सतीर्था प्रथमेऽहनि' इति । 'तीर्थं सत्रिणि पात्रे च' इति स्वामी (पृ. २९०) । सत्रिणि दीक्षिते यथा–– 'नास्ति तीर्थस्य सूतकम्' इति । पात्रे यथा––'तीर्थगामि करवै विधानतः' इति माघकाव्ये ।। ८६ ।।

[1] धनम् Tj1, Tj2. [2] 'एका क्रिया द्व्यर्थकरीह लोके' Vāyu P. (Apte's Dict. p. 847). [3] B6 adds 'अर्थ उपयाच्ञायाम्'. [4] अर्थो वैचित्र्यज्ञानम् Tv. [5] इदं पाणिनीयसूत्रम् (३. ३. ७४), अमरपाठस्तु 'आहावस्तु निपानं स्यात्' इति (पृ. १७३). [6] Gm3, Tv add भागीरथ्यादौ. [7] 'पातृतुदि . . .' (उ. २. ७) इति थक्.

(पा.) अर्थो––निवृत्तिषु । अभिधेयं शब्दवाच्यम् । रै [1]इति धनम् । वस्त्विति पदार्थः । प्रयोजनं कार्यं च कारणं च [2]स्यात् । 'कार्ये हेतौ प्रयोजनम्' इति वैजयन्ती (पृ. २७३, श्लो. ८) । [3]धर्मार्थं धनम् । निवृत्तिः प्रवृत्तिविपर्ययः । मशकार्थो धूमः ।। [4]निदान––गुरौ[5] । निदानमुपायः । आगमः शास्त्रम् । ऋषिजुष्टजलं पावनोदकम् । गुरुरुपाध्यायः ।

'तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने ।
पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः' ।।

इति वैजयन्ती (पृ. २२५, श्लो. १३) ।। ८६ ।।

[1] B3 omits इति. [2] B3 omits स्यात्. [3] धमर्थः A1. [4] निपान° C1. [5] B3 adds 'तथा जलावतरणमार्गे मन्त्रे च संस्कृते'.

समर्थस्त्रिषु शक्तिस्थे संबद्धार्थे हितेऽपि च ।
दशमीस्थौ क्षीणरागवृद्धौ वीथी पदव्यपि ।। ८७ ।।

(वि.)　समर्थस्त्रिषु शक्तिस्थे संबन्धार्थे हितेऽपि च ।

[1]समर्थ्यत इति समर्थः[2] ॥

दशमीस्थो नष्टबीजे स्थविरेऽपि प्रचक्षते ॥ 187 ॥

दशम्यां तिष्ठतीति दशमीस्थः ॥

[3]वीथी गृहाङ्के पङ्क्तौ च [4]रूपकान्तरवर्त्मनोः ।

वियन्ति गच्छन्त्यनयेति वीथी[5] । 'वी गत्यादौ' ॥ ८७ ॥

[1] समर्थयते J2.　[2] J2, K4 add 'अर्थ याच्ञायाम्'.　[3] K3 omits 6 lines.　[4] कार्ये रूपकवर्त्मनोः K6.　[5] वीथिः K2, K4.

(विव.)　समर्थस्त्रिषु शक्तिष्ठे संबन्धार्थे हितेऽपि च । इष्ठन्प्रत्ययान्तेन शक्तिष्ठशब्देन शक्तयतिशयसंपन्न उच्यते । यथा—समर्थः कार्यनिर्णय इति । संबन्धार्थोऽन्वितार्थः । यथा—'समर्थः पदविधिः' (२. १. १) । हिते यथा—एतत् समर्थं तव यन्मयोदितम् इति । समर्थयते उपकारं संपादयतीति समर्थः । 'अर्थ उपयाच्ञायाम्'[1] ॥ दशमीस्थौ क्षीणरागवृद्धौ । दशम्यां वयोऽवस्थायां नवतिवयस उपरितन्यां तिष्ठतीति दशमीस्थः वृद्धः । चक्षुःप्रीत्यादिकामुकावस्थानां दशानां मध्ये दशम्यामवस्थायां मूर्च्छावस्थाया उत्तरस्यां मरणोद्योगलक्षणायां तिष्ठतीति दशमीस्थः । स च प्राप्त्याशाविच्छेदेन मरणोद्युक्ततया प्रक्षीणगौरवत्वेन क्षीणरागशब्देनोक्तः । 'क्षीणरागो नष्टबीजः' इति [2]सुभूतिचन्द्रः । सोऽपि वृद्धसादृश्यात् लक्षणया वृद्धशब्देनोक्तः ॥ वीथी पदव्यपि । पदवी मार्गः । वियन्ति गच्छन्त्यनयेति वीथी । 'वी गतिप्रजनकान्त्यसनखादनेषु' । 'वियः क्थिः'[3] । यथा—राजवीथी इति । शेषे—'वीथी पङ्क्तावश्वगतौ नाटचभेदे गृहाङ्गणे' इति । पङ्क्तौ यथा—'रसालवीथ्यामिह [4]संचरामः' इति । अश्वगतौ यथा—'सिद्धं मुखे नवसु वीथिषु कश्चिदश्वम्' इति माघे (शिशु. ५. ६०) । नाटचभेदः 'नाटकं सप्रकरणम्...' (दशरू. १. ८) इत्यादिनोक्तोऽष्टमो रूपकभेदः ॥ ८७ ॥

[1] पचाद्यच् (३. १. १३४).　[2] B5, B6 omit सुभूति.　[3] विथ्यतेऽनया । 'विथृ याचने'। इगुपधात् किदितीन् । बाहुलकाद्दीर्घः [वा ङीष्] इति श. द्रु. (पृ. ४७०).
[4] वीथ्यामित्यत्र तृतीयाभावादात्मनेपदं न भवति (१. ३. ५४).

(पा.) समर्थस्त्रिषु—रागवृद्धौ । क्षीणरागो नष्टबीज इति सुभूतिटीका ।। [1]वीथिः पदव्यपि । 'वीथिः[2] गृहालौ[3] पङ्क्तौ च नाटचरूपकवर्त्मनोः इति विश्वः[4] (पृ. ७६, श्लो. ११) ।। ८७ ।।

[1] वीथी C_1. [2] वीथी इति मु. ग्र. [3] गृहाङ्गे इति मु. ग्र. [4] विश्वकोशः B_3.

आस्थानीयत्नयोरास्था प्रस्थोऽस्त्री सानुमानयोः ।

इति थान्तवर्गः

अभिप्रायवशौ छन्दावब्दौ जीमूतवत्सरौ ।। ८८ ।।

(वि.) आस्था चालम्वनास्थानयत्नापेक्षासु कथ्यते ।। 188 ।।

आस्थीयत इत्यास्था[1] ।।

प्रस्थोऽस्त्री शिखरे माने सानौ च परिकीर्तितः ।

प्रस्थीयत इति प्रस्थः ।।

इति थान्तवर्गः[2]

छन्दो वशेऽभिप्राये हृदाख्याचित्तवृत्तयोः ।। 189 ।।

[3]छन्द्यत इति छन्दः । 'छदि संवरणे' ।।

अब्दः संवत्सरे मेघे गिरिभेदे च मुस्तके ।

अपो ददातीति अब्दः[4] ।। ८८ ।।

[1] K_2, K_4 add 'ष्ठा गतिनिवृत्तौ'. [2] J_2, K_2 add थान्तशब्दसंख्या ७.
[3] छन्दयतीति, 'छदि आच्छादने' K_2, K_4 [4] J_2, K_2 add 'दा दाने'.

(विव.) आस्थानीयत्नयोरास्था । आतिष्ठन्त्यस्यां सभायामित्यास्था । [1]'व्यवस्थायामसंज्ञायामिति ज्ञापकात्' (३. ३. ९५, काशिका पृ. २२१) तिष्ठतेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यधिकरणे भावे चाङ प्रत्ययः । प्रतिज्ञायां

तात्पर्ये च ।। प्रस्थोऽस्त्री सानुमानयोः । सानुः पर्वतोपरितनः समदेशः । मानमिति आढकचतुर्थांशो मानविशेषः ।।

इति थान्तवर्गः

अभिप्रायवशौ छन्दौ । अभिप्राय आशयः । यथा—[2]'मूर्खं छन्दानुवृत्तितः' (चाणक्य· १५१) । वशे यथा—स्वच्छन्दहृदयः ।। अब्दौ जीमूतवत्सरौ । जीमूतः मेघः । शेषे—'गिरिदर्पणयोरब्दः' इति 'साधुरब्द इव भूतिसङ्गमान्निर्मलो ननु सुवृत्ततां वहन्' इति [3]धर्माभ्युदये दर्पणे प्रयोगः ।। ८८ ।।

[1] पूर्वपरावर... इति सूत्रे (१. १. ३४).　　[2] मूर्खं छन्दोऽनुवृत्तेन इति मु. ग्र. (पृ. १२६).　　[3] धर्माभ्युदयदर्पणे B_5, B_6.

(पा.) आस्थानी—सानुमानयोः । मानं परिमाणविशेषः । अनुक्तम्—

शास्त्रद्रविणयोर्ग्रन्थः संस्था चारे स्थितौ मृतौ ।

द्रविणं द्रव्यम् । 'ग्रन्थो द्रव्यं वचः शास्त्रं द्वात्रिंशद्वर्णसंचयः' इति वैजयन्ती (पृ. २१५, श्लो. २१) ।। स्थितिर्मर्यादा ।।

अश्वत्थः पूर्णिमायां च ब्राह्मणे च चतुष्पथः ।
[1]ग्रन्थिः कुटिलतायां च रथः स्याच्चरणेऽपि च ।
निशीथो रात्रिमात्रे च स्यादमर्षेऽपि चातिथिः ।
अनीकस्थो रणखले [2]स्फीतमर्दलकेऽपि च ।
अपार्थवाच्यपि कथा स्यादश्रद्धेयवाचि च ।
पीथं तु वक्त्रनीते स्यात् पाथस्यपि पयस्यपि ।। ८८ ।।

इति थान्तवर्गः

[1] B_2 omits 4 lines.　　[2] गजशिक्षाविचक्षणे C_1.

अपवादौ तु निन्दाज्ञे दायादौ सुतबान्धवौ ।
पादा रश्म्यङ्घ्रितुर्यांशाश्चन्द्राग्न्यर्कास्तमोनुदः ।। ८९ ।।

(वि.) अपवादस्तु निन्दायामाज्ञाविस्रम्भयोरपि ।। 190 ।।

अपवदतीत्यपवादः । 'वद व्यक्तायां वाचि' ।।

दायादो बान्धवेऽपि स्यात् [1]सुतेऽपि परिकीर्तितः ।

दायमत्तीति दायादः । 'अद भक्षणे' ।।

पादो बुध्ने तुरीयांशे शैले प्रत्यन्तपर्वते ।। 191 ।।
चरणे च [2]मयूखे च क्षोदो रजसि पेषणे ।

पद्यत इति पादः । [3]'पद गतौ' ।। क्षुद्यत इति क्षोदः ।।

चन्द्रेऽपि सूर्ये वह्नौ च तमोनुत् परिकीर्तितः ।। 192 ।।

तमो नुदतीति तमोनुत् । 'णुद[4] प्रेरणे' ।। ८६ ।।

[1] शुभेऽपि J2. [2] चमूभेदे K5, K6. [3] 'पद्लृ सेवायाम्' K3, K6.
[4] नुद K2, K4.

(विव.) अपवादौ तु निन्दाज्ञे । निन्दायां प्रागुक्तः (१, पृ. १११) । अवनतान् प्रति वादो[1] वदनं कार्ये नियोजनमाज्ञा । शासनमित्यर्थः ।। दायादौ सुतबान्धवौ । दीयत इति दायो[2] धनम् । तथाभूतं रिक्थमप्रतिबन्धमादत्त इति दायादः पुत्रः । स्वामिनाशे सति दायमादत्त इति दायादो[3] बान्धवः पत्नीभ्रात्रादिसपिण्डः ।। पादा रश्म्यङ्घ्रितुर्यांशाः । रश्मिः किरणः । तुर्यांशः चतुर्थभागः । कर्तरि 'पदरुजविशस्पृशो घञ्' (३. ३. १६) कर्मकरणादौ च भवति ।। [4]शेषे—'पादः स्याद् बुध्नपूज्ययोः' इति । बुध्नो वृक्षमूलम्[5] । पूज्ये यथा—तातपादा इति । 'पादाः प्रत्यन्तपर्वताः' इति गतम् (१, पृ. २१३) ।। चन्द्राग्न्यर्कास्तमोनुदः । अर्कः सूर्यः । 'णुद प्रेरणे' इत्यस्मात् क्विपि तमोनुत् ।। ८६ ।।

[1] 'वद व्यक्तायां वाचि' । घञ्. [2] 'आतो युक्चिण्कृतोः' (७. ३. ३३) इति युक्. [3] 'डुदाञ् दाने' । 'आतश्चोपसर्गे' (३. १. १३६) इति कः. [4] Gm3, Tv add 'पादो बुध्नाङ्घ्रितुर्यांशरश्मिप्रत्यन्तपर्वताः' इति नानार्थसंग्रहः. [5] Gm3 adds अत एव तस्य पादप इति नाम.

(पा.) अभिप्राय—सुतबान्धवौ । बान्धवः सपिण्डः । पादा—तमोनुदः । रश्मिः किरणः ।। ८६ ।।

निर्वादो जनवादेऽपि शादो जम्बालशष्पयोः ।
सारावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ।। ६० ।।

(वि.) निर्वादः स्यात् परीवादे परिनिष्ठितवादयोः ।

नितरां वदतीति निर्वादः[1] ।।

शादो बालतृणेऽपि स्याज्जम्बाले च प्रकीर्तितः ।। 193 ।।

शद्येते पादावत्रेति शादः । 'शद्लृ शातने' ।।

आक्रन्दो दारुणे शुद्धे मित्रे त्रातरि रोदने ।
आरावेऽपि समाख्यातस्तन्त्रान्तरविशारदैः ।। 194 ।।

[2]आक्रन्दयतीत्याक्रन्दः । [3]'क्रदि आह्वाने रोदने च' ।। ६० ।।

[1] K2, K4 add 'वद व्यक्तायां वाचि. [2] आक्रन्दति J2. [3] 'क्रन्दि क्रोशे' K2, K3, K4.

(विव.) निर्वादो जनवादेऽपि । जनवादो निन्दा । निषिद्धो वादः निर्वादः । शेषे—'निर्वादो निश्चिते वादे वादाभावे नबव्ययम्' इति । वादस्याभावो निर्वादः[1] । 'अव्ययं विभक्ति...' इत्यादिना (२. १. ६) भावार्थेऽव्ययीभावे सति नपुंसकम् । 'अव्ययीभावश्च' (२. ४. १८) इति नपुंसकाव्ययोभयरूपत्वमित्यर्थः ।। शादो जम्बालशष्पयोः । जम्बालः पङ्कः । शष्पं [2]नवतृणम् । [3]शद्यते छिद्यत इति शादः । 'शद्लृ शातने'[4] ।। सारावे—रणे । रुदितमिति [5]भावे निष्ठा । आराव आक्रोशः । तत्सहिते रोदने इत्यर्थः । सुबोधिनीकारस्तु—आराव इत्यजादि पठित्वा पक्ष्यादि-शब्द आराव इति व्याचष्ट । [6]पार्ष्णिग्राहकृताद् भयाद् विजिगीषुं यो रक्षति स त्राता । तदुक्तम्—[7]'पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरः' इति केचित् । त्रातृशब्देन रक्षकमात्रमुच्यत इति केचित् । यथा—'निराक्रान्दमिदं जगत्' इति (टी. स. पृ. १०५) । दारुण इति युद्धविशेषणम् । 'क्रदि आह्वाने रोदने च' इत्यस्माद् यथायोगं भावे कर्मण्यधिकरणे च घञ् ।। ६० ।।

1 'वद व्यक्तायां वाचि'। घञ्. 2 'शष्पं बालतृणम्' इति वनौषधिवर्गे (पृ. ३१६). 3 शीयते B5, B6. 4 'हलश्च' इति घञ्. 5 भाववचनम् Gm3, Tv. 6 Tv adds विजिगीषोर्नायकस्य. 7 'पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रन्दं च मण्डले' इति मनुः (७. २०७); 'पश्चात् पार्ष्णिग्राह आक्रन्दः' इति कौ. अर्थ. (६. २).

(पा.) निर्वादो जनवादेऽपि । [1]निन्दायामपि स्यात् ।। शादो—दारुणे रणे । रुदिते इति विषयसप्तमी । रुदितस्यारावे इत्यर्थः । दारुणे इति विशेषणम्[2] ।। ९० ।।

1 B3, C1 add अपिशब्दात्. 2 A1 adds दारुणभूते रणे इत्यर्थः.

स्यात् प्रसादोऽनुरोधेऽपि सूदः स्याद् व्यञ्जने त्रिषु ।
गोष्ठाध्यक्षेऽपि गोविन्दो हर्षेऽप्यामोदवन्मदः ।। ९१ ।।

(वि.) प्रसादोऽनुग्रहे कार्ये प्रसक्तौ चानुवर्तते ।

[1]प्रसीदत्यनेनेति प्रसादः । 'षद्लृ विशरणगत्यवसादनेषु'[2]

सूदस्तु सूपकारे च सूपे च व्यञ्जनेऽपि च ।। 195 ।।

सूदयति [3]हिङ्गुमरीचादिगताल्पप्राणिन इति सूदः । 'षूद क्षरणे'[4] ।।

गोविन्दो वासुदेवे स्याद् गवाध्यक्षे बृहस्पतौ ।

गा विन्दतीति गोविन्दः । 'विद्लृ लाभे' ।।

मदो [5]रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः ।। 196 ।।
आमोदमद्ययोश्चैव मदनीये च वस्तुनि ।

मदयतीति मदः । 'मदी [6]हर्षग्लपनयोः' ।। ९१ ।।

1 K6 omits अनेन. 2 विशरणादौ K3, K6. 3 °मरिच° K4. 4 J2 adds हिंसायां च. 5 मदेऽपि K2, K6. 6 हर्षे J2.

(विव.) स्यात् प्रसादोऽनुरोधेऽपि । अनुरोधोऽनुग्रहः । यथा—'प्रसादाभिमुखो वेधाः' इति (कु. सं. २. १६) । शेषे—'स्वास्थ्ये प्रसादः काव्यस्य प्राणे

नैर्मल्यहर्षयोः' इति। स्वस्थत्वे यथा—प्रसन्नं हृदयम्। काव्यस्य प्राणो नाम 'श्लेषः प्रसादः समता' (काव्यादर्शे १. ४१) इत्याद्यनुक्रम्य 'प्रसादो व्यास-मार्दवम्' [1]इत्यालंकारिकोक्तलक्षणः। निर्मलत्वे यथा—सप्रसादं जलमिति[2]। प्रसीदत्यनेनेति प्रसादः[3]। करणे घञ्॥ सूदः स्याद् व्यञ्जनेऽपि च। व्यञ्जनं निष्ठानादि। सूद्यते पच्यत इति सूदः। 'षूद क्षरणे हिंसायां च'। अपिशब्दाद् औदनिके प्रागुक्तः (पृ. ५७०)॥ गोष्ठाध्यक्षेऽपि गोविन्दः। [4]अपिशब्दाद् विष्णौ बृहस्पतौ च। गा विन्दते लभत इति गोविन्दः। 'विद्लृ लाभे'। 'गवादिषु विन्देः संज्ञायाम्'[5] (वा. ३. १. १३८) इति शप्रत्ययः॥ हर्षेऽप्यामोदवन्मदः। आमोद-शब्दो यथा हर्षे वर्तते तथा मदशब्दोऽपीत्यर्थः। अपिशब्दाद् 'आमोदः सोऽतिनिर्हारी' इत्युक्तम् (पृ. ६७)। आ समन्ताद् मोदन्तेऽनेनेति आमोदः। 'मुद हर्षे'। घञ्॥ माद्यन्त्यनेनेति मदः। 'मदी हर्षे'[6]। 'मदोऽनुपसर्गे' (३. ३. ६७) इत्यप्। शेषे—'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इति॥ ९१॥

[1] आलंकारिकैरुक्तम् Tv. [2] Tv adds हर्षकार्यो भावो विवक्षितः। यथा—'मुख-प्रसादेनानुमितः प्रमोदः' इति। 'प्रसादो यश्च पैतृकः' इत्यादावपि पितृप्रसादलब्धधने लक्षणया प्रसादः प्रयुक्तः. [3] Tj1 adds 'षद्लृ विशरणादौ'. [4] Gm1, Tv add गोष्ठाध्यक्षः पशुष्वधिकृतः. [5] Gm1 adds उपसंख्यानम्. [6] B5, B6 add ग्लपनयोः.

(पा.) स्यात् प्रसादोऽनुरोधेऽपि[1]। 'प्रसादोऽनुग्रहे [2]काव्यप्राणस्वास्थ्य[3]-प्रसक्तिषु[4]' इति विश्वः (पृ. ७९, श्लो. २०)॥ सूदः स्याद् व्यञ्जनेऽपि च। 'सूदस्तु सूपवत् सूपकारे च व्यञ्जनेऽपि च' इति विश्वः (पृ. ७८, श्लो. ७)॥ गोष्ठाध्यक्षेऽपि गोविन्दः। विष्णावपि स्यात्॥ हर्षेऽप्यामोदवन्मदः। आमोदः परिमलेऽपि स्यात्। मदो गजदानेऽपि स्यात्॥ ९१॥

[1] अनुरागेऽपि C1. [2] काव्यगुण° इति मु. ग्र. [3] स्वाच्छ्य° A1, B3. [4] °प्रसत्तिषु A1.

प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्।
स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु॥ ९२॥

(वि.) प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्॥ 197॥

कं शिर इव तिष्ठतीति ककुत् । ककुदश्च । 'ष्ठा गतिनिवृत्तौ' ।।

स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु ।

[1]सम्यग् विद्यतेऽनयेति संवित् । 'विद ज्ञाने'[2] ।। ९२ ।।

[1] सम्यग्वेत्तीति K1, K6. [2] J2 adds तोषणे च प्रतिज्ञायां संकेताकारयोरपि.

(विव.) प्राधान्ये—अस्त्रियाम् । प्रधानमेव प्राधान्यम् । स्वार्थिकः [1]ष्यञ् । यथा—'इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत्' इति कालिदासः[2] (रघु. ६. ७१) । राजलिङ्गं कनकच्छत्रचामरादि[3] । यथा—'नृपतिककुदं दत्त्वा यूने सितातपवारणम्' इति (रघु. ३. ७०) । वृषभस्य पृष्ठभागे [4]ग्रीवामूलस्थोऽवयवविशेषो वृषाङ्गम् । यथा—'ककुदे वृषस्य कृतबाहुम्' इति (किरा. १२. २०) । कं सुखं कुं भूमिं च ददातीति ककुदम् । ककुच्छब्दो दकारान्तोऽप्येष्वर्थेषु वर्तते । तथा च[5] रुद्रः—'स्त्री ककुत् ककुदोऽस्त्री राट्चिह्ने श्रेष्ठवृषाङ्गयोः' इति । के शिरसि कुदतीति (?) ककुत् ।। स्त्री संवित्—आजिनामसु । सम्यग् भाषणं संभाषा । संकेत इति केचित् । क्रियाकारो निश्चयः । यथा—'धर्मतत्त्वस्य संदेहे वर्तयेद् वृद्धसंविदा' इति[6] । अत्र प्रतापः—

'संविज् ज्ञाने प्रतिज्ञायां संकेताचारनामसु ।
संभाषणे तोषणे च क्रियाकारे च संगरे ।।'

इति । ज्ञाने यथा—'एकसंविदि विभाति भेदधीः' इति । संकेते यथा—संविद्व्यतिक्रमः इति । संभाषणे यथा—'प्रौढः संविदि गोष्ठिषु' इति ।। ९२ ।।

[1] चातुर्वर्ण्यादीनां स्वार्थ उपसंख्यानम् (वा. ५. १. १२४). [2] Gm1, Tv add रघुवंशे. [3] Tv adds चिह्नम्. [4] °मूलवर्त्यवयव° Gm1. [5] Tj1, Tj2 add दकारान्तेषु. [6] Gm3, Tv add आजिः युद्धम्, नाम संज्ञा.

(पा.) प्राधान्ये—अस्त्रियाम् । प्राधान्यं प्रधानम् । 'श्रेष्ठे वृषाङ्गे राजाङ्के[1] ककुदोऽस्त्री ककुन्न [2]षण्' इति वैजयन्ती (पृ. २७९, श्लो. २८) ।। स्त्री संवित्—आजिनामसु । [3]संभाषा संभाषणम् । क्रियाकारः क्रियानियमः ।

आजिर्युद्धम् । 'संविद् युद्धे प्रतिज्ञायां संकेताचारनामसु' इति वैजयन्ती (पृ. २२३, श्लो. ४१) ।। ६२ ।।

[1] A1 omits राजाङ्के. [2] न षण् स्त्रीपुंसयोरित्यर्थः. [3] B3 omits the sentence.

धर्मे रहस्युपनिषत् स्यादृतौ वत्सरे शरत् ।
पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ।। ६३ ।।

(वि.) भवेदुपनिषद् धर्मे वेदान्तेऽपि[1] रहस्यपि ।। 198 ।।

सर्वमत्र निषीदतीत्युपनिषत् । 'षद्लृ विशरणादौ'[2] ।।

ऋतौ संवत्सरे चैव शरच्छब्दः प्रकीर्तितः ।

पङ्कं जलं च शृणातीति शरत् । 'शॄ हिंसायाम्' ।।

पदं शब्दे च वाक्ये च व्यवसायापदेशयोः ।। 199 ।।
[3]पादान्तचिह्नयोस्त्राणस्थानयोरङ्कवस्तुनोः ।

पद्यत इति पदम् । 'पद गतौ' ।। ६३ ।।

[1] च for अपि J2. [2] J2, K2 add °गत्यवसादनेषु. [3] °चिह्नयोः स्थान° J2.

(विव.) धर्मे रहस्युपनिषत् । रह इति [1]निगूढार्थवचनम् । अप्रकाशमाने यस्मिन् कस्मिंश्चिदर्थे इत्यर्थः । यथा—'मन्मथोपनिषदं मधुव्रताः' इति । वेदान्तानां रहस्यभूते ब्रह्मप्रतिपादकभागेऽपि उपनिषच्छब्दः । यथा—'एषा वेदोपनिषत्' इति (तै. उप. १. ११. ४) । तत्त्वेऽपि । यथा—'धर्मस्योपनिषत् परा' । [2]उपनिषच्छब्दः स्त्रीलिङ्गः । स्यादृतौ वत्सरे शरत् । ऋतुः आश्वयुजकार्त्तिकमासात्मकः । वत्सरे—'शरदामयुतं ययौ' (रघु. १०. १) ।। पदं—वस्तुषु । [3]व्यवसितं व्यवसायः । उद्योग इत्यर्थः । यथा—[4]'कृत्याकृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम्' इति माघः (शिशु. २. १११) । त्राणं रक्षणम् । यथा—'पदं यदा पतिमृतिः' इति । स्थानम् आश्रयः । यथा—[5]शिरसि लब्धपदं कुसुमम् । लक्ष्म चिह्नम् । यथा—'नवनखपदमङ्गं गोपयस्यंशुकेन' इति (शिशु. ११. ३४) ।

अङ्घ्रौ पादे यथा—[6]न्यस्तं पदं शिरसि विद्विषाम् इति। वस्तुमात्रे यथा—विवादपदं द्रव्यम् इति। [7]शाश्वतकोशेऽपि (पृ. ५, श्लो. ३७)—

'व्यवसाये परित्राणे पादतच्चिह्नयोरपि ।
वस्तुस्थानापदेशेषु पदं स्याद्वाक्यशब्दयोः ॥'

इति। अपदेशे व्याजे यथा—'क्षितिपदेन निवृत्तिमुपेयिवान्' इति। शब्दः सुबन्ततिङन्तात्मकः। यथा—'सुप्तिङन्तं पदम्' इति (१.४.१४)। वाक्ये यथा—'वाक्यं वेदोपमम्' इति। पदचिह्ने यथा—'क्षितिषु ददृशिरे पदानि जिष्णोररहितकेतुरथाङ्गलाञ्छनानि' इति ॥ ९३ ॥

[1] सप्तम्यर्थेऽव्ययम् B6. [2] उपनिषीदति श्रेयोऽस्यां वा। 'षद्लृ विशरणादौ। संपदादिः [°दिभ्यःक्विप्] (वा. ३. ३. ९४) इति भा. दी. (पृ. ४७६). [3] व्यवसितिः B5, B6. [4] कृत्वा इति मु. ग्र. (पृ. ६२). [5] सूर्यांशवः शिरसि (शशिनि Gm1) लब्धपदा यथैव Tv. [6] कुरु घनोरु पदानि शनैः शनै (वेणी. २. २१) Gm3. [7] Gm1 adds 'पदं स्थाने परित्राणे व्यवसायापदेशयोः' इति [अजयः टी. स. पृ. १०६].

(पा.) धर्मे रहस्युपनिषत्। रहो[1] रहस्यार्थः। 'रहस्यार्थे तूपनिषद् धर्मवेदान्तयोरपि' इति वैजयन्ती (पृ. २७१, श्लो. ३) ॥ स्यादृतौ वत्सरे शरत्। स्त्रीति [2]एतावदधिकारः ॥ पदं—वस्तुषु। लक्ष्म सिकतादिप्रदेशे दृश्यमानं [3]पादचिह्नम्।

पदं स्थाने परित्राणे व्यवसायापदेशयोः ।
वाक्ये वस्तुनि शब्दे च पादतच्चिह्नयोरपि ॥

इति जयकोशः[4] ॥ ९३ ॥

[1] A1 adds नाम. [2] तदेतदधिकारः A1. [3] °मानपाद° B3. [4] इत्यजयः A1; टीकासर्वस्वे च (पृ. १०६).

गोष्पदं सेविते माने प्रतिष्ठा कृत्यमास्पदम् ।
त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ॥ ९४ ॥

(वि.) सेविते चैव माने च गोष्पदं परिकीर्तितम् ॥ 200 ॥

[1]गोः पदं गोष्पदम् ॥

आस्पदं तु पदे कृत्ये प्रतिष्ठायां प्रकीर्तितम् ।

आ समन्तात् [2]पद्यत इत्यास्पदम्[3] ॥

स्वादुर्मनोज्ञे हृष्टे च मधुरे च त्रिलिङ्गकः ॥ 201 ॥

स्वाद्यते आस्वाद्यत इति स्वादुः । [4]'ष्वद आस्वादने' ॥

[5]अतीक्ष्णेऽपि मृदुः प्रोक्तः कोमले विशिखेऽपि च ।

[6]मृद्यत इति मृदुः । 'मृद क्षोदे' ॥ ६४ ॥

[1] K3 omits. [2] प्रपद्यते J2. [3] J2, K2 add 'पद गतौ'. [4] 'अद भक्षणे' K2, K3. [5] अतिक्षेपे J2, K4. [6] मर्द्यते J2.

(विव.) गोष्पदं सेविते माने । गावः पद्यन्ते यस्मिन् देशे,[1] स हि सेवितशब्देनोच्यते । यथा—गोष्पदान्यरण्यानीति । मीयतेऽनेनेति मानं गोखुरश्वभ्रम् । यथा—'गोष्पदपूरं वृष्टो देवः' इति (काशिका पृ. १४७) । गोष्पदमात्रं [2]क्षेत्रमिति । 'गोष्पदं सेवितासेवितप्रमाणेषु' (६. १. १४५) इति साधुः[3] । अत्र काशिकाकारः (पृ. १४७)—'नात्र गोष्पदं [4]स्वार्थमुपादीयते । किं तर्हि । क्षेत्रस्य वृष्टेश्च परिच्छेत्तुमियत्ताम्' इति ॥ प्रतिष्ठा कृत्यमास्पदम् । आत्मयापनाय [5]स्थापनं प्रतिष्ठेति काशिका (पृ. १४७) । आस्पदमनेन लब्धम् । प्रतिष्ठा अनेन लब्धेत्यर्थः । [6]'आस्पदं प्रतिष्ठायाम्' (६. १. १४६) इति साधुः ॥ कृत्यं कार्यम् । तत्र तूपचाराद् वृत्तिः ॥ त्रिष्विष्टमधुरौ स्वादू । त्रिषु । इत ऊर्ध्वं वक्ष्यमाणाः स्वादुशब्दप्रभृतयः[7] दान्तवर्गसमाप्तिपर्यन्ता विशेष्यनिघ्ना इत्यर्थः । इष्टो मृष्टः । यथा—स्वादु भुङ्क्ते । मधुरो रसविशेषवान्, कदलीफलादिः । मधुरशब्देन मनोज्ञश्च विवक्षितः । अत एव 'स्वादुर्मृष्टमनोज्ञयोः' इत्यजयः । [8]रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः इत्यादौ धर्ममात्रवचनः स्वादुशब्दः केवलपुंलिङ्गः । स्वदते स्वादुः । 'ष्वद आस्वादने' । 'कृवापाजिमिस्वदि...' (उ. १. १.) इत्यादिना उण्प्रत्ययः ॥ मृदू चातीक्ष्णकोमलौ । अतीक्ष्णः कृपावान् । यथा—मृदुप्रकृतिरिति । कोमलः सुखस्पर्शः । यथा—मृदूनि कुसुमानीति ॥ ६४ ॥

[1] Gm1 adds गोष्पदम्. [2] देशः Tj1, Tj2. [3] Tv adds इति सुट् निपात्यते. [4] स्वार्थप्रतिपादनार्थमिति मु. ग्र. [5] स्थानमिति मु. ग्र. [6] आपद्यत इत्यास्पदम् Tv.

[7] Gm1 adds त्रिषु लिङ्गेषु. [8] रसोऽपि मधुरतिक्तकटुकषायाम्ललवणचित्रभेदात् सप्तविधः—सप्तपदार्थी T. P. H. Edn. p. 23.

(पा.) गोष्पदं सेविते माने । [1]सेवितो गोसंचारप्रदेशः । [2]मानं गोखुरश्वभ्रम् ।। प्रतिष्ठा कृत्यमास्पदम् । प्रतिष्ठेति स्थानम् । कृत्यं नाम कार्यम् ।। त्रिष्विष्टमधुरौ स्वादू । त्रिष्विति विशारदशब्दान्तमधिकारः ।। मृदू—कोमलौ ।। ९४ ।।

[1] सेवितं B3, C1. [2] A1 adds नाम.

मूढाल्पापटुनिर्भाग्या मन्दाः स्युर्द्वौ तु शारदौ ।
प्रत्यग्राप्रतिभौ विद्वत्सुप्रगल्भौ विशारदौ ।। ९५ ।।

इति दान्तवर्गः

(वि.) मन्दः खले च मूर्खे च स्वैरे चाभाग्यरोगिणोः ।। 202 ।।
[1]अथाल्पेऽपि च मातङ्गगजजातिप्रभेदयोः ।
मूढे पङ्गौ समाख्यातस्तन्त्वान्तरविशारदैः ।। 203 ।।

आलस्येन मन्दते स्वपितीति मन्दः । 'मदि[2] स्वप्ने' ।।

शारदः पीतमुद्गे स्याच्छालीनेऽप्रतिभे[3] नवे ।
वर्षे च जलपिप्पल्यां सप्तपर्णे प्रकीर्तितः ।। 204 ।।

[4]शरदि भवः शारदः ।।

विशारदो बुधे हृष्टे सुप्रगल्भे प्रकीर्तितः ।

विगतः शारदः प्रतिभाहीनत्वदोषोऽस्येति विशारदः[5] ।। ९५ ।।

इति दान्तवर्गः[6]

[1] अभाग्ये J2. [2] 'मदि स्तुत्यादौ' K3. [3] प्रतिभान्विते J2. [4] शरत्संबन्धी शारदः K2, K3. [5] अनेन संशयो विशीर्यत इति विशारदः। 'शॄ विशरणे' K2, K3, K4. [6] K2, K4 add दान्तशब्दसंख्या २५.

(विव.) मूढाल्प—मन्दा स्युः। मूढः [1]प्रज्ञाहीनः। यथा—'मन्दः कवियशःप्रार्थी' इति (रघु. १. ३)। [2]अग्निमान्द्यमिति अल्पे। अपटुः [3]व्याधितः। यथा—मन्दं चिकित्सति भिषक् इति। निर्भाग्यो भाग्यहीनः। यथा—नास्ति मन्दस्य काङ्क्षितम् इति[4]। शेषे—'मन्दो [5]मन्दे मन्दकार्ये स्वैरकारीभभेदयोः' इति। इभभेदः, 'भद्रो मन्दो मृगश्चेति विज्ञेयास्त्रिविधा गजाः' इत्युक्तलक्षणः[6]। शनैश्चरग्रहोऽपि मन्द उच्यते[7]॥ द्वौ तु—अप्रतिभौ। शरदि भवः शारदः[8]। लक्षणया अन्यत्रापि। अप्रतिभः प्रज्ञारहितः। शेषे—

'शारदः सप्तपर्णे स्यात् सरस्वत्यां तु शारदा।
शारदी गजपिप्पल्यामृतुवर्षभवे[9] त्रिषु॥'

इति। ऋतुभवे वर्षभवे च वाच्यलिङ्ग इत्यर्थः॥ विद्वत्सुप्रगल्भौ विशारदौ। विशिष्टा शारदा अस्येति विद्वान्। विगतः शारदः प्रतिभाराहित्यलक्षणो दोषोऽस्येति विशारदः सुप्रगल्भः॥ ६५॥

इति दान्तवर्गः[10]

[1] प्रतिज्ञा Gm1. [2] Tv adds अल्पोऽनुत्कटः. [3] सरोगः Tj1. [4] B6 adds इति निर्भाग्ये. [5] मन्द्रे Gm3. [6] इत्यादिसूक्तलक्षणः. Gm1. [7] मन्दः शनैश्चरोऽपि Gm1. [8] 'संधिवेलाद्यृतुनक्षत्रेभ्योऽण्' इत्यण्. [9] शरदृतुभवे Gm1. [10] B6 adds दान्तशब्दसंख्या २६.

(पा.) मूढाल्प—मन्दाः स्युः। अपटुशब्देन क्षुद्रवचस्करोगिणोरेव ग्रहणम्। 'मन्दं[1] . . . मूढक्षुद्रवाग्रोगिषु' इति सज्जनः॥ द्वौ तु—अप्रतिभौ। अप्रतिभोऽधृष्टः। विद्वत्सुप्रगल्भौ विशारदौ। सुप्रगल्भः सुधृष्टः॥ अनुक्तम्—

कुरुविन्दः पुमान् पद्मरागदर्पणयोरपि।
अन्दूस्तु पादाभरणपादवन्धनयोः स्त्रियाम्।
अष्टापदस्तु शरभे भवेच्छाखामृगेऽपि च।
अर्धेन्दुर्गलहस्ते[2] स्यान्नखाङ्केऽङ्गुलिमैथुने।
जने च स्याज्जनपदो कुमुदं[3] चारुणाम्बुजे॥ ६५॥

इति दान्तवर्गः

[1] B3 adds क्ली. [2] गलहस्तोऽर्धचन्द्राकृतिशरविशेषः. [3] मुकुन्दं A1.

व्यामो वटश्च न्यग्रोधावुत्सेधः काय उन्नतिः ।
पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ।। ९६ ।।

(वि.) न्यग्रोधो व्यामवटयोर्न्यग्रोधश्च शमीतरौ ।। 205 ।।
न्यग्रोधी [1]वृषपर्ण्यां च मोहनाख्यौषधेऽपि[2] च ।

न्यक् तिर्यग् रुणद्धीति न्यग्रोधः । 'रुधिर् आवरणे' ।।

उत्सेधः स्यादुच्छ्रयेऽपि काये च परिकीर्तितः ।। 206 ।।

उत्साधयतीति उत्सेधः । 'षिधु[3] गत्याम्' ।।

विवधो वर्तते मार्गे पर्याहारे च वीवधः ।

[4]पर्याहारः तण्डुलादिवधः[5] । विविधो वधो गतिर्जीवनं वाऽत्रास्तीति विवधः वीवधश्च । 'हन हिंसागत्योः' ।। ९६।।

[1] वृषपर्णं K4, K6. [2] ओषधावपि J2, K4. [3] षिधू K2, K3. [4] पर्याहाराः तण्डुलाः K5. [5] J2 omits वधः.

(विव.) <u>व्यामो वटश्च न्यग्रोधौ</u> । व्यामः प्रागुक्तलक्षणः (१, पृ. ४१७) तिर्यक्प्रसारितभुजयोर्मध्यम् । वटः तरुविशेषः । न्यक् तिर्यक् रोहतीति न्यग्रोधः[1] । [2]' रुह बीजजन्मनि प्रादुर्भावे च ' ।। <u>उत्सेधः काय उन्नतिः</u> । कायो देहः । उन्नतिः उच्छ्रायः । ऊर्ध्वं सेधनम् उत्सेधः । 'षिधु गत्याम्' ।। <u>पर्याहारश्च—वीवधौ च तौ</u> । विक्रेतृभिः देशान्तरादाहृतं विक्रयस्थानस्थं तण्डुलादिद्रव्यं पर्याहारः[3] । मार्गः पन्थाः । तावुभौ प्रत्येकं विवधवीवधशब्दाभ्यामुच्येते । विविधो वधो गमनमत्रेति विवधः । ' विभाषा विवधवीवधात् ' (४. ४. १७) इति निर्देशाद् वैकल्पिके दीर्घे वीवधश्च । अत्र सूत्रे <u>काशिकाकारः</u>—विवधवीवधशब्दौ[4] पथि पर्याहारे च वर्तेते इति (पृ. ३६६) । अत्र <u>न्यासकारः</u>—परित आह्रियत इति पर्याहारः [5]तण्डुलादिरर्थ इति (भाग १, पृ. १०३३) । अपरस्त्वाह—परित आह्रियतेऽनेनेति पर्याहारशब्देन कोटिद्वयग्रथितशिक्यद्वययुक्तं तण्डुलाद्याहरणसाधनं काकोटिकाख्यं काष्ठवेण्वादिकमुच्यत इति । विविधो वधो [6]वहनदुःखमत्रेति विवधः । निर्देशबलादेव दीर्घे वीवधश्च ।। ९६ ।।

[1] न्यक् रुणद्धि । 'रुधिर् आवरणे' । 'कर्मण्यण्' इति भा. दी. (पृ. ४७७). [2] न्यक्पूर्वस्य रुहेः पचाद्यचि धकारो विधीयते, न्यग्रोहयतीति न्यग्रोधः इति 'न्यङ्क्वादीनां च' इति सूत्रे काशिका (पृ. ३४१). [3] Gm3, Tv add अथवा—उभयतोलब्धशिक्ययुक्तः. [4] समानार्थौ इत्यपि मु. ग्र. [5] मण्डलादिकमुच्यते इति मु. ग्र. [6] आहरणक्लेशः Gm3, Tv.

(पा.) व्यामो—उन्नतिः । [1]उन्नतिरिति ऊर्ध्वमानम् ।। पर्याहारश्च—वीवधौ च तौ । पर्याहारः[2] [3]क्षीरदधिकावटिका । धान्यानामाधानं[4] च ।। ९६ ।।

[1] A1 adds व्यामः 'बार'. [2] A1 adds नाम. [3] क्षीरादि° B3. [4] °आधिक्यम् B3, C1.

परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
बन्धकं व्यसनं चेतःपीडाधिष्ठानमाधयः ।। ९७ ।।

(वि.) [1]चक्रे प्रान्ते च परिधिः प्रतिसूर्यक एव च ।। 207 ।।
[2]यज्ञार्हवृक्षशाखायां परिवेषे च वर्तते ।

परिधीयत इति परिधिः । 'डुधाञ् धारणपोषणयोः' ।।

[3]बन्धकेऽप्याधिराधारे [4]चेतःपीडातिदुःखयोः ।। 208 ।।

आधीयत इत्याधिः ।। ९७ ।।

[1] चक्रप्रान्तेऽपि K5. [2] यज्ञाङ्ग° K5. [3] बन्धने K4, K6. [4] K3 omits seven lines.

(विव.) परिधिः—उपसूर्यके । यज्ञार्हस्य तरोः शाखायां 'त्रयः परिधयः[1]—पलाशकाश्मर्यखदिरोदुम्बरबिल्वरोहितकविकङ्कतानाम्' (आप. श्रौ. ५. ६) इत्यापस्तम्बाद्युक्तलक्षणाः शाखाः । सूर्यमण्डलसमीपस्थं प्रतिसूर्याख्यं मण्डलम् उपसूर्यकमण्डलं परिधिः । अग्नेः सूर्यस्य वा परितो धीयत इति परिधिः[2] ([3]३. ३. ९२) ।। बन्धकं—आधयः । ऋणग्रहणसमये विश्वासार्थमधमर्णेन[4] धनिकहस्ते स्थाप्यमानं सुवर्णभूषणादिकं बन्धकमुच्यते । अधमर्णेन आधीयत इति आधिः । सर्वस्वहरणपुरनिर्वासनादिकं व्यसनं[5] चेतसः पीडा । दीर्घकालानुषक्तम् अधिष्ठानमाधारः । अधिकरणे किप्रत्ययः (३. ३. ९२) ।। ९७ ।।

[1] 'सप्तास्यासन् परिधयः त्रिःसप्त समिधः कृताः' *Rgveda* X. 90. 15 (Apte's Dict. p. 979). [2] Tv adds चक्रप्रान्तेऽपि परिधिः. [3] 'उपसर्गे घोः किः' [4] उत्कर्षाधीनतया भूम्यादिभूषणादिकम् Gm3, Tv. [5] आदिरूपकं व्यसनं Gm1.

(पा.) परिधिः—उपसूर्यके । यज्ञियतरुशाखेति पशुबन्धनार्थं निखातत्वक्सहितकाष्ठम् । त्वग्रहितकाष्ठं यूपः ।। [1]बन्धकं—आधयः । बन्धकं नाम प्रतिशीर्षकम् । [2]'कुदव' । 'प्रत्याशाप्याधिरुच्यते' इति त्रिकाण्डशेषः (पृ. २८, श्लो. ७३७) । प्रत्याशेत्यागमाशा[3] ।। ९७ ।।

[1] बन्धनं B3. [2] 'कुदुव' A1. [3] आगमे आशा A1.

स्युः समर्थननीवाकनियमाश्च समाधयः ।
दोषोत्पादेऽनुबन्धः स्यात् प्रकृत्यादिविनश्वरे ।। ९८ ।।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ।

(वि.) अङ्गीकारे वैश्यभेदे[1] चित्तैकाग्र्यसमर्थने ।
नियमे वचनाभावे समाधिः परिकथ्यते ।। 209 ।।

समाधीयत इति समाधिः ।।

दोषोत्पादे स्यात् प्रकृतिप्रत्ययादिविनश्वरे[2] ।
प्रकृतस्यानुवृत्तौ च शिशौ मुख्यानुयायिनि ।। 210 ।।
अनुबन्धस्तु हिक्कायामनुबन्धी[3] च तर्षणे ।

तर्षणं तृष्णा । अनुबध्यत इत्यनुबन्धः । 'बध संयमने' ।। ९८ ।।

[1] 'समाधिर्नाम वैश्योऽहम्' इति देवीमाहात्म्ये I. 25. [2] प्रकृत्यादिषु नश्वरे K6. [3] अनुबन्धे K2, K3.

(विव.) स्युः समर्थन—समाधयः । [1]परेणाक्षिप्तस्यार्थस्य प्रतिविधानं समर्थनम् । यथा—अत्रायं समाधिरिति । नीवाको वचनाभावः । नियमो व्रतोपवासादिः । अथवा नियमोऽङ्गीकारः । 'नियमाश्रवसंश्रवाः' इत्यादिना (१, पृ. ६४) नियमसमाधिशब्दयोः पर्यायत्वाभिधानात् । समाधानं समाधिः ([2]३. ३. ९२) । सम्यगाधीयते मनोऽत्रेति वा । शेषे—'समाधिर्हृदयैकाग्र्ये वैश्यभेदप्रकारयोः' इति ।

[3]मार्कण्डेयपुराणे 'समाधिर्नाम वैश्योऽहम्' (दे. माहा. १. २५) इत्युक्तो वैश्यविशेषः। 'तं वेधा विदधे नूनं महाभूतसमाधिना' (रघु. १. २९) इति प्रकारे[4]॥ दोषोत्पादे—प्रकृतस्यानुवर्तने। दोषाणां रागद्वेषादीनामुत्पादे प्रादुर्भावे। यथा—[5]सानुबन्धावच्छिन्नपापानां विनिवृत्तये। प्रकृतिप्रत्ययागमादिषु विनश्वरे लोप्यावयवे इत्संज्ञके। यथा—[6]इकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति। शिशाविति मुख्यं प्रधानमनुसरतो गुणीभूतमात्रस्योपलक्षणम्। यथा—धनमौदार्यमनुबध्नाति। केचित् तमनुवर्तमाने यत्र क्वचन शिशौ बाले चेति अर्थद्वयपरत्वेन व्याचक्षते। प्रकृतस्य प्रारब्धस्यानुवर्तने पुनरप्यनुक्रमणे यथा—वैरानुबन्धः इति। अनिवर्तने इति क्वचित् पाठः। निवर्तनस्य समापनस्याभाव इत्यर्थः। 'बधि संयमने' इत्यस्मादनुपूर्वाद् यथायोगं कर्मणि कर्तरि च घञ्प्रत्ययः (३. ३. १९) ॥ ९८ ॥

[1] दुर्घटप्रतिविधानं समर्थनम् Gm3.　[2] 'उपसर्गे घोः किः'.　[3] Gm3, Tv add वैश्यभेदे यथा—.　[4] Tv adds इति कालिदासः.　[5] यथा—'अनुबन्धमवस्थां च ज्ञात्वा दण्डं प्रकल्पयेत्' इति। अपराधस्य अज्ञानकृतत्वे दण्डस्यात्यल्पं रागद्वेषादिदोषपूर्वकत्वे दण्डातिशयं च कल्पयेदित्यर्थः Tv.　[6] यथा तिपः पकारोऽनुबन्धकः Gm3, Tv.

(पा.) स्युः समर्थन—समाधयः। समर्थनं[1] दुर्घटप्रतिघटनम्। नीवाकः अर्थोत्कृष्टहेतुषु जनादरः। चशब्दसंगृहीतं ध्यानम् आत्मनःसंधानम्। 'समाधिः ध्याननीवाकनियमेषु समर्थने' इति रभसः[2]॥ दोषोत्पादे—प्रकृतस्यानुवर्तने। दोषोत्पादो[3] दोषप्रकटनम्। मुख्यानुयायी शिशुः। मातापितृप्रभृतीनां पृष्ठमनुसृत्य [4]गच्छत्सुतः। [5]प्रकृतानुवर्तनं प्रस्तुतानुरोधः ॥ ९८ ॥

[1] A1 adds नाम.　[2] रभसकोशः B3, C1.　[3] दोषोत्पादनं A1.　[4] गच्छन् B3.　[5] A1 adds प्रकृतानुवर्तनं दोषोत्पादनं प्रक्रान्तापरित्यागो वा.

विधुर्विष्णौ चन्द्रमसि परिच्छेदे बिलेऽवधिः ॥ ९९ ॥
विधिर्विधाने दैवेऽपि प्रणिधिः प्रार्थने चरे।
बुधवृद्धौ पण्डितेऽपि स्कन्धः समुदयेऽपि च ॥ १०० ॥

(वि.) विष्णौ चन्द्रे च कर्पूरे राक्षसे विधुरुच्यते ॥ 211 ॥

विध्यतीति विधुः। 'व्यध ताडने' ॥

[1]कालावधानसीमासु परिच्छेदे विलेऽवधिः ।

अवधीयत इत्यवधिः[2] ।

कल्पे विधाने दैवेऽपि प्रकारे चतुरानने ।। 212 ।।
विधिर्विधायकवचःकालयोः परिकीर्त्यते ।

विधीयत [3]इति विधिः ।

प्रार्थने गूढचारे चाप्यवधाने च वीरुधि ।। 213 ।।
वर्तते स्कन्धशाखायां प्रणिधिः स्थापने तथा ।

प्रणिधीयत इति प्रणिधिः ।।

बुधः सौम्ये च विबुधे [4]जिनपण्डितयोरपि[5] ।। 214 ।।

बुध्यत इति बुधः । 'बुध अवगमने'[6] ।।

वृद्धः स्याच्छैलजे जीर्णे प्रख्याते च मनीषिणि ।

वर्धत इति वृद्धः । 'वृधु वृद्धौ' ।।

तनुप्रकाण्डयोरंसे सैन्यभागसमूहयोः ।। 215 ।।
समीहानृपयोः स्कन्धो [7]बौद्धसंज्ञादिपञ्चके ।

स्कन्द्यत इति स्कन्धः । 'स्कन्दिर् गतिशोषणयोः' ।। ९९–१०० ।।

[1] कालावसाने K2, K5. [2] K3 adds 'डुधाञ् धारणपोषणयोः' [3] J2 adds अनेन. [4] जीव° K2. [5] भवेत् for अपि J2, K5. [6] K2, K6 add 'बुध बोधने' [7] वृद्धौ K4, K6.

(विव.) विधुर्विष्णौ चन्द्रमसि । [1]विधति लोकानिति विधुः विष्णुः । 'विध विधाने'[2] । विशेषेण धीयते पीयते देवैरिति विधुः[3] चन्द्रमाः । 'धेट् पाने' । औणादिक उप्रत्ययः ।। परिच्छेदे बिलेऽवधिः । परिच्छेदो मर्यादा । बिलं छिद्रम् । अवधीयतेऽनेन स्वरूपस्येयत्तेत्यवधिः । 'उपसर्गे घोः किः' (३. ३. ९२) । 'अवधिस्त्ववधाने स्यात् सीम्नि काले बिलेऽपि च' इति नानार्थसंग्रहः । अवधानमैकाग्र्यम् ।

काले यथा—'दर्शावधिं चान्द्रमुशन्ति मासम्' इति। ऐकाग्र्यमप्यवधिरुच्यते॥ विधिर्विधाने दैवेऽपि। 'उपसर्गे घोः किः' (३. ३. ९२) इति भावार्थे किप्रत्यये विधिः। विधानं यागाद्यनुष्ठानम्। पुराकृतं कर्म दैवम्। शेषे—'विधिः प्रकारे कल्पे च लिङाद्यर्थे प्रजापतौ' इति। यथा—'तुल्य एव विधिस्तयोः' इति। [4]'एष दानविधिः प्रोक्तः' इति कल्पे। लिङाद्यर्थे यथा—'विधिविहितोऽयं प्रत्ययः' इति[5]॥ प्रणिधिः प्रार्थने चरे। प्रार्थनं याच्ञा। चरोऽपसर्पः[6]। प्रणिधानमपि प्रणिधिः॥ बुद्धवृद्धौ पण्डितेऽपि। 'बुध अवबोधने' इति दैवादिको बुध्यतिरनिट्। बुध्यते। क्तः। अपिशब्दात् सुगते (१, पृ. १२), बुधिते च (२, पृ. १५०) बुद्धः प्रागुक्तः। वृद्धशब्दस्तु स्थविरे त्रिलिङ्गः। शैलेये तु नपुंसकलिङ्गः (१, पृ. २८८)॥ स्कन्धः समुदयेऽपि च। अध्यायादिसमूहः समुदयः। यथा—त्रिस्कन्धं ज्योतिःशास्त्रम्। द्वादशस्कन्धं[7] भागवतम् इति। शेषे—'समीहावृषयोः स्कन्धः सैन्यरूपादिपञ्चके' इति। समीहा इच्छा। सैन्ये यथा—'स्कन्धावारे धन्यसेनास्य राज्ञः' इति। रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्चस्कन्धा इति बौद्धाः। भुजशिरसि (१, पृ. ४११) प्रकाण्डे च (१, पृ. २२०) प्रागुक्तः। स्कन्दति गच्छतीति स्कन्धः[8]। 'स्कन्दिर् गतिशोषणयोः'। पृषोदरादिः॥९९–१००॥

[1] Tv adds विदधाति. [2] विपूर्वाद् दधातेः करोत्यर्थाद्वा विधुः Tj1, Tj2. [3] विध्यति विरहिणम्। 'व्यध ताडने'। पृभिदि . . . (उ. १. २३) इति कुः इति भा. दी. (पृ. ४७७). [4] कल्पे यथा Gm1, Tv. [5] B6 adds प्रजापतिः ब्रह्मा. [6] अवसर्पः Tv. [7] °स्कन्धसंमितं Gm3, Tv. [8] कं शिरो दधाति। 'आतोऽनुपसर्गे कः'। पारस्करादित्वात् सुट् इति भा. दी. (पृ. ४७७).

(पा.) विधुः—अवधिः। परिच्छेदः सीमा। विलं गर्तः॥ विधिर्विधाने दैवेऽपि। 'विधिर्विधाने नियतौ विधिः काले विधातरि' इति विश्वः[1]॥ प्रणिधिः—पण्डितेऽपि। [2]बुद्धशब्दः सुगतेऽपि स्यात्। वृद्धशब्दः[3] स्थविरेऽपि स्यात्॥ स्कन्धः समुदयेऽपि च। 'स्कन्धः प्रकाण्डे [4]काये च बाहुमूलसमूहयोः' इति विश्वः (पृ. ८२, श्लो. ८)॥ ९९–१००॥

[1] मुद्रितग्रन्थे न दृश्यते. [2] B3 adds अपिशब्दात्; पारिजाते बुद्ध इति पाठः. [3] B3, C_1 omit शब्दः. [4] सैन्यांशे इति मु. ग्र.

देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ।
विधा विधौ प्रकारे च साधु रम्येऽपि च त्रिषु ।। १०१ ।।

(वि.) अब्धौ देशे[1] गजमदे नद्यां सिन्धुर्नदे भवेत् ।। 216 ।।

सिमिति धयन्त्यत्रेति सिन्धुः[2] । 'धेट् पाने' ।।

[3] ऋद्धौ प्रकारे च विधा गजाद्यन्ने विधौ भृतौ ।

विधीयत इति विधा[4] ।।

योग्ये प्रवीणे रम्येऽपि साधुर्वार्धुषिके भवेत् ।। 217 ।।

[5]साध्नोति धर्ममिति साधुः । [6]'साध संसिद्धौ' ।। १०१ ।।

[1] देशविशेषे स्यात् J2. [2] संधीयत इति J2. [3] बुद्धौ K6. [4] K2, K4 add 'डुधाञ् धारणपोषणयोः'. [5] साधयति K5, K6. [6] K2, K3, K6 add राध.

(विव.) देशे—सरिति स्त्रियाम् । सैन्धवोऽश्वः[1] इति देशे[2] । नदविशेषे यथा—'विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः' (रघु. ४. ६७) इति । अब्धौ प्रागुक्तः (१, पृ. १५६) । 'समुद्रमिव सिन्धवः' इति सरित्सामान्ये । स्यन्दत इति सिन्धुः[3] । 'स्यन्दू प्रस्रवणे' (उ. १. ११) । शेषे—'सिन्धुर्गजमदेऽपि स्यात्' इति ।। विधा विधौ प्रकारे च । विधिः विधानम् । प्रकारे यथा—द्विविधः, त्रिविधः इति । शेषे—'गजान्ने वर्तने[4] विधा' इति । गजान्ने यथा—'उत्क्षिप्तहस्ततलदत्तविधान्न*-पिण्डः' इति माघकाव्ये (शिशु. ५. ५१) प्रयोगः । विधासंज्ञकान्नपिण्ड इत्यर्थः । वर्तनं जीवनोपायः । यथा—'तस्माद् यया कया च विधया बह्वन्नं प्राप्नुयात्' इति (तै. उ. ३. १०) । 'विधानर्द्धिप्रकारेषु गजान्ने वेतने विधा' इति रुद्रः । ऋद्धिः समृद्धिः । विपूर्वाद् दधातेः 'आतश्चोपसर्गे' (३. ३. १०६) इति [5]भावार्थे अङ-प्रत्ययः ।। साधु रम्येऽपि च त्रिषु । साधयति साध्नोति वा [6]प्रियमिति साधु । 'राध साध संसिद्धौ' । 'कृवापाजि . . .' इत्यादिना (उ. १. १) उण् । शेषे—'साधु-वार्धुषिके सति' इति[7] । [8]सज्जने इत्यर्थः । विश्वप्रकाशेऽपि—'साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्' इति (पृ. ८२, श्लो. १२) ।। १०१ ।।

[1] B6 omits अश्वः. [2] देशविशेषे Gm1, Tv. [3] Tv adds 'सिन्धुः समुद्रे नद्यां च नदे देशेभदानयोः' इति विश्वः. [4] वेतने Tj1, Tj2. [5] समुचितार्थेषु Tv. [6] प्रीतिम् Gm1, Gm3. [7] Tj1, Tj2 add वार्धुषिको वृद्धचाजीवी. [8] B6 adds सति. * °विधान° इति मु. ग्र.

(पा.) देशे—विधौ प्रकारे च । 'विधा विधानहस्त्यन्नप्रकारार्थेषु[1] वेतने' इति जयकोशः ।। साधू रम्येऽपि च त्रिषु । [2]'त्रिषु साधूचिते सौम्ये सज्जने वार्धुषौ पुमान्' इति[3] वैजयन्ती (पृ. २३८, श्लो. ६६) ।। १०१ ।।

[1] °प्रकारर्द्धिषु A1. [2] साधुस्त्रिषूचिते इति मु. ग्र. [3] A1 adds पुंलिङ्गे.

वधूर्जाया स्नुषा स्त्री च सुधा लेपोऽमृतं स्नुही ।
संधा प्रतिज्ञा मर्यादा श्रद्धा संप्रत्ययः स्पृहा ।। १०२ ।।

(वि.) नवोढायां स्नुषायां च जायायां युवतौ वधूः ।
[1]शटयां प्रियङ्गौ स्पृक्कायां शारिबायामपि स्मृता ।। 218 ।।

उह्यत इति वधूः । 'वह प्रापणे' ।।

लेपे क्षीरे च पीयूषे मूर्वास्नुह्योर्भवेत् सुधा ।

सुष्ठु धीयत[2] इति सुधा । 'धेट् पाने' ।।

संधाने धारणे संधा प्रतिज्ञासीमयोर्भवेत् ।। 219 ।।

संधीयत इति संधा[3] ।।

स्पृहायां भक्तचतिशये श्रद्धाशब्दः प्रकीर्तितः[4] ।

[5]श्रद्धत्त इति श्रद्धा । 'डुधाञ् धारणपोषणयोः' ।। १०२ ।।

[1] कल्यां K6. [2] धयन्त्येनाम् K5. [3] K5 adds 'डुधाञ् धारणपोषणयोः'. [4] प्रकीर्त्यते J2, K4, K6. [5] श्रद्धधाति J2.

(विव.) वधूर्जाया स्नुषा स्त्री च । स्त्रीशब्देन स्त्रीमात्रमुच्यते[1] । उह्यत इति वधूः । 'वहो धश्च' (उ. १. ८६) इत्यूकारप्रत्ययः, धश्चान्तादेशः । शेषे—

'नवोढायां प्रियङ्गौ च [2]शटीशारिबयोर्वधूः' इति । प्रियङ्गुः फलिनी । [3]शटी षड्ग्रन्था । वधूः प्रागुक्ता (१, पृ. ३६२, ३६७) ।। सुधा लेपोऽमृतं स्नुही । [4]लेपशब्देन हर्म्यादिलेपसाधनं घृतगुडसिकतादिसाहित्येन मृदितस्निग्धचूर्णादिद्रव्यमुच्यते । अमृतं पीयूषम् । स्नुही वज्रद्रुः । सुष्ठु धीयते पीयते निधीयत इति वा सुधा । 'धेट् पाने'। 'डुधाञ् धारणपोषणयोः'। शेषे—'सुधा पयसि मूर्वायाम्' इति । मूर्वा मोरटा (१, पृ. २६४) ।। संधा प्रतिज्ञा मर्यादा । सत्यसंध इति प्रतिज्ञायाम् । मर्यादा स्थितिः । यथा—

'उपकारिणि विस्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसंधं भगवति वसुधे कथं वहसि ।।'

इति । शेषे—'संधा संधानसीमयोः' इति । संधानं संश्लेषः । संधीयेते क्षेत्रद्वयप्रान्तावनयेति संधा[5] सीमा । यथा—गोदावरीसंधो विन्ध्य इति ।। श्रद्धा संप्रत्ययः स्पृहा । संप्रत्ययो विश्वासः[6] । यथा—श्रद्धा धर्मस्य साधनम् इति । इच्छायां यथा—[7]'श्रद्धालुर्दोहदवती' इति (१, पृ. ३७४) । 'श्रदन्तरोरुपसर्गवद् वृत्तिर्वक्तव्या' (काशिका पृ. २२३) इति उपसर्गवद्भावात् 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्प्रत्यये श्रद्धा ।। १०२ ।।

[1] गम्यते Tv. [2] सृक्काशारिबयोरिति क्वचित्पाठः Gm1, Tv. [3] सृक्का देविलता, शारिबा गोपी Tj1, Tj2. [4] Tv adds लिप्यतेऽनेनेति लेपः. [5] 'डुधाञ् धारणपोषणयोः'। 'आतश्चोपसर्गे' इत्यङ्. [6] श्रत्पूर्वो दधातिर्विश्वासे वर्तते । यथा—'वृहस्पतिरकामयत श्रन्मे देवा दधीरन्' इति श्रुतिः Tv. [7] 'श्रद्धालुर्दोहदिन्यपि' इति धरणिकोशे (पृ. १८६, श्लो. ११५८).

(पा.) वधूर्जाया—स्नुही । लेप [1]इति चूर्णम् । 'सुन्नमु' ।। संधा—स्पृहा । संप्रत्यय[2] आस्तिक्यम् ।। १०२ ।।

[1] B3, C1 omit इति. [2] A1 adds नाम.

मधु मद्ये पुष्परसे क्षौद्रेऽप्यन्धं तमस्यपि ।
अतस्त्रिषु समुन्नद्धौ पण्डितंमन्यगर्वितौ ।। १०३ ।।

(वि.) जीवाशोके वसन्ते स्याच्चैत्रे दैत्ये द्रुमे मधुः ।। 220 ।।
क्षीरे मद्ये[1] पुष्परसे जले क्षौद्रे नपुंसकम् ।

[2]माद्यन्त्यनेनेति मधुः । [3]'मदि हर्षग्लेपनयोः' ॥

अन्धं [4]जले तमसि च दृष्टिहीने पुमान् स्मृतः ॥ 221 ॥

अन्धयतीत्यन्धः । 'अन्ध [5]दृष्टयुपघाते' ॥ अथ त्रिषु । [6]अतःपरं धान्तशब्दाः[7] त्रिषु लिङ्गेषु वर्तन्ते ।

[8]गर्विते पण्डितंमन्ये दुष्टवर्तनवर्तके ।
ऊर्ध्ववद्धे समुद्भूते समुन्नद्धोऽभिधीयते ॥ 222 ॥

समुन्नह्यत इति समुन्नद्धः । 'णह् वन्धने' ॥ १०३ ॥

[1] मधौ J2. [2] माद्यते J2; माद्यन्ते K5. [3] 'मदी हर्षे' K3, K6. [4] जडे K6. [5] दृष्टयुपसंहारे K2, K6. [6] K5 omits 4 lines. [7] धान्तवर्गाः K6. [8] गर्हिते J2.

(विव.) मधु मद्ये—क्षौद्रेऽपि । माध्वीकरूपे मधुविशेषे, पुष्परसे मकरन्दे, क्षुद्राभिर्मक्षिकाविशेषैः कृते सारघे । मन्यत इति मधु । 'मन ज्ञाने' । 'फलिपाटिनमिमनिजनाम् . . .' इत्यादिना (उ. १. १८) उप्रत्ययो [1]धकारागमश्च । शेषे—

'मधुर्ना क्षत्रिये चैत्रे वसन्ते दानवे द्रुमे ।
अस्त्रियां मद्यभेदे स्यात् क्लीबं सलिलदुग्धयोः ॥'

इति । 'पतिषु निर्विविशुर्मधुमङ्गनाः'[2] इति मधुनः[3] रघुवंशे पुंलिङ्गप्रयोगः* (रघु. ९. ३६) ॥ अन्धं तमस्यपि । [4]अन्ध्यते चक्षुर्वृत्तिरुपसंह्रियतेऽनेनेति अन्धम् । 'अन्ध [5]दृष्टयुपसंहारे' (३. १. १३४) । अपिशब्दात् चक्षुरिन्द्रियविकले वाच्यलिङ्गः[6] ॥ अतस्त्रिषु । इत [7]ऊर्ध्वं वक्ष्यमाणधकारान्तांश्चत्वारः शब्दा वाच्यलिङ्गा इत्यर्थः । समुन्नद्धौ पण्डितंमन्यगर्वितौ । पण्डितमात्मानं मन्यत इति पण्डितंमन्यः ([8]३. २. ८३) । पाण्डित्याभिमानयुक्त इत्यर्थः । गर्वातिशयवान् गर्वितः । आत्माभिमानेन गर्वेण च सम्यगूर्ध्वं नह्यत इति समुन्नद्धः । 'णह् बन्धने' । क्तः ॥ १०३ ॥

[1] धकारादेशश्च B6. [2] Gm3, Tv add स्मरसखं रसखण्डनवर्जितम्. [3] मधुशब्दस्य Tv. [4] रूपभेदाद् अन्धकारे अन्धशब्दो नपुंसकलिङ्गः Gm1, Tv. [5] दृष्टयुपघाते Tv. [6] Tj1 adds प्रागुक्तः (पृ. ३९९). [7] अनन्तरं B5, B6. [8] 'आत्ममाने खश्च'. * 'मकरन्दस्य . . . । अर्धर्चादिगणे पाठात् पुंनपुंसकयोर्मधुः' इति मल्लिनाथः.

(पा.) मधु मद्ये—क्षौद्रेऽपि । क्षौद्रे केषांचिद् नपुंसकम् । 'क्षौद्रादौ [1]तद्रसेऽप्यस्त्री ना वसन्ते रसे सुरे' इति वैजयन्ती (पृ. २३५, श्लो. ६१) ।। अन्धं तमस्यपि । चक्षुर्विकले [2]त्रिलिङ्गम् ।। अतस्त्रिषु—गर्वितौ ।। १०३ ।।

[1] तत्सुते A_1. [2] त्रिलिङ्गः B_3, C_1.

ब्रह्मबन्धुरधिक्षेपे निर्देशेऽथावलम्बितः ।
अविदूरोऽप्यवष्टब्धः प्रसिद्धौ ख्यातभूषितौ ।। १०४ ।।

इति धान्तवर्गः

(वि.) [1]अधिक्षिप्ते ब्रह्मवन्धुर्निर्देशे च द्विजन्मनाम् ।

[2]ब्रह्मणो वन्धुः ब्रह्मवन्धुः ।।

आक्रान्ते चाविदूरे स्यादवष्टब्धोऽवलम्बने[3] ।। 223 ।।

अवष्टभ्यत इत्यवष्टब्धः । 'स्तभि ष्टभि प्रतिवन्धे'[4] ।।

ख्यातभूषितयोश्चैव प्रसिद्धः परिकथ्यते ।

प्रकर्षेण सिद्धः प्रसिद्धः ।। १०४ ।।

इति धान्तवर्गः[5]

[1] अधिक्षेपे K_4, K_5. [2] J_2 adds ब्राह्मणस्य. [3] अवलम्बिते J_2. [4] प्रतिबन्धने J_2, K_4. [5] K_2 adds धान्तवर्गसंख्या २८.

(विव.) ब्रह्मबन्धुरधिक्षेपे निर्देशे । ब्राह्मणोऽप्ययं ब्राह्मणकर्मणि न प्रवर्तते, केवलं जातिमात्रयुक्त एवेति । एवमाद्यधिक्षेपे तिरस्कारे प्रकाशनीये ब्रह्मबन्धुशब्दः प्रयोक्तव्यः । यथा—ब्रह्मबन्धो किमेवमात्थ इति । निर्दिश्यत इति निर्देशः । यस्य [1]द्वेषान्नाम न गृह्यते, न त्वधिक्षेपार्थम्, तस्मिन्निर्देष्टव्ये ब्रह्मबन्धुशब्दः । यथा—किं करोति ब्रह्मबन्धुः इति । अत्र केचिदाहुः—ब्राह्मणजातियुक्तोऽयमित्येतावत्येव निर्देष्टव्ये ब्रह्मबन्धुरिति वाच्य इति । अपरे आहुः—कस्मिंश्चिद् देशान्तरीयत्वेन प्रागज्ञाते[2] शुश्रूषादिना परिज्ञातब्राह्मणसंबन्धे भृत्यशिष्यादौ निर्देष्टव्ये

ब्रह्मबन्धुरिति निर्देश इति । ब्रह्मबन्धुरित्यत्र [3]बहुव्रीहौ तत्पुरुषे वा समासे [4]ब्रह्मप्रतियोगिकबन्धुत्वमेव प्रकाश्यते, न तु ब्रह्मत्वमिति अधिक्षेपावगतिः । यथा— मैत्रभार्यापुत्र इत्युक्ते मैत्रजन्योऽयं न भवतीति [5]प्रतीतिः ।। अथ—अवष्टब्धः । अवलम्बितः आलम्बितः, गृहीत इति यावत्[6] । यथा—हस्तावष्टब्धयष्टिः इति । अविदूरे यथा—अवष्टब्धा सेना (काशिका पृ. ४३८) इति । आसन्ना इत्यर्थः । अवष्टभ्यत इत्यवष्टब्धः । [7]स्तम्भिः सौत्रो धातुः प्रतिबन्धार्थः । कर्मणि क्तः (३. ४. ७२) । 'अवाच्चालम्बनाविदूर्ययोः' (८. ३. ६८) इति षत्वम् । शेषे— 'आक्रान्ते चावरुद्धे स्यादवष्टब्धस्तिरस्कृते' इति । आक्रान्ते यथा—'रथान्तरमवष्टब्धं तदा तेन तरस्विना' इति । गले [8]वटिनावष्टब्ध इति निरुद्धे । तिरस्कारे यथा—निग्रहावष्टब्धो वावदूकं मन्यते इति ।। प्रसिद्धौ ख्यातभूषितौ । ख्यातः प्रख्यातः । भूषितोऽलंकृतः । प्रसिध्यति सर्वत्र प्रख्यातो भवतीति प्रसिद्धः[9] ।। १०४ ।।

इति धान्तवर्गः[10]

[1] Gm3, Tv add अज्ञानाद्वा.　[2] अज्ञातवर्णविशेषे Gm1, Tv.　[3] ब्रह्मबन्धुरस्य Tj1, Tj2.　[4] ब्रह्मप्रातिपदिकं Tv.　[5] अधिक्षेपप्रतीतिः Gm3, Tv.　[6] इति केचित् Tv.　[7] 'स्तम्भु रोधने' इति सौत्रो धातुः Tj1.　[8] परेण for वटिना (रज्जुना) Tv.　[9] B6 adds 'षिधु संराद्धौ' क्तः.　[10] B6 adds धान्तवर्गशब्दाः २८.

(पा.) ब्रह्मबन्धुरधिक्षेपे निर्देशे । किं कृतं ब्रह्मबन्धोर्दासि । अत्र दासी अधिक्षेप्या ब्रह्मबन्धोरिति तदधिक्षेपः । [1]अतः त्रिष्वित्यधिकाराद् अधिक्षेप्यलिङ्गः । ब्रह्मबन्धो माणवक तिष्ठ । अत्र माणवको निर्देश्यः । ब्रह्मबन्धो इति तन्निर्देशः । अतस्त्रिष्वित्यधिकाराद् निर्देश्यलिङ्गः ।। अथावलम्बितः—भूषितौ ।। अनुक्तम्—

कबन्धः सैंहिकेयेऽपि गन्धोऽहंकरणेऽपि च ।
शुद्धं तु केवलेऽपि स्यादब्धिः पद्माकरेऽपि च ।
[2]निषेधोऽपि च बाधे स्यान्मग्धं स्यान्नूतनेऽपि च ।
दोग्धा गोपालके वत्से निन्दावार्तोपजीविनि[3] ।
योजनगन्धा कस्तूर्यां तन्मृगे व्यासमातरि ।। १०४ ।।

इति धान्तवर्गः

[1] ततः A1.　[2] निषिद्धोऽपि च A1.　[3] °वर्तोपजीविनि A1.

अथ नान्तशब्दाः—

सूर्यवह्नी चित्रभानू भानू रश्मिदिवाकरौ ।
भूतात्मानौ धातृदेहौ मूर्खनीचौ पृथग्जनौ ।। १०५ ।।

(वि.) अग्नौ सूर्ये चित्रभानुर्भानुर्र्यम्णि दीधितौ ।। 224 ।।

चित्रा [1]भानवो यस्यासौ चित्रभानुः । भातीति भानुः ।

देहे विरिञ्चौ भूतात्मा नीचे मूर्खे पृथग्जनः ।

'भा दीप्तौ' ।। भूतानामात्मा भूतात्मा । यद्वा भूतान्यात्मा यस्येति वा भूतात्मा ।। [2]पृथक्कार्यो जनः पृथग्जनः ।। १०५ ।।

[1] J_2 adds किरणाः. [2] K_4, K_5 omit the derivation; पृथक् कृतः K_2.

(विव.) **सूर्यवह्नी चित्रभानू । [1]संयोगिद्रव्योपाधिवशात् चित्रा नानावर्णा भानवो रश्मयो यस्य सः चित्रभानुः ।। भानू रश्मिदिवाकरौ । रश्मिः किरणः[2] ।। भूतात्मानौ धातृदेहौ । भूतानां सर्वप्राणिनाम् अन्तर्यामिरूपेणावस्थितः आत्मा भूतात्मा ब्रह्मा । पृथिव्यादीनि पञ्च भूतानि आत्मा स्वरूपमस्येति भूतात्मा देहः ।। मूर्खनीचौ पृथग्जनौ । मूर्खः विवेकरहितः । नीचो हीनजातिः । सभ्यजनापेक्षया पृथक्कृतो जनः पृथग्जनः । ([3]वा. २. १. ६०) ।। १०५ ।।**

[1] संयोगे B_6. [2] भातीति भानुः । 'भा दीप्तौ' । 'दाभाभ्यां नुः' (उ. ३. ३२) इति नुः—भा. दी. (पृ. ४७८). [3] 'शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च'.

(पा.) सूर्यवह्नी—दिवाकरौ । भानुः [1]दिवसेऽपि स्यात् । 'दिवसं चास्त्रियौ भानुर्घृणिर्घस्रो रविध्वजः'[2] इति वैजयन्ती (पृ. २१, श्लो. ५५) ।। भूतात्मानौ—पृथग्जनौ ।। १०५ ।।

[1] दिवसोऽपि B_3, C_1. [2] घृणिघृष्टिरविध्वजाः A_1.

ग्रावाणौ शैलपाषाणौ पत्रिणौ शरपक्षिणौ ।
तरुशैलौ शिखरिणौ शिखिनौ वह्निबर्हिणौ ।। १०६ ।।

(वि.)　शिलोच्चये च पाषाणे ग्रावा समभिधीयते ॥ 225 ॥

गिरतीति ग्रावा । 'गॄ निगरणे' ॥

विहङ्गमे सायके च श्येनपर्वतयोरपि ।
[1]महीरुहे वाहनेऽपि[2] पत्रिशब्दोऽभिधीयते ॥ 226 ॥

पत्रमस्यास्तीति पत्री ॥

अपामार्गे वृक्षशैलकोटीषु[3] शिखरी मतः ।

शिखरमस्यास्तीति शिखरी ॥

वह्नौ मयूरे चूडाले सारङ्गे शैलवृक्षयोः ॥ 227 ॥
वलीवर्दे कुक्कुटे च केतौ विप्रे शिखी मतः ।

शिखा अस्यास्तीति शिखी ॥ १०६ ॥

[1] महारवे J2.　[2] च for अपि J2, K4.　[3] °कूटेषु K5.

(विव.)　<u>ग्रावाणौ शैलपाषाणौ</u>। व्यक्तार्थमेतत् । [1]उक्तयोगश्च । <u>पत्रिणौ शरपक्षिणौ</u>। इह पक्षिशब्देन पक्षिसामान्यम्, तद्विशेषः श्येनश्च गृह्यते। पत्रशब्दो येषु पलाशवहनादिष्वर्थेषु वर्तते, ते सर्वे द्रुमरथादयः पत्रिशब्दस्यार्थ इति विज्ञेयम्[2] ॥ <u>तरुशैलौ शिखरिणौ</u> । वृक्षाग्रं पर्वताग्रं च शिखरमिति प्रागुक्तम् (१, पृ. २२१, २११) । तद्योगात् तरुशैलौ । अपामार्गेऽपि शिखरिशब्दः (१, पृ. २६७) ॥ <u>शिखिनौ वह्नि-बर्हिणौ</u> । ज्वाला चूडा च शिखा (१, पृ. ३६, ३५३) । तद्योगाद् उभावपि शिखिनौ । शेषे—'ओषधौ[3] पर्वते विप्रे कुक्कुटध्वजयोः शिखी' इति । ओषधिः मयूरशिखेति[4] प्रसिद्धा चित्रकश्च[5] (१, पृ. २६२) ॥ १०६ ॥

[1] व्यक्त° Tv; 'गॄ निगरणे', 'शब्दे' वा, 'अन्येभ्योऽपि दृश्यते' (३. २. ७५) इति वनिप् । पृषोदरादिः—भा. दी. (पृ. १४२).　[2] पत्राणि सन्त्यस्येति पत्री । 'अत इनिठनौ' (५. २. ११५) इतीनिः.　[3] औषधे Tj1, Tj2.　[4] °शिखाख्यया Tv.　[5] P6 adds वृक्षविशेषेऽपि.

(पा.)　<u>ग्रावाणौ शैलपाषाणौ—वह्निवर्हिणौ</u> ॥ १०६ ॥

प्रतियत्नावुभौ लिप्सोपग्रहावथ सादिनौ ।
द्वौ सारथिहयारोहौ वाजिनोऽश्वेषुपक्षिणः ।। १०७ ।।

(वि.) प्रतियत्नस्तु संस्कारे[1] लिप्सोपग्रहयोरपि ।। 228 ।।

[2]प्रतियत्यत इति प्रतियत्नः । 'यती प्रयत्ने' ।।

सादी तुरङ्गमारोहे रथारोहे निषादिनि[3] ।

[4]आलस्यं सादयतीति सादी । 'षद्लृ [5]विशरणगत्यवसादनेषु' ।।

तुरङ्गमे सायके च वाजी तु विहगे भवेत् ।। 229 ।।

वाजः पक्षोऽस्यास्तीति वाजी ।। १०७ ।।

[1] संभारे K2, K6. [2] प्रतियतते K2. [3] गजारोहे इत्यर्थः. [4] अवश्यं सीदति K5. [5] विशरणादौ K5.

(विव.) प्रतियत्नावुभौ लिप्सोपग्रहौ । लब्धुमिच्छा लिप्सा[1] । उपग्रहो बन्दिग्रहः[2] । प्रतियत्यते प्राप्यं प्रति यत्नः क्रियतेऽनेनेति प्रतियत्नः । 'यती प्रयत्ने' । 'यजयाच ...' इत्यादिना (३. ३. ९०) नङ् प्रत्ययः । शेषे—'प्रतियत्नः प्रतीकारे गुणाधाने च वस्तुनः' इति । [3]अपकर्तुः [4]प्रातिकूल्याचरणं प्रतीकारः । पानीयादेर्वस्तुनः कर्पूरादिना गुणविशेषाधानं प्रतियत्नः ।। अथ सादिनौ—हयारोहौ । सीदति निषीदति अवश्यमिति सादी[5] सारथिः । सादयति [6]तुरगमिति सादी हयारोहः । [7]प्रतापोऽपि—'सादी स्यात् तुरगारोहे रथेभारोहयोरपि' इति । इभारोहे गजारोहे इत्यर्थः ।। वाजिनोऽश्वेषुपक्षिणः । इषुः बाणः । वाजाः पक्षाः सन्त्येषामिति वाजिनः[8] । अश्वानामपि पुराकल्पे पक्षाः आसन्निति पौराणिकी प्रसिद्धिः । तेन भूतपूर्वगत्या [9]संप्रत्यपि वाजिन इत्युच्यन्ते । अथवा 'वज गतौ' इति धातोः णिनिप्रत्यये वाजी ।। १०७ ।।

[1] Gm3, Tv add यथा—ग्रामविषयप्रतियत्न इति. [2] बन्दिग्राहः Gm1, Tv. [3] अपकारिणः Tv. [4] प्रातिकूल्येनोद्योगः Tv. [5] 'षद्लृ विशरणादौ' । 'आवश्यकाधमर्ण्ययोर्णिनिः' इति णिनिः. [6] तुरङ्गम् B6. [7] तथा च प्रतापः Gm3, Tv. [8] 'अत इनिठनौ' इतीनिः. [9] सांप्रतिका अपि Tj1, Tj2.

(पा.) प्रतियत्नावुभौ लिप्सोपग्रहौ। लब्धुमिच्छा लिप्सा। अनुकूलमुपग्रहः। संस्कारोऽपि स्यात्[1]। सतो गुणस्य गुणान्तराधानं संस्कारः। 'प्रतियत्नस्तु संस्कारे लिप्सोपग्रहयोरपि' इति रुद्रः॥ अथ सादिनौ—पक्षिणः॥ १०७॥

[1] B3, C1 omit स्यात्.

कुलेऽप्यभिजनो जन्मभूम्यामप्यथ हायनाः।
वर्षार्चिर्व्रीहिभेदाश्च चन्द्राग्न्यर्का विरोचनाः॥ १०८॥

(वि.) [1]कुलेऽप्यभिजनो जन्मभूम्यां कीर्तौ कुलध्वजे।

अभिजन्यत इत्यभिजनः[2]॥

वर्षे वर्गे व्रीहिभेदे हायनोऽर्चिषि च स्मृतः॥ 230॥

[3]जहाति [4]विभवानिति हायनः। 'ओहाक् त्यागे'। अर्चिःपक्षे हयति [5]दीपयतीति हायनः। 'हय गतिदीप्त्योः'॥

विरोचनश्चन्द्रवह्न्योर्बलिताते दिवाकरे।

विरोचत इति विरोचनः। 'रुच दीप्तौ'॥ १०८॥

[1] जने K6. [2] K2, K4 add 'जनी प्रादुर्भावे'. [3] जिहीते, 'ओहाङ गतौ' K5. [4] भावान् K4, K5. [5] K5 adds प्रकाशयति.

(विव.) कुले—जन्मभूम्यामपि। कुलं वंशः। यथा—महाभिजनप्रभवोऽयमिति। जन्मस्थाने यथा—कन्याकुब्जाभिजनस्त्रिविक्रमसेन इति। अभिजायतेऽस्मिन्नित्यभिजनः। 'जनी प्रादुर्भावे'। अधिकरणे घञ् (३. ३. १२१)। 'जनिवध्योश्च' (७. ३. ३३) इति वृद्धिप्रतिषेधः॥ अथ हायनाः—भेदाः स्युः। [1]वर्षः वत्सरः। अर्चिः ज्वाला। व्रीहिभेदः षष्टिकाख्यः। जहातीति हायनः। 'ओहाक् त्यागे'। 'हश्च व्रीहिकालयोः' (३. १. १४८) इति ण्युट्प्रत्ययः। 'आतो युक्चिण्कृतोः' इति [2]युक् (७. ३. ३३)। जिहीते ऊर्ध्वं गच्छतीति हायनोऽर्चिः[3]। यद्यपि वर्षार्चिर्वाचकस्य हायनशब्दस्य नपुंसकलिङ्गत्वमप्यस्ति तथापि पुंलिङ्गस्यापि सद्भावेन हायनशब्दस्य [4]भिन्नलिङ्गत्वाभावादेकशेषोपपत्तिरिति॥ चन्द्राग्न्यर्का

विरोचनाः । विशेषेण [5]रोचते दीप्यत इति विरोचनः । 'रुच [6]दीप्तौ' । 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच् । शेषे—'विरोचनो बलेस्ताते' इति । बलिचक्रवर्तिनः पिता विरोचनः पुराणेषु प्रसिद्धः ॥ १०८ ॥

[1] वर्षं B6, Tj2. [2] आतो युगागमः Gm1, Tv. [3] Tv adds 'ओहाङ् गतौ'. [4] एकदेश° Gm3, Tv. [5] B5, B6 omit रोचते. [6] Tj1, Tj2 add अभिप्रीतौ च.

(पा.) कुले—व्रीहिभेदाः स्युः । वर्षार्चिषोर्नपुंसकमपि[1] । वर्षो वत्सरः । अर्चिः मयूखः । अनयोः क्लीवत्वं चेति सुभूतिटीका[2] ॥ चन्द्राग्न्यर्का विरोचनाः ॥ १०८ ॥

[1] A1 omits अपि. [2] B3, C1 add व्रीहिभेदः षष्टिकाख्यः.

केशेऽपि वृजिनो विश्वकर्मार्कसुरशिल्पिनोः ।
आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च ॥ १०९ ॥

(वि.) वृजिनः कुटिले केशे किल्बिषे[1] वृजिनं भवेत् ॥ 231 ॥

[2]वृज्यत इति वृजिनः[3] । 'वृजी वर्जने' ॥

विश्वकर्मा देवशिल्पिसूर्ययोस्तापसान्तरे ।

विश्वस्य [4]कर्मास्यास्तीति विश्वकर्मा ॥

यत्नस्वभावदेहेषु धैर्यक्षेत्रज्ञयोरपि ॥ 232 ॥
मनीषायां च हृदये ब्रह्मण्यात्माभिधीयते ।

अततीत्यात्मा । 'अत सातत्यगमने' ॥ १०९ ॥

[1] किल्बिषं K4. [2] वर्ज्यते K5. [3] वृजिनम् K3. [4] कर्माण्यस्मिन् J2.

(विव.) क्लेशेऽपि वृजिनः । क्लेशो दुःखम् । [1]वृज्यते त्यज्यत इति वृजिनः[2] । रूपभेदात् पुंलिङ्गः । शेषे—'क्लीबे वृजिनमेनसि' इति पापे नपुंसकम्[3] । 'वृजिनं कल्मषे क्लीबं क्लेशे ना कुटिले त्रिषु' इति रभसः ॥ विश्वकर्मार्कसुरशिल्पिनोः । विश्वस्य लोकस्य कर्माणि व्यापारा यस्मादिति विश्वकर्मा सूर्यः ।

विश्वानि कर्माणि देवसभानिर्माणादीनि यस्येति देवशिल्पी[4] ।। आत्मा—वर्ष्म च । यत्नः प्रयत्नः । यथा—[5]आत्मानुरूपं फलमिति । यत्नानुरूपमित्यर्थः । [6]धृतौ धैर्ये यथा—आत्मवान् नैव मुह्यतीति । बुद्धौ यथा—स्वात्मवेद्योऽयमर्थः । [7]स्वबुद्धि-वेद्योऽयमिति यावत् । स्वभावः सहजो धर्मः । यथा—दुष्टात्मा क्रोधात्मा । ब्रह्मणि परमात्मनि यथा—'आत्मैवेदं सर्वम्' (छा. उ. ७. २५. २) इति । वर्ष्मणि शरीरे यथा—स्थूलात्मा, कृशात्मा इति । शेषे—'आत्मेन्द्रियेऽनिले जीवे' इति । इन्द्रिये यथा—नियतात्मा, संयतात्मा इति । अनिलः प्राणाख्यो वायुभेदः । यथा—नेदं निरात्मकं जीवच्छरीरम् । जीवात्मनि यथा—'नानात्मानो व्यवस्थातः' (वैशे. सू. ३. २. २०) इति । वैजयन्त्यामपि—'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि । [8]इन्द्रिये वायुभेदे च' इति (पृ. २१४, श्लो. ६) । अतति सर्वगतो भवतीति आत्मा । 'अत सातत्यगमने'[9] ।। १०९ ।।

[1] वर्ज्यते B6. [2] Tv adds 'वृजी वर्जने'. [3] Gm3, Tv add इत्यर्थः. [4] Tj1 adds त्वष्टा. [5] स्वात्मानुरूपं फलम् (Bhartṛhari, v. 350). [6] धृतिः धैर्यम् Tv. [7] स्वप्रत्ययवेद्य इत्यर्थः Tv. [8] यत्नेऽर्केऽग्नौ मतौ वाते इति मु. ग्र. [9] 'सातिभ्यां मनिन्मनिणौ' (उ. ४. १५३) [इति मनिण्] इति भा. दी. (पृ. ४७९).

(पा.) केशेऽपि वृजिनः । 'वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु' इति रभसः[1] ।। विश्वकर्मा—वर्ष्म च । यत्ने—'सर्वात्मना चक्षुरिव प्रविष्टा' इति रघुवंशः (७. १२) । धृतौ—महात्मानस्तपस्विनः । बुद्धौ—आत्मा ह्यनुभवति सुखदुःखे । स्वभावे—'अजानन् दाहात्म्यं [2]पततु शलभस्तीव्रदहने'[3] (वैरा. श. १८) । ब्रह्मणि—'प्राक्सृष्टेः केवलात्मने' (कु. सं. २. ४) । वर्ष्मणि—'अस्त्युत्तरस्यां दिशि देवतात्मा'[4] (कु. सं. १. १) । जीवमनसी अपि स्याताम् । ब्रह्मात्मनोर-भेदज्ञः । 'आत्मा येन जितस्तेन जितं हि भुवनत्रयम्' ।। १०९ ।।

[1] B3 adds विश्वप्रकाशिका च; मुद्रितग्रन्थे तु 'वृजिनं कल्मषे केशे वृजिनः कुटिलेऽन्य-वत्' इति दृश्यते (पृ. ९२, श्लो. ८६). [2] A1 omits the 3 words. [3] शलभस्त्री प्रदहने B3. [4] A1 adds इति कुमारसंभवः.

शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः ।
अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ।। ११० ।।

(वि.) श्लक्ष्णे शक्रे घातुकेभे [1]वर्षुकाब्दे घनाघनः[2] ॥ 233 ॥
अतिशयेन घनो निरन्तरो घनाघनः ।

अभिमानो [3]वधे ज्ञाने प्रणयार्थादिदर्पयोः ।
अभिमन्यत इत्यभिमानः । 'मन ज्ञाने' । [4]'मीञ् हिंसायाम्' ॥ ११० ॥

[1] वार्षिकाब्दे J_2, K_6. [2] J_2, K_4 add घातुकः मत्तेभः इति पदद्वयं वा.
[3] विधिज्ञाने K_6. [4] K_5 omits.

(विव.) शक्रो—घनाघनः । घातुको हिंस्रः । मत्तेभो मत्तगजः । वर्षुकाब्दो वर्षणशीलो मेघः । इन्द्राद्यर्थचतुष्टयेषु घनाघनशब्दः । तथा च हलायुधः[1] (अ. मा. ५. ४०)—'घनाघनो घातुकमत्तदन्तिनोर्निरन्तरे वासववर्षुकाब्दयोः' इति । यथा—घनाघने नभसि भान्ति नार्कत्विषः इति । [2]स्वामी तु—घातुकश्चासौ मत्तेभश्चेति कर्मधारयमुक्त्वा व्याख्यत् । हन्तीति घनाघनः[3] । 'चरिचलिपतिवदीनां द्वित्वमच्याक् चाभ्यासस्य' (वा. ६. १. १२) इत्यनुवृत्तौ 'हन्तेर्घत्वं च' (वा. ६. १. १२) इति धातोर्द्विर्वचनमभ्यासस्यागागमश्च, हकारस्य च घत्वं च[4] ॥ अभिमानो—हिंसयोः । धनेन कुलेन विद्यया वा मत्सदृशः कोऽपि नास्तीति बुद्धिरर्थादिदर्पः । अत्र ज्ञानशब्देन अतस्मिंस्तदिति [5]ज्ञानविशेषो विवक्षितः । यथा—शुक्तिकाशकले रजताभिमानः इति । प्रणयः प्रार्थना । परोपद्रवकरणं हिंसा । 'मन ज्ञाने' 'मन अवबोधने' 'मान पूजायाम्' । एभ्यो धातुभ्यो यथातथं भावे घञि (३. ३. १८) अभिमानः । 'मीञ् हिंसायाम्' इत्यस्माद्धातोः ल्युटि (३. ३. ११५) 'मीनाति मिनोति...' (६. १. ५०) इत्यात्वे मानशब्दो हिंसावचनः[6] । को मान इति महाभाष्यप्रयोगदर्शनात्[7] ल्युडन्तस्यापि पुंलिङ्गत्वोपपत्तिः ॥ ११० ॥

[1] मुद्रितग्रन्थे तु 'घनाघनः शक्रवर्षुकाम्बुदयोः' इत्येव दृश्यते । विश्वप्रकाशिकायां दृश्यत एव (पृ. ६६, श्लो. १७४). [2] स्वामिसुबोधिनीकारौ Tv. [3] Tj1 adds 'हृव हिंसागत्योः'. [4] Gm1 adds 'घनाघनः' इति श्रुतौ (*Rv.* 10. 103. 1). [5] प्रत्ययः Tv. [6] न तत्र रुद्रः पशूनभिमन्यते (तै. ब्रा. ३. ६. ११). [7] प्रयोगबलात् Tv.

(पा.) शक्रो—घनाघनः । घातुकश्चासौ मत्तेभश्चेति विशेषणसमास इति सुभूतिटीका । 'घनाघनो घातुकमत्तदन्तिनोः'[1] इति विश्वः (पृ. ६६, श्लो. १७४) । अभिमानो—प्रणयहिंसयोः ॥ ११० ॥

[1] B3, C1 add 'निरन्तरे वासववर्षुकाब्दयोः'.

घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे ।
इनः सूर्ये प्रभौ राजा मृगाङ्के क्षत्रिये नृपे ॥ १११ ॥

(वि.)　मेघे मूर्तिगुणे मूर्ते सान्द्रे विस्तारदार्ढ्ययोः ॥ 234 ॥
लोहमुद्गरबाहुल्यमुस्तकेषु[1] दृढे तथा ।
[2]कांस्यतालादिवाद्ये स्याद् घनो मध्यमनृत्यके[3] ॥ 235 ॥

मूर्तिगुणः काठिन्यम् । हन्यत इति घनः[4] ॥

इनो दिवाकरे पत्यौ पार्थिवे चाभिधीयते ।

[5]एतीति इनः । 'इण् गतौ' ॥

राजा चन्द्रे नृपे श्रेष्ठे[6] प्रभौ शक्रे क्षयामय ॥ 236 ॥

[7]रञ्जयतीति राजा[8] ॥ १११ ॥

[1] मुक्तकेषु K4, K5.　[2] कांस्येतरादिवाद्ये K6.　[3] °नृत्तके K2.　[4] J2, K2, K4 add 'हन हिंसागत्योः'.　[5] K2 adds नयति.　[6] क्षत्रे K2, K5.　[7] K2, K4 add 'रञ्ज रागे'.　[8] राजति इति सुवचम्.

(विव.)　घनो मेघे—निरन्तरे । [1]मूर्तिगुणे काठिन्यगुणे । रूपभेदात् पुंलिङ्गः । मूर्ते काठिन्ययुक्ते निबिडावयवद्रव्यादौ[2] वाच्यलिङ्गः । हन्यतेऽनेनेति घनः । 'मूर्तौ घनः' (३. ३. ७७) इति निपातनात् साधुः । अत्र सूत्रे 'मूर्तिः काठिन्यम्' इति यद्यपि वृत्तिकारेणोक्तं[3] (काशिका, पृ. २१६) तथापि मेघादावपि घनशब्दस्य प्रायिकप्रयोगदर्शनाद् उपमानेन [4]साधुत्वं समर्थनीयम् । घन इति योगविभागाश्रयणेन साधुत्वमपीत्यपरे । अत एव धर्मशब्देन धर्मी च सूचित इति वृत्तावुक्तम्[5] (काशिका पृ. २१६) । शेषे—'घनं स्यात् कांस्यतालादौ पुंसि मुद्गरमुस्तयोः' इति ॥ इनः सूर्ये प्रभौ । प्रभुशब्देन राजा, पतिश्च विवक्षितः । तथा च विश्वप्रकाशे (पृ. ८५, श्लो. १)—'इनः सूर्ये नृपे पत्यौ' इति । एति गच्छतीति इनः । 'इण् गतौ' । औणादिको नक्प्रत्ययः[6] ॥ राजा—नृपे । क्षत्रिये तद्वर्णमात्रे[7] । शेषे—'राजा क्षयामये शक्रे पतिमात्रद्रुभेदयोः' इति ।

द्रुभेदः[8] आरग्वधाख्यः (१, पृ. २३०)। रभसोऽपि—'प्रभौ भूमिपतौ राजा क्षत्रिये रजनीपतौ' इति ॥ १११ ॥

[1] 'मूर्तिः काठिन्यकाययोः' इत्युक्तत्वात् (श्लो. ६६) अत्र मूर्तिगुणशब्देन काठिन्यरूपो गुण उच्यते Tv. [2] पाषाणादौ Tj2. [3] व्याख्यातं Gm1, Tv. [4] अर्थान्तरेष्वपि साधुत्वमिति केचित् Tv. [5] इति व्याचक्षाणेन वृत्तिकारेणाप्ययमर्थः सूचितः Gm3, Tv. [6] 'इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ. ३. २). [7] नृपे महीपतिमात्रे Tv. [8] द्रुभेदो राजवृक्षः। शक्रः इन्द्रः। पूर्ववाक्यगतं प्रभुपदं काकाक्षिवदुभयत्रापि संबध्यते Tv.

(पा.) घनो मेघे—निरन्तरे। [1]मूर्तिगुणे—घृतघनः, घृतकाठिन्यमित्यर्थः। मूर्ते—घनं दधि। कठिनमित्यर्थः ॥ इनः सूर्ये—नृपे। [2]प्रभुशब्दस्यात्रापि समन्वयः। 'यक्षे चन्द्रे च राजा स्यात् क्षत्रिये नृपतौ प्रभौ' इति [3]त्रिकाण्डशेषः (पृ. ३०, श्लो. ८०६) ॥ १११ ॥

[1] A1 omits. [2] प्रभाविति B3, C1. [3] 'यक्षे चन्द्रे च राजा स्यात्' इत्येव मु. ग्र.; 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति वि. प्र. (पृ. ९४, श्लो. ११४).

वाणिन्यौ नर्तकीदूत्यौ स्रवन्त्यामपि वाहिनी।
ह्लादिन्यौ वज्रतडितौ वन्दायामपि कामिनी ॥ ११२ ॥

(वि.) मत्ताविदग्धादूतीषु नर्तक्यां वाणिनी मता।

वानिनीति वा पाठः। वनुते वणतीति वा वानिनी वाणिनी [1]च। 'वनु याचने', 'वण शब्दे' ॥

नद्यां सेनाविशेषे च सेनायां वाहिनी भवेत् ॥ 237 ॥

वहते वाहयतीति वा वाहिनी। 'वह प्रापणे', 'वाहृ[2] प्रयत्ने' ॥

सौदामिन्यां च कुलिशे ह्लादिनी परिकीर्तिता।

ह्लादोऽस्या अस्तीति ह्लादिनी ॥

कामुक्यामङ्गनायां[3] च वृक्षादिन्यां च कामिनी ॥ 238 ॥
कामुकायां चक्रवाक्यां पारावत्यामपि स्मृता।

कामोऽस्या अस्तीति कामिनी ।। ११२ ।।

[1] वा for च K_5.　　[2] J_2 omits 6 lines.　　[3] वनितायां K_5.

(विव.) वाणिन्यौ नर्तकीदूत्यौ । वणति शब्दायत इति वाणिनी[1]। केचिदत्र द्वितीयाक्षरं दन्त्यवर्गपञ्चमं पठन्ति । तथा च शेषे—'मत्ताविदग्धे वाणिन्यौ वाणिनी वानिनी समे' इति। वानिनीशब्दोऽपि वाणिनीशब्देनार्थतो लिङ्गतश्च समान इत्यर्थः ।। स्रवन्त्यामपि वाहिनी । स्रवन्ती नदी । शेषे—'वाहिन्यौ सैन्यतद्भेदे' इति । वहते वाहयतीति वा वाहिनी[2] । सैन्यमात्रे (१, पृ. ५२८) तद्विशेषे च (पृ. ५३०) प्रागुक्तः ।। ह्रादिन्यौ वज्रतडितौ । वज्रं कुलिशम् । ह्राद आरावोऽस्या अस्तीति ह्रादिनी ।। वन्दायामपि कामिनी । वृक्षप्ररूढो विजातीयप्ररोहो वन्दा । काम्यत इति कामः आरोग्यादिजनितसौख्यम् । [3]सोऽस्या अस्तीति कामिनी। अपिशब्देन स्त्रीविशेषः प्रागुक्तः (१, पृ. ३६३) ।। अत्र प्रतापः—'श्यामा पारावती स्त्रीषु चक्रवाक्यां च कामिनी' इति । श्यामा प्रियङ्गुः ।। ११२ ।।

[1] 'वण शब्दे'। 'आवश्यकाधमर्ण्ययोर्णिनिः' (३. ३. १७०) इति, ग्रह्यादित्वात् (३. १. १३४) वा णिनिः इति भा. दी. (पृ. ४७९-८०).　　[2] णिनिः (३. १. १३४).
[3] तदस्याः Gm_3.

(पा.) वाणिन्यौ नर्तकीदूत्यौ । मौग्ध्यवैदग्ध्यदशापन्नापि स्यात् । 'स्त्री विदग्धा च मुग्धा[1] च वाणिनीत्यभिधीयते' इति हलायुधः (अ. मा. २. ३३४) ।। स्रवन्त्यामपि वाहिनी । सेनायामपि स्यात्[2] ।। ह्रादिन्यौ वज्रतडितौ । अशनिरपि । 'अशनिः पविविद्युतोः'[3] इति विश्वः (पृ. ९५, श्लो. १२३) ।। वन्दायामपि कामिनी । स्त्रियामपि स्यात् ।। ११२ ।।

[1] मत्ता इति मु. ग्र. (पृ. ५३).　　[2] B_3 omits स्यात्.　　[3] °विद्युतौ A_1.

त्वग्देहयोरपि तनुः सूनाधोजिह्विकापि च ।
क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके ।। ११३ ।।
मन्देऽथ केतनं कृत्ये केतावुपनिमन्त्रणे ।

(वि.) अल्पे कृशे च विरले त्वचि देहे तनुर्भवेत् ।। 239 ।।

तन्यत इति तनुः[1] ।।

गलशुक्त्यां वधस्थाने पुत्रिकाप्रतिजिह्वयोः ।
सूना स्यात् प्रसवे पुष्पे सूनं तु परिकीर्तितम् ।। 240 ।।

सूयत इति सूना । 'षूङ [2]प्राणिप्रसवे' ।।

क्रतुकर्मणि विस्तारे तुच्छमन्दाध्वरेषु च ।
वितानमुल्लोचावसरवृत्तभेदेषु कथ्यते ।। 241 ।।

वितन्यत इति वितानम् । 'तनु विस्तारे' ।।

गृहे कार्ये ध्वजे चिह्ने केतनं स्यान्निमन्त्रणे ।

कित्यतेऽनेनेति केतनम् । 'कित ज्ञाने' ।। ११३ ।।

[1] K2, K4 add 'तनु विस्तारे'. [2] प्राणिगर्भविमोचने J2.

(विव.) त्वग्देहयोरपि तनुः । अस्मिन्नर्थद्वये स्त्रीलिङ्गः[1] । शेषे—'तनुस्तु वाच्यलिङ्गः स्यात् स्वल्पेऽपि विरले कृशे' इति ।। सूनाधोजिह्विकापि च । सुवति प्रेरयति श्लेष्मादिकमिति सूना उपजिह्वा । 'षू प्रेरणे'[2] । सूयन्ते प्रेर्यन्ते वधार्थं प्राणिनोऽत्रेति सूना प्राणिवधस्थानम् । शेषे—

'सूना पुत्र्यां वधस्थानगलशुण्डिकयोरपि ।
सूनं तु वाच्यवच्छूने क्लीबे[3] प्रसवपुष्पयोः ।।'

इति । वधस्थानं भक्ष्यप्राणिहननप्रदेशः । गलशुण्डिका गलस्थानगतो ग्रन्थिविशेषः । शूनम् उच्छूनम्[4] ।। क्रतुविस्तारयोः—मन्दे । तुच्छकं शून्यम् । मन्दोऽलसः । वितन्यत इति वितानम् । घञ् । विविधो विगतो वा तानस्तननमत्रेति वितानम् । विश्वप्रकाशे (पृ. ८६, श्लो. ५४)—

'वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणि ।
वृत्तभेदावसरयोर्वितानं तुच्छमन्दयोः ।।'

इति । सयूपाः ऋतवः । तद्रहिता दर्शपूर्णमासादयोऽपि यज्ञशब्दवाच्या इति भेदः ॥ अथ केतनं—उपनिमन्त्रणे । कृत्येऽवश्यकर्तव्ये । यथा—'निवापाञ्जलिदानेन केतनैः श्राद्धकर्मभिः' इति (वेणी. ३. १६) । केतौ ध्वज (१, पृ. ५४३)। यथा—मीनकेतन इति । निमन्त्रणमेवोपनिमन्त्रणम् । यथा—'कृतकेतनं ब्राह्मणं नातिक्रमेत्' इति । [5]कित्यते ज्ञायतेऽनेनेति केतनम् । 'कित ज्ञाने'[6] । वेश्मनि प्रागुक्तम् (१, पृ. १९७) ॥ ११३ ॥

[1] तनोतीति तनुः । 'तनु विस्तारे' । 'भृमृशीतॄचरित्सरितनि ...' (उ. १. ७) इति उः. [2] 'षूङ् प्राणिगर्भविमोचने' । भावे, कर्मणि क्तः । स्वादय ओदितः । 'ओदितश्च' इति निष्ठा-नत्वम् इति भा. दी. (पृ. ४८०). [3] सूनम् Tv. [4] Tv adds प्रसवः फलम् । संततिरित्येके. [5] केत्यते Gm3, Tv. [6] ल्युट् (३. ३. ११५).

(पा.) त्वग्देहयोरपि तनुः । 'त्वचि काये तनुः स्त्री स्यात् त्रिष्वल्पे विरले कृशे' इति रुद्रः[1] ॥ सूनाधोजिह्विकापि च । वधस्थानमपि स्यात् । 'सूना स्त्री घातनास्पदम्' इति रत्नकोशः[2] ॥ ऋतुविस्तार—उपनिमन्त्रणे ॥ ११३ ॥

[1] विश्वः B3; मुद्रितविश्वप्रकाशिकायां तु 'विरलेऽपि च वाच्यवत्' इति दृश्यते (पृ. ८६, श्लो. १८). [2] जयकोशः B3, C1.

वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः ॥ ११४ ॥
उत्साहने च हिंसायै सूचने चापि गन्धनम् ।
आतञ्चनं प्रतीवापजवनाप्यायनार्थकम् ॥ ११५ ॥

(वि.) ज्ञाने तत्त्वे तपोऽध्यात्मवेदेषु ब्रह्म चोच्यते ॥ 242 ॥
[1]चन्द्रार्कयोगे योगे च ब्राह्मणे च प्रजापतौ ।
ऋत्विग्भेदे [2]धर्ममाने ब्रह्मा तु परिकीर्तितः ॥ 243 ॥

[3]बृंहतीति ब्रह्मा । [4]'बृहि वृद्धौ' ॥

हिंसार्थोत्साहने हिंसासूचने[5] च प्रकाशने ।
हिंसायां गन्धकरणे गन्धनं परिकीर्तितम् ॥ 244 ॥

गन्ध्यतेऽनेनेति गन्धनम् । 'गन्ध अर्दने' ॥

आतञ्चनं प्रतीवापे[6] जवनाप्यायनार्थयोः ।

[7]आतच्यते पयोऽनेनेति आतञ्चनम् । 'तञ्चु गतौ' ।। ११४–५ ।।

[1] चन्द्रार्कयोश्च योगे K_5. [2] वर्तमाने K_6. [3] बृहति J_2. [4] K_2, K_3 add बृह. [5] °सूदनेषु प्रकीर्तितः J_2. [6] प्रतीवापो दुग्धादौ दध्यादिभावार्थे तक्रादिक्षेप इति भा. दी. (पृ. ४८०). [7] आतञ्च्यते K_2, K_4.

(विव.) वेदस्तत्त्वं—प्रजापतिः । वेदे यथा—ब्रह्मयज्ञ इति । तत्त्वं परमात्मा । यथा—'सर्वं खल्विदं ब्रह्म' (छा. उ. ३. १४. १) । तपसि यथा—'तपो ब्रह्मेति' (तै. उ. ३. २. १०) । अस्मिन्नर्थत्रये[1] रूपभेदाद् नपुंसकलिङ्गः । विप्रे वेधसि च पुंलिङ्गः । बृंहति वर्धत[2] इति ब्रह्म । 'बृंहि वृद्धौ' । 'बृंहेर्नोऽच्च' (उ. ४. १४८) इति मनिन्, नकारस्याकारश्च । शेषे— 'ब्रह्मा चन्द्रार्कयोर्योगे पुंसि स्यादृत्विगन्तरे' इति । चन्द्रसूर्ययोर्योगो विष्कम्भादिषु पञ्चविंशः । 'ब्रह्मा होताध्वर्युरग्नीत्' (तै. ब्रा. ३. ३. ८८) इत्युक्तऋत्विग्विशेषः ।। उत्साहने—गन्धनम् । उत्साहनमुत्साहोत्पादनम् । हिंसायै इति चतुर्थ्यन्तं पदं पूर्वोत्तराभ्यां संबध्यते । अतश्च हिंसार्थमर्थदानेन वचसा[3] प्रोत्साहनेन, हिंसार्थं हस्तचेष्टनादिसूचनेऽपीत्युक्तं भवति । तथा च शेषे—'हिंसार्थसूचने हिंसोत्साहने[4] चापि गन्धनम्' इति[5] । गन्धयतेऽर्द्यतेऽनेनेति गन्धनम् । 'गन्ध अर्दने' । अर्दनं हिंसेति धातुवृत्तौ[6] । करणे ल्युट् (३. ३. ११७) । अथवा गन्धवन्तं करोतीति णिच् । मतुपो लुकि ल्युटि गन्धनम् । युच्प्रत्यये स्त्रीलिङ्गे गन्धनाशब्द एष्वर्थेषु वर्तत इत्यनुसंधेयम् । केचित्तु हिंसायामिति सप्तम्यन्तं पठित्वा गन्धनशब्दस्य हिंसारूपमप्यर्थमाहुः ।। आतञ्चनं—आप्यायनार्थकम् । शृतशीते पयसि दधिनिष्पादनाय[7] स्वल्पमावाप्य-[8]तक्रादेरवसेचनं प्रतीवापः । यथा—'अग्निहोत्रोच्छेषणमातञ्चनार्थं निदधाति' इति प्रयोगः (आप. श्रौ. १. ११. १) । द्रुतस्य स्वर्णादेर्द्रव्यान्तरेणावचूर्णनं प्रतीवाप इति केचित्[9] । अवचूर्णनं रूपान्तरापादनम् । जवनं वेगः । क्षीणस्य पूरणमाप्यायनम् । आतञ्च्यते संकुच्यते पयोऽनेनेत्यातञ्चनम् । 'तञ्चु गतौ' इति धातुः[10] ।। ११४–५ ।।

[1] Tv adds ब्रह्मविदिति वेदाद्यर्थत्रये. [2] वर्धति B_6. [3] 'मम शत्रुममुं जहि' इत्यादिवचसा Tv. [4] °उपोद्वलने B_6. [5] कस्यचिदर्थमात्रेऽस्य प्रकटीकरणं प्रकाशनम् Gm_1, Tv. [6] मुद्रितमाधवीयधातुवृत्तौ न दृश्यते. [7] °करणाय Tv. [8] तक्रादिकं B_5, B_6. [9] स्वामी (पृ. २६७). [10] ल्युट्.

(पा.) वेदस्तत्त्वं—हिंसायै सूचने[1] चापि गन्धनम् । हिंसायै इति सूचनविशेषणम् । 'प्रकाशोत्साहयोर्हिंसासूचने चापि गन्धनम्' इति रभसकोशः । हिंसायाम् इति पाठे पर्यायपदम् । 'गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने' इति विश्वः (पृ. ९१, श्लो. ७४) ।। आतञ्चनं—आप्यायनार्थकम् । प्रतीवापो निक्षेपणम् । जवनं वेगः । आप्यायनं प्राणनम्[2] ।। ११४–५ ।।

[1] सूचनं A1.　　[2] पीवनम् B3; तर्पणम् C1.

व्यञ्जनं लाञ्छनश्मश्रुनिष्ठानावयवेष्वपि ।
स्यात् कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ।। ११६ ।।

(वि.) कादिवर्णे लाञ्छने च पुंमुखस्थितरोमणि[1] ।। 245 ।।
अङ्गतेमनयोश्चापि व्यञ्जनं परिकीर्तितम् ।

[2]व्यज्यतेऽनेनेति व्यञ्जनम् । 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' ।।

[3]सर्वेषां च विहङ्गानां युद्धे गर्हणगुह्ययोः ।। 246 ।।
कुलीनत्वे लोकवादे कौलीनं परिकीर्त्यते[4] ।

[5]कोलतीति कुलम् । 'कुल संस्त्याने' । कुलस्येदं कौलीनम् ।। ११६ ।।

[1] लोमनि K5.　　[2] व्यञ्जयतीति K5.　　[3] पशुसर्पविहङ्गानां J2.　　[4] परिकथ्यते J2, K4.　　[5] कुल्यत इति K6.

(विव.) व्यञ्जनं—अवयवेष्वपि । लाञ्छनं कपिध्वजादिकम् । पुरुषमुखप्रभवं रोमवृन्दं श्मश्रु । निष्ठानं तेमनम्[1] । अवयवः शिश्नोपस्थगुदादिः । व्यज्यतेऽनेनेति व्यञ्जनम् । 'अञ्जू [2]व्यक्तिम्रक्षणकान्तिगतिषु' । करणे कर्मणि च ल्युट् । अपिशब्दात् ककारादिहकारान्तानां हलां च ग्रहणम् । तथा च शेषे— 'व्यञ्जनं कादिहान्ते स्यात्' इति ।[3] स्यात् कौलीनं—पक्षिणाम् । निन्दितः पुरुषो नमितमुखत्वेन कौ भूमौ लीन इव [4]भवतीति कुलीन उच्यते । तस्येदम् इति कृत्वा कौलीनम्[5] (५. १. १३०) । लोकवादः जनवादः[6] । मेषवृषादिपशूनां सर्पाणां लवकादिपक्षिणां यद् युद्धं तदपि कौलीनमुच्यते । तथा च प्रतापः—

'कौलीनं स्यात् कुलीनत्वे गुह्ये जन्ये कुकर्मणि ।
कौलेयकविहङ्गाहिपशूनां सङ्गरेऽपि च ।।'

इति। सुभूतिचन्द्रस्तु व्याचष्ट—पशूनामहीनां पक्षिणां वा नागरिकैः क्रियमाणं द्यूतरूपं युद्धं कुलीनशब्दार्थ इति। तथा च शेषे[7]—'कुलीनत्वे व्यहिपशुयुद्धद्यूते महीक्षिताम्' इति। विः पक्षी। अहिः सर्पः। पक्षिभिः सर्पैः पशुभिश्च प्रवर्तितं राज्ञां [8]द्यूतरूपं युद्धं कौलीनमित्यर्थः। कुले भवं कौलीनम् ।। ११६ ।।

[1] B5 adds मरीचादि; भक्ताद्युपसेचनं दध्यादि Tv. [2] व्यक्तिश्लक्ष्ण° B6. [3] ककारादयो हकारान्ता इत्यर्थः B6. [4] भाति Tv. [5] अण् प्रत्ययः. [6] जनापवादः B5. [7] Gm3, Tv add कौलीनं गुह्यकुत्सयोः. [8] न पश्वादिमात्रमिति मूलग्रन्थस्य सोपस्कारमर्थकथनमिति शेषपर्यायव्याख्यायामुक्तम् Gm3, Tv.

(पा.) व्यञ्जनं—अवयवेष्वपि। तैलघृतादावपि स्यात्। 'निष्ठानं तेमनं तच्च व्यञ्जनं स्याद् घृतादि च' इति वैजयन्ती (पृ. १६५, श्लो. ८५) ।। स्यात् कौलीनं—पक्षिणाम्। युद्धे पश्वहिपक्षिणामिति प्राणिद्यूतमुक्तम्। 'कौलीनं स्यात् कुलीनत्वे प्राणिद्यूते जनोदिते' इति जयकोशः ।। ११६ ।।

स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।
अवकाशे स्थितौ स्थानं क्रीडादावपि देवनम् ।। ११७ ।।

(वि.) वनभेदे निःसरणे स्यादुद्यानं प्रयोजने ।। 247 ।।

[1]उद्यान्ति उद्योगं कुर्वन्त्यस्मिन्निति उद्यानम् ।।

अवकाशे संनिवेशे स्थितौ स्थानं प्रचक्षते[2] ।

तिष्ठत्यस्मिन्निति स्थानम्। 'ष्ठा गतिनिवृत्तौ' ।।

क्रीडायां विजिगीषायां व्यवहारे द्युतौ स्तुतौ ।। 248 ।।
मोदे मर्दे स्वप्नकान्त्योर्गतौ च परिदेवने ।
अक्षेषु द्यूतके चैव देवनं परिशब्द्यते[3] ।। 249 ।।

दीव्यन्त्यनेनेति देवनम्। 'दिवु क्रीडादौ' ।। ११७ ।।

[1] K6 omits उद्यान्ति.　[2] प्रवक्ष्यते K2.　[3] परिकथ्यते K5, K6; परिचक्षते J2.

(विव.) स्यादुद्यानं—प्रयोजने। गृहादिप्रदेशाद् निर्गमनं निःसरणम्। वनभेद आक्रीडः। प्रयोजनमुद्देश्यम्। उत्पूर्वाद् 'या प्रापणे' इत्यस्माद् भावेऽधिकरणे करणे वा ल्युट्॥ अवकाशे स्थितौ स्थानम्। मूर्तद्रव्यान्तरानवरुद्धः प्रदेशोऽवकाशः। यथा—[1]प्रतिश्रये पान्थानामस्ति स्थानम्। [2]तिष्ठतेः अधिकरणे भावे च ल्युट्। शेषे—'स्थानं स्याद् युद्धनृत्तार्थे सादृश्ये संनिवेशने' इति। युद्धार्थे प्रत्यालीढादौ। नृत्तार्थे संहतसमपादादौ चेत्यर्थः[3]॥ क्रीडादावपि देवनम्। आदिशब्देन [4]विजिगीषाव्यवहारादयो दीव्यतिधातोरर्था भावरूपाः सर्वेऽपि विवक्षिताः। देवनाः पाशकाः इति पुंलिङ्गः[5] प्रागुक्तः[6] (१, पृ. ६४७)॥ ११७॥

[1] परिश्रये, स्थितिः अवस्थानम् Gm1, Gm3.　[2] स्थीयतेऽत्रेति स्थानम्। 'ष्ठा गतिनिवृत्तौ' B5.　[3] Gm3, Tv add सादृश्ये यथा—यवस्थाने गोधूम इति.　[4] क्रीडाव्यवहारं B6.　[5] पुंलिङ्गप्रयोगः Gm1, Tv.　[6] दीव्यतेऽनेनेति देवनम्। 'दिवु क्रीडादौ'। भावे करणे च ल्युट्.

(पा.) स्यादुद्यानं—क्रीडादावपि देवनम्। क्रीडादीनां [1]करणाधिकरणयोश्चापि स्यात्॥ ११७॥

[1] कारककरणाधिकरणेषु A1.

उत्थानं पौरुषे तन्त्रे संनिविष्टोद्गमेऽपि च।
व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च॥ ११८॥

(वि.) उद्यमे पौरुषे तन्त्रे [1]मलवेगे रणे मृधि।
उपविष्टोर्ध्वभागे स्यादुत्थानं पुस्तकेऽङ्गने[2]॥ 250॥

उत्तिष्ठन्त्यत्रेत्युत्थानम्। 'ष्ठा गतिनिवृत्तौ'॥

[3]स्वैरस्य करणे चैव विरोधाचरणे तथा[4]।
[5]समाधेस्तु निवृत्तौ च व्युत्थानं परिकीर्तितम्॥ 251॥

व्युत्तिष्ठन्त्यत्रेति व्युत्थानम्॥ ११८॥

[1] हलवेगे K6.　[2] K4 adds अङ्गनं यानम्.　[3] व्युत्थानं प्रतिरोधे च K5.　[4] अपि च J2.　[5] समाप्तेः K6.

(विव.) उत्थानं—उद्गमेऽपि च। ऊर्ध्वविस्तृतदोःपाणिपुरुषप्रमाणमत्र पौरुषशब्देन विवक्षितम्। यथा—'सप्तोत्थानमिदं रम्यमाप्तरक्षिशतावृतम्' इति क्षेमेन्द्रः। तन्त्रं सैन्यम्। यथा—उत्थानसंपन्नो राजा इति। संनिविष्टस्योपविष्टस्य शयितस्य वा उद्गमनमूर्ध्वीभावः[1]। शेषे—'मलोत्सर्जन[2]उत्थानं हर्षोद्योगसमाप्तिषु' इति। हर्षे यथा—सूत्थानं ते मुखम्। उद्योगे यथा—अनुत्थाने विनश्यति[3]। समाप्तौ यथा—'यदा शतं सहस्रं कुर्वन्त्यथैकमुत्थानम्' (तै. सं. ७. २. १. ४) इति। उत्पूर्वात् तिष्ठतेः करणे भावे च ल्युटि (३. ३. ११७, ११५) 'उदः स्थास्तम्भोः पूर्वस्य' (८. ४. ६१) इति सकारलोपे[4] उत्थानम्॥ व्युत्थानं—आचरणेऽपि च। प्रतिरोधः आस्कन्दनम्। विरोधाचरणं प्रतिकूलाचरणम्। विगतमुत्थानं प्रचारोऽत्रेति व्युत्थानम्। अपिशब्दात् समाधिनिवृत्तावपि। यथा—व्युत्थानदशेति॥ ११८॥

[1] ऊर्ध्वभावः B5, B6. [2] °सर्जनमुत्थानं Tv. [3] 'अनुत्थाने ध्रुवो नाशः' कौ. अर्थशास्त्रे (Apte's Dict. p. 94). [4] पूर्वसवर्णादेशो भवति Tv.

(पा.) उत्थानं—उद्गमेऽपि च। उद्यमे समरे [1]हर्षेऽङ्गणेऽप्युत्थानमिति सुभूतिटीका। तन्त्रं सैन्यम्[2]॥ व्युत्थानं—आचरणेऽपि च। स्वतन्त्रतायामपि स्यात्। 'स्वतन्त्रता च व्युत्थानम्' इति त्रिकाण्डशेषः (पृ. ३०, श्लो. ८१२)। 'स्वातन्त्र्यानुष्ठानं व्युत्थानं विलसितं ललितम्' इति रत्नकोशः॥ ११८॥

[1] अङ्गने B3, C1. [2] A1 adds संनिविष्टोद्गमः संनिविष्टेन उद्गमः उद्यमः.

मारणे मृतसंस्कारे गतौ द्रव्योपपादने।
निर्वर्तनोपकरणानुव्रज्यासु च साधनम्॥ ११९॥

(वि.) सिद्धौ लिङ्गे सैन्यगत्योर्वधे द्रव्योपपादने।
निर्वर्तने च गमने [1]कारके मृतसंस्कृते[2]॥ 252॥
[3]शिश्नोपायोपहरणेषूपकारे च साधनम्[4]।

उपकार उपकरणम्। साध्यतेऽनेनेति[5] साधनम्। 'साध संसिद्धौ'॥ ११९॥

[1] करणे J2. [2] °संस्कृतौ J2, K4, K5. [3] उपकरणे K6. [4] प्रसाधनम् K2, K4. [5] K3, K4 omit अनेन.

(विव.) मारणे—अर्थदापने—साधनम् । मारणे यथा—कृष्णेन साधितः कंसः इति । मृतसंस्कारोऽग्निप्रदानादिः । यथा—कृतसाधनाः पितरः इति । कश्चित् अमृतसंस्कार इत्यकारप्रश्लेषेण छेदनं कृत्वा अमृतस्य वत्सनाभादेर्विषस्य निर्विषीकरणरूपसंस्कार इति व्याचष्ट । यथा—साधितं विषमिति । गतौ यथा—'साधयाम्यहमविघ्नमस्तु ते'[1] इति (रघु. ११. ९१) । द्रव्ये धनधान्यादौ यथा—साधनं संपत्तिरिति । अर्थस्याधमर्णेन गृहीतस्य दापनं [2]पुनरादापनम् । यथा—'प्रपन्नं [3]साधयन्नर्थम्' इति (या. स्मृ. २. ३. ४०) । [4]निर्वर्तनं कार्यस्य निष्पादनम् । यथा—पटं साधयति कुविन्द इति । घटं साधयति कुलाल इत्यादि । सुबोधिनीकारस्तु निवर्तनमिति रेफरहितं पठित्वा कार्यान्निवर्तनमिति व्याचष्ट । उपकरणमुपायः । यथा—[5]किं साधनं धनप्राप्तौ इति । [6]गुर्वादीननुसृत्य गमनम् अनुव्रज्या । यथा—शिष्यसाधनयुक्त इति । साध्यतेऽनेनेति साधनम् । करणे भावे ल्युट् (३. ३. ११७, ११५) । शेषे—'साधनं करणे लिङ्गसैन्ययोर्मेहनेऽपि च' इति । करणं कारकविशेषः । 'साधकतमं करणम्' (१. ४. ४२) इत्युक्तरूपः । लिङ्गमनुमापकम्[7] । यथा—अनित्यत्वसाधनं कृतकत्वमिति । सैन्ये यथा—प्रभूतसाधनो यायात् इति । मेहने यथा काव्यप्रकाशिकायाम् (७. १५१) अश्लीलोदाहरणे—'साधनं सुमहद् यस्य' इति[8] ।। ११९ ।।

[1] वः for ते B6. [2] प्रत्याहरणम् Gm3, Tv. [3] साधयेत् B5, B6. [4] अन्ये तु निर्वर्तनमिति Gm1, Tv. [5] धनार्जने साधनं चिन्तयामः Tv. [6] गुर्वादिः पृष्ठतो गमनम् Tv. [7] Tj1, Tj2 add धूमादिः. [8] Gm3, Tv add 'साधनं स्यादसाध्यार्थस्ववशीकरणेऽपि च' इति नानार्थसंग्रहे.

(पा.) मारणे—साधनम् । मृतसंस्कारोऽग्निदानम् । द्रव्यं धनम् । [1]अर्थदापनं भूमिहिरण्यादीनां न्यासः । उपकरणमुपायः ।

'साधनं निर्वृतौ [2]मेढ्रे सैन्ये सिद्धौ [3]पदे गतौ ।
उपाये मृतसंस्कारे दापने [4]सुगमे धने ।।'

इति विश्वः (पृ. ९३, श्लो. ९५) ।। ११९ ।।

[1] अर्थदापने इति पारिजातपाठः. [2] मेण्ढ्रे इति मु. ग्र. [3] गते वधे इति मु. ग्र. [4] अनुगमे इति मु. ग्र.

निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ।
व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ।। १२० ।।

(वि.) निर्यातनं वितरणे न्यासप्रत्यर्पणे तथा ।। 253 ।।
ऋणवैरमलादीनां शोधने चापि [1]कथ्यते ।

निःशेषेण यातनं निर्यातनम् ।।

भ्रंशे कामजकोपोत्थदोषे विपदि किल्बिषे ।। 254 ।।
अशुभे निष्फलोद्योगे दैवानिष्टफले[2] तथा ।
व्यसनं स्यादसामर्थ्ये पवनव्यक्तचशक्तिषु[3] ।। 255 ।।

व्यस्यत इति व्यसनम् । 'असु क्षेपणे' ।। १२० ।।

[1] च प्रचक्षते J2. [2] दैवारिष्ट° K4, K5; दैवेऽरिष्टफले J2; दैवादिष्ट° K6.
[3] °शक्तिषु J2, K5; °शुक्तिषु K6.

(विव.) निर्यातनं—अर्पणेऽपि च । वैरशुद्धिः प्रतीकारः । इह दानशब्देन प्रतिश्रुतार्थस्य प्रदानं विवक्षितम् । उपनिधिद्रव्यस्यानुद्घाटितमुद्रस्य स्वामिहस्ते दानं न्यासार्पणम् । निर्यात्यते निष्कास्यते वैरं स्वहस्तगतं वा धनमनेनेति निर्यातनम् । 'यत निकारोपस्कारयोः'[1], णिचि[2] करणे ल्युट् (३. ३. ११७) ।। व्यसनं —कामजकोपजे । विपद् दुःखम् । यथा—'चिराय[3] मित्रव्यसनी सुदमो दमघोषजः' इति माघः[4] (शिशु. २. ६०) । भ्रंशः स्खालित्यम् । यथा—आम्नाये व्यसनं प्राप्त इति । कामजानां कोपजानां च दोषाणां स्वरूपं मनुना प्रपञ्चितम् । यथा— (म. स्मृ. ७. ४७-८)

'मृगयाक्षो दिवा स्वापः[5] परीवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथा[6] त्यागः कामजो दशको गणः ।।
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ।।'

इति । एषामष्टादशानां मध्ये कष्टे सप्त कष्टतमानि ।

'पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ।।
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत् त्रिकं सदा ।।' (म.स्मृ.७.५०-१)

इति । व्यस्यते श्रेयोमार्गात् प्रच्याव्यते पुरुष इति व्यसनम् । 'असु क्षेपणे'[7] । शेषे—'व्यसनं किल्बिषे सक्तावशुभे निष्फलोद्यमे' इति । सक्तिः आसक्तिः । यथा—'विद्यायां व्यसनम्' इति (नी. श. ५१) । अशुभम् अमङ्गलं वाक्ताडनादि ।। १२० ।।

[1] °संस्कारयोः B_5, B_6. [2] Tv adds स्वार्थे. [3] चिरस्य इति मु. ग्र.
[4] माघप्रयोगः Tj_1, Tj_2. [5] स्वप्नः इति मु. ग्र. [6] वृथाट्या च इति मु. ग्र.
[7] भावे करणे च ल्युट्.

(पा.) निर्यातनं—कामजकोपजे । भ्रंशोऽपायः । 'दैवानिष्टफलेऽपाये विपत्तौ निष्फलोद्यमे' इति [1]विश्वः (पृ. ९२, श्लो. ९२) । कामजदोषः पानस्त्रीमृगयाद्यूतानि । कोपजदोषो वाक्पारुष्यदण्डपारुष्यार्थदूषणानि ।। १२० ।।

[1] B_3, C_1 add 'व्यसनं त्वशुभे सक्तौ पानस्त्रीमृगयादिषु'.

**पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि ।
तिथिभेदे क्षणे पर्व वर्त्म नेत्रच्छदेऽध्वनि ।। १२१ ।।**

(वि.) तन्त्वादिसूक्ष्मावयवे लोचनस्य च लोमनि ।
किञ्जल्के पक्षिगरुति पक्ष्मशब्दोऽभिधीयते ।। 256 ।।

पक्ष्यते परिगृह्यत[1] इति पक्ष्म । 'पक्ष परिग्रहे' ।।

उत्सवेऽवसरे[2] ग्रन्थौ विषुवत्प्रभृतावपि ।
दर्शप्रतिपदोः [3]संधौ पर्व शल्यसभादिके[4] ।। 257 ।।

पर्वतीति पर्व । 'पर्व पूरणे' ।।

पदव्यां लोचनपुटे वर्त्मशब्दः प्रकीर्तितः ।

वर्तन्तेऽनेनेति वर्त्म । 'वृतु वर्तने' ।। १२१ ।।

[1] K6 omits. [2] वत्सरे J2. [3] मध्ये K2, K4. [4] °सभादिषु J2.

(विव.) पक्ष्माक्षि—अणीयसि । नयनपुटप्रान्तप्ररूढं लोम अक्षिलोम । किञ्जल्कः प्रसिद्धः (१, पृ. १८२) । अणीयसीति पदं तन्तुतूलादिभागस्य[1] विशेषणम् । पक्ष्यते परिगृह्यत इति पक्ष्म । 'पक्ष परिग्रहे' । औणादिको [2]मनिन्प्रत्ययः (उ. ४. १४५) । अपिशब्दाद् 'गरुति च' इति स्वामी (पृ. २६८) ।। तिथिभेदे क्षणे पर्व । [3]तिथिभेदः तिथिविशेषः । यथा—

'चतुर्दश्यष्टमी चैव पूर्णिमा च कुहूस्तथा ।
पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ।।'

इति प्रसिद्धः[4] । क्षणः उत्सवः । यथा—वैवाहिकं पर्व इति । पर्वति [5]पूरणो भवत्यस्मिन्निति पर्व । 'पर्व पूरणे' । अत्र प्रतापः—

'दर्शप्रतिपदोः संधौ विषुवत्प्रभृतावपि ।
पर्व स्यादुत्सवे ग्रन्थौ प्रस्तावे लक्षणान्तरे ।।'

इति । प्रस्तावोऽवसरः । लक्ष्यते ज्ञायते प्रतिपाद्यार्थोऽनेनेति लक्षणम् अध्यायाद्येकदेशः । यथा—द्वादशलक्षणी मीमांसा इति[6] । लक्षणान्तरे लक्षणविशेषे पर्वशब्दः । यथा—आदिपर्व, सभापर्व इत्यादि ।। वर्त्म नेत्रच्छदेऽध्वनि । अक्षितिरोधानचर्मपुटो नेत्रच्छदः । अक्षिप्रान्ते वर्तत इति वर्त्म । 'वृतु वर्तने' । औणादिको मनिन्प्रत्ययः (उ. ४. १४५) । अध्वनि मार्गे प्रागुक्तः (पृ. १६२) ।। १२१ ।।

[1] तन्त्वाद्यंशस्य Tv. [2] 'सर्वधातुभ्यो मनिन्'. [3] तिथिभेदः पूर्णिमा । यथा—'न शारदः पार्विकशर्वरीश्वरः' इति नैषधकाव्ये (१. २०) । अन्येऽपि तिथिभेदाः पुराणेषु परिभाषिताः Tv. [4] विष्णुपुराणे (श. द्रु. p. 74). [5] पूर्णः B5, B6. [6] धर्मो द्वादशलक्षण्या व्युत्पाद्यः (शा. भा. Apte's Dict. p. 848).

(पा.) पक्ष्माक्षि—क्षणे पर्व । पञ्चदशी च तिथिमात्रं च तिथिभेदः । उत्सवश्च प्रस्तावश्च क्षणः । वर्त्म—अध्वनि ।। १२१ ।।

अकार्यगुह्ये कौपीनं मैथुनं संगतौ रते ।
प्रधानं परमात्मा धीः प्रज्ञानं बुद्धिचिह्नयोः ।। १२२ ।।

(वि.)　चीरखण्डे कुकार्ये च गुह्ये कौपीनमुच्यते ॥ 258 ॥

कौपीनशब्दव्युत्पत्तिरूह्या[1] ॥

संगमे ग्राम्यधर्मे च मैथुनं परिकीर्तितम् ।

मिथुनस्येदं मैथुनम्[2] । 'मिथृ मेथृ संगमे' ॥

प्रकृतावजहल्लिङ्गं प्रज्ञायामुत्तमेऽपि च ॥ 259 ॥
एकत्वे च [3]महामात्ये प्रधानं परमात्मनि ।

प्रधत्त इति प्रधानम् । 'डुधाञ् धारणपोषणयोः' ॥

[4]लाञ्छने च मनीषायां प्रज्ञानमभिधीयते ॥ 260 ॥

प्रज्ञायत इति प्रज्ञानम् । 'ज्ञा अवबोधने' ॥ १२२ ॥

[1] उन्नेया J2, K6.　　[2] K3, K4 add मेथति मिथः संगच्छत इति मिथुनम्.
[3] महामात्ते J2.　　[4] Gap of 8 pages in K5.

(विव.)　अकार्यगुह्ये कौपीनं । कर्तुमयोग्यम् अकार्यम् । प्रच्छादनार्हत्वेन कूपप्रवेशमर्हतीति कौपीनम् । 'शालीनकौपीने अधृष्टाकार्ययोः' (५. २. २०) इति कूपशब्दात् खञ्प्रत्ययः उत्तरपदलोपश्च निपात्यते । पापवदेव[1] गुह्यं रहस्यस्थानम् उपस्थोऽपि कौपीनमुच्यते । गौणोऽपि[2] निरूढत्वेन मुख्यतुल्यत्वात् कौपीनशब्दोऽपि नानार्थत्वेनोक्तः[3] । शेषे—'कौपीनं चीरखण्डे स्यात्' इति । इह चीरखण्डमपि तादर्थ्यलक्षणया गुह्याच्छादनमेव [4]गृह्णाति । 'कक्षापटेऽपि कौपीनम्' इति दुर्गः ॥ मैथुनं संगतौ रते । संगतिर्नाम सुरतव्यतिरिक्तप्रयोजनवशेन स्त्रीपुंसयोर्विवाहादिकाले प्रत्यासत्तिविशेषः । मिथुनस्य स्त्रीपुंसयोरिदं मैथुनम् (४. ३. १२०[5]) । प्रधानं परमात्मा धीः । परमात्मशब्देन क्षेत्रज्ञो विवक्षित इति चन्द्रः । धीर्बुद्धिः । तत्कारणं प्रकृतिश्च प्रधानशब्दार्थः । शेषे—'प्रधानं मुख्यमन्त्रिणोः' इति । मुख्ये श्रेष्ठे मन्त्रिणि अमात्ये चेत्यर्थः । अत्रार्थद्वये प्रधानशब्दो नपुंसकलिङ्ग एव । यथा चैतत् तथा प्रागुक्तम्[6] (२. ८. ५) ॥ प्रज्ञानं बुद्धिचिह्नयोः । चिह्नं लक्षणं ज्ञापकमित्यर्थः । भावे करणे च ल्युट् (३. ३. ११५, ११७) ॥ १२२ ॥

[1] Gm3, Tv add गोप्यत्वात्. [2] शब्दः Tv. [3] इत्यवधेयम् Tj1, Tj2, Tv. [4] गृह्यते B5, B6. [5] 'तस्येदम्'. [6] प्रधत्ते, प्रधीयतेऽनेन वा प्रधानम्। 'डुधाञ् धारणपोषणयोः'। ल्युट् (३. ३. ११५, ११७).

(पा.) अकार्यगुह्ये कौपीनम्। अकार्यं[1] गर्ह्यत्वात् [2]प्रच्छादनार्हं कार्यम्। गुह्यं[1] प्रच्छादनार्हावयवः॥ मैथुनं—परमात्मा च। [3]चात् प्रकृत्यादिः॥ प्रज्ञानं बुद्धिचिह्नयोः॥ १२२॥

[1] A1 adds नाम. [2] °अर्हभूतं A1. [3] प्रकृतिरपि स्यात् A1.

प्रसूनं पुष्पफलयोर्निधनं कुलनाशयोः।
क्रन्दने रोदनाह्वाने वर्ष्म देहप्रमाणयोः॥ १२३॥

(वि.) कुसुमे च फले चापि प्रसूनं परिकथ्यते।

प्रसूयत इति प्रसूनम्। 'षूङ प्राणिप्रसवे'॥

नाशे कुले च निधनं निवृत्तौ स्याद् धनस्य च॥ 261॥

निवृत्तं धनमस्मादिति निधनम्॥

आह्वाने रोदने चापि क्रन्दनं परिकीर्तितम्।

क्रन्द्यतेऽनेनेति क्रन्दनम्[1]। 'क्रदि आह्वाने रोदने च'॥

शरीरे च प्रमाणे च वर्ष्म स्यात् सुन्दराकृतौ॥ 262॥

[2]वर्षतीति वर्ष्म। 'वृषु सेचने'॥ १२३॥

[1] क्रन्दत्यनेनेति J2. [2] वृष्यते K3, K4.

(विव.) प्रसूनं पुष्पफलयोः। फलं फलमात्रम्। प्रसूयते वृक्षादिनेति प्रसूनम्[1]॥ निधनं कुलनाशयोः। नियतं निश्चितं धनं दायोऽत्रेति निधनं वंशः। निवृत्तं धनं स्वामिनाशादत्रेति निधनं नाशः। शेषे—'सामभक्ते तु निधनम्' इति। साम्नः [2]पञ्चमभक्तावित्यर्थः। यथाहुश्छन्दोगाः—'सर्वे निधनं ब्रूयुः

साम्नो निधनमुपयन्ति ' इति । यज्ञे बर्हिर्मुष्टिरपि निधनमुच्यते ।। क्रन्दने रोदनाह्वाने । ' क्रदि आह्वाने रोदने च ' इति रेफसहिताद् धातोः भावे ल्युटि क्रन्दनम् ।। वर्ष्म देहप्रमाणयोः । अत्र प्रमाणशब्देनोर्ध्वमानं विवक्षितम् । ' गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ' इति कालिदासः (रघु. ४. ७६) । वर्षति वृष्यते चेति वर्ष्म । ' वृषु सेचने ' । मनिन्प्रत्ययः[3] (उ. ४. १४५) ।। १२३ ।।

[1] ' षूङ् प्राणिप्रसवे ' । ' ओदितश्च ' (८. २. ४५) इति निष्ठानत्वम्; ' स्वादयः ओदितः '. [2] ' लोकेषु पञ्चविधꣳ सामोपासीत ' (छा. उ. २. २. १). [3] ' सर्वधातुभ्यो मनिन् '.

(पा.) प्रसूनं पुष्पफलयोः । सूनशब्दोऽपि एवंप्रकारः । ' सूनं प्रसवपुष्पयोः ' इति विश्वः (पृ. ८६, श्लो. ९) ।। निधनं—प्रमाणयोः । [वर्ष्म] सुन्दराकारेऽपि स्यात् । ' प्रमाणदेहयोर्वर्ष्म स्यादाकारेऽपि सुन्दरे ' इति रभसः ।। १२३ ।।

गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे ।
संनिवेशे च संस्थानं लक्ष्म चिह्नप्रधानयोः ।। १२४ ।।

(वि.) गृहे देहे स्थितौ रश्मौ धाम जन्मप्रभावयोः ।

धीयते ध्रियत इति धाम[1] ।।

संस्थानमाकृतौ मृत्यौ रचनायां चतुष्पथे ।। 263 ।।

[2]सम्यक् तिष्ठन्त्यत्रेति संस्थानम् । ' ष्ठा गतिनिवृत्तौ ' ।।

लाञ्छने च प्रधाने च लक्ष्मशब्दः प्रकीर्त्यते[3] ।

लक्ष्यत इति लक्ष्म । ' लक्ष दर्शनाङ्कनयोः ' ।। १२४ ।।

[1] K2 adds ' डुधाञ् धारणपोषणयोः '. [2] संतिष्ठन्ते J2, K4. [3] प्रकीर्तितः J2.

(विव.) गृह—धामानि । त्विट् किरणः । प्रभावः प्रतापः । धत्ते धीयत इति वा धाम । दधातेरौणादिको मनिन् (उ. ४. १४५) । शेषे—' धाम स्थाने च जन्मनि ' इति[1] । अथ चतुष्पथे—संस्थानम् । चतुर्णां पथां समावेशस्थानं चतुष्पथम् ।

संगतास्तिष्ठन्त्यत्र पन्थान इति संस्थानम्[2]। सम्यक् तिष्ठन्त्यत्रावयवा इति संनिवेशोऽवयवरचनाविशेषः। शेषे—'संस्थानमाकृतौ मृत्यौ' इति। अवयवसंनिवेशोऽभिव्यङ्ग्यस्वरूपम् आकृतिः[3]॥ लक्ष्म चिह्नप्रधानयोः। चिह्नं लक्षणम्। प्रधानं मुख्यम्। यथा—यादवलक्ष्मा कृष्णः इति॥ १२४॥

[1] B5 adds अत्र विश्वः—'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति (पृ. ६५, श्लो. १२१). [2] संस्थीयतेऽत्रेति संस्थानम्। ल्युट्. [3] Tv adds 'संस्थानमाकृतौ मृत्यौ संनिवेशे चतुष्पथे' इति रुद्रः.

(पा.) गृहदेह—संनिवेशे च संस्थानम्। संनिवेशोऽवयवविभागः। 'व्यूढोरस्को वृषस्कन्धः सालप्रांशुर्महाभुजः (रघु. १. १३)॥ लक्ष्म चिह्नप्रधानयोः॥ १२४॥

आच्छादनं संपिधानमपवारणमित्युभे।
आराधनं साधने स्यादवाप्तौ तोषणेऽपि च॥ १२५॥

(वि.) आच्छादनं स्याद् वसने संविधानेऽपवारणे॥ 264॥

[1]आच्छाद्यतेऽनेनेत्याच्छादनम्। 'छद अपवारणे'।

आराधनं साधने स्यादवाप्तौ तोषणेऽपि च।

आराध्यत[2] इत्याराधनम्। 'राध[3] संसिद्धौ'॥ १२५॥

[1] K5, K6 omit अनेन. [2] J2, K4 add अनेन. [3] J2, K4 add साध.

(विव.) आच्छादनं—इत्युभे। घटादेः पिधायकं [1]शरावादिकं पिधानम्। तिरोधायकवस्त्रादिकम् अपवारणम्। अन्ये तु—सम्यक् पिधायकं संपिधानम्। ईषत्तिरोधायकम् अपवारणमित्याहुः। आच्छाद्यतेऽनेनेत्याच्छादनम्[2]। 'छद अपवारणे'। अभिविधावीषदर्थे च आङित्युपसर्गः। [3]वस्त्रे च प्रागुक्तम् (१, पृ. ४३५)॥ आराधनं—तोषणेऽपि च। आराध्यते साध्यते फलमनेनेत्याराधनम्। 'राध साध संसिद्धौ'। करणे ल्युट् (३. ३. ११७)। यथा—विष्णोराराधनं श्रेयःसाधनम् इति। अवाप्तिः फलसंपत्तिः। यथा—'जनाः सदाराधनमीहमानाः' इति

देवीशतककाव्ये प्रयोगः (श्लो. २६)। तोषणं संतोषोत्पादनम्। यथा—जनचित्ताराधनं राज्ञो धर्म इति। भावे ल्युट् (३. ३. ११५) ।। १२५ ।।

[1] शरावादि। संपिधानं तिरोधायकम् Gm1, Tv.　[2] करणे भावे च ल्युट् (३. ३. ११७, ११५).　[3] Gm1, Tv add शेषे—वस्त्रेष्वाच्छादनं मतम्.

(पा.) आच्छादनं—इत्युभे। अपवारणमावरणमात्रं दोषावरणं च। 'आच्छादनं संपिधाने[1] वस्त्रे दोषावृतावपि' इति व्याडिः।। आराधनं—तोषणेऽपि च [2]साधनमन्नादिपचनम् ।। १२५ ।।

[1] संनिधाने A1.　[2] A1 omits the sentence.

अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ।
रत्नं स्वजातिश्रेष्ठेऽपि वने सलिलकानने ।। १२६ ।।

(वि.) रथाङ्गनगरे चापि प्रभावेऽध्यासने तथा ।। 265 ।।
आरोपणेऽप्यवस्थानेऽप्यधिष्ठानमुदाहृतम् ।

[1]अधिष्ठीयतेऽत्रेत्यधिष्ठानम्[2] ।।

रत्नं [3]स्वजातावुत्कृष्टे मणौ च परिकीर्तितम् ।। 266 ।।

[4]रमन्तेऽत्रेति रत्नम्। 'रमु क्रीडायाम्' ।।

पानीये कानने [5]चापि वनं हि समुदाहृतम् ।

वन्यत इति वनम्। 'वन षण संभक्तौ'[6] ।। १२६ ।।

[1] अधितिष्ठन्ति K2, K4.　[2] J2 adds 'ष्ठा गतिनिवृत्तौ'.　[3] स्वजातितोत्कृष्टे K6.　[4] रमयति K2, K3.　[5] चैव J2, K4.　[6] J2 adds शब्दे च; 'वनु याचने' K2.

(विव.) अधिष्ठानं—अध्यासनेष्वपि। चक्रं राष्ट्रम्। रथाङ्गमिति [1]केचित्। पुरं नगरम्। अध्यासनं पीठादेरुपर्याक्रमणम्। अधिपूर्वात् तिष्ठतेरधिकरणे भावे च ल्युट् (३. ३. ११७, ११५) ।। रत्नं स्वजातिश्रेष्ठेऽपि। जातौ जातौ यदुत्कृष्टं तद् रत्नम्। यथा—अश्वरत्नं स्त्रीरत्नम् इत्यादि। रमन्तेऽत्रेति[2] रत्नम्। 'रमु क्रीडायाम्'। 'रमेस्त च' (उ. ३. १४) इति नप्रत्ययः। तकार-

श्चान्तादेशः। अपिशब्दात् पद्मरागादौ, मुक्ताप्रवालयोश्च[3] ।। वने सलिलकानने। निगदव्याख्यातमेतत्। निवासस्थानेऽपि वनशब्दः ।। १२६ ।।

[1] अधिष्ठानं रथस्याङ्गे इत्यजयः (भा. दी. पृ. ४८२); रथाङ्गमिति स्वामी (पृ. २९९). [2] रमयतीति वा B5. [3] 'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इति वैश्यवर्गे (१, पृ. ६०९).

(पा.) अधिष्ठानं—अध्यासनेष्वपि। चक्रं रथपदम् [1] 'गालि'।। रत्नं स्वजातिश्रेष्ठेऽपि। मुक्तापद्मरागादावपि स्यात्। वने सलिलकानने। [2]प्रवासिनिलयश्च स्यात्[3]। [2] 'प्रवासिनिलये चापि वनम्[4]' इति विश्वः (पृ. ८५, श्लो. ४) ।। १२६ ।।

[1] B3, C1 omit. [2] प्रवास° B3. [3] B3 omits स्यात्. [4] प्रवासे निलये चापि इति मु. ग्र.

तलिनं विरले स्तोके वाच्यलिङ्गास्तथोत्तरे ।
समानाः सत्समैके स्युः पिशुनौ खलसूचकौ ।। १२७ ।।

(वि.) तलिनं विरले स्तोके निर्मलेऽप्यघनेऽपि च ।। 267 ।।

तल्यत इति तलिनम्[1]। 'तल प्रतिष्ठायाम्'।। वाच्यलिङ्गास्तथोत्तरे। उत्तरे वक्ष्यमाणाः शब्दाः नान्ताः वाच्यलिङ्गा भवन्ति[2] ।।

एकस्मिन्निति युक्ते च नाभिसंस्थितमारुते ।
समे सति समानः स्यात् ।।

समतीति समानः। 'षम वैक्लब्ये'[3] ।।

[4]स्पृक्काकुङ्कुमयोरपि ।। 268 ।।
[5]कपिवक्त्त्रे सूचके च खले पिशुन उच्यते ।

अपिश्यति तनूकरोति परगुणानिति पिशुनः। 'शो तनूकरणे'।। १२७ ।।

[1] 'तल गतौ' K2, K1. [2] K3 omits भवन्ति. [3] अवैकल्ये K3. [4] पृक्का J2. [5] नारद इत्यर्थः; विवस्त्रे सूचने चापि K3.

(विव.) तलिनं विरले स्तोके। स्तोकम् अल्पम्। तलति प्रतितिष्ठति द्रव्यान्तरमत्रेति तलिनम्। 'तल प्रतिष्ठायाम्'। बाहुलकाद् इनन्प्रत्ययः (उ. २. ५६[1]) ।। वाच्यलिङ्गास्तथोत्तरे। अत्र तथाशब्दस्यायमर्थः। यथा पूर्ववाक्यस्थः [2]तलिनशब्दो वाच्यलिङ्गः तथा नान्तवर्गसमाप्तिपर्यन्ता वक्ष्यमाणा अपि वाच्यलिङ्गा इति। तथा च मुरारिनाटके—'कस्य खलु तलिना तादृशी जिह्वा यस्त्वामधरोत्तरेणाभिसंधत्ते' (अनर्घ. १. ४०-) इति प्रयोगः।। समानाः सत्समैके स्युः। [3]सच्छब्देन सज्जन उक्तः। संश्च समश्च एकश्चेति द्वन्द्वसमासे 'विभाषा जसि' (१. १. ३२) इति सर्वनामसंज्ञाप्रतिषेधस्य वैकल्पिकत्वात् जसः शीभावः (७. १. १७)। सममनिति प्राणितीति व्युत्पत्त्या पुंलिङ्गः समानशब्दः शरीरगते वायुविशेषे वर्तते (१, पृ. ४४)।। पिशुनौ खलसूचकौ। खलो दुर्जनः। सूचकः कर्णेजपः। अपिश्यति मर्मोद्घाटनादिजनितदुःखेन परं तनूकरोतीति पिशुनः[4]। 'वष्टि भागुरिरल्लोपम्' (वा. २. ४ ८२) इत्यादिना अपेरकारस्य लोपः। 'पिश अवयवे' इत्यस्माद् धातोः औणादिक उनन्प्रत्ययो वा (उ. ३. ५५[5])। 'मरुन्माला तु पिशुना' इति स्त्रीलिङ्गः प्रागुक्तः (१, पृ. २६५)। कुङ्कुमे तु नपुंसकं मनुष्यवर्गे कथितम् (पृ. ४४०) ।। १२७ ।।

[1] 'तलिपुलिभ्यां च'. [2] Gm3, Tv add उत्तरवाक्यगतं वाच्यलिङ्गं पदं विभक्तिविपरिणामेन तलिनशब्देनापि संबन्धनीयम्। केचित्तु वाच्यलिङ्गमित्येकवचनान्तं पठित्वा तलिनशब्देन संबध्नन्ति. [3] सन् सज्जनः, समः सदृशः, एकः केवलः। यथा—समानोदरे शयितः Tv. [4] Tj1, Tj2 add 'शो तनूकरणे'. [5] 'क्षुधिपिशिमिथिभ्यः कित्'.

(पा.) तलिनं—तथोत्तरे। [1]उत्तरे तथाशब्दग्रहणाद् वाच्यलिङ्गाः ।। समानाः—खलसूचकौ ।। १२७ ।।

[1] स्तोके वाच्यलिङ्गम् इति पारिजाते पाठः.

हीनन्यूनावूनगर्ह्यौ वेगिशूरौ तरस्विनौ।
अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापद्गतावपि ।। १२८ ।।

इति नान्तवर्गः

(वि.) ऊने च कुत्सिते हीनो न्यून ऊनश्च कथ्यते ।। 269 ।।

हीयत इति हीनः । [1]'ओहाक् त्यागे' । नियतमूनयतीति न्यूनः[2] । ऊनयतीत्यूनः[3] । 'ऊन परिहाणे' ।

वेगयुक्ते च शूरे च तरस्वी परिकथ्यते ।

तरो वेगः, बलं वा अस्यास्तीति तरस्वी ।।

अभिपन्नो भवेद् ग्रस्तसूर्यादौ सापराधके ।। 270 ।।
[4]आपत्प्राप्ते शरव्यां च च्युतसायक एव च ।

अभिपद्यत इत्यभिपन्नः । 'पद गतौ' ।। १२८ ।।

इति नान्तवर्गः[5]

[1] J2, K2 omit. [2] नियतमूयते K2, K4. [3] ऊयते K2, K4. [4] व्यापत्° K2, K4. [5] K3, K4 add नान्तशब्दसंख्या ७०.

(विव.) हीनन्यूनावूनगर्ह्यौ । हीनो न्यूनश्च इति शब्दद्वयमिह प्रतिपाद्यम् । ऊनः स्वल्पः । गर्ह्यः निन्दाविषयः । हीयते त्यज्यत इति हीनः । 'ओहाक् त्यागे' । कर्मणि क्तप्रत्ययः (३. ४. ७२) । 'घुमास्था ...' इत्यादिना (६. ४. ६६) ईकारादेशः । 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम् । नियतम् ऊनयति न्यूनः । 'ऊन परिहाणे' । परिहाणं परित्यागः । चुरादिः । पचाद्यच् (३. १. १३४) ।। वेगिशूरौ तरस्विनौ । तरो जवो बलं च, तद्योगात् तरस्वी ।'अस्मायामेधास्रजो विनिः' (५. २. १२१) इति[1] विनिः ।। अभिपन्नो—व्यापद्गतावपि । अपराद्धः कृतापराधः । अभिग्रस्तः शत्रुभिराक्रान्तः । विविधाभिरापद्भिः प्राप्तो व्यापद्गतः । अभिपद्यते स्मेत्यभिपन्नः । 'पद गतौ' । क्तः । 'रदाभ्यां ...' (८. २. ४२) इति निष्ठानत्वम् ।। १२८ ।।

इति नान्तवर्गः[2]

[1] B5, B6 add मत्वर्थे. [2] Tj1, Tj2 add शब्दसंख्या सप्ततिः.

(पा.) हीनन्यून—व्यापद्गतावपि । दक्षिणस्वीकृतावपि स्याताम् । 'अभिपन्नं वदन्त्यार्या दक्षिणे स्वीकृतेऽपि च' इति व्याडिः[1] । शरणार्थी च स्यात् । 'अभिपन्नः शरणार्थी' इति त्रिकाण्डशेषः ।। अनुक्तम्—

वन्दिन्यपि च नग्नः स्यात् सूनुः स्यादनुजेऽपि च ।
विदग्धेऽपि च धन्वी स्याद् धमनी स्याद् गलेऽपि च ।
पन्नगेऽपि विपन्नः स्याद् भृङ्गेऽपि मधुसूदनः ।
रसज्ञायां च ललना द्विजपत्न्यां च भट्टिनी ।
जननी स्यात् कृपायां च नौरनेहसि च स्त्रियाम् ।
स्यात् प्रार्थनाभियानेऽपि स्याद् [2]विषेऽपि रसायनम् ।
स्यात् तपस्वी कृपार्हेऽपि स्यान्नलिन्यम्बुजेऽपि च ।
निर्भर्त्सनमलक्तेऽपि दमनः [3]सारथावपि ।
केलीरसे भवेत् प्रेम केसरी घोटकेऽपि च ।
नन्दिनी हस्तिनीति द्वे द्वयोश्च पुरभेदयोः ।

नन्दिनी अयोध्यापुरम् । 'साकेतं स्यादयोध्यायां कोसलानन्दिनीति च' इति वैजयन्ती (पृ १५६, श्लो. ५) । 'हस्तिनी [4]हस्तिनापुरम्' इति वैजयन्ती (पृ. १५६, श्लो. ८) । 'नागाह्वं हस्तिनापुरम्' इति रत्नकोशः ।।

कदनं कलहे युद्धे बन्धनं कवचे युधि ।
बाहामण्डलकुण्डलीकृतरणत्कोदण्डकाण्डच्छटा-
[5]हेलानिर्जितवैरिबन्धनपरक्ष्मामण्डलाखण्डलः ।
संध्याताण्डवचण्डखण्डपरशुत्वङ्गज्जटावाहिनी-
[6]डिण्डीरार्थिविडम्बिडम्बरविधिप्रोद्दण्डपाण्डित्यभूः ।।

इति साहित्यकल्पवल्ली ।।

जनः प्रजायां जाल्मे च जनिः पत्न्यां च योषिति ।
सदादानः सुरगजे गजास्ये गन्धहस्तिनि ।। १२८ ।।

इति नान्तवर्गः

[1] व्यालिः A1. [2] विलेऽपि B3, C1. [3] सिद्धके B3; सक्तके A1. [4] हास्तिन-पुरमिति मु. ग्र. [5] भञ्जन° for बन्धन° A1. [6] दिण्डीर° A1.

अथ पान्तवर्गः—

कलापो भूषणे बर्हे तूणीरे संहतेऽपि च ।
परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ।। १२६ ।।

(वि.) कलापो भूषणे वर्हे तूणीरेऽपि च संहते[1] ।। 271 ।।

[2]कला आप्नोतीति कलापः । 'आप्लृ व्याप्तौ' ।।

परिचारे जलाधारबीजारोपणयोरपि ।
अचलत्वे च सलिले [3]परीवापः प्रकीर्तितः ।। 272 ।।

पर्युप्यत इति [3]परीवापः । 'डुवप् [4]बीजसंताने' ।। १२६ ।।

[1] संहतौ K2, K3, K4. [2] कल्यते । 'कल शब्दसंघातयोः' K2, K3, K4. [3] परिवापः J2, K4. [4] K2, K4 add °तन्तु°

(विव.) कलापो—संहतेऽपि च । भूषणं काञ्च्यादि । यथा—[1]मुक्ता-कलापः (कु. सं. १. ४२) । बर्हं पिच्छम्[2] । यथा—'निजकलापभरेण' इति । तूणीरम् इषुधिः । 'कलापी कवची धन्वी' इति तूणीरे । संहतं समूहः । यथा—[3]केशकलापः । कलाः कान्तिविशेषानाप्नोति पाति वा कलापः । 'आप्लृ व्याप्तौ' । 'पा रक्षणे'[4] ।। परिच्छदे—सलिलस्थितौ । परित उप्यते राजपुरुषैरिति परीवापः । परिच्छदः [5]पटमण्डपसज्जनादिः । 'डुवप् [6]बीजसंताने' । कर्मणि घञ्[7] (३. ३. १२१) परीवापः । पर्युप्तिः कृष्टक्षेत्रे परितो बीजवपनमित्यर्थः । अधिकरणे घञ् (३. ३. १२१) । परिवापो जलस्थितिः । सलिलस्य स्थितिरत्रेति व्युत्पत्त्या जलाशय इत्यर्थः । जलस्य निश्चलत्वमात्रस्थितिरित्येके । 'उपसर्गस्य घञि . . .' इत्यादिना (६. ३. १२२) दीर्घः ।। १२६ ।।

[1] रशनामुक्ताकलाप इति भूषणे Gm3, Tv. [2] पिञ्च्छम् B5, B6. [3] गुण-कलापः Tv. [4] 'कर्मण्यण्'। कला आप्यतेऽनेन वा । 'हलश्च' इति घञ् इति भा. दी. (पृ. ४८२). [5] पटमण्डपे जनादि° Tv. [6] Tj2 adds °तन्तु°. [7] Gm1 adds भावे घञि वा.

(पा.) कलापो—संहतेऽपि च । भूषणशब्देन भूषणसामान्यविशेषौ[1] कथितौ । 'कलापो भूषणे काञ्च्यां संघाते बर्हतूणयोः' इति वैजयन्ती (पृ. २४०, श्लो. १५) ।। परिच्छदे—सलिलस्थितौ । सलिलस्थितिशब्देन आलवालमुक्तम् । 'पर्युप्तौ च परीवाप आलवाले परिच्छदे' इति वैजयन्ती (पृ. २६७, श्लो. २६)[2] ।। १२६ ।।

[1] A1 adds एव.　　[2] C1 adds परिच्छदः वस्त्रादि.

गोधुग् गोष्ठपतिर्गोपौ हरो विष्णुर्वृषाकपिः ।
बाष्पमूष्माश्रु कशिपु त्वन्नमाच्छादनं द्वयम् ।। १३० ।।

(वि.) बहुग्रामनियुक्ते च गोपो गोष्ठपतौ नृपे ।
गोपाले रक्षिकाभीरीशारिबासु स्त्रियां भवेत् ।। 273 ।।

गां पाति[1] गोपायतीति वा गोपः । 'पा रक्षणे' । [2]'गुपू रक्षणे' ।।

ईशाने च हरौ चेन्द्रे ज्वलने च वृषाकपिः ।

वर्षति कम्पते चेति वृषाकपिः । 'वृष सेचने' । 'कपि चलने' ।।

ऊष्मण्यश्रुणि बाष्पः स्यात् कशिपु त्वन्नवस्त्रयोः ।। 274 ।।

बाष्पतीति बाष्पः । [3]'बाष्प अश्रुविमोचने' ।। कशति[4] तनूकरोति क्लेशानिति कशिपु । 'कश गतिशातनयोः'[5] ।। १३० ।।

[1] K4 adds इति.　　[2] K3, K4 omit.　　[3] The root बाष्प् is assumed from the *sūtra* 'बाष्पोष्मभ्यामुद्वमने' (६. १. १६).　　[4] K4 adds कश्यते वा.
[5] °शासनयोः J2.

(विव.) गोधुग् गोष्ठपतिर्गोपौ । [1]गोबन्धनदोहनादिकर्ता गोधुक् । गवोपयुक्तकर्मण्यधिकृतो गोष्ठपतिः[2] । अत्र प्रतापः—

'गोपो ग्रामौघगोष्ठाधिकृतयोर्वल्लवे नृपे ।
गोपयोषाशारिबयोर्गोपी गोपा तु रक्षिका ।।'

इति। गां भूमिं पातीति विग्रहे 'आतोऽनुपसर्गे कः (३. २. ३) इति कप्रत्यये 'आतो लोप इटि च' (६. ४. ६४) इत्याकारलोपे च गोपो नृपः। गोपालवचनाद् गोपशब्दात् 'पुंयोगादाख्यायाम्' (४. १. ४८) इति ङीपि गोपी गोपालयोषा। शारिबायां तु प्रागुक्ता (१, पृ. २८१)। 'गुपू रक्षणे' इत्यस्मात् पचाद्यचि (३. १. १३४) टापि (४. १. ४) गोपा रक्षिका॥ हरविष्णू वृषाकपी। वृषेण धर्मेण अकन्ति वर्तन्त इति वृषाकाः धर्मशीलाः। तान् पाति रक्षतीति वृषाकपिः[3]। 'वृषाकप्यग्निकुसित ...' इत्यादिनिर्देशात् (४. १. ३७) साधुः। शेषे—'वृषाकपिः स्याज्ज्वलने सहस्राक्षे च कीर्तितः' इति। 'नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते' (तै. सं. १. ७. १३. २) इति सहस्राक्षे प्रयोगः॥ बाष्पमूष्माश्रु। [4] चित्रभानुप्रतप्ताद् भूतलघटकपालादेः उद्गच्छन् धूमादिविजातीयावयवसंभिन्नस्तेजोभाग[5] ऊष्मा[6]। अश्रु नेत्राम्बु। वायति शुष्यति शोषयति वा, पाति रक्षति शीतार्तमिति वा बाष्पः। 'ओवै शोषणे', 'पा रक्षणे' इति धातुद्वयम्। 'बाष्पोष्मभ्यामुद्वमने' (३. १. १६) इति निर्देशात् साधुः॥ कशिपु—द्वयम्। अन्नम् [7]ओदनमोदकादिकम्। आच्छादनं वस्त्रम्। तदुभयं [8]समुदितं प्रत्येकं वा नपुंसकलिङ्गेन कशिपुशब्देनोच्यते। कशति शातयति दुःखमिति कशिपु। 'कश गतिशातनयोः'[9]। 'एकोक्तया कशिपुर्भक्ताच्छादने द्वे पृथक् कृते' इति पुंनपुंसककाण्डे रभसाभिधानात् पुंनपुंसकलिङ्गः। 'पृथक् च वा' इति पक्षान्तरम्॥ १३०॥

[1] °गोदोहन° Tv. [2] Tj1 adds गां पातीति गोपः। 'पा रक्षणे'। 'आतोऽनुपसर्गे कः'. [3] Tj2, Tv add 'अक गतौ' 'पा रक्षणे'; B5 adds वृषाकपिः मूर्धन्यषः. [4] अग्निज्वालादिना प्रतप्ताद् भूप्रदेशात् Gm3, Tv. [5] सहित° for संभिन्न° Tv. [6] Tj2, Tv add यथा—बाष्पायते स्थाली. [7] अशितं for ओदनम् Tv. [8] मिलितं Tv. [9] मृगय्वादित्वाद् (उ. १. ३६) निपातनात् साधुः इति श. द्रु. (पृ. ६६).

(पा.) गोधुग्—[1]बाष्पमूष्माश्रु। ऊष्मणि—बाष्पायते स्थाली। अश्रुणि—बाष्पाम्भसां विन्दवः॥ कशिपु—द्वयम्। अन्नमाच्छादनमित्यनेन पृथक् पृथक् च, द्वयमित्यनेन मिलित्वापि कशिपुशब्दो वाच्यः। 'एकोक्तया [2]कशिपुर्भक्ताच्छादने च द्वयोः पृथक्' इति विश्वः[3] (पृ. १०५, श्लो. १८)॥ १३०॥

[1] हरविष्णू वृषाकपी इति पारिजातानुसारी पाठः. [2] भक्तया इति मु. ग्र. [3] रभसः A1; B3 adds दर्शितहिरण्यकशिपुक्षेत्रदानविस्मय इति वासवदत्ता.

तल्पं शय्याट्टदारेषु स्तम्बेऽपि विटपोऽस्त्रियाम् ।
प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ।। १३१ ।।
भेद्यलिङ्गा अमी कूर्मो वीणाभेदश्च कच्छपी ।

इति पान्तवर्गः

(वि.) शय्यापत्न्योर्दुर्गसारे तल्पं स्याद् रणमण्डपे ।

तलन्ति [1]प्रतितिष्ठन्त्यत्रेति तल्पम् । 'तल[2] प्रतिष्ठायाम्' ।।

स्कन्धादूर्ध्वंतरोः शाखास्तम्वयोर्वृक्षविस्तृतौ ।। 275 ।।
पल्लवे विटपाले च विटपः परिकीर्तितः ।

[3]वेटतीति विटपः । 'विट शब्दे' ।।

प्राप्तरूपसुरूपाभिरूपा बुधमनोज्ञयोः ।। 276 ।।

प्राप्तं रूपमस्येति प्राप्तरूपः । शोभनं रूपमस्येति सुरूपः । अभिमतं रूपमस्येत्यभिरूपः । अमी त्रयः शब्दा विशेष्यनिघ्नाः ।।

कच्छपी वल्लकीभेदे कमठीक्षुद्ररोगयोः ।

कच्छपस्येयं कच्छपी ।। १३१ ।।

इति पान्तवर्गः[4]

[1] K2, K4 omit प्रतितिष्ठन्ति. [2] 'तल गतौ' K3, K6. [3] विटति, 'विट शब्दे' J2, K4. [4] K2, K3 add पान्तशब्दसंख्या १२.

(विव.) तल्पं शय्याट्टदारेषु । अट्टः दुर्गप्राकारस्थो[1] युद्धमण्डपः । तलन्ति प्रतितिष्ठन्त्यत्र भटा इति तल्पम् । 'तल प्रतिष्ठायाम्' । (उ. ३. २८[2]) । रूपभेदाद् नपुंसकलिङ्गम् । उत्तरवाक्यस्थमस्त्रियामिति पदमत्राप्यनुसंधेयमिति चन्द्रः । तथा च—'ययुः सुषुप्सवस्तल्पान्[3] भीमैर्वचनकर्मभिः' इति भट्टिकाव्ये (८. १०१) पुंलिङ्गप्रयोगः ।। स्तम्बेऽपि विटपोऽस्त्रियाम् । स्तम्बः तृणादिगुत्सः[4] । अत्र प्रतापः—

'वृक्षस्कन्धोर्ध्वशाखायां तृणगुत्से[5] द्रुविस्तृतौ ।
पल्लवे विटमुख्ये च विटपः पुंनपुंसकम् ।।' इति ।

विटान् पाति छायासंवरणदानादिना रक्षतीति विटपः[6] ।। प्राप्तरूप—अमी । रूप-शब्देन उत्कर्षो विवक्षितः, तद्योगात् प्राप्तरूपः सुरूपः अभिरूपश्च[7] । अमी त्रयोऽपि शब्दा वाच्यलिङ्गा इत्यर्थः ।। कूर्मी वीणाभेदश्च कच्छपी । कूर्मी कमठजातीया स्त्री । 'जातेरस्त्रीविषयात् ...' इत्यादिना (४. १. ६३) ङीषि कच्छपी । तदाकारसाम्याद् वीणाभेदः । सरस्वत्या वीणा च ।। १३१ ।।

इति पान्तवर्गः

[1] °र्वतिरणमण्डपः Tv. [2] 'खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः'. [3] तल्पमिति मु. ग्र. [4] Tj1, Tv add 'स्तम्बो गुच्छतृणादिनः' इत्युक्तम् (पृ. ५६५). [5] °गुच्छे Gm3, Tv. [6] वेटति । विट्यते वा । 'विट आक्रोशे शब्दे' । 'विटपपिष्टपविशिपोलपाः' (उ. ३. १४५) इति भा. दी. (पृ. ४८३). [7] Tv adds अत्र रूपशब्दो व्याकरण-निष्पन्नशब्दवचनः । तथा च निघण्टुः—रूपं स्वभावे सौन्दर्ये नामके नाटकादिषु । आकृतौ संस्कृते शब्दे इति.

(पा.) तल्पं—अस्त्रियाम् । 'शाखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम्' इति रभसः ।। प्राप्तरूप—मनोज्ञयोः । अभिरूपमपत्यम् । अभिरूपा कन्या ।। कूर्मी—कच्छपी । वीणाभेदः सरस्वतीकरवीणा[1] । 'महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी' इति वैजयन्ती (पृ. १४५, श्लो. ११९) ।। अनुक्तम्—

[2]कुतपो मृगरोमोत्थपटे चाह्नोऽष्टमेंऽशके ।

मृगरोमोत्थपटो नाम[3] छागकम्वलः ।। 'कुतपः स्यात् कुले वाद्ये [4]तपने छागकम्वले' इति विश्वः (पृ. १०४, श्लो. १२) ।।

रूपं तु शब्दशुक्लादिसौन्दर्याकारनाणके ।
आम्रे चामरपुष्पः स्यात् काशकेतकयोरपि ।
गर्तायामपि कूपः स्यात् पादपीठेऽपि पादपः ।। १३१ ।।

इति पान्तवर्गः

[1] B3 omits °कर°.　[2] कुतुपः A1.　[3] B3, C1 omit नाम.　[4] तापके A1.

अथ फान्तवर्गः—

रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः ॥ १३२ ॥

(पा.)　रेफः पुमान् रवर्णे स्याद् द्विरेफः स्यान्मदेऽपि च ॥ १३२ ॥

इति फान्तवर्गः

लिङ्गयसूरिकृतविवृतौ, अप्पयार्यकृतविवरणे च फान्तशब्दा न दृश्यन्ते । क्षीरस्वामिग्रन्थे तु एवं दृश्यते—

शिफा शिखायां सरिति मांसिकायां च मातरि ।
शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च ॥
गुल्फः स्याद् गुम्फने बाहोरलंकारे च कीर्तितः ।
रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः ॥ इति.

अथ बान्तवर्गः—

अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ।
कम्बुर्ना वलये शङ्खे द्विजिह्वौ सर्पसूचकौ ॥ १३३ ॥
पूर्वोऽन्यलिङ्गः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ।

(वि.)　अन्तराभवसत्त्वे स्याद् गन्धर्वो दिव्यगायके ॥ 277 ॥

गां धारयतीति गन्धर्वः ॥

कम्बुर्ना वलये शङ्खे द्विजिह्वौ सर्पसूचकौ ।

काम्यत इति कम्बुः[1] । 'कमु कान्तौ' । द्वे जिह्वे यस्येति द्विजिह्वः ॥

पूर्वः स्यात् प्राग्दिशोः पूर्वः पूर्वजेऽपि[2] च कथ्यते ॥ 278 ॥

पूर्वतीति पूर्वः । [3]'पूर्व पूरणे' । वबयोरैक्यम् ॥ १३३ ॥

इति बान्तवर्गः[4]

[1] कम्बु K2, K3. [2] पूर्वजेषु J2, K4. [3] 'पुर्वमर्वपर्व पूरणे' K4, K6. [4] K2, K4 add बान्तवर्गसंख्या ४.

(विव.) अनेकार्थफकारान्तशब्दानां प्राचुर्येण प्रयोगाभावात् तदतिक्रमेण बान्तानाह—

अन्तराभव—दिव्यगायने। अत्र सुबोधिनीकारः—द्यावापृथिव्योरन्तराभवसत्त्वेन महापर्वतशिखरप्रदेशेषु वर्तमाने देवयोनिविशेषे घोटकमात्रे त्रिदिवौकसां गायने च [1]गन्धर्वशब्दो वर्तत इति ।। कम्बुर्ना वलये शङ्खे। वलये करभूषणे। शङ्खे तु नपुंसकत्वमपि प्रागुक्तम् (१, पृ. १७०[2])। द्विजिह्वौ सर्पसूचकौ। सूचकः कर्णेजपः। जिह्वाशब्दोऽत्र लक्षणया वचने वर्तते। अत्र वचनस्य च द्वैविध्यं समक्षपरोक्षयोरेकरूपत्वाभावादवसेयम् ।। पूर्वो—पूर्वजान्। अत्र प्राक्च्छब्दः पूर्वेषु दिग्देशकालेषु तत्रत्यसंबन्धिपदार्थेषु च [3]वर्तते विशेष्यनिघ्नश्च। यथा—पूर्वा दिक्। पूर्वं दिक्चक्रम्। पूर्वा संध्या। [4]पूर्वो देशः। पूर्वा भूमिः। पूर्वमुपवर्तनम्। पूर्वः समुद्रः। पूर्वं दिनम्। पूर्वा रात्रिः। पूर्वा [5]धनसंपत्तिः। पूर्वं धनम् इत्यादि यथासंभवमुदाहार्यम्। यदा तु पूर्वजान् [6]पितृपितामहादीन् पुरातनान् वा अभिधत्ते, तदा पूर्वशब्दस्य पुंलिङ्गत्वबहुवचनान्तत्वयोर्नियमः। यथा—मत्पूर्वैः पालितो देश इति। पुरातनेषु यथा—'पूर्वे पूर्वेभ्यो वच एतदूचुः' (तै. ब्रा. ३. १२. ६. २) इति। वबयोरभेदाद् गन्धर्वादिशब्दानामत्र पाठः कृतः। कैश्चिद् व्याख्यातृभिः 'अन्तराभव' इत्यादिकः सार्धश्लोकोऽपि न व्याख्यातः ।। १३३ ।।

इति बान्तवर्गः[7]

[1] गन्धमर्वति। अर्व गतौ। 'कर्मण्यण्'। शकन्ध्वादिः इति भा. दी. (पृ. ४८४). [2] 'कम्बुरस्त्रियाम्'. [3] ततश्चायमर्थः। पूर्वशब्दो वाच्यलिङ्गः Gm1, Tv. [4] Tv adds पूर्वः चन्द्रप्रकाशः. [5] दिनसंपत्तिः Tv. [6] Tv omits. [7] Tj2 adds शब्दसंख्या ४.

(पा.) अन्तराभव—दिव्यगायने। अन्तराभवसत्त्वः [1]मरणजन्मनोर्मध्यावस्थापन्नजन्तुः। अश्वः हयः। दिव्यगायनः तुम्बुरुप्रभृतिः। गायनमात्रे च स्यात्। 'अन्तराभवसत्त्वे स्याद् गन्धर्वो गायने हये' इति वैजयन्ती (पृ. २४१, श्लो. २४) ।। कम्बुर्ना वलये शङ्खे। शङ्खे पुंनपुंसकः।। द्विजिह्वौ—पूर्वजान्। प्राक्च्छब्दो दिग्देश-

कालवचनः[2]। [3]पूर्वा दिक्। पूर्वं स्थानम्। पूर्वो दिवसः। पूर्वजशब्दो वंश्यवचनः। 'पूर्वैः किलायं परिवर्धितो नः' इति रघुवंशः (१३. ३)॥ अनुक्तम्—

बिम्बं बिम्बीफले तुल्ये प्रतिमाप्रतिबिम्बयोः।

बिम्बफले—बिम्बाधरा। तुल्ये—स्मरस्य बिम्बमनिरुद्धः। प्रतिमायाम्—शिलाबिम्बम्। प्रतिबिम्बे—मुखस्य बिम्बम्। मण्डलेऽस्त्री—शशिबिम्बं शशिबिम्बः॥ १३३॥

इति बान्तवर्गः

[1] जननमरणयोः B3, C1.　[2] A1 adds कथ्यते.　[3] पूर्वो विधिः A1.

अथ भान्तवर्गः—

कुम्भौ घटेभमूर्धांशौ डिम्भौ तु शिशुबालिशौ॥ १३४॥
स्तम्भौ स्थूणाजडीभावौ शंभू ब्रह्मत्रिलोचनौ।
कुक्षिभ्रूणार्भका गर्भा विस्रम्भः प्रणयेऽपि च॥ १३५॥

(वि.)　घटे गजशिरःपिण्डे राशौ वाराङ्गनापतौ।
कुम्भकर्णश्रुतौ[1] कुम्भः कुम्भं त्रिवृति गुग्गुले[2]॥ 279॥
कुम्भी भवेच्च पिठरे वारिपर्ण्यां च कट्फले।

कुम्भयतीति कुम्भः। 'कुभि आच्छादने'॥

बालिशे बालके[3] चापि डिम्भशब्दोऽभिधीयते॥ 280॥

डयते गमनायेति डिम्भः[4]। 'डीङ विहायसा गतौ'॥

स्थूणायां च जडीभावे स्तम्भस्तु परिकीर्तितः।

स्तभ्नातीति स्तम्भः[5]। 'स्तन्भु रोधनस्तम्भनयोः'॥

शंभुः पूज्ये महेशाने परमेष्ठिनि कथ्यते॥ 281॥

शं सुखमस्माद् भवतीति शंभुः[6]।

कुक्षौ भ्रूणे बालके च संधौ [7]पनसकण्टके ।
अन्तर्भावे च गर्भः स्यादसंवादे च हिंसने ।। 282 ।।
विश्वासे केलिकलहे विस्रम्भः प्रणये भवेत् ।

गिरतीति गर्भः । 'गॄ निगरणे' ।। [8]विस्रभ्यत इति विस्रम्भः । 'स्रम्भु विश्वासे'[9] ।। १३४-५ ।।

[1] °सुते K4; °श्रुते J2. [2] गुग्गुलौ K2, K4. [3] बालिके J2. [4] डिम्भयति; 'डिभि क्षेपे' K4. [5] स्तभ्यते, 'स्तभि ष्टभि प्रतिबन्धे' K3, K4. [6] K2, K3 add 'भू सत्तायाम्'. [7] पवनसंकटे K6. [8] विस्रम्भते K2, K6. [9] J2 adds प्रमादे च.

(विव.) कुम्भौ घटेभमूर्धांशौ । [1]गजशिरःस्थितः पिण्डरूपोऽवयव इत्यर्थः । शेषे—

'कुम्भः स्यात् कुम्भकर्णस्य पुत्रे वाराङ्गनापतौ ।
राशिभेदे मानभेदे गुग्गुलुत्रिवृतोर्नपुम् ।।
कुम्भी तु पाटलावारिपर्णीपिठरकट्फले ।।'

मानभेदः पलसहस्रपरिमितः । कुम्भः द्रोणचतुष्टयमित्येके । यथा—'धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः' इति (म. स्मृ. ८. ३२०) । गुग्गुलौ त्रिदण्ड्यां च नपुम्, नपुंसकलिङ्गमित्यर्थः । पाटलादिषु [2]कुम्भशब्दो ङीबन्तः कुम्भीति । डिम्भौ तु शिशुबालिशौ । शिशुरष्टमवर्षादर्वाचीनः । बालिशो मूर्खः । डिम्भयतीति डिम्भः । 'डिभि क्षेपे' । पचाद्यच् (३. १. १३४) ।। स्तम्भौ स्थूणाजडीभावौ । स्तम्भ्यन्ते स्वोपरिस्थितानि दारूणि अनेनेति स्तम्भः स्थूणा । पटकाद्याधारत्वेन ऊर्ध्वाग्रतया स्थापितो दारुविशेष इयर्थः । 'ष्टभि स्तभि प्रतिबन्धे' । करणे घञ् (३. ३. १२१) । स्तम्भ्यते प्रतिरुध्यते शरीरव्यापारोऽनेनेति स्तम्भः जडीभावः निष्पन्दता, सात्त्विको भावविशेषश्च ।। शंभू ब्रह्मत्रिलोचनौ । ब्रह्मा चतुराननः । विष्णावपि [3]शंभुशब्द इति चन्द्रः ।। कुक्षिभ्रूणार्भका गर्भाः । भ्रूणः कुक्षिस्थः प्राणिविशेषः । कुक्षौ यथा—उच्छूनगर्भ इति । गर्भे—'गर्भहा च यथावर्णम्' (या. स्मृ. ३. ५. २५१) इति । अर्भके शिशौ यथा—'यद् गर्भरूपमिव मामनुशास्ति' इति मुरारिनाटके (अ. रा. १. १५) । शेषे—'अन्तर्भावे च गर्भः स्यात् संधौ

[4]पनसकण्टके' इति। अन्तर्भावे यथा—कदलीगर्भपत्रम्। संधौ यथा—प्रतिमुखानन्तरस्तृतीयो गर्भसंधिः प्रसिद्धः (द. रू. १. २४)॥ विस्रम्भः प्रणयेऽपि च। प्रणयोऽभिलाषविशेषः। शेषे—'विस्रम्भः केलिकलहे विश्वासेऽपि च हिंसने' इति॥ १३४–५॥

[1] Tj1, Tv add इभमूर्धांशः; मूर्धैकदेशः शिरोदेशस्थपिण्ड इत्यर्थः B5.　[2] कुं भूमिं कुत्सितं वा उम्भति। 'उम्भ पूरणे'। कर्मण्यण्। पचाद्यच् वा। शकन्ध्वादिः इति भा. दी. (पृ. ४८४).　[3] शं भवत्यस्मादिति शंभुः। 'भू सत्तायाम्'। डुप्रकरणे 'मितद्र्वादिभ्य उपसंख्यानम्' (वा. ३. २. १८०) इति डुः.　[4] वचनसंकटे B5, B6.

(पा.) कुम्भौ घटेभ—गर्भाः। भ्रूणः कुक्षिस्थशिशुः। विस्रम्भः प्रणयेऽपि च। 'विस्रम्भः केलिकलहे विश्वासे प्रणये वधे' इति विश्वः (पृ. १०६, श्लो. २८)॥ १३४-५॥

स्याद् भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम्।
स्यान्महारजने क्लीबं कुसुम्भं करके पुमान्॥ १३६॥

(वि.) दुन्दुभी राक्षसे भेर्यामक्षे बिन्दुत्रिकद्वये॥ 283॥

[1]दुन्दुमिति भाषत इति दुन्दुभिः॥

पद्मके हेमनि पटे कुसुम्भं स्यात् कमण्डलौ।

कुसुम्भ्यत इति कुसुम्भः। [2]'कुसुम्भ अर्दने'॥ १३६॥

[1] द्यतीति दुन्दुभिः। 'दो अवखण्डने' K2, K3.　[2] 'कुषुभ क्षेपे' J2.

(विव.) स्याद् भेर्यां—स्त्रियाम्। अक्षोऽत्र पाशकाख्यं द्यूतसाधनम्। यथा—'दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हारिता' इति। भेर्यां यथा—'दुन्दुभिस्ताडितोऽयम्' (वेणी. १. २२)। दुन्दुमिति शब्दं भाषत इति दुन्दुभिः। 'भाष व्यक्तायां वाचि'। औणादिकः [1]किप्रत्ययः। 'दैत्ये ना दुन्दुभिर्भेर्यां त्र्यक्षे बिन्दुत्रिकद्वये' इति रभसः। दैत्यो वालिशत्रुः। बिन्दुत्रिकद्वय इति अक्षस्वरूपकथनम्॥ स्यान्महारजने—पुमान्। महारजनं वह्निशिखम्[2] (१, पृ. ६१६)।

पद्मकमिति स्वामी (पृ. ३०२)। स्वप्रच्युतेन जवेन कुं भूमिं सुम्भति नाशयतीति कुसुम्भः। [3]'सुम्भ शुम्भ हिंसायाम्'। करकः कमण्डलुरित्यर्थः। शेषे—'कुसुम्भं हेमनि क्लीबे' इति ॥ १३६ ॥

[1] 'इगुपधात् कित्' (उ. ४. १२०) इतीन् इति भा. दी. (पृ. ४८४). [2] 'स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि' (१, पृ. ६१६). [3] सुम्भ भाषणे हिंसायां च Tv.

(पा.) स्याद् भेर्यां—स्त्रियाम्। अक्षो नाम अक्षबिन्दुत्रिकद्वयम्। 'इत्तिगलु'। 'दुन्दुभिर्दितिजे भेर्यामक्षबिन्दुत्रिकद्वये' इति विश्वः (पृ. १०६, श्लो. ३३) ॥ १३६ ॥

क्षत्रियेऽपि च नाभिर्ना सुरभिर्गवि च स्त्रियाम्।
सभा संसदि सभ्ये च त्रिष्वध्यक्षेऽपि वल्लभः ॥ १३७ ॥

(वि.) [1]जिगीषुक्षत्रिये मुख्ये चक्रान्तश्चक्रवर्तिनोः ॥ 284 ॥
प्राण्यङ्गे चैव कस्तूरीमदे नाभिः प्रकीर्त्यते।

नभते नभ्यते च नाभिः। 'णभ हिंसायाम्' ॥

चम्पके स्त्रीगवि [2]स्वर्णे सल्लकीमातृभेदयोः ॥ 285 ॥
मनोज्ञे च [3]सुगन्धौ च सुरभिर्वाच्यलिङ्गकः।

सुष्ठु रभ्यत इति सुरभिः। 'रभ राभस्ये' ॥

संसच्छालादेवनेषु गोष्ठ्यां द्यूते च मन्दिरे ॥ 86 ॥
समूहसख्ययोश्चैव सभाशब्द उदाहृतः।

सह भान्त्यत्रेति सभा। 'भा दीप्तौ' ॥

गवाध्यक्षे कुलीनाश्वे दयिते वल्लभः स्मृतः ॥ 287 ॥

वल्लत इति वल्लभः। 'वल्ल प्रीतौ'[4] ॥ १३७ ॥

इति भान्तवर्गः[5]

[1] जिगीषौ K4.　　[2] स्वर्गे J2, K4.　　[3] सुगन्धे J2.　　[4] संचरणे K6.
[5] K2, K4 add भान्तशब्दसंख्या १२.

(विव.) क्षत्रियेऽपि च नाभिर्ना। ना पुंलिङ्ग इत्यर्थः। नभते हिनस्तीति नाभिः। 'णभ हिंसायाम्'। शेषे प्रतापे च—

'चक्रान्तश्चक्रवर्तिनोः।
नाभिः प्रधाने कस्तूरीमदे प्राण्यङ्ककेऽपि च॥'

चक्रान्तः चक्रयोर्मध्यं पिण्डिकाख्यम्। रभसोऽपि—

[1]'मुख्यराट् क्षत्रियो नाभिः पुंसि प्राण्यङ्कके द्वयोः।
चक्रमध्ये प्रधाने [2]च स्त्रियां कस्तूरिकामदे॥'

इति। 'समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः' इति भारविकाव्ये पुंलिङ्गप्रयोगः[3] (किरा. ८. २४)॥ सुरभिर्गवि च स्त्रियाम्। गवि कामधेन्वामित्यर्थः। 'सुतां तदीयां सुरभेः' इति रघुवंशे (२. ८२)। गोमात्रे इति केचित्। सुष्ठु रभत इति सुरभिः[4]। 'रभ राभस्ये'। राभस्यं कार्योपक्रम इति धातुवृत्तौ[5]। शेषे—

'सुरभिर्ना जातिफले वसन्ते चम्पकद्रुमे।
शल्लक्यां स्त्री मातृभेदे मनोज्ञे तु विशेष्यवत्॥'

इति। 'सुरभिर्घ्राणतर्पणः' इति गतम् (१, पृ. ६८)॥ सभा संसदि सभ्येषु। सह भान्त्यत्रेति व्युत्पत्त्या सभा[6] संसत् ब्राह्मणसमावेशनमित्यर्थः। तद्वर्तित्वाद् उपचारेण सामाजिकेष्वपि सभाशब्दः। एकस्मिन्नेव पुरुषे सभाशब्दो न प्रवर्तत इति ज्ञापयितुं [7]सभ्येष्विति बहुवचनमुपात्तम्। शेषे—'सभा दुरोदरेऽपि स्यात् समूहे भाविते त्रिषु' इति। भया कान्त्या नक्षत्रैर्वा युक्ते वाच्यलिङ्गः। त्रिष्वध्यक्षेऽपि वल्लभः। अध्यक्षोऽत्र [8]गोष्ठाध्यक्ष एवेति सुबोधिनीकारः। 'वल्ल प्रीतौ [9]संचरणे च'। वल्लत इति वल्लभः। वल्लतिः सौत्रो धातुः। 'रासिवल्लिभ्यां च' इत्यभच् प्रत्ययः (उ. ३. १२५)। शेषे—'वल्लभस्तु प्रधानाश्वे कुलीनश्चापि वल्लभः' इति। यथा—'स्तोकेन नाक्रमत वल्लभपालमुच्चैः' (शिशु. ५. ५६)

इति, 'नीतो वल्लभपालकेन च निजामुच्चैःश्रवो मन्दुराम्' इति च माघकाव्ये। 'दयितं वल्लभं प्रियम्' इति प्रागुक्तम् (२, पृ. ७५) ॥ १३७ ॥

इति भान्तवर्गः

[1] सुराट्क्षत्रिययोः Tv. [2] अपि. Tv. [3] पुंलिङ्गतायां तु कविरेव प्रमाणम् इति मल्लिनाथः (पृ. १६१). [4] 'सर्वधातुभ्य इन्' (उ. ४. ११८) इति इन्प्रत्ययः. [5] राभस्यमुपक्रमः इति मु. ग्र. (पृ. २७२); B6 adds चात् वसन्ते. [6] 'भा दीप्तौ'। 'सुपि स्थः' इति कप्रत्ययः। 'अन्येभ्योऽपि—' (वा. ३. २. १०२) इति डो वा इति भा. दी. (पृ. ४८५). [7] सभ्ये च इति पाठः स्वामिभानुज्यादिग्रन्थेषु. [8] गोत्रा° B5, B6. [9] संवरणे Tv.

(पा.) क्षत्रियेऽपि—स्त्रियाम्। वसन्तादावपि स्यात्॥ सभा संसदि सभ्ये च।[1] 'स्त्रियां सामाजिके गोष्ठ्यां द्यूतमन्दिरयोः सभा' इति रभसः॥ त्रिष्वध्यक्षेऽपि वल्लभः। 'वल्लभो दयितेऽध्यक्षे कुलीनाश्वे च[2] वल्लभः' इति विश्वः (पृ. १०६, श्लो. २६)॥ अनुक्तम्—

दन्तेऽपि जम्भ ऋषभी नराकारस्त्रियामपि।
दुर्लभो दयितेऽपि स्याद् विभुः सर्वगतेऽपि च।
अवष्टम्भः सुवर्णेऽपि स्थानमात्रेऽपि भूरिति ॥ १३७ ॥

इति भान्तवर्गः

[1] B3, C1 add सभ्येऽपि स्त्रीलिङ्गः. [2] अपि A1.

अथ मान्तवर्गः—

किरणप्रग्रहौ रश्मी कपिभेकौ प्लवङ्गमौ।
इच्छामनोभवौ कामौ शौर्योद्योगौ पराक्रमौ ॥ १३८ ॥

(वि.) किरणप्रग्रहौ रश्मी कपौ भेके प्लवङ्गमः।

[1]अश्नुत इति रश्मिः। 'अशू व्याप्तौ'। प्लवैर्गच्छतीति प्लवङ्गमः॥

कामः स्पृहारेतसोः स्यान्निकामे मीनकेतने ॥ 288 ॥

[2]काम्यत इति कामः । 'कमु कान्तौ' ।।

पराक्रमः स्यादुद्योगे शक्तिविक्रमयोरपि ।

पराक्रमन्त्यनेनेति पराक्रमः 'क्रमु पादविक्षेपे' ।। १३८ ।।

[1] रश्यते 'रश कान्तौ' K_4, K_6; रशिः सौत्र इति स्वामी (पृ. ३०२). [2] कम्यते K_2, K_4.

(विव.) **किरणप्रग्रहौ रश्मी । [1]अश्वादिनियमनार्थो रज्जुविशेषः प्रग्रहः । अश्नुत इति रश्मिः । 'अशू व्याप्तौ' । 'अश्नोते रश् च' (उ. ४. ४६) इति मिप्रत्ययः, धातो रशादेशश्च ।। कपिभेकौ प्लवङ्गमौ । प्लवैर्गच्छतीति प्लवङ्गमः[2] । 'गमश्च' (३. २. ४७) इति खच् ।। इच्छामनोभवौ कामौ । शेषे—'रेतोनिकामयोः क्लीबं कामः काम्ये त्रिषु स्मृतः' इति । निकामं प्रकामम् ।। शौर्योद्योगौ [3]पराक्रमौ । सत्यपि भयकारणे भयराहित्यं शौर्यम् । स्वशक्त्यनुसारेण कर्तव्यार्थप्रारम्भ उद्योगः ।। १३८ ।।**

[1] °संयमनी रज्जुः B_6. [2] प्रवङ्गमोऽप्यत्रेति टी. स. (पृ. ११६). [3] पराक्रमणम् । अनेन वा । 'क्रमु पादविक्षेपे' । घञ् । 'नोदात्तोपदेशस्य—' इति न वृद्धिः इति भा. दी. (पृ. ४८५).

(पा.) किरणप्रग्रहौ रश्मी । प्रग्रह इति रज्जुः । 'पग्गमु' । कपिभेकौ प्लवङ्गमौ । प्लवगप्लवङ्गावपि [1]स्याताम् । 'प्लवङ्गमः कपौ भेके प्लवङ्गप्लवगावपि'[2] इति वैजयन्ती (पृ. २६७, श्लो. ३२) ।। इच्छामनोभवौ कामौ । इच्छाविषयोऽपि स्यात् । 'काम्यस्पृहास्मराः कामाः' इति वैजयन्ती (पृ. २१५, श्लो. १७) ।। शौर्योद्योगौ पराक्रमौ ।। १३८ ।।

[1] B_3, C_1 omit स्याताम्. [2] इव इति मु. ग्र.

धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः ।
उपायपूर्व आरम्भ उपधा चाप्युपक्रमः ।। १३९ ।।

(वि.) पुण्ये कृतान्ते न्याये च स्वभावोपमयोरपि ।। 289 ।।
[1]आचारे चाप्यहिंसायां चापोपनिषदोरपि ।

सोमपे चैव धर्मः स्याद् [2]धर्मं स्याद् धर्मसाधने ।। 290 ।।

[3]सोमपः क्रतुविशेषः। ध्रियत इति धर्मः। 'धृञ् धारणे' ।।

उपायपूर्व [4]आरम्भे प्रारम्भे विक्रमे तथा।
उपधायां चिकित्सायामागमे स्यादुपक्रमः ।। 291 ।।

उपक्रम्यत इत्युपक्रमः ।। १३९ ।।

[1] आचार्ये K6. [2] धर्मः K6. [3] सोमः क्रतुः J2. [4] प्रारम्भे K6.

(विव.) धर्माः—सोमपाः। पुण्यम् इष्टापूर्तजन्यः पुरुषगुणः। तत्र धर्मशब्दः पुंनपुंसकलिङ्गः प्रागुक्तः (१, पृ. ८६)। यमो धर्मराजः। तत्र नामैकदेश-न्यायेन धर्मशब्दः। न्यायो व्यवहारनिर्णयस्तर्कः। यथा—धर्माधिकरणं प्राप्त इति। स्वभावः पदार्थस्य सहजो धर्मः। यथा—वह्नेरुष्णत्वम्, जलस्य शैत्यमिति। आचारो देशकुलाद्याचारः। यथा—देशधर्मः, कुलधर्म इति। सोमपः सोमपीथी। यथा—धर्मोऽयं कुलभूषणमिति। ध्रियत इति धर्मः। 'धृञ् धारणे'। मन्प्रत्ययः[1] (उ. १. १४५)। शेषे—'अहिंसायां राजभेदे धर्मश्चापोपमानयोः' इति। राजभेदे—इक्ष्वाकुवंश्यो राजविशेषः। यथा—'प्राज्यं धर्मः पालयामास राज्यम्' इति। चापे यथा—'अयं रामो नैवं स हि जनकधर्मं दलितवान्' इति। उपमाने यथा—क्षत्रधर्मोऽयं ब्राह्मण इति। केचित्तु—सोमः पीयतेऽत्रेति व्युत्पत्त्या सोमप-शब्देन क्रतुरुच्यत इत्याहुः। तथा च विश्वप्रकाशिका—(पृ. १११, श्लो. १७)

'धर्मः पुण्ये यमे न्याये [2]स्वभावाचारयोः क्रतौ।
उपमायामहिंसायां [3]धार्मिके च निगद्यते।।'

इति। तथा हि—यो यागमनुतिष्ठति तं धार्मिकमाहुर्जनाः। सोमपः सोमपीथीति कथ्यत[4] इति।। उपाय—उपक्रमः। आरभ्यत इत्यारम्भः। आरभ्यमाणं कार्य-मित्यर्थः। उपायज्ञानपूर्वको य आरम्भः स पुंलिङ्गेनोपक्रमशब्देनोच्यते। यथा—ब्रह्मण उपक्रमो जगदिति। यत्र हि उपक्रमशब्दान्तः तत्पुरुषो भवति, तत्र तस्य नपुंसकत्वं वक्ष्यते[5]। मन्त्रिपुरोहितादीनां [6]परीक्षणमुपधेति क्षत्रियवर्गेऽभिहितम् (१, पृ. ४८६)। तत्राप्युपक्रमशब्दः। उपक्रम्यत इत्युपक्रमः। शेषे—'उपक्रमस्तु

प्रारम्भे चिकित्सायां च विक्रमे' इति। प्रारम्भे यथा—भोजनस्योपक्रमः। चिकित्सायां यथा—अनुपक्रमो रोगः। विक्रमे यथा—अहो कण्ठीरवस्योपरि जम्बुकस्योपक्रम इति॥ १३९॥

[1] 'अतिस्तुसुहुधृ ...' इति मन्. [2] स्वभावोदारयोः Gm1, Tj1. [3] कार्मुके Gm1, Tj1. [4] Tv adds अत्र क्रतुग्रहणमन्येषामन्नदानादीनामप्युपलक्षणम्. [5] 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम् (२. ४. २१). [6] धर्मादिभिः शुद्धि° Gm1.

(पा.) धर्माः—सोमपाः। उपायपूर्वं—उपक्रमः॥ १३९॥

वणिक्पथः पुरं वेदो निगमा नागरो वणिक्।
नैगमौ द्वौ बले रामो नीलचारुसिते त्रिषु॥ १४०॥

(वि.) वणिक्पथे पुरे वेदे वाणिज्ये निगमः स्मृतः।

नियतं गम्यतेऽनेनेति निगमः[1]॥

नैगमः स्यादुपनिषत्पौरयो[2]र्वणिजेऽपि च॥ 292॥

निगमे भवो नैगमः॥

वलभद्रे दाशरथौ जामदग्न्ये पशौ पुमान्।
नीलवर्णे मनोज्ञे च सिते रामस्त्रिषु स्मृतः॥ 293॥
अङ्गनाहिङ्गुलिन्योः स्त्री रामं वास्तुककुष्ठयोः।

[3]रमन्तेऽस्मिन्निति रामः। 'रमु क्रीडायाम्'॥ १४०॥

[1] K2, K4 add 'गम्लृ गतौ'. [2] नापिते विशि K4. [3] रमयतीति रामः J2, K2, K4.

(विव.) वणिक्पथः—निगमः। वणिक्पथो वाणिज्यम्। हट्टमार्गो वा। पुरं नगरम्। वेद आम्नायः। नियतं गम्यतेऽत्रेप्सितार्थोऽनेनेति[1] वा निगमः। नियतं गच्छत्यत्रेति वा निगमः। 'गोचरसंचरवहव्रजव्यजापणनिगमाश्च' (३. ३. ११९) इत्यधिकरणे[2] घवन्तो निपातितः। नागरो—नैगमौ द्वौ। [3]निगम-

शब्दस्य नगरं वणिक्पथश्च इत्यर्थद्वयं प्रागुक्तम् (१, पृ. १६५, पूर्वार्धे च)। तदुभय-संबन्धाद् नैगमशब्दस्य नगरसंबन्धी वणिक् चेत्यर्थद्वयमपि। अत्र सुबोधिनीकारः—'नैगमशब्दः [4]केवलयोगमात्रप्रवृत्तो न भवति। किंतु नागरे वणिक्पथे च रूढः'। 'रूढिर्योगमपहरति' इति न्यायाद् ब्राह्मणस्याम्नायरूपनिगमसंबन्धे सत्यपि नैगम-शब्दाभिधेयत्वनिवृत्त्यर्थं द्वावित्युक्तम्' इति। स्वामी चाह (पृ. ३०३)—'ब्राह्मणस्य नैगमत्वनिषेधार्थं द्वावित्युक्तम्'[5] इति। विज्ञानेश्वरस्तु—[6]'श्रेणिनैगमपाषण्डिगणा-नामप्ययं विधिः' इति [7]याज्ञवल्क्यव्याख्यानावसरे, 'ये वेदस्याप्तप्रणीतत्वेन प्रामाण्यमिच्छन्ति पाशुपतादयस्ते नैगमाः' इति व्याचष्ट (या. स्मृ. २.१५.१९२)॥ बले रामो—त्रिषु। रमते क्रीडतीति रामः। [8]बलभद्र इत्यर्थः। 'रमु क्रीडायाम्'। 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०)। अत्र रूपभेदात् पुंलिङ्गः। रमन्तेऽस्मिन् इत्यधिकरणार्थे घञि रामः (३. ३. १२)। कृष्णवर्णे सुन्दरे धवलवर्णे चायं वाच्यलिङ्गः। तथाच—

'रामः पशुविशेषे [9]च जामदग्न्ये हलायुधे।
राघवे चासितश्वेतमनोज्ञेषु तु वाच्यवत्॥
रामाङ्गनाहिङ्गुलिन्यो रामं वास्तुककुष्ठयोः॥'

इति (वि. प्र. पृ. १११, श्लो. २१-२)। पशुविशेषे 'गन्धर्वः शरभो रामः' इति प्रागुक्तः (१, पृ. ३३४)। हिङ्गुलिनि 'दुर्लभो हिङ्गुली राष्ट्री नाकुली च महौषधिः' इति। द्रव्यवति कुष्ठं सारिभाख्यो गन्धद्रव्यविशेषः॥ १४०॥

[1] प्रेप्सितार्थः Gm1. [2] Gm1 adds करणे च. [3] निगमे भवः नैगमः। 'तत्र भवः' (४. ३. ५३) इत्यण्. [4] संयोग° B6. [5] 'द्वाविति ब्राह्मणस्य नैगमत्वे निषेधः' इति मु. ग्र. [6] पाखण्डि° इति मु. ग्र. [7] याज्ञवल्क्यवचन° Gm1. [8] बलरामः Gm1. [9] स्यात् B5, Gm1.

(पा.) वणिक्पथः—नैगमौ द्वौ। [1]द्वाविति नियमोऽनर्थकः। 'नैगमः स्यादुपनिषद्वणिजोर्नागरेऽपि[2] च' इति विश्वः (पृ. ११३, श्लो. ५२)॥ बले—त्रिषु। बलो बलभद्रः। जैनमते दाशरथिश्च बलः स्यात्॥ १४०॥

[1] C1 omits the sentence. [2] नापितेऽपि च A1, B3.

शब्दादिपूर्वो वृन्देऽपि ग्रामः क्रान्तौ च विक्रमः ।
***स्तोमः स्तोत्रेऽध्वरे वृन्दे जिह्मस्तु कुटिलेऽलसे ।। १४१ ।।**

(वि.)　वृन्दे स्वरपदे ग्रामः शब्दादौ [1]परिकीर्त्यते ।। 294 ।।

[2]शब्दादिः स्वरः । गीर्यत इति ग्रामः । 'गॄ निगरणे' ।।

पादस्याक्रमणे [3]शक्तिसंपत्त्यां विक्रमः स्मृतः ।

विशेषेण क्रम्यतेऽनेनेति विक्रमः ।। १४१ ।।

* श्लोकार्धमिदं दाक्षिणात्यग्रन्थेषु न दृश्यते.　　[1] परिकथ्यते J2, K4.　　[2] K4 omits.　　[3] शक्तिसंपदोः J2.

(विव.)　शब्दादिपूर्वो वृन्देऽपि ग्रामः । अयमर्थः—शब्देन्द्रियगुणभूतादिपदपूर्वको ग्रामशब्दः समूहे वर्तते । यथा—शब्दग्रामः, इन्द्रियग्रामः, [1]गुणग्रामः, भूतग्रामः[1] इत्यादि । अस्मिन्नर्थे ग्रामशब्दस्य[2] उत्तरपदनैयत्यविधानात्[3] शब्दादीनां समूहः शब्दग्रामः इत्यस्वपदरूपेण विग्रहः कार्यः । अपिशब्दात् 'समौ संवसथग्रामौ' (१, पृ. २०७) इति निरुपपद एव प्रागुक्तः । शेषे—'ग्रामः स्वरे संवसथे' इति । [4]ग्रामे स्वरे यथा—'सप्त स्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः' इति षड्जग्रामः, मध्यमग्रामः, गान्धारग्राम इति ग्रामास्त्रयसंगीतशास्त्रे प्रसिद्धाः ।। क्रान्तौ च विक्रमः । क्रान्तिः पादेनाक्रमणम् । विक्रामन्त्यनेनेति विक्रमः । 'क्रमु [5]पादविक्षेपे' । शेषे—'विक्रमः शक्तिसंपदि' इति । 'विक्रमस्त्वतिशक्तिता' इति प्रागुक्तः (१, पृ. ५४४) ।। १४१ ।।

[1] Gm1 omits the two words.　　[2] °पदस्य Gm3, Tv.　　[3] °पदत्वनियमात् Gm1.　　[4] निरुपपदशेषे स्वरे स्वराणां स्थाने इत्यर्थः Tj1, Tj2, Tv.　　[5] 'हलश्च' (३. ३. १२१) इति घञ्.

(पा.)　शब्दादि—ग्रामः । [1]ग्रामेऽपि स्यात् ।। क्रान्तौ च विक्रमः । शक्तावपि स्यात्[2] । [3]उष्णेऽपि घर्मः । 'निदाघ ऊष्मणि ग्रीष्मे स्वेदे [4]घर्मस्तु तेषु च । आतपे च दिने चाथ' इति वैजयन्ती (पृ. २६६, श्लो. ५७) ।। चेष्टालंकारे भ्रान्तौ च विभ्रमः । चेष्टालंकारो वचनविभूषणविपर्यासः । भ्रान्ति-

ज्ञानविशेषः। शोभायामपि स्यात्। 'शोभार्थेऽपि प्रयुज्यन्ते [5]लक्ष्मीश्रीकान्तिविभ्रमाः' इति हलायुधः (अ. मा. ५. २७)। शोभा नाम वस्त्रभूषणादिप्रयुक्तविशेषः॥ १४१॥

[1] B3, C1 omit the sentence. [2] B3 omits. [3] उण्णेऽपि—विभ्रमः इत्यधिकः पाठः पारिजाते, स्वामिग्रन्थे च. [4] घर्मस्रुतेषु A1, B3. [5] लक्ष्मीः A1, B3.

गुल्मा रुक्स्तम्बसेनाश्च जामिः स्वसृकुलस्त्रियोः।
क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु॥ १४२॥

(वि.) सेनाभेदे रोगभेदे [1]स्तम्बे च वलसज्जने॥ 295॥
दुर्गादिरक्षणस्थाने सैन्यरक्षणघट्टयोः।
विटपानां च संघाते गुल्मः पुंसि विवक्षितः॥ 296॥
आमलक्यां वस्त्रवेश्मवनिकैलासु[2] तु स्त्रियाम्।

[3]गुल्यत इति गुल्मः। 'गुड [4]रक्षणे'॥

जामिर्यज्ञीयमूलः स्याज्जानिः स्वसृकुलस्त्रियोः[5]॥ 297॥

जमति भक्षयतीति जामिः। 'जमु अदने'॥

क्षितिक्षान्त्योः क्षमा न्याय्ये क्षमं शक्ते हिते त्रिषु।

क्षम्यत इति क्षमा। 'क्षमूष् सहने'॥ १४२॥

[1] स्कन्धे K4, K6. [2] °व्रतत्यैलासु J2. [3] गुडचते, डलयोरभेदः K2. [4] रक्षायाम् K2, K3, K4. [5] °स्त्रियाम् K2, K3.

(विव.) गुल्मा रुक्स्तम्बसेनाश्च। गुडचते रोगवानस्मादिति गुल्मः जठररोगः। गुडचते रक्ष्यते पुरुषोऽनेनेति गुल्मः स्तम्बः, एकमूलस्तृणकाण्डसमूहः। 'गुड रक्षणे'। मक्प्रत्ययः। लडयोरभेदः। अत्र सेनाशब्देन क्षत्रवर्गोक्तात् सेनामुखात् (१, पृ. ५३०) त्रिगुणचतुरङ्गबलसमूहो विवक्षितः। शेषे—'गुल्मस्तु रक्षणस्थानं दुर्गादौ बलरक्षणम्' इति॥ जामिः स्वसृकुलस्त्रियोः। कुलस्त्री कुलपालिका। जमति भ्रातृभर्त्रादिदत्तमिति[1] जामिः। 'जमु [2]अदने'। शेषे—'स्याज्जाम्यव्य-

यमालस्ये' इति। यथा—'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ' इत्यादि। 'जिह्मस्तु कुटिले मन्दे जामिः स्वसृकुलस्त्रियोः' इति चवर्गतृतीयादिष्वजयः। रभसस्तु—'प्रहरे संयमे यामे यामिः स्वसृकुलस्त्रियोः' इति अन्तस्थयकारादावुक्तवान्॥ क्षितिक्षान्त्योः—त्रिषु। क्षितिः भूमिः। क्षान्तिः सहनम्। 'क्षमूष् सहने' 'षिद्भिदादिभ्योऽङ' (३. ३. १०४)। उभयत्र रूपभेदात् स्त्रीलिङ्गः। युक्ते न्याये, शक्ते समर्थे, हितेऽनुकूले; युक्ताद्यर्थत्रये तु वाच्यलिङ्गः। 'क्षमं शक्ते सहे युक्ते हिते च त्रिषु कीर्तितः' इति रत्नकोशे शक्ताद्यर्थचतुष्टये क्षमं क्षमः क्षमा इति लिङ्गत्रयरूपोच्चारणेन त्रिलिङ्गत्वाभिधानात्। अतश्च युक्तार्थे क्षममिति रूपभेदाद् नपुंसकत्वमिति व्याख्यानमुपेक्षणीयम्। सुभूतिचन्द्रस्तु 'युक्तार्थे क्षमम्' इति मकारान्तमव्ययमाह॥ १४२॥

[1] °भर्त्रादिभिर्दत्तम् Gm3, Tv. [2] बाहुलकादिण् दीर्घश्च। कर्मणि 'इञजादिभ्यः' (वा. ३. ३. १०८) इतीञ् वा—इति स्वामी इति भा. दी. (पृ. ४८६).

(पा.) गुल्मा रुक्स्तम्बसेनाश्च। [1]रुग् रोगः। स्तम्बोऽप्रकाण्डः शाखी। सेना सैन्यभेदः। जामिः स्वसृकुलस्त्रियोः। 'जिह्मस्तु कुटिले मन्दे जामिः स्वसृकुलस्त्रियोः' इति जकारादिषु [2]जयकोशः। प्रहारे संयमे यामो यामिः स्वसृकुलस्त्रियोः' इति यकारादिषु रभसः॥ क्षितिक्षान्त्योः—त्रिषु। युक्ते क्षममिति युक्तार्थे नपुंसकमव्ययं च स्यात्। युक्ते उचिते क्लीवमव्ययं च मान्तमिति सुभूतिटीका॥ १४२॥

[1] रुक्स्तम्बसेनाः रोगवनस्पतिसैन्यभेदाः A1. [2] चवर्गादावजयः इति भा. दी. (पृ. ४८६).

त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिबा निशा।
ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु॥ १४३॥

(वि.) हरिते कृष्णवर्णे च प्रयागवटवृक्षयोः॥ 298॥
वारिवाहे दारके च श्यामः पुंसि प्रकीर्तितः।
शारिवागुन्द्रयो रात्रावप्रसूतस्त्रियां तथा॥ 299॥
कृष्णाप्रियङ्ग्वोर्नील्यां च तथा सोमलतौषधौ।
[1]त्रिवृतायां सोमराज्यां श्यामा त्वष्टाब्दयोषिति॥ 300॥
[2]मरिचे लवणे श्यामम्॥

श्यायत इति श्यामः। [3]'श्यङ गतौ'॥

[4]ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु।
त्रिषु लिङ्गेषु रम्ये स्याद् मुख्यसामर्थ्यलक्ष्मसु॥ 301 ॥

ललतीति [5]ललामम्। 'लल विलासे'॥ १४३ ॥

[1] विवृत्तायाम् J2. [2] मरीचे K4. [3] 'शो तनूकरणे' K3, K4. [4] पुच्छे पुण्ड्रे हये भूषा पुरुषे शृङ्गकेषु च। ललामः त्रिषु रम्ये स्यात् J2. [5] ललाम J2, K4.

(विव.) त्रिषु श्यामौ—निशा। हरित् पलाशवर्णः। दूर्वादलश्याममिति कृष्णवर्णे। यथा—'स्निग्धाञ्जनश्यामतनूभिरुन्नतैः' इति माघः (शिशु. १२. ६२)। उभयत्र वाच्यलिङ्गः। गुणमात्रे धीवर्गे पुंलिङ्ग उक्तः (पृ. १००)। शारिवा गोपी[1]। निशा रात्रिः। उभयत्र रूपभेदात् स्त्रीलिङ्गः। शेषे—

'श्यामः प्रयागन्यग्रोधे घने वृद्धे च दारके।
अप्रसूताङ्गनायां स्त्री तथा सोमलतौषधौ॥
कृष्णाप्रियङ्ग्वोर्गुन्द्रायां गोपीत्रिवृतयोरपि।
श्यामं मरीचे [2]लवणे॥'

इति। गङ्गायमुनासंगमप्रदेशस्थो न्यग्रोधः प्रयागन्याग्रोधः। यथा—'सोऽयं वटः श्याम इति प्रतीतः' इति रघुवंशे (१३. ५३)। घनो मेघः। दारको बालकः। अप्रसूताङ्गना यौवनमध्यस्था। गुन्द्रा [3]गोवन्दनी। त्रिवृता त्रिपुटा। मरीचे च लवणविशेषे च रूपभेदान्नपुंसकम्॥ ललामं—केतुषु। पुच्छं गवादीनां लाङ्गूलम्। पुण्ड्रं गवाश्वादीनां शरीरवर्णाद् [4]वर्णान्तरगतं ललाटगतं चिह्नम्। अश्वः घोटकः। भूषा आभरणम्। प्रधानमेव प्राधान्यम्। अत्र रभसः—

'ललाम च ललामं च भूषावालधिवाजिषु।
चिह्नप्रभावपुण्ड्रेषु प्रधाने ध्वजशृङ्गयोः॥'

इति। यादवप्रकाशोऽपि—

'ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे।
श्रेष्ठे भूषापुच्छशृङ्गपुण्ड्रचिह्नहयेष्वपि[5]॥'

इति (वैज. पृ. २६२, श्लो. ७२-३)। अश्वस्य भूषा इति षष्ठीसमासाश्रयणेन सुबोधिनीकारव्याख्याने मूलं न पश्यामः। ललन्तीति ललाः विलासशीलाः, तानमति गच्छतीति ललाम्। पचाद्यचि [6]कनिन्प्रत्यये [7]ललाम। 'कन्याललाम कमनीयमजस्य लिप्सोः' इति नकारान्तस्य प्रधानरूपार्थे रघुवंशे प्रयोगः (५. ६४)। 'क्षणात् कपिलललामेन द्रावितं कौरवं बलम्' इति ध्वजार्थे द्रोणपर्वणि रात्रियुद्धे प्रयोगः ।। १४३ ।।

[1] श्यामलता इत्यर्थः.　[2] मरीचिलवणे Tv.　[3] गोस्तनी Gm1; गोवन्दिनीति वैजयन्ती (पृ. ५०, श्लो. ६६).　[4] वर्णान्तरकृतं B5, B6.　[5] °चिह्नाश्वलिङ्गिषु इति मु. ग्र.　[6] अन्प्रत्यये B6.　[7] Tj1, Tj2 add नान्तोऽपि.

(पा.)　त्रिषु श्यामौ—प्राधान्यकेतुषु। पुण्ड्रं भालाङ्कम्। प्राधान्यं प्रधानम्। केतुः चिह्नम्।

'ललाम च ललामं च भूषावालधिवाजिषु।
चिह्नप्रधानपुण्ड्रेषु प्रभावे [1]ध्वजशृङ्गयोः ।।'

[2]इति जयकोशः ।। १४३ ।।

[1] द्रुम° A1, B3.　[2] अजयः इति टी. स. (पृ. १२१).

सूक्ष्ममध्यात्ममप्यादौ प्रधाने प्रथमस्त्रिषु।
वामौ वल्गुप्रतीपौ द्वावधमौ न्यूनकुत्सितौ ।। १४४ ।।
जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्।

इति मान्तशब्दाः

(वि.)　[1]सूक्ष्मं त्वणौ कैतवे स्यादध्यात्माल्पकयोरपि।

सूच्यत इति सूक्ष्मम्। [2]'सूच पैशुन्ये' ।।

आदौ प्रधानके चैव प्रथमं परिकीर्तितम् ।। 302 ।।

प्रथतेऽस्मादिति प्रथमम्। 'प्रथ [3]प्रख्याने' ।।

प्रतीपे सुन्दरे सव्ये मेघे [4]रिक्थे हरे स्मरे ।
वामः स्यादङ्गनायां तु सृगाल्यां करभस्त्रियाम् ।। 303 ।।
रासभ्यां बडवायां च वामा [5]तु परिकीर्त्यते ।

वमतीति वामः । 'टुवमु उद्गिरणे' ।

अध्माने [6]कुत्सिते न्यूनेऽप्यधमोऽधःस्थितेऽपि च ।। 304 ।।

अधमत्वात् अधमः । न विद्यते धमो ध्मानमत्रेति वाधमः

जीर्णे च परिभुक्ते च पूतिपर्युषिते तथा ।
गतस्वाभाविकरसे यातयामं प्रकीर्तितम् ।। 305 ।।

अतिशयेन याम्यत इति यातयामम् । 'यम अपरिवेषणे' [7] ।। १४४ ।।

इति मान्तवर्गः[8]

[1] सूक्ष्मेऽप्यणौ J_2. [2] K_3, K_4 omit. [3] ख्यातौ K_4, K_6. [4] तीर्थे K_6. [5] वामेति J_2. [6] कुत्सितन्यासे K_5. [7] जुगुप्सायाम् K_4, K_6. [8] K_2 adds मान्तसंख्या २३.

(विव.) सूक्ष्ममध्यात्ममपि । अध्यात्ममिति विभक्त्यर्थेऽव्ययीभावः । परमात्मनि सूक्ष्मशब्दो नपुंसकलिङ्गो वर्तत इत्यर्थः । दुर्ज्ञानत्वेनाणुपरिमाणद्रव्यसादृश्यात् सूक्ष्मम्[1] । 'अणोरणीयान् महतो महीयान्' इति श्रुतेः (कठ. २. २०) । अपिशब्देन स्वल्पेऽपि सूक्ष्मशब्दो वाच्यलिङ्गः । [2]आद्ये प्रधाने प्रथमस्त्रिषु । आद्ये यथा—'अग्निष्टोमः [3]प्रथमो यज्ञः' इति । प्रधाने श्रेष्ठे यथा—दातृणां प्रथम इति । प्रथते तस्मादन्यदितरद् द्वितीयादिकं स्वगुणभूतं वेति प्रथमः । 'प्रथ [4]प्रख्याने' । प्रथमशब्दप्रभृतयो वक्ष्यमाणा मकारान्तास्त्रिषु वाच्यलिङ्गा इत्यर्थः । वामौ वल्गुप्रतीपौ द्वौ । वल्गुः मनोहरः । यथा—वामलोचना । प्रतीपः प्रतिकूलः । यथा—'विधौ वामारम्भे वहति विफलधियः पौरुषभराः' इति । वमति प्रकटयति स्वगुणमिति वामः । 'टुवमु उद्गिरणे' । 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०) इति णप्रत्यये 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (७. ३. ३४) 'अनाचमिकमिवमीनामिति वक्तव्यम्' इति वृद्धिः । शेषे—

'वामः सव्ये त्रिषु स्मृतः।
पुंसि कामे हरे क्लीबे द्रविणे स्त्री तु योषिति।
वामी सृगालीबडवारासभीकरभीषु च ॥'

इति। हरे यथा—'वामदेवो महादेवः' (१, पृ. २३)। द्रविणे यथा—[5]'वाममस्मभ्यं सा वीः, वामभाजः स्याम' इति। योषिन्मात्रे टाबन्तः प्रागुक्तः (१, पृ. ३६२)। सृगाल्यादिषु ङीबन्तः यथा—'अथोष्ट्रवामीशतवाहितार्थम्' (रघु. ५. ३२) इति॥ अधमौ न्यूनकुत्सितौ। न्यूनोऽसमग्रः। यथा—अधमपक्षः। कुत्सितः गर्हितः। यथा—ब्राह्मणाधमः, राजाधमः इति। ['अधोऽवसोर्लोपश्च' (सर. कण्ठा. ४. ३. १२०)] 'अवोऽधसोर्लोपश्च इति वक्तव्यम्' (वा. ४. ३. ८)। अधःशब्दाद् मप्रत्ययः सकारलोपश्च। शेषे—अधःस्थोऽप्यधमोऽध्माने' इति। अधोभागस्थितोऽप्यधमः। धमतीति धमः। 'पाघ्राध्माधेट्दृशः शः' (३. १. १३७)। ततोऽन्योऽधमः। अध्मानो ध्मानरहित इत्यर्थः॥ जीर्णं च—द्वयम्। उपभोगेन कालवशेन वा गतसारं जीर्णम्। यथा—यातयामानि माल्यानि इति। तथा—'वयमपि शिथिलाङ्गा यातयामं कलत्रम्' इति। दर्भाः कृष्णाजिनं मन्त्रः इत्यादि कर्मान्तरेषु विनियुक्तानामपि दर्भादीनामन्यत्रापि कर्मणि विनियोगोऽस्तीत्यर्थः। यागादौ विनियुक्तं परिभुक्तम्[6]। यथा—'यातयामान्यन्यानि हवींष्ययातयाममाज्यम्' इति यामशब्देन प्रहरवाचिना कालमात्रं लक्ष्यते। कर्मान्तरेषूपयुक्तस्याप्याज्यस्य पुरोडाशादिवद् यातयामत्वोपाधिकनिषेधो नास्तीत्यर्थः। अत्र परिभुक्तं भुक्तोज्झितमिति सर्वानन्दः (टी. स. पृ. १२१)। यातो यामः कालोऽस्येति यातयामम्[7] ॥ १४४ ॥

इति मान्तवर्गः[8]

[1] सूच्यते। 'सूच पैशुन्ये'। 'सूचेः स्मन्' (उ. ४. १७७) इति भा. दी. (पृ. ४८६).
[2] आद्ये इति विवरणसंमतः पाठः. [3] प्रथमयज्ञः B5, B6. [4] 'प्रथेरमच्' (उ. ५. ६८).
[5] 'वाममस्मभ्यं धातु शर्म तुभ्यम्' इति ऋग्वेदे (१०. ५६. २). [6] Tv adds च.
[7] यातयामं गतरसमिति गीतायाम् (१७. १०). [8] Tv adds मान्तशब्दसंख्या २३.

(पा.) सूक्ष्ममध्यात्ममपि। 'सूक्ष्मं स्यात् कैतवेऽध्यात्मेऽप्यणौ सूक्ष्मोऽल्पकेऽन्यवत्' इति विश्वः (पृ. १११, श्लो. १९)॥ [1]आदौ प्रधाने—

प्रतीपौ द्वौ। द्वाविति नियमेन सव्याद्यर्थे त्रिष्वित्यधिकृतलिङ्गं न भवति ।। अधमौ —यातयाममिदं द्वयम्। परिभुक्तमिति [2]भुक्तोज्झितम्। 'परिभुक्तोज्झिते जीर्णे यातयामं त्रिलिङ्गकम्' इति रभसः। अनुक्तम्—

दण्डयामस्तु दिवसे कृतान्ते कुम्भसंभवे।
तलिमं बद्धभूमौ स्यात् तल्पे चैव वितानके ।।
कच्छपे जलगुल्मः स्यादावर्ते सलिलस्य च।
ध्यामश्च ध्यामलश्च द्वौ श्यामले च मलीमसे ।।
तोक्मं कर्णमले क्लीबं हरिते स्यात् त्रिलिङ्गकम्।
विद्रुमः पल्लवेऽपि स्याद् हिमं स्याच्चन्दनेऽपि च।
गर्दभ्यामपि वामी स्यात् [3]सौम्येऽप्यनुपमो भवेत्।
नियमो यन्त्रणाश्लिष्टनिश्चयप्रभृतिष्वपि।
पञ्चमौ भेकहृद्यौ च [4]संभ्रमौ विभ्रमावपि ।। १४४ ।।

इति मान्तवर्गः

[1] आद्ये A1, C1. [2] परिभुक्तोज्झितम् A1. [3] साम्येऽपि A1. [4] संभ्रमो विभ्रमेऽपि च C1.

अथ यान्तवर्गः—

तुरंगगरुडौ तार्क्ष्यौ निलयापचयौ क्षयौ ।। १४५ ।।
श्वशुर्यौ देवरश्यालौ भ्रातृव्यौ भ्रातृजद्विषौ ।
पर्जन्यौ रसदब्देन्द्रौ स्यादर्यः स्वामिवैश्ययोः ।। १४६ ।।

(वि.) तार्क्ष्योऽश्वकर्णे गरुडे रथवाहे रसाञ्जने।

[1]तरन्ति येनेति तार्क्ष्यः। [2]गरुडपक्षे [3]तृक्षस्यापत्यं पुमान् तार्क्ष्यः ।।

क्षयो गृहे गतौ हानौ हिंसाकल्पान्तयक्ष्मसु ।। 306 ।।

क्षीयत इति क्षयः। 'क्षि क्षये'। 'क्षि निवासगत्योः'[4] ।।

दम्पत्योर्देवरे स्याले श्वशुर्यः परिकीर्तितः।

श्वशुरस्यापत्यं श्वशुर्यः ॥

भ्रातृव्यो भ्रातृपुत्रेऽपि व्यसनापन्नवैरिणोः ॥ 307 ॥

भ्रातुरपत्यं भ्रातृव्यः ॥

पर्जन्यो मेघशब्दे च गर्जन्मेघे दिवस्पतौ ।

पिपर्ति [5]जनमिति पर्जन्यः । 'पॄ पालनपूरणयोः' ।

चक्रसंवन्धिशीघ्रे च पत्यौ वैश्यप्रवीणयोः ॥ 308 ॥

अर्यो योग्येऽपि च भवेत् ॥

अरणीयस्त्वादभिगम्यत्वाद् अर्यः । 'ऋ गतौ' ॥ १४५-६ ॥

[1] तरति J2. [2] गरुडस्य K4. [3] तर्क्षस्य K4. [4] K3, K4 add 'क्षिणु हिंसायाम्' and 'क्षै क्षये'. [5] K2, K4 omit जनम्.

(विव.) तुरंगगरुडौ तार्क्ष्यौ । तृक्षस्यापत्यं पुमान् तार्क्ष्यः गरुडः । वेगेन तार्क्ष्यसादृश्याद् अश्वोऽपि तार्क्ष्यः । शेषे—'तार्क्ष्योऽनूरावश्वकर्णे रथे [1]नप्तु रसाञ्जने' इति । अनूरुः सूर्यसारथिः । अश्वकर्णो वृक्षविशेषः । रथे च पुंलिङ्गः । तथा च—[2]'आरुह्य तार्क्ष्यं नभसीव भूतले' इति माघकाव्ये रथे प्रयोगः (शिशु. १२. २) । रसाञ्जने तु नप् नपुंसकलिङ्ग इत्यर्थः ॥ निलयापचयौ क्षयौ । निलयो गृहम् । अपचयो हानिः[3] । 'क्षि निवासगत्योः' । 'क्षि क्षये' । आभ्यां धातुभ्यां क्रमेणाधिकरणे भावे च एरच् (३. ३. ५६) । शेषे—'क्षयो गतौ च हिंसायाम्' इति । यक्ष्मरोगे कल्पान्ते च प्रागुक्तः (१, पृ. ३९२, ८६) ॥ श्वशुर्यौ देवरस्यालौ । पत्युर्भ्राता पत्न्या श्वशुर्य इति व्यवहर्तव्यः, भार्याया भ्राता भर्तुश्च श्वशुर्य इति व्यवहर्तव्य इत्यर्थः । श्वशुरस्यापत्यं श्वशुर्यः । 'राजश्वशुराद्यत्' (४. १. १३७) इति यत्प्रत्ययः ॥ भ्रातृव्यौ भ्रातृजद्विषौ । भ्रातुरपत्यमिति विग्रहे 'भ्रातुर्व्यच्च' (४. १. १४४) इति व्यत्प्रत्यये भ्रातृव्यः । 'व्यन् सपत्ने' (४. १. १४५) इति सूत्रेण भ्रातृशब्दात् प्रकृतिप्रत्ययसमुदायानपेक्षया शत्रावभिधेये व्यन्प्रत्यये भ्रातृव्यः । अत्र कश्चिदाह—भ्रातृपुत्रः कदाचिद् दायहरत्वेन[4] पितृव्यमभिभवति ।

एवमभिभावकत्वसाधर्म्यात् शत्रुरपि भ्रातृव्य इत्युच्यते। रूढेरभिधातुल्यत्वाद् नानार्थत्वेनाभिधानमिति[5]। तदनुपपन्नम्। मुख्यलाक्षणिकयोः स्वरवैलक्षण्यानुपपत्तेः। [6]लक्षणसिद्धेऽर्थे सूत्रारम्भवैषम्याच्च ।। पर्जन्यौ रसदब्देन्द्रौ। रसदब्दो गर्जन्मेघः। सुबोधिनीकारस्तु--शरदब्देन्द्रौ इति पठित्वा शारदमेघस्य गर्जितप्रायत्वात् शरदब्दशब्देन गर्जन्मेघ उच्यते इत्याह। पर्जन्य इत्यौणादिकनिपातनसामर्थ्यात् 'पृषु सेचने'[7] इत्यस्माद् न्यप्रत्यये षकारस्य च तालव्यवर्गतृतीये जकारे च सति पर्जन्यशब्दः (उ. ३. १०३)। अजेर्वा अन्यप्रत्यये धातोः पुगागमश्च। क्वचिन्निःशब्देऽपि मेघे [8]गर्जनयोग्यत्वात् पर्जन्यशब्दः औपचारिकः ।। स्यादर्यः स्वामिवैश्ययोः। स्वामी प्रभुः। 'अर्यः स्वामिवैश्ययोः' (३. १. १०३) इति निपातनात् साधुः[9] ।। १४५–६ ।।

[1] ना न Tv. [2] Tv adds जवेन नागान् जितवन्तमुच्चकैः. [3] ह्रासः Gm3, Tv. [4] °साधकत्वेन Tj1, Tj2. [5] Tv adds केचित्, तदपि. [6] लक्षणाश्रयणे B6. [7] 'पृषु सेचनहिंसाक्लेशनेषु' Tj2. [8] मेघे पर्जन्यशब्दप्रयोगः Tv. [9] अर्यते। 'ऋ गतौ'। 'अर्यः स्वामिवैश्ययोः' इति साधुः इति भा. दी. (पृ. ४८७).

(पा.) तुरंगगरुडौ—रसदब्देन्द्रौ। [1]अब्दरसनं च स्यात्। 'पर्जन्यो मेघशब्देऽपि[2] ध्वनदम्बुदशक्रयोः' इति विश्वः (पृ. १२१, श्लो. ८३) ।। स्यादर्यः स्वामिवैश्ययोः ।। १४५–६ ।।

[1] अम्बुद° A1, C1. [2] स्यादिति मुद्रितग्रन्थे.

तिष्यः पुष्ये कलियुगे पर्यायोऽवसरे क्रमे ।
प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ।। १४७ ।।
रन्ध्रे शब्देऽथानुशयो दीर्घद्वेषानुतापयोः ।

(वि.) तिष्यस्तु स्यात् कलौ युगे ।
आमलक्यां[1] भवेत् तिष्या पुमान् पुष्याख्यतारके ।। 309 ।।

[2]त्विषतीति तिष्यः। 'त्विष दीप्तौ' ।।

पर्यायः स्याच्च निर्याणे प्रकारेऽवसरे क्रमे ।

पर्ययण पर्यायः । [3]'अय गतौ' ।।

प्रत्ययः [4]प्रथितत्वेऽपि हेतुविश्वासयोरपि ।। 310 ।।
[5]आचाररन्ध्रशपथज्ञानसन्नादिनिघ्नयोः ।

प्रत्येतीति प्रत्ययः । 'इण् गतौ' ।।

अनुतापेऽप्यनुशयो दीर्घद्वेषेऽपि कथ्यते ।। 311 ।।

अनुशेतेऽनेनेत्यनुशयः । 'शीङ् स्वप्ने' ।। १४७ ।।

[1] धाव्यां चापि J2.　[2] त्विषते K3, K4.　[3] 'इण् गतौ' K3.　[4] प्रथिते शब्दे J2.　[5] आचार्ये J2.

(विव.) तिष्यः पुष्ये कलियुगे। पुष्यः नक्षत्रविशेषः। कृतादिषु चतुर्थं कलियुगम्। त्वेषते तिष्यः। 'त्विष[1] दीप्तौ'। [2]निपातनात् साधुः (उ.४.११३[3])। शेषे—'तिष्या त्वामलकी स्त्रियाम्' इति ।। पर्यायोऽवसरे क्रमे। विचिकीर्षितार्थकरणाय समुचितः कालोऽवसरः। बह्वीनां क्रियाणां भिन्नकालतानियमः क्रमः। 'इण् गतौ' इत्यस्मात् 'परावनुपात्यय इणः' (३. ३. ३८) इति घञि पर्यायः। शेषे—'निर्वाणे च प्रकारे च पर्यायः' इति। यथा—अयमपि तत्पर्यायः। तत्प्रकार इत्यर्थः ।। प्रत्ययो—शब्दे। अधीन आयत्तः। यथा—राजप्रत्ययाः प्रकृतयः। शपथे यथा—'गूढद्रव्याभिशङ्कायां प्रत्ययस्तत्र कीर्तितः' इति स्मृतिः। ज्ञाने यथा—प्रत्यक्षः प्रत्ययः इति। विश्वासे यथा—'मूढः परप्रत्ययनेयबुद्धिः' इति (मालविका. १. २)। हेतौ यथा—'अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः' इति कालिदासः (कु. सं. ३. १८)। परकीयापराधस्थानं रन्ध्रम्। यथा—'पापाद्विरतोऽपि शठः प्रत्ययमासाद्य विकुरुतेऽवश्यम्' इति। शब्दोऽत्र कृत्तद्धितादिरूपः पदैकदेशो विवक्षितः। 'इण् गतौ' इत्यस्माद् अधीनार्थे पचाद्यच् (३. १. १३४)। अन्यत्र भावे करणे च एरच् (३. ३. ५६)। शेषे—'प्रत्ययः पुनराचारे प्रथने' इति। आचारे यथा—'श्रुतिस्मृत्यविरुद्धानां प्रत्ययानां प्रमाणता' इति। प्रथनं प्रसिद्धत्वम्। यथा—'प्रतीते प्रथितः' इति प्रागुक्तम् (२, पृ. १३) अथ—अनुतापयोः। दीर्घद्वेषः चिरवैरम्। यथा—[4]'ततः सपत्नापनयस्मरणानुशयस्फुरा' इति माघः (शिशु. २. १४)। कृतस्य [5]दानभोगादेः

पश्चादनुशोचनमनुतापः । यथा—'दत्तमिष्टमपि नान्वशेत सः' इति माघकाव्ये (शिशु. १४. ४५) । अनुशेते सुप्त इतीव मूढो भवत्यत्र पुरुष इत्यनुशयः ।। १४७ ।।

[1] त्विषी Tv. [2] Tj1, Tj2 add औणादिक°. [3] 'अघ्नचादयश्च'.
[4] अनुशयस्मरणस्फुरिताधरः Gm3, Tv. [5] यागादेः Gm1, Tv.

(पा.) तिष्यः—क्रमे । [1]प्रकारेऽपि स्यात् । 'पर्ययिः स्यात् प्रकारेऽपि' इति त्रिकाण्डशेषः (पृ. ३२, श्लो. ८६६) ।। प्रत्ययो—शब्दे । अधीने—तृष्णा-प्रत्ययोऽम्बुपानम् । शपथे—विवादे प्रत्ययाच्छुद्धिः । ज्ञाने—प्रत्यक्षः प्रत्ययः । हेतौ—बीजप्रत्ययोऽङ्कुरः । रन्ध्रे—प्रत्ययमासाद्य विकुरुते हि खलः । शब्दे—शब्देन प्रधानसनाद्योरेव[2] ग्रहणम् । 'प्रत्ययः प्रथितत्वे स्यात् सनादिज्ञानयोरपि' इति रभसः । प्रथायाम्—अहो अमरसिंहस्य प्रत्ययः ।। अथ—अनुतापयोः[3] ।। १४७ ।।

[1] B3 omits the sentence. [2] B3, C1 add सनादौ सन्प्रत्ययः कृत्प्रत्ययः इत्यादि. [3] C1 adds 'भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः' इति विश्वः.

स्थूलोच्चयस्त्वसाकल्ये गजानां मध्यमे गते ।। १४८ ।।
समयाः शपथाचारकालसिद्धान्तसंविदः ।
व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः ।। १४९ ।।

(वि.) स्थूलोच्चयो गण्डशैलन्यूनयोः करिणीगतौ ।

स्थूलश्चासावुच्चयश्च स्थूलोच्चयः ।।

सिद्धान्तशपथाचारकालेष्ववसरेऽपि च ।। 312 ।।

प्रतिज्ञायां च संकेते नियमे समयो भवेत् ।

समेत्यत्रेति समयः[1] ।।

अनयोऽशुभदैवे[2] स्यादापदि [3]व्यसनेऽपि च ।। 313 ।।

विरुद्धो नयोऽनयः । अयादन्यो [4]वा । न विद्यतेऽयो [5]गतिरत्रेत्यनयः[6] ।। १४८–९ ।।

[1] K2, K3 add 'इण् गतौ'. [2] °देवे K3, K6. [3] व्यसनेषु J2, K2.
[4] K2 adds अनयः. [5] अत्रेति वा J2. [6] K2 adds 'णीञ् प्रापणे'.

(विव.) स्थूलोच्चय—[1]नागानां मध्यमे गते। स्थूलानामेव कणिशादीनामुच्चयनम्। न तु सूक्ष्माणामिति स्थितौ सत्यां[2] स्थूलोच्चयकृत इति शब्दप्रयोगे सति वक्तुरसाकल्यप्रतिपादनमात्रे तात्पर्यात् श्रोतुरपि तथैव प्रतिपत्तेः स्थूलोच्चयशब्दस्य साकल्याभाव एवार्थः। यथा—स्थूलोच्चयेन ब्राह्मणा आहूताः। केषांचित् प्रसिद्धानां नाम गृहीत्वा आहूताः, न सर्वे इत्यर्थः[3]। स्थूलं मुखमुच्चीयते उन्नम्यतेऽत्रेति स्थूलोच्चयशब्देन गजानामनतिशीघ्रमनतिमन्दं मध्यमगतम्। यथाह पालकाप्यः—'नीचैर्गतिः स्थूलोच्चयो वीथिमार्ग इति गजानां तिस्रो गतयः' इति। शेषे—'स्थूलोच्चयो गण्डोपलो मतः' इति। गण्डोपलो गण्डशैलः॥ समयाः—संविदः। शपथे यथा—कृतसमयः। आचारे यथा—देशसमयः, कालसमयः इति। काले यथा—संध्यासमयः। सिद्धान्ते यथा—बौद्धसमयः। संवित् प्रतिज्ञा यथा—'निस्तीर्णसमयो भीमसेनः' इति। संयन्ति संगच्छन्ते जना अनेन अत्रेति वा समयः। 'इण् गतौ'। करणेऽधिकरणे च यथायोगम् एरच्प्रत्ययः (३. ३. ५६)। शेषे—'संकेते समयः प्रोक्तो नियमेऽवसरेऽपि च' इति। संकेते यथा—अन्योन्यं समयं चक्रुरिति। नियमे यथा—'अस्मिन्नग्रहारे सर्वैरपि वेदद्वयमध्येतव्यमिति समयः'। अवसरे यथा—संप्रति गन्तुमसमयः इति॥ व्यसनानि—अनयास्त्रयः। [4]नयो नीतिशास्त्रम्। तत्र तेषां निरोधाद् नीतिशास्त्रविरुद्धत्वेन मृगयाक्षादीनि व्यसनान्यनयशब्देनोच्यन्ते। अयः शुभावहो विधिः (१, पृ. ८८), तमारूढत्वाद् दुःखहेतुः पुराकृतकर्मरूपमशुभं दैवमनय उच्यते। विपद् दुःखं तदपि कार्यकारणयोरभेदोपचाराद् अनय इत्युक्तम्॥ १४८–९॥

[1] नागानामिति विवरणसंमतः पाठः. [2] Gm3 adds आनुकूल्योपादानं प्रतीयते. [3] B6 adds स्थूलोच्चयेन ग्रन्थार्थ उक्त इति। आपततः प्रतीतार्थो व्याख्यात इत्यर्थः. [4] अत्र व्यसनशब्देन संध्यादिषाड्गुण्यप्रयोगाद् भ्रंशो विवक्षितः। नयो नीतिः, तद्विरुद्धत्वादनय इत्युच्यते Gm3, Tv.

(पा.) स्थूलोच्चय—मध्यमे गते। [1]गण्डोपले तृणसंचयेऽपि। 'स्थूलोच्चयस्त्वसाकल्ये गण्डोपलकरण्डयोः' इति विश्वः[2] (पृ. १२४, श्लो. ११६)॥ समयाः—संविदः। संवित् क्रियाकारः। 'समयस्तु क्रियाकारे संकेते चरिते सताम्' इति वैजयन्ती (पृ. २४५, श्लो. ८२)॥ व्यसनानि—त्रयः॥ १४८–९॥

[1] A1 omits the sentence. [2] C1 adds गजानां मध्यमगतौ स्थूलोच्चय उदाहृतः.

अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्यथापदि ।
युद्धायत्योः संपरायः पूज्यस्तु श्वशुरेऽपि च ।। १५० ।।

(वि.) अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डविनाशयोः ।

[1]अयस्यातिक्रमोऽत्ययः ।।

आयतौ युद्धविपदोः [2]संपरायः प्रकीर्तितः ।। 314 ।।

समन्तात् परायन्ति म्रियन्तेऽत्रेति [2]संपरायः । [3] 'अय गतौ' ।।

श्वशुरे मानयोग्ये च पूज्यस्तु परिकीर्तितः[4] ।

[5]पूजामर्हतीति पूज्यः । 'पूज पूजायाम्' ।। १५० ।।

[1] अयसः K2, K6. [2] सांपरायः K3, K4. [3] 'इण् गतौ' J2. [4] परिकीर्त्यते K2; परिकथ्यते K4. [5] पूजयितुमर्हः J2.

(विव.) अत्ययो—दण्डेऽपि । अतिक्रम्यायनं गमनम् अत्ययः । यथा—पर्वात्यये पाथिकृतिर्विधीयते[1] । कृच्छ्रे कष्टावस्थायां यथा—'प्राणात्यये तथा श्राद्धे [2]खादन् मांसं न दोषभाक्' इति (या. स्मृ. १. ८. १७६) । दोषे यथा—'महत्सु नात्ययं ब्रूयात्' इति । महापुरुषे दोषं न कीर्तयेदित्यर्थः । दण्डे यथा—वाक्पारुष्येऽत्ययः प्रोक्तः इति । शेषे—'विनाशेऽप्यत्ययः प्रोक्तः' इति[3] ।। अथापदि—संपरायः । आयतिरुत्तरकालः । सम्यक् समन्तात् परायन्ति क्रियन्तेऽत्र-जना इति संपरायः । 'इण् गतौ' । अच्प्रत्ययः[4] । ह्रस्वादिः । 'संपरायः स्मृतो युद्धे विपदुत्तरकालयोः' इत्यजयः । युद्धे यथा—'सांपरायिकं दुर्गं कुर्यात्' इति कौटिल्यः (अ. शा. २. २) । 'न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम्' इति आयतौ[5] (म. स्मृ. ११. ३०) ।। पूज्यस्तु श्वशुरेऽपि च । पत्युः पिता श्वशुरः । अपिशब्दाद् मान्योऽपि[6] ।। १५० ।।

[1] Tv adds पर्वकालमतिक्रम्येत्यर्थः. [2] Pāda-s II and III are omitted.

[3] Tj1, Tj2 add यथा—सपिण्डानां सवर्णानामत्यये दशरात्रकमिति.　[4] 'एरच्' (३. ३. ५६).　[5] B6 adds प्रयोगः.　[6] पूज्यः प्रतीक्ष्यः (२, पृ. ८).

(पा.) अत्ययो—सांपरायः[1]। आयतिरुत्तरकालः[2]। 'सांपरायः स्मृतो युद्धे व्यापदुत्तरकालयोः' इति जयकोशः। पूज्यस्तु श्वशुरेऽपि च। पूजार्होऽपि स्यात् ।। १५० ।।

[1] सांपराय इति पारिजाताभिमतः पाठः.　[2] आगामिकालः C1.

पश्चादवस्थायिबलं समवायश्च संनयौ ।
संघाते संनिवेशे च संस्त्यायः प्रणयास्त्वमी ।। १५१ ।।
विश्रम्भयाच्ञाप्रेमाणो विरोधेऽपि समुच्छ्रयः ।

(वि.) पश्चादवस्थायिबले समवाये च संनयः[1] ।। 315 ।।

सन्नमध्यवसन्नं यातीति संनयः। सतां नयः सन्नयः। [2]सन् अयोऽस्येति वा संनयः ।।

संभूते संनिवेशे च संस्त्यायो विस्तृतौ गृहे ।

संस्त्यायत इति संस्त्यायः। 'स्त्यै ष्टयै शब्दसंघातयोः'।

विस्रम्भे प्रेम्णि याच्ञायां प्रणयः प्रसरे चये ।। 316 ।।

चयः परिचयः। प्रकर्षेण नयः [3]नयनं प्रणयः ।।

समुल्लङ्घ्य स्थितावूर्ध्वश्रयणे[4]ऽप्युन्नतावपि ।
वैरिणामपि वैरे च समुच्छ्रय उदाहृतः ।। 317 ।।

[5]समुच्छ्रयणं समुच्छ्रयः। 'श्रिञ् सेवायाम्' ।। १५१ ।।

[1] K5, K6 add संनिवेशे समुन्नयः.　[2] K4 omits the sentence.　[3] K3, K5 omit नयनं.　[4] °श्रवणे J2.　[5] समुच्छ्रयत इति J2, K2.

(विव.) पश्चादवस्थायि—संनयौ। युद्धोद्युक्तं बलं स्वसमीपं नयतीति संनयः। 'पचाद्यच्' (३. १. १३४)। अस्य कर्तरि विहितत्वाद् [1]एरच्प्रत्ययेन बाधो नास्ति। युध्यमानबलस्यावष्टम्भकत्वेन तत्पश्चाद्भागावस्थितं बलमित्यर्थः।

समवायः समूहः। मेलनमिति केचित्। संश्चासौ नयश्च संनयः। सन्नं यातीति सन्नयः इत्यादीनामर्थानां क्लिष्टसमासगम्यानां प्रायेण वक्तुं शक्यत्वाद् न तेषां नानार्थकाण्डेऽभिधानमित्यवधेयम्॥ संघाते—संस्त्यायः। संघातः समूहः। 'संनिवेशो निकर्षणम्' इति प्रागुक्तम् (१, पृ. २०७)। संनिवेशोऽवयवसंस्थानमिति केचित्। सम्यक् स्त्यायन्ते संहता भवन्त्यत्रेति संस्त्यायः। 'स्त्यै शब्दसंघातयोः'। घञ्[2]॥ प्रणयाः—प्रेमाणः। विस्रम्भः परिचयः। यथा—'प्रेमार्द्राः प्रणयस्पृशः परिचयात्' इति भवभूतिः (मालती. ५. ७)। याच्ञा प्रार्थना। यथा—'तद्-भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम्' इति रघुवंशे (२. ५८)। यद्यपि 'प्रेमनीतं प्रकर्षं चेत् स एव प्रणयो मतः' इति [3]भारतीयवचनेन प्रेमप्रणययोरवस्थाभेदोऽस्ति, तथापि अवान्तरविशेषमनादृत्य[4] प्रेमप्रणयशब्दा-वेकार्थत्वेनोक्तावित्यवधेयम्[5]। प्रपूर्वस्य नयते[6]रजन्तस्योपसर्गवशाद् अनेकार्थत्वम्॥ विरोधेऽपि समुच्छ्रयः। 'उदि श्रयति...' इत्यादिना (३. ३. ४९) प्राप्तस्य घञि बाहुलकाद् अभावे सति एरचि (३. ३. ५६) समुच्छ्रयः। शेषे—'समुच्छ्रयः स्यादुन्नत्यामूर्ध्वाश्रयण एव च' इति॥ १५१॥

[1] संनीयते, एरच् वा इति भा. दी. (पृ. ४८७). [2] 'भावे' (३. ३. १८); 'आतो युक्चिण्कृतोः' (७. ३. ३३) इति [युगागमः] इति भा. दी. (पृ. ४८७). [3] भारतीयोक्तैर्यद्यपि Gm3, Tv. [4] Gm3, Tv add उपचारेण. [5] इति ज्ञेयम् Gm3, Tv. [6] एरजन्तस्य Gm3, Tv.

(पा.) पश्चादवस्थायि—संनयौ। समुन्नयावपि स्याताम्। 'समुन्नयः समवाये पृष्ठे स्थायिबलेऽपि च' इति जयकोशः॥ [1]संस्थाने संनिवेशे च संस्त्यायः[2]। गृहेऽपि स्यात्। 'संस्थाने संनिवेशे च संस्त्यायो वसतावपि' इति रभसः॥ प्रणया-स्त्वमी—प्रेमाणः। विस्रम्भः परिचयः। 'विस्रम्भः स्यात् परिचये [3]विश्वासविप्र-लम्भयोः' इति [4]जयकोशः। 'परिचयप्रार्थनयोः प्रणयः परिकीर्तितः' इत्यमरमाला॥ विरोधेऽपि समुच्छ्रयः। उन्नतावपि स्यात्॥ १५१॥

[1] संस्थाने इति पारिजाताभिमतः पाठः. [2] A1 adds संस्त्यायः 'संघरवळि', संनिवेशः 'इंटिलोतोंट'. [3] विश्वासे A1. [4] अजयः इति भा. दी. (पृ. ४८८).

विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ।। १५२ ।।
निर्यासेऽपि कषायोऽस्त्री सभायां च प्रतिश्रयः ।
प्रायो भूम्न्यन्तगमने मन्युर्दैन्ये क्रतौ क्रुधि ।। १५३ ।।

(वि.) विषयो देशशब्दादिभ[1]वेष्वन्यत्र गोचरे ।
प्रबन्धादौ जनपदे यज्ज्ञातं[2] यस्य[3] तत्र च ।। 318 ।।

गोचरो गवां चरणप्रदेशः । विसिनोति विशेषेण प्रीतिं बध्नातीति विषयः । 'षिञ् बन्धने' ।।

तुवरे सुरभौ रक्ते पीते रागे विलेपने ।
अङ्गरागे च निर्यासे कषायः परिकीर्त्यते[4] ।। 319 ।।

कषति [5]गलमिति कषायः । 'कष हिंसायाम्' ।।

प्रतिश्रयः सभायां स्यादास्पदाश्रययोरपि ।

प्रतिश्रयतेऽनेकैरिति प्रतिश्रयः । 'श्रिञ् सेवायाम्' ।।

प्रायो बहुत्वे मृत्यौ च तुल्यानशनयोरपि ।। 320 ।।

प्रैतीति प्रायः । 'इण् गतौ' ।।

दीनभावे [6]सप्ततन्तौ कोपे मन्युरुदाहृतः ।

मन्यत इति मन्युः । 'मन ज्ञाने'[7] ।। १५२–३ ।।

1 °भावेषु K_2, K_4. 2 ज्ञानं K_6. 3 यत्र J_2. 4 परिकीर्तितः K_3.
5 कण्ठं K_4; K_3 omits. 6 सप्ततन्तुर्यागः. 7 अवबोधने K_3, K_4.

(विव.) विषयो—शब्दादिकेष्वपि । यस्य देवदत्तादेर्विद्याविशेषो[1] ज्ञातोऽत्यन्तपरिशीलितः स तस्य देवदत्तादेर्विषय इत्यर्थः । यथा[2]—देवदत्तस्यानुवाको विषयः इति । अथवा येन ज्ञानसाधनेन सता योऽर्थो ज्ञायमानो भवति स तस्य विषयः । यथा[3]—वेदस्य यागादिर्विषयः । उपनिषदामद्वैतं विषयः इत्यादि । शब्दस्पर्शरूपरसगन्धास्तु पञ्चापि केवलस्यैव विषयशब्दस्यार्थः । यथा—

विषयाभिलाषः, विषयनिवृत्तिरित्यादि। 'देशविषयौ तूपवर्तनम्' इति प्रागुक्तम् (१, पृ. १८६)। विश्वप्रकाशेऽपि (पृ. १२०, श्लो. ६३)—

'विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च।
गोचरे च [4]प्रबन्धादेर्यस्य ज्ञातस्तु तत्र च॥'

इति॥ निर्यासेऽपि कषायोऽस्त्री। निर्यासः क्वाथः। यथा—धात्रीकषायः। त्रिफलाकषायः इति। केशवस्वामी (नाना. सं. २. पृ. ७६)—

[5]कषायस्तुवरे न स्त्री निर्यासे रञ्जकाश्मनि।
सुरभावपटौ रागे भावनायां च विप्लवे॥'

इति। तुवरो रसविशेषः। यथा—कषायरसो हरीतकीति। रञ्जकाश्मनि यथा—कषायवासा इति। सुरभौ यथा—'वकुलामोदकषायः प्रसरति मलयानिलः' इति। अपटौ यथा—कषायमानसः इति। रागे यथा—परिपक्वकषाय इति। भावनायां यथा—'अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना' इति कुमारसंभवे (४. ३४)। विप्लवे यथा—'सुदती जनिमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया' इति। रभसोऽपि—

'रसभेदेऽङ्गरागे च निर्यासे च विलेपने।
कषायोऽस्त्री त्रिलिङ्गस्तु सुरभौ रूषितेऽपि च॥'

इति॥ सभायां च प्रतिश्रयः। बहूनां मेलनार्थं निर्मिता शाला सभा। प्रतिश्रयते बहुभिः सेव्यत इति प्रतिश्रयः[6]। शेषे—'प्रतिश्रयस्त्वाश्रयणे प्रोक्तः साधारणास्पदे' इति। कालव्यतिरिक्तेऽपि स्थानमात्र इत्यर्थः॥ प्रायो भूम्न्यन्तगमने। भूम्नि बाहुल्ये यथा—प्रायेण धर्मशीलः। अन्तगमनं मरणसंकल्पः। यथा—'प्रायोपवेशनमतिर्नृपतिर्बभूव' इति (रघु. ८. ९४)। वैजयन्त्यामपि—'प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु' इति (पृ. २१७, श्लो. ३६)। अत्र वयःशब्देन यौवनं विवक्षितम्। तथा च राजाभिषेके—'प्रकाममेषा प्रचलैः प्रसन्नै प्रायःप्रवेशं प्रथयत्यपाङ्गैः' इति। तुल्ये यथा—मूर्खप्रायः प्रायपाठः इति। 'प्रायः स्याद् भोजनत्यागः' इति हलायुधः (अ. मा. ४. ७५)। 'इण् गतौ' इत्यस्योपसर्गवशाद् अनेकार्थत्वम्॥

मन्युर्दैन्ये क्रतौ क्रुधि । दीनस्य भावः कर्म वा दैन्यम् । क्रतुरश्वमेधादिः । क्रुत् क्रोधः । मन्यत इति मन्युः । 'मन ज्ञाने'[7] । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरमालायां पुंस्काण्डेऽभिहितम् ।। १५२–३ ।।

[1] शास्त्रादिः Gm3, Tv.　[2] Tj1, Tj2 add तथा च 'विषयो देशे' इति सूत्रे **काशिका** (१, पृ. ३१२) क्वचिदत्यन्तशीलिते ज्ञेये, देवदत्तस्य विषयोऽनुवाक इति.　[3] B6 adds मीमांसाशास्त्रस्य वेदार्थो विषयः; मनसः सुखं विषयः Gm1, Tv.　[4] प्रबन्धाद्ये इति मु. ग्र.　[5] मुद्रितग्रन्थे तु—कषायस्तुवराभिख्यरसे क्वाथरसे इत्यादि; कषति कण्ठम् । 'कष हिंसायाम्' । बाहुलकादायः । 'कष-आय-अर्धर्चादि' इति वाचस्पत्यम् (पृ. १८३८). [6] 'एरच्', घः (३. ३. ११८) वा इति भा. दी. (पृ. ४८८).　[7] 'यजिमनि...' (उ. ३. २०) इति युच् । 'मृगय्वादिः' (उ. १. ३६) इति भा. दी. (पृ. ४८८).

(पा.)　विषयो—शब्दादिकेष्वपि । [1]प्रथमोदाहरणम्—देवदत्तस्य विषयो व्याकरणम् । [1]द्वितीयोदाहरणम्—नेत्रस्य विषयो रूपम्[2] ।। निर्यासेऽपि कषायोऽस्त्री । [3]'निर्यासे [4]च कषायोऽथ सुरभौ लोहितेऽन्यवत्' इति विश्वः (पृ. १२०, श्लो. ७३) । निर्यास [5]औषधिरसः । सुरभिः सुगन्धिः, लोहितो वर्णः ।। सभायां च प्रतिश्रयः । सत्रशालायामपि स्यात्[6] । 'सत्रशाला प्रतिश्रयः' इति हलायुधः (अ. मा. २. १४२) ।। प्रायो भूम्न्यन्तगमने । अन्तगमनं मरणम् । 'प्रायो वयसि [7]बाहुल्ये तुल्यानशनमृत्युषु' इति वैजयन्ती (पृ. २१७, श्लो. ३६) ।। मन्युर्दैन्ये क्रतौ क्रुधि ।। १५२–३ ।।

[1] B3, C1 omit.　[2] B3 adds श्रोत्रस्य शब्दः.　[3] C1 adds कषायो रसभेदे स्यादङ्गरागे विलेपने.　[4] अपि इति मु. ग्र.　[5] औषध° A1.　[6] B3 omits. [7] बाहुले A1.

रहस्योपस्थयोर्गुह्यं सत्यं शपथतथ्ययोः ।
वीर्यं बले प्रभावे च द्रव्यं भव्ये गुणाश्रये ।। १५४ ।।

(वि.)　रहस्योपस्थयोर्गुह्यं गुह्यः कमठदम्भयोः ।। 321 ।।

गुह्यते संव्रियत[1] इति गुह्यम् । 'गुहू संवरणे ।।

सत्यं स्याच्छपथे [2]तथ्ये लोके साधौ तु वाच्यवत् ।

[3]सति साधु सत्यम् ।।

वीर्यं वले प्रभावे च शुक्ले तेजसि कर्मणि ।। 322 ।।

वीरस्य भावः [4]कर्म वा वीर्यम् ।।

[5]भव्ये गुणाश्रये द्युम्ने जतुद्रुमविकारयोः ।
भेषजे पित्तले द्रव्यं [6]विनये वसुधादिके ।। 323 ।।

द्रवणीयत्वाद् अभिगम्यत्वाद् द्रव्यम् । 'द्रु गतौ' ।। १५४ ।।

[1] K2, K4 omit. [2] पथ्ये J2. [3] K3, K6 add सज्जने. [4] K2 omits.
[5] द्रव्ये J2. [6] विलेपे K3; नियमे च सुधादिके J2.

(विव.) रहस्योपस्थयोर्गुह्यम् । रहस्यं गोपनीयम् । यथा—गुह्यभाषणम् इति । उपस्थो योन्यादिः । यथा—गुह्यशुद्धिरिति । गुह्यते संव्रियत इति गुह्यम् । 'गुहू संवरणे' । 'शंसिदुहिगुहिभ्यो वेति वक्तव्यम्' (वा. ३. १. १०९) इति क्यप् प्रत्ययः । शेषे—'गुह्यो ना कमठे दम्भे' इति । कमठः कूर्मः ।। सत्यं शपथतथ्ययोः । शास्त्रैकसमधिगम्यो विश्वासहेतुः शपथः, देवतास्पर्शनादिक्रियारूपः । यथा—सत्येन शुध्यत इति । तथ्ये यथा—सत्यवादी इति । सति सत्पुरुषे साधु सत्यम्[1] । शेषे—'सत्यस्तु सप्तमे लोके सत्सु साधुनि वाच्यवत्' इति ।। वीर्यं बले प्रभावे च । बलं शरीरशक्तिः । यथा—[2]वीर्यवान् पुरुषः । प्रभावो वस्तुसामर्थ्यम् । यथा—'रसवीर्यविपाकाः' इति । वीरस्य भावः कर्म वा वीर्यम् । 'वीरवीर्यौ च' (६. २. १२०) इति निर्देशात् साधुः[3] । रेतसि प्रागुक्तम् (१, पृ. ३९९) ।। द्रव्यं भव्ये गुणाश्रये । भव्यशब्देनाभिप्रेतानामर्थानां पात्रभूतो भाग्यसंपन्न[4] उच्यते । 'द्रव्यं च भव्ये' (५. ३. १०४) इति सूत्रेण द्रुशब्दादिवार्थे यत्प्रत्ययः । द्रुमसादृश्यं च फलप्रदत्वादित्यवधेयम् । यथा—'न शास्त्रमद्रव्येष्वर्थवत्' इति वामनसूत्रम् (काव्या. सू. १. २. ४) । यथा—'तत् तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः' इति भवभूतिः (उत्तर. २. १९) । गुणाश्रयत्वं च 'गुणात्यन्ताभावसमुदायानधिकरणभावत्वं च द्रव्यलक्षणम्' इति तार्किकाः । यथा—पृथिव्यादीनि [5]नव द्रव्याणीति । प्रयोजनापेक्षिभिः द्रवणीयत्वाद् द्रव्यम् । 'द्रु गतौ' । 'अचो यत्' (३. १. ९७) इति यत् वान्तादेशश्च । शेषे—'भव्ये द्रव्यं त्रिषु क्लीबं द्युम्ने जतुनि भेषजे'

इति। [6]अत्र द्रव्यशब्दस्य भव्यरूपार्थे प्रागुक्तवाच्यलिङ्गत्वं शेषकारेणोच्यते। अत एव 'द्रव्योऽयं माणवकः, द्रव्योऽयं राजपुत्रः' इति वृत्तावुदाहृतम् (काशिका २, पृ. ७३)। द्युम्नं धनमात्रम्। जतु लाक्षा। भेषजे यथा—द्रव्यं वैशेषिकम् इति। आरकूटेऽपि द्रव्यशब्दः॥ १५४॥

[1] 'तत्र साधुः' इति यत्प्रत्ययः. [2] कश्च वीर्यवान् [इति रामायणे] Gm_3, Tv. [3] वीर्यंतेऽनेन। 'वीर विक्रान्तौ'। 'अचो यत्'। वीरे साधुर्वा। 'तत्र साधुः' इति यत् इति भा. दी. (पृ. ४८८). [4] भाग्यवान् Gm_3, Tv. [5] पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणि Gm_3, Tv. [6] अत्र प्रागुक्त एव भव्यरूपार्थे Gm_3, Tv.

(पा.) रहस्य—प्रभावे च। बलशब्देन रेतःशक्तयोरेव ग्रहणम्। 'वलं रूपेऽस्थनि स्थौल्ये शक्तिरेतश्चमूषु च' इति वैजयन्ती (पृ. २३४, श्लो. ५४)॥ द्रव्यं भव्ये गुणाश्रये। भव्योऽभिप्रेतानां पात्रम्। गुणाश्रयः पृथिव्यादिरिति सुभूतिटीका॥ १५४॥

धिष्ण्यं स्थाने गृहे भेऽग्नौ भाग्यं कर्म शुभाशुभम्।
कशेरुहेम्नोर्गाङ्गेयं विशल्या दन्तिकापि च॥ १५५॥

(वि.) धिष्ण्यं स्थाने गृहे शक्तौ नक्षत्रे ज्वलने पुमान्।

[1]धृष्णोत्यत्रेति धिष्ण्यम्। 'ञिधृषा प्रागल्भ्ये'॥

शुभाशुभक्रियायां च भाग्यशब्दो विवक्षितः॥ 324॥

भज्यते सेव्यत इति भाग्यम्[2]। 'भज सेवायाम्'॥

कशेरुहेममुक्तासु गाङ्गेयः[3] स्कन्दभीष्मयोः।

गङ्गायां भवं गाङ्गेयम्॥

लाङ्गल्यां च गुडूच्यां च दन्तिकागतशल्ययोः॥ 325॥
[4]महौषधौ त्रिभण्ड्यां च विशल्या परिकथ्यते।

विगतं शल्यं यस्याः सा विशल्या[5]॥ १५५॥

[1] धिष्यत इति J2. [2] भागः अत्रेति K4; भग एव J2. [3] गाङ्गेयम् J2, K4.
[4] महौषधे K5. [5] विगतशल्यत्वात् K5, K6.

(विव.) धिष्ण्यं स्थानं गृहे भेऽग्नौ । अत्र स्थानाद्यर्थविशेषेण लिङ्ग-वैलक्षण्यस्य विद्यमानत्वेऽपि धिष्ण्यश्च धिष्ण्यं चेति भिन्नलिङ्गयोर्द्वन्द्वैकशेषे सति नपुंसकस्यैव परिशेषाभिप्रायेण धिष्ण्यमिति नपुंसकनिर्देशः कृतः इति व्याख्येयम् । तच्च लिङ्गवैलक्षण्यं शेषकारेण व्यक्तीकृतम्[1] । यथा—'स्थानाग्न्योः पुंसि धिष्ण्यः स्याद् धिष्ण्यं शक्तौ' इति । अत्र स्थानशब्देन सौमिकवेद्यामाग्नीध्रीयहोत्रिय-मार्जालीयाख्यान्यायतनानि विवक्षितानि । यथा—'चात्वालाद्धिष्णियानुपवपति' (तै. सं. ६. ३. १. १) 'अष्टावष्टावन्येषु धिष्णियेषूपदधाति' (तै. सं. ५. ४. ११. ४) इति । अग्निशब्देनापि प्रागुक्तस्थानेष्वेव स्थापनीयोऽग्निर्विवक्षितः । यथा—'यदाग्नीध्राद् धिष्णियान् विहरति' (तै. सं. ६. ३. १. १) । ततश्च यथा सभाशब्दः स्थानविशेषे तत्रस्थजनसमाजे च वर्तते इति न मुख्यलाक्षणिकत्व-चिन्तावकाशः, तथा धिष्ण्यशब्दोऽपि उभयत्रापि वर्तत इति नानार्थत्वेनाभिधान-मित्यवधातव्यम् । गृहनक्षत्रयोः शक्तरूपार्थे च धिष्ण्यशब्दो नपुंसकलिङ्गः । धीयत इति धिष्ण्यम् । [2]उणादौ धिष्ण्यमिति निपातनात् साधुः ।। भाग्यं कर्म शुभाशुभम् । केवलसुखजनकं शुभम् । केवलदुःखजनकमशुभम् । सुखदुःखयोर्जनकं शुभाशुभम् । एतत् [3]त्रितयमपि कर्म भाग्यमित्युच्यते । भागः कर्मफलं दीयतेऽत्रेति भाग्यम् । 'भागाद्यच्च' (५. १. ४९) इति यत्प्रत्ययः । यथा—'मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः' (रत्ना. १. ६) इति शुभकर्मणि प्रयोगः ।। कशेरुहेम्नोर्गाङ्गेयम् । कशेरुः जलकन्दम् । गङ्गाया उत्पन्नत्वेन तदपत्यतुल्यत्वाद् गाङ्गेयम् । शेषे—'गाङ्गेयः पुंसि भीष्मे च गाङ्गेयं मुस्तके भवेत्' इति । विशल्या दन्तिकापि च । दन्तिका वृक्षविशेषः । शेषे—

> 'विशल्या गतशल्या स्याल्लाङ्गली त्रिपुटामृता ।
> महौषधिविशेषोऽपि ।।'

इति[4] । विविधानि शल्यतुल्यानि कण्टकान्यस्या इति विशल्या । विगतं शल्यं दुःखमस्या इति वा विशल्या ।। १५५ ।।

[1] उक्तम् Gm3, Tv. [2] सानसिवर्णसि . . . धिष्ण्यशल्याः (उ. ४. १०९).

[3] त्रिविधमपि Tj1, Tj2.　　[4] Gm3, Tv add: तत्स्वरूपं स्वच्छन्दभैरवे महौषधिप्रकरणे दर्शितम्—'विशल्या नामतः ख्याता पुष्पैः श्वेतैः सकण्टका। एकपत्रा भवेत् सा तु लता कन्दवती भवेत्' इति.

(पा.) धिष्ण्यं—भेऽग्नौ। भशब्देन [1]शुक्रतारकयोर्ग्रहणम्। 'भः स्यान्मयूखे शुक्रे भं नक्षत्रे च प्रकीर्तितम्' इति विश्वः (पृ. १०८, श्लो. १६)। [2]धिष्ण्यं सर्वत्र नपुंसकम्। शुक्राग्न्योः केषांचित् पुंलिङ्गः। 'धिष्ण्यः शुक्रे च पावके' इति [3]पुंस्काण्डेऽमरदत्तः॥ भाग्यं—गाङ्गेयम्। कशेरुः कन्दविशेषः। [4]'शुक्लकारं तु क्रुसरं वृष्यकन्दं कशेरु च' इति वैजयन्ती (पृ. १५७, श्लो. ४७)॥ विशल्या दन्तिकापि च। त्रिवृतायामपि स्यात्। 'तिगुड अदुम्नु'॥ १५५॥

[1] A1 adds एव.　　[2] A1 omits.　　[3] B3 omits.　　[4] शुक्राकारस्तु A1, C1.

वृषाकपायी श्रीगौर्योरभिख्या नामशोभयोः।
आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम्॥ १५६॥
उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः।

(वि.) वृषाकपायी श्रीगौर्योः [1]शचीजीवावरीषु च॥ 326॥

वृषाकपेरियं वृषाकपायी॥

अभिख्या नामयशसोः [2]शिखाकीर्त्योश्च[3] वर्तते।

अभिख्यायत इत्यभिख्या। 'ख्या प्रकथने'॥

शिक्षार्थयोश्चिकित्सायां निष्कृतौ संस्कृतौ तथा॥ 327॥
धात्वर्थे करणे चेष्टाकर्मणोः संप्रधारणे।
आरम्भोपाययोश्चैव क्रिया समभिकथ्यते॥ 328॥

क्रियत इति क्रिया। [4]'डुकृञ् करणे'॥ १५६॥

[1] °वरीजीवन्तिकासु च J2, K5; वरी सूर्यपत्नीत्यर्थः.　　[2] शोभा° K2, K4, K5.
[3] °कान्त्योश्च K5.　　[4] K3, K6 omit.

(विव.) वृषाकपायी श्रीगौर्योः । [1]वृषाकपेः विष्णोर्हरस्य वा स्त्री इति विग्रहे 'पूतक्रतोरै च' (४. १. ३६) इत्यादि [2]सूत्रत्रयं पुंयोगप्रकरणे द्रष्टव्यमिति वृत्तिकारेणोक्तत्वाद् (काशिका १, पृ. २७०) 'वृषाकप्यग्निकुसितकुसीदानामुदात्तः (४. १. ३७) इति ङीप् प्रत्ययः ऐकारश्चान्तादेशः । अग्निभार्यायामिन्द्राण्यां च वृषाकपायीशब्दः ॥ अभिख्या नामशोभयोः । अभिख्यायते कथ्यतेऽनयेति अभिख्या [3]नामसंज्ञेत्यर्थः । [4]'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । यथा—चैत्राभिख्यो मैत्राभिख्य इति । शोभायां यथा—'काप्यभिख्या तयोरासीत्' इति रघुवंशे (१. ४६) । 'अभिख्या कीर्तियशसोरभिख्या नामशोभयोः' इति विश्वप्रकाशः (पृ. १२३, श्लो. १०४) ॥ आरम्भो निष्कृतिः—नव क्रियाः । [5]अत्र [6]क्रियाशब्दस्यार्थनिरूपकत्वेनापात्रस्य उपायशब्दस्यापि यकारान्तनिमित्तविधेयत्वभ्रान्तिनिवारणार्थं[7] नवेत्युक्तम् । ततश्च आरम्भादयः क्रियाशब्दस्यैवार्था इत्युक्तं भवति । आरम्भ उपक्रमः । यथा—क्रियावान् कर्मसूद्यतः (२, पृ. २६) इति प्रागुक्तम् । निष्कृतिः प्रायश्चित्तम् । यथा—'महापातकिनां पुंसां भवेत् प्राणान्तिका क्रिया' इति । शिक्षा अभ्यासः । यथा—'धनुर्वेदे कृतक्रियाः' इति । [8]'शिक्षा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता' इति कालिदासश्च (मालविका. १. २६) । पूजने यथा—[9]'कृता पित्रतिथिक्रिया' इति । संप्रधार्यते निश्चीयते संदिग्धार्थोऽनेनेति संप्रधारणं लिखितसाक्ष्यादिकम् । यथा—'प्राङ्न्यायकारणोक्तौ तु प्रवृत्त्यर्थे च निष्क्रियाम्' इत्यादि । चिकीर्षितार्थे सिद्धिहेतुरुपायः । यथा—सप्त सामादिकाः क्रियाः इति । सप्तोपाया इत्यर्थः । उभयोः साधनत्वाविशेषेऽपि कारकरूपस्योपायस्य पूर्वस्माद् ज्ञापकरूपात् संप्रधारणाद् भेदः । कर्मशब्देनात्र वेदोदितमनुष्ठानं विवक्षितम् । यथा—'तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः' इति । (या. स्मृ. १. ९. १९९) । 'क्रियामुद्दिश्य याचकः' इति च । यद्यपि प्रयत्नवदात्मसंयोगसमवायिक्रिया चेष्टेति प्रसिद्धा, [10]तथाप्यत्र चेष्टाशब्देन [11]पूर्वप्रदेशविभागहेतुरुत्तरसंयोगहेतुश्चलनरूपो धर्मो विवक्षितः । यथा—हस्तक्रिया, परमाणुक्रिया इति । चिकित्सायां यथा—'पुनर्ज्वरे समुत्पन्ने क्रिया पूर्वज्वरानुगा' इति । 'कृञः श च' (३. ३. १००) इति करोतेर्धातोर्यथायथं भावे [12]कर्मणि च शप्रत्यये, 'रिङ्शयग्लिङ्क्षु' (७. ४. २८) इति रिङादेशे च क्रिया । शेषे—'संस्काराख्यातधात्वर्थरचनासु क्रिया भवेत्' इति । संस्कारे यथा—'स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति' इति (या. स्मृ. १. २. ३४) । आख्याते

यथा—क्रियापदं, क्रियागोपकम् इति । धात्वर्थे यथा—क्रियावचना हि धातवः इति । रचनायां यथा—'शृणुत मनोभिरवहितैः क्रियामिमां कालिदासस्य' इति (विक्रम. १. २) ।। १५६ ।।

[1] Tv adds 'हरो विष्णुर्वृषाकपिः' इति प्रागुक्तम् । ततश्च (२, पृ. ४०१). [2] सूत्रद्वयं Tv. [3] °शब्देत्यर्थः Tv. [4] B5, B6 add ख्या प्रकथने. [5] Tj2 adds आरम्भादयश्चिकित्सान्ता नवाप्यर्थाः क्रियाशब्देनोच्यन्त इत्यर्थः. [6] क्रियाशब्दः Gm3, Tv. [7] °निरासार्थं B5, B6. [8] शिष्टा, श्लिष्टा इति मु. प्र. [9] कृतपित्रतिथिक्रियः Tv. [10] तथेह Tj2. [11] Tj2 adds आन्तरहेतुसंयोगश्च. [12] Tj2 adds करणे.

(पा.) वृषाकपायी—चिकित्सा च नव क्रियाः ।। १५६ ।।

छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ।। १५७ ।।
कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।
कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ।। १५८ ।।

(वि.) पालनोत्कोचयोः [1]कान्तौ काव्यनीतावनातपे ।
छाया पङ्क्तौ सूर्यपत्न्यां सच्छोभाप्रतिबिम्बयोः ।। 329 ।।

[2]छ्यत्यातपादिकमिति छाया । 'छो छेदने' ।।

हर्म्यादिकोष्ठके काञ्च्यामुद्योगेऽप्युत्तरीयके ।
करिणां मध्यबन्धे च कक्ष्या समभिधीयते ।। 330 ।।

[3]कक्षायां गजमध्यभागादौ भवा कक्ष्या ।।

क्रियायां देवतायां च कार्यविद्वेषयोरपि ।
तव्यादिप्रत्यये हिंस्ये[4] [5]ग्रन्थे भेद्ये धनादिना ।। 331 ।।
छेद्ये च वेष्टनीये च कृत्या तु परिकीर्त्यते ।

कृत्यत इति कृत्या । [6]'कृती छेदने' 'कृती वेष्टने' । क्रियापक्षे 'डुकृञ् करणे' ।। १५७–८ ।।

[1] क्लान्तौ J2; उत्कोचः=A bribe. [2] छ्यतीति K2, K4. [3] कक्षात् K3; कक्षे K4. [4] हिंस्रे J2. [5] ग्रन्थभेदे K6. [6] K3, K6 add 'कृती हिंसाग्रथनयोः'.

(विव.) छाया—अनातपः। सूर्यप्रिया सूर्यपत्नी। कान्तिः दीप्तिः। प्रतिबिम्बम् आदर्शादिस्वच्छद्रव्यगतं[1] स्वमुखम्, दारुशिलादिनिर्मिता [2]प्रतिमा, चित्रलिखितं च। अनातपो गृहवृक्षाद्यावरणकृतः प्रकाशाभावः। छ्यति संतापादिकमिति छाया। 'छो छेदने'। यप्रत्ययः[3] (उ. ४. १११)। शेषे—'छाया स्यात् पालनोत्कोचसच्छोभाकाव्यरीतिषु' इति। पालने—'अवधानः[4] कृतच्छायः करं ताभ्यः समाहरेत्' इति। तव छायायां वसाम इति च। उत्कोचे यथा—'वृत्ते तु कार्ये छायायां ग्रहणं दुर्लभं भवेत्' इति। सच्छब्दो नक्षत्रवचन इति प्रागुक्तम्। सच्छोभा नक्षत्रकान्तिः। यथा—[5] 'छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम्' इति (रघु. १३. २)। काव्यरीतौ यथा—[6]छायामपहरति कविः इति॥ कक्ष्या—बन्धने। हर्म्यादेर्महागृहस्य प्रकोष्ठेऽन्तर्गृहे स्वल्पगृहे यथा—बहुकक्ष्यः प्रासाद इति। स्त्रीनितम्बगता काञ्ची मेखला। पल्ययनबन्धनार्थं गजस्य कुक्षिमध्यनिहिता रज्जुः मध्येभबन्धनम्। यथा—'सिन्दूरैः कृतरुचयः सहेमकक्ष्याः' इति भारविः (किरा. ७. ८)। कक्षशब्देन बाहुमूलवाचिना सामीप्याद् मध्यभागः तिरोहितसादृश्याद् गृहमध्यस्थानं च लक्ष्यते। तत्र भवा कक्ष्या। 'शरीरावयवाद्यत्' (५. १. ६) इति यत्प्रत्ययः। शेषे—'कक्ष्या बृहतिकायां स्यात्' इति। यथा—'नीलया कक्ष्यया छन्ना तमस्यन्धेऽभिसारिका' इति॥ कृत्या—धनादिभिः। 'कृञः श च' (३. ३. १००) इति चकाराद् भावे क्यपि कृत्याशब्देन क्रियोच्यते। यथा—[7]कां कृत्यामकार्षीः इति। कृतौ परमारणे साधुः कृत्या। 'तत्र साधुः' (४. ४. ९८) इति यत्। परमारिका देवता यथा—'क्षिप्रं कृत्ये निवर्तस्व कर्तुरेव गृहान् प्रति' इति। सामदानादिभिरुपायैः परस्मिन् वैरमुत्पाद्य स्ववशत्वेन क्रियत इति कृत्यो भेद्यः। 'विभाषा कृवृषोः' (३. १. १२०) इति करोतेः कर्मणि क्यप्प्रत्ययः। ह्रस्वस्य तुगागमः[8] (६. १. ७१)। अत्र कौटिल्यः[9]—'क्रुद्धलुब्धभीतावमानिताः परेषां कृत्याः' इति (अ. शा. १. १३)। यथा—[10] 'कृत्याकृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम्' इति माघकाव्ये (शिशु. २. १११)। कृत्यः परसेनापतिः, कृत्या परसामन्तसंहतिः, कृत्यं परबलम्, इत्यादिरूपेण वाच्यलिङ्ग इत्यर्थः। शेषे—

'कृत्यं कार्ये नपुंसकम्।
हिंस्ये ग्रथ्ये [11]छेदनीये त्रिषु तव्यादिके पुमान्॥'

इति। कार्ये यथा—कृतकृत्य इति। 'कृती हिंसाग्रथनयोः', 'कृती छेदने'। आभ्यां धातुभ्यां 'ऋदुपधाच्चाक्लृपिचृतेः' (३. १. ११०) इति क्यप्प्रत्ययः। प्राङ्ण्वुल इत्यनुक्रान्ताः तव्यादिप्रत्ययाः कृत्यसंज्ञाः[12] ।। १५७–८ ।।

[1] स्वच्छद्रव्यम् Tj2.　[2] Tj2 adds कृत्रिम°.　[3] 'माछाशसिभ्यो यः'.
[4] आददानः B6.　[5] छायापदेशेन B6, Tj2.　[6] छायामपहरतु B5, B6.　[7] काल° Tj2.
[8] 'ह्रस्वस्य पिति कृति तुक्'.　[9] कौटल्यः K6, Tj1.　[10] कृत्वा कृत्य° इति मु. ग्र.
[11] भेदनीये Tv.　[12] 'कृत्याः प्राङ् ण्वुलः' (३. १. ९५).

(पा.) छाया—अनातपः। कान्तिशब्देन प्रभाशोभयोरेव ग्रहणम्। प्रभायाम्—'रत्नच्छायाव्यतिकर इव' (मेघ. १. १५)। शोभायाम्—'तनुच्छायाभिस्ते [1]तरुणतरणिश्रीसरणिभिः' इति [2]सौन्दर्यलहरी (श्लो. १८)। ईषदर्थेऽपि स्यात्—'छायामात्रप्रकृतिरभवद्रोमराजीविकारः'।। कक्ष्या—बन्धने।

'कक्षा[3] ग्राहणिकाकाञ्चीप्रकोष्ठगजरज्जुषु।
सार्द्धे पदे परीधानपश्चादञ्चलपल्लवे।।
[4]रथभागेऽपि कक्षा स्यात्।।'

इति मूर्धन्यान्तेषु विश्वः (पृ. १८३, श्लो. १०-११)।। कृत्या—धनादिभिः। धनादिभेद्यं शत्रुगुह्यम्।। १५७–८ ।।

[1] तरणिकिरण° A1.　[2] आनन्दलहरी B3, C1.　[3] कक्ष्यः क्षुद्राहिका° B3.
[4] B3, C1 omit the *pāda*.

**जन्यः स्याज्जनवादेऽपि जघन्योऽन्त्येऽधमेऽपि च।
गर्ह्याधीनौ च वक्तव्यौ कल्यौ सज्जनिरामयौ।। १५९ ।।**

(वि.) संग्रामे [1]जनितव्ये च साधौ जनितृपूज्ययोः[2] ।। 332 ।।
अस्त्री [3]वधूवरज्ञातिप्रियतुल्यहितेषु च।
उत्पादनीये [4]जनके जन्यः स्याज्जनजल्पने[5] ।। 333 ।।

जननीयो जन्यः। [6]जायत इति वा। 'जनी प्रादुर्भावे'।।

अन्त्येऽधर्मे मेहने च जघन्यं जघनोद्भवे।

जघने भवं जघन्यम् ॥

गर्ह्येऽधीने[7] च वाच्ये च वक्तव्यः शब्दवाचके[8] ॥ 334 ॥

वक्तुं योग्यो वक्तव्यः ॥

कल्यो निरामये सज्जे प्रभाते कल्यमुच्यते ।

कल्यत इति कल्यम् । 'कल[9] संख्याने' ॥ १५६ ॥

[1] जनकृत्ये K5. [2] °भट्टयोः J2, K5. [3] नववधू° J2, K4, K5. [4] जनने J2, K5. [5] जनवादने J2; °वादके K6. [6] K2, K3 omit; 'जनिवध्योश्च' इति न वृद्धिः. [7] दीने K5, K6. [8] °वाच्यके K5. [9] J2 adds गतौ.

(विव.) जन्यं स्याज्जनवादेऽपि । जनस्य जल्पो जन्यम् । 'मतजनहलात् करणजल्पकर्षेषु' (४. ४. ९७) इति यत्[1] । अपिशब्दार्थः शेषकारेण दर्शितः । यथा—

'जनितव्ये रणे क्लीबेऽपवादजनजल्पयोः ।
अस्त्री वरवधूज्ञातिप्रियतुल्यहितेषु च ॥
जन्यस्त्रिषु जने साधौ जनित्रुत्पादनीययोः ॥'

इति । जनितव्यमवश्यं जन्यार्हत्वम् । 'जनी प्रादुर्भावे' । 'ऋहलोर्ण्यत्'[2] (३. १. १२४) । रणो युद्धम् । ततो मात्सर्यादिभिर्जायत इति जन्यम् । अत्र 'भव्यगेय ...' इत्यादिना[3] (३. ४. ६८) कर्तरि यत् । अत्रोभयत्र जन्यशब्दः केवलनपुंसकलिङ्गः । अपवादो[4] निन्दा । निन्दायां जनवादे च अस्त्री पुंनपुंसकलिङ्ग इत्यर्थः । अत्र च 'जन्यः स्याज्जनवादेऽपि' इत्यमरसिंहीयः पुंलिङ्गपाठोऽपि साधुरेव । अत एव सुभूतिचन्द्रोऽप्याह—'जनवादे तु पुंस्येनं सिंहः क्लीबेऽजयोऽब्रवीत्' इति । [5]वरस्य वध्वाश्च ये ज्ञातयः प्रिया हितास्तुल्याश्च ते जन्याः । जनीं वधूं वरसमीपं प्रापयन्तीति जन्याः[6] । 'संज्ञायां जन्याः' (४. ४. ८२) इति तद्वतीत्यर्थे यत्प्रत्ययो निपातितः । जने लोके, जन्तौ जन्मनि वा साधुः जन्यः । 'तत्र साधुः' (४. ४. ९८) इति यत् । जायत इति कर्तर्यर्थे 'भव्यगेय ...' इत्यादिना (३. ४. ६८) यत्प्रत्यये जन्यो जनिता जनेः कर्ता [7]यजमान इत्यर्थः । जनेर्ण्यन्तात् कर्मणि यत्प्रत्यये जन्य [8]उत्पादनीयः । एवं वरवधूसंबन्धिज्ञात्यादिषु

उत्पाद्यान्तेषु अर्थेषु जन्यशब्दो वाच्यवशेन त्रिलिङ्गः। अनेन पूर्ववाक्यस्थस्य त्रिष्विति पदस्य यान्तवर्गसमाप्तिपर्यन्तमनुवर्तमानस्य, अस्मिन्नपि वाक्ये जन्यशब्दविषये प्रतिनियतार्थत्वं शेषकारेणोक्तमिति वेदितव्यम्। 'जन्यं हट्टे परीवादे' इति प्रतापश्च[9] ॥ जघन्योऽन्त्येऽधमेऽपि च। क्रमनिविष्टानामर्थानामन्ते भवोऽन्त्यः। अधमो गुणहीनः। पश्चात्प्रतीयमानसादृश्यात् जघनशब्देन चरमः कालो देशो वा विवक्षितः। तत्र भवो जघन्यः। शेषे—'जघन्यं शेफसि क्लीबे' इति। शेफसि शिश्ने। चशब्दात् जघनभवोऽपि[10] जघन्यम्। 'शरीरावयवाच्च' (४. ३. ५५) इति यत्॥ गर्ह्याधीनौ च वक्तव्यौ। गर्ह्यः कुत्सितः। अधीनो वचनग्राही। वचनार्हो वक्तव्यः। 'अर्हे कृत्यतृचश्च' (३. ३. १६६) इति तव्यप्रत्ययः। चशब्दाद् वचनीयमात्रेऽपि वक्तव्यशब्दः। वक्तव्यो देवदत्तः। वक्तव्या नटिका। वक्तव्यं काव्यमिति[11]। वचनीयवाच्यशब्दावपि वक्तव्यपदसमानार्थतया प्रसिद्धत्वादिह नोक्तौ। अतस्तावप्यत्र विज्ञेयौ। शेषे—'वक्तव्यं शब्दवार्त्तिके' इति। [12]व्याकरणसंबन्धिनि [13]वररुचिवार्त्तिके वक्तव्यशब्दो रूपभेदाद् नपुंसकलिङ्गः॥ कल्यौ सज्जनिरामयौ। सज्जः संनद्धः। शेषे—'कलासु साधौ दक्षे च कल्यः' इति। प्रभातरूपार्थे तु कल्यशब्दः केवलनपुंसकलिङ्गः प्रागुक्तः[14] (१, पृ. ७४) ॥ १५६ ॥

[1] Tj2 adds प्रत्ययः. [2] इति ण्यत्प्रत्ययः Tj2. [3] 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा'। भव्यादयः शब्दाः कर्तरि वा निपात्यन्ते (काशिका १, पृ. २५२). [4] गर्हा कौलीनमित्यर्थः Tv. [5] वधूवरयोः Tj2. [6] प्रागुक्तमेतत् (१, पृ. ४८३). [7] जायमानः B6. [8] उत्पादितः Tv. [9] प्रतापविश्वप्रकाशौ Tj2, Tv. [10] जघनशब्दोऽपि B5, B6. [11] इत्यादि Tj2. [12] Tj2, Tv add इह शेषकारीयपूर्ववाक्यात् क्लीबपदानुवृत्तेः. [13] वाररुच° B6, Tj2. [14] 'प्रत्यूषोऽहर्मुखं कल्यम्' इति प्रागुक्तत्वाद् वाच्यलिङ्गप्रस्तावे तदसङ्गतेश्च अत्राकथनमिति वि(Tj2 omits) ज्ञेयम् Tj1, Tj2, Tv.

(पा.) [1]जन्यं स्याज्जननीयेऽपि। जननीये जनितरि। 'जन्यं [2]कौलीनयुद्धयोः' इति जयकोशः। त्रिष्वित्यधिकारात्। जनवादेऽपि इति [3]पाठः॥ जघन्यो—गर्ह्याधीनौ[4] च वक्तव्यौ। वचनीयवाच्यावपि स्याताम्॥ कल्यौ सज्जनिरामयौ। 'सज्जः संभृतः' इति सुभूतिटीका ॥ १५६ ॥

[1] जन्यः A1. [2] कालीन° A1. [3] अपपाठः B3. [4] °दीनौ A1.

आत्मवाननपेतोऽर्थादर्थ्यौ पुण्यं तु चार्वपि ।
रूप्यं प्रशस्ते रूपेऽपि वदान्यो वल्गुवागपि ।। १६० ।।
न्याय्येऽपि मध्यं सौम्यं तु सुन्दरे सोमदैवते ।

इति यान्तवर्गः

(वि.) अर्थ्योऽर्थादनपेतेऽपि [1]बुधे न्याय्यात्मयुक्तयोः ।। 335 ।।
[2]शिलाजतुन्यर्थनीये त्रिषु लिङ्गेषु वर्तते ।

अर्थे साधुरर्थ्यः ।।

पुण्यं चारुणि धर्मे च सुकृते पुण्यवाचि च ।। 336 ।।

पुणतीति पुण्यम् । 'पुण [3]कर्मणि शुभे' ।।

[4]आहतस्वर्णरजते रूप्यं स्याद् रजतेऽपि च ।
[5]लोके प्रशस्तरूपेऽपि वाच्यवत् समुदीरितम् ।। 337 ।।

प्रशस्तं रूपमस्यास्तीति रूप्यम् ।।

वदन्यश्च वदान्यश्च वल्गुभाषिणि दातरि ।

[6]वदतीति वदान्यः । वदन्यश्च । 'वद व्यक्तायां वाचि' ।।

अवकाशे समे न्याय्ये हीने मध्योऽवलग्नके ।। 338 ।।

[7]मध्यत्वाद् मध्यः ।।

सुन्दरे सोमदैवेऽपि बुधे सौम्य उदाहृतः ।

[8]सोमो देवता अस्येति सौम्यः ।। १६० ।।

इति यान्तवर्गः[9]

[1] गुरौ K_6; सुरे J_2, K_4. [2] शिलाञ्जने J_2. [3] शुभकर्मणि K_2, K_3, K_4.
[4] अहत° K_3, K_4. [5] रूप्यं K_5. [6] K_6 adds मदीयं धनमर्थिभ्यो दीयताम्.
[7] मध्ये भवः K_5, K_6. [8] सोमस्यायं J_2, K_4; सोमस्यापत्यं K_6. [9] K_2, K_3 add यान्तशब्दसंख्या ४९.

(विव.) आत्मवाननपेतोऽर्थादर्थ्यौ । अर्थाजने साधुरर्थ्यः[1] । आत्मवान् बुद्धिमानित्यर्थः । अर्थादनपेत इति विग्रहे 'धर्मपथ्यर्थन्यायादनपेते' (४. ४. ९२) इति यत्प्रत्ययेऽर्थ्यः, सर्वदा [2]सुधनवानिति । शेषे—'अर्थ्यो बुधे पुमान् क्लीबः शिलाजतुन्यर्थ्ये त्रिषु' । अर्थमर्हतीत्यर्थ्यो विद्वान् । 'विद्वानशेषमादद्यात् स सर्वस्य[3] प्रभुर्यतः' इति स्मृतेः (या. स्मृ. २. २. ३४) । अर्थ्ये प्रार्थनीये वस्तुनि वाच्यलिङ्गः ।। पुण्यं तु चार्वपि । चारु मनोहरम् । पुण्यं वनम् । पुण्या नदी इत्यादि । पुणतीति पुण्यम् । 'पुण कर्मणि शुभे'[4] । अपिशब्दात् पुण्यवति त्रिलिङ्गः प्रागुक्तः (२, पृ. ५) । [5]सुकृते नपुंसकलिङ्गः ।। रूप्यं प्रशस्तरूपेऽपि । प्रशस्तं रूपमस्यास्तीति रूप्यम् । आहतं रूपमस्यास्तीति रूप्यो मुद्राङ्कितसुवर्णादिः । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) इति यप् । अस्मिन्नर्थे वाच्यलिङ्गः । रजतमात्रे तु नपुंसकं प्रागुक्तम् (१, पृ. ६१०) ।। वदान्यो वल्गुवागपि । वल्गुवागिति वाग्मीत्यर्थः । अपिशब्दाद् बहुप्रदोऽपि[6] ।। न्याय्येऽपि मध्यः । न्यायादनपेतो न्याय्यः । तत्र मध्यशब्दः । यथा मध्यस्थ इति । अपिशब्दाद् अवलग्ने पुंनपुंसकलिङ्गः प्रागुक्तः (१, पृ. ४१२) । मन्यत इति मध्यम् । 'मनु अवबोधने' । 'अघ्न्यादयश्च' (उ. ४. ११३) इति औणादिकनिपातनात् साधुः । यथा—शरीरस्य मध्यम् । यथा पूर्वोत्तरभागौ[7] विहाय वर्तते,[8] तथायं मध्यार्थेऽपि रागद्वेषौ परित्यज्य वर्तत इति सादृश्याद् मध्य उच्यते ।। सौम्यं तु सुन्दरे सोमदैवते । सोमो देवता अस्येति सौम्यम् । 'सोमाट्ट्यण्' (४. २. ३०) । सौम्यं हविः[9] । सुन्दरे तूपचाराद् वृत्तिः । रौहिणेये पुंलिङ्गः प्रागुक्तः (१, पृ. ६७) ।। १६० ।।

इति यान्तवर्गः[10]

[1] साधुरित्यर्थः Tv. [2] Gm3, Tv omit सु. [3] सर्वत्र Tj2. [4] 'इगुपध ...' (३. २. १३५) इति कः । पुणे साधुः । 'तत्र साधुः' इति यत् इति भा. दी. (पृ. ४८६). [5] Tj2, Tv add शेषे—'पुण्यं सुकर्मणि' इति; सुकृते रूपभेदात्. [6] स्युः वदान्य ... बहुप्रदे (२, पृ. ६). [7] °विभागौ Tv. [8] तिष्ठति Gm3, Tv. [9] Tj2, Tv add सौम्यः चरुः. [10] B6, Tj2 add शब्दसंख्या एकोनपञ्चाशत्.

(पा.) आत्मवाननपेतोऽर्थादर्थ्यौ । [1]आत्मा बुद्धिः, [2]तद्वानात्मवानिति सुभूतिटीका ।। पुण्यं तु चार्वपि । सुकृते नपुंसकम् ।। रूप्यं प्रशस्तरूपेऽपि । रजते नपुंसकम् ।। वदान्यो वल्गुवागपि । दानशौण्डोऽपि स्यात् ।। न्याय्येऽपि मध्यः[3] ।

अन्तरर्थे नपुंसकम् ।। सौम्यं तु सुन्दरे सोमदैवते । [4]सुन्दरार्थे—सौम्या स्त्री । सोमदेवताके—सौमी ऋक् । 'सोमाट्ट्यण्' (४. २. ३०) इति टित्त्वात् ङीप् । 'हलस्तद्धितस्य' (६. ४. १५०) इति टिलोपः । अनुक्तम्—

सर्वज्ञभिषजौ वैद्यो कुल्या कुलवधूः सरित् ।
फलकल्याणयोर्भव्यं योग्यं सांप्रतिके त्रिषु ।।
द्युः पुमानह्नि गगने चोद्यं प्रश्ने च विस्मये ।
क्षेत्रियं क्षेत्रजतृणे परदाररते त्रिषु ।।

उभयत्र त्रिलिङ्गः । क्षेत्रियो दर्भः । क्षेत्रिया प्रजा ।।

[5]कौकृत्यमनुतापे स्यादयुक्तकरणेऽपि च ।
दुग्धाग्रे दुग्धतालीयं दुग्धफेनेऽपि तन्मतम् ।।
अन्तशय्या तु मरणे भवेच्च पितृकानने ।
भयं प्रतिभयेऽपि स्यादहंतायां च विस्मयः ।।
जनयित्र्यामपि ज्या स्यात् पुरंध्र्यामपि च त्रयी ।
उमायामपि माया स्याद् व्यवायोऽप्यवधावपि ।।
पिचिण्डके राजकन्या दक्षकन्या तु दिश्यपि ।
अतिथावपि चातिथ्यं नेपथ्यं रङ्गभूम्यपि ।।
मृत्युः स्याद्देवतायां च जात्यं स्यात् सुन्दरेऽपि च ।
मलयः पर्वतांशे च माल्यं तु कुसुमेऽपि च ।। १६० ।।

इति यान्तवर्गः

[1] आत्मबुद्धिः A1. [2] B3 omits. [3] मध्यम् B3, C1. [4] सौन्दर्ये B3.
[5] अधःशय्या A1.

अथ रान्तवर्गः—

निवहावसरौ वारौ संस्तरौ प्रस्तराध्वरौ ।। १६१ ।।
गुरू गीर्पतिपित्राद्यौ द्वापरौ युगसंशयौ ।
प्रकारौ भेदसादृश्य आकाराविङ्गिताकृती ।। १६२ ।।

(वि.)　सूर्यादिदिवसे[1] वृन्दे [2]कुब्जवृक्षे हरे क्रमे ।। 339 ।।
मद्यपात्रेऽप्यवसरे वारो वरणसेवयोः[3] ।

व्रियत इति वारः । 'वृञ् वरणे' ।।

शयनीये सप्ततन्तौ संस्तरः परिकथ्यते ।। 340 ।।

संस्तीर्यत इति संस्तरः । 'स्तृञ् आच्छादने' ।।

बृहस्पतावुपाध्याये पितृराज्ञोः पितामहे ।
वर्णज्येष्ठे पितृव्ये च [4]दातृश्वशुरयोरपि ।। 341 ।।
मातामहे मातुले च ज्येष्ठे सोदर्य एव च ।
एतत्पत्नीषु महति दीर्घसंयुक्तशीर्षके ।। 342 ।।
[5]दुर्वहायामलघुनि गुरुः स्याद् वाच्यलिङ्गकः ।

गृणाति हितमुच्चारयतीति गुरुः । 'गॄ शब्दे' ।।

युगसंदेहयोश्चैव द्वापरः परिकथ्यते ।। 343 ।।

द्वौ परौ पक्षौ यस्यासौ द्वापरः ।।

सादृश्यभेदयोश्चैव प्रकारः परिकथ्यते ।

प्रक्रियत इति प्रकारः[6] ।

आकृताविङ्गिते चापि ह्याकारः परिगीयते[7] ।। 344 ।।

आक्रियतेऽनेनेत्याकारः[8] ।। १६१–२ ।।

[1] °वासरे K6.　[2] कूप° K5.　[3] °सेकयोः J2, K6.　[4] त्रातृ° K3, K5.
[5] दुर्वाहायाम् K6.　[6] K4 adds 'डुकृञ् करणे'.　[7] परिकथ्यते K5, K6.
[8] आकृतिराकारः K2, K6.

(विव.)　<u>निवहावसरौ वारौ</u> । निवहः समूहः । अवसरः प्रकृतकार्योचितः कालः । यथा—'स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुः' इति (१, पृ. ६४) । <u>शेषे</u>—

'वारः सूर्यादिदिवसे क्रमे कूपकवृक्षके ।
संभोगे वरणे शीघ्रे हरे मद्यस्य भाजने ।।'

इति । क्रमः पर्यायः । यथा—वारस्त्री इति । कूपको गुणवृक्षकः । संभोगः [1]संभुक्तिः सेवा । प्रतापोऽपि—

'वारः सूर्यादिदिवसेऽवसरे मूर्धजे हरे ।
वृन्दे कूपकवृक्षे च वृते स्याद् मद्यभाजने ।।'

इति । रलयोरभेदाद् वारशब्दस्य मूर्धजः केशोऽप्यर्थः । 'वृञ् वरणे', 'वृङ संभक्तौ' । अर्थानुरोधात् कर्मणि भावेऽधिकरणे च घञ् ।। संस्तरौ प्रस्तराध्वरौ । सम्यक् स्तीर्यते वस्त्रादिकमत्रेति संस्तरः प्रस्तरः शय्येत्यर्थः । सम्यक् स्तीर्यन्ते दर्भा अत्रेति संस्तरो यज्ञः । 'स्तृञ् आच्छादने' इत्यस्माद् धातोः 'ऋदोरप्' (३. ३. ५७) इत्यधिकरणे अप्प्रत्ययः ।। गुरू गीष्पतिपित्राद्यौ । आद्यशब्दार्थः कूर्मपुराणे प्रपञ्चितः (२. १२. २६-७)—

'उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ।।
वर्णज्येष्ठः पितृव्यश्च पुमांसो गुरवः स्मृताः ।
माता मातामही गुर्वी पितुर्मातुश्च सोदराः ।।
श्वश्रूः पितामही ज्येष्ठा भगिनी गुरवः स्त्रियः ।।'

इति । महाभारतेऽपि[2]—

'निषेकादीनि कर्माणि यः करोति यथाविधि ।
संभावयति चान्नेन स पिता गुरुरुच्यते ।।'

इति । शिवधर्मे च—

'संस्कृतैः प्राकृतैर्वाक्यैर्यः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः[3] स्मृतः ।।
अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह[4] गुरुं विद्याद् व्रतोपक्रिययाथवा[5] ।।'

इति। शेषे—'दुर्जरालघुनोर्दीर्घसंयुक्तपरयोर्गुरू' इति। दुर्जरे यथा—'माहिषं दधिपिष्टं हि बृंहणं मधुरं गुरु' इति। लघुत्वं नाम पतनप्रतिबन्धकः कश्चिद् भावः। तदभाववति पाषाणादौ यथा—द्वयोर्गुरुत्वं रसवत्त्वं च इति। द्विमात्रो दीर्घः। संयुक्तमक्षरं परं यस्येति संयुक्तपरम्। उभयत्र यथा—'संयोगे गुरु। दीर्घं च' इति पाणिनिः (१. ४. ११, १२) ।। द्वापरौ युगसंशयौ। द्वाभ्यां कृतत्रेतायुगाभ्यां परो द्वापरो युगः। संशयस्य कोटिद्वयावलम्बित्वेन द्वौ परौ निरूप्यावत्रेति संशयो द्वापरः। पृषोदरादिः।। प्रकारौ भेदसादृश्ये। भेदो विशेषः। यथा—षट्प्रकारा भावाः इति। सादृश्ये यथा—पितृप्रकारः पुत्र इति ।। आकाराविङ्गिताकृती। इङ्गितम् अभिप्रायसूचकचेष्टाविशेषः। आकृतिरवयवसंस्थानम्। आक्रियते मनोगतोऽर्थोऽनेनेति आकारः[6] ।। १६१–२ ।।

[1] संभक्तिः B5, B6.　[2] मनुस्मृतौ च दृश्यते ऽयं श्लोकः (२. १४२).
[3] गृणाति। 'गॄ शब्दे'। 'कृग्रोरुच्च' (उ. १. २४) इत्युः इति भा. दी. (पृ. ४६०).
[4] महीपं च B6.　[5] तथा Tv.　[6] 'डुकृञ् करणे', 'भावे' (३. ३. १८) इति घञ्.

(पा.) निवहावसरौ—प्रस्तराध्वरौ। प्रस्तरः[1] पल्लवादिशय्या। 'प्रस्तरः संस्तरः शय्या रचिता पल्लवादिभिः' इति वैजयन्ती (पृ. १७२, श्लो. १६५) ।। गुरू गीष्पतिपित्राद्यौ। मात्रादौ स्त्रीलिङ्गः। 'मात्रादौ स्त्री बृहत्ख्यातदुर्भरालघुषु[2] त्रिषु' इति वैजयन्ती (पृ. २३२, श्लो. २८) ।। द्वापरौ—भेदसादृश्ये। भेदे—नानाप्रकारः। सादृश्ये—पितृप्रकारः।। आकाराविङ्गिताकृती। 'इङ्गितं हृद्गतो भावो वहिःस्थं लिङ्गमाकृतिः' इति वैजयन्ती (पृ. १९३, श्लो. २२)[3] ।। १६१–२ ।।

[1] A1 adds नाम.　[2] दुर्जरा° A1.　[3] मुद्रितग्रन्थे तु 'आकारस्त्विङ्ग इङ्गितम्' इति दृश्यते; 'इङ्गितं हृद्गतो भावो बहिराकार आकृतिः'। सज्जनः (Apte's Dict. p. 380).

किंशारू धान्यशूकेषू मरू धन्वधराधरौ।
अद्रयो द्रुमशैलार्काः स्त्रीस्तनाब्दौ पयोधरौ ।। १६३ ।।

(वि.) किंशारुः [1]स्याद् [2]धान्यशूके कङ्कपत्रे[3] गरुत्मति।

कुत्सितं शृणातीति किंशारुः। 'शॄ हिंसायाम्' ।।

मरुर्धन्वाख्यदेशेऽपि [4]भूधरे चापि कथ्यते ।। 345 ।।

म्रियन्तेऽत्रेति मरुः । ‘ मृङ[5] प्राणत्यागे ’ ।।

महीधरे तीक्ष्णरश्मावद्रिर्भूमिरुहे भवेत् ।

अद्यते कालेनेत्यद्रिः । ‘अद भक्षणे’ ।।

[6]नारिकेले कोशफले कशेर्वाख्यजलौषधौ ।। 346 ।।
स्त्रीस्तने वारिवाहे च पयोधर उदाहृतः ।

पयो [7]धारयतीति पयोधरः ।। १६३ ।।

[1] सायके J2, K5. [2] सस्य° K6. [3] J2, K5 omit पत्ते. [4] खादिरे K2, K6. [5] K3, K6 omit the Sūtra. [6] नालिकेरे J2, K4. [7] धरति K5.

(विव.) किंशारू धान्यशूकेषु । सस्यशूके प्रागुक्तः (१, पृ. ५६५) । इषुर्बाणमात्रम् । किं कुत्सितं शृणातीति किंशारुः । ‘शॄ हिंसायाम्’ । ‘किंजरयोः श्रिणः’ (उ. १. ४) इति उण्प्रत्ययः । शेषे—‘किंशारुः कङ्कपक्षिणि’ इति । लोहपृष्ठाख्यः पक्षिविशेष इत्यर्थः ।। मरू धन्वधराधरौ । धन्वा निर्जलप्रदेशः । धराधरः पर्वतः[1] ।। अद्रयो द्रुमशैलार्काः । द्रुमो वृक्षमात्रम् । [2]अद्यते कालवशेन नश्यत इत्यद्रिः । ‘अद[3] भक्षणे’ । ‘निद्रामुद्रां द्रावयत्यम्बुजानामद्रौ तन्द्री [4]शोणयत्यद्रिजातम्’ इति रामाभ्युदये ।। स्त्रीस्तनाब्दौ पयोधरौ । स्त्रीस्तनो नारीकुचः । अब्दो मेघः । शेषे—‘इक्षुभेदे नारिकेले कशेरौ च पयोधरः’[5] इति ।। १६३ ।।

[1] ‘मृङ प्राणत्यागे’ । ‘भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः’ (उ. १. ७) इति उः. [2] कालेन वातेन वा Tv; वातेनाद्यते, अत्ति वा Gm1, Gm3. [3] ‘अदिशदिभूशुभिभ्यः क्रिन्’ (उ. ४. ६६). [4] शोषयति B6. [5] धरति । ‘धृञ् धारणे’ । पचाद्यच् । पयसो धरः इति भा. दी. (पृ. ४६०).

(पा.) किंशारू—धराधरौ । धन्वा निर्जलप्रदेशः । अद्रयो—पयोधरौ ।। १६३ ।।

ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः ।
प्रदरा भङ्गनारीरुग्बाणा अस्राः कचा अपि ॥ १६४ ॥

(वि.)　वृत्रो ध्वान्ते रिपौ रक्षःशैलयोर्घनचक्रयोः ॥ 347 ॥

वृणोतीति वृत्रः । 'वृञ् वरणे' ॥

मतङ्गजस्य शुण्डायां वलौ किरणहस्तयोः ।
वर्षोपले कर्तरि च करशब्दो विवक्षितः ॥ 348 ॥

[1]कीर्यते इति करः । 'कॄ विक्षेपे' । करोति । 'डुकृञ् करणे' ॥

स्वयं [2]दीर्णेऽवटे भङ्गे नारीरोगे भये[3] तथा ।
विदारणेऽपि[4] रहसि प्रदरः परिकथ्यते ॥ 349 ॥

प्रदीर्यत इति प्रदरः । 'दॄ विदारणे' । 'दॄ भये'[5] ॥

अस्रः कोणे कचेऽप्यश्रुरक्तयोरस्रमुच्यते ।

अस्यत इत्यस्रः[6] । 'असु क्षेपणे' ॥ १६४ ॥

[1] K_3, K_4 omit.　[2] दीर्णावटे K_5; कचे J_2.　[3] शरे J_2, K_4, K_5.
[4] अतिरहसि J_2, K_4, K_5.　[5] K_3, K_4 add 'दॄ गतिहिंसाकौटिल्येषु'.　[6] अस्रम् K_3.

(विव.)　ध्वान्तारिदानवा वृत्राः । ध्वान्तमन्धकारः । अरिः शत्रुमात्रम् । यथा—'वृत्रान् घ्नंश्चरेत्' (तै. सं. २. ४. १३. १) इति । दानवो वृत्रासुराख्यः तद्विशेषः । यथा—'यदिमानलोकानवृणोत् तद् वृत्रस्य वृत्रत्वम्' इति श्रुतिः* । वृणोतीति वृत्रः । 'वृञ् वरणे'[1] । शेषे—'शैले चक्रे घने वृत्रः' इति । चक्राकारो मेघः [2]चक्रघनः ॥ बलिहस्तांशवः कराः । प्रजाभ्यो राजग्राह्यो भागो बलिः । चतुर्विंशत्यङ्गुलो हस्तः । शेषे—'शुण्डाकरककर्तृषु । करः' इति । करको वर्षोपलः ॥ प्रदरा भङ्गनारीरुग्बाणाः । भङ्गः पराजयः । नारीणां स्त्रीणां निरन्तररजःस्रवजनको रोगविशेषो नारीरुक् । [3]बाणः शरः । 'दॄ विदारणे' । 'दॄ भये' । 'ॠदोरप्'[4] (३. ३. ५७) । शेषे—'विदारणं च भीर्दीर्णः स्वयं च प्रदरोऽवटः' इति । विदारणं भेदनम् । भीर्भयम् । स्वयं दीर्णः इत्यवटविशेषणम् । स्वयमेव निष्पन्नो गर्तः प्रदर इत्यर्थः । 'तस्मात् प्रदरादुदकं नाचामेत्' इति श्रुतिः (तै. ब्रा. १. ५. १०. ७) ॥ अस्राः कचा अपि । कचाः केशाः । अस्यन्त इत्यस्राः । 'असु

क्षेपणे '[5]। शेषे—'अस्रः कोणे कुम्भभागे' इति। अस्रशब्दः कोणप्रदेशे पुंलिङ्ग इत्यर्थः। यथा—चतुरस्रमष्टास्रमित्यादि। अपिशब्दाद् रुधिरे नेत्राम्बुनि च नपुंसकलिङ्गं गतम् (१, पृ. ४०१, ४२१)। 'अस्रः कोणे मूर्धजे चाप्यश्रुणि[6] क्षतजेऽपि च' इत्यजयः॥ १६४॥

[1] बाहुलकात् क्त्रः इति भा. दी. (पृ. ४६०). [2] चक्रघन इति विवरणसंमतः पाठः. [3] बाणाः शराः B6. [4] B6 adds इत्यप्. [5] बाहुलकात् रः इति भा. दी. (पृ. ४६१). [6] श्मश्रुणि B5, B6. * तै. सं. २. ४. १२. २.

(पा.) ध्वान्तारिदानवा वृत्राः। दानवो दानवविशेषः॥ बलिहस्तांशवः कराः। [1]बली राजभागः॥ प्रदरा भङ्गनारीरुग्बाणाः। नारीरुगिति रजोरोगः॥ अस्राः कचा अपि। 'अस्रः कोणे मूर्धजेऽस्रमश्रुणि क्षतजेऽपि च' इति जयकोशः[2]॥ १६४॥

[1] बलिर्नाम A1. [2] A1 omits कोशः.

अजातश्रृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूबरौ।
स्वर्णेऽपि राः परिकरः पर्यङ्कपरिवारयोः॥ १६५॥

(वि.) [1]अप्रोढश्रृङ्गवृषभेऽप्यश्मश्रुपुरुषे तथा॥ 350॥
तूबरस्तुबरश्चापि वर्तते वाच्यलिङ्गकः।

तन्यते गोत्रादि यया सा[2] तुः, तूश्च। तूः लक्ष्म वृणोतीति[3] तूबरः। 'वृञ् वरणे'॥

स्वर्णे वित्ते वारिवाहे रैशब्दः परिकथ्यते॥ 351॥

[4]राति प्रीतिमिति राः। 'रा दाने'

[5]वृन्दप्रगाढयोश्चैव पर्यङ्कपरिवारयोः।
आरम्भे च परिष्कारे भवेत् परिकरस्तथा॥ 352॥

परिकीर्यते परिक्रियते वा परिकरः। 'कॄ विक्षेपे'[6]॥ १६५॥

[1] अप्रौढ° K4. [2] K3, K4 omit सा. [3] वरयति K4. [4] रीयत इति राः। 'री गतिरेषणयोः' K2, K3, K4. [5] बन्ध° J2, K4. [6] J2 adds 'डुकृञ् करणे'.

(विव.) अजातशृङ्गो—तूबरौ । शृङ्गोद्गमनयोग्यकालेऽपि गवादेरनुत्पन्नशृङ्गः, यश्च पुरुषः श्मश्रुप्रादुर्भावकालेऽपि अदृष्टश्मश्रुः, तावुभौ प्रत्येकं तूबरशब्दवाच्यौ । यथा—'प्राजापत्यमजं तूबरमालभेत' (तै. सं २. १. ६. १५) इत्यादीनि । तनोति पशुत्वं पुरुषत्वं च प्रकाशयतीति तूबरः । 'तनु विस्तारे' इत्यस्माद् [1]बाहुलकाद् 'भ्रमेश्च डूः' (उ. २.७१) इति डूप्रत्ययः । तूः[2] शृङ्गश्मश्र्वादिकं वृणोति छादितवदनुपलब्धि करोतीति तूबरः । 'जपादीनां वो वा' इति वत्वविकल्पे तूवरं च ।। स्वर्णेऽपि राः । अपिशब्दाद् धनमात्रेऽपि रैशब्दः पुंलिङ्गः । राति ददाति प्रीतिमिति राः । 'रा दाने' । 'रातेर्डैः' (उ. २. ६६) इति [3]डैप्रत्ययः । 'रायो हलि' (७. २. ८५) इत्यात्वम् । 'मुसलोपलरैकीलाः' इति पुंस्त्वाधिकारे शाकटायनः (लिङ्गानु. पृ. १०६) । धर्मकीर्तिस्तु—'धने त्वक्लीबे राः' इति पुंनपुंसकोभयलिङ्गत्वमाह(?) ।। परिकरः पर्यङ्कपरिवारयोः । परितः सर्वतो दार्वादिभिः क्रियत इति परिकरः । पर्यङ्कः मञ्च इत्यर्थः । [4]'पुंसि संज्ञायां घः' (३. ३. ११८) । [5]कीर्यतेर्वा । 'ऋदोरप्' (३. ३. ५७) । परिवारः परिजनः । शेषे—'परिकरः, स्यादारम्भसमूहयोः' इति । आरम्भे यथा—कृतपरिकरः । समूहे यथा—भृत्यपरिकर इति ।। १६५ ।।

[1] बहुलग्रहणात् Gm3, Tv. [2] Tv omits two lines. [3] डप्रत्ययः B5, B6.
[4] B6 adds 'डुकृञ् करणे'. [5] 'कॄ विक्षेपे' Tj1, Tj2.

(पा.) अजातशृङ्गो—स्वर्णेऽपि राः । धनेऽपि [1]स्यात् । [2]एकदेशविकृतस्यानन्यत्वाद् 'रायो हलि' (७. २. ८५) इति कृतह्रस्वस्याप्यात्वम् । 'सुराभिर्मित्रैः' ।। परिकरः पर्यङ्कपरिवारयोः । पर्यङ्क इति पर्यस्तिका । 'विवेके स्यात् परिकरः पर्यस्तिपरिवारयोः' इति वैजयन्ती (पृ. २६७, श्लो. ३३) ।। १६५ ।।

[1] B3, C1 omit स्यात्. [2] °विकृतमनन्यवदिति A1 (प. ७. २. ७८).

मुक्ताशुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु ।
कर्बुरेऽथ प्रतिज्ञाजिसंविदापत्सु संगरः ।। १६६ ।।

(वि.) [1][गुरुपत्न्यां] [2]बुद्धदेव्यां नक्षत्रे रूप्यवर्णयोः ।
[3]सुग्रीवपत्न्यां [4]मुक्तादिशुद्धौ शुद्धमणौ तथा ।। 353 ।।
तरलेतरसंबन्धे तारकात्युच्चनादयोः ।

कनीनिकायां महति तारस्त्रिषु विवक्षितः ।। 354 ।।

तरत्यनेनेति तारः । 'तॄ प्लवनतरणयोः' ।।

शारो वायौ [5]निवृत्तौ च नानावर्णे त्रिषु स्मृतः ।

शृणातीति शारः । 'शॄ हिंसायाम्' ।।

प्रतिज्ञायां संप्रहारे क्रियाकारे विषेऽपि च ।। 355 ।।
शमीफले विपत्तौ च संगरः संविदि स्मृतः ।

सम्यग् गीर्यत इति संगरः[6] ।। १६६ ।।

[1] बृहस्पतौ K5, K6. [2] बौद्ध° J2, K2, K5. [3] K5 omits 4 lines.
[4] मुक्तादियुक्तौ J2. [5] निवृत्ते K6. [6] K2 adds 'गॄ शब्दे'.

(विव.) मुक्ताशुद्धौ च तारः स्यात् । मौक्तिकानां श्लाघ्यत्वहेतुः शुद्धिशब्दाभिलप्यो गुणस्तार इत्यर्थः । तारयति अपकर्षपरिहाणेनोत्कर्षं प्रापयत्यात्मानमिति तारः । 'तॄ प्लवनतरणयोः' । घञ् (३. ३. १८) । शेषे—

**'तारो ना मौक्तिके शुद्धे गुरुसुग्रीवभार्ययोः ।
बौद्धदेव्यां तारकयोस्ताराथो रूप्यवर्णयोः ।
तारमत्युच्चनिध्वानतरीसंबन्धयोस्त्रिषु[1] ।।'**

इति । शुद्धे मौक्तिके च पुंलिङ्गस्तारशब्देनोच्यते । गुरुः बृहस्पतिः । तद्भार्यायां सुग्रीवभार्यायां चेत्यर्थः । तथा च पुराणम्—'यथा बृहस्पतेर्भार्यां तारां जग्राह शीतगुः' इति । बौद्धानां कुलदेवता तारादेवीति प्रसिद्धा । तारकयोरिति कनीनिकायां नक्षत्रे चेत्यर्थः । एवं गुरुभार्याद्यर्थपञ्चके स्त्रीलिङ्गः । रूप्यं रजतम् । वर्णः प्रणवाख्यः । स च मन्त्रशास्त्रे तारसंज्ञया[2] प्रसिद्धः । रजताद्यर्थद्वये नपुंसकलिङ्गः । [3]तरी नौः । अत्युच्चध्वनौ नौकासंबन्धे च विशेष्यनिघ्न इत्यर्थः ।। शारो—कर्बुरे । शृणाति संतापमिति शारः । 'शॄ हिंसायाम्' । 'शॄ वायुवर्णनिवृत्तेष्विति वक्तव्यम्' (वा. ३. ३. २१) इति घञ् । वायौ नरि[4] पुंलिङ्गे । कर्बुरे चित्रवर्णे वाच्यलिङ्गः । 'कृष्णरक्तः[5] सितः शारः' इति वैजयन्ती

(पृ. १६८, श्लो. २५) ।। अथ प्रतिज्ञा—संगरः। इममर्थमवश्यमित्थं करिष्यामीति निश्चयः प्रतिज्ञा। यथा—सत्यसंगरः। आजिः संग्रामः। यथा—संगरे मरणं पुण्यमिति। एककार्याणां द्वयोर्बहूनां वा कार्यनिर्वाहपर्यन्तं सर्वैरस्माभिरशिथिलोद्योगैः दृढयत्नैरस्मिन्नर्थे भवितव्यमिति शपथपूर्विका प्रवृत्तिः संवित्। यथा—अन्योन्यं कृतसंगरा इति। आपदि यथा—संगरे शरणं सुहृदिति। [6]'गॄ शब्दे' इत्यस्माद् धातोः संपूर्वाद् अधिकरणे भावे च 'ॠदोरप्' (३. ३. ५७) इत्यप्प्रत्ययः। विश्वप्रकाशेऽपि—'विषापदोः क्रियाकारे संगरे तु शमीफले' इति। शेषे—'शम्याः फले संगरः स्यात्' इति ।। १६६ ।।

[1] °तरि° Tv. [2] °संज्ञा Tv; °संज्ञायां प्रसिद्धः Gm3. [3] तरिः Tv. [4] वायौ नरि इति विवरणे पाठः. [5] °रक्तसितः इति मु. ग्र. [6] 'गॄ निगरणे' B5, B6.

(पा.) मुक्ताशुद्धौ च तारः स्यात्। 'तारो मुक्तादिसंशुद्धौ तरले शुद्धमौक्तिके' इति विश्वः (पृ. १२६, श्लो. १८) ।। शारो—कर्बुरे। [1]द्यूतगुलिकेऽपि स्यात्। 'कालः [2]कल्यो भुवनफलके क्रीडति प्राणिशारैः' (वै. श. ३. ३९[3]) ।। अथ प्रतिज्ञा—संगरः। संविच्छब्दः [4]क्रियाकारवचनः। 'संगरो ना क्रियाकारे प्रतिज्ञाविपदोर्युधि' इति वैजयन्ती (पृ. २६४, श्लो. ९२) ।। १६६ ।।

[1] °गुडेऽपि A1. [2] काल्या A1. [3] Apte's Dict. p. 1545. [4] क्रियाकारक° A1, C1.

वेदभेदे गुप्तिवादे मन्त्रो मित्रो रवावपि ।
मखेषुयूपखण्डेऽपि स्वरुर्गुह्येऽप्यवस्करः ।। १६७ ।।

(वि.) वेदभेदे गुप्तिवादे मन्त्रः समभिधीयते ।। 356 ।।

[1]मन्त्र्यत इति मन्त्रः। 'मत्रि गुप्तभाषणे' ।।

तीक्ष्णरश्मौ च सुहृदि मित्रः[2] स्याच्छत्रुशात्रवे ।

मेद्यतीति मित्रः[2]। 'ञिमिदा स्नेहने'। सुहृदि नपुंसकः ।।

मखे [3]च यूपखण्डे [3]च [4]शक्रशस्त्रे स्वरुः पुमान् ।। 357 ।।

स्वरति शत्रूनुपतापयतीति स्वरुः । 'स्वृ [5]शब्दोपतापयोः' ।।

अवस्करो रथाङ्गे च गुह्येऽप्यधमवर्तने ।

[6]अवकीर्यत इत्यवस्करः । 'कॄ विक्षेपे' ।। १६७ ।।

[1] मन्यत इति । 'मन ज्ञाने' K2; 'मनु अवबोधने' J2. [2] मित्रम् J2. [3] अपि for च J2, K5. [4] शस्त्रेऽपि स्वरुरुच्यते K5. [5] उपतापे J2. [6] अव अधः क्रियते K3.

(विव.) वेदभेदे गुप्तिवादे मन्त्रः । अर्थवादसहितब्राह्मणव्यतिरिक्तवेदभागः 'इषे [1]त्वा' इत्यादिको मन्त्रः । [2]गुप्तिवादो नाम राजामात्यप्रभृतीनां रहसि कर्तव्यार्थावधारणम् । मन्त्र्यते गुप्तिं भाष्यते कर्तव्यार्थमत्रेति मन्त्रः । 'मत्रि गुप्तभाषणे'[3] । चुरादिः । 'एरच्' (३. ३. ५६) इत्यधिकरणे अच्प्रत्ययः । 'मन ज्ञाने' इत्यस्माद्वा औणादिकप्रत्ययः । शेषे—'मन्त्रो देवादिसाधने' इति । श्रीरामादिदेवताप्रीतिसाधनभूतः षडक्षरादिर्मन्त्रः ।। मित्रो रवावपि । सूर्ये रूपभेदात् पुंलिङ्गः । अपिशब्दात् सुहृदि नपुंसकलिङ्गः प्रागुक्तः (१, पृ. ४६०) ।। मखेषुयूपखण्डेऽपि स्वरुः । मखो यज्ञः । इषुर्बाणः[4] । पश्वञ्जनार्थो यूपावतक्षणशकलो यूपखण्डः स्वरुः । तथोक्तमापस्तम्बेन—'अवतक्षणानां स्वरुरधिमन्थनश्च शकलः' (आ. श्रौ. सू. ७. ३. ३) इति । स्वरति शब्दायत इति स्वरुः । स्वर्यते उपतप्यते दह्यते पाशुकेनाग्निना इति वा स्वरुः । तथा चापस्तम्बः—'प्रत्याक्रम्य जुह्वां स्वरुमवधाय अनूयाजान्ते जुहोति' (आ. श्रौ. सू. ७. २७. ४) इति । 'स्वृ शब्दोपतापयोः' । औणादिक उकारप्रत्ययः[5] (उ. १. १०) । शोभनान्यरूंष्यस्येति स्वरुरिति केनचिदनधीताश्रुतश्रौतगन्धेन रेफान्तप्रकरणानुसंधाने शून्यधिया कृता निरुक्तिरुपेक्षणीया । प्रतापोऽपि—'यूपखण्डे सायके च स्वरुरध्वरवज्रयोः' इति । स्वरुशब्द उकारान्तः पुंलिङ्गश्च, 'शतकोटिः स्वरुः' इत्यत्र प्रागुक्तः (१, पृ. ३२) ।। गुह्येऽप्यवस्करः । अवकीर्यते छाद्यत इत्यवस्करः । गुह्यं गुदप्रदेशः । अपिशब्दाद् विष्ठायां प्रागुक्तः (१, पृ. ४०४) । यद्यपि 'वर्चस्केऽवस्करः' (६. १. १४८) इति विष्ठायां निपातितः,[6] तथापि वर्चस्कसंबन्धाद्[7] गुदप्रदेशोऽपीति वृत्तिः (काशिका[8] २, पृ. १४८) । निरूढलक्षणानां मुख्यतुल्यत्वाद् नानार्थत्वेनानुशासनं कृतम् ।। १६७ ।।

[1] यजुर्वेदः १. १. [2] गुप्तवाद इति स्वामी (पृ. ३११); गुह्यवाद इति भा. दी. (पृ. ४६१). [3] °परिभाषणे Tj1, Tv. [4] Tv adds यूपखण्डो यूपस्तम्भः. [5] 'शॄस्वृस्निहि . . . मनिभ्यश्च'. [6] निपात्यते Tv. [7] Tv adds लक्षणया. [8] अवपूर्वस्य किरतेः कर्मणि ऋदोरप् इत्यप्, निपातनात् सुट्। . . . तत्संबन्धाद् देशोऽपि तथोच्यते इति मु. ग्र.

(पा.) वेदभेदे गुप्तिवादे मन्त्रः। वेदभेदोऽथर्वा (?) ॥ मित्रो रवावपि। सख्यौ नपुंसकः[1] ॥ मखेषुयूपखण्डेऽपि[2] स्वरुः। मखश्च इषुश्च यूपखण्डश्च मखेषु-यूपखण्डमिति समासः। 'स्वरुर्वज्रेऽध्वरे बाणे यूपखण्डेऽपि च स्वरुः' इति विश्वः (पृ. १३१, श्लो. ७२) ॥ गुह्येऽप्यवस्करः। विष्ठायामपि [3]स्यात् ॥ १६७ ॥

[1] नपुंसकम् B3. [2] °खण्डेषु C1. [3] B3, C1 omit स्यात्.

आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ।
अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ॥ १६८ ॥

(वि.) आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ॥ 358 ॥

[1]आडम्बयति चित्तं विक्षिपतीत्याडम्बरः। [2]'डवि क्षेपे'।

अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ।

अभिह्रियत इत्यभिहारः[3] ॥ १६८ ॥

[1] आडम्ब्यते K5. [2] K2, K3 add डब. [3] K4 adds 'हृञ् हरणे'.

(विव.) आडम्बरः—गर्जिते। आदम्यन्ते भीरुजना अनेनेत्याडम्बरः। 'दमु उपशमे'। बरप्रत्ययः। पृषोदरादिश्च। 'डब डिब क्षेपे' इति चान्द्रो धातुरिति सुबोधिनीकारः[1]। शेषे—'आडम्बरोऽस्त्री संरम्भे' इति। संरम्भः संभ्रमः ॥ अभिहारो—संनहनेऽपि च। महाराजसभादौ परकीयदोषोद्भावनम् अभियोगः। सेनादेः सज्जीभावः संनहनम्। सम्यग्बन्धनं संनहनमिति केचित्। 'हृञ् हरणे' इति धातोरुपसर्गवशादनेकार्थत्वम्[2] ॥ १६८ ॥

[1] आडम्ब्यते। 'डबि क्षेपे' चुरादिः। घञ्। भावे वा। आडम्बं राति। 'आतोऽनुपसर्गे कः'। आडम्बयति वा। बाहुलकादरन् इति भा. दी. (पृ. ४६१). [2] घञ् (३. ३.१८).

(पा.) आडम्वरः—गर्जिते । संरम्भेऽपि [1]स्यात् । 'आडम्बरोऽस्त्री संरम्भे पटहे गजगर्जिते' इति वैजयन्ती (पृ. २७७, श्लो. ४) ।। अभिहारो—संनहनेऽपि च । अभियोगो वैरस्याभिगमः । 'पगकुर्येदिरिंचुट'[2] ।। १६८ ।।

[1] B3 omits स्यात्. [2] A1 adds चौर्यं परधनहरणम् । संनहनं कवचहरः । 'जोडुदोडु क्कांट'.

स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे ।
विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ।। १६९ ।।

(वि.) स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे ।। 359 ।।

[1]परिव्रियतेऽनेनेति परीवारः[2] ।।

वृक्षे पीठाद्यासने च मुष्टौ दर्भस्य विष्टरः ।

विस्तीर्यत इति विष्टरः[3] । 'स्तॄञ् आच्छादने' ।। १६९ ।।

[1] परिवार्यते J2, K5. [2] J2 adds 'वृञ् वरणे'. [3] वेवेष्टीति विष्टरः । 'विष्लृ व्याप्तौ' K2, K3.

(विव.) स्याज्जङ्गमे—परिच्छदे । चरिष्णुः गोमहिष्यादिः जङ्गमः । खड्गकोशः खड्गस्य पिधानम् । परिच्छदः परिजनः । परितो व्रियते वार्यते वा अनेनेति परीवारः । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'[1] (६. ३. १२२) इति दीर्घः ।। विष्टरो—पीठाद्यमासनम् । विटपी वृक्षः । दर्भमुष्टिः मधुपर्कादावासनत्वेन परिकल्पितः पञ्चविंशतिसंख्यकः[2] कुशात्मकः । पीठं कम्बलादिकं चेति द्विविधमासनम् । वृक्षश्च विष्टर इत्युच्यते । विस्तीर्यत इति विष्टरः । 'स्तॄञ् आच्छादने' । [3]'वृक्षासनयोर्विष्टरः' (८. ३. ९३) इति साधुः । 'विष्टरः पादपे पीठे कुशमुष्टौ च दृश्यते' इत्यजयः ।। १६९ ।।

[1] 'उपसर्गस्य घञ्' B5, B6. [2] °संख्याकः Tj2. [3] 'दर्भासनयोर्विष्टरे' Gm3, Tv.

(पा.) स्याज्जङ्गमे—पीठाद्यमासनम् ।। १६९ ।।

द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे ।
विपुले नकुले विष्णौ बभ्रुः स्यात् पिङ्गले त्रिषु ।। १७० ।।

(वि.) द्वारि द्वाःस्थे [1]प्रतीहारो द्वारपाल्यां स्त्रियां भवेत् ।। 360 ।।

प्रतिह्रियतेऽनेनेति प्रतीहारः[2] ।

वह्नौ [3]शूलिनि विष्णौ च विधातृमुनिभेदयोः ।
विलासे नकुले वभ्रुः पिङ्गले विपुले भवेत ।। 361 ।।

[4]विभर्तीति वभ्रुः ।। १७० ।।

[1] वेत्रपाणौ K3, K6. [2] प्रतिहारः K3, K6. [3] शुचिनि K6. [4] भ्रियत इति J2, K5; K3, K4 add 'भृञ् भरणे'.

(विव.) द्वारि—प्रतीहार्यप्यनन्तरे। प्रतिहार्यते निवार्यते वैदेशिकजन-प्रवेशोऽत्रेति प्रतिहारो द्वारम्। करणार्थे तु प्रतिहारो द्वारपालः। अनन्तरे पूर्वोक्तार्थद्वयापेक्षया संनिहिते द्वाःस्थरूपार्थे स्त्रीविशिष्टे सति तत्र [1]प्रतिहारशब्दो ङीबन्ते वर्तत इत्यर्थः। रेफान्तमध्ये नकारान्तमनाशङ्कनीयमेव। अपिशब्दाद् राजपरिचारिकायामपि प्रतिहारीशब्दः। तथा च वैजयन्त्याम्—'प्रतीहारी तु राजानं संभावयति या सदा' इति (पृ. १०७, श्लो. ३८)। या स्त्री राजानमनु-लेपनकेशप्रसाधनादिभिरलंकरोति सा स्त्री प्रतिहारीत्यर्थः।। विपुले—पिङ्गले त्रिषु। विपुलो विशालः। पर्वतादि बिभर्तीति बभ्रुः। 'भृञ् भरणे'। 'कुर्भ्रश्च' (उ. १. २२) इति कुप्रत्ययो धातोर्द्वित्वं[2] च। शेषे—

बभ्रुर्वह्नौ विधातरि ।
विलासे मुनिभेदे च भवेत् पार्वतिवल्लभे ।।

इति। [3]ङ्यापोरिति पार्वतीशब्दस्य ह्रस्वः ।। १७० ।।

[1] प्रतीहारशब्दोऽजन्ते वर्तते Tv; 'हृञ् हरणे' घञ् (३. ३. १६). [2] द्विर्वचनं B5, B6. [3] 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' (६. ३. ६३).

(पा.) द्वारि—प्रतीहार्यप्यनन्तरे। अनन्तरे प्रतिहार्यपि स्यात्। द्वाःस्थे [1]प्रतिहारप्रतीहारशब्दौ द्वौ च वर्तेते ॥ विपुले—पिङ्गले त्रिषु। [2]विपुल इति नकुलविशेषणम् ॥ १७० ॥

[1] प्रतीहारी B3. [2] A1 omits the sentence.

सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु।
दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ १७१ ॥

(वि.) सारः स्थिरांशे न्याय्ये स्यादुत्कर्षबलयोर्भवेत्[1]।

सरतीति सारः[2] ॥

दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ 362 ॥

दुष्टमासमन्ताद् [3]उदर्यत इति दुरोदरम् ॥ १७१ ॥

[1] उत्कर्षकरयोर्बले K5. [2] K2 adds 'सृ गतौ'. [3] उदीर्यते K5.

(विव.) सारो—वरे त्रिषु। सरति शरीरं व्याप्नोतीति सारः। यथा—गोग्रहे दृष्टसारो धनंजयः इति। स्थायित्वेन [1]कालान्तरं व्याप्नोतीति सारः। स्थिरांशे यथा—चन्दनसारः, खदिरसारः इति। 'सृ स्थिरे' (३. ३. १७) इत्यत्र 'व्याधिमत्स्यबलेष्विति वक्तव्यम्' इति कर्तरि घञ्। अत्रार्थद्वये बलस्थिरांशयोः रूपभेदात् पुंलिङ्गः। सरति मनीषिणां हृदयमिति सारं न्याय्यम्। यथा—नैतत्सारमिति। न्याय्ये न्यायादनपेतमित्यर्थे नपुंसकलिङ्गः। वरे श्रेष्ठे वाच्यलिङ्गः। सारो देशः। सारा वाराणसी। सारो देवेषु शंकरः। सारं कुरुक्षेत्रमिति। नन्वस्य वाच्यलिङ्गत्वे, 'सारं सारङ्गलोचना' 'राज्ये सारं वसुंधरा' इत्यादौ कथं विशेष्यलिङ्गत्वाभाव इति चेत् सत्यम्। 'सामान्यविशेषभावत्वेन पृथग्वाक्यत्वेन योजनायां न पूर्वदोषावकाशः' इति गणरत्नमहोदधावुक्तम् (२. श्लो. ७२) ॥ दुरोदरो—दुरोदरम्। [2]दुष्टमा समन्तादुदरमस्येति दुरोदरो द्यूतकरः। तत्संबन्धात् पणभूतं धनम्। द्यूतकर्म च नपुंसकेन दुरोदरशब्देनोच्यते। 'दुरोदरोऽस्त्रियां द्यूतः' इत्यजयः। 'आश्रित्य दुर्गं गिरिकन्दरोदरं [3]क्रीडन्ति तस्मिन् सततं

दरोदरम्' इति [4]यमककाव्ये निरुकारं गोवर्धनः पठतीति सर्वानन्दः (टी. स. ३. पृ. १३०) ।। १७१ ।।

[1] सारान्तरं Tv. [2] Tv omits the sentence. [3] क्रीडन्त्यमुष्मिन् Tv; क्रीडन्नमुष्मिन् इति मु. ग्र. [4] Omitted in *Ṭīkāsarvasva*.

(पा.) सारो—वरे त्रिषु। वलं सामर्थ्यम्। [1]तत्र च स्थिरांशे पुंलिङ्गः। न्याय्यमुचितापरित्यागः। तत्र नपुंसकम्। वरं श्रेष्ठम्। [2]अत्र त्रिलिङ्गः। केषांचिन्नपुंसकमेव।

> राज्ञः सारं वसुधा [3]वसुधायामपि पुरम् पुरे सौधम् ।
> [4]सौधे तल्पं तल्पे वराङ्गना सर्वस्वम्[5] ।।

इति ।। दुरोदरो—दुरोदरम्। 'आश्रित्य दुर्गं गिरिकन्दरोदरे क्रीडन्त्यमुष्मिन् सततं दरोदरम्' इति हरिप्रबोधयमकाद् दरोदरो निरुकारः इति गोवर्धनवचनात्। क्वचिद् दुरोदरमिति सोकारम् ।। १७१ ।।

[1] A1 omits. [2] तत्र B3, C1. [3] वसुंधरायाम् A1. [4] तत्र C1. [5] सारम् B3.

> **महारण्ये दुर्गपथे कान्तारं पुंनपुंसकम् ।**
> **मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ।। १७२ ।।**

(वि.) महारण्ये दुर्गपथेऽप्युपसर्गादिकेऽपि च ।
इक्षुभेदे च कान्तारं पुंनपुंसकमिष्यते ।। 363 ।।

कस्य [1]सुखस्यान्तरर्यते प्राप्यत इति कान्तारम्[2] ।।

> [3]कृपणेऽन्यसुखद्वेषे क्रोधेऽन्यशुभवैरिणि ।
> मक्षिकायां च मात्सर्ये मत्सरः परिकीर्तितः[4] ।। 364 ।।

माद्यति मदात् सरतीति [5]वा मत्सरः[6] ।। १७२ ।।

[1] अन्तरं for अन्तः K3, K6. [2] कान्तारः K2, K4. [3] अन्यशुभद्वेषे K4. [4] परिकथ्यते K2, K4. [5] J2, K2 omit. [6] J2, K2 add 'मदी हर्षे'.

(विव.) महारण्ये—पुंनपुंसकम्। चोरपाषाणकण्टकादिबाहुल्येन दुःसंचारो मार्गो दुर्गपथः। कस्य जलस्य सुखस्य वा अन्तं नाशम् ऋच्छतीति कान्तारम्। इक्षुभेदे तु केवलपुंलिङ्गः प्रागुक्तः (१, पृ. ३१७)॥ मत्सरो—कृपणयोस्त्रिषु। [1]विद्याधनाद्यतिशयनिमित्तमन्यस्य यच्छुभाधिक्यं तद्विषयो द्वेषोऽसहत्वम्, तत्र मत्सरशब्दः पुंलिङ्गः। तथाविधमत्सरयुक्ते दीने च विशेष्यनिघ्नः। माद्यति परक्लेशेन हृष्यतीति मत्सरः। 'मदी [2]हर्षे'। 'कृधूमदिभ्यः कित्' (उ. ३.७३) इति सरप्रत्ययः। 'खरि च' (८.४.५५) इति चर्त्वं च। तद्धर्मत्वाद् द्वेषमात्रमपि मत्सर उच्यते। शेषे—'मत्सरो मक्षिकाक्रोधौ' इति। क्रोधोऽमर्षः॥ १७२॥

[1] अन्यस्य यच्छुभं विद्याधनादिनिमित्तमधिकम् Tv. [2] B5, B6 add ग्लपनयोः.

(पा.) महारण्ये—कृपणयोस्त्रिषु। मक्षिकायां स्त्री। 'मत्सरा मक्षिकायां स्त्री[1]' इति विश्वः (पृ. १३४, श्लो. ११८)॥ १७२॥

[1] मक्षिकायां च इति मु. ग्र.

देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये।
वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना॥ १७३॥

(वि.) अभीष्टदेवाच्च[1] वृते श्रेष्ठे जामातृषिङ्गयोः[2]।
त्रिफलायां शतावर्यां वृतौ काश्मीरदेशजे॥ 365॥
मनाक्प्रियेऽप्यव्ययं स्याद्वरस्त्रिषु [3]च कीर्तितः।

व्रियत इति वरः[4]॥

करीरस्तरुभेदे [5]च घटे वंशाङ्कुरेऽपि च॥ 366॥
चीरिकायां[6] करीरः स्याद् दन्तमूले च दन्तिनः।

[7]करिणः ईरयतीति करीरः। 'ईर [8]प्रेरणे'॥ १७३॥

[1] °दैवा° J2. [2] षिङ्गो विटः. [3] हि K4. [4] K2, K4 add 'वृञ् वरणे'. [5] स्यात् J2. [6] वीरुधायां K5. [7] करिणं J2. [8] गतौ K3; क्षेपे K6.

(विव.) देवाद्वृते—मनाक्प्रिये। मन्त्रपुरश्चरणादिभिः प्रसन्नमहेश्वरादेर्देवाल्लब्धे पुत्रधनादौ रूपभेदात् पुंलिङ्गः। यथा—'वरं वृणीष्वेति। सोऽब्रवीत् वरं वृणे। एष एव मे वरोऽलं यद्भगवन्तौ प्रत्यक्षं पश्यामि' इत्यादि। श्रेष्ठे तु वाच्यलिङ्गः। यथा—राजवरः, ग्रामवरः[1]। मनाक् ईषत् प्रिये तु नपुंसकलिङ्गः। यथा—'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा' इति (मेघ. १. ६)। ईषत्प्रिये तु वरमित्यव्ययमप्यस्तीति [2]स्वामी (पृ. ३१२)। व्रियत इति वरः। 'वृञ् वरणे' 'वृञ् संभक्तौ'। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इति, कर्मण्यप्प्रत्ययः। शेषे—

'वरो जामातृषिड्गयोः।
शतावर्यां वरी पाठा वरा तु त्रिफला भवेत्।'

इति। 'काश्मीरजन्माग्निशिखं वरम्' इति गतम् (१, पृ. ४४०)॥ वंशाङ्कुरे—वटे च ना। वंशाङ्कुरो वेणुप्ररोहः। तरुभेदः ग्रन्थिलाख्यः प्रागुक्तः (१, पृ. २६०)। घटः कलशः। उभयत्र पुंलिङ्गः। किरतेः करोतेर्वा औणादिक ईरन्प्रत्ययः[3] (उ. ४. ३०)। शेषे—'[4]करीरी चीरिकायां[5] च दन्तभेदे च दन्तिनाम्' इति। चीरिका झिल्ली॥ १७३॥

[1] वरो वर्णः, वरकुलमित्यादि B5, B6. [2] अव्ययमित्येके इति मु. ग्र. (पृ. २१३). [3] 'कॄशॄपॄकटिपटिशौटिभ्य ईरन्'. [4] करीरा Tj2. [5] चिरिकायां B6.

(पा.) [1]देवाद्वृते—मनाक्प्रिये। देवतासकाशादीप्सिते पुंलिङ्गः। जामातर्यपि पुंलिङ्गः[2] स्यात्। श्रेष्ठे त्रिलिङ्गः। अधिपतावपि त्रिलिङ्गः स्यात्। ईषत्प्रिये नपुंसकलिङ्गः[3]॥ वंशाङ्कुरे—घटे च ना॥ १७३॥

[1] दैवात् A1. [2] B3, C1 omit. [3] नपुंसकम् C1.

ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम्।
यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु॥ १७४॥
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु।

(वि.) सेनायां जघने माल्ये हस्तसूत्रविभूषयोः।
व्रणशुद्धौ प्रतिसरो मन्त्ररक्षाकृतौ भटे॥ 369॥

[1]प्रतिसरतीति प्रतिसरः[2] ।।

> [3]यमे वायौ सूर्यविष्ण्वोस्तुरङ्गशुकयोरपि ।
> [4]सर्पे कपौ हिमांशौ च शक्रे सिंहे च तापसे[5] ।। 370 ।।
> रश्मौ लोकान्तरे भेके कपिले हरिते तथा ।
> राजभेदे दैत्यभेदे हरिस्तु समुदाहृतः ।। 371 ।।

हरतीति हरिः[6] ।। १७४ ।।

[1] K2 omits 4 lines. [2] J2, K4 add 'सृ गतौ'. [3] मेघे K5. [4] सप्तौ K6. [5] दानवे K6. [6] K3 adds 'हृञ् हरणे'.

(विव.) <u>ना चमूजघने—अस्त्रियाम्</u>। व्यूढसेनायाः पश्चाद्भागः चमूजघनम्। तत्र प्रतिसरशब्दः पुंलिङ्गः[1]। [2]विवाहादौ वधूवरयोर्मणिबन्धस्थाने बन्धनीयमूर्णामयं सूत्रं हस्तसूत्रम्। प्रतिसरत्यत्रेति प्रतिसरः। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इत्यधिकरणे घप्रत्ययः। शेषे—

> 'रक्षाकृतौ नियोज्ये च माल्यमन्त्रविशेषयोः ।
> विभूषणेर्मशुद्धयोश्च ज्ञेयः प्रतिसरो मतः ।।'

इति। अभिमन्त्रितेन भस्मना रक्षाकरणम्[3]। नियोज्यः परिजनः। मन्त्रविशेषे यथा—'प्रतिसर प्रतिधाव' इत्यादिराथर्वणः प्रसिद्धः। ईर्मशुद्धिः व्रणशुद्धिः ।। <u>यमानिलेन्द्र—कपिले त्रिषु</u>। अनिलो वायुः। अंशुः किरणः। वाजी घोटकः। अहिः सर्पः। हरति पापादिकं [4]स्वनिर्वृत्यर्थमिति हरिः। हरतेरौणादिक इप्रत्ययः[5] (उ. ४. १४०)। सर्वत्र पुंलिङ्गः[6]। पलाशवर्णेऽपि हरिशब्दः ।। १७४ ।।

[1] Tv adds तद्युक्ते वाच्यलिङ्गः. [2] Gm3 omits the sentence. [3] रक्षाकृतिः B6, Tj2. [4] स्वनिवृत्त्यर्थं Tj1, Tj2. [5] 'अच इः'. [6] B5, B6 add कपिलवर्णगुणे च पुंलिङ्गः। तद्वति वाच्यलिङ्गः.

(पा.) <u>ना चमूजघने—अस्त्रियाम्</u>। मालायां स्त्रीलिङ्गः[1]। <u>यमानिल—भेकेषु</u>। भेदेष्विति वा पाठः[2]। <u>हरिर्ना कपिले त्रिषु</u>। कपिलवर्णे त्रिलिङ्गः ।। १७४ ।।

[1] त्रिलिङ्गः A1. [2] C1 omits.

शर्करा कर्परांशेऽपि यात्रा स्याद्यापने गतौ ॥ १७५ ॥
इरा भूवाक्सुराप्सु स्यात् तन्द्री निद्राप्रमीलयोः ।
धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ॥ १७६ ॥

(वि.)　[1]कर्परांशे रोगभेदे पाषाणे शकले तथा ।
[2]शर्करान्वितदेशे च शर्करा परिकीर्तिता ॥ 372 ॥

शृणातीति शर्करा । 'शॄ हिंसायाम्' ॥

देवार्चनोत्सवे गत्यां यात्रा भोगादिवर्तने ।

[3]यात्यनयेति यात्रा । 'या प्रापणे' ॥

इरा भुवि जले वाचि सुरास्वर्वश्ययोरपि ॥ 373 ॥

[4]एत्यनयेति इरा । 'इण् गतौ' ॥

तन्द्रा तु तन्द्री तन्द्रश्च निद्रायां च प्रमीलने ।

[5]तननमिन्द्रियाणां विस्तारं द्रातीति तन्द्रा[6] ॥

वसुमत्यामामलक्यामुपमातरि मातरि ॥ 374 ॥
पोत्र्यां च धारयित्र्यां च धात्री समभिकथ्यते ।[7]

[8]धापयतीति धात्री । 'धेट् पाने' ॥ १७५–६ ॥

[1] शर्करायां K_6.　[2] कर्परा° K_1.　[3] यानं याति K_2, K_3; यान्त्यनेति J_2. [4] ईरयति, 'ईर प्रेरणे', K_2, K_3, K_4.　[5] ततं K_2.　[6] K_2, K_4 add 'द्रा कुत्सायां गतौ'.　[7] संपरिकथ्यते K_5.　[8] धारयति J_2, K_4.

(विव.) <u>शर्करा कर्परांशेऽपि</u> । शीर्यत इति शर्करा । शृणातीति वा । शं करोतीति वा । 'शर्करादिभ्योऽण्' (५. ३. १०७) इति निर्देशात् साधुः । शीर्यतेरौणादिकः करन्प्रत्ययो वा (उ. ४. ३) । <u>विश्वप्रकाशेऽपि</u>—

'शर्करा खण्डविकृतावुपलाकर्परांशयोः ।
शर्करान्वितदेशे च रुग्भेदे शकलेऽपि च ॥'

इति। कर्परो भिन्नघटादेः कपालम्। तथा च प्रतापः—'कर्परस्तु कपाले स्याच्छस्त्रभेदकटाहयोः' इति। तस्यांश एकदेशः। रुग्भेदो रोगविशेषः शर्कराख्यः [1]अश्मरीसंज्ञकश्च ॥ यात्रा स्याद् यापने गतौ। स्नानभोजनादिकया दिनचर्यया वर्तनं यात्रा। यथा—शरीरयात्रा, प्राणयात्रा इति। गतिर्गमनम्। गते यथा—[2]काशियात्रा, पर्वतयात्रा। यात्यनयेति यात्रा। 'हुयामाश्रुभसिभ्यस्त्रन्' (उ. ४. १६६) इति त्रन्प्रत्ययः। शेषे—'यात्रा देवार्चनोत्सवे' इति। देवतामहोत्सवे यथा—'भगवतः कालप्रियनाथस्य यात्रायामार्यमिश्रान् विज्ञापयामि' इति (उत्तर. १) ॥ इरा—प्रमीलयोः। एतीति इरा। 'इण् गतौ'। औणादिको रन्प्रत्ययः (उ. २. ३१[3])। शेषे—'इरा अप्सरःसु' इति। इरा नाम काचिदप्सरःस्त्री ॥ तन्द्री निद्राप्रमीलयोः। निरिन्द्रियात्मप्रदेशे मनसोऽवस्थानं निद्रा। शरीरखेदजनितो मोहप्रायः प्रमादः प्रमीला, निद्रातः पूर्वावस्था। [4]'अवितॄस्तृतन्त्रिभ्यः ईः' (उ. ३. १५६) इति तन्द्रीः सौत्राद् धातोः ईःप्रत्ययः। ङयन्तत्वाभावात् सुलोपाभावः। शेषे—'तन्द्रिश्च तन्द्री समार्थकौ' इति। तस्मादेव सौत्राद्धातोः 'गुरोश्च हलः' (३. ३. १०३) इत्यकारप्रत्यये तन्द्रा। तत्रैव 'प्रज्ञादिभ्यश्च' (५. ४. ३८) इति ङीपि तन्द्री। 'संज्ञापूर्वको बिधिरनित्यः' (प. २. ४. ७६) इति वृद्ध्यभावः ॥ धात्री—आमलक्यपि। उपमाता स्वस्तन्यप्रदानेन पोषणकारिणी। धयन्त्येनामिति धात्री। 'धेट् पाने'। 'धः कर्मणि ष्ट्रन्' (३. २. १८१)। षित्त्वे च ङीष् प्रत्ययः[5] (४. १. ४१)। धत्ते धारयतीति वा धात्री भूमिः। पोषयित्री भूतधात्री। आमलक्यामुक्ता ॥ १७५–६ ॥

[1] कश्मली Tv. [2] काशी° Gm3. [3] 'ऋज्रन्द्राग्र . . . वम्रेरामालाः'. [4] मुद्रितकौमुद्यां तु 'अवितॄस्तृतन्त्रिभ्यः ईः' इत्येव दृश्यते; 'द्रा कुत्सायां गतौ'। '—निद्रा-तन्द्रा—' (३. २. १५८) इति तदो नान्तत्वं निपात्यते इति भा. दी. (पृ. ४६३). [5] 'षिद्-गौरादिभ्यश्च'.

(पा.) शर्करा कर्परांशेऽपि। खण्डशर्कराखण्डेऽपि स्यात् ॥ यात्रा स्याद् यापने गतौ। यापनं कालक्षेपः ॥ इरा—प्रमीलयोः। प्रमीला[1] 'कूरिपाटु'[2] ॥ धात्री—आमलक्यपि। उपमाता [2]'दादि' ॥ १७५–६ ॥

[1] C1 adds आलस्यम्. [2] B3 omits.

क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।
त्रिषु क्रूरेऽधनेऽल्पेऽपि क्षुद्रो मात्रा परिच्छदे ॥ १७७ ॥
अल्पे च परिमाणे स्यान्मात्रं कार्त्स्न्येऽवधारणे ।

(वि.)　वेश्यायां कण्टकार्यां च [1]नटीशीलविहीनयोः ।
क्षुद्रा स्यादङ्गहीनायां सरघाधूर्तयोरपि ॥ 374 ॥
[2]अधने कृपणे क्रूरेऽप्यल्पे क्षुद्रस्त्रिषु स्मृतः ।

[3]क्षुदं रातीति क्षुद्रः । 'रा दाने' ॥

परिच्छदे धने वृत्ते कर्णभूषाक्षरांशयोः[4] ॥ 375 ॥
मात्रा भवेत् परीमाणे कार्त्स्न्येऽल्पेऽप्यवधारणे ।
स्वार्थसंशययोश्चैव मात्रं तु परिकीर्तितम् ॥ 376 ॥

[5]मीयत इति मात्रा । 'माङ माने' ॥ १७७ ॥

[1] धन for शील K5.　[2] अधमे J2.　[3] क्षुद्यत इति, 'क्षुदिर् संचूर्णने' K6.
[4] °अङ्गरागयोः K5.　[5] J2 adds अनया.

(विव.) क्षुद्रा—अल्पेऽपि क्षुद्रः । व्यङ्गा अङ्गहीना । नटी [1]नर्तकस्त्री । [2]वेश्येत्याचारहीनोपलक्षणम् । सरघा मधुमक्षिका । कण्टकारिका निदिग्धिका । व्यङ्गादिपञ्चके स्त्रीलिङ्गः । क्रूरनिकृष्टस्वल्पेषु [3] विशेष्यनिघ्नः । क्षुणत्ति क्षुद्यते वा क्षुद्रः । 'क्षुदिर् [4]संपेषणे' । औणादिको रक्प्रत्ययः[5] (उ. २. १३)। क्षुदं रातीति वा क्षुद्रः। अपिशब्दात् कृपणे प्रागुक्तः (२, पृ. ६८·६) ॥ मात्रा—अवधारणे । परिच्छदः परिकरः । यथा—कापालिकस्य मात्रा महामात्राः प्रधानानि । अल्पे यथा—'सुप्प्रतिना मात्रार्थे' (२. १. ९) इति सूत्रे काशिका—मात्रा[6] स्तोकमल्पमिति पर्याया इति (१, पृ. ८६) । परिमाणे यथा—मात्रासि सर्वकालम्,[7] हस्तमात्रोऽङ्कुश इति । अस्मिन्नर्थत्रये रूपभेदात् स्त्रीलिङ्गः । कार्त्स्न्ये यथा—प्राणिमात्रं न हिंस्यात् इति । सर्वानपि प्राणिनो न हिंस्यात् इत्यर्थः । अस्य परिहारेणैकस्यैव वस्तुनो निष्कर्षणमवधारणम् । यथा—शाकमात्रं भुङ्क्ते इति । अत्रोभयत्र रूपविशेषादेव [8]नपुंसकत्वम् । 'माङ माने' इत्यस्माद् धातोः 'हुयामाश्रुभसिभ्यस्त्रन्' (उ. ४. १७०) इति औणादिकः त्रन्प्रत्ययः । शेषे—'स्त्रियां मात्रा

भूषणे स्याद् वर्णवृत्तांशयोर्धने' इति । भूषणे यथा—हस्तमात्रा, कर्णमात्रा इति। वर्णस्याप्यक्षरैकदेशे यथा—एकमात्रो ह्रस्वः । द्विमात्रो दीर्घ इति । वृत्ते यथा—मात्रावृत्तम् इति । धने यथा—को जीवेन्मात्रया विना इति ।। १७७ ।।

[1] नर्तकस्य Tj1, Tj2. [2] B6 omits आचार. [3] स्वल्पे तु Gm1. [4] संचूर्णने B6. [5] स्फायितञ्चि . . . शुभिभ्यो रक्. [6] इत्यत्र Gm1; मात्रा बिन्दुः इति मु. ग्र. [7] Gm1 adds स्यात्. [8] नपुंसकलिङ्गः Gm1.

(पा.) क्षुद्रा—कण्टकारिका । व्यङ्गेत्यङ्गहीना । त्रिषु—परिमाणे स्यात् । परिच्छदे—कर्णमात्रा, हस्तमात्रा । अल्पे—सूपस्य मात्रा । परिमाणे—हस्तमात्रोऽङ्कुशः । मात्रं कात्स्न्र्येऽवधारणे । कात्स्न्र्यार्थे—प्राणिमात्रं न हिंस्यात् । अवधारणे—पयोमात्रं भुङ्क्ते ।। १७७ ।।

आलेख्याश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः ।। १७८ ।।
योग्यभाजनयोः पात्रं पत्रं वाहनपक्षयोः ।
निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः ।। १७९ ।।

(वि.) आश्चर्ये व्योम्नि [1]किर्मीर आलेख्ये चित्रमुच्यते[2] ।
तिलके दन्तिकायां च [3]ताराभेदसुभद्रयोः ।। 377 ।।
[4]गोदुम्ब्यायामाखुपर्ण्यां चित्रा सर्पे सुरस्त्रियाम् ।

चित्रीयत इति त्रित्रम् । 'चित्र[5] चित्रकरणे' ।।

दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः ।। 378 ।।

कल्यत इति कलत्रम् । 'कल शब्दसंख्यानयोः' ।।

स्रुवादौ तीरमध्ये च राजमन्त्रिणि भाजने ।
योग्ये वित्ते च वाद्ये च प्रवेश्ये रूपकेऽपि[6] च ।। 379 ।।
पर्णे पात्रं भवेत् पात्र्यां शुद्धयन्त्योः स्त्रियां स्मृता ।

पीयतेऽनेनेति पात्रम् । पायत इति वा । 'पा पाने' 'पा रक्षणे' ।।

पत्रं भवेद् वाहने च पलाशगरुतोरपि ।। 380 ।।

पतत्यनेनेति पत्रम्। 'पत्लृ गतौ'॥

ग्रन्थनिर्दिष्टयोः शास्त्रं [7]शस्त्रोत्पन्नेऽपि कथ्यते ।

[8]शास्यतेऽनेनेति शास्त्रम्। 'शासु अनुशिष्टौ'॥

छुरिकायां भवेच्छत्री शस्त्रं त्वायुधलोहयोः ॥ 381 ॥

शस्यतेऽनेनेति शस्त्रम्। 'शसु हिंसायाम्'॥ १७८–९ ॥

[1] किम्मीरे J2, K3.　[2] इष्यते K4.　[3] तार° J2, K4.　[4] गोडुम्बायां K2.
[5] चित्रिञ् आश्चर्ये K2, K4.　[6] रूपकेषु K5.　[7] शस्तोत्पन्ने K5.　[8] शिष्यते J2.

(विव.)　आलेख्याश्चर्ययोश्चित्रम्। चीयते कुड्यपटादौ हरितालादिवर्णैरिति चित्रम् आलेख्यम्, सुरनरतुरगादिप्रकृतिः। 'चिञ् चयने'। 'अमिचिमिदिशसिभ्यः क्त्रः' (उ. ४. १६५) इति क्त्रप्रत्ययः। चित्रयति कदाचिद् भवतीति चित्रम् आश्चर्यम्, आकस्मिकाकालकुसुमफलादि। चौरादिः[1]। शेषे—

अथ चित्रके
'[2]खे चित्रं भाह्यप्सरःसु स्त्र्याखुपर्णीसुभद्रयोः ।
गोतुम्बौ दन्तिकायां च पुंसि स्याद् वह्निसंज्ञके ॥'

इति। चित्रकं तिलकम्। खमाकाशम्। उभयत्र रूपभेदाद् नपुंसकलिङ्गः। भं हस्तनक्षत्रानन्तरनक्षत्रम्। अहिः सर्पः[3]। चित्रा नामाप्सरोविशेषः। [4]नक्षत्रादिदन्तिकान्तेषु स्त्रीलिङ्गः। चित्रमूलाद्यौषधिविशेषे पुंलिङ्गः। कर्बुरवर्णे त्रिलिङ्गः प्रागुक्तः (१, पृ. १०१)॥ कलत्रं श्रोणिभार्ययोः। श्रोणिः कटिभागः। कलं त्रायत इति कलत्रम्[5]। शेषे—'नृपतिप्रभृतीनां तु दुर्गस्थानं कलत्रकम्' इति। स्वार्थे कप्रत्ययः पादपूरणार्थे। यथा—'पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरनभिभूतममूर्वहन्ति' इति माघकाव्ये (शिशु. ४. ३४)॥ योग्यभाजनयोः पात्रम्। दातारं नरकपातनात् पाति रक्षतीति पात्रम्। योग्यं कुलशीलविद्यासंपन्नं संप्रदानमित्यर्थः। [6]कृपापात्रमित्यादावुपचाराद् अर्हमात्रे प्रयोगः। भाजनममत्रम्। शेषे—'रूपकेषु [7]प्रवेशार्हे पात्रं स्याद् राजमन्त्रिणि' इति। रूपके नाटकादौ, प्रवेशार्हे नायकादौ। यथा—पात्रप्रवेशः इति। मन्त्रिणि यथा—महापात्रमिति। 'पात्रं

तदन्तरम्' इति गतम् (१, पृ. १५६)। 'पात्रं स्रुवादिकम्' इति गतम् (१, पृ. ४६४)। अमत्रवचनः [8]पात्रशब्दो लिङ्गत्रयवानिति वक्ष्यते (३. ५. ४२)। तत्र स्त्रीलिङ्गे— 'पा पाने' 'पा रक्षणे' 'पै शोषणे' एभ्यो धातुभ्यः कर्तरि तृचि (३. १. १३३) स्त्रियां ङीप्प्रत्यये पात्री पानकर्त्री रक्षिका शोषिका च इति ।। पत्रं वाहनपक्षयोः। वाहनं बलीवर्दादिकम्। 'पत्रं पलाशं छदनम्' इति गतम् (१, पृ. २२३) ।। निदेश-ग्रन्थयोः शास्त्रम्। [9]निदेशः आज्ञा। ग्रन्थः शांकरभाष्यमहाभाष्यादिः। 'शासु अनुशिष्टौ'। भावे करणे च औणादिकः [10]ष्ट्रन्। [11]शस्त्रशब्दाद् भवाद्यर्थे तद्धितोत्पत्तौ वाच्यलिङ्गः ।। शस्त्रमायुधलोहयोः। आयुधं खड्गच्छुरिकादि। [12]लोहं कालायसम्। 'स्याच्छस्त्री चासिपुत्री च' इति गतम्[13] (१, पृ. ५३६) ।। १७८–९ ।।

[1] चौरादिकः Gm1. [2] भे Gm1. [3] सर्पविशेषः Gm1. [4] नक्षत्रादिषु Tj1, Tj2. [5] B6 adds 'त्रैङ पालने'. [6] Gm1 omits the sentence. [7] प्रवेश्ये च Gm1. [8] पात्रीशब्दः स्त्रीलिङ्गोऽप्यस्तीति लिङ्गसंग्रहे वक्ष्यते Gm3, Tv. [9] निर्देशः Tv. [10] 'सर्वधातुभ्यः ष्ट्रन्' (उ. ४. १६०). [11] शस्त्रे भवं शास्त्रमिति शास्त्रं वाच्यलिङ्गम् Gm1, Gm3. [12] कालायसं लोहशब्देनोच्यते Gm1. [13] शस्यतेऽनेन। 'शसु हिंसायाम्'। 'दाम्नीशस ...' (३. २. १८२) इति ष्ट्रन् इति भा. दी. (पृ. ४९३).

(पा.) आलेख्याश्चर्ययोश्चित्रम्। क्लीबे स्यात्। तिलके स्त्रियाम्। [1]'आलेख्याश्चर्ययोश्चित्रं क्लीबे स्यात् तिलके स्त्रियाम्' इदि रभसः। कलत्रं श्रोणिभार्ययोः। दुर्गस्थानेऽपि स्यात्। 'दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः' इति [2]रुद्रः ।। योग्यभाजनयोः—[3]पर्णयोः। गरुच्छुरिकयोरपि स्यात्। 'पत्रं तु वाहने पर्णे छुरिकागरुतोरपि' इति वैजयन्ती (पृ. २२५, श्लो. २०) ।। निदेश—आयुधलोहयोः ।। १७८–९ ।।

[1] A1 omits. [2] रभसः इति भा. दी. (पृ. ४९३). [3] °पक्षयोः C1.

स्याज्जटांशुकयोर्नेत्रं क्षेत्रं पत्नीशरीरयोः ।
मुखाग्रे क्रोडहलयोः पोत्रं गोत्रं च नाम्नि च ।। १८० ।।

(वि.) जटायां [1]तरुमूले च नद्यां स्यन्दनवस्त्रयोः[2] ।
दृष्टयां मथिगुणे नेत्रं [3]नेत्रस्त्रिषु तु नेतरि ।। 382

[4]नीयत इति नेत्रम् । 'णीञ् प्रापणे' ॥

क्षेत्रं वप्रे तीर्थतन्वोर्भार्यागणितशास्त्रयोः ।

क्षीयत इति क्षेत्रम् । 'क्षि निवासगत्योः'[5] ॥

सूकरस्य हलस्यापि [6]मुखाग्रे पोत्रमुच्यते ॥ 383 ॥

पूयते भूरनेनेति पोत्रम् । [7]'पूञ् पवने' ॥

गोत्रा भुवि गवां वृन्दे कुले नाम्नि नपुंसकम्[8] ।
गिरिगोपालभूपेषु गोत्रस्तु परिकीर्त्यते[9] ॥ 384 ॥

गवां समूहो गोत्रा । गूयते शब्द्यतेऽनेनेति गोत्रम् । 'गुङ अव्यक्ते शब्दे' । गास्त्रायत इति गोत्रम्[10] ॥ १८० ॥

[1] पादपमूले J2. [2] °अस्त्रयोः K5. [3] नेत्रं तु K6. [4] नीयतेऽनेन K4; नयति K2, K5. [5] K6 adds 'क्षि क्षये'. [6] मुख्याग्रे J2. [7] पूङ K6; 'पूयी अपसारणे' J2, K2. [8] नपुंसके K3, K6. [9] °कथ्यते J2. [10] K4, K5 add 'त्रैङ पालने'.

(विव.) स्याज्जटांशुकयोर्नेत्रम् । जटा वृक्षमूलम् । अंशुकं नेत्राख्यपट्टनिर्मितं[1] वस्त्रम् । वस्त्रमात्रमिति केचित् । 'नेत्रक्रमेणोपरुरोध सूर्यम्' इति कालिदासः (रघु. ७. ३९) । नीयतेऽनेनेति वा नयतीति वा नेत्रम् । 'दाम्नीशसयुयुज . . .' इत्यादिना (३. २. १८२) ष्ट्रन्[2] । अत्र प्रतापः—

'नेत्रं पादपमूले स्यात् स्यन्दने लेपनेऽपि च ।
वस्त्रे मथिगुणे नाड्यां नेत्रं नेतरि तु त्रिषु ॥'

इति । स्यन्दनो रथः । मथिगुणे मन्थानस्याकर्षणरज्जौ । 'मन्थानं मन्दरं कृत्वा[3] नेत्रं कृत्वा च वासुकिम्' इति पुराणम् । नाडी सिरा । नेतरि नायके । यथा— 'ये देवाः पुरःसदोऽग्निनेत्राः' इति श्रुतेः (काठकसंहिता १५. २) ॥ क्षेत्रं पत्नीशरीरयोः । क्षिणोति क्षीयते वा क्षेत्रम् । 'क्षिणु हिंसायाम्' । 'क्षि क्षये' । ष्ट्रन्प्रत्ययः[4] (उ. ४. १६०) । अत्र प्रतापः—

'क्षेत्रं कलत्रे केदारे सिद्धस्थानशरीरयोः ।
क्षेत्रं गणितशास्त्रे च ॥'

इति । केदारो वप्रः । सिद्धस्थानं श्रीपर्वतादि ॥ मुखाग्रे—पोत्रम् । क्रोडो वराहः । हलं लाङ्गलम् । तस्य मुखाग्रं फालाञ्जलप्रदेशः । पुनात्यनेन भूमिं शोधयतीति पोत्रम् । 'हलसूकरयोः पुवः' (३. २. १८३) इति ष्ट्रन् ॥ गोत्रं तु नाम्नि च । गूयते शब्द्यतेऽनेन [5]देवदत्तादिरिति गोत्रं नामधेयम् । शेषे—'गोत्रस्त्राता गवां त्रिषु' इति । गास्त्रायत इति गोत्रम् ।

'गोत्रं कुले बले नाम्नि गोत्रस्तु धरणीधरे ।
गोत्रा भुवि गवां वृन्दे' ॥

इत्यजयः ॥ १८० ॥

[1] Gm1 omits निर्मितं. [2] ष्ट्रन्प्रत्ययः Gm1. [3] प्रथमपादः रामायणे दृश्यते (१. ४५. १८). [4] 'सर्वधातुभ्यः ष्ट्रन्'. [5] Gm1 omits. [6] Gm1, Tr add 'आतोऽनुपसर्गे कः'.

(पा.) स्याज्जटांशुकयोर्नेत्रम् । जटा नाम [1]तरुमूलम् । 'नेत्रं नाड्यां तरोर्मूले वस्त्रे दृशि मथो गुणे' इति वैजयन्ती (पृ. २२५, श्लो. १७) ॥ क्षेत्रं पत्नीशरीरयोः । सिद्धस्थानकेदारयोरपि स्यात् । 'क्षेत्रं शरीरे केदारे सिद्धस्थान-कलत्रयोः' इति विश्वः (पृ. १२८, श्लो. ४४) ॥ मुखाग्रे—गोत्रं तु नाम्नि च । कुलेऽपि स्यात्[2] ॥ १८० ॥

[1] दारुधनुः A1. [2] C1 adds गवां समूहेऽपि.

सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ।
अजिरं विषये कायेऽप्यम्बरं व्योम्नि वाससि ॥ १८१ ॥

(वि.) आच्छादने सदादाने यज्ञे [1]सादनदम्भयोः ।
वने सतां त्रातरि च द्विरावादौ सुरालये ॥ 385 ॥
[2]सहेत्यर्थे च पाथेये सत्रं सद्व्ययपापयोः ।

[3]सीदत्यनेनेति सत्रम् । 'षद्लृ विशरणादौ' ॥

रूपादिविषये शीघ्रे[4] मातरिश्वनि दर्दुरे ॥ 386 ॥
अजिरं [5]दुर्जये चैव शरीराङ्गणयोरपि ।

[6]अजन्ति गच्छन्तीन्द्रियाण्यत्रेति अजिरम् । 'अज गतिक्षेपणयोः' ॥

अम्बरं च भवेद् व्योम्नि वसने च सुगन्धिनि ॥ 387 ॥

अम्बते शब्दयतीत्यम्बरम् । 'अबि शब्दे' ॥ १८१ ॥

[1] साधन° K6.　[2] संहृत्यर्थे K5.　[3] अत्र for अनेन K3.　[4] नत्रे K6 : गात्रे K5.　[5] दुर्धरे K4, K6.　[6] अज्यन्ते J2, K5.

(विव.) सत्रमाच्छादने—वनेऽपि च । आच्छादनशब्देन गृहं विवक्षितम्, न तु वस्त्रमिति सुबोधिनीकारः । 'आसीरन्नुपयन्ति' [1]इत्यादिब्राह्मणविहित-बहुकर्तृको यज्ञविशेषोऽत्र यज्ञशब्देन[2] विवक्षितः । सदादानमप्यन्नस्यैव । न तु गवादीनामपि । ज्ञानसत्रम्, विद्यासत्रमित्यादौ तु प्रयोग औपचारिकः । वनमरण्यम् । 'अरण्यं विपिनं सत्रम्' इति प्रतापः । 'अयमेव मृगव्यसत्रकामः' इति भारविः (किरा. १३. ९) । सीदन्त्यत्रेति सत्रम् । 'षद्लृ विशरणादौ' । अधिकरणे [3]ष्ट्रन्प्रत्ययः (उ. ४. १६०) । शेषे—

'सत्रं दम्भे सादने च सतां [4]त्रातरि च त्रिषु ।
क्वचित् पापेऽथ सद्देये सत्राव्ययमधीनवत् ॥'

इति । सीदन्ति नश्यन्ति अनेनेति सत्रम् । दम्भः कपटः । सीदतेर्ण्यन्तात् त्रन्प्रत्यये 'बहुलमन्यत्रापि'[5] (उ. २. २५) इति णिलुकि सत्रम् । सादनमित्यर्थः । सतः त्रायत इति सत्रः, सत्पुरुषाणां रक्षकः । तत्र विशेष्यनिघ्नः । क्वचिदेव वृत्तिविषये सत्रशब्दः पापवचनः । यथा—'कण्वः पापं चिकीर्षति' इत्यस्वपदविग्रहे 'सत्र-कष्टकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम्'[6] (वा. ३. १. १४) इति क्यङ्प्रत्यये सत्रायते पापं कर्तुमिच्छतीत्यर्थः । सद्भ्यो देये सदधीने इत्यर्थद्वये 'तदधीनवचने' (५. ४. ५४) 'देये त्रा च' (५. ४. ५५) इति त्राप्रत्यये सत्राकरोति । 'च्व्यर्थ इति वाच्यम्[7]' (वा. १. ४. ७४) इति सत्राशब्दोऽव्ययम् । 'किंस्वित् प्रत्युत यच्च कच्चन न कं सत्रं समं साकमः' इति गणरत्नमहादधौ (१. ५) उक्तत्वात्

[8]सत्रमिति मकारान्तमव्ययमप्यस्ति ।। अजिरं विषये कायेऽपि । विषयो रूपादिः । कायः शरीरम् । अजन्ति क्षरन्ति चक्षुरादीन्यत्रेति अजिरम् । 'अज गतिक्षेपणयोः' । 'अजिरशिशिर ...' इत्यौणादिकनिपातनात् (उ. १. ५६) साधुः । अपिशब्दादङ्गणे प्रागुक्तम् (१, पृ. २०३) ।। अम्बरं व्योम्नि वाससि । अम्बते शब्दं करोतीति अम्ब्यते वा अम्बरम् । 'अबि शब्दे'[9] । सुगन्धिद्रव्यभेदेऽप्यम्बरशब्दः । तथा च विश्वप्रकाशे—'अम्बरं [10]वसने व्योम्नि कार्पासे च [11]सुगन्धिनि' इति (पृ. १३३, श्लो. १०२) ।। १८१ ।।

[1] विधायकश्रुत्या विहितो बहुयजमान° Gm1. [2] °शब्देनोच्यते Gm1, Tv. [3] त्रन्प्रत्ययः Tj1, Tj2. [4] सतामवितरि B5, Gm3. [5] B6 adds संज्ञाछन्दसोः. [6] Gm1 adds इति वक्तव्यम्. [7] 'साक्षात्प्रभृतिषु च्व्यर्थवचनम्' इति काशिकायाम् (१., पृ. ७८). [8] सत्रा इत्येव मु. ग्र. (पृ. ६). [9] बाहुलकादरः इति भा. दी. (पृ. ४६४). [10] वाससि इति मु. ग्र. [11] सुगन्धके इति मु. ग्र.

(पा.) सत्रमाच्छादने—अम्वरं व्योम्नि वाससि ।। १८१ ।।

चक्रं राष्ट्रेऽप्यक्षरं तु मोक्षेऽपि क्षीरमप्सु च ।
स्वर्णेऽपि भूरिचन्द्रौ द्वौ द्वारमात्रे तु गोपुरम् ।। १८२ ।।

(वि.) [1]चक्रवाके जलावर्ते सेनायामायुधान्तरे ।
कौम्भकारे तैलिकीये साधने रणराष्ट्रयोः ।। 388 ।।
[2]ग्रामजाले रथाङ्गे च चक्रं समभिधीयते ।

चकतीति चक्रम् । 'चक तृप्तौ प्रतिघाते च' ।।

मोक्षे [3]परब्रह्मणि च वर्णेऽप्यक्षरमुच्यते ।। 389 ।।

[4]न क्षरतीत्यक्षरम् । 'क्षर संचलने' ।।

सलिले चैव पयसि क्षीरशब्दोऽभिधीयते ।

घस्यतेऽद्यत इति क्षीरम् । 'घस्लृ अदने' ।।

भूरिः स्वर्णे शक्रविष्णुविधातृबहुषु स्मृतः ।। 390 ।।

[5]भवतीति भूरि ॥

[6]काम्पिल्ले [7]वारिणि स्वर्णे चन्द्रः कर्पूरसोमयोः ।

चन्दत्याह्लदयतीति चन्द्रः । 'चदि आह्लादने दीप्तौ च' ॥

द्वारमात्रे पुरद्वारे मुस्तके गोपुरं स्मृतम् ॥ 391 ॥

गोप्यते पौरैरिति गोपुरम् । 'गुपू [8]रक्षणे' ॥ १८२ ॥

[1] चक्रवाते J2. [2] ग्रामजाते K6. [3] परे ब्रह्मणि K5. [4] न क्षरमक्षरम् K2, K4. [5] K5 adds 'भू सत्तायाम्'; अतिशयेन बहु K3, K4. [6] काम्पिल्ये K6. [7] वारणे K6. [8] संरक्षणे J2.

(विव.) चक्रं राष्ट्रेऽपि । चकतीति चक्रम् । 'चक तृप्तौ प्रतिघाते च' । शेषे—

'चक्रं सैन्ये ग्रामजाले संग्रामे साधनान्तरे ।
तैलिकीये कौम्भकारे चावर्ते चायुधान्तरे ॥'

इति । तैलिकसंबन्धिनि कुम्भकारसंबन्धिनि च साधनविशेषे इत्यन्वयः ।

'चक्रः कोके व्रजे पुंसि क्लीबे सैन्यरथाङ्गयोः ।
ग्रामजाले कुम्भकारभाण्डे [1]चावर्तराष्ट्रयोः ॥'

इति त्रिकाण्डशेषश्च (पृ. ३३, श्लो. ९०४) ॥ अक्षरं तु मोक्षेऽपि । मोक्षो निःश्रेयसम् । न क्षरति न नश्यतीत्यक्षरम् । 'क्षर संचलने' (३. १. १३४) । शेषे— 'वर्णे ब्रह्मण्यक्षरं स्यात्' इति । अश्नुते श्रोत्रं व्याप्नोतीत्यक्षरम् । 'अशू व्याप्तौ' । 'अशेः सरः' (उ. ३. ७०) इति [2]सरप्रत्ययः । 'अक्षरं ब्रह्मवर्णयोः' इति रुद्रश्च ॥ क्षीरमप्सु च । घस्यते आस्वाद्यत इति क्षीरम् । 'घस्लृ अदने' । 'घसेः किच्च' (उ. ४. ३४) इति ईरन् । 'गमहन...' इत्यादिना (६. ४. ९८) उपधालोपः । 'शासिवसिघसि...' इत्यादिना (८. ३. ६०) षत्वम् । चशब्दाद् दुग्धे प्रागुक्तम् (१, पृ. ५८५) ॥ स्वर्णेऽपि भूरिचन्द्रे द्वे[3] । भूरि च चन्द्रमिति च नामद्वयं स्वर्णेऽपि वर्तते । भवतीति भूरि । 'अदिशदिभूशुभिभ्यः क्रिन्' (उ. ४. ६६) इति क्रिन्-

प्रत्ययः। अपिशब्दार्थः शेषे—'प्राज्याच्युतविधातृषु'[4] इति। विश्वप्रकाशेऽपि—'भूरिर्ब्रह्माच्युतेन्द्रेषु[5] भूरि प्राज्यसुवर्णयोः' इति (पृ. १३१, श्लो. ७६)। चन्दतीति चन्द्रः। 'चदि आह्लादने'। रक्प्रत्ययः[6] (उ. २. १३)। शेषे—'चन्द्रः शुभ्रांशुकर्पूरकपिलेषु पुमान् भवेत्' इति ॥ द्वारमात्रेऽपि गोपुरम्। गृहादेः यस्य कस्यचिद् द्वारमात्रे। अपिशब्दात् 'पुरद्वारं तु गोपुरम्' इति गतम् (१, पृ. २०५)। 'प्लवगोपुरगोनर्द ...' इत्यपि गतम्[7] (१, पृ. २६४) ॥ १८२ ॥

[1] राष्ट्रे च दृश्यते Gm1, Tv; मु. ग्र. च. [2] सरन्प्रत्ययः B6; 'अशेः सरन्' इत्युज्ज्वलदत्तादिपाठस्तु प्रामादिकः नित्स्वरापत्तेः' इति कौमुदीव्याख्यायाम् (पृ. ५१७). [3] °चन्द्रे द्वे इति विवरणाभिमतः पाठः. [4] Gm1, Tj2 add इन्द्रे च भूरि. [5] °अच्युतेशेषु इति मु. ग्र. [6] स्फायितञ्चि ... मन्दिचन्दि ... शुभिभ्यो रक्. [7] इत्यप्युक्तम् Tj2.

(पा.) चक्रं राष्ट्रेऽपि। [1]सैन्येऽपि स्यात् ॥ अक्षरं तु मोक्षेऽपि। वर्णेऽपि स्यात् ॥ क्षीरमप्सु च। दुग्धेऽपि स्यात् ॥ स्वर्णेऽपि भूरिचन्द्रौ द्वौ। प्राज्यशशाङ्कयोरपि स्याताम् ॥ द्वारमात्रेऽपि गोपुरम्। [2]पुरद्वारेऽपि स्यात् ॥ १८२ ॥

[1] B3 omits the sentence. [2] A1, C1 add मुस्तके.

गुहादम्भौ गह्वरे द्वे रहोऽन्तिकमुपह्वरे।
पुरोऽधिकमुपर्यग्राण्यगारे नगरे पुरम् ॥ १८३ ॥
मन्दिरं चाथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे।

(वि.) गुहायां दम्भगहननिकुञ्जेषु च गह्वरम्।

गाह्यत इति गह्वरम्। 'गाहू विलोडने' ॥

उपह्वरं तु विजने समीपे चापि कथ्यते ॥ 392 ॥

[1]उपह्वयतेऽत्रेत्युपह्वरम्। 'ह्वेञ् स्पर्धायां शब्दे च' ॥

पुरःप्रथमयोः [2]प्रान्ते प्रधानाधिकयोरपि।
उपर्यालम्बनेऽप्यन्नमाने[3] चाग्रमुदीर्यते ॥ 393 ॥

अगत्यत्रेत्यग्रम्। 'अग[4] कुटिलायां गतौ' ॥

अगारे नगरे काये गुग्गुलौ मकरालये ।
पुरं पाटलिपुत्रे च मन्दिरे चापि कथ्यते ।। 394 ।।

अगारं गृहोपरि गृहम् । पुरति पूर्यते वेति पुरम् । 'पुर अग्रगमने'[5] ।।

उपद्रवे जनपदे राष्ट्रशब्दोऽभिधीयते ।

राजतीति राष्ट्रम् । 'राजृ[6] दीप्तौ' ।। १८३ ।।

[1] उपह्वयन्ति J2, K5; K3, K4 omit six lines. [2] अग्रे J2. [3] आलम्बिते K6. [4] K5, K6 omit; 'अग ऊर्ध्वगमने' J2, K2. [5] K3, K4 add 'पूरी आप्यायने'. [6] K3, K5 omit.

(विव.) गुहादम्भौ गह्वरे द्वे। पर्वतादिगतमकृत्रिमविवरं गुहा। दम्भः कपटः। गाह्यत इति गह्वरम्। उणादौ 'छित्वरछत्वर... नीवरगह्वर...' (उ. ३. १) इति निपातनात् साधुः। [1]'गह्वरं तु गुहादम्भौ निकुञ्जे गहनेऽपि च' इति विश्वप्रकाशः (पृ. १३७, श्लो. १५५) ।। रहोऽन्तिकमुपह्वरे। रहो निर्जनस्थानम् । अन्तिकं समीपम् । उपह्वयतेऽत्रेत्युपह्वरम् । छित्वरादावुपह्वरमिति धातुवृत्तावुक्तत्वाद् उणादौ [2]'छित्वर...संयद्वराः' (उ. ३. १) इत्यादिना निपातनात् साधुः ।। पुरोऽधिकमुपर्यग्राणि । पुरः पूर्वो देशः। यथा—अग्रेसरैर्वाजिभिरिति। अधिकमुचितादतिरिक्तम्। यथा—जीवेत् साग्रं वर्षशतमिति। [3]वृक्षाग्रमित्युपरिभागे। [4]अगत्यत्रेत्यग्रम्। 'अगि गतौ'। 'ऋज्रेन्द्राग्रवज्र... मालाः' इति रन्नन्तो निपात्यते (उ. २. ३१) । शेषे—'अग्रमालम्बने प्रान्ते प्रथमे [5]प्रमिताशने' इति । त्वदग्रमस्मज्जीवनमित्यालम्बने। 'स्वल्पं वापि शिवस्याग्रे [6]दत्तमक्षय्यतां व्रजेत्' इति प्रान्ते। अग्रगण्य इति प्रथमे। अग्रं ग्रासचतुष्टयम् इत्यशनपरिमाणे। पराध्याग्रेति गतम् (२, पृ. ८१) ।। अगारे नगरे पुरं मन्दिरं च। पुरं मन्दिरं चेति शब्दद्वयमत्र विधेयम् । शेषे—

'गृहोपरि गृहे पुरम् ।
देहे पाटलिपुत्रे च गुग्गुलौ कथितः पुरः ।
पुराव्ययं पूर्वकाले ।।'

इति। गृहोपरिगृह इत्यनेन अमरसिंहोक्तमगारपदं शेषकारेण सविशेषं व्याख्यातम्,[7] न तु मूलग्रन्थानभिहितमर्थान्तरमुच्यत इति ज्ञेयम्। यथा—देवस्य मल्लारेः पुरमिति। मन्दिरशब्दोऽप्यर्थद्वये स्यात्। शेषे—'मन्दिरो मकरालये' इति। अथ राष्ट्रो—उपद्रवे। विषयो जनपदः। यथा—'राष्ट्रदुर्गबलानि' इति (१, पृ. ४६३)। उपद्रवः पीडाहेतुः। यथा—परराष्ट्रे कृता[8] बाधा इति। राजत इति राष्ट्रम्। 'राजृ दीप्तौ'। ष्ट्रन्प्रत्ययः (उ. ४. १६०)। 'व्रश्च ...' इत्यादिना (८. २. ३६) षत्वम् ॥ १८३ ॥

[1] गह्वरस्तु गृहादम्भनिकुञ्जगहनेष्वपि इति मु. ग्र. [2] बाहुलकाद् उपपूर्वक 'हु दानादानयोः' इत्यस्मात् ष्वरच्युकारलोपः इति कौमुदीव्याख्यायाम् (पृ. ५१३). [3] साग्रम् Tj2. [4] अङ्गत्यत्रेत्यग्रम्। 'अगि गतौ'। 'अङ्गेर्नलोपश्च' इति रक्प्रत्ययः B5, B6. [5] परिमाणेऽशनस्य च Tj2. [6] दत्तं भवति चाक्षयम् Tj2. [7] °तमिति ज्ञेयम् Gm1, Tv. [8] कृतं भयमिति Tj2.

(पा.) गुहादम्भौ गह्वरे द्वे। निकुञ्जोऽपि स्यात्। 'क्लीबं दम्भे गुहायां च निकुञ्जे पुंसि गह्वरः' इति रभसः। रहोऽन्तिकम्—विषये स्यादुपद्रवे ॥ १८३ ॥

दरोऽस्त्रियां भये श्वभ्रे वज्रोऽस्त्री हीरके पवौ ॥ १८४ ॥
तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।
औशीरं चामरे दण्डेऽप्यौशीरं शयनासने ॥ १८५ ॥

(वि.) [1]दरोऽस्त्रियां भये श्वभ्र ईषदर्थे दरोऽव्ययम् ॥ 395 ॥

दीर्यत इति दरम्। 'दॄ भये', 'दॄ विदारणे' ॥

[2]मणिवेधकरत्ने च[3] पवावपि महौषधौ ।
[4]बालकामलकीयोगे [5]गुडूच्यां वज्रमुच्यते ॥ 396 ॥

वजत्यनायासेन[6] गच्छतीति वज्रम्। 'वज व्रज गतौ' ॥

प्रधाने तन्तुवाये च सिद्धान्ते च परिच्छदे ।
इतिकर्तव्यतायां च श्रुतिशाखान्तरेऽपि च ॥ 397 ॥
निघ्ने व्याकरणे [7]हेतौ स्यात् कुटुम्बार्थकर्मणि ।
तन्त्रं शास्त्रे प्रक्रियायां व्याधौ साधारणे तथा ॥ 398 ॥

वीणागुणे सिरायां च तन्त्री वपुषि चोच्यते ।

तन्त्र्यत इति तन्त्रम् । 'तत्रि कुटुम्बधारणे' ।।

चामरे चैव शयने स्याद् दण्डासनयोरपि ।। 399 ।।
उशीरसंबन्धिनि च त्रिष्वौशीरमुदाहृतम् ।

[8]उशीरस्येदमौशीरम् ।। १८४–५ ।।

[1] दरं गुहा भयबिले K5. [2] °भेदक° J2. [3] चपलेऽपि K5. [4] बालिका° K2, K3. [5] गुलूच्यां K6. [6] J2, K4 omit. [7] भेदे K5. [8] उश्यत इत्यौशीरम् K3.

(विव.) दरोऽस्त्रियां भये श्वभ्रे । दरति बिभेत्यस्मादिति दरो भयम् । 'दॄ भये' । [1]भयादित्वादच्प्रत्ययः (वा. ३. ३. ५६) । तत्रैव पुंनपुंसकलिङ्गः । दीर्यत इति दरः । श्वभ्रं गर्तः । श्वभ्रे तु दरी इति ङीबन्तोऽप्यस्ति । शेषे—'ईषदर्थे दराव्ययम्' इति । दरेति ह्रस्वान्तमव्ययम् । यथा—'दरदलितहरिद्रापिञ्जराण्यङ्गकानि' इति प्रयोगः ।। वज्रोऽस्त्री हीरके पवौ । हीरको मणिवेधकरं रत्नम् । पविः कुलिशम् । 'वज्रं कुलिशशस्त्रयोः । मणिभेदे रत्नभेदे' इति केशवस्वामी[2] (नाना. सं. पृ. १४२, श्लो. ११५८–९) । वजति प्रतिबन्धराहित्येन गच्छतीति वज्रम् । 'वज व्रज गतौ' । 'ऋज्रेन्द्राग्रवज्र ...' इत्यादिना (उ. २. ३१) रन्प्रत्ययः । शेषे—

'वज्रस्त्वामलके योगे त्रिलिङ्गः स्यान्महौषधौ ।
गुडूच्याम् ।।'

इति । योगो विष्कम्भादिषु पञ्चदशो वज्राख्यः । महौषधिलक्षणं तु स्वच्छन्दभैरवे उक्तम् । यथा—

'वज्रवल्ली समाख्याता सपुष्पा क्षीरिणी भवेत् ।
स्नुहिपत्रोपमैः पत्रैस्तत्क्षणात् सूतबन्धिनी[3] ।।'

इति ।। तन्त्रं—परिच्छदे । प्रधाने यथा—स्वतन्त्रः, स्वप्रधान इत्यर्थः । अत्र सिद्धान्तशब्देन [4]तद्व्युत्पादको ग्रन्थो विवक्षितः । यथा—कणादतन्त्रम्, भाट्टतन्त्रमिति ।

ऊयत इति वायः। सूत्रं चासौ वायश्चेति सूत्रवायः। स च तन्त्रमित्युच्यते। तथा च न्यासकारः—'दैर्घ्येण प्रसारितास्तन्तवः तन्त्रमित्युच्यते' इति। अन्ये तु—येन दण्डादिना कुविन्दास्तन्तुवयनं[5] कुर्वन्ति स तन्तुवायः। स सूत्रवायशब्दनोच्यत इत्याहुः। शलाकारूप इति केचित्। परिच्छदः परिकरः। यथा—बहुतन्त्रोऽल्पतन्त्र इति। तनोति तन्यते वा तन्त्रम्। 'तनु विस्तारे'। ष्ट्रन् (उ. ४. १६०)। 'तत्रि कुटुम्बधारणे' इत्यस्माद्वा तन्त्रम्। शेषे—

'...अथ तन्त्रं स्यात् कुटुम्बार्थे च कर्मणि।
इतिकर्तव्यतायां च साधारणविधौ तथा।
सिरायाममृतायां च तन्त्री वीणागुणे तनौ॥'

इति। कुटुम्बार्थे व्यापारे यथा—कृषितन्त्रम्, सेवातन्त्रम् इति। इतिकर्तव्यतायां यथा—आग्नेयविकाराणां पौर्णमासतन्त्रम्, ऐन्द्राग्नविकाराणाममावास्यातन्त्रम् इति। साधारणविधिर्नाम एकस्यैवानेकयोस्तुल्यव्यापारः। तथा च [6]सकृत्प्रयुक्तस्यानेककर्तृतुल्योपकारकस्तन्त्रम् इति मीमांसकाः। यथा—'मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्' इति (या. स्मृ. १. १०. २२८)। सिरा धमनिः। अमृता गुडूची। तनुः कायः। सिराद्यर्थचतुष्टये रूपभेदेन स्त्रीलिङ्गः। 'अवितॄस्तृतन्त्रिभ्य ईः' (उ. ३. १५६) इति ईप्रत्यये ङ्यन्तत्वाभावात् सुलोपस्याभावे तन्त्रीरिति विसर्गान्तं रूपं भवति। 'भैषज्यं भेषजं जायुरगदस्तन्त्रमौषधम्' इत्यायुर्वेदनिघण्टुदर्शनाद्* औषधेऽपि तन्त्रशब्दः। वैजयन्त्यामपि—'तन्त्रं स्वराष्ट्रचिन्ता[7] स्यात्' इति (पृ. २२४, श्लो. ११)। यथा 'तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता' इति माघकाव्ये (शिशु. २. ८८)॥ औशीरं—शयनासने। चामरं प्रकीर्णकं, दण्डो यष्टिः, इत्यर्थद्वयमिति सुबोधिनीकारः। चमरस्यायं चामर इति दण्डविशेषणमिति सुभूतिचन्द्रः। शयनं मञ्चः। आसनं पीठम्। शयनं [8]स्वप्नः, आसनमुपवेशनमिति केचित्। पुनरौशीरग्रहणादेकयोक्त्या शयनासनयोरौशीरशब्दो वर्तत इति कैश्चिद् व्याख्यातम्। उश्यते काम्यत इति औशीरम्। 'वश कान्तौ'। 'वशेः कित्' (उ. ४. ३१) इति ईरन्प्रत्ययः। कित्त्वात् संप्रसारणम् (६. १. १६)। प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः (५. ४. ३८)। उशीरस्येदमिति विवक्षायाम् औशीरशब्दो वाच्यलिङ्गः॥ १८४–५॥

[1] 'दृ हिंसायाम्' इति चेद् 'अज्विधौ भयादीनामुपसंख्यानम्' (वा. ३. ३. ५६) इति अच्। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप् वा। 'दृ भये' इति चेत् 'ऋदोरप्' इत्येव

सुवचम्. 　[2]... 'वज्रं त्वस्त्री कुलिशशस्त्रयोः। मणिवेधे रत्नभेदे' इति मु. ग्र. [3] सूरजं फले Tj2. 　[4] सिद्धान्तव्युत्पादकः Tj2. 　[5] तन्तून् वायं कुर्वन्ति Tj2. [6] यत् सकृत्कृतं बहूनामुपकरोति तत् तन्त्रमित्युच्यते इति शावरभाष्यम् (११. १. १). [7] तन्त्रं स्वराष्ट्रव्यापारे इति मु. ग्र. 　[8] स्वापः Tj2. * धन्वन्तरीयनिघण्टौ 'भैषज्यं भेषजं जैत्रमगदो जायुरौषधम्' इत्येव दृश्यते (पृ. ३१०).

(पा.) दरोऽस्त्रियां भये श्वभ्रे। ईषदर्थेऽव्ययम्। 'ईषदर्थेऽव्ययं[1] दरम्' इति विश्वः (पृ. १२६, श्लो. ११)॥ वज्रोऽस्त्री हीरके पवौ। हीरको रत्नभेदः। 'वज्रोऽस्त्री हीरकः पुमान्' इति रत्नपर्यायेषु वैजयन्ती (पृ. ४४, श्लो. ३९)॥ तन्त्रं—परिच्छदे। 'एकस्यैवोभयार्थत्वे कुटुम्वव्यापृतावपि'। प्रधानं मुख्यम्। स्वतन्त्रः परतन्त्रः। सिद्धान्तः शास्त्रम्। सूत्रवायः[2] कुविन्दोपकरणम्॥ औशीरं—शयनासने। पुनर्वचनं शयनासनयोः [3]समुच्चयनार्थम्। 'औशीरं शय्यासनयोः' इति गुणाध्याये वैजयन्ती (पृ. १८७, श्लो. १७)॥ १८४–५॥

[1] दरोऽव्ययम् B3, C1; दराव्ययमिति मु. ग्र. 　[2] सूत्रवाप इति परिजाताभिमतः पाठः. 　[3] समुच्चयाभिधानार्थम् A1.

पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले।
व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः॥ १८६॥

(वि.) करिहस्ताग्रजलयोः पद्मे व्योम्नि च पञ्जरे॥ 400॥
खड्गे तीर्थे भेषजे च द्वीपे रोगे विहङ्गमे।
वाद्यभाण्डमुखे [1]सर्पे कारण्डे पुष्करं स्मृतम्॥ 401॥

पुष्णातीति पुष्करम्[2]॥ १८६॥

[1] सर्पः सर्पविशेषः J2. 　[2] पुष्करः K6; K2, K4 add 'पुष पुष्टौ'.

(विव.) पुष्करं—तीर्थौषधिविशेषयोः। मृदङ्गादिवाद्यानां ताडनस्थानं[1] वाद्यभाण्डमुखम्। खड्गफलं नाम त्सरोरुपरि[2] धाराद्वययुक्तो भागः। तीर्थविशेषो हिमवत्पार्श्वे प्रसिद्धः। 'कार्तिक्यां पुष्करं श्रेष्ठम्' इति पुराणे। ओषधिविशेषे यथा—पुष्करमूलमिति। पुष्णातीति पुष्करम्। 'पुष पुष्टौ'। 'पुषः कित्'

(उ. ४. ४) इति[3] करन्प्रत्ययः । शेषे—'द्वीपे सर्पे पुष्करः स्यात्' इति । पुष्कराख्यमन्तरीपं[4] द्वीपः स्यात् । पुष्कराख्यः सर्पविशेषश्च ।। १८६ ।।

[1] वादन° Tj1, Tv ; ताडनादि° Tj2. [2] खड्गमुष्टेरुपरि Tj2. [3] B5, B6 add कर्तरि. [4] Tj2 omits अन्तरीपम्.

(पा.) पुष्करं करिहस्ताग्रे—औषधविशेषयोः ।। १८६ ।।

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ।। १८७ ।।

(वि.) अवधाववकाशे चाप्यन्तर्धौ[1] भेदमध्ययोः ।
परिधाने च तादर्थ्ये विनार्थबहिरर्थयोः ।। 402 ।।
आत्मीयान्यार्थयोश्छिद्रे प्रस्तावेऽन्तरमात्मनि ।

अन्तं रातीत्यन्तरम् । [2]'रा दाने' ।। ।। १८७ ।।

[1] अन्तर्धानिभमध्ययोः K5, K6. [2] J2, K5 omit.

(विव.) अन्तरं—अन्तरात्मनि च । अथार्यावृत्तम् । अवकाशो [1]द्रव्यान्तरानवरुद्धः प्रदेशः । यथा—अस्माकमन्तरं देहि, अत्रान्तरे गृहाः कार्याः इति । क्रियान्तरानवरुद्धः कालोऽप्यवकाश उच्यते । यथा—दत्तप्रतिदानमनतिरमणीयम्[2] । अस्माकमिदमन्तरम् । अनतिक्रमणीयो देशः कालो वा अवधिः । यथा—अनयोर्ग्रामयोः[3] सेतुरन्तरम् । [4]मासान्तरादिदं देयमिति । परिधाने यथा—अन्तरे शाटकाः । उपसंव्यानमित्यर्थः । उपसंव्यानबहिर्योगयोरर्थयोः सर्वनामसु [5]पाठात् पुंलिङ्गत्वम् । अन्तर्धौ व्यवधाने यथा—जवनिकान्तरस्तिष्ठति इति । पर्वतान्तरितो देश इति । भेदविशेषे यथा—'नान्तरज्ञाः श्रियो जातु' (किरा. ११. २४) । महदन्तरं मेरुसर्षपयोः इति । तादर्थ्ये यथा—ओदनान्तरस्तण्डुलः[6] इति । छिद्रं सुषिरम् । यथा—कुड्यान्तरे प्रविष्टश्चोर इति । अथवा छिद्रं रन्ध्रम् । परावस्कन्दनानुकूलमित्यर्थः । यथा—प्रहरेदन्तरे शत्रुमिति । त्रिभुवनच्छिद्रपिधानव्रतमित्यादौ छिद्रशब्दो व्यसनवचनः । तदप्यन्तरमुच्यते । आत्मीये यथा—अयमभ्यन्तरो मम इति । विनार्थे यथा—अन्तरे भवमन्तरीयं विनाभूतम्, ततो नञ्समासे नान्तरीयकम्, अविनाभूतमित्यर्थः । बहिरर्थे यथा—अन्तरे चण्डालगृहा इति । 'अन्तरं बहिर्योगोपसंव्यानयोः'

(१. १. ३६)। बाह्याश्चण्डालगृहा इत्यर्थः। अवसरे यथा—'अत्रान्तरे किमपि ... मान्मथमाविरासीत्' इति (माल. मा. १. २९)। मध्ये यथा—[7]इदानीमन्तरे जाताः सरित्सागरपर्वताः इति। अन्तरात्मनि यथा—अन्तरात्मा, अन्तं रातीत्यन्तरम् इति। शेषे—'अन्तरः सदृशान्ययोः' इति। सदृशे यथा—'स्थानेऽन्तरतमः' इति (१. १. ५०)। अन्यस्मिन् यथा—स्थलान्तरं गच्छाम इति। यद्यप्यत्राविशेषेणान्तरमिति नपुंसकलिङ्गमुक्तम्, तथापि केषुचिदर्थविशेषेषु नपुंसकत्वम्, न सर्वत्र। [8]तथा च वैजयन्त्याम् (पृ. २५७, श्लो. २)—

> 'अन्तरः परिधानीये बाह्ये स्वीयेऽन्तरात्मनि।
> [9]क्लीबं मध्ये चावकाशे तादर्थ्येऽवसरेऽवधौ।
> [10]विशेषविवरान्तर्धिष्ववस्थानविनार्थयोः॥'

इति। मध्यादिष्वर्थेषु क्लीबमित्यर्थः॥ १८७॥

[1] अनन्यानवरुद्धः Tv.　[2] दत्तप्रतिदानादावनतिक्रमणीयम् Tv.　[3] क्षेत्रयोः Gm3, Tj1.　[4] मासान्तरं देयम् Tv.　[5] 'अन्तरं बहिर्योगोपसंव्यानयोः' (१. १. ३६).　[6] ओदनान्तरः तण्डुलान्तरः B6.　[7] 'आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः' (महानाटक ५. २५) इति स्वामी (पृ. ३१५).　[8] तदुक्तम् Tv.　[9] क्ली तु इति मु. ग्र.　[10] °अवसानविनार्थयोः इति मु. ग्र.

(पा.) अन्तरं—अन्तरात्मनि च। [1]सादृश्यान्यार्थयोरपि स्यात्। गकारस्य घकारोऽन्तरतमः। जन्मान्तरागतं शीलम्[2]॥ १८७॥

[1] सदृश° B3.　[2] B3, C1 omit.

> **मुस्तेऽपि पिठरं राजकशेरुण्यपि नागरम्।**
> **शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकम्॥ १८८॥**

(वि.) मुस्तेऽपि पिठरं कुम्भे भवेन्मन्थानदण्डके॥ 403॥

पिठ्यते क्लिश्यतेऽनेनेति पिठरम्। 'पिठ [1]हिंसासंक्लेशनयोः'॥

> जलकन्दविशेषेऽपि शुण्ठीसुरतबन्धयोः।
> असंज्ञायां प्रजायां च प्रवीणे कुत्सिते तथा॥ 404॥

नागरं तु त्रिषु भवेल्लिप्यां नगरसंभवे ।

नगरे जातं नागरम् ॥

घातुके शर्वरीजाते हिंस्रे[2] दन्तावलेऽपि च ॥ 405 ॥
अन्धतामिस्रके [3]चापि शार्वरः [4]परिकथ्यते ।

शर्वर्यां जातं शार्वरम् । श्रृणातीति वा शार्वरम्[5] ॥ ॥ १८८ ॥

[1] हिंसायाम् K2, K4. [2] हिंस्र॰ J2. [3] चैव J2. [4] त्रिषु for परि J2, K2.
[5] K2, K4 add 'श्रृ हिंसायाम्'.

(विव.) मुस्तेऽपि पिठरम् । पेठतीति पिठरम् । 'पिठ हिंसासंक्लेशनयोः'। 'शीकरादयश्च' [1]इत्यरप्रत्ययः । 'पिठरः स्थाल्युखा कुण्डम्' इति पुंलिङ्गो गतः (१, पृ. ५७२) । गौरादिषु पाठात् स्त्रियां ङीषि पिठरी इत्यपि । मन्थदण्डेऽपि पिठरशब्दः । शेषे—[2]'वैशाखदण्डे पिठरमुखायां पिठरीत्यपि' इति[3] ॥ राजकशेरुण्यपि नागरम् । राजकशेरु भद्रमुस्ताख्यम् । राजीवकन्द इत्यपरे । अपिशब्दात् शुण्ठ्यां नागरमुक्तम् (१, पृ. ५७६) । नगराख्यदेशे प्रायेण भवं नागरम् । शेषे—

'प्रवीणं कुत्सितं विना ।
असंज्ञानगरे जातं नागरं नागरायते ।
त्रिष्वथो सौरते बन्धे नागरम् ॥

इति । अस्यार्थः—अयोध्यापाटलीपुत्रादिके नगरे जातं नागरं विशेष्यनिघ्नः । तत्र जातोऽपि यदि कुत्सितः प्रवीणो वा स्यात्, तत्र 'नगरात् कुत्सनप्रावीण्ययोः' (४. २. १२८) इति वुञ्प्रत्यये नागरक इत्येव भवति । ननु नगरमिति विशेषसंज्ञयैव [4]गुर्जरदेशे प्रसिद्धं किंचिन्नगरमस्ति । तत्र जात इत्यण्प्रत्यये सति नागरमित्येव स्यादित्यत्राह—असंज्ञानगर इति । कत्र्यादिषु नगरं पठ्यत इति [5]वृत्तिकारवचनात् तत्र जाते कत्र्यादिभ्यो ढकञ्प्रत्यये (४. २. ९५) नागरेयकमित्येव भवति । न तु नागरमिति स्यात् । यश्च नगरस्य रायको धायकः याजकादिसमासः, तत्र न अगं रातीति व्युत्पत्त्या नागरशब्दो वाच्यलिङ्गः । सुरतकाले स्त्रीपुंसयोरवयवसंनिवेशविशेषे सुरतबन्धे नागरं नपुंसकम् । नागरलक्षणमुक्तं ग्रन्थान्तरे ॥ शार्वरं—भेद्यलिङ्गकम् । शर्वर्यां भवं शार्वरम् । गाढमन्धं तमः शृणातीति शार्वरम् ।

घातुको हिंस्रः । 'शॄ हिंसायाम्' । वरन्प्रत्ययः । पृषोदरादित्वाद् दीर्घः । शार्वरो व्याधः । शार्वरं शाबरकुलम् इत्यादौ वाच्यलिङ्गः । 'घातुकेभेऽन्यलिङ्गकम्' इति पाठे घातुकश्चासौ इभश्चेति समासः । तत्र घातुकः कुञ्जरः, कुञ्जरघटा, कुञ्जरयूथमित्यादि विशेष्यानुरोधेनान्यलिङ्गत्वमित्यर्थः ।। १८८ ।।

[1] बाहुलकादरो गुणाभावश्च इति भा. दी. (पृ. ४६५).　[2] मन्थनदण्डे इत्यर्थः. [3] Tv adds 'अधरपिठरसूर्मापिप्पलो वैजयन्तः' इति.　[4] गूर्जर° B6.　[5] 'कर्त्र्यादिषु तु संज्ञाशब्देन साहचर्यात् संज्ञानगरं पठ्यते, तस्मिन् नागरेयकमिति प्रत्युदाहार्यम् (काशिका १. पृ. ३२९-३०).

(पा.) मुस्तेऽपि पिठरम् । [1]स्थाल्यामपि स्यात् ।। राजकशेरुण्यपि नागरम् । राजकशेरु [2]तृणमूलविशेषः । शुण्ठ्यामपि स्यात् । शार्वरं—भेद्यलिङ्गकम् ।। १८८ ।।

[1] B3 omits the sentence.　[2] भद्रमुस्ताख्यः; जलजकन्दविशेषः इति स्वामी (पृ. ३१६).

गौरोऽरुणे सिते पीते व्रणकार्यप्यरुष्करः ।
जठरः कठिनेऽपि स्यादधस्तादपि चाधरः ।। १८९ ।।

(वि.) अरुणे धवले पीते पद्मकेसरचन्द्रयोः ।। 406 ।।
विशदे पुंसि गौरः स्यान्नद्यां शंकरयोषिति ।
रोचनायां हरिद्रायां कामिन्यां वरुणस्य च ।। 407 ।।
सहस्रवेधिनि तथा फलिन्यां च स्त्रियां भवेत् ।

गुरत इति गौरः । 'गुरी उद्यमने'[1] ।।

[2]भल्लातक्याख्यवृक्षे स्याद् [3]व्रणकारेऽप्यरुष्करः ।। 408 ।।

अरूंषि व्रणान् करोतीत्यरुष्करः[4] ।।

उदरे कठिने चापि जठरः परिकीर्तितः ।

[5]जायतेऽस्मिन्निति जठरः । 'जनी प्रादुर्भावे' ।।

अधस्तादोष्ठयोर्हीनेऽप्यधरः परिकथ्यते ।। 409 ।।

[6]अधोभवत्वाद् अधरः ।। १८९ ।।

[1] उद्यमे K6. [2] भल्लातकाख्य° K5. [3] व्रणकार्य° K2, K3. [4] J2 adds 'डुकृञ् करणे'. [5] जायन्ते J2. [6] अधस्त्वात् K2, K3.

(विव.) गौरोऽरुणे सिते पीते । गुरते पुरुष उद्युङ्क्तेऽस्मिन्निति गौरः । 'गुरी उद्यमने'। 'ऋज्रेन्द्र . . . गौरवब्रेरामालाः' (उ. २. ३१) इति निपातनात् साधुः । पूर्ववाक्यस्थं भेद्यलिङ्गकमिति पदं रेफान्तवर्गसमाप्तिपर्यन्तमनुवर्तनीयम् । शेषे—

'पद्मकेसरे ।
गौरं ना तु मृगे चन्द्रे नदीवरुणयोषितोः ।
रोचनारजनीहिङ्गुप्रियङ्गुक्ष्मासु च स्त्रियाम् ।।'

इति । 'शार्दूलाय राज्ञे गौरः' (तै. सं. ५. ५. ११. १) इत्युक्ते मृगविशेषे चन्द्रे च पुंलिङ्गः । नदी गौरीसंज्ञयैव प्रसिद्धा । रोचना गोरोचना । 'प्रियङ्गुः प्रियवल्ली च गौरी पुष्करपर्णिका' इति द्रव्यावल्याम् ।

'पिण्डा गौरी च रजनी हरिद्रा वर्णवत्यपि ।
नद्यादिषु च स्त्रीलिङ्गो ङीबन्तश्च . . . ।।'

इति ।। व्रणकार्यप्यरुष्करः । व्रणहेतुः शस्त्रादिः । व्रणकारिभल्लातके प्रागुक्तः[1] (१, पृ. २४१) । [2]अरूंषि करोतीत्यरुष्करः । 'दिवाविभा . . . तद्धनुररुःषु' (३. २. २१) इति टप्रत्ययः ।। जठरः कठिनेऽपि स्यात् । जायत इति जठरः[3] । 'जनेररष्ठ च' (उ. ५. ३४) इत्यरप्रत्ययः, धातोर्नकारस्य ठकारः । 'कुक्षौ तु जठरो न स्त्री त्रिषु वृद्धकठोरयोः' इति रुद्रः ।। अधस्तादपि चाधरः । अधस्तात्, अधोदेशस्थ इत्यर्थः । अपकृष्टेष्वधरस्त्रिषु । ओष्ठेऽपि[4] पुंलिङ्गः प्रागुक्तः (१, पृ. ४१९) ।। १८९ ।।

[1] B6 adds व्रणकारीव घातुके इति प्रागुक्तः. [2] Tj2 adds व्रणान्. [3] 'जनी प्रादुर्भावे' B6. [4] तु for अपि Tv.

(पा.) गौरोऽरुणे सिते पीते । भेद्यलिङ्गकमित्यधिकारः । [1]कन्याद्यर्थेषु निरवकाशः ॥ व्रणकार्येऽप्यरुष्करः । भल्लातक्यामपि स्यात् । [2]' जडियंटुन्नु ' ॥ जठरः कठिनेऽपि स्यात् । उदरेऽपि [3]स्यात् ॥ अधस्तादपि चाधरः । ओष्ठेऽपि स्यात्[3] ॥ १८९ ॥

[1] कन्याद्यर्थ° B3, C1. [2] B3 omits. [3] B3 omits स्यात्.

अनाकुलेऽपि चैकाग्रो व्यग्रो व्यासक्त आकुले ।
उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यादनुत्तरः ॥ १९० ॥
एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः पराः ।

(वि.) एकायनगतेऽपि स्यादेकाग्रश्चाप्यनाकुले ।

एकमग्रमस्येत्येकाग्रः ॥

व्यासक्ते व्याकुले चापि व्यग्रशब्दः प्रकीर्तितः ॥ 410 ॥

[1]विविधमग्रमस्येति व्यग्रः ॥

उदीच्यश्रेष्ठयोरूर्ध्वे प्रतिवाक्ये तथोत्तरम् ।
विराटपुत्रे पुंसि स्यादुत्तरा ककुभि स्मृता ॥ 411 ॥

उत्तरतीत्युत्तरम् । ' तॄ प्लवनतरणयोः ' ॥

श्रेष्ठदक्षिणयोश्च स्यादुदीच्यादिविपर्यये ।
प्रतिवाक्यविहीने चाप्यनुत्तर उदाहृतः ॥ 412 ॥

न विद्यते उत्तरमस्येत्यनुत्तरः ॥

दूरेऽप्यनात्मोत्तमयोः [2]परशब्दोऽभिधीयते ।

पिपर्तीति परः । ' पॄ पालनपूरणयोः ' ॥ १९० ॥

[1] विशेषेणागतीति व्यग्रः । ' अगि गतौ ' K3, K4. [2] द्वितीये केवले परः J2; चपले परः K4.

(विव.) अनाकुलेऽपि चैकाग्रः। अनाकुलः स्वस्थः। एकमग्रं बुद्धिस्थमस्येत्येकाग्रः। 'एकाग्रमेकताने स्यादेकाग्रं चाप्यनाकुलम्[1]' इति विश्वप्रकाशः (पृ. १४१, श्लो. २०४)॥ व्यग्रोऽप्यासक्त आकुले। व्यग्रः कार्यान्तरव्यापृतः। आकुलो दुःखाभिभूतः। विविधमग्रमस्येति व्यग्रः॥ उपर्युदीच्यश्रेष्ठेऽप्युत्तरः। उत् ऊर्ध्वं तरति प्लवत इत्युत्तरशब्दः उपरिस्थितः [2]उत्तरदेशवचनः। तद्देशभवे लक्षणया वर्तत इति उत्तर उदीच्यः। [3]उत्कृष्टवचनाद् अव्ययात् तरप्रत्यये सति उत्तरशब्दः श्रेष्ठेऽपि। शेषे—

'दिश्युत्तरा स्त्रियां पुंसि विराटतनयेऽपि च।
उत्तरं प्रतिवाक्ये स्यात्॥'

इति॥ स्यादनुत्तरः—श्रेष्ठे। एषामुपरिस्थितानां वैपरीत्ये अधःस्थितानुदीच्यनिकृष्टेष्वित्यर्थः। अविद्यमान उत्तरो यस्मादिति विग्रहे श्रेष्ठेषु अनुत्तरशब्दः। दूरानात्मोत्तमाः पराः। प्रमातारमवधीकृत्य संनिकृष्टापेक्षया भूप्रदेशसंयुक्तसंयोगभूयस्त्ववान् दूरः। तार्किकाणां प्रसिद्धपरत्वगुणाधिकरणमित्यर्थः। यथा—श्रीपर्वतस्थस्य गोदावर्यपेक्षया वाराणसी परा इति प्रयोगः। अनात्मनि यथा—इदं परेषां मतमिति। [4]परब्रह्मेत्युत्तमे। पिपर्तीति परः। 'पॄ पालनपूरणयोः'। पचाद्यच् (३. १. १३४)[5]। शेषे—'परः शत्रावलिङ्गं स्यात् केवले लिङ्गमव्ययम्' इति। 'परं दूरान्यमुख्येषु केवले त्वव्ययं मतम्' इति [6]विश्वप्रकाशश्च (पृ. १२५, श्लो. ६)॥ १६०॥

[1] अनाकुले इति मु. ग्र. [2] उदग्देश° Gm3, Tv. [3] Tj1, Tj2 add अतिशयेन. [4] परात्मेत्युत्तमेऽपि Gm1, Gm3. [5] Bhānujī adds 'ॠदोरप्' (पृ. ४६६). [6] परं दूरान्यमुख्येषु इति **वैजयन्त्यां** दृश्यते (पृ. २३४, श्लो. ४६); केवले, परमव्ययमिच्छन्ति इति मुद्रित**विश्वप्रकाशे**.

(पा.) अनाकुलेऽपि चैकाग्रः। एकतानेऽपि स्यात्[1]॥ व्यग्रो—अनात्मोत्तमाः पराः। अनात्मेत्यन्यः[2]। 'परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः' इति वैजयन्ती (पृ. २३४, श्लो. ४६)॥ १६०॥

[1] B3, C1 omit स्यात्. [2] B3 adds °अनात्मोत्तराः इत्यपि पाठः.

स्वादुप्रियौ च मधुरौ क्रूरौ कठिननिर्दयौ ॥ १६१ ॥
उदारो दातृमहतोरितरस्त्वन्यनीचयोः ।
मन्दस्वच्छन्दयोः स्वैरं शुभ्रमुद्दीप्तशुक्लयोः ॥ १६२ ॥

(वि.) स्वादुद्रव्ये प्रिये चापि मधुरः परिकथ्यते ॥ 413 ॥

मधु [1]माधुर्यमत्रास्तीति मधुरः ॥

निर्दये कठिने घोरे क्रूरस्त्रिषु विवक्षितः ।

[2]कृन्ततीति क्रूरः । 'कृती छेदने' ॥

उदारो दक्षिणे दातृमहतोरनुकूलके ॥ 414 ॥

उदियर्तीत्युदारः । 'ऋ गतौ' ॥

इतरो नीचके चैव परे च परिकथ्यते ।

एतीति इतरः[3] ॥

स्वेच्छावर्तिन्यलसके स्वैरः समभिधीयते ॥ 415 ॥

स्वेन [4]ईर्ते गच्छतीति स्वैरः । 'ईर [5]गतौ' ॥

उद्दीप्तशुक्लयोः[6] शुभ्रमभ्रके चापि कथ्यते ।

[7]शोभत इति शुभ्रः । 'शुभ दीप्तौ' ॥ १६१–२ ॥

इति रेफान्तवर्गः[8]

[1] अस्य for अत्र K_4. [2] कृणाति, 'कॄ हिंसायाम्' K_2, K_3. [3] J_2, K_2 add 'इण् गतौ'. [4] इर्यति K_2, K_4; ईरयति J_2. [5] K_4 adds कम्पने च. [6] °शुक्र्योः K_3, K_6. [7] शोभयति J_2. [8] K_2, K_4 add रेफान्तशब्दसंख्या ६२.

(विव.) स्वादुप्रियौ च मधुरौ । [1]मधुः माधुर्यरसविशेषोऽस्यास्तीति मधुरः । 'ऊषशुषिमुष्कमधो रः' (५. २. १०७) इति रप्रत्ययः । मधुरं कदलीफलमिति स्वादुनि । मधुरभाषीति प्रिये । रसमात्रे पुंलिङ्गः प्रागुक्तः (१, पृ. १६) ।

तद्वति वाच्यलिङ्गः ॥ क्रूरौ कठिननिर्दयौ । क्रूरो वृथाभ्यन्तरकोपः । निर्दयः कृपारहितः । [2]कृन्ततीति क्रूरः । 'कृती छेदने' ॥ उदारो दातृमहतोः । उदाराति उच्चैरर्थिभ्यो सर्वतो ददातीति उदारः । 'रा दाने' । 'आतश्चोपसर्गे' (३. १. १३६) इति कर्तरि कप्रत्ययः । शेषे—'दक्षिणेऽपि च । स्यादुदारोऽनुकूलेऽपि' इति । इतरस्त्वन्यनीचयोः । अन्यस्मिन् यथा—सव्येतरकरः शरः[3] इति । नीचे यथा—[4]पक्वान्नमितरे जनाः इति । इतं प्राप्तं रातीति इतरः ॥ मन्दस्वच्छन्दयोः स्वैरम् । स्वेन स्वबुद्ध्यनुसारेण ईर्ते गच्छतीति स्वैरः । 'ईर गतौ' । पचाद्यच् (३. १. १३४) । 'स्वादीरेरिणोः' (वा. ६. १. ८९) इति वृद्धिः ॥ शुभ्रमुद्दीप्तशुक्लयोः । उद्दीप्तं प्रकाशितं, शुक्लं श्वेतगुणयुक्तम् । शोभत इति शुभ्रम् । 'शुभ शुम्भ शोभार्थे' । 'स्फायितञ्चि . . . शुभिभ्यो रक्' (उ. २. १३) इति रक्प्रत्ययः । शेषे—[5]'जानीयाच्छुभ्रमभ्रके' इति ॥ १९१–२ ॥

इति रेफान्तवर्गः[6]

[1] स्वादु मध्वादिगतो मधुरविशेषः । प्रियं हृद्यम् B5, Tv. [2] कृणाति, 'कॄञ् हिंसायाम्' B6; कृणोति, 'कृञ् हिंसायाम्' Tj1, Tj2; 'कृतेश्छः क्रू च' (उ. २. २३) इति रक् इति भा. दी. (पृ. ४९६). [3] 'शरं सव्येतरे भुजे' इति रघुवंशे (१२. ९०). [4] कन्या वरयते रूपं... मिष्टान्नमितरे जनाः—Subhāṣ. (Apte's Dict. p. 1271). [5] विज्ञेयं शुभ्रमभ्रके B6. [6] Gm3 adds शब्दसंख्या ९२.

(पा.) स्वादुप्रियौ च मधुरौ—शुभ्रमुद्दीप्तशुक्लयोः । अनुक्तम्—

शिखरं शोणरत्नेऽपि गिरिः क्रीडागुडेऽपि[1] च ।

'अच्चनगंड्लु' ॥

गृध्रः स्यादर्धलुप्तेऽपि घस्रः स्याद् घातुकेऽपि[2] च ।
मकुरः स्याद् मुकुरवद् मल्लिकाकुसुमेऽपि च ॥
[3]मधुद्रो भ्रमरश्चेति द्वामिमौ कामुकेऽपि च ।
दिगम्बरोऽन्धकारेऽपि जगत्यपि चराचरम् ॥
लम्बोदरस्तुलायां[4] च लक्ष्मीपुत्रो हयेऽपि च ।
पीताम्बरो नटेऽपि स्याद् महामात्रो धनिन्यपि ॥

तुषारः शीकरेऽपि स्याच्छरं स्यादुदकेऽपि च ।
वारस्त्रियां च कावेरी स्वैरिण्यां च निशाचरी ॥
खर्जूरो वृश्चिकेऽपि स्यात् [5]कर्बूरं काञ्चनेऽपि च ।
विष्किरः कुक्कुटेऽपि स्याद् वल्लयामपि च वल्लरी ॥
प्रखरोऽश्वतनुत्रेऽपि हरः स्याद् गर्दभेऽपि च ।
असुरः कुञ्जरेऽपि स्याद् मिहिरो वारिदेऽपि च ॥
स्याद् विल्वयशसोश्च[6] श्रीः स्यादग्रभरयोश्च धूः ।
कादम्बरी परभृता शारिका भारतीति[7] च ।
धाराम्बुतानसेनाग्रस्कन्धशस्त्रमुखेषु च ॥
विहारः सुगतावासक्रीडनोपवनेषु च ।
कुमारः स्यादश्ववारे शुकबालकयोरपि ॥
भङ्गुरं नश्वरे वक्रे कटीरं कन्दरे कटौ ।
हीरा पिपीलिकालक्ष्म्योर्वेरं [8]काश्मीर्यदेहयोः ॥
वास्रस्तु दिवसे वास्रं मन्दिरे च चतुष्पथे ।
प्रकरः कीर्णपुष्पादौ प्रकरी चत्वरावनौ ॥
सुवर्णपुत्रिकायां स्याद् वम्री कम्रस्तु सुन्दरे ।
जर्जरस्त्रिषु जीर्णे स्यात् परपुष्टे तु जर्जरः ॥
टट्टरी स्याद् मृषावादे भेरीनादे तु टट्टरः ।
वन्धुरं सुन्दरे नम्रे वन्धुरा वारयोषिति ॥
टङ्कारो ज्यारवे ख्यातौ [9]कुटारं केवले रतौ ।
नरेन्द्रो विषवैद्ये स्यादार्थिके वसुधापतौ ॥
कटिसूत्रं सारसने कटिवस्त्रे च चार्मणे ।
गिरिसारोऽश्मसारे स्याद् गिरौ च मलयाह्वये ॥
पीतसारो मलयजे गोमेदकमणावपि ।
दण्डधारो यमे भूपे व्यवहारः पणे स्थितौ ॥
दण्डयात्रा दिग्विजये यात्रायां चाध्वरस्य च ॥ १६१-२ ॥

इति रेफान्तवर्गः

[1] गेन्दुकेऽपि B3.　[2] धातुके C1.　[3] मूध्रूद्रः A1.　[4] उद्ध्माते इति वि. प्र. (पृ. १४४, श्लो. २४१).　[5] कर्चूरं C1.　[6] °विषयोश्च A1.　[7] तथा B3, C1.

[8] काश्मीर° C_1. [9] कुटीरं कम्बले रतौ B_3.

अथ लान्तवर्गः—

चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ।
द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः ।। १६३ ।।

(वि.) कङ्केऽपि वृक्षे धम्मिल्ले मौलिश्चूडाकिरीटयोः ।। 416 ।।

[1]मूल्यत इति मौलिः । 'मूल प्रतिष्ठायाम्' ।।

[2]वृक्षे काण्डे गजे पुष्पे पीलुः स्यात् परमाणुके ।

[3]पीलतीति पीलुः । 'पील प्रतिष्टम्भे' ।। १६३ ।।

[1] मल्यत इति मौलिः । 'मल मल्ल धारणे' K_2, K_3. [2] वृक्षकाण्डे K_6. [3] पीयत इति पीलुः । 'पा पाने' K_2, K_4; पीड्यत इति K_5, K_6.

(विव.) चुडा—मौलयस्त्रयः । चुडा शिखा । अत्र त्रय इत्युक्त्या संयतशब्दस्य केशविशेषणत्वं मौलिशब्दस्य पुंलिङ्गत्वं च [1]गम्यते । बद्धाः केशा इत्यर्थः । [2]मूलति प्रतितिष्ठतीति मौलिः । 'मूल प्रतिष्ठायाम्' । शेषे—'कङ्केलिपादपे मौलिः' इति । कङ्केलिरशोकः ।। द्रुमप्रभेद—पीलवः । द्रुमप्रभेदो गुडफलः । मातङ्गः कुञ्जरः । काण्डो बाणः । पीलयतीति पीलुः[3] । 'पीड अवगाहने' । लडयोरभेदः । शेषे—'पीलवः परमाणवः' इति । यथा—पीलुपाक इति ।। १६३ ।।

[1] अवगम्यते Tv. [2] मूलस्यादूरे भवः । 'सुतङ्गमादित्वात्' (४. २. ८०) इञ्, यद्वा मूलस्यापत्यम् । 'अत इञ्' इति भा. दी. (पृ. ४६६). [3] पीलति गच्छतीति पीलुः । 'पील गतौ' Tv; मृगय्वादित्वात् (उ. १. ३७) उः इति भा. दी. (पृ. ४६६).

(पा.) चूडा—मौलयस्त्रयः । शिरोऽपि स्यात् । 'मुण्डोत्तमाङ्गमस्तकमौलिशिरःशीर्षमूर्धकानि स्युः' इति हलायुधः (अ. मा. २. ३६३) । [1]अन्यतरलिङ्गाभिधानात् स्त्रीपुंसलिङ्गः । 'किरीटे मौलिरक्लीबे चूडासंयतकेशयोः' इति रभसः ।। द्रुमप्रभेद—पीलवः । परमाणुरपि [2]स्यात् । 'पीलुर्द्रुमे गजे काण्डे परमाणुप्रसूनयोः' इति विश्वः (पृ. १५१, श्लो. ३४) ।। १६३ ।।

[1] B3, C1 omit 'तर°. [2] B3 omits स्यात्.

कृतान्तानेहसोः कालश्चतुर्थेऽपि युगे कलिः ।
स्यात् कुरङ्गेऽपि कमलः प्रावारेऽपि च कम्बलः ।। १६४ ।।

(वि.) मृत्यौ यमे महाकाले कालः समयनीलयोः ।। 417 ।।
गौर्यां नील्यां मेघपङ्क्तौ मञ्जिष्ठक्षीरकीटयोः ।
कृष्णत्रिवृति निन्दायां काली स्याद् मातृभेदके ।। 418 ।।

कल्यते संख्यायत इति कालः । 'कल शब्दसंख्यानयोः' ।।

कलहेऽन्त्ययुगे [1]शूरे निष्क्रियायां कलिर्युधि ।

निष्क्रिया निरर्थकरणम् । कल्यन्तेऽस्मिन्निति कलिः । 'कल किल क्षेपे' ।।

[2]पद्मे जले [3]क्लोम्नि ताम्रे पद्मके कमलं भवेत् ।। 419 ।।
कुरङ्गे कमलो लक्ष्म्यां कमला वरयोषिति ।

काम्यत इति कमलम्[4] । 'कमु कान्तौ' ।।

[5]सास्नायामुत्तरासङ्गे नागराजे च रल्लके ।। 420 ।।
क्रिमिभेदे जले क्लीबं कम्वलः परिकथ्यते ।

काम्यत इति कम्वलः[6] ।। १६४ ।।

[1] घोरे K6. [2] जडे K5. [3] व्योम्नि K5; लोम्नि K6. [4] कमला K2, K4. [5] K5 omits 3 lines. [6] J2, K2 add 'कमु कान्तौ'.

(विव.) कृतान्तानेहसोः कालः । कृतान्तो यमः । शेषे—

'काला कृष्णा त्रिवृत् काली गौरीजलदमालयोः ।
नीलीमाञ्जिष्ठयोः क्षीरकीटमातृकयोरपि ।। '

इति । कृष्णा त्रिवृदिति टाबन्तः । मातृका महाकालीति प्रसिद्धा । विश्वप्रकाशे—

[1]'कृष्णत्रिवृति काला स्यान्नीलीमाञ्जिष्ठयोरपि ।
काली गौर्यां क्षीरकीटे कालिकामातृभेदयोः ।'

इति[2] (पृ. १४६, श्लो. १२) ।। चतुर्थेऽपि युगे कलिः। कल्यन्ते क्षिप्यन्ते जना अत्रेति कलिः। 'कल किल क्षेपे'। अपिशब्दात् कलहे प्रागुक्तम् (१, पृ. ५४५) ।। स्यात् कुरङ्गेऽपि कमलः। कुरङ्गो हरिणभेदः। कं नीरं मलते उच्चैर्धत्त इति कमलम्। 'मल धारणे'। विश्वप्रकाशे—

'कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे।
मृगप्रभेदे कमलः कमला श्रीवरस्त्रियोः ।।'

इति (पृ. १५३, श्लो. ५३)। क्लोम तिलकम्। भेषजं पद्मकम् ।। प्रावारेऽपि च कम्बलः। प्रावार उत्तरासङ्गः। कं सुखं बलतीति कम्बलः। 'बल प्राणने'। शेषे—'सास्नायां नागराजे च कम्बलोदक्रिमावपि' इति। 'समौ रल्लककम्बलौ' इति गतम् (१, पृ. ४३६)। नागराजः कम्बलाख्यः सर्पः। कृमिर्वस्त्रयूका। 'कम्बलो नागराजे स्याद् [3]गजप्रावरणेऽपि च' इति विश्वप्रकाशः (पृ. १५५, श्लो. ७५) ।। १६४ ।।

[1] 'कृष्णत्रिवृत्तौ काला तु' इति मु. ग्र. [2] कालयति। 'कल शब्दसंख्यानयोः'। 'कल प्रेरणे' वा ण्यन्तः। पचाद्यच्। यद्वा कल्यते संख्यायते। कर्मणि घञ्। यद्वा कल्यते। 'कल उपदेशे'। घञ् इति भा. दी. (पृ. ४६७). [3] गजेत्यादि मुद्रितग्रन्थे न दृश्यते.

(पा.) कृतान्त—युगे कलिः। 'कलिः स्यात् कलहे शूरे कलिरन्त्ययुगे युधि' इति विश्वः (पृ. १५२, लो. ४८) ।। स्यात् कुरङ्गेऽपि कमलः।

'कमलं सलिले ताम्रे [1]क्लोम्नि रक्ताम्बुजेऽम्बुजे।
मृगप्रभेदे कमलः कमला श्रीवरस्त्रियोः ।।'

इति विश्वः (पृ. १५३, श्लो. ५३) ।। प्रावारेऽपि कम्बलः।

'कम्बलो नागराजे स्यात् सास्नाप्रावारयोः कृमौ।
कम्बलश्चोत्तरासङ्गे कम्बलं सलिले मतम् ।।'

इति विश्वः (पृ. १५५, श्लो. ७५) ।। प्रावारो रोमशाटी। [2]'कम्बलि, कम्बळि-पुरुवुन्नु' ।। १६४ ।।

[1] जलजे लोम्नि भेषजे इति मु. ग्र.　　[2] B_3 omits.

करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम् ।
स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ।। १६५ ।।

(वि.)　राजग्राह्यकरे दैत्ये गृहदारुणि [1]गन्धके ।। 421 ।।
उदरावयवे चैव वलिश्चामरदण्डके ।
पूजोपहारे [2]जरया श्लथचर्मणि वर्तते ।। 422 ।।

[3]वलत्यनेनेति वलिः । 'वल[4] प्राणने' ।।

स्थौल्ये सैन्ये रसे रूपे गन्धसामर्थ्ययोर्बलम् ।
काके सीरिणि दैत्ये [5]ना बलः सत्त्ववति त्रिषु ।। 423 ।।
वाटचालके च विद्यायां वला समभिधीयते[6] ।

वलत्यनेनेति वलम् । 'बल प्राणने' ।। १६५ ।।

[1] गण्डके K_6.　[2] जरायां K_5.　[3] वल्यतेऽनेनेति वलिः J_2.　[4] K_6 adds 'बल संचरणे'.　[5] च for ना K_2, K_3.　[6] °कथ्यते K_3, K_5.

(विव.)　करोपहारयोः—स्त्रियाम् । करः प्रजाभ्यो राजग्राह्यो भागः । उपहारो देवतोद्देशेन प्रदेय ओदनादिः । तत्रोभयत्र बलिशब्दः पुंलिङ्गः । [1]प्रवृद्धत्वादिना शरीरे जायमाना त्वक्संकोचकृता रेखा वलिः । तत्र स्त्रीलिङ्गः । यद्यपि बलिशब्दः करोपहारवचनः केवलमौष्ठ्यादिः तथाप्येकदेशविकृतस्याप्यनन्यत्वाद् (प. ७. २. ७८) नानार्थत्वेनाभिधानम् । बलति जीवत्यनेनेति बलिः । 'बल प्राणने' । वलते संवृणोति शरीरमिति वा[2] । शेषे—

'बलिश्चामरदण्डके ।
गृहदारुविशेषे च बाणताते च गन्धके ।।'

इति । गृहदारुविशेष इति [3]स्तम्भचूडासु तिर्यङ्‌निधीयमानं[4] सरन्ध्रं दारु । तथा चोक्तं पाञ्चरात्रे मण्डपनिर्माणे—

'सारदारुभवांस्तम्भान् कुर्याच्चूडासमन्वितान् ।'

इत्युक्त्वा,

‘ बलिकां मूर्धतस्तेषां कुर्यात् ।। ’

इत्युक्तत्वादिति । तत्रापि स्त्रीलिङ्ग एव । बाणतातो विरोचनसुतो बलिनामा दैत्यः । गन्धको गन्धकद्रव्यविशेषः । तत्रोभयत्र पुंलिङ्गः ।। स्थौल्य—काकसीरिणोः । स्थौल्यं [5]पीनत्वम् । सामर्थ्यं शक्तिः । स्थौल्यादित्रये रूपविशेषाद् नपुंसकलिङ्गः । बलति चिरं जीवतीति बलः काकः । ‘ बल प्राणने ’ । बलसंबन्धाद् अर्शआद्यचि (५. २. १२७) बलः । सीरी बलभद्रः । शेषे— ‘ बलं गन्धे रसे रूपे दैत्ये ना बलिनि त्रिषु ’ इति । दैत्ये यथा—इन्द्राहितः, यतो बलारातिरिति संज्ञाविशेषोऽपि, कश्चिदिन्द्रेण हत इत्यर्थः । बलवति वाच्यलिङ्गः । यथा—‘ दुर्बलस्य बलं राजा ’ (चाणक्य. ४०) इति[6] ।। १६५ ।।

[1] B6 omits प्र. [2] वलते । वल्यते वा, ‘बल प्राणने’ । ‘वल संवरणे’ । ‘सर्वधातुभ्य इन्’ (उ. ४. ११८) इति भा. दी. (पृ. ४६७). [3] स्तम्ब° Tj1, Tj2. [4] °विधीयमानं B5, B6. [5] पीवरत्वम् B6, Gm1. [6] वलते । बलति । वल्यते वा । अनेन वा । ‘बल संचरणे’ । ‘वल प्राणने’ वा । पचाद्यच् । कर्मणि घञ् वा । संज्ञापूर्वकत्वाद् वृद्ध्यभावः । ‘पुंसि—’ इति घो वा इति भा. दी. (पृ. ४६७).

(पा.) करोपहारयोः—स्त्रियाम् । [1]प्राण्यङ्गकमुदररेखाः । अथवा प्राण्यङ्गजं श्लथचर्म ।। स्थौल्य—काकसीरिणोः ।। १६५ ।।

[1] °अङ्गजमुदररेखा B3.

वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।
भेद्यलिङ्गः शठे व्यालः पुंसि श्वापदसर्पयोः ।। १६६ ।।

(वि.) वात्यायां पुंसि वातूलो वातस्यासहने त्रिषु ।। 424 ।।

वातं न सहते, वातस्य समूहो वा वातूलः ।।

त्रिलिङ्ग्यां [1]कैतववति द्वयोः श्वापदसर्पयोः ।
दुःशिक्षितगजे पुंसि व्यालः समभिवर्ण्यते[2] ।। 425 ।।

[3]व्याल्यते निवार्यत इति व्यालः । ‘अल[4] भूषणपर्याप्तिवारणेषु’ ।। १६६ ।।

[1] कैतवे वाणे K4. [2] °अभिकथ्यते K2, K4; °कीर्त्यते K5. [3] व्यलतीति K5; विशेषेणाल्यते J2. [4] 'अल निवारणे' K2, K3, K4.

(विव.) वातूलः—वात्यासहे त्रिषु । समानजवयोः विरुद्धक्रिययोः वाय्वोर्बहूनां[1] वा समूहो वात्या । 'वातात् समूहे च' (वा. ५. २. १२२) । तत्र सहत इत्यर्थे समूहार्थे च ऊलच्प्रत्ययः । वातूलः । उन्मत्तेऽप्याहुरिति स्वामी (पृ. ३१८) ॥ भेद्यलिङ्गः—श्वापदसर्पयोः । गूढविप्रियकारी शठः । तत्र व्यालशब्दो वाच्यलिङ्गः । व्याघ्रादयो वनचरा मृगाः श्वापदाः । सर्पाः प्रसिद्धाः । तत्र पुंलिङ्गत्वविधानं नपुंसकनिषेधार्थम्[2] । [3]स्त्रीलिङ्गविवक्षायां तु 'द्विचतुःषट्पदोरगाः' (३. ५. ३७) इति स्त्रीलिङ्गत्वस्यापि[4] वक्ष्यमाणत्वात् । अत एव 'व्यालीव मलयद्रुमम्' इति कालिदासः (रघु. १२. ३२) । विशेषेणाल्यते वार्यत इति व्यालः । 'अल भूषणपर्याप्तिवारणेषु'[5] । शेषे—'व्यालो दुःशिक्षिते गजे[6] ।' इति ॥ १६६ ॥

[1] B6 adds वातानां. [2] °विशेषार्थम् B6. [3] B5 omits लिङ्ग. [4] °लिङ्गत्वमपि B5. [5] विरुद्धमासमन्तादलति । अडति वा । 'अल भूषणादौ' । 'अड उद्यमे' । डलयोरेकत्वम् । पचाद्यच् इति भा. दी. (पृ. ४६७). [6] खले Tv.

(पा.) वातूलः—वातासहे त्रिषु । [1]वात्यासहे इति उदयादित्यमतानुसारी पाठः । वातासह इति शाकटायनमतानुसारी पाठः ॥ भेद्यलिङ्गः—श्वापदसर्पयोः । अर्थव्ययसहे[2] भेद्यलिङ्गः । 'अर्थव्ययसहो[3] व्यालः' इति हलायुधः (अ. मा. ५. ४६) । दुष्टगजेऽपि पुंलिङ्गः । 'व्यालो [4]दुष्टमतङ्गजे' इति हलायुधः (अ. मा. २. ७०) ॥ १६६ ॥

[1] वातासहे A1. [2] A1 adds पुरुषे. [3] °सहे इति मु. ग्र. [4] व्यालो दुष्टगजः प्रोक्तः इति मु. ग्र.

मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम् ।
शङ्कावपि द्वयोः कीलः पालिः स्त्र्यश्रयङ्कपङ्क्तिषु ॥ १६७ ॥

(वि.) श्लेष्मण्यश्रुणि मूत्रे च दूषिकाकर्णविष्ठयोः ।
विष्ठायां [1]शुक्रवसयोर्मज्जालोहितयोर्नखे ॥ 426 ॥

स्वेदे पापे मलोऽस्त्री स्यात् कृपणे[2] च त्रिषु स्मृतः ।

मल्यत इति मलः । 'मल मल्ल धारणे' ।।

आयुधे रोगभेदे च मृत्यौ शूलमुदाहृतम् ।। 427 ।।
योगभेदे ध्वजे शूलः शूला पण्यस्त्रियामपि ।

[3]शूलतीति शूलः । 'शूल रुजायाम्' ।।

ज्वालायां हव्यवाहस्य शङ्कौ कील उदाहृतः ।। 428 ।।
कीला कफोणिनिर्घाते [4]रतिसंभवताडने ।

कील्यत इति कीलः । 'कील[5] वन्धने' ।।

धाराङ्कयोर्यूकपत्न्यां संजातश्मश्रुयोषिति ।। 429 ।।
[6]प्रस्थे च कर्णतालाग्रे पालिरस्राङ्गभेदयोः ।

पाल्यत इति पालिः । 'पाल रक्षणे' ।। १६७ ।।

[1] शुक्ल° K5. [2] कृपणेषु J2, K3, K4. [3] शायतेऽनेनेति शूलम् । 'शो तनूकरणे' K2, K3. [4] रतिसंरम्भ° K5. [5] 'कील क्षेपे' J2. [6] प्रासे K6.

(विव.) मलोऽस्त्री पापविट्किट्टानि । किट्टं सिंहाणादिकम् । विड्ग्रहणं मूत्रादीनामप्युपलक्षणम् ।

'वसाशुक्लमसृङ्मज्जामूत्रविट्कर्णविण्णखाः[1] ।
श्लेष्माश्रुदूषिकास्वेदा द्वादशैते मला नृणाम् ।।'

इति स्मृतेः (म. स्मृ. ५. १३५) । पापे यथा—'निर्मला स्वर्गमायान्ति' (म. स्मृ. ८. ३१८) इति । किट्टे यथा—अयोमलमिति । मल्यते धार्यत इति मलम्[2] । शेषे—'मलस्तु कृपणे त्रिषु' इति । अस्त्री शूलं रुगायुधम् । रुग् रोगः वातकृतस्तोदः । शूलमायुधविशेषः त्रिशिखरः । [3]शूलति व्यथयतीति शूलम् । 'शूल रुजायाम्' । पचाद्यच् (३. १. १३४) । [4]शूलो योग इत्यपि । अत्र प्रतापः—

'रोगभेदे भवेच्छूलं मृत्योः प्रहरणान्तरे ।
योगभेदे [5]भवेच्छूलः शूला पण्यस्त्रियां मता ।
शूलं विक्रयणेऽपि स्यात् ॥'

इति । योगभेदो विष्कम्भादिषु नवमः शूलाख्यः ॥ शङ्कावपि द्वयोः कीलः । कील्यते बध्यतेऽस्मिन्निति कीलः शङ्कुः, गोमहिष्यादिबन्धनस्तम्भः । अपिशब्दाद् [6]वह्निज्वालाविशेषे । शेषे—'अथ कीला स्यात् प्रहारे रतिसङ्गरे'[7] इति । [8]अन्यत्राप्युक्तम्—'कीला उरसि [9]धर्तव्या वक्षस्यपि न फूत्कृतम्' इति । जिह्वाग्रजनितो ध्वनिः फूत्कृतम् । 'कीलः [10]कफोणीनिर्घाते' इति विश्वः (पृ. १५१, श्लो. ३८) ॥ पालिः स्त्र्यश्रचङ्कपङ्क्तिषु । अश्रिर्धारा[11] । अङ्क उत्सङ्गः[12] । पङ्क्तिरावलिः[13] । 'पाल रक्षणे' । 'अच इः' (उ. ४. १४०) । 'अङ्कपालीत्यत्राङ्को वक्षः' इति स्वामी (पृ. ३१८) । शेषे—

'पालिः प्रस्थांशभेदयोः ।
जातश्मश्रुस्त्रियां कर्णतालाग्रे यूकया समम् ॥'

इति । यूकया सहितेषु पूर्वोक्तार्थेषु पालिशब्दो वर्तत इत्यर्थः । प्रतापोऽपि—

'पालिः पङ्क्तिचङ्कभेदयोः ।
[14]अस्रे च कर्णतालाग्रे पालिः स्यात् प्रस्थयूकयोः ।
संजातश्मश्रुयोषायाम् ॥'

इति ॥ १६७ ॥

[1] घ्राणकर्णविट् इति मु. ग्र. [2] पचाद्यच्. [3] शूलयति B6. [4] B5 adds शेषे. [5] ध्वजे Gm1, Tv. [6] अग्नेरर्चिः Gm1, Tv; B6 adds प्रागुक्तः (पृ. ३६). [7] रतिसंभवे B5, Gm3. [8] 'यद्वात्स्यायनः—कीला उरसि कर्तरी शिरसि विद्धा कपोलयोः' इति स्वामी (पृ. ३१८). [9] कर्तव्या B5. [10] कफोणौ इति मु. ग्र. [11] कोणः Gm3. [12] वक्षः Gm3. [13] B5, Gm3 add अर्थत्रयेऽपि स्त्री; स्त्रीलिङ्ग इत्यर्थः. [14] स्त्री च B5, Tv.

(पा.) मलोऽस्त्री—रुगायुधम् । निशिताग्रस्तम्भे लञ्जिकायां च स्त्रीलिङ्गः । 'कोरुयंदुन्नु'[1] । 'शूला दुष्टवधार्थाय कीलके पण्ययोषिति' इति विश्वः (पृ. १५१, श्लो. २७) ॥ शङ्कावपि द्वयोः कीलः । ज्वालायामपि[2] ॥

पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु । स्त्री इति स्त्रीविशेषः । 'सश्मश्रुयुवतिः[3] पालिः प्रस्थः कर्णलतापि च' इति त्रिकाण्डशेषः (पृ. ३४, श्लो. ९५३) ।। अङ्को नाम चिह्नम् । 'पालिः कर्णलतायां स्यात् प्रदेशे पङ्क्तिचिह्नयोः' इत्यजयः[4] ।। १९७ ।।

[1] B3, C1 omit. [2] A1 adds स्यात्. [3] °युवती इति मु. ग्र. [4] विजयः B3; जयः A1.

कला शिल्पे कालभेदेऽप्याली सख्यावली अपि ।
अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ।। १९८ ।।

(वि.) कलनाविद्ययोः[1] शिल्पे कालभेदांशमात्रयोः ।। 430 ।।
चन्द्रस्य षोडशे भागे मूलवृद्धौ [2]वृतौ स्त्रियाम् ।
कला च तालगुरुणि कलं शुक्ले[3] तु न द्वयोः ।। 431 ।।
मधुरास्फुटनिस्वाने[4] जीर्णे कल उदाहृतः ।

कल्यत इति कला । 'कल शब्दसंख्यानयोः' ।।

आलिर्वयस्यापङ्क्तचोश्च सेतौ च परिकथ्यते ।। 432 ।।

अल्यत इत्यालिः ।[5] 'अल भूषणपर्याप्तिवारणेषु' ।।

अब्धितीरे जले काले [6]रागमर्यादयोरपि ।
अक्लिष्टमरणे राजभोजने [7]देवयोषिति ।। 433 ।।
समुद्राम्भोविकारे च वेला समभिधीयते ।

वेलतीति वेला । 'वेलृ चलने' ।। १९८ ।।

[1] °विधयोः J2. [2] वृता K6. [3] शुक्रे J2. [4] °निश्वासे J2. [5] 'अल निवारणे' K3, K4. [6] रोग° J2, K2. [7] राज° K6.

(विव.) कला शिल्पे कालभेदेऽपि । शिल्पं चतुःषष्टिप्रकारम् । [1]कालभेदः त्रिंशत्काष्ठात्मकः । कल्यत इति कला । 'कल शब्दसंख्यानयोः' । पचाद्यच् । शेषे—

'अंशमात्रे मूलवृद्धौ [2]सुषमाविद्ययोः कला ।
[3]अष्टात्रिंशन्निवृत्त्याद्ये गुरुणि स्त्रीरजस्यपि ।।
कलं शुक्रे [4]वाच्यलिङ्गमव्यक्तमधुरस्वनौ[5] ।।

इति । अंशमात्रे एकदेशमात्रे । यथा—विकलः, सकलः इति । 'कला तु षोडशो भागः' इति तु गतम् (१, पृ. ६०) । मूलस्योत्तमर्णप्रयुक्तस्य[6] अधमर्णेन नियतकाले दीयमानायां वृद्धौ कलना संख्यानं मूलवृद्धिः । यथा— 'प्रतिकलं कलादाने द्विगुणादधिकं धनम्' इति । सुषमायां यथा—मुखे कलातिशय इति । विद्यामात्रे यथा—न्यायकलानिधिरिति । निवृत्तिः प्रतिष्ठा इत्याद्याः पञ्च कलाः, शिवादि-क्षित्यन्ताः अष्टात्रिंशत्कलाः, अमृता मानदा[7] इत्याद्याः चतुर्नवतिकला [8]आगम-शास्त्रप्रसिद्धाः । यथा—अष्टात्रिंशत्कलान्यासः, चतुर्नवतिकलान्यास इति । गुरुणि यथा—अक्षरपाठेषु चच्चत्पुटादिषु आवापनिक्षेपनिष्क्रामप्रवेशनिःशब्दाः क्रिया अपि संगीतशास्त्रे प्रसिद्धाः । एताः कलाशब्देन व्यवह्रियन्ते[9] । यथा—चच्चत्पुटादिषु यथाक्षरतालेषु द्विमात्रमेकं गुरुकला इत्यादि[10] । स्त्रीसंबन्धिनि रजस्यार्तवे यथा—'निष्कला विगतार्तवा' इति (१, पृ. ३७४) । शुक्रे यथा—शुक्रं कलं गर्भाशयगतं रेतः । तत्र रूपभेदाद् नपुंसकलिङ्गः । अजीर्णे अपक्वे, अव्यक्त-मधुरध्वनौ च वाच्यलिङ्गः । अव्यक्तमधुरध्वनौ च गतम् (१, पृ. १२१) ।। आलिः सख्यावली अपि । सखी वयस्या । आवलिः पङ्क्तिः । 'सेतुरालौ' इति गतम् (१, पृ. १९२) । अनर्थेऽप्यालिरिति स्वामी[11] (पृ. ३१८) ।। अब्ध्यम्बु—मर्याद-योरपि । [12]चन्द्रोदयादिनिमित्तकृतः [13]समुद्रसलिलोच्छ्वासोऽब्ध्यम्बुविकृतिः । कालोऽवसरः । मर्यादा सीमा । वेलत्यत्र जलं चलति वेल्यते वा । 'वेलृ चलने' । 'गुरोश्च हलः' (३. ३. १०३) इत्यकारप्रत्ययः । शेषे—

'वेला त्वीश्वरभोजने ।
बुधस्त्रियां सीम्नि चापि रागे सुखमृतावपि ।।'

इति । समुद्रतीरं बुधाख्यग्रहस्य स्त्री च वेला । [14]नानार्थसंग्रहेऽपि—

'वेला काले च[15] जलधेस्तीरनीरविकारयोः ।
अक्लिष्टमरणे रागे सीम्नि वारि बुधस्त्रियाम् ।।'

इति ।। १९८ ।।

[1] कालशब्दः Gm3. [2] कलनाविद्ययोस्तथा B5, Gm3. [3] तत्तदागमसिद्धासु Gm3, Tj2. [4] कलाजीर्णे B5. [5] °ध्वनौ Gm3. [6] Gm3 adds धनस्य. [7] °पूषा इत्याद्याः Gm3. [8] मन्त्रागम° Gm3. [9] कामशास्त्रेऽपि अन्याः कलाः प्रसिद्धाः Gm3. [10] कलाशब्देन व्यवह्रियते Gm3. [11] अपिशब्दादालिरनर्थः इति मु. ग्र. [12] चन्द्रोदयालंकृतः B6. [13] °सलिलोल्लासः Gm3. [14] प्रतापोऽपि Gm3. [15] जलनिधेः Gm3.

(पा.) कला शिल्पे कालभेदेऽपि । चन्द्रांशेऽपि स्यात् ।। [1]आलिः—काल-मर्यादयोरपि । अब्ध्यम्बुविकृतिः अब्धिवृद्धिः[2] । कालो घटिकादिः । मरणविशेषेऽपि स्यात् । 'ईश्वराणां भोजनेऽक्लिष्टमरणेऽब्धिकूले च वेला' इति सुभूतिटीका । मर्यादा सीमा ।। १९८ ।।

[1] आली B3. [2] A1 adds तरङ्ग°.

बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ।
लीला विलासक्रिययोरुपला शर्करापि च ।। १९९ ।।

(वि.) अग्नौ [1]सिते कृष्णपक्षेऽर्जुने वहुलो भवेत् ।। 434 ।।
हृदये वहुलं नील्यामेलायां कृत्तिकासु[2] च ।
सौरभेयीषु च तथा बहुलाः[3] परिकीर्तिताः[3] ।। 435 ।।

[4]बहु लातीति वहुला ।।

लीला विलासक्रिययोर्भवेदिष्टजनाकृतौ ।

[5]ललनं लीला । 'लीङ श्लेषणे' ।।

उपला शर्करायां च [6]मणौ ग्राव्ण्युपलो भवेत् ।। 436 ।।

[7]उपलायतेऽस्मिन्नित्युपला । 'ला आदाने' ।। १९९ ।।

[1] सितौ J2. [2] मृत्तिकासु K2. [3] K4 omits the visarga. [4] बहुत्वाद् बहुला K2. [5] विलास एव लीला K2, K4. [6] वन्ये J2. [7] उपालायते K2, K5; पलायते J2.

(विव.) बहुलाः—शितौ त्रिषु । बह्वीरधिष्ठानतारे लात्यादत्त इति बहुलाः कृत्तिकानक्षत्रविशेषाः । तत्र स्त्रीलिङ्गो बहुवचनान्तश्च । [1]गोवाचकेऽपि

स्त्रीलिङ्ग एव। बहु हव्यं लातीति बहुलोऽग्निः। शितौ कृष्णवर्णे वाच्यलिङ्गः। शेषे—'बहुलौ कृष्णपक्षधनंजयौ। क्लीबं हृन्नभसोः' इति। धनंजयोऽर्जुनः। एलायामपि स्त्रीलिङ्गो बहुलाशब्द उक्तः (१, पृ. २८९)। 'अदभ्रं बहुलम्' इति विशेष्यनिघ्ने उक्तः (श्लो. ६३)। 'बहुलं छन्दसि' (२. ४. ३९) इत्यादिपाणिनीयव्यवहारे बहुलशब्दो नपुंसकलिङ्गो विकल्पविशेषः प्रसिद्धः॥ लीला विलासक्रिययोः। स्त्रीणां विलासः। [2]शृङ्गारभावचेष्टाविशेषो विलासः। क्रिया कायिकः परिस्पन्दः। यथा—'मलयपवनलीलाविलुलितबकुलोद्भवामोदाः' इति॥ उपला शर्करापि च। [3]सर्षपमरीचादिप्रायकठिनावयवमिश्रा मृत्तिका शर्करा। उप्यते[4] क्षिप्यते गृहादिष्विति उपला। 'डुवप् [5]बीजसंताने'। 'वृषादिभ्यश्चित्' (उ. १. १११) इति कलप्रत्ययः। यजादित्वात् (६. १. १५) संप्रसारणम्। शेषे—

[6]'अश्मपिण्डोऽश्मरूपा च मृद्विकारश्चैक्षवोऽपि यः।
तत्रोपला स्त्रियां पुंसि शिलारत्नविशेषयोः॥'

इति। रत्ने यथा—'नीलोपलस्यूतविचित्रधातुम्' इति माघः (शिशु. ४. १)॥ १९९॥

[1] गोवाचकः Tj1. [2] °भावज° Tj1. [3] °मरीच्यादि° Tv. [4] गुप्यते Tv.
[5] B5, B6 add °तन्तु°. [6] अश्मखण्डः Tv.

(पा.) बहुलाः—शितौ त्रिषु। बहुलाः इति कृत्तिकासु नित्यबहुवचनम्। 'कृत्तिकासु स्त्रियां भूम्नि बहुला बहुला गवि'[1] इति रभसः[2]॥ लीला—शर्करापि च। 'उपलौ रत्नपाषाणावुपला शर्करापि च' इति रुद्रः॥ १९९॥

[1] C1 adds 'एलायां च पुमानग्नौ कृष्णपक्षे शितौ त्रिषु'. [2] रभसकोशः B3.

शोणितेऽम्भसि कीलालं मूलमाद्ये शिफाभयोः।
जालं समूह आनायो गवाक्षक्षारकावपि॥ २००॥

(वि.) सलिले शोणिते चापि कीलालं परिकथ्यते।

[1]कीलान् ज्वालानलति निवारयतीति कीलालम्। 'अल निवारणे'॥

आद्ये शिफायां नक्षत्रे मूलं कुञ्जसमीपयोः ।। 437 ।।

मूल्यतेऽनेनेति मूलम् । 'मूल[2] प्रतिष्ठायाम्' ।।

गवाक्षव्यूहयोर्दम्भे [3]क्षारकानाययोरपि[4] ।
नीपेन्द्रजालयोर्जालं कोशातक्यां स्त्रियां भवेत् ।। 438 ।।

[5]जालवत् गवाक्षवत् तिष्ठतीति जालम् । जले क्षिप्यत इति वा ।। २०० ।।

[1] कील्यते K_5. [2] 'मूल रोहणे' K_3, K_4. [3] क्षीरिका° K_6. [4] J_2 adds आनायो वागुरा. [5] जालाकारत्वात् K_4, K_5.

(विव.) **शोणितेऽम्भसि कीलालम् । [1]कील्यते मांसेन बध्यते, कीलेन अल्यते त्वचा वार्यत इति वा कीलालं शोणितम् । 'कील बन्धने' । 'अल भूषणादौ' । अम्भसि व्युत्पादितम् (१, पृ. १५७) ।। मूलमाद्यं शिफाभयोः । शिफा वृक्षमूलम् । भं नक्षत्रं, ज्येष्ठानक्षत्रानन्तरम् । मूलति प्रतितिष्ठतीति मूलम् । 'मूल प्रतिष्ठायाम्' । [2]कप्रत्ययः (३. १. १३५) । शेषे—'मूलमन्तिककुञ्जयोः' । अन्तिके समीपे यथा—वृक्षमूलमुपसर्पति ।। जालं—क्षारकावपि । आनायो [3]मत्स्यादिनिरोधनभूतरज्जुवितानविशेषः[4] । अप्राप्तमुकुलावस्थः कुसुमाङ्कुरः क्षारकः । शेषे—**

**'पुमान् नीपद्रुमे जालो जाली कोशातकी भवेत् ।
दम्भेन्द्रजालयोः क्लीबम्' ।।**

इति । दम्भः कुहना । इन्द्रजालं[5] नाम असदर्थप्रकाशनसमर्थो [6]मन्त्रौषधादिप्रयोगः । विश्वप्रकाशेऽपि—'जालं गवाक्ष आनाये [7]कोरके दम्भवृन्दयोः' इति (पृ. १५०, श्लो. १८) । वृन्दे यथा—मेघजालं शब्दजालमिति[8] ।। २०० ।।

[1] कीलिते मांसे Tj_1. [2] 'इगुपधज्ञाप्रीकिरः कः'. [3] °निरोधसाधनभूत° Tj_1 [4] °विधान° Tj_1. [5] इन्द्रजालः Tj_1. [6] यन्त्रौषध° B_5, B_6. [7] क्षारके दन्तवृन्दयोः इति मु. ग्र. [8] जलति । 'जल घातने' । 'ज्वलादिणः' (३. १. १४०) । जालयति वा । 'जल संवरणे' चुरादिः । पचाद्यच् (३. १. १३४) इति भा. दी. (पृ. ४६८).

(पा.) शोणिते—शिफाभयोः । आद्यार्थे—अधिकं वृक्षमूले तिष्ठति पथिकः । शिफार्थे—वृक्षमूलमुत्खनति । समीपार्थेऽपि स्यात् । [1]वृक्षमूले गच्छति

सेना ॥ जालं—क्षारकावपि । [2]कपटेऽपि स्यात् । [3]'जालं तु कपटेऽप्युक्तम्' इति हलायुधः (अ. मा. ५. १८) ॥ २०० ॥

[1] B3 omits.　　[2] कपटोऽपि A1.　　[3] जालं कपटे इति मु. ग्र.

शीलं स्वभावे सद्वृत्ते सस्ये हेतुकृते फलम् ।
छदिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना ॥ २०१ ॥

(वि.)　सद्वर्तने स्वभावे च शीलशब्दः प्रकीर्तितः ।

[1]शील्यतेऽनेनेति शीलम् । 'शील समाधौ' ॥

[2]तक्कोले फलके मुष्टौ लाभमुक्ताप्रियङ्गुषु ॥ 439 ॥
जातीफले धान्यकणे वार्क्षबाणाग्रयोरपि ।
त्रिफलायां [3]हेतुकृते सस्ये च फलमुच्यते ॥ 440 ॥

फलतीति फलम् । 'फल निष्पत्तौ'[4] ॥

समूहे नेत्ररोगे च तिलके च परिच्छदे ।
आच्छादने गृहस्यापि पटलं परिकीर्तितम् ॥ 441 ॥

पटं विस्तारं लातीति पटलम् । 'ला आदाने' ॥ २०१ ॥

[1] शीलयति K6; शीलति J2.　　[2] कक्कोले च फले J2.　　[3] हेतुकृतौ K6.
[4] K5 adds 'त्रिफला विशरणे'.

(विव.)　शीलं स्वभावे सद्वृत्ते । शील्यते समाधीयत इति शीलम्[1] । 'शील समाधौ'[2] । यावद्द्रव्यभावी धर्म इत्यर्थः । यथा—निद्राशीलः, दूषणशीलः इति । सद्वृत्ते यथा—शीलवान् पुत्र इति ॥ सस्ये हेतुकृते फलम् । सस्ये यथा—'ओषध्यः फलपाकान्ताः' (१, पृ. २१८; म. स्मृ. १. ४६) । हेतुना कारणेन कृते प्राप्ते यथा[3]—यागस्य स्वर्गः फलम् । [4]दुष्कृतस्य नरकः फलम् इति । शेषे—

'फलं जातीफले मुष्टौ मुक्ताधान्यकणेषु च ।
बाणाग्रवार्क्षत्रिफले तक्कोले तिलकेऽपि च ॥'

इति । मुष्टिः संग्राहः । मुक्ता मौक्तिकम् । [5]धान्यकणाः तण्डुलशकलाः । यथा—'सुफलीकृतान् जुहोति' इति । बाणाग्रादीनां त्रयाणां द्वन्द्वैकवद्भावः । वृक्षस्य संबन्धि वार्क्षम्, सहकारदाडिमफलादि । फलकं चर्मदारुपट्टिकादि । 'प्रियङ्गुः फलिनी फली' इति गतम् (१, पृ. २४७) । 'फलं फाले धने बीजे निष्पत्तौ भोगलाभयोः'[6] इति केशवस्वामी (ना. सं. पृ. ११३, श्लो. ८२५) । फलति निष्पद्यत इति फलम् । 'फल निष्पत्तौ'[7] ।। छदिर्नेत्ररुजोः—पटलं न ना । पटं विस्तारं[8] लातीति पटलम् । छदिः तृणादिनिर्मितं गृहाच्छादनम् । नेत्ररोगः पटलाख्यः [9]नेत्रगोलकयोस्तिरोधायकः सूक्ष्मः श्लेष्मादिधातुविकारः । [10]पटसादृश्यात् पट इत्युच्यते । तं लातीति पटलम् । यथा—'तिमिरं काचतां याति पटले तदुपेक्षया' इति । समूहवचनत्वे तु स्त्रीनपुंसकोभयलिङ्गः । स्त्रियां तु गौरादिङीषि (४. १. ४१) पटली । शेषे—'तिलके च परिच्छदे । पटलः ।' इति । परिच्छदे यथा—भूषापटलिकाहस्त इति ।। २०१ ।।

[1] Tj1 adds स्वभावः. [2] घञ् (३. ३. १८), घो वा (३. ३. ११८) इति भा. दी. (पृ. ४६८). [3] Tj1 adds यत्र कुत्रचित्. [4] भोजनस्य तृप्तिः फलम् Tj1. [5] धान्यं व्रीह्यादि Tj1. [6] °लोहयोः Tj1. [7] पचाद्यच् (३. १. १३४). [8] विसारं Tj1. [9] नेत्रमार्ग° Tv. [10] वस्त्र° Tj1.

(पा.) शीलं—फलम् । हेतुकृतं[1] शास्त्रफलं विनय इत्यादिस्वरूपहेतुदर्शनसमुत्थम् ।

'फलं हेतुसमुत्थे स्यात् फलके व्युष्टिलाभयोः ।
जातीफलेऽपि [2]तक्कोले सस्यबाणाग्रयोरपि ।।'

इति विश्वः (पृ. १४१, श्लो. २-३) ।। छदिर्नेत्ररुजोः—पटलं न ना । पटलं पटली वा ।। २०१ ।।

[1] B3, C1 add हेतुस्वरूपकृतं. [2] कक्कोले इति मु. ग्र.

अधःस्वरूपयोरस्त्री तलं स्याच्चामिषे पलम् ।
और्वानलेऽपि पातालं चेलं वस्त्रेऽधमे त्रिषु ।। २०२ ।।

(वि.) [1]स्वरूपाधरयोश्चैव पृष्ठे ज्याघातवारणे ।

तलं चपेटे तालादौ [2]वितस्तौ खड्गमुष्टिके ॥ 442 ॥

तलति प्रतितिष्ठतीति तलम् । 'तल प्रतिष्ठायाम्' ॥

मांसे कर्षचतुष्के च पलं तु परिकीर्तितम् ।

पलतीति पलम् । 'पल गतौ' ॥

अधोलोके[3] [4]वाडवाग्नौ पातालं परिकीर्तितम् ॥ 443 ॥

पतन्त्यस्मिन् पापादिति पातालम्[5] ॥

चेलं वस्त्रे न ना प्रोक्तं गर्हिते नीचतुच्छयोः ।

चिलत्येतद् वस्त इति चेलम् । 'चिल वसने' ॥ २०२ ॥

[1] °आधारयोः J_2, K_5.　[2] विस्तारे J_2.　[3] °मुखे J_2.　[4] बडबाग्नौ K_3, K_4.　[5] J_2, K_2 add 'पल्ल गतौ'.

(विव.) अधःस्वरूपयोरस्त्री तलम् । तलति प्रतितिष्ठतीति तलम् । 'तल प्रतिष्ठायाम्' । अधोदेशे[1]—पादतलम् । स्वरूपे यथा—करतलम् । 'तले ज्याघातवारणे' इति गतम् (१, पृ. ५३३)[2] । शेषे—

'खड्गमुष्टिचपेटयोः ।
[3]पृष्ठे क्लीबं तालतरौ वितस्तौ च पुमान् भवेत् ॥'

इति । चपेटे—तलप्रहारः । पृष्ठे यथा—'संकोचिताङ्गनिचयोऽपि पराङ्मुखोऽपि धत्ते तलेन धरणीं कमठः पुराणः' इति ॥ स्याच्चामिषे पलम् । आमिषे मांसे । पलति रक्षतीति पलम् । 'पल रक्षणे' । [4]'पलं कर्षचतुष्टयम्' इति गतम् (१, पृ. ६०५) । 'पलमुन्मानमांसयोः' इति रुद्रश्च ॥ और्वानलेऽपि पातालम् । उदकस्य पातं पतनमालातीति पातालम् । और्वानलो बडबाग्निः । अपिशब्दाद् अधोभुवने ॥ चेलं वस्त्रेऽधमे त्रिषु । अधमो नीचो गर्हितश्च । तथा च विश्वप्रकाशे—'चेलो नीचेऽन्यवच्चेलमंशुके गर्हितेऽन्यवत्' इति (पृ. १५०, श्लो. २२) । 'न पुंसि वसने चेलं गर्हिताधमयोस्त्रिषु' इति रुद्रश्च । स्त्रियां तु ङीषि चेली ॥ २०२ ॥

[1] Tj₁ adds यथा. [2] Tv adds तलेऽधस्तले. [3] Tj₁ adds: ज्याघातवृद्धितस्त्योश्च तलस्ताले प्रकीर्तितः। ज्याघातवृत् ज्याघातवारणम्। तले तालवृक्षे इत्यर्थः. तथा विश्व-प्रकाशः—'तलं स्वरूपाधरयोः, तलस्तालतरावपि' इत्यादि (पृ. १४६, श्लो. ७). [4] B₆ adds चशब्दात्.

(पा.) अधःस्वरूपयोरस्त्री तलम्। अधोऽर्थे—वृक्षस्य तलम्। स्वरूपार्थे—नभस्तलम्। स्याच्चामिषे पलम्। उन्मानविशेषेऽपि स्यात्[1]॥ और्वानिलेऽपि पातालम्। रसातलेऽपि स्यात्। चेलं वस्त्रेऽधमे त्रिषु। अधमे—चेलोऽयम्, [2]चेलीयम्॥ २०२॥

[1] C₁ omits स्यात्. [2] B₃ adds गौरादित्वात् ङीष्.

कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले।
निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः॥ २०३॥

(वि.) कुकूलं [1]शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले॥ 444॥

कुत्सितं कूलं कुकूलम्॥

केवलं निश्चिते [2]कृत्स्नेऽप्यसहायेऽपि च त्रिषु।

केवलमिति मान्तमव्ययम्[3]॥ २०३॥

[1] शङ्कुसंकीर्णे J₂, K₂. [2] अपार्थे J₂. [3] K₆ adds केवत इति केवलम्। 'केवृ सेवने'.

(विव.) कुकूलं—तुषानले। दुर्गसमीपे प्रतिपक्षसेनासंचारपरिहारार्थं कृतैः तीक्ष्णलोहादिशङ्कुभिर्व्याप्तमहागर्ते नपुंसकलिङ्गः कुकूलशब्दो वर्तते। तुषाग्नौ तु पुंलिङ्गः। दुष्प्रवेशत्वेन कुत्सितकूलसादृश्यात् कुकूलम्॥ निर्णीते—त्वेककृत्स्नयोः। निर्णीते प्रमाणेनावधारिते केवलं नपुंसकलिङ्गमिति सुभूतिचन्द्रः। सुबोधिनीकारस्त्वाह—इतिशब्देन रूपान्तरनिराकरणादव्ययत्वम्। यथा—केवलमयं [1]मूर्ख इति। दक्षिणावर्तनाथस्तु—'ददृशे पुरुषाकृति क्षितौ हरकोपान-लभस्म केवलम्' इति श्लोकव्याख्याने (कु. सं. ४. ३) केवलं शुद्धमिति व्याख्याय तत्संवादत्वेन 'निर्णिक्ते केवलम्' इत्यमरसिंहाभिधानदर्शिते निर्णिक्तं शोधितं

वचनमुदाजहार। एकस्मिन् अद्वितीये यथा—'ख्यातः साहित्यविद्यायां केवलः शिङ्गभूपतिः' इति। यथा वा—'पार्थेन केवलेनैते गोग्रहे शत्रवो जिताः' इति। कृत्स्ने समस्ते यथा—इह ग्रामे केवला भिक्षवः इति। [2]केवतिः सेवार्थो धातुः। 'वृषादिभ्यश्चित्' (उ. १. १११) इति औणादिकः कलप्रत्ययः ॥ २०३ ॥

[1] Tj1, Tj2 add देवदत्तः.　　　[2] केवने इति केवलम्। 'केवृ सेवने' Tv; 'केवृ शब्दे' B6.

(पा.) कुकूलं—त्वेककृत्स्नयोः। केवलमिति निर्णीतार्थे नपुंसकम्। 'मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम्' (वै. श. ७) इति ॥ २०३ ॥

पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु।
प्रवालमङ्कुरेऽप्यस्त्री त्रिषु स्थूलं जडेऽपि च ॥ २०४ ॥

(वि.) पर्याप्तौ शिक्षिते पुण्ये क्षेमे कुशलमुच्यते ॥ 445 ॥

कुत्सितममङ्गल्यं श्यतीति कुशलम्। 'शो तनूकरणे'[1] ॥

अङ्कुरे विद्रुमे वीणादण्डे मूर्खतरेऽपि च।
सुकेशे च प्रवालं तु पुंनपुंसकमुच्यते ॥ 446 ॥

[2]प्रकृष्टं वलत इति प्रवालम्[3]। 'वल संवरणे संचरणे[4] च' ॥

पीवरे च जडे चैव स्थूलं त्रिष्वभिधीयते।

स्थूलयत इति स्थूलम्। 'स्थूल परिबृंहणे' ॥ २०४ ॥

[1] K6 adds कुशान् लातीति वा। 'ला आदाने'.　　　[2] प्रवलन्ते स्वरा अनेनि K2, K3.　　[3] प्रवालः K5, K6.　　[4] संचलने K6.

(विव.) पर्याप्तिक्षेम—शिक्षिते त्रिषु। पर्याप्तिः सामर्थ्यम्। कुशलो भारवाहने समर्थ इत्यर्थः। क्षेमे यथा—कुशलं ते ब्रूयात्। पुण्ये यथा—कुशलाचारशील इति। शिक्षिते यथा—कुशलस्तर्कविद्यायामिति। कुशान् लातीति कुशलः। कुशग्रहणस्येव दुष्करस्यापि कर्मणः करणे शक्त इत्यर्थः। कुं श्यति तनूकरोतीति कुशलः। 'शो तनूकरणे'। कलप्रत्ययः[1] (उ. १. १११) ॥ प्रवाल-

मङ्कुरेऽप्यस्त्री । अङ्कुरोऽत्र नवकिसलयः । वीणादण्डे विद्रुमे च प्रागुक्तम् (१, पृ. १२५, ६०८) । प्रकृष्टा वालाः केशा अस्येति प्रवालः सुकेशः । वबयोरभेदात् प्रकर्षेण बालोऽपि प्रवालः ॥ त्रिषु स्थूलं जडेऽपि च । जडो मन्दबुद्धिः । स्थूलं ज्ञानमित्येव । यथा—'बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत्' (शिशु. २. ७८) इति वाच्यलिङ्गः । अपिशब्दात् पीवरे[2] । स्थूलयत इति स्थूलम् । 'स्थूल परिबृंहणे'[3] (३. १. १३४) ॥ २०४ ॥

[1] 'वृषादिभ्यश्चित्'. [2] Tv adds अपि. [3] पचाद्यच्.

(पा.) पर्याप्तिक्षेम—शिक्षिते त्रिषु । [1]कुशलमिति सामर्थ्यमङ्गलमिति नपुंसकम् ॥ प्रवालमङ्कुरेऽप्यस्त्री । [2]अङ्कुरे नवपल्लवे । वीणादण्डविद्रुमयोरपि स्यात् ॥ त्रिषु स्थूलं जडेऽपि च । जडे निर्बुद्धौ[3] । पीवरेऽपि स्यात् ॥ २०४ ॥

[1] B_3 omits the sentence. [2] C_1 omits. [3] मन्दबुद्धौ A1.

करालो दन्तुरे तुङ्गे चारौ दक्षे च पेशलः ।
मूर्खेऽर्भकेऽपि बालः स्याल्लोलश्चलसतृष्णयोः ॥ २०५ ॥

इति लान्तवर्गः

(वि.) करालो दन्तुरे जिह्मे तुङ्गभीषणयोरपि ॥ 447 ॥

करोति भयमिति करालः[1] ॥

[2]रुचिरे कोकिले दक्षे मृदौ शीतांशुशेखरे ।
मुसले चापि कथितः पेशलः पूर्वसूरिभिः ॥ 448 ॥

पिशतीति पेशलः । 'पिश अवयवे' ॥

मूर्खे केशेऽर्भके [3]पुच्छे ह्रीबेरे बाल उच्यते ।

[4]बलत्यनेनेति बालः । 'वल प्राणने' ॥

तृष्णायुक्ते चञ्चले च लोलस्तु परिकथ्यते[5] ॥ 449 ॥

[6]लोडतीति लोलः । 'लुड विलोडने' ॥ २०५ ॥

इति लान्तवर्गः[7]

[1] भयंकरत्वात् करालः K2, K4.　[2] चिकुरे J2, K6.　[3] तुच्छे K6.
[4] बल्यतेऽनेन K4; K2, K3 add स्वल्पायासेनापि श्वसिति.　[5] परिकीर्तितः J2.
[6] लुलति, 'लुल संश्लेषणे' J2, K4.　[7] K2, K5 add लान्तवर्गसंख्या ३६.

(विव.) करालो दन्तुरे तुङ्गे । अत्रापि त्रिष्वित्यनुवर्तते । दन्तुरः उन्नतदन्तः । करोति भयमिति करालम् । कृणोतीति वा । 'कृञ् हिंसायाम्'[1] । शेषे—'कशेरुणि करालं नप् भीषणे वाच्यलिङ्गकः' इति ॥ चारौ दक्षे च पेशलः । पिशति अवयवव्यापारं करोतीति पेशलः । 'पिश अवयवक्रियायाम्' इति निष्कृष्टो धातुः[2] । शेषे—'पेशलो मृदुले प्रोक्तो[3] मुसले कोकिले हरे' इति ॥ मूर्खेऽर्भकेऽपि बालः स्यात् । मूर्खो दुराग्रहयुक्तः । वल्यतेऽज्ञानेन संव्रियत इति बालः । 'वल संवरणे' । अत्र सर्वधरः[4]—

बालोऽज्ञेऽश्वेभपुच्छयोः ।
शिशौ ह्रीबेरकचयोर्बाला तु त्रुटियोषितोः ।
बाली भूषान्तरे मेधौ ॥

इति । अश्वपुच्छमिभपुच्छं चेति[5] द्वन्द्वसमासार्थः । त्रुटिः सूक्ष्मेला । मेधिः खले दारु ॥ लोलश्चलसतृष्णयोः । चलः चञ्चलः । सतृष्णः साभिलाषः । लोलतीति लोलः । 'लुल विलोडने'[6] । त्रिष्विति पदस्यानुवृत्तेः वाच्यलिङ्गः ॥ २०५ ॥

इति लान्तवर्गः[7]

[1] करेणालाति । 'आतश्चोपसर्गे' इति, 'सुपि' (३. २. ४) इति योगविभागाद्वा कः । यद्वा करमलति । 'अल भूषणादौ' । 'कर्मण्यण्' इति भा. दी. (पृ. ४९६). [2] भावे घञ् । पेशं लाति । बाहुलकात् पिशेरलज्वा । इति भा. दी. (पृ. ४. ९६). [3] प्रोक्तौ B6. [4] विश्वः Tv. [5] Tv adds द्वयोः. [6] पचाद्यच् (३. १. १३४). [7] Tj1, Tj2 add लान्तवर्गसंख्या ३९.

(पा.) करालो—लोलश्चलसतृष्णयोः ।　त्रिष्वित्यधिकारनियमात् जिह्वालक्ष्म्योर्नोक्तम् । 'लोला जिह्वाकमलयोर्लोलश्चलसतृष्णयोः' इति विश्वः (पृ. १५२, श्लो. ४४) ॥ अनुक्तम्—

धूमेऽपि कन्दरालः स्याद् गण्डशैलोऽलिकेऽपि च ।
जम्बालः शैवलेऽपि स्यात् पञ्चालः स्याज्जनेऽपि च ।।
[1]हालाहलोऽश्वलालायामप्यरालो[2] गजेऽपि च ।
सिनीवाली भवान्यामप्याभीली दारुणेऽपि च ।।
वृषली कन्यका वन्ध्या म्रियमाणसुतापि च ।
पल्ली कुटीग्रामटयोर्वल्लः सूरण आर्द्रके ।।
हस्तिमल्लो गणपतौ महेन्द्रस्य च कुञ्जरे ।
ध्वनिनाला[3] तु वीणायां वेणुकाहलयोरपि ।।
स्यात्तु वायुफलं शक्रकार्मुके करकोपले ।
यज्वालः (?) कल्यपालश्च द्वाविमावासुतीवलौ[4] ।।
भस्मतूलमवश्यायः पांसुवर्षमिति द्वयम् ।। २०५ ।।

इति लान्तवर्गः

[1] अश्वलाला सर्पविशेषः. [2] आरालः A1. [3] °नाली A1, B3. [4] आसुतीवलः शौण्डिकः.

अथ वान्तशब्दाः—

दवदावौ वनारण्यवह्नी जन्महरौ भवौ ।
मन्त्री सहायः सचिवौ पतिशाखिनरा धवाः ।। २०६ ।।

(वि.) वने [1]वनोत्थदहने दवो दावश्च कीर्तितौ ।

दुनोति दूयतेऽनेन वा दवः दावश्च । 'टुदु[2] उपतापे' ।।

हरे जन्मनि संसारे सत्तायां प्राप्तिभावयोः ।। 450 ।।
उपादानश्रेयसोश्चाप्यवकल्कनभस्मयोः ।
अनुकल्के विकल्के च भवशब्द उदाहृतः ।। 451 ।।

[3]भवत्यस्मादिति भवः । 'भू [4]सत्तायाम्' । 'भुव अवकल्कने' ।।

सहाये च प्रधाने च सचिवः परिकीर्तितः ।

[5]सचते समवैतीति सचिवः । 'षच समवाये' ॥

धूर्ते प्रेतनरे वृक्षे धवः पत्यौ नरे भवेत् ॥ 452 ॥

[6]धूयत इति धवः । 'धूञ् कम्पने' ॥ २०६ ॥

[1] वनोत्थवह्नौ K2, K4; दवोत्थ° J2. [2] 'टुञ् परितापे' K2, K3. [3] भवत्यनेन K3, K5. [4] प्राप्तौ K2, K3. [5] सचति K2, K3. [6] धूनोति K4.

(विव.) दवदावौ वनारण्यवह्नी । [1]शब्दद्वयमत्र प्रतिपाद्यम् । वनं विपिनम्,[2] अरण्यस्य वह्निश्च दवशब्दस्य दावशब्दस्य च प्रत्येकं द्वावर्थौ । दूयतेऽनेन दवः । 'ऋदोरप्' (३. ३. ५७) । दुनोतीति दावः । 'दुन्योरनुपसर्गे' (३. १. १४२) इति णः ॥ जन्महरौ—भवौ । [3]ऋदोरबिति (३. ३. ५७) भावार्थे भवतेरप्प्रत्यये भव उत्पत्तिः । भवत्यस्मात् सर्वमित्यपादाने भवो हरः ईश्वरः । शेषे—'सत्तासंसारकल्याणप्राप्त्युपादानभस्मसु । भवः' इति ॥ मन्त्री सहायसचिवौ । बुद्धिकुशलोऽमात्यो मन्त्री । कृष्यादिकर्मस्वनुग्राहकः सहायः । [4]सचते समवैतीति[5] सचिवः । 'षच समवाये' ॥ पतिशाखिनरा धवाः । पतिर्भर्ता । शाखी वृक्षविशेषः । 'धूञ् कम्पने' । कर्तरि पचाद्यच् (३. १. १३४) । धवः कर्मणि वा । 'ऋदोरप्' (३. ३. ५७) । शेषे—'धवस्तु धूतौ स्याद् धूतिर्धुननम्' इति ॥ २०६ ॥

[1] दवौ दावौ इति Tv. [2] Tv adds 'अधिज्यधन्वा विचचार दावम्' इति (रघु. २. ८). [3] भवः संभवः । जन्म उत्पत्तिः । ऋदोरबिति भावे अपादाने च अप्रत्ययः Tv. [4] सचति B5, B6. [5] समुपैति Gm3.

(पा.) दवदावौ वनारण्यवह्नी । दवौ च तौ दावौ च दवदावौ इति विशेषणसमासः ॥ जन्महरौ भवौ । जन्ममात्रं च जन्मबन्धश्च जन्म[1] । 'भवः संसारसंप्राप्तिश्रेयःशंकरजन्मसु' इति विश्वः (पृ. १६२, श्लो २) ॥ मन्त्री—धवाः ॥ २०६ ॥

[1] जन्मनि A1.

अवयः शैलमेषार्का आज्ञाह्वानाध्वरा हवाः ।
भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥ २०७ ॥

(वि.) पर्वते तीक्ष्णरश्मौ चाप्यात्रेय्यामाखुकम्बले ।
मेषाख्यपशुभेदे चाप्यविस्तु समुदाहृतः ।। 453 ।।

[1]अवतीत्यविः । 'अव[2] रक्षणे' ।।

शासनाह्वानयोश्चापि सप्ततन्तौ हवो भवेत् ।

हूयतेऽस्मिन्निति हवः । [3]'हु दानादानयोः' ।।

सत्तास्वभावयोर्योनावभिप्रायात्मजन्तुषु ।। 454 ।।
चेष्टाक्रियापदार्थेषु [4]लीलाविभवभूतिषु ।
विकल्पनादौ सामर्थ्ये कान्तिनक्षत्रपालयोः ।। 455 ।।
सात्त्विकादौ रतौ वेगे भावो जन्मनि च स्मृतः ।

[5]भवतीति भावः । भा[6] अवतीति वा भावः । 'अव रक्षणे' ।। २०७ ।।

[1] K2 adds रक्षति. [2] J2 omits. [3] 'ह्वेञ् स्पर्धायां शब्दे च' K5.
[4] °बुधविभूतिषु K6. [5] भावयति K4. [6] भम् K2, K3.

(विव.) अवयः शैलमेषार्काः । अर्कः सूर्यः । अवति रक्षतीत्यविः । 'अव रक्षणे' (उ. ४. ११९) । शेषे—'अविर्मूषिककम्बले' इति । आखौ कम्बले [1]चेत्यर्थः । पुष्पवत्यां तु [2]सविसर्जनीय ईकारान्तः प्रागुक्तः (१, पृ. ३७३) ।। आज्ञाह्वानाध्वरा हवाः । 'ह्वेञ् स्पर्धायाम् शब्दे च' इति धातोः 'भावेऽनुपसर्गस्य' (३. ३. ७५) इति ह्वः संप्रसारणे अप्प्रत्यये च हवः, आह्वानं च । हूयन्तेऽस्मिन्नाज्यादीनीति हवोऽध्वरो यागः । 'हु दानादानयोः' । 'ऋदोरप्' (३. ३. ५७) ।। भावः—चेष्टात्मजन्तुषु । शेषे—

**'भावो बुधे विभूतौ च योनौ लीलापदार्थयोः ।
रतिवेगे शब्दवृत्तिनिमित्ते रसबन्धिनि ।।
विकल्पनादिषु प्राप्तौ जन्मन्यपि पुमान् भवेत् ।
भावं स्याद् भवसंबन्धे भं भामवति च त्रिषु ।।'**

इति । द्रव्यादीनामस्तित्वं सत्ता । यथा—'सर्वत्र सर्वदा भावः कालाकाशदिगात्मनाम्' । [3]सत्ताख्या परजातिर्भाव इति तार्किकाणां व्यवहारः । स्वभावो यावद्-

द्रव्यभावी धर्मः। यथा—[4]'भावानुरक्तवनितासुरतैः शपेयम्' इति (घटकर्पर २२)। अभिप्रायः तात्पर्यम्। यथा—अस्य श्लोकस्यायं भाव इति। चेष्टा नाम धात्वर्थरूपा क्रिया। यथा—'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इति। आत्मनि यथा—'स्वं भावं भावयेद् योगी' इति। आत्मानं भावयेदित्यर्थः। जन्तुषु यथा वनधर्मे—'शक्त्या कालभवैर्द्रव्यैः सर्वभावानुपालनम्' इति। बुधे यथा—'भावो विद्वान्' इति प्रागुक्तम् (१, पृ. १२८)। 'सौगतजरत्प्रव्राजिकायाः कामं प्रथमां भूमिकां भाव एकोऽधीते' इति। विभूतौ यथा—'अनित्या हि यतो भावास्ततो धर्मे मतिं कुरु' इति। योनौ यथा—[5]'स्त्रीभावे व्रणवत्क्लिन्ने यस्येच्छा कृमिरेव सः' इति। लीलायां यथा—भावावेदितमान्मथेति। पदार्थमात्रे यथा—द्रव्यादयः षडेव भावा इति। 'भावत्वाधिष्ठिताः सर्वाः प्रत्येकं व्यक्तयो मताः' इति च। रतिवेगे यथा—'भावसाध्यं द्वयोः कुर्यात् क्रोधहर्षकथान्तरैः' इति नैषधकाव्ये। शब्दप्रवृत्तिनिमित्ते यथा—'तस्य भावस्त्वतलौ' (५. १. ११९)। रसबन्धिनि रसनिष्पादके यथा—स्थायिभावाः, सात्त्विकभावाः, व्यभिचारिभावाः इत्यादि। जन्मनि यथा—'नासतो विद्यते भावः' इति (भ. गी. २. १६)। भवस्येदमित्यर्थे भवशब्दाद् अण्प्रत्यये भावम्। भं नक्षत्रम् अवतीति वा भां कान्तिमवतीति वा विवक्षायां भावशब्दस्य विशेष्यानुरोधात् त्रिलिङ्गत्वम्। सत्तादौ क्वचिदर्थविशेषे भवतेर्धातोर्भावार्थे घञि[6] भावः। अन्यत्र 'विभाषा ग्रहः' (३. १. १४३) इत्यत्र 'भवतेश्चेति [7]वक्तव्यम्' (वा. ३. १. १४३) इति कर्तरि णप्रत्यये भावः ॥ २०७ ॥

[1] मूषिकचर्मनिर्मितकम्बले वा. [2] अवीरिति Tv. [3] द्रव्यादित्रयवर्तिनि सत्ता जातिरपि Tv. [4] भावानुषक्त° B6. [5] Tv adds 'उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे'. [6] घञ्प्रत्यये Tj1, Tj2. [7] B6 omits.

(पा.) अवयः—ह्वाः। भावः सत्त्वस्वभाव—आत्मजन्मसु। [1]सत्त्वशब्देन सत्ताजन्तू कथितौ। तथा च विश्वप्रकाशे—

'भावः [2]स्वभावेऽभिप्राये चेष्टासत्तात्मजन्मसु।
क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु ॥'

इति (पृ. १६३, श्लो. १४) ॥ २०७ ॥

[1] सत्त्व° इति पारिजाताभिमतः पाठः. [2] स्वभावाभिप्राय° B3.

स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ।
अविश्वासेऽपह्नवेऽपि निकृतावपि निह्नवः ।। २०८ ।।

(वि.) स्यात् फलोत्पादयोः पुष्पे प्रसवो गर्भमोचने ।। 456 ।।

प्रसूयत इति प्रसवः । [1]'षूङ् प्राणिप्रसवे' ।।

निह्नवोऽपह्नवेऽपि स्यादविश्वासे च कैतवे ।

[2]निह्नूयत इति निह्नवः । 'ह्नुङ् [3]अपनयने' ।। २०८ ।।

[1] K3, K4 omit; 'षूङ् प्राणिगर्भविमोचने' K5. [2] J2 adds अपनीयते. [3] अपनये K2, K3.

(विव.) स्यादुत्पादे—गर्भमोचने । गर्भमोचने उत्पद्यत इति उत्पादोऽपत्यम्[1] । 'पदरुजविशस्पृशो घञ्' (३. ३. १६) इति घञ् । यथा—'अहो पशूनामपि प्रसववात्सल्यम्' इति मुरारिः (अ. रा. २. २२-) । गर्भमोचनं नाम दशममासादौ गर्भनिर्गमनव्यापारः[2] । यथा—प्रसवकाल इति । 'षूङ् प्राणिप्रसवे' इति धातोः कर्मणि भावे च 'ऋदोरप्' (३. ३. ५७) इत्यप्प्रत्ययः । अनुज्ञायामपि प्रसवशब्दः । यथा—'देवस्य त्वा सवितुः प्रसवे' (तै. सं. १. ८. ७. २) इति ।। अविश्वासे—निह्नवः । [3]अविश्वासे यथा—'शपथं कृतवत्यपि देशे मम चित्तं मुहुरेति निह्नवम्' इति । अपह्नवोऽपलापः । यथा—'निह्नवे भावितो दद्यात्' इति (या. स्मृ. २. २. ११) । निकृतिः तिरस्कारः । यथा—

'स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फाटिकसौधपङ्क्तीः' ।

इति माघकाव्ये (शिशु. ३. ४३) । निकृतिः शाठ्यमिति चन्द्रः । 'ह्नुङ् अपनये' इत्यस्माद् धातोर्भावे अप्प्रत्ययः[4] । अपनयोऽपलाप इति [5]धातुवृत्तिः । यत्र क्वचन कृतापह्नवे जायमानत्वाद् अविश्वासोऽपि निह्नव उच्यते ।। २०८ ।।

[1] उत्पाद उत्पत्तिरिति केचित् Tj1, Tv. [2] °निर्गमनोपायभूत° Tv. [3] Gm3 adds अविश्वसो विश्वासाभावः. [4] 'ऋदोरप्'. [5] मुद्रितमाधवीयधातुवृत्तौ न दृश्यते.

(पा.) स्यादुत्पादे—गर्भमोचने। उत्पाद उत्पत्तिः। फलपुष्पे वृक्षविकारौ। गर्भमोचनं प्रसूतिः॥ अविश्वासे—निह्नवः। 'विश्वासेऽपह्नवे चैव निकृतावपि निह्नवः' इत्यमरमाला। 'निह्नवस्त्वपलापे स्याद् विश्वामे[1] [2]निकृतावपि' इति जयकोशः[3]॥ २०८॥

[1] विश्वासो रहस्यमित्यर्थः. [2] विकृतौ A1. [3] जयः A1.

उत्सेकामर्षयोरिच्छाप्रसवे मह उत्सवः।
अनुभावः प्रभावे च सतां च मतिनिश्चये॥ २०९॥

(वि.) [1]उद्रेकेच्छाप्रसवयोरुत्सवो महकोपयोः॥ 457॥

उत्सूयतेऽस्मिन्नित्युत्सवः। [2]'षू प्रेरणे'॥

अनुभावस्तु विदुषां मतिनिश्चयनेऽपि [3]च।
भावबोधकसामर्थ्यभावनेष्वपि कथ्यते॥ 458॥

[4]अनुभावयतीत्यनुभावः। 'भुव अवकल्कने'॥ २०९॥

[1] उत्सेक° J2, K5. [2] K4, K5 add 'षु प्रसवैश्वर्ययोः'. [3] वा K6.
[4] अनुभवतीत्यनुभवः। अनुभव एव अनुभावः J2.

(विव.) उत्सेकामर्ष—मह उत्सवः। उत्सेक उद्रेकः। इच्छाप्रसव इच्छाया उत्पत्तिः। मह इति सप्तमी, उद्धर्षे इत्यर्थः। 'षू प्रेरणे', 'षु प्रसवैश्वर्ययोः' इति धातुभ्यां कर्मणि 'ऋदोरप्' (३. ३. ५७) इत्यप्प्रत्यये उत्सवः। पचाद्यच् (३. १. १३४) वा॥ अनुभावः—मतिनिश्चये। प्रभावे सामर्थ्ये यथा—महानुभावः। महापुरुषनिश्चये यथा—अनुभावविदितोऽयमर्थः। 'अनुभावो भावबोधकः' इति गतम् (१, पृ. १३३)। 'भवतेश्चेति वक्तव्यम्' (वा. ३. १. १४३) इति कर्तरि णप्रत्ययः। [1]'श्रिणीभुवोऽनुपसर्गे' (३. ३. २४) इत्यनुपसर्गादेव घञ्प्रत्ययो विहितः। तथापि 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति बहुलग्रहणात् सोपसर्गादपि [2]घञ्प्रत्ययः॥ २०९॥

[1] Tv adds अथवा यद्यपि. [2] Tj2 adds करणाद्यर्थेषु.

(पा.) उत्सेक—मह उत्सवः। उत्सेको [1]गर्वः। अमर्षोऽक्षमा। इच्छाप्रसर इच्छाप्रवृत्तिः। महो विवाहादिः। अनुभावः—मतिनिश्चये। मतिनिश्चयोऽभिप्रायनिर्णयः[2] ॥ २०९ ॥

[1] उन्नतिः A1. [2] °निश्चयनम् A1.

स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ।
शूद्रायां विप्रतनये शस्त्रे पारशवो मतः ॥ २१० ॥

(वि.) प्रभवो जन्महेतौ च स्थाने चाद्योपलब्धये ।

प्रभवतीति प्रभवः। 'भू सत्तायाम्' ॥ २१० ॥

[1] शूद्रायामित्यादिश्लोकार्धं विवृत्यभिमतपाठे न दृश्यते.

(विव.) स्याज्जन्महेतुः—आद्योपलब्धये। [1]जन्मकारणे यथा—'क्व सूर्यप्रभवो वंशः' इति (रघु. १. २)। [2]अन्यत्रोत्पन्नस्य प्रथमाविर्भावप्रदेशे यथा—प्रभवो हिमवान् गङ्गायाः इति। प्रभवति जायतेऽस्मादिति प्रभवः। अपादाने अप्प्रत्ययः[3] ॥ २१० ॥

[1] जन्मनो हेतुः पित्रादिः Tv. [2] देशान्तरोत्पन्नस्य गङ्गादेः यथाविर्भावः. [3] 'ऋदोरप्'; शूद्रायामित्यादिश्लोकार्धं विवरणे न दृश्यते.

(पा.) स्याज्जन्महतुः—आद्योपलब्धये। प्रथमोदाहरणम्[1]—अयं हि गङ्गाप्रभवो नगेन्द्रः॥ शूद्रायां—पारशवो मतः। परस्त्रीतनयेऽपि स्यात्। 'भवेत् पारशवः पारस्त्रैणे शूद्रासुतेऽपि[2] च' इति विश्वः (पृ. १६६, श्लो. ५६) ॥ २१० ॥

[1] B3 adds कौसल्याप्रभवो रामः. [2] द्विजात् इति मु. ग्र.

ध्रुवो भभेदे क्लीबे तु निश्चिते शाश्वते त्रिषु ।
स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ॥ २११ ॥

(वि.) नक्षत्रे [1]निश्चिते योगे शाश्वते शिवतर्कयोः ॥ 459 ॥
वने [2]वटे मुनौ शङ्कावबधौ [1]निश्चिते ध्रुवः ।

[3]मूर्वागीत्योः [4]शालपर्ण्यां स्रुग्भेदे च ध्रुवा मताः ॥ 460 ॥

ध्रुवति [5]स्थिरीभवतीति ध्रुवः । 'ध्रुव [6]गतिस्थैर्ययोः' ॥

ज्ञातावात्मनि वित्ते च स्वकीये स्वस्त्रिषु स्मृतः ।

स्वकीयत्वात् स्वः ॥ २११ ॥

[1] निश्चये J2.　[2] तटे K6.　[3] दूर्वा° K5.　[4] माल°.　[5] K2 omits.
[6] 'ध्रुव स्थैर्ये' K2, K6.

(विव.) ध्रुवो भभेदे—शाश्वते त्रिषु । भभेदस्तारकाविशेषः, उत्तानपादस्य पुत्रः । तत्र रूपभेदात् पुंलिङ्गः । निश्चिते तु नपुंसकलिङ्गः । यथा—'ध्रुवं प्रणाशः प्रहितस्य पत्रिणः' इति भारविः (किरा. १४. ६) । शाश्वत[1] वाच्यलिङ्गः । यथा—'ध्रुवा द्यौः ध्रुवा पृथिवी' (ऋग्वेद १०. १७३. ४), ध्रुवं विश्वमिदं जगत् इति । ध्रुवतीति ध्रुवः । 'ध्रुव स्थैर्ये' । 'पचाद्यच्' (३. १. १३४) । कुटादित्वात्[2] (१. २. १) गुणाभावः । शेषे—

'शिवे वसौ वटे योगे ध्रुवः स्त्री गीतिमूर्वयोः ।
ध्रुवं तु निश्चये तर्केऽवधौ ॥'

इति । शिवः कीलः । वसौ यथा—

'धरो ध्रुवश्च [3]सोमश्चाप्यहश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः ॥'

इत्यादिमत्स्यपुराणोक्तानाम् (५. २१) अष्टानां वसूनां मध्ये द्वितीयो वसुः । वटो न्यग्रोधतरुः । योगो विष्कम्भादिषु द्वादशः । गीतौ स्वरतालाश्रयविशेषे यथा—'विश्वामित्रस्य प्रावेशिकी ध्रुवा' इति मुरारिः (अ. रा. १. १३-) । तर्क उत्प्रेक्षा । यथा—'मन्ये शङ्के ध्रुवं प्रायः' इति दण्डी (का. आ. २. २३४) । अवधौ यथा—'ध्रुवमपायेऽपादानम्' (१. ४. २४) इति । स्रुग्भेदे तु स्त्रीलिङ्गे प्रागुक्तः (१, पृ. ४६५) । यथा—ध्रुवायामाज्यम् इति प्रयोगः । विश्वप्रकाशेऽपि—

'ध्रुवः कीले शिवे शङ्कौ वसौ योगे वटे मुनौ ।
ध्रुवा मूर्वाशालपर्ण्योर्गीतिस्रुग्भेदयोरपि ॥'

इति (पृ. १६२, श्लो. ८)। स्वो ज्ञाता—अस्त्रियां धने। स्वशब्दो ज्ञातिवचनः, रूपभेदात् पुंलिङ्गः। आत्मनि तु तत एव नपुंसकलिङ्गः। आत्मीये वाच्यलिङ्गः। धनवचनः पुंनपुंसकलिङ्गवचन इत्यर्थः। सुबोधिनीकारस्तु—पदस्यैकवाक्ये सत्यपि ज्ञात्यात्मनोर्द्वयोः पुंलिङ्गत्वमभिधाय तत्संवादित्वेन नानार्थरत्नकोशाभिधानमुदाजहार। यथा—'ज्ञात्यात्मनोः स्वः स्वं स्वोऽर्थः स्वं स्वः स्वात्मीयमात्रकः'[4] इति। तथा च—[5]'लक्ष्मीभृतोऽम्भोधितटाधिवासान् . . . बहूकृतान् स्वानिव पश्यति स्म' इति स्वशब्दस्यात्मवचनत्वेऽपि पुंलिङ्गप्रयोगो माघकाव्ये दृश्यते (शिशु. ३. ७१)। सुभूतिचन्द्रस्तु—रूपभेदाद् आत्मनि क्लीबमभिधाय तत्र 'स्वो ज्ञातावात्मनि क्लीबे' इति रभसवचनमुदाहृत्य, बोपालितस्तु 'आत्मन्यपि पुंलिङ्गत्वमाह' इति मतान्तरत्वमप्याह। स्यति नाशयति दुःखमिति स्वम्, सिनोति बध्नाति वा। 'षोऽन्तकर्मणि', 'षिञ् बन्धने'। 'स्वमज्ञातिधनाख्यायाम्' (१. १. ३५) इति निर्देशात् साधुः[6]। अत एव ज्ञातिधनयोर्वृक्षशब्दवद् रूपमुन्नेयम्। अन्यत्र पूर्वशब्दवदिति ॥ २११ ॥

[1] Tv adds अपि. [2] 'गाङ्कुटादिभ्योऽञ्णिन्ङित्'. [3] सोमश्च अहश्च Gm3, Tv. [4] °मातृकः B5, B6. [5] लक्ष्मीकृताम्भोधि° Tj1, Tj2. [6] स्वनति। स्वन्यते वा। 'स्वन शब्दे'। 'अन्येभ्योऽपि' (वा. ३. २. १०१) इति डः इति भा. दी. (पृ. ५००).

(पा.) ध्रुवो भभेदे—शाश्वते त्रिषु। भभेद औत्तानपादिः। अगभेदे इति पाठे अगभेदे स्थाणुवटौ ॥ स्वो ज्ञातौ—स्वोऽस्त्रियां धने। स्वो ज्ञातौ पुंलिङ्गः। आत्मनि स्वमिति नपुंसकम्[1]। 'स्वो ज्ञातावात्मनि क्लीबे' इति रभसः। अथवा स्वो ज्ञातावात्मनीति उभयत्र पुंलिङ्गः। 'स्वोऽस्त्री धने त्रिषु स्वीय आत्मनि स्वजने च[2] ना' इति वैजयन्ती। (पृ. २८०, श्लो. ३८) ॥ २११ ॥

[1] नपुंसकः A1. [2] तु इति मु. ग्र.

स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च।
शिवा गौरीफेरवयोर्द्वन्द्वं कलहयुग्मयोः ॥ २१२ ॥

(वि.) नीवी कान्ताकटीवस्त्रबन्धे परिपणेऽपि च ॥ 461 ॥

[1]नितरां वीयतेऽनयेति नीवी । 'व्येञ् संवरणे' ॥

गौरीफेरवयोर्भद्रे मोक्षे वेदे सुखे हरे ।
योगे [2]जले च शम्यां च रेचक्यां [3]गुग्गुलौ तथा ॥ 462 ॥
आमलक्यां वालुके च पुण्डरीके शिवस्त्रिषु ।

[4]शेरतेऽस्मिन्निति शिवः । 'शीङ् स्वप्ने' ॥

कलहे व्युत्क्रमे युग्मशिवयोर्विजनेऽपि[5] च ॥ 463 ॥
यज्ञपात्रप्रयोगे च समासे [6]द्वन्द्वमुच्यते ।

[7]मिथुनत्वाद् द्वन्द्वम् ॥ २१२ ॥

[1] नियतं J2, K5. [2] कीले K5; जिते K6. [3] गुग्गुले K3. [4] K5 adds मज्जनमनांसि. [5] विरले J2. [6] द्वन्द्वः J2, K5. [7] द्वौ सह वर्तेते इति J2, K2.

(विव.) स्त्रीकटी—परिपणेऽपि च । स्त्रीणां नितम्बदेशस्थस्य वाससः शैथिल्यपरिहारार्थं कृतो ग्रन्थिविशेष इत्यर्थः। नीयते वस्त्रादिदार्ढ्यमनयेति नीवी। 'नियो विच्'। वा ङीषि नीवी[1] स्त्रीकटीवस्त्रबन्धः। परिपणं नाम वणिजामायव्ययशुद्धं मूलधनम् । शेषे—'नीवी स्याद् बन्धनागारे' इति । अत्र स्त्रीग्रहणं नीवीशब्दस्य स्त्रीलिङ्गत्वप्रतिपादनपरमिति केनचित् कृतं व्याख्यानमनादरणीयम् । 'नीविराग्रथनं नार्या जघनस्थस्य वाससः' इति कात्योक्तेः॥ शिवा गौरीफेरवयोः। सृगालः फेरवः। शेषे—

'मोक्षे भद्रे सुखे शिवम् ।
हरे योगान्तरे वेदे वालुके गुग्गुलौ शिवः ॥
पुण्डरीकद्रुमे चाथ शिवा झण्टामलौषधे ।
अभयामलकीगौरीक्रोष्ट्रीसक्तुफलासु च ॥'

इति। हरादावर्थषट्के शिवशब्दः पुंलिङ्गः। योगविशेषो विष्कम्भादिषु विंशः। वालुकं हरिवालुकम् । हरीतक्यां सक्तुफलायां च स्त्रीलिङ्गतोक्ता (१, पृ. २५०, २४६) । विश्वप्रकाशेऽपि—

'शिवं मोक्षे [2]शुभे भद्रे सलिलेऽथ शिवो हरे ।
वेदे योगान्तरे कीले वालुके गुग्गुलेऽपि च ।।
पुण्डरीकद्रुमे [3]चापि शिवा झण्टामलौषधौ ।
अभयामलकीगौरीक्रोष्ट्रीसक्तुफलासु च ।।'

इति (पृ. १६३, श्लो. १०-११) । द्वन्द्वं कलहयुग्मयोः । द्वयोरिदमिति द्वन्द्वम् । कलहे यथा—'बाहुद्वन्द्वप्रवृत्तयोः' इति । द्वौ द्वौ इति द्वन्द्वं युग्मं मिथुनम् । यथा—'द्वन्द्वानि भावं क्रियया विवव्रुः' इति (कु. सं. ३. ३५) । 'द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' (८. १. १५) इति सूत्रेण द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावः उत्तरपदस्य अत्वं च निपात्यते । अत्र सूत्रे, अन्यत्रापि द्वन्द्वमिष्यते इत्युक्तत्वात् साधुत्वम् । शेषे—'द्वन्द्वं रहस्यमर्यादायज्ञपात्रप्रयोजने' इति । यथा—द्वन्द्वं मन्त्रयते । रहस्यं मन्त्रयत इत्यर्थः । मर्यादावचने यथा—[4]'आचतुरं होमे पशवो द्वन्द्वं मिथुनायन्ते' इति । यज्ञपात्रे यथा—'द्वन्द्वं [5]यज्ञपात्राणि प्रयुनक्ति'[6] इति । व्युत्क्रमणं हि विभेदः पृथगवस्थानम् । यथा—द्वन्द्वं व्युत्क्रान्ता ब्राह्मणा इति । [7]द्विवर्गसंबन्धेन पृथगवस्थिता इत्यर्थः ।। २१२ ।।

[1] निव्ययति, निवीयते वा । 'व्येञ् संवरणे' । 'नौ व्यो यलोपः पूर्वस्य च दीर्घः' (उ. ४. १३७) इतीण् । 'कृदिकारात्—' (ग. ४. १. ४५) इति ङीष् इति भा. दी. (पृ. ५०१). [2] सुखे इति मु. ग्र. [3] चाथ Tj1. [4] काशिका (पृ. ३७६). [5] न्यञ्चि B6. [6] धीरः इत्यपि काशिकायाम् (२, पृ. ३७६). [7] द्विवर्ण° B5.

(पा.) स्त्रीकटी—परिपणेऽपि च । शिवा गौरीफेरवयोः । फेरवे स्त्री ।

'शिवा हरीतकी क्रोष्टा शमी नद्यामलक्युमा ।
शिवो [1]घोले पद्मरागे हरे [2]कीले शिवं जले ।।'

इति वैजयन्ती (पृ. २३७, श्लो. ८४) ।। द्वन्द्वं कलहयुग्मयोः । [3]कलहे पुंलिङ्गः । 'द्वन्द्वो रहस्ये कलहे द्वन्द्वं मिथुनयुग्मयोः' इति विश्वः (पृ. १६४, श्लो. २१) ।। २१२ ।।

[1] तक्रे इत्यर्थः. [2] कीरे B3. [3] कलहः A1.

द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।
क्लीबं नपुंसके षण्ढे वाच्यलिङ्गमविक्रमे ।। २१३ ।।

इति वान्तवर्गः

(वि.)　द्रव्ये [1]प्राणे बले जन्तौ व्यवसायस्वभावयोः ।। 464 ।।
गुणे वित्ते [2]सतो भावे सत्त्वं गुणिनि तु[3] त्रिषु ।

[4]सीदतीति सत्त्वम् । 'षद्लृ विशरणादौ' । सतो भावो वा सत्त्वम् ।।

क्लीबं तु त्रिषु च प्रोक्तं निष्पराक्रमषण्डयोः ।। 465 ।।

[5]अप्रजत्वेन क्लाम्यतीति क्लीबः । 'क्लमु ग्लानौ' ।। २१३ ।।

इति वान्तवर्गः[6]

[1] द्रुमे J2.　[2] सतां J2.　[3] च K3, K4.　[4] सीदत्यस्मिन् K5, K6.
[5] क्लीबतेऽधीरो भवतीति । 'क्लीबृ अधाष्टर्ये' K5.　[6] K2, K5 add वान्तशब्दसंख्या २०.

(विव.) <u>द्रव्यासु—अस्त्री तु जन्तुषु</u>। इह द्रव्यशब्देन पारिभाषिकं द्रव्यमाश्रीयते। तथा हि—

'वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन [1]विवक्षितः ।।'

इति । अस्यार्थः—यत्र यस्मिन्नर्थे तदिदमिति सर्वनामद्वयमतीतवर्तमानसंबन्धवस्तु-प्रतिपादकं प्रयुज्यते स [2]कालद्वयसंबन्धिसिद्धरूपार्थो भेद्यत्वेन विवक्षितः। गुणक्रिया-सामान्यैर्विशेष्यत्वेन विवक्षितो द्रव्यमित्युच्यते इति। यथा—'सत्त्वे निविशतेऽपैति' इति। असुषु प्राणेषु यथा—अन्तःसत्त्वः इति। व्यवसाय उत्साहः। यथा—सर्वत्र सत्त्वसंपन्न इति। द्रव्यादित्रये रूपभेदाद् नपुंसकलिङ्गत्वम्। जन्तुषु प्राणिमात्रे यथा—'सर्वसत्त्वहिते रतः' इति। [3]सीदतीति सत्त्वम्। औणादिकत्वन्प्रत्ययः[4] (उ. ४. १०७)। <u>विश्वप्रकाशे</u>—

'सत्त्वं [5]गुणे पिशाचादौ बले द्रव्यस्वभावयोः ।
[6]सद्भावे व्यवसाये च चित्ते [7]प्राणेषु शब्द्यते[8] ।।'

इति (पृ. १६३, श्लो. १६)। सात्त्विकप्रकृतिरिति सत्त्वाख्ये गुणे। सत्त्वनाथ इति पिशाचादौ। सिंहसत्त्वः इति बले। सतो भावः सद्भावः। शुद्धसत्त्व इति चित्ते॥ क्लीबं नपुंसके––अविक्रमे। नपुंसके तृतीयप्रकृतौ। षण्डे वर्षवरे। उभयत्र रूपभेदाद् नपुंसकत्वम्। पर्यायप्रस्तावे नपुंसकलिङ्ग उक्तः (१, पृ. ३८४)। अत एवामरमालायाम्––'अस्त्री नपुंसके क्लीबम्' इत्यभिहितम्। अविक्रमे धैर्यरहिते विशेष्यनिघ्नः। वबयोरेकत्वाभिधानात् काण्डस्थवकारमध्ये क्लीबशब्दोऽप्युक्तः॥ २१३॥

इति वान्तवर्गः[9]

[1] व्यवस्थितः इति स्वामी (पृ. ३२३). [2] °द्वयवस्तुसंबन्धिनि Tv. [3] सीदति जात्यादिकं प्रवृत्तिनिमित्तमत्रेति द्रव्यम्। अन्यत्तु सीदतीति सत्त्वम्। 'षद्लृ विशरणगत्यवसादनेषु' Tv. [4] 'अन्येभ्योऽपि दृश्यन्ते'. [5, 6] द्रव्ये, आत्मत्वे इति मु. ग्र. [7] प्राणिषु Tj1, Tj2. [8] जन्तुषु इति मु. ग्र. [9] Gm3, Tv add शब्दसंख्या २०.

(पा.) द्रव्यासु––अस्त्री तु जन्तुषु। जन्तव इत्यनेन पिशाचादयोऽप्युक्ताः। 'पिशाचादौ गुणे प्राणिवले जन्तौ च चेतसि' इत्यजयः[1]॥ क्लीबं नपुंसके––अविक्रमे॥ अनुक्तम्––

[2]सोमात्मनोरपि च विः जीवः स्यादसुमत्यपि।
भुवनेऽपि च विश्वं स्यात् पार्श्वोऽस्त्री निकटेऽपि च॥
निष्पावः शूर्पवातेऽपि संभवः संहतावपि।
एनस्यपि भवेत् किण्वं स्नेहेऽपि स्यादपह्नवः॥
फेरवो राक्षसेऽपि स्याद् ह्रस्वः स्यादन्तकेऽपि च।
वडवा [3]घटचेट्यां च याचके च कुशीलवः॥
कैरवः [4]कितवे पुंसि चन्द्रिकायां तु कैरवी।
भार्गवी कमलायां स्याद् भार्गवस्तु धनुर्धरे॥
माधवी शीधुकुट्टन्योर्माधवः स्याद् वसन्तके॥ २१३॥

इति वान्तवर्गः

[1] जयकोशः A1. [2] व्योमात्मनोः A1. [3] कुम्भदासीत्यर्थः. [4] केतके A1.

अथ शान्तवर्गः—

द्वौ विशौ वैश्यमनुजौ द्वौ चराभिमरौ स्पशौ ।
द्वौ राशी पुञ्जमेषाद्यौ द्वौ वंशौ कुलमस्करौ ॥ २१४ ॥

(वि.)　विड् वैश्ये मनुजे विष्ठावेशयोश्च [1]जने भवेत् ।

विशतीति विट् । 'विश प्रवेशने' ॥

स्पशश्चाराभिमरयोः[2] युद्धे च परिकीर्तितः ॥ 466 ॥

स्पशतीति स्पशः । 'स्पश [3]बाधनस्पर्शनयोः' ॥

मेषादौ धान्यपुञ्जे च राशिशब्दः प्रकीर्तितः ।

[4]रश्यत इति राशिः । 'रश कान्तौ' ॥

वेणौ वर्गे [5]कुले वंशः पृष्ठस्यावयवेऽपि च ॥ 467 ॥

वन्यत इति वंशः । 'वन षण संभक्तौ' ॥ २१४ ॥

[1] मनुजे K5, K6.　[2] अभिमरो मारणम्.　[3] स्पर्शबाधनयोः K2, K3, K6.
[4] राश्यते K2, K3.　[5] अङ्कुरे K6.

(विव.)　द्वौ विशौ वैश्यमनुजौ । मनुजो मनुष्यमात्रः । यथा—'विशां-पतिर्विष्टरभाजमारात्' इति (रघु. ५. ३) । स्त्रीविवक्षायां तु[1] स्त्रीलिङ्गो[2] वक्ष्यते । [3]प्रवेशमात्रे तु भावे क्विपि[4] स्त्रीलिङ्गः । वर्चस्के प्रागुक्तः (१, पृ. ४०४)॥ द्वौ चराभिमरौ स्पशौ । [5]चरो गूढपुरुषः । प्राणसंशयावहव्यापारेषु सर्पग्रहणहस्ति-योधनादिषु प्रवृत्तः साहसिकोऽभिमर इति सुबोधिनीकारः । अभिमरः संग्राम इति सुभूतिः । स्पशतीति स्पशः । 'स्पश [6]बाधनस्पर्शनयोः' । 'स्पशः प्रणिधियुद्धयोः' इति विश्वप्रकाशः (पृ. १६७, श्लो. ३) ॥ द्वौ राशी पुञ्जमेषाद्यौ । संस्थान-विशेषविशिष्टो व्रीह्यादिसमूहः पुञ्जः । यथा—धान्यराशिः, तिलराशिः इति । आद्यशब्देन ज्योतिःशास्त्रप्रसिद्धानां वृषभमिथुनादीनां ग्रहणम्[7] ॥ द्वौ वंशौ कुल-मस्करौ । कुलं संतानम्[8] । मस्करो वेणुः । विश्वप्रकाशे—[9]'पृष्ठास्थ्नि गेहोर्ध्वकाष्ठे वंशो वेणौ गणे कुले' इति (पृ. १६८, श्लो. १०) ॥ २१४ ॥

[1] Tv adds विट्शब्दः. [2] Tj1, Tj2 add अपि. [3] Tv adds शेषे—'विशः प्रवेशे स्त्रियामेव'. [4] विशतीति विट्। 'विश प्रवेशने'। 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति क्विप्. [5] चारः B6. [6] परिबाधने Gm1, Gm3. [7] राति, राशयति वा राशिः इति स्वामी (पृ. ३२३). [8] संतानः Tv. [9] अयं पाठः वैजयन्त्यां दृश्यते (पृ. २१८, श्लो. ५२); विश्वप्रकाशे तु—'वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च' इति.

(पा.) द्वौ विशौ वैश्यमनुजौ। [1]भूमिस्पृशावपि स्याताम्। 'भूमिस्पृशौ वैश्यनरौ' इति वैजयन्ती (पृ. २४४, श्लो. ५६)॥ द्वौ चराभिमरौ स्पशौ। अभिमरो [2]युद्धम्। 'स्पशः प्रणिधियुद्धयोः' इति विश्वः (पृ. १६७, श्लो ३)॥ द्वौ राशी—वंशौ कुलमस्करौ। अन्वयश्च समूहश्च कुलं स्यात्। 'वंशः पृष्ठास्थ्नि गेहोर्ध्वकाष्ठे वेणौ गणेऽन्वये'[3] इति वैजयन्ती (पृ. २१८, श्लो. ५२)॥ २१४॥

[1] भूमिस्पृश् इति शब्दस्यापि वैश्यो नरश्चेति द्वावर्थौ. [2] A1 adds वधश्च. [3] कुले इति मु. ग्र.

रहःप्रकाशौ वीकाशौ निर्वेशो भृतिभोगयोः।
कृतान्ते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु॥ २१५॥

(वि.) रहस्ये च प्रकाशे च [1]वीकाशः परिकीर्तितः[2]।

विगतः काशः, विशिष्टा[3] दीप्तिरस्येति वा वीकाशः। 'काशृ दीप्तौ'॥

भृतौ भोगे मूर्च्छने च निर्वेशो वक्ष्यते बुधैः॥ 468॥

[4]निर्विश्यत इति निर्वेशः। 'विश[5] प्रवेशने'॥

कीनाशः क्षुद्रयमयोः कर्षकोपान्तघातिनोः।

कुत्सितं नाशयतीति [6]कीनाशः। 'णश अदर्शने'॥ २१५॥

[1] विकाशः J2, K5. [2] परिकीर्त्यते K2, K3; °कथ्यते J2, K6. [3] विशेष° K2. [4] J2, K5 add भुज्यते. [5] K3, K4 omit. [6] कियतो वाशतो नाशयति K5, K6.

(विव.) रहःप्रकाशौ नीकाशौ। 'काशृ दीप्तौ' इति धातोः कर्मणि घञ्। काशः प्राकट्यम्। नीत्युपसर्गो निषेधार्थत्वेऽपि। [1]नीकाशः प्रकाशः[2]।

'उपसर्गस्य घञ्यमनुष्ये बहुलम्'[3] (६. ३. १२२) इति दीर्घः। समासोत्तरपदत्वे सत्येव सदृशवचनो नीकाशशब्दः प्रागुक्तः (१, पृ. ६४२) ॥ निर्वेशो भृतिभोगयोः। निर्विश्यत इति निर्वेशः। भृतिर्वेतनम्। भोग आभोगः। 'निर्विष्टविषयस्नेहः' इति (रघु. १२. १) ॥ कृतान्ते पुंसि—कर्षकयोस्त्रिषु। कृतान्तो यमः। क्षुद्रः कृपणः। कर्षकः कृषीवलः। की इति निपातः कुत्सितार्थेऽस्तीति भोजदेवेनोक्तमिति सुबोधिनीकारः। कुत्सितं नाशयति प्राणिनः कुटुम्बादिकं वेति कीनाशः[4]। 'कीनाशः कर्कशे क्षुद्रे [5]कृतान्तोपान्तघातिनोः' इति विश्वप्रकाशः (पृ. १६६, श्लो. २१)। कीनाशः कर्कशेऽप्याहुः ॥ २१५ ॥

[1] नीकाश इति विवरणाभिमतः पाठः.　[2] निगतः काशोऽत्रेति नीकाशो निर्जनस्थानम्। निश्चयः काशोऽत्रेति नीकाशः प्रकाशः Tv.　[3] 'इकः काशे' (६. ३. १२३) इति दीर्घः इति भा. दी. (पृ. ५०१); अत्र काशशब्दः पचाद्यच्प्रत्ययान्त इति काशिका (२, पृ. २३४).　[4] पचाद्यच् (३. १. १३४)। 'क्लिश बन्धे'। 'क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च' (उ. ५. ५६) इति भा. दी. (पृ. ५०१-२).　[5] कृतान्तपशुघातिनोः इति मु. ग्र. [?]उपांशुघातिनोः इति सुवचम्.

(पा.)　रहः प्रकाशौ वीकाशौ। प्रकाशः स्फुटः ॥ निर्वेशो भृतिभोगयोः। भृतिर्नाम[1] वेतनम् ॥ कृतान्ते पुंसि—कर्षकयोस्त्रिषु। [2]क्षुद्रः कदर्यः। 'कीनाशो रक्षसि यमे कदर्ये [3]कृषके त्रिषु' इति वैजयन्ती (पृ. २५८, श्लो. २३) ॥ २१५ ॥

[1] B3, C1 omit नाम.　[2] क्षुद्रं कदर्यम् A1.　[3] कर्षके इति मु. ग्र.

पदे लक्ष्ये निमित्तेऽपदेशः स्यात् कुशमप्सु च।
दशावस्थानेकविधाप्याशा तृष्णापि चायता ॥ २१६ ॥

(वि.)　प्रसिद्धौ [1]लक्ष्यपदयोरपदेशो निमित्तके ॥ 469 ॥

अपदिश्यत इत्यपदेशः। 'दिश अतिसर्जने' ॥

जले दर्भे रामसुते द्वीपे पापिष्ठमत्तयोः।
अयोविकारे योक्त्रे च शङ्कावौदुम्बरे[2] कुशः ॥ 470 ॥

कौ भुवि शेत इति कुशः। 'शीङ् स्वप्ने' ॥

दशा नानाविधावस्थावर्त्योर्वस्त्राञ्चलेऽपि च ।

दश्यत छिद्यत इति दशा । 'दंश दशने' ।।

स्यादाशाधिकतृष्णायां दिशि व्याप्तौ [3]भुजौ पुमान् ।। 471 ।।

आ समन्तादश्नुत[4] इत्याशा । 'अशू व्याप्तौ'[5] ।। २१६ ।।

[1] लक्ष° K6. [2] K5 adds छन्दोगा हि स्तोत्रसंख्यायां कुशाशब्दं प्रयुञ्जते. [3] भोजने इत्यर्थः. [4] अश्नोति, अश्यते वा K3. [5] K3 adds 'अश भोजने'.

(विव.) पदे लक्ष्ये—अपदेशः स्यात् । अपदिश्यते [1]माथुरः स्रौघ्नः पर्वतीय इति निर्दिश्यते पुरोऽनेनेत्यपदेशः[2] । पदं स्थानम् । यथा—मथुरापदेशाः, स्रुघ्नापदेशाः इत्यादि । यत्किंचिदुद्देशेन प्रत्युक्तं लक्ष्यं व्याजः । यथा—'रक्षापदेशान्मुनिहोमधेनोः' इति रघुवंशे (२. ८) । निमित्तशब्दो हेतुवचन इति प्रागुक्तम् (२, पृ. ३२६) । यथा—तार्किकाणां लिङ्गदर्शनरूपे प्रकृतिहेतावपदेश इति। व्यवहारो यथा—'अप्रसिद्धोऽनपदेशोऽसन् संदिग्धश्चानपदेशः' (वै. सू. ३. १. १५) इति । 'अपदिश्यत इत्यपदेशो हेतुः' इति किरणावलीकारः (पृ. २२८) । अहेतुरनपदेशशब्देनोक्तः । शेषे—'प्रसिद्धावपदेशः स्यात्' इति । यथा—'औदार्यशौर्यधैर्येषु निःसीमव्यपदेशभाक्' इति ।। कुशमप्सु च । अप्सु जले । कुं भूमिं श्यति नाशयतीति कुशम् । श्यतेः कः[3] (३. २. ४) । चशब्दाद् 'अस्त्री कुशं कुथो दर्भः' इति गतम् (१, पृ. ३१८) । शेषे—

'द्वीपराजन्ययोः कुशः ।
छन्दोगस्तोत्रगणनाशङ्कावौदुम्बरे तथा[4] ।।'

इति । द्वीपे यथा—कुशद्वीपाख्यः । राजन्यः क्षत्रियविशेषो रामसुतः[5] । द्वयो रूपभेदात् पुंलिङ्गः । यज्ञकर्मणि [6]छन्दोगस्तोत्रगणना पञ्चदशसप्तदशादिस्तोत्रेषु संख्याविशेषप्रतिपत्त्यर्थं कल्पिताः प्रादेशमात्रा आस्तरण्यां निधीयमाना औदुम्बराः शङ्कवः । ते कौ भूमौ शेरते तिर्यङ्ङ निहिता भवन्तीति व्युत्पत्त्या टाबन्तेन कुशाशब्देनोच्यन्ते । अयोविकारे तु जानपदादिसूत्रेण (४. १. ४२) ङीबन्तः कुशीशब्दः प्रागुक्तः (१, पृ. ६१२) । या काचन स्त्रीलिङ्गपदाभिधेया भूमिं नाशयन्ती भवति

सापि कुशा । यद्यपि [7]कुशीति भोगशेषे (?) त्रिलिङ्गत्वमनुपदमेवाभिधीयते, तथापि स्त्रियामाबन्तत्वकथनार्थमिहोदाहृतम् ।। दशावस्थानेकविधापि । बाल्ययौवनादिरूपेणावस्थाया बहुविधत्वं, दशति पूर्वावस्थामिति दशा । 'दंश दशने'[8] । शेषे—'दशा प्रदीपवर्तौ स्यात्' इति । दीपधारणार्था वर्तिः यथा—'दीपो राम इवाभाति विनाशितदशाननः' इति । वस्त्रस्य दशा इति गतम् (१. पृ. ४३४) ।। आशा तृष्णापि चायता । आशा अतिमात्रोऽभिलाषः । आशासनम् आशा । 'शासु अनुशिष्टौ'[9] । शेषे—'आशा व्याप्तौ भुजौ च ना' इति । भुजिर्भोजनम् । यथा—'अजीर्णे प्रातराशेऽपि सायमाशो न दुष्यति' इति वाग्भटः । दिक्पर्यायेषु गतम् (१, पृ. ५१) ।। २१६ ।।

[1] माधुरः B5, B6. [2] घञ् (३. ३. १६). [3] 'सुपि' (३. २. ४) इति योगविभागात् कः इति भा. दी. (पृ. ५०२). [4] मता Tv. [5] B6 adds दशरथपौत्रः. [6] उद्गातारः त्रिवृत्पञ्चदशसप्तदशस्तोमेषु . . . आस्तरण्यां क्षिपन्ति । ते शङ्कवः Gm3, Tv. [7] कुश्यदिति भानुशतके (?) Tv. [8] मूलविभुजादि-कः (वा. ३. २. ५) । यद्वा 'पचाद्यच्' । 'जपजभदहदश . . .' (७. ४. ८६) इति निर्देशाद् अकिङत्यपि नलोपः । यद्वा दश्यते । 'गुरोश्च . . .' (३. ३. १०३) इत्यङ इति भा. दी. (पृ. ५०२). [9] आ समन्तादश्नुते । 'अशू व्याप्तौ' । पचाद्यच्.

(पा.) पदे [1]लक्ष्ये—अपदेशः स्यात् । पदं [2]नाम कपटः । लक्ष्यं[3] व्याजः । कुशमप्सु च । 'कुशा वल्गा कुशी फालः[4] कुशो दर्भः कुशं जलम्' इति शाश्वतः (अने. स. पृ. ३०, श्लो. ३३७) ।। दशावस्थानेकविधापि । 'दशा वर्तावस्थायां वस्त्रान्ते[5] स्युर्दशा अपि' इति विश्वप्रकाशिका (पृ. १६८, श्लो. १३) ।। आशा तृष्णापि चायता । दिगपि स्यात् ।। २१६ ।।

[1] लक्षे A1. [2] B3 omits. [3] A1 adds नाम. [4] लाङ्गलदण्ड इत्यर्थः. [5] वस्त्रांशे इति मु. ग्र.

वशा स्त्री करिणी च स्याद् दृग् ज्ञाने ज्ञातरि त्रिषु ।
स्यात् कर्कशः साहसिकः कठोरामसृणावपि ।। २१७ ।।
प्रकाशोऽतिप्रसिद्धेऽपि शिशावज्ञे च बालिशः ।
कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ।। २१८ ।।

इति शान्तवर्गः

(वि.) प्रमाणायत्ततायां स्यादिच्छाप्राभवयोरपि ।
वन्ध्याकरिण्योर्योषायां स्त्रीगवीसुतयोर्वशा ।। 472 ।।

[1]वष्टि इच्छतीति वशा । 'वश कान्तौ' ।।

ज्ञाने ज्ञातरि बुद्धौ च स्त्री नेत्रे दृक् प्रकथ्यते ।

[2]पश्यत्यनयेति दृक् । 'दृशिर्[3] प्रेक्षणे' ।।

कर्कशो निर्दये क्रूरे कठोरेक्षावमर्षणे ।। 473 ।।
खड्गे साहसिके कासमर्दकाम्पिल्लयोरपि[4] ।

कृणातीति कर्कशः । 'कॄ हिंसायाम्' ।।

[5]अतिप्रसिद्धे [6]द्योतेऽपि प्रकाशः [7]काशवत्यपि ।। 474 ।।

प्रकाशत इति प्रकाशः । 'काशृ दीप्तौ' ।।

अज्ञबालकयोश्चापि बालिशः परिकीर्तितः[8] ।

[9]वालते आप्लावत इति बालिशः । 'बाड़ आप्लाव्ये ।।'

कृपाणे च नृशंसे च निस्त्रिंशः परिकथ्यते[10] ।। 475 ।।

[11]निष्क्रान्तस्त्रिंशदङ्गुलिभ्य इति निस्त्रिंशः ।।

आयुधे वन्धने चापि पाशो रज्जौ प्रकीर्तितः ।

पाश्यत इति पाशः । 'पश [12]वन्धे' ।।

कोशः [13]खड्गपिधाने स्याद् मुकुलेऽर्थौघदिव्ययोः ।। 476 ।।

कूयते स्तूयत इति कोशः । 'कु शब्दे' ।। २१७–१८ ।।

इति शान्तवर्गः[14]

[1] उश्यते K2, K3. [2] दृश्यते K3. [3] K3, K4 omit. [4] काम्पिल्य° J2, K5. [5] अतिप्रसिद्धौ K5, K6. [6] द्योत्ये K2, K4. [7] काश इत्यपि J2.

[8] संप्रकीर्तितः J2, K3.　[9] बाडते J2, K5.　[10] परिकीर्तितः K6.　[11] °त्रिशतो° K4.
[12] बन्धने K3, K4.　[13] खड्गपरीधाने कुड्मले J2.　[14] K2, K5 add शान्तशब्द-संख्या १३.

(विव.) वशा स्त्री करिणी वन्ध्या। स्त्री मानुषी। वन्ध्या या काचित् [अनपत्या]। वष्टि इच्छतीति वशा। 'वश कान्तौ'[1]। कान्तिरिच्छेति धातुवृत्तौ। शेषे—

'प्रभुत्वेच्छायत्ततासु वशो ना त्रिषु तद्वति।
स्त्रीगवीसुतयोः स्त्री स्यात्॥'

इति। प्रभुत्वे यथा—स्ववशः, स्वप्राधान्यवानित्यर्थः। तद्वति प्रभुत्वादिधर्मयुक्ते विशेष्यनिघ्नः। सुता दुहिता। तथा च वैजयन्त्याम्—'वशा करिण्यां वन्ध्यायां रामायां दुहितर्यपि' इति (पृ. २३५, श्लो. ७१)॥ दृग्ज्ञाने ज्ञातरि त्रिषु। 'दृशिर् प्रेक्षणे' इत्यस्माद्धातोः संपदादित्वात् (वा. ३. ३. ९४) क्विपि दृक्शब्दो ज्ञानवचनः स्त्रीलिङ्गश्च। 'क्विप् च' (३. २. ७६) इति कर्तरि क्विपि दृक् ज्ञाता। तत्र विशेष्यलिङ्गः विचक्षणे। नयने च स्त्रीलिङ्गः प्रागुक्तः (१, पृ. ४२१)। 'क्विन्-प्रत्ययस्य कुः' (८. २. ६२) इत्यत्र प्रत्ययग्रहणात् क्विबादिप्रत्ययान्तरेऽपि कुत्वं क्वचिद् भवतीति न्यासकारेणोक्तम् (पञ्जिका २, पृ. १००४)। तेन दृशेरपि [2]क्विप्प्रत्ययप्रकृतेः पदान्तरेऽपि कुत्वं भवति॥ स्यात् कर्कशः—अमसृणावपि। [3]लोभेन परधनहरणपरस्त्रीधर्षणादिकरणशीलः साहसिकः। कठोरः कठिनः पाषाणादिः। अमसृणो रूक्षः तुषाङ्गारभस्मादिः। 'कॄ हिंसायाम्' इत्यस्मादौणादिके कशप्रत्यये कर्कशः[4]। अथवा कर्कम् अश्मविशेषमपि श्यति नाशयति तनूकरोति स्वगतपारुष्येणेति कर्कशः[5]। शेषे—'कर्कशौ क्रूरनिर्दयौ। खड्गेक्षुकाः समर्थाश्च'। कर्कशशब्दवाच्या इत्यर्थः। 'अपीवरो बृहत्काण्डः कृष्टेक्षुः कर्कशाभिधः' इत्यायुर्वेदद्रव्यभेदे च। 'काम्पिल्यः कर्कशः' इति गतम् (१, पृ. ३०४)। त्रिष्विति पदस्य पूर्ववाक्यादनुवृत्तेरस्यापि वाच्यलिङ्गत्वमुन्नेयम्॥ प्रकाशोऽतिप्रसिद्धेऽपि। त्रिष्वित्यनुवर्तते। 'विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः' इति कालिदासः (रघु. ४. ३१)। प्रकर्षेण काशत इति प्रकाशः। 'काशृ दीप्तौ', पचाद्यच् (३. १. १३४)। शेषे—'प्रकाशः प्रकाशवानपि' इति। 'प्रकाशो द्योत आतपः' इति पुंलिङ्गो गतः (१, पृ. ७२)। भावमात्रवचनत्वेऽपि पुंलिङ्गः॥ शिशावज्ञे च

बालिशः। विशेष्यनिघ्नवर्गे बालिशः कृतनिर्वचनः[6]।। कोशोऽस्त्री—अर्थौघदिव्ययोः। कुड्मलो मुकुलः। यथा—'कोशद्वन्द्वमिदं दधाति नलिनी कादम्बचञ्चुक्षतम्' इति। खड्गपिधाने यथा—[7]'उन्मुक्तकञ्चुकतेयमुदारकान्तिः शस्त्रीव शम्बररिपोरपनीतकोशः' इति। खड्गग्रहणमुपलक्षणम्। पिधायकमात्रे कोशशब्दो वर्तते। यथा—गर्भकोशान्निर्गत इति। अन्नमयादीनां पञ्चानामपि ब्रह्मस्वरूपावरकत्वेन कोशः प्रसिद्धः। अर्थौघो धनसमूहः, कृताकृतोभयरूपसुवर्णरजतसमुदायः। यथा—'कोशदण्डाविव क्षितिः' इति कालिदासः (रघु. १५. १३)। कोशागारमिति च। दिव्यं शपथम्। ब्रुवते च दुर्गाभैरवाद्युग्रदेवतास्नानोदकपानरूपम्। यथा—तुलाग्न्यापो विषं कोशो दिव्यानीति। विप्रं न पाययेत् कोशम् इत्यादि। कूयते शब्द्यत इति कोशः। 'कु शब्दे'। औणादिकः शप्रत्ययः। शेषे—'कोशः शिश्ने जातिफले तथा शब्दार्थसंग्रहे' इति। शिश्ने शेफसि यथा—'कुर्वन् करिकरक्रीडां शनैः कोशं प्रवेशयेत्' इति रतिरहस्ये। स्त्रीव्यञ्जनेऽपि कोशशब्दो यथा तत्रैव—'स्त्रीपुंसयोः कोशसाम्ये भावसाम्यं भवेद् ध्रुवम्' इति प्रयोगः[8]। अत्र मनुष्यवर्गोक्तजातीकोशशब्दस्यैकदेशन्यायेन कोशशब्दोऽपि जातीफले वर्तते। यथा—कोशवासितं सलिलम् इति। शब्दा अर्था वा उभये वा संगृह्यन्तेऽनेनेति शब्दार्थसंग्रहो ग्रन्थः। यथा—अमरकोशः। अभिधानकोश इत्यादि। अत्र शब्दार्थसंग्रहशब्देन पुस्तकमप्युच्यत इति केचित्। कोशान्तरे त्वयं पाठ इति लिखन्ति व्याख्यातारः। 'वैदेशिकेषु कोशेषु पाठभेदान् निरीक्ष्य तान्' इति। दक्षिणावर्तनाथस्तु कोशवानाचार्य इति। 'पेशी कोशः' इति गतम् (१, पृ. ३५७)। तालव्योपधोऽयं शब्दः। अत्र केचित्—कोशोऽस्त्रीत्यादिकम् अमरसिंहीयश्लोकार्धं समनन्तरमूर्धन्योष्मोपधवर्गे पठन्ति। व्याख्यातृभिः कैश्चित् तत्रैव व्याख्यातम्, 'कुष निष्कर्षे' इत्यस्माद् धातोर्निर्ब्रुवते च। अस्माभिस्तु कतिपयटीकाकारपद्धत्या नानाग्रन्थदर्शनेन च तालव्योपधत्वेन लिखितमित्यलम् ।। २१७–१८ ।।

इति शान्तवर्गः[9]

[1] पचाद्यच्. [2] क्विप्प्रत्ययप्रकृतिपदान्तविषये Tv. [3] बलावष्टम्भेन Tv. [4] कर्कशब्दाद् मत्वर्थे लोमादित्वात् शः इति श. द्रु. (पृ. ३६). [5] 'सुपि' इति योगविभागात् कः (३. १. ४). [6] २, पृ. ६७–८. [7] उन्मत्त° B5, B6. [8] पिधायकमात्रस्य यथा—'नवानां कोशधान्यानां यथाकामी च भक्षणे' इति गोपालः। कोशेन शिम्ब्याच्छादितानि धान्यानि कोशधान्यानि Tv. Tv adds यथा वा प्राकृतसप्तशत्याम्—

कोस्सत्रदव्णमि ठिव इककण्ठे मासोपवासिनि वपुसि। मासंखु उपवासं वा अअ जणु मा होद मुहह सुररअकोसम्।। कण्ठे मासोपवासिनि वदति मम खलु उपवासव्रतमद्य। ननु मा भवतु सुरतमिति. [9] Tv adds शान्तशब्दसंख्या १७.

(पा.) वशा स्त्री करिणी च स्यात्। स्त्रीशब्दः स्त्रीविशेषवचनः। [1]वन्ध्या च स्यात्। 'वशा करिण्यां वन्ध्यायां रामायां दुहितर्यपि' इति वैजयन्ती (पृ. २३५, श्लो. ७१)।। दृग्ज्ञाने ज्ञातरि त्रिषु। त्रिष्विति बालिशशब्दान्तमधिकारः।। स्यात् कर्कशः—अमसृणावपि। कठोरो निर्दयः। [2]अमसृणः खरस्पर्शः।। प्रकाशोऽतिप्रसिद्धेऽपि। 'प्रकाशोऽतिप्रसिद्धे स्यात् [3]सदृशातपयोः स्फुटे' इति विश्वः (पृ. १६६, श्लो. २०)।। शिशावज्ञे च बालिशः। अनुक्तम्—

नाशः क्षये तिरोधाने जीवितेशः प्रिये यमे।
कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः[4]।।
नृशंसखड्गौ निस्त्रिंशौ पाशो बन्धनशस्त्रयोः।
निवेशः स्याद् विवाहेऽपि निस्त्रिंशो निर्दयेऽपि च।।
अपभ्रंशोऽवपाते स्याज्जीवितेशो[5] रवावपि।
टीकायामपि चादर्शः सदृशं तूचितेऽपि च।।
क्लेशो दुःखे व्यवसितौ स्पृहास्वाधीनयोर्वशः।
पल्लीपतौ स्यात् पिङ्गाशः पिङ्गाशं जात्यकाञ्चने।। २१७–१८।।

इति शान्तवर्गः

[1] A1 omits. [2] अमसृणं A1. [3] सहास° इति मु. ग्र. [4] °दीप्ययोः B3, C1. [5] B3, C1 omit the *pāda*.

अथ षान्तवर्गः—

सुरमत्स्यावनिमिषौ पुरुषावात्ममानवौ।
काकमत्स्यात्खगौ ध्वाङ्क्षौ कक्षौ तु तृणवीरुधौ।। २१९।।

(वि.) सुपर्वणि जलचरे कथ्यतेऽनिमिषो बुधैः।

न विद्यते निमिषोऽस्येत्यनिमिषः।।

क्षेत्रज्ञे मानभेदे च वल्लभे पुरुषः स्मृतः ॥ 477 ॥

पुरि देहे [1]सीदतीति पुरुषः । 'षद्लृ विशरणगत्यवसादनेषु' ॥

काकमत्स्यात्पक्षिणोश्च ध्वाङ्क्षशब्दोऽभिधीयते[2] ।

ध्वाङ्क्षति मांसमभिकाङ्क्षतीति[3] ध्वाङ्क्षः । 'ध्वाक्षि [4]काङ्क्षायाम्' ॥

रथभागे ग्राहणिकाकाञ्चीद्विरदरज्जुषु ॥ 478 ॥
तृणवीरुत्प्रकोष्ठेषु पश्चादञ्चलपल्लवे ।
स्पर्धापदे परीधाने कक्षः स्याद् बाहुमूलके ॥ 479 ॥

[5]कष्यत इति कक्षः । 'कष हिंसायाम्' ॥ २१९ ॥

[1] K2 adds तिष्ठति. [2] विवक्षितः J2. [3] इच्छति K4. [4] इच्छायाम् K4; घोरवाशिते च K5. [5] कषते K2, K3.

(विव.) सुरमत्स्यावनिमिषौ । न निमिषतीत्यनिमिषः[1] । सुरा देवाः । मत्स्यो मीनः ॥ पुरुषावात्ममानवौ । आत्मा क्षेत्रज्ञः । 'पुंनागे पुरुषः' इति गतम् (१, पृ. २३१) ॥ काकमत्स्यात्खगौ ध्वाङ्क्षौ । [2]मत्स्यभक्षकः खगः मत्स्यात्खगः । 'ध्वाङ्क्षौ तु बकवायसौ' इत्यमरमालायाम् ॥ कक्षौ तु तृणवीरुधौ । अत्र तृणशब्देन शुष्कतृणप्रायं विपिनमुच्यते इति सुबोधिनीकारः । यथा—'अग्निना वा दहेत् कक्षम्' इति । वीरुत् लता । कषते कषतीति वा कक्षः । 'कष हिंसायाम्'[3] । शेषे—'कक्षः पापपरीधानपश्चादञ्चलपल्लवे' इति । 'सत्रकष्टकक्षकृच्छ्रगहनेभ्यः'[4] (वा. ३. १. १४) इत्यत्र कक्षशब्दः पापवचनः । अत एव सत्रायते, [कक्षायते] पापं चिकीर्षतीति तत्र व्याख्यातम्[5] (काशिका १, पृ. १४९) । परिधानस्यान्तरीयस्य गुह्यप्रदेशाच्छादके पृष्ठभागसमुपनाये दशाभागे कक्षशब्दो वर्तत इत्यर्थः । बाहुमूले[6] प्रागुक्तः (१, पृ. ४११) ॥ २१९ ॥

[1] 'मिष श्लेषणे' । 'इगुपध—' इति कः । नञ्समासः इति भा. दी. (पृ. ५०२). [2] Tv adds मत्स्यानत्तीति. [3] 'वृतृवदिहनिकमिकषिभ्यः सः' (उ. ३. ६२) इति सः इति श. द्रु. (२, पृ. ३). [4] Tv adds कण्वचिकीर्षायाम्. [5] कण्वचिकीर्षा पापचिकीर्षा इत्येव मु. ग्र. [6] बाहुमूले उभे कक्षौ Tj1, Tv.

(पा.) सुरमत्स्यौ—आत्ममानवौ । (पुरुषः) शास्त्रं च स्यात् । 'शासनं दर्शनं शास्त्रमागमः पुरुषो मतम् । श्रुतम्' इति पर्यायाः[1] इति सुभूतिटीका ।। काकमत्स्यात्खगौ ध्वाङ्क्षौ । मत्स्यात्खगो 'ध्वाङ्क्षः काके बकेऽपि च' इति [2]जयकोशः ।। कक्षौ तु तृणवीरुधौ । वीरुच्छब्दो गुल्मवचनः । 'कक्षस्तु गुल्मे [3]स्पर्धापदे तृणे' इति वैजयन्ती (पृ. २१५. श्लो. १७) ।। २१९ ।।

[1] पर्यायः A1. [2] जयः A1. [3] स्पर्धायां बाहुमूले B3, C1.

अभीषुः प्रग्रहे रश्मौ प्रैषः प्रेषणमर्दने ।
पक्षः सहायेऽप्युष्णीषं शिरोवेष्टकिरीटयोः ।। २२० ।।

(वि.) [1]प्रग्रहे किरणे चैवाप्यभीषुः परिकथ्यते ।

अभीष्यत इत्यभीषुः । 'ईष[2] उञ्छे' ।।

प्रेषणे मर्दने क्लेशेऽप्युन्मादे [3]प्रैष इष्यते[4] ।। 480 ।।

प्रेष्यत इति प्रैषः[3] । 'इष[5] गतौ' ।।

माध्ये विरोधे मासार्धे सहाये बलपत्त्रयोः ।
ग्रहे सख्यौ राजनागे देहाङ्गकुचपार्श्वयोः ।। 481 ।।
केशादिपश्चाद्बन्धे च पक्षः स्याच्चुल्लिरन्ध्रके ।

[6]पक्ष्यते परिगृह्यत इति पक्षः । 'पक्ष परिग्रहे' ।।

शिरोवेष्टे किरीटे स्यादुष्णीषो लक्षणान्तरे ।। 482 ।।

[7]उष्णनिवारणार्थमिष्यत इत्युष्णीषः । 'इषु इच्छायाम्' ।। २२० ।।

[1] रागादौ J2. [2] 'इषु इच्छायाम्' J2. [3] प्रेष्यः K6. [4] उच्यते K2, K5. [5] 'इषु इच्छायाम्' K2, K4. [6] पक्षति K6. [7] उष्णार्थमिष्यते K5.

(विव.) अभीषुः प्रग्रहे रश्मौ । प्रग्रहो नाम रथादिवाहनद्वयनियमनार्थं सारथिना ध्रियमाणो[1] रज्जुविशेषः । रश्मिः किरणः । अभीष्यते बलीवर्दादि-

इति हरिप्रबोधयमकाद् [1]अभीशुरिति तालव्यान्तोऽपि स्यात् ॥ प्रेषः[2] प्रेषणमर्दने । पक्षः सहायेऽपि । अर्धमासपतत्रपार्श्वार्थेषु च स्यात् ॥ उष्णीषः शिरोवेष्ट-किरीटयोः । शिरस्यपि स्यात् । 'उष्णीषं शीर्षमक्षत्रं पुंसि मूर्धा च [5]मस्तकः' इति वैजयन्ती (पृ. १८०, श्लो. ८५) ॥ २२० ॥

[1] °अभीषु° C1.　[2] सहासं A1.　[3] अभीशुभिः शुभैरिति B3.　[4] प्रेपः A1.
[5] मस्तिकः इति मु. ग्र.

शुक्ले मूषिके श्रेष्ठे सुकृते वृषभे वृषः ।
द्यूतेऽक्षे शारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये ॥ २२१ ॥
ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे ।

(वि.)　मूषिकश्रेष्ठयो राशौ [1]शुक्ले सुकृते तथा ।
[2]वृषो वृषभपुंसोः स्यात् सिंहीकण्डूरयोर्वृषा ॥ 483 ॥
व्रत्यासने वृषी प्रोक्ता वर्षके तु वृषं [3]मतम् ।

वर्षतीति वृषः । 'वृष सेचने' ॥

द्यूते च पाशकाकृष्टयोः कोदण्डाभ्यासवस्तुनि ॥ 484 ॥
शारीणां फलके च स्यादाकर्षोऽपीन्द्रिये तथा ।

आकृष्यत इत्याकर्षः । 'कृष विलेखने' ॥

[4]कलिद्रुमे च द्यूताङ्गे कर्षे चक्रात्मनोरपि ॥ 485 ॥
अक्षो व्याप्तौ परिपणे चेन्द्रियेऽक्षमुदाहृतम् ।

[5]अक्ष्यत इत्यक्षम् । 'अक्षू व्याप्तौ' ॥ २२१ ॥

[1] शुक्लले J2.　[2] वृषभे च वृषः पुंसि K5.　[3] स्मृतम् K2, K3.　[4] कलि-द्रुमो विभीतकाख्यो वृक्षः.　[5] अक्ष्णोति K4, K5.

(विव.)　शुक्ले—वृषभे वृषः । शुक्लः रेतोबहुलः । वर्षतीति [1]वृषः । 'वृष सेचने' । इगुपधलक्षणः कः[2] (३. १. १३५) शेषे—

'वृषः पुंसि च राशौ ना [3]कपिकच्चाटरूषयोः ।
शृङ्ग्यामपि वृषा स्त्री स्याद् व्रतिनामासने[4] वृषी ।।

इति । वृष इति राशिर्मेषानन्तरः ।

'वृषो धर्मे बलीवर्दे श्रेष्ठमूषकराशिषु ।
शुक्रले च पुमान् स्त्री तु कपिकच्चाटरूषयोः ।।

इति रभसः ।। द्यूतेऽक्षे—आकर्षः । [5]आकृष्यते शारिकात्रेति आकर्षः द्यूतः क्रीडा द्यूतफलकं च । अत्राकर्षशब्दो द्यूतकर्मवाच्यः शारिकापि । छन्दः आकृष्यत इत्या-[6]कर्षोऽक्षः पाशकः । कार्मुकादेरप्याकर्षणमाकर्षः । आकृष्टिरित्यर्थः ।। अथाक्षमिन्द्रिये —कलिद्रुमे । अक्ष्णोति विषयमित्यक्षम् इन्द्रियम् । यथा—प्रत्यक्षो घटः । प्रत्यक्ष आत्मा इति । तत्र रूपभेदाद् नपुंसकम् । [7]अर्थान्तरेषु पुंलिङ्गः । द्यूताङ्गं पाशकाख्यम् । यथा—'दुरक्षान् दीव्यता राज्ञा राज्यमात्मा वयं वधूः' इति भारविः (किरा. ११. ४७) । कर्षः षोडशमाषात्मकः । यथा—'ते षोडशाक्षः कर्षोऽस्त्री' इति (१, पृ. ६०५) । चक्रं रथाङ्गम् । तेन तदुभयसंबन्धं तिर्यगवस्थापितं काष्ठं लक्ष्यते । यथोक्तम्—'अक्षाग्रकीलके तु द्वयोरणिः' इति (१, पृ. ५१८) । व्यवहारे यथा— 'प्राड्विवाकाक्षदर्शकौ' इति (१, पृ. ४८६) । कलिद्रुमो विभीतकः (१, पृ. २४६) । शेषे—'अक्षो व्याप्तावात्मनि च' इति । आत्मनि यथा—एतदध्यक्षसाक्षिकम् इति ।। २२१ ।।

[1] Tv adds वृषभः. [2] 'इगुपधज्ञाप्रीकिरः कः'. [3] कपिकच्छूः इति विश्वः (पृ. १७१, श्लो. २). [4] आसनम् Tj2; बृसी Tv. [5] आकृष्यन्ते शारयः Tv. [6] घञ्. [7] Tv adds द्यूताङ्गादौ तु ना पुंलिङ्गः.

(पा.) शुक्रले—वृषभे वृषः । वृषभे नान्तोऽपि स्यात् । [1]'वृषोक्ष्ण्यग्र्ये पुमिन्द्रयोः' इति वैजयन्ती (पृ. २१८, श्लो. ५६) ।। [2]कोषोऽस्त्री—दिव्ययोः । 'कोशकाशकशाङ्कुशम्' इति तालव्यान्तेषु चन्द्रगोमी । द्यूतेऽक्षे—व्याकर्षः । अक्षः पाशकः[3] ।। अथाक्षमिन्द्रिये—कलिद्रुमे । कर्षः उन्मानविशेषः । चक्रं [4]शकटं च [5]रथाङ्गं च स्यात् । व्यवहारो न्यायः ।। २२१ ।।

[1] वृषा नकारान्तः; उक्ष्णि वृषभे. [2] कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः

इति पारिजाताभिमतः पाठः. [3] पाशिकः C1; पाशिके A1. [4] शकटः B3.
[5] रथश्च A1.

कर्षूर्वार्ता करीषाग्निः कर्षूः कुल्याभिधायिनी ॥ २२२ ॥
पुंभावे तत्क्रियायां च पौरुषं विषमप्सु च ।

(वि.) कुल्यावृत्त्योः करीषाग्नौ कर्षूश्च[1] समुदाहृता ॥ 486 ॥

कृष्यत[2] इति कर्षूः । 'कृष विलेखने' ॥

[3]मनोभावे कर्मजात्योः पुंसः पौरुषमुच्यते ।

पुरुषस्य भावः कर्म वा पौरुषम् ॥

क्ष्वेडे जले विप्रयुक्ते विशिष्टव्याप्तयोर्विषम् ॥ 487 ॥
विषा महौषधे च स्यात् त्रिषु लिङ्गेषु च स्मृता ।

वेवेष्टीति विषम् । 'विष्लृ [4]व्याप्तौ' ॥ २२२ ॥

[1] कर्षूस्तु K3, K4, K5. [2] K4 adds विलिख्यते. [3] मानभावे K5.
[4] K3, K5 omit.

(विव.) कर्षूर्वार्ता—कुल्याभिधायिनी । अत्र वार्ताशब्देन वृत्तिविशेषः कृषिरुच्यत इति स्वामी[1] (पृ. ३२६) । सुबोधिनीकारस्तु—'कर्षूर्वक्ता करीषाग्नेः' इति पठित्वा व्याचष्ट । कर्षूशब्दः करीषाग्नेः शुष्कगोमयेन्धनवह्नेः वक्ता वाचकः । वक्तेति विशेषणरूपभेदात् पुंलिङ्गत्वम्' इति । कुल्याशब्देनात्र प्रेतकर्मणि क्रियमाणो गर्त उच्यते । तदभिधानशीलेत्यर्थः । तत्रापि विशेषणवशेन कर्षूशब्दस्य स्त्रीलिङ्गत्वम् । यथा—'तिस्रः कर्षूः खात्वा' इति कल्पसूत्रे प्रयोगः[2] । तथा च रभसः—'करीषाग्नौ पुमान् कर्षूः कुल्यायां तु स्त्रियां भवेत्' इति । कर्षति समीपस्थमिति कर्षूः । कृष्यते कुद्दालादिनेति च । 'कृष विलेखने' । 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उ. १. ८४) इति औणादिक ऊकारप्रत्ययः ॥ पुंभावे तत्क्रियायां च पौरुषम् । पुरुषस्य भावः कर्म वा पौरुषम् । भावे कर्मणि च वर्तमाने 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' (५. १. १२६) इति

प्राणभृज्जातिविशेषवचनात् पुरुषशब्दाद् अञ्प्रत्ययः । शेषे—'पुंस्तेजसि च पौरुषम्' इति । पुरुषस्य तेजसि प्रभावे इत्यर्थः । ऊर्ध्वविस्तृतदोःपाणिभागस्य[3] पुरुषस्य प्रमाणे गतम्(१, पृ. ४१७)।। विषमप्सु च । अप्सु जले चशब्दाद् गरले प्रागुक्तम् (१, पृ. १५१)। यथा—'तया मम वियोगोऽद्य विषं मुञ्चन्ति वारिदाः' इत्यभिनन्दः[4] ।। २२२ ।।

[1] वार्ता कृषिः इति मु. ग्र. [2] 'कर्षू खात्वा . . . बिभरासि' *Śat. Br.*, (मत्स्योपाख्यान) Apte's Dict. p. 543. [3] °पाणिनृमाने पौरुषं त्रिषु इति मूलग्रन्थे. [4] वेवेष्टीति विषम् । 'विष्लृ व्याप्तौ' । 'इगुपध. . .' इत्यादिना (३. १. १३५) कः.

(पा.) कर्षूर्वार्ता—कुल्याभिधायिनी । वार्ताकरीषाग्न्योः पुंलिङ्गः । वार्ता नाम वृत्तिः[1] । कुल्यायां स्त्रीलिङ्गः । कुल्या नाम नदी ।। पुंभावे तत्क्रियायां च पौरुषम् । पुरुषतेजस्यपि स्यात् । 'पौरुषं पुरुषस्योक्तं भावे कर्मणि [2]तेजसि' इति विश्वः (पृ. १७२, श्लो. १७) ।। विषमप्सु च । गरलेऽपि स्यात् ।। २२२ ।।

[1] वार्ताकम् A1; वृत्तिविशेषः C1. [2] चेतसि A1.

उपदानेऽप्यामिषं स्यादपराधेऽपि किल्बिषम् ।। २२३ ।।
स्याद् वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।
प्रेक्षा नृत्येक्षणं प्रज्ञा भिक्षा सेवार्थना भृतिः ।। २२४ ।।

(वि.) [1]उपदाने च मांसादौ लोभसंभोगयोरपि ।। 488 ।।
सुन्दराकाररूपादिविषयेऽप्यामिषं भवेत् ।

आमिष्यत[2] इत्यामिषम् । 'मिष[3] स्पर्धायाम्' ।।

पापेऽपराधे रोगे च किल्विषं कलुषे स्मृतम् ।। 489 ।।

[4]कल्यते चित्रगुप्तेन गण्यत इति किल्विषं कलुषं च । 'कल संख्याने' ।।

वृष्टौ भुवोंऽशे क्लैब्ये च वत्सरे वर्षमुच्यते ।

[5]वर्षतीति वर्षम् । 'वृषु सेचने' ।।

प्रज्ञायां दर्शने नृत्यं प्रेक्षा तु परिकीर्तिता ॥ 490 ॥

प्रेक्ष्यत इति प्रेक्षा । 'ईक्ष [6]दर्शने' ॥

याच्ञाभृत्योश्च सेवायां भिक्षा भिक्षितवस्तुनि ।

[7]भिक्ष्यत इति भिक्षा । 'भिक्ष याच्ञायाम्' ॥ २०३–४ ॥

[1] उपादाने K2, K3. [2] K4, K5 add भुज्यते. [3] 'मिष शब्दे' K2, K3, K4. [4] कल्यत इति कलुषम् J2, K6. [5] वृष्यत इति K3. [6] दर्शनाङ्कनयोः J2. [7] भिक्षत इति K2, K3, K4.

(विव.) उपदानेऽप्यामिषं स्यात् । 'उपाच्चारप्रदानन्दा हारो [1]ग्राह्योपायनेऽपि' इत्यभिधानचिन्तामणौ । उपशब्दाद् उत्तरेषां चारदानादिशब्दानां पर्यायत्वाभिधानाद् इहोपदानशब्देन उपायनमुच्यते; उपादान इति द्वितीयाक्षरदीर्घोऽपपाठः । शेषे—

'आमिषं सुन्दराराद्रूपादिविषये भवेत् ।
संभोगलोभयोर्मांसे ॥'

इति । सुन्दरविषये यथा—'आदास्यमानः प्रमदामिषं तत्' इति रघुवंशे (७. ३१) ॥ अपराधेऽपि किल्बिषम् । वाग्दण्डपारुष्यराजाज्ञोल्लङ्घनादिकमपराधः[2] । शेषे—'किल्बिषं दुरिते रुजि' इति । रुग् रोगः ॥ स्याद् वृष्टौ—वर्षमस्त्रियाम् । लोकस्य धात्री, धारयित्री भूमिः [3] । अन्ये तु—दधातेः 'सितनिगमि . . .' इत्यादिना (उ. १. ७२) तुन्प्रत्ययान्तं कृत्वा लोकधात्वंश इति पठित्वा लोकधातुशब्देनापि भूमिरेवाभिधेय इत्याहुः । तस्या अंशो भूम्येकदेशस्य जम्बूद्वीपस्यैको[4] भागः । वत्सरः संवत्सरः । वृष्यते सिच्यत इति वर्षम् । 'वृषु सेचने' [5](वा. ३. ३. ५६) । शेषे—'वर्षं क्लैब्ये पुमान् मेघे' इति । क्लैब्ये यथा—वर्षधर इति । वर्षतीति पचाद्यचि (३. १. १३४) वर्षो मेघः । 'पुंनपुंसकयोर्वर्षं जम्बूद्वीपाब्दवृष्टिषु' इति रुद्रश्च ॥ प्रेक्षा नृत्तेक्षणप्रज्ञाः । नृत्तादीनां त्रयाणां द्वन्द्वः[6] । नृत्तं प्रेक्षणकसंज्ञया प्रसिद्धम् । ईक्षणं नयनव्यापारः । केचित्तु—नृत्तस्येक्षणमिति षष्ठीतत्पुरुषमाश्रित्य भिन्नं पदमाहुः प्रेक्षा कौतुकमिति । प्रज्ञा शीघ्रग्राहिणी बुद्धिः ।

प्रज्ञा यथा—प्रेक्षावन्त इति। प्रपूर्वाद् ईक्षतेः 'गुरोश्च हलः' (३. ३. १०३) इत्यकारप्रत्यये भावे कर्मणि च प्रेक्षा ॥ भिक्षा सेवार्थना भृतिः। अर्थना याच्ञा। भृतिर्वेतनम्। शेषे—'भिक्षा भिक्षितवस्तुनि' इति। यथा—भिक्षां देहीति। 'भिक्ष याच्ञायाम्' इति धातोः पूर्ववद् [7]अकारप्रत्ययः ॥ २२३–४ ॥

[1] ग्राह्यायते अपि B6. [2] °उल्लङ्घनादिकरणम् Tv. [3] Tv adds इत्यर्थः. [4] Tv adds नवधा विभक्तस्य. [5] 'अज्विधौ भयादीनामुपसंख्यानम्'. [6] नृत्तेक्षणप्रज्ञाः इति विवरणाभिमतः पाठः. [7] 'गुरोश्च हलः'.

(पा.) उपदाने[1] ऽप्यामिषं स्यात्। मांसेऽपि स्यात् ॥ अपराधेऽपि किल्बिषम्। 'दुरिते दुष्टगरलेऽप्यपराधेऽपि किल्बिषम्' इति जयकोशः[2] ॥ स्याद् वृष्टौ—वर्षमस्त्रियाम्। [3]लोकधात्व्यंशो भारतादिः ॥ प्रेक्षा नृत्तेक्षणं प्रज्ञा। नृत्तस्येक्षणं नृत्तेक्षणम्। 'प्रेक्षा नृत्तेक्षणे बुद्धौ' इति [4]विश्वप्रकाशवैजयन्त्यौ (पृ. १८३, श्लो. १३; पृ. २२२, श्लो. २५) ॥ भिक्षा सेवार्थना भृतिः ॥ २२३–४ ॥

[1] A1 adds भङ्गिवस्तुनि. [2] अजयः A1. [3] लोकधात्री भूः तदंशः भारतवर्षादिः. [4] B3 omits प्रकाश; 'प्रेक्षानुत्प्रेक्षणे बुद्धौ' इति मुद्रितविश्वप्रकाशे.

त्विट् शोभापि त्रिषु परे न्यक्षं कार्त्स्न्यनिकृष्टयोः।
प्रत्यक्षेऽधिकृतेऽध्यक्षो रूक्षस्त्वप्रेम्ण्यचिक्कणे ॥ २२५ ॥

(वि.) शोभादीप्त्योर्गिरि रवे व्यवसाये त्विडुच्यते ॥ 491 ॥

[1]त्वेषत इति त्विट्। 'त्विष दीप्तौ' ॥ त्रिषु परे। उत्तरे वक्ष्यमाणाः शब्दाः षान्ताः[2] त्रिषु लिङ्गेषु वर्तन्ते ॥

न्यक्षः परशुरामे स्याद् न्यक्षं कार्त्स्न्यनिकृष्टयोः।

नितरामक्ष्णोतीति न्यक्षम्। 'अक्षू व्याप्तौ' ॥

अध्यक्षोऽधिकृते चैव प्रत्यक्षेऽपि [3]प्रकीर्तितः ॥ 492 ॥

[4]अधिगतोऽक्षेष्वित्यध्यक्षः ॥

अप्रेम्ण्यचिक्कणे चैव रूक्षः स्यात् पादपान्तरे ।

रूक्षयतीति रूक्षः । 'रूक्ष [5]पारुष्ये' ।। २२५ ।।

इति षान्तवर्गः[6]

[1] K5 adds अनया. [2] षान्तवर्गशब्दाः K4. [3] परिकीर्तितः J2. [4] अध्यक्ष्णोतीति K2. [5] नैस्निग्ध्ये K4, K5. [6] K2 adds षान्तशब्दसंख्या २३.

(विव.) त्विट् शोभापि । शोभा कान्तिः । यथा—चम्पकत्विडियमिति । अपिशब्दाद् दीप्तिरपि । यथा—सहस्रत्विडिति । त्वेषतेऽनयेति त्विट् । 'त्विष दीप्तौ' । क्विप्[1] (वा. ३. ३. ९४) । शेषे—'त्विड् दीप्तौ व्यवसाये च जिगीषायां गिरि ध्वनौ' इति ।। त्रिषु परे । परे वक्ष्यमाणाः न्यक्षादयस्त्रयः शब्दा वाच्यलिङ्गा इत्यर्थः ।। न्यक्षं कात्स्न्र्यनिकृष्टयोः । कात्स्न्र्यशब्दस्य धर्मवचनत्वेनार्थनिर्देशेऽपि पूर्ववाक्ये न्यक्षशब्दस्यापि वाच्यलिङ्गत्वविधानात् कृत्स्नरूपे धर्मिण्येव पर्यवसानम् । यथा 'कार्मस्ताच्छील्ये' (६. ४. १७२) इत्यादिषु । नियतमक्षमिन्द्रियसंयोगोऽस्मिन्निति न्यक्षं कृत्स्नम् । [2]निषिद्धमक्षमिन्द्रियव्यापारोऽनेनेति न्यक्षः निकृष्टः, अधम इत्यर्थः । शेषे—'न्यक्षः परशुरामे स्यात्' इति ।। प्रत्यक्षेऽधिकृतेऽध्यक्षः । [3]अधिगतोऽक्षैरिन्द्रियैरिति अध्यक्षः । प्रत्यक्षो घटादिः । [4]अध्यक्ष्णोति व्याप्नोतीति अध्यक्षोऽधिकृतः ग्रामादिषु नियुक्तः ।। रूक्षस्त्वप्रेम्ण्यचिक्कणे । [5]प्रेमरहिते यथा—रूक्षवृत्तिः प्रजाक्षयम् इति । अचिक्कणे [6]मार्दवरहिते यथा—रूक्षस्पर्श इति । 'रूक्ष पारुष्ये' इति चौरादिकाद् धातोः पचाद्यचि (३. १. १३४) रूक्षः । शेषे—'रूक्षः स्यात् पादपान्तरे' इति ।।

इह [7]मूर्धन्योष्मोपधवर्गमध्ये 'कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' (श्लो. २१८) इति श्लोकार्धं पठित्वा क्षीरस्वामिसुबोधिनीकाराभ्यां व्याख्यातम् । पुस्तकेष्वपि केषुचिदिहैव लिखितम् । अतो मूर्धन्योपधः कोषशब्दोऽप्यस्तीति विज्ञेयम् । अस्माभिस्तु तालव्योपधवर्गमध्ये व्याख्यातम् ।। २२५ ।।

इति षान्तवर्गः[8]

[1] संपदादिभ्यः क्विप्. [2] निषिद्धमत्सरम् B5, B6. [3] अधिकृतः Tj1, Tj2. [4] B6 adds 'अक्षू व्याप्तौ'. [5] Tv adds अप्रेम्णि. [6] मृदुत्व° B5, B6. [7] B5 omits °ऊष्म°. [8] B6, Tv add षान्तशब्दसंख्या २३.

(पा.) त्विट् शोभापि। 'त्विट् स्त्री शोभारुजोर्वाचि' इति रुद्रः ।। त्रिषु परे—निकृष्टयोः। त्रिषु परे इत्यधिकारः। कात्स्न्यर्शब्दः कृत्स्नवचनः ।। प्रत्यक्षेऽधिकृतेऽध्यक्षः। प्रमाणं च प्रमेयं च प्रत्यक्षम् ।। रूक्षस्त्वप्रेम्ण्यचिक्कणे। अचिक्कणं कर्कशस्पर्शः ।। अनुक्तम्—

व्याजसंख्याशरव्येषु लक्षं घोषौ रवव्रजौ।
शुण्डाग्रभागे गण्डूषो द्वयोश्च मुखपूरणे ।।
जिगीषा व्यवसाये च [1]संघर्षप्रमदेऽपि च।
शेषोऽक्षतादिदाने स्यान्निर्माल्ये मरुतामपि ।।
अम्बरीषः किशोरे स्याद् भास्करे गिरिशेऽपि च।
अनुतर्षः सुरापाने सुरापात्रे सुरातृषोः[2] ।। २२५ ।।

इति षान्तवर्गः

[1] संघर्षः B3. [2] सुरातृषि A1, C1.

अथ सान्तवर्गः—

रविश्वेतच्छदौ हंसौ सूर्यवह्नी विभावसू।
वत्सौ तर्णकवर्षौ द्वौ सारङ्गाश्च दिवौकसः ।। २२६ ।।

(वि.) रवौ श्वेतच्छदे विष्णौ [1]हयेऽमत्सरयोगिनोः[2] ।। 493 ।।
मन्त्रे निर्लोभनृपतौ देहस्थे मरुदन्तरे।
[3]शैलभेदात्मनोश्चैव हंसशब्दः प्रकीर्तितः ।। 494 ।।

[4]हन्तीति हंसः। 'हन हिंसागत्योः'।

हारभेदे तीक्ष्णरश्मौ हव्यवाहे विभावसुः।

[5]विभा वसु यस्य स विभावसुः ।।

वत्सं वक्षसि संप्रोक्तं वत्सस्तर्णकपुत्रयोः ।। 495 ।।

वस्यते छाद्यत इति वत्सः। 'वस आच्छादने' ।।

सारङ्गेषु[6] सुपर्वसु दिवौका: परिकीर्त्यते[7] ।

द्यौरोक: स्थानं येषां[8] ते दिवौकस: ।। २२६ ।।

[1] हरे K5. [2] मत्सर° K6. [3] शिलाभेद° K6. [4] हसति K3, K5; K2 adds गच्छति. [5] J2 adds प्रभा. [6] सारङ्गे च सुपर्वादौ J2, K4. [7] परिकथ्यते J2. [8] अस्येति दिवौका: K2, K4.

(विव.) रविश्वेतच्छदौ हंसौ । श्वेतच्छदो हंसनाम्नैव प्रसिद्धः पक्षि-विशेषः । शेषे—

'हंसो निर्लोभनृपतौ शारीरमरुदन्तरे ।
हयभेदे योगिभेदे मन्त्रभेदे च मत्सरे[1] ।।
परमात्मनि विष्णौ च श्रेष्ठे राजादिपूर्वकः ।।'

इति । हयभेदः सर्वशुभ्राश्वः । योगिभेदो हंसाख्यः संन्यासिविशेषः । शारीरवायु-विशेषे यथा—'हंसं तनौ संनिहितं चरन्तम्' इति नैषधकाव्ये (३. ४) । श्रेष्ठे यथा—राजहंसः, कविहंसः इत्यादि[2] ।। सूर्यवह्नी विभावसू । विभा प्रभैव वसु धनं ययोस्तौ विभावसू । शेषे—'विभावसुर्हारभेदे' इति ।। वत्सौ तर्णकवर्षौ द्वौ । अचिरजातगौस्तर्णकः । वर्षः संवत्सर इति सुबोधिनी । तर्णकपुत्रौ इति पठित्वा पुत्रस्तनय इति केचिदाहुः । 'वस निवासे' इत्यस्मादौणादिकः सप्रत्ययः[3] (उ. ३. ६२) । 'सः स्यार्धधातुके' (७. ४. ४९) इति सकारस्य तकारः । 'उरो वत्सम्' (१, पृ. ४११) इति वक्षसि क्लीबं गतम् ।। २२६ ।।

[1] वत्सरे Tv. [2] हन्ति गच्छतीति हंसः । 'हन हिंसागत्योः' । पचाद्यच् (३. १. १३४) । 'भवेद् वर्णागमाद् हंसः' इति सक् । यद्वा 'वृतॄवदिवचिवसिहनिकमिकषिभ्यः सः' (उ. ३. ६२) इति सप्रत्ययः इति भा. दी. (पृ. ५०४); हसतीति वा. [3] 'वृतॄ . .' इत्यादि.

(पा.) रविश्वेतच्छदौ हंसौ । रव: प्राणिस्वन:[1] । 'प्राणिस्वने[1] त्वाराव आरव: । रव:' इति वैजयन्ती (पृ. ३१, श्लो. ३-४) । रवयोगाद् [2]रवी जीवोऽपि स्यात् ।। सूर्यवह्नी—तर्णकवर्षौ द्वौ । पुत्रादिरपि स्यात् । 'वत्सस्तर्णकपुत्रादिवर्षे' [3]इति विश्व: (पृ. १७४, श्लो. ६) ।। सारङ्गाश्च दिवौकस: । देवा अपि स्यु: ।

वहुत्वमविवक्षितम्। 'दिवौकाश्चातके सुरे' इति विश्वः (पृ. १७८, श्लो. ५४) ॥ २२६ ॥

[1] प्राणिस्वरः A_1, C_1. [2] रविश्वेत इति मूलस्थरविशब्दः नकारान्तोऽपि स्यादित्याशयः. [3] C_1 adds वत्सं तु वक्षसि.

शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः ।
पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे ॥ २२७ ॥

(वि.) [1]आद्ये धातौ विषे वीर्ये पारदे जलरागयोः ॥ 496 ॥
द्रवे गुणे [2]च तिक्तादौ शृङ्गारादौ रसः स्मृतः ।
[3]घोण्टाभुवोः कङ्गुजिह्वासल्लकीषु रसा भवेत् ॥ 497 ॥

रस्यत[4] इति रसः । 'रस आस्वादने' ॥

स्यातामुत्तंसावतंसौ कर्णपूरे च शेखरे ।

उत्तंस्यतेऽनेनोत्तंसः । अवतंसश्च । 'तसि [5]अलंकरणे' ॥ २२७ ॥

[1] आढ्ये K_6. [2] शब्द इति K_5. [3] फाण्टे J_2. [4] K_4 adds आस्वाद्यते.
[5] भूषायाम् K_2, K_3, K_4.

(विव.) शृङ्गारादौ––द्रवे रसः। आदिशब्देन वीरकरुण° इत्यादिनोक्ताः (१, पृ. १३१) रसाः नाट्यवर्गोक्ता विवक्षिताः। विषं गरलं जलं च। विषे गरले यथा––'रसं दास्यामि' इति मुरारिनाटके शूर्पणखावाक्यम्। जले यथा––'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः' इति रघुवंशे (१. १८)। 'जले शरीरधातौ च [1]तिक्तादौ पारदे रसः' इति त्रिकाण्डशेषः (पृ. ३६, श्लो. १००२)। वीर्ये यथा––[2]'विद्धि चात्तरसमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया' इति रघुवंशे (११. ७६)। [3]क्षीरादतिरसं सर्पिः इति च। गुणे माधुर्यादौ यथा––'रसाः कट्वम्ललवणतिक्तोष्णकषायकाः' इति। रागेऽनुरागे यथा––रसार्द्रचित्तः इति। द्रवे यथा––'क्षीरे त्रिरात्रं स्वरसे त्रिरात्रम्' इति। रस्यते आस्वाद्यत इति रसः। 'रस आस्वादने' चुरादावदन्तः[4]। शेषे––'रसः शरीरधातौ च रसो ब्रह्मणि पारदे' इति। शरीरधातौ यथा––'वसासृङ्मांसमेदोऽस्थिमज्जाशुक्लानि[5]

धातवः' इति (वाग्भट. १. ८)। ब्रह्मणि यथा—'रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति' इति (तै. उ. २. ७. १)। पारदे यथा—रसवाद इति। [6]भुवि [7]पाठायां सल्लक्यां रसेति स्त्रीलिङ्गः प्रागुक्तः (१, पृ. १८५, २६५, २८८)। पुंस्युत्तंसावतंसे वा कर्णपूरे च शेखरे। कर्णपूरः कर्णभूषणम्। शेखरः शिरोभूषणम्। उत्तंस्यते भूष्यते कर्णः शिरो वा अनेनेति उत्तंसः। उपसर्गभेदाद् अवतंसं च। तसिः भूषार्थो धातुर्दुर्गाचार्येण पठित इति सुबोधिनीकारः। [8]द्वन्द्वान्तरूपभेदादुभयोर्नपुंसकत्वम्। 'पुंसि वा' इत्युक्तचा विकल्पेन पुंलिङ्गत्वं च। 'वष्टि भागुरिः . . .' इत्यादिना (कौमुदी २. ४. ८२) अकारलोपे वतंसोऽपि ॥ २२७ ॥

[1] पारदस्वादयो रसः इति मु. ग्र. [2] विद्धि चात्तबलमोजसा इति मु. ग्र. (पृ. २३४). [3] रसस्यातिरसः सर्पिः इति स्वामी (पृ. ३२७). [4] 'पुंसि संज्ञायां घः प्रायेण' इति घः इति श. द्रु. (४, पृ. ६६). [5] °शुक्राणि Gm_1, Gm_3. [6] B_6 adds भूमौ. [7] 'पाठा . . . शिवा' इति (१, पृ. २६५) अस्मिन् ग्रन्थे पाठः; 'पाठा . . . रसा' इति विवरणाभिमतः पाठः, भा. दी. च. (पृ. १७६). [8] °अवतंसे वा इति विवरणेऽङ्गीकृतः पाठः.

(पा.) श्रृङ्गारादौ—द्रवे रसः। विषं गरलं जलं च स्यात्। वीर्यं वलम्। देहधातुरपि[1] स्यात्। 'जले शरीरधातौ च पारदस्वर्णयो[2] रसः' इति त्रिकाण्डशेषः (पृ. ३६, श्लो. १००२)। द्रवः [3]परीहासः। निर्यासोऽपि स्यात्। 'निर्यासेऽमृतशब्दयोः' इति वैजयन्ती (पृ. २१८, श्लो. ४६) ॥ पुंस्युत्तंसावतंसौ—शेखरे। वतंसोऽप्येतत्प्रकार एव। 'वतंसोत्तंसावतंसाः कर्णपूरेऽपि शेखरे' इति वैजयन्ती (पृ. २७०, श्लो ५९) ॥ २२७ ॥

[1] °धातुश्च B_3. [2] °स्वादयो रसः इति मु. ग्र. [3] परिहासः A_1.

देवभेदेऽनले रश्मौ वसू रत्ने धने वसु।
विष्णौ च वेधाः स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः ॥ २२८ ॥

(वि.) अग्नौ मयूखे धनदे देवे योक्त्रे वसुः पुमान् ॥ 498 ॥

[1]वृद्धचौषधे धने रत्ने [2]हाटके मधुरे त्रिषु।

[3]वसतीति वसुः। 'वस निवासे'॥

विधौ बुधे चक्रपाणौ वेधास्तु परिकीर्तितः ।। 499 ।।

[4]विदधातीति वेधाः । 'डुधाञ् धारणपोषणयोः' ।।

आशीः स्याद् विष्णुमायायां हिताशंसाहिदंष्ट्रयोः ।

आशास्तेऽनयेत्याशीः । 'शासु[5] इच्छायाम्', 'शसु हिंसायाम्', 'शंसु स्तुतौ' ।। २२८ ।।

[1] पथ्यौषधे K5. [2] हट्टके K6. [3] वसु अस्यास्तीति K6. [4] विधति, 'विध विधाने' K2, K3. [5] आङः शासु इच्छायाम् K4, K6.

(विव.) देवभेदेऽनले—धने वसु। अष्टौ वसव इति गणदेवताविशेषाः प्रसिद्धाः (१, पृ. ६) । अनलेऽग्नौ यथा—'वसुरग्निर्वसुश्रवाः' इति (ऋग्वेदः ५. २४. २) । रश्मिः किरणः। पुनरपि वसुग्रहणं रत्नधनयोर्वर्तमानस्य वसुशब्दस्य रूपभेदेन नपुंसकत्वज्ञापनार्थम् । किरणे धने च यथा—'निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका' इति माघकाव्ये (शिशु. ६. १०)। रत्ने यथा—'वामं वसु विवदमानो गृहान्' इति । स्वोचितस्थाने वसतीति वसु । 'वस निवासे'[1] ।। विष्णौ च वेधाः। 'विध विधाने' इत्यस्माद् असुन्प्रत्यये वेधाः[2] । शेषे—'वेधा विधौ[3] बुधे विष्णौ' इति । बुधः पण्डित इत्यर्थः । चतुर्मुखे प्रागुक्तः (१, पृ. १४) ।। स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः। हितस्य पुत्रपश्वादेराशंसा, 'प्रजावान् भूयासम्, पशुमान् भूयासं' इत्यादिरूपेण प्रार्थना । अहेः सर्पस्य दंष्ट्रायां यथा—आशीविष इति । आशासनमाशीः । 'आङः शासु इच्छायाम्' । संपदादित्वात् क्विप् (वा. ३. ३. ९४) । धातूनामनेकार्थत्वात् पूर्वस्मादेव धातोर्हिंसार्थात् कर्तरि क्विपि आशीः सर्पदंष्ट्रा । 'शास इदङ्हलोः' (६. ४. ३४) इत्यत्र 'क्विप्प्रत्यये तु तस्यापि भवतीति वक्तव्यम्' (वा. ६. ४. ३४) इति आशासेरपि उपधाया इत्वम् ।। २२८ ।।

[1] 'शॄस्वृस्निहित्रप्यसिवसि . . .' इत्यादिना (उ. १. १०) उः । [2] 'विधाञो वेध च' (उ. ४. २२५) इत्यसुन् इति भा. दी. (पृ. ५०४-५); 'डुधाञ् धारणादौ विपूर्वादस्मादसिः स्याद् वेधादेशश्च सोपसर्गधातोः' इति कौमुदीव्याख्या (पृ. ५३८). [3] विधिर्बुधे **B6**; विश्वप्रकाशेऽपि 'वेधा विधौ . . .' इति दृश्यते (पृ. १७६, श्लो. २७).

(पा.) देवभेदेऽनले—धने वसु । [1]किरणश्च प्रग्रहश्च रश्मिशब्दार्थः । 'वसुर्योक्त्राग्निशुष्मेषु देवभेदमयूखयोः' इति जयकोशः ॥ विष्णौ च वेधाः । 'वेधा विधौ बुधे विष्णौ' इति विश्वप्रकाशः (पृ. १७६, श्लो. २७) ॥ स्त्री त्वाशीः—दंष्ट्रयोः । आशीति अहिदंष्ट्रायामीकारान्तोऽपि[2] स्यात् ।

'यो बिभर्ति जटाजूटगाढबद्धोरगोज्झिताम् ।
[3]आशीमिव कलामिन्दोर्गङ्गानिर्ल्वयनीमिव ॥'

इति [4]वालिविलासः ॥ २२८ ॥

[1] B3 omits the sentence.　[2] A1 omits अपि.　[3] आलीमिव A1.
[4] हरिविलासः B3.

लालसे प्रार्थनौत्सुक्ये हिंसा चौर्यादिकर्म च ।
प्रसूरश्वापि भूद्यावौ रोदस्यौ रोदसी च ते ॥ २२९ ॥

(वि.) लालसा प्रार्थनौत्सुक्ययाच्ञातृष्णातिरेचने ॥ 500 ॥

[1]अतिशयेन लस्यत इति लालसा । 'लस श्लेषणक्रीडनयोः' ॥

हिंसा स्याद् बन्धने चापि वधचौर्यादिकर्मणोः ।

हिंस्यतेऽनयेति हिंसा । 'हिसि हिंसायाम्' ॥

प्रसूर्वीरुधि कन्दल्यामश्वामात्रोश्च कथ्यते ॥ 501 ॥

[2]प्रसूते प्रजा इति प्रसूः । 'षूङ गर्भविमोचने[3]' ॥

रोदस्यौ रोदसी स्यातां द्योधरित्र्योरुभे इमे ।

आद्यमीकारान्तं द्वितीयं [4]सान्तम् । रुदन्त्यस्मिन्निति रोदः, रोदसी च । 'रुदिर् अश्रुविमोचने' ॥ २२९ ॥

[1] अतिशयस्तर्षः K2, K3, K5.　[2] प्रसूयते K5.　[3] प्राणिप्रसवे K2.
[4] सकारान्तम् K3.

(विव.) लालसे प्रार्थनौत्सुक्ये। प्रार्थना वाञ्छा। औत्सुक्यमिष्टार्थोद्योगः। शेषे—'लालसा त्वक्लीबे तृष्णातिरेचने' इति। अक्लीबे द्वयोर्लिङ्गयोरित्यर्थः। भृशं लसति विषयेषु श्लिष्यत्यनया पुरुष इति लालसा। 'लस[1] श्लेषक्रीडनयोः'। क्रियासमभिहारे यङ्प्रत्ययः (३. १. २२)। 'सन्यङोः' (६. १. ९) इति द्विर्वचनम्। यङन्ताद् 'अ प्रत्ययात्' (३. ३. १०२) इति स्त्रियामकारप्रत्ययः। पुंलिङ्गपक्षे 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति करणे घञ्प्रत्ययः। 'यङोऽचि च' (२. ४. ७४) इत्युभयत्र यङो लुक्। 'तृष्णातिरेके वाञ्छायामौत्सुक्ये लालसा द्वयोः' इति रभसः॥ हिंसा चौर्यादिकर्म च। परद्रव्यहरणं चौर्यम्। आदिशब्देन बन्धनताडनादिकं गृह्यते। चशब्दाद् वधोऽपि। 'हिंसि हिंसायाम्' इत्यस्मादकारप्रत्ययः ([2]३. ३. १०३)॥ प्रसूरश्वापि। अश्वा बडवा। जनन्यां प्रागुक्ता (१, पृ. ३७७)। लतायामपि प्रसूशब्द इत्याहुः॥ भूद्यावौ—रोदसी च ते। भूश्च द्यौश्च भूद्यावौ पृथिव्यन्तरिक्षे द्वे अपि सकृदुच्चरितेन ङीबन्तत्वेन द्विवचनान्तेन रोदसीशब्देन, सकारान्तेन च नपुंसकलिङ्गेन द्विवचनान्तरोदःशब्देन वा अभिधीयते। यथा—'होतारं सत्ययजं रोदस्योः' इति (ऋग्वेद. ४. ३. १)। तथा—'वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी' इति विक्रमोर्वशीये (१. १)। अन्तर्गतं सर्वं वस्तु रुन्धाते आवृण्वाते इति रोदसी[3]। 'रुधिर् आवरणे'। औणादिकोऽसुन्प्रत्ययः ([4]उ. ४. १८९)। बहुलग्रहणाद् धातुगतधकारस्य दकारः। रूपभेदादेव नपुंसकत्वम्। स्त्रीत्वविवक्षायाम् 'उगितश्च' (४. १. ६) इति ङीपि रोदस्यौ। गणरत्नमहोदधौ[5] तु 'भूर्भुवोर्वाचकं रोदसीत्यव्ययम्' (पृ. ३५) इत्यव्ययगणेऽभिहितम्॥ २२९॥

[1] लालसनम्। 'लस दीप्तौ'। यङन्तः। 'अप्रत्ययात्' इति भा. दी. (पृ. ५०५).
[2] 'गुरोश्च हलः'.
[3] रोदिति सर्वमस्मिन्। 'रुदिर् अश्रुविमोचने'। असुन् (उ. ४. १८९)। पक्षे गौरादित्वाद् ङीष् इति भा. दी. (पृ. ५०५).
[4] 'सर्वधातुभ्यो असुन्'.
[5] 'रोदस्योर्भूर्भुवः' इति मूलश्लोके, रोदसी इति द्यावापृथिव्यर्थे इति व्याख्यायां च दृश्यते (पृ. ३४-५).

(पा.) लालसौ—हिंसा चौर्यादिकर्म च। [1]प्राणव्यपरोपणमपि स्यात्। प्रसूरश्वापि। मातापि स्यात्॥ भूद्यावौ—रोदसी च ते। [2]प्रत्येकं समुदाये च स्याताम्। 'रोदसी रोदसा सार्धं पृथक् स्वर्गे दिवि क्षितौ[3]' इति जयकोशः॥ २२९॥

[1] °व्यवरोपणम् A1.　[2] प्रत्येकसमुदायाभ्याम् A1.　[3] विवक्षितौ A1; पृथ्वीस्वर्गे इति टी. स. (३, पृ. १४८).

ज्वालाभासोर्न पुंस्यर्चिर्ज्योतिर्भद्योतदृष्टिषु ।
पापापराधयोरागः खगबाल्यादिनोर्वयः ।। २३० ।।

(वि.)　स्त्रीनपुंसकयोरर्चिर्ज्वालाभासोः[1] प्रकथ्यते ।। 502 ।।

अर्च्यते[2] पूज्यत इत्यर्चिः । 'अर्च पूजायाम्' ।।

तीक्ष्णरश्मौ हव्यवाहे पुमान् ज्योतिः प्रकीर्तितः ।
प्रकाशदृष्टयोर्नक्षत्रे नपुंसकमुदाहृतम् ।। 503 ।।

द्योतत इति ज्योतिः । 'द्युत दीप्तौ' ।।

पापापराधयोरागःशब्दस्तु परिकीर्तितः[3] ।

आ समन्ताद्[4] अगत्यनेनेत्यागः । 'अग कुटिलायां गतौ' ।।

बाल्यादौ पत्रिणि वयो भवेद्यौवनमात्रके ।। 504 ।।

वीयत इति [5]वयः । 'वी गत्यादिषु' ।। २३० ।।

[1] ज्वालाभा स्त्री K2, K6.　[2] K2 adds अनेन.　[3] परिकीर्त्यते K2, K3; परिकथ्यते K5.　[4] K4, K6 omit.　[5] वयते । 'वय गतौ' K4.

(विव.)　ज्वालाभासोर्न पुंस्यर्चिः । ज्वाला वह्नेः शिखा । भाः सूर्यादेः प्रभा । पुंसि नेति निषेधाद् नपुंसके च[1] ।। ज्योतिर्भद्योतदृष्टिषु । भं नक्षत्रम् । द्योतः प्रकाशः । दृष्टिर्नेत्रस्य कनीनिका[2] । द्योतत इति ज्योतिः । 'द्युत दीप्तौ' । 'द्युतेरिसिन्नादेश्च जः' (उ. २. ११०) इति द्युतेरिसिन्प्रत्ययः, धात्वादेश्च[3] जकारः । शेषे—'ज्योतिः पुंस्यग्निसूर्ययोः । चन्द्रे च' इति । अग्न्यादिषु पुंस्त्वविधानाद् नक्षत्रादिषु नपुंसकत्वम् । अत एव रुद्रः—ज्योतिर्ना भास्करेऽग्नौ च क्लीबं भद्योतदृष्टिषु' इति । 'ज्योतिः प्रकाशे तारायां वेदाङ्गान्तरनेत्रयोः' इत्यजयश्च ।। पापापराधयोरागः । पापे यथा—'तौ नो [4]मुञ्चतमागसः' इति श्रुतिः (तै.

सं. ४. ७. १५. ३)। अपराधे यथा—'सहिष्ये शतमागांसि' इति माघकाव्ये (शिशु. २. १०८)॥ खगबाल्यादिनोर्वयः। खगः पक्षिमात्रम्। यथा—'आलोकशब्दं वयसां विरावैः' इति (रघु. २. ९)। बाल्यादि बाल्ययौवनाद्यवस्थाविशेषः। उभयत्र रूपभेदाद् नपुंसकत्वम्। वयते स्वानुरूपव्यापारं गच्छतीति वयः। 'वय गतौ'। [5]असुन्। शेषे—'युवतामात्रे[6] वयः' इति। यौवनमात्र इत्यर्थः।[7] यथा—'वयःप्रादुर्भावं प्रथयति परीहासफणितिः' इति ॥ २३० ॥

[1] अर्च्यते। 'अर्च पूजायाम्'। 'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः' (उ. २. १०८) इति इसिः इति भा. दी. (पृ. ५०५). [2] कनीनिकामध्यमिति स्वामी (पृ. ३२८). [3] धात्वादेशः Gm1, Gm3. [4] मुञ्चतमंहसः इति अथर्ववेदे (४. २. ५. १). [5] 'सर्वधातुभ्योऽसुन्' (उ. ४. १९०). [6] यौवत° Tv. [7] इत्यर्थान्तरकथनम् Tv.

(पा.) ज्वालाभासोः—द्योतदृष्टिषु। सूर्याग्न्योः पुंलिङ्गः। 'ज्योतिर्ना भास्करेऽग्नौ च क्लीबं भद्योतदृष्टिषु' इति रुद्रः॥ पापापराधयोरागः। एनःशब्दोऽप्येतत्प्रकारः[1]। 'आगः किल्बिषमेनश्च त्रीणि [2]पापापराधयोः' इति वैजयन्ती (पृ. २७४, श्लो. १६)॥ खगबाल्यादिनोर्वयः। यौवनमात्रेऽपि[3] स्यात्। 'वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके' इति विश्वः (पृ. १७६, श्लो. ३२)॥ २३०॥

[1] B3, C1 omit एतत्प्रकारः. [2] पाप्मा इति मु. ग्र. [3] B3 omits the sentence.

तेजःपुरीषयोर्वर्चो महस्तूत्सवतेजसोः।
रजो गुणे च स्त्रीपुष्पे राहौ ध्वान्ते गुणे तमः॥ २३१॥

(वि.) वर्चः [1]सुरूपपुरुषे भवेत् तेजःपुरीषयोः।

[2]वर्चते दीप्यत इति वर्चः। 'वर्च दीप्तौ'॥

क्लीबं महस्तेजसि स्यादुत्सवे तु पुमान् महः॥ 505॥

मह्यते [3]जनैरिति महः। 'मह पूजायाम्'॥

पांसौ गुणे च स्त्रीपुष्पे रजःशब्द उदाहृतः।

रज्यतेऽनेनेति रजः । 'रञ्ज रागे' ।।

राहौ ध्वान्ते गुणे शोके तमःशब्दः प्रकीर्तितः[4] ।। 506 ।।

[5]तम्यतेऽनेनेति तमः । 'तमु [6]ग्लानौ' ।। २३१ ।।

[1] 'पुंसि चन्द्रस्य तनये' इति मेदिनी; 'वर्चो रूपेऽपि च क्वचित्' इति विश्वः (पृ. १७६, श्लो. २७). [2] वर्च्यते, 'वर्च कान्तौ' K_2, K_4. [3] K_3, K_6 omit जनैः. [4] प्रकथ्यते K_2, K_4. [5] तमयति ग्लपयतीति K_2. [6] 'तमु काङ्क्षायाम्' K_5.

(विव.) तेजःपुरीषयोर्वर्चः । वर्च्यत इति वर्चः । 'वर्च दीप्तौ' । वृज्यते त्यज्यत इति वर्चः पुरीषम् । 'वृजी वर्जने' । औणादिकोऽसुन्प्रत्ययः[1] (उ. ४. १८९) । बाहुलको जकारस्य चकारः । शेषे—'वर्चस्तु रूपवद्वर्चः' इति । रूप इव तेजःपुरीषयोरपि वर्चःशब्दो वर्तत इत्यर्थः ।। महश्चोत्सवतेजसोः । मह्यते पूज्यते संबन्धिजनोऽत्रेति महः । 'मह पूजायाम्'[2] । [3]'महामहोनीलशिलारुचः पुरः' इति माघकाव्ये (शिशु. १. १६) सकारान्तप्रयोगः । उत्सववचने त्वकारान्तो नाट्यवर्गे कथितः (१, पृ. १४४) । तत्रापि सकारान्तकथने 'मह उद्धव उत्सवः' इत्यत्र लिङ्गसंकरदोषः प्रसज्येत । अतस्तत्राकारान्तत्वं सकारान्तत्वं चेत्युत्सववाचकस्य महःशब्दस्योभयमङ्गीकरणीयम् । 'न खलु दूरगतोऽप्यतिवर्तते महमसाविति बन्धुतयोदितैः' इति [4]माघकाव्ये (शिशु. ६. १९) अकारान्तस्य [5]महशब्दस्य प्रयोगश्च । 'स राशिरासीन्महसां महोज्ज्वलः' इत्युभयत्रापि नैषधकाव्ये (१. १) । इह तु प्रकरणपाठसामर्थ्यात् सकारान्तत्वमस्तीत्यवगम्यते ।। रजो गुणे च स्त्रीपुष्पे । 'गुणाः सत्त्वं रजस्तमः' इत्युक्तो गुणः (१, पृ. ६०) । स्त्रियाः पुष्पमार्तवम्[6] । प्रतिमासं जायमानमिति यावत् । चशब्दात् पांसौ च प्रागुक्तम् (१, पृ. ५४२) ।। राहौ ध्वान्ते गुणे तमः । गुणः तद्विशेषः प्रागुक्तः (१, पृ. ६०) । शेषे—'तमः शोके' इति । 'क्लीबं तमोगुणे शोके[7] सैंहिकेयान्धकारयोः' इति रभसश्च । राहौ—'तमस्तु राहुः स्वर्भानुः' इति (१, पृ. ६७) । 'स्वर्भानुश्च तमो राहुः सैंहिकेयो विधुंतुदः' इत्यमरमालायां पुंस्काण्डे कथितमिति सुभूतिचन्द्रः ।। २३१ ।।

[1] 'सर्वधातुभ्योऽसुन्'. [2] असुन्प्रत्ययः (उ. ४. १८९). [3] महामहानील° इति

मु. ग्र. (पृ. ८). [4] उत्सवे माघेन प्रयुक्तः Tv. [5] महःशब्दस्य B6. [6] एतदपि पूर्वमुक्तम्, 'स्याद् रजः पुष्पमार्तवम्' इति (१, पृ. ३७३). [7] लोके B6.

(पा.) तेजःपुरीषयोः—उत्सवतेजसोः । [1]अकारान्तमहशब्दोऽपि[2] स्यात्[3] । 'मही भूमौ मही नद्यां मह उत्सवतेजसोः' इति विश्वः (पृ. १८०, श्लो. १०) ।। रजो गुणेऽपि—गुणे तमः ।। २३१ ।।

[1] °महःशब्दः A1. [2] उक्तं चैतद् व्याख्यात्रा (१, पृ. १४५)—'अत्र महशब्दोऽकारान्तः। यथा—"स स्वयंवरमहाय महेन्द्रान्" इति नैषधे' इति. [3] B3 omits स्यात्.

छन्दः पद्येऽभिलाषे च तपः कृच्छ्रादिकर्म च ।
सहो बलं सहा मार्गो नभः खं श्रावणो नभाः ।। २३२ ।।

(वि.) छन्दः स्यात् स्वैरचरणे पद्ये वेदाभिलाषयोः ।

[1]चन्दयत्याह्लादयतीति छन्दः । 'चदि आह्लादने' ।।

कृच्छ्रादिकर्मणि तपः पुमान् स्याद् माघघर्मयोः ।। 507 ।।

लोकान्तरे च शिशिरे धर्मे च समुदाहृतम् ।

[2]तपन्त्यत्रेति तपः । 'तप संतापे' ।।

सहो बले ज्योतिषि च सहा [3]हेमन्तमार्गयोः ।। 508 ।।

सह्यत इति सहः[4] । 'षह मर्षणे' ।

आकाशे श्रावणे मेघे [5]घ्राणे चैव पतद्ग्रहे ।
मृणालसूत्रे वर्षासु नभःशब्द उदाहृतः ।। 509 ।।

न भातीति नभः । 'भा दीप्तौ' ।। २३२ ।।

[1] छन्दति K_6; छन्दयति K_5. [2] तप्यन्तेऽत्र K_5. [3] मार्गहेमन्तयोर्भवेत् K_4; °हेमन्तयोर्बले K_5. [4] सहनं सहः K_2, K_4; हसा सह वर्तत इति वा सहः K_2. [5] प्राणे K_6.

(विव.) छन्दः पद्येऽभिलाषे च । पद्ये पद्यगताक्षरसंनिवेशविशेषे गायत्रीत्रिष्टुबादिपदाभिलप्ये । अभिलाषेऽकारान्तोऽप्यस्ति । तथा च शब्दभेदप्रकाशे—'छन्दोऽभिलाषे छन्दः स्यादुत्सवे च महो महः' इति । चकाराद् वेदे च । यथा—श्रोत्रियः छन्दोऽधीते [1]इति ।। तपः कृच्छ्रादिकर्म च । कृच्छ्रं सांतपनादिकम् । आदिशब्देन जपोपवासादिकं गृह्यते । शेषे—'तपो लोके धर्ममात्रे क्लेशे शिशिरमाघयोः' इति । लोके—तपोलोके । धर्ममात्रे—दानाध्ययनादौ । क्लेशे यथा—किं करोतु तपस्वी । शोच्यत इत्यर्थः[2] ।। सहो बलं सहा मार्गः । बलं सामर्थ्यम् । मार्गो मासविशेषः[3] । तत्र रूपभेदात् पुंलिङ्गः । शेषे—'सहो ज्योतिषि हेमन्ते ना हासवति वाच्यवत्' इति । हेमन्ते च विशेषविधानात् पुंलिङ्गः । हासयुक्ते तु त्रिलिङ्गः । तत्र हसनं हस्, भावे क्विप्[4] । हसा सह वर्तत इति सहः । स्त्रीपुंसयोरप्येवमेव, दीर्घप्राप्तेरभावात् ।। नभः खं श्रावणे नभाः । खमाकाशम् । [5]द्विः पदोपादानमर्थविशेषेण लिङ्गभेदनप्रत्ययनार्थम् । शेषे—

'नभः क्लीबं जलधरे ना तु घ्राणे पतद्ग्रहे ।
मृणालसूत्रे वर्षासु ।।'

इति । विश्वप्रकाशे च—

'नभो व्योम्नि [6]नभा मेघे नभाः पुंसि पतद्ग्रहे ।
घ्राणे मृणालसूत्रे च वर्षासु श्रावणेऽपि च ।।'

इति[7] (पृ. १७७, श्लो. ३७)।। २३२ ।।

[1] 'चन्दनम् । चन्द्यतेऽनेन वा । 'चदि आह्लादने दीप्तौ च' । 'चन्देरादेश्च छः' (उ. ४. २१६) इत्यसुन् । —छन्दति-इति स्वामिमुकुटोक्तो विग्रहश्चिन्त्यः' इति भा. दी. (पृ. ५०५-६). [2] 'तपनम् । तप्यते । अनेन वा । 'तप संतापे' । असुन् (उ. ४. १८९)' इति भा. दी. (पृ. ५०६). [3] मार्गशीर्षः B6. [4] 'क्विप् च' (३. २. ७६). [5] द्विपद° Tj1, Tj2. [6] नभो मेघे B6. [7] 'न बभस्ति भाति नभः' इति स्वामी (पृ. २२); 'नभनम् । नभ्यते, अनेन, अत्र वा । "णभ हिंसायाम्" । असुन्' इति भा. दी. (पृ. ५०६).

(पा.) छन्दः पद्येऽभिलाषे च । स्वैराचरणवेदयोरपि स्यात् । 'छन्दः पद्ये च वेदे च स्वैराचाराभिलाषयोः' इति विश्वः (पृ. १७६, श्लो. २८) ।। तपः

कृच्छ्रादिकर्म च । 'तपश्चान्द्रायणादौ[1] स्याद् [2]धर्मे लोकान्तरेऽपि च' इति विश्वः (पृ. १७६, श्लो. ३५) ।। सहो बलं सहा मार्गः । मार्गो मार्गशीर्षः ।। नभः खं श्रावणे नभाः ।। २३२ ।।

[1] चान्द्रायणादि A_1. [2] घर्मे B_3.

ओकः सद्माश्रयश्चौकाः पयः क्षीरं पयोऽम्बु च ।
ओजो दीप्तौ बले स्रोत इन्द्रिये निम्नगारये ।। २३३ ।।

(वि.) अगाराश्रययोरोको न स्त्रियां परिकथ्यते ।

उच्यति समवैत्यत्रेत्योकः । 'उच समवाये' ।।

क्षीरे च सलिले चैव पयःशब्दोऽभिधीयते ।। 510 ।।

पीयत इति पयः[1] । [2]'पीङ पाने' ।।

धात्ववष्टम्भबलयोर्दीप्तौ तेजसि न द्वयोः ।

विक्रमे च प्रकाशे च संख्यास्वौजस्त्वदन्तकः[3] ।। 511 ।।

[4]उब्जत्यनेनेत्योजः । 'उब्ज आर्जवे' ।।

स्रोतो [5]नदीमहावेगे द्वारे चैवेन्द्रियस्य [6]हि ।

स्रवतीति स्रोतः । 'स्रु गतौ' ।। २३३ ।।

[1] पयत इति वा । 'पय गतौ' K_5. [2] 'पा पाने' K_2, K_4. [3] विषमसंख्यावाची त्वोजोऽदन्तः इति स्वामी (पृ. ३२६). [4] Pt_2 adds व्यक्तीभवति; ओजःशब्दः सौत्रधातुजः K_3. [5] महानदीवेगे J_2. [6] ह K_4.

(विव.) ओकः सद्माश्रयश्चौकाः । सद्म गृहम् । आश्रयो वृक्षादिस्थानमात्रम् । उच्यन्ति संभूय तिष्ठन्त्यत्रेति ओकः । 'उच समवाये' दैवादिकः । 'ओक उचः के' (७. ३. ६४) [1]इत्यसुन्प्रत्ययः चकारस्य ककारादेशश्च । उच्यतेरसुन्प्रत्यये उणादिषु बहुलग्रहणात् कुत्वमिति [2]काशिका (२, पृ. ३४३) ।

द्विः पदावृत्तिः पादपूरणार्था । शेषे—'स्यादोकः पुंस्यदन्तकः' इति । अकारान्तस्य प्रसङ्गादुक्तिः ॥ पयः क्षीरं पयोऽम्बु च । अत्रापि पादपूरणार्थं द्विः पदपाठः[3] ॥ ओजो दीप्तौ बले । दीप्तिः प्रकाशः । बलं सामर्थ्यम् । उब्जति व्यक्तीभवतीति ओजः । 'उब्ज आर्जवे' । आर्जवं स्पष्टतेति धातुवृत्तौ[4] । 'उब्जेर्बले बलोपश्च' (उ. ४. १९३) इति बलेऽभिधेयेऽसुन्प्रत्ययः । धातोर्बकारस्य च लोपः । सूत्रे बलग्रहणस्योपलक्षणत्वाद् अर्थान्तरेऽपि धातोरसुन्प्रत्यये बकारलोपश्च भवत्येव । लघूपधगुणः (७. ३. ८६) । 'ओजर्क्षे पुरुषांशके' इत्यकारान्तत्वेन जातकग्रन्थे प्रयुक्तः । ओजःशब्दो विशेषसंख्यावाचित्वेन ज्यौतिषकैः परिभाषित इति नेह तस्योपयोगः ॥ स्रोत इन्द्रिये निम्नगारये । इन्द्रियम् इन्द्रियस्थानगतं द्वारम् । यथा—'स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः' इति भारविः (किरा. ७. ८) । रयशब्देनात्र प्रवाहो लक्ष्यते । यथा—त्रिस्रोता इति । [5]स्रवतीति स्रोतः ।[6] 'स्रुरीभ्यां तुट् च' (उ. ४. २०३) इत्यसुन्, तस्य च तुडागमः ॥ २३३ ॥

[1] 'इत्यदन्तोऽपि' इति स्वामी (पृ. ३२८); 'असुन् । न्यङ्क्वादिः (७. ३. ५३) । "ओक उचः के" इति निपाताद् अदन्तोऽपि' इति भा. दी. (पृ. ५०६). [2] 'किंपुनरत्र निपात्यते । कुत्वं गुणश्च । . . . दिवौकसः, जलौकसः, इत्येवमादावप्यसुनि प्रत्यये उणादयो बहुलमिति कुत्वं द्रष्टव्यम्' इति काशिका. [3] पीयते । 'पीङ पाने' । पयते वा । 'पय गतौ' । वा असुन् इति भा. दी. (पृ. ५०६). [4] मुद्रितमाधवीयधातुवृत्तौ न दृश्यते. [5] स्रवन्ति B6. [6] Gm1, Gm3 add 'स्रु गतौ'.

(पा.) ओकः सद्माश्रयश्चौकाः । पदरुहस्पृशो चाङ्ग इति कात्यायन-सूत्रोक्त्या अदन्तोऽपि स्यात् ॥ पयः क्षीरं—इन्द्रिये निम्नगारये । निम्नगारयो नदी नदीप्रवाहोऽपि ।

'स्रोतः स्रोतस्विनी कर्षूः कुल्या द्वीपवती सरित् ।'
'ओघः प्रवाहो वेणी च धारा स्रोतो रयः स्मृतः ।'

इति हलायुधः (अ. मा. ३. ४४, ४७) । 'स्रोत इन्द्रिये गजपुष्करे' इति [1]पाठे गजपुष्करमिभकराग्रम् । 'स्रोतोऽम्बुनिर्गमद्वार इन्द्रियेभकराग्रयोः' इति भागुरिः ॥ २३३ ॥

[1] पाठान्तरे A1.

तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्यतस्त्रिषु ।
विद्वान् विदंश्च बीभत्सो हिंस्रेऽप्यतिशये त्वमी ।। २३४ ।।

(वि.) दीप्तौ प्रभावे *भरते तेजः स्याद् बलशुक्रयोः ।। 512 ।।

तेजयतीति तेजः । 'तिज [1]निशातने' । अतस्त्रिषु । अतःपरं वक्ष्यमाणाः शब्दाः आसान्तवर्गं त्रिषु लिङ्गेषु वर्तन्ते ।।

[2]पण्डितप्राज्ञयोर्विद्वानात्मवेदिनि कथ्यते ।

वेत्तीति विद्वान् । 'विद ज्ञाने' ।।

हिंस्रेऽर्जुने च बीभत्सः कृपावति रसे त्रिषु ।। 513 ।।

[3]बीभत्सा अस्यास्तीति [4]बीभत्सः । 'बध बन्धने' इत्यस्य निन्दायां सन् ।। अतिशये त्वमी । अमी वक्ष्यमाणाः [5]चत्वारः शब्दा अतिशये वर्तन्ते[6] ।। २३४ ।।

[1] निशाने J2. [2] °प्राप्तयोः K6. [3] भीषयते J2. [4] बीभत्सुः K5.
[5] J2, K5 omit चत्वारः. [6] K3 omits 8 lines. * अग्नावित्यर्थः.

(विव.) तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि । प्रभावः प्रतापः । [1]दुराधर्षत्वमित्यर्थः । तदुक्तम्[2]—

'अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं[3] तत्तेजः समुदाहृतम् ।।'

इति । दीप्तिः प्रकाशः । बलं सामर्थ्यम् । शुक्रं [4]चरमधातुः । तेजयति तनूकरोति शात्रवादिकमिति तेजः । 'तिज निशातने' । निशातनं तनूकरणम् । असुन्प्रत्ययः (उ.४.१८९) ।। अतस्त्रिषु । इतः परं सान्तवर्गसमाप्तिपर्यन्ताः शब्दाः वाच्यलिङ्गा इत्यर्थः ।। विद्वान् विदंश्च । यो विदन् ज्ञेयोपादेयविवेकवान् स विद्वानुच्यते । 'विद ज्ञाने' इति धातोः लादेशस्य शतृप्रत्ययस्य 'विदेः शतुर्वसुः' (७.१.३६) इति वस्वादेशे सति 'उगिदचां सर्वनामस्थानेऽधातोः' (७.१.७०) इति नुमागमे 'सान्तमहतः संयोगस्य' (६.४.१०) इति दीर्घे संयोगान्तलोपे च (८.२.२३) विद्वानिति रूपम् । प्रज्ञादिगणे (५.४.३८) विदन्निति शत्रन्तः पठ्यते । अत एव

ज्ञापकाद् 'विदेः शतुर्वसुः' इति वस्वादेशस्य पाक्षिकत्वादिह ग्रन्थकारेण विदन्निति शत्रन्तनिर्देशः कृतः। अथवा—'तुह्योस्तातङङाशिष्यन्यतरस्याम्' (७. १. ३५) इत्यनुवर्तते। तथा च काशिकाकारः—'केचिदन्यतरस्यां ग्रहणमनुवर्तयन्ति। तेन[5] विदन्तौ विदन्तः इति सिद्धं भवति' इति (२, पृ. २८०)। शेषे—'विद्वानात्मविदि प्राज्ञे पण्डिते चाभिधेयवत्' इति। प्राज्ञो गम्भीरार्थावधारणक्षमः॥ बीभत्सो हिंस्रेऽपि। हिंस्रो घातुकः। 'बध बन्धने' इति धातोः 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (३. १. ६) इति सूत्रे बधेर्वैरूप्य[6] इति वक्तव्यात् वैरूप्यार्थे सन्प्रत्यये तदन्ताद्धातोः 'अप्रत्ययात्' (३. ३. १०२) इत्यकारप्रत्यये स्त्रीलिङ्गाद् बीभत्साशब्दाद् अर्शआद्यचि (५. २. १२७) बीभत्सः। शेषे—'पार्थो घृणावान् बीभत्सः' इति। पार्थोऽर्जुनः। घृणावान् जुगुप्सित इत्यर्थः। रसे पुंलिङ्गः। तद्वति त्रिलिङ्गश्चेति प्रागुक्तः (१, पृ. १०१)॥ अतिशये त्वमी। अमी वक्ष्यमाणाः ईयसुन्प्रत्ययान्ता ज्यायःप्रभृतयश्चत्वारः शब्दा वृद्धादीनां बाढपर्यन्तानामतिशयार्थे वर्तन्ते॥ २३४॥

[1] दुराधर्षे प्रसिद्धार्थः Tv.　[2] अपिशब्दादसहनत्वे यद्भरतः इति स्वामी (पृ. ३२९); इति भरतः इति भानुजीदीक्षितश्च (पृ. ५०६).　[3] अवस्थानम् B6.　[4] वसासृङ्मांसेत्यादिसप्तसु धातुषु.　[5] विदन् इत्यपि मु. ग्र.　[6] 'अत्रापि सन्नर्थविशेष इष्यते।... बधेर्वैरूप्ये' इति काशिकायाम् (१, पृ. १४७); 'बधेश्चित्तविकारे' इति सि. कौमुद्याम् (पृ. ३६९).

(पा.) तेजः प्रभावे—बले शुक्लेऽपि। बलं पराक्रमः। [1]शुक्लं रेतः॥ अथ त्रिषु विद्वान् विदंश्च। पण्डितोऽपि स्यात्। अधिकारात् त्रिलिङ्गः। विदुषी सभा। विद्वत्सदः॥ बीभत्सो हिंस्रेऽपि। [2]जुगुप्सितेऽपि स्यात्॥ अतिशये त्वमी॥ २३४॥

[1] शुक्रम् A1.　[2] जुगुप्सितव्यश्च A1.

वृद्धप्रशस्ययोर्ज्यायान् कनीयांस्तु युवाल्पयोः।
वरीयांस्तूरुवरयोः साधीयान् साधुबाढयोः॥ २३५॥

इति सान्तवर्गः

(वि.) प्रशस्तवृद्धयोर्ज्यायान् कनीयांस्तरुणेऽल्पके ।
अतिशयेन वृद्धो[1] ज्यायान् । अतिशयेनाल्पः[2] कनीयान् ।
उरौ वरे वरीयान् स्यात् साधीयान् साधुबाढयोः ।। 514 ।।
अतिशयेन उरुः वरीयान् । अतिशयेन साधुः[3] साधीयान् ।। २३५ ।।

इति सान्तवर्गः[4]

[1] J2 adds प्रशस्यो वा. [2] J2 adds युवा वा. [3] बाढः K4. [4] K2, K4 add सान्तशब्दसंख्या ३६.

(विव.) वृद्धप्रशस्ययोर्ज्यायान् । वृद्धप्रशस्यशब्दाभ्यामतिशयरूपार्थविवक्षायाम् ईयसुन्प्रत्यये (५. ३. ५७), प्रशस्यस्य (५. ३. ६०) इत्यनुवृत्तौ 'ज्य च' (५. ३. ६१), 'वृद्धस्य च' (५. ३. ६२) इति सूत्राभ्यां [1]शब्दद्वयस्य ज्यादेशे, 'ज्यादादीयसः' (६. ४. १६०) इति प्रत्ययादेरात्त्वे ज्यायानिति रूपम् ।। कनीयांस्तु युवाल्पयोः । अतिशयेन युवा, अतिशयेनाल्प इति च विग्रहे ईयसुन्प्रत्यये (५. ३. ५७), 'युवाल्पयोः कनन्यतरस्याम्' (५. ३. ६४) इति [2]शब्दद्वयस्य कनादेशे कनीयानिति रूपम् ।। वरीयांस्तूरुवरयोः । उरुर्महान् । वरः श्रेष्ठः । अत्रापि [3]पूर्ववदतिशयार्थे शब्दद्वयादीयसुन्प्रत्यये, 'प्रियस्थिर...' इत्यादिना (६. ४. १५७) उरुशब्दस्य वरादेशे वरीयानित्यर्थद्वये साधारणं रूपं भवति ।। साधीयान् साधुबाढयोः । अतिशयेन साधुरिति विवक्षायामीयसुन्प्रत्यये (५. ३. ५७) टिलोपे[4] (६. ४. १५५) साधीयान् । अतिशयेन साधुः सज्जन इत्यर्थः । अतिशयेन बाढ इत्यस्मिन्नर्थे 'अन्तिकबाढयोर्नेदसाधौ' (५. ३. ६३) इति [5]साधादेशे च साधीयान्, अतिदृढ इत्यर्थः ।। २३५ ।।

इति सान्तवर्गः[6]

[1] B6 adds वृद्धप्रशस्येति. [2] B6 adds युवाल्पयोः. [3] °अतिशायनार्थे Tj1, Tj2. [4] 'टे':. [5] B6 adds बाढशब्दस्य. [6]Tv adds सान्तशब्दसंख्या ३६.

(पा.) वृद्धप्रशस्तयोर्ज्यायान् । 'अतिशये त्वमी' इत्यधिकाराद् अतिवृद्धातिप्रशस्तयोः ।। कनीयांस्तु—साधुबाढयोः ।।

अनुक्तम्—

ओदनेऽपि च पाथः स्यादम्भस्यपि सरो भवेत् ।
दासः स्याद् दानपात्रेऽपि त्रासो दोषेऽपि रत्नजे ।।
तितित्सः [1]स्यात् तरक्षौ च रभसः[2] समदेऽपि च ।
ताम्रेऽपि स्यात् तामरसं चन्द्रमस्यपि सारसः ।।
क्रूरदृष्टौ च सप्तार्चिदंष्ट्रायामपि राक्षसी ।
अन्धेऽपि दिव्यचक्षुः स्याद् यथात्रैव सुलोचनः ।।
भवेद् घनरसस्तक्रघनसारकयोरपि ।
रासो ध्वनौ[3] नर्मगोष्ठ्योः सेवासेवकयोश्च [4]से ।। २३५ ।।

इति सान्तवर्गः

[1] 'तरक्षुस्तु मृगाजीवस्तिलित्सकमृगादनौ' इति वैजयन्ती (पृ. ६५, श्लो. ४). [2] 'रभसो विषवेगयोः' इति वैजयन्त्यां (पृ. २४४), 'रभसो वेगहर्षयोः' इति शाश्वते (पृ. ५८), विश्वप्रकाशे च (पृ. १७५) दृश्यते. [3] रसे A_1, C_1. [4] 'सेशब्दः सेवने स्त्री स्यात् सेवके त्वभिधेयवत्' इति वैजयन्ती (पृ. २८०, श्लो. ४०).

अथ हान्तवर्गः—

दलेऽपि बर्हं निर्बन्धोपरागार्कादयो ग्रहाः ।
द्वार्यापीडे क्वाथरसे निर्यूहो नागदन्तके ।। २३६ ।।

(वि.)　दले मयूरपिञ्छे[1] च प्रधाने परिवारके ।
उद्योगवृद्धयोरपि च बर्हशब्दः प्रकीर्तितः ।। 515 ।।

[2]वर्हत इति बर्हः । 'बर्ह प्राधान्यादौ' । बृहतीति वा वर्हः । 'बृहू उद्यमने[3]' ।।

सूर्यादौ ग्रहणे युद्धे पूतनादावनुग्रहे[4] ।

उपरागे च निर्बन्धे स्वर्भानौ च ग्रहः स्मृतः ।। 516 ।।

[5]गृह्यत इति ग्रहः । 'ग्रह उपादाने' ।।

[6]क्वाथस्य च रसे चैवाप्यापीडे नागदन्तके ।
अगारद्वारके चैव निर्यूहः परिकथ्यते ।। 517 ।।

निर्यूह्यत इति निर्यूहः । 'यूहिः' लौकिको धातुः ।। २३६ ।।

[1] °पिच्छे J2. [2] बर्हति नृत्तेन बर्हम् । 'बृह वृद्धौ' K6. [3] उद्यमे K4. [4] च सुग्रहे K4, K6. [5] गृह्येते सूर्याचन्द्रमसावनेनेति ग्रहः K2, K4. [6] द्वार्यापीडे क्वाथरसे K5.

(विव.) दलेऽपि बर्हम् । दलं पर्णम् । बर्हं मयूरपिञ्छम् । शेषे—

'बर्हं मयूरपिञ्छेऽथ प्राधान्योद्योगवृद्धिषु
परिवारे पुमान् ।।'

इति । प्राधान्यादिषु पुंलिङ्ग इत्यर्थः । 'बृह वृद्धौ' इति धातोः पचाद्यचि (३. १. १३४) बर्हम्[1] ।। निर्बन्धोपरागार्कादयो ग्रहाः । निर्बन्ध आग्रहः । उपरागो राहुणा चन्द्रसूर्ययोर्ग्रहणम् । आदिशब्देन सूर्यादयो नव ग्रहाः[2] । 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इति भावे अप्प्रत्ययः । गृह्णन्तीति ग्रहाः सूर्यादयः । 'विभाषा ग्रहः' (३. १. १४३) इति पक्षे पचाद्यच् । शेषे—'युद्धग्रहणानुग्रहेषु तु । पूतनादौ ग्रहः' इति । अत्र युद्धशब्देन युद्धोद्योगो विवक्षितः । तथा विश्वप्रकाशे—

'ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे ।
सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः ।।'

इति (पृ. १७६, श्लो. २) ।। द्वार्यापीडे—नागदन्तके । द्वारं गृहादौ निर्गमप्रवेशार्थं विकल्पितं कवाटस्थानविवरम् । 'आपीडशब्देन कुडचाद् बहिर्निर्गतं दारु कथ्यते' इति [3]क्षीरस्वामिसुबोधिनीकारौ । तदुक्तं विश्वकर्मणा—

'स्थूणा तुलाग्रयोर्लग्नं द्विप्रान्तं तिर्यगुन्नतम् ।
आपीड उच्यते दारु स्वोर्ध्वस्यापीडधारणात् ।।'

इति । अपरे तु—स्वसंबन्धं पुरुषमापीडयति स्थापयतीति व्युत्पत्त्या मत्तवारणमापीडशब्दार्थमाहुः । तथा च वैजयन्त्याम्—'कूटागारं तु वलभी निर्यूहो [4]मत्त-

वारणम्' इति (पृ. १६१, श्लो. ३१)। सुभूतिचन्द्रस्तु—आपीडः शेखर इति व्याख्याय तत्र रुद्राभिधानसंवादमाह—'निर्यासे शेखरे द्वारि निर्यूहो नागदन्तके' इति। क्वाथरसः [5]पुष्परसः। नागदन्तकलक्षणमुक्तं वास्तुशास्त्रे—

'द्वारप्रान्तद्वये खातं नासाया ईषदुन्नतम्।
दारु स्रगवलम्बार्थं नागदन्तक उच्यते॥'

इति। द्वारबन्धस्योपरिस्थितं दारु नासा। प्रान्तद्वयवर्तित्वेन नागदन्तसादृश्याद् नागदन्तकः। 'नागदन्तो द्विपरदे [6]गृहनिर्गतदारुणि' इति विश्वप्रकाशश्च (पृ. ७२, श्लो. १९९)। निर्यान्त्यनेनेति वा, स्वयं निर्यातीति वा निर्यूहः। यातेरूह-प्रत्ययः[7]॥ २३६॥

[1] बर्ह्यते वा। 'बर्ह हिंसायाम्'। घञ् इति भा. दी. (पृ. ५०७). [2] B6 adds 'ग्रह उपादाने'. [3] आपीडो बहिर्निःसृतं दारु इति मु. ग्र. (पृ. ३२९). [4] गृहं परितो वृतिः, चन्द्रशालिका वा. [5] क्वाथरसे घने द्रव्यनिर्यासे इति टी. स. (४, पृ. १५१); क्वथितद्रव्यरसे इति भा. दी. (पृ. ५०७). [6] गृहान्निर्गत° इति मु. ग्र. [7] कूहप्रत्ययः B6; निर्यूहति। 'यूहि' लौकिको साधुः (धातुः?)। 'इगुपध...' इति कः। निरूहति वा। पृषोदरादित्वाद् धातोर्यडागमः इति भा. दी. (पृ. ५०७).

(पा.) दलेऽपि बर्हम्। शिखिपिञ्छेऽपि स्यात्[1]। 'विंटि अंदुन्नु'॥ निर्बन्धो-पराग—निर्यूहो नागदन्तके। नागदन्तकः 'नागवासमु'। भाषान्तरे 'नेरुगुंठम्' ॥ २३६॥

[1] B3 omits.

तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च।
पत्नीपरिजनादानमूलशापाः परिग्रहाः॥ २३७॥

(वि.) तुलासूत्रे हेम्नि भुजे बन्दीनियमयोर्घृणौ।
[1]हरिद्रौ हयरश्मौ च प्रग्राहः प्रग्रहे भवेत्॥ 518॥

प्रगृह्यत इति प्रग्राहः, प्रग्रहश्च[2]॥

भृत्ये शापे मूलपत्न्योरादाने स्यात् परिग्रहः।

परिगृह्यत इति परिग्रहः ।। २३७ ।।

[1] हरिद्राहयरश्मौ K4. [2] K2, K4 add 'ग्रह उपादाने'.

(विव.) तुलासूत्रे--प्रग्रहोऽपि च। तुलादण्डस्योपरि स्तम्भद्वये तिर्यगवस्थापितकीलमध्ये तुलाधारणार्थं निहितं सूत्रं तुलासूत्रमिति सुबोधिनीकारः। रथादावश्वादिनियमनार्था सारथ्यादिभिर्ध्रियमाणा[1] रज्जुः अश्वादिरश्मिः। प्रकर्षेण गृह्यते तुलादिकमनेनेति प्रग्राहः। ग्रह इति वर्तमाने 'प्रे वणिजाम्' (३. ३. ५२), 'रश्मौ च' (३. ३. ५३) इति ग्रहेर्विभाषायां घञि प्रग्राहः। तदभावपक्षे 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्प्रत्यये प्रग्रहः। विश्वप्रकाशे--

'प्रग्रहस्तु[2] तुलासूत्रे बन्द्यां नियमने भुजे।
हयादिरश्मौ रश्मौ च सुवर्णहरिपादपे ।।'[3]

इति (पृ. १८०, श्लो. १२)। रश्मिः सूर्यादिकिरणः। शेषेऽपि--

'रश्मौ बन्द्यां नियमने भुजे च हरिपादपे।
हेम्नश्च प्रग्रहः' ।।

इति ।। पत्नीपरिजनादानमूलशापाः परिग्रहाः। परिजनः [4]परिवारः। आदानं मूलं बुध्नः। यथा--दृढपरिग्रहः पादपः इति। शापः शपथः। परिपूर्वो गृह्णातिः, कर्मणि भावे करणे च 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्प्रत्यये परिग्रहः ।। २३७ ।।

[1] क्रियमाणा Tj1, Tj2. [2] प्रग्राहः इति मु. ग्र. [3] हलिपादपे इति भा. दी. (पृ. ५०७), मु. ग्र. च. [4] परीवारः B6.

(पा.) तुलासूत्रे--मूलशापाः परिग्रहाः। मूलं नाम[1] मूल्यम्। शापो नाम[1] शपथः ।। २३७ ।।

[1] B3, C1 omit नाम.

दारेषु च गृहाः श्रोण्यामप्यारोहो वरस्त्रियाः।
व्यूहो वृन्देऽप्यहिर्वृत्रेऽप्यग्नीन्द्वर्कास्तमोऽपहाः ।। २३८ ।।

परिच्छदे नृपार्हेऽर्थे परिबर्हः

इति हान्तवर्गः

(वि.) अगारे चैव भार्यायां गृहशब्दः प्रकीर्तितः ।। 519 ।।

सर्वं [1]गृह्णन्तीति गृहाः ।।

वरस्त्रियाः कटीभागेऽप्युच्छ्रायेऽश्वादिसादिनि ।
दैर्घ्यारोहणयोर्मानेऽप्यारोहः परिकथ्यते ।। 520 ।।

आरुह्यत इत्यारोहः । 'रुह बीजजन्मनि प्रादुर्भावे च' ।।

वृन्दे विशिष्टतर्के च सैन्यविन्यसनेऽपि च ।
पक्षिवृन्दे गते व्यूहनिर्माणे व्यूह उच्यते ।। 521 ।।

व्यूह्यत[2] इति व्यूहः । 'ऊह वितर्के' ।।

वृत्रासुरे पन्नगे [3]चाप्यहिस्तु समुदाहृतः ।

[4]अंहत इत्यहिः । 'अहि गतौ' ।।

हव्यवाहे हिमांशौ च सूर्येऽपि स्यात् तमोऽपहः ।

तमोऽपहन्तीति तमोऽपहः । 'हन हिंसागत्योः' ।।

नृपार्हचामरादौ च परिच्छेदे च वस्तुनि ।। 524 ।।
परिच्छदे भूषणे च परिबर्हः प्रकथ्यते ।

परिबर्हत इति परिबर्हः । 'बर्ह [5]प्राधान्ये' ।। २३८ ।।

इति हान्तवर्गः[6]

[1] गृह्णातीति गृहः K_4. [2] K_2, K_3 add समूहतया रच्यते. [3] चाप्यहिशब्दः प्रकीर्तितः K_5. [4] यत्तु 'अंहति' इत्युक्तं स्वामिना, तन्न । नलोपासंभवात् इति भा. दी. (पृ. ५०७). [5] प्राधान्यपरिभाषणहिंसाप्रसादेषु J_2. [6] K_2, K_5 add हान्तशब्दसंख्या ११.

(विव.) दारेषु च गृहाः। भर्त्रादिदत्तं गृह्णन्तीति गृहाः। पुंलिङ्गो बहुवचनान्तश्चायं गृहशब्दः। चशब्दाद् वेश्मनि च। 'गेहे कः' (३. १. १४४) इति सूत्रे गेहशब्दस्य वेश्माभिधेयत्वम्[1], तात्स्थ्यात् लक्षणया पत्नी चाभिधेयभूता। एवमर्थद्वयेऽप्यभिधेये कर्तरि ग्रहधातोः कप्रत्यये 'ग्रहिज्या...' इत्यादिना (६. १. १६) संप्रसारणे गृहमिति ॥ श्रोण्यामप्यारोहो वरस्त्रियाः। शेषे—

'अश्वादिसादिनि।
आरोहणे द्राघिमनि मानेऽप्यारोह इष्यते ॥'

इति। द्राघिमनि रज्ज्वादेर्दीर्घत्वे, माने वेण्वादेरुच्छ्राये। [2]रुहेर्धातोः आङ्पूर्वात् कर्मणि भावे च घञ्प्रत्ययः। व्यूहो वृन्देऽपि। समूहे कृतनिर्वचनः (१, पृ. ३५८)। 'व्यूहस्तु बलविन्यासे' इति गतः (१, पृ. ५२६)। वीनां पक्षिणां समूहो व्यूहः। तद्वानपि व्यूहस्त्रिलिङ्गः। विशिष्टस्तर्को व्यूह इत्यादि। 'व्यूहो ना बलविन्यासे निर्माणनिकुरुम्बयोः' इति रुद्रः ॥ अहिर्वृत्रेऽपि। वृत्रो दानवविशेषः। अत एव— 'सर्पे वृत्रासुरेऽप्यहिः' इति रभसः[3]। यथा—'द्रुतं धनुष्खण्डमिहाहिविद्विषः' इति भारविः (किरा. ४. २७)। [4]अंहति लोकान् व्याप्नोतीति अहिः[5]। 'अहि गतौ'। सर्पे प्रागुक्तः (१, पृ. १५०) ॥ अग्नीन्द्वर्कास्तमोऽपहाः। तमो ध्वान्तमपहन्तीति तमोऽपहः। 'अपे क्लेशतमसोः' (३. २. ५०) इति डप्रत्ययः। डित्त्वात् टिलोपः[6] ॥ परिच्छदे नृपार्हेऽर्थे परिबर्हः। परिबर्हः परिच्छदः परिकरः। राजार्हं छत्रचामरादिकम्। यथा—'वेश्मानि रामः परिबर्हवन्ति' इति रघुवंशे (१४. १५)। अर्थो धनम्। परिबृह्यते वर्धत इति परिबर्हः। 'बृहि वृद्धौ'। कर्मणि घञ्प्रत्ययः। परिबर्हयन्तीति वा परिबर्हः। बृहतेर्ण्यन्तात् पचाद्यच्प्रत्ययः[7]। (३. १. १३४) ॥

इति हान्तवर्गः[8]

अत्र नानार्थवर्गपरिसमाप्तिं द्योतयितुं वर्गान्तरे वक्ष्यमाणमुपक्षिपति— अव्ययाः परे इति। अनन्तरमविभक्तिकलक्षणा अव्यया एव कथयिष्यन्त इत्यर्थः। इह केचिदाहुः—वक्ष्यमाणानाम् आङीषदादीनामप्यनेकार्थत्वाद् 'विशेष्यनिघ्नैः संकीर्णैः' (३. १. १) इत्याद्युद्देशश्लोकगतानां[9] नानार्थशब्देनोदाहरणम्[10]। वर्ग-

समाप्तिस्तु 'हि हेताववधारणे' (श्लो. २५७) इत्यन्तनानार्थाव्ययनिरूपणानन्तर-भावीति[11]। अव्ययवर्गस्तु[12] 'चिराय चिररात्राय' इत्यादिक इति च। अपरे तु[13]—तेषामप्यविभक्तिकत्वाद् अव्ययपदेनैवोपसंग्रहणाद् आङीषदर्थे . . . इत्यादिकोऽव्यय-वर्ग इत्याहुः। तेषामनेकार्थत्वं काण्डप्रथमश्लोकोक्तस्य वर्गाणां वर्गसंश्रयत्वस्यैव निर्वाहकमिति। अव्ययवर्गे द्वावप्यवान्तरवर्गौ नानार्थवर्गः पर्यायवर्गश्च इत्युपपत्तेः। [14]न च विशेष्यनिघ्नत्वं संकीर्णवर्गवद् अवान्तरवर्गाश्रयत्वं मा भूदिति वाच्यम्। सति संभवे तु परित्यागानुपपत्तेः। तयोरपि वर्गयोराचार्योक्तं वर्गसंश्रयत्वं प्रागेव समर्थितम्। किं च नानार्थवर्गादावाचार्येण प्रतिज्ञातम् इह केचिदनेकार्थाः कान्तादिवर्गेष्वेव विवक्ष्यन्ते। भूरिप्रयोगास्तु पर्यायकाण्डे कान्तादिषु चेति। न चाङादयः पर्यायकाण्डगताः। न हि कान्तादिवर्गेषु क्रोडीकृत्य पठिताः। अतो नानार्थवर्ग-समाप्तिरत्रैव। अव्ययवर्गस्तु आङीषदर्थे (श्लो. २३९) इत्यादिरिति सर्वं कल्याणम्॥ २३८॥

व्याचष्टामरसिंहोक्ते[15] नामलिङ्गानुशासने।
बोम्मगण्टचप्पयाचार्यो वर्गं नानार्थगुम्फितम्॥
[16]इह यत्त्यक्तमज्ञानादालस्याद्यदुपेक्षितम्।
प्रमादादन्यथोक्तं यत् तद् विद्वद्भिर्विशोध्यताम्॥

इति नानार्थवर्गः समाप्तः[17]

[1] अभिधेयम् Gm1, Gm3. [2] 'रुह बीजजन्मनि प्रादुर्भावे च' B6. [3] वैजयन्त्यामपि एवं दृश्यते (पृ. २१५, श्लो. ५). [4] अंहति इत्युक्ते नलोपासंभवः इति भा. दी. (पृ. ५०७). [5] आहन्ति। 'हन हिंसागत्योः'। 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ. ४. १३८) इतीण् डित् आङो ह्रस्वः इति भा. दी. (पृ. ५०७). [6] 'टेः' (६. ४. १४३). [7] परिबर्हते। परिबर्हते वा। 'बर्ह प्राधान्ये'। पचाद्यच्। घञ् वा (३. ३. १९) इति भा. दी. (पृ. ५०७). [8] B6, Tv add हान्तशब्दसंख्या १२. [9] °गतनानार्थ° B6. [10] उपसंग्रहणम् B6, Tv. [11] निरूपणान्त° Gm3. [12] Tj1, Tj2 omit वर्ग°. [13] B6 adds आहुः. [14] स च विशेष्यनिघ्नसंकीर्णपदस्या-व्ययान्तवर्गाश्रयत्वं मा भूदिति वाच्यम् Gm1, Gm3. [15] °अमरसिंहीये Tv. [16] Tv omits the verse. [17] नानार्थवर्ग इहैव समाप्यते इति विवरणकारमतम्.

(पा.) दारेषु च गृहाः। नपुंसकगृहशब्दोऽपि [1]एवप्रकारः। 'जाया च गृहिणी गृहाः[2]' इति हलायुधः (अ. मा. २. ३३९)॥ श्रोण्यामप्यारोहो वरस्त्रियाः।

³समुच्छ्रायेऽपि स्यात् ।। व्यूहो बृन्देऽपि । सेनाविन्यासेऽपि स्यात् ।। अहिर्वृत्रेऽपि । सर्पेऽपि स्यात् ।। अग्नीन्द्वर्का--परिबर्हः । नृपार्हार्थः श्वेतच्छत्रादिः ।। अनुक्तम्--

पिकालापेऽपि च कुहूरीहा स्यादुद्यमेऽपि च ।
आरोहः स्यान्महामात्रो हस्त्यारोहोऽप्ययं मतः ।। २३८ ।।

इति हान्तवर्गः

[1] B3 omits. [2] गृहम् A1. [3] उत्सेधेऽपि B3, C1.

अव्ययाः परे ।
आङीषदर्थे ऽभिव्याप्तौ [1]सीमार्थे धातुयोगजे ।। २३९ ।।

(वि.) अव्ययाः परे । परे वक्ष्यमाणाः शब्दा आलिङ्गसंग्रहवर्गान्तमव्ययाः । अलिङ्गा इत्यर्थः ।। अतः [2]परमव्ययनानार्थवर्गमुपक्रमते--आङीषदर्थे--धातुयोगज इति । वर्तते इति शेषः । अत्रोदाहरणानि । ईषदर्थे यथा--'आपाण्डरीभूतमुखच्छवीनाम्' इति (कु. सं. ३. ३३) । अभिव्याप्तौ यथा--आकुमारं यशः । कुमारा अपि यशो जानन्तीत्यर्थः । सीम्नि यथा--'आसमुद्रक्षितीशानाम्' (रघु. १. ५) । [3]धातुयोगजे यथा--आदत्ते । आहरति । [4]आक्रामति । आयातीत्यादि ।। २३९ ।।

[1] सीम्न्यर्थे K4, K5. [2] J2, K5 omit °नानार्थ°. [3] धातुयोगजार्थे K5; °योगार्थे J2. [4] K5 omits आक्रामति.

(विव.) आङीषदर्थे--धातुयोगजे । उद्देशक्रमानुरोधेन पूर्ववर्गान्त एवोपक्षिप्तानव्ययानाह--आङित्यस्य गणगतत्वेन 'उपदेशेऽजनुनासिक इत्' (१. ३. २) इति ङकारस्येत्संज्ञालोपे सति प्रयोगकाले तस्याभाव एव । ईषदर्थोऽल्पार्थः । यथा--आ उष्णमिति विग्रहे 'नित्यं[1] कुगतिप्रादयः' (२. २. १८) इति समासे सति ओष्णं, किंचिदुष्णमित्यर्थः । आलवणम् । [2]'आपाण्डरीभूतमुखच्छवीनाम्' (कु. सं. ३. ३३) इति च । अन्येन युक्तो विधिः अभिविधिः[3] । यथा--'आकुमारं यशः पाणिनेः' (म. भाष्य. १. ४. ८९), बाला अपि पाणिनेर्यशो जानन्तीत्यर्थः । 'आजन्मशुद्धानाम्' (रघु. १. ५) इति च । सीम्नि मर्यादायाम् ।

यथा—'ओदकान्तं[4] प्रियं पान्थमनुव्रजेत्', देशान्तरं प्रति गच्छन्तं प्रियं सजलजलाशयदर्शनान्तमनुव्रजेदित्यर्थः। 'पञ्चम्यपाङ्परिभिः' (२. ३. १०) इति पञ्चमी धातुयोगजेऽर्थ इति अनेकार्थे सत्यपि अनभिव्यक्तार्था एव धातवः आङाद्युपसर्गवशादर्थविशेषे वर्तन्ते। अतो धात्वर्थद्योतकत्वेन उपसर्गाणामपि तदर्थत्वमुच्यते। आङित्यस्य ईषदाद्यर्थत्रयाभिधायकत्वं, धातुयोगजार्थस्य तु द्योतकत्वमिति विवेकः। एवमुत्तरत्रापि यथायथं द्रष्टव्यम्। अत्र धातुयोगज इत्यस्य विवरणं शेषकारेण कृतम्। यथा—

'क्रियोद्गमग्रहाधर्षाश्लेषशापाभिकाङ्क्षणे।
अवष्टम्भे कालहृतावुत्कण्ठानिकटत्वयोः॥
स्पर्धावापनिषेधेषु विनामे बन्धने वधे।
स्नाने संस्थासंप्रदायदर्शनेषु विमर्शने॥
विज्ञाने ज्ञापने पारतन्त्र्ये त्यागनियोगयोः।
भूषासंभाषणालेख्याभिमुख्याक्रमणेषु च॥
वृत्त्यावृत्तिप्रापणेषु प्रतिश्रवणविस्तृतौ।
विस्रम्भाभिविधोद्योगे संभ्रमाभ्यवहारयोः॥
स्थान आवरणाह्वान आध्मापूजाश्रमेषु च।
उक्तिदुःखानन्दनेषु संचये चाङ् प्रवर्तते॥'

इति। क्रियायां यथा—आचरति करोतीत्यर्थः। उद्गम ऊर्ध्वगमनम्। यथा—'यावत् प्रतापनिधिराक्रमते न भानुः' इति (रघु. ५. ७१)। उदेतीत्यर्थः। ग्रहे स्वीकारे। यथा—'आदत्ते हि रसं रविः' (रघु. १. १८) इति। 'मिषतामाच्छिनत्ति नः' (कु. सं. २. ४६)। गृह्णातीत्यर्थः। 'आधर्षः आधर्षणमुपद्रवकरणम्। यथा—आस्कन्दति। आश्लेषे यथा—आलिङ्गति। शापे यथा—आक्रोशति। अभिकाङ्क्षणमिच्छा। यथा—आकाङ्क्षति भिक्षाम्। अवष्टम्भः तदेकशरणत्वम्। यथा—'नालम्बते दैष्टिकताम्' इति (शिशु. २. ८६)। कालहृतिः कालयापनम्। यथा—आगमयस्व तावन्माणवकम्। उत्कण्ठायाम्। यथा—आध्यानमुत्कण्ठेति प्रागुक्तम् (१, पृ. १३८)। निकटत्वे सामीप्ये। यथा—आसीदति, संनिकृष्टो भवतीत्यर्थः। स्पर्धायाम्। यथा—'गतभीराह्वत चेदिराण्मुरारिम्' (शिशु. २०. १); शिशुपालः स्पर्धमानः सन्नाह्वानं कृतवानित्यर्थः।

आवापो निधानम् । यथा—गर्भमादधाति । [5]बीजमावपति । विनामो वक्रीकरणम् । यथा—हस्तमाकुञ्चयति । बन्धने यथा—'आमुञ्चतीवाभरणम्' इति (रघु. १३. २१) । वधे यथा—'वायव्यं[6] श्वेतमालभेत' (तै. सं. २. १. १. १) इति । स्नाने यथा—आप्लावते इति । संस्था अवयवविशेषो यथा—'आकारसदृशप्रज्ञः' इति (रघु. १. १५) । छन्दोगा आमनन्तीत्याम्नायः । संप्रदाय इति च गतम् (२, पृ. १६८) । दर्शने यथा—आलोकन्त इति । विमर्शो विचारो यथा—आलोचयतीति । विज्ञाने यथा—अर्थोऽयमाभासते, ज्ञानविषयो भवतीत्यर्थः । ज्ञापने यथा—आदिशतीति । पारतन्त्र्ये यथा—तदायत्तः, तत्परतन्त्र इत्यर्थः । त्यागः प्रारब्धकर्मपरित्यागः । यथा—'अनारतं तेन पदेषु लम्भिताः' इति[7] (किरा. १. १५) । नियोगे यथा—आज्ञापयति देवः इति । भूषायां यथा—आभरणमिति । संभाषणे यथा—आलपति, भाषत इत्यर्थः । आलेख्ये यथा—आलिखति । आभिमुख्ये यथा—आगच्छति । आक्रमणं व्यापनम् । यथा—आरोहति धूमो हर्म्यतलम् । आक्रमते नीहार इति । वृत्तौ यथा—वृद्ध्याजीवो वार्धुषिकः । आवृत्तिर्निवृत्तिः । यथा—[8]आवर्तते वनान्तात् । पुनः पुनः क्रियायामभ्यास आवृत्तिः । यथा—आवृत्तशास्त्रः । प्रापणे यथा—अन्तर्वेदि हवींष्यासादयति । आज्यमासादयति[9] । प्रतिश्रवणं प्रतिज्ञातम्[10] । यथा—'आश्रुतं प्रतिज्ञातम्' इति गतम् (२, पृ. १५०) । वेदमपौरुषेयमास्थिषत भाट्टाः । आश्रृणोति, प्रतिजानीत इत्यर्थः । विस्तृते विस्तारे यथा—आयामः । विस्रम्भो विश्वासः । यथा—आश्वस्तमित्रजन इति । अभितो विधानं कार्त्स्न्येन करणमित्यर्थः । यथा—दर्भानालुनाति, समन्ततो लुनातीत्यर्थः । उद्योगे यथा—आरभते । संभ्रमस्त्वरा । यथा—आवेगः, आग्रहः । अभ्यवहारे यथा—आचामति, आस्वादयति । स्थाने यथा—आधारः । आवरणं तिरोधानकरणम् । यथा—आवृणोति । आह्वाने यथा—आकारयति । आध्मा आध्मानं पूरणमित्यर्थः । यथा—आध्मातशङ्ख इति । पूजायां यथा—[11]आराधयति शिवम् । श्रमे यथा—आयासयति[12] । उक्तौ यथा—आचष्टे सम्यग् भाषणम् । [13]सांमुख्येन भाषणं संभाषणम्, उक्तिस्तु भाषणमित्यनयोर्भेदः । दुःखे यथा—आतङ्क आपन्नः । आनन्दे यथा—'आपृच्छस्व प्रियसखममुम्' इति (मेघ. १. १२) । संचयः संग्रहः । यथा—गोमयानाचिनोति । एवं प्रयोगानुपलक्ष्योपसर्गद्योत्या अर्था द्रष्टव्याः ॥ २३९ ॥

[1] Tj1, Tj2 omit नित्यम्. [2] आपाण्डुरीभूत° Gm1, Gm3. [3] आङीष-

दर्थेऽभिविधौ ' इति विवरणाभिमतः पाठः. [4] ' ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः ' इति शाकुन्तले चतुर्थाङ्के. [5] B_6 adds भूमौ. [6] ' वायव्यं श्वेतमालभेत भूतिकामः ' B_6 (शाबरभाष्येऽपि दृश्यते १०. २. ६८). [7] Tj_2 adds भारविः. [8] आववृते Gm_1; आवर्तमानं वनिता वनान्तात् (रघु. २. १९). [9] आनयति Tj_2. [10] प्रतिज्ञानम् Tj_2. [11] आधावति B_6. [12] आयासः B_6. [13] आभिमुख्येन Gm_1.

(पा.) अव्ययाः परे। हान्तवर्गादुपरि[1] वक्ष्यमाणाः शब्दा अव्यया भवन्ति ।। आङीषदर्थे—धातुयोगजे । ईषदर्थे—आपिङ्गला गौः । [2]अभिव्याप्तौ—आजन्मब्रह्मचारी । सीमार्थे— [3]ओदकान्तं प्रियमनुव्रजेत् । धातुयोगजे— [4]आहरति ।। २३९ ।।

[1] °वर्गोपरि A_1. [2] अभिव्याप्त्यर्थे A_1. [3] ओदकात् पान्थमनुव्रजेत् B_3, C_1; ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः इति शाकुन्तले चतुर्थाङ्के. [4] आहरत्यर्धम् C_1.

आ प्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात् कोपपीडयोः ।
पापकुत्सेषदर्थे कु धिग्निर्भर्त्सननिन्दयोः ।। २४० ।।

(वि.) आ प्रगृह्यः स्मृतौ वाक्ये चाः कोपे तापपीडयोः ।
पापकुत्सेषदर्थे कु धिङ निर्भर्त्सननिन्दयोः ।। 524 ।।

वाक्येऽपि ।[1] वर्तत इति शेषः । स्मृतौ यथा—आ एवं किल तत् । वाक्ये यथा—आ एवं नु मन्यसे ।। कोपे यथा—' आः किमेतत् इति क्रोधात् ' (देवीमा. २. ३६)। तापे यथा—आः [2]क्वासि प्रिये। पीडायां यथा—आः कष्टं वर्तते ।। कु, पापार्थे यथा—त्यजेत् कुजनसंगम् । कुत्सायां यथा—कुभोजनम् । ईषदर्थे यथा—कोष्णम्, कदुष्णम्, कवोष्णम्[3] ।। धिक्, निर्भर्त्सने यथा—धिग् जाल्मम्[4] । निन्दायां यथा —' धिगिमां देहभृतामसारताम् ' इति (रघु. ८. ५१) ।। २४० ।।

[1] प्रगृह्यः आ स्मृतौ वाक्ये च वर्तते K_4, K_5. [2] क्वापि K_6. [3] J_2, K_2 omit कवोष्णम्. [4] जालानि K_2; जालान् K_4.

(विव.) आ प्रगृह्यः स्मृतौ वाक्येऽपि। आ इत्ययं निपातः स्मरणे वाक्ये च वर्तते। स्मृतौ यथा—आ एवं किल तत् इति। पूर्वोदितादर्थादन्यथात्वद्योतनाय वाक्यान्तरस्यादौ आकारः प्रयुज्यते। यथा—आ एवं नु मन्यसे इति। पूर्वं

नैवममंस्थाः, अधुना प्रकारान्तरेण मन्यस इति तस्यार्थः। वाक्ये वाक्यालंकारे इत्यपरे। यथा—आ अद्य स्वादिष्ठं भोजनं लब्धम् इति।

'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यास्मरणयोरङित्॥'

इति हरदत्तः (पदम. १, पृ. ११३[1])। ततश्च 'निपात एकाजनाङ्' (१. १. १४) इति प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि' (६. १. १२५) इति प्रकृतिभावः। अमरसिंहग्रन्थेऽपि प्रगृह्यसंज्ञाविधानस्य प्रकृतिभाव एव प्रयोजनमिति ज्ञेयम्॥ आस्तु स्यात् कोपपीडयोः। आः इति विसर्जनीयान्तो [2]निपातः प्रयोक्तुः क्रोधे पीडायां च वर्तते। क्रोधे यथा—'आः किमेतदिति क्रोधादाभाष्य महिषासुरः' इति (देवीमा. २. ३६)। आः कष्टं वर्तते इति पीडायाम्॥ पापकुत्सेषदर्थे कु। पापे यथा—'त्यजेत् कुजनसंगमम्' इति। कुत्सायां निन्दायाम्। यथा—कुभोजनम्। ईषदर्थे यथा—कोष्णं, कवोष्णमिति। अत्र 'कवं चोष्णे' (६. ३. १०७) इति कुशब्दस्य कवादेशः॥ धिग् निर्भर्त्सननिन्दयोः। निर्भत्सने यथा—धिगिमं निष्ठुरालापमिति। निन्दायां यथा—'धिगिमां देहभृतामसारताम्' इति (रघु ८. ५१)॥ २४०॥

[1] कारिकेयं महाभाष्ये दृश्यते (१. १. १४). [2] निपातितः Gm1.

(पा.) आ प्रगृह्यः स्मृतौ वाक्येऽपि। [1]स्मृत्यर्थे—आ ज्ञातम्। जटायुरेषः। वाक्यपूरणे— आ एवं मन्यसे। प्रगृह्यत्वात् संधिर्न भवति॥ आस्तु स्यात् कोपपीडयोः। [2]कोपे—आः पाप। पीडायाम्—आः कष्टमापतितम्॥ पापकुत्सेषदर्थे कु। पापे—कुब्राह्मणः। कुत्सायाम्—कुदानम्। ईषदर्थे—कोष्णम्॥ धिग् निर्भर्त्सननिन्दयोः॥ २४०॥

[1] स्मृतौ B3, C1. [2] कोपार्थे A1.

चान्वाचयसमाहारेतरेतरसमुच्चये।
स्वस्त्याशीःक्षेमपुण्यादौ प्रकर्षे लङ्घनेऽप्यति॥ २४१॥

(वि.)　चान्वाचयसमाहारेतरेतरसमुच्चये ।
पादपूरणचेदर्थतुल्ययोगावधारणे ।। 525 ।।
विनियोगेऽपि हेत्वर्थे चानुबन्धेऽपि कथ्यते ।

अन्वाचये यथा––भिक्षामट, गां चानय इति । समाहारे यथा––छत्रोपानहम् । इतरेतरयोगे यथा––देवदत्तयज्ञदत्ताभ्यामिदं कार्यं कर्तव्यम् । समुच्चये––वसिष्ठं गौतम धर्ममगस्त्यं प्रणनाम [1]च । पादपूरणे यथा––' रामो रामश्च रामश्च बुद्धः [2]कल्कीति ते दश '* । चेदर्थे––' त्वं च [3]मां नयसे राजन्नागमिष्यामि सज्जितः ' इति । तुल्ययोगे यथा––त्वं चाहं च सखे गच्छावः । अवधारणे यथा––' वेलामतीता तव चेयमाज्ञा ' इति । विनियोगे यथा––पठ च पच च । हेत्वर्थे यथा––राजा च द्रष्टव्यः । अनुबन्धे यथा––त्वं च गच्छसि कार्यं नः सेत्स्यति ।।

स्वस्त्याशीःक्षेमयोः पुण्ये मङ्गले प्रतिवन्दने ।। 526 ।।

आशिषि––'स्वस्त्यस्तु ते'[4] (रघु. ५. १७) । क्षेमे यथा––स्वस्ति गच्छति । स्वस्ति पुनरागच्छति । पुण्ये यथा––स्वस्तिमान् स्वर्गमश्नुते । मङ्गले––स्वस्तिवाक्यं[5] ततः कुर्यात् । प्रतिवन्दने––राज्ञा नमस्कृता विप्राः स्वस्तीत्येते प्रयुञ्जते इति ।।

प्रकर्षे लङ्घने व्याधावतिदेशे च पूजने ।
दुर्नये यापने नाशे निर्बन्धानर्थशङ्कयोः ।। 527 ।।
अनुबन्धानुज्ञयोः स्यादधिक्षेपापहासयोः ।
आरोपणे चाप्युपधावतिशब्द उदाहृतः ।। 528 ।।

प्रकर्षे यथा––' पूर्वान् महाभाग तयातिशेषे ' (रघु. ५. १४) । लङ्घने––[6]' अतीतकालस्त्वहमभ्युपेतः ' (रघु. ५. १४) । व्याधौ––अतिसारेण पीडितः । अतिदेशे––अतिदिशति । पूजने––अतिस्तुतो मया विप्रः । दुर्नये––अतिचरति । यापने––गाढपङ्कमतिवाहितातपः[7] । नाशे––' वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ' इति (रघु. १३. ७७) । निर्बन्धे––यद्वं ब्रह्मचारिन् प्राणमत्यप्रक्षः[8] । अनर्थशङ्कायाम्––मा ते ऽत्याहितमङ्गने । अनुबन्धे––अतिगृह्णाति मां संख्या[9] । अनुज्ञायाम्––अतिसृजति भोजनाय । अधिक्षेपे––[10]स्वाम्यधिक्षिपति प्रजाः । अपहासे––स्यालान्

देवोऽतिहसति[11] । आरोपणे—अत्यादधति पात्रेषु धनं कुशलबुद्धयः । उपधायाम्[12] —अतिसंधत्ते ।। २४१ ।।

[1] सः for च J2, K4. [2] कल्किस्तथैव च J2. [3] मानयसे K2, K3. [4] तव K3. [5] °वाच्यम् J2, K4. [6] व्यतीत° इति मु. ग्र. (पृ. ६३). [7] °वाहितातपाः K6. [8] अत्यप्रक्ष्यः K3, K6. [9] सख्या K5. [10] स्वामिन्यधिक्षिपति K5. [11] देवरोऽतिहसति K4. [12] उपधा K6. *Vārāh. P. (Apte's Dict. p. 245).

(विव.) चान्वाचय—समुच्चये । एकस्य प्राधान्ये सति अपरस्य [1]गुणीभावोऽन्वाचयः । यथा—भिक्षामट, गां चानय इति । अत्र भिक्षाटनं कुर्वाणो यदि गां [2]पश्यति तदा तामप्यानयति[3] । नो चेत् भिक्षाटनमेव करोति । न तु गामप्यन्विष्यानयतीति भिक्षाटनस्य प्राधान्यम् । गवानयनस्य गुणभावः चकारेणावगम्यते । इतरेतरशब्देनात्र इतरेतरयोगो लक्ष्यते । स च परस्परापेक्षाणां बहूनां द्वयोर्वा [4]परस्परभेदानुगमेन समुदायरूपतामापन्नानामेकस्मिन्नर्थेऽन्वये सति भवति । यथा—देवदत्तयज्ञदत्ताभ्यामिदं कार्यं कर्तव्यमिति, प्लक्षन्यग्रोधौ सह तिष्ठत इति उद्भूतावयवभेदत्वाद् द्विवचनमपि भवति । प्लक्षन्यग्रोधावित्यत्र साहचर्यवशात् प्लक्षशब्दो [5]न्यग्रोधार्थोऽपि भवति । न्यग्रोधशब्दश्च प्लक्षार्थोऽपि शब्दशक्तिमहिम्ना [6]समावेव समुदायार्थमाहतुः । न पृथग्भूतौ । ततश्च न प्लक्षानयनप्रसङ्गे न्यग्रोधानयनम् । नापि न्याग्रोधानयनप्रसङ्गे प्लक्षानयनम् । नाप्येकेनोक्तत्वात् परस्य प्रयोगानुपपत्तिः । प्लक्षशब्देन यावदर्थोऽभिधीयते तावान् न्यग्रोधशब्देनापीति द्व्यर्थत्वाद् द्विवचनमेव भवति । अतः समुदायान्न बहुवचनमित्यादिप्रपञ्चो महाभाष्यकारकैयटाभ्यां निरूपितोऽनुसंधेयः । परस्परसापेक्षाणामेवावयवभेदतिरोधानेन एकीभूतावस्थतया एकस्मिन् [7]प्रतिसंबन्धिनि संबन्धः समाहारः । यथा—छत्रोपानहम्, मार्दङ्गिकपाणविकम् इत्यादि । अत्र संहतेः प्रधानत्वाद् एकवचनमेव । इतरेतरयोगसमाहाररूपयोरर्थयोः 'चार्थे द्वन्द्वः' (२. २. २९) इति विहितस्य समासस्य वैकल्पितत्वाद् वाक्यमपि भवति । तस्माद् देवदत्तेन यज्ञदत्तेन च कर्तव्यम्, छत्रोपानहोश्च समाहार इत्यपि प्रयोगः । परस्परनिरपेक्षाणामनेकेषामेकस्मिन् संबन्धिसंबन्धः समुच्चयः । यथा—गौरश्वश्च महिषश्च देवदत्तस्येत्यादि । 'शं च मे मयश्च मे प्रियं च मे' इत्यादि (तै. सं. ४. ७. ३.१) । तथा एकस्मिन् द्रव्ये बह्वीनां क्रियाणां समुच्चयः । यथा—

'पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं[4] दिवः ।'

इति (शिशु. १. ५१) । अत्र य इति निर्दिष्टकर्तृभूतरावणरूपे द्रव्ये पुर्यवस्कन्दन-नन्दनलवनरत्नमोषणाप्सरोहरणरूपाणां क्रियाणां समुच्चयः । अत्र चशब्दप्रयोगा-भावेऽपि समुच्चयस्य गम्यमानत्वम् । अत एव 'समुच्चयेऽन्यतरस्याम्' (३. ४. ३) इति भूतलकारापवादेन लोट्प्रत्ययः । तथा गुणयोरपि क्वचित् समुच्चयः । यथा—पटान्तो रक्तः शुक्लश्चेति । शेषे—

'चण् चेदर्थे णकारेत्स्यादवधारणभेदयोः ।
पादस्य पूरणे हेतौ तुल्ययुग्विनियोगयोः ॥'

इति । यदा चेति निपातस्य णकार इत्संज्ञको भवति, तदा चेदर्थे वर्तत इत्यर्थः । तदुक्तम्—चण् चेदर्थ इति । यथा—त्वं च गच्छसि कार्यं नः सेत्स्यति इति; त्वं चेत् गच्छसि कार्यसिद्धिर्भविष्यतीत्यर्थः । णकारानुबन्धो निपातैर्यद्यदिह . . . चेत् चण् कच्चिद्यत्र युक्तमिति निघातप्रतिषेधार्थः । अवधारणे यथा—'अतीतः पन्थानं तव च महिमा वाङ्मनसयोः' इति (शिवमहिम्न. २) । भेदविशेषे यथा—स खलु त्वामनुवर्तते त्वं च निरपेक्षः इति । त्वं पुनर्निरपेक्ष इत्यर्थः । पादपूरणे यथा—'भीमः पार्थस्तथैव च' इति । हेतौ यथा—'न चान्यतस्तस्य शरीररक्षा' इति (रघु. २. ४) । यस्मात् तस्य दिलीपस्यान्यतः शरीररक्षणं नापेक्षितम्, अतोऽनु-यायिवर्गो निषिद्ध इत्यर्थः । तुल्ययोगे यथा—त्वं चाहं च गच्छावः । विनियोगे यथा—पठ च पच च ॥ स्वस्त्याशीःक्षेमपुण्यादौ । अविद्यमानार्थस्य प्रार्थनमाशीः । यथा—'स्वस्त्यस्तु ते' (रघु. ५. १७) । लब्धपरिपालनं क्षेमः । यथा—स्वस्त्येव गच्छति स्वस्ति पुनरागच्छति । 'भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते' (रघु. २. ४८) इति । पुण्ये यथा—

'सौवस्तिकानि कर्माणि सर्वदैव करोत्ययम् ।
. . . . स्वस्तिमान् स्वर्गमश्नुते ॥'

इति । आदिशब्दाद् मङ्गले यथा—स्वस्ति श्रीमदित्यादिकं संदेशपत्रिकासु । 'प्रास्थानिकं स्वस्त्ययनं प्रयुज्य' इति (रघु. २. ७०) ॥ प्रकर्षे लङ्घनेऽप्यति । प्रकर्षे यथा—अतिशेते । लङ्घने यथा—अतिक्रामति । शेषे—

'अतिः पूजातिक्रमणातिदेशव्याधियापने ।
आरोपणे च निर्बन्धे विनाशानुज्ञयोरपि ॥'

इति । पूजायां यथा—[9]स्वती पूजायाम् ('स्वतिभ्यामेव' पा. ५. ४. ६९) । अतिक्रमणे यथा—'अतिरतिक्रमणे च' (१. ४. ९५) । एकत्रोपदिष्टानां धर्माणामन्यत्र सद्भावकथनमतिदेशः । यथा—[10]'प्रकृतिधर्माणां विकृतावतिदेशः' इति । व्याधौ यथा—अतिसारेण पीडितः इति । यापने यथा—कालमतिवाहयति । आरोपणे यथा—उद्घने काष्ठमत्यादधाति । निर्बन्धने यथा—मा स्म गुरूनतिपृच्छ, निर्बन्धेन मा प्राक्षीरित्यर्थः । विनाशे यथा—अतीतो देवदत्तः । अनुज्ञायां यथा—प्रत्यातिसृज होष्यामि अतिसृष्ट उद्धरे जुहुयात् इति । अपिशब्दाद् भये यथा—अत्याहितम् । कपटे यथा—अतिसंधत्ते ॥ २४१ ॥

[1] गुणभावः Gm1, Gm3. [2] पश्यसि Tj2. [3] आनयेति Tj2. [4] परस्पराभेद° Gm1. [5] न्यग्रोधोऽपि भवति Tj2. [6] समुदितावेव समुदायमाहतुः Gm1, Tj2. [7] प्रतिबन्धिनि Tj2. [8] अहर्निशं Tj2, Tv. [9] 'अतिरतिक्रमणे' इत्यत्र अतिशब्दः अतिक्रमणे, चकारात् पूजायां च इति काशिका (१, पृ. ८१) 'पूजायां स्वतिग्रहणं कर्तव्यम्' इति वार्तिकं काशिकायाम् (२, पृ. ६४). [10] 'अतिदेशो नाम ये परत्र विहिता धर्मा तानतीत्यान्यत्र तेषां देशः' शाबरभाष्यम् (७. १. १२).

(पा.) चान्वाचय—समुच्चये । अन्वाचये—भिक्षामट गां चानय । अन्वाचयो यत्रैकः प्राधान्येनाभिधीयते, अपरो गुणभावेनेति । अत्र भिक्षाटनं प्रधानम्, गवानयनमुपसर्जनम् । समाहारे—गोवलीवर्दौ[1] । इतरेतरे—प्लक्षन्यग्रोधौ । आविर्भूतावयवभेदः इतरेतरः,[2] तिरोहितावयवभेदः समाहार इति तद्भेदः । समुच्चये—गावश्च वत्साश्च[3] गच्छन्ति ॥ स्वस्त्याशीः क्षेमपुण्यादौ । आदिशब्दाद् मङ्गलेऽपि स्यात् । 'स्वस्ति [4]मङ्गलनिष्पापक्षेमेष्वाशीर्वचस्यपि' इति वैजयन्ती (पृ. २८६, श्लो. २९) ॥ प्रकर्षे लङ्घनेऽप्यति । अपिशब्दात् प्रशंसायामपि स्यात् । 'अतिः प्रकर्षप्रशंसालङ्घनेषु प्रयुज्यते' इति जयकोशः[5] ॥ २४१ ॥

[1] °बलीवर्दम् B3. [2] C1 adds °योगः. [3] वत्सश्च गच्छति A1. [4] °निष्पाव° B3. [5] A1 omits °कोशः.

स्वित् प्रश्ने च वितर्के च तु स्याद् भेदे ऽवधारणे ।
सकृत् सहैकवारे चाप्याराद् दूरसमीपयोः ।। २४२ ।।

(वि.) वितर्कप्रश्नयोश्चैव स्विदव्ययमुदाहृतम् ।

वितर्के यथा—'अधःस्विदासीदुपरि स्विदासीत्' (ऋग्वेद. १०. १२९. ५) । प्रश्ने—'कः[1] स्विदेकाकी चरति' (तै. सं. ७. ४. १८. ३) ।।

भेदावधारणार्चासु तु हेतौ पादपूरणे ।। 529 ।।

[2]भेदविशेषे यथा—पूज्या गौः, कपिला तु पूज्यतरा । अवधारणे—वेदास्तु प्रमाणम् । अर्चायाम्—विद्वांस्तु द्विजमुख्यानाम् । हेतौ—पात्रं विप्रः श्रोत्रियस्तु । पादपूरणे—ततस्तं रामचन्द्रस्तु ।।

सकृत् सहैकवारे चाप्याराद् दूरसमीपयोः ।

सहार्थे—देवदत्तयज्ञदत्तौ सकृद्भुञ्जाते । एकवारे—[3] 'सकृदंशो निपतति' (म. स्मृ. ९. ४७) ।। आरात् । दूरे यथा—आराद्गता[4] दृष्टिपथं व्यतीता । समीपे यथा—'तमर्च्यमारादभिवर्तमानम्' (रघु. २. १०) ।। २४२ ।।

[1] सरस्वतीकण्ठाभरणे (पृ. ३५) इति (*Ak.* POS 43, p. 333). [2] K_5 omits 3 lines. [3] सकृत्पुत्रम् K_4, K_5. [4] °गतः, व्यतीतः J2; आराद्रथः K_5.

(विव.) स्वित् प्रश्ने च वितर्के च । प्रश्ने यथा—'कः स्विदेकाकी चरति' (तै. सं. ७. ४. १८. ३) । वितर्के यथा—'अधः स्विदासीदुपरि स्विदासीत्' (ऋग्वेद. १०. १२९. ५) इति ।। तु स्याद् भेदेऽवधारणे । भेदे[1] यथा—'सेवया तु कलौ युगे' इति । अवधारणे यथा—'तत्तु समन्वयात्' (ब्र. सू. १. १. ४); 'वेदास्तु प्रमाणम्' इति च । शेषे—'त्वर्चाहेत्वोः पादपूर्तौ' इति । अर्चा पूजा । यथा—'वेदाढ्यस्तु द्विजातीनाम्' इति । हेतौ यथा—'दिशस्तु जलदैश्छन्ना भवित्री वृष्टिसंहतिः' इति । यस्माद् मेघैर्दिशश्छन्ना अतो वृष्टिर्भविष्यतीत्यर्थः । पादपूरणे यथा—'ततस्तु धर्मराजं तम्' इति ।। सकृत् सहैकवारे चापि । सहार्थे यथा—[2]दम्पती सकृद्भुञ्जाते । सहभुञ्जाते इत्यर्थः । एकवारे यथा—'सकृत् प्रदीयते कन्या' (म. स्मृ. ९. ४७) । अपिशब्दात् सर्वदेत्यर्थे यथा—

[3]सकृत्तरुणा देवाः; सर्वदा युवान इत्यर्थः। आराद् दूरसमीपयोः। दूरे यथा—'आरात्तेऽग्निरस्त्वारात्[4] परशुरस्तु ते' इति (आपस्तम्बमन्त्रपाठः १. १३. ७)। समीपे यथा—'आरादागतमृत्यवः' इति ॥ २४२ ॥

[1] Tv adds विशेषे. [2] दम्पती असकृद्भुङ्क्ते B6. [3] 'सकृद्युवानो गीर्वाणाः' इति स्वामी (पृ. ३३२). [4] आरात्ते Tj2.

(पा.) स्वित् प्रश्ने—अवधारणे [1]'हेतुव्यावृत्तिपूजासु तथा पादस्य पूरणे' इति क्वचित् पाठः ॥ सकृत् सहैकवारे चापि। [2]सदैकवारे इति क्वचित् पाठः। आराद्दूरसमीपयोः ॥ २४२ ॥

[1] A1 omits the line. [2] B3, C1 omit the sentence.

प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः।
पुनःसदार्थयोः शश्वत् साक्षात् प्रत्यक्षतुल्ययोः ॥ २४३ ॥

(वि.) प्रतीच्यां चरमार्थे च पश्चादव्ययमुच्यते ॥ 530 ॥

प्रतीच्यां [1]यथा—पश्चादस्तं गतो रविः। चरमार्थे यथा—'पश्चिमे वयसि नैमिशं[2] वशी' इति (रघु. १९. १) ॥

अप्यर्थपादपूर्त्योश्च समुच्चयविकल्पयोः।
पक्षान्तरप्रश्नयोरप्युताव्ययमुदाहृतम् ॥ 531 ॥

अप्यर्थे[3] यथा—उत भिन्द्याच्छिरसा शिलोच्चयम्। पादपूर्तौ—अब्रवीदुत रावणम्। समुच्चये—सुशेवो[4] बलवानुत। विकल्पे—[5]'जायामदोषामुत संत्यजामि' (रघु. १४. ३४)। पक्षान्तरे—'अजीजनत् सिन्धुरुतावमन्थ्यः'[6]। प्रश्ने—'उत येन बिभर्षि तत्' (कु. सं. ६. २३) ॥

सहार्थे पुनरर्थे च सदार्थे शश्वदुच्यते।

सहार्थे यथा—दम्पती शश्वद् भुञ्जाते। पुनरर्थे—'शश्वत् पश्यत शब्दवार्धिलहरी विद्योल्वणं दौल्वणम्'। सदार्थे—'शश्वद् दाता सुखं वसेत्' इति ॥

प्रत्यक्षतुल्ययोः साक्षादव्ययं समुदाहृतम् ॥ 532 ॥

प्रत्यक्षे—'श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्' इति (कु. सं. ७. ४३)। [7]तुल्ये—'स्कन्देन साक्षादिव देवसेनाम्' इति (रघु. ७. १)॥ २४३॥

[1] K5 adds पाश्चात्यभागमिह. [2] नैमिषमिति मु. ग्र. (पृ. ३३७). [3] K5 adds बाढार्थे. [4] सुग्रीवः J2; सुरे वा K3. [5] जयाम दोषानुत K5; संययामि K6. [6] उतामृतं द्यौः K4. [7] तुल्यार्थे J2.

(विव.) **प्रतीच्यां चरमे पश्चात्। प्रतीच्यां यथा—पश्चादस्तं गतो रविः। चरमे यथा—श्रोत्रियेभ्योऽतिथिभ्यश्च पूर्वं दीयतां पश्चादितरेभ्यः इति[1]॥ उताप्यर्थविकल्पयोः। अप्यर्थे समुच्चये यथा—'नमस्तेऽस्तु धन्वने बाहुभ्यामुत ते नमः' (तै. सं. ४. ५. १. १)। विकल्पे यथा—'पारिव्राज्यमुत ग्राह्यमुत राज्यं नृणां सुखम्' इति। शेषे—'वितर्केऽपि भवेदुत' इति। वितर्के यथा—स्थाणुरुतायं पुरुष इति। [2]पादपूरणे यथा—'अब्रवीदुत राघवम्' इति। प्रश्ने यथा—[3]उत पठसि॥ पुनः[4]सदार्थयोः शश्वत्। पुनरर्थे यथा—शश्वदुदकं पिबति। सदाशब्दस्यार्थे यथा—शाश्वतः, सदातन इत्यर्थः। शेषे—'स्यात् शश्वत् सहसंतते[5]' इति। सहार्थे यथा—दम्पती शश्वद् भुञ्जाते। सहभुञ्जाते इत्यर्थः। संततं विच्छेदरहितम्। यथा—'वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम्[6]' इति रघुवंशे (१. ८८)[7]॥ साक्षात् प्रत्यक्षतुल्ययोः। प्रत्यक्षे यथा—'साक्षाद्[8] दृष्टोऽसि' इति (कु. सं ६. २२)। तुल्ये यथा—साक्षाद् महाराजोऽयम्; महाराजतुल्योऽयमित्यर्थः॥ २४३॥**

[1] 'पश्चात्' (५. ३. ३२) इत्यनेनावरस्य सप्तमीपञ्चमीप्रथमान्तस्य निपातितः इति भा. दी. (पृ. ५०८); अपरस्य पश्चभाव आतिश्च प्रत्ययः इति काशिका (२, पृ. ६३). [2] पादस्य B6. [3] ऊयसे स्म। 'उङ शब्दे'। क्तः इनि भा दी. (पृ. ५०८). [4] °सहार्थयोः इति पाठः—स्वामी (पृ. ३३२), भा. दी. (पृ. ५०८). [5] °संगते B5, B6. [6] आत्मानं गमनेऽनु गाम् Tj2. [7] शशति। 'शश प्लुतगतौ'। बाहुलकाद्वत् [शश्वत्] इति भा. दी. (पृ ५०८). [8] सहाक्षेण साक्षः। तमतति। क्विप् (भा. दी. पृ. ५०८).

(पा.) प्रतीच्यां चरमे पश्चात्। अनन्तरार्थे च स्यात्। 'चरमेऽनन्तरे पश्चात्' इति गोपालितः[1]॥ उताप्यर्थविकल्पयोः। [2]अप्यर्थः। प्रश्नः। 'उत प्रश्ने वितर्के स्यादुताप्यर्थविकल्पयोः' इति विश्वः (पृ. १८७, श्लो. १७)॥ पुनः-[3]सदार्थयोः—प्रत्यक्षतुल्ययोः॥ २४३॥

[1] बोपालितः (?). [2] B_3 omits. [3] सहार्थयोः B_3, C_1.

खेदानुकम्पासंतोषविस्मयामन्त्रणे बत ।
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥ २४४ ॥

(वि.) खेदानुकम्पासंतोषविस्मयामन्त्रणे वत ।

खेदे यथा—'त्यजत [1]मानमलं वत विग्रहैः' इति (रघु. ९. ४७) । अनुकम्पायां यथा—'मा रोदीर्बत पुत्र त्वं मोदकान्[2] प्रददामि ते' इति । संतोषे यथा—'वत [3]मुक्तास्मि किल्बिषात्' इति । विस्मये यथा—'अहो बतासि स्पृहणीयवीर्यः' इति (कु. सं. ३. २०) । आमन्त्रणे यथा—'बत पुत्र [4]सतां सङ्गं कुरु नित्यमतन्द्रितः' इति ॥

आमोदे च विषादे च [5]वाक्यारम्भानुकम्पयोः ॥ 533 ॥
दाननिश्चययोश्चैव हन्ताव्ययमुदाहृतम् ।

आमोदे यथा—'हन्त जीविताः स्मः' इति (स. कण्ठा. पृ. ३२) । विषादे यथा—'हन्त जातमजातारेः प्रथमेन त्वयारिणा' इति (शिशु. २. १०२) । वाक्यारम्भे यथा—'हन्त ते कथयिष्यामि' इति (भ. गी. १०. १९) । अनुकम्पायां यथा—'मा रोदीर्हन्त पुत्रक' इति । दाने यथा—'इदं [6]मनुष्येभ्यो हन्त' इति (स. कण्ठा. पृ. ३२) । निश्चये यथा—'हन्त भोक्ष्यावः' इति ॥ २४४ ॥

[1] मानबलं K_3. [2] दास्यामि तव मोदकान् K_2, K_4. [3] मुक्ताः स्म J_2, K_2. [4] सदा K_6. [5] वाच्यारम्भ° K_4. [6] मानुषेभ्यः K_5.

(विव.) खेदानुकम्पा—आमन्त्रणे बत । खेदे यथा—'बत कष्टां वशां गतोऽसि' इति । अनुकम्पायां यथा—'बत बुभुक्षितासि' इति । संतोषे यथा—'बत दृष्टा प्रिया' इति । विस्मये यथा—'बत बाल[1] प्रगल्भसे' इति । आमन्त्रणं संबोधनम् । यथा—'बत[2] वितरत तोयं तोयवाहा हिमान्तम्' इति । हे मेघाः सेतोरारभ्य हिमाचलावधि तोयं मुञ्चत इत्यर्थः ॥ हन्त हर्षे—विषादयोः । हर्षे यथा—हन्त लब्धजीवनाः स्मः इति । अनुकम्पायां यथा—मा रोदीर्हन्त पुत्रक इति । वाक्यारम्भे यथा—'हन्त ते कथयिष्यामि' इति (भ. गी. १०. १९) ।

विषादे यथा––हन्त वृथा यत्नः कृतः इति। [3]हन्तेति निपातो दानेऽपि। यथा––भूरियं हन्तकार इति। मनुष्येभ्यो दीयमानमन्नं हन्तकार इत्यर्थः ॥ २४४ ॥

[1] बालः प्रगल्भते B6. [2] वयते स्म। 'वय गतौ'। 'गत्यर्था––'इति क्तः। नेट्। वन्यते स्म। 'वनु याचने'। क्तः इति भा. दी. (पृ. ५०६). [3] हन्ति। बाहुलकात्तः इति भा. दी. (पृ. ५०६).

(पा.) खेदानुकम्पा––वत। हन्त–– विषादयोः ॥ २४४ ॥

प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः।
इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु ॥ २४५ ॥

(वि.) वीप्सायां च प्रतिनिधौ लक्षणप्रतिदानयोः ॥ 534 ॥
इत्थंभूतस्य चाख्याने प्रति भागे च कथ्यते।

वीप्सायां यथा––वृक्षं वृक्षं प्रति [1]सिञ्चति (काशिका. १, पृ. ८०)। प्रतिनिधौ यथा––पुत्रो जनकतः प्रति इति[2]। लक्षणे यथा––' वृक्षं प्रति विद्योतते विद्युत्' इति (काशिका १. ४. ९०)। प्रतिदाने यथा––चणकानस्मै गोधूमेभ्यः प्रति यच्छति इति। इत्थंभूताख्याने यथा––साधुः पुत्रो देवदत्तं प्रति। भागे यथा––[3]यद्दत्तं मां प्रति स्यादिति ॥

इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु[4] ॥ 535 ॥
एवमर्थे वक्ष्यमाणविचारे नियमे तथा।

हेतौ यथा––' सहसोद्वेगमियं व्रजेदिति' इति (रघु. ८. ७)। [5]प्रकरणे यथा––' इति शत्रुषु चेन्द्रियेषु च' इति (रघु. ८. २३)। प्रकर्षे यथा––इति पाणिनिशब्दः इति[6]। समाप्तौ यथा–इति द्वितीयवर्गः इति[7]। एवमर्थे यथा––' इति ब्रुवन्तं तमुवाच स व्रती' इति (शिशु. १. ३१)। वक्ष्यमाणविचारे यथा––' स्तुतिरिति जगदे हरेः सूनुना' (किरा. १८. २१) इति। नियमे यथा––' आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती' इति (शिशु. २. ३०) ॥ ॥ २४५ ॥

[1] प्रतिवृक्षं K5. [2] अभिमन्युरर्जुनतः प्रति इति काशिका (१, पृ. ८०). [3] यदत्र K5, K6. [4] प्रकारादि° K3, K6. [5] प्रकारे K6. [6] पाणिनिशब्दः प्रकर्षात् प्रसिद्ध इत्यर्थ इत्यपि स्वामी (पृ. ३३३). [7] 'अ अ इति' (८. ४. ६८) इति स्वामिदत्तमुदाहरणम्.

(विव.) प्रति प्रतिनिधौ—प्रयोगतः। मुख्यसदृशः प्रतिनिधिः। यथा—'अभिमन्युरर्जुनतः प्रति' (काशिका १.४.९२)। अभिमन्युरर्जुनसदृश इत्यर्थः। मुख्यसदृशतया प्रतिनिधीयत इति प्रतिनिधिशब्दस्यापि प्रतिशब्दसामर्थ्यलभ्यम्। सामर्थ्यमेव प्रवृत्तिनिमित्तमत्र। अत्र प्रतिनिधिशब्दग्रहणम् [1]एकसूत्रोपात्तस्य प्रतिदानस्याप्युपलक्षणम्। तथा च पाणिनिसूत्रम्—'प्रतिनिधिप्रतिदाने च यस्मात्' (२.३.११) इति। प्रतिदाने यथा—'माषानस्मै तिलेभ्यः प्रति यच्छति' इति (काशिका १, पृ. ८०)। विनिमयसंप्रतिपत्त्या तिलान् गृहीत्वा माषान् ददातीत्यर्थः। नानाभूतानामर्थानां क्रियागुणाभ्यां युगपद् [2]व्याप्तुमिच्छा वीप्सा व्याप्तिरित्यर्थः। यथा—वृक्षं वृक्षं प्रति सिञ्चति (काशिका १, पृ. ८०)। द्विर्वचनमत्र प्रतिशब्दावयववीप्साभिव्यक्तचर्थम्। लक्षणं चिह्नम्। ज्ञापकमिति यावत्। यथा—वृक्षं प्रति विद्योतते विद्युत् (काशिका १.४.९०)। आदिशब्देन 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (१.४.९०) इति सूत्रोक्तयोः इत्थंभूताख्यानभागयोर्ग्रहणम्। कंचित् प्रकारं प्राप्तः इत्थंभूतः। तस्याख्याने यथा—'साधु देवदत्तो मातरं प्रति' इति (काशिका १, पृ. ८०)। भागे यथा—यदत्र मां प्रति स्यात् स भागो दीयताम् इति। 'प्रतिनिधिप्रतिदाने च यस्मात्' (२.३.११), 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (१.४.९०) इति सूत्राभ्यां प्रतिशब्दः पूर्वोक्ते प्रतिनिध्याद्यर्थषट्के कर्मप्रवचनीयसंज्ञो भवति। 'प्रयोगतः' इत्यस्यायमर्थः। न केवलं सूत्रद्वयानुसारेणोक्ता एत[3] एव प्रतिशब्दस्यार्थाः, किं तु प्रयोगतो लोकप्रयोगानुसारेण अन्येऽप्यर्थाः, लक्षणादाविति आदिशब्देनैव संगृहीता इति। ते च शेषकारेण केचित् दर्शिताः—

'परिज्ञाने पदप्राप्तौ कालहृत्यां निवारणे।
व्यलीकाविष्कृतौ तुष्टौ सेवायां निष्क्रयेऽपि च॥
प्रोत्साहे चाविनाभावे विघ्नाङ्गीकारयोरपि।
व्यावर्तने विनिमये पुनरावर्तनेऽपि च॥
वैपरीत्ये विनिद्रत्वेऽपेक्षाप्रेक्षकयोरपि।
संक्षेपस्पर्धसादृश्ये स्वीकाराभ्यवहारयोः॥
उत्तरस्तोकयत्नेषु चोपसर्गः प्रति स्मृतः।'

इति। परिज्ञानादिष्वर्थेषु कर्मप्रवचनीयसंज्ञाया अभावे सति प्रतिशब्द उपसर्गसंज्ञको भवतीत्यर्थः। परिज्ञाने यथा—प्रतिदीयते, प्रतिपद्यते। पदप्राप्तौ यथा—

प्रतितिष्ठति । कालहरणे यथा—प्रतीक्षते, प्रतिपालयति । निवारणे यथा—प्रतिषेधति । व्यलीकाविष्कृतौ यथा—प्रतिभिनत्ति, प्रत्युपलभते । तुष्टौ यथा—प्रतिनन्दति, प्रतीतः । सेवायां यथा—प्रतिश्रयते । निष्क्रये यथा—प्रत्युपकुरुते, प्रतियातयति, प्रतिमुञ्चति । प्रोत्साहे यथा—होत्रे[4] प्रतिगृणाति (सि. कौ. १. ४. ४१) । अविनाभावे यथा—धूमोऽग्निना प्रतिबद्धः, व्याप्त इत्यर्थः । विघ्ने यथा—प्रतिबध्नाति । अङ्गीकारे यथा—प्रतीच्छति, प्रतिशृणोति । व्यावर्तने यथा—प्रत्यावर्तते, प्रतिगच्छति । विनिमये यथा—प्रतिददाति, प्रतिलभते । स्वत्वनिवृत्तिपरस्वापत्तिपर्यन्तं प्रतिदानं विनिमयार्थः । व्यत्ययमात्रमिति प्रतिदानविनिमययोर्भेदः । पुनरावर्तने यथा—प्रत्यारभते, प्रत्युज्जीवति । वैपरीत्ये यथा—प्रत्यवतिष्ठते । विनिद्रत्वे यथा—प्रतिबुध्यते निशात्यये । [5]अपेक्षायां यथा—प्रतिजागरः[6] । प्रक्षेपे यथा—प्रतिवापः । संक्षेपे यथा—प्रत्याहरणम् । स्पर्धे यथा—प्रतिगर्जति । सादृश्ये यथा—प्रतिमानं, प्रतिबिम्बम् । स्वीकारे यथा—प्रतिगृह्णाति । अभ्यवहारे यथा—प्रत्यवस्यति । उत्तरे यथा—प्रतिब्रूते । स्तोकेऽल्पे यथा—सूपप्रति, शाकप्रति (काशिका १, पृ. ८६) । 'सुप्प्रतिना मात्रार्थे' (२. १. ९) इति समासः । यत्ने यथा—भोक्तुं प्रतियतते । एवमभियुक्तप्रयोगानन्विष्य प्रतिशब्दस्यार्थान्तराण्युन्नेयानि[7] ॥

इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु । हेतौ यथा—चोर इति पलायते । प्रकरणं प्रकारः । यथा—गौरश्वः पुरुषो हस्तीति जातिः (म. भाष्य. १. १. १) । गवादिप्रकारा जातिरित्यर्थः । प्रकर्षे यथा—इति बोधायनोऽब्रवीत् इति । बोधायनो धर्मज्ञानप्रकर्षवान्, अतः तदुक्तमवश्यानुष्ठेयमिति तस्य तात्पर्यम् । आद्यर्थे यथा—'ज्वलितिकसन्तेभ्यो णः'[8] (३. १. १४०) । हेलालीलेत्यमी भावा इति च । समाप्तौ यथा—इति श्रीमद्रामायणे बालकाण्डे प्रथमः सर्गः । शेषे—

> '[9]इतिरुक्तार्थनिर्देशे मत्येवंनियमेषु च ।
> वक्ष्यमाणपरामर्शे विवक्षानियमेषु च ।'

इति । पूर्वोक्तवाक्यार्थस्य च निर्देशे कर्मत्वेन निर्दिश्यमानत्वे इत्यर्थः । अत्र वाक्यपरामर्शे यथा—'आश्रावयेति चतुरक्षरमस्तु । श्रौषडिति चतुरक्षरम् (तै. सं. १. ६. ११. १)' इति । वाक्यार्थपरामर्शे यथा—'गतोऽस्तमर्क इति' (भामह. २. ८७); सूर्यास्तकथनस्य संध्याकालो जात इत्यर्थः । मतौ बुद्धिविशेषे यथा—

इत्यापिशलिः; आपिशलेर्मतमित्यर्थः ('वा सुप्यापिशलेः' ६. १. ९२)। एवमर्थे यथा—'इत्युक्तवन्तं व्रज साधयेति प्रमाणयन् वाक्यमजातशत्रोः' इति (किरा. ३. २४)। नियमो नाम योगान्ययोगयोर्व्यवच्छेदः। यथा—'सामान्यं द्विविधम्, परमपरं चेति' (तर्कसं. पृ. ७)। 'आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती' (शिशु. १. ३०) इति। वक्ष्यमाणपरामर्शे यथा—'रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच' इति (रघु. १३. १)। विवक्षानियमे यथा—'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१. १. ६६)। 'तस्मादित्युत्तरस्य' (१. १. ६७)। 'तदस्यास्त्यस्मिन्निति मतुप्' (५. २. ९४) इति ॥ २४५ ॥

[1] एतत्सूत्र° Tv. [2] व्याप्तिर्वीप्सा B6, Tj2. [3] अत एव Tv. [4] होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयति इति कौमुद्यां दृश्यते; होतुः प्रतिगृह्णाति B6. [5] अवेक्षायाम् Tv. [6] प्रतिज्ञादरः Tv. [7] प्राति। 'प्रा पूरणे'। प्रथते वा। 'प्रथ प्रख्याने'। बाहुलकाड्डुतिः इति भा. दी. (पृ. ५०९). [8] इतिशब्द आद्यर्थः इति काशिका (१, पृ. १७३) [9] एति। अयति वा। क्तिच् [इति] इति भा. दी. (पृ. ५०९).

(पा.) प्रति प्रतिनिधौ—प्रयोगतः। प्रतिनिधौ—प्रद्युम्नो [1]वासुदेवात् प्रति। 'प्रतिः[2] प्रतिनिधिप्रतिदानयोः' इति [3]पाणिनीयम् (१. ४. ९२)। प्रतिदानेऽपि स्यात्। 'माषानस्मै तिलेभ्यः प्रति यच्छति' (काशिका १, पृ. ८०)। 'लक्षणेनाभिप्रती आभिमुख्ये' (२. १. १४) इति आभिमुख्यार्थेऽपि स्यात्। आचार्यं प्रति कृताञ्जलिस्तिष्ठेत्। वीप्सायाम्—वृक्षं वृक्षं प्रति सिञ्चति (काशिका १, पृ. ८०)। लक्षणादौ—वृक्षं प्रति विद्योतते विद्युत् (काशिका (१. ४. ९०)। साधुर्देवदत्तो मातरं प्रति। यदत्र [4]मां प्रति स्यात् (काशिका १, पृ. ८०)। 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (१. ४. ८९) इति सूत्रात् पर्यनुशब्दावपि स्याताम्। 'अभिरभागे' (१. ४. ९१) इति [5]भागं विना अभिशब्दश्च स्यात्॥ इति हेतु—समाप्तिषु। हेतौ—हन्तीति पलायते। प्रकरणे—इति वक्ष्ये चित्रकथाम्। प्रकरणं प्रक्रमः[6] प्रस्ताव इति पर्यायाः। प्रकारे—लौकिकाः शब्दाः, शकुनिर्मृगो ब्राह्मण इति (म. भाष्य. १. १. १.)। एवंप्रकारा इत्यर्थः। 'प्रकाशादिसमाप्तिषु' इति पाठे—इति पाणिनिः। पाणिनेः ख्यातिरित्यर्थः। इति हरिशब्दः। प्रकाशत इत्यर्थः। आद्यर्थे—हेलालीलेत्यमी भावाः। समाप्तौ—'इत्यमरसिंहकृतौ'[7] (१, पृ. १८३)॥ २४५॥

[1] कृष्णात् B3, C1.　[2] प्रति A1.　[3] A1 omits.　[4] मातरं A1.　[5] B3, C1 add सूत्रात्; A1 adds वृक्षमभि विद्योतते इत्यादि.　[6] B3 omits प्र.　[7] A1 adds नामलिङ्गानुशासने (१. १२. ४५).

प्राच्यां पुरस्तात् प्रथमे पुरार्थेऽग्रत इत्यपि ।
यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ।। २४६ ।।

(वि.)　प्राच्यां पुरस्तात् प्रथमे [1]पुरार्थेऽग्रत इत्यपि ।। 536 ।।

प्राच्याम् यथा---'पौरस्त्यानेवमाक्रामस्तांस्ताञ्जनपदान् [2]जयी' इति (रघु. ४. ३४) । प्रथमे यथा---'पुरस्तात् क्रियते कर्म पश्चात् सिद्ध्यति तत्फलम्' इति । पुरार्थे यथा---'त्वया पुरस्तादुपयाचितो यः' (रघु. १३. ५३) इति । अग्रतोऽर्थे ---'नश्यत् पुरस्तादनुपेक्षणीयम्' इति (रघु. २. ४४) ।।

यावत्तावच्च साकल्ये ऽप्यवधारणमानयोः ।
भविष्यदर्थे सातत्येऽप्यवधावपि कथ्यते ।। 537 ।।

साकल्ये यथा---'यावत्कृतं तावदेव फलं [3]प्राप्नोति मानवः' इति । अवधारणे यथा---'यावदमत्रं[4] ब्राह्मणानामन्त्रयस्व' इति । माने यथा---'सप्ताश्वत्थस्य पत्राणि[5] तावत्सूत्रेण वेष्टयेत्' (या. स्मृ. २. ७. १०३) इति । भविष्यदर्थे 'यावद् भवत्याहितसायकस्य' (कु. सं. ३. ४) इति । सातत्ये यथा---'यावज्जीवमतन्द्रितः' इति । अवधौ यथा--- 'यावत् कुण्डिनमच्युतः[6]' इति ।। २४६ ।।

[1] पुरोऽर्थे K5.　[2] K5 omits latter half.　[3] आप्नोति K3, K4. [4] तावतः K5; यावन्त्यमत्राणि संभवन्ति पञ्च षड् वा तावत आमन्त्रयस्व (काशिका २. १. ८).　[5] पर्णानि J2, K4.　[6] अच्युत K4.

(विव.)　<u>प्राच्यां पुरस्तात्</u>---<u>अग्रत इत्यपि</u>। प्राच्यादिष्वर्थेषु पुरस्ताच्छब्दो वर्तते । तथा च <u>वोपालितः</u>[1]---'प्राच्यां पुरः [2]पुरस्तादग्रप्रथमव्यतीतेषु'[3] इति ।। <u>यावत्तावच्च</u>[4]---<u>मानेऽवधारणे</u> । साकल्यं सामस्त्यम् । यथा---यावत्कर्तव्यं तावत्कृतम् । साकल्येन कृतमित्यर्थः । अवधिः मर्यादा । यथा---'यावत् सस्यक्षेत्रं तावत् कण्टकीवृक्षैः परिवृतम्' इति । मानं प्रमाणम् । यावद्दत्तं तावद्भुक्तम्

(काशिका २. १. ८) । यत्प्रमाणं दत्तं तत्प्रमाणं भुक्तमित्यर्थः । अवधारणे यथा—'यावदमत्रं ब्राह्मणानामन्त्रयस्व' इति (काशिका १, पृ. ८६)। अमत्रसंख्ययैव ब्राह्मणा निमन्त्रणीयाः, न न्यूनाः नाधिकाश्चेत्यर्थः । 'तद्वल्गुना युगपदुन्मिषितेन तावत्' (रघु. ५. ६८) इति युगपदेवेत्यर्थः । शेषे—'भविष्यदर्थं सान्तत्यं यावदप्रतियुग्भवेत्' इति । तत्र प्रतियुक्च्छब्देन यावच्छब्दप्रतियोगित्वेन तावच्छब्दो विवक्षितः । तद्रहितः केवलो यावच्छब्दो भविष्यदर्थं सान्तत्यं चाभिदधातीत्यर्थः । भविष्यदर्थे यथा—'यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती' इति (कु. सं. ३. ४) ।। २४६ ।।

[1] बोपालितः Tj2; गोपालितः B6. [2] पूर्वस्मिन् । '—सप्तमी—' (५. ३. २७) इत्यस्तातिः । 'अस्ताति च' (५. ३. ४०) इति पुरादेशः इति भा. दी. (पृ. ५०६). [3] °प्रसिद्धेषु B5, B6. [4] यत्, तत्, परिमाणमस्य । 'तद्धिताः' (४. १. ७६) इति बहुवचनेनान्येऽनुक्ता अपि तद्धिता ज्ञापिताः । तेन डावतुः इति भा. दी. (पृ. ५०६).

(पा.) प्राच्यां पुरस्तात्—अग्रत इत्यपि । पुरार्थः अतीतः । अग्रतोऽर्थः[1] अग्रम् । 'प्राच्यां पुरः पुरस्तादग्रप्रथमव्यतीतेषु' इति गोपालितः[2] ।। यावत्तावच्च —अवधारणे ।। अनुक्तम्—

अहो वतानुकम्पायां खेदे संबोधनेऽपि च ।
पक्षात्मनोरनिर्देश्ये प्रकृतामर्शने च तत् ।। २४६ ।।

[1] B3 omits अर्थः. [2] बोपालित इति भा. दी. (पृ. ५०६).

मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।
वृथानिरर्थकाविध्योर्नानानेकविनार्थयोः ।। २४७ ।।

(वि.) अङ्गीकारेऽधिकारे च समुच्चयविकल्पयोः ।
मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ[1] ।। 538 ।।

अङ्गीकार यथा—'इद त्वदीयं [2]धनुरथेति ब्रूमः' इति । अधिकारे यथा—'अथ शब्दानुशासनम्' इति (महाभाष्य १. १. १.) । समुच्चये यथा—'दानं कुर्वथ भोजनम्' इति । विकल्पे यथा—'हन्मि लोकमथ[3] तं मखार्जितम्' इति (रघु. ११. ८४) । मङ्गले यथा—'अथ[4] वर्णान् प्रवक्ष्यामि' इति । अनन्तरे यथा—

'अथौषधीनामधिपस्य वृद्धौ' इति (कु. सं. ७. १)। आरम्भे यथा—'अथ परस्मैपदान्यारभ्यन्ते[5]' इति। प्रश्ने यथा—'अथ किं कार्यं कर्तव्यं वद' इति। कार्त्स्न्ये यथा—'अथातो[6] दर्शपूर्णमासौ व्याख्यास्यामः' इति (आप. श्रौत. १. १)। एष्वर्थेषु अथोशब्दोऽपि वर्तते॥

वृथा निरर्थकाविध्योर्नानानेकविनार्थयोः।

निरर्थके यथा—'प्रासादशृङ्गाणि वृथाध्यरोहत्[7]' इति। अविधौ यथा—'प्रपच्यते स नरके यो वृथालभते पशुम्' इति॥ नाना; अनेकार्थे यथा—'नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम्' (मेघ. १. ६५.) इति॥ [8]विनार्थे यथा—'नाना नारीं निष्फला [9]लोकयात्रा' इति॥ २४७॥

[1] मतः J2.　[2] धेनुमथेति भूयः K2, K6.　[3] लोकमुतेति मु. ग्र. (पृ. २३६).
[4] अथ शिक्षां प्रवक्ष्यामि इति पाणिनीयशिक्षा १.　[5] आरभन्ते K2, K5; Svāmin omits *ārabhante* (p. 333).　[6] अथ व्याकरणम् J2.　[7] अध्यरुक्षत् J2, K6.　[8] उभयार्थयोः इति क्वचित् पाठः J2.　[9] कामयात्रा K5.

(विव.) मङ्गलानन्तर—अथो अथ। मङ्गले यथा—'अथ वर्णसमाम्नायः' (तै. प्रा. १. १) इति।

'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥'

इति। आनन्तर्ये यथा—'अथ प्रजानामधिपः प्रभाते' इति (रघु. २. १)। आरम्भे यथा—'अथेदानीमेतन्निरूप्यते' इति। प्रश्ने यथा—'अथैकधेनोरपराधचण्डाद्[1] गुरोः कृशानुप्रतिमाद् बिभेषि' इति (रघु. २. ४९)। कार्त्स्न्ये यथा—अथ चुरादयः कथ्यन्ते इति। साकल्येन कथ्यन्त इत्यर्थः। शेषे—

'अङ्गीकारेऽधिकारे च समुच्चयविकल्पयोः।
मतान्तरेऽप्यथाथो च अन्वादेशे त्वथो इति॥'

इति। अङ्गीकारे यथा—'किं तार्किको भवानिति प्रश्ने अथेति ब्रूमः' इति। अधिकारे यथा—'अथ शब्दानुशासनम्' इति (महाभाष्य. १. १. १)। समुच्चये यथा—'ओदनं पचाथ'। सूपमपि पचनीयमित्यत्रैव प्रयोक्तुरभिप्रायः। नत्वा-

नन्तर्ये। विकल्पः संशयः। यथा—'शब्दः किं नित्यः, अथानित्यः' इति। मतान्तरे यथा—अथैवं मनुषे इति। एतेष्वर्थेषु अथो अथ इति द्वयं वर्तते। ततश्च अथो इत्यस्यापि उदाहरणानि द्रष्टव्यानि। अन्वादेशे त्वथो शब्द एवेति शेषः। यथा—[2]'इमं व्याकरणमध्यापय, [3]अथो एनं स्मृतीः' इति॥ वृथा निरर्थकाविध्योः। निरर्थके प्रयोजनशून्ये यथा—'प्रयुक्तमप्यस्त्रमितो वृथा स्यात्' (रघु. २. ३४) इति। अविधौ शास्त्रीयेतिकर्तव्यताराहित्ये यथा—'वसेत् स नरके घोरे यो वृथा-लभते पशुम्[4]' इति (या. स्मृ. १. ७. १८०)। [5]वृथा अविधिनेत्यर्थः। अथवा अविधिः क्रियाशून्यः, यथा—वृथावाक्य इति। उक्तार्थकरणशून्य इत्यर्थः॥ नानानेकविनार्थयोः। अनेकार्थे यथा—'तस्मान्नानारूपाः पशवः'[6] इति। बहुरूपा इत्यर्थः। विनार्थे यथा—'नाना[7] नारीं निष्फला लोकयात्रा' इति। गणरत्नमहोदधौ च 'विनानेकार्थयोर्नाना' इति (पृ. २३, अध्या. १. १७)। वक्ष्यति च—'पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने' इति (३. ४. ३)। 'नानानेकोभयार्थयोः' इति केचित् पठन्ति। तथा च विश्वप्रकाशे—[8]'नाना विनार्थेऽपि भवेन्नानानेकोभयार्थयोः[9]' इति (पृ. १८८, श्लो. ३२)॥ २४७॥

[1] °दण्डात् B6, Tj2. [2] 'इमं छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापय' इति काशिकायाम् (२. ४. ३४). [3] अर्थयते। 'अर्थ याच्ञायाम्'। बाहुलकात् डोः। 'अन्येभ्योऽपि ...' इति डः। पृषोदरादित्वाद्रलोपः इति भा. दी. (पृ. ५०६). [4] 'यो हन्त्यविधिना पशून्' इति चतुर्थः पादो मु. ग्र. (पृ. ५४). [5] वृणोति। वृणीते वा। 'वृञ् वरणे'। 'वृङ् संभक्तौ' वा। बाहुलकात् थाक् [वृथा] इति भा. दी. (पृ. ५०६). [6] 'नानारूपाः पशवो जायमानाः' इत्यथर्वसंहितायाम् (१४. २. २५). [7] नानानारीर्निष्फला योगयात्रा Tv. [8] नेति नाना। 'विनञ्भ्यां नानाञौ नसह' (५. २. २७) इति नञो नाञ्. [9] °उभयोरपि B5, B6.

(पा.) मङ्गलानन्तर—अथो अथ। [1]अथशब्दः संशयप्रथमयोरपि स्यात्। 'अथ कल्याणानन्तरसंप्रश्नारम्भसंशयाद्येषु[2]' इति गोपालितः॥ वृथा निरर्थकाविध्योः। निरर्थकं निष्कारणम्। 'वृथा निरर्थकाविध्योः' इत्यमरमाला॥ अनुक्तम्—

यथा सादृश्ययोग्यत्ववीप्सास्पर्धानतिक्रमे।
तथा समुच्चये सौम्ये परमार्थाभ्यनुज्ञयोः॥

नानानेकोभयार्थयोः ।। २४७ ।।

[1] B3 omits the word.　[2] °संशयादिषु A1.

नु पृच्छायां विकल्पे च पश्चात्सादृश्ययोरनु ।
प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु ।। २४८ ।।

(वि.)　पृच्छाविषादयोः पादपूरणोत्प्रेक्षयोरपि ।। 539 ।।
　　उपमायां वितर्के च नुशब्दः परिकथ्यते ।

पृच्छायां यथा—' कथं नु शक्योऽनुनयो महर्षेः '[1] इति (रघु. २. ५४) । विषादे यथा—'क्व नु मां त्वदधीनजीविताम्' इति (कु. सं. ४. ६) । पादपूरणे यथा—' अहिंसा नु परो[2] धर्मः ' इति । उत्प्रेक्षायां यथा—' व्यत्ययं विनिमयं नु वितेने ' इति (किरा. ६. ६०) । उपमायां यथा—' पद्मं नु [3]लपनं तस्या राजते हरिणीदृशः ' इति । [4]वितर्के यथा—' तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः '[5] इति (कु. सं. १. ४७) ।।

वीप्सायामानुपूर्व्ये च पश्चात्सादृश्ययोरनु ।। 540 ।।

वीप्सायां यथा—' वृक्षं वृक्षमनु सिञ्चति ' (काशिका १. ४. ९०) इति । आनुपूर्व्ये यथा—' ज्येष्ठानुगमनात् पूर्वम् ' इति (रघु. १२. ३५) । पश्चादर्थे यथा—अनुजः इति । सादृश्ये यथा—'आत्मानुरूपां विधिनोपयेमे ' इति (कु. सं. १. १८) ।।

आमन्त्रणेऽप्यनुज्ञायामवधारणपृच्छयोः ।
ननुशब्दोऽप्यनुनये क्षेपे परमतस्य च ।। 541 ।।

आमन्त्रणे यथा—' ननु नान्वेति हितः[6] प्रियः ' इति । अनुज्ञायां यथा— ननु गच्छामि । अवधारणे यथा—'त्वया नियम्या ननु दिव्यचक्षुषा ' इति (रघु. ३. ४५) । पृच्छायां यथा—नन्वभोजि । अनुनये यथा—नन्वधिष्ठाः । परमतक्षेपे यथा—ननु चैतत् कथं घटते इति ।। २४८ ।।

[1] J2, K2 add ' विश्राणनाच्चान्यपयस्विनीनाम् '.　[2] परमः J2.　[3] मुखमित्यर्थः; लवनम् K4.　[4] विकल्पे J2.　[5] J2 omits the latter half.　[6] हितं प्रिया K2, K4.

(विव.) नु पृच्छायां विकल्पे च। पृच्छा प्रश्नः। यथा—[1]'आ नो नु युवां न ह्रीमानि नो ह्रानि . . .' इति। विकल्पः संशयः। यथा—'स्थाणुर्नु पुरुषः' इति। 'पुरुषो नु कामिनीषु मदनो नु' इति। शेषे—

'प्रत्युक्तावुपमाने च विषादोत्प्रेक्षयोरपि।
नु पादपूरणे ज्ञेयो जिज्ञासायां समुच्चये॥'

इति। प्रतिवचने[2] यथा—'देवदत्त किं कटं कृतवानसि[3]' इति प्रश्ने 'अहं नु करोमि' इति प्रतिवचनम् (काशिका १, पृ. १९५)। 'नन्वोर्विभाषा' (३. २. १२१) इति भूतार्थे लट्। उपमाने यथा—'पद्मं नु लपनं तस्या राजते हरिणीदृशः' इति। विषादे यथा—'क्व नु मां त्वदधीनजीविताम्' इति (कु. सं. ४. ६)। उत्प्रेक्षायां यथा—'अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु' इति (किरा. ९. ७)। पादपूरणे यथा—'आख्यास्यामि नु ते वार्ताम्' इति। जिज्ञासायां यथा—'कथमिदं नु भवेत्' इति। समुच्चये यथा—'वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने' इति[4] (किरा. ९. ६०)॥ पश्चात्सादृश्ययोरनु। पश्चादर्थे यथा—अनुरथं पादातम्। सादृश्ये यथा—अनुसखि। उभयत्रापि 'अव्ययं विभक्ति . . . वचनेषु' (२. १. ६) इत्यव्ययीभावः। शेषे—

'अनु हीने लक्षणे च सह दैर्घ्यानुपूर्व्ययोः।
लक्षणेत्थंभूताख्यानभागवीप्सासमीपयोः॥
अथोपसर्गो विज्ञेयः सहपश्चाद्द्यासु सः।
अवबोधे चानुमतौ सादृश्ये सान्त्वसेवयोः॥
प्रश्ने चालोचनाचार आनुकूल्ये च मार्गणे।
आसक्तावानुपूर्व्यां च सातत्येच्छोपकारवत्॥
प्रोत्साहे चानुतापे च वासने च प्रसाधने।
अन्वये विनियोगे च॥

इति। हीने यथा—अनुशाकटायनं वैयाकरणाः (काशिका १. ४. ८६)। शाकटायनाद्धीना अन्ये वैयाकरणा इत्यर्थः। लक्षणं हेतुः। यथा—'शाकल्यस्य संहितामनु प्रावर्षत्' इति (काशिका १, पृ. ७९)। शाकल्यसंहिताहेतुनेत्यर्थः। सहार्थे यथा—

'नदीमन्ववसिता सेना' इति (काशिका १. ४. ८५)। नद्या सह संबद्धेत्यर्थः[5]। 'अनुर्लक्षणे' (१. ४. ८४), 'तृतीयार्थे' (१. ४. ८५), 'हीने' (१. ४. ८६) इत्यनोः कर्मप्रवचनीयत्वम्। तृतीयार्थे सहार्थे। दैर्घ्ये यथा—'अनुगङ्गं वाराणसी' (काशिका १, पृ. ८८) इति। गङ्गायामेन वाराणस्यायामो [6]लक्ष्यते। 'यस्य चायामः' (२. १. १६) इत्यव्ययीभावः। आनुपूर्व्येऽनुक्रमे यथा—'अनुज्येष्ठं प्रविशन्तु भवन्तः' (काशिका १, पृ. ८६) इति। ज्येष्ठानुपूर्व्येणेत्यर्थः। 'अव्ययं विभक्ति . . .' इत्यादिना (२. १. ६) अव्ययीभावः। लक्षणे यथा—'वृक्षमनु विद्योतते विद्युत्' (काशिका १, पृ. ८०) इति। इत्थंभूताख्याने यथा—'साधुर्देवदत्तो मातरमनु' इति (काशिका १, पृ. ८०)। भागे यथा—'यदत्र मामनु स्यात् स भागो दीयताम्' इति। वीप्सायां यथा—'वृक्षं वृक्षमनु विद्योतते विद्युत्' इति। 'लक्षणेत्थंभूत . . .' इत्यादिना (१. ४. ९०) कर्मप्रवचनीयत्वम्। सामीप्ये यथा—'अनुवनमशनिर्गतः' इति (काशिका १, पृ. ८८)। 'अनुर्यत्समया' (२. १. १५) इत्यव्ययीभावः। सहार्थे यथा—अनुप्लवते। पश्चादर्थे यथा—अनुवदति। दयायां यथा—अनुक्रोशति, अनुकम्पते। अवबोधे ज्ञाने यथा—अनुमिमीते, अनुभवति। अनुमतौ यथा—अनुजानाति। सादृश्ये यथा—अनुहरति पितुरश्वः। सान्त्वने यथा—अनुनयति। सेवायां यथा—अनुजीवति। प्रश्ने यथा—अनुयोगः। आलोचने यथा—अनुसंधानम्। आचारे यथा—अनुष्ठानम्। आनुकूल्ये यथा—अनुकूलः। अनुलोमः। मार्गणे यथा—अन्वेषणम्। आसक्तौ यथा—अनुरज्यते। आनुपूर्व्ये यथा—अनुक्रमः। सातत्ये यथा—संपत् संपदमनुबध्नाति। इच्छायां यथा—अनुरोधः। उपकारे यथा—अनुगृह्णाति। प्रोत्साहे यथा—होत्रे अनुगृणाति (काशिका १, पृ. ७०)। होतारं प्रोत्साहयतीत्यर्थः। 'अनुप्रतिगृणश्च' (१. ४. ४१) इति संप्रदानार्थत्वम्। अनुतापे यथा—अनुशेते, अनुतप्तः। वासने यथा—कर्पूरेणानुविद्धं जलम्। वासितमित्यर्थः। प्रसाधने यथा—अनुलिम्पति। अन्वये यथा—अनुषज्यते, अन्वेतीत्यर्थः। विनियोगे यथा—अनुशास्ति; इत्याद्युदाहरणीयम्[7]॥ प्रश्नावधारण—आमन्त्रणे ननु। प्रश्ने यथा—'ननु वर्णा नित्या अनित्या वा' इति। नन्वभोजि। अवधारणे यथा—[8]नन्वद्य गच्छामः। अनुज्ञायां यथा—ननु भोक्ष्यामि। 'नन्वित्यनुज्ञैषणायाम्' (८. १. ४३) इति सूत्रे काशिका। 'अनुज्ञैषणा अनुज्ञाप्रार्थनेत्यर्थः' इति (२, पृ. ३८३)। अननये यथा—नन्वधीष्व। आमन्त्रणे यथा—ननु भुङ्क्ष्व।

शेषे—'ननु क्षेपे मतस्य च । प्रत्युक्तावेषणायां च' । [9]परमतक्षेपे यथा—'नन्वेतत् कथं घटते' इति । उक्तौ प्रतिवचने यथा—अकार्षीः कटं देवदत्तेति प्रश्ने 'ननु करोमि भोः' इति (काशिका १, पृ. १९५) । 'ननौ पृष्टप्रतिवचने' (३. २. १२०) इति भूते लट् । एषणायां यथा—'ननु जीवन्तु सुधियः' इति[10] ।। २४८ ।।

[1] कुतो नु भवान् न हि मानिनो हानिः Tv. [2] प्रत्युक्तौ Tj1, Tj2. [3] कृतवानासीत् Tv. [4] नुदति । नौति वा । 'णुद प्रेरणे' । 'णु स्तुतौ' वा । मितद्र्वादित्वात् (वा. ३. २. १८०) डुः [नु] इति भा. दी. (पृ. ५०६). [5] बद्धेत्यर्थः B5, B6. [6] Gm1, Gm3 omit लक्ष्यते. [7] अनिति । 'अन प्राणने' । बाहुलकाडुः [अनु] इति भा. दी. (पृ. ५०६). [8] ननु वर्णा नित्याः B6. [9] Gm3, Tv omit परमत°. [10] न नुदति । 'णुद प्रेरणे' । डुः (वा. ३. २. १८०) [ननु] इति भा. दी. (पृ. ५०६).

(पा.) नु पृच्छायां—सादृश्ययोरनु । पश्चात्—अनु जनकं गच्छति । सादृश्ये—अनुकरोति जननीम् । 'अनु हीने सहार्थे च' इति [1]विश्वः (पृ. १८८, श्लो. ३३) । पाणिनिमनु वैयाकरणाः । अनु वीणां वैणिको गायति ।। प्रश्नावधारणा—आमन्त्रणे ननु ।। अनुक्तम्—नञभावविरोधान्यसाम्येष्वीषन्निषेधयोः इति । अभावे यथा—अदन्तो बालः । अदन्तो वृद्धः । घटः पटो न भवति । नास्त्यश्वस्य विषाणम् इत्यादि । विरोधे यथा—तमःप्रकाशौ न निवसतः । अतिमिरस्तरणिरुदेति । अन्यार्थे यथा—अगौर्गवयः । साम्ये यथा—'असक्तः सुखमन्वभूत्' इति (रघु. १. २१) । ईषदर्थे यथा—स न पुरुषो यो न विक्रामति । निषेधार्थे यथा—[2]नानृतं ब्रूयादिति ।। २४८ ।।

[1] B3, C1 add पश्चात्सादृश्ययोरनु. [2] 'प्रियं च नानृतं ब्रूयात्' इति म. स्मृ. (४. १३८).

गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि ।
उपमायां विकल्पे वा सामि त्वर्धे जुगुप्सिते ।। २४९ ।।

(वि.) गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि ।

गर्हायां यथा—'अपि वाग्भूतृणोदकैः' इति (या. स्मृ. १. ५. १०७) । समुच्चये यथा—'वत्सरः सोऽपि तत्समः' इति । प्रश्ने यथा—'अप्यग्रणीर्मन्त्रकृतामृषीणाम्'

इति (रघु. ५. ४) । शङ्कायां यथा—अप्यागच्छेद् व्याघ्रः[1] इति । संभावनायां यथा—' समुद्रमपि लङ्घयेत्[2] ' इति ॥

उपमायां विकल्पे वावधारणसमुच्चये ॥ 542 ॥

उपमायां यथा—' विशेषको वा विशिशेष यस्याः ' इति (शिशु. ३. ६३) । विकल्पे यथा—' षष्ठेऽष्टमे वा सीमन्तः ' इति (या. स्मृ. १. २. ११) । अवधारणे यथा—' अरावणमरामं वा जगदद्येति निश्चितः ' इति (रघु. १२. ८३) । समुच्चये यथा—' अग्निर्वा पवनो वास्य कपेर्लङ्कां दिधक्षतः[3] ' इति ॥

अर्धे जुगुप्सने सामि सहार्थान्तिकयोरमा ।

अर्धे यथा—' ससीत्कृतं सामि [4]विकूणितानना ' इति । जुगुप्सने यथा—' साम्यन्नं न तु भोक्तव्यम् ' इति ॥ सहार्थे यथा—अमावास्या । अन्तिके यथा—अमात्यः ॥ २४६ ॥

[1] विष्णुः K_2, K_6.　　[2] लङ्घये J_2.　　[3] K_5 adds साहाय्यकमनुप्राप्तः.
[4] विकूजिता° K_3, K_5.

(विव.) गर्हासमुच्चय—संभावनास्वपि । गर्हायां यथा—' अपि स्तुयाद् वृषलम् ' (काशिका १, पृ. ८१) इति । समुच्चये यथा—' अपि सिञ्च, अपि स्तुहि ' इति (काशिका १. ४. ९६) । प्रश्ने यथा—' अपि क्रियार्थं सुलभं समित्कुशम् ' इति (कु. सं. ५. ३३) । शङ्कायां यथा—' अपि कुप्येदाचार्यः ' इति । शक्तेरप्रतिघाताविष्करणं संभावना । यथा—[1]अपि सिञ्चेद् द्राक्षाणां सहस्रम् इति । अपि पर्वतं शिरसा भिन्द्यात् । किमुतान्यदित्यर्थः । ' अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ' (१. ४. ९६) इत्यपेः कर्मप्रवचनीयत्वम्[2] । उपमायां विकल्पे वा । उपमायां यथा—[3]' शिशिरमथितां पद्मिनीं वान्यरूपाम् ' इति (मेघ. २. २३) । विकल्पे यथा—' [4]यवैर्व्रीहिभिर्वा यजेत ' इति । शेषे—' अनवकल्पेऽवधारणे । समुच्चये वा ' इति । अनवकल्पोऽसंभावना । यथा—' [5]अस्त्रवेदमधिगम्य तत्त्वतः कस्य वेह[6] भुजवीर्यशालिनः ' इति (किरा. १३. ६२) । अवधारणे यथा—' सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ' इति (कु. सं. २. ६०) । न च तृतीयेत्यवधारणम् । ' गर्भाष्टमेऽष्टमे वाब्दे ' (या. स्मृ. १.

२. १४) इति वाशब्दाभ्यां द्योतते । समुच्चये यथा—'वायुर्वा दहनो वास्य कपेर्लङ्कां दिधक्षतः । साहाय्यकमनुप्राप्तौ' इति[7] ।। [8]सामि त्वर्धे जुगुप्सने । अर्धे यथा—'सामिभुक्तविषयाः समागमाः' इति (रघु. १९. १६) । जुगुप्सायां यथा—'साम्यध्ययनमनध्यायः' इति ।। २४९ ।।

[1] मूलकसहस्रमिति काशिकायाम् (१, पृ. ८१). [2] B6 adds तत्र छादने यथा—अपिदधाति । बन्धने यथा—अपिनह्यति; 'न पियति । 'पि गतौ' । क्विप् (३. १. १७८) । आगमशास्त्रस्यानित्यत्वान्न तुक्' [अपि] इति भा. दी. (पृ. ५०९). [3] B6 adds जातां मन्ये. [4] एवं वा कार्यम् Tv. [5] कस्य वेदमधिगम्य तत्त्वतः, कस्य देहभुजवीर्यशालिनः Tv. [6] चेह इति मु. ग्र. (पृ. ३०६). [7] वाति । 'वा गत्यादौ' । क्विप् [वा] इति भा. दी. (पृ. ५०९). [8] सामयति । 'षाम सान्त्वप्रयोगे' । 'अच इः' (उ. ४. १३८) इति भा. दी. (पृ. ५०९).

(पा.) गर्हासमुच्चय — संभावनास्वपि । गर्हायाम् — अपि स्तुयाद् वृषलम् । समुच्चये—अपि सिञ्च, अपि स्तुहि । प्रश्नार्थे—अपि जानासि । शङ्कायाम्—[1]अपीह चोरो भवेत् । संभावनायाम्—अपि स्थाणुं जयेद्रामो भवतो ग्रहणं कियत्[2] ।। उपमायां विकल्पे वा । समुच्चयावधारणयोरपि स्यात् । 'वा स्याद् विकल्पोमयोरेवार्थे [3]च समुच्चये' इति विश्वः (पृ. १८९, श्लो. ४०) ।। सामि त्वर्धे [4]जुगुप्सने । सामि कृतम्[5] ।। २४९ ।।

[1] अपि ह A1. [2] च यत् A1. [3] अपीति मु. ग्र. [4] जुगुप्सिते C1. [5] सामीकृतम् A1.

अमा सह समीपे च कं वारिणि च मूर्धनि ।
इवेत्थमर्थयोरेवं नूनं तर्केऽर्थनिश्चये ।। २५० ।।

(वि.) कमाकाशे जले मूर्ध्नि सुखे च समुदाहृतम् ।। 543 ।।
आकाश—कङ्गाः पक्षिणः । जले—कञ्जं पद्मम् । मूर्ध्नि—कंधरा । सुखे—कंदर्पः ।।

इवार्थेऽङ्गीकृतावित्थमर्थनिश्चययोरपि ।
एवं भवेच्च प्रकृतपरामर्शोपदेशयोः ।। 544 ।।

इवार्थे यथा—'भानुरेवंमुनिर्भाति' इति । अङ्गीकृतौ यथा—एवं करोमि ।

इत्थमर्थे यथा—एवंगुणस्य [1]कृष्णस्य रुक्मिणी . . .' इति । निश्चये यथा—एवमेव । प्रकृतपरामर्शे यथा— [2]'एवंवादिनि देवर्षौ ' इति (कु. सं. ६. ८४) । उपदेशे यथा—'एवं [3]कुर्याच्छिवार्चनम् ' इति ॥

उत्प्रेक्षायां भवेन्नूनमर्थनिश्चयतर्कयोः ।

उत्प्रेक्षायां यथा—'कान्तानां दहनज्वाला नूनं चन्द्रमसः कराः[4] ' इति । अर्थनिश्चये यथा—'क्षुद्रेऽपि नूनं शरणं प्रपन्ने ' इति (कु. सं. १. १२)। तर्के यथा—'नूनमुन्नमति यज्वनां [5]पतिः ' इति (कु. सं. ८. ५८) ॥ २५० ॥

[1] भवतो गोविन्द K_2, K_4. [2] एवं वदति गोविन्दे J_2, K_5. [3] कुर्याम् K_3.
[4] कलाः K_4. [5] प्रियः J_2, K_3, K_5.

(विव.) अमा सह समीपे च । सूर्याचन्द्रमसौ अमा सह वसतोऽस्यामिति अमावास्या । समीपे यथा—अमात्यः । समीपे भव इत्यर्थे 'अव्ययात् त्यप्' । [1](४. २. १०४) ॥ कं वारिणि मूर्ध्नि च । वारिणि यथा—कञ्जं पद्मम् । मूर्ध्नि यथा—कंधरा । शेषे—'कं सुखे व्योम्नि' इति । सुखे यथा—कंदर्पः । व्योम्नि यथा—कङ्गाः पक्षिणः । 'कं शिरोऽम्बुनोः' (२, पृ. २२७) इत्यत्र कान्तवर्गे कशब्द उक्तः । इह तु मकारान्तमव्ययमिति विवेकः[2] ॥ इवेत्थमर्थयोरेवम् । इवार्थे यथा—'अग्निरेवं द्विजो भस्मसात् कुर्यात्', 'भानुरेवं मुनिर्भ्राजति' इति । शेषे—

'एवमङ्गीकृतावपि ।
निर्धारणे च प्रकृतपरामर्शोपदेशयोः ॥'

इति । अङ्गीकारे यथा—कटं कुरु इत्युक्ते एवं करोमि इति । निर्धारणे निश्चये यथा—'आहार्यमेवं मृगनाभिपात्रम्' इति । प्रकृतपरामर्शे यथा—'एवंवादिनि देवर्षौ' इति (कु. सं. ६. ८४) । उपदेशे यथा—'एवं कुर्याच्छिवार्चनम्' इति । निश्चये यथा—'[3]एवमेतत् कः संदेहः' (रत्ना. १. ७-) इति ॥ नूनं तर्केऽर्थनिश्चये । [4]उत्कटैककोटिस्तर्कः । यथा—'नूनमेषा मम प्रिया भवेत्' इति । अर्थनिश्चये यथा—'नीतानि पणतां नूनमीदृशी भवितव्यता' इति

(किरा. ११. ४७) । नूनमिति मान्तमव्ययमुत्प्रेक्षायामपि भवति । यथा—'मदनस्येषवो नूनं युवतीनां दृशः शिताः' इति[5] ।। २५० ।।

[1] B6 adds इति त्यप्; 'न माति । "मा माने" । क्विप्' (३. २. ७६) [अमा] इति भा. दी. (पृ. ५०६). [2] कम्यते । 'कमु कान्तौ' । णिङभावे विच् [कम्] (३. २ ७५). [3] 'ए' एत्यं वमति । 'टु वम उद्गिरणे' । विच् (३. २. ७५) इति भा. दी. (पृ. ५१०) [4] उद्भूट° Gm3, K5. [5] नुवा स्तुत्या नमति । विच् (३. २. ७५) [नूनम्] इति भा. दी. (पृ. ५१०).

(पा.) अमा सह—कं वारिणि च मूर्धनि । सुखे च स्यात् । 'कं सुखे ऽम्भसि [1]मूर्ध्नि च' इति वैजयन्ती (पृ. २८४, श्लो. ३) ।। इवेत्थमर्थयोरेवम् । इवार्थ औपम्यम्[2] । इत्थमर्थः प्रकारः । 'एवं प्रकार औपम्येऽनुज्ञायामवधारणे' इति जयकोशः[3] ।। नूनं तर्केऽर्थनिश्चये ।। २५० ।।

[1] मूर्धनि B3, C1. [2] सादृश्यम् B3. [3] A1 omits कोशः.

तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने ।
नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ।। २५१ ।।

(वि.) तूष्णीमर्थे सुखार्थे च जोषमित्यव्ययं भवेत् ।। 545 ।।

तूष्णीमर्थे यथा—'इति जोषमवस्थितं[1] द्विषः' इति (शिशु. १६. १६) । सुखार्थे यथा—'जोषमासीत वर्षासु' इति ।।

प्रश्नेषदर्थयोः किं स्यान्निन्दातिशययोरपि ।

प्रश्ने यथा—'शक्ताः प्रबन्धेषु महाकवीनां किमाद्रियेरन् रसिकाः कृतिं मे' इति । ईषदर्थे यथा—'तदस्ति किं व्यस्तमपि त्रिलोचने' इति (कु. सं. ५. ७२) । निन्दायां यथा—'स किंसखा साधु न शास्ति योऽधिपम्[2]' इति (किरा. १. ५) । अतिशये यथा—'निवार्यतामालि किमप्ययं वटुः' इति (कु. सं. ५. ८३) ।।

प्रकाशसंभावनयोः क्रोधोपगमकुत्सने ।। 546 ।।
कथंचिदर्थे नाम स्याद् विस्मयालीकयोरपि ।

प्रकाशे यथा—'कुम्भोदरं नाम निकुम्भमित्रम्[3]' इति (रघु. २. ३५) ।

संभावनायां यथा—'कुर्वन्नाम समेष्यसि' इति। क्रोधे यथा—'आः [4]कंसस्य भयं नाम गोपान्मेऽपि सुरद्विषः' इति। उपगमे यथा—'अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति' इति (शिशु. २. १०७)। कुत्सने यथा—'को नामायं प्रलपति पुरो मे विशङ्कः सभायाम्' इति। कथंचिदर्थे यथा—पत्युः[5] क्रुद्धस्य पुरतो सेवको नाम वर्तते इति। विस्मये यथा—'एको नामार्जुनः[6] [7]शत्रून् कर्णादीनजयद्युधि' इति। अलीके यथा—'परिश्रमं नाम विनीय च क्षणम्' इति (कु. सं. ५. ३२) ॥ २५१ ॥

[1] अवस्थिते मुनौ K_2, K_4, K_5. [2] K_3, K_5 add हितान्न यः संशृणुते स किंप्रभुः. [3] निकुम्भतुल्यम् J_2, K_4, K_5. [4] किं तस्य K_4. [5] प्रत्युत्क्रुद्धस्य K_5. [6] जनः K_5. [7] शत्रुः K_5.

(विव.) तूष्णीमर्थे सुखे जोषम्। तूष्णीमर्थो मौनम्। यथा—'जोषमास्ते जितेन्द्रियः' इति। सुखे यथा—'जोषमासीत वर्षासु' इति[1] ॥ किं पृच्छायां जुगुप्सने। पृच्छायां यथा—किं भार्या प्रतिकूला। जुगुप्सने यथा—किंनरः, नरशरीरावयवानामपूर्णत्वात्। जुगुप्सितो नर इत्यर्थः। 'स किंराजा यो[2] राष्ट्रं न रक्षति'। किंराजा कुत्सितो राजा इत्यर्थः। अत्र किंराजेति समस्तं कथम्। 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति सूत्रेण प्राप्तः समासान्तप्रत्ययो न भवति, 'किमः क्षेपे' (५. ४. ७०) इति सूत्रेण तस्य प्रतिषेधात्। शेषे—'किमीषदतिशायने' इति। ईषदर्थे यथा—'किमपि प्रियश्च'। ईषत्प्रिय इत्यर्थः। अतिशये यथा—किमप्येष प्रगल्भते। अतिशयेन प्रगल्भत इत्यर्थः[3] ॥ नाम प्राकाश्य—कुत्सने। प्राकाश्ये प्राकट्ये यथा—'हिमालयो नाम नगाधिराजः' इति (कु. सं. १. १)। संभाव्ये कथंचिदर्थे यथा—इह लप्स्यते धनं नाम इति। क्रोधे यथा—'ममापि नाम दशाननस्य परैः परिभवः' इति। उपगमे यथा—'अस्तु नाम' इति। क्रोधेनोपगमः क्रोधपूर्वाङ्गीकार इति केचित्। यथा—अस्मानेवमधिक्षिपसि, भवतु नाम, संप्रत्येव भवन्तं कथावशेषं करिष्यामि इति। कुत्सने पृथक्करणे यथा—'को नामायं गृहपतिः, गृहा[4] येन न गृहीताः' इति। शेषे—'नामालीके विस्मये चामन्त्रणेऽर्थे कथंचितः' इति। अलीकेऽपरमार्थे यथा—'विश्रम्य विष्टरे नाम व्याजहारेति भारतीम्' इति। विस्मये यथा—'एको नामाजयद् रिपून्' इति। आमन्त्रणे यथा—'भो नाम रावण गृहाण धनुस्त-

तज्यम्' इति। कथंचित्पदस्यार्थे यथा—'पत्युः क्रुद्धस्य पुरतः सेवको नाम वर्तते'। कथंचिद् वर्तते इत्यर्थः[5] ।। २५१ ।।

[1] जुष्यते। 'जुष तृप्तौ'। बाहुलकादम् [जोषम्] इति भा. दी. (पृ. ५१०). [2] यस्य राष्ट्रम् Gm3, Tv. [3] कूयते कवनं वा। 'कु शब्दे'। बाहुलकाड्डिम्। कायतेः डिमिः (उ. ४. १५८) वा [किम्] इति भा. दी. (पृ. ५१०). [4] गृहा हि न हृतश्रियः Tv. [5] नामयति। नाम्यते वा। 'णमु प्रह्वत्वे'। 'अन्येभ्योऽपि' (वा. ३. २. १०१) इति डः [नाम] इति भा. दी. (पृ. ५१०).

(पा.) तूष्णीमर्थे सुखे जोषम्। तूष्णीमर्थो मौनम्।। किं पृच्छायां जुगुप्सने। [1]पृच्छार्थे—कुशलं किमत्र भवतः। जुगुप्सायाम्—स किंराजा यो न रक्षति प्रजाः। विकल्पहेतुनिषेधेष्वपि स्यात्। विकल्पे—तिष्ठतु किं, गच्छतु किम्। हेतौ—किं मामङ्ग बाधसे। निषेधे—किं धनैः परहितानि कुरुध्वम्।। नाम प्राकाश्य—कुत्सने। प्राकाश्यार्थे—राजाभूच्छूद्रको नाम। संभाव्ये—'विद्या नाम नरस्य रूपमधिकं [2]प्रच्छन्नगुप्तं धनम्' इति (नी. श. ७०)। क्रोधे—रामो नाम कुतः कुतः। उपगमे—'अविवेकि कुचद्वन्द्वं हन्तु नाम जगत्त्रयम्' (कुवलया. पृ. १०१)। कुत्सने—

'पुंस्कोकिलस्य चरितानि करोतु नाम
काकः कलध्वनिविधौ ननु काक एव'।

इति ।। २५१ ।।

[1] पृच्छायाम् B3. [2] A1 omits the two words.

**अलं भूषणपर्याप्तिशक्तिवारणवाचकम्।
हुं वितर्के परिप्रश्ने समयान्तिकमध्ययोः ।। २५२ ।।**

(वि.) अलं भूषणपर्याप्तिशक्तिवारणवाचकम् ।। 547 ।।

भूषणे यथा—'अलंचकारास्य वधूरहस्करः' इति (शिशु. १. ५८)। पर्याप्तौ यथा—'तस्यालमेषा क्षुधितस्य तृप्त्यै[1]' इति (रघु. २. ३९)। शक्तौ यथा—'अलं दशास्यस्य वधाय राघवः' इति। वारणे यथा—'अलं विवादेन यथा श्रुतं त्वया' इति (कु. सं. ५. ८२) ।।

वितर्के च परिप्रश्ने [2]कोपभर्त्सनयोरपि ।। 548 ।।
अनिच्छाभययोः स्मृत्यां हुमित्यव्ययमुच्यते ।

वितर्के यथा—' हुं जलं मृगतृष्णा हुम् ' इति । परिप्रश्ने यथा—हुं देवदत्तोऽयम् इति । कोपे यथा—' हुं निहन्मि सहसा युधि शत्रून् ' इति । भर्त्सनायां यथा—' हुं युद्धादपसर शत्रो ' इति । अनिच्छायाम्—हुं मुञ्च पापेति जगाद साध्वी इति । भये—हुं राक्षसः समायाति । स्मृतौ—अत्र हुं क्रीडितं पुरा इति ।।

मध्येऽन्तिके स्यात् समया भेदाप्रथमयोः पुनः ।। 549 ।।

मध्ये—समया शैलयोर्नदी । अन्तिके—समया [3]पट्टणं नदी ।। २५२ ।।

[1] तृप्तौ J2.　　[2] क्रोध° J2.　　[3] पत्तनं J2.

(विव.) अलं भूषण—वारणवाचके[1] । भूषणे यथा—अलंकरोति । [2]पर्याप्तौ यथा—' तस्यालमेषा क्षुधितस्य तृप्त्यै ' इति (रघु. २. ३९) । शक्तौ सामर्थ्ये यथा—' अलं मल्लो मल्लाय ' इति (काशिका २. ३. १६) । वारणे निषेधे यथा—[3] ' अलमतिप्रसङ्गेन ' (मुद्राराा १-) ।। हुं वितर्के परिप्रश्ने । वितर्के यथा—' हुं भवितव्यं कान्तारेऽस्मिन्नभिमुखागतैरेभिः पाटच्चरैरेव ' इति । परिप्रश्ने पृच्छायां यथा—' रामो नाम बभूव हुं तदबला सीता ' इति ([4]वसुंधरस्य) । ' आमन्त्रणे भर्त्सने हुं परिप्रश्नवितर्कयोः ' इत्यजयः । आमन्त्रणे यथा—' हुं देवदत्त क्व यासि ' इति । भर्त्सने यथा—' हुमपसर क्वासि मां नेतुं राम ' इति । स्मृतावपि यथा—' अत्र हुं[5] क्रीडितं पुरा ' इति ।। [6]समयान्तिकमध्ययोः । अन्तिके यथा—' गङ्गां समया वाराणसी ' इति । मध्ये यथा—' ग्रामं समया देवागारम् '; ग्रामस्य मध्ये देवागारमित्यर्थः ।। २५२ ।।

[1] वाचकम् B6.　[2] Gm1, Tj2 add पूर्णतायाम्.　[3] अलति । ' अल भूषणादौ ' । बाहुलकादम् इति भा. दी. (पृ. ५१०).　[4] सुभाषितरत्नभाण्डागारे श्लोकानुक्रमणिकायाम् (पृ. ५३).　[5] हूयते । ' हु दानादौ ' । बाहुलकान्मः इति भा. दी. (पृ. ५१०). [6]समेति । ' इण् गती ' । ' आः समिण्निकषिभ्याम् ' (उ. ४. १७५) इति भा. दी. (पृ. ५१०).

(पा.) अलं भूषण—वारणवाचकम् । भूषणे—अलंकरोति कन्याम् । पर्याप्तौ—' फलमलमशनाय [1]स्वादु पानाय तोयम् ' (वै. श. ५४) । शक्तौ—

अलं मल्लो मल्लाय । वारणे—अलं बाले रुदित्वा । निरर्थकेऽपि स्यात् । यथा—अलमूषरेषु[2] बीजावापः इति ।। हुं वितर्के परिप्रश्ने । अनुक्तम्—कथं प्रश्ने प्रकारे च प्रकर्षात्यियोर्भृशम् इति ।। समयान्तिकमध्ययोः २५२ ।।

[1] B3 omits the second *pāda*. [2] ऊषरे B3.

पुनरप्रथमे भेदे निर्निश्चयनिषेधयोः ।
स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा ।। २५३ ।।

(वि.) भेदे यथा—'जीवन् पुनः शश्वदुपप्लवेभ्यः [1]प्रजाः प्रजानाथ पितेव पासि' इति (रघु. २. ४८) । अप्रथमे यथा—'पुनर्बभाषे तुरगस्य रक्षिता' इति (रघु. ३. ५१) ।

निषेधे [2]निश्चये निः स्यात् सुखाप्त्यादौ निरासने ।

निषेधे—निरस्यति । निराचष्टे । निराकरोति । निश्चये—निर्णयति । निश्चिनोति । सुखाप्तौ—निर्वृतिः । निर्वृणोति । निरसने—निरष्ठीवत् ।।

स्यात् प्रबन्धे चिरातीते निकटागामिके[3] पुरा ।। 550 ।।

प्रबन्धे यथा—'उपाध्यायेन पुरा धीयते स्म' इति । चिरातीते यथा—'पुरातनं त्वां पुरुषं पुराविदः' इति (शिशु. १. ३३) । निकटागामिके समीपवर्तने यथा—'आलोके ते निपतति पुरा [4]सा बलिव्याकुला वा' (मेघ. २. २५) ।। २५३ ।।

[1] K5 omits the second *pāda*. [2] निश्चिते K5. [3] निकटागामिनोः K5.
[4] K5 omits the latter half.

(विव.) पुनरप्रथमे खेदे । अत्राप्रथमे आवृत्तौ यथा—पुनर्भुक्तम् । खेदे यथा—'वैश्या आरण्यान्न विक्रीणन्ति किं पुनर्ब्राह्मणः' इति[1] । निर्निश्चयनिषेधयोः । निश्चये यथा—निर्णयः । निषेधे यथा—निरस्यति । शेषे—

'सुखप्राप्तावभावे च प्रादुरर्थे पृथक्कृतौ ।
खेदनिग्रहकात्स्न्यें च भोगार्थादौ[2] निरीरितः ।।'

इति । सुखप्राप्तौ यथा—निर्वृणोति । अभावे यथा—'कृतं भवता निर्मक्षिकम्' इति (शाकु. २. ७-) । प्रादुरर्थो व्यक्तत्वम् । यथा—निर्वचनम् । पृथक्करणे यथा—निर्धारयति । खेदे यथा—निर्वेदः । निग्रहे यथा—निर्बध्नाति । कार्त्स्न्ये यथा—निर्दहति । निष्कृन्तति । निष्पिनष्टि । उपभोगे यथा—[3]निर्विशति । आदिशब्दाद् निष्ठीवतीति निरसने, निर्दिशतीत्यन्वाख्याने इत्यादि । 'प्रपराप-समन्ववनिर्दुर्व्याङन्यधि . . .' इत्याद्युपसर्गगणे निः इति विसर्जनीयान्तं नि इति ह्रस्वान्तं चेति द्वयमपि पठितम् । सूत्रेष्वपि 'निरः कुषः' (७. २. ४६) 'नेर्गदनद . . .' (८. ४. १७) इत्यादिषु द्वयं व्याहृतम् । तथा च अमरसिंहेनापि[4] 'निर्निश्चयनिषेधयोः' इत्युपसर्गद्वयस्यापि सामान्येन ग्रहणम् । तत्र ह्रस्वान्तस्य निश्चये यथा—'नियमेन मया निबर्हणीयः परमं लाभमरातिभङ्गमाहुः' इति (किरा. १३. १२) । नियमः[5] शास्त्रनियमः नियतवागित्यादि । निषेधे यथा—निषेधति । अभावे यथा—निवापो देशः । नीवाकः निधनमिति । निकार इति तिरस्कारे[6] ।। स्यात् प्रबन्धे—पुरा । प्रबन्धे सातत्ये यथा—उपाध्यायेन पुराधीयते स्म । अविरतमपाठीदित्यर्थः । अथवा प्रबन्धे वाक्यरचनारूपे पुराणादावित्यर्थः । चिरातीते बहुकालातीते यथा—'इतिहासः पुरावृत्तम्' (१, पृ. १०६) ; 'पुरातनं त्वां पुरुषं [7]पुराविदः' इति (शिशु. १. ३३) । केचित्तु चिरमतीतं चेति व्याचक्षते । अतीते यथा—'एतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुपयन्ति' (तै. सं. ३. ३. ८. ४), 'अथैहैनं पुरर्षयः'; अतीते काले इत्यर्थः । निकटागमिकम् अविलम्बेन भावि । यथा—'गच्छ शीघ्रं पुरा देवो वर्षति' इति । वर्षिष्यतीत्यर्थः । केचित्तु—संनिहिते निकटवर्तिनि, आगामिके चेत्यर्थद्वयपरत्वेन व्याचक्षते । संनिहिते यथा—'पुरा प्रातरनुवाकाज्जुहुयात्' इति । प्रातरनुवाकात् संनिहिते पूर्वकाल इत्यर्थः[8] ।। २५३ ।।

[1] पनते । 'पन स्तुतौ' । बाहुलकादरः, अकारस्योकारः [पुनः] इति भा. दी. (पृ. ५१०). [2] भोगार्थेऽपि Gm1, Tj1. [3] B6 adds निर्विष्टविषयस्नेहः (रघु. १२. १). [4] °सिंहनाथेनापि Tj1, Tj2. [5] घण्टापथे नियमेनावश्यमिति मल्लिनाथेन व्याख्यातम् (पृ. २८८). [6] नृणाति । 'नॄ नये' । क्विप् (३. २. १७८) । 'ऋत इत्—' (७. १. १००) इति भा. दी. (पृ. ५१०). [7] पुरा विदुः B5, B6. [8] पुरति । 'पुर अग्रगमने' । बाहुलकात् का [पुरा] इति भा. दी. (पृ. ५०९).

(पा.) पुनरप्रथमे—निश्चयनिषेधयोः । निश्चये—निर्वक्तु भवान् ।

निश्चितं वक्तु भवानित्यर्थः । निषेधे--निष्कामो भवान् । निषिद्धकाम इत्यर्थः ।। स्यात् प्रबन्धे--पुरा । प्रबन्धो [1]नाम वाक्यरचना । नटी कस्मात् पुरा धीयते । [2]चिरातीतं भूतम् । यथा--पुरातनम् । [3]निकटागामिकम् अनागतम् । 'आलोके ते निपतति पुरा ' (मेघ. २. २५) । अव्यवधानेन निपतिष्यतीत्यर्थः ।। २५३ ।।

[1] B3, C1 omit. [2] चिरं पुरातनम्, अतीतं भूतम् A1. [3] निकटं समीपम्, आगामिकमनागतम् A1.

ऊरर्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ।
स्वर्गे परे च लोके स्ववार्तासंभाव्ययोः किल ।। २५४ ।।

(वि.) उरर्यूरी चोररी च विस्तारे ऽङ्गीकृतौ[1] त्रयम् ।

विस्तारे यथा--उररीकरोति, ऊरीकरोति, ऊररीकरोति, अङ्गीकृतावप्येवम् ।।

परलोके देवलोके सुखे स्वः परिकथ्यते ।। 551 ।।

परलोके यथा--' स्वर्गतस्य क्रियाः कार्याः पुत्रैः परमभक्तितः ' इति । देवलोके यथा--' स्वर्णद्यां स्नाति नारदः ' इति । सुखे यथा--स्वर्गः ।।

न्यक्कारालीकवार्तासु संभाव्येऽनुचिते किल ।

न्यक्कारे यथा--' त्वं किलानमितपूर्वमक्षिणोः ' इति । अलीके यथा--' अमूं किल त्वं त्रिदिवादवातरः ' इति (शिशु. १. ३६) । वार्तायां यथा--' अथ किलैकरथेन नृपात्मजा ' इति । संभाव्ये यथा--गुरून् किलातिशेते शिष्यः[2] इति । अनुचिते यथा--' वक्तुं किल गुरूनेवमनर्हस्त्वं विनष्टधीः ' इति ।। २५४ ।।

[1] अङ्गीकृते K3, K6. [2] अर्जुनः K6.

(विव.) ऊरर्यूरी--अङ्गीकृतौ त्रयम् । द्वयं दीर्घादि, तृतीयं तु ह्रस्वादि । तथैव प्रागुक्तम् 'ऊरीकृतमुररीकृतम्' इति (२, पृ. १५०) । अजयस्तु त्रयमपि ह्रस्वादिषु पपाठ । यथा--

'उपतापो गदे ताप उत्सर्गस्त्यागदानयोः ।
उररी चोररी चोरी विस्ताराङ्गीकृतेऽव्ययम् ।। '

इति । अत एव नैषधकाव्ये 'न खलु मुष्टिरुरीकृतबन्धनः' इति (४. ८४) । ह्रस्वादिः प्रागुक्तः । तत्रैव—'अर्थेषु स्वयमुररीकृतकाम्यः' इति च । 'तन्मे वरद्वयमुरीकृतपूर्वमेव' इति मुरारिश्च (अनर्घ. ४. ६६) । विस्तारे यथा—'ऊरीकृत्य पटं धारयति', विस्तार्य पटं धारयतीत्यर्थः[1] ।। [2]स्वर्गे परे च लोके स्वः । स्वर्गे यथा—स्वर्लोकः । परलोकमात्रे यथा—'स्वर्गतस्य क्रियाः कार्याः' इति । '[3]स्वर्यातस्य पुत्रस्य पत्नी तद्भागमर्हति' इति च । शेषे—'स्वराकाशे शर्मणि च' इति । आकाशे यथा—स्वर्गङ्गा । आकाशगङ्गेत्यर्थः । शर्मणि सुखे यथा—स्वं सुखं गम्यतेऽत्रेति स्वर्गः[4] ।। वार्तासंभाव्ययोः किल । वार्तायां यथा—'जघान कंसं किल वासुदेवः' ([5]महाभाष्ये) इति । संभवे यथा—'गुरून् किलातिशेतेऽर्जुनः' इति । शेषे—'अलीके च किल स्मृतः न्यक्कारेऽनुचिते हेतौ' इति । अलीके यथा—'अजानानः किल पृच्छति' इति । न्यक्कारे यथा—त्वं किल योत्स्यसे । अनुचिते यथा—एवं किल गुरून् वक्तुमनर्हो भवान् । हेतौ यथा—'शीघ्रं पाकस्त्वया कार्यः क्षुधा किल भविष्यति' । इति[6] ।। २५४ ।।

[1] ऊयते । 'ऊयी तन्तुसंताने' । बाहुलकाद्ररीक्, रीक् च । वयतेः ररीक् । संप्रसारणम् (६. ४. १५) इति भा. दी. (पृ. ५१०). [2] स्वर्गे च परलोके स्वः Tv. [3] स्वर्यातस्य ह्यपुत्रस्य इति या. स्मृ. (२. ८. १३६). [4] स्वरति । 'स्वृ शब्दोपतापयोः' । विच् (३. २. ७५) [स्वः] इति भा. दी. (पृ. ५१०). [5] Mbh. Apte's Dict. p. 573; स. कण्ठा. (पृ. ३५)—Ak. OBA ed. p. 336. [6] किलति । 'किल श्वैत्ये' । 'इगुपध . . .' इति कः [किल] इति भा. दी. (पृ. ५१०).

(पा.) ऊरर्यूरी—अङ्गीकृतौ त्रयम् । [1]ऊरर्यूरीशब्दौ ह्रस्वादिरपि स्याताम् । ऊरीशब्दो दीर्घादिः ।

उपतापो गदे ताप उत्सर्गस्त्यागदानयोः ।
उररी चोररी चोरी विस्तारेऽङ्गीकृतौ त्रयम् ।।

इति [2]जयकोशपाठाद् ह्रस्वादिरपि ।। स्वर्गे परे च—संभाव्ययोः किल । तन्त्राद् [3]वार्तासंभाव्ययोरेव ग्रहणम् । 'संभाव्ये किल वार्तायाम्' इति रभसः । 'वार्तायामरुचौ किल' इति त्रिकाण्डशेषः (पृ. ३७, श्लो. १०२०) ।। २५४ ।।

[1] ऊर्युररीशब्दौ B3. [2] अजयः इति भा. दी. (पृ. ५१०). [3] संभाव्य-संभावयोः A1.

निषेधवाक्यालंकारे जिज्ञासानुनये खलु ।
समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः ।। २५५ ।।

(वि.) निषेधवाक्यालंकारजिज्ञासानुनयेषु च ।। 552 ।।
निश्चये नियमे हेतौ खलुशब्दः प्रकीर्तितः ।

निषेधे यथा--' निर्धारितेऽर्थे लेखेन[2] खलूक्त्वा खलु [3]वाचिकम् ' इति (शिशु. २. ७०) । वाक्यालंकारे यथा--अथो खल्वर्थः । जिज्ञासायां यथा--स[4] खल्वधीते[5] ते पुत्रः । अनुनये यथा--' न खलु दूरगतोऽप्यतिवर्तते ' इति । निश्चये यथा--' न खल्वनिर्जित्य रघुं कृती भवान् ' इति (रघु. ३. ५१) । नियमे यथा--' प्रवृत्तिसाराः खलु मादृशां गिरः ' इति (किरा. १. २५) । हेतौ यथा--' कविरेव ततः खलूक्तवान् ' इति ।।

समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः ।। 553 ।।

समीपे यथा--वाराणसीमभितो भागीरथी । भागीरथीमभित इत्यर्थः । [7]उभयतो यथा--' भेजेऽभितःपातुकसिद्धसिन्धोः ' इति[8] (शिशु. ३. ३) । शीघ्रे यथा--अभितः शत्रुरायाति । साकल्ये यथा--भुङ्क्तेऽन्नमभितोऽतिथिः । अभिमुखे यथा--'अभितो हिंस्रको दन्ती मामेव परिधावति ' इति ।। २५५ ।।

[1] प्रकीर्त्यते K2, K3; प्रकथ्यते K4. [2] लेख्येन K4, K6. [3] वाचकम् K2, K3. [4] न for स K3. [5] स्वधीते K5. [6] K3 adds पाठान्तरमपि--कविरेवं स ततः. [7] उभयत इत्यर्थे K5. [8] K4 adds अभूतपूर्वां रुचमम्बुराशेः.

(विव.) निषेधवाक्यालंकारे--खलु । निषेधे यथा--' निर्धारितेऽर्थे लेख्येन[1] खलूक्त्वा खलु वाचिकम् ' इति (शिशु. २. ७०) । वाक्यालंकारे यथा--'अयं खलु महाराज इत एवाभिवर्तते ' इति । जिज्ञासायां यथा--को नु खल्वयम् । अनुनये यथा--' न खलु न खलु मुग्धे साहसं कार्यमेतत् ' इति (नागा. २. ११) । शेषे--' विषादे[2] निश्चये हेतौ ' इति । विषादे यथा--' न विदीर्ये कठिनाः खलु स्त्रियः ' इति (कु. सं. ४. ५) । निश्चये यथा--तत् खलु देयम्, निश्चयेन

देयमित्यर्थः । हेतौ यथा——ततः खलु[3]; तस्माद् हेतोरित्यर्थः ।। समीपोभयतः—— अभिमुखेऽभितः । समीपे यथा——पर्वतमभितो ग्रामः । उभयत इत्यस्यार्थे यथा—— नगरमभितो नदी । [4]उभयत्रापि 'पर्यभिभ्यां च' (५. ३. ९) इति तसिल्प्रत्ययः, 'अभितः[5] परितः . . .' इत्यादिना (वा. १. ४. ४८) द्वितीया च । शीघ्रे यथा——आगच्छ [6]त्वामभितः सार्थो दूरं यास्यति । साकल्ये यथा——व्याप्नोत्यभितो रजः, समन्ताद् रजो व्याप्नोतीत्यर्थः । अभिमुखे यथा——अभितः समापतन्तमरिमपश्यत्; आभिमुख्येनापतन्तं शत्रुमपश्यदित्यर्थः ।। २५५ ।।

[1] लेखेनेति मु. ग्र. (पृ. ५०).　　[2] नियमे Gm1, Tj1.　　[3] खलति । 'खल संचये' । बाहुलकादुः [खलु] इति भा. दी. (पृ. ५१०).　　[4] उभयत्राप्यभिशब्दयोगाद् द्वितीया B5, B6.　　[5] अभिमुखमग्रमस्य । 'पर्यभिभ्यां च' इति तसिल् इति भा. दी. (पृ. ४२९).　　[6] त्वम् B6.

(पा.)　निषेधवाक्यालंकारे——खलु । क्रमेणोदाहरणानि——

'कुपित्वा खलु वामाक्षि कोपः कः खलु किंकरे ।
जाने खलु कृपालुं[1] त्वां वाचं देहि खलु प्रिये ।।

इति ।। समीपोभयतः——अभिमुखेऽभितः ।। २५५ ।।

[1] कृपालुस्त्वम् A1.

नामप्राकाश्ययोः प्रादुर्मिथोऽन्योन्यं रहस्यपि ।
तिरोऽन्तर्धौ तिर्यगर्थे हा विषादशुगर्तिषु ।। २५६ ।।

(वि.)　जन्मप्रकाशयोः प्रादुर्मिथोऽन्योन्यरहस्ययोः ।

जन्मनि यथा——'प्रादूरासीच्चक्रपाणिर्देवक्यां वसुदेवतः' इति । प्रकाशे यथा—— 'प्रादुरासीद् वसुंधरा' इति (रघु. १५. ८३) ।। मिथः, अन्योन्यार्थे यथा—— वसिष्ठकौण्डिन्यमैत्रावरुणा मिथो न विवाह्याः[1] । रहस्ये यथा——'वक्तुं मिथः प्राक्रमतैवमेनम्[2]' इति (कु. सं. ३. २) ।।

अन्तर्धाने तिर्यगर्थे तिर इत्यव्ययं भवेत् ।। 554 ।।

अन्तर्धाने यथा—'अभिवृष्य[3] मरुत्सस्यं कृष्णमेघस्तिरोदधे' इति (रघु. १०. ४८)। तिर्यगर्थे यथा—'तिरस्करिण्यो जलदा भवन्ति' इति (कु. सं. १. १४)॥

निन्दाविस्मययोर्हा स्यादार्तौ शोकविषादयोः ।

निन्दायां यथा—हा कदन्नमुपभुञ्जते द्विजाः। विस्मये यथा—हा गजेन हतः सिंहः। आर्तौ यथा—हा हतोऽस्मि मन्दभाग्यः । शोके यथा—'हा लक्ष्मणेति [4]गदितं विनिशम्य सीता' इति । विषादे यथा—'[5]हा हा कृष्णो राजपुत्रं रथस्थः' इति ॥ २५६ ॥

[1] विवाहयेयुः K5. [2] एनमेवम् इति मु. ग्र. (पृ. २३). [3] अभिषिच्य K5. [4] कथितम् K5. [5] हा हं कृष्णं K5.

(विव.) नामप्राकाश्ययोः प्रादुः । नाम नामधेयमिति सुबोधिनीकारः । यथा—'प्रादुर्भावा हरेर्दश'। मत्स्यकूर्मादिरूपेण दश नामानीत्यर्थः। सुभूतिचन्द्रस्तु व्याचष्ट—नाम्नि नामशब्दार्थे संभावनारूपे प्रादुःशब्दः[1]। तथा च—'प्रादुः स्फुटे च संभाव्ये' इत्यजयः। प्राकाश्ये यथा—'प्रादुरास प्रभाकरः' इति । केचित्तु—'जन्मप्राकाश्ययोः प्रादुः' इति पठन्ति। जन्मनि यथा—'प्रादुर्भूतः सुतस्तस्य' इति ॥ मिथोऽन्योन्यं रहस्यपि । अन्योन्यमित्यर्थे यथा—भारद्वाजकपिगर्गाणां मिथो विवाह्याः। रहसि यथा—'[2]मिथस्त्वदाभाषणलोलुपं मनः' इति (शिशु. १. ४०); 'मिथः[3] कृते मन्मथ एव साक्षी' इति च ॥ तिरोऽन्तर्धौ तिर्यगर्थे । अन्तर्धे यथा—'विश्वयोनिस्तिरोदधे' इति (कु. सं. २. ६२) । तिर्यगर्थे यथा—'गतं तिरश्चीनमनूरुसारथेः' इति (शिशु. १. २)[4]॥ हा विषादशुगर्तिषु। विषादे यथा—'पुण्यान्तःपुरमेव हा प्रविशति क्रुद्धो मुनिर्भार्गवः' इति (महावीर. २. २०)। शुचि शोके यथा—'हा प्रिये जानकि' इति (उत्तर. ३. १२-)। आर्तौ यथा—'हा हतोऽस्मि मन्दभाग्यः' इति । शेषे—'विस्मये च जुगुप्सायां हा मतः' इति । विस्मये यथा—'हा गजेन हतः सिंहः' इति । जुगुप्सायां यथा—'[5]हा कदन्नमुपभुञ्जते द्विजाः' इति ॥ २५६ ॥

[1] प्रान्दति । 'अदि बन्धने'। बाहुलकादुस् । आगमशास्त्रस्यानित्यत्वान्न नुम् [प्रादुः] इति भा. दी. (पृ. ५१०). [2] मिथस्तदाभाषण° Gm3, Tj2. [3] मेथति । 'मेथृ संगमे'। असुन् (उ. ४. १८९) । पृषोदरादित्वाद् ह्रस्वः [मिथः] इति भा. दी. (पृ. ५१०).

[4] तरति । 'तॄ' । असुन् (उ. ४. १८९) । 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति गुणविषये इर् [तिरः] इति भा. दी. (पृ. ५१०).　　[5] जहाति । 'ओहाक् त्यागे'। क्विप् (३. २. १७८) इति भा. दी. (पृ. ५११).

(पा.) नामप्रकाशयोः प्रादुः । नामप्रकाशौ संभाव्यस्फुटार्थकौ । 'प्रादुः स्फुटे च संभाव्ये' इति जयकोशः ।। मिथोऽन्योन्यं—हा विषादशुग्र्गतिषु ।। २५६ ।।

अहहेत्यत्यद्भुते खेदे हि हेतावधारणे ।।

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने नानार्थवर्गः

(वि.) अहहेत्यव्ययं[1] प्रोक्तं खेदनाश्चर्ययोरपि ।। 555 ।।

खेदने यथा—'अहह कष्टमपण्डितता विधेः' इति ([2]भर्तृहरि ३४२) । आश्चर्ये यथा—'अहह महतां निःसीमानश्चरित्रविभूतयः' इति[3] (भर्तृ. ७३) । अहहा इति वा पदच्छेदः । 'अहहा भिक्षमाणोऽपि क्षुधा संपीड्यते जनः' इति ।।

अवधारणहेत्वोर्हि स्फुटार्थे पादपूरणे ।

अवधारणे यथा—चन्द्रो हि शीतः । हेतौ यथा—कृतिमन्तो हि कार्यतः । स्फुटार्थे यथा—'तथा हि सर्वे तस्यासन्'[4] इति (रघु. १. २९) । पादपूरणे यथा—'रामो हि लक्ष्मणं वाक्यमवादीद् विहसन्निव' इति ।।

इति श्रीवङ्गलकामयभट्टोपाध्यायसूनुलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ

अव्ययनानार्थवर्गः संपूर्णः

[1] द्वयम् K_4, K_6.　　[2] Kosambi's edn. p. 133.　　[3] ibid., p. 30.
[4] J_2 adds परार्थैकफला गुणाः.

(विव.) अहहेत्यद्भुते खेदे । अद्भुते यथा—'अहह महतां निःसीमानश्चरित्रविभूतयः' इति (भर्तृ. ७३) । खेदे यथा—'अहह कष्टमपण्डितता विधेः' इति (भर्तृ. ३४२) । अहहा इति दीर्घान्तो वा [1]पदच्छेदः । यथा—'[2]अहहा भिक्षमाणोऽपि क्षुधा संपीड्यते जनः' इति ।। हि हेतावधारणे । हेतौ यथा—'जानाम्यग्निरिहास्तीति महान् धूमो हि दृश्यते' इति । अवधारणे

यथा—'परुषोक्तिः कथं तस्मिन् ब्रूहि त्वं हि तपोधन' इति । त्वमेव ब्रूहीत्यर्थः । शेषे—'हि स्फुटार्थे विनिश्चित्यां पादपूरे प्रकीर्तितः' इति । स्फुटार्थे यथा— 'तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः' इति (रघु. १. २९) । निश्चये यथा—'दाक्ष्यं हि सद्यः फलदम्' इति । पादपूरणे यथा—[3]'उत्फुल्लपद्म-केसरपरागगौरद्युते मम हि गौरि' इति[4] (नागा. १. १३) ॥

इति नानार्थाव्ययवर्गः[5]

[1] Gm3, Tv omit पद°. [2] अहं जहाति, जिहीते वा । 'हाक्', 'हाङ्' । 'अन्येभ्योऽपि . . .' (वा. ३. २. १०१) इति डः । पृषोदरादित्वाद् मलोपः । अहहा । तत्र क्विप् इति भा. दी. (पृ. ५११). [3] Tv adds 'अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन' इति. [4] हिनोति, 'हि गतौ' । विच् (३. २. ७५) । संज्ञापूर्वकत्वाद् गुणाभावः । क्विपि (३. २. १७८) तुगभावो वा [हि] इति भा. दी. (पृ. ५११). [5] B6 adds अत्र श्लोकसंख्या १८.

(पा.) अहहेत्यद्भुते—अवधारणे । 'हि स्याद् विशेषणे हेतौ हि हेताववधारणे' इति वैजयन्ती (पृ. २८४, श्लो. ९) । अनुक्तम्—'स्यात् प्रश्नोत्तरयोस्तर्हि प्रसिद्ध्यारम्भयोर्ह वै' इति ॥

इति[1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजातेऽव्ययनानार्थवर्गः

[1] °नागनाथनारसिंह° A1.

४. अव्ययवर्गः

चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः ।
मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः ॥ १ ॥

(वि.) [1]अथाव्ययवर्गमुपक्रमते चिरायेति—अत्राद्यशब्देन [2]प्रथमा-तृतीयापञ्चमीविभक्तचन्तप्रतिरूपका[3] अव्यया गृह्यन्ते । अत्र [4]क्रमेणोदा-हरणानि—'चिराय संतर्प्य समिद्भिरग्निम्' इति (रघु. १३. ५५) । 'चिररात्राय संचितम्' इति । 'चिरस्य दृष्टेव मृतोत्थितेव' इति (कु. सं. ७. ४) । 'चिरंतनस्तावदभिन्यवीविशत्' इति (शिशु. १. १५) । 'चिरेण नाभि

प्रथमोदबिन्दवः ' इति (कु. सं. ५. २४)। 'चिरात् सुतस्पर्शरसज्ञतां ययौ ' इति (रघु. ३. २६)॥ [5]मुहुर्मुहुः—असकृत्समाः। अत्रोदाहरणानि— 'अवेक्षमाणं महतीं मुहुर्मुहुः ' इति (शिशु. १. १०)। 'पुनः पुनः सूतनिषिद्धचापलम् ' इति (रघु. ३. ४२)। [6]'वन्यवृत्तिरिमां शश्वत् ' इति (रघु. १. ८८)। 'अभीक्ष्णमक्षुण्णतयातिदुर्गमम् ' इति (शिशु. १. ३२)। 'असकृदनवगीतं गीतमाकर्णयन्तः ' इति (शिशु. ११. १०)। एतानि मुहुरर्थे वर्तन्ते ॥ १ ॥

[1] °अव्ययपर्यायवर्ग° K_5.　[2] °तृतीयया° K_4.　[3] °विभक्तचन्तर° K_6.
[4] K_5, K_6 omit क्रमेण.　[5] मुहुः पुनः पुनः J_2.　[6] वन्यवृत्तीनिमान् K_4.

(विव.) चिराय चिररात्राय—चिरार्थकाः। अथैकार्थाव्यया उच्यन्ते। नानार्थाव्यया उक्ताः। अथैकार्थानव्ययानाह—चिरायेति। अत्र आद्यशब्देन चिरं चिरात् चिरेणेति विभक्तचन्तप्रतिरूपका अव्यया गृह्यन्ते। चिरार्थकाः चिरकालार्थका इत्यर्थः। चिरार्थका इत्युक्तिभङ्ग्या चिरशब्दोऽव्ययोऽप्यस्तीति सूचितम्। अत एव 'सायंचिरंप्राह्णे . . . ' (४. ३. २३) इत्यत्र वृत्तावुक्तम्—सायादयो न व्यया अपीति (काशिका १, पृ. ३३६)[1]। तथा च चिरपरिचयः, चिरायुः इत्यादयः प्रयोगा द्रष्टव्याः। क्रमेणोदाहरणानि—चिराय[2] यथा— 'चिराय संतर्प्य समिद्भिरग्निम् ' इति (रघु. १३. ५५)। 'संचितं चिररात्राय ' इति। 'चिरस्य दृष्टेव मृतोत्थितेव ' इति (कु. सं. ७. ४)। 'चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ' इति (शिशु. २. २६)। 'चिरेण नाभि प्रथमोदबिन्दवः ' इति (कु. सं. ५. २४)। 'चिरात् सुतस्पर्शरसज्ञतां ययौ ' इति (रघु. ३. २६)॥ मुहुः पुनः—असकृत्समाः। यस्याः कस्याश्चित् क्रियाया अनुपरत एवाभ्यासवृत्तेः[3] एतानि नामानि। यथा—'शरासनज्यां मुहुराममर्श ' इति (कु. सं. ३. ६४)। 'स्रस्तां नितम्बादवलम्बमाना[4] पुनः पुनः [5]केसरदामकाञ्चीम् ' इति (कु. सं. ३. ५५)। 'शश्वत् प्रियमयं ब्रूते ' इति। अभीक्ष्णमिति मकारान्तमव्ययम्। यथा—'अभीक्ष्णमक्षुण्णतयातिदुर्गमम् ' इति (शिशु. १. ३२)। 'असकृद् भक्तिहितं हिताभिलाषी ' इति। शेषे—'वारंवारं शश्वदर्थे ' इति। 'वारंवारेण चेष्यते ' इति त्रिकाण्डशेषश्च (पृ. ३७, श्लो. १०२३)। यथा— 'वारं वारं तिरयति दृशावुद्गतो बाष्पपूरः ' इति (मालती. १. ३५)। 'आस्ते नताननस्तूष्णीं वारं वारेण निश्वसन् ' इति ॥ १ ॥

[1] सायमिति मकारान्तं पदमव्ययं, ततोऽव्ययत्वादेव सिद्धः प्रत्ययः। यस्तु स्यतेरन्तकर्मणो घञि सायशब्दस्तस्येदं मकारान्तत्वं प्रत्ययसंनियोगेन निपात्यते इति काशिका. [2] चिरमयते। 'अय गतौ'। 'कर्मण्यण्' [चिराय] इति भा. दी. (पृ. ५११). [3] अनुपरमेणाभ्यावृत्तेः B6. [4] अवरोहयन्ती Gm3, Tv. [5] केसरपुष्प° इति मु. ग्र. (पृ. ३४).

(पा.) चिराय चिररात्राय—चिरार्थकाः। एते चिरार्थकाः स्युः। चिरार्थो दीर्घकालः। 'चिरेण चिररात्राय दीर्घकाले चिराच्चिरम्' इति वैजयन्ती (पृ. २८७, श्लो. १) ॥ मुहुः पुनः—असकृत्समाः। एते पौनःपुन्यार्थकाः। वारंवारेण वारंवारं शब्दावपि[1]। 'वारंवारं शश्वदर्थे वारंवारेण चेष्यते' इति त्रिकाण्डशेषः (पृ. ३७, श्लो. १०२३)। नपुंसकभूतो[2]ऽभीक्ष्णशब्दोऽप्यस्ति। 'अभीक्ष्णमव्ययं वा स्यात् पौनःपुन्यभृशार्थयोः' इति वैजयन्ती (पृ. २५०, श्लो. २) ॥ १ ॥

[1] A1 adds स्तः; C1 स्याताम्. [2] °भूताभीक्ष्ण° A1.

स्राग्झटित्यञ्जसाह्नायद्राङ्मङ्क्षुसपदि द्रुते।
बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २ ॥

(वि.) स्राग्झटिति—द्रुते। एतानि द्रुतार्थे वर्तन्ते। स्राक्—[1]'स्राग्वयो याति देहिनाम्'। झटिति—[2]सुतशतमत्यन्तदुर्लभं[3] झटिति। अञ्जसा—अञ्जसा याति तुरगः। अह्नाय—[4]'अह्नाय तावदरुणेन तमो निरस्तम्' इति (रघु. ५. ७१)। द्राक्—'द्राग्भविष्यति सुखं तव प्रिये' इति। मङ्क्षु—'मङ्क्षूदपाति परितः पटलैरलीनाम्' इति (शिशु. ५. ३७)। सपदि—'वचसस्तस्य सपदि क्रिया केवलमुत्तरम्' इति (शिशु. २. २२) ॥ बलवत्सुष्ठु—निर्भरे। एतानि निर्भरार्थे वर्तन्ते। अत्रोदाहरणानि। बलवत्—'पुनर्वशित्वाद् बलवन्निगृह्य' इति (कु. सं. ३. ६९)। सुष्ठु—सुष्ठु पीतं मया घृतम्। किमुत—किमुताद्य कृतं कार्यम्। सु—सुवृष्टिः सस्यवर्धनी[5]। अति—'अतिवृष्टिरनावृष्टिः' इति। अतीव—अतीव शोभते राजा ॥ २ ॥

[1] K5 omits 4 lines. [2] J2 omits 3 lines. [3] °दुर्भवम् Pt2. [4] K4 adds यावत् प्रतापनिधिराक्रमते न भानुः. [5] °वर्धिनी J2.

(विव.) स्राग्झटिति—सपदि द्रुते । स्रागादयः सप्त शीघ्ररूपार्थे । क्रमेण यथा—स्राक् सरन्त्यभिसारिकाः (गणरत्न. पृ. ३६) । झटिति—'आनीय झडिति घटयति [1]विधिरभिमतमभिमुखीभूतः' इति (रत्ना. १. ५) । एष मूर्धन्यवर्गतृतीयमध्याक्षरः । झटितीति वर्गप्रथममध्याक्षरस्त्वपपाठः । अञ्जसा—सुवर्गं लोकमञ्जसा नयति । अह्नाय—'अह्नाय सा नियमजं क्लममुत्ससर्ज' इति (कु. सं. ५. ८६) । द्राक्—'पाताले द्रागहिभयमथास्त्येव नित्यम्' इति । मङ्क्षु—'मङ्क्षूदपाति परितः पटलैरलीनाम्' इति (शिशु. ५. ३७) । सपदि[2]—'वचसस्तस्य सपदि क्रिया केवलमुत्तरम्' इति (शिशु. २. २२) । झगितीति कण्ठ्यवर्गतृतीयमध्याक्षरोऽप्यस्ति । तथा च गणरत्नमहोदधौ द्वयमप्युक्तम्—'अह्नाय मङ्क्षु झगिति[3] झडिति द्राक् स्राक् शैघ्र्ये' इति । बलवत्—निर्भरे । बलवदादिषट्कं निर्भरेऽतिमात्रे । क्रमेण यथा—'बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः' इति (अभि. शा. १. २) । सुष्ठु—सुष्ठु पीतं मया घृतम् । किमुत—किमुत ब्रह्मविद् याज्ञवल्क्यः । गणरत्नमहोदधौ— 'किंपुनरर्थेऽतिशये [4]प्रश्ने पक्षान्तरेऽपि किमुत' इति (पृ. ७) । सु—सुवृष्टिः सस्यवर्धनी । अति—अतिवृष्टिरभूत् । अतीव—अतीव क्षुधितोऽतिथिः ॥ २ ॥

[1] Gm3, Tv omit अभिमतम्.　　[2] Tv adds द्रुतं गृह्णाति सपदि व्याकरोति.
[3] झगितीत्यपि केचित् इति मु. ग्र. (पृ. ३५).　　[4] प्रश्ने इति मुद्रितग्रन्थे न दृश्यते (पृ. ७).

(पा.) स्राग्झटिति—सपदि द्रुते । एते शीघ्रार्थे [1]स्युः ॥ बलवत्—निर्भरे । एते षट् निर्भरे इति साधिकार्थे [2]वर्तन्ते । 'किमुतातीव [3]बलवदतिसुष्ठु सु साधिके' इति वैजयन्ती (पृ. २८७, श्लो. ४) ॥ २ ॥

[1] वर्तन्ते A1.　　[2] स्युः B3, C1.　　[3] बलवत् स्वति सुष्ठु च साधिक इति मु. ग्र.

पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने ।
यत्तद्यतस्ततो हेतावसाकल्ये तु चिच्चन ॥ ३ ॥

(वि.) पृथग्विना—वर्जने । अत्रोदाहरणानि । पृथक्—किंचिद् दत्त्वा पृथक्क्रियाम् । विना—'क्षणमप्युत्सहते न मां विना' इति (कु. सं. ४. ३६) । अन्तरेण सुतं नास्ति सुखं संसारिणां[1] भुवि । ऋते—'ऋते रवेः क्षालयितुं

क्षमेत कः' इति (शिशु. १. ३८)। हिरुक्—हिरुक् कर्मणां मोक्षः। नाना—नाना विष्णुं मोक्षदो नास्ति देवः। एतानि वर्जनार्थे वर्तन्ते ।। यत्तद्यतस्ततो हेतौ। अत्रोदाहरणानि। यत्—'[2]व्यावृत्ता यत् परस्वेभ्यः' इति (रघु. १. २७)। तत्—'तदिदं परिरक्ष शोभने भवितव्यप्रियसंगमं वपुः' इति (कु. सं. ४. ४४)। यतः—'[3]यतो बुधैः सर्वगतस्त्वमुच्यसे' इति (कु. सं. ५. ५८)। 'यतो गङ्गाम्भसि स्नातस्ततो निष्कल्मषो [4]जनः' इति। एतानि हेत्वर्थे वर्तन्ते ।। असाकल्ये तु चिच्चन। अत्रोदाहरणे। चित्—करोति किंचिदभ्यासात्। चन—'अपात्रे कुशलैर्देयं न किंचन धनं सदा' इति। एते असाकल्यार्थे वर्तेते ।। ३ ।।

[1] संसारिणः J2. [2] व्यापृतां K4; K2 adds श्रुतौ तस्करता स्थिता. [3] यदा बुधैः इति मु. ग्र. (पृ. ६३). [4] नरः J2, K3.

(विव.) पृथग्विना—वर्जने। पृथगादिषट्कं वर्जनरूपार्थे। पृथग् देवदत्तम्। पृथग् देवदत्तेन। पृथग् देवदत्तात् (काशिका. १, पृ. ११७)। 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' (२. ३. ३२) इति द्वितीयातृतीयापञ्चम्यः। एवं विनानानाशब्दयोगेऽपि विभक्तित्रयम्। त्वामन्तरेण। 'अन्तरान्तरेण युक्ते' (२. ३. ४) इति द्वितीया। ऋते—'ऋते कृशानोर्न हि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम्[1]' इति (कु. सं. १. ५२)। 'अन्यारादितरर्ते . . .' इत्यादिना (२. ३. २९) ऋतेयोगे पञ्चमी। हिरुक्—'न[2] हिरुक् कर्मणां मोक्षः' इति। (गणरत्न. पृ. ३९)। कर्मणां वर्जने सति मोक्षो नास्तीत्यर्थः। नाना—[3]'नाना नारीं निष्फला लोकयात्रा' (गणरत्न. पृ. ४१), 'नाना विष्णुं मोक्षदो नास्ति देवः'। अत्र महोदधौ—'पृथग्विना च वर्जने नानानेकविनार्थयोः, अन्तरान्तरेण विनार्थौ [4]हिरुग्वर्जने' इति (पृ. ४१, पृ. ३९) ।। यत्तद्यतस्ततो हेतौ। 'यद् विद्यासु प्रगल्भोऽसि तत्सर्वैरपि पूज्यसे'। 'यतो मेघाः समुन्नादास्ततो वृष्टिर्भविष्यति' इति ।। असाकल्ये तु चिच्चन। असाकल्ये परितश्छिन्नपरिमाणे यथा। चित्—अत्र केचिदाहुः। चन—स्मृतिरन्येति केचन ।। ३ ।।

[1] Gm3, Tv omit the latter half. [2] 'न' मुद्रितग्रन्थे न दृश्यते (पृ. ३९). [3] Vopadeva (Apte's Dict. p. 887). [4] 'हिरुगिति वियोगहिंसावर्जनेषु' इति मु. ग्र. (पृ. ३९).

(पा.) पृथग्विना—वर्जने । एते षट् वर्जनार्थे ।। यत्तद्यतस्ततो हेतौ । एते च हेत्वर्थे ।। असाकल्ये तु चिच्चन । एतौ द्वौ असाकल्यार्थे ।। ३ ।।

कदाचिज्जातु सार्धं तु साकं सत्रा समं सह ।
आनुकूल्यार्थकं प्राध्वं व्यर्थके तु वृथा मुधा ।। ४ ।।

(वि.) कदाचिज्जातु । अत्रोदाहरणे । 'कदाचिदुपविष्टेन [1]ज्ञायते जातु न श्रमः' इति । एते [2]एकदार्थे वर्तेते ।। सार्धं तु साकं सत्रा समं सह । अत्रोदाहरणानि । सार्धम्—'सार्धमुद्धवसीरिभ्याम्' इति (शिशु. २. २) । साकम्—पत्न्या साकं पतिर्भुङ्क्ते । सत्रा—सत्रा कलत्रेण सुखं समश्नुते । समम्—'समं वधूभिर्वलभीर्युवानः' इति (शिशु. ३. ५३)। सह—'[3]निःश्वासधूमं सह रत्नभाभिः' इति (शिशु. ४. १) । एतानि सहार्थे वर्तन्ते ।। आनुकूल्यार्थकं प्राध्वम् । 'सव्येतरं प्राध्वमितः प्रयुङ्क्ते' इति (रघु. १३. ४३) । एतदानुकूल्यार्थे वर्तते ।। व्यर्थके तु वृथा मुधा । वृथा—'प्रयुक्तमप्यस्त्रमितो वृथा स्यात्' (रघु. २. ३४) । मुधा—'तत्र भ्रमत्येव मुधा षडङ्घ्रिः' इति । एते व्यर्थकार्थे[4] वर्तेते ।। ४ ।।

[1] जायते J2; जानते . . . श्रमम् K6.　[2] कदार्थे K3, K4.　[3] निश्वास° J2, K4.
[4] व्यर्थार्थे K5.

(विव.) कदाचिज्जातु । अनियतकालस्यैते नामनी । यथा—'कदाचिदासन्नसखीमुखेन सा' इति (कु. सं. ५. ६) । जातु—'तत्रानिशं निषण्णाप्ता[1] जानकी जातु न श्रमम्' इति ।। सार्धं तु साकं सत्रा समं सह । पञ्चैतानि सहेत्यस्य नामानि । सार्धम्—'सार्धमुद्धवसीरिभ्याम्' इति (शिशु. २. २) । साकम्—'साकं शक्तिधरेण तत्रभवतो देवाद् भवानीपतेः' इति । सत्रा—'[2]सत्रा कलत्रमित्रैश्च गार्हस्थ्यं सुखमश्नुते' इति । समम्—'समं वधूभिर्वलभीर्युवानः' इति (शिशु. ३. ५३) । सह—पुत्रेण सहागतः पिता (काशिका १, पृ. ११५) । एतैर्योगे 'सहयुक्तेऽप्रधाने' (२. ३. १९) इति तृतीया। समकं सजूरिति शब्दावप्यत्र । 'समकं चतुरङ्गसेनया', 'सजूर्देवैः' इति ।। आनुकूल्यार्थकं प्राध्वम् यथा—'सव्येतरं प्राध्वमितः प्रयुङ्क्ते' (रघु. १३. ४३) । अत्र 'प्राध्वं बन्धने' (१. ४. ७८) इति बन्धनहेतुकमानुकूल्यमभिप्रेतम् । ततश्च सव्येतरं भुजमङ्गुलि-

बन्धनेनानुकूलं कृत्वा प्रयुङ्क्ते इत्यर्थः ॥ व्यर्थके तु वृथा मुधा । यथा—'वृथा कृथा[3] मानिनि मा परिश्रमम्' इति । मुधा—'मुग्धे मुधा मा कुपः' इति । अयं वर्गचतुर्थोपध इत्याहुः ॥ ४ ॥

[1] निषण्णास्ते B6; निषण्णा ते Gm3. [2] 'सत्रा पुत्रकलत्रमित्रनिवहैः' *Rām. ca.* 2. 94 (Apte's Dict. p. 1613). [3] क्रिया Tv.

(पा.) कदाचिज्जातु । एतौ [1]द्वौ [2]विशिष्याज्ञातकालार्थकौ । 'ओह्-माटु' ॥ सार्धं तु साकं सत्रा समं सह । एते पञ्च[3] साहित्यार्थे । 'कूडुट' । क्वचित्तु सत्राशब्दः सत्रमिति मान्तोऽपि । 'समकं तु सजूः साकं सार्धं [4]सत्रं समं सह' इति वैजयन्ती (पृ. २८८, श्लो. १७) ॥ आनुकूल्यार्थकं प्राध्वम् । [5]प्राध्वंशब्दः आनुकूल्यार्थकः । नम्रार्थेऽपि स्यात् । 'प्राध्वं नम्रानुकूलयोः' इति विश्वः (पृ. १८६, श्लो. ४६) ॥ व्यर्थके तु वृथा मुधा । व्यर्थक इति निष्फलार्थे ॥ ४ ॥

[1] B3 omits द्वौ. [2] युगपदर्थकौ A1. [3] B3, C1 omit पञ्च. [4] सत्रा इत्येव मु. ग्र. [5] प्राध्वमिति शब्दः B3.

आहो उताहो किमुत विकल्पे किं किमूत च ।
तु हि च स्म ह वै पादपूरणे पूजने स्वति ॥ ५ ॥

(वि.) आहो उताहो—किमूत च । अत्रोदाहरणानि । आहो—'आहो स्विदासारयदच्युतोऽङ्गात्' इति । उताहो—'उताहो ब्रह्म [1]चोच्यते' इति । किमुत—'किमुत त्वं शिवो ब्रह्मा विष्णुर्वा यदि देवराट्' इति । किम्—स्थाणुरयं किं पुरुषः । किमु—किमु ते कार्यमुतान्यदीयकार्यम् । उत—'उत येन बिभर्षि तत्' (कु. सं. ६. २३) । एतानि विकल्पार्थे वर्तन्ते ॥ तु हि च स्म ह वै पादपूरणे । अत्रोदाहरणानि । तु—[2]रामस्तु लक्ष्मणं प्राह । हि—अहं हि यास्ये नगरम् । च—स च प्राह च राजानम् । स्म—मया स्म भुक्तं सहसा[3] । ह—रामः प्राह ह लक्ष्मणम् । वै—तेन वै राक्षसो हतः । एतानि पादपूरणार्थे वर्तन्ते ॥ पूजने स्वति । सु—[4]सुपन्थाः । अति—अतिपन्थाः । एते[5] पूजने वर्तेते ॥ ५ ॥

[1] ब्रह्म उच्यते J2. [2] K5 omits two lines. [3] K5, K6 omit. [4] सुपथः K6. [5] एतौ J2, K3.

(विव.) आहो उताहो—किमूत च। यथा—'स्थाणुरयमाहो पुरुषः' इति (गणरत्न. पृ. १०)। उताहो—'परमात्माथवानन्त उताहो ब्रह्म उच्यते' इति। किमुत—स्थाणुरयं किमुत पुरुषः। 'शब्दः किं [1]नित्योऽनित्यो वा किमु' इति द्व्यक्षरो निपातः। यथा—'उत मुखं सुदृशः किमु वारिजम्' इति। आहो [2]इत्यादिषट्कं [3]वितर्कसंशये वर्तते इत्यर्थः। आहो इति पदं दीर्घादि ह्रस्वादि च॥ तु हि च स्म वै पादपूरणे। श्लोकपादे सार्थकाक्षरैरपरिपूरणे सति छन्दसःपूर्तये प्रकृतोपयुक्तार्थपरत्वाभावेऽपि स्तोभाक्षरवत् [4]प्रयोक्तव्या इत्यर्थः। यथा—आख्यास्यामि तु ते वार्ताम्। हि—'उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि' इति (नागा. १. १३)। च—स च प्राह च राजानम्। स्म—'इति ह स्माहुराचार्याः' [5]। वै—'यो वै युवाप्यधीयानः' इति (म. स्मृ. २. १५६)॥ पूजने स्वति। यथा—सुपन्थाः, अतिपन्थाः इति। 'न पूजनात्' (५. ४. ६९) इति समासान्तप्रतिषेधः॥ ५॥

[1] नित्यम् Gm3, Tv. [2] B6 omits इत्यादि. [3] विकल्पे Tj1, Tj2. [4] B5 adds तावत्. [5] सर. कण्ठा. (पृ. ३७) इति स्वामिव्याख्याने दृश्यते (पृ. ३३८); मुद्रितग्रन्थे तु 'इति स्मोपाध्यायः कथयति' इति दृश्यते (पृ. ३७).

(पा.) आहो उताहो—किमूत च। एते षड् विकल्पार्थकाः। स्थाणुरयमाहो[1] पुरुषः। [2]ह्रस्वादिश्च दृष्टः। '[3]आहो उताहो च विकल्पार्थे प्रयोक्तृभिः' इति भागुरिः॥ तु हि च—पादपूरणे। एते षट् पादपूरणार्थकाः॥ पूजने स्वति। एतौ पूजनार्थे॥ ५॥

[1] अहो B3. [2] दीर्घादि च A1. [3] अहो A1.

दिवाह्नीत्यथ दोषा च नक्तं च रजनाविति।
तिर्यगर्थे साचि तिरोऽप्यथ संबोधनार्थकाः॥ ६॥
स्युः पाट् प्याडङ्ग हे है भोः समया निकषा हिरुक्।

(वि.) दिवाह्नीति। दिवा—'केचिद् दिवा तथा रात्रौ' (देवीमा. १. ३६)। एतद् [1]अह्नीति सप्तम्यर्थे [2]एव वर्तते॥ अथ दोषा—रजनाविति। दोषा—चोरा दोषा ययुः पथि। नक्तम्—'नक्तमापानभूमिषु[3]' इति (कु. सं. ६. ४२)।

एतौ शब्दौ [4]रजनौ रात्रौ सप्तम्यर्थेऽपि[5] वर्तेते ।। तिर्यगर्थे साचि तिरः । साचि—'चुम्बनायोद्यते पत्यौ वध्वा [6]साचीकृतं मुखम्' इति । तिरः—मेघैस्तिरोधीयते तीक्ष्णरश्मिः । एतौ तिर्यगर्थे वर्तेते ।। अथ संबोधन—हे है भोः । अत्रोदाहरणानि । पाट्—पाट् प्रिये ह्येहि मेऽन्तिकम् । प्याट्—प्याट् पुत्र पठ सर्वदा । अङ्ग—'श्रूयतामङ्ग वामपि' इति (शिशु. २. १२) । हे—हे वृक्ष किं कम्पसे । है—है वटो भैक्षमाहर[7] । भो—भो रावण तिष्ठ ममाग्रतो युधि । एतानि संबोधनार्थं कथयन्ति ।। समया निकषा हिरुक् । समया—समया पर्वतं नदी । निकषा—आपः खरांशुं निकषा न्यकार्षुः । हिरुक्—पर्वतस्य हिरुङ् नदी । एते समीपार्थे वर्तन्ते ।। ६ ।।

[1] J2 omits अह्नीति. [2] K5 omits एव. [3] सोपानपङ्क्तिषु इति मु. ग्र. (पृ. ७६). [4] रजन्यामिति सप्तम्यर्थे K5. [5] J2 omits अपि. [6] साचि कृतम् K4. [7] आरभस्व K6.

(विव.) दिवाह्नीति । दिवेत्येतदव्ययम् अधिकरणे, प्रधान एव वाहः-शब्दार्थे वर्तत इति दर्शयितुमितिकरणं कृतम् । यथा— 'केचिद् दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः' (देवीमा. १. ३६) इति ।। अथ दोषा च नक्तं च रजनाविति । अत्रापि दोषेत्याकारान्तम्, नक्तमिति मकारान्तं चेत्यव्ययद्वयम् । अधिकरणप्रधाने रजनिशब्दार्थे रात्रिरूपे वर्तत इति दर्शयितुमितिकरणं[1] कृतम् । यथा—'दोषा चरन्ति चोरा नक्तंचराः' इति ।। तिर्यगर्थे साचि तिरोऽपि । यथा—'साचि लोचनयुगं नमयन्ती' इति (किरा. ९. ४४) । तिरः—तिरोऽञ्चतीति तिर्यक् । 'तिरसस्तिर्यलोपे' (६. ३. ९४) इति [2]तिरि इत्ययमादेशो भवति ।। अथ संबोधन—हे है भोः । संबोधनमभिमुखीकरणम् । प्याट्—प्याट् पुत्र पठ सत्वरम् । पाट्—शीघ्रमायाहि पाट् प्रिये । केचित्तु प्याट् पाडिति ओष्ठचवर्गप्रथममिदं पठन्ति । अपरे तु फाडिति द्वितीयमादिम् अन्तस्थरहितं चाहुः । पाट् पान्थ मद्गृहे भुङक्ष्व, फाट् सखे फलितो माकन्दः । अङ्ग— 'मम तावन्मतमिदं श्रूयतामङ्ग वामपि' इति (शिशु. २. १२) । हे—हे वृक्ष किं कम्पसे[3] । है—है वटो भैक्षमाहर । भोः सप्तद्वीपवर्तिनो राजानश्चेतयध्वम् । अयं सकारान्तः, विसर्जनीयरहित ओकारान्तोऽप्यस्ति । यथा—'भो भो जामदग्न्य[4]' इति । ननुबतशब्दावप्यत्र ।।

समया निकषा हिरुक् । एतत् त्रयं सामीप्ये वर्तते । वाराणसी गङ्गां समया । वाराणसी गङ्गायाः समीपे इत्यर्थः । निकषा—[5]' विलङ्घ्य लङ्कां निकषा हनिष्यति ' इति (शिशु. १. ६८) । ' अभितः परितः समया निकषा हा प्रतियोगेऽपि ' (वा. १. ४. ४८) इत्युभयत्र द्वितीया । हिरुक्—गङ्गाया हिरुक् वाराणसी । गङ्गासमीपे वाराणसीत्यर्थः । उत्तरत्र ' निकषान्तिके ' (श्लो. १६) इति निकषाशब्दस्य सामीप्यलक्षणार्थे वक्ष्यमाणत्वाद् इह समयादित्रयं मध्यरूपार्थे वर्तत इति सुभूतिचन्द्रः ।। ६ ।।

[1] ' अथ दोषा. . . रजनाविति ' इति विवरणाभिमतः पाठः　[2] तिर्यातिदेशः Tj1, Tj2.　[3] कम्पसि B5, B6.　[4] भो भोः क्षात्रेण. . . विकत्थमानाः इति, भो भोः पौरजानपदाः इति च अ. रा. (४. ५६, पृ. २१६).　[5] B6 adds नदीम्; पयोधिम् Gm1, Gm3.

(पा.) दिवाह्नीति । दिवाशब्दोऽह्नीति सप्तम्यर्थे । [1]अहर्मात्रेऽपि वदन्ति ।। अथ दोषा—रजनाविति । [2]दोषा नक्तं शब्दौ रजनाविति सप्तम्यर्थे । रजनीमात्रार्थेऽपि [3]वदन्ति । अनव्ययावित्यपि वदन्ति । तथा च विश्वप्रकाशिका—(पृ. १७१, श्लो. ७; पृ. १६१, श्लो. ६४)—

' दोषः स्याद् दूषणे पापे दोषा रात्रौ भुजेऽपि च ' ।

' दोषा रात्रिमुखे रात्रावत्रानव्ययमप्यसौ ' ।

इति । ' वसतिः स्थाननक्तयोः ' इति ध्वनिमञ्जरी ।। तिर्यगर्थे साचि तिरः । तिर्यगर्थे स्त्रीलिङ्गः साचिशब्दोऽप्यस्ति । ' तिर्यक् साचि स्त्रियाम्[4] ' इति रत्नकोशः ।। अथ संबोधन—हे है भोः । अये, हन्त, हंहो शब्दा अपि स्युः ।

' हंहो सिंहणभूप तावकयशःकर्पूरमुर्वीभृतां
[5]विक्रीणन् कटकेषु जीवति चिरं श्रीमान् कलिङ्गः कविः । '

इति । रेशब्दः नीचसंबोधनार्थकः ।

' रे रे कोकिल मा भज मौनं
किंचिदुदञ्चय पञ्चमरागम् ' ।। इति ।

समया निकषा हिरुक् । एते समीपार्थे ।। ६ ।।

[1] A1 adds अपरार्धे. [2] B3 omits the three words. [3] C1 omits वदन्ति. [4] B3 adds पराक्. [5] विक्रीडन् A1.

अतर्किते तु सहसा स्यात् पुरः पुरतोऽग्रतः ।। ७ ।।
स्वाहा देवहविर्दाने श्रौषड् वौषड् वषट् स्वधा ।
किंचिदीषन्मनागल्पे प्रेत्यामुत्र भवान्तरे ।। ८ ।।

(वि.) अतर्किते तु सहसा । यथा—'सहसा विदधीत न क्रियाम्' इति (किरा. २. ३०) । अविचारितार्थस्य नाम ।। स्यात् पुरः पुरतोऽग्रतः । पुरः—'पुरः सखीनाममिमीत लोचने' इति (कु. सं. ५. १५) । पुरतः—पुरतोऽवलोक्य । अग्रतः—'प्रत्यर्थिनोऽग्रतो लेख्यम्[1]' (या. स्मृ. २. १. ६) इति । एतान्यग्रसमार्थानि ।। स्वाहा देव—वषट् स्वधा । अत्रोदाहरणानि । स्वाहा—'अग्नये स्वाहा' (तै. सं. १. ४. २८. १) । श्रौषट्—[2]'अस्तु श्रौषट्' (तै. सं. १. ६. ११. १) । वौषट्—'इन्द्राय वौषट्'।[3] वषट्—'शिखायै वषट्' (वरद. उप. २. २) । स्वधा—'स्वधा पितृभ्यः' (तै. सं. १. १. ११. १) । एते देवेभ्यो हविर्दाने वर्तन्ते ।। किंचिदीषन्मनागल्पे । किंचित्—'किंचिद् विहस्यार्थपतिं बभाषे' इति (रघु. २. ४६) । ईषत्—ईषदुष्णं पयः पिब । मनाक्—'मनागनभ्यावृत्त्या वा' इति (शिशु. २. ४३) । एतान्यल्पार्थे[4] वर्तन्ते ।। प्रेत्यामुत्र भवान्तरे । 'प्रेत्य स्वर्गे महीयते' (रामा. १. १. ९९)। अमुत्र—'इह वामुत्र वैकेषां[5] भावस्तत्र प्रयोजनम्' इति (या. स्मृ. ३. ४. १३३) । एतौ जन्मान्तरे वर्तेते ।। ७-८ ।।

[1] B6 adds यथावेदितमर्थिना. [2] भवतु J2. [3] वौषडित्येके (आप. श्रौ. २४. १४. ११). [4] अल्पार्थं वदन्ति K4, K5. [5] वामुत्र चैकेषाम् J2.

(विव.) अतर्किते तु सहसा स्यात् । यथा—'सहसा विदधीत न क्रियाम्' इति (किरा. २. ३०) ।। पुरः पुरतोऽग्रतः । एते त्रयोऽग्रशब्दसमानार्थाः । पुरः—'पुरः सखीनाममिमीत लोचने' इति (कु. सं. ५. १५) । पुरतः—पुरतोऽवलोक्य । अग्रतः—'प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना' इति (या.

स्मृ. २. १. ६) ।। स्वाहा देव—वषट् स्वधा । यदुद्देशेन पुरोडाशादिकं त्याज्यमिति श्रुतिवाक्येषु दृश्यते सा देवता देवताशब्देनोच्यते । एवं चायमर्थः संपन्नः । चोदितां देवतामुद्दिश्य द्रव्यप्रदाने प्रकाश्ये स्वाहादयः शब्दा वर्तन्ते । यथा—'अग्नये स्वाहा' (तै. सं. १. ४. १८. १) । श्रौषट्—'अस्तु श्रौषट्' (तै. सं. १. ६. ११. १) । वौषट्—'सोमस्याग्ने वीहि[1] वौषट्' (ऐ. ब्रा. ३. ५) । वषट्—'इन्द्राय वषट्' (तै. सं. ३. ५. ४. ६) इति । स्वधा—'आ स्वधेत्याश्रावयति, अस्तु स्वधेति प्रत्याश्रावयति' इति (तै. ब्रा. १. ६. ६. ५) ।। किंचिदीषन्मनागल्पे । अल्पेऽल्पार्थे वर्तन्ते । यथा—'किंचिद् विहस्यार्थपतिं बभाषे' इति (रघु. २. ४६)। ईषत्—'ईषदुष्णं पयः पिब' इति। मनाक्—'मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी' इति (शिशु. २. ४३) ।। प्रेत्यामुत्र भवान्तरे । एतद् द्वयं भवान्तरे जन्मान्तरे[2] । प्रेत्येति ल्यबन्तकप्रतिरूपकमव्ययमिदम् । ल्यबन्तत्वे तु जन्मान्तररूपार्थविरोधः स्यात् । भवो[3] मरणानन्तरभाविवर्तमानशरीरासङ्गानन्तरपरिग्रह इत्यर्थः । 'प्रेत्य स्वर्गे महीयते' (रामा. १. १. ९९) इति । अमुत्र—'अमुत्र भविता यत्ते तच्चिन्तय शुभाशुभम्' इति (स्वामी पृ. ३३९) ।। ७-८ ।।

[1] वाहीत्यनु वषट् इति मु. ग्र. (पृ. ५७). [2] Tv adds वर्तते. [3] भवं B6.

(पा.) अतर्किते तु सहसा । सहसाशब्दः अतर्कितार्थे । अकस्माच्छब्दोऽपि स्यात् । अकस्मात् कुप्यति भवान् ।। स्यात् पुरः पुरतोऽग्रतः । एते अग्रार्थे ।। स्वाहा देव—वषट् स्वधा । एते देवतानां[2] हविर्दानार्थे ।। किंचिदीषन्मनागल्पे । एते अल्पार्थे ।। प्रेत्यामुत्र भवान्तरे । एतौ भवान्तरार्थे ।। ७-८ ।।

[1] B3, C_1 omit the sentence. [2] देवताहविर्दाने एते स्युः B3.

वद् वा यथा तथेवैवं साम्येऽहो ही च विस्मये ।
मौने तु तूष्णीं तूष्णीकां सद्यः सपदि तत्क्षणे ।। ९ ।।

(वि.) [1]वद् वा यथा तथेवैवं साम्ये । अत्रोदाहरणानि । वत्—'सोमवत् प्रियदर्शनः' (रामा. १. १. १८) इति । वा—'पुष्पेक्षणैर्बिम्बितलोचनैर्वा' इति । यथा—'तस्यार्तस्य यथौषधम्' इति (रघु. १. २८) । तथा—'यथा तथैवावरजेषु वृत्तिम्' इति (रघु. १४. २१) । इव—'इन्दुः क्षीरनिधाविव' इति (रघु.

१. १२)। एवम्—'अग्निरेवं द्विजो भस्मसात्कुर्यादवमानितः' इति। एतानि[2] साम्ये वर्तन्ते ॥ अहो ही च विस्मये। 'अहो मे सौभाग्यं मम च भवभूतेश्च भणितम्' इति (भो. प्र. पृ. ५६, श्लो. २५३)। ही—'[3]हतविधिलसितानां ही विचित्रो विपाकः' इति (शिशु. ११. ६४)। एते विस्मये वर्तेते ॥ मौने तु तूष्णीं तूष्णीकाम्। तूष्णीम्—'तूष्णीमेताः क्रियाः स्त्रीणाम्' इति (या. स्मृ. १. २. १३)। तूष्णीकाम्—'जपन्नास्ते मुनिर्देवीं तूष्णीकां जलमध्यगः' इति। एते मौनस्य नामनी ॥ सद्यः सपदि तत्क्षणे। सद्यः—'सद्यो हतन्यङ्कुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे' इति (रघु. १६. १५)। सपदि—[4]'सारुन्धतीकाः सपदि प्रादुरासन् पुरः प्रभोः' इति (कु. सं. ६. ४)। एते[5] तत्क्षणार्थे वर्तेते ॥ ६ ॥

[1] वद् वा' इति विवृत्यभिमतः पाठः. [2] K5 adds पदानि. [3] J2 adds हन्त हन्त. [4] 'सपदि प्रदहत्यपेक्षितोऽग्निः' Pt2. [5] एतौ K2, K4.

(विव.) [1]वद् वा यथा तथैवैवं साम्ये। अत्र वच्छब्देन वतिप्रत्ययान्ता गृह्यन्ते। 'तेन तुल्यं क्रिया चेद्वतिः' (५. १. ११५) इति। यथा—'पुंवत्प्रगल्भा'[2] इति (रघु. ६. २०)। 'तत्र तस्येव' (५. १. ११६) इति वतिः। यथा—ब्राह्मण इव ब्राह्मणवत्। वा—'विशेषको वा विशिशेष[3] यस्यां श्रियं त्रिलोकीतिलकः स एव' इति (शिशु. ३. ६३)। यथा—'तस्यार्तस्य यथौषधम्' इति (रघु. १. २८)। तथा—'शिवः पूज्यस्तथा गुरुः' इति। इव[4]—कमलमिव मुखम्। एवम्—यथा गौरेवं गवय इति ॥ अहो हीति विस्मये। साम्ये अहो इत्यकारप्रश्लेषः। अहो इति द्व्यक्षरो निपातः। 'अहो मे सौभाग्यम्'[5] इति (भो. प्र. पृ. ५६, श्लो. २५३)। ही—'हतविधिलसितानां ही विचित्रो विपाकः' इति (शिशु. ११. ६४) ॥ मौने तु तूष्णीं तूष्णीकाम्। मौने वाग्वृत्तिपरित्यागे यथा—तूष्णीमास्ते[6] इत्यादि। '[7]तूष्णीमः काम्प्रत्ययो वक्तव्यः' (वा. ५. ३. ७१) इति काम्प्रत्यये तूष्णीकामास्ते (काशिका. २, पृ. ७०)। काम् प्रत्ययस्याज्ञानकुत्सानुकम्पाद्यर्थविशेषविवक्षायामेव विधानात् तूष्णीकां शब्दस्य मौनविशेषोऽर्थः। तूष्णींशब्दस्य मौनमात्रमर्थ इत्यर्थभेदे सत्यपि प्रधानमात्रस्याभेदात् पर्यायत्वमुक्तमिति विज्ञेयम् ॥ सद्यः सपदि तत्क्षणे। तत्क्षणे तत्काले। यथा—'सद्यो हतन्यङ्कुभिरस्रदिग्धम्' इति (रघु. १६. १५)। सपदि—'सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या' इति (कु. सं. ३. ७६) ॥ ६ ॥

[1] 'वद्वेति' पाठः, नतु 'व वा' इति; व वेति भा. दी. (पृ. ५१४)　[2] Tj2 adds प्रतिहाररक्षी　[3] प्रविवेश Tv.　[4] 'तथैवैवम्' इति विवरणाभिमतः पाठः.　[5] B5, B6 add अप्यस्ति किंचिदद्भुतमिव द्रष्टुम्.　[6] Tv adds तूष्णीं चतुर्थम्　[7] 'अकच्प्रकरणे तूष्णीमः. . .' इति काशिकायाम् (२, पृ. ७०).

(पा.) [1]वद् वा यथा तथैवैवं साम्ये । एते साम्यार्थे ।। अहो हीति विस्मये । एतौ विस्मयार्थे । तन्त्वात् हिशब्दस्यापि ग्रहणम् । 'अहो हि[2] हो अहहा च नना पश्यत विस्मये[3]' इति शृङ्गारप्रकाशिका ।। मौने तु—सपदि तत्क्षणे । एतौ तत्क्षणार्थे ।। ९ ।।

[1] 'व वा' इति भानुजीदीक्षिताभिमतः पाठः.　[2] ही B3.　[3] विस्मयार्थे A1.

दिष्टया समुपजोषं चेत्यानन्देऽथान्तरेऽन्तरा ।
अन्तरेण च मध्ये स्युः प्रसह्य तु हठार्थकम् ।। १० ।।

(वि.) दिष्टया समुपजोषं चेत्यानन्दे । यथा—'दिष्टया त्वमसि मे धात्रा [1]भीतेनेवोपपादितः' इति (रघु. १५. १८) । 'समुपजोषं भवान् जयति' इति । एते आनन्दस्य नामनी ।। अथान्तरे—मध्ये स्युः । अत्रोदाहरणानि । अन्तरे —'[2]आवयोरन्तरे जाताः सरित्सागरपर्वताः' इति (महानाटक ५. २५) । अन्तरा—'अन्तरा त्वां च मां च कमण्डलुः' [3](सर. कण्ठा. पृ. ५८) । अन्तरेण —[4]'मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः' इति (शिशु. ३. ३)। एतानि[5] मध्यार्थे वर्तन्ते ।। प्रसह्य तु हठार्थकम् । यथा—'प्रसह्य दास्यभिगमे' इति (या. स्मृ. २. २४. २९१) । एतद् हठार्थस्य बलात्कारस्य नाम ।। १० ।।

[1] भीतेनेव K4, मुद्रितग्रन्थे च (पृ. ३००).　[2] इदानीम् K6.　[3] महाभाष्य (Apte's Dict. p. 124).　[4] °सूत्रान्तर° K5, K6.　[5] एते K5.

(विव.) दिष्ठया शमुपजोषं[1] चेत्यानन्दे । इतिशब्दोऽत्र शब्दस्वरूपनिर्देशार्थः । नवानन्दार्थः । ततश्च दिष्टचादयस्त्रयः आनन्दे चित्रहर्षे वर्तन्त इति सुभूतिचन्द्रः । यथा—'देव दिष्ठया वर्धसे' इति । शमिति तालव्यादि मान्तमव्ययं च । 'शं नो वातः पवतां मातरिश्वा शं नस्तपतु सूर्यः' इति (तै. आ. ४. ४२. १) । 'शंकरः शं करोतु नः' इति । उपजोषम्—'उप-

जोषमिहास्महे' इति। तथा च वैजयन्ती--'सुखे दिष्टचोपजोषं शम्' इति (पृ. २८८, श्लो. १७)। सुबोधिनीकारस्तु--'दिष्टचा समुपजोषम्' इति पठित्वा द्वितीयं शब्दं पञ्चाक्षरदन्त्योष्ठचादि च मन्वानो 'दिष्टचा समुपजोषं च' इत्यव्ययद्वयमानन्दे वर्तत इति व्याख्याय उदाजहार--'दिष्टचा पुत्रो जातः, समुपजोषं शुभं चेति मकारान्तमव्ययद्वयमप्यत्र विज्ञेयमिति'॥ अथान्तरे--मध्ये स्युः। अन्तरे इति सप्तम्यन्तप्रतिरूपकमेकारान्तमव्ययम्। तदादाय त्रयः शब्दा यत्किंचिद्द्वयापेक्षया मध्यरूपार्थे वर्तन्ते। यथा--अन्तरे पर्वतयोः नदी। अन्तरा --'[2]अन्तरा त्वां च मां च कमण्डलुः (सर. कण्ठा. पृ. ५८)। अन्तरेण--'मातरं पितरं चान्तरेण पुत्रः' इति। 'अन्तरान्तरेण युक्ते' (२. ३. ४) इति द्वितीया। अत्र गणरत्नमहोदधिकारः[3]--'अन्तरान्तरेणेति मध्यमाधेयप्रधानमाचक्षते' इति (पृ. ३२)॥ प्रसह्य तु हठार्थकम्। प्रसह्येति ल्यबन्तप्रतिरूपको निपातो बलात्कारशब्दसमानार्थ[4] इत्यर्थः। यथा--'प्रसह्य सिंहः किल तां चकर्ष' इति (रघु. २. २७)॥ १०॥

[1] शम् उपजोषमिति विवरणाभिमतः पाठः. [2] गणरत्न° (पृ. ३२). [3] अन्तरा इति मध्यविनार्थयोः इति मुद्रितग्रन्थे दृश्यते (पृ. ३२). [4] °समार्थः B6.

(पा.) दिष्टचा समुपजोषं चेत्यानन्दे। एतौ आनन्दार्थे। [1]जोषंशब्दो नानार्थवर्गे गतः (पृ. ५९८, श्लो. २५१)॥ अथान्तरे--मध्ये स्युः। एते मध्यार्थे॥ प्रसह्य तु हठार्थकम्। प्रसह्यशब्दो [2]बलात्कारार्थे॥ १०॥

[1] B3 omits the sentence. [2] हठार्थे B3; A1 omits the sentence.

युक्ते द्वे सांप्रतं स्थानेऽभीक्ष्णं शश्वदनारते।
अभावे नह्य नो नापि मास्म मालं च वारणे॥ ११॥

(वि.) युक्ते द्वे सांप्रतं स्थाने। यथा--'[1]स्वयं छेत्तुमसांप्रतम्' इति (कु. सं. २. ५५)। स्थाने यथा--'स्थाने भावानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति' इति (रघु. ५. १६)। [2]एते द्वे युक्तार्थे वर्तेते॥ अभीक्ष्णं शश्वदनारते। यथा--'अभीक्ष्णमुष्णैरपि तस्य सोष्मणः' इति (शिशु. १. ६५)। शश्वद् भवः शाश्वतः। एतावनारतार्थं कथयतः॥ अभावे [3]नहि नो नापि। अपिशब्दाद्

नञपि । यथा—' नहि स्वात्मारामं विषयमृगतृष्णा [4]मृगयते ' इति । नो—' नो[5] चक्री किं कुलालः ' इति । न—' न मे किंचन दह्यते ' इति । अ—' अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ' इति (या. स्मृ. २. १६. १९७) । एते ऽभावे [6]नास्तीत्यर्थे वर्तन्ते ।। मास्म मालं च वारणे । अत्रोदाहरणानि । मास्म—' सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः ' इति (मेघ. १. २८) । मा—' मा भूदाश्रमपीडेति ' (रघु. १. ३७) । अलम्—' अलं महीपाल तव श्रमेण ' इति (रघु. २. ३४) । एतानि वारणार्थे वर्तन्ते ।। ११ ।।

[1] K4 adds विषवृक्षोऽपि संवर्ध्य. [2] एतौ K5. [3] ' नहि नो ' इति विवृत्यभिमतः पाठः. [4] भ्रमयति K2, K3. [5] अङ्गुल्या कः कपाटं प्रहरतीत्यादिश्लोकः (सुभा. रत्नभा. पृ. २७. श्लो. १९१). [6] अभावार्थे K5; नास्त्यर्थे K2, K6.

(विव.) युक्ते द्वे सांप्रतं स्थाने । सांप्रतमिति मकारान्तम्, स्थाने इत्येकारान्तं चेत्यव्ययमिति युक्तरूपार्थे वर्तेते । यथा—' विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ' इति (कु. सं. २. ५५) । युक्तं न भवतीत्यर्थः । स्थाने यथा—' स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ' इति (रघु. ५. १६) ।। अभीक्ष्णं शश्वदनारते । अनारते[1] सर्वकाल इत्यर्थः । यथा—अभीक्ष्णमन्नं ददाति । अजस्रं ददातीत्यर्थः । शश्वद् भवः शाश्वतः ।। अभावे नह्य नो नापि । नह्यादिचतुष्कमभावे निषेधे वर्तते । नहीति द्व्यक्षरमेकं पदम् । यथा—' नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ' इति । अकारः केवलः प्रतिषेधे । यथा—स्वयमपचन्ति परिव्राजकाः । स्वयं न पचन्तीत्यर्थः । ' हासकरमिदमधनुते नितरां शिरसीव कङ्कणमुपोढमूर्धजे ' इति माघकाव्ये च । नो—' नो चक्री किं कुलालः '[2] इति । न—' न मे किंचन दह्यते[3] ' इति । अपिशब्दाद् नञ् निषेधे यथा—' अनादिरन्तः ' इत्यादि । ' नलोपो नञः ' (६. ३. ७३) इति नकारलोपः । अत्र सुभूतिचन्द्रः—अनशब्दोऽपि निषेधे । यथा—' अनोपमा ते बुद्धिः ' इति शृङ्गारप्रकाशे इति ।। मास्म मालं च वारणे । मास्मेत्यादयस्त्रयो निवारणार्थे वर्तन्ते । यथा—' सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः ' इति (मेघ. १. २८) । मा—' मा भूदाश्रमपीडेति परिमेयपुरःसरौ ' इति (रघु. १. ३७) । अलम्—' अलं महीपाल तव श्रमेण ' इति (रघु. २. ३४) । माङ्व्यतिरिक्तः केवलोऽपि माशब्दो निपातः प्रतिषेधवचनः । यथा—' मा[4] चापलायेति गणान् व्यनैषीत् ' इति (कु. सं. ३. ४१) ।। ११ ।।

[1] Tj1, Tj2 add अनुपरते. [2] सत्यभामाश्रीकृष्णयोः चाटुश्लोकः. [3] जनकस्योक्तिरियम्—'मिथिलायां प्रदीप्तायां न मे किंचन दह्यते' इति. [4] मा भवतु चास्य पापम् B5, B6.

(पा.) युक्ते द्वे सांप्रतं स्थाने । एते युक्ते इति उचितार्थे ।। अभीक्ष्णं शश्वदनारते । अनारतार्थेऽविच्छेदेऽर्थे[1] ।। अभावे [2]नह्य नो नापि । एतेऽभावार्थे[3] ।। मास्म मालं च वारणे । एतानि वारणे इति निषेधार्थे । चशब्दाद् नह्यादयोऽपि स्युः । 'न हि नो अनमा मास्म प्रतिषेधे प्रकीर्तिताः' इति त्रिकाण्डशेषः[4] (पृ. ३६, श्लो. १०१७) ।। ११ ।।

[1] B3 adds एतौ स्तः. [2] 'नह्य नो' इति पारिजाताभिमतः पाठः. [3] B3, C1 add स्युः [4] मुद्रितग्रन्थे तु 'नञभावे निषेधे च तद्विरुद्धतदन्ययोः' इति दृश्यते.

पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाञ्जसा द्वयम् ।
प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते ।। १२ ।।

(वि.) पक्षान्तरे चेद्यदि च । यथा—'सत्यं चेत् तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्' इति (नी. श. ३७) । एतौ पक्षान्तरे वर्तेते ।। तत्त्वे त्वद्धाञ्जसा द्वयम् । उदाहरणे । अद्धा—'आराधितोऽद्धा मनुरप्सरोभिः' इति । (सर. कण्ठा. पृ. ५८) । अञ्जसा—'अञ्जसेति रुरुधुः[1] कचग्रहैः' इति (रघु. १९. ३१) । एतौ तत्त्वे निश्चये वर्तेते ।। प्रकाशे प्रादुराविः स्यात् । [2]यथा——'प्रादुरासीद् वसुंधरा' इति (रघु. १५. ८३) । 'आविर्बभूव कुशगर्भमुखं मृगाणां यूथम्' इति (रघु. ९. ५५) । एते[3] प्रकाशस्य नामनी ।। ओमेवं परमं मते । यथा—'ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभः' इति (शिशु. १. ७५) । एवम्—'एवं यदात्थ भगवन्'[4] इति (कु. सं. २. ३१) । परमम्—'ततः परममित्युक्त्वा' इति (कु. सं. ६. ३५) । एते मते ऽङ्गीकारे वर्तन्ते ।। १२ ।।

[1] रुरुदुः K2, K4. [2] K2, K4 add उदाहरणे. [3] एतौ प्रकाशार्थे वर्तेते K5.
[4] J2, K6 add आमृष्टं नः परैः पदम्.

(विव.) पक्षान्तरे चेद्यदि च। अनेकपक्षसंभावनायाम् अन्यतरपक्ष-विशेषपरिग्रहरूपार्थे द्वावेतौ शब्दौ वर्तेते। यथा च 'कोटिद्वयनिपाते एककोटि-परिग्रहः यद्यर्थः' इति वल्लभाचार्यः। यथा—'सत्यं चेत् तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्' इति (नी. श. ३७)॥ तत्त्वे त्वद्धाञ्जसा द्वयम्। यथा 'अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः' इति (रघु. १३. ६५)। अञ्जसा—'अञ्जसा वक्ति [1]सज्जनः' इति॥ प्रकाशे प्रादुराविः स्यात्। यथा—'प्रादुरासीत् प्रजापतिः' इति। आविः—'आविर्भूतप्रथममुकुलाः'[2] इति (मेघ. १. २१)॥ ओमेवं परमं मते। मतेऽङ्गीकारे ओमिति। यथा—'ओमित्युक्तवतोऽथ शार्ङ्गिणः' इति (शिशु. १. ७५)। एवम्—'ओं तथा। एवमेतद् यथात्थ त्वम्' इति। परमम्—'ततः परममित्युक्त्वा [3]प्रतस्थे मुनि-मण्डलम्' इति (कु. सं. ६. ३५)॥ १२॥

[1] अञ्जसा वक्ति साधुः इति स्वामी (पृ. ३४०).　[2] B6 adds कन्दलीश्चानुकच्छम्.
[3] Tj2 omits the latter half of the hemistich.

(पा.) पक्षान्तरे चेद्यदि च। एतौ पक्षान्तरार्थे। 'च पादपूरणे पक्षान्तरे हेतौ विनिश्चये' इति त्रिकाण्डशेषः (पृ. ३६, श्लो. १०१८)॥ तत्त्वे त्वद्धा-ञ्जसा द्वयम्। एतद् द्वयं तत्त्वे इति परमार्थे॥ प्रकाशे प्रादुराविः स्यात्। एते द्वे प्रकाशे इति प्राकट्यार्थे[1]। प्रादुरभूत्। साक्षादिति पाठे व्यवहितेऽपि स्याताम्। 'अभवन् युगपद् विलोलजिह्वा[2]युगलीढोभयसृक्कभागमाविः' इति (शिशु. २०. ४२)॥ ओमेवं परमं मते। एतानि मतार्थ[3]॥ १२॥

[1] A1 adds वर्तेते　[2] °युगवीथोभय° A1.　[3] B3 adds वर्तन्ते.

समन्ततस्तु परितः सर्वतो विष्वगित्यपि।
अकामानुमतौ काममसूयोपगमेऽस्तु च॥ १३॥

(वि.) समन्ततस्तु—विष्वगित्यपि। उदाहरणानि। 'समन्ततो वर्षति मेघसंघः' इति। परितः—'आयान्ति परितः स्त्रियः[1]' इति। सर्वतः—'त्वं सर्वतोगामि च साधकं च' इति (कु. सं. ३. १२)। विष्वक्—'विष्वक् तटेषु[2] पतति स्फुटमन्तरिक्षम्' इति। एतानि सर्वतोऽर्थे वर्तन्ते॥ अकामानु-

मतौ कामम् । यथा—' कामं [3]क्षाम्यतु यः क्षमी ' इति (शिशु. २. ४३) । एतदकामानुमतौ अनिश्चयाङ्गीकृतौ वर्तते ।। असूयोपगमेऽस्तु च । चकाराद् भवत्वित्यपि । अत्र उदाहरणे । अस्तु—' तथाविधस्तावदशेषमस्तु सः ' इति (कु. सं. ५. ८२) । भवतु—' भवतु भवत्वसुहृज्जनः सकामः ' इति । एतावसूयया अङ्गीकारे वर्तेते ।। १३ ।।

[1] श्रियः K4. [2] मेघततिम् K2, K5. [3] काम्यतु K6.

(विव.) **समन्ततस्तु—विष्वगित्यपि । समन्तत इत्यादिचतुष्टयं क्रियायाः सर्वदेशसंबन्धित्वे[1] । यथा—' समन्ततो वर्षति मेघसंघः ' इति । परितः —' आयान्ति परितः श्रियः ' इति । सर्वतः—सर्वतोऽवलोक्य । विष्वक्— ' विष्वक्तटेषु पतति स्फुटमन्तरिक्षम् ' इति । इतिशब्दः [2]एवंविधाव्ययान्तरप्रदर्शनार्थः । यथा—समन्तादवलोक्य इत्यादि ।। अकामानुमतौ कामम् । कामम् आत्मन इच्छाया अभावेऽपि परानुरोधाद् बलाद्वा कृतमङ्गीकरणम् अनुमतिः । यथा—[3]' मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ' इति (शिशु. २. ४३) । कदाचिदपि क्षमा न करणीयेति तन्मतम् । यदि करणीयेति परस्य मतं, तर्हि क्वचिदेव क्रियतामित्यर्थः काममिति मान्तेनाव्ययेन प्रकाश्यते । सुभूतिचन्द्रस्तु 'आकामानुमतौ कामम् ' इति दीर्घादिं पठित्वा निकामानुमताविति व्याचष्ट । तथा च ' कामं कामाभ्यनुज्ञायाः ' इति त्रिकाण्ड्यामुक्तम् । रुद्रस्तु उभयमप्याह— ' आकामानुमतौ काममसूयोपगमेऽपि च ' इति ।। असूयोपगमेऽस्तु च । असूयापूर्वकेऽङ्गीकारे यथा—' अलं विवादेन[4] यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः ' इति (कु. सं. ५. ८२) । चशब्दाद् भवतुशब्दोऽपीति सुबोधिनीकारः । यथा —' भवतु को दोषः ' इति ।। १३ ।।**

[1] Tv adds वर्तते. [2] अभितः, विश्वतः, समन्तात् इत्याद्यपि इति भा. दी. (पृ. ५१५). [3] Tv omits the first half. [4] विषादेन Gm3, Tv.

(पा.) समन्ततस्तु—विष्वगित्यपि । एतानि सर्वत्रार्थे । समन्ताच्छब्दोऽप्यस्ति । 'परितः सर्वतो विष्वक् समन्ताच्च समन्ततः ' इति वैजयन्ती (पृ. २८७, श्लो. ३) ।। अकामानुमतौ कामम् । कामंशब्दः अकामपूर्वकानुमतौ[1] ।

असूयोपगमेऽस्तु च । अस्तुशब्दोऽसूयापूर्वकाभ्युपगमेऽपि स्यात् । 'अस्तु स्यादभ्युपगमेऽप्यसूयापीडयोरपि' इति विश्वः[2] (पृ. १८६, श्लो. १५) ॥ १३ ॥

[1] °अनुमते B3.　　[2] मुद्रितग्रन्थे तु—'अस्तु स्यादभ्यनुज्ञानेऽप्यसूयानीह्योरपि' इति दृश्यते.

ननु च स्याद् विरोधोक्तौ कच्चित् कामप्रवेदने ।
निःषमं दुःषमं गर्ह्ये यथास्वं तु यथायथम् ॥ १४ ॥

(वि.) ननु च स्याद् विरोधोक्तौ । 'ननु चात्र [1]तुगागमः कथं भवति' इति । ननु चेति[2] विरोधोक्तौ वर्तते ॥ कच्चित् कामप्रवेदने । यथा—'आमृश्यते जानपदैर्न कच्चित्' इति (रघु. ५. ८) । एतत् कामप्रवेदने इष्टपरिप्रश्ने वर्तते ॥ निःषमं दुःषमं गर्ह्ये । यथा—निःषमं वक्ति मूर्खः । दुःषमं वर्तते वधूः । [3]एतौ गर्ह्ये निन्दार्थे वर्तेते ॥ यथास्वं तु यथायथम् । [4]यथा—'यथास्वमाश्रमैश्चक्रे' इति (रघु. १७. ६५) । यथायथं पलायन्तः[5] । एतावात्मन्यात्मीये वर्तेते ॥ १४ ॥

[1] तुरंगमः J2; नागमः K6.　　[2] एतौ K3, K4, K5.　　[3] एते गर्हे K3, K4.
[4] K2, K3 add अत्रोदाहरणे.　　[5] पलायन्ते J2.

(विव.) ननु च स्याद् विरोधोक्तौ । यथा—ननु च नित्या वेदाः; त्वदुक्तं वेदानामाप्तप्रणीतत्वं विरुद्धमित्यर्थः ॥ कच्चित् कामप्रवेदने । स्वाभिप्रायाविष्करणं कामप्रवेदनम् । यथा—'कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता' इत्यादावपि भवदीयपित्रोर्जीवनं ममाभिमतमित्यादिरर्थोऽवगन्तव्यः । केचित्तु—कामप्रवेदनशब्द इष्टपरिप्रश्ने लक्षणया वर्तत इत्याहुः ॥ निःषमं दुःषमं गर्ह्ये । निर्गतं समं निःषमम् । दुष्टं समं दुःषमम् । 'तिष्ठद्गुप्रभृतीनि च' (२. १. १७) इत्यव्ययीभावे 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' (८. ३. ८८) इति षत्वम् । तथा च महोदधौ—(पृ. १३३) 'निर्गतं समं निर्गतत्वं समस्येति वा समान्निष्क्रान्तो वा निःषमम्[1]' । 'दुष्टं[2] समं, दुष्टत्वं वा समस्य दुःषमम्' । (पृ. १३५) । [3]'अव्ययीभावश्च' (२. ४. १८, १. १. ४१) इति नपुंसकत्वमव्ययत्वं चेत्यनयोः शब्दान्तरेण समासो नास्तीति 'तिष्ठद्गुप्रभृतीनि च' (२. १. १७) इति चकारेणावधारितम्' । अन्ये त्वाहुः—'निर्गता बहवः समाः

संवत्सरा यस्मिन् शरत्संवत्सराद्यात्मके काले स कालो निःषमम् । यथा——निःषमं वक्ति मूर्खः । बहुकालसाध्यमर्थं स्वल्पावशिष्टकाले वक्तीत्यर्थः । तथा दुःषमशब्दोऽपि कालवाचनः । यथा——दुःषमं वर्तत इति । दुष्टसमावेशात् कालस्य दुष्टत्वम् । दुष्टः कालो वर्तत इत्यर्थः । उभयोरपि पुर्ववदेवाव्ययीभावत्वं षत्वं च । निःषमदुःषमकालोऽप्यतिरिक्ते गर्ह्यमात्रे तूपचाराद् निःषमदुःषमशब्दौ वर्तेते इति बोद्धव्यम् ।। यथास्वं तु यथायथम् । अत्र स्वशब्द आत्मीयवचनः । तेन यो य आत्मा यो य आत्मीयो वा तत्रोभयत्रापि यथास्वं यथायथमिति शब्दद्वयं वर्तते । 'यथास्वमिति वीप्सायामव्ययीभावः' इति काशिका । यथास्वं यथायथमिति यथाशब्दस्य द्विर्वचनं नपुंसकत्वं[4] च निपात्यते (काशिका. २, पृ. ३७६)। अत एव 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१. २. ४७) इति ह्रस्वत्वस्याव्ययगणे पाठादव्ययत्वम् । तत्रात्मवचनत्वे यथा——'यथास्वं कृतविक्रमाः' इति । 'तत्प्रसादादमी भावा ज्ञाताः सर्वे यथायथम्' इति । सर्वे पदार्थाः[5] स्वरूपतो ज्ञाता इत्यर्थः । आत्मीयवचनत्वे यथा——'अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि' इति (रघु. १३. २२) । 'यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः' इति (किरा. ८. २) ।। १४ ।।

[1] इति केचित् इति मु. ग्र. (पृ. १३३). [2] दुष्टत्वं समाया दुष्टाः समा वा यत्र तद् दुःषमम् इति मु. ग्र. (पृ. १३५). [3] तिष्ठद्गु इत्येवमादयः समासास्तिष्ठद्ग्वादिरयमित्यनेनाव्ययीभावसंज्ञा निपात्यन्ते । अयमेव निपातितः समासो भवति नान्यः इति मु. ग्र. (पृ. १३२). [4] नपुंसकलिङ्गता इति मु. ग्र. (२, पृ. ३७६). [5] वेदार्थाः B5, B6.

(पा.) ननु च स्याद् विरोधोक्तौ । ननुचशब्दो विरोधोक्तौ स्यात् । प्रश्नेऽपि स्यात् । तथा च विश्वः 'ननुच प्रश्नदृष्टचोक्तचोः' इति (पृ. १८६, श्लो. ११) ।। कच्चित् कामप्रवेदने । कच्चिच्छब्दः कामप्रवेदनायाम्[1] । प्रश्नवितर्कयोरपि स्यात् । 'कच्चित् प्रश्नवितर्कयोः' [2]इति विश्वः (पृ. २८७, श्लो. १५) ।। निःषमं दुःषमं गर्ह्ये । एते गर्ह्यार्थे स्याताम् ।। यथास्वं तु यथायथम् । म्वेषां स्वेषामित्यस्मिन्नर्थे स्याताम्[3] ।। १४ ।।

[1] A1 adds वर्तते. [2] मुद्रितग्रन्थे तु 'किंस्वित् प्रश्ने वितर्के च' इति दृश्यते. [3] A1 adds 'तमतमकु अनेटि अर्थमंदु'

मृषा मिथ्या च वितथे यथार्थं तु यथातथम् ।
स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः ।। १५ ।।

(वि.) मृषा मिथ्या च वितथे । यथा—'भवन्ति[1] नोद्दामगिरां कवीना-मुच्छ्रायसौन्दर्यगुणा मृषोद्याः[2] ' इति (शिशु. ४. १०) । मिथ्या—' तामूचतुस्ते प्रियमप्यमिथ्या ' इति (रघु. १४. ६) । एतावनृते वर्तेते ।। यथार्थं तु यथातथम् । यथा—यथार्थमुक्तवानासीत् । यथातथम्—गुरुर्यथातथं वक्ति । एतौ सत्ये वर्तेते ।। स्युरेवं—धारणवाचकाः । यथा—' एवमेतद् यथा प्राह विष्णुस्तु जगदीश्वरः ' इति । तु—' रावणं [3]तु दुरात्मानमवधीद् राघवः पुनः ' इति । वा—' व्यासो [4]वा सर्वधर्मज्ञः ' इति । एव—' त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि ' इति (शिशु. १. ३१) । एतेऽवधारणे[5] निश्चयार्थे वर्तन्ते ।। १५ ।।

[1] K5 omits the first half of the hemistich.　[2] मृषार्थाः K6.　[3] वै J2; हि K4.　[4] पुनः वा एव इति विवृत्यभिमतः पाठः.　[5] अवधारणार्थे K5.

(विव.) मृषा मिथ्या च वितथे । वितथेऽप्रामाणिके वचसि वस्त्वन्तरे वा यथा—मृषा भाषसे, मिथ्या वदसि । मिथ्याभूतमिदं जगत्, प्रपञ्चो मिथ्या इति । यथार्थं तु यथातथम् । अर्थं वस्तुतत्त्वमनतिक्रम्य यथार्थम् । ' तथाशब्दः[1] सत्यवचने ' इति महोदधौ (पृ. ४२२) । तथा सत्यमनतिक्रम्य यथातथम् । ' यथातथयथापुरयोः पर्यायेण ' (७. ३. ३१) इति निपातनात् साधुत्वम् ।। स्युरेव तु—धारणवाचकाः । एवशब्दादयः पञ्च स्वेतरनिषेधगर्भितनिश्चयज्ञान-वाचकाः । यथा—' न वैव द्रव्याणि ' इति । केचित् एवमिति सबिन्दुकं पठित्वो-दाहरन्ति—' एवमेतत् कः संदेहः ' इति (रत्ना. १. ७-) । तु—' आत्मा सव तु पश्यति ' इति । आत्मैव पश्यतीत्यर्थः । पुनः—' विप्रः[2] पुनः पूज्यतमः[3] समस्तैः' इति । विप्र एव पूज्य इत्यर्थः । वै—' न वै ब्राह्मणे श्री रमते ' इति । न रमत एवेत्यर्थः । च—' आत्मा च सच्चिदानन्दः ' इति प्रामाणिकप्रथा । [4]केचित्तु वैवेत्यन्तिमं शब्दं पठन्ति । यथा—' सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ' इति (कु. सं. २. ६०) । अत्र न तृतीया व्यक्तिरित्यवधारणं द्वाभ्यां वाशब्दाभ्यां गम्यते ।। १५ ।।

[1] यथातथं सत्यम् इति मु. ग्र. [2] विप्रः पुनः पूज्यः इति स्वामी (पृ. ३४०). [3] पूज्यतमैः B6. [4] 'पुनर्वै च' इति विवरणाभिमतः पाठः; 'चान्वाचये समाहारे अन्योन्यार्थे समुच्चये। पक्षान्तरे तथा पादपूरणेऽप्यवधारणे'।। इति रुद्रः इति भा. दी. (पृ. ५१६).

(पा.) मृषा मिथ्या च वितथे। एते वितथार्थे स्याताम् ।। यथार्थं तु यथातथम्। एते सत्यार्थे ।। स्युरेव तु--धारणवाचकाः। एते पञ्च अवधारणार्थकाः स्युः ।। १५ ।।

प्रागतीतार्थकं नूनमवश्यं निश्चये द्वयम् ।
संवद् वर्षेऽवरे त्ववर्गामेवं स्वयमात्मना ।। १६ ।।

(वि.) प्रागतीतार्थकम्। यथा--'प्रपेदिरे प्राक्तनजन्मविद्याः' इति (कु. सं. १. ३०)। एतदतीतार्थके वर्तते ।। नूनमवश्यं निश्चये द्वयम्। यथा--'नूनं मत्तः परं वंश्याः' इति (रघु. १. ६६)। अवश्यम्--'अवश्यं [1]यातारश्चिरतरमुषित्वापि विषयाः' इति (वै. श. पृ. ६१, श्लो. १५७)। [2]एतौ निश्चये वर्तेते ।। संवद् वर्षे। यथा--'रामः पञ्चदशे संवदयोध्यां प्रविवेश ह' इति। एतद् [3]वर्षे संवत्सरे वर्तते ।। [4]अवरे त्ववर्क्। यथा--'अर्वाक् सपिण्डीकरणं यस्य संवत्सराद् भवेत्[5]' इति (या. स्मृ. १. २०. २५५)। एतदवरार्थे[6] वर्तते ।। आमेवम्। यथा--'आं करोमि तव प्रियम्' इति। एतदेवमर्थेऽङ्गीकारे वर्तते ।। स्वयमात्मना। यथा--[7]'स्वयंकृतप्रसादस्य' इति (शिशु. २. ११०)। एतदात्मना[8] इति तृतीयार्थे वर्तते ।। १६ ।।

[1] स्थिरपरिगृहीताश्च K3, K6. [2] एते J2. [3] संवदिति पदं वत्सरे वर्तते J2, K5. [4] अधरे K5, K6. [5] भवति K6. [6] अधरार्थे K5. [7] 'स्वयं कृतं वा यदृणं' (या. स्मृ. २. ३. ४६) K2, K3. [8] आत्मनि K5, K6.

(विव.) प्रागतीतार्थकम्। यथा--'प्रपेदिरे प्राक्तनजन्मविद्याः' इति प्रागुक्तम् (कु. सं. १. ३०) ।। नूनमवश्यं निश्चये द्वयम्। यथा--'नूनं हन्तास्मि [1]रावणम्' इति। अवश्यम्--'अवश्यं यातारश्चिरतरमुषित्वापि विषयाः' इति (वै. श. १५७) ।। संवद् वर्षे। वर्षे वत्सरे। यथा--'रामः पञ्चदशे संवदयोध्यां प्रविवेश ह' इति। 'संवत्तृतीये चूडाकर्म' इति; तृतीये वर्षे चूडाकरणं कर्तव्य-

मित्यर्थः ॥ अपरे त्वर्वाक् । परस्मादुत्कृष्टादन्योऽपरः । अवर इत्यन्तस्थमध्याक्षरपाठेऽप्ययमर्थः[2] । यथा—'अर्वाक् तु ब्रह्महत्यायाः षडब्दं कृच्छ्रमाचरेत्' इति ॥ आमेवं । आमेवमिति द्वयं परोदीरितार्थस्याङ्गीकारे वर्तते । ओमेवं परममिति प्रागुक्तम् (पृ. ६२६, श्लो. १२) । [3]शब्दद्वयं तु स्वपरयोरुभयोरपि संमतस्याङ्गीकारे इति भेदः । यथा—आं किं करोमि, एवं करोमि इति ॥ स्वयमात्मना । तृतीयैकवचनान्तस्यात्मशब्दस्य यावानर्थः तत्र स्वयमित्यव्ययं वर्तत इत्यर्थः । यथा—'स्वयंकृतप्रसादस्य' इति (शिशु. २. ११०) ॥ १६ ॥

[1] रावण: Gm1, Gm3.　[2] अयमेवार्थः B6.　[3] शब्दत्रयं B6.

(पा.) प्रागतीतार्थकम् । प्राक्शब्दोऽतीतार्थकः स्यात् ॥ नूनमवश्यं निश्चये द्वयम् । एते द्वे निश्चयार्थे स्याताम् ॥ संवद् वर्षे । संवच्छब्दः[1] संवत्सरार्थे[2] ॥ अवरे त्वर्वाक् । अर्वाक् शब्दः अवरे इत्यधस्तादर्थे ॥ आमेवम् । एते द्वे ऽनुज्ञार्थे[3] वर्तेते ॥ स्वयमात्मना । एतदेकमात्मनेति तृतीयान्तार्थे ॥ १६ ॥

[1] A1 adds वर्षे इति.　[2] C1 adds वर्तते.　[3] अङ्गीकारार्थे B3.

अल्पे नीचैः महत्युच्चैः प्रायो भूम्न्यद्रुते शनैः ।
सना नित्ये बहिर्बाह्ये स्मातीतेऽस्तमदर्शने ॥ १७ ॥

(वि.) अल्पे नीचैः । यथा—'तथापि नीचैर्विनयादृश्यत' इति (रघु. ३. ३४)। एतदल्पार्थे वर्तते ॥ महत्युच्चैः । यथा—'शृङ्गमुच्चैर्गिरेरिदम्' इति । एतद् महदर्थे वर्तते ॥ प्रायो भूम्नि । यथा—'प्रायो नववधूः कान्ता[1]' इति । एतद् भूमार्थे वर्तते ॥ अद्रुते शनैः । यथा—आलिङ्गति शनैः शनैः । एतदद्रुतेऽशीघ्रार्थे वर्तते ॥ सना नित्ये । यथा—सनातनः । [2]एतन्नित्यार्थं कथयति ॥ वहिर्बाह्ये । यथा—'दासीकुम्भं [3]बहिर्ग्रामान्निनयेरन् स्वबान्धवाः' इति (या. स्मृ. ३. ५. २९४) । एतद् बाह्यार्थे वर्तते ॥ स्मातीते । यथा—'सेवते स्म शयनं पराङ्मुखी' (कु. सं. ८. २) इति । एतदतीतार्थे वर्तते ॥ अस्तमदर्शने । यथा—'[4]अस्तमेति [5]युगभग्नकेसरैः' इति । एतददर्शननाम ॥ १७ ॥

[1] कान्तं K2, K3, K4. [2] एतद् नित्ये वर्तते K5. [3] बहिरगात् J2. [4] अस्तमिति K6. [5] K5, K6 omit.

(विव.) अल्पे नीचैः । 'यथा-- तथापि नीचैर्विनयाददृश्यत' इति (रघु. ३. ३४) ।। महत्युच्चैः । यथा--महान् वातो वातीत्यर्थे उच्चैर्वातो वाति । सकारान्तावेतौ[1] ।। प्रायो भूम्नि । भूम्नि बाहुल्ये । यथा-- 'प्रायः प्रत्ययमाधत्ते [2]स्वगुणेषूत्तमादरः' इति (कु. सं. ६. २०)। अकारान्तः प्रायशब्दः [3]यान्तेषु प्रागुक्तः (पृ. ४३३, नाना. १५३) । अद्रुते शनैः । अद्रुते शीघ्ररहित इत्यर्थः । यथा--शनैश्चर इति ।। सना नित्ये । यथा--'पूर्णं ब्रह्म सनातनम्' इति । नित्यमित्यर्थः ।। बहिर्बाह्ये । अनावृतो देशो बाह्यम् । तत्र यथा--ग्रामाद् बहिरिति । स्मातीते । अतीतकालसंबन्धिनि भूतार्थ इत्यर्थः । 'सेवते स्म शयनं पराङ्मुखी' (कु. सं. ८. २) इति ।। अस्तमदर्शने । अदर्शनं दर्शनाभावो नाशप्रयुक्तः तिरोभावप्रयुक्तो वा । तत्रोभयत्र मान्तमव्ययं वर्तते । यथा--अस्तं गतो रावणः,[4] अस्तं गतो भास्करः[5] इति ।। १७ ।।

[1] B6 adds नीचैरुच्चैःशब्दौ. [2] प्रगुणेषु Tj1, Tj2. [3] ब्रह्मवर्गेऽनशनेऽपि प्रायशब्दोऽकारान्तः (१, पृ. ४८०). [4] B6 adds इति नाशार्थे; [5] इति तिरोधानार्थे.

(पा.) अल्पे नीचैः । नीचैःशब्दोऽल्पार्थे· नीचार्थे चापि [1]स्यात् ।। महत्युच्चैः । उच्चैःशब्दो महदर्थे स्यात् । उच्चार्थेऽपि स्यात् ।। प्रायो भूम्नि । प्रायःशब्दो भूमार्थे[2] ।। अद्रुते शनैः । शनैःशब्दोऽशीघ्रार्थे ।। सना नित्ये । सनाशब्दो नित्यार्थे वर्तते ।। बहिर्बाह्ये । बहिःशब्दो बाह्यार्थे ।। स्मातीते । स्मशब्दोऽतीतार्थे । स्मृतिनिषेधयोरपि स्यात् । 'स्मृतौ वृत्ते निषेधे स्म' इति वैजयन्ती (पृ. २८४, श्लो. ७) ।। अस्तमदर्शने । अस्तंशब्दोऽदर्शनार्थे ।। १७ ।।

[1] A1 adds अधस्तादर्थेऽपि स्यात्. [2] B3 adds वर्तते.

अस्ति सत्त्वे रुषोक्तावु ऊं प्रश्नेऽनुनये त्वयि ।
हुं तर्के स्यादुषा रात्रेरवसाने नमो नतौ ।। १८ ।।

(वि.) अस्ति सत्त्वे। यथा—'आस्तिकः श्रद्दधानश्च' इति (या. स्मृ. १. १०. २६८)। एतत् सत्त्वे सतोभावे वर्तते ।। रुषोक्तौ हुम्[1]। 'प्रसह्य[2] हुंकारनिर्वर्तितः पुरा' इति (कु. सं. ५. ५४)। [3]उमिति वा पाठः। यथा—'[3]उमित्युवाच पुरतः पुरुषस्य कान्ता' इति। एतद् रुषोक्तौ वर्तते ।। उ प्रश्ने। 'उ [4]आगतः शत्रुः' इति। एतत् प्रश्नार्थे वर्तते ।। अनुनये त्वयि। यथा—'[5]अयि क्रियार्थं सुलभं समित्कुशम्' इति (कु. सं. ५. ३३)। [6]एतदनुनये वर्तते ।। [7]तर्के तु स्यात्। [8]यथा—'स्याच्चेत् किं नोपपद्यते[9]' इति (कु. सं. ६. ६१)। 'तर्के नु स्यात्' इति वा पाठः। यथा—रामो नु लक्ष्मणो नु इति। एतौ तर्के वर्तेते ।। उषा रात्रेरवसाने। यथा—उषा जनाः प्रबुध्यन्ते इति। एतत् प्रभाते वर्तते ।। नमो नतौ। यथा—नमो विष्णवे। एतन्नत्यर्थे वर्तते ।। १८ ।।

[1] हुमिति विवृतौ विवरणे च पाठः.　[2] असह्यहुंकार° इति मु. ग्र. (पृ. ५४).
[3] ऊमिति K_4, K_5.　[4] मागतः J_2, K_4.　[5] अपि इति मु. ग्र. (पृ. ५७).
[6] अयीत्यनुनये K_5.　[7] तर्के स्यात् स्यात् K_2.　[8] K_5 adds स्यादिति तर्के वर्तते.
[9] नोपदिश्यते इति मु. ग्र. (पृ. ७६).

(विव.) अस्ति सत्त्वे। अस्तीति कालसामान्ये तिङन्तप्रतिरूपकमव्ययं सत्तावाचकम्। यथा—'षण्णां पदानामस्तित्वम्' 'अस्तिक्षीरा ब्राह्मणी' (काशिका. १, पृ. १०६) इति ।। रुषोक्तौ हुम्। रोषेण वचसि हुमिति निपातो वर्तते। यथा—'वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते' इति भवभूतिः (उत्तर. ५. ३५)। अनुचितभवदीयवचनश्रवणेनास्माकं रोषोक्तिर्वर्तत इत्यर्थः। अन्ये तु रुषोक्तावूम् इति मकारान्तं दीर्घमोष्ठ्यं स्वरं पठन्ति। यथा—ऊं सैव भवतः प्रिया। भवतो मनसि या वर्तते सैव प्रिया नाहं प्रियेत्यर्थः ।। [1]उं प्रश्ने। परोदीरितं मनसिकृत्य प्रकृतप्रसङ्गविशेषजिज्ञासाविष्करणमिह प्रश्नशब्देन विवक्षितम्। अत्र उमिति ह्रस्वो मान्तो निपातो वर्तते। 'उंकोनुट्टु पेरु' ।। अनुनये त्वयि। यथा—'अयि जीवितनाथ जीवसि' इति (कु. सं. ४. ३)। 'अयि मुग्धे' इति च ।। तर्के नु स्यात्। द्वयमूहे। यथा—'अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु' इति (किरा. ९. ७)। स्यात्—'यद्यग्निर्न स्यात् तर्हि धूमोऽपि न स्यात्' इति ।। उषा रात्रेरवसाने। रात्रेश्चतुर्थप्रहरोत्तरार्धे

घटिकाचतुष्टये[2] । यथा—' उषातनो वायुरुपैति मन्दम् ' इति । नमो नतौ । नतौ प्रणामे । यथा—' नमो धर्माय महते नमः कृष्णाय वेधसे ' इति (भागवत. १२. १२. १) । ' नमः[3] स्वस्ति . . . ' इत्यादिना (२. ३. १६) चतुर्थी । ' साक्षात्प्रभृतीनि च ' (१. ४. ७४), ' विभाषा कृञि ' (१. ४. ७२) इति गतिसंज्ञापक्षे ' नारायणं नमस्कृत्य ' इत्यादौ ' उपपदविभक्तेः कारकविभक्ति- र्बलीयसी ' (परि. २. ३. १६) इति द्वितीयैव भवति । ' नमोवरिवश्चित्रङः क्यच् ' (३. १. १९) इति क्यच्प्रत्यये तु ' नारायणं नमस्यति ' । ' स्वयंभुवे नमस्कृत्य ', ' ब्राह्मणेभ्यो नमस्कृत्य ' इत्यादयः प्रयोगाः ' पत्ये शेते ' ' युद्धाय संनह्यति ' इत्यादिवदुपपादनीयाः ।। १८ ।।

[1] उ प्रश्ने Tv; ऊम् B6. [2] Tj1, Tj2 add उषाशब्दो वर्तते. [3] नमनम् । ' णम प्रह्वत्वे ' । असुन् (उ. ४. १८९) [नमः] इति भा. दी. (पृ. ५१७).

(पा.) अस्ति सत्त्वे । अस्तिशब्दः सत्त्वे इति विद्यमानतायां वर्तते । अस्ति [1]देवदत्तः, अभूत् भवति भविष्यति वा इत्यर्थः । ' अस्त्याह कालसामान्ये तिङन्तप्रतिरूपकम् ' इति त्रिकाण्डशेषः (पृ. ३७, श्लो. १०२५) ।। रुषोक्तावूम् । ऊंशब्दो रोषोक्तौ दीर्घादिः[2] ।। उं प्रश्ने । उं शब्दः प्रश्नार्थे ह्रस्वादिः ।। अनुनये त्वयि । अयिशब्दो ऽनुनयपूर्वकः प्रश्नार्थे[3] । ' अयि प्रश्नेनानुनये ' इत्यमरमाला ।। तर्के नु स्यात् । नुस्याच्छब्दौ तर्कार्थे[4] ।। उषा रात्रेरवसाने । उषाशब्दो रात्रिशेषे । उषःशब्दोऽप्यस्ति । ' उषा स्याद् रजनीशेष उष इत्यपि दृश्यते ' इति रभसः ।। नमो नतौ । नमःशब्दो नत्यर्थे । अनव्ययनमःशब्दोऽप्यस्ति । ' यत्तन्नमः किमपि शुश्रुम देवताभ्यः ' इति । ' त्वामन्तरेण नमसामवसानभूमिम् ' इति च ।। १८ ।।

[1] A1 omits देवदत्तः. [2] B3, C1 add अनुनासिकः ; ऊ A1. [3] A1 adds प्रश्नो नामानुवर्तनम्, ' अनुवर्ति स्युन्नुंट '. [4] B3 adds स्याताम्.

पुनरर्थेऽङ्ग निन्दायां दुष्ठु सुष्ठु प्रशंसने ।
(आमानुगुण्ये स्मरणेऽये फड् विघ्ननिराकृतौ ।
अङ्गीकृतौ स्यादधिकं हीनसंबोधने तु रे ।।)
सायं साये प्रगे प्रातः प्रभाते निकषान्तिके ।। १९ ।।

(वि.) पुनरर्थेऽङ्ग । यथा—'मूर्खस्तु[1] नावमन्तव्यः किमङ्ग विद्वान्' इति (स्वामी पृ. ३४१) । एतत् पुनरर्थे वर्तते । निन्दायां दुष्ठु । यथा—दुष्ठुवृत्तिर्दुर्जनः स्यात् । एतन्निन्दायां वर्तते ॥ सुष्ठु प्रशंसने । यथा—सुष्ठु भुक्तं मया गृहे । एतत् प्रशंसायां[2] वर्तते ॥ [3]आमानुगुण्ये । यथा—आम वर्तते । एतदानुगुण्ये स्ववशत्वे वर्तते । स्मरणेऽये । यथा—अये पूर्वं कृतं मया । एतत् [4]स्मरणे वर्तते ॥ फड् विघ्ननिराकृतौ । 'अस्त्राय फट्' इति (वरदपूर्वतापन्युपनिषत् २. २) । एतद् विघ्ननिराकरणे वर्तते ॥ [5]अङ्गीकृतौ स्यादथ किम् । यथा—देवदत्त घटं करोषि? अथ किम् । एतदङ्गीकारे वर्तते ॥ हीनसंबोधने तु रे । यथा—रेरे [6]पापिन् ममान्तिकादपसर । एतत् हीनसंबोधने वर्तते ॥ सायं साये । यथा—[7]'विन्यस्तसायंतनमल्लिकासु' इति । एतत् साये दिनान्ते वर्तते ॥ प्रगे प्रातः प्रभाते । यथा—[8]'इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद् बहिः' इति (शिशु. १२. १) । प्रातः—'प्रातः संध्यामुपासीत' इति (या. स्मृ. १. ५. ६८) । एतौ प्रभाते वर्तेते ॥ निकषान्तिके । यथा—'विलङ्घ्य लङ्कां निकषा हनिष्यति' इति (शिशु. १. ६८) । [9]एतत् समीपार्थे वर्तते ॥ १९ ॥

[1] मूर्तिस्तु K_4. [2] प्रशंसनार्थे K_4. [3] 'आमानुगुण्ये . . . हीनसंबोधने तु रे' इति श्लोकोऽधिकः पाठः. [4] स्मरणार्थे J_2. [5] अङ्गीकृते K_4. [6] पाप J_2, K_4. [7] सायं संयमिनस्तस्य J_2. [8] J_2, K_2 omit the first two words. [9] निकषा इत्यन्तिकार्थे वर्तते K_5.

(विव.) पुनरर्थेऽङ्ग । अत्र पुनरर्थे भेदरूपः । यथा—'मूर्खोऽपि नावमन्तव्यः किमङ्ग विद्वान्' इति मुरारिनाटके । 'नारकेऽपि तं चोत्तिष्ठमानं पौरजानपदाः प्रकृतयो ऽप्यनूत्तिष्ठेरन्[1] किमङ्ग संबन्धिबान्धवाः' इति । किंपुनः संबन्धिबान्धवा इत्यर्थः ॥ निन्दायां दुष्ठु । यथा—दुष्ठु जल्पति । गर्हितं वदतीत्यर्थः ॥ सुष्ठु प्रशंसने । यथा—सुष्ठु भाष्यकारेण इति ॥ [2]आमानुगुण्ये । आनुगुण्ये आनुकूल्ये । यथा—आम मैथिलि । आम इति ह्रस्वान्तोऽयं निपातितः स्मरणेऽये । यथा—'अये पूर्वं कृतम्' इति पूर्वं मया कृतं स्मृतमित्यर्थः ॥ फड विघ्ननिराकृतौ । यथा—'हुं फट्' 'अस्त्राय फट्' (वरद. उप. २. २.) ॥ अङ्गीकृतौ स्यादथ किम् । यथा—'देवदत्त किं भोक्ष्यसे' इति पृष्ट आह 'अथ

किम्' इति ।। हीनसंबोधने तु रे । यथा—'रे रे रावण' इति । केचित् 'हीन-संबोधने त्वरे' इति स्वरादिद्व्यक्षरं पठित्वोदाहरन्ति—यथा—'रे रे वानर को भवानहमरे त्वत्सूनुहन्ताहवे' इति । इह कैश्चित् टीकाकारैः 'आमानुगुण्ये' इत्यादिश्लोको न व्याख्यातः न पठितश्च । सायं साये । अत्र साय इति सप्तम्या विनिर्दिशन्ननव्ययोऽप्यकारान्तः सायशब्दोऽस्तीति दर्शयति । कालवर्गेऽप्यकारान्त उक्तः[3] (पृ. ७४) । स च सायाह्न इत्यादौ दिनान्ते वर्तते । '[4]सायमण्डनमभि त्वरयन्त्यः' (किरा. ९. ६) इत्यादौ निशामुखे । अत्रोभयत्रापि सायमिति मान्तमव्ययं भवति । यथा—'सायंतन्यपरत्र चेन्मृततिथिः प्रत्याब्दिके मासिके सा ग्राह्या' इति दिनान्ते । '[5]सायं प्रातरग्निहोत्रं जुहोति' इति निशामुखे ।। प्रगे प्रातः प्रभाते । प्रगे इत्येकारान्तमव्ययम् । यथा—'प्रगेतनो वायुरुपैति मन्दम्' इति । प्रातः—'प्रातःसंध्यामुपासीत' इति (या. स्मृ. १. ५. ९८) ।। निकषान्तिके । यथा—'विलङ्घ्य लङ्कां निकषा हनिष्यति' इति (शिशु. १. ६८) । लङ्कायाः समीपे इत्यर्थः । 'अभितःपरितःसमयानिकषाहाप्रतियोगेषु च दृश्यते' (वा. १. ४. ४८) इत्यनेन निकषाशब्दयोगे लङ्काशब्दस्य द्वितीया ।। १९ ।।

[1] प्रकृतयोऽनुतिष्ठेरन् Tj1, Tj2. [2] विवरणेऽपि श्लोकोऽयमधिकः पठितः. [3] 'सायः संध्या पितृप्रसूः' इति (पृ. ७४). [4] सायमण्डलमिति मु. ग्र. (पृ. १७८). [5] सायं प्रातर्जुहोति इति कौशिकसूत्रे (७३. १६).

(पा.) पुनरर्थेऽङ्ग । अङ्गशब्दः [1]पुनरर्थे ।। निन्दायां दुष्ठु । दुष्ठुशब्दो निन्दार्थे ।। सुष्ठु प्रशंसने । सुष्ठुशब्दः प्रशंसायाम् ।। सायं साये । सायंशब्दः साये इति दिवसावसाने ।। प्रगे प्रातः प्रभाते । एते द्वे दिवसादौ[2] ।। निकषान्तिके । निकषाशब्दः समीपार्थे[3] ।। अनुक्तम्—अत्यन्ताय स्यान्नितान्ते । अत्यन्तायशब्दो नितान्तार्थे स्यात् ।। १९ ।।

[1] C1 adds स्यात्. [2] प्रभातेऽर्थे A1. [3] B3 adds the verse 'आमानुगुण्ये . . . हीनसंबोधने तु रे'.

परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ।
अद्यात्राह्न्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ।। २० ।।
तथाधरान्यान्यतरेतरात् पूर्वेद्युरादयः ।

(वि.) परुत्परारि—पूर्वतरे यति । पूर्वे पूर्वतरे यति वर्तमाने च क्रमेण परुच्छब्दः परारिशब्द ऐषमःशब्दश्च [1]वर्तते । अत्रोदाहरणे श्लोकः—

'परारिसंचितं वित्तं परुन्नष्टमभोगतः ।
[2]ऐषमश्चीयते यत्नात् [3]तस्य किं वा भविष्यति' ।।

इति ।। अद्यात्राह्नि । अत्राह्नि अस्मिन् वर्तमानेऽहनि अद्यशब्दो वर्तते । यथा—[4]'अरावणमरामं वा जगदद्येति निश्चितः' इति (रघु. १२. ८३) ।। अथ पूर्वेऽह्नीत्यादौ—पूर्वेद्युरादयः । अस्यार्थः—पूर्वोत्तरापरात् तथा अन्यान्यतरेतरात् शब्दाच्च पूर्वेऽह्नीत्यादौ [5]पूर्वेद्युरादयः शब्दा वर्तन्ते । अत्र क्रमेणोदाहरणानि—पूर्वेद्युः—'निमन्त्रयेत पूर्वेद्युः' इति (या. स्मृ. १. १०. २२५) । उत्तरेद्युः—'नान्दीमुखादुत्तरेद्युर्विवाहः' इति । अपरेद्युः, अधरेद्युः—'आगतानपरेद्युस्तानधरेद्युः समागताः[6]' इति । अन्येद्युः—'अन्येद्युरात्मानुचरस्य भावम्' इति (रघु. २. २६)। अन्यतरेद्युः—'पञ्चमीषष्ठयोरन्यतरेद्युः पितरं द्रक्ष्यसि'। इतरेद्युः—[7]कष्टदिनादितरेद्युः प्रियो द्रष्टव्यः ।। २० ।।

[1] वर्तन्ते K_4, K_5.　[2] एषमश्च यते K_5, K_6.　[3] ततः K_6.　[4] K_3, K_4 omit the first half.　[5] पूर्वेद्युरित्यादयः K_5.　[6] समागतान् K_2, K_3.　[7] अष्टदिन° J_2.

(विव.) परुत्परारि—पूर्वतरे यति । पूर्वस्मिन्नब्दे परुच्छब्दः । पूर्वतरे वर्षे परारिशब्दः । यति वर्तमाने वर्षे ऐषमः इत्यर्थः । 'सद्यःपरुत्परार्यैषमः . . .' (५. ३. २२) इत्यत्र काशिका (२, पृ. ६१)—'पूर्वपूर्वतरयोः परभावो निपात्यते[1] उदारी च प्रत्ययौ संवत्सरेऽभिधेये । पूर्वस्मिन् संवत्सरे परुत्, पूर्वतरे संवत्सरे परारि । इदम इश्भावः समसण्प्रत्ययो निपात्यते संवत्सरेऽभिधेये । "इदम[2] इश्" (५. ३. ३) इतीशादेशः आदिवृद्धिश्च । अस्मिन् [3]संवत्सरे ऐषमः ।' यथा—

**'परारिसंचितं वित्तं परुन्नष्टमभोगतः ।
ऐषमश्चीयते यत्नात् तस्य किं वा भविष्यति ।।'**

तथा च—

**'परारिसंदर्शितसंनिवेशौ परुत्पराभूतसरोजकोशौ[4] ।
इमावियन्तौ पुनरैषमस्ते कुचौ कियन्तौ पुरतो भवेताम् ।।'**

इति ॥ अद्यात्राह्नि । अत्र वर्तमानेऽहनि, अधिकरणार्थप्रधाने । यथा—'अद्याहं वसन्तोत्सवे सबहुमानमाहूय' इति (रत्ना. १. ५-) । अथ पूर्वेऽह्नीत्यादौ—पूर्वेद्युरादयः । अस्यार्थः—[5]पूर्व उत्तर अपर इत्येतेभ्यः, अधर अन्य अन्यतर इतर इत्येतेभ्यश्च सप्तभ्यः शब्देभ्यः क्रमेण पूर्वेऽह्नि उत्तरेऽह्नि अपरेऽह्नि इत्याद्यधिकरणत्वविशिष्टार्थविवक्षायाम् एद्युसिप्रत्यये, पूर्वेद्युः उत्तरेद्युः अपरेद्युः अधरेद्युः अन्येद्युः अन्यतरेद्युः इतरेद्युः इत्येते सप्त शब्दा भवन्ति । 'सद्यः परुत् परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः' (५. ३. २२) इति निपातनादेषां साधुत्वम् । यथा—'पूर्वेद्युर्नान्दीमुखम्' इति । 'पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः पूर्ववासरे' इति रुद्रवाक्यात् पूर्वेद्युशब्दः प्रातरर्थेऽपि वर्तते । उत्तरेद्युः—नान्दीमुखादीनामुत्तरेद्युर्विवाहः । अपरेद्युः—तस्मिन्नपरेद्युर्वा गृहप्रवेशः । अधरेद्युः—सर्वत्रोपवासदिनादधरेद्युरेकभुक्तं कुर्यात् । अन्येद्युः—'अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः' इति (रघु. २. २६) । अन्यतरेद्युः—'प्रतिपत्पञ्चदश्योरन्यतरेद्युरागमिष्यत् प्रभाकरः' इति । इतरेद्युः—'रिक्ततिथेरितरेद्युर्द्रष्टव्यो राजा' इति ॥ २० ॥

[1] B6, Tv omit निपात्यते. [2] इदं वाक्यं मुद्रितग्रन्थे न दृश्यते. [3] वत्सरे Gm3, Tv. [4] °पयोजकोशौ Tv. [5] अथ पूर्वेऽह्नीत्याद्यधिकरणविशिष्टार्थविवक्षायामेद्युसिप्रत्यये पूर्वेद्युः . . . सप्त शब्दा भवन्ति Tv.

(पा.) परुत्परारि—पूर्वतरे यति । परुत् परारि ऐषमः [1]इत्येते शब्दाः [2]पूर्वपूर्वतरवर्तमानवर्षेषु स्युः । यथा—

'परारिसंदर्शितसंनिवेशौ परुत्पराभूतसरोजकोशौ ।
[3]तथैषमस्तालफलोपमौ तौ स्तनौ कियन्तौ पुरतो भवेताम् ॥'

इति ॥ अद्यात्राह्नि । अद्यशब्दोऽत्राह्नीत्येतस्मिन्नर्थे स्यात् ॥ अथ पूर्वेऽह्नीत्यादौ—पूर्वेद्युरादयः । पूर्वेद्युरादिशब्दाः पूर्वादिशब्देभ्यः सकाशात् पूर्वेऽह्नीत्याद्यर्थेषु स्युः । पूर्वेद्युः पूर्वाह्णश्च पूर्वदिवसश्च स्युः । 'पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः पूर्ववासरः' इति रुद्रः । उत्तरेद्युः [4]उत्तरेऽह्नीत्यर्थः । अपरेद्युरपरेऽह्नि । अधरेद्युरधरेऽह्नि । अन्येद्युरन्यस्मिन्नहनि । अन्यतरेद्युरन्यतरस्मिन्नहनि । इतरेद्युरितरस्मिन्नहनीत्यर्थः ॥ २० ॥

[1] A1 omits इत्येते. [2] पूर्वे पूर्वतरे वर्तमाने च वर्षे स्युः B3, C1. [3] इमावियन्तौ पुनरैषमस्त्यौ A1. [4] A1 omits the three lines.

उभयद्युश्चोभयेद्युः परे त्वह्नि परेद्यवि ॥ २१ ॥
ह्योऽतीतेऽनागतेऽह्नि श्वः परश्वस्तत्परेऽहनि ।
तदा तदानीं युगपदेकदा सर्वदा सदा ॥ २२ ॥

(वि.) उभयद्युश्चोभयेद्युः । [1]एतावुभयोरह्नोरित्यस्मिन्नर्थे वर्तेते । यथा—उभयद्युरुपोषणम्[2] । उभयेद्युरुत्सवः ॥ परे त्वह्नि परेद्यवि । परेऽह्नीत्यर्थे परेद्यवि इत्यव्ययं वर्तते । यथा—परेद्यवि दृष्टस्ते सखा ॥ ह्योऽतीते । गतेऽह्नि ह्यः इत्यव्ययं वर्तते । यथा—ह्यः सर्वमभवत्[3] ॥ अनागतेऽह्नि श्वः । अनागते वर्तमानानन्तरदिवसे श्वः शब्दो वर्तते । यथा—'श्वःकार्यमद्य कुर्वीत' इति[4] ॥ परश्वस्तत्परेऽहनि । [5]श्वोदिनानन्तरेऽहनि परश्वःशब्दो वर्तते । यथा—परश्वो वा भविष्यति ॥ तदा तदानीम् । एतौ तस्मिन्[6] काले इत्यर्थे वर्तेते । यथा—'तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः' इति (रघु. ४. १८) । तदानीम्—'यदा स्यात् प्रियया सङ्गस्तदानीमेव मे सुखम्' इति ॥ युगपदेकदा । एतौ तुल्यकाल इत्यस्मिन्नर्थे वर्तेते । यथा—'युगपद्व्यानशे दिशः' इति । एकदा—एकदा मिलिता द्विजाः ॥ सर्वदा सदा । एतौ सर्वस्मिन् काल [7]इत्यर्थे वर्तेते । यथा—'सर्वदा सर्वदोऽसीति याचते याचकः सदा' ॥ २१-२ ॥

[1] उभयस्मिन् अह्नि K5. [2] K4 adds मया. [3] एतद् गतदिननाम K2, K6. [4] K2, K6 add एतदनागतदिननाम. [5] K5 omits दिन°. [6] अस्मिन् काले K6. [7] इत्यस्मिन्नर्थे K2, K4.

(विव.) उभयद्युश्चोभयेद्युः । उभयस्मिन् अह्नीत्यर्थे 'द्युश्चोभयाद्वक्तव्यः' (वा. ५. ३. २२) इति द्युःप्रत्यये उभयद्युः, तदभावपक्षे 'सद्यःपरुत् परारि ...' (५. ३. २२) इत्यादिनिपातनात् एद्युसिप्रत्यये उभयेद्युः । यथा—'उभयेद्युर्जलूकाभिरसृङ्मोक्षः प्रशस्यते' इति ॥ परे त्वह्नि परेद्यवि । पूर्ववदेव निपातनात् साधुः । यथा—'हन्तास्मि लङ्काधिपतिं[1] परेद्यवि' इति ॥ ह्यो गते । अह्नीत्यनुकृष्यते । गतेऽनन्तरातीते दिने । यथा—'ह्योगोदोहोद्भवं घृतम्' इति ॥ अनागतेऽह्नि श्वः । संनिहित एव भविष्यति दिवसे । यथा—'श्वोभूते

ब्राह्मणं वृणीते' इति । 'श्वो न हन्ता जयद्रथम्' इति च । ह्यस् श्वस् शब्दावुभावपि सकारान्ताव्ययौ ॥ परश्वस्तत्परेऽहनि । तस्मात् श्वःशब्दवाच्यात् परेऽनन्तरेऽहनि परश्वः । पारस्करादित्वेन (६. १. १५७) परशब्दादुत्तरस्य श्वःशब्दस्य सुडागमे श्चुत्वे च परश्श्वः । यथा—'परश्वोऽपि वाहनोत्सवः' इति ॥ तदा तदानीम् । द्वयं तस्मिन् काले इत्यर्थे वर्तते । 'तदो दा च' (५. ३. १९) इति वर्तमानकाले[2] वर्तमानात् सप्तम्यन्तात् तच्छब्दाद् दाप्रत्ययः । चकाराद् दानींप्रत्ययश्च (५. ३. १८) । यथा—'तदैव प्रातःसवनाय प्रसर्पन्ति' इति । तदानीम्—'तदानीं कलहो महान्' इति ॥ युगपद् एकदा । बह्वीनां [3]क्रियाणामवच्छेदकन्यूनातिरेकरहिते काले द्वयं वर्तते । तत्र युगपत् [4]इत्यव्युत्पन्नं प्रातिपदिकम् । यथा—युगपद् [5]व्रजन्ति, युगपदागच्छन्ति[6] इति । एकदा—'सर्वैकान्यकियत्तदः काले दा' (५. ३. १५) इति दाप्रत्ययः । यथा—एकदा कर्म कुर्वन्ति इति ॥ सर्वदा सदा । सर्वस्मिन् काले इत्यर्थे द्वयम् । 'सर्वैकान्य...' इत्यादिना (५. ३. १५) सर्वशब्दात् सप्तम्यन्तात् काले वर्तमानाद् दाप्रत्यये सर्वदा । यथा—सर्वदा क इव वा सहिष्यते । 'सर्वस्य सोऽन्यतरस्याम्' (५. ३. ६) इति विकल्पेन सभावे सदा । यथा—सदातन इति ॥ २१-२ ॥

[1] °अधिपतिः B6, Gm3. [2] 'काले' इत्येव काशिकायाम् (२, पृ. ६०). [3] अवच्छेदके Gm3. [4] युवन्त्यस्मिन् काले । 'यु मिश्रणादौ' । गपदक्प्रत्ययः । युगं पयतेऽस्मिन् । 'पय गतौ' । डत्प्रत्ययः इति भा. दी. (पृ. ५१८). [5] भुञ्जते Gm3. [6] आगच्छति B6.

(पा.) उभयद्युश्चोभयेद्युः । एते द्वे [1]उभयस्मिन्नहनीत्यर्थे स्याताम् ॥ परेद्यवि परेऽहनि । परेद्यविशब्दः परेऽहनीत्यर्थे[2] स्यात् ॥ ह्यो गते । ह्यःशब्दो [3]भूतदिवसार्थे स्यात् । 'निन्नु' ॥ अनागतेऽह्नि श्वः । श्वःशब्दोऽनागतदिवसार्थे[4] स्यात् । 'रेपु' ॥ परश्वस्तु परेऽहनि । परश्वःशब्दः [5]श्वःपरदिवसार्थे स्यात् । 'मर्नाडु' ॥ तदा तदानीम् । एते द्वे तस्मिन् काले इत्यर्थे स्याताम् । 'अप्पुडु[6]' ॥ तर्हिशब्दोऽपि स्यात् । 'यदा यर्हि तदा तर्हि' इति वैजयन्ती (पृ. २८७, श्लो. ५) ॥ युगपदेकदा । एते द्वे एकस्मिन् काले इत्यर्थे स्याताम् । 'ओहप्पुडु[6]' ॥ सर्वदा सदा । एते द्वे सर्वस्मिन् काले इत्यर्थे स्याताम् । 'यल्लप्पुडुन्नु[6]' ॥ २१-२ ॥

[1] उभयोरह्नोरित्यर्थे B3. [2] परेऽह्नीत्यर्थे B3. [3] भूतेऽह्नि B3; भूतदिनार्थे C1. [4] अनागतेऽह्नि B3. [5] श्वःपरेऽहनि B3. [6] B3 omits.

एतर्हि संप्रतीदानीमधुना सांप्रतं तथा ।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ।। २३ ।।

इत्यव्ययवर्गः

(वि.) एतर्हि संप्रति––सांप्रतं तथा। एते पञ्चशब्दा अस्मिन् काले इत्यर्थे वर्तन्ते । [1]यथा––एतर्हि क्रियते कार्यम् । संप्रति––' संप्रत्यसांप्रतं वक्तुम्[2] ' इति (शिशु. २. ७०) । इदानीम्––' इदानीमस्मि संवृत्तः [3]सचेताः प्रकृतिं गतः ' इति (भ. गी. ११. ५१) । अधुना––' बलावलेपादधुनापि पूर्ववत् ' इति (शिशु. १. ७२) । सांप्रतम्––[4]तत्पापो धाम सांप्रतम् ।। दिग्देशकाले––प्रत्यगादयः । अस्यार्थः––पूर्वादौ पूर्वपश्चिमोत्तराधरेषु दिग्देशकाले[5] दिगर्थे देशार्थे कालार्थे गम्यमाने प्रागुदक्प्रत्यगादयः प्राक् उदक् प्रत्यक्, आदिशब्दादधस्तात् अर्वाक् इति पञ्चाव्यया भवन्ति । अत्रोदहरणानि––दिशि यथा । प्राक्––' [6]आयुष्यं प्राङ्मुखो भुङ्क्ते ' इति (म. स्मृ. २. ५२) । देशे यथा––' प्राग्भागतः पतदिहेदमुपत्यकासु ' इति (शिशु. ४. ४६) । काले––' प्राक्सृष्टेः केवलात्मने ' इति (कु. सं. २. ३) । एवमुदक्प्रत्यगादिष्वपि कालवर्जमुदाहरणानि द्रष्टव्यानि ।। २३ ।।

इति श्रीवङ्गललिङ्गयसूरिविरचितायाममरकोशपदविवृतावव्ययवर्गः[7]

[1] अत्रोदाहरणानि K2; क्रमेणो° K4. [2] J2 adds उक्ते मुसलपाणिना. [3] K2, K3 omit the latter half. [4] तद्वद्यः K6. [5] °कालेषु K5. [6] प्राङ्मुखोऽन्नानि भुञ्जीत K6. [7] °वर्गविवरणं समाप्तम् J2.

(विव.) एतर्हि संप्रति––सांप्रतं तदा । एते पञ्च शब्दाः अस्मिन् काले इत्यर्थे वर्तन्ते । ' इदमो र्हिल् ' (५. ३. १६) इति र्हिल्प्रत्ययः । ' एतेतौ रथोः ' (५. ३. ४) इति इदम एतादेशश्च । संप्रतिशब्दस्य तिष्ठद्गुप्रभृतित्वेन (२. १. १७) निःषमादिशब्दवदव्ययीभावत्वम् । ' दानीं च ' (५. ३. १८) इति सप्तम्यन्ताद् इदंशब्दात् काले वर्तमानात् दानींप्रत्यये इशादेशे च इदानींशब्दसिद्धिः । ' अधुना ' (५. ३. १७) इति निपातनाद् इदंशब्दात् काले वर्तमानात् सप्तम्यन्तात्

धुनाप्रत्ययः प्रकृतेरशादेशे च अधुनाशब्दः साधुः । 'तद्धितश्चासर्वविभक्तिः' (१. १. ३८) इत्यव्ययत्वम् । संप्रतिशब्दादेव स्वार्थिकेऽण्प्रत्यये सांप्रतम् । यथा—एतर्हि क्रियते । संप्रत्येवागतं मया । इदमिदानीं निरूप्यते । उपयोगोऽधुनोच्यते । 'कोन्वस्मिन् सांप्रतं लोके' इति (रामा. १. १. २) ।। दिग्देशकाले—प्रत्यगादयः। अस्यार्थो यथा—'दक्षिणोत्तराभ्यामतसुच्' (५. ३. २८) इत्यत्र सूत्रे दिग्देशकालेषु इत्यर्थत्रयानुवृत्तावपि दक्षिणशब्दस्य काले वृत्त्यसंभवाद् उत्तरशब्दादेवार्थत्रयवृत्तेरतसुच्प्रत्ययविधिरङ्गीकृतो वृत्तिकारादिभिः (काशिका २, पृ. ६२)। एवं प्रकृतेऽपि दिग्देशकाल इत्यविशेषणोक्तावपि प्राक्पदस्यैवार्थत्रये विधिः। उदगादिशब्दानां तु कालरूपार्थे वृत्त्यसंभवाद् अर्थद्वय एव विधिः । यथा—'प्राङ्मुखोऽन्नानि भुञ्जीत' इति प्राच्यां दिशि । 'प्राग्भागतः पतदिहेदमुपत्यकासु' इति (शिशु. ४. ४६) प्राग्देशः । 'प्राक्सृष्टेः केवलात्मने' (कु. सं. २. ३) इति पूर्वकाले । कण्ठस्थब्रह्मसूत्र उदङ्मुख इति उदीच्यां दिशि । उदक्प्रवण इति देशे। प्रत्यगा तारकोदयादिति प्रतीच्यां दिशि, प्रत्यगुन्नत इति देशे । आदिशब्देन अर्वाक् अधराक् इत्यादि । यथा—'प्राग् अवाग् उदग् अधराक् सर्वतस्त्वा दिश आधावन्तु' इति श्रुतिः (तै. सं. १. ४. १. २) । तथा 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो 'दिग्देशकालेष्वस्तातिः' (५. ३. २७) इति प्राची अवाची उदीची अधरा इत्येतेभ्यो यथासंभवं दिग्देशकालेषु वर्तमानेभ्यः अस्तातिप्रत्यये सति 'अञ्चेर्लुक्' (५. ३. ३०) इति दिक्शब्दस्य उत्तरस्यास्तातिप्रत्ययस्य लुक् । ततो 'लुक्तद्धितलुकि' (१: २. ४६) इति स्त्रीप्रत्ययस्य लुकि प्राक् अर्वाक् प्रत्यक् अधराक् इति भवति । इदानीं शेषकारेणोक्ता निरूप्यन्ते ।

'उक्ता ग्रन्थकृता केचित् प्रत्ययान्ताव्यया इह ।
तत्प्रसङ्गान्निरूप्यन्ते प्रत्ययान्ताव्ययाः परे ।।'

इत्यव्ययवर्गनिरूपणप्रस्तावे परुत्परारितदातदानीमित्यादयः केचित् प्रत्ययान्ताव्ययाः अमरसिंहनाथेन प्रदर्शिताः । तत्प्रसङ्गादपरेऽपि प्रत्ययान्ता अव्यया निरूप्यन्त इत्यर्थः। तानेव श्लोकेन संगृह्णाति—

सुच्कृत्वसुच्त्रातसित्रल्दादामेधार्हिलाहयः ।
साच्च्विडाज्धमुञश्चक्त्वाशस्वतिमान्तकृदव्ययम् ।।

इति । एतेषां च सुजन्तप्रभृति मान्तकृदन्तपर्यन्तानां 'स्वरादिनिपातमव्ययम्' (१. १. ३७) इत्यधिकारे सूत्रवार्त्तिकभाष्यकारैरव्ययत्वकथनात्,

'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।'

इति (काशिका १, पृ. १४) अव्ययलक्षणस्य सद्भावाच्च सुस्पष्टमव्ययत्वम् । सुजादिप्रत्ययान्ता अव्ययीभावसमासश्च अव्यया इत्यर्थः । एषां क्रमेणोदाहरणानि । सुच्—'द्वित्रिचतुर्भ्यः सुच्' (५. ४. १८) । 'द्विर्भुङ्क्ते त्रिर्भुङ्क्ते, चतुरवत्तं हविः' इति । कृत्वसुच्—'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (५. ४. १७) । यथा—'पञ्चकृत्वस्ते नमः' इति (तै. आ. ४. २८. १) । षट्कृत्वः, सप्तकृत्वः । त्रा—'तदधीनवचने' (५. ४. ५४) 'देये त्रा च' (५. ४. ५५) । ब्राह्मणाधीनं देयं करोति ब्राह्मणत्रा करोति । ब्राह्मणत्रा भवति । ब्राह्मणत्रा स्यात् (काशिका २, पृ. ९१) । अत्र कृभ्वस्तियोगनियमः । 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' (५. ४. ५६) इति त्रा । अत्र धातुनियमो नास्ति । यथा—देवान् गच्छति, देवत्रा गच्छति । देवेषु गच्छति, देवत्रा गच्छति इत्यादि (काशिका २, पृ. ९१) । एवं मनुष्यादयोऽप्युदाहार्याः । बहुलग्रहणाद् 'बहुत्रा जीवतो मनः' (ऋग्वेद. १०. १६४. २) इत्याद्यपि भवति । तसिल्—'पञ्चम्यास्तसिल्' (५. ३. ७) कस्मादित्यर्थे कुतः । सर्वस्मादित्यर्थे सर्वतः । यस्मादित्यर्थे यतः इत्यादि । 'पर्यभिभ्यां च' (५. ३. ९) इत्यत्र सर्वोभयार्थे वर्तमानाभ्यां प्रत्यय इष्यते । परितः, अभितः इति । तथा—'प्रतियोगे पञ्चम्यास्तसिः' (५. ४. ४४) । 'प्रद्युम्नो वासुदेवतः प्रति' (काशिका २, पृ. ८८) । माषानस्मै तिलतः प्रति यच्छति इति । 'तसिप्रकरणे आद्यादिभ्य उपसंख्यानम्' (वा. ५. ४. ४४) इति । आदौ आदितः । मध्ये मध्यतः । पार्श्वे पार्श्वतः । पृष्ठे पृष्ठतः इत्यादि ।।

त्रल्—'सप्तम्यास्त्रल्' (५. ३. १०) इति सप्तम्यर्थे । यथा—कस्मिन्नित्यर्थे कुत्र । यत्र, तत्र इत्यादि ।। दा—'सर्वैकान्यकिंयत्तदः काले दा' (५. ३. १५) इति । सर्वदा, सदा, एकदा ।। अत्—'किमोऽत्' (५. ३. १२) । किमः 'क्वाति' (७. २. १०५) इति क्वभावः । कस्मिन्नर्थे क्व ।। आम्—'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' (५. ४. ११) इति । किंतराम् । किंतमाम् । प्रगेतराम् ।

प्रगेतमाम् । पचतितराम् । पचतितमाम् । उच्चैस्तराम् । उच्चैस्तमाम् (काशिका २, पृ. ८२) इति ।। एधा—'द्वित्र्योश्च धमुञ्' (५. ३. ४५) इति वर्तमाने, 'एधाच्च' (५. ३. ४६) इति एधाजादेशः । द्वेधा, त्रेधा इत्यादि । 'संख्याया विधार्थे धा' (५. ३. ४२) इति । द्विधा करोति । त्रिधा दृश्यते । बहुधा भाषते इत्यादि । अत्र धाग्रहणमन्यस्यापि धाप्रत्ययादेशस्योपलक्षणम् । ततश्च 'एकाद्धो ध्यमुञन्यतरस्याम्' (५. ३. ४४) इति ध्यमुञ्प्रत्यये 'तद्धितेष्वचामादेः' (७. २. ११७) इति ञिति तद्धितप्रत्ययस्य परत्वादादिवृद्धिः । ऐकध्यम् । एकधा इति भवति ।।

र्हिल्—'इदमो र्हिल्' (५. ३. १६) इत्यस्मिन् काले इत्यर्थे 'एतेतौ रथोः' (५. ३. ४) इति इदम एतादेशः । 'अनद्यतने र्हिलन्यतरस्याम्' (५. ३. २१) इति किमादेः सप्तम्यन्ताद् अनद्यतने वा र्हिल् । कदेत्यर्थे कर्हि । यदेत्यर्थे यर्हि इत्यादि । पक्षे दादि (५. ३. १५) कदा, यदा ।। आ—'दक्षिणादाच्' (५. ३. ३६) इति । दक्षिणा वसति, दक्षिणस्यां दिशि वसतीत्यर्थः । दक्षिणा दिगिति वा ।। आहि—आहयः इत्यत्र (शेषकारश्लोके) आकारस्यापि सवर्णदीर्घे आहिप्रत्यय-निर्देशसिद्धिः । 'आहि च दूरे' (५. ३. ३७) इति, चकारात् आच्प्रत्ययः । दक्षिणाहि वसति । दक्षिणस्यां दिशि दूरे इत्यर्थः । दक्षिणाहि पर्वतो दूरे । दक्षिणाहि रमणीयम् इति । 'उत्तराच्च' (५. ३. ३८) इति आजाही प्रत्ययौ । उत्तरस्यां दिशि दूरे वसतीत्यर्थे उत्तराहि वसति । उत्तराहि पर्वतः । उत्तराहि रमणीयम् इति ।।

सात्—'विभाषा साति कार्त्स्न्ये' (५. ४. ५२) इति । सर्वं लवणमुदकमापद्यत इत्यर्थे उदकसाद्भवति लवणम् । पक्षे उदकीभवति । अग्निसाद्भवति । पक्षे—अग्नीभवति । 'अभिविधौ संपदा च' (५. ४. ५३) इति सातिप्रत्यये अग्निसात् संपद्यते । 'तदधीनवचने' (५. ४. ५४) इति सातिप्रत्यये अग्निसात् भवति । राजाधीनं करोति राजसात् करोति । राजसाद्भवति । राजसात् संपद्यते । राजसात् स्यात् । तथा 'देये त्रा च' (५. ३. ५५) इति सातिः । ब्राह्मणाधीनं देयं करोति ब्राह्मणसात्करोति, पात्रसात्करोतीत्यादि (काशिका २, पृ. ९०-१) ।। च्विः—'अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः' (५. ४. ५०) इति । अशुक्लः शुक्लः संपद्यत इत्यर्थे शुक्लीभवति, शुक्ली स्यात्, शुक्लीकरोति इति । तथा 'अरुमनश्चक्षुश्चेतो-

रहोरजसां लोपश्च ' (५. ४. ५१) इति च्विः । प्रातिपदिकस्य च लोपः । अनरुररुर्भवति अरूभवति । उन्मनीभवति । प्रचक्षूभवति । प्रचेतीकरोति । विरजीकरोति इत्यादि ।। डाच्—' अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् ' (५. ४. ५७) इति । दमदमा भवति । सिमसिमा करोति इत्यादि । तथा ' कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ' (५. ४. ५८) इति डाच् । द्वितीया करोति । द्वितीयलेखनं करोतीत्यर्थः । एवं तृतीया करोति । शम्बा करोति । अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं तिर्यग् वा कृषतीत्यर्थः इत्यादि । ' मद्रात् परिवापणे ' (५. ४. ६७), ' भद्राच्चेति वक्तव्यम् ' (वा. ५. ४. ६७) इति डाच् । मद्रा करोति, भद्रा करोति; मङ्गलार्थं मुण्डनं करोतीत्यर्थः । इत्यादयो डाजन्ताः ।।

धमुञ्—धाप्रत्ययस्य विधार्थे ' द्वित्र्योश्च धमुञ् ' (५. ३. ४५) इति । द्वैधम् । त्रैधम् इति । ' धमुञश्च ' इति शेषग्रन्थे चकारो विकल्पार्थः । धमुञ्प्रत्ययान्तो विकल्पनाव्यय इत्यर्थः । तथा च ' धमुञन्तात् स्वार्थे डदर्शनम् ' (वा. ५. ३. ४५) इति डप्रत्यये सत्यकारान्तनपुंसकत्वमपि विकल्पेन भवति । यथा—द्वैधस्य विषयः, त्रैधस्य विषयः इति ।।

क्त्वा—' अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ' (३. ४. १८) इति । यथा—' आलप्यालम् ' इति (शिशु. २. ४०) नालपितव्यमित्यर्थः । खलु—' खलूक्त्वा खलु ' (शिशु. २. ७०) । वाचिकं न वक्तव्यमित्यर्थः । तथा ' उदीचां माङो व्यतीहारे ' (३. ४. १९) इति क्त्वा । यथा—अपमित्य याचते । याचित्वापमयते इत्यर्थः । ' समानकर्तृकयोः पूर्वकाले ' (३. ४. २१) इति क्त्वा । यथा—भुक्त्वा व्रजति । पीत्वा गच्छति (काशिका १, पृ. २४३) । व्यादाय स्वपिति । संमील्य स्वपिति इत्युपसंख्यानम् । अत्र अपूर्वकालत्वादिति आद्युदाहरणानि [अपमित्य याचते इत्यादि] ।। शस्—' बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ' (५. ४. ४२) इति । बह्वर्थाद् मङ्गलवचनम् । यथा—बहुशो ददाति । पक्षे बहूनि ददाति । भूरिशो ददाति । भूरि ददातीति । अल्पार्थादमङ्गलवचनम् । यथा—अल्पशो ददाति । पक्षे अल्पं ददाति । स्तोकशो ददाति । पक्षे स्तोकं ददाति । (काशिका. २, पृ. ८८) । एवं कारकान्तरेष्वुदाहार्यम् । ' संख्यैकवचनाच्च वीप्सायाम् ' (५. ४. ४३) इति शस् । यथा—द्वौ द्वौ ददातीत्यर्थे द्विशो ददाति । त्रींस्त्रीन् ददातीत्यर्थे त्रिशो ददाति । कर्षापणं कर्षापणं ददातीत्यर्थे कर्षापणशो ददाति । माषशो ददाति । प्रस्थशो ददाति इत्यादि (काशिका. २, पृ. ८८) ।।

वतिः—इवार्थे वतिः प्रागुक्तः। 'तेन तुल्यं क्रिया चेद् वतिः' (५. १. ११५)। ब्राह्मणवत्। राजवत्। 'तत्र तस्येव' (५. १. ११६) इति वतिः। मथुरायामिव मथुरावत्। देवदत्तस्येव देवदत्तवत्॥

मान्तकृत्—'आभीक्ष्ण्ये णमुल् च' (३. ४. २२)। यथा—भोजं भोजं व्रजति। पायं पायं व्रजति। तथा 'विभाषाग्रेप्रथमपूर्वेषु' (३. ४. २४)। अग्रे भोजं व्रजति। अग्रे भुक्त्वा व्रजतीत्यर्थः॥ तथा 'कर्मण्याक्रोशे कृञः खमुञ्' (३. ४. २५)। चोरंकारमाक्रोशति। चोरोऽसि इत्याक्रोशतीत्यर्थः। तुमुन्—'शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्' (३. ४. ६५)। यथा—शक्नोति भोक्तुम् इत्यादि। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (३. ३. १०) इति तुमुन्। यथा—भोक्तुं व्रजति इति (काशिका. १, पृ. २०८)॥ शेषे—

'थाल्थमुस्तादेनबसादव्ययीभाव आसि च'

इति। थाल्प्रत्ययादिसप्तप्रत्ययान्तं शब्दरूपम् अव्ययीभावसमासश्चेत्यष्टविधम् अव्ययसंज्ञमिति पूर्वेणान्वयः। तत्र थाल्—'प्रकारवचने थाल्' (५. ३. २३)। तेन प्रकारेणेत्यर्थे तथा। एवं यथा सर्वथा इति॥ थमु—'इदमस्थमुः' 'किमश्च' (५. ३. २४-५) इति। यथा—इत्थम्, कथम् इति॥ अस्तातिः—'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (५. ३. २७)। पूर्वस्यां दिशीत्यर्थे पुरस्तात्, पूर्वस्या दिशः पुरस्तात्, पूर्वा दिक् पुरस्तात् इत्यादि॥ एनप्—'एनबन्यतरस्यामदूरेऽपञ्चम्याः' (५. ३. ३५) इति। यथा—उत्तरस्यां दिश्यदूरे वसतीत्यर्थे उत्तरेण वसति इति। एवं दक्षिणेन, अधरेण इत्यादि दिग्देशकालेषु विभक्तयन्तरे द्रष्टव्यम्। अपञ्चम्या इति निषेधात् तत्राभावः॥ अस्—'पूर्वाधरावराणामसि पुरधवश्चैषाम्' (५. ३. ३९) इति। पुरः। पूर्वस्यां दिशीत्यर्थः। एवम् अधः, अवः इति दिग्देशकाले विभक्तित्रयं द्रष्टव्यम्॥ आत्—'उत्तराधरदक्षिणादातिः' (५. ३. ३४) इति अस्तातेरर्थे आतिः। उत्तरस्यां दिशि वसति, उत्तराद् वसति। अधराद् वसति। दक्षिणाद् वसति इति॥ अव्ययीभावः—अव्ययीभावो नाम समासविशेषः। 'अव्ययं विभक्तिसमीप...' (२. १. ६) इत्यादिसूत्रसंदर्भविहितः। यथा—अधिपीठम्, उपकुम्भम्, प्रत्यर्थमित्यादि॥ आसि—'इण आसिः' (उ. ४. २२३)। अयाः॥ अनन्तरं केचिदव्ययाः शेषकारेण दर्शिताः। यथा—प्रत्यारम्भे सह इति। अचोदितस्यावधिकरणे न प्रतिषेधः प्रत्यारम्भः। यथा—सह भोक्ष्यस इति॥ शेषे—

'भगो हे हंहो भो हो च संबुद्धिः'

इति। एते पञ्च संबुद्धिः संबोधने। यथा—भगो गुरवः। हे वृक्ष किं कम्पसे। हंहो पश्यत। भो देवदत्त। उपहूतो हो इत्याह इति॥ शेषे—'दुष्टसंबोधने अघो स्यात्'। यथा—अघो दुरात्मन् इति॥ शेषे—'त्वया ते मे मयेति च'। इति-शब्दस्य त्वयेत्यनेनाप्यन्वयं दर्शयितुं चशब्दः। ततश्च त्वयेत्यर्थे तेशब्दो वर्तते। मयेत्यर्थे मेशब्दो वर्तत इत्यर्थः। यथा—'श्रुतं ते राजशार्दूल श्रुतं मे भवतो गुरो' इति॥ शेषे—'येन तेनेति हेतौ स्तः' इति। साधनत्वावस्थापन्ने हेतौ अभिधेये तृतीयैकवचनप्रतिरूपकौ येन तेनेत्यव्ययौ स्त इत्यर्थः। 'वितर गिरमुदारां येन मूकाः पिकाः स्युः' इति। तेन—अयं वादेषु प्रगल्भते तेन श्लाघ्यः इति॥ शेषे—'न ह वै तु निषेधने'। यथा—'न ह वा एतस्यार्चा न यजुषा न साम्नाऽर्थोऽस्ति, यः सावित्रं वेद' इति। शेषे—'शुभं शुभे'। यथा—शुभंयुः इति।

शेषे—'विशेषे तु' इति। यथा—अयं तु वक्ता इति॥ शेषे—'वितर्के नु वै स्मृतः' इति। यथा—'को नु वा अन्तरिक्षे वाचं विसृजति' इति॥ शेषे—'हेतावृतं निमित्तर्ते' इति। निमित्तं च ऋतं च निमित्तर्तम् इति द्वन्द्वैकवद्भावः। हेतौ इत्यव्ययं निमित्ते वर्तते। ऋतमित्यव्ययम् ऋते सत्ये वर्तते इत्यर्थः। हेतौ यथा—हेतौ तुष्यति भवान् इति। केनापि निमित्तेन तुष्यतीत्यर्थः। यथा—ऋतंवदः। सत्यवादीत्यर्थः॥ शेषे—'सम्यगर्थे पशुः स्मृतः' इति। यथा—'बोधं नयन्ति पशुंमन्यमानाः' इति। सम्यक् प्रतिपाद्यमाना इत्यर्थः॥ शेषे—'मात्रायां परिमाणार्थे' इति। यथा—मात्रायां भुङ्क्ते इति॥ शेषे—'शुकं शीघ्रे' इति। यथा—शुकं गच्छति इति॥ शेषे—'ममत्ववान् मम'। ममेत्यव्ययम्। ममत्वं वक्तीत्यर्थः। यथा—'निर्ममो निरहंकारः' इति (भ. गी. २. ७१)॥ शेषे—'प्राह्णे अह्न आरम्भे' इति। अह्नः प्रारम्भे प्राह्णेशब्दः। यथा—'प्राह्णे देवानाम्' इति। पूर्वाह्णे देवानामित्यर्थः॥

शेषे—'अथान्योन्यस्य परस्परे' इति। अन्योन्यस्येत्यव्ययं परस्परशब्दार्थे वर्तते। यथा—'छन्दांस्यन्योन्यस्य लोकमभ्यध्यायन्' इति॥ शेषे—'यथा कथा चानादृत्याम्' इति। अनादृत्यामनादरे। यथा—'यथा कथा च दीयते। यथा कथा च दक्षिणा' इति (गण. मह्रो. पृ. १५)॥ शेषे—'मर्यादा स्यात् सीमबन्धने' इति। सीम्नि दीयमानतया मर्यादाशब्दो निर्व्यूढः। 'मर्या इति सीमबन्धने।

मर्या आदीयते मर्यादा ' इति महोदधिश्च (पृ. १५) ।। शेषे—' हिं प्रस्तावे ' इति । प्रस्तावः सामभक्तिविशेषः । यथा—' हिं करोति ' इति । (हिं साम गीयते इति महोदधौ पृ. १६) ।। शेषे—' कत् प्रकर्षे ' इति । यथा—' कद् रुद्राय प्रचेतसे ' इति (तै. आ. १०. १७. १) ।। शेषे—' शोः कुत्सायाम् ' इति । यथा—' शोः करोति ' इति ।। शेषे—' सुखे तु शम् ' इति । यथा—शंकरः शंभुः इति ।।

शेषे—' अन्तरिक्षे भुवः ' इति । सकारान्तोऽयम् । ' भुवो वायुनान्तरिक्षेण साम्ना ' इति श्रुतिः (आपस्तम्बमन्त्रपाठः २. २१. ३)। रेफान्त इत्यपरे । यथा—' भुवर्देवांस्तर्पयामि ' इति । एतच्चोदाहरणद्वयं भ्रान्तिमूलमित्यन्ये ।। शेषे—' कौ भूः ' इति । भूरित्यव्ययं रेफान्तं कौ भूमौ वर्तत इत्यर्थः । यथा—भूर्लोकः इति ।। शेषे—' मिथुने मिथुनं विदुः ' इति । यथा—' मिथुनंभाव उभयोः ' इति ।। शेषे—' समानार्थे प्रशान् ' इति । यथा—प्रशान् देवदत्तेन यज्ञदत्तः इति ।। शेषे—' युक्तं न्याय्ये ' इति । यथा—' न तव युक्तं दुष्टभावः ' इति ।। शेषे—' क्षान्तौ क्षमा भवेत् ' इति । यथा—क्षमाकरोति; इत्यादयोऽवगन्तव्याः । अव्ययगणेषु विभक्तिस्वरप्रतिरूपकाश्च निपाता इत्युक्ता अव्ययाः । त इदानीं प्रदर्श्यन्ते । यथा—आस बभूवार्थे । यथा—' लावण्य उत्पाद्य इवास यत्नः ' इति (कु. सं. १. ३५) ।। न यातीति न शक्यते इत्यर्थे । यथा—इदं ते कर्तुं न याति इति । यातीति शक्यार्थे । इदं कर्तुं याति ।। वर्तते इति सोल्लुण्ठन्यङ्गवचने । यथा—' वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते ' इति (उत्तर. ५. ३५) । न वर्तते इति मङ्गलप्रतिषेधे । यथा—' समराभिमुखे पत्यावश्रुपातो न वर्तते ' (गण. महो. पृ. ३०) इति । मङ्गलं न संभवतीत्यर्थः ।। भवति सत्तायाम् । यथा—' भवति नाम तत्रभवान् वृषलं याजयिष्यति ' इति (गण. महो. पृ. ३०) ।। मन्ये वितर्के । यथा—' मन्ये मार्तण्डगृह्याणि पद्मान्युद्धर्तुमुत्सुकः ' इति (गण. महो. पृ. ३०) । नास्तीति सत्तानिषेधे । यथा—नास्ति मतिरस्य नास्तिकः इति ।। अस्मीत्यस्मदर्थानुवादे । यथा—' अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः ' इति (योगसू. २. ३) । ' त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ' इति काव्यप्रकाशिकायाम् ।। एहि मन्ये प्रहासादौ । यथा—एहि मन्ये रथेन यास्यसि इति । एहि न त्वया जल्पिष्यामीत्यनादरे । असि त्वमर्थवाक्यालंकारयोः । त्वमर्थे यथा मालतीमाधवे—' कल्याणानां त्वमसि महतां भाजनं विश्वमूर्ते ' इति (१. ३) ।

'आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः' इति नैषधकाव्ये (५. १००)। त्वं तोयराशिरित्यर्थः। वाक्यालंकारे यथा—'यदपूपुजस्त्वमसि पार्थ' इति (शिशु. १५. १४)॥

पूर्यते इति निषेधे। यथा—'पूर्यते प्राणायामेन' इति (गण. महो. पृ. ३०)। अलं प्राणायामेनेत्यर्थः॥ अस्ति सत्तायाम्। यथा—अस्ति परलोके मतिरस्येत्यास्तिकः। अस्तिक्षीरा ब्राह्मणी (काशिका १, पृ. १०६) इति। शङ्के इति वितर्के। यथा—'शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते' (मेघ. २. २८) इति। शङ्के शशाङ्कोऽयम् इति च। विद्यते इति भवत्यर्थे। यथा—विद्यते क्षीरा ब्राह्मणी इति। पश्य, पश्यत इति पूजायाम्। यथा—

'महीं सागरपर्यन्तां भो राजन् पश्य पालय।
गुरवः पश्यतासन्ने मयि दत्त कृपां दृशा॥'

इति। आह इत्युवाचेत्यर्थे। यथा—'अथाह वर्णी विदितो महेश्वरः' इति (कु. सं. ५. ६५)। इति तिङन्तप्रतिरूपका उक्ताः।

अथ विभक्तिप्रतिरूपकाः केचिदुच्यन्ते—प्रायः, अहम्, त्वम्, शुभम्, कृतम्, पर्याप्तम्, येन, तेन, चिरेण, अन्तरेण, चिराय, चिररात्राय, अकस्मात्, अकृत्या, अन्योन्यस्य, चिरस्य, मम, प्राह्णे, प्रगे, हेतौ, वेलायाम्, मात्रायाम् इति विभक्तिप्रतिरूपकाः। एवमादयो गणपाठेषु निघण्ट्वन्तरे च द्रष्टव्याः। ग्रन्थगौरवभयादिह न लिख्यन्ते॥ २३॥

नानैकार्थविशेषाद् वर्गद्वयवन्तमव्ययसमूहम्।
शेषोक्तादिसमेतं प्रव्यक्तं व्याख्यदप्पयाचार्यः॥
इह यत्त्यक्तमज्ञानादालस्याद्यदुपेक्षितम्।
प्रमादादन्यथोक्तं यत् तद्विद्वद्भिर्विशोध्यताम्॥
आद्याव्ययवर्गीयश्लोका अष्टोत्तरा दश।
चिराद्यव्ययवर्गीयश्लोका नेत्रपयोधयः[1]॥
नानार्थाव्ययसंयुक्ताश्चत्वारिंशदधिद्विकाः।

इति श्रीबोम्मगण्टप्पयाचार्यकृतनामलिङ्गानुशासनवि[2]वरणेऽव्ययः समाप्तः

[1] चतुर्विंशतिरित्यर्थः.　　[2] विवृतौ B6.

(पा.) एर्तार्हि संप्रति—सांप्रतं तदा । एतानि एतस्मिन् काले इत्यर्थे स्युः । 'इप्पुडु' । दिग्देशकाले—प्रत्यगादयः । प्रागादिशब्दाः पूर्वादिग्देशकालेषु स्युः । पूर्वदिग्देशकालाः । प्राक्—प्रागागतः । प्राग्वसति । प्राग्रमणीयम् । उत्तरदिग्देशकालाः । [1]उदक्, प्रत्यक् । आदिपदात् अधरदिगादिः[2] । अधस्तात् । [3]उपरि [4]उपरिष्टात् इत्यादि ।। २३ ।।

इति [5]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजातेऽव्ययवर्गः

[1] A1 adds अपरदिग्देशकालाः. [2] B3 adds अधरदेशः. [3] C1 adds ऊर्ध्वदेशकालाः. [4] तावेव B3, C1. [5] °नागनाथनरसिंह° A1.

---

५. लिङ्गादिसंग्रहवर्गः

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
[1]अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ।। १ ।।

(वि.) अथ लिङ्गादिसंग्रहवर्गमुपक्रमते सलिङ्गेति । अस्यार्थः—लिङ्गशास्त्रसहितैः सन्नादिकृत्तद्धितसमासजैर्ग्रन्थैरिह संग्रहे वर्गेऽनुक्तं लिङ्गं संकीर्णवत् संकीर्णवर्गे इवोन्नयेत् ।। १ ।।

(विव.) सलिङ्गशास्त्रैः—संकीर्णवदिहोन्नयेत् । इह हि ग्रन्थादौ ग्रन्थकारः 'संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्' (१, पृ. ३) इति प्रतिज्ञाय एतदन्तेन ग्रन्थसदंर्भेण [2]सलिङ्गानां नाम्नां साव्ययानामनुशासनं विधाय तत्र तत्र लिङ्गविधेरसंपूर्णतां मन्वानः तन्निरूपणाय वर्गान्तरमारभते सलिङ्गेति । संक्षेपेण सम्यक् वाच्यलिङ्गान्यत्र गृह्यन्ते निरूप्यन्त इति संग्रहशब्देन वक्ष्यमाणो लिङ्गसंग्रहाख्यो वर्गो विवक्षितः । लिङ्गमित्येकवचनमविवक्षितम् । उन्नयेदिति लक्षणमुखेन तत्त्वज्ञानमुन्नीय[3] लिङ्गानि जानीयादित्यर्थः । कथं जानीयात् ? इत्यत आह—सन्नादीत्यादिना । इह सन्नादिशब्देन सन् क्यच् काम्यजादिप्रत्ययान्तेभ्यो धातुभ्यो विहिता[4] अकारादिप्रत्यया अभिहिताः, तृतीयधात्वधिकारविहिताः तिङ्वर्जिताः

प्रत्ययाः कृतः सनाद्यन्तेभ्यो धातुभ्यो विहितानां कृत्प्रत्ययव्यतिरिक्तप्रत्ययानां लिङ्गनिर्णयौपयिकत्वाभावात् । यद्यपि सन्नादयोऽपि कृद्रूपा एव, तथापि ब्राह्मणपरिव्राजकन्यायेन कृद्भ्यः सन्नादीनां पृथगेव निर्देशः कृतः । तथा कृच्छब्देन सनाद्यन्तधातुव्यतिरिक्तधातुविहिता एव कृत्यप्रत्यया ग्राह्याः । तद्धिताः प्रसिद्धाः । सन्नादयः कृतश्च तद्धिताश्च समासाश्चेति द्वन्द्वः । तेभ्यो जातान्यनन्तरमेवास्माभिः कृदाद्युपाधिमुखेन वक्ष्यमाणानि वाक्यानि । तत्र स्त्रीभावादावनिक्तिन्नित्यादीनि कृज्जानि (श्लो. ४), तल्वृन्दे येनिकट्यत्रा इत्यादीनि (श्लो. ४) तद्धितानि, अजन्तैर्द्विगुरेकार्थः (श्लो. ३) इत्यदीनि समासजानि तल्लिङ्गान्युन्नयेत् इत्यन्वयः ।

ननु—भवत्प्रणीतवाक्यानां कथं प्रामाण्यमित्यत आह—सलिङ्गशास्त्रैरिति । 'स्त्रियां क्तिन्' (३. ३. ९४), 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यते' (वा. २. ४. १७), 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८), 'घञन्ताः पुंसि' (लिङ्गानु. ३६)। 'रात्राह्नाहाः पुंसि' (२. ४. २९), 'अनुवाकादयः पुंसि वक्तव्याः', 'नपुंसके भावे क्तः' (३.३.११४), 'अपथं नपुंसकम्' (२.४.३०), 'अर्धर्चाः पुंसि च' (२. ४. ३१), 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) 'पूर्ववदश्वबडबौ' (२. ४. २७) इत्यादीनि यानि [5]पाणिनिवररुचिभाष्यकारादिभिः प्रणीतानि लिङ्गप्रतिपादकानि शास्त्राणि, यानि च बार्हस्पत्यादीनि च लिङ्गानुशासनानि तत्सहितैरित्यर्थः । तत्साहित्यं च तदेकार्थत्वं तन्मूलत्वमिति यावत् । अनेन स्ववाक्यानां प्राक्तनलिङ्गानुशासनमूलकत्वेन प्रामाण्यमुक्तम् ।

ननु—नामानुशासनसमय एव लिङ्गानामपि स्पष्टीकरणात् किमनेन पिष्टपेषणप्रयासतुल्येन प्रत्ययादिद्वारकलिङ्गनिर्णयकर्तव्यताप्रयासेन इत्यत आह—अनुक्तमिति । अयमभिप्रायः—सकलस्य शब्दजातस्य प्रातिपद्येन लिङ्गनिर्णयकरणानुपपत्तेः यत्किंचिदुपाधिमुखेनैव शब्दजातं क्रोडीकृत्य लिङ्गनिर्णयः कर्तव्यः । स च पूर्वमकृत एव । संकीर्णवर्गे तु प्रकृत्यादिभिरुन्नयनमात्रमुपक्षिप्तम् । न तून्नयनोपायोऽपि विविच्य दर्शितः । अतः पर्यायकाण्डे नानार्थकाण्डे च कृतमपि लिङ्गानुशासनम् असाकल्यादनुक्तप्रायमेवेति मन्वानेन अनुक्तमित्युक्तम् ।

अत्र केचित् पठन्ति—तत्रापि प्रागनुक्तैः सकलशब्दशास्त्रक्रोडीकारैः कृत्यप्रत्ययादिभिरुपाधिभिः लिङ्गमुन्नयेदिति योज्यम् । दृष्टान्तमुखेनापि लिङ्गोन्नयनोपायप्रकारमाह—संकीर्णवदिति । यथा संकीर्णवर्गे प्रकृत्यादिमुखेन लिङ्गोन्नयनमुक्तं [6]तद्वदिहापीति । तत्र प्रकृत्या यथा—बाल एव बालकः । शश एव शशकः । गोधैव गोधिका । स्थानमेव स्थानकम् । इत्यादिषु स्वार्थविहितप्रत्ययान्तेषु प्रकृतिलिङ्गानु-

वर्तनम् । विशेषविधानेषु चातुर्वर्ण्यादिषु प्रकृतिलिङ्गस्याप्यतिसृतिः प्रत्ययेन लिङ्गोन्नयनम् । यथा—पात्री पुटी इत्यादीनाम् (श्लो. ४२)। मत्वर्थे इनिप्रत्ययान्तत्वपक्षे वक्ष्यमाणपरोपगत्वप्रकरणपाठापत्तेः । तदभावत्वेन ङीबन्तत्वनिश्चये सति स्त्रीलिङ्गनिर्देश इत्यवधार्यते । यत्र पात्रीभूतप्रदेश इति प्रयोगस्तत्र मत्वर्थीयप्रत्ययेन विशेष्यनिघ्नमित्यादि । अर्थेन यथा—'नाभी राजसभापि च' (श्लो. ६) । यद्यपि स्त्रीलिङ्गप्रकरणे वक्ष्यते, तथापि प्राण्यङ्गवचनस्य[7] च स्त्रीलिङ्गत्वम् । क्षत्रिये तु पुंस्त्वमित्यर्थेन निर्णयः (१, पृ. ५१८) । चूर्णिः, शाणी, दृणी, दरद् इत्यादिषु प्रकरणवशात् लिङ्गावधारणम् । तथा क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं चेत्यादिकं बोद्धव्यम्[8] ।

ननु—समनन्तरवर्गस्य लिङ्गनिर्णयार्थत्वे 'पात्रामत्रं च भाजनम्' (१, पृ. ५७३) इत्यत्र पात्रशब्दस्य केवलनपुंसकलिङ्गत्वमुक्तम् । लिङ्गादिसंग्रहे तु—'त्रिषु पात्री' (श्लो. ४२) इति त्रिलिङ्गत्वं वक्ष्यते । अतः केवलनपुंसकत्वत्रिलिङ्गत्वयोर्विरोधः । तथा—'कुवलफेनिले' (१, पृ. २३७) इति कुवलशब्दस्य नपुंसकत्वं प्रागुक्तम् । लिङ्गसंग्रहे तु—[9]त्रिलिङ्गत्वमभिधास्यते (श्लो. ४२) इत्यादिस्थलेषु पूर्वोत्तरस्थलेषु च विरोधे कस्य प्रसङ्ग इत्याकाङ्क्षायामाह—लिङ्गशेषेत्यादि (श्लो. २) ॥ १ ॥

[1] अनुक्तं Gm3; संग्रहे इति विवरणपाठः. [2] नानालिङ्गानां Tv. [3] उन्नय्य B6. [4] धात्वधिकारविहिताः Tv. [5] °वररुचिभिः Gm1. [6] तद्वदत्रापीत्यर्थः Gm1, Gm3. [7] Tv adds चक्रमध्यवचनस्य च. [8] नपुंसकत्वं च बोध्यम् B5, B6. [9] 'त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ' इत्येव मुद्रितग्रन्थे दृश्यते (श्लो. ४२).

(पा.) रक्षतु लक्ष्मीरमणो लक्ष्मीकुचकुम्भयुग्मपरिरम्भः ।
रक्षितलोकत्रितयः शिक्षितरक्षोगणाधिपाध्यक्षः[1] ॥

<u>सलिङ्गशास्त्रैः—संकीर्णवदिहोन्नयेत्</u> । इह संग्रहो लिङ्गानां नाम्नां च संग्रहणादयं वर्गो लिङ्गादिसंग्रहवर्गः । अत्रानुक्तं[2] लिङ्गं च संकीर्णवत् संकीर्णवर्गे प्रकृतिप्रत्ययार्थादिभिर्यथा लिङ्गोन्नयनं तथा सलिङ्गशास्त्रैः लिङ्गशास्त्रसहितैः सन्नादिकृत्तद्धितसमासजैः [3]कृत्तद्धितसमासशास्त्रे उन्नयेत् तर्कयेत् । 'जैत्रेजः प्रतिपत्तव्यः शम्बरे शब्दशासने' इति । तानि कानीति चेद् विद्युन्निशावल्लीत्यादीनि लिङ्गशास्त्राणि । स्त्रीभावादौ क्तिन्नित्यादीनि कृच्छास्त्राणि । सन्नादिग्रहणं तुमादिव्युदासार्थम् ।

तल् कटचच् त्वलित्यादितद्धितशास्त्राणि । [4]द्विगुरेकवचनमित्यादीनि समासशास्त्राणि ।। १ ।।

[1] A1 adds श्रीधेनुवागीश्वर्यै नमः, श्रीमहागणाधिपतये नमः.   [2] B3 adds अकथितं लिङ्गम्.   [3] C1 omits.   [4] द्विगुरेकार्थः A1.

लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।
स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च ।। २ ।।

(वि.) लिङ्गशेष—अबाधितः । लिङ्गशास्त्रे स्त्रियामीदूदित्यादिभिः, सन्नादिभिः चिकीर्षा जिहीर्षा इत्यादिभिः, कृज्जैः कृतिः हृतिः इत्यादिभिः, तद्धितजैः मौष्टा पाल्लवेत्यादिभिः, समासजैः त्रिलोकी त्रिवेदीत्यादिभिः लिङ्गविशेषविधिः स्त्रीलिङ्गानुशासनविशेषविधिरबाधितश्चेत् [1]अविशेषितश्चेत् तदा व्यापी प्रसङ्गाद् भवति ।। स्त्रियामीदूद्विरामैकाच् । एकाच् एकस्वरा ईद्विरामा[2] ऊद्विरामा च शब्दप्रकृतिः स्त्रियां वर्तते । अत्रोदाहरणानि—श्रीः, धीः, भूः, पूः इत्यादि ।। सयोनिप्राणिनाम च । योनिमत्प्राणिनां नाम स्त्रियां वर्तते । यथा—इयं कपिः । इयं गुरुः । इयं हरिरित्यादि ।। २ ।।

[1] J2, K2 add विशेषद्वारा दाराः पुंभूम्नि इत्यादिभिः.   [2] ईदूद्विरामा शब्दप्रकृतिः K6.

(विव.) लिङ्गशेषविधिर्व्यापी । उक्तनयेन लिङ्गयोर्विरोधे सति [1]लिङ्गशेषविधिरेव व्यापी प्रसङ्गवान् भवति । ग्राह्यो भवतीत्यर्थः । पात्रादिशब्दानां प्रागुक्तं (१ , पृ. ५७३) लिङ्गमबाधित्वैव लिङ्गान्तरविधानाद् (श्लो. ४२) वास्तवो विरोधो नास्तीत्यभिप्रायः । ननु—लिङ्गशेषविधिनैव तदर्थलाभात् [2]पूर्वविधिवैयर्थ्यमित्यपि न वाच्यम् । प्रयोगप्राचुर्यप्रदर्शनपरत्वाद्वा स्वप्रायपठितस्य लिङ्गनिश्चयार्थत्वाद्वा तस्योपपत्तेरित्यलम् ।।

ननु—यदि पूर्वविध्यपेक्षया लिङ्गविशेषविधेः प्राबल्यं स्यात्, तर्हि 'सयोनिप्राणिनाम च' इति स्त्रीमात्रे नाम्नां सामान्येन स्त्रीलिङ्गत्वं विदधता लिङ्गविशेषविधिना दारशब्दस्य पूर्वोक्तं (१, पृ. ३६५) पुंलिङ्गत्वं कलत्रशब्दस्य नपुंसकत्वम् (२, पृ. ४७०) इत्यादि बाध्येतेत्यत्राह—विशेषैर्यद्यबाधितः । [3]अस्यार्थः—'सयोनिप्राणिनाम च' इति लिङ्गसंग्रहोक्तो विधिः सामान्यविधिः । 'पुं भूम्नि

दाराः' (१, पृ. ३६५), 'कलत्रं श्रोणिभार्ययोः' (१, पृ. ४७०) इति प्रागुक्तो विधिः विशेषविधिः। विशेषेण च सामान्यबाधो युक्तः। [4]विशेषगृहीतव्यतिरिक्तस्थले सामान्यस्य सावकाशत्वात्। न च सामान्यविधिना विशेषविधेर्बाधः। विशेषविधेरन्यत्रानर्थक्यप्रसङ्गात्। अतः सामान्यविशेषव्यतिरेकेण द्वयोरपि विशेषविधित्वे लिङ्गशेषवर्गोक्तविधेः प्राबल्यमिति ॥

एवं सुखज्ञानाय परिभाषामुक्त्वा स्त्रीपुंनपुंसकलिङ्गानि व्यस्तानि च क्रमेण विधत्ते--स्त्रियामिति। अधिकारोऽयम् आ पुंलिङ्गविधेः (श्लो. ११), इत उत्तरत्र वक्ष्यमाणाः स्त्रियां वेदितव्या इत्यर्थः ॥ ईदूद्विरामैकाच्। ईद्विरामम् ईकारान्तम्, ऊद्विरामम् ऊकारान्तम्, एकाच् एकस्वरं पदं च स्त्रियां भवति। यथा--श्रीः, धीः, भूः, पूः इत्यादि। एकाजिति किम्? [5]ग्रामणीः, [6]प्रतिभूः इति। ईदूद्विरामेति किम्? कः, स्वम् इति ॥ सयोनिप्राणिनाम च। योनिः स्त्रीव्यञ्जनम्। योनिमतः प्राणिनो नाम स्त्रियां भवति। यथा--योषित्, वधूः, स्नुषा इत्यादि। सयोनीति किम्? पुरुषः, पिता, भ्राता इति ॥ २ ॥

[1] लिङ्गविशेषे विधिर्व्यापी Tv. [2] तात्पर्यस्य वैयर्थ्यम् B5, B6. [3] अयमर्थः Gm3; अस्यायमर्थः Gm1, Tv. [4] विशेषागृहीतस्थले B6; °गृहीतव्यक्तिव्यतिरिक्त° Gm1. [5] पुंलिङ्गः (२, पृ. २६३). [6] पुंलिङ्गः (१, पृ. ६४६).

(पा.) लिङ्गशेष--अबाधितः। [1]विशेषैरबाधितो लिङ्गशेषविधिर्व्यापी। बाधितविषयं विना तदतिरिक्तस्वविषये व्यापक इत्यर्थः। 'मन्दाक्षं ह्रीस्त्रपा व्रीडा' (१, पृ. १३५)। अत्र मन्दाक्षशब्दो बाधितविषयः ॥ स्त्रियामीदूद्विरामैकाच्। स्त्रियाम् इत्यामसीशब्दम् (श्लो. १०) अधिकारः। ईदूद्विरामाणि ईदूदन्तानि [2]एकाच्कानि च नामानि स्त्रीलिङ्गानि। यथा--लक्ष्मीः, तन्त्रीः, तन्द्रीः, तरीः, जम्बूः, अलाबूः, कुतूः, कूहूः, दृक्, शृक्, स्रक्, वाक् ॥ सयोनिप्राणिनाम च। योनिमत्प्राणिनां नाम स्त्रीलिङ्गम्। यथा--गौः, करेणुः ॥ २ ॥

[1] A1 omits; विशेष्यैः B3. [2] एकाच्कभूतानि A1.

नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम्।
अदन्तैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ॥ ३ ॥

(वि.) नाम विद्युत्—नदीह्रियाम् । तडिद्रात्रिलतावल्लकीदिग्भूसरिल्लज्जानां नाम स्त्रियां वर्तते ।। अदन्तैर्द्विगुरेकार्थः । अदन्तैरकारान्तोत्तरपदैः एकार्थः समाहाररूपो द्विगुसमासः स्त्रियां [1]भवति । अत्रोदाहरणानि—[2]पञ्चपूली, दशपूली, त्रिलोकी इत्यादि ।। न स पात्रयुगादिभिः । स द्विगुसमासः पात्रयुगादिभिरुत्तरपदैः स्त्रियां न वर्तते । उदाहरणानि—[3]त्रिपात्रम्, चतुर्युगम् । आदिशब्दात् त्रिभुवनमित्यादि ।। ३ ।।

[1] भवेत् K_3, K_6.　[2] पञ्चवटी K_3.　[3] पञ्चपात्रम् K_3.

(विव.) नाम विद्युत्—नदीह्रियाम् । विद्युतः सौदामिन्याः, निशाया रात्र्याः[1], वल्ल्याः लतायाः, वीणाया वल्लक्याः, दिशः ककुभः, भुवो भूमेः, नद्याः सरितः, ह्रियो लज्जायाश्च सर्वाणि नामानि स्त्रीलिङ्गानि[2] भवन्ति । उदाहरणानि स्पष्टानि । मन्दाक्षमित्यादौ (१, पृ. २३५) विशेषविधिना सामान्यस्य बाधः सर्वत्रानुसंधेयः । अत्र भूशब्दह्रीशब्दयोर्द्वयोः 'ईदूद्विरामैकाच्' (श्लो. २) इति प्रागुक्तम् । निशावल्लीवीणादिशब्दानां 'ङ्याबूङन्तम्' (श्लो. ५) इति वक्ष्यमाणं नित्यस्त्रीत्वं सुस्पष्टम् । तथापि तत्पर्यायाणामनेवंभूतानां विद्युद्रात्रिव्रततिप्रभृतीनां लिङ्गप्रतिपादनार्थं [3]स्पष्टार्थं चानेन रूपेणाभिधानमित्यवगन्तव्यम् ।।

अदन्तैर्द्विगुरेकार्थे । अदन्तैः अकारान्तोत्तरपदैः सह संख्याशब्दानामेकार्थे । '[4]तद्धितार्थोत्तरपदसमाहारे च' (२. १. ५१) इति समाहाररूपार्थे विहितो द्विगुसमासः स्त्रियां वर्तते । तदुक्तम्—'अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' इति (वा. २. ४. १७) । अत्र समाहारस्यैकत्वाद् 'द्विगुरेकवचनम्' (२. ४. १) इत्येकवचनम् । 'द्विगोः' (४. १. २१) इति ङीप्प्रत्ययश्च । यथा—पञ्चपूली, दशपूली (काशिका १, पृ. २६६), षट्शती, सप्तशती इत्यादि । तथा तिसृणां पुरां समाहारः त्रिपुरी, पञ्चानां धुरां समाहारः पञ्चधुरी इति । अत्र 'ऋक्पूरब्धू...' इत्यादिना (५. ४. ७४) समासान्तस्य उत्तरपदावयवत्वदर्शनाश्रयणेन उत्तरपदस्याकारान्तत्वे त्रिपुरी पञ्चधुरी इत्यादि भवति ।।

यत्तु मतम्—प्रथमतः समासः, ततः समासान्तविधिः इति । अत्रादन्तैरिति अकारान्तभूतैर्लक्षितो द्विगुः स्त्रियामिति व्याख्येयम् । अदन्तैरिति किम्? पञ्चानामग्नीनां समाहारः पञ्चाग्नि । अत्र 'स नपुंसकम्' (२. ४. १७) इति नपुंसकत्वम् । द्विगुरिति किम्? समित्कुशम्, पाणिपादम् इति समाहारद्वन्द्वे मा

भूत् । अत्र 'द्वन्द्वैकत्वाव्ययीभावौ' (श्लो. २६) इति नपुंसकत्वं वक्ष्यति । एकार्थ इति किम् ? त्रिनावम्,[5] पञ्चकपालः पुरोडाशः इति ॥

अदन्तैर्द्विगुरेकार्थ इत्यस्य क्वचिदपवादमाह—न स पात्रयुगादिभिः । स द्विगुरकारान्तैरपि पात्रयुगादिभिरुत्तरपदैरुपेतः स्त्रियां न भवति । यथा—त्रिपात्रम्, चतुर्युगम् त्रिभुवनम् (काशिका १, पृ. १३१) इत्यादि । ननु—'पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः' (श्लो. २५) इति वक्ष्यमाणो नपुंसकविधिः अदन्तैरित्यस्य बाधको भविष्यतीति किमत्रानेन प्रतिषेधेनेति चेत्, सत्यम् । अस्य प्रतिषेधस्य 'पात्रादिभ्यः[6] प्रतिषेधो वक्तव्यः' (वा. २. ४. १७) इति वक्तव्यमूलत्वप्रतिज्ञानार्थं प्रपञ्चार्थं चोपन्यास इति ॥ ३ ॥

[1] रात्रेः Gm1. [2] स्त्रीलिङ्गाः B6. [3] Gm3 omits स्पष्टार्थं. [4] तद्धितोत्तर° B5, B6. [5] त्रिषवणम् Tj1. [6] 'पात्राद्यन्तस्य न' इति कौमुद्यां पाठः (पृ. १८२).

(पा.) नाम विद्युत्—नदीह्रियाम् । विद्युदाद्यर्थानां नाम स्त्रीलिङ्गम् । विद्युन्नाम्नो नीलाञ्जना [1]शतह्रदा, निशानाम्नो याम्या क्षणिनी[2], वल्लीनाम्नो व्रततिः प्रततिः, तद्विशेषनाम्नोऽपि[3] द्राक्षा नवमालिका, वीणानाम्नो घोषवती कण्ठकूणिका, तद्विशेषनाम्नोऽपि किंनरी दन्तिका ॥ अदन्तैर्द्विगु—युगादिभिः । अकारान्तोत्तरपदसमाहारद्विगुः स्त्रीलिङ्गः । त्रिलोकी पञ्चपूली । न स पात्रयुगादिभिरिति बाधितविषयः प्रदर्शितः । यथा—[4]पञ्चपात्रम्, चतुर्युगम्, त्रिभुवनम् इति (काशिका १, पृ. १३१) ॥ ३ ॥

[1] शतावर्ता A1. [2] B3, C1 add पक्षिणी. [3] °विशेषनामानि B3. [4] A1 omits the examples.

तल्वृन्दे येनिकटचत्रा वैरमैथुनिकादिवुन् ।
स्त्रीभावादावनिक्तिण्वुल्णच्ण्वुच्क्यब्युजिञ्ङनिशाः ॥ ४ ॥
उणादिषु निरूरीश्च ङ्याबूङन्तं चलं स्थिरम् ।

(वि.) तल्वृन्दे येनि—चलं स्थिरम् । तल्—भावसमूहस्वार्थेषु वर्तमानः तल्प्रत्ययः[1] स्त्रियां वर्तते । अत्र क्रमेणोदाहरणानि । भावे यथा—अश्वता, पुरुषता[2] । समूहार्थे यथा—[3]जनता, बन्धुता, सहायता । स्वार्थे यथा—देवता

इत्यादि ।। वृन्दे येनिकटचत्राः । वृन्दे समूहार्थे विहिता यप्रत्ययइनिप्रत्ययकटचच्-प्रत्ययत्रप्रत्ययान्ताः स्त्रियां वर्तन्ते । उदाहरणानि । यप्रत्ययान्ता यथा—[4]पाश्या, वात्या, धूम्या, वन्या इत्यादि । इनिप्रत्ययान्ता यथा—खलिनी, उलूकिनी, [5]कुण्डलिनी इत्यादि । कटचच्प्रत्ययान्तो यथा—रथकटचा इति (काशिका १, पृ. ३१२) । त्रप्रत्ययान्तो यथा—गोत्रा इति ।।

वैरमैथुनिकादिवुन् । वैरविवाहवाचको[6] वुन्प्रत्ययान्तः स्त्रियां वर्तते । उदाहरणानि । वैरे यथा—काकोलूकयोर्वैरं काकोलूकिका, अश्वमहिषिका इत्यादि । विवाहे यथा—अत्रिभरद्वाजयोर्विवाहः अत्रिभरद्वाजिका[7] । [8]वसिष्ठकुशिकयोर्विवाहः वसिष्ठकुशिकिका । आदिशब्दाद् दानदण्डद्वन्द्वभावकर्मवाचको वुन्प्रत्ययान्तश्च स्त्रियां वर्तते । क्रमेणोदाहरणानि । द्वौ द्वौ [9]पादौ ददाति द्विपदिकां ददाति । द्वे द्वे शते दण्डयति द्विशतिकां दण्डयति ।। वुञ् शिष्योपाध्याययोः भावः कर्म वा शैष्योपाध्यायिका (काशिका २, पृ. २६) । गर्गस्य [श्लाघार्थे] भावः कर्म वा गार्गिका । कौशिकस्य[10] भावः कर्म वा कौशिकिका (५. १. १३४) इत्यादि ।।

स्त्रीभावादिति । सिद्धावस्थामापन्नो धात्वर्थो भावः[11] । भावः आदिर्यस्यासौ भावादिः । स्त्री चासौ भावादिश्च स्त्रीभावादिः । तस्मिन् विहिता अन्यादि-प्रत्ययान्ताः स्त्रियां वर्तन्ते । अनिप्रत्ययान्तो यथा—अजननिः, अकरणिः ।। क्तिन्प्रत्ययान्तो यथा—कृतिः, भृतिः, हृतिरित्यादि ।। ण्वुल्प्रत्ययान्तो यथा—प्रवाहिका, प्रच्छर्दिकेत्यादि ।। णच्प्रत्ययान्तो यथा—व्यावक्रोशी । अन्योन्यक्रोशनं वर्तत इत्यर्थः । व्यावहासीत्यादि । ण्वुच्प्रत्ययान्तो यथा—[भवतः] शायिका । क्यप्प्रत्ययान्तो यथा—[12]व्रज्या । समज्या, सुत्येत्यादि ।। युच्प्रत्ययान्तो यथा—आसना, कारणा, ग्रन्थनेत्यादि ।। अङ्प्रत्ययान्तो यथा—त्रपा, भिदा, छिदा इत्यादि ।। अप्रत्ययान्तो यथा—पुत्रीया इत्यादि[13] । निप्रत्ययान्तो यथा—ग्लानिः, म्लानिः, हानिः इत्यादि । शप्रत्ययान्तो यथा—मृगया, इच्छा[14] इत्यादि । अथ उणादिषु निप्रत्ययान्तो यथा—श्रेणिः, योनिः, द्रोणिः इत्यादि ।। अनिप्रत्ययान्तो यथा—सरणिः । ऊकारप्रत्ययान्तो यथा— खर्जूः, चमूः इत्यादि । ईकारप्रत्ययान्तो यथा—तन्त्रीः, लक्ष्मीः इत्यादि ।।

ङ्याबूङन्तं चलं स्थिरम् । ङीत्यनेन ङीप्, ङीष्, ङीन् इति प्रत्ययान्तानां ग्रहणम् । आबित्यनेन टाप् डाप् चाप् इति प्रत्ययान्तानां ग्रहणम् । ऊङ इत्यनेन ऊङ्प्रत्ययस्य ग्रहणम् । चलमभिधेयवल्लिङ्गम् । स्थिरं नियतलिङ्गम् । चलं स्थिरं

ङीबन्तमावन्तमूङन्तं शब्दरूपं स्त्रियां वर्तते । ङीबन्ते यथा—कर्त्री । ङीषन्ते यथा—गौरी । ङीनन्ते यथा—शार्ङ्गरवी । टाबन्तो यथा—अजा । डाबन्तो यथा—सुराजा । चाबन्तो यथा—कौमुदगन्ध्या । ऊङन्तो यथा—वामोरूः ।।४।।

[1] °प्रत्ययान्तः J2, K5. [2] पुत्रता J2. [3] K3, K4 add °ग्रामता. [4] 'पाशादिभ्यो यः' (४. २. ४९). [5] उलमुकिनी K4. [6] J2, K5 add विरोधे विवाहे, आदिशब्दग्रहणाद् वीप्सायां च विहितः वुन्. [7] K5 adds बाभ्रव्य-शालङ्कायनिका. [8] °विश्वामित्रयोः J2. [9] K6 omits पादौ ददाति. [10] श्लाघार्थे; 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' (५. १. १३४). [11] K5 adds धात्वर्थः केवलः शब्दो भाव इत्यभिधीयते. [12] प्रव्रज्या K4, K5. [13] K4, K5 add इञ्प्रत्ययान्तो यथा—कारिः, दारिः इत्यादि. [14] K3, K5 add यदृच्छा, परिसर्या, अवद्या.

(विव.) तल्वृन्दे येनि—चलं स्थिरम् । तल् । विविधस्तल्प्रत्ययः । तलन्तं शब्दरूपं स्त्रियां [1]वर्तते । तत्र, 'तस्य भावस्त्वतलौ' (५. १. ११९) इति भावार्थे तल् । यथा—देवदत्तस्य भावो देवदत्तता । [2]अश्वता । '[3]ग्रामजन-बन्धुभ्यस्तल्' (४. २. ४३) इति समूहार्थे तल् । यथा—ग्रामता, जनता इत्यादि । 'देवात्तल्' (५. ४. २७) इति स्वार्थे तल् । देव एव देवता । अत्रानुबन्धग्रहणं किम्? '[4]पूञ्हसिभ्यां तन्' (उ. ३. ८६) इति तन्प्रत्यये पोतः, हस्तः, इति ।।

[1] Gm_1 adds एव. [2] आश्वता B6, Gm_1. [3] °बन्धुसहायेभ्यः° Tj1. [4] 'हसिमृग्रिणवामिदमिलूपूधुर्विभ्यस्तन्' इत्युणादिसूत्रम् (पृ. ५१८).

वृन्दे येनिकड्यत्राः[1] । यश्च इनिश्च कड्यच्च त्रश्चेति चत्वारः प्रत्ययाः समूहार्थे विहिताः । तदन्ताः शब्दाः स्त्रियां भवन्ति । 'पाशादिभ्यो यः' (४. २. ४९) इति यप्रत्यये पाशानां समूहः पाश्या । एवं गल्या, तृण्या, हल्या इत्यादि ।। 'खलगोरथात्' (४. २. ५०) इत्यनुवृत्तौ, 'इनित्रकड्यचश्च' (४. २. ५१) इति यथासंख्यन्यायेन खलशब्दाद् इनिप्रत्यये खलिनी । अत्र 'खलादिभ्य इनिर्वक्तव्यः' (वा. ५. २. ५१) इति वक्तव्यबलाद् उलूकानां समूहः उलूकिनी, कुटुम्बिनी, कुण्डलिनी [2]इत्यादि । गवां समूह इत्यर्थे गोशब्दादुत्तरे[3] त्रप्रत्यये गोत्रा । रथानां समूहो [4]रथकड्या इति । केचित्तु रथकट्येति मूर्धन्यवर्गप्रथमाक्षरयुक्तं कथयन्ति । सूत्रस्थचशब्देन शब्दत्रयादपि यप्रत्ययः समुच्चीयते । ततश्च खल्या, गव्या, रथ्या इति त्रयः शब्दा भवन्ति । वृन्द इति किम्? 'सख्युर्यः' (५. १. १२६) इत्यादौ स्त्रीत्वं मा भूत् ।।

[1] कङचच् इति विवरणाभिमतः पाठः.	[2] Gm1, Tv add उल्मुकिनी, उक्थिनी.
[3] Gm1 omits उत्तरे.	[4] B6, Tj2 add रथ्या.

वैरमैथुनिकादिवुन्। वैरं विरोधः। मैथुनिकः विवाहः। तत्र 'द्वन्द्वाद् वुन् वैरमैथुनिकयोः' (४. ३. १२५) इत्यनेन सूत्रेण द्वन्द्वसमासात् प्रातिपदिकाद् वुन्-प्रत्ययो विहितः। तदन्तं शब्दरूपं स्त्रियां भवति। यथा—काकोलूकयोर्वैरं काकोलूकिका। अश्वमहिषिका इति ॥ मैथुनिकायां यथा—अत्रिभरद्वाजयोर्विवाहः अत्रिभरद्वाजिका। शाण्डिल्यकुशिकयोर्विवाहः शाण्डिल्यकुशिकिका। आदिशब्दार्थः शेषे—'वीप्सादण्डनदाने वुन्' इति। वीप्सायां यथा—द्वौ द्वौ पादौ ददाति द्विपदिका। 'पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च' (५. ४. १) इति वुन्-प्रत्ययः। तत्संनियोगेन चान्त्यस्य लोपः। 'यस्येति च' (६. ४. १४८) इत्यनेनैव लोपे सिद्धे पुनर्लोपवचनं [1]परनिमित्तानपेक्षलोपविधानार्थम्। 'यस्येति च' इति विहितो लोपः परनिमित्तकः। तस्य स्थानिवद्भावेन[2] 'पादः पत्' (६. ४. १३०) इति पद्भावो न स्यात्। प्रत्ययसंनियोगविशिष्टस्य तु लोपस्य परनिमित्तकत्वाभावात् [3]स्थानिवद्भावाभावेन द्विपदिकां ददाति द्विशतिकां ददातीत्यादौ पद्भावः स्यादेवेति वृत्तिकारेण प्रपञ्चितम् (काशिका २, पृ. ८०)। दण्डने यथा—द्विपदिकां दण्डयति। दाने यथा—द्विपदिकां ददाति। द्वौ द्वौ पादौ ददातीत्यर्थः। द्वे द्वे शते ददाति द्विशतिकां ददाति। 'दण्डव्यवसर्गयोश्च' (५. ४. २) इत्युभयत्रापि वुन्प्रत्ययः। व्यवसर्गः दानम्।

[1] अनैमित्तिकार्थम् इति मुद्रितकाशिकायाम् (२, पृ. ८०).	[2] स्थानिवद्भावात् इति मु. ग्र.	[3] न स्थानिवत्त्वम् इति मु. ग्र.

अत्र शेषकारः—

'वुञ् द्वन्द्वाद् भावकर्मणोः। श्लाघायां तदवेतेत्याकारे चरणगोत्रयोः' इति। अस्यार्थः—'योपधाद् गुरूपोत्तमाद् वुञ्'। (५. १. १३२) इत्यतो वुञ् इति वर्तमाने, 'द्वन्द्वमनोज्ञादिभ्यश्च' (५. १. १३३) इत्यनेन सूत्रेण भावकर्मणोरर्थयोः द्वन्द्वसमासाद् विहितो यो वुञ्प्रत्ययः तदन्तं शब्दरूपं स्त्रियां भवति। यथा—शिष्योपाध्याययोर्भावः कर्म वा शैष्योपाध्यायिका। गोपालपशुपालिका। तथा 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' (५. १. १३४) इति सूत्रेण, गोत्रमपत्यम्, चरणं शाखा, गोत्रप्रत्ययान्तात् चरणप्रत्ययान्ताच्च श्लाघादिष्वर्थेषु गम्यमानेषु

भावकर्मणोर्विहितो यो वुञ्प्रत्ययः तदन्तं शब्दरूपं स्त्रियां भवति। गर्गस्य भावेन कर्मणा वा श्लाघते गार्गिकया श्लाघते[1]। तदवेतः तत्प्राप्तिः। अत्याकारः पराधिक्षेपः[2]। गार्गिकामवेतः। गार्गिकया अत्याकरोति। चरणप्रत्ययान्ताद् यथा—काठिकया श्लाघते। काठिकया अत्याकरोति। [3]काठिकामवेतः इत्यादि (काशिका २, पृ. २९)॥

[1] B6 adds तत्र श्लाघा विकत्थनम्। गार्ग्यत्वेन विकत्थत इत्यर्थः. [2] पराक्षेपः Gm1, Gm3. [3] Tj1, Tj2 add तदवेत इत्यर्थे यथा—

स्त्रीभावादावनिक्तिन्—युजिञ्चङनिशाः। शेषे—'अकर्तृककारके भावे क्विबकारेण्वुचः स्त्रियाम्' इति। भाव आदिर्यस्य कर्तृवर्जितकारकस्य स भावादिः इति तद्गुणसंविज्ञानो बहुव्रीहिः। स्त्रीलिङ्गश्चासौ भावादिश्च, [1]स्त्रीभावे कर्तृवर्जिते कारकेऽर्थे च विहिताः अनि, क्तिन्, ण्वुल्, णच्, क्यप्, युच्, इञ्, अङ, नि, श, इत्याचार्यसंगृहीता दश प्रत्ययाः, तथाभूत एवार्थे शेषकारेण क्विप् अकारः [2]इण् ण्वुच् इति चत्वारश्च, इत्येवं चतुर्दशप्रत्ययान्ताः स्त्रीलिङ्गा संगृहीताः वेदितव्याः। ते च क्रमेणोदाह्रियन्ते।

[1] स्त्रीलिङ्गे भावे B5, B6. [2] इञ् Tj1, Tj2.

तत्र[1] 'आक्रोशे नञ्यनिः' (३. ३. ११२) इत्याक्रोशे शपथे गम्यमाने नञ्युपपदे भावार्थे धातोरनिप्रत्ययो विहितः। यथा—अकरणिस्ते वृषल भूयात् (काशिका १, पृ. २२४)। अभवनिरस्तु ते विभूतेः[2]। अपूरणिस्ते कामानामस्तु। 'तस्याजननिरेवास्तु जननीक्लेशकारिणः' इति (शिशु. २. ४५)। अथ क्तिन्। यथा—'स्त्रियां क्तिन्' (३. ३. ९४)। प्रकृतिः, हृतिः, शुद्धिः, बुद्धिः इति। 'श्रुयजिस्तुभ्यः करणे' (वा. ३. ३. ९४)। श्रूयतेऽनयेति[3] श्रुतिः। इज्यतेऽनयेति इष्टिः। स्तूयतेऽनया सा स्तुतिः। '[4]ऋकारल्वादिभ्यः क्तिन्निष्ठावद् भवति इति वक्तव्यम्' (वा. ३. ३. ९४)। 'जॄष् वयोहानौ'। जीर्णिः। 'कॄ हिंसायाम्'। कीर्णिः। 'लूञ् छेदने'। लूनिः। निष्ठावद्भावात् तकारस्य नकारः (८. २. ४२)। 'स्थागापापचो भावे' (३. ३. ९५) इत्यङप्रत्ययस्यापवादः। 'ष्ठा गतिनिवृत्तौ'। प्रस्थितिः। 'व्यवस्थायामसंज्ञायाम्' (१. १. ३४), 'आस्पदं प्रतिष्ठायाम्' (६. १. १४६) इत्यादिज्ञापकाद् अङप्यस्ति। प्रतिष्ठा, संस्था,

निष्ठा इत्यादि । 'गै शब्दे' । उद्गीतिः । 'पा पाने' । प्रपीतिः । 'डुपचष् पाके' । पक्तिः । षित्करणसामर्थ्याद्[5] अङप्यस्ति (३. ३. १०४) । पचा । तथा 'ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च' (३. ३. ९७) इति क्तिन्नन्तनिपातनम् यथा—'अव रक्षणे' । ऊतिः । 'यु मिश्रणे' । यूतिः । 'जू' इति सौत्रो धातुः । जूतिः । 'षोऽन्तकर्मणि' । सातिः । 'हि गतौ' । हेतिः ।।

[1] Tv adds अनिप्रत्ययो यथा. [2] विभूतिः Gm1, Gm3. [3] B6 adds सा.
[4] 'ऋज्वादिभ्यः क्तिन्निष्ठावद्वाच्यः' B5, B6. [5] 'षिद्भिदादिभ्योऽङ'.

अथ ण्वुल् । 'रोगाख्यायां ण्वुल् बहुलम्' (३. ३. १०८) इति ण्वुल् । 'छर्द वमने' । प्रच्छर्दिका । 'वह प्रापणे' । प्रवाहिका (काशिका १, पृ. २२३) । 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' (वा. ३. ३. १०८) । 'आस उपवेशने' । आसिका । 'शीङ स्वप्ने' । शायिका । 'विश प्रवेशने' । वेशिका ।।

अथ णच् । 'कर्मव्यतिहारे णच् स्त्रियाम्' (३. ३. ४३) इति । धातुभ्यो भावार्थे णच्प्रत्ययो भवति । कर्मव्यतिहारे क्रियाविनिमये गम्यमाने, 'णचः स्त्रियामञ्' (५. ४. १४) इति स्वार्थिकोऽञ्प्रत्ययः । अञ्प्रत्ययान्तत्वेन 'टिड्ढाणञ् . . .' इत्यादिना (४. १. १५) ङीपि व्यावक्रोशी । अन्योन्यं क्रोशनमित्यर्थः । एवं परस्परं हसनं व्यावहासी । परस्परमुक्षणं व्यात्युक्षी । [1]व्यावचोरी इत्यादि (काशिका १, पृ. २१४) ।।

अथ ण्वुच् । 'पर्यायार्हणोत्पत्तिषु ण्वुच्' (३. ३. १११) इति । पर्यायः परिपाटी । अर्हणमर्हो योग्यता । एष्वर्थेषु ण्वुच् स्यात् । यथा—भवतः शायिका । भवत आसिका । अर्हे—भवानिक्षुभक्षिकामर्हति । ऋणे—इक्षुभक्षिकां मे धारयसि । उत्पत्तौ—इक्षुभक्षिका मे[2] उदपादि (काशिका १, पृ. २२४) ।।

अथ क्यप्—'व्रजयजोर्भावे क्यप्' (३. ३. ९८) । 'व्रज गतौ' । व्रज्या । 'यज देवपूजादौ' । इज्या । 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङभृञिणः' (३. ३. ९९) इति क्यप् । 'अज गतिक्षेपणयोः' । समजन्त्यस्यामिति समज्या । 'षद्लृ विशरणगत्यवसादनेषु' । निषीदन्त्यस्यामिति निषद्या । निपत्या । 'मन ज्ञाने' । मन्यते मन्या । झलादित्वाभावाद् अनुनासिकलोपाभावः । 'विद ज्ञाने' । विदन्ति यया सा विद्या । 'षुञ् अभिषवे' । सुन्वन्त्यस्यामिति सुत्या । 'शीङ स्वप्ने' । शेरतेऽस्यामिति शय्या । '[3]भृञ् भरणे' । भ्रियते कर्मकरोऽनयेति

भृत्या । 'इण् गतौ' । [4]यन्त्यनयेति इत्या । 'कृञः श च' (३. ३. १००) इति क्यपि कृत्या (६. १. ७१) ॥

[1] व्यावभोजी B6, Gm3. [2] Tv omits मे. [3] 'डुभृञ् धारणपोषणयोः' Tv.
[4] यान्ति B6.

अत्र क्यप्प्रत्ययोदाहरणमध्ये 'हनस्त च' (३. १. १०८) इति सूत्रेण निष्पन्नो हत्याशब्दोऽपि स्त्रीलिङ्गः कैश्चिदुदाहृतः । तत्र मूलं चिन्तनीयम् । तथा हि—नात्र [1]भावमात्रविहितक्यप्प्रत्ययान्तत्वमेव स्त्रीलिङ्गत्वे प्रयोजकम् । किं तर्हि? [2]स्त्र्यधिकारविहितक्यबन्तत्वम् । अन्यथा 'भुवो भावे' (३. १. १०७) इति सूत्रविहितक्यबन्तो ब्रह्मभूयशब्दोऽपि स्त्रीलिङ्गः प्रसज्येत[3] । तच्चानिष्टम् । न च 'हनस्त च' इति सूत्रे स्त्रियामिति पदं श्रूयते । नापि स्त्र्यधिकारगतमिदं सूत्रम् । तस्मादस्मिन् प्रकरणे हत्या इत्युदाहरणमसङ्गतम् । अतः हत्याशब्दस्य प्रमाणान्तरात् स्त्रीलिङ्गत्वमवगन्तव्यम् ॥

अथ युच् । 'ण्यासश्रन्थो युच्' (३. ३. १०७) इति । तत्र ण्यन्ताद् यथा—कारणा । हारणा । 'आस उपवेशने' । आसना । 'श्रन्थ[4] ग्रन्थ संदर्भे' । श्रन्थना । ग्रन्थना । चन्द्रस्तु—'ण्यासश्रन्थो युच्' इति सूत्रं पठित्वा 'ग्रन्थ मोचनप्रतिपादनयोः' इति क्र्यादिधातुजं ग्रन्थनाशब्दमाह । 'घट्टिवन्दिविदिभ्य उपसंख्यानम्' (वा. ३. ३. १०७) इति युच् । 'घट्ट चलने' । घट्टना । 'वदि अभिवादनस्तुत्योः' । वन्दना । 'विद ज्ञाने' । वेदना (काशिका १, पृ. २२२) । 'इषेरनिच्छार्थस्य युज् वक्तव्यः' (वा. ३. ३. १०७) इति अन्वेषणा, अध्येषणा इति ॥

[1] °विहितं Tv. [2] स्त्र्यधिकारे विहितस्य Tj1, Tj2. [3] प्रसज्यते Tv.
[4] काशिकायां तु (१, पृ. २२३)—'श्रन्थिः क्र्यादिर्गृह्यते, श्रन्थ विमोचनप्रतिहर्षयोरिति । न चुरादिः, श्रन्थ ग्रन्थ संदर्भे' इति । ण्यन्तत्वेनैव सिद्धत्वात्.

अथ इञ् । 'विभाषाख्यानपरिप्रश्नयोरिञ् च' (३. ३. ११०) इति । परिप्रश्ने आख्याने गम्यमाने इञ् स्यात् । यथा—कां कारिं त्वमकार्षीः । कां कारिकां क्रियां कृत्यां कृतिं वा अकार्षीः । चकारानुबन्धनाद् ण्वुलपि ॥

अथ अङ्। 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इति। षिद्भ्यस्तावत्। 'जॄष् वयोहानौ'। जीर्यन्त्यङ्गान्यस्यामिति जरा। 'ऋदृशोऽङि गुणः' (७. ४. १६) इति गुणः। 'त्रपूष् लज्जायाम्'। त्रपा इत्यादि। भिदादयस्तु महोदधौ—

'[1]भिदिं छिदिं विदिं दयिं रुजिं मृजिं प्रछिं चुरिम्।
अनामनि क्षिपिं तथा गुहिं तुलिं वसिं वपिम्॥
क्षपिं क्षियिं रिखिं लिखिं शुभिं सिधिं मिधिं गुधिम्।

इत्यादयः पठिताः (८. ४५१-२, पृ. ४७४)। 'भिदिर् विदारणे'। भिदा। 'छिदिर् द्वैधीकरणे'। छिदा। 'विदिर् लाभे', 'विद ज्ञाने'। विदा। 'दय दानगतिरक्षणेषु'। दया। 'रुज रोगे'। रुजा। 'मृजूष् शुद्धौ'। मृजा[2]। 'प्रच्छ ज्ञीप्सायाम्'। पृच्छा। 'चुर स्तेये'। चुरा। गणपाठादेव णेर्लुक्। 'क्षिप प्रेरणे'। क्षिपा। एतेऽनामनि असंज्ञाविषये साधवः। अनन्तरधातुभ्यः संज्ञायामेव प्रत्ययः। यथा—'गुहू संवरणे'। गुहा। पर्वतकुहरम्, ओषधिविशेषश्च[3]। 'तुल उन्माने'। तुला। 'वस निवासे'। वसत्यनया मांसमिति वसा मांसस्नेहः। 'डुवप् [4]बीजतन्तुसंताने'। उप्यते नाभिसमीपमिति वपा। वस्त्रखण्डसदृशाकारो मेदोविशेषः। 'क्षै क्षये'। हेतुमण्णिचि [5]पुगागमे (७. ३. ३६) मितां ह्रस्वे [6]च (६. ४. ९२) क्षपा रात्रिः। 'क्षि हिंसायाम्'। क्षिया आचारभ्रंशः। रेखा राजिः। लेखा सैव। रिखिर्लिखसमानार्थः सौत्रो धातुः। 'शुभ दीप्तौ'। शोभा कान्तिः। 'षिधू संराद्धौ'। सेधा। प्राणिविशेषः[7]। ['मिधि मेधाहिंसनयोः'। मेधा]। 'गुध परिवेष्टने'। गोधा[8]। 'कृप कृपायाम्' इत्यस्मात् 'कृपेः संप्रसारणं च' (गणसूत्रम्) इत्यङि कृपा। आरा शस्त्री[9]। हारा। कारा बन्धने। तारा ज्योतिः। धारा प्रपातः इत्यादिप्रपञ्चो भिदादेर्द्रष्टव्यः॥

[1] भिदा, छिदा, विदा इत्यादि Tv. [2] B6 adds षित्त्वादेरङ्प्रत्यये सिद्धे मृजेर्गणपाठः. [3] गिर्योषध्योर्गुहा Tv. [4] B6 omits °तन्तु°. [5] 'अर्तिह्री . . . क्ष्माय्यातां पुग्णौ'. [6] घटादयो मितः (गणसूत्रम्). [7] 'अलुगुपेरु' B5. [8] 'उडुमु' B5. [9] शस्त्र्याम् Tv.

'चिन्तिपूजिकथिकुम्बिचर्चश्च' (३. ३. १०५) इति स्त्रियामङ्। 'चिती संज्ञाने'। अस्माच्चुरादिण्यन्तात् चिन्ता। 'पूज पूजायाम्'। पूजा। 'कथ वाक्यप्रबन्धे'। कथा। 'कुबि आच्छादने'। कुम्बा। 'चर्च अध्ययने'। चर्चा।

'आतश्चोपसर्गे'[1] (३. ३. १०६)। प्रदा। प्रधा। विदा। उपधा। 'श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्या' (वा. ३. ३. १०६)। श्रद्धा। अन्तर्धा। '[2]इक् कृष्यादिभ्यः' (वा. ३. ३. १०८)। कृषिः। 'लिप उपदेहे'। लिपिः इत्यादि ॥

अथ निः। 'ग्लाम्लाज्याहाभ्यो निर्वक्तव्यः' (वा. ३. ३. ९४)। 'ग्लै हर्षक्षये'। ग्लानिः। 'म्लै गात्रविनामे'। म्लानिः। 'ज्या वयोहानौ'। ज्यानिः। 'ओहाक् त्यागे'। हानिः। ग्लादिभ्यो निप्रत्ययः क्तिन्प्रत्ययस्यापवादः (काशिका १, पृ. २२१) ॥

अथ शप्रत्ययः। 'कृञः श च' (३. ३. १००)। [3]क्रिया। तथा इच्छेरप्रत्ययान्तो निपातः (३. ३. १०१)। इच्छा। तथा 'परिचर्यापरिसर्यामृगयाटाटचानामुपसंख्यानम्' (वा. ३. ३. १०१) इति शप्रत्ययान्तनिपातः। तथा 'जागर्तेरकारो वा' (वा. ३. ३. १०१) इति शप्रत्ययः। जागर्या। एवं मूलग्रन्थस्था दश प्रत्यया उदाहृताः ॥

[1] Tv adds इति स्त्रियामङ्.   [2] Tv adds अथ इक्.   [3] Gm1, Gm3 add रिङ्शयग्लिङ्क्षु (७. ४. २८).

अथ शेषकारीयाश्चत्वारः क्रमेणोदाह्रियन्ते—क्विप्। 'संपदादिभ्यः[1] क्विप्' (वा. ३. ३. ९४)। भावग्रहणं [अकर्तृककारके भावे इति शेषग्रन्थे पृ. ६६२] कर्तृव्यतिरिक्तकारकोपलक्षणम्। 'पद गतौ'। संपत्। विपत्। आपत्। 'षद्लृ विशरणगत्यवसादनेषु'। संसत्। परिषत्। उपनिषत्। 'विद ज्ञाने'। वित्। संवित्। 'णह बन्धने'। उपानत्। 'वृषु सेचने'। प्रावृट्। 'प्लुष दाहे'। विप्रुट्। 'वृतु वर्तने'। आवृत्[2]। 'यम उपरमे'। संयत्। 'श्रु श्रवणे'। प्रतिश्रुत्। 'डुभृञ् धारणपोषणयोः'। उपभृत्। 'वृधु वृद्धौ'। संवृत्। 'ञि इन्धी दीप्तौ'। समित्। 'क्रुध कोपे'। क्रुत्। 'क्षुध बुभुक्षायाम्'। क्षुत्। 'युध संप्रहारे'। युत्। 'रुजो भङ्गे'। रुक्। 'रुष हिंसायाम्'। रुट्। 'शुच शोके'। शुक्। 'रुच दीप्तौ'। रुक्। 'मृड सुखने'। मृट्। 'गॄ निगरणे'। गीः। 'गुरी उद्यमने[3]'। [4]आगूः। 'ह्री लज्जायाम्' ह्रीः। 'ञिभी भये'। भीः। 'लुभ विमोहने'। लुप् ॥ 'भू सत्तायाम्'। भूः। 'लूञ् छेदने'। लूः। 'द्विष अप्रीतौ'। द्विट्। 'त्विष दीप्तौ'। त्विट्। 'क्रुश आह्वाने'। क्रुट्। तथा—'ज्वरत्वरश्रिव्यविमवामुपधायाश्च'। (६. ४. २०)[5]। जूः। 'ञित्वरा

संभ्रमे ’ । तूः । [6]‘ स्रिवु गतिशोषणयोः ’ । स्रूः । ‘ अव रक्षणे ’ । ऊः । ‘ मव बन्धने ’ । मूः । ‘ मुच्लृ मोक्षणे ’ । मुट्[7] । ‘ णश अदर्शने ’ । नट् । ‘ नशेर्वा ’ (८. २. ६३) इति कुत्वविकल्पे नक् । नट् । एवं कृत्, युज्, विट्, भिद्, छिद् इत्यादयोऽवगन्तव्याः ॥

[1] B5, B6 add भावे. [2] संवृत् Tv. [3] उद्यमे Tj2. [4] गूः Tv. [5] Gm1. Gm3 add इति ऊडादेशः. [6] काशिकायां तु श्रिवीति पठित्वा श्रूः इत्याद्युदाहृतम्. [7] मुक् Tv.

अथ अ । ‘ गुप्तिज्किद्भ्यः सन् ’ (३. १. ५) इति । निन्दाक्षमाव्याधिप्रतीकारेष्वर्थेषु विहितात्[1] सन्प्रत्ययान्ताद् धातोः ‘अ प्रत्ययात्’ (३. ३. १०२) इति अकारप्रत्यये जुगुप्सा । तितिक्षा । चिकित्सा । ‘ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ’ (३. १. ६) इत्यत्र ‘ मान जिज्ञासायाम् ’ इति सन्नन्ताद् अप्रत्यये मीमांसा । ‘ बध वैरूप्ये ’ सनि उपधादीर्घे भष्भावे (८. २. ३७)चर्त्वे च अकारप्रत्यये बीभत्सा । दानेरार्जव इति दीदांसा । [2]शानेर्निशातनेऽर्थे सनि शीशांसा । तथा ‘ धातोः कर्मणः समानकर्तृकादिच्छायां वा ’ (३. १. ७) इति सनि अप्रत्यये च चिकीर्षा, जिहीर्षा, जिगीषा इत्यादि । ‘ आशङ्कायामुपसंख्यानम् ’ (वा. ३. १. ७) । विचिकित्सा । एवं [3]सन्प्रत्ययव्यतिरिक्त-क्यजादिप्रत्ययान्तेभ्योऽपि धातुभ्यः पूर्ववदप्रत्ययान्ता [4]उदाहर्तव्याः । यथा—पुत्रीया, पुत्रकाम्या, [5]लोलूया, कण्डूया, चित्रीया, कलहाया इत्यादयः । तथा—‘ गुरोश्च हलः ’ (३. ३. १०३) इत्यप्रत्ययः । ‘ एध वृद्धौ ’ । एधा । ‘ स्पर्ध संघर्षे ’ । स्पर्धा । ‘ शंसु स्तुतौ ’ । शंसा इति । ‘ जागर्तेरकारो वा ’ (वा. ३. ३. १०१) । जागरा, जागर्या इति ।

अथ इण् । [6]‘ इणजादिभ्यः ’ (वा. ३. ३. १०८) इति इण् । ‘ अज गतिक्षेपणयोः ’ । आजिः । ‘ अत सातत्यगमने ’ । आतिः । ‘ राजृ दीप्तौ ’ । राजिः । ‘ जनी प्रादुर्भावे ’, ‘ जनिवध्योश्च ’ (७. ३. ३५) इति वृद्धिप्रतिषेधे जनिः । तथा ‘ विभाषाख्यानपरिप्रश्नयोरिञ् च ’ (३. ३. ११०) इति । परिप्रश्ने यथा—कां त्वं कारिमकार्षीः । कां क्रियामकार्षीः इति प्रश्नार्थः । आख्याने यथा—सर्वां कारिमकार्षम् इत्यादि (काशिका १, पृ. २२४) ॥

[1] विहितसन्प्रत्यय° Tj2. [2] निशानेऽर्थे Tj2. [3] °क्यबादि° Gm3. [4] उदाहार्याः Gm3. [5] Tj1, Tv add रोहिताया, गोपाया, ऋतीया. [6] 'इञजादिभ्यः' इति काशिकायां पाठः (१, पृ. २२३).

अथ ण्वुच्। 'पर्यायार्हणोत्पत्तिषु ण्वुच्' (३. ३. १११) इति। पर्याये यथा—भवतः शायिका। भवत आसिका। अर्हे यथा—अर्हति भवानिक्षुभक्षिकाम्। ऋणे यथा—इक्षुभक्षिकां मे धारयसि। उत्पत्तौ यथा—इक्षुभक्षिका मे उत्पन्ना इति। अत्र 'ण्वुल्तृचौ' (३. १. १३३), 'वदः सुपि क्यप् च' (३. १. १०६), 'क्यचि च' (७. ४. ३३), 'अत इञ्' (४. १. ९५), 'पाघ्राध्माधेट्दृशः शः' (३. १. १३७), 'इक्श्तिपौ धातुनिर्देशे' (वा. ३. ३. १०८) इत्यादिभिः कर्तरि विहितानां ण्वुलादीनां स्त्रीत्वं मा भूदिति [1]'भावादौ' इत्युक्तम्। तथापि 'भुवो भावे' (३. १. १०७) इत्यादिना विहितक्यबादिनिवृत्त्यर्थं [2]स्त्र्यधिकारविशेषणं कृतम्॥

केचिदत्र 'स्त्रीभावादनिक्तिण्णुल्णच्ण्वुच्क्यब्युजिञ्ङनिशाः' इति पूर्वोदाहृतदशप्रत्ययातिरिक्तं ण्वुच्प्रत्ययमकारप्रत्ययं [3]चान्तरीकृत्य द्वादशप्रत्ययोपसंग्रहत्वेन अमरसिंहीयश्लोकार्धं पठन्ति। स पाठः [4]शेषकारस्यानभिप्रेतः। ण्वुच्प्रत्ययाकारप्रत्यययोः अमरसिंहनाथेनानुक्तत्वबुद्ध्या ताभ्यां सह प्रत्ययचतुष्टयस्य स्वेनोपसंग्रहणादिति॥

उणादिषु निरूरीश्च। उणादिप्रत्ययानां मध्ये निः, ऊः, ईः इति प्रत्यया उक्ताः। तदन्ताः शब्दाः स्त्रीलिङ्गा भवन्ति। तत्र निप्रत्ययो यथा—'वीज्याज्वरिभ्यो निः' (उ. ४. ४९) इति। 'वी गतिप्रजनकान्त्यसनखादनेषु'। वीयते बध्यत इति वेणिः केशबन्धः। 'ज्या वयोहानौ'। जिनात्यनयेति ज्यानिः। 'ज्वर रोगे'। ज्वरयतीति जूर्णिः आदित्यः। 'सृवृषिभ्यां कित्' (उ. ४. ५०)। सरन्त्यनयेति सृणिः अङ्कुशः[5]। वर्षतीति वृष्णिः यदुविशेषः। अग्निः। वह्निः। इत्यादीनां तु सुरपर्यायाणां विशेषणेन बाधसद्भावात् पुंस्त्वम्॥

[1] मूले (श्लो. ४). [2] स्त्र्यधिकारविहितत्वेन Tj2. [3] अन्तर्गतरीत्या Tv; अन्तर्गतीकृत्य Tj2. [4] अमरशेषकारस्य नाभिप्रेतः. Tv [5] Tv adds अशनिः, अवनिः.

अथ ऊः। 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उ. १. ८४)। 'कृष[1] विलेखने'। कर्षूः [2]व्याधिविशेषः, गोमयश्च। 'चमु अदने'। चमूः सेना। 'तनु

विस्तारे'। तनूः शरीरम्। 'धन धान्ये'। धनत्यनेनेति धनूः[3] शरः। 'सर्ज षर्ज अर्जने'। सर्ज्यते [4]आर्ज्यते ऽनेनेति सर्जूः वणिक्। 'खर्ज व्यथने पूजने च'। [5]खर्जतीति खर्जूः। पामा। 'मृजेर्गुणश्च' (उ. १. ८५)। 'मृजूष् शुद्धौ'। मर्जूः शुद्धिः रजश्च। 'वहो धश्च' (उ. १. ८६)। उह्यत इति वधूः अभिनवपाणिग्रहणा। अन्यत्र स्त्रीमात्रे गौणः। 'कषेश्छश्च' (उ. १. ८७)। 'कष हिंसार्थः'। कषत्यनयेति कच्छूः पामा। 'णित्कसिपद्यर्तेः' (उ. १. ८८)। 'कस गतौ'। कासूः रोगविशेषः। (शक्तिरिति कौमुद्याम् पृ. ४९८)। [6]आयुधविशेषश्च। 'पद गतौ'। पादूः उपानत्। 'ऋ गतौ'। अर्यतेऽनयेति आरूः। वेदिका, वेदना, बलं च। 'नञि लम्बेर्नलोपश्च' (उ. १. ९०)। 'लबि शब्दे अवस्रंसने च।'। अलाबूः। 'के श्र एरङ चास्य' (उ. १. ९१)। 'शॄ हिंसायाम्'। कशेरूः। [7]तृणकन्दविशेषः। पद्ममूलम्। वीरुद्विशेषः। फलजातिश्च। 'त्रो दुट् च' (उ. १. ९२)। 'तॄ प्लवनतरणयोः'। तरतीति तर्दूः। दारुहस्तकः। 'दरिद्रातेर्यलोपश्च' (उ. १. ९३)। 'दरिद्रा दुर्गतौ'। दर्द्रूः कुष्ठविशेषः। 'नृतिशृध्योः कूः' (उ. १. ९४)। 'नृती [8]गात्रविक्षेपे'। नृत्यतीति नृतूः। दीर्घकृमिविशेषः। 'शृधु मृधु उन्दे'। शृधूः [9]गुणः प्रज्ञा च। अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (उ. १. ९६)। 'अति अदि बन्धने'। अन्दूः अयोमयी [10]शृङ्खला। 'दृभी ग्रन्थे'। दृम्भूः सर्पजातिः, दृन्भूर्वा। 'चमु छमु जमु झमु अदने'। जम्यत इति जम्बूः वृक्षविशेषः। 'फल निष्पत्तौ'। कफेलूः श्लेष्मातकः। कर्कशब्दोपपदाद् धाञः कूप्रत्ययः। उपपदस्य नुक्। कर्कन्धूः बदरी। दधातेः इषुक् चागमः। दिधिषूः द्विरूढा॥

[1] Tj2 omits Dhātu sūtra. [2] कुष्ठम् Tj2. [3] A bow (Apte's Dict. p. 853). [4] आर्जयत इति B5, B6. [5] खर्जयति Gm1, Gm3. [6] सुबलाख्यमायुधं च B6, Tv. [7] Gm3, Tj2 add जलजातिविशेषः. [8] गात्रविनामे Tj2. [9] गुदमिति कोशे (Apte's Dict. p. 1566). [10] गजशृङ्खला B6, Tj2.

अथ ईः। 'अवितॄस्तृतन्त्रिभ्य ईः' (उ. ३. १५९)। 'अव रक्षणादिषु'। अवतीति अवीः प्रकाशः। अवति रक्षत्यात्मानं परपुरुषादिभ्य इति अवीः रजस्वला। 'तॄ प्लवनतरणयोः'। तीर्यतेऽनयेति तरीः नौः। 'स्तॄञ् आच्छादने'। स्तृणातीति स्तरीः [1]धूमः। 'तन्त्रि कुटुम्बधारणे'। तन्त्रीः वीणारज्जुः, वाद्यविशेषश्च। तन्द्रिः सौत्रो धातुः आलस्यार्थः। तन्द्रीः आलस्यम्।

'लक्षेर्मुट् च' (उ. ३. १६२)। 'लक्ष दर्शनाङ्कनयोः'। लक्षयतीति[2] लक्ष्मीः ॥ अत्र चकारेण औणादिक एव अनिप्रत्ययो गृह्यते। यथा—'अर्तिसृधृधम्यश्य-वितृभ्योऽनिः' (उ. २. १०२)। 'ऋ गतौ'। अर्यत इति अरणिः काष्ठविशेषः। 'सृ गतौ'। सरन्त्यनेनेति सरणिःपन्थाः। 'धृङ् अवस्थाने'। धरणिः पृथिवी। धमिः सौत्रो धातुः। धमनिः। अश्नुत इति अशनिः वज्रम्। अवतीति अवनिः पृथिवी। तरतीति तरणिः सूर्यः इति। अत्र अरण्याशनिशब्दयोरपि विशेषविधिना [3]लिङ्गद्वयवृत्तित्वम्। तरणिशब्दस्य सूर्यवाचकत्वाद् 'द्युमणिस्तरणिर्मित्रः' (१, पृ. ६९) इति विशेषविधिकल्पनेन[4] पूर्वोत्तरसाहचर्येण पूंलिङ्गत्वमिति[5] विज्ञेयम् ॥

ङ्याबूङन्तं चलं स्थिरम्। ङीप्, ङीष्, ङीन् इति त्रयाणां ङी इति सामान्य-ग्रहणम्। आप् इति टाप्, डाप्, चाप् इति त्रयाणां ग्रहणम्। ङ्यन्तम्, आबन्तम्, ऊङन्तं च स्त्रीलिङ्गं भवति। क्रमेणोदाहरणानि। यथा 'ऋन्नेभ्यो ङीप्' (४. १. ५)। कर्त्री, दण्डिनी इति। 'अन्यतो ङीष्' (४. १. ४०), 'षिद् गौरादिभ्यश्च' (४. १. ४१) इति ङीषि गौरी। 'शार्ङ्गरवाद्यञो ङीन्' (४. १. ७३)। शार्ङ्गरवी। बैदी। इत्यादि। 'अजाद्यतष्टाप्' (४. १. ४) इति टापि अजा, एडका। 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) इति डापि बहुराजा। 'यङश्चाप्' (४. १. ७४) इति चाप्प्रत्यये [6]कारीषगन्ध्या। 'ऊङुतः' (४. १. ६६) इति ऊङ्प्रत्यये ब्रह्मबन्धूः। 'ऊरूत्तरपदादौपम्ये' (४. १. ६९) करभोरूः। 'संहित-शफलक्षणवामादेश्च' (४. १. ७०) इति रम्भोरूः, संहितोरूः, शफोरूः, लक्षणोरूः, वामोरूः इत्यादि।

ननु यस्य शब्दस्य स्त्रियां वृत्तिः स शब्दः स्त्रीलिङ्ग इति वक्तव्यम्। ततश्चास्मिन् शास्त्रे स्त्रियामपरिभाषितत्वात् लोकप्रसिद्धस्त्रीग्रहणे खट्वा-शालादौ अतिव्याप्तिप्रसङ्गात् 'स्त्रियाम्' इति सिद्धवदनुवादोऽनुपपन्नः। एवं पुंनपुंसकयोर्लिङ्गयोरपि दुर्वचनत्वात् लिङ्गविशेषव्यवहारानुपपत्तिरित्याशङ्क्याह —चलं स्थिरमिति। चलं चेतनम्। स्थिरमचेतनमित्यर्थः। अयमभिप्रायः—चेतनेषु [7]स्तनादिरभिव्यक्तिः स्त्रीव्यञ्जिका। [8]श्मश्रुरोमादिरभिव्यक्तिः पुंस्त्वस्य। उभयविलक्षणा तु नपुंसकत्वस्य। अचेतनेषु खट्वादिषु पूर्वोक्तव्यञ्जकव्यक्तीनाम-भावाद् ब्राह्मणत्वादिवद् उपदेशव्यङ्ग्या एव जातय इति। तदुक्तं 'स्त्रियाम्' (४. १. ३) इत्यत्र सूत्रे वृत्तिकारैः—'सामान्यविशेषाः स्त्रीत्वादयो [9]गोत्वादय इव बहुप्रकारा व्यक्तयः। [10]क्वचिदाश्रयविशेषाभावाद् उपदेशव्यङ्ग्या[11] एव

भवन्ति । यथा ब्राह्मणत्वादयः ' इति (काशिका. १, पृ. २६२) । अत्र न्यासकारादिभिश्च अयमेवार्थः प्रपञ्चितः । तत्र चलनशीलेषु चेतनेषु योषितादिषु व्यक्तिविशेषव्यङ्ग्यं [12]स्त्रीत्वादिकं शब्दार्थः । स्थिरप्रायेष्वचेतनेषु खट्वादिषु पुनरुपदेशमात्राभिव्यङ्ग्यं स्त्रीत्वादिकं शब्दार्थः । एवं च सति चलं चलव्यक्तिव्यङ्ग्यलिङ्गविशिष्टार्थाभिधायकम् । स्थिरं स्थिरव्यक्तिगतोपदेशमात्राभिव्यङ्ग्यलिङ्गविशिष्टार्थाभिधायकं ङ्याबूङन्तं स्त्रियां भवतीति । एतच्च लिङ्गस्वरूपनिरूपणं यद्यप्येतद्वर्गादौ ग्रन्थादौ वा कर्तव्यम्, तथापि ङ्याबूङन्तमित्यस्य मूलभूते ' स्त्रियाम् ' (४. १. ३) इति सूत्रे [13]कृतमित्यत्रैवायमर्थः एकमुष्टचा आचार्येण सूचितमित्यवधेयम् ।। ४ ।।

[1] छदिः Tj2.　　[2] B6 adds नीतिकुशलम्.　　[3] पुंलिङ्गः, स्त्रीलिङ्गश्च.
[4] विशेषविधिना Tv.　　[5] इह for इति Tj2.　　[6] कौमुदगन्ध्या Tv.　　[7] स्तनादिमतीव्यक्तिः Tv.　　[8] Tj2 omits °रोम°.　　[9] गोत्वादिपदवत् Gm1, Gm3.
[10] आश्रयगतविशेषस्य दुर्निरूपत्वात् B5, B6.　　[11] उपदेशमात्राभिव्यङ्ग्या एव Tj1, Tv.
[12] स्त्रीलिङ्गत्व° Tj2.　　[13] अत्रैवाचार्येण सूचितम् Tj2.

(पा.) तल्वृन्दे येनि—चलं स्थिरम् । तल्प्रत्ययान्तः स्त्रीलिङ्गः । भावे तल् यथा—जडस्य भावो जडता । ' देवात्तल् ' (५. ४. २७) । देव एव देवता । ' ग्रामजनबन्धुसहायेभ्यस्तल्[1] ' (४. २. ४३) । ग्रामाणां समूहो ग्रामता । जनता । बन्धुता । सहायता । ' गजाच्चेति वक्तव्यम् ' (वा. ४. २. ४३) । गजानां समूहो गजता ।। वृन्दे येनिकट्यत्राः । समूहार्थे यप्रत्ययान्ताः इनित्रकटचजन्ताश्च स्त्रीलिङ्गाः । [2]पाश्या, तृण्या, उलूकिनी, गोत्रा, रथकटचा ।। वैरमैथुनिकादिवुन् । वैरमैथुनिकाद्यर्थेषु वुन्प्रत्ययः स्त्रीलिङ्गः । ' द्वन्द्वाद् वुन् वैरमैथुनिकयोः ' (४. ३. १२५) । काकोलूकानां वैरं काकोलूकिका । अत्रिभरद्वाजयोर्मैथुनिको विवाहः अत्रिभरद्वाजिका ।। ' पादशतस्य ' (५. ४. १) ' दण्डव्यवसर्गयोश्च ' (५. ४. २) । द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति, द्विशतिकां ददाति । द्विपदिकां दण्डितः । द्विपदिकां व्यवसृजति । उपलक्षणात् वुञ्प्रत्ययोऽपि स्त्रीलिङ्गः । गार्गिकया श्लाघते । ' द्वन्द्वमनोज्ञादिभ्यश्च ' (५. १. १३३) वुञ् । शिष्योपाध्याययोर्भावः शैष्योपाध्यायिका ।।

स्त्रीभावादौ—चलं स्थिरम् । स्त्रीभावार्थे अनिप्रभृतिप्रत्ययान्ताः स्त्रीलिङ्गाः । ' आक्रोशे नञ्यनिः ' (३. ३. ११२) । अकरणिस्ते वृषल[3] भूयात् ।

अजननिः ।। ‘ स्त्रियां क्तिन् ’ (३. ३. ९४) । कृतिः, हृतिः । क्तिन्ग्रहणेन निप्रत्ययस्यापि ग्रहणम् । ‘ ग्लाम्लाज्याहाभ्यो [4]निः ’ (वा. ३. ३. ९४) । ग्लानिः, म्लानिः[5] ।। ‘ रोगाख्यायां ण्वुल् बहुलम् ’ (३. ३. १०८) । प्रवाहिका, प्रच्छर्दिका । ‘ पर्यायार्हर्णोत्पत्तिषु ण्वुच् ’ (३. ३. १११) । भवतः शायिका ।। ‘ कर्मव्यतिहारे णच् स्त्रियाम् ’ (३. ३. ४३) । अन्योन्यं क्रोशनं व्यावक्रोशी वर्तते ।। ‘ व्रजयजोर्भावे क्यप् ’ । व्रज्या, इज्या ।। ‘ ण्यासश्रन्थो युच् ’ (३. ३. १०७) । कारणा, आसना, श्रन्थना । ‘ षिद्भिदादिभ्योऽङ ’ (३. ३. १०४) । पचा, भिदा, छिदा ।। ‘ [6]प्रश्नाख्यानयोरिञ्च ’ (३. ३. ११०) । कां कारिमकार्षीः । सर्वां कारिमकार्षम् । ‘ अ प्रत्ययात् ’ (३. ३. १०२) । चिकीर्षा, पुत्रीया ।। ‘ कृञः श च ’ (३. ३. १००) । क्रिया । ‘ इच्छा ’ (३. ३. १०१) ।। [7]उणादिष्वन्यन्तादयः । अरणिः, धमनिः, लक्ष्मीः, तन्त्रीः, अलाबूः इत्यादि ।। ४ ।।

[1] °गजसहायेभ्यः A_1. [2] B_3 adds ‘पाशादिभ्यो यः’, ‘खलगोरथात्’, ‘इनित्रकटयचश्च’ । पाश्या, वात्या, खल्या, रथ्या, खलिनी, गोत्रा, रथकट्या. [3] शठ B_3, C_1. [4] निर्वक्तव्या A_1. [5] C_1 adds ज्यानिः, हानिः. [6] ‘ विभाषाख्यानपरिप्रश्नयोरिञ् च ’ इति काशिकायां सूत्रपाठः (१, पृ. २२४). [7] A_1 omits uṇādi examples.

तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा णदिक् ।। ५ ।।
घञो ञः सा क्रियास्यां चेद् दाण्डपाता हि फाल्गुनी ।
श्यैनंपाता च मृगया तैलंपाता स्वधेति दिक् ।। ६ ।।

(वि.) <u>तत्क्रीडायां प्रहरणं चेत्</u> । अस्यां क्रीडायां तत्प्रहरणमित्येतस्मिन्नर्थे णप्रत्ययो विहितश्चेत् तदन्तं शब्दरूपं स्त्रियां वर्तते[1] । <u>मौष्टा पाल्लवा णदिक्</u> । [2]पूर्वोक्तप्रत्ययस्योदाहरणमिदम् । मुष्टिः[3] प्रहरणमस्यां क्रीडायामिति मौष्टा । पल्लवः[4] प्रहरणमस्यां क्रीडायामिति पाल्लवा ।। <u>घञो ञः सा क्रियास्यां चेत्</u> । सा क्रिया अस्यां वर्तते इति विवक्षा चेत् तदा घञन्तप्रतिपादकोपरि विहितोऽञ्प्रत्ययः स्त्रियां भवति । अत्र पूर्वोक्तं स्पष्टीकर्तुं स्वयमेवोदाहरणानि दर्शयति––<u>दाण्डपाता हि फाल्गुनी––स्वधेति दिक्</u> । यस्यां फाल्गुन्यां दण्डपातो वर्तते सा दाण्डपाता । यस्यां मृगयायां श्येनानां पातो वर्तते सा श्यैनंपाता । यस्यां स्वधायां तिलानां पातो वर्तते सा तैलंपाता । दिग्ग्रहणमुदाहरणान्तरप्रदर्शनार्थम्[5] ।। ५-६ ।।

[1] भवति K4. [2] J2, K3, K5 add मौष्टा पाल्लवेति पदद्वयम्. [3] मुष्टि-प्रहरणम् J2, K6. [4] पल्लवप्रहरणम् J2, K6. [5] K5 adds यथा—मौसलपाता, कौसुमपाता इत्यादि.

(विव.) तत्क्रीडायां प्रहरणं चेत् । तदित्यनन्तरम् अस्याम् इत्यध्याहार्यम् । अनन्तरोदाहरण एव वाक्ये[1] 'णदिक्' इति वक्ष्यमाणसामर्थ्याद् इहापि चेत् इत्यनन्तरं णप्रत्यय इत्यध्याहार्यम्[2]। ततश्चायमर्थः—मुष्ट्यादिकमस्यां क्रीडायामित्यस्मिन्नर्थे तदिति प्रथमासमर्थात् प्रहरणवाचिनो मुष्ट्यादिशब्दात् णप्रत्ययो विहितः। तदन्तं शब्दरूपं च स्त्रियां भवति । 'तदस्यां प्रहरणमिति क्रीडायां णः' (४. २. ५७) इति क्रीडायामिति[3] स्त्रीलिङ्गनिर्देशाद् एवंविधविषये णप्रत्ययान्तस्य स्त्रीलिङ्गत्वं सूत्रकारस्याभिमतमिति गम्यते ॥ स्वयमेवोदाहरति—मौष्टा पाल्लवा णदिक् इति । मुष्टिः प्रहरणमस्यां क्रीडायामिति मौष्टा । पल्लवाः प्रहरणमस्यां क्रियायामिति पाल्लवा इति । णदिक् णप्रत्ययस्योदाहरणमार्ग इत्यर्थः ॥

घञो ञः सा क्रियास्यां चेत् । भावार्थविहितघञन्तशब्दवाच्या दण्डपातादिरूपा या क्रिया सा वर्ततेऽस्यामिति विवक्षा चेद् भवति तदा घञो घञन्तरूपात् प्रातिपदिकात् प्रथमासमर्थाद् 'घञः सास्यां क्रियेति ञः' (४. २. ५८) इति सूत्रेण यो ञप्रत्ययो [4]विहितः तदन्तं शब्दरूपं स्त्रियां भवति । स्वयमेवोदाहरति—

दाण्डपाता हि फाल्गुनी—स्वधेति दिक् इति । दण्डानां कर्तृभूतानां पातः । 'षष्ठी' (२. २. ८) इति कर्तरि षष्ठीसमासः । दण्डपातरूपक्रिया यस्यां फाल्गुन्यां सा फाल्गुनी दाण्डपाता । श्येनपातलक्षणा क्रिया यस्यां मृगयायां सा श्यैनंपाता । स्वधेति पदं श्राद्धक्रियावचनमाकारान्तम् । 'स्वधायै वः पितरो नमः' (वाज. सं. काण्व. २. ७. ४), 'मध्यान्नीचादुच्चा स्वधयाभिप्रतस्थे', [5]'स्वधां पितृभ्योऽमृतं दुहानाः' इत्यादिप्रयोगदर्शनात् । तिलपातक्रिया यस्यां स्वधायां सा स्वधा तैलंपाता । 'घञः सास्यां क्रियेति ञः' (४. २. ५८) इति ञप्रत्यये आदिवृद्धिश्च (७. २. ११७) । 'श्येनतिलस्य पाते ञे' (६. ३. ७१) इति मुम् । अत्रापि सूत्रकारेण अस्यामिति निर्देशात् स्त्रीलिङ्गत्वमभिप्रेतम् । अतश्च मृगयादेरेव विशेष्यत्वम् । न त्वाखेटमृगव्यश्राद्धादीनामित्यवगन्तव्यम् । दिक् । एष दिगुदाहरणमार्ग इत्यर्थः । तेन मौसलपाता, पौष्पपाता इत्यादि भवति ॥ ५-६ ॥

[1] वाक्येन Tv. [2] अध्याहर्तव्यम् Gm1, Gm3. [3] Tj2 adds अस्यामिति.
[4] अभिहितः Tv. [5] 'स्वधां दुहाना अमृतस्य धाराम्' इति तै. सं. ४. २. ६. ६.

(पा.) तत्क्रीडायां––पाल्लवा णदिक् । 'तदस्यां प्रहरणमिति क्रीडायां णः' (४. २. ५७) इत्यर्थे विहितणप्रत्ययान्तः स्त्रीलिङ्गः । मुष्टिप्रहरणमस्यामिति मौष्टा । पाल्लवा[1] । एवं दण्डः प्रहरणमस्यां क्रीडायामिति दाण्डा ।। घञो ञः सा क्रियायां––तैलंपाता स्वधेति दिक् । 'घञः सास्यां क्रियेति ञः' (४. २. ५८) इत्यस्मिन्नर्थे[2] विहितञप्रत्ययान्तः[3] स्त्रीलिङ्गः । दण्डपातोऽस्यां वर्तत इति दाण्डपाता फाल्गुनी । फाल्गुनीति फल्गुनीनक्षत्रयुक्ता पौर्णमासी । श्येनपातोऽस्यां वर्तत[4] इति श्यैनंपाता मृगया । तिलपातो ऽस्यां वर्तत इति तैलंपाता स्वधा । 'श्येनतिलस्य पाते ञे' (६. ३. ७१) इति मुमागमः ।। ५-६ ।।

[1] A1 adds पल्लवैर्वा अत्र क्रीडा. [2] B3 omits अस्मिन्. [3] ञप्रत्ययः A1.
[4] प्रवर्तते B3.

स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि ।
लङ्का शेफालिका टीका धातकी पञ्जिकाढकी ।। ७ ।।

(वि.) स्त्री स्यात् काचित्–– अपचये यदि । मृणाल्यादिः काचिदाख्या अपचयेऽल्पत्वे यदि विवक्षा तदा स्त्री स्यात् । अल्पं मृणालं मृणाली । आदिग्रहणाद् अल्पः पटः पटी । एवं घटी[1] पुटी छत्री [2]इत्यादि ।। लङ्का शेफालिका––आढकी । एते शब्दाः स्त्रीलिङ्गे वर्तन्ते । लङ्का रावणपुरी । शेफालिका[3] सुवहा । टीका [4]पूर्वकृतग्रन्थव्याख्या । धातकी धातुपुष्पिका । पञ्चिका न्यासः । आढकी [5]तुवरिका ।। ७ ।।

[1] J2, K4 add मठी, कुम्भी. [2] इत्यादीनि K3. [3] K2, K4 add तु.
[4] K3 omits °ग्रन्थ°. [5] तुवरी K4, K5.

(विव.) स्त्री स्यात् काचित्––अपचये यदि । [1]मृणाल्यादिरित्ययमर्थः । अल्पविवक्षायामशेषेष्वपि[2] महाप्रबन्धेषु दृष्टा काचिदेव मृणाल्यादिः स्त्री स्यात् । गौरादिपाठात्[3] (४. १. ४१) ङीषन्तश्च भवति । आदिशब्दाद् घटपटकुम्भादिशब्देभ्यः तदर्थापचयविवक्षायां घटी पटी कुम्भी इत्यादिर्भवति । काचिदिति किम्? अल्पो वृक्षः । अल्पं गृहम् । अल्पं सुखमित्यदौ मा भूत् ।।

एवं पुरातनलिङ्गानुशासनछायामनुसृत्यानेकशब्दोपसंग्राहप्रत्ययादिमुखेन[4] केषांचिल्लिङ्गान्यनुशिष्य अधुना कांश्चित् स्त्रीलिङ्गान् सार्धश्लोकत्रयेण स्वरूपतो दर्शयति—[5]लङ्का शेफालिका—आढकी इति। लङ्का रावणपुरी। शेफालिका नीलपुष्पिका निर्गुण्डी। टीका प्रतिपदव्याख्याग्रन्थः न्यासपदमञ्जर्यादिः। धातकी धातुपुष्पिका प्रागुक्ता (१, पृ. २८६)। पञ्चिका व्याख्येयविषयपदार्थप्रकाशको ग्रन्थः कौमारपञ्चिकादिः। आढकी तुवर्याख्यो धान्यविशेषः। 'आढकं मानभेदे स्यात् तुवर्यामाढकी मता' इति विश्वप्रकाशः (पृ. ८, श्लो. ६६)॥ ७॥

[1] मृणाल्यादेरि° Tv.　[2] अशेषेऽपि B5, B6.　[3] 'षिद्गौरादिभ्यश्च'. [4] °संग्राहक° Tv.　[5] 'लक आस्वादने' चुरादिः। 'एरच्'। घञ् वा। पृषोदरादित्वाद् नुम्। नुम्यनुपधात्वान्न वृद्धिः [लङ्का]; शेते इति शे। शीङः विच्। शयं फालयति। 'ञिफला विशरणे'। अण्। स्वार्थे कन्। क्वुन् वा [शेफालिका]; टीक्यतेऽर्थो यया। 'टीकृ गतौ'। 'गुरोश्च हलः' इत्यः [टीका]; धातुं करोति। 'तत्करोति...' इति णिच्। टिलोपः। क्वुन्। पिप्पल्यादित्वात् ङीष् [धातकी]; 'पिजि भाषार्थः', 'गुरोश्च' इत्यः। पृषोदरादित्वादिकारस्याकारः। स्वार्थे कन् [पञ्चिका]; आ समन्तात् ढौकते। अच् घञ् वा। पृषोदरादिः। 'गौरादिः' (४. १. ४२) [आढकी] इति भा. दी. (पृ. ५२०).

(पा.) स्त्री स्यात् काचित्—अपचये यदि। मृणल्यादिशब्दाः केचन[1] अपचयविवक्षायां स्त्रीलिङ्गाः। अल्पं मृणालं मृणाली। एवं मठी छत्री[2] इत्यादि॥ लङ्का शेफालिका—आढकी। लङ्कादयः शब्दाः स्त्रीलिङ्गाः। लङ्काशब्दोऽनेकार्थः[3]। 'लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु[4] च' इति विश्वप्रकाशः (पृ. ६, श्लो. ४६)। शेफालिका गतार्था (१, पृ. २५७)। टीकेति विवरणम्। धातकी गतार्था (१, पृ. २८६)। पञ्चिकेति विवरणम्। द्यूतभेदोऽपि स्यात्। 'द्यूतोऽस्त्रियामक्षवती तद्भेदाः पञ्चिकादयः' इति वैजयन्ती (पृ. १४०, श्लो. ५६)। आढकीति स्वल्पद्रोण[5]ः। आढकिकेति केषांचिदावन्तः॥ ७॥

[1] केचित् B3.　[2] छत्रिका B3, C1.　[3] नानार्थः B3.　[4] °शाखिनी° A1. [5] A1 adds 'पिन्नतूमेडु'.

सिध्मका शारिका हिक्का प्राचिकोल्का पिपीलिका।
तिन्दुकी कणिका भङ्गिः सुरङ्गासूचिमाढयः॥ ८॥

(वि.) सिध्रका—सूचिमाढयः। एते शब्दाः स्त्रीलिङ्गे वर्तन्ते। सिध्रका[1] वृक्षविशेषः[2]। शारिका पक्षिभेदः। हिक्का वायुविकारेण कण्ठे विलम्ब्य[3] जायमानो ध्वनिः। प्राचिका स्पृक्का[4]। उल्का पुच्छज्योतिः[5]। पिपीलिका क्षुद्रजन्तुभेदः। तिन्दुकी [6]वृक्षभेदः। कणिका गोधूमपिष्टम्[7]। भङ्गिर्भङ्गी वा विच्छित्तिः। सुरङ्गा चोरकृतकुड्यादिगतद्वारम्[8]। सूचिः[9] सीवनसाधनम्। माढिर्देश-विशेषः ॥ ८ ॥

[1] °सिध्रिका J2, K6. [2] °भेदः K3, K4. [3] विलम्ब्य विलम्ब्य K5. [4] J2 adds मक्षिकाविशेष इति केचित्. [5] तेजःपुञ्ज इति यावत्. [6] तिन्दुकः K6. [7] पिष्टकम् K4. [8] °गर्त° K4. [9] सूची K2, K3.

(विव.) सिध्रका—सूचिमाढयः। [1]सिध्रका शिवलिङ्गाभबीजाढ्यफला। 'स्यात् सिध्रका लता' इति भट्टशिवः। शारी एव शारिका पक्षिविशेषः।[2] हिक्का [3]विलम्ब्य कण्ठादुद्गतो वायुविकारजः शब्दः। 'वेक्कुपेरु'। प्राचिका वनमक्षिका। प्राचिकाशब्दः प्रसिद्ध इति सुबोधिनीकारः। 'प्राचिका वनमक्षिका' इति सुभूतिचन्द्रः। 'श्येन्यां तु प्राचिका मता' इति वैजयन्ती (पृ. २७, श्लो. २०)। उल्का नभसः पतन्ती विद्युत्समतारा। पिपीलिका स्वेदजः क्षुद्रजन्तुविशेषः। 'चिमपेरु'। तिन्दुकः पुंलिङ्गः वृक्षविशेषः प्रागुक्तः (१, पृ. २३८)। संप्रति तत्रैवार्थे तिन्दुकीति स्त्रीलिङ्गोऽपि ङीषन्तः पठ्यते। कणिका दारुमयी लेखिनी। गोधूमचूर्णं च। व्रीहिभेद इत्यन्ये। कर्णिका इति पाठे कर्णभूषणमर्थः। भङ्गी प्रकारः। 'चञ्चद्विपञ्चीकलनादभङ्गीसंगीतमङ्गीकुरुते स्म भृङ्गी' इति प्रयोगः। सुरुङ्गा चौरकृतकुड्यविवरम्। 'कन्नपेरु'। सूचिः जीर्णवस्त्रखण्डसीवनसाधनम्, तीक्ष्णाग्रायोविकारः। सूची नृत्तभेदश्च। वीचिः कल्लोलः। अन्ये तु वीचि-शब्दस्थाने माटिरिति मूर्धन्यप्रथमोपधं माटिशब्दं पठन्ति। तत्र माटिः पर्णशिरा। अन्ये तु माढिरिति मूर्धन्यचतुर्थोपधमाहुः। तत्र माढिः देशविशेष इति स्वामी (पृ. ३४६)। पत्रादिभङ्ग इत्यपरे। 'माढिः पत्रादिभङ्गौ स्यान्माढिर्दैन्यप्रकाशने' इति विश्वप्रकाशः (पृ. ४६, श्लो. ४)। माटिमाढिशब्दयोरुभयोरपि देशीय-पदत्वेन धातुजत्वाभावात् स्वोपक्रान्तवर्णक्रमोल्लङ्घनमपि न दोषमावहति। केचित्[4] काञ्चिरिति पठन्ति। काञ्चिर्मेखला। 'नीवीमुन्मुच्य शनैः स्पृशति रतिकाले करेण काञ्चिपदम्' इति चम्पूकाव्ये ह्रस्वान्तस्य प्रयोगः[5] ॥ ८ ॥

[1] सिध्रिका T.v. [2] 'गोरवङ्क' B6. [3] अविलम्ब्य Gm3. [4] अपरे तु Tv. [5] सेधति, सिध्यते वा। 'षिधु गत्याम्'। 'स्फायि तञ्चि . . .' (उ. २. २३) इति रक्। स्वार्थे कन्। क्षिपकादित्वाद् (वा. ७. ३. ५) इत्वाभावः [सिध्रका]; सरति। 'सृ गतौ'। ण्वुल् [सारिका], 'शॄ हिंसायाम्' [शारिका]; हिक्कनम्। 'हिक्क अव्यक्ते शब्दे'। 'गुरोश्च हलः' इत्यः [हिक्का]; प्राचति। 'अचु गतौ'। ण्वुल् [प्राचिका]; ऋच्छति। अर्यते वा। 'ऋ गतौ'। 'शुकवल्कोल्काः' (उ. ३. ४२) इति साधुः [उल्का]; अपि पील्यते। 'पील प्रतिष्टम्भे'। घञ्। 'वष्टिभागुरिरल्लोपम्' इत्यपेरल्लोपः। स्वार्थे कन् [पिपीलिका]; तिम्यति। 'तिम आर्द्रीभावे'। बाहुलकादुकष् गुणाभावश्च [तिन्दुकी]; कणति। 'कण गतौ'। पचाद्यच्। स्वार्थे कन् [कणिका]; भङ्गस्य करणम्। 'तत्करोति' इति ण्यन्तात् 'अच इः' (उ. ४. १३९) [भङ्गिः]; सु बहु रज्यतेऽस्यां रजसा। 'रञ्ज रागे'। 'हलश्च' इति घञ्। 'चजोः—' इति कुत्वम् [सुरङ्गा]; सूच्यतेऽनया। 'सूच पैशुन्ये'। चुरादिः। 'अच इः' [सूचिः]; महनम्। अनया वा। 'मह पूजायाम्'। क्तिन्। ढत्व (८. २. ३१), धत्व (८. २. ४०), ष्टुत्व (८. ४. ४१) ढलोप (८. ३. १३) दीर्घः (६. ३. १११) [माढिः] इति भा. दी. (पृ. ५२१).

(पा.) सिध्रका—सूचिमाढयः। सिध्रकेति वृक्षभेदः। शारिका शुकाङ्गना[1]। वाद्यलगुडोऽपि स्यात्। 'वादित्रलगुडे कोणा[2] न नपुं शारिका स्त्रियाम्' इति वैजयन्ती (पृ. १४७, श्लो. १३६)। हिक्का रोगविशेषः। प्राचिका पक्षिजातिः। नीलमक्षिकापि स्यात्। [3]'प्राचिका पक्षिजातिः स्यात् प्राचिका नीलमक्षिका' इति ध्वनिमञ्जरी। उल्का निर्गतज्वाला[4]। पिपीलिका कृमिविशेषः। 'चिम'। 'शनैर्याति पिपीलिकः' इति पुंस्त्वमपि सिद्धं क्षीरस्वामिवचनात् (पृ. ३४६)। तिन्दुकीति वृक्षभेदः[5]। कणिका नाम वृक्षविशेषः। भङ्गिः विच्छित्तिः। सुरङ्गा नाम चोरादिकृतभित्त्यादिरन्ध्रम्। 'कन्नमु'। सूचीति स्यूतिसाधनम्[6]। सूचिश्च सूचा च स्यात्। 'सूचिः सूचा च सीवनी' इति वैजयन्ती (पृ. १३६, श्लो. ११)। माठिः कवचः। 'माठिः स्त्री जागरो वक्षश्छदः संनाहकङ्कटौ' इति वैजयन्ती (पृ. ११६, श्लो. १५३)। माढिरिति पाठे, पत्रवल्कमपि स्यात्। 'पत्रमध्यसिरा माढिः' इति वैजयन्ती (पृ. ४६, श्लो. १८)॥ ८॥

[1] पक्षिविशेषः B3, C1; A1 adds भाषान्तरे 'पुरिळी'. [2] कोणोऽस्त्री A1. [3] प्रचिका A1. [4] गतार्था (१, पृ. ४०) B3; A1 adds 'कारवी'. [5] तिन्दुकः A1. [6] 'सूदि' A1.

पिच्छावितण्डाकाकिण्यश्चूर्णिः शाणी द्रुणी दरत् ।
सातिः कन्था तथासन्दी नाभी राजसभापि च ।। ६ ।।

(वि.) पिच्छा--द्रुणी दरत् । एते शब्दाः स्त्रीलिङ्गे वर्तन्ते । पिच्छा [1]आचामः । वितण्डा वादविशेषः । काकणी [काकिणी] [2]कर्षस्य चतुर्थो भागः । चूर्णी [3]गद्यविशेषः । शाणी कर्षणशिला । [4]द्रुणी कर्णजलूका । दरद् दारदाख्य-विषजन्मदेशः । सातिर्दानम् । कन्था [5] पटखण्डैः [6]स्यूतवासः । [7]कथा प्रसिद्धा । आसन्दी शवयापनयानविशेषः[8] (?) । नाभिः कुक्षिमध्यगतरन्ध्रम्[9] । राजसभा नृपास्थानम् ।। ६ ।।

[1] ओदनमण्ड इति यावत्. [2] माषस्य J2. [3] गद्यम् K6. [4] दृणी K3, K4. [5] कर्पटीखण्डैः K4. [6] व्यूढ° K5. [7] कथा for तथा is the reading in Vivṛti; प्रबन्धः K5. [8] यानम् K3, K5. [9] °गतं द्वारम् K4.

(विव.) पिच्छा--द्रुणी दरत् । पिच्छादयः स्त्रीलिङ्गे वर्तन्ते । पिच्छा शाल्मलिपिष्टः ओदनमण्डश्च । वितण्डा [1]स्वपक्षस्थापनाहीनो वादः । काकणि-र्मानभेदः । 'माषचतुर्थो भागः काकणी' इति सुबोधिनीकारः । विंशतिर्वराटिका काकणी इत्यन्ये । चूर्णिः गद्यात्मकः पदसंदर्भः, कादम्बर्यादौ चूर्णिकेति प्रसिद्धा । शाणिः कर्षणशिला । [2]दृणिः कर्णजलूका । दरद् म्लेच्छाधिष्ठितो देशविशेषः । तकारान्तत्वमस्य वर्णप्रक्रमादेवावगम्यते[3] । सातिर्दानम् । कन्था निरन्तरतन्तु-जालस्यूतपटखण्डसमुदायः । कथा वादजल्पवितण्डात्मिका, वाक्यसंदर्भरूपा [4]राज-वाहनादिकथा च । आसन्दी शववाहनसाधनं काष्ठयन्त्रम् । स्वल्पखट्वातुल्यं समचतुरश्रमासनं च । नाभिः पिण्डिकाख्यः चक्रावयवविशेषः । कुक्षिमध्यरन्ध्रे तु द्वयोर्लिङ्गयोः प्रागुक्तः ([5]१, पृ. ४० ८) । क्षत्रियविशेषे तु पुंस्त्वं नानार्थे कथितम् (२, पृ. ४१०) । वक्ष्यति च (श्लो. २०) । राज्ञः सभा राजसभा । 'सभा राजा-मनुष्यपूर्वा' (२. ४. २३) इत्यत्र पर्यायस्यैव राजाद्यर्थमिति वचनाद् (काशिका. १, पृ. १३२) राजपर्यायाणामेव ग्रहणम् । न राजशब्दस्य । तेनायमर्थः-- सभान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, सा चेत् सभा राजवर्जिताद् राजपर्यायात् परा भवति । यथा--ईशसभम् । ईश्वरसभम् । राजपर्यायवाचिन इति किम्? पुष्य-मित्रसभा, चन्द्रगुप्तसभा इत्यादौ तद्विशेषणवाचिनो मा भूत् । राजशब्दवर्जितादिति किम्? राजसभा । तदेतत्प्रत्युदाहरणमभिप्रेत्य 'राजसभापि च' इत्युक्तम्[6] ।। ६ ।।

[1] °स्थापनवादः Tv. [2] दूणिरिति विवरणाभिमतः पाठः. [3] दूणिः, दरत्, सातिः, कन्था इति वर्णक्रमः. [4] दशकुमारचरितमिति यावत्. [5] अमरसिंहीयपाठस्तु 'वस्तिर्नाभेरधो द्वयोः' इत्येव दृश्यते (१, पृ. ४०८). [6] पिच्छयते । 'पिच्छ बाधे'। 'गुरोश्च . . .' इत्यः [पिच्छा]; वितण्डते । 'तडि आघाते'। 'गुरोश्च . . .' इत्यः [वितण्डा]; काकमणति । 'अण शब्दे'। अण्। पृषोदरादिः [काकिणी]; चूर्णस्य करणम् । 'तत्करोति . . .' इति ण्यन्तात् 'अच इः'। 'घृणि . . .' (उ. ४. ५२) इति साधुः [चूर्णिः]; शणस्य विकारः। 'तस्य विकारः' इत्यण् । 'टिड्ढाणञ् . . .' इति ङीप् [शाणी]; द्रुणति । 'इगुपध . . .' इति कः । 'जातेः . . .' इति ङीष् [द्रुणी]; दरणम् । दीर्यते वा । 'शॄदृभसोऽदिः' [दरत्]; सननम् । 'षणु दाने'। 'ऊतियूति . . .' इति साधुः [सातिः]; कम्यते । बाहुलकात्थन् [कन्था]; आस्यतेऽस्याम् । 'शब्दादयश्च' (उ. ४. ९८) इति साधुः [आसन्दी]; नभ्यतेऽनया। 'इञजादिभ्यः' (वा. ३. ३. १०८) [नाभिः] इति भा. दी. (पृ. ५२१).

(पा.) पिच्छा—द्रुणी दरत् । पिच्छा नामाश्वपदव्याधिः[1] । वितण्डा वादः, दारुविशेषो[2] वा । काकिण्यनेकार्था । 'काकिणी पणतुर्यांशे मानदण्डे च काकिणी' इति विश्वः (पृ. ५३, श्लो. ७६) । चूर्णिर्नाम गद्यभेदः । ग्रन्थभेदेऽपि स्यात् । चूर्णिर्भाष्यमिति क्षीरस्वामी (पृ. ३४६) । शाणी निकषपाषाणः । 'ओरगल्लु'[3] । शाणोऽपि स्यात् । 'शाणी निकषः, शाण इत्येके' इति क्षीरस्वामी (पृ. ३४६) । द्रुणीशब्दोऽनेकार्थः । 'द्रुणी [4]कच्छपिकायां च जलद्रोण्यामुदाहृता' इति विश्वः (पृ. ४८, श्लो. ७) । दरदिति देशः । सातिर्नाम दुकूलम् । कन्था भिक्षुप्रावरणम् । कन्थटिकापि स्यात् । 'कन्थाकन्थटिके समे' इति वैजयन्ती (पृ. १६६, श्लो. १२८) । कन्थटिरपि स्यात् । 'छिन्नं च संधत्ते दरिद्र इव कन्थटिम्' इति प्रयोगरत्नावलिः । आसन्दी नामासनम् । नाभिर्गतार्थः (१, पृ. ५१८; २, पृ. ४१०) । राजसभा नामास्थानम् । अपिशब्देन मनुष्यसभेति मनुष्यसंघातः ॥ ९ ॥

[1] अश्वपदम् A1. [2] A1 omits. [3] B3 omits. [4] इभकीटायां A1.

झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला ।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥ १० ॥

इति स्त्रीलिङ्गविशेषप्रकरणम्

(वि.) झल्लरी––चमसी मषी। एते शब्दाः स्त्रीलिङ्गे वर्तन्ते। झल्लरी वाद्यविशेषः। चर्चरी काचिद्देवी [नृत्तविशेषः][1]। पारी [2]कलशी। होरा लग्नम्। लट्वा भ्रमरकः[3]। सिध्मला पामा। लाक्षा अलक्तकः। लिक्षा यूका[4]। गण्डूषा प्रसिद्धा[5]। गृध्रसी ऊरुसंधौ वातरुक्। चमसी पात्रविशेषः। मषी[6] लेखनार्थं द्रवद्रव्यम् ॥ १० ॥

इति स्त्रीलिङ्गविशेषप्रकरणम्

[1] हर्षक्रीडा इति स्वामी (पृ. ३४६). [2] 'पादरज्ज्वां च हस्तिनः' इति विश्वः (पृ. १२६, श्लो. १७). [3] विहगविशेषः, क्रीडासाधनं वा. [4] यूकागर्भ इति स्वामी (पृ. ३४६). [5] आस्यचुलुकमित्यर्थः. [6] मषीति विवृतौ पाठः.

(विव.) झल्लरी––चमसी मसी। झल्लरी वाद्यविशेषः। चर्चरी गीतिभेदः। चर्चरी काचिद्देवीनृत्तविशेषः इत्यन्ये। तालविशेषः इत्यपरे। पारी जलाधारः। कर्कर्याख्यपात्रविशेषः इति सुभूतिचन्द्रः। तथा च नैषधकाव्ये––

'चुचुम्ब नोर्वीवलयोर्वशीं परं
पुरोऽधिपारि प्रतिबिम्बितां विटः'।

इति (१६. ६९)। दोहनभाण्डमिति सुबोधिनी। तथा च 'प्रगृह्य पारीमुभयेन जानुनोः' इति माघकाव्ये प्रयोगः (शिशु. १२. ४०)। होरा अहोरात्रविकल्पः। [1]ससिध्मला सिध्मलासहिता च द्वे[2] इत्यर्थः। एवं च लट्वाशब्दात् पूर्वमेव सिध्मलाशब्दस्य निर्देशः फलति। तथा च लान्तादिक्रमस्य भङ्गो नाशङ्कनीयः। लट्वा बालक्रीडासाधनभूता भ्रमरकाख्या। 'बोङ्गरुपेरु'। ग्रामचटको लट्वाख्य इति चन्द्रः। शिक्यमेवेति सुबोधिनी। मनुष्यवर्गे 'किलासी सिध्मलः' (पृ. ३९९) इत्युक्तस्य वाच्यलिङ्गत्वाद् अत्र न तस्य ग्रहणम्। लाक्षा अलक्तकः। लिक्षा यूकाण्डम्। 'ईरुपेरु'। गण्डूषा जलादिना मुखपूरणम्। अत्राह सुभूतिचन्द्रः–– गण्डूषशब्दः स्त्रियामाम्नातोऽपि कविसमयात् पुंसि प्रयुज्यते। तथा च माघकाव्ये––

'गण्डूषमुज्झितवता पयसः सरोषं
नागेन लब्धपरवारणमारुतेन।

इति (शिशु. ५. ३६)। तथान्यत्रापि 'गण्डूषमेकमशनैः' इति। यथाहुः पूर्वाचार्याः ––'देशभाषापदं प्रयोक्तव्यम्, लिङ्गाध्याहारोऽपि' इति। "गण्डूषे मुखपूर्तो ना"

इति बोपालितेन पुंलिङ्गतयानुशासनमपि कविसमयमूलमेव, यद्येवं न स्याद् गण्डूष-शब्दमाचार्यः स्त्रीपुंसप्रकरण एव ब्रूयात् इति । "गण्डूषजलम्" (कु. सं. ३. ३७) इत्यादौ तु मत्वर्थेऽच्प्रत्ययाश्रयणेन निर्वाहः कार्य' इति । अथ दन्त्योपधास्त्रयः । गृध्रसी ऊरुसंधिप्रभवो वातरोगविशेषः । चमसी सोमपात्रम् । श्रुतौ 'चमसो देवपानः' (तै. सं. २. ५. ६. ३) इत्यादयो बहवः पुंलिङ्गप्रयोगाः । मसीप्रक्रमा-दयमपि दन्त्योपधः । श्रीतालपत्रादौ लिपिप्रयोजनमञ्जनरूपं द्रव्यं मसीति । मस्यति वर्णादिरूपेण परिणमतीति मसी । 'मसी परिणामे' । पचाद्यचि (३. १. १३४) गौरादिङीषि (४. १. ४१) रूपम् । अत्र प्रागुक्तानामपि शेफालिकादिशब्दा-नामिहापि पठनमेतद्दृष्टान्तबलादितरेषामपि लिङ्गविधानार्थमिति विज्ञेयम्[3] ॥ १० ॥

इति स्त्रीलिङ्गविशेषप्रकरणम्

[1] ससिध्मला इति विवरणाभिमतः पाठः. [2] लट्वेत्यर्थः Tv. [3] झर्झते । 'झर्झ भर्त्सोक्तयोः' । बाहुलकादरन् । पृषोदरादिः । गौरादिः [झल्लरी]; चर्च्यते । 'चर्च उक्तौ' । बाहुलकादरन् । गौरादिः [चर्चरी]; पारयति पार्यते वा पचाद्यच् । घञ् वा । गौरादिः [पारी]; होलति, हुल्यते वा । पचाद्यच् । घञ् वा [होरा]; लटति । 'अशूप्रुषि-लटि . . .' (उ. १. १५१) इति क्वुन् [लट्वा]; सिध्ममस्त्यस्याः । 'सिध्मादिभ्यश्च' इति लच् [सिध्मला]; लाष्यते 'लष शिल्पयोगे' चुरादिः । बाहुलकात् सः [लाक्षा]; लक्ष्यते । घञ् । पृषोदरादित्वाद् अस्य इः [लिक्षा]; गण्ड्यते । 'गण्डेश्च' (उ. ४. ७८) इत्यूषन् [गण्डूषा]; गृध्रमपि स्यति । 'आतोऽनुपसर्गे' इति कः । गौरादिङीष् [गृध्रसी]; चम्यते । 'अत्यविचमितसि . . .' (उ. ३. ११७) इत्यसच् । गौरादित्वाद् ङीष् [चमसी] इति भा. दी. (पृ. ५२२).

(पा.) झल्लरी—चमसी मसी । झल्लरी [1]अनेकार्थः । '[2]झल्लरी झाल्लरी च द्वे हुडुक्के बालचक्रके' इति विश्वः (पृ. १४३, श्लो. २२४) । 'त्युडुकु वाद्यमु' ।

'जयन्ति मम सूक्तयो जलजसूतिसीमन्तिनी-
विलासहसितामृतम्रदिमनर्ममर्मस्पृशः[3] ।
विशंकटनटन्महानटजटाटवीवाटिका[4]-
झरीलहरिझल्लरीगरिमगर्वसर्वंकषाः[5] ॥

इति साहितीकल्पवल्ली । चर्चरी करतालिका । पारी [6]क्षीरदोहनपात्रम् । होरा अहोरात्रः । लट्वा चटका 'आंडुपिचुक' । लट्वा चटकेति उणादिवृत्तिः । लट्वेत्येव पाठः । लड्वेति पाठो दुरुक्तोऽपि कैश्चिदङ्गीकृतः । 'बोगरमु' । लट्वा भ्रमरक इति क्षीरस्वामी (पृ. ३४६) । सिध्मला नाम मलिनचित्रम् । लाक्षा गतार्थः (१, पृ. ४४१) । गण्डूषा गण्डपूर्तिः । स्त्रीलिङ्गमध्यपाठः आवन्तत्वमात्र-प्रख्यापनार्थः ।

'गण्डूषगर्जभुजजागरहारकील-
ज्वालाच्छटारभसवर्तकगर्तशृङ्गाः ।
व्रीडोदयश्च वरटश्च फणो मृणाल[7]-
श्चोत्कण्ठबाणकरकाश्च समामया च (?) ।।

इति रभसकोशः । गृध्रसीति वातरोगः । चमसी चणकपिष्टम् । 'सोमिपिण्डि' । मषी मसीति द्वे [8]निर्वाणाङ्गारः ।। १० ।।

इति स्त्रीलिङ्गशेषः

[1] वाद्यभेदः B_1. [2] 'सल्लरी सिल्लरा च द्वे हुडुक्के चारचक्रके' इति मु. ग्र.
[3] सर्वं for नर्म B_3, C_1. [4] अटवीजाह्नवी B_3. [5] °गरिमवर्गकूलंकषाः A_1.
[6] वादनदण्डः A_1. [7] मराल° B_3. [8] निष्प्रभालातम् A_1.

अथ [1]**पुंलिङ्गविशेषविधिप्रकरणम्--**

पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।
स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः ।। ११ ।।

(वि.) पुंस्त्वे--सुरासुराः । सुरपर्याया अमरा [2]निर्जरा देवा इत्यादयः (१, पृ. ७) । सुरभेदपर्याया ब्रह्मशंभुविष्णुसूर्यचन्द्रा[3] इत्यादयः (१, पृ. १६, २२, १५, ६८, ५६) । सुरानुचरपर्याया माठरपिङ्गलदण्डादयः (१, पृ. ७०) । असुर-पर्याया असुरा दैत्यदैतेया[4] इत्यादयः (१, पृ. ११) । असुरविशेषपर्याया हिरण्य-[5]कशिपुबाणविरोचनादयः । असुरानुचरपर्याया प्रहस्तचण्डमुण्डादयः । एते पुंस्त्वे पुंलिङ्गे वर्तन्ते । अत्र तत्पर्यायपदेष्वेवोदाहरणानि द्रष्टव्यानि ।। स्वर्गयाग--

शरारयः । नाकयज्ञशैलवारिदसमुद्रवृक्षकालखड्गबाणशत्रूणां पर्याया यथासंभवं तद्विशेषपर्यायाश्च पुंसि भवन्ति । अत्रोदाहरणानि तत्तत्पर्याये द्रष्टव्यानि ।। ११ ।।

[1] पुंलिङ्गशेष° J2, K3.　[2] J2 omits निर्जरा देवाः.　[3] °शक्रचन्द्रसूर्यादयः J2, K4.　[4] °दैतेयादयः J2, K4.　[5] प्रह्लाद for बाण K5.

(विव.) अथ पुंलिङ्गविशेषाः । पुंस्त्वे—सुरासुराः । पुंस्त्व इत्यधिकारोऽयं नपुंसकविधिपर्यन्तः । ततोऽर्वागनुक्रान्ताः सर्वे पुंलिङ्गा इत्यर्थः । सुराश्च असुराश्च इति शब्दव्यक्तिगतबहुत्वाभिप्रायेण बहुवचनम् । कथंभूताः? सपर्यायाः । अमरनिर्जरादिभिः दैत्यदैतेयादिभिश्च पर्यायैः सहिताः । पुनः कथंभूताः? सभेदानुचराः । अत्र भेदानुचरशब्दाभ्यां तद्वाचकाः शब्दाः लक्ष्यन्ते । ततश्च सुरविशेषवाचकैः इन्द्राग्नियमवरुणादिशब्दैः असुरविशेषवाचकैः हिरण्यकशिपुरावणकुम्भकर्णादिशब्दैः सुरानुचरवचनैः माठरपिङ्गलादिशब्दैः, असुरानुचरवचनैः प्रहस्तधूम्राक्षादिशब्दैश्च सहिता इत्यर्थः ।

अत्र दैवतशब्दस्य स्वर्गवर्गोक्तरूपभेदलक्षणविशेषेण केवलपुंस्त्वाभावात् नपुंसकत्वम् । इह केषांचिद् देवादिशब्दानां प्राप्तं पुंस्त्वं[1], 'द्विचतुःषट्पदोरगाः जातिभेदाः' (श्लो. ३७) इत्यत्रैव वर्गे वक्ष्यमाणेन स्त्रीपुंसविधिना विरुध्यते । तथापि स्त्रीपुंसविधेः परत्वात् तस्यैव प्राबल्यम् । दिव्योपपादुकशब्दस्य (२, पृ. ७१) देवतावचनत्वेऽपि क्रियावचनत्वाद्, 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः' (श्लो. ४४) इति वक्ष्यमाणविधिबलात् त्रिलिङ्गत्वम् । अत एव विशेष्यनिघ्नवर्ग एव पठितः इत्यादिरूपेण सर्वत्र बाधकपर्यालोचनया सामान्यविधिविषया उन्नेयाः ।।

स्वर्गयाग—शरारयः । अत्र सभेदाः सपर्याया इति पदद्वयं पूर्ववाक्यादनुषज्यते । ततश्च एते स्वर्गादयः शब्दाः सुरपर्याया यथासंभवं स्वप्रभेदरहिताः पुंस्त्वे भवन्तीत्यधिकृतेनान्वयः । स्वर्गादिपर्यायास्तदनुशासनप्रस्तावे प्रव्यक्ता एव दर्शिताः । स्वर्गविशेषाः—नाकपृष्ठमहेन्द्रादयः । यागविशेषाः—अग्निष्टोमोऽत्यग्निष्टोमोक्थ्यादयः । अद्रेः पर्वतस्य विशेषाः—मेरुहिमवदादयः । मेघविशेषाः—पुष्करावर्तकादयः । समुद्रविशेषाः—क्षीरोदादयः । द्रोः वृक्षस्य विशेषाः—अश्वत्थचूतपनसादयः । कालविशेषाः—क्षणलवमाससंवत्सरादयः । असेः खड्गस्य भेदाः—नन्दकचन्द्रहासादयः । शरविशेषाः—क्षुरप्रनाराचादयः । अरिविशेषाः—यातव्यपार्ष्णिग्राहोदासीनादयः इत्याद्युदाहर्तव्यम् । त्रिविष्टपराजसूयगन्धमादना-

ग्रहरिचन्दनप्रतिपदादिशब्दानां विशेषबाधेन लिङ्गान्तरवृत्तिरित्यपि न विस्मर्तव्यः[2] ।। ११ ।।

[1] Tv adds यद्यपि. [2] सुरन्ति । 'षुर प्रसवैश्वर्ययोः' । 'इगुपध . . .' इति कः [सुराः]; अस्यन्ति क्षिपन्ति देवान्, 'असेरुरन्' (उ. १. ४२) [असुराः]; सुष्ठु अर्ज्यते । कर्मणि घञ् [स्वर्गः]; इज्यते । अनेन वा । अत्र वा । यजेर्घञ् (३. ३. १९) [यागः]; अत्ति, अद्यते वा । 'अदिशदिभूशुभिभ्यः क्रिन्' (उ. ४. ६५) [अद्रिः]; मेहति । अच् । न्यङ्क्वादित्वात् कुत्वम् (७. ३. ५३) [मेघः]; आपो धीयन्तेऽत्र । 'कर्मण्यधिकरणे च' (३. ३. ९३) इति धाञः किः [अब्धिः]; द्रवत्यूर्ध्वम् । 'द्रु गतौ' । मितद्र्वादित्वात् (वा. ३. २. १८०) डुः [द्रुः]; कलयत्यायुः । पचाद्यजन्तात् प्रज्ञाद्यण् (५. ४. ३८) [कालः]; अस्यते । 'सर्वधातुभ्य इन्' (उ. ४. ११८) [असिः]; शृणाति । पचाद्यच् [शरः]; इयर्ति विरोधम् । 'ऋ गतौ' । 'अच इः' (उ. ४. ११९) [अरिः] इति तत्र तत्र भा. दी.

(पा.) पुंस्त्वे––सुरासुराः । पुंस्त्वे इति आपतद्ग्रहशब्दम् (श्लो. २१) अधिकारः । सभेदानुचराः सुरासुरपर्यायाः पुंलिङ्गाः[1] । सुरपर्यायस्य––' अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ' (१, पृ. ७) । सुरभेदपर्यायस्य––' आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ' (१, पृ. ९) । सुरानुचरपर्यायस्य––' स्यात् किंनरः किंपुरुषस्तुरङ्गवदनो मयुः ' (१, पृ. ४९) । असुरपर्यायस्य––' असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ' (१, पृ. ११) । असुरभेदपर्यायस्य––' तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ' (१, पृ. ६७) ।। स्वर्गयाग––शरारयः । सभेदानां स्वर्गादीनां पर्यायाः[2] पुंलिङ्गाः ।। ११ ।।

[1] B3 adds पुंस्त्वे. [2] A1 adds पर्यायास्तु तत्र तत्र द्रष्टव्याः.

करगण्डौष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।
अह्नाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः ।। १२ ।।

(वि.) करगण्ड––नखस्तनाः । पाणिकपोलाधरबाहुरदनगलकचनखकुचानां पर्याया यथासंभवं तद्विशेषपर्यायाश्च पुंसि भवन्ति । अत्रोदाहरणानि तत्तत्पर्यायेषु[1] द्रष्टव्यानि ।। अह्नाहान्ताः । अह्न अह इत्येवमन्ताः शब्दाः[2] पुंसि वर्तन्ते । अह्नान्ता यथा––प्राह्णः, पराह्णः, पूर्वाह्णः, मध्याह्नः[3] इत्यादि । अहान्ता यथा––द्व्यहः, त्र्यहः, पञ्चाहः इत्यादि ।। क्ष्वेडभेदाः । क्ष्वेडभेदा

[4]विषवाचकाः शब्दाः पुंसि [5]वर्तन्ते । अत्रोदाहरणानि—सौराष्ट्रिकः । शौक्लिकेयः । ब्रह्मपुत्रः । प्रदीपनः[6] इत्यादि ॥ रात्रान्ताः प्रागसंख्यकाः । संख्याव्यतिरिक्त-शब्दपूर्वा [7]रात्र इत्येवमन्ताः शब्दाः पुंसि[8] भवन्ति । अत्रोदाहरणानि । अर्धरात्रः । पूर्वरात्रः[9] । अहोरात्रः इत्यादि ॥ १२ ॥

[1] तत्पर्याये K_3, K_4.　[2] K_5, K_6 omit.　[3] K_4 adds अपराह्णः.
[4] विषविशेष° K_3.　[5] भवन्ति K_5.　[6] K_2, K_3, K_4 omit.　[7] रात्रान्ताः K_5.
[8] पुंलिङ्गे J_2.　[9] K_3, K_4 add अपररात्रः.

(विव.) करगण्ड—नखस्तनाः । करादीनां नवानामर्थाः प्रसिद्धा एव । तथापि लिपिसंदेहभ्रान्त्यादिमूलपाठान्तरसंदेहनिवृत्त्यर्थं तत्पर्यायपदानि लिख्यन्ते । करो हस्तः । गण्डः कपोलः । ओष्ठो दन्तच्छदः । दोर्बाहुः । दन्तो रदः । कण्ठो गलः । केशः शिरोरुहः । नखः कररुहः । स्तनः कुच इति । शेषे—

'कुसूलनदपुष्यांशुपविकुन्तपरश्वधाः ।
धान्यध्वनिरथोऽह्यात्मगुल्ममानाब्जकर्दमाः ॥'

इति । एते कुसूलादयः षोडशपर्यायाः यथासंभवं विशेषरहिताश्च पुंलिङ्गाः । कुसूलः कोष्ठः । नदविशेषः शोणादिः । पुष्यः तिष्यः । अंशुः किरणः । पविः शतकोटिः । कुन्तः प्रासः । परश्वधः परशुः । अत्र धान्यशब्देन न स्वरूपग्रहणम् । किं तु तद्विशेषा व्रीहियवगोधूमादय एव गृह्यन्ते । ध्वनिः शब्दः । रथः शताङ्गः । तद्विशेषः पुष्यरथः । अहिः सर्पः । तद्विशेषाः शेषवासुकिप्रभृतयः । 'द्विचतुःषट्पदोरगाः' (श्लो. ३७) इति वक्ष्यमाणस्य स्त्रीपुंसविधेः परत्वात् परवल्लिङ्गम् । आत्मा जीवः । गुल्मः स्तम्बः । अत्र मानशब्देन तद्विशेषाः कुडुवप्रस्थाढकद्रोणादय एव गृह्यन्ते । न स्वरूपम् । अब्जः शङ्खः । कर्दमो जम्बालः । 'विशेषैर्यद्यबाधितः' (श्लो. २) इत्युक्तत्वाद् अशनिकुलिशादीनां लिङ्गान्तरेऽपि वृत्तिरित्यनुस्मर्तव्यः ॥

अह्नाहान्ताः । समासे सति 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति टच्प्रत्यये अह इत्येवंरुपतया श्रूयमाणः शब्दो येषां समासशब्दानां ते अहान्ताः । पूर्ववदेव समासान्तप्रत्यये 'अह्नोऽह्न एतेभ्यः' (५. ४. ८८) इत्यहन्शब्दस्य अह्नादेशे सति अह्न इत्येवं श्रूयमाणः शब्दो येषां समासान्तानां तेऽह्नान्ताः । ते च द्विविधाः पुंस्येव भवन्ति इत्यधिकृतेन संबन्धः । 'रात्राह्नाहाः पुंसि' (२. ४. २९)

इति सूत्रमूलमेतत्। अह्नान्ता यथा—सर्वाह्णः। अह्नः पूर्वो भागः पूर्वाह्णः। मध्याह्नः। अपराह्ण इत्यादि। लिङ्गानुशासने 'द्रोणापराह्णतोरण . . .' इत्यादिना अपराह्णशब्दः अर्धर्चादौ पठित इति सुभूतिचन्द्रः। अहान्ता यथा—द्वयोरह्नोः समाहारो द्व्यहः। त्रयाणामह्नां समाहारः त्र्यहः। अत्र 'न संख्यादेः समाहारे' (५. ४. ८९) इत्यह्नादेशप्रतिषेधः। तथा वर्तमानमहः वर्तमानाहः। गताहः इत्यादि। अत्र अहान्ता इत्यधिकृतसमासान्तग्रहणेन बहुव्रीहिसमासे समासान्ताभावात् तदन्तस्य विशेष्यनिघ्नत्वेन नियतपुंलिङ्गत्वं मा भूत्। अहान्तस्य तु 'पुण्यसुदिनाभ्यां त्वहः परः' (श्लो. २९) इति क्वचिन्नपुंसकत्वं वक्ष्यते। द्वयोरह्नोर्भवः द्व्यहः उत्सवः। द्व्यहा पूजा। इत्यादौ 'तद्धितार्थे द्विगुः' (श्लो. ४३) इति परोपगत्वं वक्ष्यते॥

क्ष्वेडभेदाः। सौराष्ट्रिकवत्सनाभादयः षड् विषविशेषाः पुंलिङ्गाः। काकोलकालकूटादीनां विशेषविधानात् पुंनपुंसकलिङ्गत्वं प्रागुक्तम् (१, पृ. १५२)॥ रात्रान्ताः प्रागसंख्यकाः। 'संख्याव्ययादेः' (५. ४. ८६) इति वर्तमाने 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' (५. ४. ८७) इत्यचि रात्रशब्दः, तदन्ताः संख्यावाचकशब्दव्यतिरिक्तपूर्वपदाः पुंसि भवन्ति। यथा—अहश्च रात्रिश्च समाहृते अहोरात्रः। 'चार्थे द्वन्द्वः' (२. २. २९) इति समासे सति समाहारे नपुंसकस्यापवादः। असमाहारे तु पुंस्त्वविधेर्वक्ष्यमाणवाच्यलिङ्गतापवादो वेदितव्यः। 'अहोरात्रे वा अकामयेताम्' इत्यादौ वेदे लिङ्गव्यत्ययश्छान्दसः। सर्वा रात्रिरिति कर्मधारये सर्वरात्रः। पूर्वो भागो रात्रेः इत्येकदेशिसमासे पूर्वरात्रः। एवमपररात्रः, पश्चिमरात्रः, संख्याता रात्रिः संख्यातरात्रः। अतिक्रान्तो रात्रिमतिरात्रः सोमसंस्थाविशेषः। प्रागसंख्यकाः इति किम्? पञ्चरात्रम्। गणरात्रम्। अत्र 'त्रिरात्रमाहुराशौचम्' (मनु. ५. ८०) इति जयादित्येन[1] 'रात्राह्नाहाः पुंसि' (२. ४. २९) इति सूत्रे उदाहृतम्[2]॥ १२॥

[1] काशिकायां त्रिरात्रः इत्येव दृश्यते (१, पृ. १३३) [2] गण्डति। 'गडि वदनैकदेशे'। पचाद्यच् [गण्डः]; उष्यते उष्णाहारेण। 'उष दाहे' 'उषिकुषि . . .' (उ. २. ४) इति थन् [ओष्ठः]; दाम्यत्यनेन। 'दमेर्डोस्' (उ. २. ६९) [दोः]; दाम्यति। 'दमु उपशमे'। अन्तर्भावितण्यर्थाद् बाहुलकात् तन् [दन्तः]; कणति। 'कण शब्दे'। 'कणेष्ठः' (उ. १. १०३) [कण्ठः]; क्लिश्यते। 'क्लिशेरन् लो लोपश्च' (उ. ५. ३३) [केशः]; न खमस्य। 'न भ्राट् . . .' (६. ३. ७५) इति साधुः [नखः]; स्तनति कथयति यौवनोदयम्। पचाद्यच् [स्तनः]; क्ष्वेडते मोहयति। 'पचाद्यच्'। [क्ष्वेडः] इति तत्र तत्र भा. दी.

(पा.) करगण्ड––नखस्तनाः । करादीनां पर्यायाः पुंलिङ्गाः ।। अह्ला-हान्ताः । अह्लान्ता[1] अहान्ताश्च शब्दाः पुंलिङ्गाः । पूर्वमह्नः पूर्वाह्णः । अपराह्णः द्वयोरह्नोः समाहारो द्व्यहः । त्र्यहः ।। क्ष्वेडभेदाः । विषभेदाः पुंलिङ्गाः । मेषशृङ्गः । वत्सनाभः । पुण्डरीकः । कुष्ठः । ब्रह्मघोषः[2] ।। रात्रान्ताः प्रागसंख्यकाः । प्रागसंख्यकाः रात्रान्ताः शब्दाः पुंलिङ्गाः । पूर्वरात्रः । सर्वरात्रः । मध्यरात्रः । प्रागसंख्यका इति [3]वाधितविषयप्रदर्शनार्थम् ।। १२ ।।

[1] अह्लाहान्ताः A1. [2] विषविशेषाः B3. [3] बाधितविषयः प्रदर्शितः A1.

श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।
कशेरुजतुवस्तूनि हित्वा तुरुविरामकाः ।। १३ ।।

(वि.) श्रीवेष्टाद्याश्च निर्यासाः । श्रीवेष्टसर्जरसकर्पूरयावनादयो निर्यासाः [1]पुंलिङ्गे वर्तन्ते ।। असन्नन्ता अबाधिताः । असन्ता अन्नन्ताश्च शब्दा अबाधिता विशेषविधिनाबाधिताः[2] पुंसि भवन्ति । असन्ता यथा––उशना । अनेहा इत्यादयः । अन्नन्ता यथा––सुत्रामा, मातरिश्वा इत्येवमादयः[3] । कशेरु––तुरुवि-रामकाः । रुविरामाः शब्दाः कशेरु, दारु, श्मश्रु, अश्रु वर्जयित्वा; तुविरामाः मस्तु, जतु, वस्त्वादीन् शब्दान् वर्जयित्वा; सर्वे पुंलिङ्गे वर्तन्ते । तुविरामा यथा––धातुः, ओतुः, सेतुः[4] इत्यादि । रुविरामा यथा––चरुः, [5]मरुः, त्सरुः इत्यादि ।। १३ ।।

[1] पुंसि K5. [2] °विधानाबाधिताः K2, K4. [3] इत्यादयः K2, K5. [4] J2 adds हेतुः. [5] मेरुः J2.

(विव.) श्रीवेष्टाद्याश्च निर्यासाः । निर्यासो वृक्षद्रवः । श्रीवेष्टः प्रागुक्तः (१, पृ. ४४३) । तदादयो निर्यासवाचकाः शब्दाः पुंलिङ्गाः । श्रीवेष्टः, सर्जरसः, कर्पूरः इत्यादयः ।। असन्नन्ता अबाधिताः । अस् इत्येवमन्ताः, अन् इत्येवमन्ताश्चेति द्विविधाः अबाधिताः 'द्व्यच्क्मसिसुसन्नन्तम्' (श्लो. २४) इति नपुंसकविधाना-दबाधिताः तद्विधेरविषयाः, त्र्यच्काः चतुरच्काश्चेति यावत्, पुंलिङ्गा भवन्ति । अङ्गिराः, पुरोधाः, पुरूरवाः इत्याद्या असन्ताः । अथर्वा, सुत्रामा, मातरिश्वा इत्याद्या अन्नन्ता इति ।।

कशेरु––तुरुविरामकाः । विरामोऽन्त्याक्षरम् । धातुहेतुसेतुप्रभृतयस्तु-विरामाः। कारुमेरुमरुत्सरुप्रभृतयो रुविरामाश्च शब्दाः पुमांसः। अत्रापवादमाह––कशेर्वादीनि हित्वा वर्जयित्वा। कशेरु जलकन्दः। जतु लाक्षारसः। वस्तु पदार्थः। एतच्च मस्तुवास्तु-अश्रुश्मश्रुदारुकुस्तुम्बुरु-प्रभृतीनामुपलक्षणम्। तुरुविरामका इति किम्? त्रपुजानुताल्वादीनि नपुंसकनि[1] ।। १३ ।।

[1]श्रीसंज्ञकः श्रियो वा वेष्टो निर्यासः [श्रीवेष्टः]; 'कश शब्दे'। बाहुलकादेरुः [कशेरु]; जायते। 'फलिपाटि . . .' (उ. १. १८) इत्युः तोऽन्तादेशः [जतु]; वसति। 'वसेस्तुन्' (उ. १. ७६) [वस्तु] इति तत्र तत्र भा. दी.

(पा.) श्रीवेष्टाद्याश्च निर्यासाः। श्रीवेष्टादिनिर्यासाः पुंलिङ्गाः। श्रीवेष्टः, सिल्वाकः, गुग्गुलुः। श्रीवेष्टादिग्रहणादत्र न भवति––पिच्छा, हिङ्गु[1] ।। असन्नन्ता अबाधिताः। अबाधिता असन्नन्ताः पुंलिङ्गाः।

'नभो व्योम्नि नभा माघे श्रावणे च पतद्ग्रहे।
अध्वा वर्त्मनि संस्थाने ।।'

इत्याद्यनुशासनेन न बाधितत्वम्। 'द्व्यच्कमसिसुसन्नन्तम्' (श्लो. २४) इत्यनेन[2] बाधः ।। कशेरु––तुरुविरामकाः। कशेरुजतुवस्त्वादीन् शब्दान् हित्वा तुरुविरामकाः शब्दाः पुंलिङ्गाः। धातुः, सेतुः, हेतुः, केतुः, जीवातुः, मन्तुः, तन्तुः, जन्तुः; मरुः, डमरुः, चरुः, खरुः। 'खरुर्दन्ते हरे दर्पे हये श्वेते तु वाच्यवत्'। ऊरुः, किशारुः। कशेर्वादिनियमाद्[3] अत्रापि स्यात् दारुः, अगरुः ।। १३ ।।

[1] हिङ्गुः A_1. [2] A_1 omits अनेन. [3] °पर्युदासात् B_3, C_1.

**कषणभमरोपान्ता यद्यदन्ता अमी अथ।
पथनयसटोपान्ता गोत्राख्याश्चरणाह्वयाः ।। १४ ।।**

(वि.) कषणभम––सटोपान्ताः। अत्र[1] अथशब्दः सदाशब्दार्थः। ककार-षकारणकारभकारमकाररेफा उपधा येषां शब्दानाम्। तथा पकारथकारनकार-यकारसकारटकारा उपधा येषां शब्दानां ते शब्दा यद्यकारान्ता[2] भवेयुर्तर्हि पुंलिङ्गे

वर्तन्ते । अत्रोदाहरणानि द्रष्टव्यानि[3] ।। गोत्राख्याः । गोत्रं काश्यपादि, तस्य आख्या गोत्राख्याः । ताः पुंलिङ्गे वर्तन्ते । अत्रोदाहरणानि—गार्ग्यः, [4]वासिष्ठः, भारद्वाजः[5] इत्यादि ।। चरणाह्वयाः । अत्र चरणशब्दो गौणः शाखानिमित्तकः [6]पुरुषे वर्तते । चरणविशेषाद्यत्राह्वयाः, कठकलापवह्वृच इत्येवमादयः' शब्दाः पुंलिङ्गे वर्तन्ते ।। १४ ।।

[1] K5 omits the sentence. [2] यद्यदन्ताः K3. [3] J2 adds लोकः, माषः, गुणः, होमः इत्यादीनि. [4] वसिष्ठः J2. [5] भरद्वाजः J2. [6] पुंलिङ्गे K5.

(विव.) **कषणभम—सटोपान्ताः** । अत्र उपान्तशब्दः 'अलोऽन्त्यात् पूर्व उपधा' (१. १. ६५) इति वैयाकरणप्रसिद्धोपधावचनः । अमी अथ[1] इति केचित् पठन्ति । अत्राप्यथशब्दः तथाशब्दार्थः । ततश्च नाकः, सायकः, श्लोकः, लोकः, कलङ्क इत्याद्याः ककारोपधाः । पक्षः, कक्षः, शोषः, रोष इत्याद्याः षकारोपधाः । कोणः, बाणः, पणः, गुणः[2] इत्याद्याः णकारोपधाः । कुम्भः, स्तम्भः, दम्भः, गर्भ इत्याद्याः भकारोपधाः । उत्सः, [3]समासः, दास इत्यादयः सकारोपधाः । वटः,[4] विटः, रटः, चाट इत्यादयो टकारोपधाश्च इत्येवं द्वादशवर्णोपधाः शब्दा यदि अदन्ताः अकारान्ता भवन्ति तदा विशेषबाधरहिताः पुंलिङ्गा भवन्तीत्यर्थः । कषादिग्रहणं किम्? कुण्डलम्, बलम्, कूलम्,[5] उपदा, उपधा इत्यादौ मा भूत् । अदन्ता इति किम्? कोका, भूषा, पारणा, शोभा,[6] नारी, वामा इत्यादौ मा भूत् ।।

गोत्राख्याः । याभिर्गोत्रस्य वंशस्य व्यपदेशः ता गोत्राख्याः पुंसि भवन्ति । यथा—गार्ग्यः, वात्स्यः, भारद्वाजः, वासिष्ठः इत्यादिगोत्रान्ताः[7] । अपत्यप्रत्ययान्ता इति तु व्याख्यानमसङ्गतम् । 'स्त्रीपुंसयोरपत्यान्ताः' (श्लो. ३७) इत्यनेन पौनरुक्त्यविरोधयोरापत्तेः ।। **चरणाह्वयाः** । यथा स्वमनुष्ठातारः चरन्त्येतेष्विति चरणशब्दो यद्यपि मुख्यया वृत्त्या काठककालापकादिशाखाविशेषेषु वर्तते, तथापि अत्र तदध्येतृपुरुषाः चरणशब्देन पुंलिङ्गतया विवक्षिताः । अत एव चरणशब्दः शाखानिमित्तकः पुरुषेषु गौण्या वृत्त्या वर्तत इति काशिकादयः । यथा—कठः, कलापः, कौथुमिः इति ।। १४ ।।

[1] 'अमी तथा' इति विवरणाभिमतः पाठः. [2] गणः Tv. [3] Tj1, Tj2 add रसः. [4] घटः Tv. [5] कुलम् Tv. [6] शोभना Tv. [7] °गोत्राख्याः B5, B6.

(पा.) कषणभम—अदन्ता अमी । अदन्ताः कांद्युपान्ताः पुंलिङ्गाः । अलकः, पुलकः, चलुकः, कलङ्कः, करङ्कः, पेटकः, पाटकः सेनानिवेशः,[1] कुशिकः तैलशेषः, मिसिकः, सस्यकः हरिद्रत्नम्, मलूकः कृमिः, फल्लूकः [2]बालपक्षी, जाहकः संकुचितगात्रमार्जारः, गोकुणिकः पङ्कपतितगौः[3], रात्रकः लञ्जामीढः, भार्याटिकः भार्याप्रधानः, सूचकः बुक्कच्छुनकः,[4] खट्टिकः महिषीक्षीरम्, शार्ककः क्षीरफेनम्[5], तर्तरिकः काकनीडम्[6], पर्परिकः चपेटः, कर्करिकः जलपात्रम्, प्रचलाकः मयूरबर्हम्[7], खजकः दधिमन्थनदण्डः इति । क्वचित्स्थले न भवति । शलाका, सलाका, पताका, खजाका, मतेलिका, रक्तपिपीलिका[8], विका चिन्ता, शूका जुगुप्सा, कुटिलिका, रिक्कणिका, गुलिका मुक्तामणिः, चिल्लिका, तुम्बिका चक्रमध्यरन्ध्रम्, अम्बकं नेत्रम् ।। षकारोपान्तस्य यथा—वेषः, कोषः, माषः, ऊषः, प्रत्यूषः, वातरूषः इन्द्रधनुः, लम्बूषः सप्तसूत्रप्रोतमुक्तादाम 'येडुपेट्टिनमुत्योलदंण्ड', अक्षः, पक्षः, कक्षः, कटाक्षः[9] ।।

णकारोपान्तस्य यथा—क्षणः, पङ्कणः, गुणः, पणः, कार्षापणः, टिप्पणः टीका, मत्कुणः श्मश्रुविहीनपुरुषः 'पेडुमूतिवांडु', प्रघणः ताम्रकुम्भः, परिरणः, तण्डुरीणः, कर्णः, वर्णः, अवर्णः, चूर्णः, रागचूर्णः स्मरः, किरणः, वरणः, वारणः, कुर्वाणः भृत्यः, भ्रूणः, कोणः ।। भकारोपान्तस्य यथा—गर्भः, रासभः, कुम्भः, कुम्भी इति स्वल्पघटे स्त्रीत्वम्, कुम्भा इति वेश्यापुत्र्यां स्त्रीत्वम्, करम्भः, करभः[10] 'क्व प्रस्थितासि करभोरु घने निशीथे' (अमरु. ७१), ऋषभः, वृषभः, ककुभः, कौस्तुभः, शलभः, वलिभः स्त्रीवस्त्रभङ्गी 'स्त्रीलनेरिकट्टिनकुच्चुल्लु' ।।

मकारोपान्तस्य यथा—व्यामः, सोमः, होमः, धूमः, ग्रामः, संग्रामः, द्रुमः, विद्रुमः, डिण्डिमः, डिमः, घर्मः, धर्मः ।। रेफोपान्तस्य यथा—मुकुरः, शीकरः, शेखरः, मुद्गरः, वागरः पशुव्याधिः 'पसुलरोगमु', विष्टरः, पिठरः, कोटीरः, कैटीरः 'इन्द्रगोपमु', अङ्गारः, भृङ्गारः, श्रृङ्गारः, दीनारः, [11]शुनीरः शुनीसमूहः, बन्धुमारः 'करुदुव', [12]घर्घरः वर्षध्वनिः 'वानम्रात', कर्करः,[13] अवस्करः, मुर्मुरः तुषाग्निः इति ।।

[1] A1 adds 'पालेमु, पाडगमुन्नु'. [2] 'लेन्तपिट्ट' A1. [3] 'अडुसुलोपट्टगोवु' A1. [4] 'मोरिगेटिकुक्क' A1. [5] 'पालनोर' A1. [6] 'काकिगूडु' A1. [7] 'नेमलपिरि' A1. [8] 'यर्रचिम' A1. [9] कटाक्षहसितम् A1. [10] A1 adds चापाग्रम्. [11] शुनारः शुनकक्षीरम् । सर्पाण्डमपि स्यात् । 'पामुगुड्डुन्नु' A1. [12] कहरः गृहमध्यस्तम्भः 'कहरु' A1. [13] 'अद्दमु' A1.

पथनयसटोपान्ताः । पकाराद्युपान्ताः पुंलिङ्गाः । कूपः, सूपः, पूपः, दीपः, प्रदीपः प्रशब्दः इतरोपसर्गनिवृत्त्यर्थः, धूपः अगर्वादिधूमः 'धूपोऽसौ गन्धवासितः', इति वैजयन्ती (पृ. ११, श्लो. २८), कोपः[1], नीपः, तपः ग्रीष्मकालः, चपः वेणुः,[2] बाष्पः[3], खजपः दर्वी, कृपपः शुष्कवृक्षः 'येंडिनचेट्टु', दलपः मुखत्राणम्[4], कुतुपः 'कुतुपनियतविक्रमाः स्त्रियः', कुटपः गृहारामः । क्वचित्तु स्थले न भवति । पिण्डपुष्पम्, बालकूपी वद्धसोपानकूपः[5] ।। थोपान्तस्य यथा––रथः, कर्णीरथः[6], पुष्परथः । 'धान्यध्वनिरथी ह्यात्मा गुल्ममासर्तुकर्दमः' इति पुस्तकान्तरपाठादपि स्यात् पुलिङ्गः रथी इति । अपचयविवक्षायां स्त्रीत्वम् । मेथिः, सारथिः बुद्धयैव सारथिना शास्त्रमिदं खे . . . इति । अतिथिः 'अतिथिना भवितव्यमत्रभवत्या' । भेदकाः सन्तोऽपि भेद्यलिङ्गा न भवन्ति । अर्थः, सार्थः, घण्टापथः, शमथः, दमथः, आवसथः, संवसथः, अवभृथः, निशीथः, गोपीथः जलद्रोणी, अवगाथः प्रातःसवनम्, ग्रन्थः, ग्रन्थिः, कुन्थुः सूक्ष्मजन्तुः ।

नोपान्तस्य यथा––जनः, अभिजनः, देवनः, कर्केतनः गोमेदः[7], सिनः शरीरं वस्त्रं च स्यात्, भानुः, धनुः 'अस्त्रियौ चापधनुषावासेष्वासौ धनुर्द्रुणम्' इति वैजयन्ती (पृ. ११८, श्लो. १७२), स्नुः, वस्नः, बुध्नः, रक्षोघ्नः श्वेतसर्षपः, अध्वानः 'करितुरगमनुष्यं यत्र चाध्वानदीपम्', अनुमानः 'कोऽसावनुमानः' इत्यमरभाष्यम्, अनः उच्छ्वासः, अपानः ।।

[1] B3 adds कलापः.　[2] 'वेदरु' A1.　[3] A1 adds शुष्पः बलात्कारः.
[4] स्तलिपः स्तम्भः A1.　[5] 'नडबावि' A1.　[6] कर्णरथः C1.　[7] गोमेदिकम् A1.

योपान्तस्य यथा––पायुः, मायुः, जायुः अगदः, जरायुः, मन्युः, जन्युः जन्म, कुलायः, विपूयः[1], विनीयः पापम्, उद्यः, भिद्यः 'भिद्योद्यौ तदतिष्यपुष्य . . .' इति पुस्तकान्तरपाठादपि स्यात् पुंलिङ्गः । वीक्ष्यः नर्तकः, कुल्यः कुलीनः, पूज्यः । हयमन्त्रश्वशुरवाचकत्वाद् वाच्यलिङ्गा न भवन्ति ।। सकारोपान्तस्य यथा–– कीकसः कृमिः 'पुरुवु', पनसः कण्टकः 'मुल्लु', वाहसः 'नीरुगण्डि', स्त्रीपुंसः शिखण्डी[2], मलीमसः अयः, नभश्चमसः इन्द्रजालम्, विभावसुः हारः, असुः, पांसुः, उत्सः, गुत्सः[3] ।। टकारोपान्तस्य यथा––पटः, कूटः, चेटः, किलाटः क्षीरविकारः, करहाटः, आरकूटः, कामकूटः वेश्याप्रणयः, परिकूटः पुरद्वारस्थमृत्कूटः, मत्कोटः 'चीम', चतुःषष्टिः गीतनृत्यादिकलाः[4], घरट्टः गोधूमयन्त्रम् 'प्रतिहट्टपथे घरट्टजात्

पथिकाह्वानदसक्तुसौरभैः' इति नैषधः (२. ८५), कर्पटः, कङ्कटः, अवटः, चिपिटः, निष्कुटः, करटः, भरटः कुम्भकारः, वहटः तन्तूत्पादकयन्त्रम् 'राट्नमु', अर्गटः अर्गलम् । क्वचित् स्थले न भवति । धाटी, भाटी वेश्या[5], [6]कुक्कुटी ॥ गोत्राख्याः । गोत्रनामानि पुंलिङ्गानि । वात्स्यः, गार्ग्यः ॥ चरणाह्वयाः । शाखानामानि पुंलिङ्गानि । छन्दोगः कठः ॥ १४ ॥

[1] मुञ्ज इत्यर्थः. [2] A1 adds 'स्त्रीपुंवविट्टि'. [3] गुच्छ इत्यर्थः. [4] B3 adds °वाद्यादि°. [5] A1 adds भाषान्तरे कावटी. [6] कुकुटिः B3.

नाम्न्यकर्तरि भावे च घञजब्नङ्णघाथुचः ।
ल्युः कर्तरीमनिज्भावे को घोः किः प्रादितोऽन्यतः ॥ १५ ॥

(वि.) नाम्न्यकर्तरि—णघाथुचः । नाम्नि संज्ञायामकर्तरि कारके भावे च विहिता घञादिप्रत्ययान्ताः शब्दाः पुंलिङ्गे[1] वर्तन्ते । घञन्तो यथा—पादः, रोगः वेश इत्यादि । कर्तृव्यतिरिक्तकारके यथा—प्रक्रियत इति प्रकारः । प्रसीदत्यस्मिन्निति प्रसादः । भावार्थे यथा—त्यागः, भोगः, योग इत्यादि[2] । अच्प्रत्ययान्ता यथा—नयः, चयः, जय इत्यादि । अप्प्रत्ययन्ता यथा—करः, गरः, लव इत्यादि । नङ्प्रत्ययान्ता यथा—[3]विज्ञः, यत्नः, प्रश्न इत्यादि । णप्रत्ययान्तो यथा—न्यादः इति । घप्रत्ययान्ता यथा—उरच्छदः, दन्तच्छद इत्यादि । अथुच्प्रत्ययान्ता यथा—आनन्दथुः, [4]क्षवथुः, वेपथुरित्यादि ॥ ल्युः कर्तरि । कर्तर्येकारकार्थे विहितो ल्युप्रत्ययान्तो पुंलिङ्गो भवति । उदाहरणे—नन्दनः, रमण इत्यादि ॥ इमनिज्भावे । भावार्थे विहित इमनिच्प्रत्ययान्तः पुंसि[5] भवति । उदाहरणे—प्रथिमा, लघिमा इत्यादि ॥ को घोः किः प्रादितोऽन्यतः । भावे विहितः कप्रत्ययान्तः पुंसि[5] वर्तते । उदाहरणे—आखूत्थः, श्येनोत्थः इत्यादि । प्रादितः प्राद्युपसर्गाच्च अन्यतः उपसर्गव्यतिरिक्ताच्च परः किप्रत्ययान्तो यो घुसंज्ञको धातुः तदुपरि विहितः किप्रत्ययान्तशब्दश्च पुंसि भवति । प्रादित उदाहरणे—निधिः, विधिरिति । अन्यत इत्यत्रोदाहरणे—वार्धिः, जलधिरिति[6] ॥ १५ ॥

[1] पुंसि K5. [2] K2, K3 omit इत्यादि. [3] J2, K3 add यज्ञः, रक्ष्णः. [4] K4, K5 add श्वयथुः. [5] पुंलिङ्गे K3. [6] K5 adds वारिधिः.

(विव.) नाम्न्यकर्तरि––णवाथुचः । नाम्नि कर्तृरूपार्थविषये तद्व्यतिरिक्तार्थविषये वा, संज्ञामात्रे, अकर्तरि संज्ञाव्यतिरिक्तार्थत्वेऽपि कर्तृव्यतिरिक्तकारकमात्रे भावे शुद्धे धात्वर्थमात्रे च यथासंभवं घञ्, अच्, अप्, नङ, ण, घ, अथुच् इति सप्तप्रत्ययान्ताः पुंसि भवन्ति । तत्र कर्तरि संज्ञायां घञ्प्रत्ययान्तो यथा–– 'पदरुजविशस्पृशो घञ्' (३. ३. १६) । पद्यतेऽसौ पादः । रुजतीति रोगः । विशतीति वेशः । अकर्तरि संज्ञाविषये यथा––प्रक्रियत इति प्रकारः । पच्यत इति पाकः ओदनः । अत एव केषांचिद् यज्ञानां पक्वगुणकत्वेन पाकयज्ञसंज्ञा । रज्यतेऽनेनेति रागो लाक्षा । प्रपतन्त्यस्मिन्निति प्रपातः तटम् । [1]प्रतिहारो द्वारम् । विपथः काकोटिकाख्यः पर्याहारो वा इत्यादिकमुदाहार्यम् । 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इत्यत्र सूत्रे चकारः संज्ञाव्यभिचारार्थ इति वृत्तिकारेणाभिधानाद् (काशिका १, पृ. २१०) असंज्ञायामपि कर्तृव्यतिरिक्ते घञ्प्रत्ययो यथा––दीयत इति दायः । लभ्यत इति लाभः ॥

केचित्तु––कर्तृव्यतिरिक्तार्थविषयस्य घञन्तस्य विशेष्यनिघ्नत्वम् । यथा–– पङ्कं, काष्ठमिति । तथा नम इत्युच्यते यत्र वाक्ये, तत् नमोवाकम् । तथा च 'अनुवाकादयः पुंसि वक्तव्याः' इत्यत्र 'भावे' (३. ३. १८) इति सूत्रेण भावार्थेषु घञ्प्रत्ययान्तो यथा––पचनं पाकः । त्यजनं त्यागः । यजनं याग इत्यादि । संज्ञायामच्प्रत्ययान्ता यथा––क्षयन्ति निवसन्त्यस्मिन्निति क्षयः गृहम् । चीयत इति चयः प्रकारः । नीयतेऽर्थोऽनेनेति नयः नीतिः । भावे यथा––चयनं चयः । 'एरच्' (३. ३. ५६) । असंज्ञायां यथा––चयः, जयः इति । 'अज्विधौ भयादीनामुपसंख्यानम्' नपुंसके [2]क्तादिनिवृत्त्यर्थम् (वा. ३. ३. ५६) इति विशेषविधानाद् अजन्तानामपि भयादीनां नपुंसकत्वम् । अप्प्रत्ययान्ता यथा––कीर्यत इति करः, राजग्राह्यो भागः । लवनं लवः । अत्र 'ऋदोरप्' (३. ३. ५७) इति सूत्रेण अप्प्रत्ययः । नङ्प्रत्ययान्तस्तु––'यजयाचयतविच्छप्रच्छरक्षो नङ' (३. ३. ९०) इति । यज्ञः, यत्नः, विश्नः, प्रश्नः, रक्ष्णः । नङन्तस्यापि याच्ञाशब्दस्य रूपभेदलक्षणविशेषबाधेन स्त्रीलिङ्गत्वम्[3] । 'नौ ण च' (३. ३. ६०) इति सूत्रेण णप्रत्ययान्तो यथा––नितरामद्यत इति न्यादः न्यदनं च । घप्रत्ययान्तो यथा––'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति । उरश्छाद्यतेऽनेनेति उरश्छदः कवचः । दन्तच्छदः ओष्ठः । एत्य कुर्वन्त्यत्रेति आकरः । अथुच्प्रत्ययो यथा––[4]क्षवथुः । वेपथुः । [5]श्वयथुः इत्यादि । अत्र 'ट्वितोऽथुच्' (३. ३. ८९) इत्यथुच्प्रत्ययः ॥

[1] प्रतीहारः B6. [2] Tv adds भावे. [3] Tv adds युक्तम्. [4] Gm1, Gm3 add संदथुः. [5] B6 adds टुओश्वि.

ल्युः कर्तरि । 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (३. १. १३४) इति विहितो नन्द्यादिल्युप्रत्ययान्तः पुंस्येव । यथा—नन्दनः पुत्रः । रमणो भर्ता । दहनः पावकः । पवनो वायुरित्यादि । ये तु संज्ञायामेव नन्द्यादिल्युप्रत्ययमिच्छन्ति तन्मते-नेदमुक्तम् । केवलयौगिकत्वे तु विशेष्यनिघ्नत्वमेव । 'कर्तरि' इति स्वरूपकथनम् ॥ इमनिज्भावे कः । 'पृथ्वादिभ्य इमनिज्वा' (५. १. १२२) इति सूत्रेण विहिते [1]भावार्थे य इमनिच्प्रत्ययः, यश्च भावार्थे कप्रत्ययः तदन्ताः पुंसि । यथा—पृथोर्भावः प्रथिमा । एवं महिमा, गरिमा इत्यादि । विशेषविधानात् [2]प्रेमशब्दस्य नपुंसकत्वमपि । 'सुपिस्थः' (३. २. ४.) इति योगविभागात् कप्रत्यये सति आखूनामुत्थानम् आखूत्थः । श्येनोत्थः (काशिका १, पृ. १७५) । यथा 'घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्' (वा. ३. ३. ५८) इति वक्तव्यात् कप्रत्ययः । यथा—प्रस्थानं प्रस्थः । आविधः । विघ्नः इत्यादि । शब्दार्णवे तु—'आखूत्थशलभोत्थादि तत उत्थानमद्वयोः' इति नपुंसकत्वमुक्तम् । भाव इति किम्? [3]भरिमा पर्यङ्कः । भरिमा खट्वा । भरिमा पीठम् इत्यादेरौणादिकस्य कर्त्रर्थस्य विहिते तस्य इमनिच्प्रत्ययान्तस्य, गोदः, पार्ष्णिः, त्रिः इत्यादेः कप्रत्ययान्तस्य च विशेष्यनिघ्नयोर्व्यवच्छेदार्थम् ॥

घोः किः प्रादितोऽन्यतः । 'दाधाघ्वदाप्' (१. १. २०) इति केषांचिद् धातूनां पूर्वाचार्यैः कृता घुसंज्ञा । प्राद्युपसर्गपूर्वात् पदान्तपूर्वाच्च घुसंज्ञकाद् धातोर्यः किप्रत्ययः तदन्तः पुंसि । प्रादितः किप्रत्यये यथा—विधिः, आधिः, उपाधिः, निधिः इत्यादि । उपसर्गव्यत्ययात् किप्रत्यये यथा—जलधिः, अब्धिः अम्बुधिः इत्यादि । अत्र 'प्रादितः' इत्यनेन 'उपसर्गे घोः किः' (३. ३. ९२) इति विहितः कप्रत्ययः 'अन्यतः' इत्यनेन 'कर्मण्यधिकरणे च' (३. ३. ९३) इति विहित उक्तः । न तु तदन्यस्य ग्रहणम् । तथाहि—'कानच्क्वसूचकिकिनौ भाषायां यङ्लुकावपि' इति वाक्यपदीयवचनात् भाषायामपि किकिन्प्रत्ययदर्शनात् 'आदृगमहनजनः किकिनौ लिट् च' (३. २. १७१) इति सूत्रे विहितस्य किप्रत्ययान्तस्य कर्तरि विहितस्य विशेष्यनिघ्नत्वादिति ॥ १५ ॥

[1] इह 'भावे' इति न संबध्यते। कमर्थिस्येमनिचोऽसंग्रहापत्तेः। चण्डस्य कर्म भावो वा चण्डिमा। महतः कर्म भावो वा महिमा इति भा. दी. (पृ. ५२२-३). [2] प्रीधातोरौणादिकमनिनन्तः प्रेमशब्दः इति भा. दी. (पृ. ५२४). [3] वरिमा, तरिमा इत्याद्यौणादिकेमनिज्वारणाय 'भावे' इति स्वामी। तन्न। 'कृतः कर्तर्यसंज्ञायाम्' (श्लो. ४५) इत्यनेन तत्र सिद्धत्वात् इति भा. दी. (पृ. ५२४).

(पा.) नाम्न्यकर्तरि—गघाथुचः। संज्ञासु विहिताः घञादिप्रत्ययान्ताः[1] शब्दाः पुंलिङ्गाः। भावे घञ्—पाकः, त्यागः। 'एरच्' (३. ३. ५६)—चयः, जयः। 'ऋदोरप्' (३. ३. ५७) करः, गरः, भवः, स्तवः। 'यजयाचयतविच्छप्रच्छरक्षो नङ' (३. ३. ९०) [2]यज्ञः, प्रश्नः। 'नौ ण च' (३. ३. ६०) न्यादः। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) उरश्छदः, दन्तच्छदः[3]। 'ट्वितोऽथुच्' (३. ३. ८९) श्वयथुः, वेपथुः[4]॥ ल्युः कर्तरि। कर्त्रर्थे विहितल्युप्रत्ययान्तः शब्दः पुंलिङ्गः। 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (३. १. १३४) [5]नन्दनः, शोभनः। इमनिज्भावे। भावार्थे विहित इमनिच्प्रत्ययान्तः शब्दः पुंलिङ्गः। 'पृथ्वादिभ्य इमनिज्वा' (५. १. १२२) प्रथिमा, म्रदिमा, अकिंचनिमा। कः। कप्रत्ययान्तः[6] शब्दः पुंलिङ्गः। 'घञर्थे [7]कविधानं कर्तव्यम्' (वा. ३. ३. ५८) प्रस्नः, विघ्नः। किप्रत्ययसांनिध्याद् घञर्थस्यैव ग्रहणम्। घोः किः प्रादितोऽन्यतः। प्रादिपूर्वस्य च कर्मपूर्वकस्य च घुसंज्ञकधातोर्विहितः किप्रत्ययान्तः शब्दः पुंलिङ्गः। 'उपसर्गे घोः किः' (३. ३. ९२) [8]विधिः, निधिः। 'कर्मण्यधिकरणे च' (३. ३. ९३) जलधिः, इषुधिः॥ १५॥

[1] °प्रत्ययाः A_1.　[2] A_1 adds यत्नः.　[3] B_3, C_1 omit.　[4] A_1 omits.　[5] A_1 adds व्रश्चनः.　[6] कप्रत्ययः A_1.　[7] C_1 adds स्थास्नापाव्यधिहनियुध्यर्थम्.　[8] B_3 adds प्रदिः.

द्वन्द्वेऽश्वबडबावश्वबडबानसमाहृते।
कान्तः सूर्येन्दुपर्यायपूर्वोऽयःपूर्वकोऽपि च॥ १६॥

(वि.) द्वन्द्वेऽश्व—असमाहृते। [1]इतरेतरशब्दयोगार्थे ऽश्वबडवयोः यः समासः तदात्मकः शब्दः पुंलिङ्गो[2] भवति। अत्रोदाहरणे दर्शिते—अश्वबडवौ। अश्वबडवानिति॥ कान्तः—अयःपूर्वकोऽपि च। सूर्यपर्यायपूर्वः, इन्दुपर्यायपूर्वः,

³अयःशब्दपूर्वकश्च कान्तशब्दः पुंलिङ्गे वर्तते । क्रमेणोदाहरणानि—सूर्यकान्तः, पतङ्गकान्तः,⁴ चन्द्रकान्तः⁵, अयस्कान्तः इत्यादि ।। १६ ।।

¹ K3, K4 add असमाहृते. ² पुंसि K5. ³ K2, K3, K4 omit °शब्द°. ⁴ इनकान्तः J2. ⁵ J2, K4 add इन्दुकान्तः.

(विव.) द्वन्द्वे—असमाहृते । असमाहृते समाहारद्वन्द्वादन्यत्र, अश्वश्च बडवा च इति इतरेतरयोगे द्वन्द्वसमासे ¹परवल्लिङ्गबाधेन पूर्वपदलिङ्गत्वमनेनोच्यते । 'पूर्ववदश्वबडवौ' (२. ४. २७) इति द्विवचनान्तस्योक्तत्वाद् अश्वबडवागतबहुत्वविवक्षायां पूर्वपदलिङ्गत्वं नास्तीति वा मन्दाशङ्कानिरासार्थम्, असंदिग्धमुदाहरणद्वयम् । तत्र अश्वबडवौ इति प्रथमयोर्द्विचनम् । अश्वबडवानिति शसन्तं द्वितीयम् । समाहारद्वन्द्वे तु 'स नपुंसकम्' (२. ४. १७) इति नपुंसकलिङ्गत्वाद् असमाहृत इत्युक्तम् । कान्तः—अयःपूर्वकोऽपि च । सूर्यशब्दपूर्वकः, इन्दुशब्दपूर्वकः, तदुभयपर्यायपूर्वकश्च, अयःशब्दपूर्वकश्च कान्तशब्दः पुंलिङ्गः । यथा—सूर्यकान्तः, रविकान्तः, इन्दुकान्तः, चन्द्रकान्त इति । द्वामिमौ मणिविशेषौ । अयस्कान्तो लोहविशेषप्रकृतिः चुम्बकशीला । कस्कादित्वात् (८. ३. ४८) विसर्जनीयस्य सत्वम् । अत्र केचित्² 'अपि च' इति समुच्चयदर्शनाद् अयःपर्यायात् लोहशब्दाद् उत्तरस्यापि कान्तशब्दस्य पुंलिङ्गत्वमिच्छन्ति । यथा—लोहकान्त इति³ ।। १६ ।।

¹ 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६). ² मल्लिनाथीयपारिजाते एवं दृश्यते. ³ अश्नुते । 'अशू व्याप्तौ' । 'अशूप्रुषिलटि . . .' (उ. १. १५१) इति क्वन् [अश्वः]; वलं वाति । 'आतोऽनुप . . .' इति कः । बलेन वजति वा । 'अन्येभ्योऽपि . . .' इति डः डलयोरेकत्वम् [बडवा]; सुवति । 'षू प्ररेणे' । 'सुसूधाञ्गृधिभ्यः क्रन्' (उ. २. २४) [सूर्यः]; उनत्ति । 'उन्दी क्लेदने' । 'उन्देरिच्चादेः' (उ. १. १२) इत्युः [इन्दुः] इति तत्र तत्र भा. दी.

(पा.) द्वन्द्वे—अश्वबडवं¹ तु समाहृते । ²इतरेतरयोगद्वन्द्वे ऽश्वबडवौ इति पुंलिङ्गः । समाहारद्वन्द्वे तु अश्वबडवमिति नपुंसकं स्यात् । 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) इति विहितपरवल्लिङ्गस्यापवादः³ ।। कान्तः—अयःपूर्वकोऽपि च । सूर्येन्दुपर्यायपूर्वकश्च अयःपर्यायपूर्वकश्च कान्तशब्दः पुंलिङ्गः । यथा—सूर्यकान्तः, रविकान्तः, इन्दुकान्तः⁴, अयस्कान्तः, लोहकान्तः ।। १६ ।।

[1] '°बडवं तु समाहृते' इति पारिजाताभिमतः पाठः.　　[2] B₃ omits °योग°.
[3] इत्यस्यापवादः B3, C1.　　[4] B3 adds चन्द्रकान्तः.

वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः ।
पुङ्खो न्यूङ्खः समुद्गश्च विटपट्टघटाः खटः ।। १७ ।।

(वि.) वटकश्चानुवाकश्च---खटः । अत्र कांश्चित् पुंलिङ्गान् स्वरूपेणाह---वटक इति । वटको[1] भक्ष्यविशेषः । अनुवाकः [2]ऋक्सामयजुःसमूहः । रल्लकः कम्बलः । [3]कुडङ्गो लतागहनम् । पुङ्खो बाणमूलम् । न्यूङ्खो नैरन्तर्येणोक्ताः षडोंकाराः । समुद्गः संपुटकः । विटः कामुकानुचरः[4] । पट्टो ललाटभूषणम् । घटो दारुतुला । खटः स्थूणाविशेषः ।। १७ ।।

[1] K4 adds वटकादयः शब्दाः पुंलिङ्गा भवन्ति.　　[2] K5 omits °सामयजुस्°.
[3] कुडङ्गकः K3, K5.　　[4] कामुकः K5.

(विव.) वटकश्चानुवाकश्च---खटः । अथ पूर्वाचार्यकृतलिङ्गानुशासनच्छायया पर्यायावसरे प्रागुक्ताननुक्तांश्च कांश्चित् पुंलिङ्गान् स्वरूपेणाह---वटक इति । वटको [1]मरीचजीरकादिमिश्रितः पिष्टादिकृतो भक्ष्यविशेषः । निस्तलीकृतमृत्पाषाणौषधादि च । अनूच्यत इत्यनुवाकः । यथायोगम् ऋचां साम्नां यजुषां वा समूहः । यथा---रुद्रानुवाकः, काण्डानुवाकः, शान्त्यनुवाक इत्यादि । अत्रानुवाकशब्देन ' अनुवाकादयः पुंसि वक्तव्याः ' इत्युक्तानां ग्रहणम् । यथा--- सूक्तवाकः, शंयुवाक इत्यादि । रल्लकः कम्बलविशेषः । मृगभेदश्च । कुडङ्गो[2] वृक्षलतादिच्छादितप्रदेशः । यथा---' अभिषेकजलेन दत्तसेकाः प्रमथाधीशजटाटवीकुडङ्गाः[2] ' इति । स्वार्थे वृत्तपूरणार्थः कप्रत्ययः[3] । पुङ्खः शरस्य ज्यासंधानप्रदेशः । न्यूङ्खो नैरन्तर्येणोच्चारिताः षडोंकाराः । सुन्दरे तु वाच्यलिङ्गः । तथा च चन्द्रः---' न्यूङ्खः साम्नि षडोंकारे त्रिषु सम्यङ्मनोहरः ' इति । दीर्घादिरयं शब्दः । समुद्गकः संपुटकः । विटः कामुकानुचरविशेषः । पट्टो ललाटभूषणविशेषः । शिलाविशेषश्च । घटः तुलाविशेषो दारुनिर्मितः । खटः करस्य प्रहारविशेषः । ' खटः श्लेष्मण्यन्धकूपे प्रहारान्तरटङ्कयोः ' इति रभसः । प्रहारान्तरं मुष्टिविशेष इति सुभूतिचन्द्रः । खटस्तृणविशेष इति स्वामि (पृ. ३४९) सुबोधिनीकारौ[4] ।। १७ ।।

[1] मरिच° Tj1, Tj2. [2] कुड्ङ्गः Gm1, Gm3. [3] मूले कुडङ्गक इत्यत्र. [4] वटति । 'वट वेष्टने' । क्वुन् (उ. २. ३२) [वटकः]; अनु उच्यते । घञ् । 'चजोः . . .' इति कुत्वम् [अनुवाकः]; लल्यते । 'लल ईप्सायाम्' । संपदादिः (वा. ३. ३. ९४) । रलयोरेकत्वम् । लक्यते । 'पुंसि संज्ञायां . . .' घः । रल् चासौ लकश्च [रल्लकः]; कुटति । क्विप् । कुट् अङ्गमस्य । 'शेषाद्विभाषा' इति कप् [कुडङ्गकः]; पुमांसं खनति । 'अन्येभ्योऽपि' (वा. ३. २. १०१) [पुङ्खः]; 'यज्ञकर्मण्यजपन्यूङ्खसामसु' (१. २. ३४) इति साधुः [न्यूङ्खः]; समुद्गम्यते । 'अन्येष्वेपि . . .' (वा. ३. २. ४८) इति डः [समुद्गः]; वेटति । 'इगुपध . . .' इति कः [विटः]; पटति । बाहुलकात्तः [पट्टः]; खट्यते । 'पुंसि . . .' इति घः [खटः] इति भा. दी. (पृ. ५२४).

(पा.) वटकश्चानुवाकश्च––खटः । वटकादयः पुंलिङ्गाः । वटकः 'वडियम्' । अनुवाको नाम अवच्छेदविशेषः ।

'अनुवाकश्च खण्डिका ।
ब्राह्मणं चेत्यवच्छेदा एकग्रन्थस्तु [1]फक्किका ।। '

इति वैजयन्ती (पृ. ८५, श्लो. ३२-३) । रल्लक उक्तः (१, पृ. ४३६) । कुडङ्गकः कुञ्जः । पुङ्खः शरस्य गरुत्संनिवेशः । [2]न्यूङ्खो नाम षडोंकाराः । समुद्गको गतार्थः (१, पृ. ४४९)। विटपट्टशब्दावनेकार्थकौ ।

'विटोऽद्रौ लवणे षिङ्गे मूषके खदिरेऽपि च ।'
'पट्टः पेषणपाषाणे व्रणादीनां च वन्धने ।
चतुष्पथे च राजादिशासनान्तरपीठयोः ।। '

इत्युभयत्र[3] विश्वः (पृ. ३६, श्लो. ७; पृ. ३७, श्लो. १४-५) । धटो दारुतुला । खटोऽन्धकूपः ।। १७ ।।

[1] पक्किका A1; भक्किका B3. [2] न्यूङ्ख इति पारिजाताभिमतः पाठः. [3] B3 adds अपि.

कोट्टारघट्टहट्टाश्च पिण्डगोण्डपिचण्डवत् ।
गडुः करण्डो लगुडो वरण्डश्च किणो घुणः ।। १८ ।।

(वि.) कोट्टारघट्ट––किणो घुणः । कोट्टादिघुणान्ताः शब्दाः पुंलिङ्गाः भवन्ति । कोट्टो दुर्गः । [1]अरघट्टो महाकूपः । हट्टो विपणिः । पिण्डो ग्रासः । गोण्डः

तुन्दिलः । पिचण्डः कुक्षिः । [2]गडुर्मांसविशेषः । करण्डः समुद्गः । लगुडो दण्डः । वरण्डो रोगः[3] । किणो व्रणस्थानम् । घुणो दारुकृमिः[4] ।। १८ ।।

[1] आरघट्टः A1.　[2] गण्डुः J2.　[3] मुखरोगः J2, K2.　[4] °क्रिमिः K5, K6.

(विव.) कोट्टारघट्ट—किणो घुणः । अत्र कोट्टारश्च घट्टश्च हट्टश्च इति विग्रहे प्रथमपदं त्र्यक्षरं रेफोपधं चाभिप्रेत्य सुभूतिचन्द्रो व्याचष्ट । भट्टग्रामन्यायेन टान्तेष्वपि रेफान्तस्य कोट्टारशब्दस्य पाठः । 'कोट्टारो नागरे कूपे पुष्करिण्यां च पाटके' इत्यभिधानात् (विश्व. पृ. १३६, श्लो. १७७) । घट्टः शुल्कस्थानम्' इति । स्वामी (पृ. ३४६) तु प्रकारान्तरेण पदं छित्वा व्याचष्ट—'कोट्टो [1]दुर्गम् । अरघट्टः[2] महाकूप' इति । हट्टः क्रयविक्रयस्थानम् । पिण्डः—

'पिण्डो देहे जपापुष्पे निवापे सिल्हकेऽपि च ।
[3]पिण्डः स्यात्तगरेऽलाबुखर्जूरीभेदयोरपि ।।'

इति विश्वप्रकाशः (पृ. ४४, श्लो. १४-५) । 'गोण्डः पामरजातीये वृद्धनाभौ तु वाच्यवत्' इति रुद्रः । पिचण्डः कुक्षिः । गडुः शरीरपृष्ठभागस्थो मांसग्रन्थिविशेषः । यथा—'किमन्तर्गडुना' इति[4] (सर्व. संग्र.) । गण्ड इति पाठे गण्डः कपोलः । करण्डः कर्पूरादेराधारभूतः पात्रविशेषः । लगुडो लोहमयः प्रहरणविशेषः । वरण्डः तृणपत्रादिनिचयः । 'फलकमुखरोगयोर्वरण्डः स्यात्' इति रत्नकोशः । '[5]वरण्डस्त्वन्तरावेद्यां संदोहमुखरोगयोः' इति विश्वप्रकाशश्च (पृ. ४५, श्लो. २७) । किणो रोपितव्रणप्रदेशजन्यो मांसग्रन्थिः । घुणः काष्ठकीटः[6] ।। १८ ।।

[1] दुर्गः इति मु. ग्र.　[2] आरघट्टः Tj1, Tj2.　[3] लोहे Gm1, Gm3; पिण्डी इति मु. ग्र.　[4] किमनेनान्तर्गडुना (*Sar. Saṃ.* Apte's Dict. p. 119).　[5] 'वरण्डोऽप्यन्तरा वेदौ' इति मु. ग्र.　[6] कुट्टयते । बाहुलकादारन् गुणश्च [कोट्टारः]; घट्टयते । 'हलश्च' इति घञ् [घट्टः]; हटन्त्यत्र । बाहुलकात्तः [हट्टः]; पिडि संघाते । पचाद्यच् [पिण्डः]; अपि चण्डते, अनेन अत्र वा । 'चडि कोपे' । 'हलश्च' इति घञ् । 'वष्टि भागुरि ...' इत्यपेरल्लोपः [पिचण्डः]; गडति । 'गड सेचने' । बाहुलकादुः [गडुः]; क्रियते । 'अण्डन् कृसृभृवृञः' (उ. १. १२६) [करण्डः]; लगति । बाहुलकादुडच् [लगुडः]; वृणोति । 'अण्डन् ...' [वरण्डः]; कणति । पचाद्यच् । पृषोदरादित्वाद् अत इः [किणः]; घोणते । 'इगुपध ...' इति कः [घुणः] इति भा. दी. (पृ. ५२४-५).

(पा.) कोट्टारघट्ट––किणो घुणः । कोट्टादयः पुंलिङ्गाः । कोट्टो दुर्गपुरम्। अरघट्टो घटीयन्त्रम्[1] । यद्वा[2] कोट्टारो जलकुण्डम् । 'निश्लकुण्ड' । घट्टो वनगिरिप्रायदेशः । हट्टः [3]आपणवीथी । पिण्डोऽनेकार्थः । 'पिण्डो देहे [4]जपापुष्पे निवापे सिल्हकेऽपि च' इति विश्वः (पृ. ४४, श्लो. १४) । गोण्डः पामरजातिः । तुण्डिले वाच्यलिङ्गः । '[5]गोण्डः पामरजातौ च वृद्धनाभौ च वाच्यवत्' इति विश्वः (पृ. ४४, श्लो. १३) । पिचण्डो गतार्थः(१, पृ. ४१०)। अथवा पिचण्डः शय्या । 'पिचण्डः कुक्षिशय्ययोः' इति वैजयन्ती (पृ. २४३, श्लो. ५७) । गडुः 'वेन्नुकोप्पु' । करण्डः पुष्पपुटः । 'करेंडे' । करण्डीत्यपचयविवक्षायां स्त्रीत्वम् । लगुडो दण्डः[6] । वरण्डस्त्वनेकार्थः । वरण्डोऽप्यन्तरावेदौ संदोहमुखरोगयोः' इति विश्वः (पृ. ४५, श्लो. २७) । किणो व्रणलाञ्छनम् । 'पुंटिमत्स' । घुणो [7]दारूपरिवर्णालेखकीटः । 'कुट्टिकपुरुवु' ।। १८ ।।

[1] A1 adds 'यान्तामु'. [2] अथवा A1. [3] °वीथि: B3. [4] जवा° इति मु. ग्र. [5] गौण्डः इति मु. ग्र. [6] A1 adds 'वेदुरुगंदिध'. [7] दारुक्रिमिः B3, C1.

दृतिसीमन्तहरिता रोमन्थोद्गीथबुद्बुदाः ।
कासमर्दोऽर्बुदः कुन्दः फेनस्तूपौ सयूपकौ ।। १९ ।।

(वि.) दृतिसीमन्त––सयूपकौ । दृत्यादियूपकान्ताः शब्दाः पुंलिङ्गा भवन्ति । दृतिर्भस्त्रिका । सीमन्तः केशपद्धतिः । [1]हरितः पक्षिभेदः[2] । मुनिर्वा । रोमन्थः पशूनां चर्वितचर्वणम् । उद्गीथः सामप्रवणः । बुद्बुदो जलस्फोटः । कासमर्दः [3]शाकभेदः । अर्बुदः संख्याविशेषः । कुन्दो माघ्यपुष्पम् । फेनो डिण्डीरः । स्तूपो मृदालिन्दः[4] । यूपको यूपस्तम्भः ।। १९ ।।

[1] हारीतः J2. [2] °विशेष: J2, K6. [3] काशमर्दः शाकविशेषः J2; काशभेदः K6. [4] मृदादिकूटः K2.

(विव.) दृतिसीमन्त––सयूपकौ । दृत्यादयः शब्दाः पुंलिङ्गाः । दृतिर्जलाधारश्चर्मविकारः । सीमन्तो ललाटस्योपरि वर्तमाना केशपद्धतिः । हरितः पक्षिभेदः । ऋषिविशेषश्च[1] । रोमन्थः पशूनां चर्वितचर्वणम् । उद्गीथः सामभक्तिविशेषः । बुद्बुदो जलस्फोटः । कासमर्दो वन्यशाकविशेषः । 'कसवन्दपेरु' ।

अर्बुदो व्रणविशेषः। पर्वतभेदश्च। संख्यावचनत्वे तु पुंनपुंसकत्वम्। कुन्दः पुष्पवृक्षविशेषः। 'कुन्दश्चक्रभ्रमौ[2] माघ्ये निधिभेदे मुरद्विषि' इति विश्वप्रकाशः (पृ. ७८, श्लो. ६)। 'माघ्यं कुन्दम्' (१, पृ. २५८) इत्यत्र कुन्दशब्दस्य नपुंसकत्वमुक्तम्। इह तु पुंलिङ्गत्वमित्युभयलिङ्गत्वम्। 'माघ्यं कुन्दोऽस्त्रियाम्' इति वनौषधिवर्गे शेषकारेणोक्तम्। फेनो डिण्डीराख्यो जलपरिणामः। स्तूपो मृत्पाषाणादिकृत उन्नतप्रदेशः। गृहवंशरूपो दारुविशेषश्च। तथा च 'गृहस्तूपे निदधाति' इत्यापस्तम्बप्रयोगः। यूपः अग्नीषोमीयादिपशुबन्धनार्थं पालाशादिदारुविशेषः। तेन सह वर्तेत इति सयूपकौ। स्वार्थे कप्रत्ययः (५. ४. ५)। 'सपूपकौ' इति पाठे पूपो गोधूमादिपिष्टविकारः पक्व उच्यते[3] ॥ १९ ॥

[1] °भेदः Tv.   [2] चक्रभ्रमे B5, B6.   [3] द्रियते। क्तिच् (३. ३. १७४) [दृतिः]; सीम्नोऽन्तः। शकन्ध्वादिः (वा. ६. १. ९४) [सीमन्तः]; हरति। 'हृसृरुहि-' (उ. १. ९७) इतीतिः [हरित्]; रोम [ग?] स्य मन्थः। पृषोदरादिः [रोमन्थः]; उद्गीयते। 'गश्चोदि' (उ. २. १०) इति थक् [उद्गीथः]; 'बुद्' इत्यव्यक्तशब्दध्वनिं बुन्दति करोति। मूलविभुजादित्वात् (वा. ३. २. ५) कः [बुद्बुदः]; कासं मृद्नाति। कर्मण्यण् [कासमर्दः]; अरं बुन्दति। मूलविभुजादिः। पृषोदरादिः [अर्बुदः]; कुं द्यति। पृषोदरादिः [कुन्दः]; स्फायते। 'फेनमीनौ' (उ. ३. ३) इति साधुः [फेनः]; स्तूयते। 'स्तुवो दीर्घश्च' (उ. ३. २५) इति पः [स्तूपः]; यौति। 'कुयुभ्यां च' (उ. ३. २७) इति दीर्घः किच्च [यूपः]; पुनाति। पूयते वा। बाहुलकात् पक् [पूपः] इति भा. दी. (पृ. ५२५).

(पा.) दृतिसीमन्त—सयूपकौ। दृत्यादयः पुंलिङ्गाः। दृतिर्भस्त्रा[1]। सीमन्तः केशवीथिः[2]। हरितो मुद्गः[3]। रोमन्थः पशूनां चर्वितचर्वणम्। 'पसुलमेलुकु'। उद्गीथः साम। बुद्बुदो [4]जलस्फोटः। 'नीरुबुड्ढलु'। स्थासकोऽपि। 'बुद्बुदस्थासकौ समौ' इति वैजयन्ती (पृ. १५५, श्लो. १३)। कासमर्द ओषधिविशेषः। 'तगर्चचेट्टु'। भाषान्तरे 'एलहु'। अर्बुदो मांसकीलः। कुन्दस्त्वनेकार्थः। 'कुन्दश्चक्रभ्रमौ माघ्ये निधिभेदे मुरद्विषि' इति विश्वः (पृ. ७८, श्लो. ६)। फेनो [5]गतार्थः (१, पृ. ६१५)। अथवा वज्रः इत्युणादिवृत्तिः। स्तूपः चैत्यम्। यूपो यज्ञीयस्तम्भः[6] ॥ १९ ॥

[1] चर्मभस्त्रा A1.   [2] A1 adds 'पापट'.   [3] 'पेसरु' A1.   [4] A1 adds जलबुद्बुदोपमम्.   [5] 'डिण्डीरोऽब्धिकफः फेनः' इति.   [6] यज्ञकाष्ठम् A1.

आतपः क्षत्रिये नाभिः कणयक्षुरकेदराः ।
पूरक्षुरप्रचुक्राश्च गोलहिङ्गुलपुद्गलाः ।। २० ।।

(वि.) आतपः––पुद्गलाः । आतपादिपुद्गलान्ताः शब्दाः पुंलिङ्गा भवन्ति । आतपोऽर्कद्योतः । क्षत्रिये नाभिः, नाभिशब्दः क्षत्रियविशेषे पुंसि वर्तते । अत्र क्षत्रियशब्दः प्राण्यङ्गव्यवच्छेदार्थः[1] । कणयः[2] कुन्तभेदः । क्षुरो वपनसाधनम् । केदरस्तरुविशेषः[3] । पूरो जलोल्लासः । क्षुरप्रः शरविशेषः[4] । [5]चुक्रोऽम्लवेतसः । गोलो वर्तुलः पिण्डः[6] । हिङ्गुलो रागद्रव्यम् । पुद्गलो जीवः ।। २० ।।

[1] व्यवच्छेदकः K5. [2] K4 adds कणप इति केचित्; स्वामी च (पृ. ३४९).
[3] कूपकः. K6. [4] काण्डच्छेदः K6 ; काण्डविशेषः K5. [5] चुक्लः K2, K3.
[6] वर्तुलेन्द्रियस्थानम् K4, K6.

(विव.) आतपः––पुद्गलाः । आतपः सूर्यप्रकाशः । राजमण्डलमध्यस्थक्षत्रियवाचको नाभिशब्दः पुंलिङ्ग एवेति नियमः । अर्थान्तरे तु लिङ्गविवेकः प्रागेव कृतः (पृ. ६७८) । कणयः कुन्तायुधविशेष इति केचित्[1] । शरभेद इत्यन्ये[2] । क्षुरः केशवपनसाधनम् । केदरस्तरुविशेषः । केदारो व्रीहिक्षेत्रमिति कश्चित् । नद्यादौ जलार्थः स्वल्पः कूप इत्यन्ये । केदाराख्यतरुविशेष इत्यपरे । पूरो जलवृद्धिः । क्षुरप्रः शरविशेषः । खुर इव स्वसंयुक्तं देशं प्रति पूरयति खुरप्र इति कवर्गद्वितीयादिरयं शब्द इति केचित् । चुक्रः अम्लवेतसः । अन्यस्तु खुरश्च प्रचुक्रश्च इति त्र्यक्षरं रेफोपधं च विगृह्य प्रचुक्रो बुद्धिविशेषः इति व्याचष्ट । गोलो वर्तुलो मृत्पिण्डादिः । यथा––ब्रह्माण्डगोल इति । चक्षुरादीन्द्रियाधिष्ठानभूतः पार्थिवावयवविशेषश्च । यथा––चक्षुर्गोल इति । विधवापुत्रो गोल इत्युच्यते । यथा–– 'अवकीर्णो कुण्डगोलौ' इति (या. स्मृ. १. १०. २२२) । हिङ्गुलिः रागद्रव्यविशेषः । आकारान्तोऽयं शब्द इत्येके । पुद्गलो जीवात्मा जैनानां प्रसिद्धः । 'देहेऽध्यात्मनि पुद्गलः' इति रुद्रः[3] ।। २० ।।

[1] विवृतौ दृश्यते. [2] पारिजाते दृश्यते. [3] आतपति । पचाद्यच् [आतपः]; कणं पाति । 'आतोऽनुप . . .' इति कः [कणपः]; क्षुरति । 'इगुपध . . .' इति कः [क्षुरः]; के दृणाति । पचाद्यच् [केदरः]; पूरयति । पचाद्यच् [पूरः]; क्षुरं प्राति । 'आतोऽनुप . . .' इति कः [क्षुरप्रः]; चक्यतेऽनेन । 'चकिचम्योरुच्चोपधायाः' (उ. २. १४) इति

रक् [चुक्रः]; गुड्यते । घञ् । रलयोरेकत्वम् [गोलः]; हिङ्गु लाति । 'आतोऽनुप . . .' इति कः [हिङ्गुलः]; 'पुत्' इति कुत्सायामव्ययम् । पुदिगलति । 'ऋदोरप्' [पुद्गलः] इति भा. दी. (पृ. ५२५-६).

(पा.) आतपः—पुद्गलाः । आतपादयः पुंलिङ्गाः । आतपो [1]गतार्थः (१, पृ. ७२) । अथवा [2]रवितापः । 'अथातपो रौद्रमिद्धम्' इति वैजयन्ती (पृ. १८, श्लो. २२) । नाभिः क्षत्रियः । क्षत्रिय इति शृङ्गग्राहिकया[3] वचनं प्राण्यङ्गादिव्युदासार्थम् ।

'मुख्यराट् क्षत्रियो नाभिः पुंसि प्राण्यङ्गके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे ॥'

इति रभसः । कणयः शरः । 'अम्मु' । क्षुरो नापितशस्त्रम्[4] । 'मङ्गलकत्ति' । केदरः केदारः । 'केदारः केदरः क्षेत्रम्' इति वैजयन्ती (पृ. १२४, श्लो. १७) । पूरस्तोयोल्लासः । क्षुरप्रो बाणविशेषः । 'अर्धचन्द्रः[5] क्षुरप्रः स्यात्' इति हलायुधः (अ. मा. २. ३१४) । चक्रः समूहचक्रवाकयोरन्यतरः ॥

'चक्रः कोके व्रजे पुंसि चक्रं[6] सैन्यरथाङ्गयोः ।
ग्रामजाले कुम्भकारभाण्डे राष्ट्रे च दृश्यते ॥'

इति त्रिकाण्डशेषः (पृ. ३३, श्लो. ६०४) । गोलः 'गोट्टिकल्लु' । हिङ्गुलो रागद्रव्यम् । 'इङ्गिलिकम्' । 'हिङ्गुलं हंसपादं च कुरुविन्दं निगद्यते' इति [7]केषांचिन्नपुंसकम् । पुद्गलो देहः ॥ २० ॥

[1] प्रकाशः B3, C1.　[2] रव्यादि° B3.　[3] °ग्राहिवचनम् A1.　[4] °खड्गः A1.
[5] 'अर्धचन्द्रक्षुरप्रादि' इति मु. ग्र. (पृ. ५०).　[6] क्लीबे इति मु. ग्र.　[7] वैजयन्त्यां दृश्यते (पृ. ४४, श्लो. ४४).

वेतालमल्लभल्लाश्च पुरोडाशोऽपि पट्टिसः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥

इति पुंलिङ्गशेषः

(वि.) वेतालमल्ल—पतद्ग्रहः । [1]वेतालादिपतद्ग्रहान्ताः शब्दाः पुंलिङ्गाः । वेतालो भूताविष्टशवः । मल्लो बाहुयोद्धा । भल्लः शरभेदः[2] । पुरोडाशः पिष्टकृतहोमद्रव्यम् । पट्टिसः आयुधविशेषः । कुल्माषो यावकः । रभसः पौर्वापर्याविचारः । कटाहो [3]जलपूरणार्हो घटविशेषः । पतद्ग्रहो [4]गण्डूषताम्बूलादिग्रहणसाधनम् ।। २१ ।।

इति पुंलिङ्गशेषप्रकरणम्[5]

[1] बेतालः K_4. [2] काण्डच्छेदः K_6. [3] °पूरणार्थः K_4. [4] °ग्रहणपात्रविशेषः K_4, K_5; °विशेषसाधनम् J_2. [5] °विशेष° J_2.

(विव.) भेतालमल्ल—पतद्ग्रहः । भेतालः[1] पिशाचविशेषः । मल्लो नियुद्धकुशलः । भल्लः स्थूलफलः शरविशेषः । पुरोडाशो दर्शपूर्णमासादिषु व्रीह्यादिपिष्टकृतोऽश्वशफमात्रः कूर्माकृतिराग्नेयादिहोमद्रव्यविशेषः । पट्टिसः आयुधविशेषः । कुल्मासोऽर्धपक्वो मुद्गगोधूमादिः । दन्त्योपधमध्यपाठात् कुल्मास इत्यस्य शब्दस्य [2]साधुत्वमसंदिग्धम् । 'कुल्माषो यावके पुंसि काञ्जिके स्यान्नपुंसकम्' इति मूर्धन्यान्ते रभसश्च । व्रीहिभेदे कुल्माष इति मूर्धन्यान्तं केचिदाहुः । अनालोचितार्थप्रारम्भो रभसः । 'रभसो हर्षवेगयोः' इति रुद्रः । तद्युक्ते तु वाच्यलिङ्गः । यथा—'रभसया तु दिगन्तदिदृक्षया' इति भारविप्रयोगः (किरा. ५. १) । कटाहो नाम बहुद्रव्याधारो मृन्मयादिर्भाण्डविशेषः । सकटाहः कटाहशब्देन सहित इत्यर्थः । पतद्ग्रहो गण्डूषादिप्रक्षेपार्थः कांस्यादिनिर्मितः पात्रविशेषः[3] । 'पडिगमु' ।। २१ ।।

इति पुंलिङ्गविशेषप्रकरणम्

[1] भेताल इति विवरणाभिमतः पाठः. [2] सान्तत्वम् B_5, B_6. [3] वो वायुरितो गतो यस्मात् स वेतः । वेतमलति । कर्मण्यण् [वेतालः]; मल्लते । पचाद्यच् [मल्लः]; भल्लते । पचाद्यच् [भल्लः]; 'व्रीहेश्च पुरोडाशे' (४. ३. १४८) इति साधुः [पुरोडाशः]; पट्टिं श्यति । 'आतोऽनुप . . .' इति कः [पट्टिशः]; कोलनम् । संपदादिक्विप् । कुलं मषति । कर्मण्यण् [कुल्माषः]; रभते । 'अत्यविचमितमि . . .' (उ. ३. ११७) इत्यसच् [रभसः]; कटेनातिशयेनाहन्ते । 'अन्येभ्योऽपि . . .' इति डः [कटाहः]; गृह्णाति । पचाद्यच् । पततस्ताम्बूलादेर्ग्रहः [पतद्ग्रहः] इति भा. दी. (पृ. ५२६-७).

(पा.) वेतालमल्ल—पतद्ग्रहः । [1]वेतालादयः शब्दाः पुंलिङ्गाः । वेतालो यमकिंकरः । भूताविष्टमृतशरीरं वा । मल्लो बाहुयोद्धा । भल्लो [1]बाणभेदः 'बाडम्मु' । 'स्नुहीदलफलो भल्लः' इति वैजयन्ती (पृ. ११६, श्लो. १८२) । पुरोडाशो [2]यज्ञीयपूपः । पट्टिस[3] आयुधभेदः । [4]'कुल्माषोऽर्धस्विन्नो माषादिः' इति क्षीरस्वामी (पृ. ३५०) । अथवा[5] कुल्माषो रत्नभेदः । 'कुरुविन्दस्तु[6] कुल्माषः' इति वैजयन्ती (पृ. ४४, श्लो. ४०) । रभसो वेगः । कटाहः पात्रभेदः । 'काप्येर' । 'कटाहः कर्परो लट्टः[7]' इति वैजयन्ती (पृ. १६३, श्लो. ५६) । पतद्ग्रहः कलाचिका । 'पडिगमु' । 'पतद्ग्रहः प्रतिग्राहो वालोऽस्त्री दारुणा कृतः' इति वैजयन्ती (पृ. १७१, श्लो. १६०) ॥ २१ ॥

इति पुंलिङ्गशेषः

[1] A1 omits. [2] यज्ञपूपः A1. [3] पट्टिशः A1, C1. [4] A1 adds 'गुग्गिल्लु'. [5] यद्वा B3. [6] °विन्दास्तु कुल्माषाः इति मु. ग्र. [7] लट्व इति मु. ग्र.

अथ नपुंसकशेषप्रकरणम्—

द्विहीनेऽन्यच्च खारण्यपर्णश्वभ्रहिमोदकम् ।
शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बलम् ॥ २२ ॥

(वि.) द्विहीनेऽन्यच्च—बलम् । अथ नपुंसकलिङ्गशेषः । अन्यत् पूर्वोक्तादन्यद् नपुंसकलिङ्गशेषानुशासनमारभ्यत इत्यर्थः । खशब्दमारभ्य ध्वान्तशब्दान्ताः सर्वे सपर्यायाः सविशेषाः शब्दाः विशेषविधिनाबाधिताः सन्तः नपुंसकलिङ्गे वर्तन्ते ॥ २२ ॥

(विव.) [1]तृतीयेऽन्यच्च—बलम् । यत् शब्दरूपं स्त्रीलिङ्गे पुंलिङ्गे वा वर्तते, ततोऽन्यत् सर्वं तृतीये नपुंसकलिङ्गे भवतीत्यर्थः । तदेव विवृणोति—वज्रविमानबिम्बमण्डलादिशब्दानां सत्यपि नपुंसकलिङ्गत्वे तेषां स्त्रीपुंसयोरपि वृत्तेः तदन्यत्वाभावेन वक्ष्यमाणप्रकरणविषयत्वं नास्ति । किं तु केवलनपुंसकलिङ्गानामेवेति बोद्धव्यम् । खादयः शब्दा ध्वान्तपर्यन्ता[2] एकोनपञ्चाशत् सपर्यायाः विशेषविधिबाधरहिताः सन्तो नपुंसकलिङ्गे वर्तन्ते । अत्र खशब्देन गगनमिन्द्रियं चेति

द्वितयमपि विवक्षितम् । अरण्यं विपिनम् । पर्णं पत्रम् । श्वभ्रमवटः । हिमं प्रालेयम् । उदकं पानीयम् । शीतमुष्णं चेति द्वावपि स्पर्शविशेषौ । धर्मिवचनत्वे तु तयोर्वाच्यलिङ्गत्वम् । मांसमामिषम् । रुधिरं रक्तम् । मुखं वदनम् । [अक्षि नयनम्] । द्रविणं धनम् । बलं सैन्यं शौर्यं च[3] ।। २२ ।।

[1] तृतीये इति विवरणाभिमतः पाठः. [2] ध्वान्तशब्दोऽधिकपाठे दृश्यते (श्लो. २३).
[3] खनति, खन्यते वा । 'अन्येभ्योऽपि . . .' इति डः [खम्]; अर्यते । 'अर्तेर्निच्च' (उ. ३. १. २) इत्यन्यः [अरण्यम्]; पर्णयति । पचाद्यच् [पर्णम्]; श्वभ्रयति । पचाद्यच् [श्वभ्रम्]; हन्ति । 'हन्तेर्हिच्च' (उ. १. १४७) [हिमम्]; उनत्ति, क्वुन् (उ. २. ३२) । नलोपः (६. ४. २४) [उदकम्]; श्यायते स्म । 'गत्यर्था . . .' (३. ४. ७२) । 'द्रवमूर्तिस्पर्शयोः' इति संप्रसारणम् [शीतम्]; ओषति । 'इण्सिञ् . . .' (उ. ३. २) इति नक् [उष्णम्]; मन्यते 'मनेर्दीर्घश्च' (उ. ३. ६४) इति सः [मांसम्]; रुणद्धि । 'इषिमदि . . .' (उ. १. ५१) इति किरच् [रुधिरम्]; खन्यते, खनति वा । 'डित्खनेर्मुट् चोदात्तः' (उ. ५. २०) इत्यजलौ [मुखम्]; अश्नुते । 'अशेर्नित्' (उ. ३. १५६) इति क्सिः [अक्षि]; द्रवत्यनेन । 'द्रुदक्षिभ्यामिनन्' (उ. २. ५०) [द्रविणम्]; बलति । पचाद्यच् [बलम्] इति भा. दी. (पृ. ५२७).

(पा.) द्विहीनेऽन्यच्च––वलम् । द्विहीने नपुंसके । [1]आबाह्लिकशब्दमधिकारः । अन्यदेवाह––खेति । खादीनि नपुंसकानि । खशब्देन इन्द्रियाकाशयोरेव ग्रहणम् । 'हृषीकं विषयीन्द्रियम्' (१, पृ. ६५); 'इन्द्रियेऽपि खम्' (२, पृ. २४७) । 'व्योम पुष्करमम्बरम् । . . . सुरवर्त्म खम्' (१, पृ. ५०) । 'अरण्यं विपिनं गहनं काननं वनम्' (१, पृ. २१५) । 'पत्रं पलाशं छदनं दलं पर्णम्' (१, पृ. २२३) । 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रम्' (१, पृ. १४६)। 'हिमं प्रालेयं तुहिनम्' (१, पृ. ६२)। 'उदकं जलं पयः' (१, पृ. १५६-७)। शीतोष्णशब्दौ गुणमात्रनिष्ठौ । देवदत्तस्य [2]शीतं वर्तते । गुणिनि गुणिलिङ्गावेव । शीतोऽपि चन्द्रो विरहिणामुष्ण एषः । मांसं पिशितम् । रुधिरं रक्तम् । मुखं वदनम् । अक्षि नेत्रम् । द्रविणं वित्तम् । [3]वलं सैन्यम् ।। २२ ।।

[1] श्लोकः ३२. [2] B3 adds उष्णं वा. [3] बलमिति A1.

फलहेमशुल्बलोहं सुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ।। २३ ।।

(वि.) फलहेम——अनुलेपनम् । फलादयः शब्दाः नपुंसकलिङ्गे वर्तन्ते ।। २३ ।।

विवृतौ अधिकः पाठः——

भयामृतशकृद्वस्त्रचापाभरणलाञ्छनम् ।
दार्वौषधमृधापत्यहृदयोदरकाकुदम् ।।
पत्तनाजिनशृङ्गार्मद्वारबर्होडुमानसम् ।
ध्वान्तं चाव्यक्तलिङ्गस्य भणितौ यत्प्रयुज्यते ।।

अव्यक्तलिङ्गस्य इयं स्त्री, अयं पुमान् इति यस्य व्यक्तिर्नास्ति, अस्य भणितौ उक्तौ यत्प्रयुज्यते तत् नपुंसकं ज्ञेयम् । अत्रोदाहारणम्——' स्त्री वा पुमान् वा किं तस्य जातं तद् ब्रूहि पण्डित ' इति.

(विव.) फलहेम——अनुलेपनम् । फलं चूतपनसादि । हेम हिरण्यम् । हलमिति पाठे हलं लाङ्गलम् । शुल्बं ताम्रम् । लोहशब्देनात्र[1] गोबलीवर्दन्यायेन सुवर्णताम्रव्यतिरिक्तमेव त्रपुसीसादिकं गृह्यते । सुखं शर्म । तद्विपरीतं दुःखम् । शुभं कल्याणम् । अशुभममङ्गलम् । जलपुष्पाणि [2]कमलोत्पलकुमुदादीनि । लवणं सैन्धवं सामुद्रादि । व्यञ्जनं तेमनं रसादिवस्तु, शाकादिकं च । अनुलेपनं चन्दनागरुकुङ्कुमादि ।। २३ ।।

[1] लोहशब्दः B_5, B_6.	[2] कुमुदकल्हारादीनि Tj_1, Tv. विवरणेऽधिकः पाठः——

भयामृतशकृद्वस्त्रचापाभरणलाञ्छनम् ।
दार्वौषधमृधापत्यहृदयोदरकाकुदम् ।।
पत्तनाजिरशृङ्गार्मद्वारबर्होडुमानसम् ।
ध्वान्तं चाव्यक्तलिङ्गस्य भणितौ यत्प्रयुज्यते ।।

भयं साध्वसम् । अमृतं पीयूषम् । शकृत् पुरीषम् । वस्त्रमंशुकम् । चापं धनुः । आभरणं भूषणम् । लाञ्छनं चिह्नम् । दारु काष्ठम् । औषधं भेषजम् । मृधं युद्धम् । अपत्यं तोकम् । हृदयं वक्षः । उदरं जठरः । काकुदं तालु । पत्तनं नगरम् । अजिरं चत्वरम् । शृङ्गं शिखरम् । अर्मशब्देन चक्षुर्गोलस्थितं दृष्टिवारकं रोगजं चर्मोच्यते । द्वारं गोपुरम् । बर्हं पिञ्छम् । उडु नक्षत्रम् । मानसं मनः । ध्वान्तं तिमिरम् । अत्र चकारस्य अनुक्तसमुच्चयपरत्वेन गृहसुरतरामठकाञ्चिकादीनां ग्रहणम् । अव्यक्तेति । गर्भसत्त्वादिना निमित्तेन अव्यक्तस्य लिङ्गस्यार्थस्य भणितौ अभिधाने यत् पदं प्रयुज्यते तत् नपुंसकलिङ्गे वर्तते इत्यधिकृतेन संबन्धः । यथा——स्त्री वा पुमान् वा किं तस्य जातं तत्र हि तत्त्वतः इति । तथा ' रे रे मालिक देव शाधि ननु किं त्वत्कूटबन्धे स्रजः ' इति ।।

फलति । पचाद्यच् । [फलम्]; हिनोति । 'सर्वधातुभ्यो मनिन्'(उ. ४. १४५) [हेम]; शलति । 'उल्बादयश्च' (उ. ४. ९५) इति साधुः [शुल्बम्]; लोहयति । पचाद्यच् [लोहम्]; सुखयति । दुःखयति । पचाद्यच् [सुखम्, दुःखम्]; शोभते । 'इगुपध . . .' इति कः [शुभम्]; लुनाति । नन्द्यादिल्युः (३. १. १३४) । 'लवणाल्लुक् (४. ४. २४) इति निर्देशाण्णत्वम् [लवणम्]; व्यज्यतेऽनेन । 'करणाधि . . .' इति ल्युट् [व्यञ्जनम्]; अनुलिप्यते, अनेन वा । कर्मणि,करणे वा ल्युट् [अनुलेपनम्] इति भा. दी. (पृ. ५२७-८).

(पा.) फलहेम—अनुलेपनम् । फलशब्दः पर्यायविशेषयोरेव वाचकः । फलं, सस्यं, पिप्पलं, पनसं, [1]चूतं, कपित्थं, नारङ्गम् । हेम काञ्चनम् । शुल्बं ताम्रम् । लोहम् अयः । सुखदुःखशब्दौ धर्मवचनौ । देवदत्तस्य सुखमभूत् मा[2] भूत् दुःखम् । धर्मिणि धर्मिलिङ्गावेव । सुखो वसन्तसमयः । दुःखो हेमन्तसमयः । शुभं मङ्गलम् । अशुभमरिष्टम् । जलपुष्पाणि कमलकुवलयादीनि । लवणव्यञ्जनानुलेपनानि स्वरूपविशेषाणि । सैन्धवं सामुद्रम् । व्यञ्जनं तेमनं, क्षीरं दधि घृतम् । अनलेपनं कुङ्कुमचन्दनादि । ध्वान्तं तिमिरम् । [3]अव्यक्तलिङ्गस्य फणितौ यत्[4] प्रयुज्यते तत्पदं नपुंसकम् । किमस्या गर्भे संजातम् । किं करोषि भद्रक ।। २३ ।।

[1] A1 omits. [2] दुःखमभूत् A1. [3] अव्यक्तेत्यादि पारिजातेऽधिकः पाठः. [4] A1 adds अव्यक्तलिङ्गार्थस्योक्तौ यत् पदं प्रयुज्यते.

कोटयाः शतादिः संख्यान्या वा लक्षा नियुतं च तत् ।
द्व्यच्कमसिसुसन्नन्तं यदनान्तमकर्तरि ।। २४ ।।

(वि.) कोटयाः शतादिः—अकर्तरि । कोटया अन्या शतसहस्रादिसंख्या नपुंसके वर्तते । लक्षशब्दो विकल्पेन नपुंसकलिङ्गो भवति । [1]नियुतपदं च लक्षशब्दार्थम् । द्वौ अचौ यस्य द्व्यच्कम्[2] । [3]द्व्यच्कमसन्तमिसन्तमुसन्तं, द्व्यच्कमन्नन्तं च नपुंसकलिङ्गं भवति । असन्तं यथा— तेज इत्यादि । इसन्तं यथा—हविरित्यादि । उसन्तं यथा—वपुरित्यादि । अन्नन्तं यथा—नामेत्यादि । यदनान्तमकर्तरि । अकर्तरि वर्तमानमनप्रत्ययान्तं यच्छब्दरूपं तन्नपुंसकं[4] ज्ञेयम् । अत्रोदाहरणानि— साध्यतेऽनेनेति साधनम् । लवनम् । छेदनमित्यादि ।। २४ ।।

[1] प्रयुतपदम् K4. [2] K4 adds द्विस्वरमित्यर्थः. [3] द्व्यच्कमिसन्तम्, द्व्यच्कमुसन्तं K3, K4. [4] °नपुंसकलिङ्गं J2, K3.

(विव.) कोटयाः शतादिसंख्यान्या । कोटिपदव्यतिरिक्तं शतं सहस्र-मित्यादिसंख्यावाचकं पदं नपुंसकलिङ्गं भवतीत्यर्थः । कोटचा इति रूपनिर्देशात् कोटिशब्दस्य स्त्रीलिङ्गत्वम् । अत्र शतादिग्रहणात् ततोऽर्वाचीनानाम् एकादि-विंशतिपर्यन्तानां वाच्यलिङ्गत्वम् । विंशत्यादीनां नवतिपर्यन्तानां स्त्रीलिङ्गत्वं च प्रागुक्तमवगन्तव्यम् (१, पृ. ६०२-३) ।। वा लक्षा नियुतं च तत् । लक्षशब्दः शतादित्वेऽपि रूपभेदाद् विकल्पेन स्त्रीलिङ्गः । यथा——

‘ कियती पञ्चसहस्री कियती लक्षाधिकोटिरपि कियती ।
औदार्योन्नतमनसां रत्नवती वसुमती कियती ।। ’

इति । स्त्रीत्वाभावपक्षे प्रकरणान्नपुंसकत्वम् । तदेव लक्षं नियुतमित्युच्यते । अत्रादित्यपुराणम्——

‘ एकं दश शतं चैव सहस्रं चेति सत्तमाः ।
यथोत्तरं दशगुणं सहस्राणि दशायुतम् ।।
तथा शतसहस्राणि प्रोच्यते नियुतं बुधैः ।
तथा शतसहस्राणि दशप्रयुतमुच्यते ।।
शतं शतसहस्राणि कोटिरित्यभिधीयते ।। ’

इति । द्व्यच्कमसिसुसन्नन्तम् । द्वावचौ स्वराख्यौ वर्णौ यस्य तद् द्व्यच्कम् । अन्त-शब्दः प्रत्येकमभिसंबध्यते । अस्, इस्, उस्, अन् इत्येवमन्तं शब्दरूपं द्व्यच्कं चेद् नपुंसकम् । असन्तं यथा——यशः, पयः, तेजः इत्यादि । बर्हिः, सर्पिः, रोचिः इत्यादिक-मिसन्तम् । उसन्तं यथा——यजुः, वपुः, अरुः, परुः इत्यादि । अन्नन्तं यथा——साम, लोम, वर्म, चर्म इत्यादि । द्व्यच्कमिति किम् ? उशना, पुरूरवाः, मातरिश्वा इत्यत्र मा भूत् । वेधाः, बर्हिः, अयं धनुः इत्यादौ विशेषविधानाद् अन्यथात्वं विज्ञेयम् ।।

यदनान्तमकर्तरि । अनशब्देन ‘ युवोरनाकौ ’ (७. १. १) इति सूत्र-प्राप्तमादिष्टरूपं विवक्षितम् । तेन घनः, विघनः, अभिजनः, संतानः, संमान इत्या-दावप्रसङ्गः । अकर्तरि वर्तमाने अन इत्यन्तशब्दरूपं नपुंसकलिङ्गं भवति । अत्र कर्तृपदं कारकमात्रोपलक्षकं सर्वेषामपि कारकाणाम्

' स्वव्यापारेषु कर्तृत्वं सर्वेषामुपजायते ।
विक्लृद्यन्ति ज्वलन्तीति बिभर्तीति च दर्शनात् ।। '

इति । विक्लृद्यन्ति तण्डुला इत्यत्र पचनरूपव्यापारे करणभूतानां काष्ठानां कर्तृत्वम् । ज्वलन्ति काष्ठानीत्यत्र ज्वलनाख्यव्यापारे करणभूतानां काष्ठानां कर्तृत्वम् । बिभर्ति स्थालीत्यत्र तण्डुलधारणरूपव्यापारेऽधिकरणभूतस्थाल्याः कर्तृत्वम् । ततश्च कारकव्यतिरिक्ते भावमात्रे विहितमनान्तं नपुंसकं भवतीत्युक्तम् । यथा—हरणम्, गमनम्, भोजनम् इत्यादि । अकारक इति किम्? नन्दयतीति नन्दनः, दहनः इत्यादि । अत्र ' नन्दिग्रहि . . . . ' (३. १. १३४) इत्यादिना कर्तरि ल्युः । तथा मुखसहितया नासिकया उच्यत इति मुखनासिकावचनः । राजभिर्भुज्यन्त इति राजभोजिनः शालयः । अत्र ' कृत्यल्युटो बहुलम् ' (३. ३. ११३) इति कर्मणि ल्युट् । तथा इध्मप्रव्रश्चनः कुठारः, पलाशशातन आयसनखः इति । अत्र ' करणाधिकरणयोश्च ' (३. ३. ११७) इति करणे ल्युट् । तथा यत्र मांसं पच्यते सा [1]मांसपचनी । अत्राधिकरणे ल्युट् । एवं निष्प्रवाणी तन्तुवायशलाका, प्रसाधनी कङ्कतिका, पृषदाज्यधानी इत्यादीनां कारकार्थानामनंपुसकत्वमवगन्तव्यम् । तस्य वाक्यस्य भाववचनमनान्तं नपुंसकमित्यत्रैव [2]तात्पर्यात्, अन्यत्र चौदासीन्याद् भावार्थव्यतिरिक्तवृत्तेरनान्तस्यापि क्वचिन्नपुंसकलिङ्गत्वं न निषिध्यते । यथा— साध्यतेऽनेनेति साधनम्, गजतुरगाद्युपकरणम् । मेहनं शेफः । यानं तुरगशकटबलीवर्दादि । व्यञ्जनं श्मश्र्वादि । करणं साधकतमम् (१. ४. ४२) । करणं हेतुः । पीयत इति पानम् । प्रह्रियतेऽनेनेति प्रहरणम् आयुधम् । आस्यत उपविश्यतेऽत्रेति आसनं पीठम् । शयनं मञ्चः इत्यादि तत्तत्प्रस्तावे लिङ्गानुशासनं कृतमेव । यत्र तु न कृतः तत्र शिष्टप्रयोगान्निर्णय इति ग्रन्थान्ते वक्ष्यति (श्लो. ४६)[3] ।। २४ ।।

[1] मांस्पचनी Gm3. [2] तात्पर्यावधारणात् Tj1, Tv. [3] कोटयते । ' अच इः ' (उ. ४. १३९) [कोटिः]; दश दशतः परिमाणमस्य संघस्य । ' पङ्क्ति . . . . ' (५. १. ५९) इति साधुः [शतम्]; लक्ष्यते । ' गुरोश्च हलः ' इत्यः [लक्षा]; नियूयते स्म । क्तः [नियुतम्]. इतिभा. दी.

(पा.) <u>कोट्याः शतादिसंख्यान्या</u> । कोटिसंख्याया अन्या शतादिसंख्या नपुंसकम् । शतं सहस्रमयुतं लक्षम् । <u>वा लक्षा</u> । पक्षे लक्षशब्दः स्त्रीलिङ्गश्च स्यात् ।

[1]नियुतं च स्यात् । नियुतमित्यप्युच्यते[2] ।। द्व्यच्कमसिसुसन्नन्तम् । द्व्यच्काः असन्ता इसन्ता उसन्ता अन्नन्ताश्च नपुंसकाः । असन्तस्य यथा— वचः, तपः, यशः, वयः, विवः । ' विवांसि भान्वोरिव बिभ्रतोस्तयोः ' इति । इसन्तस्य यथा— हविः, ज्योतिः, छर्धिः, सर्पिः, । उसन्तस्य यथा—अरुः,परुः, धनुः, वपुः । अन्नन्तस्य यथा —दाम, धाम, नाम, व्योम, लोम । द्व्यच्करणाद् अन्यत्र न भवति । सुगन्धयः सुमनसः, चन्द्रमाः । ' प्रक्षिप्योदर्चिषं कक्षे ' (शिशु. २. ४२) । उदर्चिर्नाम वह्नि-र्मुखः[3] । संचक्ष्युषो हि सभामण्डनम् । संचक्ष्युषो विद्वांसः । सुधर्माणमतिशेते भूसुरसभा । सुधर्मा देवसभा ।। यदनान्तमकर्तरि । [4]अकर्त्रर्थेऽनान्तो यः शब्दोऽस्ति स नपुंसकः । साध्यतेऽनेनेति साधनम् । अधिक्रियते ऽस्मिन्नित्यधिकरणम् । पाकः पचनम्। [5]त्यागः त्यजनम् । क्वचिन्न भवति । राजभोजनाः शालयः । गोदोहनी स्थाली ।। २४ ।।

[1] B3, C1 add पक्षे लक्षा. [2] उक्तम् A1. [3] वह्निः B3. [4] अकर्त्रर्थकानान्तशब्दः B3. [5] B3 omits the sentence.

त्रान्तं सलोपधं शिष्टं रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ।। २५ ।।

(वि.) त्रान्तं—संख्ययान्वितम् । लकरोपधेन सहितं [1]त्रान्तं शब्दरूपं शिष्टं पूर्वोक्तात् त्रान्तात् लकारोपधाच्च व्यतिरिक्तं नपुंसकलिङ्गं भवति । उदाहरणानि । त्रान्तं यथा—पात्रम्, मित्रम् , पत्रम् इत्यादि । लकारोपधानि यथा—फलम्, जलम्, कुलमित्यादि[2] ।। [3]रात्रान्तं संख्यापूर्वकं शब्दरूपं नपुंसकलिङ्गं भवति । उदाहरणानि—त्रिरात्रम्, पञ्चरात्रम्, गणरात्रम् इत्यादि । पात्राद्य-दन्तैः—अनुसारतः । पात्रादिभिरदन्तैरेकार्थैः [4]समाहारो द्विगुसमासो लक्ष्यानुसारतः प्रयोगानुसारेण[5] नपुंसकलिङ्गो भवति । उदाहरणानि—त्रियुगम्, त्रिपात्रम्, त्रिभुवनमित्यादि ।। २५ ।।

[1] त्रान्तशब्दान्तं K6. [2] इत्यादीनि K4. [3] J2, K4 add रात्रं प्राक्संख्ययान्वितम् [4] K2 omits. [5] °अनुसारतः K3, K4.

(विव.) त्रान्तं सलोपधं शिष्टम् । त्र इति सरेफमसंयुक्तमक्षरम् अन्ते यस्येति तत् त्रान्तम् । सकारो लकारो वा उपधा यस्य तत् सलोपधम् । तत् त्रिविधं

नपुंसकलिङ्गं भवति । त्रान्तं यथा—पत्रम्, पतत्रम्, पात्रम्, गात्रम्, गोत्रम्, मित्रम्, कलत्रम्, चित्रम्, तोत्रम् इत्यादि । सकारोपधं यथा—बिसम्, बुसम्, साध्वसम्, साहसम्, कीकसम्, महानसम्, श्वःश्रेयसम्, ब्रह्मवर्चसम्, निःश्रेयसम् इत्यादि । लकारोपधं यथा—आवालम्, आलवालम्, कमलम्, कूलम्, कौतूहलम्, पलम्, पललम्, पातालम्, फलम्, बलम्, लाङ्गलम्, लाङ्गूलम् इत्यादि । ननु कथं तर्हि पुत्रः, मन्त्रः, मित्रः सूर्यः, शात्रवोऽमित्रः, मात्रा, गोत्रा, गजस्य जङ्घादेशो गात्रा; तथा घासः, कासः, प्रासः, व्यासः, मासः, रसः, हसः; तथा तालः, कालः, कोलः, फालः, सालः, हालः, वेला, शिला, शाला, कला, माला, हेला, डोला, लीला, फेला, खला, बला, बाला, जाला, इत्यादीनां लिङ्गान्तरत्वमित्यत आह—शिष्टमिति । स्त्रीलिङ्गत्वेन पुंलिङ्गत्वेन वा तत्र तत्रानुशिष्टाद् यत् शिष्टम् अवशिष्टम् अन्यदेव त्रान्तं सलकारोपधं च तद् नपुंसकमित्यर्थः ॥

रात्रं प्राक्संख्ययान्वितम् । संख्यावाचकपदपूर्वकं रात्रान्तं नपुंसकम्[1] । यथा—तिसृणां रात्रीणां समाहारः त्रिरात्रम् । पञ्चरात्रम् । गणरात्रमित्यादि । 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' (५. ४. ८७) इति चकारेण समासान्तोऽच्प्रत्ययः समाहार इत्येव । द्वयोः रात्र्योः समाहारः द्विरात्रम् । प्राक्संख्ययान्वितमिति किम्? अहोरात्रः । अतिरात्रः इत्यादि । रात्रान्ताः प्राक्संख्याका इत्यनेन संख्यापूर्वस्य पुंस्त्वे निषिद्धे किंलिङ्गत्वमिति जिज्ञासायामिदमुच्यते । इदं च नपुंसकत्वं कात्यायनमतानुसारेणेति द्रष्टव्यम् । पाणिनीयाचार्यमते तु—'रात्राह्नाहाः पुंसि' (२. ४. २९) इत्यत्रोपपदविशेषानुपपादनात् प्रत्युत वृत्तिकारेण (काशिका १, पृ. १३३) द्विरात्रः त्रिरात्रः इति संख्यापूर्वस्यैवोदाहृतत्वाच्च पुंस्त्वमेवाभिप्रेतमिति गम्यते । वक्ष्यमाणेन समनन्तरवचनेनैव अस्यार्थस्य सिद्धत्वेऽपि पुंस्त्वनपुंसकत्वलक्षणमतभेदसूचनार्थमत्राप्याभिधानमित्यवगन्तव्यम् ॥

पात्राद्यदन्तैः—अनुसारतः । पूर्वम् 'अदन्तैर्द्विगुरेकार्थः' (पृ. ६५६, श्लो. ३) इति प्राप्तस्य स्त्रीत्वस्य, 'न स पात्रयुगादिभिः' (श्लो. ३) इति प्रतिषेधः कृतः । तर्हि किं लिङ्गं भवतीति जिज्ञासायामिदमारभ्यते । पात्रादिभिरकारान्तैः उत्तरपदभूतैः समाहारार्थे संख्याशब्दानां यो द्विगुसमासः स प्रयोगानुसारेण नपुंसकलिङ्गो भवति । यथा—त्रिपात्रम्, चतुर्युगम्, त्रिभुवनम्, द्विचन्द्रम् इत्यादि । तथा—पञ्चानां गवां समाहारः पञ्चगवम्, षड्गवम् इत्यादि । अत्र 'गोरतद्धितलुकि' (५. ४. ९२) इति समासान्तः । अत्र केचिदाहुः—प्रथमतः समासान्तविधिः, ततः समास इति तत्र

कृता पदयोजना । यत्तु मतम्––समासोत्तरकालं समासान्तविधिः इति । तत्र तु अदन्तैः अकारान्त्यावयवत्वेनोपलिक्षतैर्यो द्विगुरेकार्थः इति योजनीयम् । पात्रादिग्रहणं किम्? पञ्चपूली, दशपूली इति । [2]अदन्तैरिति किम्? त्रिखट्वम्, त्रिखट्वी इत्यत्र 'वा टाबन्त' (श्लो. ४१) इति विकल्पो न स्यात् । एकार्थ इति किम्? पञ्चकपालः पुरोडाशः इत्यत्र तद्धितार्थविषयद्विगुसमासे नपुंसकत्वं मा भूत् । द्विगुरिति किम्? लक्ष्यानुसारत इत्यनेन पात्रादेराकृतिगणत्वं दर्शितम् । अत एव 'पात्रादिराकृतिगणः' इति कैयटः ।। २५ ।।

[1] नपुंसकलिङ्गं भवति Tv. [2] अकारैः Tv.

(पा.) त्रान्तं सलोपधं शिष्टम् । अवशिष्टानि त्रान्तानि लोपधानि च नपुंसकानि । त्रान्तं यथा––पात्रम्, क्षेत्रम्, दात्रम्, गात्रम्, कलत्रम्, खनित्रम्, भटित्रम्, धवित्रम् । लोपधानि यथा––कुलम्, बिलम्, शिलम्, सिलम् । लूनकेदारशेषं तु शिलसिलमिति स्मृतम् । मूलम्, जालम्, कूलम्, मङ्गलम्, लाङ्गलम्, जाङ्गलम्, त्र्यङ्गुलम्[1], चतुरङ्गुलम् । शिष्टग्रहणादत्र न भवति––यात्रा, मात्रा, होत्रा, वरत्रा, शाला, डोला, माला, हेला, उलंकलः[2] 'चलिचिम', कमली मञ्जूषा, काकलः 'काकितमु', तैतिलः 'मंदगि' ।। रात्रं प्राक्संख्ययान्वितम् संख्यापूर्वको रात्रिशब्दो नपुंसकः । त्रिरात्रम्, गणरात्रम् । पात्राद्यदन्तैः––अनुसारतः । पात्राद्यदन्तैः कृतः समाहारद्विगुः [3]शिष्टप्रयोगगम्यः[4] ।। २५ ।।

[1] द्व्यङ्गुलम् B3. [2] A1 adds शांकुला 'कोडुवलि' [3] विशिष्ट° B3, C1. [4] C1 adds नपुंसकं स्यात् । पञ्चपात्रम्, त्रिभुवनम्.

द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात्परः ।
षष्ठ्याश्छाया बहूनां चेद्विच्छायं संहतौ सभा ।। २६ ।।

(वि.) द्वन्द्वैकत्वाव्ययीभावौ । द्वन्द्वैकत्वं समाहारे द्वन्द्वसमासः, अव्ययीभावसमासश्च[1] नपुंसकलिङ्गौ भवतः । द्वन्द्वैकत्वं यथा––पाणिपादम्, समित्कुशम् (कु. सं. ५. ३३) इत्यादि । अव्ययीभावसमासो यथा––यथाशक्ति, यावदमित्रमित्यादि ।। पथः संख्याव्ययात्परः । संख्यावाचिपदादव्ययाच्च परः समासान्तः [2]पथशब्दो विशेषविधिना अबाधितो नपुंसकलिङ्गो भवति । संख्यापरो यथा––

त्रिपथम्, चतुष्पथमित्यादि । अव्ययात्परो यथा—उत्पथम्, [3]सत्पथमित्यादि । षष्ठ्याश्छाया—विच्छायम् । षष्ठ्याः षष्ठीतत्पुरुषात् परो यः छायाशब्दो बहूनां चेद् बहूनां छाया चेत् नपुंसकलिङ्गो भवति । अत्रोदाहरणे[4]—इक्षूणां छाया इक्षुच्छायम् (रघु. ४. २०) । वीनां पक्षिणां छाया विच्छायम् ।। संहतौ सभा । अत्र सभाशब्दः समूहार्थः, शालार्थश्च[5] । समूहार्थे वर्तमानः सभाशब्दान्तः षष्ठीतत्पुरुषो नपुंसकलिङ्गो भवति । अत्रोदाहरणम्—स्त्रीणां सभा स्त्रीसभम् । स्त्रीसमूह इत्यर्थः ।। २६ ।।

[1] K4 omits समास. [2] पथिन्शब्दः K4. [3] K5 adds दुष्पथम्. [4] K3, K4 add दर्शिते. [5] J2 omits.

(विव.) द्वन्द्वैकत्वाव्ययीभावौ । द्वन्द्वस्यैकत्वं समाहाररूपोऽर्थः । अर्थे लिङ्गविध्यसंभवात् तद्वाचिनो नपुंसकत्वविधिरित्यवसेयम् । ततश्च समाहारार्थद्वन्द्वसमासोऽव्ययीभावश्च नपुंसकलिङ्गौ स्यातामित्यर्थः । अश्वश्च बलीवर्दश्च अश्वबलीवर्दम् । धवखदिरपलाशम् । अत्र समाहारः [1]समासार्थः । तथा—‘द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्’ (२. ४. २.) इति समाहारार्थे द्वन्द्वः । पाणिपादम् । शिरोग्रीवम् । मार्दङ्गिकपाणविकम् । गजाश्वम् । गजारोहम् । अश्वारोहमित्यादि समासार्थैकत्वाद्,[2] एकवचनम् । ‘स नपुंसकम्’ (२. ४. १७) ‘अव्ययीभावश्च’ (२. ४. १८) इति च सूत्रेण अव्ययीभावसमासस्य[3] समाहारस्यापि नपुंसकत्वम् । यथा—अधिपीठम् इति । विभक्त्यर्थेऽव्ययीभावः (२. १. ६) । अन्वहम् इति यथार्थे । शाकस्य मात्रा शाकप्रति इति ‘सुप्रतिना मात्रार्थे’ (२. १. ९) । उपकुम्भमिति समीपार्थे निर्मक्षिकमित्यभावे । ‘ह्रस्वो नपुंसके प्रातिपदिकस्य’ (१. २. ४७) इति ह्रस्वत्वम् । अव्ययीभावस्य लिङ्गविधानं शब्दशास्त्रे कृतम् । निघण्टुकारैस्तु लिङ्गविधानं निर्मक्षिकं मुखमित्यादौ अव्ययीभावविशेषणानां नपुंसकलिङ्गानामेव साधुत्वमिति ज्ञापयितुमित्यवगन्तव्यम् ।।

पथः संख्याव्ययात्परः । संख्यावाचिनः शब्दा अव्ययाश्च, कृतसमासान्तः पथशब्दो नपुंसकलिङ्गः । यथा—त्रयाणां पन्थाः त्रिपथम् । द्वयोः पन्थाः द्विपथम् । ‘पथः संख्याव्ययादेः क्लीबतेष्यते’ (वा. २. ४. १८) इत्यत्र पदमञ्जरीकारः शिवभक्तो हरदत्ताचार्यः—‘त्रिपथमिति षष्ठीसमासोऽयम्, द्विगौ तु पात्रादित्वात् सिद्धम् इति (पदम. पृ. ६१) । अव्ययात् परो यथा—उत्पथम् ।

प्रपथम्। दुष्पथमित्यादि। अत्र 'कुगतिप्रादयः' (२. २. १८) इति समासः। न त्वव्ययपरत्वे सत्येव विपथकापथशब्दयोः भूवर्गोक्तं पुंस्त्वम् (१, पृ. १६३) अनेन विरुध्यते। न च वाच्यम्—शृङ्गग्राहिकया भूवर्गोक्तं शब्दद्वयमपहाय[4] अयं नपुंसकविधिः उत्पथादिष्ववतिष्ठत इति।

'दुरध्वस्तु कदध्वा स्याद् व्यध्वौ विपथकापथौ।
न स्त्रियौ स्ताम्॥'

इति प्रतापमार्तण्डे विपथकापथशब्दयोः नपुंसकलिङ्गत्वमप्यङ्गीकृतत्वात्। अयमत्र समाधिः—शब्दद्वयस्यापि प्राक् पुंलिङ्गत्वमुक्तम् (१, पृ. १६३)। इह तु क्लीबत्वमुच्यत इत्युभयलिङ्गत्वं विपथकापथयोः अमरसिंहनाथेनाभिप्रेतमिति। 'पथः संख्याव्ययादेः क्लीबतेष्यते' (वा. २. ४. १८) इति लिङ्गविधायकसूत्रविरोधस्तु शेषकारेण परिहृतः—

'इह द्वैधं जयादित्यः पथः संख्याव्ययात्परम्।
नपुंसकमुवाचामुं पुमांसं वामनोऽब्रवीत्॥'

इति। अस्यार्थः—कृतसमासान्तोऽकारान्तः पथशब्दः संख्यावाचकाद् अव्ययाच्च परश्चेत् तं पथशब्दं जयादित्यो नपुंसकमाह। तथा च तस्य ग्रन्थः—'पथः संख्याव्ययादेरिति नपुंसकमिति प्रकृतेन संबन्धः' इति। वामनस्तु अमुं पथशब्दं पुमांसमाह। तथा च तस्य ग्रन्थः—'संख्याव्ययात्पूर्वकश्च पथः इति पुंसि प्रकृतेनान्वयः' इति। जयादित्यमतेन नपुंसकत्वमुक्तम्। भूवर्गे तु वामनमतेन पुंलिङ्गत्वमिति न पूर्वोत्तरविरोध[5] इति। एवं वामनमतेन पुंस्त्वं प्रागुक्तम् (१, पृ. १६३)। इह तु जयादित्यमतेन क्लीबत्वमुक्तमिति ज्ञेयम्[6]। सुभूतिचन्द्रस्तु प्रकारान्तरेण विरोधं परिजहार। 'पादः[7] पथश्च मार्गश्च' इति त्रिकाण्डशेषे दर्शनात् (पृ. ६, श्लो. १६६) पथिपर्यायोऽदन्तशब्दः पुंलिङ्गः पथशब्दोऽप्यस्ति। तथा च 'कुपथं तं विजानीयात्' इति महाभारतप्रयोगश्च (१३. ६३७. ६)। तथा च विरुद्धः पथो विपथः इति पथशब्देनैव विग्रहे पुंलिङ्गत्वमेव। यथा पथिन्शब्देनैव विगृह्य समासान्तविधिः तथा 'पथः संख्याव्ययादेः' इति नपुंसकत्वमिति। संख्याव्ययादेरिति किम्? राजपथः। जनपथः। घण्टापथः[8]। कृतसमासान्तग्रहणं किम्? अपन्थाः, सुपन्थाः इति॥

षष्ठ्याश्छाया—विच्छायम् । अत्र षष्ठ्या इति पदं ' कन्थोशीनरनामसु ' (श्लो. २८) इत्येतदन्तमधिक्रियते । षष्ठीविभक्त्यन्तपूर्वपदात् परो यः छाया-शब्दः तदन्तः तत्पुरुषसमासो नपुंसकलिङ्गः सा छाया बहूनां संबन्धिनी [9]भवति चेत् । ' छाया बाहुल्ये ' इति (२. ४. २२) सूत्रमूलमेतत् । अत्र स्वयमेवोदाहरति । वीनां पक्षिणां छाया विच्छायमिति । एवं शलभच्छायमित्यादि । ' अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी ' इति कालिदासः (रघु. १२. ५०) । कुड्यस्य छाया इत्यादौ छायाया एकमात्रसंबन्धित्वे ' विभाषा सेनासुराच्छायाशालानिशानाम् ' (२. ४. २५) इति विकल्पेन स्त्रीलिङ्गत्वमपि स्यात् । तन्निवृत्त्यर्थं बहूनामित्युक्तम् । षष्ठ्या इति किम्? शुद्धा चासौ छाया च शुद्धच्छाया । बह्वर्थवचनषष्ठ्यन्तपूर्वपद-त्वेऽपि उत्तरपदार्थविवक्षायां नपुंसकत्वं नास्तीति सुभूतिचन्द्रः ।। संहतौ सभा । सभाशब्दः शालावचनः, समूहवचनश्च । तत्र समूहवाची सभाशब्दान्तः षष्ठी-तत्पुरुषसमासो नपुंसकलिङ्गः । यथा—स्त्रीणां सभा स्त्रीसभम्, स्त्रीसंघात इत्यर्थः । ' अशाला च ' (२. ४. २४) इति सूत्रेण नपुंसकत्वम् । संहताविति किम्? अनाथसभा, अनाथशालेत्यर्थः । षष्ठ्या इति किम्? शुद्धा चासौ सभा च शुद्धसभा[10] ।। २६ ।।

[1] समासः Tj1, Tj2. [2] समासार्थस्य Tv. [3] B5, B6 omit °समास. [4] परिहाय Gm1, Gm3. [5] पूर्वापरविरोधः Tv. [6] ध्येयम् Tj2. [7] वाटः पथश्च माथश्च इति मु. ग्र. [8] Tv adds वणिक्पथः. [9] Tv omits भवति. [10] संहन्यते । क्तिन् [संहतिः]; सह भान्त्यत्र । ' अन्येभ्योऽपि दृश्यते ' (वा. ३. ३. १०१) इति डः [सभा] इति भा. दी. (पृ.१३५).

(पा.) द्वन्द्वैकत्वाव्ययीभावौ । समाहारद्वन्द्वश्च अव्ययीभावश्च नपुंसकौ । यथा—पाणिपादम्, तिष्ठद्गु ।। पथः संख्याव्ययात्परः । [1]संख्याया अव्ययेभ्यश्च परः पथशब्दो नपुंसकः । यथा—त्रिपथम् । उत्पथम् ।। षष्ठ्याश्छाया—विच्छायम् । [2]बहुसंबन्धि स्याच्चेत् षष्ठीतत्पुरुषात्[3] परः छायाशब्दो नपुंसकः । विच्छाय-मिति तदुदाहरणम् । वीनां [2]पक्षिणां छाया विच्छायम् । अबहुसंबन्धि चेन्न भवति । वृक्षस्य छाया वृक्षच्छाया[4] इति ।। संहतौ सभा । [5]संहतिरर्थश्चेत् षष्ठ्याः परः सभाशब्दो नपुंसकः[6] । दासीनां सभा दासीसभम्[7] । शालार्थे न भवति । दास्याः सभा दासीसभा । दासीशालेत्यर्थः ।। २६ ।।

[1] संख्याव्ययेभ्यः A1. [2] B3 omits. [3] षष्ठ्याः A1 [4] A1 adds 'इक्षुच्छायानिषादिन्य' इति (रघु. ४. २०)। [5] संहतिरित्यर्थः B3, C1. [6] A1 adds दासीसभमिति तदुदाहरणम् [7] B3 adds संहतिरित्यर्थः.

शालार्थापि परा राजामनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ।। २७ ।।

(वि.) शालार्थापि–अराजकात् । अराजकाद् राजशब्दवर्जिताद् राजामनुष्यार्थाद् राजपर्यायाद् अमनुष्याद् रक्षःपिशाचपर्यायाच्च परा शालार्था सभा, अपिशब्दात् समूहार्थापि षष्ठीतत्पुरुषे सति नपुंसकलिङ्गे वर्तते । नृपाणां सभा संहतिः शाला वा नृपसभम् । अत्रोदाहरणानि स्वयमेव दर्शयति—दासीसभम्— इमा दिशः । दासीसभमिति 'संहतौ सभा' (श्लो. २६) इत्यस्योदाहरणम् । नृपसभमिति राजपर्यायस्योदाहरणम् । रक्षःसभमिति अमनुष्यार्थस्योदाहरणम् ।। इमा दिश इति इमान्युदाहरणानीत्यर्थः ।। २७ ।।

(विव.) शालार्थापि—अराजकात् । अराजकाद् राजशब्दवर्जिताद् राजार्थाद् राजपर्यायाद् अमनुष्यार्थाद् रक्षःपिशाचपर्यायाच्च परा सभा शालार्था, अपिशब्दाद् अशालार्थापि, तदन्तः षष्ठीतत्पुरुषसमासो नपुंसकलिङ्गो भवति । 'सभा राजामनुष्यपूर्वा' (२. ४. २३) इति सूत्रेण नपुंसकत्वम् । 'अत्रामनुष्यशब्दो [1]रक्षःपिशाचेषु रूढः' इति काशिका (१, पृ. १३२) । अत्र वेदभाष्यकर्ता हरदत्ताचार्यः—'तत्र पूर्वसूत्रेण राजामनुष्यपूर्वत्वे शालावचनस्यापि भविष्यति; 'अशाला च' इत्यत्र तु अशालावचनत्वे राजामनुष्यपूर्वत्वाभावेऽपीति[2]' (पदम. पृ. ६३) । अत्रोदाहरणानि स्वयमेव दर्शयति—दासीसभं—इमा दिशः । अत्र दासीसभमित्येतत् 'संहतौ सभा' (श्लो. २६) इत्यस्योदाहरणम् । नृपसभमित्येतद् राजव्यतिरिक्तराजपर्यायोत्तरस्य । रक्षःसभमित्येतदमनुष्योत्तरस्य । 'अशाला च' (२. ४. २४) इति निषेधाद् दासीसभं दासीसमूहमित्यर्थः । नृपाणां संहतिः शाला च नृपसभम् । राजपूर्वस्य तु 'नाभी राजसभापि च' इति स्त्रीलिङ्गत्वमुक्तम् (पृ. ६७८, श्लो. ६) । तस्माद् अराजकादित्युक्तम् । अत्र राजशब्देन राजपर्यायाणामेव ग्रहणम् । न तु [3]तद्विशेषाणाम् । तेन ब्रह्मगुप्तसभा, हरिश्चन्द्रसभा इत्यादौ स्त्रीलिङ्गत्वमेव । अमनुष्याणां रक्षसां संहतिः शाला वा रक्षःसभम् ।

इमा दिशः उदाहरणप्रकारा इत्यर्थः । तत उदाहरणान्तराण्यपि उन्नेयानीति भावः । यथा—स्त्रीणां समूहः स्त्रीसभम्, ईश्वरसभम् , राक्षससभम्, पिशाचसभमित्यादि । षष्ठ्या इति किम्? दासीप्रधाना सभा दासीसभा इति[4] ।। २७ ।।

[1] रूढिरूपेण रक्षःपिशाचादिष्वेव वर्तते इति मु. ग्र. [2] Gm1, Gm3 add भवति. [3] तत्तद्विशेषाणाम् B5, B6. [4] तत्पुरुष इति किम्? ईश्वरस्य सभेव सभा यस्य स ईश्वरसभः । 'सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च' (वा. २. २. २४) इति बहुव्रीहिः इति भा. दी. (पृ. ५२६).

(पा.) शालार्थापि—इमा दिशः । राजशब्दवर्जितराजार्थकेभ्यः अमनुष्यार्थकेभ्यश्च षष्ठ्याः परः [1]सभाशब्दः संहतिशालार्थयोः[2] नपुंसकलिङ्गो भवति । राजार्थषष्ठ्याः उदाहरणम्—नृपसभमिति । नृपाणां[3] संहतिः शाला चेत्यर्थः । रक्षःसभमिति अमनुष्यार्थषष्ठ्या उदाहरणम् । रक्षसां संहतिः शाला चेत्यर्थः । अमनुष्यशब्दो रूढ्या रक्षःपिशाचादिवचनः । अन्यत्र तु 'स्यात् सुधर्मा देवसभा' इति (१, पृ. ३४) ।। २७ ।।

[1] B3 adds समस्तः. [2] A1 adds द्वयोरपि. [3] A1 omits the sentence.

उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादि कन्थोशीनरनामसु ।। २८ ।।

(वि.) उपज्ञोपक्रम—प्रकाशने । [1]आद्यं ज्ञानमुपज्ञा । उपक्रम्यत इत्युपक्रमः । इमावन्तौ यस्य [2]समासस्य स उपज्ञोपक्रमान्तः । तदादित्वप्रकाशने—तयोः उपज्ञोपक्रमयोः आदित्वप्रकाशने उपज्ञेयस्य उपक्रम्यार्थस्य च प्रकाशने द्योत्ये सति नपुंसकं[3] भवति । उदाहरणे स्वयमेव दर्शयति—कोपज्ञकोपक्रमादि इति । कस्य ब्रह्मणः उपज्ञा कोपज्ञम् वेदः । कस्य ब्रह्मणः उपक्रमः कोपक्रमं [4]सर्गः । आदिग्रहणात् प्राचेतसोपज्ञं रामायणमित्यादि ।। कन्थोशीनरनामसु । उशीनरदेशे या कन्था षष्ठ्याः परा तदन्तः समासः संज्ञायां नपुंसकलिङ्गो भवति । अत्रोदाहरणे—सुशमस्यापत्यानि सौशमयः । तेषां कन्था सौशमिकन्थम्[5] ।। २८ ।।

[1] K4 omits two lines. [2] K2 adds षष्ठी°. [3] नपुंसकलिङ्गं K5 [4] स्वर्गः K4. [5] K5 adds आह्वरकन्थम्; कन्था नगरी.

(विव.) उपज्ञोपक्रम—प्रकाशने। अत्राप्युपदेशमन्तरेण प्राग्भवीयसंस्कारादिना स्वेनैव उपज्ञायत इत्युपज्ञा, स्वयमेव प्रतिभातं वस्तु । उपक्रम्यत इत्युपक्रमः । अन्योपदेशं विना स्वत एव प्रक्रान्तं वस्तु । अनयोरर्थयोः अभिधायकौ उपज्ञोपक्रमशब्दान्तौ यस्य षष्ठीसमासस्य असौ उपज्ञातः उपक्रान्तश्च । तयोः उपज्ञोपक्रमयोः आदित्वे प्राथम्ये गम्यमाने नपुंसकलिङ्गो भवति । तदुक्तम्—'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (२. ४. २१) इति ।। स्वयमेवोदाहरति — कोपज्ञकोपक्रमादि । कस्य ब्रह्मणः उपज्ञा कोपज्ञं वेदः । कस्य ब्रह्मणः उपक्रमणं कोपक्रमं सर्गः । आदिशब्दात् 'प्राचेतसोपज्ञं रामायणम्' (रघु. १५. ६३) । मनूपज्ञं लोकव्यवहारः । नन्दस्य उपक्रमाः नन्दोपक्रमाणि मानानि । 'तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम्' इति नैषधकाव्ये (३. ६४) । 'रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्' इति [1]कालिदासः (रघु. १२. ४२) । तदादित्वप्रकाशने इति किम्? देवदत्तोपज्ञो ग्रन्थार्थः । यज्ञदत्तोपक्रमः स्वाध्यायः इति । अत्र क्रियासंबन्धमात्रस्य विवक्षितत्वात् तदादित्वप्रकाशनमविवक्षितम् । षष्ठ्या इत्येव त्वदुपक्रमः मदुपक्रमः इत्यत्र विशेषणसमासे पुंलिङ्गत्वमेव ।।

कन्थोशीनरनामसु । उशीनरो नाम देशविशेषः । तत्प्रतिबद्धा ग्रामा अपि [2]उशीनरनामसंज्ञाः । उशीनराश्च नाम चेति [3]बहुवचनानुपपत्तेः । अयमर्थः कन्थाशब्दान्तः षष्ठीतत्पुरुषो नपुंसकलिङ्गः स्यात्, संज्ञायां विषये सा चेत् कन्था उशीनरेषु उशीनराख्ये देशे भवति । तथा 'संज्ञायां कन्थोशीनरेषु' (२. ४. २०) इति नपुंसकत्वम् । यथा—सौशमिकन्थम् । आह्वरकन्थम् इति । सुशमस्यापत्यानि सौशमयः, तेषां कन्था इति शब्दसाधुत्वार्थं व्युत्पत्तिमात्रकथनम् । वस्तुतस्तु—कन्थाविशेषस्येयं प्रसिद्धा संज्ञा । एवम् आह्वरकन्थम् । उशीनरेष्विति किम् ? दाक्षेरिति प्रसिद्धस्य कस्यचित् देशान्तरभवा कन्था दाक्षिकन्थेति संज्ञया प्रसिद्धा, तत्र मा भूत् । नाम्नीति किम्? उशीनरदेशेष्वेव, वरिणानां कन्था इति योगवशादेव वरिणकन्थेति प्रयुज्यते । तत्र नपुंसकत्वं मा भूत् इति [4] ।। २८ ।।

[1] रघुकारः Gm3.　　[2] उशीनरा नाम B6.　　[3] बहुवचनोपपत्तिः B5.
[4] उपज्ञायते । 'आतश्चोपसर्गे' इति कर्मण्यङ [उपज्ञा]; उपक्रम्यते । कर्मणि घञ् [उपक्रमः]; कम्यते । बाहुलकात् थन् [कन्था] इति भा. दी (पृ. ५२९).

(पा.) उपज्ञोपक्रम—प्रकाशने । उपज्ञायत इत्युपज्ञा । उपक्रम्यत इत्युपक्रमः । उपज्ञोपक्रमयोः प्राथम्ये गम्यमाने तदन्ताः[1] तत्पुरुषा[2] नपुंसकलिङ्गाः ।

कोपज्ञकोपक्रमादि इति तदुदाहरणम् । कस्य ब्रह्मणः[3] उपज्ञा कोपज्ञं, कोपक्रमं वा सृष्टिः । वाल्मीक्युपज्ञं वाल्मीक्युपक्रमं वा श्लोकः । प्राथम्यागम्ये चेन्न भवति । देवदत्तोपज्ञा[4] देवदत्तोपक्रमो वा तटाकस्नानम् ।। कन्थोशीनरनामसु । कन्थान्तः[5] तत्पुरुषो नपुंसकलिङ्गः, स चेद् उशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सौशमिकन्थम् । आह्लिकन्थम्[6] । उशीनरग्रहणादत्र न भवति—दाक्षिकन्था । नामग्रहणादत्र न भवति—चैत्रकन्था ।। २८ ।।

[1] उपज्ञोपक्रमान्ताः A1, [2] समुदायाः षष्ठीसमासेन A1. [3] A1 omits. [4] विष्णुकर्मोपज्ञा, विष्णुकर्मोपक्रमः A1. [5] उशीनरदेशे संज्ञायां षष्ठ्याः परः कन्थाशब्दः नपुंसकः A1. [6] आह्वार° A1

भावे नणकचिड्भ्योऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वहःपरः ।। २९ ।।

(वि.) भावे नणकचित्—अदन्तप्रत्ययाः । अदन्तप्रत्यया ये भावार्थे विहिताः नणकचिड्भ्योऽन्ये नप्रत्ययणप्रत्ययकप्रत्यय-चकारानुबन्धकप्रत्ययेभ्यः इतरे कृत्संज्ञकाः, ये च समूहार्थे भावकर्मणोश्चार्थे विहिताः तद्धितसंज्ञकाः, तेऽदन्तप्रत्यया नपुंसकलिङ्गा भवन्ति । अत्रोदाहरणानि—सांराविणं वर्तते । [1]समन्ताद् रावो वर्तत इत्यर्थः । [2]सांकूटिनं वर्तते । [3]भिक्षाणां समूहो भैक्षम् । भावकर्मणोर्यथा—ब्राह्मणस्य भावः कर्म वा ब्राह्मण्यम् इत्यादि । पुण्यसुदिनाभ्यामहःपरम् । पुण्यं च सुदिनं च पुण्यसुदिने । ताभ्यां परमुत्तरभूतम्[4] अहरिति पदं [5]कृतसमासान्तं नपुंसकलिङ्गं भवति । अत्र सुदिनशब्दः शोभनवचनः । उदाहरणे—पुण्याहम्, सुदिनाहमिति ।। २९ ।।

[1] K3 omits the sentence [2] K2 omits. [3] K2, K4 add समूहार्थे यथा. [4] उत्तरपदभूतम् K2, K3, K4. [5] K2, K3 omit.

(विव.) भावे नणकचित्—अदन्तप्रत्ययाः । अत्र नणकचिद्भ्यः इत्युपलक्षणम् । ततश्च नप्रत्ययणप्रत्ययकप्रत्ययचकारानुबन्धप्रत्ययेभ्यः स्त्रीलिङ्गपुंलिङ्गप्रकरणोक्तघञबाधितप्रत्ययेभ्यश्चान्ये ये धात्वर्थलक्षणभावार्थविहिताः कृत्संज्ञकाः, ये च समूहाद्यर्थत्रये विहिताः तद्धितसंज्ञकाः अदन्तप्रत्ययाः ते तदन्ताः शब्दाः नपुंसकलिङ्गा भवन्ति । तत्र भावमात्रे यथा—समन्ततो

रावणमिति विग्रहे, 'रु शब्दे' इति संपूर्वः, 'अभिविधौ भाव इनुण्' (३. ३. ४४) इति इनुण्प्रत्ययः। तदन्तात् स्वार्थे 'अणिनुणः' (५.४.१५) इत्यण्। 'नस्तद्धिते' (६. ४. १४४) इति प्राप्तस्य टिलोपस्य, 'इनण्यनपत्ये' (६. ४. १६४) इति प्रकृतिभावात् प्रतिषेधः। एवं सांराविणम्। एवं सांकोटिनम् इति। तथा 'भुवो भावे' इति क्यप्प्रत्यये ब्रह्मभूयम्, देवभूयम् इत्यादि। तथा 'नपुंसके भावे क्तः' (३. ३. ११४) इति भावे क्तप्रत्यये हसितम्, जल्पितम् इत्यादि। 'यजयाच...' (३. ३. ९०) इत्यादिना विहितनङ्प्रत्ययान्तानां स्वप्नयज्ञप्रश्नादीनां, 'नौ ण च' (३. ३. ६०) इति णप्रत्ययान्तस्य,[1] घञर्थे कप्रत्ययान्तानां (वा. ३. ३. ५८) आखूत्थादीनां चकारानुबन्धप्रत्ययानां चय[2]जयादीनामन्येषां चोपलक्षणप्रसक्त-घञादिप्रत्ययान्तानां पाकादीनां च भावविहितकृत्प्रत्ययान्तत्वे सत्यपि पर्युदास-सामर्थ्यात् तेषां नपुंसकत्वं न भवति।

समूहे यथा--भिक्षाणां समूहो भैक्षम्। 'भिक्षादिभ्योऽण्' (४. २. ३८) इति। युवतीनां समूहो यौवतमिति। भिक्षादिषु पाठसामर्थ्यादेव पुंवद्भावो नास्तीति काशिका (१, पृ. ३०९)। महाभाष्ये तु--'भस्याढे तद्धिते' (वा. ६. ३. ३५) इति पुंवद्भावे, 'प्रकृत्याके राजन्यमनुष्ययुवानः' (वा. ७. १. १) इति प्रकृतिभावे टिलोपाभावे च [3]यौवतमित्युक्तम्। तथा च वार्त्तिकम्--'भिक्षादिषु युवतिग्रहणा-नर्थक्यं पुंवद्भावस्य सिद्धत्वात्' इति। तथा 'गोत्रोक्षोष्ट्रोरभ्र...' (४. २. ३९) इत्यादिना वुञ्प्रत्यये गर्गाणां समूहो गार्गकम्। उक्ष्णां समूहः औक्षकम्। एवं औष्ट्रकमित्यादि। तथा 'केदाराद्यञ्च' (४. २. ४०) इति कैदार्यम्, कैदारकम् इत्यादि। अत्र द्वितीयभावशब्देन प्रवृत्तिनिमित्तं[4] विवक्षितम्। यथा--गोर्भावो गोत्वम्। 'तस्य भावस्त्वतलौ' (५. १. ११९) इति त्वप्रत्ययः। अश्वत्वम्, घटत्वमिति। 'वर्णदृढादिभ्यः ष्यञ् च (५. १. १२३) इति ष्यञ्। शौक्ल्यम्, कार्ष्ण्यम्, दार्ढ्यम् इति। कर्मव्यापारे यथा--'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५. १. १२४) इति ष्यञ्प्रत्ययः। यथा--राज्ञो भावः कर्म वा राज्यम्। आधिपत्यम्। युवादित्वाद् अण् प्रत्ययो भवति (५. १. १३०)। कौशलम्, कौशल्यम्; चापलम्, चापल्यम्; पैशुनम्, पैशुन्यम् इत्याद्युदाहार्यम्। अदन्तग्रहणं स्पष्टार्थम्॥

पुण्यसुदिनाभ्यां त्वहः परः। पुण्यसुदिनाभ्यां परः कृतसमासान्तोऽहःशब्दो नपुंसके। यथा--पुण्यं च तदहश्चेति पुण्याहम्। सुदिनं च तदहश्चेति सुदिनाहम्।

सुदिनशब्दः शोभनमात्रवचनः। तथा—'सुदिनासु सभासु कार्यमेतत् परिचिन्वीत विशेषतः स्वयं च' इति प्रयोगः। तथा च 'भवन्तु सुदिनाहःक्रियाः' इति च। 'अह्नाहान्ताः' इति प्रागुक्तस्य (श्लो. १२) अपवादोऽयम्। तथा च 'पुण्यसुदिनाभ्यामह्नः क्लीबतेष्यते' (वा. २. ४. १७) इति नपुंसकत्वम् ॥ २९ ॥

[1] Tj1, Tj2 add अदन्तार्थस्य. [2] चयनयजनादीनां B5, B6. [3] यौवनम् Gm1, Gm3. [4] काशिका (२, पृ. २५).

(पा.) भावे नणकचिद्भ्योऽन्ये। भावे विहिता नणकचिद्व्यतिरिक्ता कृत्प्रत्ययाः अदन्ताः नपुंसकलिङ्गाः[1]। 'अभिविधौ भाव इनुण्' (३. ३. ४४)। [2] 'अणिनुणः' (५. ४. १५)। समन्ताद् रावः सांराविणं वर्तते। 'भुवो भावे' (३. १. १०७) इति क्यप्। ब्रह्मणो भावः ब्रह्मभूयं गतः। अदन्तग्रहणादत्र न भवति—संधिः, व्यवधिः इति॥ समूहे—अदन्तप्रत्ययाः। समूहे च भावकर्मणोश्च विहिताः तद्धितप्रत्ययान्ताः नपुंसकाः। समूहे यथा—काकानां समूहः काकम्। भैक्षम्। औक्षकम्। कैदार्यम्। कावचिकम्। अदन्तग्रहणादत्र न भवति—खलानां समूहः खलिनी। भावकर्मणोर्यथा—शुक्लस्य भावः कर्म वा शौक्लयम्। मार्दवम्। मानोज्ञकम्। ब्रह्मत्वम्। अदन्तग्रहणादत्र न भवति—[3]पृथोर्भावः प्रथिमा॥ पुण्यसुदिनाभ्यां त्वहः परः। पुण्यसुदिनाभ्यां परः अहःशब्दो नपुंसकः। पुण्यमहः पुण्याहम्[4]। सुदिनमहः सुदिनाहम्। 'सुदिनं शोभनार्थे स्याद् दुर्दिनं तद्विपर्यये'॥ २९ ॥

[1] नपुंसकाः A1. [2] A1 omits. [3] B3, C1 omit. [4] A1 adds पुण्यं हवनमुच्यते.

क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके।
चोचं पिच्छं गृहस्थूणं तिरीटं मर्मयोजने॥ ३०॥

(वि.) क्रियाव्यय—एकत्वेऽपि। क्रियाविशेषणानि अव्ययविशेषणानि च। अपिशब्दात् क्रियाव्ययाश्च नपुंसकलिङ्गा भवन्ति। तान्येकत्वे एकवचने वर्तन्ते। क्रियाविशेषणानि यथा—शोभनं पचति। मन्दं पचति। साधु वदतीत्यादि। अव्यय-

विशेषणानि यथा——पुरस्ताद्रमणीयम् । प्राग्गन्तव्यम् इत्यादि । क्रियाव्यया यथा——[1]पचतिरूपम् । [1]पचतिकल्पम् । [1]पचतिदेश्यम् इत्यादि । अत्र कांश्चिन्नपुंसकलिङ्गान् स्वरूपेणाह——उक्थतोटके——मर्मयोजने । उक्थं [2]सामविशेषः । तोटकं वृत्तविशेषः । चोचं लवङ्गाख्यगन्धद्रव्यम्[3] । [4]उक्तमेकाक्षरं छन्दः । गृहस्थूणं गृहस्तम्भः । किरीटं[5] शिरोवेष्टनम् । मर्म संधिस्थानम् । योजनं क्रोशचतुष्टयम् ।। ३० ।।

[1] पचन्ति° K₂, K₆. [2] सामभेदः K₃, K₄. [3] °द्रव्यविशेषः K₆. [4] उक्तमिति विवृतौ पाठः; पिच्छमिति पाठे मयूरच्छदः K₅. [5] किरीटमिति विवृतौ पाठः.

(विव.) क्रियाव्यय——एकत्वेऽपि । धात्वर्थलक्षणक्रियाणाम् अव्ययार्थस्य च यानि भेदकानि विशेषणानि तदभिधायकानि शब्दरूपाणि नपुंसकलिङ्गानि एकवचनानि च भवन्तीत्यर्थः । क्रियाया अव्ययार्थस्य चासत्त्वरूपत्वेन लिङ्गसंख्याभावात् तद्विशेषणमपि अलिङ्गसंख्यत्वे प्राप्ते इदमारब्धम् । क्रियाविशेषणानि यथा——शोभनं पचति । [1]संततं पठति । ' मन्दं नुदति पवनः ' इति (मेघ. १. १०) । अव्ययविशेषणानि यथा——निर्मलं प्रातः । शोभनं श्वः इत्यादि । तथा——' तिङश्च ' (५. ३. ५६) इति वर्तमाने ' प्रशंसायां रूपप् ' (५. ३. ६६) । यथा——पचतिरूपम्, पचतोरूपम्, पचन्तिरूपम् इति । तथा——' ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ' (५. ३. ६७) इति । पचतिकल्पम्, पचतःकल्पम्, पचन्तिकल्पम् इति । अत्र काशिका (२, पृ. ६६)——' क्रियाप्रधानमाख्यानं भवति । एका च क्रियेति रूपप्प्रत्ययान्ताद् द्विवचनबहुवचने न भवतः[2] । नपुंसकलिङ्गं तु भवति, लोकाश्रयत्वाल्लिङ्गस्य ' इति । अत्र न्यासः (२, पृ. १२७)——' यदि तर्हि एका क्रिया, पचतः पचन्तीति द्विवचनबहुवचने न भवतः; नैतत् साधनाश्रये भविष्यतः । रूपप्प्रत्ययान्तात्तु तिङन्तेनैवोक्तत्वाद् न भविष्यतः, एकवचनं तु भवति । [3]" एकवचनमुत्सर्गतः करिष्यति " इति न्यायात् तस्यौत्सर्गिकत्वादिति ' ।

अथ कानिचिद् नपुंसकानि लिङ्गानि स्वरूपेण निर्दिशति——उक्थतोटके——मर्म योजनम् । उक्थं नाम सुत्याहे[4] होत्रादिभिः शंस्यः सप्रतिगरमृक्समूहः । यथा——' आज्यमुक्थमव्यथयत् ' (तै. सं. ४. ४. २. १), ' प्र उगमुक्थमव्यथयत् ' (तै. सं. ४. ४. २. १) इत्यादि । तोटकं रूपकभेदः, छन्दोभेदो वा । ' इह

तोटकमम्बुधिसैः प्रमितम्[5]' इत्युक्तलक्षणवृत्तविशेषश्च । चोचं लवङ्गाख्यं गन्धद्रव्यम् । 'चोचं भुक्तफलावशेषः' इति चन्द्रः । तालफलमित्यपरे । [6]उल्बं प्रागुक्तलक्षणम् (१, पृ ३८३) । पिञ्छमिति पाठे मयूरस्य शिखण्डः । गृहस्य स्थूणा गृहस्थूणमिति विग्रहे षष्ठीतत्पुरुषस्य परलिङ्गत्वबाधेन नपुंसकत्वमुच्यते । वामनीयलिङ्गानुशासनेऽप्युक्तम्––'ऊर्णास्थूणे शशगृहपरे' इति शशगृहशब्दाभ्यां ये ऊर्णास्थूणे शब्दौ तदन्तः षष्ठीतत्पुरुषो नपुंसकलिङ्ग इत्यर्थः । तिरीटं वेष्टनम् । किरीटं शिरोवेष्टनमिति केचित् पठन्ति । शिरोभूषणमित्यरुणदत्तः । मर्म प्राणसंचरणस्थानम् । योजनं क्रोशचतुष्टयम्[7] ।। ३० ।।

[1] सुस्वरं Gm3, Tv. [2] सिद्ध्यतः इति मु. ग्र. [3] 'एकवचनमुत्सर्गः करिष्यत इति वचनात्' इति मु. ग्र. [4] सुत्याग्निहोत्रादि° Tv. [5] प्रथितम् Tv.
[6] उल्बमिति विवरणे पाठः. [7] उच्यते । 'पातॄतुदि . . .' (उ. २. ७) इति थक् [उक्थम्]; तुटति । ण्वुल् [तोटकम्]; चञ्चति, चच्यते वा । पचाद्यच् । घञ् वा । पृषोदरादिः [चोचम्]; पिच्छयते । घञ् [पिच्छम्]; तरति तीर्यते वा । कॄतॄकृषिभ्यः कीटन्' (उ. ४. १८५) [तिरीटम्]; म्रियतेऽनेन । 'सर्वधातुभ्यो मनिन्' (उ. ४. १४५) [मर्म]; युज्यते । कर्मणि 'कृत्यल्युटो बहुलम्' इति ल्युट् [योजनम्] इति भा. दी. (पृ. ५२९-३०).

(पा.) क्रियाव्यय––एकत्वेऽपि । क्रियाविशेषणानि अव्ययविशेषणानि च नपुंसकानि । यथा––स्तोकं पचति । पुरो रमणीयम् । एकत्वेऽपीत्यनेन उभयत्रैकवचनम् । उक्थतोटके––मर्मयोजने । उक्थादीनि नपुंसकानि । उक्थं सामभेदः[1] । तोटकं वृत्तभेदः । 'इह तोटकमम्बुधिसैः प्रमितम्'। चोचं नारिकेलफलम् । [2]उक्तं वचनम् । छन्दोभेदो[3] वा । 'उक्तमेकाक्षरं छन्दस्युक्तं स्याद् भाषितेऽपि च' इति विश्वः (पृ. ५६, श्लो. ३५) । गृहस्थूणं गृहमध्यस्तम्भः । 'निह्लडु'[4]। वेश्मस्थूणा गृहस्थूणमुल्वस्थूणा तु[5] पादिका' इति वैजयन्ती (पृ. १६२, श्लो. ३६) । गृहस्य स्थूणा गृहस्थूणमित्येवंप्रकारेण ब्रह्मणि चर्या ब्रह्मचर्यम् । तिरीटं किरीटम् । मर्म जीवस्थानम्[6] । 'जीवस्थानं भवेन्मर्म' इति हलायुधः (अ. मा. २. ३७४) । योजनं क्रोशचतुष्टयम्[7] ।। ३० ।।

[1] साम A1. [2] पिच्छम् B3, C1. [3] छन्दो वा A1. [4] B3 omits.
[5] अल्पस्थूणा A1, B3. [6] जीवावासः A1. [7] A1 adds 'आमड'.

राजसूयं वाजपेयं गद्यपद्ये कृतौ कवेः ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ।। ३१ ।।
लोकायतं हरितालं विदलं स्थालबाह्लवम् ।

इति नपुंसकलिङ्गशेषः

(वि.) राजसूयं--स्थालवाह्लवम् । राजसूयादिशब्दा नपुंसकाः । [1]राजसूयवाजपेयौ यज्ञविशेषौ । कवेः कृतौ कविविरचिते गद्यपद्ये वर्तेते । गद्यमपादबद्धम् । पद्यं पादबद्धम्। माणिक्यं मणिविशेषः[2]। भाष्यं सूत्रव्याख्यानम्[3]। सिन्दूरं नागसंभवम् । चीरं वल्कलवस्त्रम् । चीवरं मुनिवासः[4] । पञ्जरं पक्ष्यादिबन्धनम् । लोकायतं चार्वाकतर्कशास्त्रम् । हरितालं धातुविशेषः । विदलं दाडिमफलकणम् । स्थालं भोजनपात्रम् । बाह्लीकं देशभेदः ।। ३१ ।।

इति नपुंसकलिङ्गशेषः[5]

[1] राजसूयवाजपेयौ पुंलिङ्गेऽपि भवतः. [2] मणिः K_3, K_6. [3] °व्याख्या K_2, K_4.
[4] °वस्त्रम् J_2. [5] °विशेषः K_2, K_4.

(विव.) **राजसूयं--बाह्लकम् । राजसूयवाजपेयशब्दयोः यज्ञविशेषवचनयोः पुंलिङ्गत्वेन सर्वत्र प्रसिद्धत्वाद् इह ताभ्यामन्नविशेषावेव विवक्षिताविति सुबोधिनीकारः । कवेः कृतौ काव्ये वर्तमानौ गद्यपद्यशब्दौ नपुंसकलिङ्गौ । ' अपादः पदसंतानो गद्यम् ' (काव्यादर्शः १. २३) । पद्यं तु पादबद्धम् । कविकृतेरन्यत्र तु ' गदमद . . . ' इत्यादिना (३. १. १००) यत्प्रत्यये गद्या वाक्, गद्यः श्लोकः, गद्यं वचनमिति । तथा--' पदमस्मिन् दृश्यम् ' (४. ४. ८७) इति यत्प्रत्यये पद्या धूलिः, पद्यः कर्दमः, पद्यं रजः इति विशेष्यनिघ्नत्वमेव । मणिशब्दात् प्रशंसायां कन्प्रत्यये, ततः स्वार्थे ष्यञि माणिक्यं रत्नविशेषः । भाष्यं सूत्रव्याख्यानरूपो ग्रन्थः । तदुक्तम्--**

[1]' सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।। '

इति । सिन्दूरं स्त्रीणां सीमन्तप्रसाधनार्थो [2]रक्तद्रव्यविशेषः । चीरं वल्कलादि-वस्त्रम् । 'अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि' इति रघुवंशे (१३. २२) । चीवरं जीर्णत्यक्तवस्त्रम् । 'प्रेतचीवरवसा स्वनोग्रया' इति च तत्रैव (रघु. ११. १६) । पञ्जरं वंशशलाकादिकृतं शुकशारिकादि-पलायनप्रतिबन्धनार्थं यन्त्रम् । लोकायतं चार्वाकशास्त्रम् । हरीतालं हरिद्रासदृशवर्णो धातुविशेषः । हरितालमिति ह्रस्वद्वितीयाक्षरशब्दस्तु प्रागुक्तः (१, पृ. ६१४) । अत एव 'हरितालं हरीतालम्' इति शब्दभेदप्रकाशे द्वयमप्युक्तम् । द्विधाकृते मुद्गमाषकलायादिधान्ये, द्विधाकृते वेणुवेत्रादौ च विदलशब्दो वर्तते । 'विदलं दाडिमबीजकणः' इति सुबोधिनीकारः । स्थालं कांस्यादिनिर्मितं विस्तृतं भोजन-पात्रम् । '[3]स्थालानीव प्रेतराजस्य' इति माघकाव्ये (शिशु. १८. ६७) । बाह्लकं कुङ्कुमम् । बाह्लवं देशविशेष इति सुबोधिनीकारः । बाहुभवम् । अङ्गदादिपरिष्कारजातं बाहुभवमिति सुभूतिचन्द्रः[4] ॥ ३१ ॥

इति नपुंसकलिङ्गशेषप्रकरणम्

[1] सूत्रग्रन्थः Gm1, Gm3. [2] रक्तचन्दनविशेषः Gm1. [3] 'आहाराय प्रेतराजस्य रौप्यस्थालानीव स्थापितानि स्म भान्ति' इति मु. ग्र. [4] 'राजसूय . . .' (३. १. ११४) इति साधुः [राजसूयम्]; भाष्यते सूत्रार्थो येन । 'कृत्यल्युटो . . .' इति करणे ण्यत् [भाष्यम्]; स्यन्द्यते । 'स्यन्देः संप्रसारणं च' (उ. १. ६८) इत्यूरन् [सिन्दूरम्]; चयिते । 'शुसिचिमीनां दीर्घश्च' (उ. २. २५) इति रक् [चीरम्]; चीयते । 'छित्वरच्छ-त्वर . . . चीवर . . .' (उ. ३. १) इति साधु [चीवरम्]; पिञ्ज्यते । बाहुलकादरः । पृषोदरादिः [पञ्जरम्]; लोके आयतन्ते । पचाद्यच् । तेषामिदं शास्त्रम् । तस्येदमित्यण् । संज्ञापूर्वकत्वान्न वृद्धिः [लोकायतम्]; हरितेनालति । पचाद्यच् [हरितालम्]; विदलति । पचाद्यच् [विदलम्]; स्थलत्यत्र । 'हलश्च' इति घञ् । [स्थालम्]; बह्लदेशे भवम् । 'तत्र भवः' इत्यण् [बाह्लवम्] इति भा. दी. (पृ. ५३०).

(पा.) राजसूयं—स्थालबाह्लिकम् । राजसूयादिबाह्लिकान्ताः शब्दाः नपुंसकाः । राजसूयं वाजपेयं यज्ञभेदौ । गद्यपद्ये द्वे कविकृती स्याताम् । अन्यत्र गद्या स्त्री । गदितव्येत्यर्थः । पद्या शर्करिला[1] पादाहितेत्यर्थः । माणिक्यं मणिः । पल्ल्यां तु नपुंसकं न । 'टट्टनी मुसली पल्ली माणिक्या गृहगोधिका' इति वैजयन्ती (पृ. १५०, श्लो. ३०) । भाष्यं विवरणभेदः । सिन्दूरं गतार्थम् (१, पृ. ६१५) । चीरचीवरे द्वे वस्त्रभेदौ । 'चीरं खण्डकमस्त्रियाम्[2]' इति, 'चीवरं भिक्षुसंघाटी'

इत्युभयत्र वैजयन्ती (पृ. १६६, श्लो. १३०, १२८) । पञ्जरं पक्षिनीडम् । 'पिट्टगूडु' । लोकायतं चार्वाकमतम् । हरितालं गतार्थम् (१, पृ. ६१४) । हरिताली च गतार्था (?) । 'हरिताली नभोरेखादूर्वाखङ्गलतासु च' इति विश्वः (पृ. १६१, श्लो. १५५) । विदलं [3]'म्राकुविडिके' । 'विदलं दारु पाटितम्' इति वैजयन्ती (पृ. ४६, श्लो. १४) । दाडिमफलमिति क्षीरस्वामी[4] (पृ. ३५३) । स्थालं भोजनपात्रम् । [5]बाह्लिकं कुङ्कुमम् ।। ३१ ।।

इति नपुंसकलिङ्गशेषः

[1] शर्करा पदहिताहितेत्यर्थः A1. [2] खण्डलमस्त्रियाम् इति मु. ग्र. [3] B3 omits.
[4] विदलं दाडिमकणः, फल [ले] स्य सिद्धम् इति मु. ग्र. [5] बाह्लिकमिति पारिजाते पाठः.

अथ पुंनपुंसकसंग्रहः—

पुंनपुंसकयोः शेषोऽर्धर्चपिण्याककण्टकाः ।। ३२ ।।
मोदकस्तण्डकष्टङ्कः शाटकः खर्वटोऽर्बुदः ।
पातकोद्योगचरकतमालामलका नडः ।। ३३ ।।

(वि.) पुंनपुंसकयोः शेषः । पुंनपुंसके प्रागनुशिष्टेभ्यः शिष्टाः[1] अर्धर्चादिशब्दाः पुंनपुंसकयोः वर्तन्ते । के ते शब्दाः—अर्धर्चपिण्याक—आमलका नडः । ऋचोऽर्धमर्धर्चः । पिण्याकः [2]उद्धततैलपिष्टम् । कण्टकः[3] [4]तीक्ष्णाग्रस्वल्पखदिराद्यवयवः[5] । मोदको भक्ष्यविशेषः । तण्डकः परिकरः । टङ्कः पाषाणभेदकः । शाटकः स्वल्पवस्त्रम् । खर्वटः [6]चतुःशतग्रामसंग्रहस्थानम् । अर्बुदो दन्तरोगः । संख्याविशेषो वा । पातको ब्रह्महत्यादि । उद्योग उत्साहः । चरको वैद्यशास्त्रभेदः । तमालो वृक्षभेदः । आमलको धात्रीफलम् । नडः तृणविशेषः ।। ३२-३ ।।

[1] अवशिष्टाः K2. [2] उत्पतत्° K3, K4. [3] कूटकः J2. [4] तीक्ष्णोग्र° K6.
[5] °कटुक° K3, K6. [6] °ग्रामजन° J2.

(विव.) पुंनपुंसकयोः शेषः । [1]पुंनपुंसकोभयलिङ्गत्वेन प्रागनुशिष्टेभ्यः शेषो[2] वक्ष्यमाणोऽर्धर्चादिः पुंनपुंसकयोः वर्तत इत्यर्थः । अत्र कश्चिदाह— 'पुंनपुंसकयोः इत्येकमेव पदं आप्रकरणमधिक्रियते । शेषशब्दोऽर्धर्चादिशब्दवद्

विधेयभूत एव । उपयुक्तादन्यः शेषः । "शेषो बहुव्रीहिः" (२. २. २३) "शेषं पूर्ववत्" इत्यादौ शेषशब्दस्याप्युभयलिङ्गत्वदर्शनात्' इति । तदसङ्गतम् ।

'शेषोऽप्रधानेऽनन्ताख्ये सर्पराजेऽथ शार्ङ्गिणः ।
अवतारान्तरेऽपत्ये त्रिष्वन्यत्रोपयुक्ततः ।
माल्याक्षतादिदाने तु स्त्री शेषा ॥'

इति केशवस्वामिना (नाना. सं. १. पृ. १६३, श्लो. १४१५-१६) उपयुक्ताद् अन्यस्मिन्नर्थे त्रिलिङ्गत्वाभिधानात् केवलपुंनपुंसकप्रकरणे शेषशब्दस्य पाठायोगाद् उपयुक्तादन्यः इत्यत्रापि शेषशब्दस्य लिङ्गविशेषः सूत्रस्थान्यशब्दवदेव प्राकरणिक-विशेष्याभिप्रायेणोक्तः । इहापि 'कृतः कर्तर्यसंज्ञायाम्' (श्लो. ४५) इति विशेष्य-निघ्नत्वं वक्ष्यते । अत एव—'शेषान् मासान् गणय[3] चतुरो लोचने मीलयित्वा' इति कालिदासः (मेघ. २. ५०) । 'तया नभः पुष्यतु कोरकेण' इति नैषधकाव्ये (३. ११४) स्त्रीलिङ्गप्रयोगो विशेष्यानुरोधादेव । 'सप्तर्षिहस्तावचितावशेषाणि' इति (कु. सं. १. १६) नपुंसके ॥

तानेव शब्दानाह—अर्धर्चपिण्याक—आमलका नडः । अर्धं ऋचः अर्धर्चम्, अर्धर्चः । एवं तद्गणपठितानां सर्वेषां लिङ्गद्वये रूपद्वयं द्रष्टव्यम् । पिण्याकम् [4]उद्धृत-तैलपिष्टम् । कण्टको नाम खदिरबर्बरादिवृक्षाणां तीक्ष्णाग्रावयवविशेषः । 'रोमाञ्चे क्षुद्रशत्रौ च द्रुमाङ्गे कण्टकोऽस्त्रियाम्' इपि रुद्रः । कङ्कट इति मूर्धन्यप्रथमोपधान्तपाठे कङ्कट उरच्छदः । मोदको भक्ष्यविशेषः । तण्टकः परिकरः । दण्डक इति दन्त्यवर्गतृतीयादित्वपाठे दण्डकः [5]समासप्रयोगगद्यविशेषः । टङ्कः पाषाणदारणः[6] । शाटकोऽल्पवस्त्रम्[7] । खर्वटः चतुःशतग्रामजनसंग्रहस्था-नमिति सुबोधिनी । ग्रामजनवास्तव्यजनोपजीव्यो ग्रामः खर्वट इति सुभूतिचन्द्रः । खर्वटः प्रचुरकण्टकसंतानो ग्राम इति विज्ञानेश्वरः (या. स्मृ. २. १०. १६७) । कर्पट इति पाठे स्वल्पमुपसंव्यानम् । कर्पटः कौपीनमित्येके । अर्बुदं दन्तरोगविशेषः । संख्याविशेषश्च । पातकः पापविशेषः । उद्योग उद्यमः । चरकं वैद्यशास्त्रविशेषः । तमालं वृक्षविशेषः । आमलकं धात्री । नलो नडो वा [8]तृणविशेषः[9] ॥ ३२-३ ॥

[1] पुंनपुंसकयोः B_5, B_6. [2] Tv adds अवशिष्टः. [3] गमय इति मु. ग्र.
[4] उद्धृततैलं तिलपिष्टम् Gm_1. [5] °प्रयोगस्य विशेषः B_5. [6] °दारकः Gm_1.

[7] स्वल्प° Gm1.　[8] Tv adds अर्थान्तरे तु पुंलिङ्गः　[9] 'अर्धं नपुंसकम्' इति समासः । 'ऋक्पू . . .' इत्यः समासान्तः [अर्धर्चम्]; पण्यते । 'पिनाकादयश्च' (उ. ४. १५) इति साधुः [पिण्याकम्]; कण्टति । ण्वुल् [कण्टकः]; मोदयते । ण्वुल् [मोदकः]; तण्डते । ण्वुल् [तण्डकः]; टङ्कयति । अच् [टङ्कः]; शटति । ण्वुल् [शाटकः]; खर्वति । 'शकादिभ्योऽटन्' (उ. ४. ८१) [खर्वटः]; अर्वति । बाहुलकादुदच् [अर्बुदः]; पातयति । ण्यन्तः । ण्वुल् [पातकः]; उद्योजनम् घञ् [उद्योगः]; चरति । क्वुन् (उ. २. ३२) [चरकः]; ताम्यति । 'तमिविशि . . .' (उ. १. ११८) इति कालन् [तमालः]; आमलक्याः फलम् । 'नित्यं वृद्ध . . .' इति मयट् । 'फले लुक्' [आमलकः]; नडति । 'चुरादीनां वा णिच्' इति पक्षाश्रये पचाद्यच् [नडः] इति भा. दी. (पृ. ५३१).

(पा.)　पुंनपुंसकयोः—आमलका नडः । अर्धर्चादयः पुंनपुंसकलिङ्गाः । अर्धर्चः ऋचोऽर्धम् । पिण्याको गतार्थः (पृ. २३१, नाना. ९) । कण्टको वेण्वादिः । 'वेणौ द्रुमाङ्गे रोमाञ्चे क्षुद्रशत्रौ च कण्टकः' इति पुंलिङ्गाध्याये वैजयन्ती (पृ. २४०, श्लो. १४) । मोदको लड्डुकः[1] । तण्डको गृहदारु । समासप्रायवचनं वा । '[2]तण्डको दण्डकः' इति क्षीरस्वामी (पृ. ३५४) । टङ्को गतार्थः (१, पृ. ६४०) । [3]शाकटो नाम प्रत्ययः । तद्ग्रहणात् तदन्तस्यैव ग्रहणम् । शाकस्य क्षेत्रं शाकशाकटम् । [4]खर्वटो ग्रामभेदः । अर्बुदः संख्याभेदः । 'अथ स्त्री कोटिरर्बुदे' इति कोटिसंख्यायां वैजयन्ती (पृ. १८८, श्लो. २९) । 'दशकोटिषु चार्बुदम्[5]' इति दशकोटौ विश्वः (पृ. ७९, श्लो. २३) । पातको ब्रह्महत्यादिः । उद्योगो यत्नः । चरकं वैद्यशास्त्रम् । तमालं तमालपत्रम् । आमलकमामलकफलम् । नडो गतार्थः (१, पृ. ३१६) ॥ ३२-३ ॥

[1] A1 adds 'लड्वम्'.　[2] 'तण्डकं परिष्कारः, दण्डको वायम्' इति मु. ग्र.
[3] शाकट इति पारिजाते पाठः.　[4] खर्पटः A1, B3.　[5] अर्बुदः इति मु. ग्र.

कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेमकुट्टिमम् ।
संगमं शतमानार्मशम्बलाव्ययताण्डवम् ॥ ३४ ॥

(वि.)　कुष्ठं मुण्डं—ताण्डवम् । कुष्ठादयः पुंनपुंसकलिङ्गाः । कुष्ठः त्वग्दोषः । मुण्डः कवन्धः । शीधुः मद्यविशेषः । पुस्तः[1] लेख्यादिकर्म । क्ष्वेडितो विषविशेषः[2] । क्षेमः कुशलम् । कुट्टिमो मणिवद्धभूमिः । संगमो नद्यादिमेलनम् ।

शतमानः पलपरिमितम् । हेमरूपं वा । अर्म अक्षिरोगः । शम्बलः पाथेयम् । अव्ययः [3]स्वरादिनिपातरूपाः चादयः । ताण्डवो [4]नृत्तविशेषः ।। ३४ ।।

[1] पुस्त इति विवृतौ पाठः. [2] सिंहनादः K5. [3] अलिङ्गं शब्दरूपम् K5. [4] नाटचम् J2, K6.

(विव.) कुष्ठं मुण्डं—ताण्डवम् । कुष्ठं गन्धद्रव्यविशेषः। रोगविशेषश्च । मुण्डं [छिन्न]मस्तकम् । तद्युक्ते तु वाच्यलिङ्गः । मुण्डो ब्रह्मचारी । मुण्डा विधवा इत्यादि । शीधु मद्यविशेषः । पुस्तं पुस्तकम् । ' बुस्तं लेख्यकर्मविज्ञानयोरपि ' इति स्वामी[1] (पृ. ३५४) । क्ष्वेडितमुत्साहजसिंहनादः[2] । क्षेमं कुशलम् । कुट्टिमं मणिपाषाणसुधादिबन्धनेन निर्वृत्तं स्थलम् । संगमं संबन्धः । नद्यादिमेलश्च । शतमानं पलपरिमितं रजतम् । तच्च[3] रजतमानप्रस्तावे याज्ञवल्क्यः (या. स्मृ. १. १३. ३६४-५)—

' द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ।
शतमानं तु दशभिर्धरणैः [4]पलमेव तु ।। '

इति । अर्म नेत्ररोगविशेषः । तस्य द्विलिङ्गत्वेऽपि नपुंसकलिङ्ग एव प्रयोगप्राचुर्यदर्शनात् ' पत्तनाजिरशृङ्गार्म ' (पृ. ७०७) इति केवलनपुंसकलिङ्गमध्येऽपि पाठः कृत इति न विरोधः। शम्बलं पाथेयम् । अव्ययमलिङ्गसंख्यं शब्दरूपम् । तदुक्तम्—

' सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।। '

इति । ताण्डवमुद्धतनृत्यम्[5] ।। ३४ ।।

[1] ' बुस्तं मांसशष्कुली ' इति मु. ग्र. [2] Gm1 adds ' बोबेपेरु ' [3] तथा च Gm1. [4] परिकीर्तितम् Gm1, Gm3. [5] कुष्णाति, ' हनिकुषि . . .' (उ. २. २) इति क्थन् [कुष्ठम्]; मुण्डचते । घञ् [मुण्डम्]; शेतेऽनेन । ' शीङो धुग्लक् . . . ' (उ. ४. ३८) इति धुक् [शीधु]; बुस्यते स्म । क्तः [बुस्तम्]; क्ष्वेडनम् । ' ञीतः क्तः ' [क्ष्वेडितम्]; क्षियति, क्षयति वा । ' अर्तिस्तुसु . . .' (उ. १. १४५) इति मन् [क्षेमम्]; कुट्टेन निर्वृत्तम् । ' भाव . . .' (वा. ४. ४. २०) इति इमप् [कुट्टिमम्]; संगमनम् ।

'ग्रहवृद्...' (३. ३. ५८) इत्यप् [संगमम्]; ऋच्छति। 'अर्तिस्तुसु...' (उ. १. १४५) इति मन् [अर्म]; शम्बत्यनेन। बाहुलकादलच् [शम्बलम्]; न व्येति 'एरच्' [अव्ययम्]; तण्डुना प्रोक्तम्। 'तेन प्रोक्तम्' इत्यण् [ताण्डवम्].

(पा.) कुष्ठं मुण्डं—ताण्डवम्। कुष्ठो गतार्थः (१, पृ. ३६४)। मुण्डं शिरः। शीधुर्गतार्थः (१, पृ. ६४४)। पुस्तं पुस्तकम्। अथवा बुस्तमिति मांसशष्कुली। 'बुस्तं मांसशष्कुली' इति क्षीरस्वामी[1] (पृ. ३५४)। क्ष्वेडितं सिंहनादः। 'पिडिबोब्ब'। क्षेमं गतार्थम् (१, पृ. ८८)। कुट्टिमं [2]निबद्धभूमिः। '[3]रायिगट्टिननेल'। संगमं सङ्गः। शतमानं पलम्। 'शतमानं तु कर्षे द्वे' इति वैजयन्ती (पृ. १६०, श्लो. ५०)। अथवा शतमाने संख्याभेदपरिमाणभेदे[4]। अर्म पक्ष्ममध्यकेशः 'कोटिरेप्पलु'। शम्वलं पाथेयम्। 'पाथेयं शम्वलं मतम्[5]' इति हलायुधः (अ. मा. २. २०३)। अव्ययं स्वरादिशब्दः[6]। ताण्डवं गतार्थम् (१, पृ. १२६)॥ ३४॥

[1] A1 adds 'मांसचक्किलम्'. [2] बद्ध° A1. [3] B3 omits. [4] A1 adds 'शङ्कुस्तु शतं पुस्तं' इति चन्द्रगोमी. [5] स्मृतम् इति मु. ग्र. (पृ. ३६) [6] B3, C1 omit शब्दः.

कवियं कन्दकार्पासं पारावारं युगंधरम्।
पूयं प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ॥ ३५॥

(वि.) कवियं—चमसचिक्कसे। कवियम् अश्वमुखवन्धनम्। कन्दो मूलविशेषः। [1]कार्पासं बादरम्[2]। पारावारम् उभयतटौ। युगंधरं रथकाष्ठम्। पूयं क्लिन्नरुधिरम्। प्रग्रीवो वातायनम्। पात्रीवो यज्ञोपकरणम्। यूषं मुद्गादि-निर्यासः। चमसं यज्ञपात्रम्। चिक्कसं [3]यवादिपिष्टम्॥ ३५॥

[1] कर्पासः J2. [2] खादरम् K2. [3] मदादि° K6.

(विव.) कवियं—चमसचिक्कसे। कवियमश्वमुखबन्धनम्। कन्दं सूरणादिमूलविशेषः इति सुबोधिनीकारः। सुभूतिचन्द्रस्तु—कर्मेति पाठेनाह। 'कर्म क्रिया। "कर्म व्याप्यक्रियायां च पुंनपुंसकयोर्मतम्" इति रुद्रः' इति। कार्पासं वस्त्रयोनिः। फलविशेषे च। पारं नद्याः परो देशः। 'अवारमवाग्देशः'

इति टीकाकृत्। युगंधरः कूबरः। ईषाग्रमित्यन्ये। पर्वतविशेष इत्यपरे। पूयं क्लिन्नशोणितम्। सुभूतिचन्द्रस्तु यूपमिति पठित्वा यूपं पशुबन्धकाष्ठमिति व्याचष्ट। [1]प्रग्रीवो वातायनम् इति स्वामी (पृ. ३५४)। 'प्रग्रीवो मत्तवारणः' इति प्रतापः। [2]पात्रीवशब्दस्तु अप्रसिद्धार्थः। यूषं मुद्गकुलुत्थादिनिर्यूहः[3]। चमसः सोमाधारणपात्रविशेषः। स्त्रीलिङ्गप्रकरणेऽपि चमसीति ङीबन्त उक्तः (पृ. ६७६, श्लो. १०)। चिक्कसं यवादिपिष्टम्[4] ॥ ३५ ॥

[1] प्रग्रीवमिति मु. ग्र. [2] पात्नीय° B5. [3] निर्व्यूहः Tj1, Tj2. [4] कवते। बाहुलकादियः [कवियम्]; कन्दति। पचाद्यच् [कन्दः]; करोति। 'कृञः पासः' (उ. ५. ४५) [कर्पासः]; पारयति, न वारयति। पचाद्यच् [पारावारम्]; युगं धारयति। 'संज्ञायां भृतॄ...' इति खच्। 'खचि ह्रस्वः'। 'अरुर्द्विषत्...' इति मुम् [युगंधरः]; युवन्त्यस्मिन्। 'कुयुभ्यां च' (उ. ३. २७) इति पो दीर्घश्च [यूपम्]; पात्नीं वाति। कः (३. २. ३) [पात्नीवम्]; यूषति, 'इगुपध...' इति कः [यूषम्]; चमन्त्यनेन। 'अत्यावचमि...' (उ. ३. ११७) इत्यसच् [चमसम्]; चिक्कयति। अच्। चिक्कं स्यति। 'आतोऽनुप...' इति कः [चिक्कसम्] इति भा. दी. (पृ ५३२).

(पा.) कवियं––चमसचिक्कसे। कवियादयः पुंनपुंसकाः। कवियं खलीनम्। 'गुर्रपुकश्लिमु'। 'कवियोऽस्त्री खलीनोऽस्त्री पञ्चाङ्गी कविका [1]कवी' इति वैजयन्ती (पृ. ११३, श्लो. ११३)। कर्म[2] नाम करणम्। 'चेसुट'। 'करणं क्लीबे कृत्यं कर्म नृशंस्ये क्रियाविला' इति गोपालितः। कार्पासो गतार्थः (१, पृ. ४३२)। 'प्रत्ति'। पारावारमुभयतटम्। 'पारावारः समुद्रे च पारावारं तटद्वयम्'[3] इति विश्वः (पृ. १४६, श्लो. २५८)। युगंधरं गतार्थम् (१, पृ. ५१८)। पूयं शुक्लरक्तम्। 'पूयं तु कुणपं दूष्यम्' इति वैजयन्ती (पृ. १८२, श्लो. ११८)। प्रग्रीवोऽनेकार्थः। 'प्रग्रीवमस्त्री कलशे ग्रीवाप्रासादयोरपि[4]' इति वैजयन्ती (पृ. २६१, श्लो. ५६)। पात्नीवं यज्ञोपकरणम्। यूषः पक्वधान्यरसः। 'पुल्वकट्टु[5]'। 'यूषो ऽस्त्री यूः पुमान् रसे' इति वैजयन्ती (पृ. १६७, श्लो. १००)। चमसं यज्ञपात्रविशेषः[6]। चिक्कसं यवपिष्टम्। 'यवपिण्डि' ॥ ३५ ॥

[1] कविः B3. [2] कन्दस्य स्थाने कर्म इति पारिजातपाठः. [3] तटद्वये इति मु. ग्र.
[4] °जालयोः B3. [5] C1 adds 'मुदलैनदि.' [6]यज्ञेऽम्बुप्रणयनम् A1.

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ।। ३६ ।।

इति पुंनपुंसकसंग्रहः

(वि.) अर्धर्चादौ—शेषवत् । अर्धर्चादौ अर्धर्चादिगणे घृतादीनां घृतक्षीरामृतादीनां[1] [2]यद्वैदिकं पुंस्त्वं पुंलिङ्गत्वं ध्रुवं निश्चितं, तदिह केवललौकिकशब्दावधि[3] कुर्वन् अस्मिन् ग्रन्थे नोक्तम्, लौकिकेऽपि च तत् पुंलिङ्गमस्ति चेत् तर्हि शेषवदस्तु, तल्लिङ्गशेषत्वाद् अङ्गीकरोमीत्यर्थः ।। ३६ ।।

इति पुंनपुंसकलिङ्गशेषप्रकरणम्

[1] K4 omits.　[2] पुंस्त्वं यत् इति विवृतौ पाठः.　[3] °शब्दानधिकुर्वति K4.

(विव.) ननु अर्धर्चादिगणपठितानां घृतामृतक्षीरादिशब्दानां तत्तत्पर्यायकथनप्रस्तावे नपुंसकलिङ्गत्वमात्रमेवोक्तम् । तत् 'अर्धर्चाः पुंसि च' (२. ४. ३१) इति सूत्रेण विरुद्धमित्याशङ्क्य परिहरति—अर्धर्चादौ—तन्नोक्तमिह । इह ग्रन्थे घृतामृतक्षीरादिशब्दानाम् अर्धर्चादिगणपठितत्वेन पुंनपुंसकोभयलिङ्गत्वेनानुशिष्टानामपि यस्मात् पुंलिङ्गत्वे वैदिकं छन्दोविषयत्वमेवेति ध्रुवं निश्चितम् । लोके घृतादिशब्दानां नपुंसकत्वेनैव प्रयोगदर्शनाद् इति भावः । तस्मात् कारणाद् अस्मदीयग्रन्थस्य लोकप्रसिद्धमात्रसुशब्दानुशासनपरत्वात् तेषां शब्दानां पुंलिङ्गत्वमत्र नेष्यते ।

ननु चात्यन्तविदुषोऽपि लोकप्रसिद्धसकलप्रयोगपरिज्ञानसाधर्म्याभावात् कथमुच्यते पुंस्त्वं वैदिकमेवेत्यत आह—लोके तु तच्चेदस्त्यस्तु शेषवत् । अत्र घृतादिशब्दानां लोके पुंलिङ्गत्वं यदि महाजनप्रयोगेषु विद्येत तदप्यस्तु । न वयं निर्बन्धेन तेषां पुंस्त्वं निराकरिष्याम इति भावः । तस्मात् कारणाद् अस्यास्मदीयग्रन्थस्य लोकप्रसिद्धमात्रसुशब्दानुपरत्वादिति । शेषवदिति दृष्टान्तः । शेषं नपुंसकत्वं यथा तेषामङ्गीक्रियते, तद्वत् पुंलिङ्गत्वमपीत्यर्थः । अथवा शेषवत् शेषाणामेवेत्यर्थः । यथा—पर्यायप्रस्तावे कुष्ठमुण्डशीधुपुस्तादीनां[1] केवलनपुंसकत्वेनानुशिष्टाना[2]मप्यत्र कुष्ठं मुण्डं शीधु पुस्तम् इत्यादिनोभयलिङ्गत्वमुच्यते । तद्वद् घृतादिशब्दानामिति भावः । अथवा इह ग्रन्थे प्रमादाद् विस्तरभयाद्वा

छन्दोभङ्गभयाद्वा यदनुक्तं तच्छेषम् । तच्च शिष्टप्रयोगतो ज्ञेयमिति ग्रन्थान्ते वक्ष्यते । तद्वद् घृतादिशब्दानामपि पुंलिङ्गत्वं लोकेऽपि शिष्टप्रयोगतोऽङ्गीकरणीयमिति[3] ।। ३६ ।।

इति पुंनपुंसकलिङ्गशेषप्रकरणम्

[1] बुस्तादीना° Tv; प्रस्थादीनां B5. [2] Tv omits अनुशिष्टानां. [3] घ्रियते । 'घृ सेके' । 'अञ्जिघृसिभ्यः क्तः' (उ. ३. ८९) [घृतम्]; वेदे उक्तं ठञ् [वैदिकम्]; ध्रुवति । 'इगुपध . . .' इति कः [ध्रुवम्] इति तत्र तत्र भा. दी.

(पा.) अर्धर्चादौ—शेषवत् । अर्धर्चादिगणपठितानां घृतामृतरजतादिशब्दानां पुंस्त्वं यत् तद् वैदिकम् । यच्च लौकिकं भवति चेत् शेषवदस्तु । इह लौकिकम्, तद्वैदिकं नोक्तम् ।। ३६ ।।

इति पुंनपुंसकलिङ्गशेषः

अथ स्त्रीपुंससंग्रहः—

स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ।। ३७ ।।

(वि.) स्त्रीपुंसयोरपत्यान्ताः । अपत्यप्रत्ययान्ताः शब्दाः स्त्रीपुंसयोर्वर्तन्ते । अत्रोदाहरणानि—उपगोरपत्यम् औपगवः । औपगवी । एवं भैदः, भैदी ।। द्विचतुः—जातिभेदाः । द्विपदचतुष्पदषट्पदोरगरूपजातिविशेषाः स्त्रीपुंसयोर्वर्तन्ते । द्विपदानामुदाहरणानि—नरः, नारी । कुक्कुटः, कुक्कुटी इत्यादि । चतुष्पदादीनामुदाहरणानि—भ्रमरः, भ्रमरी इत्यादि । उरगाणामुदाहरणानि—पन्नगः, पन्नगी । नागः, नागी । इत्यादि ।। पुमाख्याश्च स्त्रीयोगैः सह । पुमाख्या गणकमहामात्राद्याः स्त्रीयोगैः सह स्त्रीणां पुंयोगनिमित्तकाख्याभिः सह स्त्रीपुंसलिङ्गयोर्वर्तन्ते । अत्रोदाहरणानि— गणकः पुरुषः, तस्य स्त्री गणकी । महामात्रः पुरुषः, तस्य स्त्री महामात्री । आदिशब्दाद् इन्द्रः, इन्द्राणी इत्यादि । कांश्चित् स्त्रीपुंसलिङ्गान् शब्दान् स्वरूपेणाह—मल्लक इति । मल्लकः मल्लकी दीपपात्रम् ।। ३७ ।।

(विव.) स्त्रीपुंसयोरपत्यान्ताः । अधिकारोऽयम् । उत्तरप्रकरणाद् अपत्यान्ताः अपत्यप्रत्ययान्ताः शब्दाः स्त्रियां पुंसि च भवन्ति । यथा—उपगोरपत्यं

पुमान् औपगवः, औपगवी स्त्री । भिदस्यापत्यं पुमान् भैदः, भैदी स्त्री । यद्यप्यत्र न्यासकारेण (पञ्जिका १, पृ. ८६२) 'गोत्रं [1]सर्वलिङ्गभाग् भवति' इत्युक्त्वा 'नाडायनः पुमान्, नाडायनी स्त्री, नाडायनं नपुंसकम्' इत्यादि लिङ्गत्रयेऽप्युदाहृतम्, यदाप्येवं त्रिलिङ्गत्वेऽपि स्त्रीलिङ्गत्वसद्भाववादोऽत्र नानुपपन्नः । यथा—पात्रादयः स्त्रीलिङ्गा अप्यर्धर्चादौ पठिताः । सुभूतिचन्द्रस्त्वाह—'नहि नपुंसकत्वमप्यत्राप्युपदेशार्हम् । किं तर्हि ? यैरेव पूर्वजाः संतानोत्पादनद्वारेण 'पुंनाम्नो नरकाद् घोरात् त्रायन्ते' (म. स्मृ. ९. १३८) इति तान्येव अपत्यप्रत्ययोत्पत्तिस्तु संबन्धमात्राभिप्रायेण' इति । तथा कम्बोजादिभ्य इति उत्तरस्यापत्यप्रत्ययस्याञः 'कम्बोजाल्लुक्' (४. १. १७५) इति लोपेऽपि प्रत्ययलक्षणन्यायेनापत्यप्रत्ययान्तत्वमेव 'कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम्' (वा. ४. १. १७५) । कम्बोजः, कम्बोजी । चोलः, चोली इत्यादि ॥

द्विचतुः—जातिभेदाः । द्विचतुःषट्पदोरगाः द्विपदचतुष्पदषट्पदरूपजातिविशेषवाचकाः सर्पजातिविशेषवाचकाश्च शब्दाः स्त्रीपुंसयोर्वर्तन्त इत्यर्थः । क्रमेण यथा—मानुषः, मानुषी । कुक्कुटः, कुक्कुटी । मयूरः, मयूरी । मृगः, मृगी । शार्दूलः, शार्दूली । भ्रमरः, भ्रमरी । मधुकरः, मधुकरी । उरगः, उरगी । पन्नगः पन्नगी इत्यादि । द्विपदादिग्रहणं मत्स्यादीनामुपलक्षणम् । तेन मत्स्यः, मत्स्यी इत्याद्यपि द्रष्टव्यम् ।

पुमाख्याश्च स्त्रीयोगैः । पुंसः आचष्ट इति पुमाख्यः । अत्र सोपसर्गत्वाद् 'आतोऽनुपसर्गे कः' (३. २. ३) इति कप्रत्ययस्याभावः । 'कर्मण्यणि' (३. २. १) तु प्रकृतरूपसिद्धिः । तस्माद् मूलविभुजादिलक्षणः कप्रत्ययः, पुंसामाख्या इति वा (वा. ३. २. ५) । पुरोगत्वादिगुणविशिष्टपुरुषेष्वेव प्रयुक्तत्वाद् अत्र पुमाख्यशब्देन प्रष्ठमहामात्रगणका उच्यन्ते । स्त्रीति भिन्नं पदम् । स्त्रीकर्तृयोगैः स्वस्वपुरुषसंबन्धैः स्वस्वामिभावादिभिर्हेतुभूतैः पुमाख्याः, स्वस्वपुरुषाख्या लभते पुरुषे वर्तमानं प्रातिपदिकम् । तत्संबन्धायां स्त्रियामपि वर्तत इत्यर्थः । तथा चैकस्यैव लिङ्गद्वयवृत्तित्वमित्याशयः । यथा—प्रष्ठस्य भार्या प्रष्ठी । महामात्रस्य भार्या महामात्री । गणकस्य भार्या गणकी इत्यादि । तथा च जयादित्यः—'पुंयोगाद्धेतोः प्रातिपदिकं [2]पुमांसमाख्याभूतं स्त्रियां वर्तते' इति (काशिका १, पृ. २७३) । अत्र न्यासकारः—'यथैव ह्यसौ स्त्री तद्योगात् स्नानोद्वर्तनाभिषेकान् लभते तथैव ताच्छब्द्यमपि' इति (पञ्जिका १, पृ. ८४९) । यथा[3] पुमाख्यास्तद्योगात्

स्त्रीषु वर्तन्ते तथा[4] 'पुंयोगादाख्यायाम्' (४. १. ४८) इति ङीष्। अन्यस्तु व्याचष्ट—'स्त्रीयोगैरित्यनन्तरस्य सहशब्दस्य पूर्वेण संबन्धः, पुमाख्याः प्रष्ठगणकमहामात्रेन्द्रवरुणशर्वाद्याः शब्दाः स्त्रीयोगैः सह स्त्रीणां पुंयोगनिमित्ताख्याभिः सह प्रष्ठी गणकी महामात्री इन्द्राणी वरुणानी शर्वाणी इत्यादिभिः सह स्त्रीपुंसयोर्वर्तन्ते' इति। अत्र पूर्वापरानुसंधानरहितः कश्चिद् व्याचष्ट—[5]प्रष्ठजवनमहामात्राद्या अजातिवाचकाः शब्दाः स्त्रीणां पुरोगत्वशीघ्रत्वादिगुणयोगैः हेतुभिः स्त्रीष्वपि वर्तमानाः स्त्रियां पुंसि च वर्तन्ते। यथा—[5]प्रष्ठः पुरुषः, [5]प्रष्ठा स्त्री। जवनः पुरुषः, जवना स्त्री इत्याद्यूहनीयम्' इति। तदसङ्गतम्। 'उक्ता भूरिप्रयोगत्वात्' (१, पृ. ६४७) इत्यत्रैव सकलयौगिकशब्दानां लिङ्गनिर्णयस्योक्तत्वाद् यौगिकशब्दानां लिङ्गत्रयवृत्तित्वेन स्त्रीपुंसप्रकरणानुपपत्तेश्च इत्यलमतिप्रसङ्गेन ॥

अथ कांश्चित् स्त्रीपुंसलिङ्गान् स्वरूपेणाह—[6]सहमल्लक इति। मल्लकेन सह वर्तते इति सहमल्लकः[7] ॥ ३७ ॥

[1] मलिङ्ग° Tv. [2] पुंस आख्याभूतमिति मु. ग्र. [3] यदा Tj1. [4] तदा Tj1. [5] प्रेष्ठ° Tv. [6] सहमल्लक इति विवरणाभिमतः पाठः. [7] मल्लते। 'मल्ल धारणे'। ण्वुल् (३. १. १३३) [मल्लकः] इति भा. दी. (पृ. ५३२).

(पा.) स्त्रीपुंसयोरपत्यान्ताः। स्त्रीपुंसयोरिति आकुटीशब्दमधिकारः। [1]अपत्यप्रत्ययान्ताः शब्दाः स्त्रीपुंसलिङ्गाः। औपगवः, औपगवी ॥ द्विचतुःषट्पदोरगाः। एते स्त्रीपुंसलिङ्गाः। कुक्कुटः कुक्कुटी। गर्दभः, गर्दभी। भ्रमरः, भ्रमरी। सर्पः, सर्पी[2]। जातिभेदाः। एते स्त्रीपुंसलिङ्गाः। ब्राह्मणः, ब्राह्मणी ॥ पुमाख्याश्च स्त्रीयोगैः सह। स्त्रीयोगैः सार्धं पुमाख्याः स्त्रीपुंसलिङ्गाः। इन्द्रः, इन्द्राणी ॥ मल्लकः। मल्लकादयः स्त्रीपुंसलिङ्गाः[3]। मल्लः, मल्ली। 'मल्लो मल्ली च कोशिका[4]' इति वैजयन्ती (पृ. १६३, श्लो. ५७) ॥ ३७ ॥

[1] A1 omits °प्रत्यय.° [2] A1 adds सर्पिणीशब्दः प्रकृत्यन्तरः. [3] 'मल्लकमनिवेसला' A1. [4] कौशिकौ A1, B3.

मुनिर्वराटकः स्वातिर्वल्लको झाटलिर्मनुः।
मूषा सृपाटी कर्कन्धूर्यष्टिः शाटी कटी कुटी ॥ ३८ ॥

इति स्त्रीपुंलिङ्गशेषप्रकरणम्

(वि.) मुनिर्वराटकः—कटी कुटी । एते शब्दाः स्त्रीपुंसलिङ्गाः । अयं मुनिः तपस्वी । इयं मुनिः । वराटकः, वराटिका पद्मकोशः । स्वातिः, स्वाती नक्षत्रभेदः[1] । [2]वल्लकः, वल्लकी वीणा । झाटलिः, झाटली वृक्षभेदः[3] । अयं मनुः इयं मनुः, स्वायंभुवः तस्य पत्नी च । मूषः, मूषा च धातुद्रवीकरणपात्री । सृपाटः, सृपाटी सरित्[4] । अयं कर्कन्धूः, इयं कर्कन्धूः वदरी । अयं यष्टिः, इयं यष्टिः दण्डः । शाटः, शाटी वस्त्रम् । कटः, कटी च श्रोणी । कुटः, कुटी च पर्णशाला ।। ३८ ।।

इति स्त्रीपुंलिङ्गशेषप्रकरणम्

[1] विशेषः J2, K5, K6.   [2] J2 adds वर्णक इति वा पाठः   [3] मुष्कः K6.
[4] परिमाणविशेषः K4.

(विव.) [1]योनिर्वराटकः—कटी कुटी । योनिशब्दः स्त्रीपुंसयोरित्यर्थः । सहशब्दस्य पूर्ववाक्यशेषत्वपक्षे मल्लक इति पदं दीपभाजनम् । मल्लिका च । योनिः स्त्रीपुंसयोर्व्यञ्जनम् । वराटः कपर्दिकायाम्, पद्मकोशे च । स्त्रियां तु वराटिका । स्वातिर्नक्षत्रविशेषः । स्वाती च । वल्लको वीणा, वल्लकी च । वर्णक इति पाठे नील्यादिलेपनद्रव्यम्, वर्णिका च । झाटलिर्वृक्षविशेषः । स्त्रियां झाटली च । अयं मुनिर्वाचंयमः । इयं मुनिः । मनुरिति पाठे मनुष्याणामाद्यभूता स्त्री पुरुषो वा मनुशब्दार्थः । अयं मनुः । इयं मनुः । मूषः स्वर्णादिविलेपनपात्रम् । अजादित्वात् टापि मूषा च । सृपाटिशब्दोऽप्रसिद्धार्थ इति सुबोधिनी । परिमाणविशेष इति सुभूतिः । असिधारा इत्यन्ये । सरिदित्यपरे । स्त्रियां तु ङीषि गौरादिपाठे सृपाटी । इयमयं वा कर्कन्धूः बदरी । इयमयं वा यष्टिर्दण्डः । शाटोऽल्पवस्त्रम् । शाटी च । कटः श्रोणी कटी च । कुटोऽल्पगृहम् । कुटी च ।

**' स्त्रीपुंसयोरशन्यूर्मियोनिश्रोणिमरीचयः ।
इषुर्धरणिकर्कन्धूवस्तिशाल्मलिमृत्यवः ।
मणिबाणशाटयष्टित्रुटिकीटकुटीषवः ।। '**

इत्यादि ।। ३८ ।।

इति स्त्रीपुंसशेषप्रकरणम्

[1] योनिरिति विवरणाभिमतः पाठः.

(पा.) मुनिर्वराटकः—कटी कुटी । मुनिर्गतार्थः (१,पृ.४७४) । वराटकः कपर्दः[1] । 'कपर्दस्तु वराटकः' इति वैजयन्ती (पृ. १५२, श्लो. ५७) । स्वातिरिति नक्षत्रम् । [2] भल्लको बाणः । 'भल्लो भल्ली च बाणे स्यात्' इति विश्वः (पृ. १५१, श्लो. ३०) । पुनः पाठः मतान्तराङ्गीकारार्थः । तेनेतरत्राभिहिताः शब्दाश्चाङ्गीकृताः ।

'शाटी रेणुहरेणूरुजलूकाकोलिधूलयः ।
उत्कण्ठा कङ्कती कन्दूवितस्ती [3]रयिरञ्जलिः ॥'

इति वैजयन्ती (पृ. २६१, श्लो. २६-७) ।

'तिथिमणिधृणिकेलीशाल्मलीस्वातिवस्ती-
रशनिमुनिगभस्तीराशियोन्यूर्मिवार्ष्णीः ।
[4]विरणिमणिमरीचिश्रेण्यणिर्मुष्टियष्टीः
कुटिमिषुधिमवीचीं पाटलीं पुंसि चाहुः ॥'

इति रभसकोशः । झाटलिः कुञ्जः । 'अनिपाद' । मनुर्देवता । मूषाशब्दो गतार्थः (१, पृ. ६४०) । सृपाटी तुण्डम् । 'चञ्चुस्त्रोटिः सृपाटिका' इति वैजयन्ती (पृ. ३०, श्लो. ५०) । कर्कन्धूर्गतार्थः (१, पृ. २३७) । यष्टिरनेकार्थः । यष्टिर्हारलताशस्त्रभेदयोर्ध्वजदण्डके' इति विश्वः (पृ. ३७, श्लो. २३) । शाटीकटीकुटीशब्दाः शाटककटकुटार्थकाः ॥ ३८ ॥

इति स्त्रीपुंलिङ्गशेषः

[1] A1 adds 'गव्व'. [2] भल्लक इति पारिजाते पाठः. [3] वितस्तिरणि° A1, C1. [4] मरीची: A1.

अथ स्त्रीनपुंसकशेषप्रकरणम्—

स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः ॥ ३९ ॥

(वि.) स्त्रीनपुंसक—क्वचिच्च वुञ् । शब्दप्रवृत्तिनिमित्तो भावः, क्रिया व्यापारः । तयोर्भावकर्मणोरन्यतरार्थे वर्तमानः ष्यञ्प्रत्ययान्तो वुञ्प्रत्ययान्तश्च

स्त्रीनपुंसकयोर्वर्तते । क्वचित् प्रत्यययोगानुसारेण स्त्रियां वर्तते । अत्रोदाहरणानि दर्शयति––औचित्यमौचिती––प्रागुदाहृतः । ष्यञ्प्रत्ययान्तो यथा––उचितस्य भावः कर्म वा औचित्यम्, औचिती च । एवं मैत्र्यं मैत्री । वुञ्प्रत्ययान्तस्तु [1]प्राग् वैरमैथुनिकादिवुन् (पृ. ६५८, श्लो. ४) इत्यत्रोदाहृतः ।। ३९ ।।

[1] वुन् प्रत्ययः वुञ्प्रत्ययस्याप्युपलक्षणमिति भावनीयम्.

(विव.) स्त्रीनपुंसक––क्वचिच्च वुञ् । त्रिलिङ्गशेषावधितया (श्लो. ४२) अधिकारो वेदितव्यः । भावकर्मणोः ष्यञ्, क्वचिच्च वुञ् । भावः शब्दप्रवृत्तिनिमित्तभूतो वस्तुधर्मः । क्रिया कर्मव्यापार इत्यर्थः । 'तस्य भावस्त्वतलौ' (५. १. ११९) इत्यतो भाव इति वर्तमाने, 'वर्णदृढादिभ्यः ष्यञ् च' (५. १. १२३) इत्यतो भावे ष्यञ् । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५. १. १२४) इति भावकर्मणोः ष्यञ् भावकर्माधिकारे; 'योपधाद् गुरूपोत्तमाद् वुञ्' (५. १. १२३), 'द्वन्द्वमनोज्ञादिभ्यश्च' (५. १. १३३) इति भावकर्मणोः वुञ्प्रत्ययान्ताश्च शब्दाः स्त्रीनपुंसकलिङ्गा भवन्ति । क्वचिदिति विशेषणमसाकल्यार्थम् । ततश्च उचितादिसंबन्धिनोरेव ष्यञ्वुञ्प्रत्यययोरुभयलिङ्गत्वम् । न तु शुक्लादिसंबन्धिनोरपीति प्रयोगानुसारेण विज्ञेयमित्यर्थः ।

स्वयमेवोदाहरति––औचित्यमौचिती मैत्र्यं मैत्री । उचितशब्दाद् गुणवचनाद् भावकर्मणोरर्थयोः ष्यञ्प्रत्यये औचित्यम् । स्त्रीविवक्षायां तु षित्वाद् ङीष्प्रत्यये भसंज्ञायामकारयकारयोर्लोपे[1] औचिती । मित्रशब्दाद् ब्राह्मणादिष्यञि पूर्ववदेव मैत्र्यं मैत्री इति रूपद्वयम् ।। वुञ् प्रागुदाहृतः । पूर्वं मानुष्यकराजन्यकादिशब्दा (२, पृ. २१७; १, पृ. ४८५) समूहार्थे बुञन्ताः, तत्तत्प्रस्तावेषु दर्शिताः । तद्वदेव भावकर्मणोरपि योपधादिभ्यो वुञ् ऊहितुं शक्य इति उदाहृत इत्युक्तम् । उदाहृत इति उदाहृतप्राय इत्यर्थः। अथवा––आहोपुरुषिकाचौरिकादिशब्दानां (१, पृ. ५४३, ६३५) मनोज्ञादिपठितानामुक्तत्वाद् (५. १. १३३) उदाहृत इत्युक्तेर्न विरोधः । अथवा स्त्रीलिङ्गशेषे 'वैरमैथुनिकादिवुन्' (पृ. ६५८, श्लो. ४) इत्यत्र वुन्ग्रहणस्योपलक्षणत्वेन व्याख्यानाद् वुञ्प्रत्ययान्ताः केवलस्त्रीलिङ्गा दर्शिताः । नपुंसकशेषप्रकरणे तु––'समूहे भावकर्मणोरदन्तप्रत्ययाः' (पृ. ७२०, श्लो. २९) इति वाक्येन वुञ्प्रत्ययोऽपि सामान्येन नपुंसकलिङ्ग उक्तः । अतो वुञ्प्रत्ययान्तस्य

स्त्रीनपुंसकयोरुभयलिङ्गत्वं क्वाचित्कमिति प्रकटयितुं 'वुञ् प्रागुदाहृतः' इत्युक्तम् । क्वचित्तु स्त्रीलिङ्गत्वेन, क्वचिच्च नपुंसकलिङ्गत्वेनोदाहृतः इत्यर्थः ।।

इह ष्यञन्तवुञन्तशब्दयोर्मध्ये केषामुभयलिङ्गत्वम्, केषां केवलस्त्रीलिङ्गत्वम् केषां नपुंसकलिङ्गत्वमिति जिज्ञासायां क्वचिच्छब्दसंजातशङ्कां वारयितुं स्वयं शेषकार आह--

'स्यादौचित्यं मैत्र्यं शैल्यानुपूर्व्यवैदग्ध्यसामग्र्यम् ।
चातुर्यं वाणिज्यं पारिख्यात्यमपि सामाचार्यम् ।।
वैदुष्यं मौखर्यं याथाकाम्यार्हन्त्यसाहित्यम् ।
स्यादौचिती च मैत्री च शैल्यानुपूर्वी च वैदग्धी ।।
स्यात् सामग्री चातुरी स्याद् वाणिजी पारिख्यात्यपि ।
सामाचारी वैदुषी च याथाकामी च मौखरी ।।
आर्हन्ती साहितीति स्युरिति पञ्चदश ष्यञि ।
स्त्रीनपुंसकयोरेवं चौरिका चौरिकं तथा ।।
धौर्तकं धौर्तिका शारपत्रिका शारपत्रकम् ।
कौलपुत्रिका कौलपुत्रकमेते स्त्रियां नपि ।।
[2]आहोपुरुषिका च स्यादामुष्यकुलिका तथा ।
आमुष्यपुत्रिका चादोरूपिका वैश्वदेविका ।।
कुमारिका पुत्रिका च कुलिका च कुलालिका ।
षण्डिका चेति पञ्च स्युर्ग्रामशब्दात् परे स्त्रियाम् ।।
परिशिष्टं मनोज्ञादौ नपुंसकमिति स्थितिः ।।

इति । अस्यार्थः--उचितस्य भावः कर्म वा औचित्यम् । स्त्रीत्वविवक्षायां ङीषि औचिती । एवं मैत्र्यं मैत्री । शीलमस्यास्तीति शीलः । अर्शआदिभ्योऽच् । शीलस्य भावः कर्म वा शैल्यम्, शैली । 'इयमाचार्याणां शैली' इति पञ्चपादिकायां प्रयोगः । पूर्वं पूर्वं संगताः अनुपूर्वाः । तेषां भावः आनुपूर्व्यम् , आनुपूर्वी च । विदग्धस्य भावः कर्म वा वैदग्ध्यम्, वैदग्धी च । समग्रस्य भावः कर्म वा सामग्र्यम् सामग्री च । चतुर-शब्दात् चातुर्यं चातुरी च । वणिजो भावः कर्म वा वाणिज्यम् वाणिज्या च । स्त्रियां तु अजादित्वात् टाबिति वामनः । परितः ख्यातः परिख्यातः । तस्य भावः कर्म वा पारिख्यात्यम् । पारिख्याती च । सम्यग् आचारो यस्य सः समाचारः ।

[3]तस्य भावः कर्म वा सामाचार्यम्, सामाचारी च। विदुषो भावः कर्म वा वैदुष्यम्, वैदुषी च। मुखरो वाचालः, तस्य भावः कर्म वा मौखर्यम्, मौखरी च। यथाभूतः कामो यस्य यथाकामः। ततो याथाकाम्यम्, याथाकामी च। अर्हन् पूज्यः। तस्य भावः कर्म वा आर्हन्त्यम्,[4] आर्हन्ती च। सहितयोः शब्दार्थयोरन्वययोः भावः साहित्यम्, साहिती च। एते पञ्चदशशब्दाः ष्यञन्ताः भावकर्मणोः स्त्रीपुंसकयोर्वर्तन्ते। ततोऽन्ये ब्राह्मण्यम्, शौक्लच्यम्, दार्ढ्यम्,[5] जाड्यम्, शैत्यमित्यादयो नपुंसकलिङ्गा एव।

अथ वुञ्। चोरस्य भावः कर्म वा चौरिका, चौरिकं च। धूर्तशब्दात् कितववचनाद् धौर्तिका, धौर्तकं च। शरपत्रशब्दात् शारपत्रिका, शारपत्रकं च। कुलपुत्रशब्दात् कौलपुत्रिका, कौलपुत्रकम्। एते वुञन्ताः चत्वारः शब्दाः स्त्रीनपुंसकयोर्भवन्ति। अमुष्य पुत्रस्य भावः कर्म वा आमुष्यपुत्रिका। 'आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति चालुग्वक्तव्यः' (वा. ६. ३. २१) इत्यलुक्।।

[6]आदोरूपिकाशब्दः प्रशस्तवचनः इति गणकारः। वैश्वदेवशब्दाद् वैश्वदेविका। कुमारिकादयस्तु पञ्चशब्दा ग्रामशब्दात् परभूता एवेति नियमः। यथा—ग्रामकुमारस्य भावः कर्म वा ग्रामकुमारिका। एवं ग्रामपुत्रिका, ग्रामकुलालिका इति। षण्डो वृषः। ग्रामषण्डिका, आमुष्यपुत्रिकादयः त्रयः, ग्रामशब्दोत्तरः पञ्च इत्येवमष्टौ शब्दा वुञन्ताः स्त्रियामेवेति नियमः। मनोज्ञादिगणपठिता अवशिष्टाः सर्वे वुञन्ता नपुंसकलिङ्ग एव। यथा मानोज्ञकमित्यादि। चातुर्वर्ण्यादौ अर्थान्तरे ष्यञि लिङ्गनियमनिवृत्त्यर्थं भावकर्मणोरित्युक्तम्।।

[1] 'हलस्तद्धितस्य', 'यस्येति' च.   [2] Tv omits the line.   [3] समाचारस्य Gm1.   [4] आर्हत्यम्, आर्हती B5, B6.   [5] शैष्टचम् Tv.   [6] आहोपुरुषिका° Tj1.

(पा.) स्त्रीनपुंसक—क्वचिच्च वुञ्। एतौ प्रत्ययान्तौ स्त्रीनपुंसकलिङ्गौ।। औचित्यं—मैत्र्यम्। एवं पाण्डित्यम्, पाण्डिती। साहित्यम्, साहिती। एतानि ष्यञ उदाहरणानि।। वुञ् प्रागुदाहृतः[1]। 'वृद्धसंघेऽपि वार्द्धकम्' (१, पृ. ३८५) इति क्वचिद्ग्रहणात् स्त्रीलिङ्गो न भवति। 'चौरिका स्तैन्यचौर्ये च' (१, पृ. ६३५) इति क्वचिद्ग्रहणाद् नपुंसकं न भवति। भैषज्यानन्त्यावसथ्यैतिह्यशब्दा यदि स्त्रियाम्, सूरजादौ द्रष्टव्या इति शाकटायनमते। एते स्त्रीनपुंसकलिङ्गाः। [2]भेषजमेव भैषज्यम्, भैषज्या वा। भिषज्यमिति कण्ड्वादिः।। ३९।।

[1] आहोपुरुषिका इत्यादौ (१, पृ. ५४३).   [2] A1 omits the examples.

षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ।। ४० ।।

(वि.) षष्ठ्यन्तप्राक्पदाः—स्युर्वा । अत्र वाशब्दः स्त्रीलिङ्गोदाहारणसमुच्चयार्थः[1] । षष्ठ्यन्तपूर्वपदाः छायाशालासुरासेनानिशा[2] इत्येते शब्दा वा स्त्रीनपुंसकयोः [3]स्युः । अत्रोदाहरणानि स्वयमेव दर्शयति—नृसेनं—इतरे च दिक् । नृणां सेना नृसेनम्, नृसेना । एवं [4]श्वनिशम्, श्वनिशा । गोशालम्, गोशाला । इतरे च दिक् । इतरे च छायासुरे अपि दिक् उदाहार्ये । वृक्षच्छायम्, वृक्षच्छाया । यवसुरम्, यवसुरा ।। ४० ।।

[1] K6 omits °समुच्चय°. [2] सेनादयः शब्दाः K5. [3] स्युरिति विवृतौ पाठः. [4] स्वनिशम् J2.

(विव.) षष्ठ्यन्तप्राक्पदाः—इतरे च दिक् । षष्ठीतत्पुरुषसमासे उत्तरपदभूताः सेनादयः पञ्च शब्दाः स्त्रीनपुंसकयोरित्यर्थः । स्वयमेवोदाहरति—स्यादिति । वा विकल्पेन निर्दिष्टाः । तदभावपक्षे स्त्रीलिङ्गान्ताः । इतरे छायासुरान्ताः शब्दाश्च दिक् उदाहरणानि भवन्तीत्यर्थः । नृणां सेना नृसेनम्, नृसेना च । शुनो निशा श्वनिशम्, श्वनिशा च । यत्र श्वानः कस्यांचित् कृष्णचतुर्दश्यामुपवसन्ति तत् श्वनिशमिति क्वचित् प्रसिद्धिः । गवां शाला गोशालम्, गोशाला च । एवं वृक्षस्य छाया वृक्षच्छायम् । छायाया बहुद्रव्यसंबन्धित्वे विच्छायमिति केवलनपुंसकत्वं प्रागुक्तम्[1] (श्लो. २६) । तदन्यसबन्धित्वे तूभयलिङ्गत्वमत्रोच्यत इति न विरोधः । तथा गुडस्य सुरा गुडसुरम्, गुडसुरा । एवमेव कपिसेनम्, कपिसेना । शिवनिशम्, शिवनिशा । अश्वशालम्, अश्वशाला । यवसुरम्, यवसुरा इत्यादिकमप्युदाहार्यमिति दिक्पदेन सूचितम् । 'विभाषा सेनासुराच्छायाशालानिशानाम्' (२. ४. २५) इति सूत्रमूलमेतत् ।। ४० ।।

[1] B5 adds 'छाया बाहुल्ये' इति वृद्धित्वे वा छायायोगलक्षणे तत्पुरुषसमासे च पर्यायपदस्य यल्लिङ्गं तद्भवतीत्यर्थः । तदुक्तं 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति । अतः छायमिति केवलनपुंसकलिङ्गमिति.

(पा.) षष्ठ्यन्तप्राक्पदाः--स्याद्वा। षष्ठ्यन्तपूर्वपदाः सेनादयः स्त्रीनपुंसकलिङ्गाः। नृसेनम्--इतरे च दिक्। नृसेनादीनि तदुदाहरणानि। नृणां सेना नृसेनम्। वाग्रहणाद् नृसेना। एवमन्येऽपि ॥ ४० ॥

आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप्।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ ४१ ॥

इति स्त्रीनपुंसकशेषः

(वि.) आवन्नन्तोत्तर--नश्च लुप्[1]। आवन्तोत्तरपदोऽन्नन्तोत्तरपदश्च द्विगुः द्विगुसमासः अपुंसि स्त्रीनपुंसकयोर्वर्तते। नश्च उत्तरपदस्थनकारस्य[2] च लुप् लोपो भवति। उदाहरणानि स्वयमेव दर्शयति। त्रिखट्वं--त्रितक्ष्यपि। तिसृणां खट्वानां समाहारः त्रिखट्वम्। त्रिखट्वी च। त्रयाणां तक्ष्णां समाहारः त्रितक्षम्, त्रितक्षी च ॥ ४१ ॥

इति [3]स्त्रीनपुंसकशेषप्रकरणम्

[1] लुक् J2, K2.　[2] °पदस्य नकारस्य K4, K6.　[3] °लिङ्गशेषः K4.

(विव.) आबन्नन्तोत्तर--नश्च लुप्। अत्र आब्ग्रहणेन लोप एव ग्रहणम्। 'अनो नलोपश्च वा द्विगुः स्त्रियाम्' (वा. २. ४. १७) इत्येतन्मूलत्वाद् अस्य विधेराबन्तोत्तरपदो द्विगुसमासः, अन्नन्तशब्दोत्तरपदश्च समाहारद्विगुः अपुंसि स्त्रीनपुंसकयोर्भवति। अन्नन्तोत्तरपदस्य यो नकारः तस्य लोपो भवति। तेन लोपविधानं लिङ्गशास्त्रे यद्यपि न वक्तव्यम्, तथापि, अस्य लिङ्गविधेः 'अनो नलोपश्च वा द्विगुः स्त्रियाम्' इति वक्तव्यमूलत्वप्रत्यभिज्ञानार्थमिति ज्ञेयम्। अपुंसि [1]इत्यधिकृतस्यैवानुवादो वृत्तानुसारेण पादपूरणार्थ इति ॥ द्विविधस्यापि द्विगोरुदाहरणे स्वयमेव दर्शयति त्रिखट्वम्--त्रितक्ष्यपीति। तिसृणां खट्वानां समाहारः त्रिखट्वम्। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१. २. ४७) इति ह्रस्वत्वम्। स्त्रीत्वविवक्षायां 'द्विगोः' (४. १. २१) ङीपि त्रिखट्वी। त्रयाणां

तक्ष्णां समाहारः त्रितक्षम् त्रितक्षी इति । दिङ्मात्रमेतत् । तेन दशमालम्, दशमाली । पञ्चकर्म, पञ्चकर्मी इत्याद्यप्युदाहरणीयम् ।। ४१ ।।

इति स्त्रीनपुंसकलिङ्गशेषः

[1] 'स्त्रीनपुंसकयोः' इत्यधिकारः (श्लो. ३९).

(पा.) आवन्नन्तोत्तर––नश्च लुक् । आवन्तोत्तरपदः आवन्त उत्तरपदः अन्नन्तोत्तरपदश्च[1] द्विगुः अपुंसि स्त्रीनपुंसकलिङ्गः[2] ।। त्रिखट्वं––त्रितक्ष्यपि । त्रिखट्वं त्रिखट्वी च इति द्वे आवन्तोदाहरणे । त्रितक्षं त्रितक्षी । एते द्वे अन्नन्तोदाहरणे । नश्च लुक् इत्यनेन अनो नकारस्य लोपः ।। ४१ ।।

इति स्त्रीनपुंसकलिङ्गशेषः

[1] A1 omits च. [2] °नपुंसकः A1.

अथ त्रिलिङ्गशेषः––

त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ ।

(वि.) त्रिषु पात्री––कुवलदाडिमौ । पात्रादयः शब्दाः[1] त्रिषु लिङ्गेषु वर्तन्ते । उदाहरणानि । पात्री पात्रः पात्रं भोजनसाधनम् । पुटी पुटः पुटमाच्छादनम् । वाटी वाटो वाटं शाकाद्युत्पत्तिस्थानम् । पेटी पेटः पेटं मञ्जूषा[2] । कुवली कुवलः कुवलं बदरी[3] । दाडिमी दाडिमः दाडिमं विदलम् ।।

इति त्रिलिङ्गशेषप्रकरणम्

[1] J2, K2 omit. [2] संहतिः K3, K6. [3] बदरीवृक्षः K6.

(विव.) त्रिषु पात्री––कुवलदाडिमौ । पात्रादयः षट् शब्दाः लिङ्गत्रयेऽपि भवन्ति । यथा––पात्रः पात्री पात्रम्, भाजनम् । पुटः पुटी पुटम्, पलाशपत्रादिरचितं[1] द्रव्याधारपात्रम् । [2]पट इति पाठे वस्त्रम् । '[3]विस्तारयन्ति कुशलाश्चित्रां वाचं [4]पटीमिव' इति माघकाव्ये (शिशु. २. ७४) । वाटः वाटी वाटम्, वृक्षाद्यावासस्थानम् । यथा––चूतवाटी, पुष्पवाटी इत्यादि[5] । पङ्क्ति-

वचनश्च, यथा—ब्राह्मणवाटी, विटपवाटी, विद्वद्वाटी इत्यादि । पेटः पेटी पेटम्, वस्त्रादिरक्षणार्थं दारुवेणुवेत्रादिनिर्मितं मञ्जूषाख्यम् । स्त्रियां तु गौरादित्वाद् ङीष् । कुवलदाडिमशब्दौ विशेषवाचिनौ स्त्रियां ङीबन्तौ । अजादिपाठाच्च पेटा इति टाबन्तोऽप्यस्ति[6] ।।

इति त्रिलिङ्गशेषः

[1] B5, B6 omit °आदि°.　[2] पटी Tj1, Tj2.　[3] प्रसारयन्ति इति मु. ग्र.
[4] पटीयसीं B6.　[5] इतिवत् B5.　[6] पाति । ष्ट्रन् (उ. ४. १८६) [पात्री]; पुटति । 'इगुपध. . . .' इति कः । गौरादिः [पुटी]; वाटयते । ण्यन्तः । कर्मणि घञ् [वाटी]; पिट्यते । घञ् । जातित्वात्, गौरादित्वाद्वा ङीष् [पेटी]; कौ वलति । पचाद्यच् [कुवली]; दलनम् । घञ् । दालेन निर्वृत्तः । 'भावप्रत्ययान्तादिमप्' (वा. ४. ४. २०) । डलयोरेकत्वम् [दाडिमी] इति भा. दी. (पृ. ५२६-३०).

(पा.) त्रिषु पात्री—कुवलदाडिमौ । [1]पात्र्यादयः त्रिलिङ्गाः । पात्री पात्रः पात्रम् । पुटी पुटः पुटम् । पुटी पुष्पकरण्डः । 'पुव्वुलकरेडु' । 'करण्डी तु पुटी त्रयी' इति वैजयन्ती (पृ. १३८, श्लो. ३३) । [2]वाटी [3]शाकाद्यारामः । 'कूरगायलतोंट' । 'पुष्पवाटी त्वमात्यादेस्त्रयी वाटी फलाय चेत्' इति वैजयन्ती (पृ. ४५, श्लो. ४) । पेटी पेटः पेटम्, पेटिका । 'पेट्टि' । [4]कुवलं वदरम्[5] । दाडिमी दाडिमः दाडिमम्, 'दाडिम्वम्' ।।

इति त्रिलिङ्गशेषः

[1] पात्रादयः B3, G1.　[2] B3 adds वाटः वाटम्.　[3] शलाटूनाम् A1.
[4] B3 adds कुवलः कुवली.　[5] वदरी B3, G1.

परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ।। ४२ ।।

(वि.) परलिङ्गं—अपि तत् । अथ परलिङ्गप्रकरणम्[1] । स्वप्रधाने द्वन्द्वे इतरेतरयोगद्वन्द्वसमासे[2] तत्पुरुषसमासे च[3] उत्तरपदस्य यल्लिङ्गं तद्भवति । द्वन्द्वस्योदाहरणानि—पार्वतीपरमेश्वरौ । जायापती । कुक्कुटमयूर्यौ । [4]मयूरीकुक्कुटावित्यादि । तत्पुरुषे यथा—अर्धं पिप्पल्याः अर्धपिप्पली । अर्धं कोशातक्याः अर्धकोशातकी । वृक्षशाखेत्यादि ।। ४२ ।।

इति परलिङ्गशेषप्रकरणम्

[1] परलिङ्गशेषः J2. [2] °समासेऽपि K2, K4. [3] परलिङ्गम् K3. [4] मयूर° K5, K6.

(विव.) [1]अनेकलिङ्गपदात्मकसमासरूपं प्रातिपदिकं किंलिङ्गकमिति जिज्ञासायामिदमारभ्यते––परलिङ्गं––तत्पुरुषेऽपि च । समाहारद्वन्द्वस्य नपुंसकलिङ्गत्वात् तद्व्यवच्छेदार्थं स्वप्रधान इत्युक्तम् । समाहारद्वन्द्वो हि समस्यमानपदार्थैः गम्यमानसमुदाये तात्पर्यान्न स्वप्रधानः । इतरेतरद्वन्द्वस्तु समस्यमानपदार्थेषु तात्पर्यात् स्वप्रधानः । तथाभूतद्वन्द्वे इतरेतरयोगलक्षणे तत्पुरुषसमासे च परस्य पदस्य यल्लिङ्गं तद्[2] भवतीत्यर्थः । तदुक्तम्––'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) इति । यथा––पार्वतीपरमेश्वरौ । पृथिव्यप्तेजोवाय्वाकाशानि । कुक्कुटमयूर्यौ । मयूरीकुक्कुटाविमौ । तत्पुरुषे यथा––नीलं च तदुत्पलं च नीलोत्पलम् । मुखमेव चन्द्रो मुखचन्द्रः । ग्रामं प्राप्तः ग्रामप्राप्तः । शङ्कुलया खण्डः शङ्कुलाखण्डः । रुद्राय बलिः रुद्रबलिः । चोराद् भयं चोरभयम् । देवदत्तस्य कन्या देवदत्तकन्या । अर्धं पिप्पल्याः अर्धपिप्पली । अक्षेषु शौण्डः अक्षशौण्डः इत्यादि ।। ४२ ।।

इति [3]परलिङ्गप्रकरणम्

[1] Tv adds अथ परलिङ्गप्रकरणम्. [2] तद्वद्भवति B5. [3] इत्युत्तरप्रकरणम् Tj1.

(पा.) परलिङ्गं स्वप्रधाने द्वन्द्वे । इतरेतरयोगद्वन्द्वे[1] परवल्लिङ्गं स्यात् । कुक्कुटमयूर्यौ । मयूरीकुक्कुटौ । तत्पुरुषेऽपि तत् । तत्पुरुषविशेषेऽपि तद्वत् इति परवल्लिङ्गः स्यात् । कुलविप्रः, विप्रकुलम् । [2]स्वप्रधान इति वचनाद् अत्र न । पाणिपादमित्यादि ।। ४२ ।।

इति परलिङ्गशेषः

[1] A1 omits °योग°. [2] A1 omits the sentence.

अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थे द्विगुः संख्यासर्वनामतदन्तकाः ।। ४३ ।।

(वि.) अर्थान्ताः । अर्थशब्दान्ताः परोपगा वाच्यलिङ्गा भवन्ति । अर्थान्ता यथा––ब्राह्मणाय धनं ब्राह्मणार्थं धनम् । संतानाय संतानार्थो विधिः । भटाय

भटार्था भृतिः इत्यादि ।। प्राद्यलंप्राप्तापन्नपूर्वा परोपगाः । प्रादयश्च अलंशब्दश्च[1] प्राप्तशब्दश्च आपन्नशब्दश्च येषां समासशब्दानां [2]पूर्वपदानि भवन्ति ते परोपगाः विशेष्यनिघ्ना भवन्ति । प्रादिपूर्वा यथा—प्रगत आचार्यो यस्य प्राचार्यः । प्राचार्या नर्तकी । प्राचार्यं शिष्यकुलम् । एवं कोकिलया अवशिष्टं अवकोकिलं पुष्पम् । अवकोकिला कलिका । अवकोकिलः कुड्मलः । परिश्रान्तोऽध्ययनाय पर्यध्ययनो माणवकः । पर्यध्ययना शिष्यसंहतिः । पर्यध्ययनं शिष्यकुलम् इत्यादि । अलंपूर्वा यथा—अलं जीवनाय, अलंजीवनः कोशः । अलंजीवना भूः । अलंजीवनं धनमित्यादि । प्राप्तपूर्वा यथा—[3]प्राप्तो जीविकां प्राप्तजीविकः पुरुषः । प्राप्तजीविका स्त्री । प्राप्तजीविकं नटकुलमित्यादि । आपन्नपूर्वा यथा—आपन्नं सत्त्वमापन्नसत्त्वः । आपन्नसत्त्वा सिंही । आपन्नसत्त्वं [4]भटकुलमित्यादि ।।

तद्धितार्थो द्विगुः । तद्धितार्थो द्विगुसमासः परोपगो भवति । अत्रोदाहरणानि —पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः, पञ्चकपाला, पञ्चकपालमित्यादि ।। संख्यासर्वनामतदन्तकाः । [5]संख्यावाचिनः शब्दाः परोपगा भवन्ति । एको घटः[6] । एका शाटी । एकं मित्रमित्यादि । द्वौ कुचौ । द्वे स्त्रियौ । द्वे लोचने । त्रयः पुरुषाः । तिस्रः स्त्रियः । त्रीणि फलानि । चत्वारः समुद्राः । चतस्रो विद्याः । चत्वारि पदानि इत्यादि । सर्वनामशब्दाः संख्यान्ताः सर्वनामान्तशब्दाश्च परोपगा भवन्ति । उदाहरणानि—सर्वः पुमान् । सर्वा नारी । सर्वं जगत् । विश्वो जनः । विश्वा जनता । विश्वं कुलमित्यादि ।। [7]संख्यान्ता यथा—द्वित्राः पुरुषाः । द्वित्राः स्त्रियः । द्वित्राणि पदानि । एवं द्विचतुराः, त्रिचतुराः, पञ्चषाः इत्यादि । सर्वनामान्ता यथा—आभ्यामन्यः तदन्यः । तदन्या स्त्री । तदन्यं कुलमित्यादि[8] ।। ४३ ।।

[1] K5 adds °आदिशब्दश्च.　[2] पूर्वपूर्व° K3, K4.　[3] K6 omits the two words.　[4] नटकुलम् K4, K6.　[5] J2 adds संख्याः.　[6] नटः J2.　[7] J2 adds तदन्तकाः शब्दाः.　[8] °आद्यूह्यम् J2.

(विव.) अथ विशेष्यनिघ्नशेषः । अर्थान्ताः । अर्थशब्दोऽन्तो येषां चतुर्थीसमासान्ते अर्थान्ताः । अर्थशब्दान्ताः चतुर्थीसमासाः परोपगा इत्युत्तरवाक्यस्थं पदमेतत्प्रकरणस्थैः पूर्वोत्तरवाक्यैः यथायोगं संबध्यते । विशेष्यनिघ्ना इत्यर्थः । तदुक्तम्—'अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या' (वा. २. १. ३६)

इति । यथा—ब्राह्मणार्थः सूपः । ब्राह्मणाय सूप इत्यर्थः । जलार्था वापी । जलार्थमुदपानमित्यादि ॥ प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः । प्राद्यन्यतमोपसर्गपूर्वकाः, अलंशब्दपूर्वाः, प्राप्तपूर्वकाः, आपन्नपूर्वकाश्च परोपगा भवन्ति । अत्र परशब्देन श्रेष्ठवाचिनः प्रधानभूतं विशेष्यं विवक्षितम् । तेन च तल्लिङ्गं लक्ष्यते । परलिङ्गमुपगच्छन्तीति परोपगाः । विशेष्यवाचकशब्दानुसारिलिङ्गवचना इत्यर्थः । अथवा परशब्दोऽन्यार्थः । अन्याधीनलिङ्गाः, न तु स्वाधीनलिङ्गा इत्यर्थः । कस्यान्यस्य लिङ्गमनुसरतीत्याकाङ्क्षायां संनिधिप्रयुक्तस्य स्वावच्छेद्यस्य विशेष्यस्यैवेत्यवगम्यते । क्रमेणोदाहरणानि—अतिक्रान्तः खट्वाम् अतिखट्वः पुरुषः । अतिखट्वा स्त्री । अतिखट्वं कलत्रमिति । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा. २. २. १८) इति समासः । अवकृष्टः[1] कोकिलया अवकोकिलः पुष्पस्तबकः । अवकोकिला मञ्जरी । अवकोकिलं फलम् इत्यादि । 'अवादयः [2]कृष्टाद्यर्थे तृतीयया' (वा. २. २. १८) इति समासः । परिश्रान्तोऽध्ययनाय पर्यध्ययनो माणवकः । पर्यध्ययना वटुसंहतिः । पर्यध्ययनं कठवृन्दम् इति । 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा. २. २. १८) इति [3]समासः । निष्क्रान्तो ग्रामाद् निर्ग्रामः पशुगणः । निर्ग्रामा सेना । निर्ग्राममजाविकुलम् । प्रच्युतः आचारात् प्राचारो ब्राह्मण इति । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या (वा. २. २. १८) इति समासः । अलं जीविकायै अलंजीविको ग्रामः[4] । अलंजीविका भूमिः । अलंजीविकं धनमित्यादि । आकृतिगणत्वेन अलंशब्दस्य पर्यादिष्वनुप्रवेशात् 'पर्यादयः ग्लानाद्यर्थे चतुर्थ्या' (वा. २. २. १८) इति समासः । प्राप्तो धनं प्राप्तधनः पुत्रः । प्राप्तं गर्भं प्राप्तगर्भा पत्नी । प्राप्तं धनं प्राप्तधनं विप्रवृन्दम् । आपन्नो ग्राममापन्नग्रामः पुरुषः[5] । आपन्नग्रामा स्त्री । आपन्नग्रामं कलत्रम् इत्यादि । 'प्राप्तापन्ने च द्वितीयया' (२. २. ४) इत्युभयत्र समासः ॥

तद्धितार्थे द्विगुः । परोपग इति वचनविपरिणामेनानुषज्यते । 'तद्धितार्थोत्तरपदसमाहारे च' (२. १. ५१) इति सूत्रेण संख्यावाचिशब्दानां समानाधिकरणेन यो द्विगुसमासः तद्धितार्थे विषयभूते तद्धितप्रत्यये कर्तव्ये सति विशेष्यनिघ्न इत्यर्थः । यथा—पञ्चकपालः पुरोडाशः । एककपालं हविरित्यादि । अत्रोत्पन्नस्य तद्धितस्य 'द्विगोर्लुगनपत्ये' (४. १. ८८) इति लुकि कृते द्विगोरणाद्यन्ताभावात् तस्य परोपगत्वं न स्यात् इति शङ्कां वारयितुमिदमारब्धम् । अर्थान्तरविहितद्विगोः परोगत्वाभावात् तद्धितार्थ इत्युक्तम् ॥

संख्यासर्वनामतदन्तकाः । संख्यावाचिनः शब्दाः, संख्यान्तशब्दाः, सर्वनामशब्दाः, सर्वनामान्तशब्दाश्च इति चतुर्विधाः परोपगा इति संबन्धः । अत्र संख्यावाचिनां मध्ये 'तासु चानवतेः स्त्रियः' (१, पृ. ६०३) इति विंशत्यादीनां स्त्रीलिङ्गत्वमुक्तं वैश्यवर्गे । शतादीनां त्वत्रैव वर्गे 'कोट्याः शतादिः संख्यान्या' (पृ. ७०८, श्लो. २४) इत्यादिना नपुंसकत्वमुक्तम् । अतोऽत्र संख्याशब्देन एकाद्या अष्टाविंशान्ता बहुशब्दश्च गृह्यन्ते । ननु—अत्रापि 'षट्संज्ञकास्त्रिषु समा' (श्लो. ४६) इति पञ्चन्नादीनामष्टादशान्तानां त्रिलिङ्गत्वावगमात् प्रकृते संख्याशब्देन एकादिचतुरन्तानामेव ग्रहणमिति वाच्यम् । पञ्चन्नादीनां तत्प्रायपठिततिङव्ययसाधारण्याद् अलिङ्गत्वप्रतिपादनमात्रेणापि वक्ष्यमाणवाक्यार्थपर्यवसानस्य वक्तुं शक्यत्वात् । तर्हि 'संख्याः संख्येये ह्यादश त्रिषु' (१, पृ. ६०२) इत्यनेन पौनरुक्तयं स्यादिति चेत् सत्यम् । तत्रैकादिसंख्यानां त्रिलिङ्गत्वमात्रमुक्तम् । न तु परोपगत्वमिति । तच्च त्रिलिङ्गम् । तटमण्डलादिशब्दवदाविष्टलिङ्गत्वेनाप्युपपद्यत इति परोपगत्वमिदानीमुच्यत इति सर्वं सुस्थम्[6] ।।

संख्याशब्दे यथा—एको घटः । एका वापी । एकं गृहम् । द्वौ घटौ । द्वे जाये । त्रयो लोकाः । तिस्र आहुतयः । त्रीणि सवनानि । चत्वार ऋत्विजः । चतस्रो दिशः । चत्वारि कृष्णलानि इत्यादि । सर्वनामशब्दाः द्विविधाः सर्वादयः प्रथमचरमादयश्च इति । तत्राद्या यथा—सर्वे जनाः । सर्वा पृथिवी । सर्वं जगत् । विश्वे देवाः । विश्वा आशाः । विश्वानि भुवनानि । प्रथमः सर्गः । प्रथमा सृष्टिः । प्रथमं कलत्रम् । पूर्वः पुरुषः । स्वं कलत्रम् इत्यादि । संख्यान्ता यथा—परमैकः पुरुषः । परमत्रयो नराः । परमतिस्रो नार्यः इति । सर्वनामान्ता यथा—परमसर्वः पुमान् । परमसर्वा नारी । परमसर्वं कुलमित्यादि ।। ४३ ।।

[1] अवक्रुष्टः Tv. [2] क्रुष्टाद्यर्थं Tv; मुद्रितकाशिकायां च (१, पृ. १०४). [3] B5, B6 add चतुर्थी . [4] ब्राह्मणः Tv. [5] देवदत्तः Tj1, Tj2. [6] गिद्धम् Gm1, Gm3.

(पा.) अर्थान्ताः—परोपगाः । अर्थान्ताश्च प्रादिप्रभृतिपूर्वकाश्च वाच्यलिङ्गाः स्युः । अर्थान्तानां यथा—ब्राह्मणाय ब्राह्मणार्था यवागूः । ब्राह्मणार्थः सूपः । [1]ब्राह्मणार्थं भक्ष्यम् । प्रादिप्रभृतिपूर्वकाणां यथा—प्रगत आचार्योऽस्याः प्राचार्या । अतिक्रान्तः खट्वाम् अतिखट्वः[2] । अलं जीविकायै अलंजीविकः[3] । प्राप्तजीविकः ।

आपन्नो जीविकामापन्नजीविकः[4] इत्यादि ।। तद्धितार्थे द्विगुः । तद्धितार्थद्विगुर्वाच्यलिङ्गः । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः । पञ्चकपाला अपूपिका ।। संख्यासर्वनामतदन्तकाः । संख्याश्च सर्वनामानि च [5]संख्यासर्वनामान्ताश्च वाच्यलिङ्गाः । संख्यायां यथा––एका, एकः, एकम् । सर्वनाम्नो यथा––सा, सः, तत् । तदन्तानां यथा––ऊनास्तिस्रो यासां ताः ऊनतिस्रः, ऊनत्रयः । सर्वनामान्ता यथा––एकामतिक्रान्तः[6] अत्येकः, अत्येका, अत्येकम्; द्वाभ्यामन्या द्व्यन्या, द्व्यन्यः, द्व्यन्यमित्यादि ।। ४३ ।।

[1] A1 omits. [2] B3, C1 add अतिखट्वा. [3] अलंजीविका B3. [4] आपन्नजीविका B3. [5] तदन्ताश्च C1. [6] A1 omits.

बहुव्रीहिरदिग्नाम्नामुन्नेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ।। ४४ ।।

(वि.) वहुव्रीहिरदिग्नाम्नाम् । दिङ्नामव्यतिरिक्तानां शब्दानां यो वहुव्रीहिसमासः[1] स परोपगो भवति । अत्रोदाहरणानि––चित्रः पटो यस्य चित्रपटो जनः । चित्रपटा सेना[2] । चित्रपटं सद इत्यादि ।। उन्नेयं तदुदाहृतम् । [3]शेषाणाम् 'अर्थान्ताः' इत्यादीनामेतदन्तानामुदाहरणमुन्नेयम् । गुणद्रव्य––परगामिनः । गुणश्च द्रव्यं च क्रिया च तेषां योगः संवन्धः, स एवोपाधिर्येषां शब्दानां ते शब्दाः परगामिनो वाच्यलिङ्गा भवन्ति । गुणयोगोपाधयो यथा––शुक्लः पटः । शुक्ला शाटी । शुक्लं वस्त्रमित्यादि । द्रव्ययोगोपाधयो यथा––दण्डी पुरुषः । दण्डिनी स्त्री । दण्डि सैन्यमित्यादि । क्रियायोगोपाधयो यथा––पाचकः पुरुषः । पाचिका[4] स्त्री । [5]पाचकं कुलमित्यादि ।। ४४ ।।

[1] K5 omits °समासः. [2] J2, K3 add चित्रपटा सभा. [3] तेषामर्थानां K5; एषां° K6. [4] पचका K6. [5] पाचिकं K5.

(विव.) बहुव्रीहिरदिङ्नाम्नाम् । [1]अदिङ्नाम्नां दिङ्नामव्यतिरिक्तानां यो बहुव्रीहिः स परोपगो भवति । चित्रः पटो यस्य सः चित्रपटः पुरुषः । चित्रपटा सेना । चित्रपटं कलत्रम् । वीरपुरुषो ग्रामः । वीरपुरुषं पुरम् । कण्ठे कालो यस्य कण्ठेकालः । कण्ठेकाला मूर्तिरित्यादि । 'अनेकमन्यपदार्थे' (२. २. २४) इति

बहुव्रीहिसमासः। अदिङ्नाम्नामिति किम्? दक्षिणपूर्वा। दक्षिणपरा। उत्तरपूर्वा। उत्तरपरा इत्यादि। अत्र 'दिङ्नामान्यन्तराले' (२. २. २६) इति सूत्रेण अवान्तरदिशि वाच्ये बहुव्रीहिविधानाद् अवान्तरदिशां च केवलस्त्रीलिङ्गवाच्यत्वेन चित्रपटादिवत् परोपगनिवृत्त्यर्थम्। अत एव काशिकाकारेण (१, पृ. १०७)— 'दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा दिक्। एवं पूर्वोत्तरा, उत्तरपश्चिमेति' केवलस्त्रीलिङ्गान्येवोदाहरणानि दर्शितानि॥

इह वर्गे कतिचिल्लिङ्गलक्षणानां कानिचिदुदाहरणानि मूलग्रन्थ एवोक्तानि। यत्र तु 'अर्थान्ताः' (श्लो. ४३) इत्यादौ लक्षणमात्रमेवोक्तम्, तत्र लक्ष्याणामुन्नेतुं शक्यत्वात् तन्मात्रमेवोक्तमित्यभिप्रायेणाह—उन्नेयं तदुदाहृतम् इति। एकवचनमविवक्षितम्। तेषामदर्शितलक्ष्याणामुदाहरणमुन्नेयमुन्नेतुं शक्यमित्यर्थः। अथवा—चित्रगुः, चित्रपटः, इत्यादीनामेव बहुव्रीहित्वेनाबालं प्रसिद्धत्वात् परोपगत्वबुद्धेस्तन्मात्रविश्रान्ततापरिहारेण व्याकरणलक्षणसिद्धबहुव्रीह्यन्तराण्यपि परोपगत्वेनोदाहर्तव्यानीत्यमुमर्थं सूचयितुं बहुव्रीहिप्रकरण एवोन्नयनस्य कर्तव्यताकथनं कृतमित्यनुसंधेयम्।

तथा हि —'संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये' (२. २. २५) इति बहुव्रीहिः। यथा—उपगता दश उपदशाः घटाः। उपदशा इमा नार्यः। उपदशानीमानि फलानि। उपविंशाः। आसन्नविंशाः। अदूरदशाः। अधिकदशाः। अधिकविंशाः। एको वा द्वौ वा एकद्वाः शूराः। द्वौ वा त्रयो वा द्वित्राः। त्रिचतुराः। चतुःपञ्चा इत्यादि॥ 'तेन सहेति तुल्ययोगे' (२. २. २८) इति बहुव्रीहिः। यथा—पुत्रेण सहागत[2] इति सपुत्रः। सशिष्यः। सवधूकः। सभर्तृका योषित इति॥ 'प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः' (वा. २. २. २४)। यथा—प्रगत आचार्यो यस्य प्राचार्यः शिष्यः। प्राचार्या नर्तकी इत्यादिकमुन्नेयमिति॥

गुणद्रव्य—परगामिनः। योगः संबन्धः। गुणसंबन्धः, द्रव्यसंबन्धः, क्रियासंबन्धो वा येषां शब्दानां प्रवृत्तिनिमित्तम्, तैः प्रवृत्तिनिमित्तैर्हेतुभूतैः ये शब्दाः,[3] ते शब्दाः परोपगाः इत्यधिकृतेन संबन्धः। उपाधय इति पाठे बहुव्रीहिसमाश्रयणेन [4]शब्दपरत्वेन योज्यम्। अत्र योगपदं प्रयुञ्जानस्यायमभिप्रायः। यदा गुणद्रव्यादिव्यक्तयस्तद्गताकृतयो वा [5]मतभेदेन शब्दानां प्रवृत्तिनिमित्तानि भवन्ति, यदा न

वाच्यलिङ्गत्वम्, तदा न गुणलिङ्गत्वम्। अत एव 'गुणे शुक्लादयः पुंसि'[6] (१, पृ. १०१), 'क्लीबे शीघ्राद्यसत्त्वं स्यात्' (१, पृ. ४६) इत्यादिना तत्तत्प्रस्तावे शुक्लादिशब्दानां स्वप्रधानत्वेन[7] नियतलिङ्गत्वमुक्तम्। यथा—पटस्य शुक्लः। अपां शुक्लो रूपम्। हिमस्य शीतम्। गुडस्य मधुरो रसः। 'मनोऽधिकं शीघ्रमिहाश्ववृन्दम्' इत्यत्र यथातथात्व एव शब्दाः मतुब्लोपाद् अभेदोपचाराद्वा सामानाधिकरण्येन गुणिनि वर्तन्ते। तथा गुणयोगोपाधिनैव विशेष्यनिघ्नः। यथा शुक्लः पटः। शुक्ला शाटी। शुक्लं वस्त्रम्। शीतो वायुः। शीता आपः। शीतं जलमित्यादि।

किं च येषां समर्थकुशलनिपुणादिशब्दानां [8]सर्वत्रापि परप्रधानत्वेन केवलं धर्मिसामानाधिकरण्येनैव प्रयोगः, तेषामप्युत्साहविवेचकत्वादिगुणयोग एव वाच्यलिङ्गत्वे निमित्तम्। यथा—समर्थः कुशलश्च पुरुषः। समर्था सेना। समर्थं कलत्रमित्यादि। येषां रूपरसादिशब्दानां सर्वथा स्वार्थप्रधानतया धर्मिणा सह वैयधिकरण्येनैव प्रयोगः, तेषामपि स्वार्थप्रवृत्तौ रूपत्वरसत्वादिरेव प्रवृत्तिनिमित्तत्वेन गुणयोगलक्षणोपाधेरभावाद् न [9]वाच्यलिङ्गत्वशङ्कावकाशः। न च रूपरसादिशब्दानां शुक्लादिशब्दवदेव मतुबारोपाद्वा अर्शआदित्वाद्वा अभेदोपचाराद्वा धर्मिसामानाधिकरण्यमस्तीति वाच्यम्। अनभिधानशिरस्कत्वात् सामानाधिकरण्ये। अभिधानलक्षणा हि कृत्तद्धितसमासा इति शाब्दिकन्यायः। यथा च ततो रूपरसादिशब्देभ्यो मत्वर्थीयप्रत्ययोत्पत्त्या धर्मिपरत्वेन श्रूयते। तथा गुणयोगलक्षणोपाधिसद्भावात् तेषां परोपगत्वमप्रतिहतमेव। यथा रूपवान् पुत्रः। रूपवती भार्या। रूपवत् कलत्रम्। गन्धवान् वायुः। गन्धवती पृथिवी। ज्ञानी मुनिः। ज्ञानवान् मुनिः। [10]स्मृतिमानित्यादि।

द्रव्ययोगे यथा—दण्डी देवदत्तः। दण्डिनी स्त्री। दण्डि यदुकुलमिति। क्रियायोगे[11] यथा—'क्रियां कुर्वद्धि कारकम्' इति क्रियायोगः कारकमात्रस्यास्ति। तत्र कर्तरि यथा—वाचकः पुरुषः। वाचिका जाया। वाचिकं कलत्रम् इति। कर्मणि यथा—पचति स्म पक्वमन्नम्। पक्वा शष्कुली। पक्व ओदन इति। करणे यथा—वृश्चते येन वृश्चिकः परशुः। वृश्चनं शस्त्रम्। वृश्चनी शस्त्री। अपादाने यथा—यो बिभेति यस्मात् स भीमः पुरुषः। भीमो राक्षसः। भीमं दुर्गम्। अधिकरणे यथा—पच्यतेऽत्रेति पचनः पिठरः। पचनी स्थाली। पचनं कुण्डमित्यादि ॥ ४४ ॥

[1] B5, B6 add उत्तरपूर्वा इत्यादि. [2] वर्तते Tv. [3] B5, B6 add परगामिनः प्रधानभूतस्य न यस्यार्थः स विशेषः. [4] विशेषणत्वेन Tv. [5] Gm1, Gm3 omit मतभेदेन. [6] Tj1 adds रसाः पुंसि सितं गुणे. [7] स्वप्रधानतया Tj2. [8] सर्वथापि Tj2. [9] °लिङ्गशङ्का° Gm3. [10] Tj2 omits. [11] क्रियायोगेन Gm3.

(पा.) बहुव्रीहिरदिग्नाम्नाम् । अदिङ्नाम्नां बहुव्रीहिर्वाच्यलिङ्गः । चित्रा गावो यस्य चित्रगुः पुमान्, चित्रगुः स्त्री । अदिग्नाम्नामित्यनेन [1]दिङ्नामबहुव्रीहौ न भवति । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा । पूर्वोत्तरा इत्यादि ।। गुणद्रव्य––परगामिनः । गुणद्रव्यक्रियाभिः [2]योगोपाधयः योगप्रवृत्तिनिमित्तभूतशब्दा वाच्यलिङ्गाः । शुक्लः पटः । शुक्ला पटी । शुक्लं पटम् । दण्डिनी गोपालिका । दण्डी गोपालकः । [3]दण्डि गोपकुलम् । पाचिका देवदत्ता । पाचको देवदत्तः । पाचकं कलत्रमित्यादि ।। ४४ ।।

[1] दिक्समास° B3. [2] A1 omits. [3] A1 omits the sentence.

कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ।। ४५ ।।

इति वाच्यलिङ्गशेषः

(वि.) कृतः कर्तर्यसंज्ञायाम् । असंज्ञायां कर्तृकारके विहिताः कृतः[1] कृत्संज्ञकाः परगामिनो भवन्ति । उदाहरणानि––भर्ता, भर्त्री, भर्तृ । साधकः, साधिका, साधकमित्यादि । कृत्याः कर्तरि कर्मणि । कर्तरि कर्मणि च कारके विहिताः कृत्यप्रत्ययान्ताः शब्दाः असंज्ञायां वर्तमानाः परगामिनो वाच्यलिङ्गा भवन्ति । कर्तरि कृत्यप्रत्ययान्तो यथा––वास्तव्या विप्राः । वास्तव्या लक्ष्मीः । वास्तव्यं [2]धनमित्यादि । कर्मणि कृत्यप्रत्ययान्तो यथा––कर्तव्यः कटः । कर्तव्या [3]शाटी । कर्तव्यं वस्त्रमित्यादि ।। अणाद्यन्तास्तेन रक्ताद्यर्थे । तेन रक्तमित्येतस्मिन्नर्थे आदिग्रहणात् तेन [4]युक्तमित्यर्थे च विहिता [5]अणादिप्रत्ययान्ताः शब्दा असंज्ञायां वर्तमानाः परगामिनः स्युः । अण्प्रत्ययो यथा––[6]काषायः पटः । काषायी पटी[7] । काषायं वस्त्रमित्यादि । ठक्प्रत्ययो यथा––लाक्षया रक्तः पटः लाक्षिकः । लाक्षिकी । लाक्षिकम् इत्यादि ।। नानार्थभेदकाः । ये नानार्थानां भेदकाः ते

शब्दाः परगामिनो भवन्ति । अत्रोदाहरणानि—शिवो रुद्रः । शिवा गौरी । शिवं [8]भद्रमित्यादि ।। ४५ ।।

इति वाच्यलिङ्गशेषप्रकरणम्

[1] K₅ adds कृत्प्रत्ययान्ताः शब्दाः. [2] कुलम् J2. [3] पटी J2. [4] तेन प्रोक्तम् J2. [5] K4 adds ठक्. [6] J2, K4 add कषायेण रक्तः काषायः. [7] शाटी J2, K3. [8] रत्नम् K4.

(विव.) कृतः कर्तर्यसंज्ञायाम् । कर्तृकारकविहिताः कृत्प्रत्ययान्ताः संज्ञाव्यतिरिक्तार्थाः परोपगा भवन्ति । यथा—सुखकरो वायुः । सुखकरी वृष्टिः । सुखकरं सज्जनसंभाषणमित्यादि । कर्तरि यथा—कर्ता, कर्त्री, कर्तृ इत्यादि । असंज्ञायामिति किम्? हिनस्तीति सिंहः । व्याजिघ्रतीति व्याघ्रः इत्यादीनां परोपगत्वं मा भूत् ।। कृत्याः कर्तरि—नानार्थभेदकाः । 'तव्यत्तव्यानीयरः' (३. १. ९६) इत्यादिपाणिन्याचार्यपठिताः चित्याग्निचित्यादयश्च (३. १. १३२) कृत्यसंज्ञकाः । तदन्ताः परोपगा भवन्ति । ते च कृत्याः कर्तरि कर्मणि वा भवन्ति । अत्राप्यसंज्ञायामित्येव । कर्तरि यथा—'वसेस्तव्यत् कर्तरि णिच्च' (वा. ३. १. ९६) इति वास्तव्यो विप्रः । वास्तव्या लक्ष्मीः । वास्तव्यं ब्राह्मणवृन्दम् । 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापत्या वा' (३. ४. ६८) इति । भवतीति भव्यम् । गायतीति गेयम् । गेयो माणवकः साम्नामित्याद्युदाहरणानि द्रष्टव्यानि (काशिका. १, पृ. २५२) ।

कर्मणि कृत्या यथा—'तयोरेव कृत्यक्तखलर्थाः' (३. ४. ७०) इति । तयोः भावकर्मणोरित्यर्थः । पक्तव्यास्तण्डुलाः । पक्तव्यं पायसम् । पचनीय ओदनः । पचनीया यवागूः इति । 'अचो यत्' (३. १. ९७) इति यत्प्रत्ययः । वह्यो रथः । वह्या अशीतिः । वह्यं शतमित्यादौ करणार्थेऽपि कृत्यप्रत्ययान्तस्य परोपगत्वमस्ति । अणाद्यन्ता इति । अत्राप्यसंज्ञायामित्यनुवर्तते । अस्यार्थः—'तेन रक्तं रागात्' (४. २. १.) इत्यारभ्य 'निष्प्रवाणिश्च' (५. ४. १६०) इत्येतदन्तेषु[1] संज्ञाव्यतिरिक्तार्थेषु विहिता ये अणादयः प्रत्ययाः, तदन्ताः शब्दा नानार्थभेदकाः, अनेकेषामर्थानां भेदका विशेषेण प्रतिपादकाः सन्तः परोपगा भवन्ति । यथा—कषायेण रक्तः काषायः । कुसुम्भेन रक्तः कौसुम्भः । माञ्जिष्ट इत्यादौ 'तेन रक्तं

रागात्' (४. २. १) इत्यण् । तथा—'लाक्षारोचनाशकलकर्दमाट्ठक्' (४. २. २) इति ठक् । लाक्षिकः, रौचनिक इति । 'शकलकर्दमाभ्यामणपीष्यते' (वा. ४. २. २) इति शाकलिकः, शाकलः ; कार्दमिकः, कार्दमः इत्यादि[2] । तथा—'नील्या अन् वक्तव्यः' (वा. ४. २. २) इति । नीलः पटः । नीला शाटी । नीलं वस्त्रमित्यादि[3] ।

'नक्षत्रेण युक्तः कालः' (४. २. ३) इत्यनेन कृत्तिकाभिर्युक्तमहः कार्तिकमहः । कार्तिको दिवसः । कार्तिकी तिथिः इत्यादि । 'परिवृतो रथः' (४. २. १०) इति । वस्त्रेण परिवृतो रथः वास्त्रो रथः । 'पाण्डुकम्बलादिनिः' (४. २. ११) इति । पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली इति । 'द्वैपवैयाघ्रादञ्' (४. २. १२) इति । द्वीपिनो विकारो द्वैपम् । तेन परिवृतो रथः द्वैपो रथः । एवं वैयाघ्रः । 'सास्य देवता' (४. २. २४) इति । इन्द्रो देवता अस्येति ऐन्द्रं हविः । ऐन्द्रः पुरोडाशः । ऐन्द्री दिक् इत्यादीनि बहून्युदाहरणानि ज्ञेयानि । असंज्ञायामिति किम् ? 'सास्मिन् पौर्णमासीति संज्ञायाम्' (४. २. २१) इति संज्ञायां कन् । तस्य संज्ञाविषयत्वात् कार्त्तिको मास इति पुंलिङ्गत्वमेव । न तु अयनसंक्रान्त्यादिव्यावर्तकतया लिङ्गान्तरत्वम् । तथा—'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु' (४. २. ९६) इति । कौलेयकः सारमेयः । कौक्षेयकः खड्गः । ग्रैवेयकं कण्ठभूषा इत्यादिसंज्ञाविषये विशेष्यनिघ्नत्वाभावात् । नानार्थभेदका इति किम् ? नामैव नामधेयमित्यादौ[4] स्वार्थे कप्रत्ययानां प्रकृतिलिङ्गत्वम् । 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यप्यतिवर्तन्ते' इति । अपीति वचनात् चत्वारो वर्णाः चातुर्वर्ण्यम् । देव एव देवता इत्यादौ प्रकृतिलिङ्गातिवृत्तिरपि भवति । तथा दौस्तिकम्, औष्ट्रकम्, राजकम्, गव्या, गोत्रा, पाश्या, गल्या इत्यादीनामणाद्यन्तभेदकत्वाभावात् नियतलिङ्गत्वमेव । न तु परोपगत्वमित्यादि विवेचनीयम् ।। ४५ ।।

इति परोपगलिङ्गप्रकरणम्

[1] Gm3, Tj2 add सूत्रेषु. [2] एवं लाक्षिकं रौचनिकं शाकलिकं कार्दमिकमित्यादि Gm3, Tj2. [3] B5, B6 add 'पीतात् कन् वक्तव्यः' इति । पीतकः पटः । पीतकं वस्त्रम् । तथा 'हरिद्रामहारजनाभ्यामञ्' इत्यञ् । हारिद्रः पटः । हारिद्रा शाटी । हारिद्रं वस्त्रम् इत्यादि. [4] 'भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः' (वा. ५. ४. २५).

(पा.) कृतः कर्तर्यसंज्ञायाम् । कर्त्रर्थे विहिताः कृतो वाच्यलिङ्गाः । कर्ता, कर्त्री, [1]कर्तृ । कारकः, कारिका, कारकम् । असंज्ञायामित्यनेन संज्ञायां न भवति । हिनस्तीति सिंहः । व्याजिघ्रतीति व्याघ्रः ।। कृत्याः कर्तरि कर्मणि । कर्तृकर्मणो- विहिताः कृत्यप्रत्यया वाच्यलिङ्गाः । भव्यः, भव्या, भव्यम् । वसतीति वास्तव्यः[2] । वास्तव्यम् । क्रियत इति कर्तव्यः । कर्तव्यम् । असंज्ञायामेव । तिष्यः । सूर्यः ।। अणाद्यन्तास्तेन रक्ताः । 'तेन रक्तं रागात्' (४. २. १) इत्याद्यर्थे विहिता अणाद्यन्ता वाच्यलिङ्गाः । हरिद्रया रक्तो हारिद्रः पटः । हारिद्रं [3]वस्त्रम् । इन्द्रो देवता अस्य [4]ऐन्द्रचरुः । ऐन्द्रं हविरित्यादि । असंज्ञायामेव । कार्तिकी पौर्णमासी ।। नानार्थभेदकाः । नानार्थविशेषणानि वाच्यलिङ्गानि । पुण्यो लोकः[5] । पुण्यमहः ।। ४५ ।।

इति वाच्यलिङ्गशेषः

[1] A1 omits. [2] B3 adds वास्तव्या. [3] पटम् C1; B3 adds हारिद्री पटी. [4] B3, C1 add ऐन्द्री ऋक्. [5] पुण्या प्रजा B3.

षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ।। ४६ ।।
(इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ।।)*

* अयं श्लोकः दाक्षिणात्यव्याख्यानेषु न दृश्यते.

(वि.) षट्संज्ञकाः—तिङव्ययम् । षट्संज्ञकाः षकारान्ताः नकारान्ताः संख्याशब्दाः युष्मदस्मच्छब्दाः तिङन्ताश्च शब्दाः अव्ययसंज्ञकाश्च शब्दा त्रिषु लिङ्गेषु समा एकरूपाः । लिङ्गनिवन्धनरहिता[1] इत्यर्थः । षट्संज्ञा यथा—पञ्च बाणाः । पञ्च स्त्रियः । पञ्च फलानि । युष्मदस्मच्छब्दा यथा—त्वं पुमान् । त्वं स्त्री । त्वं नपुंसकम् इत्यादि । अहं पुमान् । अहं स्त्री । अहं नपुंसकमित्यादि । तिङन्तो यथा—स तिष्ठति । सा तिष्ठति । तत् तिष्ठति । अव्ययसंज्ञका यथा— नाना पुरुषाः । नाना स्त्रियः । नाना रूपाणि ।। परं विरोधे । अस्मिन् [2]वर्गे पूर्वापरविरोधे सति परं परलिङ्गं भवति । शेषं तु ज्ञेयं शिष्टप्रयोगतः । इहास्मिन्

लिङ्गादिसंग्रहवर्गे शेषमनुक्तं लिङ्गशेषं शिष्टप्रयोगतः वृद्धव्यवहारतो ज्ञेयम् । यथा—अयं पचति । इयं पचति । वेदाः प्रमाणमित्यादि सर्वमनवद्यम् ।। ४६ ।।

इति श्रीवङ्गलकामयभट्टोपाध्यायसूनुलिङ्गयसूरि-
विरचितायाममरकोशपदविवृतौ लिङ्गादिसंग्रहवर्गः[3]

[1] °रूपविशेषरहिताः K_4, K_5. [2] सर्गे K_4. [3] J_2 adds तृतीयकाण्डः समाप्तः । करकृतमपराधं क्षन्तुमर्हन्ति सन्तः. K_4 adds 'यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ।। K_6 adds पार्थिवाब्दे नभोमाससितकामदिने ददौ । सीतारामप्रभोर्लिङ्गाभट्टीयं केशवद्विजः ।।

(विव.) इह हि शब्दा द्विविधाः । व्यक्तलिङ्गाः, अव्यक्तलिङ्गाश्च । तत्र व्यक्तलिङ्गानामनुशासनं कृतम् । अन्येषामप्यभिधेयतया [1]प्रतिज्ञाताया अनभिधाने लिङ्गानुशासनपूर्णतोक्तेर्व्याहतिः स्यादिति मन्वानः संप्रत्यलिङ्गान्[2] निरूपयति—षट्संज्ञकाः—तिङव्ययम् इति । 'ष्णान्ता षट्' (१. १. २४), 'डति च' (१. १. २५) इति सूत्रद्वयेन पाणिन्यादिभिराचार्यैः षकारान्तस्य षट्शब्दस्य नकारान्तानां [3]पञ्चादीनामष्टादशपर्यन्तानां कतिशब्दस्य च षट्संज्ञया व्यवहारः कृतः । 'तिप् तस् झि' इत्यादीनां [4]लादेशानामष्टादशानां प्रत्ययानां 'तिङ' इति संज्ञा परिभाषिता । तदुभयानुसारेणेदमुच्यते । [5]षट्संज्ञकाः शब्दाः युष्मदस्मच्छब्दाश्च तिङन्ताश्च अव्ययसंज्ञकाश्च त्रिषु लिङ्गेषु[6] समाः एकरूपाः, लिङ्गभेदनिबन्धनरूपविशेषरहिता इत्यर्थः । यथा—षट् कुम्भाः । षड् योषितः[7] । षट् कुण्डानि[8] । इमे पञ्च । इमाः[9] पञ्च । इमानि[10] पञ्च । दश पुत्राः । दश योषितः । दश कलत्राणि इत्यादि । 'संख्यासर्वनामतदन्तकाः' (श्लो. ४३) इति परोपगप्रकरणोक्तानामेव केषांचित् संख्यासंज्ञादिशब्दानां लिङ्गत्रयेऽप्यैकरूप्याद् अव्यक्तलिङ्गत्वेनेहाभिधानमित्यवधेयम् ।

तथा त्वं पुमान् । त्वं भार्या । त्वं नपुसकम् । अहं पुमान्[11] । अहं भार्या[12] । अहं कलत्रम् । अयं पचति । इयं[13] पचति । इदं कलत्रं पचति । उच्चैर्वृक्षः । उच्चैः शाला । उच्चैर्गृहम् । नाना पुरुषाः । नाना स्त्रियः । नाना कुलानीत्यादि । अत्र शेषकारः—'षड्युष्मदस्मदन्ताश्च तत्प्रधानाः समास्त्रिषु' इति । तत्प्रधानाः युष्मदस्मच्छब्दप्रधानाः, षड्युष्मदस्मच्छब्दान्ताः त्रिषु लिङ्गेषु समा समाना[14]

भवन्ति । यथा——परमपञ्च । परमषट् । परमसप्त । परमत्वम् । परमाहमित्यादि । तत्प्रधाना इति किम् ? पञ्चषानिमान् पश्य । पञ्चषा इमाः पश्य । पञ्चषाणीमानि पश्येति । उपपञ्चान् । उपपञ्चाः । उपपञ्चानि । युष्मानतिक्रान्तान् अतियुष्मान् । अत्यस्मानिति ।।

इत्यलिङ्गप्रकरणम्

[1] प्रतिज्ञा पराहता स्यात् Tj1, Tj2. [2] अव्यक्तलिङ्गान् Tj2. [3] पञ्चन्नादीनाम् Tj2. [4] °लादिप्रत्ययानां Tj1. [5] षकारनकारान्ताः संख्याशब्दाः कति शब्दश्च B5, B6. [6] Gm3 omits. [7] स्त्रियः Tj1. [8] फलानि Tj1. [9] Tj1 adds स्त्रियः. [10] फलानि Tj1. [11] राजा Tj1, Tj2. [12] स्त्री Tj1, Tj2. [13] Tj2 adds स्त्री. [14] समानरूपाः Tj1.

इह ग्रन्थे लिङ्गविशेषविधेरेव[1] पूर्वविध्यपेक्षया प्राबल्यमुक्तम् । अधुना लिङ्गविशेषस्थयोरेव विध्योर्मिथो विरोधे [2]कस्य प्राबल्यमित्यपेक्षायामाह——परं विरोधे । अत्र वर्गे पूर्वापरविरोधे [3]परमेव लिङ्गं भवतीत्यर्थः । यथा——'[4]पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः' (श्लो. ११) इति । सुरासुरवाचकशब्दानां पुंलिङ्गत्वमुक्तम् । अनन्तरं तेषामेव शब्दानां 'द्विचतुःषट्पदोरगाः जातिभेदाः' (श्लो. ३७) इति स्त्रीपुंसकत्वमुक्तम् । तथा असुरपर्यायतया रक्षःशब्दस्य पुंलिङ्गत्वमुक्तम् । अनन्तरं 'द्व्यचच्कर्मसिसुसन्नन्तम्' (श्लो. २४) इति नपुंसकलिङ्गत्वमुक्तम्[5] । तयोर्विरोधे परत्वाद् नपुंसकमेव भवतीत्यादि ।।

इह आचार्यः स्वग्रन्थे नाम्नां लिङ्गानामनुशासनस्य साकल्येनाकृतत्वाद् न्यूनतादोषमाशङ्क्य 'संपूर्णमुच्यते' (१, पृ. ३) इति स्वकृतिप्रतिज्ञाया व्याहतिं परिहरति[6]——शेषं तु ज्ञेयं शिष्टप्रयोगतः इति । अयमर्थः——इहास्माभिरज्ञानाद् अस्मरणाद् [7]अत्यन्तोपयोगाभावेन ग्रन्थगौरवभयाद्वा यद् नाम्नां नानुशिष्टं तत् सर्वं शिष्टानां महाकवीनां प्रयोगानालोच्य शिष्टानुशिष्टग्रन्थानप्याकलय्य[8] सम्यगवगन्तव्यमिति[9] । यथा——विष्णुपर्यायेषु [10]मुञ्जकेशादयः शब्दा नाभिहिताः । [11]शंभुपर्यायेषु अहिर्बुध्न्यादयो नोक्ताः । समुद्रभेदेषु क्षीरोदवाचककलशाम्बुधिशब्दः परित्यक्तः । बिन्दुपर्यायेषु तुन्तुरुषशब्दो न स्मृतः । एवमादयः शब्दा बहवः तत्पर्यायानुशासनप्रस्तावेषु न गणिताः । तथा [12]वृक्षलतापक्षिसरीसृपभेदा नानुशिष्टाः ।

[1] °विधिरेव B5. [2] कथं निर्णयः Tj1. [3] परविध्युपस्थायि तमेव लिङ्गं ग्राह्यम् Tj1. [4] सुरासुरपर्यायाणां पुंलिङ्गत्वमुक्तम् Tj1. [5] उपस्थापितम् Tj2. [6] आशङ्क्य आह Tj1, Tj2. [7] उपयोगातिशयाभावेन Tj1. [8] °शिष्टप्रयोगाना° Gm3. [9] परिज्ञातव्यम् Tj1, Tj2. [10] मुञ्जकेश्यादि नाभिहितम् Tj2. [11] Tv adds अनुशिष्टेष्वपि क्वचित् क्वचित् केचन पर्याया न निबद्धाः. [12] °लताधान्य° Gm3.

तथा नानार्थवर्गेऽपि कतिचिदेव [1]नानार्थवाचकाः शब्दाः कथिताः। तेषामपि अन्त्यवर्णस्यैव नियमतो वर्गीकरणम्। वर्गान्तरस्य तदर्थानामपि कियतामेवाभिधानम्। न तु सर्वेषामर्थानाम्। तथा कोरकमौक्तिकादिशब्दानां [2]विद्यमानेऽप्यनेकलिङ्गत्वं नाभिहितम्[3]। [4]किंच लिङ्गसंग्रहेऽपि बहुवक्तव्यमस्ति। यथा—'इक्श्तिपौ धातुनिर्देशे' (वा. ३. ३. १०८) इत्यनेन धातुमात्रनिर्देशे प्रत्ययद्वयं शास्त्रे कथितम्। तदिह नोक्तम्[5]। अपि च [6]स्वार्थिकप्रत्ययानामपि कतिचिदेव नानार्थवाचकाः शब्दाः कथिताः। केषांचित् प्रकृतिलिङ्गातिवृत्तिर्दृश्यते। यथा—चत्वारो वर्णा एव चातुर्वर्ण्यम्। छन्दसामण्प्रत्यये गायत्र्येव गायत्रम्। त्रिष्टुबेव त्रैष्टुभम्। जगत्येव जागतम्। तथा समासविधेः [7]तयप्प्रत्ययान्तस्य स्त्रीनपुंसकोभयलिङ्गत्वं दृश्यते। यथा—'अतद्द्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे' (नैषध. १. २३)। 'स्तनद्वयं चारु तथा प्रवृद्धम्' (कु. सं. १. ४०)। 'जगत्त्रयीपण्डितमण्डितैषा सभा न भूता न च भाविनी सा' (नैषध. १०. ७१)। 'भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्' (नैषध. २. १८) इत्यादि। अथ नियतलिङ्गाः—वेदाः प्रमाणम्। स्मृतयः प्रमाणम्। तन्मे प्रमाणं शिवः। प्रमाणमियं ब्रह्माणि। गमने मङ्गलं ब्राह्मणाशिषः। विप्राशिषो भद्रमित्यादिकमनेकमिह[8] शब्दराशेर्निबन्द्धुमशक्यतया सामान्यतः प्रकृतिप्रत्ययमुखेनैव चिरंतनशिष्टानुशिष्टप्रबन्धपरिशीलिना च नामलिङ्गानि परिज्ञातव्यानीत्युपदेशः नामलिङ्गानुशासनप्रभेद एवेति तदुक्तिप्रतिज्ञाया न काचिद् व्याहतिः। किंतु संपूर्णतैव निर्व्यूढेत्यभिप्रायः॥ ४६॥

[1] शब्दा नानार्थवाचकत्वेनोक्ताः Tj2. [2] विद्यमानमपि Tj1. [3] नाख्यातम् Gm3. [4] Tj1, Tj2 add अव्ययवर्गेऽपि अव्ययानां तदर्थानां च साकल्यं नैव दृश्यते. [5] भिदिः, छिदिः; पचतिः, पठतिः (काशिका १, पृ. २२३). [6] स्वार्थे कप्रत्ययानामपकर्षे केषांचित् . . . B5, B6. [7] 'संख्याया अवयवे तयप्'। 'द्वित्रिभ्यां तयस्यायज्वा'. [8] इह बहुज्ञैरुदाहर्तव्यम् Gm3.

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
तृतीयकाण्डः सामान्यः साङ्ग एव समर्थितः ।।

निगदव्याख्यानमेतत् ।

व्याचष्टामरसिंहोक्ते नामलिङ्गानुशासने ।
बोम्मगण्टचप्पयाचार्यो वर्गं लिङ्गादिसंग्रहम् ।।
इह यत् त्यक्तमज्ञानादालस्याद् यदुपेक्षितम् ।
प्रमादादन्यथोक्तं यद् विद्वद्भिस्तद् विशोध्यताम् ।।

Additional verses in Gm1, Gm3.

आद्यो वेदविदां कणादकपिलव्यासाहिराडङ्घ्रिद्-
ग्जैमिन्यादिसमष्टिमूर्तिरवधिः स्मार्तक्रियावेदिनाम् ।
व्याचष्टामरसिंहनाथरचितं ग्रन्थं निघण्टूत्तमं
ख्यातं शिष्यहितार्थमप्पयसुधीः श्रीमारपोताभिधः ।।
रेचर्लवंशसंभूतेरास्थान्यां शिङ्गभूपतेः ।
बोम्मगण्ड्यप्पयाचार्यमूर्त्या जागर्ति शारदा ।।
कुमारशिङ्गभूपेन लक्ष्यलक्षणवेदिना ।
शोधितश्चेदयं ग्रन्थः किं शोध्यं शोधकान्तरैः ।।
कुमारशिङ्गभूपेन यः कदापि न शोधितः ।
स ग्रन्थः शोधितोऽप्यन्यैः किं बुधैर्व्यवह्रियते ।।
काव्यालंकारनानार्थतत्त्वभावितमानसः ।
कुमारशिङ्गभूपाल एक एवास्ति नापरः ।।
कुमारशिङ्गभूपालकृतयस्तस्य नित्यशः ।
एधयन्ति मुदं दृष्टा दृष्टान्ताकृतिनः परम् ।।
जैवातृकं बुधगुरुं निलयं कलानां
सर्वज्ञमूर्धमणिमाश्रितशुद्धपक्षम् ।
श्रीबोम्मकण्ठचुपपदाङ्कितमप्ययार्यं
सर्वेष्टितोषितसुरं द्विजराजमाहुः ।।
व्याख्यद् यो गौतमीयं कणभु . . . शास्त्रं समस्तं
येन व्याकारि भाष्यं फणिपतिगदितं कैयटं वीक्ष्य . . ।

. . यत्नप्रयोगः शबरमुनिमतं व्याकृतं द्विप्रभेदं
व्याकर्ता व्यासवाचां स जयति भुवने बोम्मगण्टचप्पयार्यः ॥

The scribe adds:

श्रीबोम्मकण्ठचप्पयवाक्यवृत्ति
संजीवनीं संसदि शाब्दिकानाम् ।
मत्वा तदीयामरसिंहटीकां
पतञ्जलिः प्रौढमुखो लिलेख ॥
सौम्यनामसंवत्सर वैशाख शु. सोमवारं वरकु व्रासिनेनु.

(पा.) षट्संज्ञकास्त्रिषु समाः । षट्संज्ञकाः शब्दाः त्रिलिङ्गेषु समाः सरूपाः । पञ्च नराः । पञ्च स्त्रियः । कति नराः । कति स्त्रियः । युष्मदस्मत्तिङव्ययम् । युष्मदादयः त्रिलिङ्ग्यां सरूपाः । त्वं पुमान् । त्वं स्त्री । त्वमपत्यम् । अहं पुमान् । अहं स्त्री । स गच्छति । सा गच्छति । स इव । सेव ॥ परं विरोधे । पूर्वलिङ्गपरलिङ्गयोः विप्रतिषेधे परलिङ्गं ग्राह्यम् । द्व्यहः । त्र्यहः । 'अदन्तैर्द्विगुरेकार्थः' (पृ. ६५६, श्लो. ३) इति स्त्रीलिङ्गं न भवति ॥ पुण्याहम्, सुदिनाहम् । 'अह्नाहान्ताः' (पृ. ६८४, श्लो. १२) इति पुंलिङ्गं न भवति ॥ शेषं तु ज्ञेयं शिष्टप्रयोगतः । अनुक्तशेषलिङ्गानि शिष्टप्रयोगाद् बोध्यानि । तथा चोक्तम्——

'वक्ता वाचस्पतिर्यत्र श्रोता शक्रस्तथापि तौ ।
शब्दपारायणस्यान्तं न गतौ तत्र के वयम्' ॥

इति श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचिते
अमरपदपारिजाते लिङ्गादिसंग्रहवर्गः
श्रीवत्सान्वयमान्येन मल्लिनाथेन निर्मिते ।
व्याख्यानेऽमरसिंहस्य तृतीयः काण्ड उम्भितः ॥
वामां वामाङ्कभूपामधरमधुसुधां याचिते पुष्टिराजे
रत्नैरापूर्णकुम्भं मम दिशसि यदि त्वं गृहाणेत्यवादीत् ।
नेत्येवं तां ब्रुवाणे जठरफणिपतेर्दर्शमात्रे स तस्मिन्
केशीभारं मयूरं गतवति च सदा सान्त्वयन् वः पुनातु ॥

पद्मानि बोधयत्यर्कः काव्यानि कुरुते कविः ।
तत्सौरभं नभस्वांश्च सन्तो जानन्ति तद्गुणान् ॥
कवेरमरसिंहस्य कृतिरेषा सुनिर्मला ।
आचन्द्रतारकं स्थेयान्नामलिङ्गानुशासनम् ॥
प्रागल्भ्यं प्रकटीकृतं पदकलाकूपारपारीणधी-
गन्धाढ्यैर्बुधसिन्धुरैरमरकृद्भावार्थजात्यन्धकैः ।
तैः किं नो जगतीतले विधिवचोलीलासुधीः . . .
जानीते नितरां स एव तदनु श्रीमल्लिनाथः स्वयम् ॥

अमरकोशः समाप्तः